অর্থাৎ

এতদ্দেশস্থসমস্তকোষাশেষশাস্ত্রসঙ্কলিতাকারাদিবর্ণক্রমবিন্যস্তশব্দতল্লিঙ্গ-
নানার্থপর্য্যায়প্রমাণপ্রয়োগধাতুতদনুবন্ধাভিধেয়সহিততত্তচ্ছব্দ-
প্রসঙ্গোত্থিতবেদবেদাঙ্গবেদান্তন্যায়পুরাণেতিহাসসঙ্গীত-
শিল্পসূপকারশাস্ত্রজ্যোতিষতন্ত্রাখ্যানকাব্যালঙ্কার-
চ্ছন্দঃপ্রভৃতিনামলক্ষণোদাহরণদ্রব্যগুণরোগ-
নিদানৌষধস্মৃত্যুক্তব্যবস্থাদিসংযুক্তসর্ব্ব-
দর্শনমতানুসারিসংস্কৃতাভিধানগ্রন্থঃ

স্যার রাজরাধাকান্তবাহাদুরেণ

বিরচিতঃ

শ্রীযুতকুমারউপেন্দ্রকৃষ্ণদেববাহাদুরস্যানুকূল্যেন

শ্রীবরদাকান্তমিত্রপ্রভৃতিভিঃ

পুনঃপ্রকাশিতঃ।

তৃতীয়ঃ কাণ্ডঃ।

কলিকাতারাজধান্যাং

নূতনবাঙ্গালাযন্ত্রে শ্রীসারদাপ্রসাদচট্টোপাধ্যায়েন

মুদ্রিতঃ।

সংবৎ—১৯৩২।

CALCUTTA:

PRINTED BY S. E. CHATTERJEE

AT THE NEW BENGAL PRESS.

প

প. পকারঃ। স তু পঞ্চমবর্গস্য প্রথমো ব্যঞ্জন-স্যৈকবিংশতিতমো বর্ণঃ। অস্যোচ্চারণস্থানং ওষ্ঠঃ। ইতি ব্যাকরণং ॥ তৎপর্য্যায়ঃ। লোহিতঃ ২ পার্শ্বঃ ৩ শূরঃ ৪। ইতি রুদ্রযামলে বর্ণাভিধানং ॥ অস্য তত্ত্বং যথা। অতঃ পরং প্রবক্ষ্যামি পকারাক্ষরমব্যয়ং। চতুর্ব্বর্গপ্রদং বর্ণং শরচ্চন্দ্রসমপ্রভং ॥ পঞ্চদেবময়ং বর্ণং স্বয়ং পরমকুণ্ডলী। পঞ্চপ্রাণময়ং বর্ণং ত্রিশক্তিসহিতং সদা॥ ত্রিগুণাবহিতং বর্ণমাত্মাদিতত্ত্বসংযুতং। মহামোক্ষপ্রদং বর্ণং হৃদি ভাবয় পার্ব্বতি ॥ ইতি কামধেনুতন্ত্রে ৫ পটলঃ॥ অস্য লেখনক্রমো যথা। কুঞ্চিতা বামরেখায়াঃ কোণাদ্দক্ষিণতোঽপরা। কুঞ্চিতা সাপি বিজ্ঞেয়া মাত্রা বামোদ্গতা তথা॥ শম্ভুর্ব্রহ্মা ভগবতী ক্রমশস্তাসু তিষ্ঠতি। ইতি বর্ণোদ্ধারতন্ত্রং ॥ অস্যোৎপত্তিপ্রকারো যথা। ঋটুরেফষকারশ্চ মূর্দ্ধগো দন্তগস্তথা। ৯তবর্গলসানোষ্ঠ্যানুপূপধ্মানসংজ্ঞকান্ ॥ ইতি প্রপঞ্চসারঃ॥ তস্য ধ্যানং যথা। বিচিত্রবসনাং দেবীং দ্বিভুজাং পঙ্কজেক্ষণাং। রক্তচন্দনলিপ্তাঙ্গীং পদ্মমালাবিভূষিতাং ॥ মণিরত্নাদিকেয়ূরহারভূষিতবিগ্রহাং। চতুর্ব্বর্গপ্রদাং নিত্যাং নিত্যানন্দময়ীং পরাং ॥ এবং ধ্যাত্বা পকারস্তু তন্মন্ত্রং দশধা জপেৎ। ইতি বর্ণোদ্ধারতন্ত্রং ॥ * ॥ তস্য নামানি যথা। পঃ পুরপ্রিয়তা তীক্ষ্ণা লোহিতঃ পঞ্চমো রমা। গুহ্যকর্ত্তা নিধিঃ শেষঃ কালরাত্রিঃ সুবাহিতা ॥ তপনঃ পালনঃ পাতা পদ্মরেণুর্নিরঞ্জনঃ। সাবিত্রী পাতিনী পানং বীরতন্ত্রো ধনুর্দ্ধরঃ॥ দক্ষপার্শ্বশ্চ সেনানী মরীচিঃ পবনঃ শনিঃ। উড্ডীশং জয়িনী কুম্ভোহলসং রেখা চ মোহকঃ॥ মূলা দ্বিতীয়মিন্দ্রাণী লোকাক্ষী মন আত্মনঃ। ইতি নানাতন্ত্রশাস্ত্রং ॥

পঃ (পুং) পবনঃ। পর্ণং। পানং। পাতা। ইত্যেকাক্ষরকোষঃ॥

পক্কণঃ (পুং ক্লী) শবরালয়ঃ। ইত্যমরঃ॥

পক্কপৌড়ঃ (পুং) বৃক্ষবিশেষঃ। পখৌড়া ইতি হিন্দী ভাষা। তৎপর্য্যায়ঃ। পঞ্চকৃত্যঃ ২ বর্দ্ধনঃ ৩ পঞ্চরক্ষকঃ ৪। অস্য গুণাঃ। দৃষ্ট্যঞ্জনবিধৌ শস্তত্বং। কটুত্বং। জীর্ণজ্বরাপহত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

পক্তা [ঋ] (ত্রি) পাককর্ত্তা। পচধাতোঃ কর্ত্তরি তৃণ্‌ নিষ্পন্নঃ। ইতি ব্যাকরণং॥ অগ্নৌ পুং। যথা। অন্নস্রষ্টা চ পক্তা চ পচভোক্তা পচে নমঃ। ইত্যাগ্নেয়ে ২ অধ্যায়ঃ॥

পক্তিঃ (স্ত্রী) গৌরবং। পাকঃ। ইতি মেদিনী॥

পক্তিশূলং (ক্লী) পরিণামশূলং। তৎপর্য্যায়ঃ। পাকজং ২ পরিণামজং ৩। ইতি রাজনির্ঘণ্টঃ॥

পক্তৃং (ক্লী) গার্হপত্যাগ্নিঃ। ইত্যুণাদিকোষঃ॥

পক্ত্রিমং (ত্রি) পাকিমং। পাকাজ্জাতং। ইতি ত্রিকাণ্ডশেষঃ॥

পক্কং (ক্লী) স্বিন্নতণ্ডুলাদি। তত্র পাকস্য বিধিনিষেধাদির্যথা। পূর্ব্বাশাভিমুখো ভূত্বা উত্তরাশামুখেন বা। পচেদন্নঞ্চ মধ্যাহ্নে সায়াহ্নে চ বিবর্জ্জয়েৎ॥ অগ্ন্যাশাভিমুখে পক্ত্বা অমৃতান্নং বিজানীহি। পূর্ব্বমুখো ধর্ম্মকামঃ শোকহানিশ্চ দক্ষিণে॥ শ্রীকামশ্চোত্তরমুখো পতিকামশ্চ পশ্চিমে। ঐশান্যাভিমুখে পক্ত্বা দরিদ্রো জায়তে নরঃ॥ *॥ যদা তু আয়সে পাত্রে পক্কমশ্নাতি বৈ দ্বিজঃ। স পাপিষ্ঠোঽপি ভুঙ্‌ক্তেঽন্নং রৌরবে পরিপচ্যতে॥ তাম্রে পক্ত্বা চক্ষুর্হানির্ম্মণৌ ভবতি বৈ ক্ষয়ং। স্বর্ণপাত্রে তু যৎ পক্কং অমৃতং তদপি স্মৃতং॥ *॥ পিতৃভ্যাং পক্কমন্নঞ্চ পিতৃব্যেণ যশস্বিনি। পুণ্ডরীকস্য যজ্ঞস্য লভতে ফলমীপ্সিতং॥ বাতুলেন তু যৎ পক্কং ভগিন্যা চ কনিষ্ঠয়া। অসগোত্রেণ যৎ পক্কং শোণিতং তদপি স্মৃতং। অভক্তেন চ যৎ পক্কং স্ত্রিয়া পক্কং তথৈব চ। পক্কপাত্রে চ যৎ পক্কং তৎ সর্ব্বং নিষ্ফলং ভবেৎ॥ *॥ উড়ুম্বরেণ কাষ্ঠেন কদম্বস্য দলেন চ। শালেন করমর্দ্দেন উদরাবর্ত্তকেন চ॥ পক্কান্নং নৈব ভুঞ্জীত ভুক্ত্বা রাত্রিমুপাবসেৎ। গর্হিতান্নমবীরান্নং ভুক্ত্বা কৃচ্ছ্রং সমাচরেৎ॥ অপ্রজা যা তু বনিতা [illegible]দেব তদ্‌গৃহে। *। শালকাষ্ঠস্য পক্কান্নং শিরীষকস্য চৈব হি। কলিচণ্ডাতকস্যৈব বজ্রাবারুণকস্য চ। ভেরণ্ডশাল্মলৈর্ব্বাপি পক্কান্নং গর্হিতং স্মৃতং॥ *॥ যদা মৃণ্ময়পাত্রে তু পক্কং বৈ সার্ব্বকালিকং। মাসে পক্ষে তথাষ্টৌ চ তৎ পাত্রং বিসৃজেদ্‌গৃহী॥ *॥ ধনুঃপাকে তথা সিংহে মিথুনে বা বরাননে। যঃ কুর্য্যাদ্ভোজনং দেবি কৃচ্ছ্রেণৈব বিশুদ্ধ্যতি॥ *॥ একদা তু জলং দদ্যাৎ দ্বিবারং ন প্রদীপয়েৎ। ত্রিভাগং পূরয়েৎ পাত্রং পশ্চাত্তোয়ং ন দাপয়েৎ॥ ইতি॥ *॥ মোদকং কন্দুপক্কঞ্চ গব্যাঢ্যং ঘৃতসংযুতং। পুনঃ পুনর্ভোজনে চ পুনরন্নং ন দুষ্যতি॥ ইতি চ মৎস্যসূক্তে মহাতন্ত্রে ৪২ পটলঃ॥

পক্কং (ত্রি) পরিণতং। পাকা ইতি ভাষা। নিষ্ঠাং প্রাপ্তং। সুদৃঢ়মিতি যাবৎ। যথা পরিণতা বুদ্ধিঃ। বিনাশোন্মুখং। প্রত্যাসন্নবিনাশং। অতিপক্কব্যঞ্জনদশমূলাদৌ নিষ্পক্কং কথিতঞ্চ। ক্ষীরাজ্যপয়সাং পাকে শৃতং। ঈষৎপক্কে আপক্কং। ইত্যমরভরতৌ॥

পক্ককৃৎ (পুং) নিম্ববৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥ পাককর্ত্তরি ত্রি॥

পক্করসঃ (পুং) মদ্যং। ইতি শব্দরত্নাবলী॥

পক্কবারি (ক্লী) কাঞ্জিকং। ইতি শব্দচন্দ্রিকা॥ পক্ববারি ইত্যপি পাঠঃ। পক্কজলঞ্চ॥

পক্কান্নং (ত্রি) কৃতপাকতণ্ডুলাদি। যথা। আমং শূদ্রস্য পক্কান্নং পক্কমুৎসৃষ্টমুচ্যতে। ইতি তিথিতত্ত্বং॥

পক্কাশয়ঃ (পুং) নাভ্যধোভাগঃ। ইতি রাজনির্ঘণ্টঃ॥ পক্কাশয়স্ত্বধো নাভেরূর্দ্ধমামাশয়ঃ স্মৃতঃ। ইতি বৈদ্যকং॥

পক্কঃ (পুং ক্লী) কর্দ্দমঃ। পাঁক্ ইতি ভাষা।

পাপং । ইত্যমরঃ ॥ পূর্ব্বস্য গুণাঃ । পিত্তাস্রদাহনাশিত্বং । ভগ্নক্ষয়হিতত্বং । হিমত্বঞ্চ । ইতি রাজবল্লভঃ ॥ শোথঘ্নত্বং । সরত্বঞ্চ । ইতি ভাবপ্রকাশঃ ॥

পঙ্ককর্ব্বটঃ (পুং) জলযুক্তপঙ্কং । যথা । চুলুকো ঘনজম্বালে দলাঢ্যে পঙ্ককর্ব্বটঃ । ইতি ত্রিকাণ্ডশেষঃ ॥

পঙ্ককীরঃ (পুং) কোযষ্টিপক্ষী । ইতি ত্রিকাণ্ডশেষঃ ॥

পঙ্কক্রীড়ঃ (পুং) শূকরঃ । ইতি কশ্চিৎ ॥ কর্দ্দমখেলকে ত্রি ॥

পঙ্কগড়কঃ (পুং) মৎস্যবিশেষঃ । পাঁকাল ইতি ভাষা । তৎপর্য্যায়ঃ । ব্রহ্মী ২ । ইতি ত্রিকাণ্ডশেষঃ ॥

পঙ্কগতিঃ (স্ত্রী) পঙ্কগড়কমৎস্যঃ । ইতি শব্দমালা ॥

পঙ্কগ্রাহঃ (পুং) মকরঃ । ইতি হারাবলী ॥

পঙ্কজং, পঙ্কজন্ম [ন্] (ক্লী) পদ্মং । ইতি রাজনির্ঘণ্টঃ ॥

পঙ্করুট্ [হ্], পঙ্করুহং (ক্লী) পদ্মং । ইতি রাজনির্ঘণ্টঃ ॥

পঙ্কজিনী (স্ত্রী) পদ্মসমূহঃ । পদ্মাকরঃ । ইতি রত্নমালা হেমচন্দ্রশ্চ ॥

পঙ্কণঃ (পুং) পক্কণঃ । শবরালয়ঃ । ইতি শব্দরত্নাবলী ॥

পঙ্কপ্রভা (স্ত্রী) কর্দ্দমযুক্তনরকবিশেষঃ । ইতি হেমচন্দ্রঃ ॥

পঙ্কমণ্ডূকঃ (পুং) শম্বূকঃ । ইতি হারাবলী ॥

পঙ্কবাসঃ (পুং) কর্কটঃ । ইতি রাজনির্ঘণ্টঃ

পঙ্কশুক্তিঃ (স্ত্রী) দুর্নামা । ঝিনুক্ ইতি ভাষা । ইতি হারাবলী ॥

পঙ্কশূরণঃ (পুং) শালূকঃ । ইতি ত্রিকাণ্ডশেষঃ ॥

পঙ্কারঃ (পুং) শৈবলঃ । সেতুঃ । সোপানং । জলকুব্জকঃ । ইতি মেদিনী ॥

পঙ্কিলঃ (ত্রি) সকর্দ্দমঃ । তৎপর্য্যায়ঃ । সজম্বালঃ ২ । ইত্যমরঃ ॥ পঙ্কযুক্তঃ ৩ । ইতি শব্দরত্নাবলী ॥ কর্দ্দমান্বিতঃ ৪ । ইতি জটাধরঃ ॥

পঙ্কেজং (ক্লী) পদ্মং । ইতি ত্রিকাণ্ডশেষঃ ॥

পঙ্কেরুহং (ক্লী) পদ্মং । সারসপক্ষিণি পুং । ইত্যমরঃ

পঙ্‌ক্তিঃ (স্ত্রী) সজাতীয়সংস্থানবিশেষঃ । শারি ইতি পাঁতি ইতি চ ভাষা । তৎপর্য্যায়ঃ । বীথী ২ আলিঃ ৩ আবলিঃ ৪ শ্রেণী ৫ । ইত্যমরঃ ॥ বীথিঃ ৬ আলী ৭ আবলী ৮ পঙ্‌ক্তী ৯ শ্রেণিঃ ১০ । ইতি ভরতঃ ॥ শরণিঃ ১১ সন্ততিঃ ১২ । ইতি জটাধরঃ ॥ বিণ্ডোলী ১৩ পালিঃ ১৪ পালী ১৫ বীথিকা ১৬ । ইতি শব্দরত্নাবলী ॥ * ॥ পঞ্চাক্ষরপাদচ্ছন্দোবিশেষঃ । তস্য লক্ষণং যথা । ভেপৌগিতি পঙ্‌ক্তিঃ ॥ উদাহরণং যথা । কৃষ্ণসনাথা তর্ণকপঙ্‌ক্তিঃ । যামুনকচ্ছে চারু চচার ॥ ইতি ছন্দোমঞ্জরী ॥ দশাক্ষরপাদচ্ছন্দঃ । দশসংখ্যা । ইতি মেদিনী ॥ পৃথিবী । ইতি শব্দমালা ॥ গৌরবং । পাকঃ । ইতি হেমচন্দ্রঃ ॥ * ॥ অথ পঙ্‌ক্তিসাঙ্কর্য্যদোষাঃ যথা । ন সংবসেচ্চ পতিতৈর্ন চাণ্ডালৈর্ন

পুক্কশৈঃ। ন মূর্খৈর্নাবলিপ্তৈশ্চ নান্ত্যৈ-র্নান্ত্যাবসায়িভিঃ॥ একশয্যাসনং পঙ্‌ক্তি-ভাণ্ডপক্কান্নমিশ্রণং। যাজনাধ্যাপনে যোনি-স্তথৈব সহ ভোজনং॥ সহাধ্যায়স্তু দশমঃ সহযাজনমেব চ। একাদশ সমু-দ্দিষ্টা দোষাঃ সাঙ্কর্য্যসঙ্গিতাঃ॥ সমীপে চাপ্যবস্থানাৎ পাপং সংক্রমতে নৃণাং। তস্মাৎ সর্ব্বপ্রযত্নেন সাঙ্কর্য্যং পরিবর্জ্জ-য়েৎ॥ * ॥ পঙ্‌ক্তিসাঙ্কর্য্যদোষনিবারণো-পায়া যথা। একপঙ্‌ক্ত্যুপবিষ্টা যে ন স্পৃশন্তি পরস্পরং। ভস্মনা ক্রমমর্য্যাদা ন তেষাং সঙ্করো ভবেৎ॥ অগ্নিনা ভস্মনা চৈব ষড়্‌ভিঃ পঙ্‌ক্তির্বিভিদ্যতে। ইতি কূর্ম্মে ১৫ অধ্যায়ঃ॥

পঙ্‌ক্তিগ্রীবঃ (পুং) রাবণঃ। ইতি শব্দরত্না-বলী॥

পঙ্‌ক্তিচরঃ (পুং) কুররপক্ষী। ইতি রাজ-নির্ঘণ্টঃ॥

পঙ্‌ক্তিদূষকঃ (পুং) অপাঙ্‌ক্তেয়ঃ। শ্রাদ্ধ-ভোজনানর্হব্রাহ্মণঃ। যথা। অপাঙ্‌ক্তেয়া-স্তু যে রাজন্ কীর্ত্তয়িষ্যামি তান্ শৃণু। কিতবো ভ্রূণহা যক্ষ্মী পশুপালো নিরা-কৃতিঃ॥ গ্রামপ্রেষ্যো বার্দ্ধুষিকো গায়নঃ সর্ব্ববিক্রয়ী। অগারদাহী গরদঃ কুণ্ডাশী সোমবিক্রয়ী॥ সামুদ্রিকো রাজদূত-স্তৈলিকঃ কূটকারকঃ। পিত্রা বিবদমানশ্চ যস্য চোপপতির্গৃহে॥ অভিশস্তস্তথা স্তেনঃ শিল্পং যশ্চোপজীবতি। পর্ব্বকারশ্চ শূচী চ মিত্রধ্রুক্ পারদারিকঃ॥ অব্রতানা-মুপাধ্যায়ঃ কাণ্ডপৃষ্ঠস্তথৈব চ। শ্বভিশ্চ যঃ পরিক্রামেদযঃ শুনা দষ্ট এব চ॥ পরি-বৃত্তিস্তু যশ্চ স্যাদ্দুশ্চর্ম্মা গুরুতল্পগঃ। কুশী-লবো দেবলকো নক্ষত্রৈর্যশ্চ জীবতি॥ ঈদৃশা ব্রাহ্মণা যে চ আপঙ্‌ক্তেয়াস্তু তে মতাঃ। রক্ষাংসি গচ্ছন্তে হব্যং যদেষাস্তু প্রদীয়তে॥ * ॥ শ্রাদ্ধে ভুক্ত্বা মহারাজ দুশ্চর্ম্মা গুরুতল্পগঃ। শ্রাদ্ধং নাশয়তে তস্য পিতরোঽপি ন ভুঞ্জতে॥ সোম-বিক্রয়িণে দত্তং বিষ্ঠাতুল্যং ভবেন্নৃপ। ভিষজে শোণিতসমং নষ্টং দেবলকে তথা॥ অপ্রতিষ্ঠং বার্দ্ধুষিকে নিষ্ফলং পরিকীর্ত্তিতং। বহুবাণিজকে দত্তং নেহ নামুত্র তদ্ভবেৎ॥ ভস্মনীব হুতং হব্যং তথা পৌনর্ভবে দ্বিজে। যে তু ধর্ম্মব্যপে-তেষু চরিত্রাপগতেষু চ॥ হব্যং কব্যং প্রযচ্ছন্তি তেষাং তৎ প্রায় নশ্যতি। জ্ঞান-পূর্ব্বন্তু যে তেভ্যঃ প্রযচ্ছন্ত্যল্পবুদ্ধয়ঃ॥ পুরীষং ভুঞ্জতে তস্য পিতরঃ প্রেত্য নিশ্চিতং। এতান্ বিদ্ধি মহাবাহো অপা-ঙ্‌ক্তেয়ান্ দ্বিজাধমান্॥ শূদ্রাণামুপদেশন্তু যে কুর্ব্বন্ত্যল্পবুদ্ধয়ঃ। ষষ্টিং কাণঃ শতং খঞ্জঃ শ্বিত্রী যাবৎ প্রপশ্যতি। পঙ্‌ক্ত্যাং সমুপবিষ্টায়াং তাবদ্দূষয়তে নৃপ॥ যদ্-বেষ্টিতশিরা ভুঙ্‌ক্তে যদ্ভুঙ্‌ক্তে দক্ষিণামুখঃ। সোপানৎকশ্চ যদ্ভুঙ্‌ক্তে সর্ব্বং বিদ্যা-ত্তদাসুরং॥ অসূয়তে চ যদ্দত্তং যচ্চ শ্রদ্ধাদিবর্জ্জিতং। সর্ব্বং তদসুরেন্দ্রায় ব্রহ্মা ভাগমকল্পয়ৎ॥ শ্বানশ্চ পঙ্‌ক্তি-দূষাশ্চ নাবেক্ষেরন্ কথঞ্চন॥ * ॥ তস্মাৎ পরিবৃতে দদ্যাত্তিলাংশ্চান্নে বিকীরয়েৎ।

তিলৈর্বিরহিতং শ্রাদ্ধং কৃতং ক্রোধবশেন চ ॥ যাতুধানাঃ পিশাচাশ্চ বিপ্রলুম্পন্তি তদ্ধবিঃ। অপাঙ্‌ক্তেয়ানতঃ পঙ্‌ক্ত্যাং ভুঞ্জানো নমু পশ্যতি॥ তাবৎ ফলাদ্‌ভ্রংশয়তি দাতারং তস্য বানিশং। ইতি পাদ্মে স্বর্গখণ্ডে ৩৫ অধ্যায়ঃ॥

পঙ্‌ক্তিপাবনঃ (পুং) শ্রেণিপবিত্রকর্ত্তা। শ্রাদ্ধভোজনার্হব্রাহ্মণঃ। যথা। ইমে হি মনুজশ্রেষ্ঠ বিজ্ঞেয়াঃ পঙ্‌ক্তিপাবনাঃ। বিদ্যাবেদব্রতস্নাতা ব্রাহ্মণাঃ সর্ব্ব এব হি॥ সদাচারপরাশ্চৈব বিজ্ঞেয়াঃ পঙ্‌ক্তিপাবনাঃ। মাতাপিত্রোর্যশ্চ বশ্যঃ শ্রোত্রিয়ো দশ পূরুষঃ॥ ঋতুকালাভিগামী চ ধর্ম্মপত্নীষু যঃ সদা। বেদবিদ্যাব্রতস্নাতো বিপ্রঃ পঙ্‌ক্তিং পুনাত্যুত॥ অথর্ব্বশিরসোঽধ্যেতা ব্রহ্মচারী যতব্রতঃ। সত্যবাদী ধর্ম্মশীলঃ স্বকর্ম্মনিরতশ্চ যঃ॥ যে চ পুণ্যেষু তীর্থেষু অভিষেককৃতশ্রমাঃ। মখেষু চ সমস্তেষু ভবন্ত্যবভৃথপ্লুতাঃ॥ অক্রোধনা হ্যচপলাঃ ক্ষান্তা দান্তা জিতেন্দ্রিয়াঃ। সর্ব্বভূতহিতা যে চ শ্রাদ্ধেষ্বেতান্ নিমন্ত্রয়েৎ॥ এতেষু দত্তমক্ষয্যমেতে বৈ পঙ্‌ক্তিপাবনাঃ। যতয়ো মোক্ষধর্ম্মজ্ঞা যোগাঃ সুচরিতব্রতাঃ॥ যে চেতিহাসং প্রযতাঃ শ্রাবয়ন্তি দ্বিজোত্তমান্। যে চ ভাষ্যবিদঃ কেচিদ্‌যে চ ব্যাকরণে রতাঃ॥ অধীয়তে পুরাণং যে ধর্ম্মশাস্ত্রাণি চাপ্যুত। অধীত্য চ যথান্যায়ং বিধিবত্তস্য কারিণঃ॥ উপপন্নো গুরুকুলে সত্যবাদী সহস্রদঃ। অগ্র্যাঃ সর্ব্বেষু বেদেষু সর্ব্বপ্রবচনেষু চ॥ যাবদেতে প্রপশ্যন্তি পঙ্‌ক্ত্যাং তাবৎ পুনন্তি চ। ততো হি পাবনাৎ পঙ্‌ক্ত্যা উচ্যন্তে পঙ্‌ক্তিপাবনাঃ॥ অনৃত্বিগনুপাধ্যায়ঃ স চেদগ্রাসনং ব্রজেৎ। ঋত্বিগ্‌ভিরননুজ্ঞাতঃ পঙ্‌ক্ত্যা হরতি দুষ্কৃতং॥ অথ চেদ্বেদবিৎ সর্ব্বৈঃ পঙ্‌ক্তিদোষৈর্ব্বিবর্জ্জিতঃ। ন চ স্যাৎ পতিতো রাজন্ পঙ্‌ক্তিপাবন উচ্যতে॥ ইতি পাদ্মে স্বর্গখণ্ডে ৩৫ অধ্যায়ঃ॥

পঙ্‌ক্তিরথঃ (পুং) দশরথরাজঃ। ইতি শব্দরত্নাবলী॥ তথা চ। অযোধ্যায়াং মহারাজঃ পুরা পঙ্‌ক্তিরথো বলী। তস্যাত্মজো রামচন্দ্রঃ সর্ব্বশূরশিরোমণিঃ॥ ইতি পাদ্মে পাতালখণ্ডং॥

পঙ্‌ক্তিবীজঃ (পুং) বর্ব্বূরবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

পঙ্গুঃ (পুং) শনৈশ্চরঃ। ইতি শব্দমালা॥

পঙ্গুঃ (ত্রি) জঙ্ঘাবৈকল্যেন চলনাক্ষমঃ। তৎপর্য্যায়ঃ। শ্রোণঃ ২। ইত্যমরঃ॥ জঙ্ঘাহীনঃ ৩। ইতি শব্দরত্নাবলী॥ তস্য লক্ষণং খঞ্জশব্দে দ্রষ্টব্যং॥

পঙ্গুলঃ (পুং) সিতকাচাভঘোটকঃ। ইতি হেমচন্দ্রঃ॥

পঙ্গুল্যহারিণী (স্ত্রী) শিম্বড়ীক্ষুপঃ। ইতি রাজনির্ঘণ্টঃ॥

পচ ই ক ততৌ। ইতি কবিকল্পদ্রুমঃ॥ ততিরিহ বিস্তারবচনং। ই ক পঞ্চয়তি ধীরো গ্রন্থার্থং। ইতি দুর্গাদাসঃ॥

পচ ই ঙ ব্যক্তীকারে। ই পঞ্চ্যতে। ঙ পঞ্চতে স্বগুণং ভিক্ষুকঃ। ইতি দুর্গাদাসঃ॥

পচ ঙ ঔ ব্যক্তীকারে। ইতি কবিকল্পদ্রুমঃ॥ ঔ পক্তা। ঙ পচতে স্বগুণং ভিক্ষুকঃ। ইতি দুর্গাদাসঃ॥

পচ ডু ঞ ঔ ষ পাকে। ইতি কবিকল্পদ্রুমঃ॥ পাকো বিক্লিত্যনুকূলব্যাপারঃ। ডু পক্ত্রিমং। ঞ পচতি পচতে তণ্ডুলা-নোদনং লোকঃ। ঔ পক্তা। ষ পচা। ইতি দুর্গাদাসঃ॥

পচঃ (ত্রি) পচতি যঃ। পাককর্ত্তা। ইতি ব্যাকরণং॥ স্বার্থে কে পচকশ্চ॥

পচতঃ (পুং) সূর্য্যঃ। অগ্নিঃ। ইন্দ্রঃ। ইত্যু-ণাদিকোষঃ॥

পচতিকল্পং (ক্লী) ঈষদূনস্য পাকস্য কর্ত্তা। ইতি ব্যাকরণং॥

পচৎপুটঃ (পুং) সূর্য্যমণিবৃক্ষঃ। ইতি শব্দ-চন্দ্রিকা॥

পচন্ [ৎ] (ত্রি) পাককর্ত্তা। ইতি ব্যা-করণং॥

পচনং (ক্লী) পাকঃ। ইতি পচধাতোর্ভাবে অনট্॥

পচনঃ (পুং) অগ্নিঃ। ইতি শব্দচন্দ্রিকা॥ পাককর্ত্তরি ত্রি॥

পচনী (স্ত্রী) বনবীজপূরকঃ। ইতি রাজ-নির্ঘণ্টঃ॥

পচন্তী (স্ত্রী) পাককর্ত্রী। ইতি ব্যাক-রণং॥

পচমানঃ (ত্রি) পাককর্ত্তা। ইতি ব্যাক-রণং॥

পচম্পচা (স্ত্রী) দারুহরিদ্রা। ইত্যমরঃ॥

পচা (স্ত্রী) পাকঃ। ইত্যমরঃ॥

পচিঃ (পুং) অগ্নিঃ। ইতি ত্রিকাণ্ডশেষঃ॥ পচধাতুঃ পচনঞ্চ। ইতি সংক্ষিপ্তসার-ব্যাকরণং॥

পচেলিমঃ (পুং) সূর্য্যঃ। অগ্নিঃ। ইত্যুণাদি-কোষঃ॥ কর্ত্তুরনায়াসেন স্বয়ং পক্কে ত্রি। যথা। পচেলিমাস্তণ্ডুলাঃ। ইতি মুগ্ধবোধ-ব্যাকরণং

পচেলুকঃ (পুং) সূদঃ। পাচকঃ। ইতি ত্রিকাণ্ডশেষঃ॥

পচ্ছঃ [স্] ব্য পাদং পাদং। ইতি সংক্ষিপ্ত-সারব্যাকরণং

পচ্যমানঃ (ত্রি) বর্ত্তমানপচনকর্ম্মতাশ্রয়ঃ। বর্ত্তমানপাকবিশিষ্টতণ্ডুলাদি। ইতি ব্যা-করণং

পজ ই রোধে। ইতি কবিকল্পদ্রুমঃ॥ রোধ আবরণং। পঞ্জরঃ। সৌত্রধাতুরয়ং। ইতি দুর্গাদাসঃ॥

পজ্জঃ (পুং) শূদ্রঃ। ইতি হেমচন্দ্রঃ॥

পজ্ঝটিকা (স্ত্রী) ছন্দোবিশেষঃ। তল্লক্ষণং যথা। প্রতিপদযমকিতষোড়শমাত্রা নবম-গুরুত্ববিভূষিতগাত্রা। পজ্ঝটিকা পুনরত্র বিবেকঃ ক্বাপি ন মধ্যগুরুর্গণ একঃ॥ উদাহরণং যথা। তরলবতংসাশ্লিষ্টস্কন্ধ-শ্চলতরপজ্ঝটিকাকটিবন্ধঃ। মৌলিচপল-শিখিচন্দ্রকবৃন্দঃ কালিয়শিরসি ননর্ত্ত মুকুন্দঃ॥ ইতি ছন্দোমঞ্জর্য্যাং মাত্রা-বৃত্তাখ্যঃ ৫ স্তবকঃ॥ * ॥ ক্ষুদ্রঘণ্টিকা। ইতি তন্ত্রীকা॥

পঞ্চ [ন্] (ত্রি) সংখ্যাবিশেষঃ। পাঁচ ইতি ভাষা। বহুবচনান্তোঽয়ং। ইত্যুণাদিকোষঃ॥

তদ্বাচকানি যথা। পাণ্ডবঃ ১ শিবাস্যং ২ ইন্দ্রিয়ং ৩ স্বর্গঃ ৪ ব্রতাগ্নিঃ ৫ মহাপাপং ৬ মহাভূতং ৭ মহাকাব্যং ৮ মহামখঃ ৯ পুরাণলক্ষণং ১০ অঙ্গং ১১ প্রাণাঃ ১২ বর্গঃ ১৩ ইন্দ্রিয়ার্থঃ ১৪ বাণঃ ১৫। ইতি কবিকল্পলতা॥ পঞ্চসংখ্যাবিশিষ্টে ত্রি। যথা। সংখ্যাসংখ্যেয়ে হ্যাদশ ত্রিষু। ইত্যমরঃ॥

পঞ্চকং (ত্রি) পঞ্চ। যথা। সংখ্যাদিপঞ্চকং কালদিশোঃ শব্দশ্চ তে চ খে। ইতি ভাষাপরিচ্ছেদঃ॥

পঞ্চকপালঃ (পুং) পঞ্চসু কপালেষু সংস্কৃতঃ পুরোডাশঃ। স তু যজ্ঞবিশেষঃ। যথা। পরা বা এষ যজ্ঞং পশূন্ বপতি যোঽগ্নিমুদ্বাসয়তে পঞ্চকপালঃ পুরোডাশো ভবতি। ইত্যাদি যজুর্বেদীয়শ্রুতিঃ॥ কপালপঞ্চকে ক্লী॥

পঞ্চকর্ম্ম [ন্] (ক্লী) পঞ্চপ্রকারশারীরিকচিকিৎসাবিশেষঃ। যথা। বমনং রেচনং নস্যং নিরূহশ্চানুবাসনং। পঞ্চকর্ম্মেদমন্যচ্চ কর উৎক্ষেপণাদিকং॥ ইতি শব্দচন্দ্রিকা॥

পঞ্চকষায়ঃ (পুং) মহাস্নানীয়পঞ্চপ্রকারকষায়দ্রব্যং। যথা। জম্বুশাল্মলিবাট্যালং বকুলং বদরং তথা। কষায়াঃ পঞ্চ বিজ্ঞেয়া দেব্যাঃ প্রীতিকরাঃ শুভাঃ॥ ইতি দুর্গোৎসবপদ্ধতিঃ॥

পঞ্চকৃত্যঃ (পুং) পক্তপৌড়বৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

পঞ্চকোলং (ক্লী) পাচনবিশেষঃ। যথা। পঞ্চকোলং কণামূলং কৃষ্ণাচব্যাগ্নিনাগরৈঃ। ইতি শব্দচন্দ্রিকা॥ অস্য গুণাঃ। পঞ্চকোলং রসে পাকে কটুকং রুচিকৃন্মতং। তীক্ষ্ণোষ্ণং পাচনং শ্রেষ্ঠং দীপনং কফবাতনুৎ॥ গুল্মপ্লীহোদরানাহশূলঘ্নং পিত্তকোপনং। ইতি ভাবপ্রকাশঃ॥ অপি চ। পিপ্পলী পিপ্পলীমূলং চব্যচিত্রকনাগরং। দীপনীয়ঃ শৃতো বর্গঃ কফানিলগদাপহঃ॥ ইতি চক্রপাণিদত্তঃ॥

পঞ্চকোষাঃ (পুং) কোষা ইবাত্মাচ্ছাদকত্বেন কোষাঃ। তে চ পঞ্চবিধাঃ। যথা। অন্নবিকারত্বাৎ স্থূলশরীরং অন্নময়কোষঃ ১॥ পঞ্চকর্ম্মেন্দ্রিয়সহিতপ্রাণপঞ্চকং প্রাণময়কোষঃ ২॥ পঞ্চজ্ঞানেন্দ্রিয়সহিতং মনঃ মনোময়কোষঃ ৩॥ পঞ্চজ্ঞানেন্দ্রিয়সহিতা বুদ্ধিঃ বিজ্ঞানময়কোষঃ ৪॥ অহঙ্কারাত্মকোঽবিদ্যাত্মকো বা আনন্দময়কোষঃ৫॥ ইতি শিবগীতামতং॥ * ॥ অপি চ। পিতৃভুক্তান্নজাদ্বীর্য্যাজ্জাতোঽন্নেনৈব বর্দ্ধতে। দেহঃ সোঽন্নময়ো নাত্মা প্রাক্ চোর্দ্ধং তদভাবতঃ॥ ইত্যন্নময়কোষঃ ১॥ পূর্ণো দেহে বলং যচ্ছন্নক্ষাণাং যঃ প্রবর্ত্তকঃ। বায়ুঃ প্রাণময়ো নাসাবাত্মা চৈতন্যবর্জ্জনাৎ॥ ইতি প্রাণময়কোষঃ ২॥ অহন্তাং মমতাং দেহে গৃহাদৌ চ করোতি যঃ। কামাদ্যবস্থয়া ভ্রান্তো নাসাবাত্মা মনোময়ঃ॥ ইতি মনোময়কোষঃ ৩॥ লীনা সুপ্তৌ বপুর্বোধে ব্যাপ্নুয়াদানখাগ্রগা। চিচ্ছায়োপেতধীর্নাত্মা বিজ্ঞানময়শব্দভাক্॥ ইতি বিজ্ঞানময়কোষঃ ৪॥

কাচিদন্তর্মুখাবৃত্তিরানন্দপ্রতিবিম্বভাক্ । পুণ্যভোগে ভোগশান্তৌ নিদ্রারূপেণ লীয়তে ॥ কাদাচিৎকত্বতো নাত্মা স্যাদানন্দময়োঽপ্যয়ং । ইত্যানন্দময়কোষঃ ৫ ॥ ইতি পঞ্চদশী ॥

পঞ্চখট্বং (ক্লী স্ত্রী) পঞ্চখট্বাঃ সমাহৃতাঃ । পঞ্চানাং খট্বানাং সমাহারঃ । ইতি ব্যাকরণং ॥

পঞ্চগণযোগঃ (পুং) বিদারী গন্ধা বৃহতী পৃশ্নিপর্ণী নিদিগ্ধিকা শ্বদংষ্ট্রা এতা মিলিতাঃ । ইতি রাজনির্ঘণ্টঃ ॥

পঞ্চগবং (ক্লী স্ত্রী) পঞ্চানাং গবাং সমাহারঃ । পঞ্চগাবঃ সমাহৃতাঃ । ইতি ব্যাকরণং ॥

পঞ্চগবধনঃ (ত্রি) পঞ্চ গাবো ধনং যস্য । ইতি মুগ্ধবোধব্যাকরণং ॥

পঞ্চগব্যং (ক্লী) গোসম্বন্ধিপঞ্চপ্রকারদ্রব্যং । তত্তু গোময়গোমূত্রদুগ্ধদধিঘৃতরূপং । যথা । পঞ্চগব্যং দধিক্ষীরঘৃতগোমূত্রগোময়ৈঃ । ইতি শব্দচন্দ্রিকা ॥ * ॥ তৎপরিমাণং যথা । পলমাত্রং দুগ্ধভাগং গোমূত্রং তাবদিষ্যতে । ঘৃতঞ্চ পলমাত্রং স্যাৎ গোময়ং তোলকত্রয়ং ॥ দধি প্রসৃতমাত্রং স্যাৎ পঞ্চগব্যমিদং স্মৃতং । অথবা পঞ্চগব্যানাং সমানো ভাগ ইষ্যতে ॥ ইতি গৌতমীয়তন্ত্রং ॥ * ॥ অপি চ । গোশকৃদ্দ্বিগুণং মূত্রং পয়ঃ স্যাত্তচ্চতুর্গুণং । ঘৃতং তদ্দ্বিগুণং প্রোক্তং পঞ্চগব্যে তথা দধি ॥ * ॥ তস্য পানফলং যথা । পঞ্চগব্যেন পূতস্তু বাজিমেধফলং লভেৎ । গব্যন্তু পরমং মেধ্যং গব্যাদন্যন্ন বিদ্যতে ॥ সৌম্যে মুহূর্ত্তে সংযুক্তে পঞ্চগব্যন্তু যঃ পিবেৎ । যাবজ্জীবকৃতাৎ পাপাৎ তৎক্ষণাদেব মুচ্যতে ॥ * ॥ গব্যানাং দেবপ্রীতিকরত্বং যথা । দধ্না হি ত্রিদশাঃ সর্ব্বে ক্ষীরেণ চ মহেশ্বরঃ । ঘৃতেন পাবকো নিত্যং পায়সেন পিতামহঃ ॥ সকৃদ্দত্তেন প্রীয়ন্তে বর্ষাণাঞ্চ ত্রয়োদশ । তাং দত্ত্বা চৈব পীত্বা চ প্রেতো মেধ্যস্তু জায়তে ॥ ইতি বরাহপুরাণং ॥ * ॥ তস্য বিশেষো যথা । পয়ঃ কাঞ্চনবর্ণায়াঃ শ্বেতবর্ণোত্থগোময়ং । গোমূত্রং তাম্রবর্ণায়া নীলবর্ণাভবং ঘৃতং ॥ দধি স্যাৎ কৃষ্ণবর্ণায়া দর্ভোদকসমাযুতং । গোমূত্রমাষকাণ্যষ্টৌ গোময়স্য চতুষ্টয়ং ॥ ক্ষীরস্য দ্বাদশ প্রোক্তা দধ্নস্তু দশ উচ্যতে । ঘৃতস্য মাষকাঃ পঞ্চ পঞ্চগব্যং মলাপহং ॥ ইতি গারুড়ে প্রায়শ্চিত্তপ্রকরণং ॥

পঞ্চগুঃ (ত্রি) পঞ্চভির্গোভিঃ ক্রীতঃ । ইতি মুগ্ধবোধব্যাকরণং ॥

পঞ্চগুপ্তঃ (পুং) চার্ব্বাকদর্শনং । কচ্ছপঃ । ইতি মেদিনী ॥

পঞ্চগুপ্তিরসা (স্ত্রী) স্পৃক্কা । ইতি রাজনির্ঘণ্টঃ ॥

পঞ্চচামরং (ক্লী) ষোড়শাক্ষরপাদচ্ছন্দোবিশেষঃ । যথা । প্রমাণিকাপদদ্বয়ং বদন্তি পঞ্চচামরং । ইতি ছন্দোমঞ্জরী ॥

পঞ্চচীরঃ (পুং) মঞ্জুঘোষঃ । ইতি ত্রিকাণ্ডশেষঃ ॥

পঞ্চচূড়া (স্ত্রী) অপ্সরোবিশেষঃ । ইতি পুরাণং ॥

পঞ্চজনঃ (পুং) পুরুষঃ। ইত্যমরঃ॥ দৈত্য-বিশেষঃ। স চ সংহ্রাদস্য ক্রতৌ পত্ন্যাং জাতঃ। ইতি শ্রীভাগবতং॥ যস্যাস্থ্নি পাঞ্চজন্যনামা শঙ্খো জাতঃ। স চ শ্রীকৃষ্ণস্য। যথা। পাঞ্চজন্যং হৃষীকেশ ইত্যাদি শ্রীভগবদ্গীতা॥

পঞ্চজনী (স্ত্রী) পঞ্চানাং জনানাং সমাহারঃ। ইতি ব্যাকরণ

পঞ্চজনীনঃ (পুং) ভণ্ডঃ। ইতি হলায়ুধঃ॥ পঞ্চজনসম্বন্ধিনি পঞ্চজন্যাঃ প্রভৌ চ ত্রি॥

পঞ্চজ্ঞানঃ (পুং) বুদ্ধঃ। ইতি হেমচন্দ্রঃ॥

পঞ্চতত্ত্বং (ক্লী) পঞ্চভূতং। ইতি স্বরোদয়ঃ॥ পঞ্চমকারঃ। মদ্যমাংসমৎস্যমুদ্রামৈথুন-রূপং। যথা। মদ্যং মাংসং তথা মৎস্যং মুদ্রাং মৈথুনমেব চ। পঞ্চতত্ত্বমিদং দেবি নির্ব্বাণমুক্তিহেতবে॥ মকারপঞ্চকং দেবি দেবানামপি দুর্লভং। ইতি কৈবল্যতন্ত্রে প্রথমপটলঃ॥ বৈষ্ণবানাং যথা। তত্ত্বজ্ঞান-মিদং প্রোক্তং বৈষ্ণবে শৃণু যত্নতঃ। গুরু-তত্ত্বং মন্ত্রতত্ত্বং মনস্তত্ত্বং সুরেশ্বরি॥ দেব-তত্ত্বং ধ্যানতত্ত্বং পঞ্চতত্ত্বং বরাননে। তত্রাদৌ শ্রীগুরোস্তত্ত্বং স্নেহাদ্বক্ষ্যামি পার্ব্বতি॥ সতৈলং বর্ত্তিকাযুক্তং দেহস্থং ব্রহ্মতেজসং। গুরুণা মন্ত্রদানেন তৎ-সূত্রং দীপিতং ভবেৎ॥ দেবতায়াঃ শরীরং হি মন্ত্রাদুৎপদ্যতে ধ্রুবং। অতএব হি তস্যাত্মা দেবরূপো ন সংশয়ঃ॥ ঈশ্বরস্য তু যদ্বীর্য্যং তদেব অক্ষয়াত্মকং। তেন বর্ণাত্মকং দেহং জন্তোরেব ন সংশয়ঃ॥ মন্ত্রবর্ণে সর্ব্ববর্ণময়াস্তে পরমেশ্বরি। বর্ণ-তত্ত্বমিদং দেবি সর্ব্বস্বং মম যত্নবেৎ॥ স্বয়ং দেবো ন চান্যোঽস্মি নির্ম্মলো দেব-রূপকঃ। সর্ব্বত্র দেবতাং ধ্যায়েৎ তৃণগুল্ম-লতাদিষু॥ ধ্যানেন লভতে সর্ব্বং ধ্যানেন বিষ্ণুরূপকঃ। ধ্যানেন সিদ্ধিমাপ্নোতি বিনা ধ্যানং ন সিদ্ধ্যতি॥ ইতি তে কথিতং তত্ত্বং বৈষ্ণবস্য সুরেশ্বরি। যজ্জ্ঞানাদমর-ত্বঞ্চ বিষ্ণুরূপো ভবেন্নরঃ॥ তে নরা নহি গচ্ছন্তি কদাচিদ্যমমন্দিরং। ইতি নির্ব্বাণ-তন্ত্রে ১২ পটলঃ॥

পঞ্চতপাঃ [স্] (ত্রি) অগ্নিচতুষ্টয়সূর্য্যৈতৎ-পঞ্চকসাধ্যতপোবিশিষ্টঃ। যথা। তেজস্বি-মধ্যে তেজস্বী দবীয়ানপি গণ্যতে। পঞ্চমঃ পঞ্চতপসস্তপনো জাতবেদসাং॥ ইতি মাঘদ্বিতীয়স্বর্গঃ॥

পঞ্চতয়ং (ত্রি) পঞ্চাবয়বং। ইতি ব্যাকরণং॥

পঞ্চতন্মাত্রং (ক্লী) তামসাহঙ্কারোৎপন্নমহা-ভূতোপাদানকারণশব্দস্পর্শরূপরসগন্ধাঃ। তদাশ্রয়দ্রব্যাণি চ। ইতি সাংখ্যভাষ্যং॥

পঞ্চতক্ষং (ক্লী স্ত্রী) পঞ্চানাং তক্ষ্ণাং সমা-হারঃ। ইতি ব্যাকরণং॥

পঞ্চতা (স্ত্রী) মৃত্যুঃ। ইত্যমরঃ॥ দেহারম্ভ-কাণাং পৃথিব্যাদিপঞ্চমহাভূতানাং স্বাংশ-সংক্রমণাৎ পৃথক্ত্বং। ইতি ভরতঃ॥ পঞ্চভাবঃ। ইতি মেদিনী॥

পঞ্চতিক্তং (ক্লী) তিক্তদ্রব্যপঞ্চকং। যথা। নিম্বামৃতাবৃষপটোলনিদিগ্ধিকাঃ। ইত্যাদি চক্রপাণিদত্তঃ॥

পঞ্চতীর্থী (স্ত্রী) তীর্থপঞ্চকং। যথা। বিষুব-দ্দিবসে প্রাপ্তে পঞ্চতীর্থীবিধানতঃ। ইতি

তিথিতত্ত্বং ॥ পঞ্চতীর্থান্যাহ। মার্কণ্ডেয়ে বটে কৃষ্ণে রৌহিণেয়ে মহোদধৌ। ইন্দ্রদ্যুম্নসরঃ স্নাত্বা পুনর্জন্ম ন বিদ্যতে॥ ইতি তীর্থতত্ত্বং ॥ * ॥ অপি চ। পৃথিব্যাং যানি তীর্থানি সর্ব্বাণ্যেবাভিষেচনাৎ। তৎপঞ্চতীর্থস্নানেন সমং নাস্ত্যত্র সংশয়ঃ ॥ একাদশ্যাঞ্চ বিশ্রান্তৌ দ্বাদশ্যাং শৌকরে তথা। ত্রয়োদশ্যাং নৈমিষে চ প্রয়াগে চ চতুর্দ্দশী ॥ কার্ত্তিক্যাং পুষ্করে চৈব কার্ত্তিকস্য সিতাসিতে। কালেম্বেষু নরঃ স্নাত্বা সর্ব্বং পাপং ব্যপোহতি॥ ইতি বরাহপুরাণং ॥

পঞ্চত্বং (ক্লী) মরণং। পঞ্চানাং ভাবঃ। ইতি হেমচন্দ্রঃ ॥

পঞ্চদশঃ (ত্রি) পঞ্চদশানাং পূরণঃ। পোনেরই ইত্যাদি ভাষা। তৎসংখ্যামাত্রবাচিত্বে নান্তবহুবচনান্তোহয়ং। ইতি ব্যাকরণং ॥ তদ্বাচকশব্দঃ। তিথিঃ। ইতি কবিকল্পলতা ॥

পঞ্চদশী (স্ত্রী) পূর্ণিমা। অমাবাস্যা। ইতি মেদিনী ॥ বেদান্তগ্রন্থবিশেষশ্চ ॥

পঞ্চদীর্ঘং (ক্লী) শরীরপঞ্চাবয়বলক্ষণবিশেষঃ। যথা। বাহূ নেত্রদ্বয়ং কুক্ষির্দ্বে তু নাসে তথৈব চ। স্তনয়োরন্তরঞ্চৈব পঞ্চদীর্ঘং প্রশস্যতে॥ ইতি সামুদ্রকং ॥

পঞ্চধা ব্য পঞ্চপ্রকারং। ইতি ব্যাকরণং ॥

পঞ্চনখঃ (পুং) হস্তী। কূর্ম্মঃ। ইতি হেমচন্দ্রঃ ॥ ব্যাঘ্রঃ। ইতি রাজনির্ঘণ্টঃ ॥ * ॥ ভক্ষণীয়পঞ্চনখা যথা। শশকঃ শল্লকী গোধা খড়্গী কূর্ম্মশ্চ পঞ্চমঃ। ইতি স্মৃতিঃ ॥ পঞ্চ পঞ্চনখা ভক্ষ্যা যে প্রোক্তাঃ কৃতজৈর্দ্বিজৈঃ। কৌশল্যাজশশাদীনাং তেষাং নৈকোহপ্যহং কপিঃ॥ ইতি ভট্টিঃ ॥

পঞ্চনদঃ (পুং) পঞ্চনদীযুক্তদেশবিশেষঃ। পঞ্জাব ইতি পারস্যভাষা। তস্য নামান্তরং। বাহ্লীকঃ মদ্রদেশশ্চ। তা নদ্যো যথা। শতদ্রুঃ ১ বিপাশা ২ ইরাবতী ৩ চন্দ্রভাগা ৪ বিতস্তা ৫। ইতি পুরাণং ॥ পঞ্চানাং নদীনাং সমাহারে ক্লী ॥

পঞ্চনিম্বং (ক্লী) নিম্ববৃক্ষস্য পত্রত্বক্পুষ্পফলমূলানি। ইতি রাজনির্ঘণ্টঃ ॥ পঞ্চনিম্বস্তু তৎপুষ্পমূলবল্কফলচ্ছদৈরিতি শব্দচন্দ্রিকা॥

পঞ্চনী (স্ত্রী) শারিশৃঙ্খলা। ইতি শব্দরত্নাবলী ॥

পঞ্চনীরাজনং (ক্লী) পঞ্চানাং নীরাজনানাং সমাহারঃ। পঞ্চপ্রকারারাত্রিকং। ইতি কালোত্তরতন্ত্রং ॥ অস্য বিবরণং নীরাজনশব্দে দ্রষ্টব্যং ॥

পঞ্চপর্ণিকা (স্ত্রী) গোরক্ষীক্ষুপঃ। ইতি রাজনির্ঘণ্টঃ ॥

পঞ্চপল্লবং (ক্লী) আম্রাদিপত্রপঞ্চকং। যথা। আম্রজম্বুকপিত্থানাং বীজপূরকবিল্বয়োঃ। গন্ধকর্ম্মাণ সর্ব্বত্র পত্রাণি পঞ্চপল্লবং ॥ ইতি শব্দচন্দ্রিকা ॥ বৈদিককর্ম্মণি ঘটোপরিদেয়পঞ্চপল্লবং যথা। আম্রাশ্বত্থবটপর্কটীযজ্ঞোড়ুম্বরাণি। তান্ত্রিককর্ম্মণি পঞ্চপল্লবং যথা। পনসাম্রং তথাশ্বত্থং বটং বকুলমেব চ। পঞ্চপল্লবমুক্তঞ্চ মুনিভিস্তন্ত্রবেদিভিঃ॥ ইতি তন্ত্রসারঃ ॥

পঞ্চপক্ষী [ন্] (পুং) পারিভাষিকপক্ষিপঞ্চক-

দ্বারা ত্রিকালবোধকপ্রশ্নগ্রন্থঃ । যথা । প্রণম্য শ্রীমহাদেবং সর্ব্বশাস্ত্রবিশারদং। ভবিষ্যদর্থবোধায় পপ্রচ্ছুর্ম্মুনয়ো মুদা ॥ তেষাং বচনমাকর্ণ্য নিজগাদ মহেশ্বরঃ। ত্রিকালজ্ঞানবোধার্থং পঞ্চপক্ষী প্রদর্শ্যতে ॥ অনেন শাস্ত্রসারেণ লোকৈঃ কালত্রয়ং প্রতি। বলাবলানি দৃশ্যন্তে সর্ব্বকার্য্যেষু নিশ্চিতং ॥ আগতং পৃচ্ছকং দৃষ্ট্বা দৈবজ্ঞঃ সাবধানতঃ। যদ্‌যৎ করোতি কর্ম্মাণি তস্মাৎ সর্ব্বং বিচারয়েৎ ॥ * ॥ ঊর্দ্ধাবলোকনে জীবস্ত্বধোদৃষ্টৌ তু মূলকং। সমদৃষ্টৌ ভবেদ্ধাতুরেতাশ্চিন্তাপ্রভেদতঃ॥ তত্র। ললাটে পুত্রচিন্তা স্যাৎ কামচিন্তা চ কণ্ঠকে। বাহুভ্যাং বস্তুচিন্তা চ ব্যাধিচিন্তা তথোদরে॥ কটৌ বিচ্ছেদচিন্তা চ শত্রুচিন্তা চ গুহ্যকে। দুঃখচিন্তা ভবেৎ পাদে এতে চিন্তাপ্রভেদকাঃ॥ * ॥ অপরঞ্চ। অক্ষরং পক্ষিভুক্তঞ্চ দিগ্দৈবতদিনানি চ। কালং বর্ণং বলং মিত্রং ধাতুমূলাদিকং ক্রমাৎ॥ আরূঢ়প্রশ্নলগ্নেভ্যঃ প্রথমাক্ষরতোঽপি বা। পৃচ্ছকস্য বচঃ শ্রুত্বা গ্রাহ্যো বর্ণঃ স্বরস্তথা॥ * ॥ স্বরেণ কল্পয়েদ্বারং বারাৎ পক্ষী প্রজায়তে। পক্ষিণো জায়তে বাক্যং বাক্যাচ্চ ফলসম্ভবঃ॥ * ॥ অকারাদিওকারান্তাঃ স্বরাঃ পঞ্চ প্রকীর্ত্তিতাঃ। ভুক্ত্যর্থং কল্পয়েদ্রূপং স্বরান্তে পক্ষিরূপিণঃ॥ অকারঃ শ্যেন আখ্যাত ইকারঃ পিঙ্গলস্তথা। উকারো বায়সশ্চৈব একারস্তাম্রশেখরঃ॥ ওকারো নীলকণ্ঠশ্চ স্বরান্তে পক্ষিসংজ্ঞকাঃ। * ।

অকারঃ পূর্ব্বদিগ্‌ভাগে ইকারশ্চৈব দক্ষিণে॥ উকারঃ পশ্চিমে জ্ঞেয় একারশ্চোত্তরে তথা। শেষস্থানেষু সর্ব্বেষু ওকারস্তু প্রকীর্ত্তিতঃ॥ শকুনানাং ক্রিয়াগত্যা দ্যূতে যুদ্ধে জয়াজয়ৌ । * । প্রাক্ শ্যেনঃ পিঙ্গলো যাম্যে পশ্চিমে কাক উচ্যতে॥ উত্তরে তাম্রচূড়শ্চ কলাপী মধ্যগঃ স্মৃতঃ। ঙঞণাক্ষরকৈর্হীনান্ ককারাদীংস্তু বিন্যসেৎ॥ অকারাদিষু হান্তাংস্তানেকৈকং ষট্ পরিক্রমাৎ। * । অস্বরে কছডা বর্ণা ধভবাশ্চ ভবন্তি হি॥ খজঢা নমশা বর্ণা ইকারে পরিকীর্ত্তিতাঃ । গঝতাঃ পযষা বর্ণা উস্বরে স্যুর্যথাক্রমং॥ ঘটথাঃ ফরসা এতে বর্ণা এস্বরমাত্রগাঃ। চঠদা বলহা বর্ণা ওস্বরে পরিকীর্ত্তিতাঃ॥*॥ প্রথমে রবিভৌমৌ চ দ্বিতীয়ে চন্দ্রচন্দ্রজৌ। তৃতীয়ে জীববারশ্চ চতুর্থে ভৃগুবাসরঃ॥ পঞ্চমে মন্দবারশ্চ পক্ষিণাং ক্রমশো লিখেৎ। * । নন্দা ভদ্রা জয়া রিক্তা পূর্ণা চ তিথয়ঃ ক্রমাৎ॥*॥ অকারে মেষসিংহালিঃ ইঃ কন্যাযুগ্মকর্কটাঃ। উকারে চাপমীনৌ চ একারে চ তুলাবৃষৌ॥ ওকারে মৃগকুম্ভৌ চ এবং রাশিঞ্চ সংলিখেৎ। * । স্বরাধঃ স্থাপয়েৎ খেটান্ রাশের্যো যস্য নায়কঃ॥ অকারে সপ্ত ঋক্ষাণি রেবত্যাদিক্রমেণ চ। পঞ্চ পঞ্চ ইকারাদাবেবমৃক্ষং স্বরোদয়ে ॥ * ॥ প্রথমে চাশ্বিনী পূর্ব্বং পঞ্চনক্ষত্রমুচ্যতে। অতঃ ক্রমাৎ দ্বিষট্ চৈব পঞ্চ পঞ্চ চ তারকাঃ॥ * ॥ স্বরাণাঞ্চ ক্রমেণৈব দেবতাঃ পরিকীর্ত্তিতাঃ। ঈশ্বরঃ

পবনশ্চৈব ইন্দ্রাকাশঃ সদাশিবঃ ॥ * ॥ প্রাচ্যাং পৃথ্বী গুরুশ্চৈব যাম্যাং শুক্রো জলং তথা। অঙ্গারকঃ পশ্চিমেঽগ্নির্বুধো বায়ুস্তথোত্তরে ॥ সূর্য্যপুত্রস্তথাকাশে ঊর্দ্ধমেবং লিখেত্ততঃ ।*। ক্ষিতৌ ব্রহ্মা জলে বিষ্ণুস্তথা রুদ্রো হুতাশনে ॥ ঈশ্বরঃ পবনে চৈব তথাকাশে সদাশিবঃ ।*। ভূতো ময়ূরঃ কুব্জশ্চ কুক্কুটো বর্ত্তমানকঃ ॥ বলিভুক্‌শ্যেনকৌ খ্যাতৌ ভবিষ্যন্তৌ সুনিশ্চিতং ।*। শ্যেনো হিরণ্যবর্ণশ্চ পিঙ্গলঃ শুক্লবর্ণকঃ ॥ কাকো রক্তোঽসিতশ্চিত্রঃ কুক্কুটঃ শ্যামলঃ শিখী ।*। কাকো বলীয়ান্ সর্ব্বেভ্যস্তস্মাৎ শ্যেনো হি দুর্ব্বলঃ ॥ কুক্কুটো দুর্ব্বলস্তাভ্যাং পিঙ্গলস্তেভ্য ঊনকঃ । সর্ব্বেভ্যো দুর্ব্বলঃ পক্ষী নীলকণ্ঠো ন সংশয়ঃ॥ বলী ময়ূরাৎ কুব্জস্তু তাম্রচূড়স্তয়োর্ব্বলী । এতেভ্যো বলবান্ শ্যেনশ্চতুর্ণাং বায়সো বলী ॥ * ॥ মিত্রং ময়ূরঃ শ্যেনস্য ময়ূরস্য চ পিঙ্গলঃ । তাম্রচূড়স্য সুহৃদৌ ময়ূরপিঙ্গলৌ তথা ॥ বায়সস্যাপি মিত্রং স্যাৎ শিখী ভবতি সর্ব্বদা। সুহৃদৌ পিঙ্গলশ্যেনৌ ময়ূরারুণশেখরৌ ॥ * ॥ কাককুক্কুটশ্যেনাশ্চ পিঙ্গলস্য চ বিদ্বিষঃ। ময়ূরস্য রিপূ নিত্যং সর্ব্বদা শ্যেনবায়সৌ ॥ ভবতঃ শ্যেনকাকৌ দ্বৌ তাম্রচূড়স্য বিদ্বিষৌ। কাকস্য শত্রবো নিত্যং পিঙ্গলশ্যেনকুক্কুটাঃ ॥ * ॥ ঊর্দ্ধর্ভবেৎ জীবো হ্যধোদৃষ্টিস্তু মূলকং। সমদৃষ্টির্ভবেদ্ধাতুরেতে চিন্তাপ্রভেদকাঃ॥*॥ শ্যেনো মূলং তথা কুব্জো জীবো ধাতুশ্চ

বায়সঃ। কুক্কুটো মূলজীবৌ চ মূলধাতূ শিখণ্ড্যপি ॥ * ॥ শ্যেনো নরো বধূঃ কুব্জঃ পুরুষো বায়সস্তথা। কুক্কুটঃ স্ত্রী পুমাংশ্চৈব শিখী নপুংসকস্তথা ॥ * ॥ শ্যেনকুব্জৌ দ্বিজশ্রেষ্ঠৌ মহীপালস্তু বায়সঃ। তাম্রচূড়ো বণিক্‌ শূদ্রো নীলকণ্ঠস্তথান্ত্যজঃ ॥ * ॥ চতুষ্পাৎ পিঙ্গলো জ্ঞেয়ো দ্বিপদৌ শ্যেনবায়সৌ। তাম্রচূড়ো নখী শৃঙ্গী শিখণ্ডী পক্ষিজীবকঃ ॥ * ॥ শ্যেনো মুখং কণ্ঠবাহূ কুব্জো বক্ষস্তু বায়সঃ ॥ কুক্কুটঃ পৃষ্ঠভাগঃ স্যাৎ শিখী পাদযুগং ক্রমাৎ ॥ * ॥ শ্যেনো ভূম্যাং ধনং জ্ঞেয়ং পিঙ্গলো জলপঙ্কযুক্‌। বায়সস্তৃণসঙ্ঘাতে কুক্কুটো ভস্মনাবৃতং ॥ শ্যেনঃ শিখী গৃহান্তর্গং বন্ধুস্থানেষু নিশ্চিতং ।*। স্বগ্রামে শ্যেনকুব্জৌ তু বায়সো বন্ধুমাপ্নুয়াৎ॥ কুক্কুটঃ পরদেশে চ পরগ্রামে তথা শিখী। কুব্জস্তু দশহস্তে চ ত্বর্দ্ধক্রোশে তু কুক্কুটঃ॥ দ্বিক্রোশে তু তথা কাকঃ শ্যেনঃ ক্রোশে তু পূর্ব্বতঃ। ময়ূরো যোজনে চেতি তথৈবং দূরনিশ্চয়ঃ ॥ * ॥ ভুক্তৌ চ মাসো গমনে চ পক্ষো রাজ্যে দিনানি ত্বয়নস্তু সুপ্তে। মৃতে চ বর্ষং শকুনস্য চর্য্যা কালপ্রমাণং মুনয়ো বদন্তি ॥ * ॥ শুক্রে চন্দ্রে গুল্মবল্লী লতাকন্দৌ বুধে তথা। পত্রং গুরৌ ফলং সূর্য্যে মূলঞ্চ রবিজে কুজে ॥ * ॥ শুক্রে চন্দ্রে ভবেদ্রৌপ্যং বুধে স্বর্ণমুদ্রান্বিতং। গুরৌ রত্নযুতং হেম সূর্য্যে মৌক্তিকমেব চ ॥ ভৌমে তাম্রং শনৌ লৌহং রাহাবস্থীনি কীর্ত্তয়েৎ। এতেষাং

ধাতুভেদঞ্চ বারাণামুদয়ক্রমাৎ ॥ * ॥ শুক্রে চন্দ্রে জলাধারো দেবতাবসতির্গুরৌ। রবৌ চতুষ্পদস্থানমিষ্টকানিলয়ো বুধে ॥ দগ্ধস্থানং কুজে প্রোক্তং শনৌ রাহৌ চ বাহ্বভূঃ। অমীভির্হিবুকে স্থানে নষ্টভূমিং বিলোকয়েৎ ॥*॥ রবৌ ভৌমে চ ভেরুণ্ডো ময়ূরো বায়সঃ শনৌ। পাদায়ুধঃ শিখী শুক্রে কাককুক্কুটৌ গুরৌ তথা ॥ কুজ-কুক্কুটাবিন্দুজ্ঞৌ ক্রমোঽয়ং শুক্লকৃষ্ণয়োঃ॥*॥ যস্য বারস্য যঃ পক্ষী তদাদিং গণয়েদ্বুধঃ ॥ দিনপক্ষী কার্য্যরূপী প্রশ্নপক্ষী ফলপ্রদঃ। দিনেষু শুক্লপক্ষে যৎ কৃষ্ণে রাত্রিষু তত্তথা॥ কৃষ্ণে দিনেষু যদ্যত্তৎ শুক্লে রাত্রিষু যোজয়েৎ।*। বালঃ কুমারস্তরুণো বৃদ্ধো মৃত ইতি ক্রমাৎ ॥ ঘটিকা ষট্ ষড়েবং হি ফলমেষামুদীরিতং। কিঞ্চিল্লাভকরো বালঃ কুমারস্ত্বর্দ্ধলাভদঃ॥ তরুণো রাজ্যদো বৃদ্ধো হানিদো মৃত্যুদো মৃতঃ।*। ভোজনং গমনং রাজ্যং নিদ্রা মরণমেব চ ॥ একান্তরে ভবেৎ কৃষ্ণে শুক্লে স্যাৎ ক্রমশো বিদুঃ। পক্ষিণাং ক্রমশো জ্ঞাত্বা ফলং ব্রূয়াৎ যথা তথা ॥ গণয়েৎ পঞ্চ-পক্ষ্যাদৌ জাতভূতগণাদ্যপি। শুক্ল-পক্ষে ॥ * ॥ ততঃ কৃষ্ণপক্ষে। ভোজনং মরণঞ্চৈব নিদ্রা রাজ্যং তথৈব চ। গমনং পঞ্চপক্ষাণাং কৃষ্ণপক্ষে ক্রমো দিবা ॥ * ॥ রাজ্যং সুভিক্ষ্যমক্ষোভং নষ্টলাভং সদা জয়ং। রোগমুক্তং মহালাভং পক্ষিণাং ভুক্তিলক্ষণং ॥ * ॥ অনায়াসেন দৃষ্টিঃ স্যাদদৃষ্টধনসঞ্চয়ঃ। ভূলাভো রোগ-নাশশ্চ যাত্রাসিদ্ধী রণে জয়ঃ ॥ দূরাদা-গমনং যোগঃ প্রয়াণে পক্ষিলক্ষণং। *। রাজ্যোদয়ে যদি প্রশ্নো লাভার্থে স্বল্প-লাভদঃ ॥ রুজানাং চিররোগঃ স্যাৎ যানে হানিঃ ক্ষয়ো রণে। পুরগ্রামপ্রবেশঞ্চ গমনং কলহং তথা ॥ মনশ্চঞ্চলমারোগ্যং গমনেষু বিচারয়েৎ। *। রাজ্যলাভো জয়ং সৌখ্যং অক্ষোভং রোগনাশনং ॥ সুভিক্ষং বহুবৃষ্টিশ্চ পক্ষিণাং রাজ্য-লক্ষণং। *। যাত্রাহানিরনাবৃষ্টিঃ কার্য্য-হানিরদর্শনং ॥ ব্যাধিশ্চ দীর্ঘরোগশ্চ পক্ষিণাং সুপ্তিলক্ষণং। অপমৃত্যুভয়ঞ্চৈব সর্ব্বকার্য্যবিনাশনং ॥ এতদেব ফলং ব্রূয়াৎ পক্ষিণাং মৃত্যুলক্ষণং।*। শ্যেনে ভোক্তরি কাকস্তু পান্থো রাজা ভুজঙ্গ-ভুক্ ॥ স্বপ্নাবস্থাং গতঃ কুক্কুটঃ পরাসুস্তাম্র-শেখরঃ।*। কাকে ভোক্তরি কেকী তু পান্থঃ স্যাৎ পিঙ্গলো নৃপঃ ॥ তাম্রচূড়-স্তথা স্বাপী শ্যেনঃ কালবশং গতঃ।*। ময়ূরে ভোক্তরি তথা কুক্কুটো যাত্রাবশং গতঃ ॥ মহীপঃ কুক্কুটঃ শ্যেনঃ স্বাপী কাকো বশং গতঃ।*। কুক্কুটে ভোক্তরি পান্থস্তু কুক্কুটঃ শ্যেনকো নৃপঃ ॥ কাকো নিদ্রাবশং যাতো ময়ূরো মরণং গতঃ।*। কুক্কুটে ভোক্তরি শ্যেনঃ পান্থো রাজা তু বায়সঃ ॥ শিখী নিদ্রাবশং যাতঃ পিঙ্গলঃ কালমাপ্নুয়াৎ। ইতি কৃষ্ণপক্ষস্য দিবা-ক্রমঃ শুক্লপক্ষস্য রাত্রিক্রমশ্চ ॥ * ॥ স্বরোঽপি যথা। অনুমোদিতে। উন্মো-দিতেন। ওমিত্যেবায়ুঃ। ইত্যেব জুহো।

এবমুক্তোঽসি ॥ * ॥ শ্যেনে ভোক্তরি কুব্জঃ স্যাৎ পান্থঃ কাকো মহীপতিঃ। তাম্রচূড়ো নিদ্রিতশ্চ শিখী কালবশং গতঃ ॥ * ॥ ময়ূরে ভোক্তরি শ্যেনঃ পান্থঃ কুব্জো মহীপতিঃ। স্বপ্নাবস্থাং গতঃ কাকস্তাম্রচূড়ো মৃতস্তথা ॥*॥ কুক্কুটে ভোক্তরি শিখী সদা গমনমাপ্নুয়াৎ। শ্যেনো মহাপতিঃ কুব্জঃ স্বাপী কাকো মৃতিং গতঃ ॥*॥ কাকে ভোক্তরি যাত্রায়াং তাম্রচূড়ঃ শিখী নৃপঃ। নিদ্রায়াং রমতে শ্যেনঃ কুব্জঃ কালবশং গতঃ ॥ * ॥ কুব্জে ভোক্তরি যাত্রায়াং বায়সঃ কুক্কুটো নৃপঃ। নীলকণ্ঠস্তথা স্বাপী শ্যেনো মৃত্যুবশং গতঃ ॥ ইতি শুক্লপক্ষস্য দিবাক্রমঃ কৃষ্ণপক্ষস্য রাত্রিক্রমশ্চ ॥ * ॥ স্বরোঽপি যথা। অহিপুরেভোঃ। গোকরিপুরে। একোনরিপুঃ। উপেন্দ্রো হরিঃ। বিষ্ণুস্তে লোকঃ ॥ * ॥ ইত্যুক্তং পক্ষিণাং কার্য্যং লাভালাভং শুভাশুভং। যেন বিজ্ঞানমাত্রেণ ত্রিকালজ্ঞো ভবেন্নরঃ ॥ তাবদ্গর্জ্জন্তি শাস্ত্রাণি শকুনানামনেকশঃ। যাবন্ন শ্রূয়তে পক্ষিশকুনং শঙ্করোদিতং ॥ ইতি শ্রীমহাদেববিরচিতং পঞ্চপক্ষিশাকুনং সমাপ্তং ॥

পঞ্চপাত্রং (ক্লী) পঞ্চানাং পাত্রাণাং সমাহারঃ। ইতি ব্যাকরণং ॥ পঞ্চপাত্রকরণকপার্ব্বণবিধিকশ্রাদ্ধং। তত্তু অম্বষ্টকাশ্রাদ্ধং। অমাবস্যামৃতপ্রেতপক্ষমৃতসাম্বৎসরিকং সপিণ্ডীকরণঞ্চ। ইতি লোকপ্রসিদ্ধং ॥

পঞ্চপিত্তং (ক্লী) পিত্তপঞ্চকং। যথা। বরাহচ্ছাগমহিষমৎস্যমায়ূরপিত্তকং। পঞ্চপিত্তমিতি খ্যাতং সর্ব্বেষ্বেব হি কর্ম্মসু॥ ইতি বৈদ্যকং ॥

পঞ্চপ্রদীপঃ (পুং) পঞ্চদীপযুক্তারাত্রিকং। যথা। কুর্য্যাৎ সপ্তপ্রদীপেন শঙ্খঘণ্টাদিবাদ্যকৈঃ। হরেঃ পঞ্চপ্রদীপেন বহুশো ভক্তিতৎপরঃ ॥ ইতি পাদ্মোত্তরখণ্ডে ১০৭ অধ্যায়ঃ ॥

পঞ্চপ্রাসাদঃ (পুং) দেবগৃহবিশেষঃ। পঞ্চরত্ন ইতি খ্যাতঃ। যথা। পক্কেষ্টকচিতং রম্যং পঞ্চপ্রাসাদসংযুতং। কারয়িত্বা হরের্ধাম ধূতপাপো ব্রজেদ্দিবং ॥ ইত্যগ্নিপুরাণং ॥

পঞ্চবন্ধঃ (পুং) নষ্টদ্রব্যস্য পঞ্চমাংশদণ্ডঃ। যথা। আগমেনোপভোগেন নষ্টং ভাব্যমতোঽন্যথা। পঞ্চবন্ধো দমস্তস্য রাজ্ঞে তেনাবিভাবিতে ॥ আগমেন রিক্থক্রয়াদিনা। উপভোগেন চ মদীয়মিদং দ্রব্যং তচ্চৈবং নষ্টমপহৃতং বেত্যপি। ভাব্যং সাধনীয়ং তৎ স্বামিনা। অতোঽন্যথা তেন স্বামিনা অবিভাবিতে। পঞ্চবন্ধো নষ্টদ্রব্যস্য পঞ্চমাংশো দমো নাষ্টিকেন রাজ্ঞে দেয়ঃ। ইতি মিতাক্ষরা ॥

পঞ্চভদ্রঃ (পুং) পঞ্চস্থানেষু পুষ্পিতোঽশ্ববিশেষঃ। যথা। পঞ্চভদ্রস্তু হৃৎপৃষ্ঠমুখপার্শ্বেষু পুষ্পিতঃ। ইতি হেমচন্দ্রঃ ॥ পাচনবিশেষঃ। যথা। ছিন্নোদ্ভবাপর্পটবারিবাহভূনিম্বশুণ্ঠীজনিতঃ কষায়ঃ। সমীরপিত্তজ্বরজর্জ্জরাণাং করোতি ভদ্রং খলু পঞ্চভদ্রঃ ॥ ইতি শার্ঙ্গধরঃ ॥

পঞ্চভূতং (ক্লী) পঞ্চানাং ভূতানাং ক্ষিত্যপ্তেজোমরুদ্ব্যোম্নাং সমাহারঃ। অস্যোৎপত্তির্যথা। অভূত্তস্মাদহঙ্কারস্ত্রিবিধঃ সৃষ্টিভেদতঃ। বৈকারিকাদহঙ্কারাদ্দেবা বৈকারিকা দশ॥ দিগ্বাতার্কপ্রচেতোঽশ্বিবহ্নীন্দ্রোপেন্দ্রমিত্রকাঃ। তৈজসাদিন্দ্রিয়াণ্যাসংস্তন্মাত্রা ক্রমযোগতঃ॥ ভূতাদিকাদহঙ্কারাৎ পঞ্চভূতানি জজ্ঞিরে। ইতি শারদায়াং প্রথমপটলঃ॥ *॥ সোঽহঙ্কারস্ত্রিভেদঃ স্যাৎ সত্ত্বাদিগুণযোগতঃ। বৈকারঃ সাত্ত্বিকো নাম তৈজসো রাজসঃ স্মৃতঃ॥ ভূতাদিস্তামসস্তে চ পৃথক্‌কৃতত্ত্বাদ্যবাসৃজন্। বৈকারিকাদ্দিগাদ্যাশ্চ চন্দ্রে নৈকাদশ স্মৃতাঃ॥ ইন্দ্রিয়াণামধিষ্ঠাতৃদেবাস্তে পরিকীর্ত্তিতাঃ॥ যচ্চাপরং মনস্তত্ত্বং সসঙ্কল্পবিকল্পকং। তৈজসাদেব তজ্জাতমিন্দ্রিয়াণি তথা দশ॥ ভূতাদেঃ পঞ্চতন্মাত্রাণ্যাসন্ ভূতমতঃ পরং। ইতি রাঘবভট্টধৃতং॥ *॥ শব্দাদ্ব্যোমস্পর্শতস্তেন বায়ুস্তাভ্যাং রূপাদ্বহ্নিরেতৈ রসাচ্চ। অম্ভাংস্যেতৈর্গন্ধতো ভূর্ধরাদ্যা ভূতাঃ পঞ্চ স্যুর্গুণোনাঃ ক্রমেণ॥ ইতি প্রপঞ্চসারে প্রথমটলঃ॥ *॥ আকাশাজ্জায়তে বায়ুর্বায়োরুৎপদ্যতে রবিঃ। রবেরুৎপদ্যতে তোয়ং তোয়াদুৎপদ্যতে মহী॥ তস্য লয়প্রকারো যথা। মহী সংলীয়তে তোয়ে তোয়ং সংলীয়তে রবৌ। রবিঃ সংলীয়তে বায়ৌ বায়ুর্নভসি লীয়তে॥ পঞ্চতত্ত্বাদ্ভবেৎ সৃষ্টিস্তত্ত্বে তত্ত্বং বিলীয়তে। ইতি ব্রহ্মজ্ঞানতন্ত্রনির্ব্বাণতন্ত্রে॥ *॥ তদুদ্ভবাস্থ্যাদি যথা। অস্থিমাংসনখাশ্চৈব নাড়ী ত্বক্ চেতি পঞ্চমঃ। পৃথ্বীপঞ্চগুণাঃ প্রোক্তা ব্রহ্মজ্ঞানেন ভাষিতং॥ মলং মূত্রং তথা শুক্রং শ্লেষ্মা শোণিতমেব চ। তোয়পঞ্চগুণাঃ প্রোক্তা ব্রহ্মজ্ঞানেন ভাষিতং॥ হাসো নিদ্রা ক্ষুধা চৈব ভ্রান্তিরালস্যমেব চ। তেজঃপঞ্চগুণাঃ প্রোক্তা ব্রহ্মজ্ঞানেন ভাষিতং॥ ধারণং চালনং ক্ষেপঃ সঙ্কোচঃ প্রসরস্তথা। বায়ুপঞ্চগুণাঃ প্রোক্তা ব্রহ্মজ্ঞানেন ভাষিতং॥ কামক্রোধস্তথা লোভস্ত্রপা মোহশ্চ পঞ্চমঃ। নভঃপঞ্চগুণাঃ প্রোক্তা ব্রহ্মজ্ঞানেন ভাষিতং॥ ইতি ব্রহ্মজ্ঞানতন্ত্রে প্রথমপটলঃ॥ *॥ পঞ্চভূতনক্ষত্রাণি যথা। ধনিষ্ঠা রেবতী জ্যেষ্ঠানুরাধা শ্রবণা তথা। অভিজিচ্চোত্তরাষাঢ়া পৃথ্বীতত্ত্বমুদাহৃতং॥ পূর্ব্বাষাঢ়া তথাশ্লেষা মূলার্দ্রা চৈব রোহিণী। উত্তরভাদ্রপদা তোয়ং আপস্তত্ত্বস্ত্বভীষ্টদং॥ ভরণী কৃত্তিকা পুষ্যা মঘা পূর্ব্বা চ ফল্গুনী। পূর্ব্বভাদ্রপদা স্বাতী তেজস্তত্ত্বমিতি প্রিয়ে॥ বিশাখোত্তরফল্গুন্যৌ হস্তা চিত্রা পুনর্ব্বসুঃ। অশ্বিনী মৃগশীর্ষা চ বায়ুস্তত্ত্বমুদাহৃতং॥ ইতি সূক্ষ্মস্বরোদয়ঃ॥

পঞ্চমং (ক্লী) মৈথুনং। যথা। ভগলিঙ্গস্য যোগেন মৈথুনং যদ্ভবেৎ প্রিয়ে। তস্য নাম ভবেদ্দেবি পঞ্চমং পরিকীর্ত্তিতং॥ ইতি সময়াচারতন্ত্রে দ্বিতীয়পটলঃ॥

পঞ্চমঃ (ত্রি) পঞ্চানাং পূরণঃ। পাঁচই ইত্যাদি ভাষা। ইতি মেদিনী॥ রুচিরঃ। দক্ষঃ। ইতি হেমচন্দ্রঃ॥

পঞ্চমঃ (পুং) তন্ত্রীকণ্ঠোত্থিতস্বরবিশেষঃ। ইত্যমরঃ॥ পঞ্চানাং স্বরাণাং পূরণঃ। স তু ষড়্জাদিসপ্তস্বরাণাং পঞ্চমঃ স্বরঃ। তস্যোৎপত্তির্যথা। বায়ুঃ সমুদ্গতো নাভে-রুরোহৃৎকণ্ঠমূর্দ্ধসু। বিচরন্ পঞ্চমস্থান-প্রাপ্ত্যা পঞ্চম উচ্যতে॥ ইতি তন্ত্রীকায়াং ভরতঃ॥ অপি চ। প্রাণোঽপানঃ সমানশ্চ উদানো ব্যান এব চ। এতেষাং সমবায়েন জায়তে পঞ্চমঃ স্বরঃ॥ ইতি সঙ্গীতদামোদরঃ॥ অস্য জাতিঃ ঔড়বঃ। পঞ্চস্বর-মিলিত ইতি যাবৎ। অস্য কূটতানাঃ বিংশত্যধিকশতং ১২০ প্রত্যেকতানে চত্বারিংশৎ ৪০। সমুদায়েন চতুঃসহস্রাষ্ট-শতানি ৪৮০০ তানা ভবন্তি। অস্যো-চ্চারণজাতিঃ পিকঃ। উচ্চারণস্থানং উরঃ গলঃ শিরশ্চ। ব্যাকরণমতে অধরঃ। অয়ং বিপ্রবর্ণঃ। ইতি শুদ্ধতানবিবেকলক্ষণং॥ অস্য রূপং ইন্দ্ররূপতুল্যং। বর্ণঃ শ্যামঃ। স্থানং ক্রৌঞ্চদ্বীপং। দেবতা মহাদেবঃ। বারো বৃহস্পতেঃ। সময়শ্চতুস্ত্রিংশৎপলা-ধিকাষ্টৌ ঘটিকাঃ। শ্রুতয়শ্চত্বারঃ ক্ষিতিঃ রক্তা সন্দীপনী আলাপিনী চ। মূর্চ্ছনা-স্তিস্রঃ যমলী নির্ম্মলী কোমলী চ। ইতি নাদপুরাণং॥ * ॥ রাগভেদঃ। ইতি মেদিনী॥ অয়ং কল্লিনাথমতে সোমেশ্বর-মতে চ ষড়্রাগাণাং মধ্যে তৃতীয়রাগঃ। সোমেশ্বরমতে অস্য গানসময়ঃ শরদৃতুঃ প্রাতঃকালশ্চ। কল্লিনাথমতে অস্য রাগিণ্যঃ ষট্। যথা ত্রিবেণী ১ স্তম্ভতীর্থা ২ আভীরী ৩ কুকভ্ ৪ বরারী ৫ সাবীরী ৬। সোমেশ্বরমতে তু বিভাসা ১ ভূপালী ২ কার্ণাটী ৩ বড়হংসিকা ৪ মালশ্রীঃ ৫ পট মঞ্জরী ৬। অস্মিন্রাগে গান্ধারস্বরস্তীব্রঃ ঋষভপঞ্চমৌ স্বরৌ লুপ্তৌ। ষড়্জস্বরঃ গৃহাংশন্যাসাঃ। স চ হনূমন্মতে ভরত মতে চ ভৈরবরাগস্যাষ্টমপুত্রঃ। ইতি সঙ্গীতশাস্ত্রং॥

পঞ্চমকারং (ক্লী) মকারপঞ্চকং। পঞ্চতত্ত্বং। তত্তু মুদ্রামৈথুনমদ্যমাংসরূপং। যথা মদ্যং মাংসং তথা মৎস্যং মুদ্রাং মৈথুন-মেব চ। পঞ্চতত্ত্বমিদং দেবি নির্ব্বাণ-মুক্তিহেতবে॥ মকারপঞ্চকং দেবি দেবানামপি দুর্লভং। ইতি গুপ্তসাধন-তন্ত্রে ৭ পটলঃ॥ * ॥ মদ্যৈর্মাংসৈস্তথা মৎস্যৈর্মুদ্রাভির্মৈথুনৈরপি। স্ত্রীভিঃ সার্দ্ধং মহাসাধুরর্চ্চয়েদ্জগদম্বিকাং॥ অন্যথা চ মহানিন্দা গীয়তে পণ্ডিতৈঃ সুরৈঃ। কায়েন মনসা বাচা তস্মাত্তত্ত্বপরো ভবেৎ॥ ইতি কামাখ্যাতন্ত্রে ৫ পটলঃ॥ * ॥ যা সুরা সর্ব্বকার্য্যেষু কথিতা ভুবি মুক্তিদা। তস্যা নাম ভবেদ্দেবি তীর্থং পানং সুদু-র্লভং॥ শূদ্রাণাং ভক্ষ্যযোগ্যানাং যন্মাংসং দেবনির্ম্মিতং। বেদমন্ত্রেণ বিধিবৎ প্রোক্তা সা শুদ্ধিরুত্তমা॥ ভক্ষ্যযোগ্যাশ্চ কথিতা যে যে মৎস্যা বরাননে। তে রহস্যে ময়া প্রোক্তা মীনাঃ সিদ্ধিপ্রদায়কাঃ॥ পৃথুকা তণ্ডুলা ভ্রষ্টা গোধূমচণকাদয়ঃ। তস্য নাম ভবেদ্দেবি মুদ্রা মুক্তিপ্রদায়িনী॥ ভগলিঙ্গস্য যোগেন মৈথুনং যদ্ভবেৎ প্রিয়ে। তস্য নাম ভবেদ্দেবি পঞ্চমং

পরিকীর্ত্তিতং ॥ প্রথমন্তু ভবেন্মদ্যং মাংসঞ্চৈব দ্বিতীয়কং। মৎস্যঞ্চৈব তৃতীয়ং স্যান্মুদ্রা চৈব চতুর্থিকা ॥ পঞ্চমং পঞ্চমং বিদ্যাৎ পঞ্চৈতে নামতঃ স্মৃতাঃ ॥ ইতি সময়াচারতন্ত্রে ২ পটলঃ ॥ * ॥ অথ মৎস্যাদিব্যুৎপত্তিঃ। মায়ামলাদিশমনান্মোক্ষমার্গনিরূপণাৎ। অষ্টদুঃখাদিবিরহান্মৎস্যেতি পরিকীর্ত্তিতঃ ॥ মাঙ্গল্যজননাদ্দেবি সম্বিদানন্দদানতঃ। সর্ব্বদেবপ্রিয়ত্বাচ্চ মাংস ইত্যভিধীয়তে ॥ পঞ্চমং দেবি সর্ব্বেষু মম প্রাণপ্রিয়ং ভবেৎ। পঞ্চমেন বিনা দেবি চণ্ডীমন্ত্রং কথং জপেৎ ॥ যদি পঞ্চমকারেষু ভ্রান্তিশ্চেৎ কুরুতে প্রিয়ে। তস্য সিদ্ধিঃ কথং দেবি চণ্ডীমন্ত্রং কথং জপেৎ ॥ আনন্দং পরমং ব্রহ্ম মকারাস্তস্য সূচকাঃ। ইতি কুলার্ণবতন্ত্রে পঞ্চমখণ্ডে ১৭ উল্লাসঃ ॥*॥ তেষাং শোধনাদিকং বাহুল্যভিয়া লোকমোহভয়াচ্চ নোক্তং ॥

পঞ্চমহাযজ্ঞাঃ (পুং) গৃহস্থকর্ত্তব্যপঞ্চপ্রকারনিত্যকর্ম্মাণি। যথা। পাঠো হোমশ্চাতিথীনাং সপর্য্যা তর্পণং বলিঃ। এতৈঃ পঞ্চ মহাযজ্ঞা ব্রহ্মযজ্ঞাদিনামকৈঃ ॥ ইত্যমরঃ ॥

পঞ্চমারঃ (পুং) বলদেবপুত্ত্রঃ। ইতি শব্দমালা ॥

পঞ্চমাস্যঃ (পুং) কোকিলঃ। ইতি শব্দরত্নাবলী

পঞ্চমী (স্ত্রী) পাণ্ডবপত্নী। দ্রৌপদী। ইতি মেদিনী ॥ শারিশৃঙ্খলা। পাশার ছক্ ইতি ভাষা। ইতি ভূরিপ্রয়োগঃ ॥ * ॥ তিথিবিশেষঃ। সা চ চন্দ্রস্য পঞ্চমকলাক্রিয়ারূপা তদুপলক্ষিতকালশ্চ। পঞ্জিকাকারসঙ্কেতেন শুক্লপক্ষে ৫ কৃষ্ণপক্ষে ২০ এতদঙ্কবোধিতা ॥ * ॥ অথ পঞ্চমীব্যবস্থা। সা চ চতুর্থীযুতা গ্রাহ্যা যুগ্মাৎ। পঞ্চমী চ প্রকর্ত্তব্যা চতুর্থীসহিতা বিভো। ইতি স্কন্দপুরাণাচ্চ ॥ * ॥ অথ নাগপঞ্চমী। দেবীপুরাণে। সুপ্তে জনার্দ্দনে কৃষ্ণে পঞ্চম্যাং ভবনাঙ্গনে। পূজয়েন্মনসাদেবীং স্নুহীবিটপসংস্থিতাং ॥ পদ্মনাভে গতে শয্যাং দেবৈঃ সর্ব্বৈরনন্তরং। পঞ্চম্যামসিতে পক্ষে সমুত্তিষ্ঠতি পন্নগী ॥ দেবৈরিতি সহার্থে তৃতীয়া। তথা। দেবীং সংপূজ্য নত্বা চ ন সর্পভয়মাপ্নুয়াৎ। পঞ্চম্যাম্পূজয়েন্নাগাননন্তাদ্যান্মহোরগান্ ॥ ক্ষীরং সর্পিস্তু নৈবেদ্যং দেয়ং সর্ব্ববিষাপহং ॥ এবং গারুড়ে তথৈব নাগানাহ। অনন্তং বাসুকিং পদ্মং শঙ্খং কম্বলমেব চ। তথা কর্কোটকং নাগং ধৃতরাষ্ট্রঞ্চ শঙ্খকং ॥ কালীয়ং তক্ষকঞ্চৈব পিঙ্গলং মাসি মাসি চ। যজেত্তানসিতে নাগান্ দষ্টমুক্তো দিবং ব্রজেৎ ॥ পুরাণান্তরেঽপি। অনন্তো বাসুকিঃ পদ্মো মহাপদ্মোঽথ তক্ষকঃ। কুলিকঃ কর্কটঃ শঙ্খো হ্যষ্টৌ নাগাঃ প্রকীর্ত্তিতাঃ ॥ পুরাণান্তরেঽপি। শেষঃ পদ্মো মহাপদ্মঃ কুলীরঃ শঙ্খপালকঃ। বাসুকিস্তক্ষকশ্চৈব কালীয়ো মণিভদ্রকঃ ॥ ঐরাবতো ধৃতরাষ্ট্রঃ কর্কোটকধনঞ্জয়ৌ। অত্র চ। যোঽসৌ চানন্তরূপেণ

ব্রহ্মাণ্ডং সচরাচরং। পুষ্পবদ্ধারয়েন্মূর্দ্ধ্নি তস্মৈ নিত্যং নমো নমঃ॥ ইত্যনেন ওঁকারপূর্ব্বেণ মৎস্যপুরাণোক্তেনানন্তং পূজয়েৎ। রত্নাকরে। পিচুমর্দ্দস্য পত্রাণি স্থাপয়েন্তবনোদরে। স্বয়ঞ্চাপি তদশ্নীয়াদ্‌ব্রাহ্মণাংশ্চৈব ভোজয়েৎ॥ * ॥ অথ শ্রীপঞ্চমী। ভবিষ্যোত্তরে। মাঘশুক্লপক্ষমধিকৃত্য। চতুর্থী বরদা নাম তস্যাং গৌরী প্রপূজিতা। সৌভাগ্যমতুলং কুর্য্যাৎ পঞ্চম্যাং শ্রীরপি শ্রিয়ং॥ সম্বৎসরপ্রদীপে। পঞ্চম্যাং পূজয়েল্লক্ষ্মীং পুষ্পধূপান্নবারিভিঃ। মস্যাধারং লেখনীঞ্চ পূজয়েন্ন লিখেত্ততঃ॥ মাঘে মাসি সিতে পক্ষে পঞ্চমী যা শ্রিয়ঃ প্রিয়া। তস্যাঃ পূর্ব্বাহ্ণ এবেহ কার্য্যঃ সারস্বতোৎসবঃ॥ ইত্যুপাদানাৎ শ্রিয়ঃ স্বরসত্যাঃ। তথা চ ব্যাড়িঃ। লক্ষ্মীসরস্বতীধীত্রিবর্গসম্পদ্বিভূতিশোভাসু। উপকরণবেশরচনাবিধাসু চ শ্রীরিতি প্রথিতা॥ ধ্যানং যথা। তরুণশকলমিন্দোর্বিভ্রতী শুভ্রকান্তিঃ কুচভরনমিতাঙ্গী সন্নিষণ্ণা সিতাব্জে। নিজকরকমলোদ্যল্লেখনীপুস্তকশ্রীঃ সকলবিভবসিদ্ধ্যৈ পাতু বাগ্‌দেবতা নঃ॥ ইতি শারদোক্তং ধ্যায়েৎ। পাদ্যাদিভিঃ পূজয়িত্বা। ভদ্রকাল্যৈ নমো নিত্যং সরস্বত্যৈ নমো নমঃ। বেদবেদান্তবেদাঙ্গবিদ্যাস্থানেভ্য এব চ॥ স্বাহেতি ব্রহ্মপুরাণীয়েন ত্রিঃ পূজয়েৎ। মৎস্যসূক্তে। বন্ধুজীবঞ্চ দ্রোণঞ্চ সরস্বত্যৈ ন দাপয়েৎ। সরস্বতীং সংপূজ্য। যথা ন দেবো ভগবান্ ব্রহ্মা লোকপিতামহঃ। ত্বাং পরিত্যজ্য সন্তিষ্ঠেত্তথা ভব বরপ্রদা॥ বেদাঃ শাস্ত্রাণি সর্ব্বাণি নৃত্যগীতাদিকঞ্চ যৎ। ন বিহীনং ত্বয়া দেবি তথা মে সন্তু সিদ্ধয়ঃ॥ লক্ষ্মীর্মেধা ধরা পুষ্টির্গৌরী তুষ্টিঃ প্রভা ধৃতিঃ। এতাভিঃ পাহি তনুভিরষ্টাভির্ম্মাং সরস্বতি॥ ইতি মৎস্যপুরাণীয়ৈঃ প্রার্থয়েৎ॥ * ॥ অথ পঞ্চমীব্রতং। তচ্চ শুদ্ধকালে মাঘশুক্লপঞ্চম্যামারভ্য ষড়্বর্ষপর্য্যন্তং প্রতিমাসীয়শুক্লপঞ্চম্যাং কার্য্যং। যথা। ক্ষীরোদে চ পুরা সুপ্তং লক্ষ্মীসমন্বিতং হরিং। প্রণম্য পরিপপ্রচ্ছ নারদো মুনিসত্তমঃ॥ নারদ উবাচ। কেনোপায়েন দেবেশ নারীণাঞ্চ সুখং ভবেৎ। সৌভাগ্যমতুলং যাতি তন্মে ত্বং বক্তুমর্হসি॥ শ্রুত্বা তদ্বচনং দেবো নারদস্য মহাত্মনঃ। সংপ্রেক্ষ্য কমলাং সন্ধ্যে ব্রূহি দেবি শুভাননে॥ ইঙ্গিতং পত্যুরালোক্য পদ্মপত্রাক্ষবল্লভা। বল্লভং তং পুরস্কৃত্য প্রীত্যা ব্রতমুবাচ হ॥ দেব্যুবাচ। অস্তি শ্রীপঞ্চমীনাম ব্রতং পরমদুর্লভং। যৎ কৃত্বা প্রাপ্যতে লোকৈঃ সুখং সৌভাগ্যমুত্তমং॥ তত্র মাং পূজয়েদ্ভক্ত্যা মাধবঞ্চ প্রযত্নতঃ। গন্ধৈঃ পুষ্পৈশ্চ বস্ত্রৈশ্চ ধূপৈর্নানাবিধৈঃ ফলৈঃ॥ শ্রদ্ধয়া পূজয়েদ্‌ভক্ত্যা মাঘাদৌ পঞ্চমীদিনে। ইমাং ব্রহ্মপুরাণোক্তাং যা করোতি চ পঞ্চমীং॥ লক্ষ্মীসমা ভবেন্নারী ইহ লোকে পরত্র চ। বিধানং শৃণু ধর্ম্মজ্ঞ যাদৃশী পঞ্চমী মম॥ বর্ষাণি ষট্ প্রকর্ত্তব্যা পরমপ্রীতিমানসা। শুদ্ধকালে তু সংপ্রাপ্তে পঞ্চমী যা শুভা

ভবেৎ॥ তস্মামারভ্য কর্ত্তব্যং ব্রতং পাপপ্রণাশনং। স্বয়ং যতাত্মা ভূত্বা চ আরভেদ্‌ব্রতমুত্তমং ॥ আদ্যদ্বয়মলবণেন হবিষ্যেণ দ্বয়ং তথা। ফলেনৈকন্তু কর্ত্তব্যমুপবাসৈঃ প্রতিষ্ঠয়েৎ॥ প্রতিষ্ঠায়া বিধিরয়ং কাঞ্চনস্থ শ্রিয়ং হরিং। ব্রাহ্মণঞ্চ সপত্নীকং পূর্ব্বেদ্যুরধিবাসয়েৎ ॥ পঞ্চম্যামৃত্বিজং বিপ্রমাচার্য্যঞ্চ দ্বিজোত্তমং । পূজা চ বিবিধা কার্য্যা মূলমন্ত্রেণ ভক্তিতঃ ॥ হোমঞ্চ তিললাজানাং শতং কুর্য্যাৎ পৃথক্ পৃথক্। নৈবেদ্যং বিবিধং কুর্য্যাৎ লড্ডুকং পূপমুত্তমং॥ আসনং পাদ্যমর্ঘ্যঞ্চ তথাপ্যাচমনীয়কং । বাসৌ যজ্ঞোপবীতঞ্চ গন্ধপুষ্পফলং তথা॥ ছত্রং ধূপঃ প্রদীপশ্চ তাম্বূলং ফলমেব চ। গৌঃ শয্যা কম্বলশ্চৈব হিরণ্যং রজতং তথা॥ ব্রাহ্মণেভ্যঃ প্রদেয়ানি দক্ষিণাসংযুতানি চ। যথোক্তেন বিধানেন যা কুর্য্যাৎ পঞ্চমীব্রতং ॥ আসপ্তকুলমুদ্ধৃত্য বিষ্ণুলোকমবাপ্নুয়াৎ। শচীব পুরুহূতস্থ রতীব মদনস্থ চ ॥ শঙ্করস্থ যথা গৌরী তথা ভবতি সা শুভা। মাসি মাসি সিতে পক্ষে পঞ্চমী যা প্রকীর্ত্তিতা॥ তস্যাং পূজ্যা সদা দেবী ভক্তিতঃ কমলোদ্ভবা। লক্ষ্মীসমা ভবেন্নারী ষট্‌পঞ্চমীব্রতেন বৈ ॥ শ্রীপঞ্চমীব্রতং রম্যং যা করোতি পতিব্রতা। তস্থাহং স্থিরতাং যামি যথা নারায়ণে স্থিরা॥ মৎপ্রসাদান্মুনিশ্রেষ্ঠ সর্ব্বসৌভাগ্যমাপ্নুয়াৎ॥ ইতি ব্রহ্মপুরাণোক্তষট্‌পঞ্চমীব্রতকথা সমাপ্তা ॥ * ॥ অথ পঞ্চমীজাতফলং যথা।

ভূপালমান্যো মনুজঃ সুগাত্রঃ কৃপাসমেতো বিদুষাং বরেণ্যঃ। বাগ্মী গুণী বন্ধুজনৈকমান্যঃ প্রসূতিকালে যদি পঞ্চমী স্যাৎ॥ ইতি কোষ্ঠীপ্রদীপঃ ॥ বিদ্যাবিশেষঃ। তদ্বিবরণং যথা। কামং বিষ্ণুযুতং দেবি শক্তিমায়েন্দ্রমেব চ। মহামায়াং ততঃ পশ্চাৎ বাগ্‌ভবং বীজমুদ্ধরেৎ॥ বিষ্ণুযুতং অকারযুক্তমিত্যর্থঃ। শক্তিরেকারঃ। মায়া ঈকারঃ। বিয়চ্চন্দ্রস্ততঃ পশ্চাৎ কলৌ নকুলিরেব চ। মায়াস্বরেণ সংযুক্তং নাদবিন্দুকলান্বিতং ॥ প্রথমং কামরাজস্য বীজং পরমদুর্লভং। *। বিয়দ্বিষ্ণুযুতং কামো হংসঃ শক্রস্ততঃ পরং ॥ মহামায়া ততঃ পশ্চাৎ স্বপ্নাবর্তীতি কথ্যতে। হংসো হকারঃ। এতদ্দ্বিতীয়ং কামকূটং॥ *॥ মাদনং শিববীজঞ্চ বায়ুবীজং ততঃ পরং। ইন্দ্রবীজং ততঃ পশ্চাৎ মহামায়াং সমুদ্ধরেৎ॥ ইতি তৃতীয়ং। ইয়ং মধুমতী ॥ * ॥ শিববীজং তথা কামং ইন্দ্রং দেবীং নিযোজয়েৎ। মহামায়াং ততঃ পশ্চাৎ শক্তিকূটং সমুদ্ধরেৎ॥ দেবীং সকারং। বাগ্‌ভবং প্রথমং কূটং শক্তিকূটন্তু পঞ্চমং। মধ্যকূটত্রয়ং দেবি কামরাজং মনোহরং॥ কথিতা পঞ্চমী বিদ্যা ত্রৈলোক্যসুভগোদয়া। *। ঈশ্বর উবাচ। শৃণু দেবি মহাভাগে শক্তিকূটং সুদুর্লভং। বাগ্‌ভবং প্রথমং কূটং কামরাজং ত্রিকূটকং॥ শক্তিকূটং প্রবক্ষ্যামি তব স্নেহাৎ বিশেষতঃ। জীবপ্রাণৌ মহাদেবি মাদনং

তদনন্তরং॥ ইন্দ্রবীজং ততঃ পশ্চাৎ ভুবনেশী তু পঞ্চমং। জীবঃ সকারঃ। প্রাণো হকারঃ। ইতি বা শক্তিকূটং ॥ * ॥ অথবা দেবদেবেশি সৌভাগ্যায়াশ্চ বাগ্‌ভবং। কূটত্রয়ং কামরাজং শক্তিবীজঞ্চ পূর্ব্ববং ॥ এষা শাক্তা মহাদেবি পঞ্চমী পরমেশ্বরী। অস্যা বাগ্‌ভবং কূটং হিত্বা সৌভাগ্যায়াঃ প্রথমকূটং বাগ্‌ভবং কূটমিত্যর্থঃ। কামরাজকূটত্রয়ং পঞ্চম্যা এব। বামনেত্রাদিকূটং বা ভগাদিকূটমেব বা। অরিহা সিদ্ধিদা বিদ্যা সর্ব্বদোষবিবর্জ্জিতা ॥ ভগ একারঃ। এতেনাষ্টধা পঞ্চমী বাগ্‌ভবশক্তিকূটভেদেন ॥ * ॥ যামলে। দ্বিবিধা পঞ্চমী বিদ্যা পঞ্চপঞ্চাক্ষরী পরা। মধ্যে ষড়ক্ষরী চৈব শক্তিশ্চ চতুরক্ষরী ॥ ষড়িতি কামরাজবিদ্যায়া মধ্যকূটমিত্যর্থঃ। শক্তিরিতি কামরাজস্য শক্তিকূটমিত্যর্থঃ। এষা চতুর্দ্ধা বাগ্‌ভবকূটভেদাৎ। এতয়োঃ কামরাজস্য তৃতীয়কূটস্তু তত্রৈব ॥ * ॥ কামবীজং মহেশানি শিববীজং ততঃ পরং। তদধো হংসবীজন্তু ইন্দ্রবীজং বিচিন্তয়েৎ ॥ মহামায়াং ততঃ পশ্চাৎ কূটং পরমদুর্লভং। এষা পূর্ব্ববদষ্টধা। অন্যা চতুর্দ্ধা ॥ * ॥ তথা তত্ত্ববোধে। কামাকাশপরা শক্র সংস্থানকৃতরূপিণী। পরা সকারঃ। সংস্থানকৃতরূপিণী মহামায়া ॥ * ॥ তথা চ তন্ত্রে। কামবীজং মহেশানি শম্ভুবীজং ততঃ পরং। তদধশ্চন্দ্রবীজন্তু পৃথ্বীবীজং ততো লিখেৎ ॥ তদন্তে চ মহামায়া কূটং পরমদুর্লভং।

এষা পূর্ব্ববদষ্টধা। অন্যা চতুর্দ্ধা। তেন ষট্‌ত্রিংশদ্রূপিণী পঞ্চমী ॥ * ॥ হংসমাহেশ্বরে। বামকেশ্বরবিদ্যায়াঃ কূটং বাগ্‌ভবমুত্তমং। একারাদি বাগ্‌ভবন্তু কূটং বাগ্‌ভবমুত্তমং ॥ একারাদি বাগ্‌ভবস্তু সৌভাগ্যায়াশ্চ বাগ্‌ভবং। এষা চ পঞ্চমী বিদ্যা ত্রৈলোক্যবশকারিণী ॥ * ॥ শ্রীক্রমে। এতাসাং চৈব বিদ্যানাং প্রাণং শৃণু বরাননে। রমাং মায়াং হংসবীজং বাগ্‌ভবাদ্যে নিযোজয়েৎ ॥ শক্ত্যন্তে তু মহাদেবি হংসং মায়াং রমাং তথা। এভির্যুক্তেন দেবেশি বিদ্যাজপনমাচরেৎ ॥ জপশ্চ সপ্তবারমেব দীপন্যাং তথা দর্শনাৎ। এতাসাং পূর্ব্বোক্তশ্রীক্রমোক্তবিদ্যানাং ॥ * ॥ পঞ্চম্যাস্তু বিশেষো যথা। রমাং মায়াং হংসবীজং বাগ্‌ভবাদ্যে নিযোজয়েৎ। শক্ত্যন্তে তু মহেশানি হংসং মায়াং রমাং তথা ॥ কামরাজত্রয়ে দেবি ককারং শক্রসংযুতং। মায়াবিন্দ্বীশ্বরযুতং সূর্য্যকোটিসমপ্রভং ॥ প্রথমং কামকূটস্য চাদ্যে নিযোজয়েদিদং। বান্তং বহ্নিসমাযুক্তং বামনেত্রবিভূষিতং ॥ নাদবিন্দুসমাযুক্তং শ্রিয়ো বীজমুদাহৃতং। দ্বিতীয়ং কামবীজন্তু জপেদুক্ত্বা চ সুন্দরি ॥ গগনং বহ্নিসংযুক্তং বামনেত্রবিভূষিতং। নাদবিন্দুসমাযুক্তং মায়াবীজং প্রকীর্ত্তিতং ॥ মধুমতীং জপেচ্চাপি সর্ব্বকামফলপ্রদাং। ইতি তন্ত্রসারঃ ॥ * ॥ * ॥ রাগিণীবিশেষঃ। সা চ বসন্তরাগস্য প্রিয়া। যথা। বসন্তী পঞ্চমী দোলী বহারী রূপমঞ্জরী। রাগিণ্য

ঋতুরাজস্য বসন্তস্য প্রিয়া ইমাঃ ॥ অস্যা ধ্যানং যথা। সঙ্গীতগোষ্ঠীষু গরিষ্ঠভাবং সমাশ্রিতা গায়নসম্প্রদায়ৈঃ। খর্ব্বাঙ্গিণী নূপুরপাদপদ্মা সা পঞ্চমী পঞ্চমবেদবেত্রী ॥ ইতি সঙ্গীতদর্পণঃ ॥

পঞ্চমীব্রতং (ক্লী) মাঘশুক্লপঞ্চমীমারভ্য ষড়্বর্ষপর্য্যন্তং প্রতিমাসীয়শুক্লপঞ্চম্যাং স্ত্রীকর্ত্তব্যনিয়মবিশেষঃ। তৎপ্রয়োগো যথা। তত্রাদৌ কৃতনিত্যক্রিয়া যজমানা কুশহস্তাচম্য স্বস্তিবাচনপূর্ব্বকং সঙ্কল্পং কুর্য্যাৎ। বিষ্ণুর্নমোঽদ্য মাঘে মাসি শুক্লে পক্ষে পঞ্চম্যাং তিথৌ অমুকগোত্রা শ্রী-অমুকী পুত্রপৌত্রাদ্যনবচ্ছিন্নসন্ততিমহদৈশ্বর্য্যসৌভাগ্যারোগ্যসৌন্দর্য্যাবৈধব্যপ্রাপ্তি-পূর্ব্বকবিষ্ণুলোকপ্রাপ্তিকামা অদ্যারভ্য ষড়্বর্ষপর্য্যন্তং প্রতিমাসীয়শুক্লপঞ্চম্যাং গণপত্যাদিনানাদেবতাসলক্ষ্মীকবাসুদেবপূজাপূর্ব্বকভবিষ্যপুরাণোক্তকথাশ্রবণরূপষট্-পঞ্চমীব্রতমহং করিষ্যে। ইতি সঙ্কল্প্য সূক্তং পাঠয়েৎ। ততঃ সামান্যার্ঘ্যাদি আসনশুদ্ধিভূতশুদ্ধিমাতৃকান্যাসকরাঙ্গন্যাসান্তং কৃত্বা গণেশাদীন্ সংপূজ্য লক্ষ্মীং নারায়ণঞ্চ যথাশক্তি পূজয়েৎ। ততো ভোজ্যোৎসর্গং কৃত্বা প্রণমেৎ ॥ * ॥ অথ কথা। শেষশয্যাসমাসীনং লক্ষ্মীধৃত-পদাম্বুজং। যোগনিদ্রান্বিতং কৃষ্ণং নারদঃ পরিপৃচ্ছতি ॥ কেনোপায়েন ভগবন্নারী দুঃখং ন বিন্দতি। সৌভাগ্যারোগ্যসৌন্দর্য্যপুত্রপৌত্রাদিকং লভেৎ ॥ ইত্যুক্তো মাধবশ্চক্রে লক্ষ্মীমুখনিরীক্ষণং। ইঙ্গিতাকারতত্ত্বজ্ঞা পদ্মা পদ্মাক্ষবল্লভা। বল্লভাজ্ঞাং পুরস্কৃত্য প্রীতা বচনমব্রবীৎ ॥ * ॥ শ্রীরুবাচ। ষট্পঞ্চমীব্রতং সম্যক্ শ্রূয়তাং পাপনাশনং। সৌভাগ্যারোগ্যসৌন্দর্য্যপুত্রপৌত্রধনপ্রদং ॥ মাঘে মাসি সিতে পক্ষে পঞ্চমী যা শুভা ভবেৎ। তস্যামারভ্য কর্ত্তব্যং ষড়ব্দং ব্রতমুত্তমং ॥ প্রতিমাসি চ পঞ্চম্যাং লক্ষ্মীং সংপূজ্য কেশবং। পূজয়েদ্গন্ধপুষ্পাদ্যৈর্নৈবেদ্যৈশ্চ পৃথগ্বিধৈঃ ॥ কুর্য্যাদ্ধোমঞ্চ বিধিবৎ গণেশস্য গ্রহস্য চ। বিষ্ণোশ্চ লক্ষ্ম্যা বাগ্দেব্যা দুর্গায়া বিভবক্রমাৎ॥ অন্যেষাঞ্চ যথাশক্তি তিলাজ্যযবধান্যকৈঃ। ততোঽশ্নীয়াদলবণমাদৌ সংবৎসরদ্বয়ং ॥ তৃতীয়ে চ চতুর্থে চ হবিষ্যান্নঞ্চ ভোজয়েৎ। পঞ্চমে ফলমশ্নীয়াৎ ষষ্ঠে কুর্য্যাদুপোষণং। ষষ্ঠে প্রতিষ্ঠা কর্ত্তব্যা ভোজয়েদ্দ্বাদশ দ্বিজান্ ॥ তত্র ষোড়শদানানি হেমশৃঙ্গীমলঙ্কৃতাং। দক্ষিণাসহিতাং দদ্যাদাচার্য্যায় মুনীশ্বর ॥ ততঃ ষড্ডল্লকং দদ্যাৎ সর্ব্বালঙ্কার-ভূষিতং। কাঞ্চনপ্রতিমাযুগ্মলক্ষ্মীনারায়ণান্বিতং ॥ বিধিনানেন যা কুর্য্যাৎ পঞ্চমীব্রতমুত্তমং। স্ববংশাংস্তু সমুদ্ধৃত্য বিষ্ণুলোকমবাপ্নুয়াৎ ॥ এতত্তে কথিতং বিপ্র মর্ত্যলোকে প্রকাশিতং। শোকসন্তাপ-হানিশ্চ বৃথাদুঃখং ন জায়তে ॥ ধন্যং যশস্যমায়ুষ্যমৈশ্বর্য্যঞ্চাপি বর্দ্ধয়েৎ। যাশ্চ কুর্ব্বন্তি ভূর্লোকে তাসাং সর্ব্বং সুখাবহং ॥ * ॥ শ্রীরুবাচ। শৃণু সত্যং মুনিশ্রেষ্ঠ দেব্যা যৎ কথিতং ময়ি।

তদনুষ্ঠানসর্ব্বস্ত প্রতিষ্ঠাঞ্চ দ্বিজোত্তম ॥ যা করোতি ব্রতং সাধ্বী সর্ব্বকামফলং লভেৎ। তস্যাঃ শ্রীর্নিশ্চলা গেহে সত্যং সত্যং হি নারদ ॥ যথেন্দ্রাণী মহেন্দ্রস্য লক্ষ্মীর্লক্ষ্মীপতের্যথা। শঙ্করস্য যথা গৌরী সাপি ভর্ত্তুর্ভবেত্তথা ॥ যা পঞ্চমীব্রতং কুর্য্যাৎ সা ভবেচ্চ পতিব্রতা। যথোক্ত-বিধিনা যা তু কুর্ব্বীত ব্রতমুত্তমং ॥ পুত্র-পৌত্রধনৈশ্বর্য্যং পঞ্চমীকরণাদপি। এতত্তে কথিতং সর্ব্বং তত্ত্বং কমললোচন ॥ * ॥ নারদ উবাচ। কেনাপি কথিতং পূর্ব্বং কৃতং কেনাপি বা পুনঃ। প্রাপ্তং কুত্র ত্বয়া দেবি শ্রোতুমিচ্ছামি তদ্বদ ॥ * ॥ শ্রীরুবাচ। মাঘে মাসি সিতে পক্ষে পঞ্চ-ম্যাঞ্চ মহামুনে। নিশাবসানসময়ে চন্দ্র-ভাগাং মহানদীং ॥ হংসসঙ্ঘৈঃ সমাকীর্ণাং নলিনীপুলিনোজ্জ্বলাং। তত্র গৌরী শচী মেধা সাবিত্রী চোর্ব্বশী পরা ॥ নারায়ণং সমারোপ্য কুর্ব্বন্তি ব্রতমুত্তমং। কাম্য-ব্রতমিদং পদ্মে লভতে ফলমুত্তমং ॥ হর্ষ-বতীঞ্চ তাং বীক্ষ্য প্রোবাচ কমলালয়া। পুষ্পঞ্চ দেহি মে ধূপং দীপং নৈবেদ্য ডল্লকং ॥ ময়া তব প্রসাদেন ক্রিয়তে ব্রতমুত্তমং। ততস্তাসাং ফলৈঃ পুষ্পৈ নৈবেদ্যৈশ্চ ব্রতং কৃতং ॥ ততস্তাসাং প্রসাদেন বল্লভাহং জনার্দ্দন। ত্বয়ি দেব জগন্নাথ নরনারীগণেন চ ॥ ভক্ত্যা ময়া তে কথিতং মর্ত্যলোকে প্রকাশিতং। যা করোতি ব্রতং হ্যেতৎ যথাবিধিবিধা-নতঃ ॥ ইহ লোকে সুখং ভুক্ত্বা নারায়ণ-পুরং ব্রজেৎ। শ্রুত্বা ব্রতস্য মাহাত্ম্যং ব্রতমেতৎ চরন্তি যাঃ ॥ ন কিঞ্চিদ্দুষ্কৃতং লোকে তাসাং সত্যং বদাম্যহং। হরন্তি তাসাং পাপানি যাশ্চ কুর্ব্বন্ত্যহর্নিশং ॥ নারায়ণং নমস্কৃত্য প্রপূজ্য চ বিসর্জ্জয়েৎ। ইতি ভবিষ্যপুরাণোক্তা ষট্‌পঞ্চমীব্রতকথা সমাপ্তা ॥

পঞ্চমুখঃ (পুং) সিংহঃ। ইতি রাজনির্ঘণ্টঃ ॥ শিবঃ। ইতি হেমচন্দ্রঃ ॥ তস্য নাম-বর্ণাদি যথা। শিবস্তত্র স্থিতঃ সাক্ষাৎ সর্ব্বপাপহরঃ শুভঃ। স তু পঞ্চমুখঃ খ্যাতো লোকে সর্ব্বার্থসাধকঃ। পঞ্চ ব্রহ্মাত্মকো যস্মাত্তেন পঞ্চমুখঃ স্মৃতঃ ॥ পশ্চিমে তু মুখে সদ্যো বামদেবস্তথো-ত্তরে। পূর্ব্বে তৎপুরুষং বিদ্যাদঘোর-ঞ্চাপি দক্ষিণে ॥ ঈশানঃ পঞ্চমো মধ্যে সর্ব্বেষামুপরি স্থিতঃ। এতে পঞ্চ মুখা বৎস পাপঘ্না গ্রহনাশনাঃ ॥ সদ্যোজাতং ভবেচ্ছুক্লং বামদেবস্তু পীতকং। রক্তস্তৎ-পুরুষো জ্ঞেয়োঽঘোরঃ কৃষ্ণঃ স এব চ ॥ ঈশানঃ পশ্চিমস্তেষাং সর্ব্ববর্ণসমন্বিতঃ। কামদঃ কামরূপী স্যাৎ জ্ঞানাধারঃ শিবা-ত্মকঃ ॥ ইতি দেবীপুরাণং ॥

পঞ্চমুখী (স্ত্রী) বাসকঃ। ইতি রাজনির্ঘণ্টঃ ॥ জবাপুষ্পবিশেষশ্চ ॥

পঞ্চমুদ্রা (স্ত্রী) পূজায়াং কর্ত্তব্যা পঞ্চপ্রকার-মুদ্রা। তস্যা অনুষ্ঠানং যথা। সম্যক্ প্রপূরিতঃ পুষ্পৈঃ করাভ্যাং কল্পিতো-ঽঞ্জলিঃ। আবাহনী সমাখ্যাতো মুদ্রা দেশিকসত্তমৈঃ ॥ ১ ॥ অধোমুখী ত্বিয়ঞ্চেৎ

স্যাৎ স্থাপনী মুদ্রিকা ভবেৎ। ২। উচ্ছ্রিতাঙ্গুষ্ঠমুষ্ট্যোস্তু সংযোগাৎ সন্নিধাপনী ॥ ৩ ॥ অন্তঃপ্রবেশিতাঙ্গুষ্ঠা সৈব সম্বোধনী মতা। ৪। উত্তানমুষ্টিযুগলা সংমুখী করণী মতা ॥৫॥ ইতি পূজাপ্রদীপঃ ॥

পঞ্চমূত্রং (ক্লী) গবাজামেষীমহিষীগর্দ্দভীমূত্রং। ইতি রাজনির্ঘণ্টঃ ॥

পঞ্চমূলং (ক্লী) স্বনামখ্যাতপাচনং। তৎ ত্রিবিধং বৃহৎ স্বল্পং তৃণাখ্যঞ্চ। আদ্যং যথা। বিল্বশ্যোণাকগাম্ভারীপাটলা গণিকারিকা। কফবাতহরং শ্রেষ্ঠং পঞ্চমূলমিদং মহৎ ॥ দ্বিতীয়ং যথা। শালপর্ণী পৃশ্নিপর্ণী বৃহতীদ্বয়গোক্ষুরং। বাতপিত্তহরং বৃষ্যং কনীয়ঃ পঞ্চমূলকং ॥ তৃতীয়ং যথা। কুশঃ কাশঃ শরো দর্ভ ইক্ষুশ্চেতি তৃণোদ্ভবঃ। ইতি চক্রপাণিদত্তঃ ॥ অপি চ। বিল্বাগ্নিমন্থশ্যোণাককাশ্মর্য্যঃ পাটলা তথা। জ্ঞেয়ং বৃহৎ পঞ্চমূলং পঞ্চমূলমিতি স্মৃতং ॥ শরেক্ষুদর্ভকাশানাং নলস্য মূলমেব চ। সৌশ্রুতঞ্চারুকঞ্চৈব তৃণাখ্যং পঞ্চমূলকং ॥ ইতি শব্দচন্দ্রিকা ॥

পঞ্চমূলী (স্ত্রী) স্বল্পপঞ্চমূলপাচনং। যথা। শালপর্ণী পৃশ্নিপর্ণী বৃহতী কণ্টকারিকা। তথা গোক্ষুরকঞ্চৈব পঞ্চমূলী কনীয়সী ॥ ইতি শব্দচন্দ্রিকা ॥

পঞ্চযজ্ঞাঃ (পুং) গৃহস্থকর্ত্তব্যপঞ্চপ্রকারযজ্ঞবিশেষাঃ। যথা। ব্রহ্মযজ্ঞো নৃযজ্ঞশ্চ দেবযজ্ঞশ্চ সত্তম। পিতৃযজ্ঞো ভূতযজ্ঞঃ পঞ্চযজ্ঞাঃ প্রকীর্ত্তিতাঃ ॥ ইতি পাদ্মে ক্রিয়াযোগসারে ১৬ অধ্যায়ঃ ॥ শূদ্রমধিকৃত্য নমস্কারেণ মন্ত্রেণ পঞ্চযজ্ঞান্ন হাপয়েৎ। ইতি তিথ্যাদিতত্ত্বং ॥ অস্য বিবরণং পঞ্চমহাযজ্ঞশব্দে দ্রষ্টব্যং ॥

পঞ্চরত্নং (ক্লী) পঞ্চানাং রত্নানাং সমাহারঃ। তদ্যথা। কনকং ১ হীরকং ২ নীলমণিঃ ৩ পদ্মরাগঃ ৪ মুক্তা ৫। যথা। কনকং হীরকং নীলং পদ্মরাগঞ্চ মৌক্তিকং। পঞ্চরত্নমিদং প্রোক্তমৃষিভিঃ পূর্ব্বদর্শিভিঃ ॥ রত্নানাঞ্চাপ্যভাবে তু স্বর্ণং কর্ষার্দ্ধমেব বা। সুবর্ণস্যাপ্যভাবে তু আজ্যং জ্ঞেয়ং বিচক্ষণৈঃ ॥ ইতি হেমাদ্রিঃ ॥ কনকরজতপ্রবালমৌক্তিকরাজপট্টাত্মকমিতি গৌড়াঃ ॥

পঞ্চরসা (স্ত্রী) আমলকী। ইতি হারাবলী শব্দমালা চ ॥

পঞ্চরক্ষকঃ (পুং) পক্তপোড়বৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

পঞ্চরাত্রং (ক্লী) গ্রন্থবিশেষঃ। যথা। রাত্রঞ্চ জ্ঞানবচনং জ্ঞানং পঞ্চবিধং স্মৃতং। তেনেদং পঞ্চরাত্রঞ্চ প্রবদন্তি মনীষিণঃ ॥ প্রথমং সাত্ত্বিকং জ্ঞানং দ্বিতীয়ন্তু তদেব চ। নৈর্গুণ্যঞ্চ তৃতীয়ঞ্চ জ্ঞানঞ্চ সর্ব্বতঃ পরং ॥ চতুর্থঞ্চ রাজসিকং ভক্তস্তন্নাভিবাঞ্ছতি। পঞ্চমং তামসং জ্ঞানং বিদ্বাংস্তন্নাভিবাঞ্ছতি ॥ জ্ঞানং পঞ্চবিধং প্রোক্তং পঞ্চরাত্রং বিদুর্বুধাঃ ॥ তৎ সপ্তবিধং যথা। পঞ্চরাত্রং সপ্তবিধং জ্ঞানিনাং জ্ঞানদং পরং। ব্রাহ্মং শৈবঞ্চ কৌমারং বাশিষ্ঠং কাপিলং পরং ॥ গৌতমীয়ং নারদীয়মিদং সপ্তবিধং স্মৃতং ॥ ইতি নারদপঞ্চরাত্রে প্রথমরাত্রং ॥ অপি চ

পঞ্চকং পঞ্চরাত্রাণাং কৃষ্ণমাহাত্ম্যপূর্ব্বক.. বাশিষ্ঠং নারদীয়ঞ্চ কাপিলং গৌতমীয়কং। পরং সনৎকুমারীয়ং পঞ্চরাত্রঞ্চ পঞ্চকং॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ১৩২ অধ্যায়ঃ॥ এতদতিরিক্তানি হয়শীর্ষপৃথুধ্রুবাদিপঞ্চরাত্রাণি সন্তি। পঞ্চনিশাঃ। যথা ত্রিরাত্রং পঞ্চরাত্রম্বা দশরাত্রমথাপি বা। লঙ্ঘনং সন্নিপাতেষু কুর্য্যাদারোগ্যদর্শনাৎ॥ ইতি চক্রপাণিদত্তঃ॥

পঞ্চলক্ষণং (ক্লী) পুরাণং। যথা। সর্গশ্চ প্রতিসর্গশ্চ বংশো মন্বন্তরাণি চ। বংশানুচরিতঞ্চৈব পুরাণং পঞ্চলক্ষণং॥ ইত্যমরভরতৌ॥

পঞ্চলবণং (ক্লী) পঞ্চানাং লবণানাং সমাহারঃ। তদ্যথা। কাচং। সৈন্ধবং। সামুদ্রং। বিড়ং। সৌবর্চ্চলং। ইতি রাজনির্ঘণ্টঃ॥

পঞ্চলাঙ্গলকং (ক্লী) মহাদানভেদঃ। যথা। অথাতঃ সংপ্রবক্ষ্যামি মহাদানমনুত্তমং। পঞ্চলাঙ্গলকং নাম মহাপাতকনাশনং॥ পুণ্যাং তিথিং সমাসাদ্য যুগাদিগ্রহণাদিকং। ভূমিদানং ততো দদ্যাৎ পঞ্চলাঙ্গলকান্বিতং॥ কর্ব্বটং খেটকঞ্চাপি গ্রামং বা শস্যশালিনং। নিবর্ত্তনশতং বাপি তদর্দ্ধং বাপি শক্তিতঃ॥ সারদারুময়ান্ কৃত্বা হলান্ পঞ্চ বিচক্ষণঃ। সর্ব্বোপকরণৈর্যুক্তানন্যান্ পঞ্চ চ কাঞ্চনান্॥ বৃষলক্ষণসংযুক্তান্ দশৈব তু ধুরন্ধরান্। সুবর্ণশৃঙ্গাভরণান্ মুক্তালাঙ্গূলভূষিতান্॥ রৌপ্যপাদাগ্রতিলকানুরক্তকৌশেয়ভূষণান্। স্রগ্দামচন্দনযুতান্ শালায়ামধিবাসয়েৎ॥ পর্জ্জন্যাদিত্যরুদ্রেভ্যঃ পায়সং নির্ব্বপেৎ চরুং। একস্মিন্নেব কুণ্ডে তু গুরুর্যস্মিন্নিবেদয়েৎ॥ পালাশাঃ সমিধস্তদ্বদাজ্যং কৃষ্ণতিলাংস্তথা। তুলাপুরুষবৎ কুর্য্যাৎ লোকেশাবাহনং বুধঃ॥ ততো মঙ্গলশব্দেন যুক্তমাল্যাম্বরো বুধঃ। আহূয় দ্বিজদাম্পত্যং হেমসূত্রাঙ্গুরীয়কৈঃ॥ কৌশেয়বস্ত্রকটকৈর্ম্মণিভিশ্চাপি পূজয়েৎ। শয্যাং সোপস্করাং তদ্বদ্ধেনুমেকাং পয়স্বিনীং॥ তথাষ্টাদশ ধান্যানি সমন্তাদধিবাসয়েৎ। ততঃ প্রদক্ষিণং কৃত্বা গৃহীতকুসুমাঞ্জলিঃ॥ ইমমুচ্চারয়েন্মন্ত্রমথ সর্ব্বং নিবেদয়েৎ। যস্মাদ্দেবগণাঃ সর্ব্বে স্থাবরাণি চরাণি চ॥ ধুরন্ধরাঙ্গে তিষ্ঠন্তি তস্মাদ্ভক্তিঃ শিবেঽস্তু মে। যস্মাচ্চ ভূমিদানস্য কলাং নার্হন্তি ষোড়শীং॥ দানান্যন্যানি মে ভক্তির্ধর্ম্ম এব দৃঢ়া ভবেৎ। দণ্ডেন সপ্তহস্তেন ত্রিংশদ্দণ্ডান্নিবর্ত্তনং॥ ত্রিভাগহীনং গোচর্ম্মমানমাহ প্রজাপতিঃ। মানেনানেন যো দদ্যাৎ নিবর্ত্তনশতং বুধঃ॥ বিধিনানেন তস্যাশু ক্ষীয়তে পাপসংহতিঃ। তদর্দ্ধমথবা দদ্যাদপি গোচর্ম্মমাত্রকং। ভবনস্থানমাত্রং বা সোঽপি পাপৈঃ প্রমুচ্যতে॥ যাবন্তি লাঙ্গলকমার্গমুখানি ভূমেস্তাসাং পতির্দুহিতুরঙ্গজরোমকাণি। তাবন্তি শঙ্করপুরে বর্ষাণি তিষ্ঠেদ্ভূমিপ্রদানমথ যঃ কুরুতে মনুষ্যঃ॥ গন্ধর্ব্বকিন্নরসুরাসুরসিদ্ধসংঘৈরাধূতচামর-

মুপেত্য মহদ্বিমানং। সম্পূজ্যতে পিতৃপিতামহবন্ধুযুক্তঃ শম্ভোঃ পুরং ব্রজতি চামরনায়কঃ সন্ ॥ ইন্দ্রত্বমপ্যধিগতং ক্ষয়মভ্যুপৈতি গোভূমিলাঙ্গলধুরন্ধরসংপ্রদানাৎ। তস্মাদঘৌঘপটলক্ষয়কারিভূমের্দানং বিধেয়মিতি ভূতিভবাভবায় ॥ ইতি মাৎস্যে ২৫৭ অধ্যায়ঃ ॥

পঞ্চলোহং (ক্লী) সৌরাষ্ট্রকলোহং। ইতি হেমচন্দ্রঃ ॥

পঞ্চলোহকং (ক্লী) পঞ্চানাং লোহকানাং ধাতূনাং সমাহারঃ। তদ্যথা। সুবর্ণরজততাম্রবঙ্গনাগানি। ইতি রাজনির্ঘণ্টঃ ॥

পঞ্চবটঃ (পুং) উরস্কটঃ। তৎপর্য্যায়ঃ। জোটিঙ্গঃ ২ মহাব্রতী ৩ বালযজ্ঞোপবীতকং ৪। ইতি ত্রিকাণ্ডশেষঃ ॥

পঞ্চবটী (স্ত্রী) পঞ্চপ্রকারবৃক্ষবিশেষঃ। যথা। অশ্বত্থবিল্ববৃক্ষঞ্চ বটধাত্রীঅশোককং। বটীপঞ্চকমিত্যুক্তং স্থাপয়েৎ পঞ্চদিক্ষু চ ॥ অশ্বত্থং স্থাপয়েৎ প্রাচি বিল্বমুত্তরভাগতঃ। বটং পশ্চিমভাগে তু ধাত্রীং দক্ষিণতস্তথা॥ অশোকং বহ্নিদিক্স্থাপ্যং তপস্যার্থং সুরেশ্বরি। মধ্যে বেদীং চতুর্হস্তাং সুন্দরীং সুমনোহরাং ॥ প্রতিষ্ঠাং কারয়েত্তস্যাঃ পঞ্চবর্ষোত্তরং শিবে। অনন্তফলদাত্রী সা তপস্যাফলদায়িনী ॥ * ॥ ইয়ং পঞ্চবটী প্রোক্তা বৃহৎপঞ্চবটীং শৃণু। বিল্ববৃক্ষং মধ্যভাগে চতুর্দ্দিক্ষু চতুষ্টয়ং ॥ বটবৃক্ষং চতুষ্কোণে বেদসংখ্যং প্ররোপয়েৎ। অশোকং বর্তুলাকারং পঞ্চবিংশতিসম্মিতং ॥ দিগ্বিদিক্ষ্বামলকীঞ্চৈব একৈকং পরমেশ্বরি। অশ্বত্থঞ্চ চতুর্দ্দিক্ষু বৃহৎপঞ্চবটী ভবেৎ ॥ যঃ করোতি মহেশানি সাক্ষাদিন্দ্রসমো ভবেৎ। ইহ লোকে মন্ত্রসিদ্ধিঃ পরে চ পরমা গতিঃ ॥ ইতি হেমাদ্রীয়ব্রতখণ্ডধৃতস্কন্দপুরাণবচনানি ॥

পঞ্চবক্ত্রঃ (পুং) শিবঃ। অস্য মন্ত্রা যথা। সমস্তানাং স্বরাণাস্তু দীর্ঘাঃ শেষাঃ সবিন্দুকাঃ। ঋঃকশূন্যাঃ সার্দ্ধচন্দ্রা উপান্তে নাভিসংহিতাঃ॥ এভিঃ পঞ্চাক্ষরৈর্ম্মন্ত্রং পঞ্চবক্ত্রস্য কীর্ত্তিতং। ক্রমাৎ সম্মদসন্দোহমাদগৌরবসংজ্ঞকাঃ ॥ প্রাসাদস্তু ভবেৎ শেষং পঞ্চমন্ত্রাঃ প্রকীর্ত্তিতাঃ। একৈকেন তথৈবৈকং বক্ত্রং মন্ত্রেণ পূজয়েৎ ॥ একং সমুদিতং কৃত্বা পঞ্চভির্ব্বা প্রপূজয়েৎ। প্রাসাদেনাথবা পঞ্চবক্ত্রং দেবং প্রপূজয়েৎ ॥ সম্মদাদিষু মন্ত্রেষু প্রাসাদস্তু প্রশস্যতে। শম্ভোঃ প্রসাদনেনৈব যস্মাদ্বৃত্তস্তু মন্ত্রকঃ॥ তেন প্রাসাদসংজ্ঞোঽয়ং কথ্যতে মুনিপুঙ্গবৈঃ। তস্মাৎ সর্ব্বেষু মন্ত্রেষু প্রাসাদঃ প্রীতিদঃ প্রভোঃ॥ আমোদকারকঃ শম্ভোর্ম্মন্ত্রঃ সম্মদ উচ্যতে। মনঃপ্রপূরণশ্চাপি সন্দোহঃ পরিকীর্ত্তিতঃ॥ আকর্ষকো ভবেন্মাদো গুরুত্বাদ্গৌরবাহ্বয়ঃ। এতদ্ব্যস্তং সমস্তঞ্চ মন্ত্রং শম্ভোঃ প্রকীর্ত্তিতং ॥ পঞ্চাক্ষরঞ্চ যন্মন্ত্রং পঞ্চবক্ত্রস্য কীর্ত্তিতং। স্বয়স্তেনৈব মন্ত্রেণ আরাধয়তমীশ্বরং ॥*॥ ধ্যানঞ্চ শৃণু বক্ষ্যামি সম্যগ্বেতালভৈরবৌ। পঞ্চবক্ত্রং মহাকায়ং জটাজূটবিভূষিতং ॥ চারুচন্দ্রকলাযুক্তং

মূর্দ্ধ্নি ব্যালোবসংগতং। বাহুভির্দ্দশভির্যুক্তং ব্যাঘ্রচর্ম্মাম্বরাম্বরং ॥ কালকূটধরং কণ্ঠে নাগহারোপশোভিতং। কোটীরবন্ধনং বাহুভূষণঞ্চ ভুজঙ্গমাঃ ॥ বিভূতিং সর্ব্বগাত্রেষু জ্যোৎস্নার্পিতস্বরোচিষং। ভূতিসংলিপ্তসর্ব্বাঙ্গমেকৈকত্র ত্রিভিস্ত্রিভিঃ ॥ নেত্রৈস্তু পঞ্চদশভির্জ্জ্যোতিস্মদ্ভির্বিভূষিতং। বৃষভোপরি সংস্থস্তু গজকৃত্তিপরিচ্ছদং ॥ সদ্যোজাতং বামদেবমঘোরঞ্চ ততঃ পরং। তৎপুরুষং যথেশানং পঞ্চবক্ত্রং প্রকীর্ত্তিতং ॥ সদ্যোজাতং ভবেদ্বক্ত্রং শুদ্ধস্ফটিকসন্নিভং। পীতবর্ণং তথা সৌম্যং বামদেবং মনোহরং ॥ নীলবর্ণমঘোরন্তু দংষ্ট্রাভীতিবিবর্দ্ধনং। রক্তং তৎপুরুষং দেবং দিব্যমূর্ত্তিং মনোহরং ॥ শ্যামলঞ্চ তথেশানং সর্ব্বদৈব শিবাত্মকং। চিন্তয়েৎ পশ্চিমে ত্বাদ্যং দ্বিতীয়ঞ্চ তথোত্তরে ॥ অঘোরং দক্ষিণে দেবং পূর্ব্বে তৎপুরুষন্তথা। ঈশানং মধ্যতো ধ্যেয়ং চিন্তয়েদ্ভক্তিতৎপরঃ ॥ শক্তিত্রিশূলখট্বাঙ্গবরদাভয়দং শিবং। দক্ষিণেষ্বথ হস্তেষু বামেষ্বপি ততঃ শৃণু॥ অক্ষসূত্রং বীজপূরং ভুজগং ডমরূৎপলং। অষ্টৈশ্বর্য্যসমাযুক্তং ধ্যায়েত্তু হৃদ্গতং শিবং ॥ ইতি কালিকাপুরাণে ৫০ অধ্যায়ঃ ॥ * ॥ পঞ্চমুখরুদ্রাক্ষঃ। যথা স্কান্দে। পঞ্চবক্ত্রঃ স্বয়ং রুদ্রঃ কালাগ্নির্নাম নামতঃ। অগম্যাগমনাচ্চৈব অভক্ষ্যস্য চ ভক্ষণাৎ। মুচ্যতে সর্ব্বপাপেভ্যঃ পঞ্চবক্ত্রস্য ধারণাৎ ॥ ইতি তিথিতত্ত্বং ॥

পঞ্চবল্কলং (ক্লী) বল্কলপঞ্চকং। যথা। ন্যগ্রোধোড়ুম্বরাশ্বত্থপ্লক্ষবেতসবল্কলৈঃ সর্ব্বৈরেকত্র সংযুক্তৈঃ পঞ্চবল্কলমুচ্যতে ॥ অপি চ। ন্যগ্রোধোড়ুম্বরাশ্বত্থপ্লক্ষপিপ্পলপীতনাঃ। ক্ষীরিবৃক্ষাশ্চ পঞ্চৈষাং বল্কলং পঞ্চবল্কলং ॥ ইতি শব্দচন্দ্রিকা॥ অস্য গুণাঃ। পঞ্চৈতে ক্ষীরিণো বৃক্ষাস্তেষাং ত্বক্ পঞ্চলক্ষণং। ত্বক্পঞ্চকং হিমং গ্রাহি ব্রণশোথবিসর্পজিৎ ॥ ইতি রাজনির্ঘণ্টঃ ॥

পঞ্চবাণঃ (পুং) কামদেবঃ। ইতি হেমচন্দ্রঃ ॥ পঞ্চানাং বাণানাং সমাহারে ক্লী। পঞ্চবাণবিশিষ্টে ত্রি ॥

পঞ্চশরঃ (পুং) কন্দর্পঃ। ইত্যমরঃ ॥ অস্য পঞ্চ শরাণি যথা। সম্মোহনং সমুদ্বেগবীজং স্তম্ভনকারণং। উন্মত্তবীজং জ্বলনং শশ্বচ্চেতনহারকং ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ৩২ অধ্যায়ঃ ॥ অপি চ। সম্মোহনোন্মাদনৌ চ শোষণস্তাপনস্তথা। স্তম্ভনশ্চেতি কামস্য পঞ্চ বাণাঃ প্রকীর্ত্তিতাঃ ॥ পঞ্চ ইন্দ্রিয়ার্থাঃ শরা অস্যেত্যন্যে। ইতি ভরতঃ ॥

পঞ্চশস্যং (ক্লী) শস্যপঞ্চকং। তত্তু ধান্যমুদ্গতিলযবশ্বেতসর্ষপরূপং। সর্ষপস্থানে মাষোঽপি। ইতি দুর্গোৎসবপদ্ধতিঃ ॥

পঞ্চশাখঃ (পুং) হস্তঃ। ইত্যমরঃ ॥ পঞ্চানাং শাখানাং সমাহারে ক্লী। পঞ্চশাখাবিশিষ্টে ত্রি ॥

পঞ্চশিখঃ (পুং) সিংহঃ। ইতি হেমচন্দ্রঃ ॥ ধর্ম্মস্য হিংসাভার্য্যায়াং জাতো মুনিবিশেষঃ। যথা। ধর্ম্মস্য ভার্য্যা হিংসাখ্যা

তস্যাং পুত্রচতুষ্টয়ং । সম্প্রাপ্তং মুনিশার্দ্দূল যোগশাস্ত্রবিচারকং ॥ জ্যেষ্ঠঃ সনৎকুমারোঽভূদ্দ্বিতীয়শ্চ সনাতনঃ। তৃতীয়ঃ সনকো নাম চতুর্থশ্চ সনন্দনঃ॥ সাংখ্যবেত্তারমপরং কপিলং বোঢ়ুমাসুরিং। দৃষ্ট্বা পঞ্চশিখং শ্রেষ্ঠং যোগযুক্তং তপোনিধিং ॥ জ্ঞানযোগং ন তে দদ্যুর্জ্যায়াংসোঽপি কনীয়সাং। ইতি বামনে ৫০. অধ্যায়ঃ ॥

পঞ্চশূরণঃ (পুং) পঞ্চপ্রকারশূরণঃ। তদ্যথা। অত্যম্লপর্ণী কাণ্ডীরঃ মালাকন্দঃ শূরণঃ শ্বেতশূরণশ্চ। তথাহি। অত্যম্লপর্ণীকাণ্ডীরমাল্লাকন্দদ্বিশূরণৈঃ। কল্পো ভবতি যোগোঽয়ং পঞ্চশূরণসংজ্ঞকঃ॥ ইতি রাজনির্ঘণ্টঃ ॥

পঞ্চশৈরীষকং (ক্লী) শিরীষবৃক্ষস্য কুসুমমূলফলপত্রত্বচঃ। ইতি রাজনির্ঘণ্টঃ ॥

পঞ্চষাঃ (ত্রি) পঞ্চ বা ষড়্বা পরিমাণং যেষাং তে। বহুবচনান্তোঽয়ং শব্দঃ। ইতি মুগ্ধবোধব্যাকরণং ॥

পঞ্চসিদ্ধৌষধিঃ (পুং) পঞ্চপ্রকারৌষধিবিশেষঃ। যথা। তৈলকন্দসুধাকন্দক্রোড়কন্দরুদন্তিকাঃ। সর্পনেত্রযুতাঃ পঞ্চসিদ্ধৌষধিকসংজ্ঞকঃ॥ ইতি রাজনির্ঘণ্টঃ॥

পঞ্চসুগন্ধকং (ক্লী) পঞ্চপ্রকারসুগন্ধিদ্রব্যং। যথা। কুসুমানি লবঙ্গস্য তথা কক্কোলকাণ্ডয়োঃ। জাতীফলানি কর্পূরমেতৎ পঞ্চসুগন্ধকং ॥ ইতি শব্দচন্দ্রিকা॥ অপি চ। কর্পূরকক্কোললবঙ্গপুষ্পগুবাকজাতীফলপঞ্চকেন। সমাংশভাগেন চ যোজিতেন মনোহরং পঞ্চসুগন্ধকং স্যাৎ ॥ ইতি রাজনির্ঘণ্টঃ ॥

পঞ্চসূনা (স্ত্রী) পঞ্চপ্রকারপ্রাণিবধস্থানং। যথা। পঞ্চসূনা গৃহস্থস্য চুল্লী পেষণ্যুপস্করঃ। কণ্ডনী চোদকুম্ভশ্চ বধ্যতে যাশ্চ বাহয়ন্ ॥ ইতি শুদ্ধিতত্ত্বং ॥ তজ্জন্যপাপং গৃহস্থস্য প্রতিদিনং ভবতি তস্য প্রায়শ্চিত্তং বৈশ্বদেবঃ। যথা। লৌকিকে বৈদিকে বাপি হুতোচ্ছিষ্টে জলে ক্ষিতৌ। বৈশ্বদেবস্তু কুর্ব্বীত পঞ্চসূনাপনুত্তয়ে ॥ ইতি আহ্নিকতত্ত্বধৃতশাতাতপবচনং ॥ অশৌচকালোৎপন্নপঞ্চসূনাদিজন্যপাপস্য দানাদিনাশ্যত্বং যথা। দশাহাত্তু পরং সম্যক্ বিপ্রোঽধীয়ীত ধর্ম্মবিৎ। দানঞ্চ বিধিনা দেয়মশুভাত্তারকং হি তৎ ॥ ইতি শুদ্ধিতত্ত্বধৃতসম্বর্ত্তবচনং ॥

পঞ্চস্বরা (স্ত্রী) প্রজাপতিদাসবৈদ্যকৃতশিশুরিষ্টমাতৃরিষ্টপিতৃরিষ্টস্ত্রীপুংনপুংসকজ্ঞানসুখদুঃখরিষ্টচ্ছেদাদিযোগমৃত্যুজ্ঞাননির্ণয় ইতি সপ্তাধ্যায়াত্মকজ্যোতির্গ্রন্থবিশেষঃ। যথা। পঞ্চস্বরাভিধানঞ্চ গ্রন্থং নিদানসম্মতং। কিঞ্চিদুদ্দেশগম্যঞ্চ স্বল্পং বক্ষ্যামি শাশ্বতং ॥ ইতি তত্রৈব ॥

পঞ্চস্বরোদয়ঃ (পুং) জ্যোতিঃশাস্ত্রবিশেষঃ। যথা। কালং বক্ষ্যামি সংসিদ্ধ্যৈ রুদ্র পঞ্চস্বরোদয়াৎ। রাজা মাজা উদাসা চ পীড়া মৃত্যুস্তথৈব চ ॥ আ ঈ উ এ ঔ স্বরাশ্চ লিখেৎ পঞ্চাগ্নিকোষ্ঠকে। ঊর্দ্ধতির্য্যগ্‌গতৈরেখৈঃ ষড়্‌বহ্নিক্রমমাগতৈঃ ॥ তিথী একাগ্নিকোষ্ঠেষু ত্রয়ো রাজাথ

মাজয়া। উদাসা পীড়া মৃত্যুশ্চ কুজঃ সোম-
সুতঃ ক্রমাৎ ॥ গুরুশুক্রশনৈশ্চররবিচন্দ্রা
যথোদিতং। রেবত্যাদিশিবান্তাশ্চ ঋক্ষা-
শ্চ প্রথমাঃ কলাঃ ॥ পঞ্চপঞ্চান্যত্র ভানি
চৈত্রাদ্য উদয়স্তথা। দ্বাদশাহা দ্বয়ো মাসা
নাম্ন আদ্যক্ষরং তথা ॥ কলা লিঙ্গঞ্চ যা
তিষ্ঠেৎ পঞ্চমস্তস্য বৈ মৃতিঃ। কলা তিথি-
স্তথা বারনক্ষত্রং মাসমেব চ ॥ নামো-
দয়স্য পূর্ব্বঞ্চ তথা ভবতি নান্যথা। ইতি
গরুড়পুরাণং ॥

পঞ্চক্ষারগণঃ (পুং) ক্ষারপঞ্চকং। পঞ্চলবণং।
যথা। ক্ষারৈস্তু পঞ্চভিঃ প্রোক্তঃ পঞ্চক্ষারা-
ভিধো গণঃ। কাচসৈন্ধবসামুদ্রবিট্সৌবর্চ্চ-
লকৈঃ সমৈঃ ॥ স্যাৎ পঞ্চলবণং তচ্চ
মুজ্জোপেতং ষড়াহ্বয়ং। ইতি রাজ-
নির্ঘণ্টঃ ॥

পঞ্চাগ্নি (ক্লী) পঞ্চানামগ্নীনাং সমাহারঃ।
অস্য বিবরণং পঞ্চাতপশব্দে দ্রষ্টব্যং ॥
শরীরস্থপঞ্চাগ্নয়ো যথা। উদরে গার্হ-
পত্যাগ্নির্মধ্যদেশে তু দক্ষিণঃ। আস্য
আহবনোঽগ্নিশ্চ সত্যঃ পর্ব্বা চ মূর্দ্ধনি ॥
যঃ পঞ্চাগ্নীনিমান্ বেদ আহিতাগ্নিঃ স
উচ্যতে। ইতি গরুড়পুরাণং ॥

পঞ্চাঙ্গং (ক্লী) একবৃক্ষস্য ত্বক্পত্রপুষ্প-
মূলফলানাং সমাহারঃ। যথা। ত্বক্পত্র-
কুসুমং মূলং ফলমেকস্য শাখিনঃ। একত্র
মিলিতঞ্চৈতৎ পঞ্চাঙ্গমিতি সংজ্ঞিতং ॥
ইতি রাজনির্ঘণ্টঃ ॥ পুরশ্চরণবিশেষঃ।
যথা। জপহোমৌ তর্পণঞ্চাভিষেকো বিপ্র-
ভোজনং। পঞ্চাঙ্গোপাসনং লোকে পুর-
শ্চরণমিষ্যতে ॥ ইতি তন্ত্রসারঃ ॥ বার-
তিথিনক্ষত্রযোগকরণাত্মকপঞ্জিকা। যথা।
তিথির্বারশ্চ নক্ষত্রং যোগঃ করণমেব চ।
পঞ্চাঙ্গস্য ফলং শ্রুত্বা গঙ্গাস্নানফলং
লভেৎ ॥ ইতি জ্যোতিষং ॥

পঞ্চাঙ্গঃ (পুং) কমঠঃ। ইতি শব্দমালা ॥
অশ্ববিশেষঃ। তৎপর্য্যায়ঃ। পঞ্চভদ্রঃ ২
পুষ্পিততুরঙ্গমঃ ৩। ইতি শব্দরত্নাবলী ॥
প্রণামবিশেষঃ। যথা। বাহুভ্যাঞ্চৈব
জানুভ্যাং শিরসা বচসা দৃশা। পঞ্চাঙ্গো-
ঽয়ং প্রণামঃ স্যাৎ পূজাসু প্রবরাবিমৌ ॥
ইতি তন্ত্রসারঃ ॥

পঞ্চাঙ্গগুপ্তঃ (পুং) কচ্ছপঃ। ইতি ত্রিকাণ্ড-
শেষঃ ॥

পঞ্চাঙ্গুলঃ (পুং) এরণ্ডবৃক্ষঃ। ইত্যমরঃ ॥
পঞ্চাঙ্গুলপরিমাণযুক্তে ত্রি ॥

পঞ্চাঙ্গুলিঃ (ত্রি) পঞ্চাঙ্গুলয়ো যস্য সঃ। ইতি
ব্যাকরণং ॥

পঞ্চাঙ্গুলী (স্ত্রী) তক্রাহ্বাক্ষুপঃ। ইতি রাজ-
নির্ঘণ্টঃ ॥

পঞ্চাতপা (স্ত্রী) তপস্যাবিশেষঃ। যথা। চর্য্যা
পঞ্চাতপাচিন্তা শাম্ভবী শাম্ভবো জপঃ।
যজ্ঞিয়ৈর্দারুভিঃ শুষ্কৈশ্চতুর্দ্দিক্ষু চতুষ্কৃতং ॥
বহ্নিসংস্থাপনং গ্রীষ্মে তীব্রাংশুস্তত্র
পঞ্চমঃ। হস্তান্তরে চতুর্ব্বহ্নীন্ কৃত্বা
বৈশ্বানরেষ্টিনা ॥ তন্মধ্যস্থা সূর্য্যবিম্বং
বীক্ষন্তী বহুলাংশুকা। ইতি কালিকা-
পুরাণে ৪২ অধ্যায়ঃ ॥

পঞ্চাননঃ (পুং) শিবঃ। সিংহঃ। ইতি
মেদিনী ॥ অত্যুগ্রঃ। ইতি শব্দরত্নাবলী ॥

পঞ্চামরাঃ (স্ত্রী) পঞ্চপ্রকারামরলতাদি। যথা। একা তু অমরা দূর্ব্বা তস্যা গ্রন্থিং সমানয়েৎ। অন্যা তু বিজয়া দেবী সিদ্ধিরূপা সরস্বতী ॥ অন্যা তু বিল্লপত্রস্থা শিবসন্তোষকারিণী। অন্যা তু যোগসিদ্ধ্যর্থে নির্গুণ্ডী চামরা লতা ॥ অন্যা তু কালতুলসী শ্রীবিষ্ণোঃ প্রিয়তোষণী। এতাঃ পঞ্চামরা জ্ঞেয়া যোগসাধনকর্ম্মণি ॥ ইতি রুদ্রযামলোত্তরখণ্ডে ৩৬ পটলঃ ॥

পঞ্চামৃতং (ক্লী) শর্করাদুগ্ধঘৃতদধিমধুঘটিতং। যথা। দুগ্ধং সশর্করঞ্চৈব ঘৃতং দধি তথা মধু। পঞ্চামৃতমিদং প্রোক্তং বিধেয়ং সর্ব্বকর্ম্মসু ॥ গর্ভবতীভ্যস্তদ্দানস্য দিনং যথা। রেবত্যশ্বিপুনর্ব্বসুদ্বয়মরুন্মূলানুরাধামঘাহস্তাসূত্তরফল্গুনীষু ভৃগুজে জীবার্কবারে তথা। লগ্নক্ষোড়ু পশোভনেষু নিয়তং সন্ত্যজ্য রিক্তাং তিথিং দেয়ং মাসি চ পঞ্চমেষু করণে পঞ্চামৃতং যোষিতাং ॥ ইতি জ্যোতিস্তত্ত্বং ॥

পঞ্চামৃতযোগঃ (পুং) গুড়ূচীগোক্ষুরমুশলীমুণ্ডিকাশতাবরীণাং সংযোগঃ। যথা। গুড়ূচী গোক্ষুরঞ্চৈব মুশলী মুণ্ডিকা তথা। শতাবরীতি পঞ্চানাং যোগঃ পঞ্চামৃতাভিধঃ॥ ইতি রাজনির্ঘণ্টঃ ॥

পঞ্চাম্নায়ঃ (পুং) শিবস্য পঞ্চবক্ত্রবিনির্গতস্তন্ত্রশাস্ত্রবিশেষঃ। যথা। পূর্ব্বাম্নায়ঃ পূর্ব্বমুখঃ পশ্চিমঃ পশ্চিমামুখঃ। দক্ষিণো দক্ষিণস্তদ্বদুত্তরশ্চোত্তরঃ পরঃ ॥ নিরুত্তরং তথা চোর্দ্ধং সিদ্ধান্তাগমরূপিণং। ঊর্দ্ধাম্নায়পরিজ্ঞানং নাল্পস্য তপসঃ ফলমিতি ॥ অন্যত্র। পূর্ব্বাম্নায়ঃ শব্দরূপো দক্ষিণঃ কর্ণরূপকঃ। পশ্চিমঃ প্রশ্নরূপঃ স্যাদুত্তরশ্চোত্তরস্তথা॥ ঊর্দ্ধাম্নায়স্তত্ত্ববোধঃ কেবলানুভবাত্মকঃ। ইতি ভৈরবতন্ত্রং ॥ মম পঞ্চমুখেভ্যশ্চ পঞ্চাম্নায়াঃ সমুদ্গতা ইত্যাদি। ইতি কুলার্ণবতন্ত্রং ॥ * ॥ বিভাব্য মুখপদ্মং হি শিবস্য বরবর্ণিনি। সদ্যোজাতং বামদেবমঘোরঞ্চ ততঃ পরং। তৎপুরুষং তথেশানং পঞ্চবক্ত্রং প্রকীর্ত্তিতঃ॥ সদ্যোজাতঞ্চ বৈ শুক্লং শুদ্ধস্ফটিকসন্নিভং। পীতবর্ণং তথা সৌম্যং বামদেবং মনোহরং ॥ কৃষ্ণবর্ণমঘোরঞ্চ সমং ভীমবিবর্দ্ধনং। রক্তং তৎপুরুষং দেবি দিব্যমূর্ত্তি মনোহরং ॥ শ্যামলঞ্চ তথেশানং সর্ব্বদেবশিবাত্মকং। চিন্তয়েৎ পশ্চিমে চাদ্যং দ্বিতীয়ঞ্চ তথোত্তরে ॥ অঘোরং দক্ষিণে দেবং পূর্ব্বে তৎপুরুষং তথা। ঈশানং মধ্যতো জ্ঞেয়ং চিন্তয়েদ্ভক্তিতৎপরঃ ॥ ইতি নির্ব্বাণতন্ত্রে ৬ পটলঃ ॥ * ॥ অন্যং ষড়াম্নায়শব্দে দ্রষ্টব্যং ॥

পঞ্চাম্রং (ক্লী) বৃক্ষবিশেষাণাং সমাহারঃ। যথা। অশ্বত্থমেকং পিচুমর্দ্দমেকং ন্যগ্রোধমেকং দশ পুষ্পজাতীঃ। দ্বে দ্বে তথা দাড়িমমাতুলঙ্গে পঞ্চাম্রবাপী নরকং ন যাতি ॥ ইতি বরাহপুরাণং ॥ অপি চ। অশ্বত্থ একঃ পিচুমর্দ্দ একো দ্বৌ চম্পকৌ ত্রীণি চ কেশরাণি। সপ্তাথ তালা নব নারিকেলাঃ পঞ্চাম্ররোপী নরকং ন যাতি॥ ইতি তিথিতত্ত্বং ॥

পঞ্চাম্লং (ক্লী) অম্লপঞ্চকং। যথা। কোল-

দাড়িমবৃক্ষাম্লৈরম্লবেতসসংযুতৈঃ। চতুরম্লঞ্চ পঞ্চাম্লং মাতুলঙ্গসমন্বিতং॥ ইতি শব্দচন্দ্রিকা॥

পঞ্চারী (স্ত্রী) শারিশৃঙ্গলা। ইতি শব্দমালা॥

পঞ্চার্চ্চিঃ [স্] (পুং) বুধগ্রহঃ। ইতি ত্রিকাণ্ডশেষঃ॥

পঞ্চালঃ (পুং) দেশবিশেষঃ। ইত্যুণাদিকোষঃ॥ তস্য ব্যুৎপত্তির্যথা। হর্য্যশ্বাম্মুদ্গলসৃঞ্জয়বৃহদিষুযবীনরকাম্পিল্লসংজ্ঞাঃ। পঞ্চানামেতেষাং বিষয়াণাং রক্ষণায়ালমেতে মৎপুত্রা ইতি পিত্রাভিহিতা ইতি পঞ্চালাঃ। ইতি বিষ্ণুপুরাণে ৪ অংশে ১৯ অধ্যায়ঃ॥

পঞ্চালাঃ (পুং) নীবৃদ্বিশেষঃ। বহুবচনান্তোঽয়ং। ইতি মেদিনী॥

পঞ্চালিকা (স্ত্রী) পুত্তলী। ইত্যমরটীকায়াং ভরতঃ॥

পঞ্চালী (স্ত্রী) বস্ত্রাদিকৃতপুত্রিকা। কানির পুতুল ইতি ভাষা। গীতবিশেষঃ। পাঁচালী ইতি ভাষা। ইতি মেদিনী॥ শারিশৃঙ্খলা। ছক্ ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ॥

পঞ্চাবটং (ক্লী) উরস্কটং। বালোপবীতং। ইতি হারাবলী॥

পঞ্চাবস্থঃ (পুং) শবঃ। ইতি ত্রিকাণ্ডশেষঃ॥ পঞ্চাবস্থাযুক্তে ত্রি॥

পঞ্চাশৎ (ত্রি) সংখ্যাবিশেষঃ। পঞ্চাশ ইতি ভাষা। ইতি জ্যোতিষং॥

পঞ্চাস্যঃ (পুং) সিংহঃ। ইত্যমরঃ॥

পঞ্চীকরণং (ক্লী) পঞ্চভূতানাং ভাগবিশেষেণ মিশ্রীকরণং। যথা। পঞ্চীকরণন্তু আকাশাদিপঞ্চস্বেকৈকং দ্বিধা সমং বিভজ্য তেষু দশসু ভাগেষু মধ্যে প্রাথমিকান্ পঞ্চভাগান্ প্রত্যেকং চতুর্দ্ধা সমং বিভজ্য তেষাং চতুর্ণাং ভাগানাং স্বস্বদ্বিতীয়ার্দ্ধভাগং পরিত্যজ্য ভাগান্তরেষু সংযোজনং। তদুক্তং। দ্বিধা বিধায় চৈকৈকং চতুর্দ্ধা প্রথমং পুনঃ। স্বস্বেতরদ্বিতীয়াংশৈর্যোজনাং পঞ্চ পঞ্চ তে ইতি॥ অস্যাপ্রামাণ্যং নাশঙ্কনীয়ং ত্রিবৃৎকরণশ্রুতেঃ পঞ্চীকরণস্যাপ্যুপলক্ষণার্থত্বাৎ। পঞ্চানাং পঞ্চাত্মকত্বে সমানেঽপি তেষু চ বৈশিষ্ট্যাত্তু তদ্বাদস্তদ্বাদ ইতি ন্যায়েন আকাশাদিব্যপদেশঃ সম্ভবতি। তদানীমাকাশে শব্দোঽভিব্যজ্যতে। বায়ৌ শব্দস্পর্শৌ। অগ্নৌ শব্দস্পর্শরূপাণি। অপ্সু শব্দস্পর্শরূপরসাঃ। পৃথিব্যাং শব্দস্পর্শরূপরসগন্ধাশ্চ। এতেভ্যঃ পঞ্চীকৃতেভ্যো ভূতেভ্যঃ ভূর্ভুবঃ স্বর্মহর্জনস্তপঃ সত্যমিত্যেতন্নামকানামুপর্য্যুপরি বিদ্যমানানাং অতলবিতলসুতলরসাতলতলাতলমহাতলপাতালনামকানাং অধোঽধো বিদ্যমানানাং লোকানাং ব্রহ্মাণ্ডস্য তদন্তর্গতচতুর্ব্বিধস্থূলশরীরাণামন্নপানাদীনাঞ্চোৎপত্তির্ভবতি। ইতি বেদান্তসারঃ॥

পঞ্চেন্দ্রিয়ং (ক্লী) পঞ্চানাং জ্ঞানেন্দ্রিয়াণাং সমাহারঃ। যথা। শ্রোত্রত্বক্নেত্ররসনঘ্রাণং পঞ্চেন্দ্রিয়াণি চ। ইতি শব্দচন্দ্রিকা॥ পঞ্চকর্ম্মেন্দ্রিয়ঞ্চ॥

পঞ্চেষুঃ (পুং) কামদেবঃ। ইতি হলায়ুধঃ॥

পঞ্চোপবিষং (ক্লী) উপবিষপঞ্চকং। যথা। স্নুহ্যর্ককরবীরাণি লাঙ্গলী বিষমুষ্টিকা। এতান্যুপবিষাণ্যাহুঃ পঞ্চ পাণ্ডিত্যশালিনঃ॥ ইতি রাজনির্ঘণ্টঃ॥

পঞ্চোষ্মাণঃ (পুং) আহারপাচকশরীরস্থপঞ্চাগ্নয়ঃ। যথা। ভৌমাপ্যাগ্নেয়বায়ব্যাঃ পঞ্চোষ্মাণঃ সনাভসাঃ। পঞ্চাহারগুণান্ স্বান্ স্বান্ পার্থিবাদীন্ পচন্ত্যনু। পার্থিবাঃ পার্থিবানেব শেষাঃ শেষাংশদেহগান্॥ ইতি সারকৌমুদী॥

পঞ্জরং (ক্লী) কায়াস্থিবৃন্দং। শরীরাস্থিপঞ্জরং। পক্ষ্যাদিবন্ধগৃহং। পিঁজ্‌রা ইতি ভাষা। ইত্যমরভরতৌ॥ তৎপর্য্যায়ঃ। শালারং ২। ইতি জটাধরঃ॥

পঞ্জরঃ (পুং) শরীরং। ইতি ত্রিকাণ্ডশেষঃ॥ দেহাস্থিসমূহঃ। তৎপর্য্যায়ঃ। কঙ্কালঃ ২ দেহবন্ধাস্থি ৩। ইতি জটাধরঃ॥ কলিযুগং। গবাং নীরাজনাবিধিঃ। ইতি সারস্বতাভিধানং॥

পঞ্জরাখেটঃ (পুং) মৎস্যমারণোপায়ঃ। পোলো ইতি ভাষা। তৎপর্য্যায়ঃ। প্লবঃ ২ পলবঃ ৩। ইতি ত্রিকাণ্ডশেষঃ॥

ঃ (পুং) কোলকন্দঃ। ইতি রাজনির্ঘণ্টঃ॥

ঃ (স্ত্রী) সূত্রনালিকা। পাঁইজ ইতি ভাষা। ইতি শব্দমালা॥ পঞ্জিকা চ॥

পঞ্জিকা (স্ত্রী) তুলনালিকা। পাঁইজ ইতি ভাষা। ইতি হারাবলী॥ টীকাবিশেষঃ। যথা। টীকা নিরন্তরব্যাখ্যা পঞ্জিকা পদভঞ্জিকা। ইতি হেমচন্দ্রঃ॥ অগ্রসন্ধানী। ইতি ত্রিকাণ্ডশেষঃ॥ পঞ্চাঙ্গং। পাঁজি ইতি ভাষা। তৎশ্রবণফলং যথা। বারো হরতি দুঃস্বপ্নং নক্ষত্রং পাপনাশনং। তিথির্ভবতি গঙ্গায়া যোগঃ সাগরসঙ্গমঃ॥ করণং সর্ব্বতীর্থানি শ্রূয়তে দিনপঞ্জিকা। ইতি দৈবজ্ঞাঃ॥ অপি চ। দুঃস্বপ্ননাশকো বারো নক্ষত্রং পাপনাশনং। তিথিরায়ুষ্করী প্রোক্তা যোগো বুদ্ধিবিবর্দ্ধকঃ॥ চন্দ্রঃ করোতি সৌভাগ্যমংশকঃ শুভদায়কঃ। করণাল্লভতে লক্ষ্মীং যঃ শৃণোতি দিনে দিনে॥ ইতি জ্যোতিস্তত্ত্বে বরাহবচনং॥ *॥ নিঃশেষপদব্যাখ্যাত্রী। তিথিবারাদিজ্ঞাপিকা। আয়ব্যয়লিখনার্থা চ। ইত্যমরটীকায়াং ভরতঃ॥

পঞ্জিকারকঃ (পুং) কায়স্থজাতিঃ। যথা। অথ কায়স্থঃ করণঃ পঞ্জিকারকঃ। ইতি জটাধরঃ॥ পঞ্জিকাকারশ্চ॥

(স্ত্রী) পঞ্জিঃ। নালিকা। ইতি শব্দমালা॥ পঞ্জিকা। পাঁজি ইতি ভাষা। যথা। দৈবজ্ঞবক্ত্রেণ শৃণোতি পঞ্জীং শক্রক্ষয়ং যাতি শশীব কৃষ্ণে। ইতি দৈবজ্ঞাঃ॥ গ্রন্থবিশেষঃ। যথা। প্রণম্য বিশ্বেশ্বরপাদমাদৌ সরস্বতীং তাং কুলদেবতাঞ্চ। শিশুপ্রবোধায় কুলস্য পঞ্জী বিবিচ্যতে শ্রীযুতমিশ্রকেন॥ ইতি ধ্রুবানন্দমিশ্রঃ॥

পঞ্জীকরঃ (পুং) কায়স্থঃ। যথা। কায়স্থে কূটকৃৎপঞ্জীকরৌ। ইতি ত্রিকাণ্ডশেষঃ॥

পট গতৌ। ইতি কবিকল্পদ্রুমঃ॥ পটতি। ইতি দুর্গাদাসঃ॥

পট ক ত্বিষি। ইতি কবিকল্পদ্রুমঃ॥ ক পাট-
য়তি। ত্বিষি দীপ্তৌ। ইতি দুর্গাদাসঃ॥

পট ৎ ক বেষ্টনে। ইতি কবিকল্পদ্রুমঃ॥ গ্রন্থনে। ইত্যন্যে। পটয়তি মালাং মালিকঃ। ইতি দুর্গাদাসঃ॥

পটং (ক্লী) ছদিঃ। চালং। ইতি পটলশব্দটীকায়াং ভরতঃ॥

পটঃ (পুং ক্লী) শোভনবস্ত্রং। তৎপর্য্যায়ঃ। সুচেলকঃ ২। ইত্যমরঃ॥ চিত্রপটঃ। ইতি মেদিনী॥ তস্য লক্ষণং যথা। পটস্য লক্ষণং বক্ষ্যে যথা সিধ্যন্তি সাধকাঃ। গ্রন্থিকেশবিহীনে তু অজীর্ণে সমতন্তুকে॥ অস্ফাটিতে অচ্ছিদ্রে তু স্থলেনৈব সমালিখেৎ। যোগিনী রূপিণী কার্য্যা জয়াদ্যৈঃ পরিবারিতা॥ বৃদ্ধেন চ ভবেদ্বৃদ্ধো ব্যাধিতে ব্যাধিতো ভবেৎ। কুরূপেণ কুরূপস্তু মূর্খেণ তু ন পূজ্যতে॥ লেখকস্য তু যদ্রূপং চিত্রে ভবতি তাদৃশং। ইতি দেবীপুরাণং॥

পটঃ (পুং) পিয়ালবৃক্ষঃ। ইতি মেদিনী॥ পুরস্কৃতঃ। ইতি বিশ্বঃ॥

পটকঃ (পুং) শিবিরং। ইতি শব্দমালা॥

পটকারঃ (পুং) তন্তুবায়ঃ। চিত্রকরঃ। পটং শোভনবস্ত্রং চিত্রপটং বা করোতীতি ব্যুৎপত্ত্যা ষণ্প্রত্যয়নিষ্পন্নঃ॥

পটকুটী (স্ত্রী) বস্ত্রবেশ্ম। তাঁবু ইতি ভাষা। তৎপর্য্যায়ঃ। কেণিকা ২ গুণালয়নিকা ৩। ইতি হেমচন্দ্রঃ॥

পটচ্চরং (ক্লী) জীর্ণবস্ত্রং। ইত্যমরঃ॥ চৌরে পুং ইত্যমরটীকায়াং রমানাথঃ॥

পটমণ্ডপঃ (পুং) পটকুটী। ইতি শব্দচন্দ্রিকা॥

পটময়ং (ক্লী) বস্ত্রগৃহং। যথা। পটবাসঃ পটময়ং দূষ্যং বস্ত্রগৃহং স্থলং। ইতি ত্রিকাণ্ডশেষঃ॥ শাটী। যথা। পটবাসঃ পটময়ং শাটী শাটক ইত্যপি। ইতি শব্দরত্নাবলী॥

পটরকঃ (পুং) গুন্দ্রবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

পটলং (ক্লী) ছদিঃ। চাল ইতি ভাষা। নেত্ররোগঃ। ইত্যমরঃ॥ পিটকঃ। পরিচ্ছদঃ। তিলকঃ। সমূহে ক্লী স্ত্রী। ইতি মেদিনী॥ দৃষ্টেরাবরকং। চক্ষুর পরদা ইতি ভাষা। যথা। প্রথমে পটলে দোষো যস্য দৃষ্ট্যাং ব্যবস্থিতঃ। অব্যক্তানি সরূপাণি কদাচিদথ পশ্যতি॥ ইতি মাধবকরঃ॥ দৃষ্ট্যাং চত্বারি পটলানি। রসরক্তাশ্রয়ং বাহ্যং দ্বিতীয়ং মাংসসংশ্রয়ং তৃতীয়ং মেদঃসংশ্রিতং চতুর্থং কালকাস্থিসংশ্রিতং। তথা চ সুশ্রুতঃ। তেজোজলাশ্রিতং বাহ্যং তেম্বন্যৎ পিশিতাশ্রিতং। মেদস্তৃতীয়ং পটলমাশ্রিতং ত্বস্থি চাপরং। পঞ্চমাংশসমং দৃষ্টেস্তেষাং বাহুল্যমিষ্যত ইতি॥ অত্র তেজঃশব্দেন রক্তং জলশব্দেন রসো ব্যাখ্যাতঃ। তেষু পটলেষু বাহ্যাদিভেদেনাধিষ্ঠানবিশেষপ্রভাবাৎ দোষাণাং লিঙ্গবিশেষমাহ প্রথমে পটলে ইত্যাদি। প্রথমে পটলে সর্ব্বাভ্যন্তরে ন তু বাহ্যে। ইতি বিজয়রক্ষিতঃ॥

পটলঃ (পুং স্ত্রী) গ্রন্থঃ। বৃক্ষঃ। ইতি

শব্দরত্নাবলী ॥ বৃক্ষস্থানে বৃন্তোঽপি পাঠঃ ॥

পটলপ্রান্তং (ক্লী) গৃহচালিকান্তভাগঃ। ছাঁচি ইতি ভাষা। তৎপর্য্যায়ঃ। বলীকং ২ নীব্রং ৩। ইত্যমরঃ ॥

পটুলী (স্ত্রী) ছদিঃ। চাল ইতি ভাষা। ইতি ভরতহেমচন্দ্রৌ ॥

পটবাপঃ (পুং) বস্ত্রগৃহং। ইতি ত্রিকাণ্ডশেষঃ ॥

পটবাসঃ (পুং) বস্ত্রগৃহং। শাটী। ইতি শব্দরত্নাবলী ॥

পটবাসকঃ (পুং) পটবাসচূর্ণং। পটো বাস্যতেঽনেনেতি ঘঞি পটবাসঃ ততঃ স্বার্থে কঃ। তৎপর্য্যায়ঃ। পিষ্টাতঃ ২। পিষ্টেন কুঙ্কুমচূর্ণাদিনা অততি পিষ্টাতঃ পচাদ্যন্। ইত্যমরভরতৌ ॥

পটহং (ক্লী পুং) আনকবাদ্যং। ইত্যমরঃ ॥ পটৎশব্দং জহাতি পটহঃ ডঃ নিপাতাৎ তলোপঃ। ইতি ভরতঃ ॥

পটহঃ (পুং) যুদ্ধে বাদ্যমানঢক্কা। তৎপর্য্যায়ঃ। আড়ম্বরঃ ২। ইত্যমরঃ ॥ পটয়তি গময়তি যোধান্ যুদ্ধায় উৎসাহবর্দ্ধকত্বাৎ পটহঃ পট গতৌ নাম্নীতি অহঃ। ইতি ভরতঃ ॥ সমারম্ভঃ। হিংসনং। ইতি শব্দরত্নাবলী ॥

পটাকঃ (পুং) পক্ষিবিশেষঃ। ইত্যুণাদিকোষঃ ॥

পটাকা (স্ত্রী) পতাকা। ইতি শব্দরত্নাবলী ॥

পটালুকা (স্ত্রী) জলৌকা। ইতি ত্রিকাণ্ডশেষঃ

পটিঃ (স্ত্রী) পটভেদঃ। বাগুলিঃ। কুম্ভিকাদ্রুমঃ। ইতি মেদিনী ॥

পটিকা (স্ত্রী) পটিঃ। বস্ত্রং। যথা। বিস্তারে ত্রিকরাঃ করাষ্টকমিতা দৈর্ঘ্যে বিচিত্রাশ্চ চেদ্রূপৈরুৎকটপট্টসূত্রপটিকা অষ্টৌ লভন্তে শতং। দৈর্ঘ্যে সার্দ্ধকরত্রয়া পরপটী হস্তার্দ্ধবিস্তারিণী তাদৃক্ কিং লভতে দ্রুতং বদ বণিক্ বাণিজ্যকং বেৎসি চেৎ ॥ ইতি লীলাবতী ॥

পটিষ্ঠঃ (ত্রি) অতিশয়পটুঃ। ইতি ব্যাকরণং ॥

পটী (স্ত্রী) বস্ত্রভেদঃ। ইতি শব্দরত্নাবলী ॥ যবনিকা। ইতি ত্রিকাণ্ডশেষঃ ॥

পটীয়ান্ [স্] (ত্রি) অতিশয়পটুঃ। ইতি ব্যাকরণং ॥

পটীরং (ক্লী) তিতউঃ। তুঙ্গং। মূলকং। কেদারঃ। বারিদঃ। বেণুসারঃ। বাতিকঃ। চন্দনং। ইতি শব্দরত্নাবলী ॥ খদিরং। উদরং। কন্দর্পঃ। হরণীয়ং। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ ॥

পটু (ক্লী) ছত্রা। লবণং। ইতি মেদিনী ॥ পাংশুলবণং। ইতি রত্নমালা ॥

পটুঃ (পুং) পটোলঃ। ইত্যমরঃ ॥ পটোলপত্রং। ইতি বিশ্বঃ ॥ কাণ্ডীরলতা। কারবেল্লঃ। চোরকঃ। ইতি রাজনির্ঘণ্টঃ ॥

পটুঃ (ত্রি) দক্ষঃ। নীরোগঃ। চতুরঃ। ইতি মেদিনী ॥ তীক্ষ্ণঃ। স্ফুটঃ। ইতি হেমচন্দ্রঃ ॥ নিষ্ঠুরঃ। ইতি জটাধরঃ ॥ ধূর্ত্তঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

পটুকঃ (পুং) পটোলঃ। ইতি শব্দরত্নাবলী ॥

পটুকল্পঃ (ত্রি) ঈষদূনঃ পটুঃ। ইতি ব্যাকরণং ॥

পটুজাতীয়ঃ (ত্রি) পটুপ্রকারঃ। ইতি ব্যাকর

পটুতৃণকং (ক্লী) লবণতৃণং। ইতি রাজনির্ঘণ্টঃ ॥

পটুপত্রিকা (স্ত্রী) ক্ষুদ্রচঞ্চুক্ষুপঃ। ইতি রাজনির্ঘণ্টঃ ॥

পটুপর্ণিকা (স্ত্রী) ক্ষীরিণীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

পটুপর্ণী (স্ত্রী) স্বর্ণক্ষীরী। ইত্যমরঃ ॥

পটুরূপঃ (ত্রি) অতিশয়পটুঃ। ইতি ব্যাকরণং ॥

পটোটজং (ক্লী) ছত্রাকঃ। ইতি শব্দরত্নাবলী ॥

পটোলং (ক্লী) বস্ত্রভেদঃ। ইতি মেদিনী ॥ তত্তু গুজ্জরদেশীয়বিচিত্রপট্টবস্ত্রং ॥

পটোলঃ (পুং) স্বনামপ্রসিদ্ধলতিকাফলং। পলবল্ ইতি হিন্দী ভাষা। তৎপর্য্যায়ঃ। কুলকং ২ তিক্তকঃ ৩ পটুঃ ৪। ইত্যমরঃ ॥ কর্কশদলঃ ৫ কুলজঃ ৬ বাজিমান্ ৭ লতাফলঃ ৮ রাজফলঃ ৯ বরতিক্তঃ ১০ অমৃতাফলঃ ১১। ইতি রত্নমালা ॥ কটুফলঃ ১২ কটুকঃ ১৩ কর্কশচ্ছদঃ ১৪ রাজনামা ১৫ অমৃতফলঃ ১৬ পাণ্ডুঃ ১৭ পাণ্ডুফলঃ ১৮ বীজগর্ভঃ ১৯ নাগফলঃ ২০ কুষ্ঠারিঃ ২১ কাসমর্দ্দনঃ ২২ পঞ্জরঃ ২৩ আজীফলঃ ২৪ জ্যোৎস্নী ২৫ কচ্ছুঘ্নী ২৬। অস্য গুণাঃ। কটুত্বং। তিক্তত্বং। উষ্ণত্বং। সারকত্বং। পিত্তবলাশকফকণ্ডুতিকুষ্ঠাসৃগ্জ্বরদাহার্ত্তিনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ অপি চ। পাচনত্বং। হৃদ্যত্বং। বৃষ্যত্বং। লঘুত্বং। অগ্নিদীপনত্বং। স্নিগ্ধত্বং। কাসদোষত্রয়ক্রিমিনাশিত্বঞ্চ। তস্য মূলাদিগুণাঃ। পটোলস্য ভবেন্মূলং বিরেচনকরং সুখাৎ। নালং শ্লেষ্মহরং পত্রং পিত্তহারি ফলং পুনঃ ॥ দোষত্রয়হরং প্রোক্তং তদ্বত্তিক্তা পটোলিকা। ইতি ভাবপ্রকাশঃ ॥ অপি চ। পটোলং কফপিত্তাসৃগ্জ্বরকুষ্ঠব্রণাপহং। বিসর্পনয়নব্যাধিত্রিদোষগরনাশনৌ। পটোলফলকঞ্চেতি কিঞ্চিদ্গুণান্তরাবুভৌ ॥ ইতি রাজবল্লভঃ ॥

পটোলকঃ (পুং) শুক্তিঃ। ইতি শব্দমালা ॥

পটোলিকা (স্ত্রী) ফলবিশেষঃ। ঝিঙ্গা ইতি ভাষা। পোরলি ইতি খ্যাতা। ইতি কেচিৎ। ইতি ভরতঃ ॥ তৎপর্য্যায়ঃ। জ্যোৎস্নী ২ জালী ৩। ইত্যমরঃ ॥ জ্যোৎস্না ৪। ইতি স্বামী ॥

পটোলী (স্ত্রী) জ্যোৎস্নী। ইতি মেদিনী ॥

পট্টং (ক্লী) নগরং। ইতি শব্দরত্নাবলী ॥

পট্টঃ (পুং) পেষণপাষাণঃ। শিল্ ইতি ভাষা। ব্রণাদীনাং বন্ধনং। পটী ইতি ভাষা। চতুষ্পথঃ। চৌমাতা রাস্তা ইতি ভাষা। রাজাদিশাসনান্তরং। পাট্টা ইতি ভাষা। পীঠঃ। পিড়ি ইতি ভাষা। ইতি মেদিনী ॥ ফলকঃ। ঢাল ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ ॥ উষ্ণীষাদিঃ। পাগ ইত্যাদি ভাষা। ইতি স্বামী ॥ উত্তরীয়াদি। এক পাট্টা ইতি ভাষা। ইতি সুভূতিঃ ॥ কৌষেয়ঃ।

পাট্ ইতি রেশম্ ইতি চ ভাষা। ইতি মুকুটঃ॥ লোহিতকৌষেয়মুষ্ণীষাদি। রাঙ্গা রেশমী পাগ্ ইত্যাদি ভাষা। ইতি ভরতঃ॥

পট্টকঃ (পুং) পট্টঃ। পট্ট এব ইত্যর্থে স্বার্থে কপ্রত্যয়েন নিষ্পন্নঃ॥

পট্টজং (ক্লী) বস্ত্রভেদঃ। পট্টবস্ত্রং। ইতি জটাধরঃ॥

পট্টদেবী (স্ত্রী) মহাদেবী। পাটরাণী ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

পট্টনং (ক্লী)
পট্টনী (স্ত্রী) পত্তনং। ইতি দ্বিরূপকোষঃ॥

পট্টরঙ্গং (ক্লী) পত্তরঙ্গং। বকম্ ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

পট্টরঞ্জনকং (ক্লী) পত্তরঙ্গং। ইতি রাজনির্ঘণ্টঃ॥

পট্টশাকং (ক্লী পুং) নালিতাশাকং। ইতি শব্দমালা ভাবপ্রকাশশ্চ॥ অস্য গুণাঃ নাড়ীচশব্দে দ্রষ্টব্যাঃ॥

পট্টার্হা (স্ত্রী) মহাদেবী। পাটরাণী ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

পট্টিকা (স্ত্রী) পট্টিকাখ্যলোধ্রঃ। ইত্যমরটীকায়াং বাচস্পতিঃ॥

পট্টিকাখ্যঃ (পুং) রক্তলোধ্রঃ। পাটিয়ালোধ ইতি ভাষা। তৎপর্য্যায়ঃ। ক্রমুকঃ ২ পট্টী ৩ লাক্ষাপ্রসাদনঃ ৪। ইত্যমরঃ॥

পট্টিকালোধ্রঃ (পুং) রক্তলোধ্রঃ। পাটিয়ালোধ ইতি ভাষা। তৎপর্য্যায়ঃ। ক্রমুকঃ২ বল্কলোধ্রঃ ৩ বৃহদ্দলঃ ৪ জীর্ণবুধ্নঃ ৫ বৃহদ্বল্কঃ ৬ শীর্ণপত্রঃ ৭ অক্ষিভেষজঃ ৮ শাবরঃ ৯ শ্বেতলোধ্রঃ ১০ গালবঃ ১১ বৃহত্ত্বচঃ ১২ পট্টী ১৩ লাক্ষাপ্রসাদঃ ১৪ বল্কঃ ১৫। ইতি রাজনির্ঘণ্টঃ॥ স্থূলবল্কলঃ ১৬ জীর্ণপত্রঃ ১৭ বৃহৎপত্রঃ ১৮। ইতি ভাবপ্রকাশঃ॥ লোধ্রদ্বয়গুণাঃ। কষায়ত্বং। শীতত্বং। বাতকফাস্রবিষনাশিত্বং। চক্ষুষ্যত্বং। তত্র বল্কলোধ্রকো বিশিষ্টঃ। ইতি রাজনির্ঘণ্টঃ॥ গ্রাহিত্বং। লঘুত্বং। পিত্তরক্তপিত্তাতীসারশোথনাশিত্বঞ্চ। ইতি ভাবপ্রকাশঃ॥

পট্টিলঃ (পুং) পূতিকরজঃ। ইতি জটাধরঃ॥

পট্টিলোধ্রঃ
পট্টিলোধ্রকঃ (পুং) পট্টিকালোধ্রঃ। ইতি শব্দরত্নাবলী॥

পট্টিশঃ
পট্টিসঃ (পুং) অস্ত্রবিশেষঃ। যথা। পরশুঃ পট্টিসো নাম স এব চ পরশ্বধঃ। ইত্যমরটীকায়াং ভরতঃ॥

পট্টী (স্ত্রী) পট্টিকালোধ্রঃ। ইতি রাজনির্ঘণ্টঃ॥ ললাটভূষা। ইতি বিশ্বঃ॥ তলসারকং। অশ্ববক্ষঃস্থলবন্ধনরজ্জুঃ। ইতি শব্দমালা॥

পট্টী [ন্] (পুং) রক্তলোধ্রঃ। ইতি স্বামী॥ ইত্যমরটীকায়াং ভরতঃ॥

পট্টোলিকা (স্ত্রী) কৃপ্তকীলা। ব্যবস্থাপত্রং ইতি কেচিৎ। পাট্টা। ইতি চ কেচিৎ। ইতি ত্রিকাণ্ডশেষঃ॥

পঠ বাচি। ইতি কবিকল্পদ্রুমঃ॥ পঠতি শ্লোকং ধীরঃ। ইতি দুর্গাদাসঃ॥

পঠনং (ক্লী) বাচনং। পড়ন্ ইতি ভাষা। যথা। ভূতপ্রেতপিশাচানাং পঠনাদেব নাশনং। ইতি দেবীমাহাত্ম্যং॥

পঠমঞ্জরী (স্ত্রী) শ্রীরাগস্য চতুর্থরাগিণী। তস্যা ন্যাসাংশগৃহাঃ পঞ্চমঃ। গানসময়স্তু এক-

প্রহরদিবসোত্তরং। ইতি সঙ্গীতদর্পণঃ॥ লক্ষণং যথা। বিয়োগিনী কান্তবিতীর্ণ-পুষ্পাং স্রজং বহন্তী বপুষাতিমুগ্ধা। আশ্বাস্যমানা প্রিয়য়া চ সখ্যা বিধূসরাঙ্গী পঠমঞ্জরীয়ং॥ ইতি সঙ্গীতদামোদরঃ॥

পঠসমঞ্জরী (স্ত্রী) রাগিণীবিশেষঃ। ইতি হলায়ুধঃ॥

পঠিঃ (স্ত্রী) পঠনং। পাঠঃ। ইতি শব্দরত্নাবলী॥

পঠিতঃ (ত্রি) বাচিতঃ। কৃতপাঠঃ। অধীতঃ। উচ্চরিতঃ। যথা। ময়া ন পঠিতা চণ্ডী ত্বয়া নাপি চিকিৎসিতং। অকস্মান্নগরোপান্তে কথং ধূমায়তে চিতা॥ ইতি হাস্যার্ণবঃ॥

পঠিতব্যং (ত্রি) পঠনীয়ং। পাঠ্যং। যথা। তস্মান্মমৈতন্মাহাত্ম্যং পঠিতব্যং সমাহিতৈঃ। ইতি দেবীমাহাত্ম্যং॥

পড ই কৃ সংহতৌ। ইতি কবিকল্পদ্রুমঃ॥ ই কৃ পণ্ডয়তি। সংহতী রাশীকরণং। ইতি দুর্গাদাসঃ॥

পড ই ঙ গত্যাং। ইতি কবিকল্পদ্রুমঃ॥ ই পণ্ড্যতে। ঙ পণ্ডতে। ইতি দুর্গাদাসঃ॥

পণ ঙ ব্যবহৃতৌ। স্তুতৌ। ইতি কবিকল্পদ্রুমঃ॥ ব্যবহৃতৌ ব্যবহারে। ঙ পণতে। পণায়তি পণায়তে আয়াস্তত্বাদুভয়পদমিতি বোপদেবঃ। প্রাণানামপণিষ্টাসৌ অত্র কর্ম্মণি ষষ্ঠী। স্তুতৌ তু পণায়তি পণায়তে বিষ্ণুং ধীরঃ। অন্যে তু দ্বয়োরর্থয়োরেব আয়স্যাপ্রাপ্তিপক্ষে আত্মনেপদমেব। অপণিষ্ট পেণে পণিতা পণিষীষ্ট পণিষ্যতে অপণিষ্যৎ। ইতি দুর্গাদাসঃ॥

পণঃ (পুং) কার্ষিকতাম্রিকঃ। স তু পঞ্চকৃষ্ণলমাষকারব্ধতাম্রকর্ষকৃতব্যবহারদ্রব্যং। পূর্ব্বং হি তাম্ররক্তিকায়াঃ কপর্দ্দক একো মূল্যমিতি অশীতিবরাটমূল্যঃ। লোকে তূপচারাৎ কার্ষাপণবৎ পণব্যপদেশো মূল্য এব। নির্ব্বেশঃ। ভৃতিঃ। দ্যূতং। গ্লহঃ। আড় ইতি হোড় ইতি বাজি ইতি চ ভাষা। মূল্যং। ধনং। ইত্যমরভরতৌ॥ কার্ষাপণঃ। ক্রয্যশাকাট্টিকা। ব্যবহারঃ। ইতি মেদিনী॥ বিংশতিগণ্ডকঃ। ইতি হেমচন্দ্রঃ॥ শৌণ্ডিকঃ। ইতি জটাধরঃ॥ গৃহং। ইতি শব্দমালা॥

পণগ্রন্থিঃ (পুং) হট্টঃ। ইতি শব্দরত্নাবলী॥

পণনং (ক্লী) বিক্রয়ঃ। ইতি শব্দরত্নাবলী॥

পণফরং (ক্লী) লগ্নাৎ দ্বিতীয়পঞ্চমাষ্টমৈকাদশ লগ্নাঃ। যথা। পণফরং দ্বিতীয়াষ্টপঞ্চমৈকাদশং বিদুঃ। ইতি জ্যোতিস্তত্ত্বং॥

পণবঃ (পুং) গায়নপটহঃ। প্রণব ইতি কেচিৎ। ইত্যমরভরতৌ॥

পণবা (স্ত্রী) পণবঃ। যথা। পণবঃ পণবা চ স্যাৎ প্রণবোঽপ্যত্র বর্ত্ততে। ইতি ভরতদ্বিরূপকোষঃ॥

পণসঃ (পুং) পণ্যদ্রব্যং। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥

পণাঙ্গনা (স্ত্রী) বেশ্যা। ইতি হেমচন্দ্রঃ॥

পণায়া (স্ত্রী) ক্রয়বিক্রয়ব্যবহারঃ। ইতি জটাধরঃ॥

পণায়িতঃ (ত্রি) স্তুতঃ। ইত্যমরঃ॥

পণাস্থি (ক্লী) কপর্দ্দকং। বরাটকঃ। ইতি ত্রিকাণ্ডশেষঃ॥

পণাস্থিকং (ক্লী) বরাটকঃ। ইতি হেমচন্দ্রঃ॥

পণিতং (ত্রি) স্তুতং। ইত্যমরঃ॥ ব্যবহৃতং। ইতি পণধাত্বর্থদর্শনাৎ॥

পণিতব্যং (ত্রি) বিক্রেয়দ্রব্যং। ইত্যমরঃ॥ স্তোতব্যং। ব্যবহার্য্যং। ইতি পণধাত্বর্থ-দর্শনাৎ॥

পণ্ডঃ (পুং) ক্লীবং। নপুংসকং। ইত্যমরঃ॥ নিষ্ফলশ্চ॥

পণ্ডা (স্ত্রী) বুদ্ধিঃ। ইতি মেদিনী॥ তত্ত্বা-নুগা বুদ্ধিঃ। ইতি হেমচন্দ্রঃ॥

পণ্ডাপূর্ব্বং (ক্লী) ফলাজনকাদৃষ্টং। তদ্-বিশিষ্টে ত্রি। যথা। যদপি পণ্ডাপূর্ব্বং ফল-মিতি তদপি ন কামনাভাবে অকরণাপত্তে-স্তৌল্যাৎ। ইতি সিদ্ধান্তমুক্তাবলী॥

পণ্ডিতঃ (পুং) পণ্ডা বুদ্ধিঃ সা জাতা অস্য। শাস্ত্রজ্ঞঃ। অস্য লক্ষণং যথা। পঠকাঃ পাঠকাশ্চৈব যে চান্যে শাস্ত্রচিন্তকাঃ। সর্ব্বে ব্যসনিনো মূর্খা যঃ ক্রিয়াবান্ স পণ্ডিতঃ॥ ইতি মহাভারতে বনপর্ব্ব॥ অপি চ। বিদ্যাবিনয়সম্পন্নে ব্রাহ্মণে গবি হস্তিনি। শুনি চৈব শ্বপাকে চ পণ্ডিতাঃ সমদর্শিনঃ॥ ইতি শ্রীভগবদ্-গীতায়াং৫ অধ্যায়ঃ॥ তৎপর্য্যায়ঃ। বিদ্বান্২ বিপশ্চিৎ৩ দোষজ্ঞঃ ৪ সন্ ৫ সুধীঃ ৬ কোবিদঃ ৭ বুধঃ ৮ ধীরঃ ৯ মনীষী ১০ জ্ঞঃ ১১ প্রাজ্ঞঃ ১২ সংখ্যাবান্ ১৩ কবিঃ ১৪ ধীমান্ ১৫ সূরিঃ ১৬ কৃতী ১৭ ১৮ লব্ধবর্ণঃ ১৯ বিচক্ষণঃ ২০ দূরদর্শী ২১ দীর্ঘদর্শী ২২ বিশারদঃ ২৩। ইত্যমরঃ॥ কবী ২৪ সূরী ২৫। ইতি ভরতঃ॥ বিদগ্ধঃ ২৬ দূরদৃক্ ২৭ বেদী ২৮ বৃদ্ধঃ ২৯ বুদ্ধঃ ৩০ বিধানগঃ ৩১ প্রজ্ঞিলঃ ৩২ কৃষ্টিঃ ৩৩। ইতি শব্দরত্নাবলী॥ বিজ্ঞঃ ৩৪ মেধাবী ৩৫। ইতি রাজনির্ঘণ্টঃ॥ সিহ্লকঃ। ইতি মেদিনী॥

পণ্ডিতম্মন্যঃ (ত্রি) আত্মানং পণ্ডিতম্মন্যতে যঃ সঃ। ইতি ব্যাকরণং॥

পণ্ডিতমানী [ন্] (ত্রি) পণ্ডিতাভিমানী। যথা। মূর্খাঃ পণ্ডিতমানিনঃ। ইতি প্রাচীনাঃ॥

পণ্যং (ত্রি) পণিতব্যং। বিক্রেয়দ্রব্যং। ইত্যমরঃ॥ ব্যবহার্য্যং। স্তোতব্যং। ইতি পণধাত্বর্থদর্শনাৎ॥

পণ্যবীথিকা (স্ত্রী) বিপণিঃ। ইত্যমরঃ॥ পণ্যবিক্রয়শালা। ইতি হলায়ুধঃ॥ হট্টঃ। ইত্যন্যে॥ বিক্রয়ার্থপ্রসারিতনানাদ্রব্যাণাং বণিগ্বীথী। বাণিয়াবিহী ইতি বাজার ইতি চ খ্যাতঃ। ইতি কেচিৎ। হট্ট-মণ্ডপঃ। ইতি কেচিৎ। হট্টমধ্যস্থপণ্য-বিক্রয়বীথী। ইতি কেচিৎ। ইতি তট্টীকায়াং ভরতঃ॥ আপণঃ পণ্যবীথী চ দ্বয়ং বীথীতিসংজ্ঞিতং। ইতি শাশ্বতঃ॥

পণ্যবীথী (স্ত্রী) ক্রয়বিক্রয়স্থানং। ইতি শব্দমালা॥

পণ্যশালা (স্ত্রী) হট্টঃ। ইতি হেমচন্দ্রঃ॥ বিক্রয়গৃহঞ্চ॥

পণ্যস্ত্রী (স্ত্রী) বেশ্যা। ইতি কোষান্তরং॥

পণ্যা (স্ত্রী) পিণ্যা। ইতি দ্বিরূপকোষঃ॥

পণ্যাঙ্গনা (স্ত্রী) বেশ্যা। ইতি হেমচন্দ্রঃ॥

পণ্যাজীবঃ (পুং) ক্রয়বিক্রয়িকঃ। বণিক্। ইত্যমরঃ॥

পণ্যাজীবকং (ক্লী) হট্টঃ। ইতি ত্রিকাণ্ডশেষঃ॥ পণ্যজীবকমিত্যপি পাঠঃ॥

পণ্যান্ধা (স্ত্রী) তৃণবিশেষঃ। তৎপর্য্যায়ঃ। কঙ্গুনীপত্রা ২ পণ্যধা ৩ পণধা ৪। অস্যা গুণাঃ। সমবীর্য্যত্বং। তিক্তত্বং। ক্ষারত্বং। সারকত্বং। তৎকালশস্ত্রঘাতব্রণসংরোপণত্বঞ্চ। দীর্ঘা মধ্যা তথা হ্রস্বা পণ্যান্ধা ত্রিবিধা স্মৃতা। রসবীর্য্যবিপাকেষু মধ্যমা গুণদায়িকা॥ ইতি রাজনির্ঘণ্টঃ॥ পণ্যন্ধা ইত্যপি পাঠঃ॥

পৎ [দ্] (পুং) পাদঃ। ইত্যমরঃ॥

পত ৯ জ গতৌ। ঐশ্বে। ইতি কবিকল্পদ্রুমঃ॥ ৯ অপতৎ। জ পাতঃ পতঃ। গতিরিহ পতনং। পততি পত্রং বৃক্ষাৎ। ইতি দুর্গাদাসঃ॥

পত ৎ ক গতৌ। ঐশ্যে। ইতি কবিকল্পদ্রুমঃ॥ ঐশ্যমিশ্বরীভাবঃ। গতিরিহ পতন। পাতয়তি পত্রং বৃক্ষাৎ। ইতি দুর্গাদাসঃ॥

পত য ঙ ঐশ্যে। ইতি কবিকল্পদ্রুমঃ॥ য ঙ পত্যতে। ঐশ্যমৈশ্বর্য্যমিশ্বরীভাবঃ। ইতি দুর্গাদাসঃ॥

পতং (ত্রি) পুষ্টং। ইতি জটাধরঃ॥

পতগঃ (পুং) পক্ষী। ইত্যমরঃ॥

পতঙ্গং (ক্লী) সূতং। পারদং। ইতি মেদিনী॥ চন্দনভেদঃ। ইতি শব্দচন্দ্রিকা॥

পতঙ্গঃ (পুং) সূর্য্যঃ। পক্ষী। শলভঃ। ইত্যমরঃ॥ শালিপ্রভেদঃ। ইতি মেদিনী॥ জলমধূকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

পতঙ্গমঃ (পুং) পক্ষী। ইতি ব্যাকরণং॥

পতঙ্গিকা (স্ত্রী) মধুমক্ষিকাবিশেষঃ। তৎপর্য্যায়ঃ। পুত্তিকা ২। ইত্যমরঃ॥

পতঞ্চিকা (স্ত্রী) ধনুর্জ্যা। ইতি শব্দরত্নাবলী॥

পতঞ্জলিঃ (পুং) মুনিবিশেষঃ। স তু পাতঞ্জলদর্শনপাণিনিটীকামহাভাষ্যাদিগ্রন্থকর্ত্তা। তৎপর্য্যায়ঃ। গোনর্দ্দীয়ঃ ২। ইতি হেমচন্দ্রঃ॥ চূর্ণিকৃৎ ৩ ভাষ্যকারঃ ৪। ইতি ত্রিকাণ্ডশেষঃ॥ বররুচিঃ ৫। ইতি শব্দরত্নাবলী॥

পতত্রং (ক্লী) পক্ষঃ। পাখা ইতি ভাষা। ইত্যমরঃ॥

পতত্রিঃ (পুং) পক্ষী। ইত্যমরঃ॥

পতত্রী [ন্] (পুং) পক্ষী। ইত্যমরঃ॥

পতদ্গ্রহঃ (পুং) প্রতিগ্রাহঃ। পিক্দানী ইতি ভাষা। ইত্যমরঃ॥

পতদ্ভীরুঃ (পুং) শ্যেনঃ। ইতি শব্দরত্নাবলী॥

পতন্ [ৎ] (পুং) পক্ষী। পতনশীলে ত্রি। ইতি মেদিনী॥

পতনং (ক্লী) পাতঃ। পড়ন্ ইতি ভাষা। যথা। অশনেঃ পতনে ন বেদনা পতনজ্ঞানমতীব দুঃসহং॥ ইত্যুদ্ভটঃ॥ দ্বিজাতি-

কর্ম্মভ্যো হানিঃ পতনং পরত্র চাসিদ্ধি-স্তমেকে নরকং। ইতি হারীতসূত্রং॥ পাপং। যথা। বিহিতস্যাননুষ্ঠানান্নিন্দিতস্য চ সেবনাৎ। অনিগ্রহাচ্চেন্দ্রিয়াণাং নরঃ পতনমৃচ্ছতি॥ ইতি প্রায়শ্চিত্তবিবেকঃ॥

পতয়ুঃ (পুং) চন্দ্রঃ। পক্ষী। পতঙ্গঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥

পতয়ালুঃ (ত্রি) পতনশীলঃ। তৎপর্য্যায়ঃ। পাতুকঃ ২। ইত্যমরঃ॥

পতসঃ (পুং) পক্ষী। ইত্যুণাদিকোষঃ॥ চন্দ্রঃ পতঙ্গঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥

পতাকা (স্ত্রী) পত্যতে জ্ঞায়তে যোধভেদোহনয়া। ধ্বজং। নিশান্ ইতি ভাষা। তৎপর্য্যায়ঃ। বৈজয়ন্তী ২ কেতনং ৩ ধ্বজং ৪। ইত্যমরঃ॥ পটাকা ৫ জয়ন্তী৬ বৈজয়ন্তিকা ৭ কদলী ৮ কন্দুলী ৯ কেতুঃ১০ কদলিকা ১১ ব্যোমমণ্ডলং১২। ইতি শব্দরত্নাবলী॥ চিহ্নং ১৩। ইতি জটাধরঃ॥ কেতনং ধ্বজং এতদ্দ্বয়ং পাতাকাদণ্ডে। ইতিভরতঃ॥ সৌভাগ্যং। নাটকাঙ্গং। ইতি মেদিনী॥ অঙ্কঃ। কেতু। ইতি হেমচন্দ্রঃ॥ অস্য বিবরণং ধ্বজশব্দে দ্রষ্টব্যং॥

পতাকী [ন্] (ত্রি) বৈজয়ন্তিকঃ। পতাকাধারী। ইত্যমরঃ॥ রিষ্টারিষ্ট-বোধকচক্রবিশেষঃ। তস্য লিখনক্রমো যথা। তির্য্যগূর্দ্ধগতা রেখাঃ তিস্রো দেয়াঃ পতাকয়া। যুতাঃ কার্য্যা বেধবিদা সর্ব্বসঙ্গতরেখয়া॥ দক্ষস্থোদ্গতরেখাতো বামং মেষাদ্যরাশয়ঃ। পঞ্চাষ্টযুগ্মবিংশাশ্চ ষড়্দশেন্দ্রাগ্নিসাগরাঃ॥ কর্কটান্মীনপর্য্যন্তমঙ্কা দেয়া যথাক্রমং।

বালস্য জন্মকালীনগ্রহলগ্নমজাদিষু। বিন্যস্য চিন্তয়েৎ প্রাজ্ঞঃ শুভাশুভং যথাগ্রহাৎ॥ *॥ তত্র শুভাশুভজ্ঞানং যথা। শুভদণ্ডযোগবেধৈর্লগ্নাদ্বালস্য শোভনং। পাপদণ্ডযোগবেধৈরাশ্যঙ্কাদ্রিষ্টিকালবিৎ। বলেঽধিকে দিনং মধ্যে মাসো হীনে চ হায়নং॥ *॥ বেধজ্ঞানং যথা। কর্কে মীনধনুর্ভ্যাঞ্চ হরেঃ কীটঘটেন চ। স্ত্রিয়াস্তৌলিমৃগাভ্যাঞ্চ ধটে মীনেন কন্যয়া॥ ধনুষো মৃগকর্কিভ্যাং মকরে ধনুষা স্ত্রিয়া। মীনে কর্কিতুলাভ্যাঞ্চ মীনস্ত্রীধনুষাত্বজে॥ তুলাকর্কিমৃগৈর্দ্বন্দ্বে কীটকুম্ভবৃষেষু চ। সিংহবদ্বেধ এতেষু বামদক্ষিণসংমুখৈঃ॥ রাহুকেত্বর্কসৌরারৈঃ পাপৈর্বিদ্ধো যুতোঽশুভঃ। তদন্যৈর্যুতবিদ্ধস্তু লগ্নরাশিঃ শুভপ্রদঃ॥ *॥ রিষ্টিকালো যথা। একোনবিংশতিঃ কর্কে সিংহে সপ্তদশৈব তু। ষট্‌ত্রিংশদবলায়াঞ্চ ষড়্বিংশতিস্তুলাধরে॥ বৃশ্চিকে সিংহবজ্জ্ঞেয়মূনত্রিংশচ্ছরাসনে। ষড়্বিংশঃ মকরে জ্ঞেয়ং কুম্ভে সপ্তদশ স্মৃতাঃ॥ নবযুগ্মে তথা মীনে মেষে ষড়্দশভিস্তথা।

বৃষভে চ তথা সিংহে যুগ্মেঽঙ্কহরলোচনে॥ ত্রিতয়াঙ্কাদিয়ং সংখ্যা দিনমাসাব্দনির্ণয়ে। একাঙ্কাদ্দ্বিগৃহাঙ্কাদ্বা ক্বচিদ্রিষ্টেশ্চ সম্ভবঃ ॥ * ॥ অথ যামার্দ্ধাধিপজ্ঞানং। বারেশাদর্দ্ধযামেষু রাত্র্যহ্নোঃ পঞ্চষট্ ক্রমাৎ ॥ অধিপাঃ স্যুর্গ্রহাস্তত্র যথার্কাহে ভবন্তি তে। রবীজ্যেন্দুভৃগুক্ষ্মাজশনিজ্ঞরবয়ো নিশি॥ রবিশুক্রজ্ঞরাত্রীশশনীজ্যকুজভাস্করাঃ। দিনে ঊহ্যাঃ পরেষ্বেবং তত্রাধ্যক্ষাশ্চতুর্গ্রহাঃ ॥ * ॥ অথ দণ্ডাধিপজ্ঞানং। পাপদণ্ডে ভবেদ্রিষ্টিঃ শুভদণ্ডে শুভং ভবেৎ। শুভগ্রহস্য দণ্ডে তু কর্ম্মারম্ভাচ্ছুভং ভবেৎ॥ যস্যার্দ্ধযামস্তস্যৈব প্রাগ্দণ্ডঃ সর্ব্বদা ততঃ। ষট্ ষট্ পরীত্য দণ্ডাশ্চ ত্রয়ো রাত্রৌ মতা যথা॥ আদিত্যে ভৃগুজো বুধোঽপি চ শশী সোমে শনীজ্যৌ কুজো ভৌমেঽর্কঃ সিতসোমজৌ চ শশিজে সোমঃ শনির্ব্বাক্পতিঃ। জীবেঽঙ্গাররবী ভৃগুর্ভৃগুসুতে সৌম্যেন্দুমার্ত্তণ্ডজাঃ কালে জীবমহীজতিগ্মকিরণা রাত্রৌ চ দণ্ডাধিপাঃ॥ যামার্দ্ধাধিপসংখ্যাতো দ্বিতীয়স্তু তদর্দ্ধকঃ। তদর্দ্ধাত্তু তৃতীয়ঃ স্যাত্তদর্দ্ধাত্তু তুরীয়কঃ॥ অঙ্কাভাবে তু রাহুঃ স্যাৎ তদঙ্কো বসুসংজ্ঞকঃ। ভগ্নাঙ্কস্য পরিত্যাগাদ্দিবাদণ্ডাধিপা যথা॥ রবিদনুজবুধগ্লৌশ্চন্দ্রসূরাসুরজ্ঞাঃ কুজরবিদনুজজ্ঞাজ্জেন্দুসূরাসুরাশ্চ। গুরুশশিরবিদৈত্যাঃ শুক্রভৌমার্কদৈত্যাঃ শনিকুজরবিদৈত্যা দণ্ডপাস্ত্বর্দ্ধযামে ॥ * ॥ শুভাশুভদণ্ডজ্ঞানং যথা। শেষাবর্কস্য দণ্ডৌ সততশুভকরাবাদিশেষৌ তথেন্দোঃ শেষো দণ্ডঃ কুজস্যাপ্যথ গুরুবুধয়োরাদ্যমর্দ্ধং প্রশস্তং। আদির্দণ্ডস্তথৈকো ভৃগুকুলনৃপতেঃ সর্ব্বকার্য্যেষু শস্তো দণ্ডাশ্চত্বার এতে ক্বচিদপি সময়ে নৈব শৌরেঃ প্রশস্তাঃ॥ * ॥ পলপতাকী যথা। প্রতিদণ্ডং পলান্যেষাং জ্ঞাত্বা বাচ্যং ক্বচিচ্ছুভং। রবৌ চ বেদা বসবঃ সুধাংশৌ কুজে চ বাণাঃ শশিজে তথাঙ্কাঃ। শনাবৃতুর্দিক্ চ বৃহস্পতৌ স্যাদ্রাহৌ তুরঙ্গা ভৃগুজে চ রুদ্রাঃ॥ * ॥ বালস্য শুভাশুভফলং যথা। অশুভে দণ্ডসংযোগে সর্ব্বত্র পুণ্যবর্জিতে। বালস্য মরণং শীঘ্রং যদি পাপৈঃ সমন্বিতং॥ অশুভগ্রহদণ্ডে তু সর্ব্বত্র পাপবর্জ্জিতে। বালস্য কুশলং সর্ব্বং শুভৈর্যদি সমন্বিতং॥ অশুভো দণ্ডনাথো হি বেধশ্চেত্তেন লভ্যতে। মরণং তত্র বক্তব্যং বালস্য নান্যথা ভবেৎ॥ পাপস্য দণ্ডমাত্রে তু তদ্যোগবেধবর্জিতে। বালস্য কুশলং তত্র শুভৈর্যদি সমন্বিতং॥ ইতি জ্যোতিষতত্ত্বে পতাকীবেধঃ॥

পতিঃ (পুং) মূলং। গতিঃ। ইতি বিশ্বঃ॥ পাণিগ্রহীতা। ভাতার ইতি ভাষা। তৎপর্য্যায়ঃ। ধবঃ ২ প্রিয়ঃ ৩ ভর্ত্তা ৪। ইত্যমরঃ॥ কান্তঃ ৫ প্রাণনাথঃ ৬ গুরুঃ ৭ হৃদয়েশঃ ৮ জীবিতেশঃ ৯ জামাতা ১০ সুখোৎসবঃ ১১ নর্ম্মকীলঃ ১২ রতগুরুঃ ১৩ স্বামী ১৪ রমণঃ ১৫। ইতি শব্দরত্নাবলী॥ বরঃ ১৬ পরিণেতা ১৭ গৃহী ১৮। ইতি রাজনির্ঘণ্টঃ॥ তস্য লক্ষণং। বিধিবৎ-

পাণিগ্রাহকঃ। অনুকূলদক্ষিণধৃষ্টশঠ-ভেদাৎ পতিশ্চতুর্দ্ধা। সার্ব্বকালিকপরাঙ্গনাপরাঙ্মুখত্বে সতি সর্ব্বকালমনুরক্তোঽনুকূলঃ। ১। সকলনায়িকাবিষয়সমসহজানুরাগো দক্ষিণঃ। ২। ভূয়ো নিঃশঙ্কঃ কৃতদোষোঽপি ভূয়ো নিবারিতোঽপি ভূয়ঃ প্রশ্রয়পরায়ণো ধৃষ্টঃ। ৩। কামিনীবিষয়কপটপটুঃ শঠঃ। ৪। ইতি রসমঞ্জরী ॥*॥ পতিসেবাদিফলং যথা। কথং মে সুব্রতে সাধ্বি নিদ্রাভঙ্গঃ কৃতস্ত্বয়া। ব্যর্থং ব্রতাদিকং তস্যা যা ভর্ত্তুশ্চাপকারিণী ॥ তপশ্চানশনঞ্চৈব ব্রতং দানাদিকঞ্চ যৎ। ভর্ত্তুরপ্রিয়কারিণ্যাঃ সর্ব্বং ভবতি নিষ্ফলং॥ যয়া প্রিয়ঃ পূজিতশ্চ শ্রীকৃষ্ণঃ পূজিতস্তয়া। পতিব্রতাব্রতার্থঞ্চ পতিরূপী হরিঃ স্বয়ং॥ সর্ব্বদানং সর্ব্বযজ্ঞঃ সর্ব্বতীর্থনিষেবণং। সর্ব্বং ব্রতং তপঃ সর্ব্বমুপবাসাদিকঞ্চ যৎ ॥ সর্ব্বধর্ম্মঞ্চ সত্যঞ্চ সর্ব্বদেবপ্রপূজনং। তৎ সর্ব্বং স্বামিসেবায়াঃ কলাং নার্হন্তি ষোড়শীং ॥ সুপুণ্যে ভারতে বর্ষে পতিসেবাং করোতি যা। বৈকুণ্ঠং স্বামিনা সার্দ্ধং সা যাতি ব্রহ্মণঃ শতং ॥ বিপ্রিয়ং কুরুতে ভর্ত্তুর্বিপ্রিয়ং বদতি প্রিয়ং। অসৎকুলপ্রজাতা যা তৎফলং শ্রূয়তাং সতি ॥ কুম্ভীপাকং ব্রজেৎ সা চ যাবচ্চন্দ্রদিবাকরৌ। ততো ভবতি চাণ্ডালী পতিপুত্রবিবর্জ্জিতা ॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ৪৩ অধ্যায়ঃ ॥ * ॥ অপি চ। স্বকান্তশ্চ পরো বন্ধুরিহ লোকে পরত্র চ। নহি কান্তাৎ পরঃ শ্রেয়ান্ কুলস্ত্রীণাং পরো গুরুঃ ॥ দেবপূজা ব্রতং দানং তপশ্চানশনং জপঃ। স্নানঞ্চ সর্ব্বতীর্থেষু দীক্ষা সর্ব্বমখেষু চ ॥ প্রাদক্ষিণ্যং পৃথিব্যাশ্চ ব্রাহ্মণাতিথিসেবনং। সর্ব্বাণি পতিসেবায়াঃ কলাং নার্হন্তি ষোড়শীং ॥ কিমতঃ পতিভক্তায়া অভক্তায়াশ্চ ভারতে। যয়া দুঃখী সুখারম্ভে সাকাঙ্ক্ষঃ প্রথমো ভবেৎ ॥ পতিসেবাপরো ধর্ম্মো নহি স্ত্রীণাং শ্রুতৌ শ্রুতং। স্বপ্নে জ্ঞানে চ সততং কান্তং নারায়ণাধিকং। দৃষ্ট্বা তচ্চরণাম্ভোজং সেবাং নিত্যং করিষ্যসি ॥ পরিহাসেন কোপেন ভ্রমেণাবজ্ঞয়া সুতে। কটূক্তিং স্বামিনঃ সাক্ষাৎ পরোক্ষাম্ন করিষ্যসি ॥ স্ত্রিয়া বাগ্‌যোনিদুষ্টায়াঃ কামতো ভারতে ভুবি। প্রায়শ্চিত্তং শ্রুতৌ নাস্তি নরকং ব্রহ্মণঃ শতং ॥ সর্ব্বধর্ম্মপরীতা যা কটূক্তিং কুরুতে পতিং। শতজন্মকৃতং পুণ্যং তস্যা নশ্যতি নিশ্চিতং ॥ দত্ত্বা কন্যাং বোধয়িত্বা জগাম মুনিপুঙ্গবঃ। ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ২৪ অধ্যায়ঃ ॥ * ॥ অপি চ। যা স্ত্রী ভর্ত্তুরসৌভাগ্যা সাসৌভাগ্যা চ সর্ব্বতঃ। শয়নে ভোজনে তস্যা ন সুখং জীবনং বৃথা ॥ যস্যা নাস্তি প্রিয়প্রেম তস্যা জন্ম নিরর্থকং। তৎ কিং পুত্রে ধনে রূপে সম্পত্তৌ যৌবনেঽথবা ॥ যদ্ভক্তির্নাস্তি কান্তে চ সর্ব্বপ্রিয়তমে পরে। সাশুচির্ধর্ম্মহীনা চ সর্ব্বকর্ম্মবিবর্জ্জিতা ॥ পতির্ব্বন্ধুর্গতির্ভর্ত্তা দৈবতং গুরুরেব চ। সর্ব্বস্মাচ্চ পরঃ স্বামী ন গুরুঃ স্বামিনঃ পরঃ ॥

পিতা মাতা সুতো ভ্রাতা ক্লিষ্টো দত্তে মিতং ধনং। সর্ব্বস্বদাতা স্বামী চ মূঢ়ানাং যোষিতাং সুরাঃ॥ কাচিদেব হি জানাতি মহাসাধ্বী চ স্বামিনং। অতিসদ্বংশজাতা চ সুশীলা কুলপালিকা॥ অসদ্বংশপ্রসূতা যা দুঃশীলা ধর্ম্মবর্জ্জিতা। মুখদুষ্টা যোনিদুষ্টা পতিং নিন্দন্তি কোপতঃ॥ যা স্ত্রী দ্বেষ্টি সর্ব্বপরং পতিং বিষ্ণুসমং গুরুং। কুম্ভীপাকে পচতি সা যাবদিন্দ্রাশ্চতুর্দ্দশ॥ ব্রতঞ্চানশনং দানং সত্যং পুণ্যং তপশ্চিরং। পতিভক্তিবিহীনায়া ভস্মীভূতং নিরর্থকং॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ৫৭ অধ্যায়ঃ॥ *॥ অপি চ। সাধ্ব্যাঃ সদ্বংশজায়াশ্চ শতপুত্রাধিকঃ পতিঃ। অসদ্বংশপ্রসূতা যা দুঃশীলা জ্ঞানবর্জ্জিতা। স্বামিনং মন্যতে নাসৌ পিত্রোর্দ্দোষেণ কুৎসিতা॥ কুৎসিতং পতিতং মূঢ়ং দরিদ্রং রোগিণং জড়ং। কুলজা বিষ্ণুতুল্যঞ্চ কান্তং পশ্যন্তি সন্ততং॥ হুতাশনো বা সূর্য্যো বা সর্ব্বতেজস্বিনাং পরঃ। পতিব্রতাতেজসশ্চ কলাং নার্হন্তি ষোড়শীং॥ মহাদানানি পুণ্যানি ব্রতান্যনশনানি চ। তপাংসি পতিসেবায়াঃ কলাং নার্হন্তি ষোড়শীং॥ পুত্রো বাপি পিতা বাপি বান্ধবো বা সহোদরঃ। যোষিতাং কুলজাতানাং ন কশ্চিৎ স্বামিনঃ সমঃ॥ ইতি ব্রহ্মবৈবর্ত্তে গণেশখণ্ডে ৪৪ অধ্যায়ঃ॥*॥ পতিদক্ষিণাদি যথা। নিরূপিতশ্চ বেদেষু স্বশব্দো ধনবাচকঃ। তদ্দযস্যাস্তীতি স স্বামী বেদজ্ঞ শৃণু মদ্বচঃ॥ তস্য দাতা সদা ন চ স্বং স্বামিনো ভবেৎ। অহো ব্যবস্থা ভবতাং বেদজ্ঞানমবোধতাং॥ ধর্ম্ম উবাচ। পত্নীং বিনা ন স্বং সাধ্বি স্বামিনং দাতুমক্ষমং। দম্পতী ধ্রুবমেকাঙ্গৌ তয়োর্দ্দাতা চ দ্বৌ সমৌ॥ নিরূপিতা পুণ্যকে চ ব্রতে স্বামী চ দক্ষিণা। শ্রুতৌ শ্রুতো যঃ স্বধর্ম্মো বিপরীতো হ্যধর্ম্মকঃ॥ ইতি ব্রহ্মবৈবর্ত্তে গণেশখণ্ডে ৭ অধ্যায়ঃ॥

পতিঃ (ত্রি) অধিপতিঃ। তৎপর্য্যায়ঃ। স্বামী ২ ঈশ্বরঃ ৩ ঈশিতা ৪ অধিভূঃ ৫ নায়কঃ ৬ নেতা ৭ প্রভুঃ ৮ পরিবৃঢ়ঃ ৯ অধিপঃ ১০। ইত্যমরঃ॥

পতিঘ্নী (স্ত্রী) পতিনাশকহস্তরেখাবিশেষঃ। যথা। লক্ষণে জায়াপতিভ্যাং। জায়াঘ্নো হস্তঃ। পতিঘ্নী পাণিরেখা। ইতি সংক্ষিপ্তসারব্যাকরণং॥ স্বামিহন্ত্রী চ॥

পতিতঃ (ত্রি) চলিতঃ। গলিতঃ। পতনাশ্রয়ঃ। পড়া ইতি ভাষা। তৎপর্য্যায়ঃ। প্রস্কন্নঃ ২। ইতি হেমচন্দ্রঃ॥ পাতিত্যবিশিষ্টঃ। স্বধর্ম্মচ্যুতঃ। তস্য লক্ষণং যথা। স্বধর্ম্মং যঃ সমুচ্ছিদ্য পরধর্ম্মং সমাশ্রয়েৎ। অনাপদি স বিদ্বদ্ভিঃ পতিতঃ পরিকীর্ত্তিতঃ॥ ইতি মার্কণ্ডেয়পুরাণং॥*॥ পাতিত্যকারণং যথা। চাণ্ডালান্ত্যস্ত্রিয়ো গত্বা ভুক্ত্বা চ প্রতিগৃহ্য চ। পতত্যজ্ঞানতো বিপ্রো জ্ঞানাৎ সাম্যন্তু গচ্ছতি॥ ইতি মাৎস্যে ২০১ অধ্যায়ঃ॥ *॥ পতিতা যথা। গরাগ্নিবিষদাশ্চৈব পাষণ্ডাঃ ক্রূরবুদ্ধয়ঃ। ক্রোধাৎ প্রায়ং বিষং বহ্নিং

শস্ত্রমুদ্বন্ধনং জলং ॥ গিরিবৃক্ষপ্রপাতঞ্চ যে কুর্ব্বন্তি নরাধমাঃ। কুশিল্পজীবিনশ্চৈব সুনালঙ্কারকারিণঃ ॥ তথা। ব্রহ্মদণ্ডহতা যে চ যে চ বৈ ব্রাহ্মণৈর্হতাঃ। মহাপাতকিনো যে চ পতিতাস্তে প্রকীর্ত্তিতাঃ ॥*॥ তেষাং দাহাদিনিষেধো যথা। পতিতানাং ন দাহঃ স্যান্নান্ত্যেষ্টির্নাস্থিসঞ্চয়ঃ। ন চাশ্রুপাতঃ পিণ্ডো বা কার্য্যং শ্রাদ্ধাদিকং ক্বচিৎ ॥ ইতি শুদ্ধিতত্ত্বে ব্রহ্মপুরাণং ॥*॥ তেষাং সংসর্গনিষেধো যথা। আসনশয়নাচ্চৈনং ভোজনাৎ কথনাদিষু। সম্বৎসরেণ পততি পতিতেন সহাচরন্ ॥ ইতি বরাহপুরাণং ॥*॥ প্রায়শ্চিত্তেতরবৈদিককর্ম্মানধিকারী সন্ নরকভাগী। যথা। পতিতৈঃ সংপ্রযুক্তানামিমাং শৃণুত নিষ্কৃতিং। সম্বৎসরেণ পততি পতিতেন সহাচরন্ ॥ যাজনাধ্যাপনাদ্যৌনাচ্ছাসপানাশনাসনাৎ। যো যেন পতিতেনৈব সংসর্গং যাতি মানবঃ ॥ স তস্যৈব ব্রতং কুর্য্যাৎ সংসর্গস্য বিশুদ্ধয়ে ॥*॥ তেষামুদককার্য্যং যথা। পতিতস্যোদকং কার্য্যং সপিণ্ডৈর্ব্রাহ্মণৈঃ সহ। নিন্দিতেঽহনি সায়াহ্নে জ্ঞাতিভির্গুরুসন্নিধৌ ॥ দাসীঘটময়ং পূর্ণং পর্য্যস্যেৎ প্রেতবৎ সদা। অহোরাত্রমুপাসীনং নাশৌচং ব্রাহ্মণৈঃ সহ ॥ নিবর্ত্তয়েরংস্তস্মাত্তু সম্ভাষণসহাসনং ॥ ইতি মাৎস্যে ২০১ অধ্যায়ঃ ॥*॥ অত্যাজ্যা পতিতা যথা। পতিতা গুরবস্ত্যাজ্যা ন তু মাতা কদাচন। গর্ভধারণপোষাভ্যাং তেন মাতা গরীয়সী ॥ ইতি মৎস্যপুরাণং ॥ দ্বাদশবার্ষিকব্রতনাশ্যপাপযুক্তঃ। তস্য ঔর্দ্ধদেহিকবিধির্যথা। পূর্ব্বোক্তকাম্যহাদেঃ দাহাশৌচাদিনিষেধঃ তদানীমেব। বৎসরান্তে তু সর্ব্বমৌর্দ্ধদেহিকং কুর্য্যাৎ। গোব্রাহ্মণহতানাঞ্চ পতিতানাং তথৈব চ। ঊর্দ্ধং সংবৎসরাৎ কুর্য্যাৎ সর্ব্বমেবৌর্দ্ধদেহিকং ॥ ইতি হেমাদ্রৌ ষট্‌ত্রিংশন্মতাৎ। এবং ম্লেচ্ছীকৃতানামপি। গয়াশ্রাদ্ধমপি কার্য্যং। ব্রহ্মহা চ কৃতঘ্নশ্চ গোঘাতী পঞ্চপাতকী। সর্ব্বে তে নিষ্কৃতিং যান্তি গয়ায়াং পিণ্ডপাতনাৎ ॥ ইত্যগ্নিপুরাণাৎ ॥*॥ এবং ব্রাহ্মেঽপি। ক্রিয়তে পতিতানান্তু গতে সংবৎসরে ক্বচিৎ। দেশধর্ম্মপ্রমাণত্বাৎ গয়াকূপে স্ববন্ধুভিঃ ॥ মার্ত্তণ্ডপাদমূলে বা শ্রাদ্ধং হরিহরৌ স্মরন্। সূর্য্যপদে ইত্যর্থঃ ॥*॥ তত্র বর্ষমধ্যে কৃত্যমুক্তমপরার্কে বায়ুপুরাণে। শুক্লপক্ষে তু দ্বাদশ্যাং কুর্য্যাৎ শ্রাদ্ধন্তু বৎসরং। দ্বাদশাহানি বা কুর্য্যাৎ শুক্লে চ প্রথমেঽহনি ॥*॥ ছাগলেয়ঃ। নারায়ণবলিঃ কার্য্যো লোকগর্হাভয়ান্নরৈঃ। তথা তেষাং ভবেচ্ছৌচং নান্যথেত্যব্রবীদ্যমঃ ॥*॥ ব্যাসঃ। নারায়ণং সমুদ্দিশ্য শিবং বা যৎ প্রদীয়তে। তস্য শুদ্ধিকরং কর্ম্ম তদ্ভবেন্নৈতদন্যথেতি ॥*॥ স চাত্মঘাতাদিপ্রায়শ্চিত্তং কৃত্বা কার্য্যঃ। তদুক্তং হেমাদ্রৌ ষট্‌ত্রিংশন্মতে। কৃত্বা চান্দ্রায়ণং পূর্ব্বং ক্রিয়া কার্য্যা যথাবিধি। নারায়ণবলিঃ কার্য্যো লোকগর্হাভয়াৎ

নরৈঃ ॥ পিণ্ডোদকক্রিয়াঃ পশ্চাৎ বৃষোৎসর্গাদিকঞ্চ যৎ। একোদ্দিষ্টানি কুর্ব্বীত সপিণ্ডীকরণং তথা ॥ * ॥ দিবোদাসীয়ে বৃদ্ধশাতাতপস্তু । পতিতে চ মৃতে শুদ্ধ্যৈ প্রাজাপত্যাংস্তু ষোড়শ। মৃতে চাপত্যরহিতে কৃচ্ছ্রাণাং নবতিং চরেৎ। ইত্যাহ। ইদং প্রায়শ্চিত্তার্হপিত্রাদিবিষয়ং। ইন্দ্রিয়ৈরপরিত্যক্তা যে চ মূঢ়া বিষাদিনঃ। ঘাতয়ন্তি স্বমাত্মানং চাণ্ডালাদিহতাশ্চ যে ॥ তেষাং পুত্রাশ্চ পৌত্রাশ্চ দয়য়া সমভিপ্লুতাঃ। যথাশ্রাদ্ধং প্রতন্বন্তি বিষ্ণুনামপ্রতিষ্ঠিতং ॥ তথা তে সংপ্রবক্ষ্যামি নমস্কৃত্য সয়ম্ভুবে। ইতি হেমাদ্রৌ তেনৈবোক্তেঃ ॥ * ॥ তত্রৈব বৌধায়নোঽপি। নারায়ণবলিস্ত্যাখ্যাস্যামোঽভিশস্তপতিতসুরাপাত্মত্যাগিনাং ব্রাহ্মণহতানাঞ্চ দ্বাদশবর্ষাণি ত্রীণি বা বারিমরণং যত্র যস্য তত্র তত্র কুর্ব্বীতেতি ॥ * ॥ গৃহ্যপরিশিষ্টে তু চণ্ডালাদিত্যাদ্যুক্ত্বা । দগ্ধ্বা শরীরং প্রেতস্য সংস্থাপ্যাস্থীনি যত্নতঃ। প্রায়শ্চিত্তন্তু কর্ত্তব্যং পুত্রৈশ্চান্দ্রায়ণত্রয়ং ॥ ইত্যুক্তং ॥ * ॥ মদনরত্নে। ব্রাহ্মণহতানাঞ্চ দ্বাদশবর্ষাণি ত্রীণি বা কুর্ব্বীতেতি ॥ * ॥ মদনরত্নে ব্রাহ্মে । প্রমাদাদপি নিঃশঙ্কস্ত্বকস্মাদ্বিধিচোদিতঃ । চণ্ডালৈর্ব্রাহ্মণৈশ্চোরৈর্নিহতো যত্র কুত্রচিৎ ॥ তস্য দাহাদিকং কার্য্যং যস্মান্ন পতিতস্তু সঃ। চান্দ্রায়ণং তপ্তকৃচ্ছ্রদ্বয়ং তস্য বিশুদ্ধয়ে ॥ যদ্বা কৃচ্ছ্রান্ পঞ্চদশ কৃত্বা তু বিধিনা দহেৎ। বুদ্ধিপূর্ব্বমৃতানান্তু ত্রিংশৎকৃচ্ছ্রং সমাচরেৎ ॥ ইত্যুক্তং। স্মৃতিরত্নাবল্যাং তদ্দ্বিগুণং প্রায়শ্চিত্তং কৃত্বা অর্ব্বাগপ্যব্দাৎ সর্ব্বং কার্য্যং ইত্যুক্তং। আত্মনো ঘাতশুদ্ধ্যর্থং চরেচ্চান্দ্রায়ণদ্বয়ং। তপ্তকৃচ্ছ্রচতুষ্কঞ্চ ত্রিংশৎকৃচ্ছ্রাণি বা পুনঃ ॥ অর্ব্বাক্ সংবৎসরাৎ কুর্য্যাৎ দহনাদি যথোদিতং। কৃত্বা নারায়ণবলিমনিত্যত্বাত্তদায়ুষঃ ইতি ॥ ইদঞ্চাত্মবধনিমিত্তং তজ্জাতিবধপ্রায়শ্চিত্তেন সমুচ্চিতং কার্য্যং। অতএব বৌধায়নেনোক্তং। দ্বাদশবর্ষাণি ত্রীণি বেতি। মদনপারিজাতে স্মৃত্যর্থসারে চ ব্রহ্মহাদীনাং তদ্যোগ্যং প্রায়শ্চিত্তং কৃত্বা নারায়ণবলিঃ কার্য্য ইত্যুক্তং। এবং ম্লেচ্ছীকৃতানামপি ॥ * ॥ যত্তু কশ্চিদাহ। পুত্রকৃতেন প্রায়শ্চিত্তেন পিতুঃ পাপনাশে মানাভাবঃ। আত্মঘাতে তু বচনাদস্তু। মহাপাতকে তু কথং স্যাদিতি। স স্বয়মেব আত্মবধপ্রায়শ্চিত্তস্য জাতিবধনিমিত্তেন সমুচ্চয়ং বদন্ হৃদয়শূন্য এব। নহি জাতিবধনিমিত্তং পুত্রৈঃ কার্য্যমিতি বচনমস্তি পুত্রকর্ত্তৃকসর্ব্বপ্রায়শ্চিত্তাদিবিপ্লবাপত্তেঃ। প্রাগুক্তবৌধায়নবচনাচ্চেতি দিক্। ইদং প্রায়শ্চিত্তার্হাণামেব। প্রায়শ্চিত্তানর্হাণান্তু পতিতোদকমাত্রং কার্য্যমিতি কেচিৎ। মদনপারিজাতাদিস্বরসোঽপ্যেবং। বস্তুতস্তু তদর্হানর্হয়োর্ব্বচনেঽনুপাদানাৎ অবিশেষাৎ তত্রাপি নারায়ণবলির্গয়াশ্রাদ্ধঞ্চেতি যুক্তং ॥ * ॥ পতিতোদকবিধিস্তু মিত্রাদ্যতিরিক্তবিষয় ইত্যপরে। স যথা। হেমাদ্রৌ ব্রাহ্মে।

পতিতস্য তু কারুণ্যাৎ যস্তৃপ্তিং কর্ত্তুমিচ্ছতি। স হি দাসীং সমাহূয় সর্ব্বগাং দত্তবেতনাং ॥ অশুদ্ধঘটহস্তাস্তাং যথাবৃত্তং ব্রবীত্যপি। হে দাসি গচ্ছ মূল্যেন তিলানানয় সত্বরং ॥ তোয়পূর্ণং ঘটঞ্চেমং সতিলং দক্ষিণামুখী। উপবিষ্টা তু বামেন চরণেন ততঃ ক্ষিপ ॥ কীর্ত্তয়েঃ পাতকীসংজ্ঞাং ত্বং পিবেতি মুহুর্ব্বদ। নিশম্য তস্য বাক্যং সা লব্ধমূল্যা করোতি তৎ ॥ এবং কৃতে ভবেত্তৃপ্তিঃ পতিতানাং ন চান্যথেতি। ইদঞ্চ মৃতাহে কার্য্যং। পতিতস্য দাসী মৃতাহ্নি পদা ঘটমপবর্জয়েদেতাবতায়মুপচরিতো ভবতীতি মদনরত্নে বিষ্ণূক্তেঃ। ইদঞ্চাত্মত্যাগিবিষয়ং। আত্মত্যাগিনঃ পতিতাস্তে নাশৌচোদকভাজঃ স্যুরিত্যুপক্রম্য বিষ্ণুনা এতস্যাভিধানাদিতি গৌড়াঃ। উপলক্ষণত্বাৎ সর্ব্বেষামিতি তু যুক্তং। ইতি নির্ণয়সিন্ধৌ ৫ পরিচ্ছেদঃ ॥

পতিম্বরা (স্ত্রী) স্বয়ম্বরা। স্বেচ্ছয়া পত্যন্বেষিণী। পতিং বৃণীতে যা সা। ইত্যমরভরতৌ ॥ কৃষ্ণজীরকঃ। ইতি শব্দচন্দ্রিকা ॥

পতিবত্নী (স্ত্রী) সভর্তৃকা। সধবা। ইত্যমরঃ ॥

পতিব্রতা (স্ত্রী) পতির্ব্রতমিব সদোপাস্যোঽস্যাঃ। স্বাম্যনুরক্তা। তৎপর্য্যায়ঃ। সুচরিত্রা ২ সতী ৩ সাধ্বী ৪। ইত্যমরঃ ॥ একপত্নী ৫। ইতি শব্দরত্নাবলী ॥ তস্যা লক্ষণং যথা। আর্ত্তার্ত্তে মুদিতা হৃষ্টে প্রোষিতে মলিনা কৃশা। মৃতে ম্রিয়েত যা পত্যৌ সাধ্বী জ্ঞেয়া পতিব্রতা ॥ ইতি শুদ্ধিতত্ত্বং ॥ * ॥ তস্যা মাহাত্ম্যং যথা। নারদ উবাচ। কর্ম্মণা কেন রাজেন্দ্র তপসা বা তপোধনাঃ। উত্তমাঞ্চ গতিং যাতি কৃষ্ণবাসঃ প্রশংস মে ॥ এবমুক্তস্তু ধর্ম্মাত্মা নারদেনাব্রবীত্তদা। যম উবাচ। ন তস্যা নিয়মো বিপ্র তপো নৈব চ সুব্রত। উপবাসো ন দানঞ্চ ন দমো বা মহামতে ॥ যাদৃশী তু ভবেদ্বিপ্র শৃণু তত্ত্বং সমাসতঃ। প্রসুপ্তে যা প্রস্বপিতি বিবুদ্ধে জাগ্রতি স্বয়ং ॥ ভুঙ্‌ক্তে তু ভোজিতে বিপ্র সা মৃত্যুঞ্জয়তি ধ্রুবং। মৌনে মৌনা ভবেদ্যা তু স্থিতে তিষ্ঠতি যা স্বয়ং ॥ সা মৃত্যুঞ্জয়তে বিপ্র নান্যৎ পশ্যামি কিঞ্চন ॥ একদৃষ্টিরেকমনা ভর্ত্তুর্ব্বচনকারিণী। তস্যা বিভিমহে সর্ব্বে যে তথান্যে তপোধন ॥ দেবানামপি সা সাধ্বী পূজ্যা পরমশোভনা। ভর্ত্রা বাভিহিতা বাপি প্রণত্যাখ্যায়িনী ভবেৎ ॥ বর্ত্তমানাপি বিপ্রেন্দ্র প্রত্যাখ্যানাপি সা যদা। তদৈব তং সংশ্রয়তি পতিং নান্যং কদাচন ॥ ভর্ত্তুর্মৃত্যুমুখং ব্রহ্মন্ যা পশ্যতি বরাঙ্গনা। এবং যাতি ভবেন্নিত্যং ভর্ত্তুঃ প্রিয়হিতে রতা ॥ অনুবিষ্টেন ভাবেন ভর্ত্তারমনুগচ্ছতি। সা তু মৃত্যুমুখদ্বারং ন গচ্ছেদ্ব্রহ্মসম্ভব ॥ এষ মাতা পিতা বন্ধুরেষ মে দৈবতং পরং। এবং শুশ্রূষতে যা তু স মাং বিজয়তে সদা। পতিব্রতা তু যা সাধ্বী তস্যাশ্চাহং কৃতাঞ্জলিঃ ॥ ভর্ত্তার-

মনুধ্যায়ন্তী ভর্ত্তারমনুগচ্ছতি। ভর্ত্তারমনুশোচন্তী মৃত্যুদ্বারং ন পশ্যতি ॥ গীতবাদিত্রনৃত্যানি প্রেক্ষণীয়ান্যনেকশঃ। ন শৃণোতি ন পশ্যেত মৃত্যুদ্বারং ন পশ্যতি ॥ স্নায়ন্তী তিষ্ঠতী বাপি কুর্ব্বন্তী বা প্রসাধনং। নান্যঞ্চ মনসা ধ্যায়েৎ কদাচিদপি সুব্রতা ॥ দেবতা অর্চ্চয়ন্তী বা ভোজয়ন্ত্যথ বা দ্বিজান্। পতিং ন ত্যজতে চিত্তাৎ মৃত্যুদ্বারং ন পশ্যতি ॥ ভানৌ চানুদিতে যা তু উত্থায় চ তপোধন। গৃহং মার্জ্জয়তে নিত্যং মৃত্যুদ্বারং ন পশ্যতি ॥ চক্ষুর্দেহঃ স্বভাবশ্চ যস্যা নিত্যং সুসংবৃতং। শৌচাচারসমাযুক্তা সাপি মৃত্যুং ন পশ্যতি ॥ ভর্ত্তুর্মুখং প্রপশ্যন্তী ভর্ত্তুশ্চিত্তানুসারিণী। বর্ত্ততে চ হিতে ভর্ত্তুর্মৃত্যুদ্বারং ন পশ্যতি ॥ এবং কীর্ত্তিমতাং লোকে দৃশ্যন্তে দিবি দেবতাঃ। মানুষাণাঞ্চ ভার্য্যা বৈ তত্র দেশে তু দৃশ্যতে ॥ কথিতৈবং পুরা বিপ্র আদিত্যেন পতিব্রতা। ময়া তস্মাত্তু বিপ্রর্ষে যথাবৃত্তং যথাশ্রুতং। গুহ্যমেতত্ততো দৃষ্ট্বা পূজয়ামি পতিব্রতাং ॥ ইতি বারাহে পতিব্রতাচরিত্রং ॥ * ॥ পতিব্রতাধর্ম্মো যথা। পতিব্রতানাং যদ্ধর্ম্মং তন্নিবোধ ব্রজেশ্বর। নিত্যং ভর্ত্তুর্য্যুৎসুকয়া তৎপাদোদকমীপ্সিতং। ভক্তিভাবেন সততং ভোক্তব্যং তদনুজ্ঞয়া॥ ব্রতং তপস্যাং দেবার্চ্চাং পরিত্যজ্য প্রযত্নতঃ। কুর্য্যাচ্চরণসেবাঞ্চ স্তবনং পতিতোষণং ॥ তদাজ্ঞারহিতং কর্ম্ম ন কুর্য্যাদ্বৈরতঃ সতী। নারায়ণাৎ পরং কান্তং ধ্যায়তে সততং সতী ॥ পরপুংসাং পুরশ্চৈব সুবেশং পুরুষং পরং। যাত্রামহোৎসবং নিত্যং নর্ত্তকং গায়নং ব্রজ। পরক্রীড়াঞ্চ সততং নহি পশ্যতি সুব্রতা ॥ যদ্ভক্ষ্যং স্বামিনাং নিত্যং তদেবম্মপি যোষিতাং। নহি ত্যজেত্তু তৎসঙ্গং ক্ষণমেব চ সুব্রতা ॥ উত্তরে নোত্তরং দদ্যাৎ স্বামিনশ্চ পতিব্রতা। ন কোপং কুরুতে শুদ্ধা তাড়নাচ্চাপি কোপতঃ॥ ক্ষুধিতং ভোজয়েৎ কান্তং দদ্যাৎ পানঞ্চ তোষণে। ন বোধয়েত্তং নিদ্রালুং প্রেরয়ত্যেব কর্ম্মসু ॥ পুত্রাণাঞ্চ শতগুণং স্নেহং কুর্য্যাৎ পতিং সতী। পতির্বন্ধুর্গতির্ভর্ত্তা দৈবতং কুলযোষিতঃ ॥ শুভং দৃষ্ট্বা সুধাতুল্যং কান্তং পশ্যতি সুন্দরী। সস্মিতং বদনং কৃত্বা ভক্তিভাবেন যত্নতঃ॥ পুরুষাণাং সহস্রঞ্চ সতী স্ত্রী চ সমুদ্ধরেৎ। পতিঃ পতিব্রতানাঞ্চ মুচ্যতে সর্ব্বপাতকাৎ॥ নাস্তি তেষাং কর্ম্মভোগঃ সতীনাং ব্রততেজসা। তয়া সার্দ্ধঞ্চ নিষ্কর্ম্মী মোদতে হরিমন্দিরে॥ পৃথিব্যাং যানি তীর্থানি সতীপাদেষু তান্যপি। তেজশ্চ সর্ব্বদেবানাং মুনীনাঞ্চ সতীষু চ ॥ তপস্বিনাং তপঃ সর্ব্বং ব্রতিনাং যৎ ফলং ব্রজ। দানে ফলং যদ্দাতৄণাং তৎ সর্ব্বং তাসু সন্ততং ॥ স্বয়ং নারায়ণঃ শম্ভুর্বিধাতা জগতামপি। সুরাঃ সর্ব্বে সুমুনয়ো ভীতাস্তাভ্যাঞ্চ সন্ততং ॥ সতীনাং পাদরজসা সদ্যঃ পূতা বসুন্ধরা। পতিব্রতান্নমস্কৃত্য মুচ্যতে পাতকান্নরঃ॥

ত্রৈলোক্যং ভস্মসাৎ কর্ত্তুং ক্ষণেনৈব পতিব্রতা। স্বতেজসা সমর্থা সা মহা-পুণ্যবতী সদা॥ সতীনাঞ্চ পতিঃ সাধ্বী পুত্রো নিঃশঙ্ক এব চ। নহি তস্য ভয়ং কিঞ্চিদ্দেবেভ্যশ্চ যমাদপি॥ শতজন্মপুণ্য-কৃতাং গৃহে জাতা পতিব্রতা। পতিব্রতা-প্রসূঃ পূতা জীবন্মুক্তঃ পিতা তথা॥ সতী স্ত্রী প্রাতরুত্থায় ত্যক্ত্বা চ রাত্রিবাসসং। ভর্ত্তারঞ্চ নমস্কৃত্য করোতি স্তবনং মুদা॥ গৃহকার্য্যং ততঃ কৃত্বা স্নাত্বা ধৌতে চ বাসসী। গৃহীত্বা শুক্লপুষ্পঞ্চ ভক্তিতঃ পূজয়েৎ পতিং॥ স্নাপয়িত্বা সুপূতেন জলেন নির্ম্মলেন চ। তস্মৈ দত্বা ধৌত-বস্ত্রং তৎপাদৌ ক্ষালয়েন্মুদা॥ আসনে বাসয়িত্বা চ দত্বা ভালে চ চন্দনং। সর্ব্বাঙ্গলেপনং কৃত্বা দত্বা মাল্যং গলে-ঽপি চ॥ সামবেদোক্তমন্ত্রেণ ভোগদ্রব্যৈঃ সুধোপমৈঃ। সংপূজ্য ভক্তিতঃ কান্তং স্তুত্বা চ প্রণমেন্মুদা॥ ওঁ নমঃ কান্তায় শান্তায় সর্ব্বদেবাশ্রয়ায় স্বাহা॥ ইত্যনে-নৈব মন্ত্রেণ দত্বা পুষ্পঞ্চ চন্দনং। পাদ্যার্ঘ্য-ধূপদীপাংশ্চ বস্ত্রং নৈবেদ্যমুত্তমং॥ জলং সুবাসিতং শুদ্ধং তাম্বূলঞ্চ সুসংস্কৃতং। দত্বা স্তোত্রঞ্চ প্রপঠেৎ যৎ কৃতং পাঠ্য-মেব চ॥ ওঁ নমঃ কান্তায় শাস্ত্রে চ শিব-চন্দ্রস্বরূপিণে। নমঃ শান্তায় দান্তায় সর্ব্ব-দেবাশ্রয়ায় চ॥ নমো ব্রহ্মস্বরূপায় সতী-প্রাণপরায় চ। নমস্যায় চ পূজ্যায় হৃদা-ধারায় তে নমঃ॥ পঞ্চপ্রাণাধিদেবায় চক্ষুষস্তারকায় চ। জ্ঞানাধারায় পত্নীনাং পরমানন্দরূপিণে॥ পতির্ব্রহ্মা পতির্বিষ্ণুঃ পতিরেব মহেশ্বরঃ। পতিশ্চ নির্গুণাধারো ব্রহ্মরূপ নমোঽস্তু তে॥ ক্ষমস্ব ভগবন্ দোষং জ্ঞানাজ্ঞানকৃতঞ্চ যৎ। পত্নীবন্ধো দয়াসিন্ধো দাসীদোষং ক্ষমস্ব চ॥ ইদং স্তোত্রং মহাপুণ্যং সৃষ্ট্যাদ্যে পদ্মরা কৃতং। সরস্বত্যা চ ধরয়া গঙ্গয়া চ পুরা ব্রজ॥ সাবিত্র্যা চ কৃতং পূর্ব্বং ব্রহ্মণে চাপি নিত্যশঃ। পার্ব্বত্যা চ কৃতং ভক্ত্যা কৈলাসে শঙ্করায় চ॥ মুনীনাঞ্চ সুরাণাঞ্চ পত্নীভিশ্চ কৃতং পুরা। পতিব্রতানাং সর্ব্বাসাং স্তোত্রমেতৎ শুভাবহং॥ ইদং স্তোত্রং মহাপুণ্যং যা শৃণোতি পতি-ব্রতা। নরোঽন্যো বাপি নারী বা লভতে সর্ব্ববাঞ্ছিতং॥ অপুত্রো লভতে পুত্রং নির্ধনো লভতে ধনং। রোগী চ মুচ্যতে রোগাৎ বদ্ধো মুচ্যেত বন্ধনাৎ॥ পতিব্রতা চ স্তুত্বা চ তীর্থস্নানফলং লভেৎ। ফলঞ্চ সর্ব্বতপসাং ব্রতানাঞ্চ ব্রজেশ্বরঃ॥ ইদং স্তুত্বা নমস্কৃত্য ভুঙ্‌ক্তে সা তদনুজ্ঞয়া। উক্তং পতিব্রতাধর্ম্মং গৃহিণাং শ্রূয়তাং ব্রজ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্ম-খণ্ডে ৮৩ অধ্যায়ঃ॥ *॥ পতিব্রতানামানি যথা। সূর্য্যস্য সুবর্চ্চলা ১ শক্রস্য শচী ২ বশিষ্ঠস্য অরুন্ধতী ৩ চন্দ্রস্য রোহিণী ৪ অগস্ত্যস্য লোপামুদ্রা৫ চ্যবনস্য সুকল্যা ৬ সত্যবতঃ সাবিত্রী ৭ কপিলস্য শ্রীমতী ৮ সৌদাসস্য মদয়ন্তী ৯ সগরস্য কেশিনী ১০ নলস্য দময়ন্তী ১১ রামস্য সীতা ১২ শিবস্য সতী ১৩ নারায়ণস্য লক্ষ্মী ১৪

ব্রহ্মণঃ সাবিত্রী ১৫ রাবণস্য মন্দোদরী ১৬। ইতি পুরাণান্তরং ॥

পতেরঃ (পুং স্ত্রী) পক্ষী। গন্তরি ত্রি। ইত্যুণাদিকোষঃ ॥

পতেরঃ (পুং) আঢ়কঃ। গর্ত্তঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ ॥

পত্তঙ্গং (ক্লী) রক্তচন্দনং। ইতি শব্দরত্নাবলী ॥ বৃক্ষবিশেষঃ। বকম্ ইতি ভাষা। তৎপর্য্যায়ঃ। পত্রাঙ্গং ২ রক্তকাষ্ঠং ৩ সুরঙ্গদং ৪ পত্রাণ্যং ৫ পট্টরঙ্গং ৬ ভার্য্যাবৃক্ষঃ ৭ রক্তকঃ ৮ লোহিতং ৯ রঙ্গকাষ্ঠং ১০ রোগকাষ্ঠং ১১ কুচন্দনং ১২ পট্টরঞ্জনকং ১৩ সুরঙ্গং ১৪। অস্য গুণাঃ। কটুত্বং। রূক্ষত্বং। অম্লত্বং। শীতত্বং। গৌল্যত্বং। বাতপিত্তজ্বরবিস্ফোটোন্মাদভূতনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ অপি চ। পতঙ্গস্তু রক্তসারং সুরঙ্গং রঞ্জনং তথা। পটরঞ্জনমাখ্যাতং পত্তুরঞ্চ কুচন্দনং ॥ পতঙ্গং মধুরং শীতং পিত্তশ্লেষ্মব্রণাস্রনুৎ। হরিচন্দনবজ্জ্ঞেয়ং বিশেষাদ্দাহনাশনং ॥ ইতি ভাবপ্রকাশঃ ॥

পত্তনং (ক্লী) নগরং। ইত্যমরঃ ॥ মহতী পুরী। ইতি শ্রীধরস্বামী ॥ মৃদঙ্গঃ। ইতি হারাবলী ॥

পত্তনবণিক্ [জ্] (পুং) নগরবণিক্। তৎপর্য্যায়ঃ। স্বাধ্যায়ী ২। ইতি ত্রিকাণ্ডশেষঃ ॥

পত্তিঃ (পুং) পদাতিকঃ। ইত্যমরঃ ॥ বীরঃ। ইতি বিশ্বঃ ॥

পত্তিঃ (স্ত্রী) গতিঃ। সেনাবিশেষঃ। যথা। একেভৈকরথা ত্র্যশ্বা পত্তিঃ পঞ্চপদাতিকা। ইত্যমরঃ ॥

পত্তিসংহতিঃ (স্ত্রী) পদাতিসমূহঃ। তৎপর্য্যায়ঃ। পাদাতং ২। ইত্যমরঃ ॥

পত্তুরঃ (পুং) শালিঞ্চশাকঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ পত্তঙ্গে ক্লী। ইতি ভাবপ্রকাশঃ ॥

পত্নী (স্ত্রী) বেদবিধানেনোঢ়া। অস্যত্রোপচারাৎ। পত্যা উদ্বাহবিহিতমন্ত্রাদিনা ঊঢ়া। ইতি ভরতঃ ॥ তৎপর্য্যায়ঃ। পাণিগৃহীতী ২ দ্বিতীয়া ৩ সহধর্ম্মিণী ৪ ভার্য্যা ৫ জায়া ৬ দারাঃ ৭ সধর্ম্মিণী ৮ ধর্ম্মচারিণী ৯ দারঃ ১০ গৃহিণী ১১। ইতি শব্দরত্নাবলী ॥ সহচরী ১২ গৃহঃ ১৩ ক্ষেত্রং ১৪ বধূঃ ১৫ জনী ১৬ পরিগ্রহঃ ১৭ ঊঢ়া ১৮ কলত্রং ১৯। ইতি হেমচন্দ্রঃ ॥

পত্ন্যাটঃ (পুং) পত্নীগৃহং। যথা। বাসাগারং ভোগগৃহং কন্যাপত্ন্যাটনিষ্কুটাঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

পত্রং (ক্লী) বৃক্ষাবয়ববিশেষঃ। পাতা ইতি ভাষা। তৎপর্য্যায়ঃ। পলাশং ২ ছদনং ৩ দলং ৪ পর্ণং ৫ ছদঃ ৬। ইত্যমরঃ ॥ পাত্রং ৭ ছাদনং ৮ বর্হং ৯ বর্হণং ১০ পত্রকং ১১। ইতি শব্দরত্নাবলী ॥ * ॥ বিষ্ণবে পত্রবিশেষদানফলং যথা। পত্রাণ্যপি সপুষ্পাণি হরেঃ প্রীতিকরাণি চ। প্রবক্ষ্যামি নৃপশ্রেষ্ঠ শৃণুষ্ব গদতো মম ॥ অপামার্গপত্রং প্রথমং তস্মাদ্ভৃঙ্গারকং পরং। তস্মাত্তু খাদিরং শ্রেষ্ঠং ততশ্চ শমিপত্রকং ॥ দূর্ব্বাপত্রং ততঃ শ্রেষ্ঠং

ততোঽপি কুশপত্রকং। পত্রং তস্মাদ্দমনকং ততো বিল্বস্য পত্রকং॥ বিল্বপত্রাদপি হরেস্তুলসীপত্রমুত্তমং। এতেষাঞ্চ যথালব্ধৈঃ পত্রৈর্বা যোঽর্চ্চয়েদ্ধরিং॥ সর্ব্বপাপবিনির্ম্মুক্তো বিষ্ণুলোকে মহীয়তে॥ ইতি নারসিংহে ৫২ অধ্যায়ঃ॥*॥ দেবীপ্রীতিকরপত্রাণি যথা। অপামার্গস্য পত্রন্তু ততো ভৃঙ্গারপত্রকং। ততোঽপি গন্ধিনীপত্রং বলাহকমতঃ পরং॥ তস্মাৎ খদিরপত্রন্তু বঞ্জুলস্তবকস্তথা। আম্রস্তবকগুচ্ছস্তু জম্বূপত্রং ততঃ পরং॥ বীজপূরস্য পত্রন্তু ততোঽপি কুশপত্রকং। দূর্ব্বাঙ্কুরং ততঃ প্রোক্তং শমীপত্রমতঃ পরং॥ পত্রমামলকং তস্মাদ্দামপত্রমতঃ পরং। সর্ব্বতো বিল্বপত্রন্তু দেব্যাঃ প্রীতিকরং মতং॥ ইতি কালিকাপুরাণে ৬৮অধ্যায়ঃ॥*॥ তেজপত্রং। তৎপর্য্যায়ঃ। তমালপত্রং ১ পত্রকং ২ ছদনং ৩ দলং ৪ পালাশং ৫ অংশুকং ৬ বাসঃ ৭ তাপসং ৮ সুকুমারকং ৯ বস্ত্রং ১০ তমালকং ১১ শ্যামং ১২ গোপনং ১৩ বসনং ১৪ তমালং ১৫ সুরনির্গন্ধং ১৬। অস্য গুণাঃ। কটুত্বং। তিক্তত্বং। উষ্ণত্বং। কফবাতবিষবস্তিকণ্ডুতিদোষনাশিত্বং। মুখমস্তকশোধনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অপি চ। পত্রকং মধুরং কিঞ্চিত্তীক্ষ্ণোষ্ণং পিচ্ছিলং লঘু। নিহন্তি কফবাতার্শোহৃল্লাসারুচিপীনসান্॥ ইতি ভাবপ্রকাশঃ॥*॥ বাহনং। শরপক্ষঃ। পক্ষিপক্ষঃ। ইতি মেদিনী॥*॥ লিখনাধারঃ। পাৎ ইতি ভাষা। যথা। ষাণ্মাসিকে তু সম্প্রাপ্তে ভ্রান্তিঃ সংজায়তে যতঃ। ধাত্রাক্ষরাণি সৃষ্টানি পত্রারূঢ়ান্যতঃ পুরা॥ ইতি জ্যোতিস্তত্ত্বং॥*॥ ধাতুময়পত্রাকৃতিদ্রব্যং। পতর্ ইতি তবক্ ইতি চ ভাষা। যথা। সুবর্ণপত্রাভরণা চ কার্য্যা সুলোহপার্শ্বদ্বয়শৃঙ্খলাভিঃ। ইতি তুলাপুরুষদানে দানসাগরঃ॥*॥ পত্রী। লিপিঃ। তস্য রঞ্জনং যথা। সুবর্ণরূপ্যরঙ্গাদ্যৈ রঞ্জয়েৎ পত্রমুত্তমং। সামান্যোত্তমমধ্যানাং পত্ররঞ্জনমীরিতং॥*॥ অথ পত্রপ্রমাণং। ষড়ঙ্গুলাধিকং হস্তং পত্রমুত্তমমীরিতং। মধ্যমং হস্তমাত্রং স্যাৎ সামান্যং মুষ্টিহস্তকং॥*॥ অথ পত্রভঙ্গপ্রকারঃ। পত্রন্তু ত্রিগুণীকৃত্য ঊর্দ্ধে তু দ্বিগুণং ত্যজেৎ। শেষভাগে লিখেদ্বর্ণান্ গদ্যপদ্যাদিসংযুতান্॥*॥ অথ পত্রস্য রচনক্রমঃ। রাজলেখকমাহূয় নৃপো ব্রূয়াৎ প্রযত্নতঃ। পত্রং কুরু যথাযোগ্যং গদ্যপদ্যাদিসংযুতং॥ পণ্ডিতদ্বয়মানীয় লেখকো রহসি স্থিতঃ। যথাযোগ্যানুসারেণ পত্রং কুর্য্যান্মনোরমং॥ দিনদ্বয়ং ত্রয়ং বাপি বিচার্য্য পণ্ডিতেন বৈ। স্বভ্রান্তের্দূষণং জ্ঞাত্বা বিলিখেৎ পত্রপুস্তকে॥ সামান্যপত্রে সংলিখ্য রহসি শ্রাবয়েন্নৃপং। নৃপাজ্ঞয়া শুভে পত্রে বিলিখেদ্রাজলেখকঃ॥*॥ অথ লেখনপ্রকারঃ। অঙ্কুশং প্রথমং দদ্যাৎ মঙ্গলার্থং বিচক্ষণঃ। মধ্যে বিন্দুসমাযুক্তমধঃ সপ্তাঙ্কসংযুতং॥ তদধঃ স্বস্তি বিন্যস্য

ততো গদ্যং সুশোভনং। ততঃ শ্রীশব্দরূপাণি পদন্যাসক্রমং লিখেৎ ॥ ভাষয়া সংস্কৃতেনৈব কুশলং বিলিখেৎ সুধীঃ। ততঃ শুভাশুভাং বার্ত্তাং সংস্কৃতৈঃ প্রাকৃতৈস্তথা॥ ততঃ প্রমাণসন্দেশং ততো বার্ত্তাং নিযোজয়েৎ। কীর্ত্তিপ্রীতিযুতং পদ্যং ততঃ কিমধিকাদিকং ॥ পত্রপ্রেষণশ্লোকঞ্চ অঙ্কমাসাদিসংযুতং। সর্ব্বেষামেব পত্রেষু লিখনঞ্চৈবমীরিতং ॥ সর্ব্বেষামেব পত্রাণাং বিধিং জ্ঞাত্বা লিখেত্তু যঃ। স্বদেশে কীর্ত্তিমাপ্নোতি তথা দেশান্তরে ষ্বপি ॥ এবং শাস্ত্রক্রমং জ্ঞাত্বা যো লিখেদ্রাজপত্রকং। স রাজমন্ত্রিভিঃ সার্দ্ধং যশঃ প্রাপ্নোত্যনুত্তমং ॥ শাস্ত্রসন্দর্ভমজ্ঞাত্বা যো লিখেদ্রাজপত্রকং। স রাজমন্ত্রিভিঃ সার্দ্ধং দুর্যশো মহদাপ্নুয়াৎ ॥ * ॥ অথ পত্রনয়নক্রমঃ। রাজপত্রং নয়েন্মূর্দ্ধ্নি ললাটে পাত্রমন্ত্রিণাং। গুরুপত্রং নয়েন্মূর্দ্ধ্নি ব্রাহ্মণানান্তথৈব চ ॥ যতিসন্ন্যাসিনাঞ্চৈব স্বামিনশ্চ তথৈব চ। সাদরেণৈব যত্নেন তথা মূর্দ্ধনি ধারয়েৎ ॥ ভার্য্যাপুত্রস্য মিত্রস্য হৃদয়ে ধারয়েৎ সুধীঃ। প্রবীরাণাং কণ্ঠদেশে পত্রধারণমীরিতং ॥ এতেষাঞ্চৈব পত্রাণামুক্তং ধারণলক্ষণং। অন্যেষামপি পত্রাণাং নিয়মো নাত্র দর্শিতঃ ॥ * ॥ অথ পত্রপঠনপ্রকারঃ। পত্রং ধৃত্বা নমস্কৃত্য পূর্ব্বাগ্রং স্থাপয়েৎ সুধীঃ। দক্ষিণাগ্রেণ সদসি নৃপাগ্রে রাজলেখকঃ ॥ পত্রং বিতত্য সদসি দ্বিবারং মনসা পঠেৎ। স্ফুটং পশ্চাৎ প্রবক্তব্যমক্ষোভো রাজলেখকঃ ॥ রহসি শ্রাবয়েৎ পত্রং শুভং বা যদি বাশুভং। পত্রং শ্রুত্বা বিদিত্বার্থং সভায়াং শ্রাবয়েত্ততঃ ॥ রহস্যপত্রং রহসি নৃপাগ্রে শ্রাবয়েদ্দ্বিজঃ। অশুভং নৈব সদসি শুভং পত্রং নৃপাজ্ঞয়া ॥ এবং ক্রমেণ পত্রার্থং শ্রাবয়িত্বা দ্বিজোত্তমঃ। নৃপতেঃ সন্নিধৌ স্থিত্বা নৃপাজ্ঞামনুবর্ত্ততে॥ * ॥ অথ পত্রচিহ্নানি। ঊর্দ্ধে ষড়ঙ্গুলং ত্যক্ত্বা বর্ত্তুলং চন্দ্রবিম্ববৎ। কস্তূরীকুঙ্কুমৈঃ কুর্য্যাদ্রাজপত্রং সুচিহ্নিতং ॥ মন্ত্রিণাং কুঙ্কুমেনৈব পণ্ডিতস্যৈব চন্দনৈঃ। গুরূণাং চন্দনেনৈব সিন্দূরেণৈব স্বামিনঃ॥ ভার্য্যায়াশ্চাপ্যলক্তেন চন্দনৈঃ পিতৃপুত্রয়োঃ। সন্ন্যাসিনাং চন্দনেন যতীনাং কুঙ্কুমেন চ ॥ রক্তচন্দনপঙ্কেন ভৃত্যস্য সমুদীরিতং। শোণিতেনৈব শত্রূণাং পত্রচিহ্নং প্রকল্পয়েৎ ॥ এতেষাঞ্চৈব সর্ব্বেষাং যথাযোগ্যানুসারতঃ। পত্রস্যোর্দ্ধে তু মতিমান্ কুর্য্যাৎ চিহ্নং সুবর্ত্তুলং॥ * ॥ অথ রাজপত্রস্য কোণচ্ছেদনপ্রকারঃ। দক্ষিণে পত্রকোণস্য অধস্তাৎ ছেদয়েৎ সুধীঃ। একাঙ্গুলপ্রমাণেন রাজপত্রস্য চৈব হি ॥ * ॥ অথ রাজপত্রাদেঃ পদন্যাসঃ। মহারাজাধিরাজঞ্চ দানশৌণ্ডং তথৈব চ। তথা সচ্চরিতং যোজ্যং কল্পবৃক্ষাদিকং ন্যসেৎ ॥ যথাযোগ্যানুসারেণ তথৈব গুণভেদতঃ। রাজপত্রেষু সর্ব্বেষু পদন্যাসক্রমং বিদুঃ ॥*॥ অথ মন্ত্রিপত্রস্য। প্রবরং গুণভেদেন তথা সচ্চরিতাদিকং। বিন্যস্য বিলিখেৎ প্রাজ্ঞো মন্ত্রিপত্রে

পদক্রমং ॥*॥ অথ পণ্ডিতস্য। সংখ্যাবদ্-বন্দিতত্বপদং শাস্ত্রার্থনিপুণাদিকং। পণ্ডিতানাঞ্চ পত্রেষু বিলিখেদ্বৈ পদক্রমং ॥ * ॥ অথ গুরুপত্রস্য। সাংখ্যসিদ্ধান্তনিপুণং সনমস্কারকং পদং। বিন্যস্য বিলিখেৎ প্রাজ্ঞো গুরুপত্রে পদক্রমং ॥ * ॥ অথ স্বামিপত্রস্য। প্রবর্য্যং সনমস্কারং প্রাণপ্রিয়াদিকং পদং। বিন্যস্য বিলিখেদ্ধীমান্ স্বামিপত্রে পদক্রমং ॥ * ॥ অথ ভার্য্যাপত্রস্য। প্রাণপ্রিয়াপদং সাধ্বীং তথা সচ্চরিতাদিকং। ভার্য্যাপত্রে লিখেদ্বিদ্বান্ পদক্রমমনুত্তমং ॥*॥ অথ পুত্রস্য। প্রাণপুত্রপদং তদ্বত্তথা সচ্চরিতাদিকং। আশীর্ব্বচনসংযুক্তং পুত্রপত্রে পদক্রমং ॥ * ॥ অথ পিতৃপত্রস্য। প্রভুবর্য্যং নমস্কারং তথা সচ্চরিতাদিকং। বিন্যস্য বিলিখেৎ পুত্রঃ পিতৃপত্রে পদক্রমং ॥ * ॥ অথ সন্ন্যাসিযতিপত্রস্য। সর্ব্ববাঞ্ছাবিনির্মুক্তং সর্ব্বশাস্ত্রার্থপারগং। সন্ন্যাসিযতিপত্রেষু বিলিখেচ্চ পদক্রমং ॥ * ॥ সামান্যস্য। সামান্যভৃত্যশত্রূণাং বিনিযোজ্যামুকং প্রতি। শস্ত্রাবশেষিতপদং ছাগতুল্যাদিকং তথা ॥ এতেষামেব পত্রেষু যথাযোগ্যানুসারতঃ। বিন্যস্য বিলিখেৎ প্রাজ্ঞঃ পদক্রমমনুত্তমং ॥ * ॥ শ্রীশব্দবিন্যাসসংখ্যা যথা। ষড়্গুরোঃ স্বামিনঃ পঞ্চ দ্বে ভৃত্যে চতুরো রিপৌ। শ্রীশব্দানাং ত্রয়ং মিত্রে একৈকং পুত্রভার্য্যয়োঃ ॥ * ॥ অথ রাজ্ঞঃ প্রশস্তিঃ। স্বস্তিগীর্ব্বাণচয়চূড়ারত্নরাজিরোচিশ্চুম্বিতচন্দ্রচূড়চরণনখেন্দুবৃন্দচন্দ্রিকাসন্দোহাস্বাদচতুরচেতশ্চকোরবরবিষমসমরসঞ্চরৎপ্রবলতরতুরগখুরপুটপটলদলিতভূপৃষ্ঠোত্তিষ্ঠদ্ভূয়িষ্ঠধূলিধারাধূসরিতসকলহরিদন্তরপ্রচণ্ডভুজদণ্ডভ্রাজমানখরতরাসিবিত্রাসিতপ্রত্যর্থিপৃথ্বীপতিসার্থপ্রার্থিতানুকম্পাসুধাসম্পাতানবরতবিদ্বদ্দারিদ্র্যবিদ্রাবণদ্রবিণরাশিবিশ্রাণনসমুপার্জ্জিতোর্জ্জিতযশোমরালাবলিকবলিতবলিদধীচিসঞ্চিতযশোমৃণালজালভূপালকুলতিলকশ্রীযুতমহারাজাধিরাজেষু। ১। স্বস্তিপ্রচণ্ডদোর্দণ্ডখণ্ডখণ্ডিতারিমণ্ডলমুণ্ডোন্মুক্তমুক্তাবলীমণ্ডিতসংগ্রামাঙ্গনরিঙ্গমাণানেকবারণবাহাদিকায়কাণ্ডবক্রতরনক্রচক্রচংক্রমণদুরতিক্রমণীয়াপগাপতিপ্রভূতযশশ্চন্দ্রচন্দ্রিকাদ্যোতবিদ্যোতিতাখিলজগন্মণ্ডলবিবিধদ্রবিণার্পণসন্তোষিতসূরিসমূহস্তূয়মানাবদাতকীর্ত্তিনর্ত্তকীনর্ত্তনলীলালেপলেপিতগীতিধুরীণোর্ব্বশ্যাদিবেশ্যাজনসবিলাসগীয়মানগুণশ্রবণান্দোলিতাখণ্ডশ্রবণকুণ্ডলপরিতঃপ্রসর্পিতপ্রতাপতপনোত্তাপিতারাতিততিসমধ্যাসিতনিকুঞ্জকুঞ্জপ্রস্তুতসৌন্দর্য্যগাথাপ্রমুদিতশ্রীমন্নারায়ণচরণকিঙ্করশ্রীযুতমহারাজদানশৌণ্ডেষু। ২ ॥ * ॥ অথ মন্ত্রিপ্রশস্তিঃ। স্বস্তিশ্রীমৎসমস্তসামন্তসেবকনির্ব্বাহকেষু। কোষগোকৃষিকৃষীবলগজবাজিগৃহপরিবারহর্ষহেতুনীতিসেতুরক্ষণনিপুণেষু। অস্মদ্বিশ্বাসৈকনিকেতনেষু শ্রীশ্রীমন্ত্রিপ্রবীরেষু আশীরাশিনিবেদনকোঽয়ং বর্ণভূতোঽত্রত্যং ভব্যমাবেদয়ন্ তত্রত্যং ভব্যমব্যাহতমনুদিনমনুক্ষণং পৃচ্ছতিস্ম॥*॥

অথ গুরুপ্রশস্তিঃ। স্বস্তিশ্রীনারায়ণপদ-পাথোরুহনিঃসরম্মকরন্দমধুপায়মানমান-সেষু। বিবিধবিদ্যাবিদ্যোতিতাখিলগুণ-গণালঙ্কতবেদবেদাঙ্গপারগস্বাশ্রমোচিতা-চারসম্পন্নপরমহংসপরিব্রাজকাচার্য্যসে-ব্যমানশ্রীগোবিন্দস্বরূপগুরুচরণারবিন্দেষু কোটিশঃ প্রণামাঃ ॥ * ॥ অথ ভার্য্যায়াঃ স্বামিপ্রশস্তিঃ। স্বস্তিশ্রীমদুদ্দামপ্রেমহেম-ভূষিতাস্মদাদিভক্তজনেষু। কর্ণয়োরধিষ্ঠা-নেষু। নেত্রয়োরধিদৈবতেষু। কামস্য পরিণামেষু। চতুর্ব্বর্গপ্রদায়কেষু। মমা-পররূপেষু। শ্রীমৎস্বামিচরণারবিন্দেষু। গোবিন্দ ইবেন্দিরায়াঃ শঙ্কর ইব গিরি-জায়াঃ মহেন্দ্র ইব পুলোমজায়াঃ প্রতি-দিনং বর্দ্ধমানা সমারাধনা প্রণামপূর্ব্ব-মাস্তাং ॥ * ॥ অথ ভর্ত্তুর্ভার্য্যাপ্রশস্তিঃ। স্বস্তিশ্রীমৎসমস্তপ্রেমপারলাবণ্যমূর্ত্তৌ প্রি-য়তমায়াং নেত্রযুগ্মস্য কনীনিকায়ামিব চন্দ্রস্য ক্ষণদায়ামিব কমলাকরস্য কম-লিন্যামিব পথিকস্য ছায়ায়ামিব তৃষা-তুরস্য শীতলামৃতধারায়ামিব মম সপ্রেম নিবেদয়ন্তী পত্রী শুভাশীরাশীন্নিবেদয়তু সর্ব্বদা ॥ * ॥ অথ পুত্রস্য পিতরং প্রতি প্রশস্তিঃ। স্বস্তিশ্রীমদভিনববশম্বদচিত্ত-চিন্তিতস্বীয়ানুরাগানুরঞ্জিতানুগৃহীতস্বগৃহ্য-বর্গেষু। নিজচরণসরোজরঞ্জিতপরাগসং-রক্তাস্মদাদিভালস্থলবিশালভাগ্যসম্ভাবুকে-ষু। শ্রীযুতপিতৃচরণসরোরুহেষু। অকি-ঞ্চিৎকরকিঙ্করস্য মম বদ্ধকরসম্পুটস্যা-বনীপৃষ্ঠলগ্নাঃ সাষ্টাঙ্গপ্রণতয়ঃ সহস্র-মজস্রং বিজ্ঞাপ্যঞ্চ ॥ * ॥ অথ পিতুঃ পুত্রং প্রতি প্রশস্তিঃ। স্বস্তিশ্রীবিশ্বেশ্বরচরণস-রোরুহানুগ্রহসমাসাদিতাতিবিতন্তানবদ্য-বিদ্যাবিলাসপীযূষপরম্পরাপরাভাবুকানু-পমমাধুরীধুরীণবিবিধগুণালঙ্কতনিজবংশা-বতংসসকলবিশ্বাসনিধাননিজকুলপবিত্রী-কৃতাত্মপ্রায়েষু। শ্রীযুতশুদ্ধাচারপরিপূরি-তপুত্রেষু শুভাশিষাং রাশয়ঃ সন্তু বিজ্ঞাপ্য-ঞ্চ ॥ * ॥ অথ সন্ন্যাসিযতিপ্রশস্তিঃ। স্বস্তিশ্রীমৎপরমহংসপরিব্রাজকাচার্য্যকর-ণনিপুণতাপরাঙ্মুখেষু। বিষমবিষয়দোষ দর্শনদূষিতপ্রপঞ্চরচনাবিভাবেষু। বেদ-বেদান্তসাংখ্যসিদ্ধান্তবদ্ধদেবপ্রকৃতিপুরুষ বিবেকজ্ঞানশীলেষু। সংখ্যাবন্মুখ্যবন্দিত চরণারবিন্দস্বাশ্রমোচিতাচারপরিপালনপ বিত্রীকৃতধরিত্রীতলেষু। সকলভূদেবপূ জিতশ্রীযুতগোস্বামিচরণারবিন্দেষু। মমা বনীসংলগ্নাঃ সাষ্টাঙ্গপ্রণামসহস্রমজস্রং ওঁ নমো নারায়ণায়েতিমন্ত্রেণাকলিত মস্ত ॥ * ॥ অথ ভৃত্যপ্রশস্তিঃ। ৭ঁস্বস্তি ভগবচ্চরণপরায়ণসকলদ্রবিণাধিরক্ষকগে মহিষ্যাদিপ্রতিপালকনিখিলবংশানুসেবব বশম্বদামুকভৃত্যং প্রতি ॥ * ॥ অথারি প্রশস্তিঃ। স্বস্তিসমরাঙ্গনভ্রষ্টপ্রতিভটা যশঃপরিপূরিতসকলসামন্তরাজধানীবিজৃ ম্ভিতবীরশস্ত্রাবশেষিতনিজবংশানুরক্ষকস ততপরিত্রস্তশরণাগতামুকং প্রতি ॥ * অথ বিবেকিনাং প্রশস্তিঃ। স্বস্তিশ্রীভগবৎ পদপঙ্কজপূজনোপচিতপুণ্যপুঞ্জপবিত্রীকৃ স্তঃকরণদিগ্বিলাসিনীবিসরদ্ধম্মিল্লমিলম্মল্লি

য়ালাকলাযশোঽনুবন্ধিনিরবধিবসুবিশ্রাণনাধরীকৃতসুরপুরভূমীরুহেষু। স্বস্তিশ্রীমৎপরমেশ্বরপাদপাথোরুহাস্বাদচতুরচিত্তচঞ্চরীকভূবৃন্দারকবৃন্দাবনজনিতামিতযশঃপটীরপঙ্কপটলালঙ্কৃতদিগঙ্গনাগণস্তনতটপ্রবলপ্রতাপৌর্ব্বখর্ব্বীকৃতপ্রত্যর্থিসার্থগর্ব্বাকূপারপারেষু। ইতি বররুচিকৃতপত্রকৌমুদী ॥

পত্রকং (ক্লী) বৃক্ষস্য পত্রং। পত্রাবলী। ইতি শব্দরত্নাবলী ॥ তেজপত্রং। অস্য গুণঃ। কফবাযুর্শোহৃল্লাসারুচিনাশিত্বং। ইতি রাজবল্লভঃ ॥ শালিঞ্চশাকে পুং। ইতি রত্নমালা ॥

পত্রকাহলা (স্ত্রী) পিঙ্গোলা। পত্রশব্দঃ। ইতি হারাবলী ॥

পত্রকৃচ্ছ্রঃ (পুং) পর্ণকৃচ্ছ্রব্রতং। যথা। পর্ণোডুম্বররাজীববিল্বপত্রকুশোদকৈঃ। প্রত্যেকং প্রত্যহং পীতৈঃ পর্ণকৃচ্ছ্র উদাহৃতঃ ॥ ইতি যাজ্ঞবল্ক্যঃ ॥ পলাশোডুম্বরারবিন্দশ্রীবৃক্ষপর্ণানামেকৈকেন ক্বথিতমুদকং প্রত্যহং পিবেৎ কুশোদকঞ্চ একস্মিন্নহনীতি পঞ্চাহসাধ্যঃ পর্ণকৃচ্ছ্রঃ। ইতি মিতাক্ষরা ॥

পত্রগুপ্তঃ (পুং) ত্রিকণ্টঃ। তেকাঁটাসিজ্ ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥

পত্রধনা (স্ত্রী) সাতলাবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

পত্রাঙ্গং (ক্লী) পত্রাঙ্গং। রক্তচন্দনং। ইতি শব্দরত্নাবলী ॥

পত্রঝঙ্কারঃ (পুং) পুরোটিঃ। রায়ভাটী ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ ॥

পত্রণা (স্ত্রী) শরপত্ররচনা। যথা। শরাণাং পত্ররচনা পত্রণা পরিকীর্ত্তিতা। ইতি হারাবলী ॥

পত্রতণ্ডুলী (স্ত্রী) যবতিক্তা। ইতি রাজনির্ঘণ্টঃ ॥

পত্রতরুঃ (পুং) দুষ্খদিরঃ। ইতি রাজনির্ঘণ্টঃ ॥

পত্রদারকঃ (পুং) ক্রকচঃ। করাৎ ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ ॥

পত্রনাড়িকা (স্ত্রী) পত্রশিরা। ইতি জটাধরঃ ॥

পত্রপরশুঃ (পুং) স্বর্ণকারাদীনাং স্বর্ণাদিচ্ছেদিকা। ছেনী ইতি ভাষা। তৎপর্য্যায়ঃ। ব্রশ্চনঃ ২। ইত্যমরঃ ॥ পত্রপশুঃ ৩। ইতি শব্দরত্নাবলী ॥

পত্রপা (স্ত্রী) অপত্রপা। লজ্জা। ইতি শব্দরত্নাবলী ॥

পত্রপালঃ (পুং) আয়তা ছুরিকা। ইতি হেমচন্দ্রঃ ॥

পত্রপালী (স্ত্রী) কর্ত্তনী। কাঁচী ইতি ভাষা। ইতি হলায়ুধঃ ॥

পত্রপাশ্যা (স্ত্রী) স্বর্ণাদিরচিতললাটাভরণং। টীকা ইতি ভাষা। ইত্যমরঃ ॥

পত্রপিশাচিকা (স্ত্রী) জলত্রা। টোকা ইতি ভাষা। তৎপর্য্যায়ঃ। খর্পরঃ ২ বারিত্রা ৩ মূর্দ্ধখোলং ৪। ইতি ত্রিকাণ্ডশেষঃ ॥

পত্রপুষ্পঃ (পুং) রক্ততুলসী। ইতি শব্দচন্দ্রিকা ॥

পত্রপুষ্পকঃ (পুং) ভূর্জ্জপত্রং। ইতি শব্দমালা ॥

পত্রপুষ্পা (স্ত্রী) তুলসী। ইতি শব্দমালা ॥ ক্ষুদ্রপত্রতুলসী। ইতি রত্নমালা ॥

পত্রবন্ধঃ (পুং) পুষ্পরচনা। যথা। রচনা চ পরিস্পন্দঃ পত্রবন্ধ ইতি ত্রয়ং। পত্রভঙ্গপ্রসূনাদিরচনায়াং নিগদ্যতে ॥ ইতি শব্দরত্নাবলী ॥

পত্রবালঃ (পুং) তুলাধটঃ। দাঁড় ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ ॥

পত্রভঙ্গঃ (পুং) স্তনকপোলাদৌ কস্তূরিকাদিরচিতপত্রাবলী। তৎপর্য্যায়ঃ। পত্রলেখা ২ পত্রবল্লী ৩ পত্রলতা ৪ পত্রাঙ্গুলী ৫। ইতি হেমচন্দ্রঃ ॥ পত্রাঙ্গুলিঃ ৬ পত্রভঙ্গী ৭ পত্রকং ৮ পত্রভঙ্গিঃ ৯ পত্রাবলী ১০। ইতি শব্দরত্নাবলী

পত্রভঙ্গী (স্ত্রী) পত্রভঙ্গঃ। ইতি শব্দরত্নাবলী ॥

পত্রযৌবনং (ক্লী) পল্লবং। নূতনপত্রং। যথা। নবোদ্গতে কিশলয়ং কিশলং পত্রযৌবনং। ইতি জটাধরঃ ॥

পত্ররথঃ (পুং স্ত্রী) পক্ষী। ইত্যমরঃ ॥

পত্রলং (ক্লী) দ্রপ্সং। অঘনদধি। ইতি হেমচন্দ্রঃ ॥

পত্রলেখা (স্ত্রী) পত্রভঙ্গঃ। ইত্যমরঃ ॥

পত্রবল্লী (স্ত্রী) পত্রভঙ্গঃ। ইতি হেমচন্দ্রঃ ॥ রুদ্রজটা। পলাশী লতা। ইতি রাজনির্ঘণ্টঃ ॥ পর্ণলতা চ ॥

পত্রবাহঃ (পুং) বাণঃ। ইতি জটাধরঃ ॥ লিপিবাহকে ত্রি ॥

পত্রশাকঃ (পুং) ষড়্বিধশাকান্তর্গতপত্রাত্মকশাকঃ। যথা। পত্রং পুষ্পং ফলং নালং কন্দং সংস্বেদজং তথা। শাকং ষড়্বিধমুদ্দিষ্টং গুরুবিদ্যাদ্যথোত্তরং ॥ ইতি রাজবল্লভঃ ॥

পত্রশিরা (স্ত্রী) পত্রভঙ্গঃ। তৎপর্য্যায়ঃ। মাঢ়িঃ ২। ইতি হারাবলী ॥ পর্ণনাড়ী চ ॥

পত্রশ্রেণী (স্ত্রী) দ্রবন্তী। ইতি রাজনির্ঘণ্টঃ ॥ পর্ণপংক্তিশ্চ ॥

পত্রশ্রেষ্ঠঃ (পুং) বিল্বঃ। ইতি রাজনির্ঘণ্টঃ ॥

পত্রসূচিঃ (পুং) কণ্টকং। ইতি ত্রিকাণ্ডশেষঃ ॥

পত্রহিমং (ক্লী) হিমদুর্দ্দিনং। ইতি ত্রিকাণ্ডশেষঃ ॥

পত্রাখ্যং (ক্লী) তেজপত্রং। ইতি শব্দচন্দ্রিকা ॥ তালীশপত্রং। ইতি রাজনির্ঘণ্টঃ ॥

পত্রাঙ্গং (ক্লী) রক্তচন্দনং। রক্তচন্দনসদৃশকাষ্ঠবিশেষঃ। বকম্ ইতি ভাষা। ইত্যমরঃ ॥ ভূর্জ্জং। পদ্মকং। ইতি মেদিনী ॥

পত্রাঙ্গুলিঃ (স্ত্রী) পত্রভঙ্গঃ। স্তনকপোলাদৌ কস্তূরিকাদিরচিতপত্রাবলী। ইত্যমরঃ ॥

পত্রাঞ্জনং (ক্লী) মসী। ইতি শব্দরত্নাবলী ॥

পত্রাঢ্যং (ক্লী) পিপ্পলীমূলং। পর্ব্বততৃণং। ইতি রাজনির্ঘণ্টঃ ॥

পত্রান্যং (ক্লী) পত্তঙ্গং। ইতি রাজনির্ঘণ্টঃ ॥

পত্রালুঃ (পুং) কাসালুঃ। ইক্ষুদর্ভা। ইতি রাজনির্ঘণ্টঃ ॥

পত্রাবলিঃ (স্ত্রী) গৈরিকং। ইতি শব্দচন্দ্রিকা ॥ পত্রশ্রেণী চ ॥

পত্রাবলী (স্ত্রী) পত্রভঙ্গঃ। ইতি শব্দরত্নাবলী ॥ নবদুর্গাসম্প্রদানকমধুমিশ্রিতযব-

চূর্ণযুক্তনবাশ্বত্থপত্রাণি। যথা। অমায়াং নিশি সংঘে তু পত্রে চাশ্বত্থসংজ্ঞকে। ক্রমাৎ পত্রাবলী দেয়ং মধুনা যবচূর্ণকং॥ ইতি কৈবল্যতন্ত্রং॥ দেবাদিসন্নিধৌ সন্দিগ্ধবস্তুনোরেকতরাবধারণার্থকব্রাহ্মণবালকোত্তোলিততত্তৎসন্দেহকোটিলিখিতপত্রসমূহশ্চ॥

পত্রিকা (স্ত্রী) পত্রী। লিপিঃ। যথা। আদিত্যাদিগ্রহাঃ সর্ব্বে নক্ষত্রাণি চ রাশয়ঃ। দীর্ঘমায়ুঃ প্রকুর্ব্বন্তু যস্যেয়ং জন্মপত্রিকা॥ ইতি জ্যোতিষং॥

পত্রিকাখ্যঃ (পুং) কর্পূরভেদঃ। ইতি রাজনির্ঘণ্টঃ॥ পত্রিকানামকে ত্রি॥

পত্রিণী (স্ত্রী) পল্লবঃ। ইতি শব্দচন্দ্রিকা॥

পত্রী [ন্] (পুং) বাণঃ। পক্ষী। ইত্যমরঃ॥ শ্যেনঃ। বৃক্ষঃ। রথী। পর্ব্বতঃ। ইতি মেদিনী॥ তালঃ। শ্বেতকিণিহী। গঙ্গাপত্রী। পাচী। ইতি রাজনির্ঘণ্টঃ॥ পত্রবিশিষ্টে ত্রি॥

পত্রা (স্ত্রী) লিপিঃ। পত্রং। যথা। শ্রীমৎপঙ্কজিনীপতিঃ কুমুদিনীপ্রাণেশ্বরো ভূভবঃ শাশাঙ্কিঃ সুররাজবন্দিতপদো দৈত্যেন্দ্রমন্ত্রী শনিঃ। স্বর্ভানুঃ শিখিনাং গণো গণপতির্ব্রহ্মেশলক্ষ্মীধরাস্ত্বাং রক্ষন্তু সদৈব যস্য বিমলা পত্রী ময়া লিখ্যতে॥ ইতি জাতকং॥

পত্রোপস্করঃ (পুং) কাসমর্দ্দঃ। ইতি হারাবলী॥

পত্রোর্ণং (ক্লী) ধৌতকৌষেয়ং। ইত্যমরঃ॥ বটলকুচাদিপত্রেষু ক্রিমিভিরূর্ণায়াঃ কৃতত্বাৎ পত্রসম্বন্ধিনী ঊর্ণা অত্রেতি। ইতি ভরতঃ॥

পত্রোর্ণঃ (পুং) শ্যোণাকবৃক্ষঃ। ইত্যমরঃ॥

পৎসলং (ক্লী) পন্থাঃ। ইত্যুণাদিকোষঃ॥

পথ ই ক গত্যাং। ইতি কবিকল্পদ্রুমঃ॥ ই ক পন্থয়তি। ইতি দুর্গাদাসঃ॥

পথ এ জ গত্যাং। ইতি কবিকল্পদ্রুমঃ॥ এ অপথীৎ। জ পাথঃ পথঃ। ইতি দুর্গাদাসঃ॥

পথঃ (পুং) পন্থাঃ। ইতি ত্রিকাণ্ডশেষঃ॥

পথন্ [৯] (পুং) পথঃ। ইত্যমরটীকা॥ গমনকর্ত্তা চ॥

পথিকঃ (ত্রি) পন্থানং গচ্ছতি যঃ। তৎপর্য্যায়ঃ। অধ্বনীনঃ ২ অধ্বগঃ ৩ অধ্বন্যঃ ৪ পান্থঃ ৫। ইত্যমরঃ॥ গন্তঃ ৬ যাতুঃ ৭ পথকঃ ৮ যাত্রিকঃ ৯ যাতৃকঃ ১০। ইতি শব্দরত্নাবলী॥ পথিলঃ ১১। ইত্যুণাদিকোষঃ॥

পথিকসন্ততিঃ (স্ত্রী) পথিকসংঘঃ। তৎপর্য্যায়ঃ। হারিঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥ পথিকসংহতিঃ ৩। ইতি হারাবলী॥

পথিকা (স্ত্রী) কপিলদ্রাক্ষা। ইতি রাজনির্ঘণ্টঃ॥

পথিদ্রুমঃ (পুং) খদিরবৃক্ষঃ। ইতি জটাধরঃ॥ শ্বেতখদিরঃ। ইতি রাজনির্ঘণ্টঃ॥

পথিলঃ (ত্রি) পথিকঃ। ইত্যুণাদিকোষঃ॥

পথিবাহকঃ (ত্রি) শাকুনিকঃ। নিষ্ঠুরঃ। ইতি শব্দমালা॥ ভারবাহকশ্চ॥

পথ্যং (ত্রি) চিকিৎসাদৌ হিতকারকং। তৎপর্য্যায়ঃ। করণং ২ হিতং ৩। ইতি শব্দ-

চন্দ্রিকা॥ আত্মীয়ং ৪ আয়ুষ্যং ৫। সৈন্ধবে ক্লী। ইতি রাজনির্ঘণ্টঃ॥

পথ্যঃ (পুং) হরীতকীবৃক্ষঃ। যথা। শিবায়াং বনতিক্তঃ স্যাৎ পথ্যঃ সুন্দরমাতৃকৌ। ইতি শব্দমালা॥

পথ্যশাকঃ (পুং) তণ্ডুলীয়শাকঃ। ইতি রাজনির্ঘণ্টঃ॥

পথ্যা (স্ত্রী) হরীতকী। মৃগের্ব্বারুঃ। চির্ভিটা॥ বন্ধ্যা কর্কোটকী। ইতি রাজনির্ঘণ্টঃ॥

পথ্যাদিগুগ্‌গুলুঃ (পুং) ঔষধবিশেষঃ। যথা। পথ্যা বিভীতামলকীফলানাং শতং ক্রমেণ দ্বিগুণাভিবৃদ্ধং। প্রস্থেন যুক্তঞ্চ পলঙ্কষাণাং দ্রোণে জলে সংস্থিতমেকরাত্রং। অর্দ্ধাবশেষং ক্বথিতং কষায়ং ভাণ্ডে পচেত্তৎ পুনরেব লোহে। অমূনি বহ্নেরবতার্য্য দদ্যাৎ দ্রব্যাণি সংচূর্ণ্য পলার্দ্ধকানি॥ বিড়ঙ্গদন্তীত্রিফলাগুড়ূচীকৃষ্ণাত্রিবৃন্নাগরকোষণানি। যথেষ্টচেষ্টস্য নরস্য শীঘ্রং হিমাম্বুপানানি চ ভোজনানি॥ নিষেব্যমানো বিনিহন্তি রোগান্ সগৃধ্রসীং নূতনখঞ্জতাঞ্চ। প্লীহানমুগ্রং জঠরার্ত্তিগুল্মং পাণ্ডুত্বকণ্ডুত্ববিবাতরক্তং॥ পথ্যাদিকো গুগ্‌গুলুরেষ নাম্না খ্যাতঃ ক্ষিতাবপ্রমিতপ্রভাবঃ। বলেন নাগেন সমং মনুষ্যং জবেন কুর্য্যাত্তুরগেণ তুল্যং॥ আয়ুঃপ্রকর্ষং বিদধাতি চক্ষুর্ব্বলং তথা পুষ্টিকরো বিষঘ্নঃ। ক্ষতস্য সন্ধানকরো বিশেষাদ্‌রোগেষু শস্তঃ সকলেষু তজ্জ্ঞৈঃ॥ ইতি ভাবপ্রকাশঃ॥

পথ্যাপথ্যং (ক্লী) রোগাণাং হিতাহিতকারকদ্রব্যাণি। তত্র তরুণজ্বরে পথ্যং যথা। বমনং। লঙ্ঘনং। কালোহষ্টাহঃ। যবাগুঃ। স্বেদনং। কটুতিক্তরসৌ। এতানি পাচনানি॥ *॥ নবজ্বরে অপথ্যং যথা। স্নানং। বিরেকঃ। সুরতং। কষায়ঃ। ব্যায়ামঃ। অভ্যঞ্জনং। দিবানিদ্রা। দুগ্ধং। ঘৃতং। বৈদলং। আমিষং। তক্রং। সুরা। স্বাদুগুরুদ্রবদ্রব্যাণি। অন্নং। প্রবাতঃ। ভ্রমণং। কোপঃ॥ *॥ মধ্যজ্বরে পথ্যং যথা। পুরাতনষষ্টিকঃ। পুরাতনশালিঃ। বার্ত্তাকুঃ। শোভাঞ্জনং। কারবেল্লঃ। বেত্রাগ্রং। আষাঢ়ফলং। পটোলং। কর্কোটকং। মূলকপোতিকা। মুদ্গমসূরচণককুলত্থমুকুষ্টকানাং যূষঃ। পাঠা। অমৃতা। বাস্তুকং। তণ্ডুলীয়ঃ। জীবন্তী। কাকমাচী। সুপক্বানি দ্রাক্ষাকপিত্থদাড়িমবৈকঙ্কতফলানি। লঘূনি সাত্ম্যানি চ ভেষজানি॥ *॥ অথ পুরাণজ্বরে পথ্যং। বিরেচনং। ছর্দ্দনং। অঞ্জনং। নস্যং। ধূমঃ। অনুবাসনং। সিরাব্যধঃ। সংশমনং। প্রদেহঃ। অভ্যঙ্গঃ। অবগাহঃ। শিশিরোপচারঃ। এণঃ। কুলিঙ্গঃ। হরিণঃ। ময়ূরঃ। লাবঃ। শশঃ। তিত্তিরিঃ। কুক্কুটঃ। ক্রৌঞ্চঃ। কুরঙ্গঃ। পৃষতঃ। চকোরঃ। ঃ। বর্ত্তকঃ। কালপুচ্ছঃ। গোক্ষীরং। অজাক্ষীরং। গোঘৃতং। অজাঘৃতং। হরীতকী। পর্ব্বতনির্ঝরাম্ভঃ। এরণ্ডতৈলং। সিতচন্দনং। জ্যোৎস্না। প্রিয়ালিঙ্গনং॥ *॥ ব্যায়ামঞ্চ ব্যবায়ঞ্চ স্নানং চংক্রমণং তথা। জ্বরমুক্তো ন

সেবেত যাবন্নো বলবান্ ভবেৎ ॥ * ॥ অথাতিসাররোগে পথ্যং। বমনং। লঙ্ঘনং। নিদ্রা। পুরাণাঃ শালিষষ্টিকাঃ। বিলেপী। লাজমণ্ডঃ। মসূরতুবরীশশৈণলাবহরিণ-কপিঞ্জলভবযূষঃ। সর্ব্বে ক্ষুদ্রমৎস্যাঃ। শৃঙ্গী। খুড্‌ডীশঃ। মধুরালিকা। তৈলং। ছাগঘৃতক্ষীরে। গোদধিতক্রে। গবাজয়োর্দধিজং পয়োজং বা নবনীতং। নবরম্ভা-পুষ্পং। নবরম্ভাফলং। ক্ষৌদ্রং। জম্বুফলং। ভব্যং। মহার্দ্রকং। নিম্বং। শালুকং। বিকঙ্কতং। কপিত্থং। বকুলং। বিল্বং। তিন্দুকং। দাড়িমদ্বয়ং। তিলকং। কঞ্চট-দলং। চাঙ্গেরী। বিজয়া। অরুণা। জাতী-ফলং। অহিফেনং। জীরকঃ। গিরিমল্লিকা। কুস্তুম্বুরু। মহানিম্বং। সকলকষায়রসঃ। দীপনানি লঘূন্যন্নপানানি। নাভের্দ্ব্যঙ্গু-লতোঽধস্তাৎ তথা বংশাস্থিমূলে শস্ত্রেণ অর্দ্ধচন্দ্রবদ্দাহঃ ॥ * ॥ অতীসারে অপথ্যং যথা। স্বেদঃ। অঞ্জনং। রুধিরমোক্ষণং। অম্বুপানং। স্নানং। ব্যবায়ঃ। জাগরণং। ধূমঃ। নস্যং। অভ্যঞ্জনং। সকলবেগ-ধারণং। রূক্ষাণি। অসাত্ম্যমশনং। বিরু-দ্ধান্নং। গোধূমঃ। মাষঃ। যবঃ। বাস্তুকং। কাকমাচী। নিষ্পাবঃ। কন্দঃ। মধুশিগ্রুঃ। রসালং। পূগং। কুষ্মাণ্ডং। তুম্বী। বদরং। গুর্ব্বন্নং। গুরুপানং। তাম্বূলং। ইক্ষুঃ। গুড়ঃ। মদ্যং। উপোদিকা। দ্রাক্ষা। অম্ল-বেতসফলং। লশুনং। ধাত্রী। দুষ্টাম্বু। মস্তু। গৃহবারি। নারিকেলং। স্নেহনং। মৃগমদঃ। অখিলপত্রশাকং। ক্ষারঃ।

সর্ব্বাণি সরাণি। পুনর্নবা। ইর্বারুকং। লবণং। অম্লং ॥ * ॥ অথ গ্রহণীরোগে পথ্যং। নিদ্রা। ছর্দ্দনং। লঙ্ঘনং। পুরা-তনশালয়ঃ। পুরাতনষষ্টিকাঃ। লাজমণ্ডঃ। মসূরতুবরীমুদ্গভবযূষঃ। নিঃশেষোদ্ধৃত-সারগব্যদধি। গবাং ছাগ্যা বা পয়োজং নবনীতং। ছাগঘৃতপয়োদধীনি। তিল-তৈলং। সুরা। মাক্ষিকং। শালূকং। বকুলং। দাড়িমযুগং। নব্যং ভব্যং। রম্ভাপুষ্পং। রম্ভাফলং। তরুণবিল্বং শৃঙ্গাটকং। চাঙ্গেরী। বিজয়া। কপিত্থং কুটজং। অজাজী। কশেরু। তক্রং কঞ্চটপল্লবং। তিলকং। জাতীফলং। জাম্ববং। ধন্যাকং। তিন্দুকং। মহানিম্বঃ। অরুণা। অফেনং। ক্রব্যাৎ। লাবশশৈণ-তিত্তিরিমাংসযূষঃ। সর্ব্বে ক্ষুদ্রমৎস্যাঃ। খুড্‌ডীশঃ। মধুরালিকামৎস্যঃ। খলিশঃ। সর্ব্বকষায়রসঃ। নাভের্দ্ব্যঙ্গুলতোঽধস্তাৎ তথা বংশাস্থিমূলে প্রজ্বলিতায়সার্দ্ধচন্দ্র-বদ্দাহঃ ॥ * ॥ গ্রহণ্যামপথ্যং যথা। রক্ত-স্রুতিঃ। জাগরঃ। অম্বুপানং। স্নানং। স্ত্রী। বেগবিধারণং। নস্যং। অঞ্জনং। স্বেদনং। ধূমপানং। শ্রমঃ। বিরুদ্ধাশনং। আতপঃ। গোধূমঃ। নিষ্পাবঃ। কলায়ঃ। মাষঃ। যবঃ। আর্দ্রকং। ছত্রকং। রাজ মাষঃ। উপোদিকা। বাস্তুকঃ। কাকমাচী। কুষ্মাণ্ডঃ। তুম্বী। মধুশিগ্রুঃ। কন্দঃ। তাম্বূলং। ইক্ষুঃ। বদরং। রসালং। ইর্ব্বা-রুকং। পূগফলং। রসোনং। ধান্যাম্লং। বীরং। তুষোদকং। দুগ্ধং। গুড়ঃ।

মস্তু। নারিকেলং। পুনর্নবা। বার্হতং। বৈণবং। সর্ব্বাণি পত্রশাকানি। দুষ্টাম্বু। গোমূত্রং। মৃগনাভিঃ। ক্ষারং। সমস্তানি সরাণি। দ্রাক্ষা। অম্লং। লবণরসঃ। গুর্ব্বন্নং। গুরুপানং। সর্ব্বে পূপাঃ ॥ * ॥ অথার্শসি পথ্যং। বিরেচনং। লেপনং। অস্রমোক্ষঃ। ক্ষারঃ। অগ্নিকর্ম্ম। শস্ত্রকর্ম্ম। পুরাতনলোহিতশালয়ঃ। পুরাতনষষ্টিকাঃ। যবাঃ। কুলত্থাঃ। গোধাখুগজোষ্ট্রকূর্ম্মাবিকলিঙ্গাজখরৌতুকীশতরক্ষুচাসশৃগালকাকানাং মাংসানি। স্বল্পমাংসাঃ প্রসহাঃ। পটোলং। পত্তূরঃ। রসোনকং। বহ্নিঃ। পুনর্নবা। শূরণঃ। বাস্তুকং। জীবন্তিকা। দন্তশঠঃ। সুরা। ক্রুটিঃ। বয়ঃস্থা। নবনীতং। তক্রং। কক্কোলং। ধাত্রী। রুচকং। কপিত্থং। ঔষ্ট্রমূত্রাজ্যপয়াংসি। ভল্লাতকং। সর্ষপতৈলং। গোমূত্রং। সৌবীরং। তুষোদকং। বাতাপহান্নপানং। অগ্নিবর্দ্ধকান্নপানং ॥ * ॥ অর্শসি অপথ্যং যথা। আনূপমামিষং। মৎস্যঃ। পিণ্যাকঃ। দধি। পিষ্টকং। মাসঃ। করীরং। নিষ্পাবঃ। বিল্বং। তুম্বী। উপোদিকা। পক্কাম্রং। সর্ব্বশালূকং। বিষ্টম্ভীনি। গুরূণি। আতপঃ। জলপানং। বমনং। বস্তিকর্ম্ম। নদীনাং সলিলং। বিরুদ্ধানি সর্ব্বাণি। পূর্ব্বদিগ্‌ভববায়ুঃ। বেগরোধঃ। স্ত্রিয়ঃ। পৃষ্ঠযানং। উৎকটকাসনং। যথাস্বং দোষলং দ্রব্যং। রক্তপিত্তিনাং যদ্যৎ পথ্যাপথ্যং তত্তদপি রক্তার্শোরোগিণাং বিশেষতো বিদ্যাৎ ॥ * ॥ অথাগ্নিমান্দ্যাজীর্ণাদৌ পথ্যং। শ্লৈষ্মিকে পূর্ব্বং বমনং। পৈত্তিকে মৃদুরেচনং। বাতিকে স্বেদনং। যথাবস্থং হিতবস্তূনি। নানাপ্রকারব্যায়ামঃ। দীপনানি। লঘূনি। বহুকালসমুৎপন্না মুদ্গলোহিতশালয়ঃ। বিলেপী। লাজমণ্ডঃ। মুদ্গভৃষ্টমণ্ডঃ। সুরা। এণঃ। বর্হী। শশঃ। লাবঃ। সর্ব্বক্ষুদ্রমৎস্যঃ। শালিঞ্চশাকং। বেত্রাগ্রং। বাস্তুকং বালমূলং। লশুনং। বৃদ্ধকুষ্মাণ্ডং। নবীনকদলীফলং। শোভাঞ্জনং। পটোলং। বার্ত্তাকুঃ। নলদাম্বু। কর্কোটকং। কারবেল্লং। বার্হতং। মহার্দ্রকং। প্রসারণী। কাকমাচী। চাঙ্গেরী। সুনিষণ্ণকং। ধাত্রীফলং। মাতুলুঙ্গং। দাড়িমং। যবঃ। পর্প টঃ। অম্লবেতসং। জম্বীরং। নাগরঙ্গং। মাক্ষিকং। নবনীতং। ঘৃতং। তক্রং। সৌবীরকং। তুষোদকং। ধান্যাম্লং। কটুতৈলং। রামঠং। লবণার্দ্রকং। যমানী। মরিচং। মেথী। ধান্যকং। জীরকং। দধি। তাম্বূলং। তপ্তসলিলং। কটুরসঃ। তিক্তরসঃ ॥ * ॥ অগ্নিমান্দ্যাজীর্ণাদৌ অপথ্যং যথা। বিরেচনং। বিণ্মূত্রবায়ূনাং বেগধারণং। অতিরিক্তাশনং। অধ্যশনং। জাগরণং। বিষমাশনং। রক্তস্রুতিঃ। শমীধান্যং। মৎস্যঃ। মাংসং। উপোদিকা। জলপানং। পিষ্টকং। জাম্ববং। সর্ব্বশালূকং। কূর্চ্চিকা। মোরটঃ। ক্ষীরং। কিলাটঃ। প্রপানকং। তালাস্থিশস্যং। বালতালং। স্নেহনং। দুষ্টবারি। বিরুদ্ধপানান্নং। অসাত্ম্য-

পানান্নং। বিষ্টম্ভীনি। গুরূণি। ফলবর্ত্তিং বমিং স্বেদং লঙ্ঘনং চাপতর্পণং। বিশেষা-দলসে কুর্য্যাদ্বিসূচ্যামতিসারবৎ ॥ * ॥ অথ ক্রিমিরোগে পথ্যং। আস্থাপনং। কায়বিরেচনং। শিরোবিরেচনং। ধূমঃ। কফঘ্নানি দ্রব্যাণি। শরীরমার্জ্জনা। পুরাতনবৈণবরক্তশালয়ঃ। পটোলং। বেত্রাগ্রং। রসোনং। বাস্তূকং। হুতাশঃ। মন্দারদলং। সর্ষপাঃ। নবীনমোচং। বৃহতীফলং। তিক্তানি নালীচদলানি। মৌষিকমাংসং। বিড়ঙ্গং। পিচুমর্দ্দপল্লবং। পথ্যা। তিলতৈলং। সর্ষপতৈলং। সৌবীরং। শুক্তং। তুষোদকং। মধু। পচেলিমতালং। অরুষ্করং। গোমূত্রং। তাম্বূলং। সুরা। মৃগাগুজং। ঔষ্ট্রমূত্রাজ্যপয়াংসি। রামঠং। ক্ষারঃ। অজমোদা। খদিরঃ। বৎসকং। জম্বীরনীরং। সুষবী। যমানিকা। সুরাহ্বাগুরুসিংশপোদ্ভবক্ষারঃ। তিক্তকটুকষায়রসাঃ ॥ * ॥ ক্রিমিরোগে অপথ্যং যথা। ছর্দ্দিঃ। তদ্বেগবিধারণং। বিরুদ্ধপানাশনং। দিবানিদ্রা। দ্রবদ্রব্যং। পিষ্টান্নং। অজীর্ণভোজনং। ঘৃতং। মাষঃ। দধি। পত্রশাকং। মাংসং। পয়ঃ। অম্লঃ। মধুররসঃ ॥ * ॥ অথ পাণ্ডুরোগে পথ্যং। ছর্দ্দিঃ। বিরেচনং। পুরাতনযবগোধূমশালয়ঃ। মুদ্গাঢ়কীমসূরাণাং যূষঃ। জাঙ্গলজরসঃ। পটোলং। বৃদ্ধকুষ্মাণ্ডং। তরুণকদলীফলং। জীবন্তী। ক্ষুরঃ। মৎস্যাক্ষী। গুড়ূচী। তণ্ডুলীয়কং। পুনর্নবা। দ্রোণপুষ্পী। বার্ত্তাকুঃ। লশুনদ্বয়ং। পক্কাম্রং। অভয়া। বিম্বী। শৃঙ্গী মৎস্যঃ। গোমূত্রং। ধাত্রী। তক্রং। ঘৃতং। তৈলং। সৌবীরকং। তুষোদকং। নবনীতং। গন্ধসারঃ। হরিদ্রা। নাগকেশরং। যবক্ষারঃ। লৌহভস্ম। কষায়দ্রব্যং। কুঙ্কুমং। চরণয়োঃ সন্ধৌ নাভের্দ্ব্যঙ্গুলাদধঃ মস্তকে হস্তয়োর্মূলে স্তনকক্ষয়োর্মধ্যে চ দাহঃ। যথাদোষমিদং পথ্যং পাণ্ডুরোগবতাং ভবেৎ ॥ * ॥ পাণ্ডুরোগে অপথ্যং যথা। রক্তস্রুতিঃ। ধূমপানং। বমিঃ। বেগধারণং। স্বেদনং। মৈথুনং। শিম্বী। পত্রশাকানি। রামঠং। মাষঃ। অম্বুপানং। পিণ্যাকঃ। তাম্বূলং। সর্ষপঃ। সুরা। মৃদ্ভক্ষণং। দিবাস্বপ্নঃ। তীক্ষ্ণানি। লবণানি। সিন্ধুবিন্ধ্যাদ্রিজাতনদীনাং জলং। সর্ব্বাণ্যম্লানি। দুষ্টাম্ভঃ। বিরুদ্ধাশনানি। গুর্ব্বন্নং। বিদাহীনি ॥ * ॥ অথ রক্তপিত্তে পথ্যং। অধোগমে ছর্দ্দনং। ঊর্দ্ধনির্গমে বিরেচনং। উভয়ত্র লঙ্ঘনং। পুরাতনাঃ ষষ্টিকশালিকোদ্রবপ্রিয়ঙ্গুনীবারযবপ্রশাতিকাঃ। মুদ্গাঃ। মসূরঃ। চণকঃ। তুবরী। মুকুষ্টকঃ। চিঙ্গটঃ। বর্ম্মিমৎস্যঃ। শশঃ। কপোতঃ। হরিণঃ। এণঃ। লাবঃ। শরালিঃ। পারাবতঃ। বর্ত্তকঃ। বকঃ। উরভ্রঃ। কালপুচ্ছঃ। কপিঞ্জলঃ। কষায়বর্গঃ। গোদুগ্ধঘৃতং। অজাদুগ্ধঘৃতং। মহিষীঘৃতং। পনসং। পিয়ালং। রম্ভাফলং। কঙ্কটং। তণ্ডুলীয়ঃ। পটোলং। বেত্রাগ্রং। মহার্দ্রকং। পুরাণকুষ্মাণ্ডফলং। পক্কতালং। তদ্বীজজলং। বাসা। স্বাদূনি।

বিল্বং। দাড়িমং। খর্জ্জূরং। ধাত্রী। মিষিঃ। নারিকেলং। কশেরু। শৃঙ্গাটকং। পৌষ্করং। কপিত্থং। শালূকং। পরূষকং। ভূনিম্বশাকং। পিচুমর্দ্দপত্রং। তুম্বী। কলিঙ্গং। লাজশক্তবঃ। দ্রাক্ষা। সিতা। মাক্ষিকং। ঐক্ষবং। শীতোদকং। ঔদ্ভিদবারি! সেকঃ। অবগাহঃ। শতধৌতসর্পিঃ। অভ্যঙ্গঃ। শিশিরপ্রদেহঃ। হিমানিলঃ। চন্দনং। ইন্দুপাদাঃ। মনোহনুকূলবিচিত্রকথা। ধারাগৃহং। সুশীতং ভূমিগৃহং। বৈদূর্য্যমুক্তামণীনাং ধারণং। রম্ভোৎপলাম্ভোরুহপত্রাণাং শয্যা। ক্ষৌমাম্বরং। সুশীতোপবনং। প্রিয়ঙ্গুঃ। চন্দনরূষিতানাং বরাঙ্গনানামালিঙ্গনং। পদ্মাকরসরিৎহ্রদচন্দ্রোদয়হিমবদ্দরীসুশীতলগিরিনির্ঝরাণামালিঙ্গনং। শ্রুতিপ্রশস্তকীর্ত্তনং। প্রবীণনীরং। হিমবালুকা॥ * ॥ রক্তপিত্তে অপথ্যং যথা। ব্যায়ামঃ। অধ্বনিষেবণং। রবিকরঃ। তীক্ষ্ণানি কর্ম্মাণি। ক্ষোভঃ। বেগধারণং। চপলতা। হস্ত্যশ্বযানানি। স্বেদঃ। অস্রস্রুতিঃ। ধূমপানং। সুরতঃ। ক্রোধঃ। কুলত্থঃ। গুড়ঃ। বার্ত্তাকুঃ। তিলঃ। মাষঃ। সর্ষপঃ। দধি। ক্ষারঃ। কৌপপয়ঃ। তাম্বূলং। নলদাম্বু। মদ্যং। লশুনং। শিম্বী। বিরুদ্ধাশনং। কটু। অম্লং। লবণং। বিদাহিদ্রব্যং॥ * ॥ অথ রাজযক্ষ্মণি পথ্যং। ঘৃতপক্বমরীচজীরকসংস্কৃতলাবতিত্তিরজরসঃ। দোষাধিকস্য বলিনোঽগ্রে মৃদুশুদ্ধিঃ। গোধূমঃ। মুদ্গঃ। চণকঃ। অরুণশালয়ঃ। ছাগানি মাংসনবনীতপয়োঘৃতানি। ক্রব্যাদ্মাংসং। জাঙ্গলজা রসাঃ। মার্ত্তণ্ডচণ্ডকিরণপরিশোষিতসুচূর্ণিতপক্বপললং লেহ্যং। রাগাঃ। কাম্বলিকঃ। ষাড়বঃ। বেশবারঃ। শশাঙ্ককিরণঃ। মধুররসঃ। মোচপনসাম্রাণাং পক্বফলানি। ধাত্রী। খর্জ্জূরং। পৌষ্করং। পরূষকং। নারিকেলং। শোভাঞ্জনং। বকুলং। নবতালশস্যং। দ্রাক্ষা। মিষিঃ। মাণিমন্থং। সিংহাস্যপত্রং। অজাগোমহিষীঘৃতং। ছাগাশ্রয়ঃ। ছাগাবস্করমূত্রলেপঃ। মৎস্যণ্ডিকা। শিখরিণী। মদিরা। রসালা। কর্পূরং। মৃগমদঃ। সিতচন্দনং। অভ্যঞ্জনানি। সুরভীণ্যনুলেপনানি। স্নানং। বেশরচনং। অবগাহনং। হর্ম্ম্যং। স্রজঃ। স্মরকথা। মৃদুগন্ধবাহঃ। গীতানি। লাস্যং। চন্দ্র রুচিঃ। বিপঞ্চী। মৃগদৃশাং সন্দর্শনং। হেমচূর্ণং। মুক্তামণিপ্রচুরভূষণধারণং। হোমঃ। প্রদানং। অমরপূজা। দ্বিজপূজা। হৃদ্যান্নপানং॥ * ॥ রাজযক্ষ্মণি অপথ্যং যথা। বিরেচনং। বেগধারণং। শ্রমঃ। স্ত্রী। স্বেদঃ। অঞ্জনং। প্রজাগরঃ। সাহসকর্ম্মসেবা। রূক্ষান্নপানং। বিষমাশনং। তাম্বূলং। কালিঙ্গং। কুলত্থং। মাষঃ। রসোনং। বংশাঙ্কুরঃ। রামঠং। অম্লং। তিক্তং। কষায়ঃ। সর্ব্বকটু। পত্রশাকঃ। ক্ষারঃ। বিরুদ্ধাশনং। শিম্বী। কর্কোটকং। বিদাহিদ্রব্যং। কৃষ্ণকঠিল্লকং॥ * ॥ অথ কাসে পথ্যং। স্বেদঃ। বিরেচনং। ছর্দিঃ। ধূমপানং। সমাশনং।

শালিঃ। ষষ্টিকঃ। গোধূমঃ। শ্যামাকঃ। যবঃ। কোদ্রবঃ। আত্মগুপ্তা। মাষমুদ্গ-কুলত্থানাং রসাঃ। গ্রাম্যোদকং। অনূপ-ধন্বদেশভববিবিধমাংসানি। সুরা। পুরাতনসর্পিঃ। ছাগদুগ্ধং। ছাগঘৃতং। বাস্তূকং। বায়সীশাকং। বার্ত্তাকুঃ। বালমূলকং। কণ্টকারী। কাসমর্দ্দঃ। জীবন্তী। সুনিষণ্ণকং। দ্রাক্ষা। বিম্বী। মাতুলুঙ্গং। পৌষ্করং। বাসকঃ। ত্রুটিঃ। গোমূত্রং। লশুনং। পথ্যা। ব্যোষং। উষ্ণোদকং। মধু। লাজাঃ। দিবসনিদ্রা। লঘূন্যন্নানি॥*॥ কাসে অপথ্যং যথা। বস্তিঃ। নস্যং। অস্রমোক্ষঃ। ব্যায়ামঃ। দন্তঘর্ষণং। আতপঃ। দুষ্টপবনঃ। রজঃ। মার্গনিষেবণং। বিষ্টম্ভীনি। বিদাহীনি। বিবিধরূক্ষাণি। শকৃন্মূত্রোদ্গারকাসবমিবেগবিধারণং। মৎস্যঃ। কন্দঃ। সর্ষপঃ। তুম্বী। উপোদিকা। দুষ্টাম্বু। দুষ্টান্নপানং। বিরুদ্ধাশনং। গুরুশীতান্নপানং ॥ * ॥ অথ শ্বাসে পথ্যং। বিরেচনং। স্বেদনং। ধূমপানং। প্রচ্ছর্দ্দনং। দিবাস্বপন। পুরাতনাঃ ষষ্টিকরক্তশালিকুলত্থগোধূমযবাঃ। শশঃ। অহিভুক্। তিত্তিরিঃ। লাবঃ। দক্ষঃ। শুকাদয়ঃ। ধন্বমৃগাঃ। ধন্বপক্ষিণঃ। পুরাতনসর্পিঃ। অজাদুগ্ধঘৃতং। সুরা। মধু। নিদিগ্ধিকা। বাস্তূকং। তণ্ডুলীয়ঃ। জীবন্তিকা। মূলকপোতিকা। পটোলং। বার্ত্তাকুঃ। রসোনং। পথ্যা। জম্বীরং। বিম্বীফলং। মাতুলুঙ্গং। দ্রাক্ষা। ত্রুটিঃ। পৌষ্করং। উষ্ণবারি। কটুত্রয়ং।

গোমূত্রং। কফানিলঘ্নান্যন্নপানভেষজানি। বক্ষঃপ্রদেশাৎ পার্শ্বযুগ্মে করস্বয়োর্মধ্যময়োর্দ্বয়োঃ কণ্ঠকূপে চ প্রদীপ্তলৌহেন দাহঃ ॥ * ॥ শ্বাসে অপথ্যং যথা। মূত্রোদ্গারচ্ছর্দ্দিতৃট্কাসানাং রোধঃ। নস্যং। বস্তিঃ। দন্তকাষ্ঠং। শ্রমঃ। অধ্বা। ভারঃ। রেণুঃ। সূর্য্যকিরণঃ। বিষ্টম্ভীনি। গ্রাম্যধর্ম্মঃ। বিদাহীনি। অনূপমামিষং। তৈলভৃষ্টং। নিষ্পাবঃ। শ্লেষ্মকারীণি। মাষঃ। রক্তস্রাবঃ। পূর্ব্ববাতান্নপানং। মেষীঘৃতদুগ্ধং। দুষ্টজলং। মৎস্যঃ। কন্দঃ। সর্ষপঃ। রূক্ষশীতগুর্ব্বন্নপানং ॥ * ॥ অথ হিক্কায়াং পথ্যং। স্বেদনং। বমনং। নস্যং। ধূমপানং। বিরেচনং। নিদ্রা। স্নিগ্ধানি লঘূন্যন্নানি। লবণানি। জীর্ণকুলত্থগোধূমশালিষষ্টিকযবাঃ। এণতিত্তিরিলাবাদ্যা জাঙ্গলা মৃগপক্ষিণঃ। পক্ককপিত্থং। লশুনং। পটোলং। বালমূলকং। পৌষ্করং। কৃষ্ণতুলসী। মদিরা। নলদাম্বু। উষ্ণোদকং। মাতুলুঙ্গং। মাক্ষিকং। সুরভিজলং। বাতশ্লেষ্মহরাণ্যন্নপানানি। শীতাম্বুসেকঃ। সহসা ত্রাসঃ। বিস্মাপনং। ভয়ং। ক্রোধঃ। হর্ষঃ। প্রিয়োদ্বেগঃ। প্রাণায়ামনিষেবণং। দগ্ধসিক্তমৃদাঘ্রাণং। কূর্চ্চে ধারাজলার্পণং। নাভ্যূর্দ্ধপীড়নং। পায়ূর্দ্ধং নাভের্দ্ব্যঙ্গুলাদূর্দ্ধঞ্চ দীপদগ্ধহরিদ্রয়া দাহঃ॥*॥ হিক্কায়াং অপথ্যং যথা। বাতমূত্রোদ্গারকাসশকৃদ্বেগধারণং। রজঃ। অনিলঃ। আতপঃ। বিরুদ্ধাশনং। বিষ্টম্ভীনি। বিদাহীনি।

রূক্ষাণি। কফদানি। নিষ্পাবঃ। পিষ্টকঃ। মাষঃ। পিণ্যাকঃ। অনূপমামিষং। অবিদুগ্ধং। দন্তকাষ্ঠং। বস্তিঃ। মৎস্যঃ। সর্ষপং। অম্লং। তুম্বী। কন্দঃ। তৈলভৃষ্টং। উপোদিকা। গুরুশীতান্নপানং ॥*॥ অথ স্বরভেদে পথ্যং। স্বেদঃ। বস্তিঃ। ধূমপানং। বিরেকঃ। কবলগ্রহঃ। নস্যং। ভালসিরাবেধঃ। যবঃ। লোহিতশালিঃ। হংসাটবী। তাম্রচূড়কেকিনাং মাংসরসাঃ। সুরা। গোকণ্টকঃ। কাকমাচী। জীবন্তী। বালমূলকং। দ্রাক্ষা। পথ্যা। মাতুলুঙ্গং। লশুনং। লবণার্দ্রকং। তাম্বূলং। মরিচং। সর্পিঃ ॥*॥ স্বরভেদে অপথ্যং। আমকপিত্থং। বকুলং। শালুকং। জাম্ববং। তিন্দুকং। কষায়ঃ। বহ্নিঃ। স্বপ্নঃ। প্রজল্পনং। অনুপানং ॥*॥ অথারোচকে পথ্যং। বস্তিঃ। বিরেকঃ। যথাবলং বমনং। ধূমোপসেবা। কবড়গ্রহঃ। তিক্তকাষ্ঠেন দন্তধাবনং। চিত্রান্নপানং। গোধূমঃ। মুদ্গাঃ। লোহিতশালয়ঃ। ষষ্টিকা। বরাহচ্ছাগশশৈণানাং মাংসং। চেঙ্গঃ। ঝসাগুং। মধুরালিকা। ইল্লিশঃ। প্রোষ্ঠী। খলেশঃ। কবয়ী। রোহিতঃ। কর্কারুঃ। বেত্রাগ্রং। নবীনমূলকং। বার্ত্তাকুঃ। শোভাঞ্জনং। মোচং। দাড়িমং। ভব্যং। পটোলং। রুচকং। ঘৃতং। পয়ঃ। বালতালং। রসোনং। শূরণং। দ্রাক্ষা। রসালং। নলদাম্বু। কাঞ্জিকং। মদ্যং। রসালা। দধি। তক্রং। আর্দ্রকং। কক্কোলং। খর্জ্জুরং। পিয়ালং। তিন্দুকং। পক্বকপিত্থং। বদরং। বিকঙ্কতং। তালাস্থিমজ্জা। হিমবালুকা। সিতা। পথ্যা। যমানী। মরিচং। রামঠং। স্বাদ্বম্লতিক্তানি। দেহমার্জনা ॥*॥ অরোচকে অপথ্যং। কাসোদ্গারক্ষুধানিদ্রাবমীনাং বেগধারণং। অহৃদ্যান্নং। অসৃঙ্মোক্ষঃ। ক্রোধঃ। লোভঃ। ভয়ং। শোকঃ। দুর্গন্ধঃ। সূর্য্যসেবা ॥*॥ অথ ছর্দ্যাং পথ্যং। বিরেচনং। ছর্দ্দনং। লঙ্ঘনং। স্নানং। মৃজা। লাজমণ্ডঃ। পুরাতনাঃ ষষ্টিকশালিমুদ্গাঃ। কলায়ঃ। গোধূমঃ। যবঃ। মধু। শশাহিভুক্তিত্তিরিলাবকাদ্যাঃ। জাঙ্গলমৃগপক্ষিণঃ। মনোজ্ঞনানারসগন্ধরূপা রসাঃ। ষাড়বা যূষাঃ। রাগাঃ। খড়াঃ। কাম্বলিকাঃ। সুরা। বেত্রাগ্রং। কুস্তুম্বুরু। নারিকেলং। পচেলিমানি জম্বীরধাত্রীসহকারকোলদ্রাক্ষাকপিত্থানি। হরীতকী। দাড়িমং। বীজপূরং। জাতীফলং। বালকং। নিম্বং। বাসা। সিতা। শতাহ্বা। করিকেশরং। হিতমনঃপ্রীতিকরভক্ষ্যাঃ। ভুক্তস্য বক্ত্রে শিশিরাম্বুসেকঃ। কস্তূরিকা। চন্দনং। ইন্দুকিরণঃ। মনোজ্ঞগন্ধান্যনুলেপনানি; সুগন্ধিপুষ্পপানফলানি। স্বমনোঽনুকূলরূপরসগন্ধস্পর্শশব্দাঃ। নাভেস্ত্রিযবোপরিষ্টাদ্দাহঃ ॥*॥ ছর্দ্যাং অপথ্যং। নস্যং। বস্তিঃ। স্বেদনং। স্নেহপানং। রক্তস্রাবঃ। দন্তকাষ্ঠং। দ্রবান্নং। বীভৎসদর্শনং। ভীতিঃ। উদ্বেগঃ। উষ্ণস্নিগ্ধাসাত্ম্যাহৃদ্যবৈরোধিকান্নং। রম্ভা। শিম্বী।

কোষবতী। মধূকং। চিত্রা। সূক্ষ্মেলা সর্ষপঃ। দেবদালী। ব্যায়ামঃ। ছত্রিকা অঞ্জনং ॥*॥ অথ তৃষ্ণায়াং পথ্যং শোধনং। বমনং। নিদ্রা। স্নানং। কবল ধারণং। দীপদগ্ধহরিদ্রয়া জিহ্বাধঃশিরয়োর্দ্দাহঃ। কোদ্রবাঃ। শালয়ঃ। পেয়াঃ বিলেপী। লাজশক্তবঃ। অন্নমণ্ডঃ। ধন্ব রসঃ। শর্করা। রাগঃ। ষাড়বঃ। ভৃষ্ট মুদ্গামসূরচণককৃত্তরসঃ। রম্ভাপুষ্পং। তৈল কূর্চ্চং। দ্রাক্ষা। পর্প টপল্লবঃ। কপিত্থং। কোলং। মল্লিকা। কুষ্মাণ্ডকং। উপোদিকা। খর্জ্জূরং। দাড়িমং। ধাত্রী কর্কটী। নলদাম্বু। জম্বীরং। করমর্দ্দং। বীজপূরং। গবাং পয়ঃ। মধূকপুষ্পং। হ্রীবেরং। তিক্তানি। মধুরাণি। বালতালাম্বু। শীতাম্বু। পয়ঃপেটী। প্রপানকং। মাক্ষিকং। সরসীতোয়ং। শতাহ্বা। নাগকেশরং। এলা। জাতীফলং। পথ্যা। কুস্তুম্বুরু। টঙ্কণং। ঘনসারঃ। গন্ধসারঃ। কৌমুদী। শিশিরানিলঃ। চন্দনার্দ্রপ্রিয়াশ্লেষঃ। রত্নাভরণধারণং। হিমানুলেপনং ॥*॥ তৃষ্ণায়াং অপথ্যং। স্নেহঃ। অঞ্জনং। স্বেদঃ। ধূমপানং। ব্যায়ামঃ। নস্যং। আতপঃ। দন্তকাষ্ঠং। গুর্ব্বন্নং। অম্লং। লবণং। কষায়ঃ। কটুঃ। স্ত্রিয়ঃ। দুষ্টজলং। তীক্ষ্ণং ॥*॥ অথ মূর্চ্ছায়াং পথ্যং। সেকঃ। অবগাহঃ। মণিঃ। হারঃ। শীতাঃ প্রদেহাঃ। ব্যজনানিলঃ। শীতানি গন্ধবন্তি পানানি। ধারাগৃহং। শীতমরীচিরোচিঃ। ধূমঃ। অঞ্জনং। লাবণং। অস্রমোক্ষঃ। দাহঃ। সূচীপরিতোদনং। লোম্নাং কচানাঞ্চ লুঞ্চনং। নখান্তপীড়া। দশনোপদংশঃ। নাসামুখদ্বারমরুন্নিরোধঃ। বিরেচনং। ছর্দ্দনং। লঙ্ঘনং। ক্রোধঃ। ভয়ং। দুঃখকরী শয্যা। বিচিত্রা মনোহরাঃ কথাঃ। ছায়া। নভোঽম্ভঃ। শতধৌতসর্পিঃ। মৃদূনি। তিক্তানি। লাজমণ্ডঃ। জীর্ণযবলোহিতশালয়ঃ। কৌম্ভং হবিঃ। মুদ্গযূষঃ। সতীলযূষঃ। ধন্বোদ্ভবা মাংসরসাঃ। রাগাঃ। ষাড়বাঃ। গব্যপয়ঃ। সিতা। পুরাণকুষ্মাণ্ডং। পটোলং। মোচং। হরীতকী। দাড়িমং। নারিকেলং। মধূকপুষ্পং। তণ্ডুলীয়ঃ। তুষোদকং। লঘূন্যন্নানি। প্রনীরনীরং। সিতচন্দনং। কর্পূরনীরং। হিমবালুকা। অত্যুচ্চশব্দঃ। অদ্ভুতদর্শনং। উৎকটগীতং। উৎকটবাদ্যং। শ্রমঃ। স্মৃতিঃ। চিন্তনং। আত্মবোধঃ। ধৈর্য্যং ॥*॥ মূর্চ্ছায়ামপথ্যং যথা। তাম্বূলং। পত্রশাকং। ব্যবায়ঃ। স্বেদনং। কটুঃ। তৃণ্নিদ্রয়োর্বেগরোধঃ। তক্রং ॥*॥ অথ মদাত্যয়ে পথ্যং। সংশোধনং। সংশমনং। স্বপনং। লঙ্ঘনং। শ্রমঃ। সম্বৎসরসমুৎপন্নশালিষষ্টিকযবমুদ্গমাষগোধূমসতীলাঃ। রাগঃ। ষাড়বঃ। এণতিত্তিরিলাবাজদক্ষবর্হিশশানামামিষং। বেশবারঃ। বিচিত্রান্নং। হৃদ্যমদ্যং। পয়ঃ। সিতা। তণ্ডুলীয়ঃ। পটোলং। মাতুলুঙ্গং। পরূষকং। খর্জ্জূরং। দাড়িমং। ধাত্রী। নারিকেলং। গোস্তনী। পুরাণসর্পিঃ। কর্পূরং। প্রনীরং।

শিশিরানিলঃ। ধারাগৃহং। চন্দ্রপাদাঃ। মণয়ঃ। মিত্রসঙ্গমঃ। ক্ষৌমাম্বরং। প্রিয়াশ্লেষঃ। উদ্ধতগীতবাদিত্রং। শীতাম্বু। চন্দনং। স্নানং॥ * ॥ মদাত্যয়ে অপথ্যং যথা। স্বেদঃ। অঞ্জনং। ধূমপানং। লাবণং। দন্তঘর্ষণং। তাম্বূলং ॥ * ॥ অথ দাহে পথ্যং। শালয়ঃ। ষষ্টিকাঃ। মুদ্গাঃ। মসূরাঃ। চণকাঃ। যবাঃ। ধন্বমাংসরসাঃ। লাজমণ্ডঃ। লাজশক্তবঃ। সিতা। শতধৌতঘৃতং। দুগ্ধং। পয়োভবনবনীতং। কুষ্মাণ্ডং। কর্কটী। মোচং। পনসং। স্বাদুদাড়িমং। পটোলং। পর্পটং। দ্রাক্ষা। ধাত্রীফলং। পরূষকং। শিম্বী। তুম্বী। পয়ঃপেটী। খর্জ্জুরং। ধান্যকং। মিসিঃ। বালতালং। পিয়ালং। শৃঙ্গাটকং। কশেরুকং। মধুকপুষ্পং। হ্রীবেরং। পথ্যা। সর্ব্বাণি তিক্তানি। শীতাঃ প্রদেহাঃ। ভূবেশ্ম। সেকঃ। অভ্যঙ্গঃ। অবগাহনং। পদ্মোৎপলদলক্ষৌমাণাং শয্যা। শীতলকাননং। বিচিত্রা কথা। গীতানি। শিশিরঃ। মঞ্জুভাষণং। উশীরচন্দনালেপঃ। শীতাম্বু। শিশিরানিলঃ। ধারাগৃহং। প্রিয়াস্পর্শঃ। প্রনীরং। হিমবালুকা। সুধাংশুরশ্ময়ঃ। স্নানং। মণয়ঃ। মধুররসঃ ॥ * ॥ দাহে অপথ্যং। বিরুদ্ধান্নপানানি। ক্রোধঃ। বেগধারণং। গজাশ্বযানং। অধ্বা। ক্ষারং। পিত্তকরাণি। ব্যায়ামঃ। আতপঃ। তক্রং। তাম্বূলং। মধু। রামঠং। ব্যবায়ঃ। কটুঃ। তিক্তঃ উষ্ণঃ ॥ * ॥ অথোন্মাদে ভূতোন্মাদে চ পথ্যং। মরুদ্ভবে পূর্ব্বং স্বেদঃ। পিত্তোদ্ভবে পূর্ব্বং বিরেকঃ। কফোদ্ভবে পূর্ব্বং বমনং। ততঃপরং বস্তিবিধিঃ। নস্যং। সন্তর্জনং। তাড়নং। অঞ্জনং। আশ্বাসনং। ত্রাসনং। বন্ধনং। ভয়ং। হর্ষণং। দানং। ধূপঃ। দমঃ। বিস্মরণং। প্রদেহঃ। শিরাব্যধঃ। সংশমনং। সেকঃ। আশ্চর্য্যকর্ম্মাণি। ধূমপানং। ধীধৈর্য্যং। সত্বং। আত্মনিবেদনং। অভ্যঞ্জনং। স্বাপনং। আসনং। নিদ্রা। সুশীতাম্বনুলেপনানি। গোধূমঃ। মুদ্গঃ। অরুণশালয়ঃ। ধারোষ্ণদুগ্ধং। শতধৌতসর্পিঃ। নবীনঘৃতং। পুরাতনঘৃতং। কূর্ম্মামিষং। ধন্বরসঃ। রসালং। পুরাণকুষ্মাণ্ডফলং। পটোলং। ব্রহ্মীদলং। বাস্তূকং। তণ্ডুলীয়ঃ। খরাশ্বমূত্রং। গগনাম্বু। পথ্যা। সুবর্ণচূর্ণং। নারিকেলং। দ্রাক্ষা। কপিত্থং। পনসং॥ * ॥ উন্মাদে অপথ্যং। মদ্যং। বিরুদ্ধাশনং। উষ্ণভোজনং। নিদ্রাক্ষুতৃষ্ণাবেগধারণং। ব্যবায়ঃ। আষাঢ়ফলং। কঠিল্লকং। পত্রশাকং। তিক্তানি। বিম্বী ॥ * ॥ অথাপস্মারে পথ্যং। বাতোদ্ভবে পূর্ব্বং বস্তিঃ। পৈত্তিকে বিরেচনং। শ্লৈষ্মিকে বমনং। পরং ধূপনং। অঞ্জনং। নস্যং। শিরাব্যধঃ। দানং। ত্রাসনং। বন্ধনং। ভয়ং। তর্জ্জনং। তাড়নং। হর্ষঃ। ধূমপানং। বিস্ময়ঃ। ধীধৈর্য্যং। আত্মাদিবিজ্ঞানং। স্নানং। অভ্যঞ্জনং। লোহিতশালয়ঃ। মুদ্গাঃ। গোধূমাঃ। প্রতনং হবিঃ। কূর্ম্মামিষং। ধন্বরসঃ। দুগ্ধং। ব্রহ্মীদলং।

বচা। পটোলং। বৃদ্ধকুষ্মাণ্ডং। বাস্তূকং। স্বাদ্বদাড়িমং। শোভাঞ্জনং। পয়ঃপেটী। দ্রাক্ষা। ধাত্রী। পরূষকং। তৈলং। খরাশ্বমূত্রং। গগনাম্বু। হরীতকী ॥ * ॥ অপস্মারে অপথ্যং। চিন্তা। শোকভয়ং। ক্রোধঃ। অশুচীন্যশনানি। মদ্যং। মৎস্যঃ। বিরুদ্ধান্নং। তীক্ষ্ণোষ্ণগুরুভোজনং। অতিব্যবায়ঃ। আয়াসঃ। পূজ্যপূজাব্যতিক্রমঃ। পত্রশাকানি। বিম্বী। আষাঢ়ফলং। তৃষ্ণানিদ্রাক্ষুধাবেগাঃ ॥ * ॥ অথ বাতরোগে পথ্যং। অভ্যঙ্গঃ। মর্দ্দনং। বস্তিঃ। স্নেহঃ। স্বেদঃ। অবগাহনং। সংবাহনং। সংশমনং। প্রাবৃতিঃ। বাতবর্জ্জনং। অগ্নিকর্ম্ম। উপনাহঃ। ভূশয্যা। স্নানং। আসনং। তৈলদ্রোণী। শিরোবস্তিঃ। শয়নং। নস্যং। আতপঃ। সন্তর্পণং। বৃংহণং। কিলাটঃ। দধি। কূর্চ্চিকা। সর্পিঃ। তৈলং। বসা। মজ্জা। স্বাদ্বম্ললবণা রসাঃ। নবীনতিলগোধূমমাষাঃ। সম্বৎসরোষিতশালিষষ্টিকাঃ। কুলত্থরসঃ। সুরা। গ্রাম্যা গোহশ্বতরোষ্ট্ররাসভচ্ছাগলাদয়ঃ। আনূপাঃ কোলমহিষন্যঙ্কুখড়্গিগজাদয়ঃ। ঔদকা হংসকাদম্বচক্রমদ্গুরকাদয়ঃ। বিলেশয়া ভেকগোধানকুলশ্বাবিদাদয়ঃ। জাঙ্গলাঃ চটককুক্কুটবর্হিতিত্তিরয়ঃ। শিলিন্দঃ। পর্ব্বতঃ। নক্রঃ। গর্গরঃ। কবয়ী। ইল্লিশঃ। এরণ্ডঃ। চুলুকী। কূর্ম্মঃ। শিশুমারঃ। তিমিঙ্গিলঃ। রোহিতঃ। মদ্গুরঃ। শৃঙ্গী। বর্ম্মী। খুড্ডীশঃ। এতে ঝষাঃ। পটোলং। শিগ্রু। বার্ত্তাকুঃ। লশুনং। দাড়িমদ্বয়ং। পক্কতালং। রসালং। নলদাম্বু। পরূষকং। জম্বীরং। বদরং। দ্রাক্ষা। নাগরঙ্গং। মধূকজং। প্রসারণী। গোক্ষুরকঃ। শুক্লাক্ষী। পারিভদ্রকঃ। পয়াংসি। পয়ঃপেটী। রুবুতৈলং। গবাং জলং। মৎস্যণ্ডিকা। তাম্বূলং। ধান্যাম্লং। তিন্তিড়ীফলং। স্নিগ্ধোষ্ণভোজ্যানি। স্নিগ্ধোষ্ণানুলেপনং। আমাশয়মুপাগতে বিশেষাদ্বমনং। পক্কাশয়স্থে তথা মাংসস্থে স্নিগ্ধবিরেচনং। প্রত্যাধ্মানাধ্মানসঙ্গে বস্তিঃ লঙ্ঘনং দীপনং। অষ্ঠীলাখ্যে গুল্মবিধিঃ। শুক্রস্থে ক্ষয়জিৎক্রিয়া। ত্বঙ্মাংসাসৃক্সিরাপ্রাপ্তে রক্তমোক্ষণং ॥ * ॥ বাতরোগে অপথ্যং। চিন্তা। প্রজাগরঃ। বেগধারণং। ছর্দ্দিঃ। শ্রমঃ। অনশনং। চণকঃ। কলায়ঃ। নীবারকঙ্গুযববৈণবকোরদূষশ্যামাকচূর্ণং। কুরুবিন্দঃ। তৃণধান্যানি। রাজমাষঃ। মুদ্গঃ। তড়াগসরিদম্বু। করীরং। জম্বু। কশেরু। তলকং। ক্রমুকং। মৃণালং। নিষ্পাববীজং। তালফলাস্থিমজ্জা। শালূকং। তিন্দুকং। কঠিল্লকং। বালতালং। বিম্বী। পত্রশাকং। উড়ুম্বরং। শীতাম্বু। রাসভপয়ঃ। বিরুদ্ধমন্নং। ক্ষারঃ। শুষ্কপললং। ক্ষতজস্রুতিঃ। ক্ষৌদ্রং। কষায়কটুতিক্তরসাঃ। ব্যবায়ঃ। হস্ত্যশ্বযানং। চংক্রমণং। খট্বা। আধ্মানিনোহর্দ্দিতবতোহপি বিশেষাৎ স্নানং। প্রদুষ্টসলিলং। দন্তঘর্ষণং ॥ * ॥ অথ বাতে গুগ্গুলুসেবিনাং পথ্যং। ক্ষীরং। মাংসরসাঃ। যূষাঃ।

কলমাদিশালয়ঃ। যবগোধূমমাষাঃ ॥ * ॥ গুগ্‌গুলাবপথ্যং। ব্যায়ামঃ। আতপঃ। রূক্ষং। স্নানং। বহুভাষণং। প্রবাতঃ। মৈথুনং। যানং ॥ * ॥ অথ বাতরক্তে পথ্যং। উত্তানে অভ্যঞ্জনং সেকঃ সোপনাহঃ প্রলেপনং। গম্ভীরে স্নেহপানং আস্থাপনং বিরেচনং। সর্ব্বত্র সূচীজলৌকশৃঙ্গালাবুভিরস্রস্রুতিঃ। শতধৌতঘৃতাভ্যঙ্গঃ। মেষীদুগ্ধাবসেচনং। যবঃ। ষষ্টিকঃ। নীবারঃ। কলমঃ। অরুণশালিঃ। গোধূমঃ। চণকঃ। মুদ্গাঃ। তুবরী। মুকুষ্টকঃ। অব্যজামহিষীগবাং পয়ঃ। লাবঃ। তিত্তিরিঃ। সর্পদ্বিট্। তাম্রচূড়াদিঃ। এতে বিষ্কিরাঃ। প্রতুদাঃ শুকদাত্যূহকপোতচটকাদয়ঃ। উপোদিকা। কাকমাচী। বেত্রাগ্রং। সুনিষণ্ণকং। বাস্তূকং। কারবেল্লং। তণ্ডুলীয়ঃ। প্রসারণী। পত্তুরঃ। বৃদ্ধকুষ্মাণ্ডং। সর্পিঃ। সম্পাকপল্লবং। পটোলং। রুবুতৈলং। মৃদ্বীকা। শ্বেতশর্করা। নবনীতং। সোমবল্লী। কস্তুরী। সিতচন্দনং। শিংশপাগুরুদেবাহ্বসরলস্নেহমর্দ্দনং। তিক্তং ॥ * ॥ বাতরক্তে অপথ্যং। দিবাস্বপ্নঃ। অগ্নিসন্তাপঃ। ব্যায়ামঃ। আতপঃ। মৈথুনং। মাষঃ। কুলত্থঃ। নিষ্পাবঃ। কলায়ঃ। ক্ষারসেবনং। অম্বুজানূপমাংসানি। বিরুদ্ধানি। দধীনি। ইক্ষুঃ। মূলকং। মদ্যং। পিণ্যাকং। অম্লং। কাঞ্জিকং। কটু। উষ্ণং। গুরু। অভিষ্যন্দি। লবণং। শক্তবঃ ॥ * ॥ অথোরুস্তম্ভে পথ্যং।

সর্ব্বো রূক্ষবিধিঃ। স্বেদঃ। কোদ্রবঃ। রক্তশালিঃ। যবঃ। কুলত্থঃ। শ্যামাকঃ। পুরাতনোদ্দালাঃ। শোভাঞ্জনং। কারবেল্লং। পটোলং। লশুনং। সুনিষণ্ণং। কাকমাচী। বেত্রাগ্রং। নিম্বপল্লবং। পত্তুরঃ। বাস্তূকং। পথ্যা। বার্ত্তাকুঃ তপ্তবারি। সম্পাকশাকং। পিণ্যাকং। তক্রং। অরিষ্টং। মধু। কটুঃ। তিক্তঃ। কষায়ঃ। ক্ষীরসেবা। গবাং জলং। যথাশক্তিব্যায়ামঃ। স্থূলস্থাক্রমণং। অচ্ছহ্রদে সন্তরণং। নদীষু প্রতিস্রোতঃ সন্তরণং। শ্লেষ্মাপহরণং। অমারুতকোপনং ॥ * ॥ ঊরুস্তম্ভে অপথ্যং। গুরুশীতদ্রবস্নিগ্ধবিরুদ্ধাসাত্ম্যভোজনং। বিরেচনং। স্নেহনং। বমনং। রক্তমোক্ষণং। বস্তিঃ ॥ * ॥ অথামবাতে পথ্যং। রূক্ষস্বেদঃ। লঙ্ঘনং। স্নেহপানং। বস্তিঃ। লেপঃ। রেচনং। পায়ুবর্ত্তিঃ। অব্দোৎপন্নশালিকুলত্থাঃ। জীর্ণং মদ্যং। জাঙ্গলানাং রসঃ। বাতশ্লেষ্মঘ্নানি সর্ব্বাণি। তক্রং। বর্ষাভূঃ। এরণ্ডতৈলং। রসোনং। পটোলং। পত্তুরকং। কারবেল্লং। বার্ত্তাকুঃ। শিগ্রু। তপ্তনীরং। মন্দারঃ। গোকণ্টকঃ। বৃদ্ধদারঃ। ভল্লাতকং। গোজলং। আর্দ্রকং। কটূনি। তিক্তানি। দীপনানি ॥ * ॥ আমবাতে অপথ্যং। দধি। মৎস্যঃ। গুড়ঃ। ক্ষীরং। উপোদিকা। মাষঃ। পিষ্টকং। দুষ্টনীরং। পূর্ব্ববাতঃ। বিরুদ্ধাশনং। অসাত্ম্যং। বেগরোধঃ। জাগরঃ। বিষমাশনং ॥ * ॥ অথ শূলে পথ্যং। ছর্দ্দিঃ।

স্বেদঃ। লঙ্ঘনং। পায়ুবর্ত্তিঃ। বস্তিঃ। নিদ্রা। রেচনং। পাচনং। অব্দোৎপন্নাঃ শালয়ঃ। বাট্যমণ্ডঃ। তপ্তক্ষীরং। জাঙ্গলানাং রসঃ। পটোলং। শোভাঞ্জনং। কারবেল্লং। বার্ত্তাকুঃ। পক্কাম্রং। দ্রাক্ষা। কপিত্থং। রুচকং। পিয়ালং। শালিঞ্চপত্রাণি। বাস্তুকং। সামুদ্রং। সৌবর্চ্চলং। হিঙ্গু। বিশ্বং। বিড়ং। শতাহ্বা। লশুনং। লবঙ্গং। এরণ্ডতৈলং। সুরভীজলং। তপ্তাম্বু। জম্বীররসঃ। কুষ্ঠং। লঘূনি। ক্ষাররজাংসি ॥ * ॥ শূলে অপথ্যং। বিরুদ্ধান্নপানং। জাগরঃ। বিষমাশনং। রূক্ষতিক্তকষায়াণি। শীতলানি। গুরূণি। ব্যায়ামঃ। মৈথুনং। মদ্যং। বৈদলং। লবণং। কটু। বেগরোধঃ। শোকঃ ক্রোধঃ ॥*॥ অথোদাবর্ত্তানাহয়োঃ পথ্যং নারিকেলপুষ্পমিশ্রিতশীতলোদকপানং। স্নেহস্বেদঃ। বিরেকঃ। বস্তিঃ। ফলবর্ত্তিঃ। অভ্যঙ্গঃ। যবঃ। সৃষ্টবিণ্মূত্রমারুতঃ। গ্রাম্যোদকং। আনূপরসঃ। রুবুতৈলং। বারুণী। বালমূলকং। সম্পাকঃ। ত্রিবৃৎ। তিলঃ। সুধাদলং। শৃঙ্গবেরং। মাতুলুঙ্গং। যবক্ষারঃ। হরীতকী। লবঙ্গং। রামঠং। দ্রাক্ষা। গোমূত্রং। লবণানি। অধোবাতসমুত্থে তু। স্নেহঃ। স্বেদঃ। বর্ত্তিঃ। বস্তিঃ। সমীরণহরান্নপানং। তথা পুরীষজে। বস্তিঃ। স্বেদঃ। অভ্যঙ্গঃ। অবগাহনং। ফলবর্ত্তিঃ। বিড়্ভেদ্যশনপানং। মূত্রবেগসমুৎপন্নে। ত্রিবিধং বস্তিকর্ম্ম স্বেদঃ। অভ্যঙ্গঃ। অবগাহঃ। সর্পিষাবপীড়নং। উদ্গারোত্থে হিক্কাঘ্নবিধিঃ। কাসজে কাসজিদ্বিধিঃ। ক্ষবজে স্বেদনং। ধূমঃ। ঔত্তরভক্তিকঘৃতং। ক্ষবপ্রবর্ত্তননস্যং। ঊর্দ্ধজত্রুকাভ্যঙ্গঃ। তৃষ্ণোত্থে শীতান্নপানং। জৃম্ভোত্থে বাতজিৎক্রিয়া। নিদ্রাবেগোত্থিতে ক্ষীরং। স্বপ্নসংবাহনং। বুভুক্ষোত্থে স্নিগ্ধাল্পোষ্ণলঘুভোজনং। বাষ্পজে বাষ্পসংমোক্ষঃ। স্বপ্নঃ। মদ্যং। প্রিয়কথা। শ্রমশ্বাসসমুৎপন্নে বিশ্রামঃ। বাতহারিদ্রব্যং। শুক্রোত্থে বস্তিঃ। অভ্যঙ্গঃ। অবগাহঃ। চরণায়ুধঃ। শালিঃ। মদিরা। ক্ষীরং। যৌবনগর্ব্বিতপ্রিয়া। ছর্দ্দ্যুত্থে লঙ্ঘনং। ধূমঃ। ভুক্ত্বা প্রচ্ছর্দ্দনং। শ্রমঃ। রূক্ষান্নপানং। বিরেকঃ। রক্তমোক্ষণং ॥ * ॥ উদাবর্ত্তানাহয়োরপথ্যং। বমনং। বেগরোধঃ। শমীধান্যং। কোদ্রবঃ। নালীচশাকং। শালূকং। জাম্ববং। কর্কটীফলং। পিণ্যাকং। সর্ব্বমালুকং। করীরঃ। পিষ্টবৈকৃতং। বিষ্টম্ভীনি। বিরুদ্ধানি। কষায়াণি। গুরূণি॥*॥ অথ গুল্মে পথ্যং। স্নেহস্বেদঃ। বিরেকঃ। বস্তিঃ। বাহুসিরাব্যধঃ। লঙ্ঘনং। বর্ত্তিঃ। অভ্যঙ্গঃ। স্নেহঃ। পক্কে তু পাটনং। সম্বৎসরসমুৎপন্নকলায়রক্তশালয়ঃ। খড়ঃ। কুলত্থযূষঃ। ধন্বমাংসরসঃ। সুরা। গবাজয়োঃ পয়ঃ। মৃদ্বীকা। পরূষকং। খর্জ্জূরং। দাড়িমং। ধাত্রী। নাগরঙ্গং অম্লবেতসং। তক্রং। এরণ্ডতৈলং লশুনং। বালমূলকং। পত্তুরঃ। বাস্তূকং। শিগ্রু। যবক্ষারঃ। হরীতকী

রামঠং। মাতুলুঙ্গং। ত্র্যূষণং। সুরভী-জলং। স্নিগ্ধোষ্ণবৃংহণলঘুদীপনাম্নানি। বাতানুলোমনং ॥ * ॥ গুল্মে অপথ্যং। সর্ব্বং বাতকারি। বিরুদ্ধাশনং। বল্লুরং। মূলকং। মৎস্যঃ। মধুরফলং। শুষ্কশাকং। শম্বীধান্যং। বিষ্টম্ভীনি। গুরূণি। অধোবাতশকৃন্মূত্রশ্রমশ্বাসাশ্রুধারণং। বমনং। জলপানং ॥ * ॥ অথ হৃদ্রোগে পথ্যং। স্বেদঃ। বিরেকঃ। বমনং। লঙ্ঘনং। বস্তিঃ। বিলেপী। পুরাতনরক্তশালয়ঃ। জাঙ্গলমৃগপক্ষিযূষাঃ। মুদ্গকুলত্থরসাঃ। রাগাঃ। খড়াঃ। কাম্বলিকাঃ। ষাড়বাঃ। ভব্যং। পটোলং। কদলীফলং। পুরাণকুষ্মাণ্ডং। রসালং। দাড়িমং। সম্পাকশাকং। নবমূলকং। এরণ্ডতৈলং। গগনাম্বু। সৈন্ধবং। দ্রাক্ষা। তক্রং। পুরাতনগুড়ঃ। শুণ্ঠী। যমানী। লশুনং। হরীতকী। কুষ্ঠং। কুস্তুম্বুরু। কৃষ্ণং। আর্দ্রকং। সৌবীরং। শুক্তং। মধু। বারুণীরসঃ। কস্তূরিকা। চন্দনং। প্রপানকং। তাম্বূলং ॥ * ॥ হৃদ্রোগে অপথ্যং। তৃট্ছর্দ্দিমূত্রানিলশুক্রকাসোদ্গারশ্রমশ্বাসবিড়শ্রূণাং বেগধারণং। সহ্যাদ্রিবিন্ধ্যাদ্রিনদীনাং জলং। মেষীপয়ঃ। দুষ্টজলং। কষায়ঃ। বিরুদ্ধং। উষ্ণং। গুরু। তিক্তঃ। অম্লঃ। চিরন্তনপত্রোত্থশাকানি। ক্ষারঃ। মধূকং। দন্তকাষ্ঠং। রক্তস্রুতিঃ ॥ * ॥ অথ মূত্রকৃচ্ছ্রে পথ্যং। বাতোদ্ভবে অভ্যঙ্গঃ। নিরূহঃ। বস্তিঃ। স্নেহঃ। অবগাহঃ। উত্তরবস্তিঃ। সেকঃ। পৈত্তে অবগাহঃ। শিশিরপ্রদেহঃ। গ্রৈষ্মো বিধিঃ। বস্তিবিধিঃ। বিরেকঃ। শ্লেষ্মোদ্ভবে স্বেদঃ। বিরেকঃ। বস্তিঃ। ক্ষারঃ। যবান্নং। তীক্ষ্ণং। উষ্ণং। ত্রিদোষজে অভ্যঙ্গপুরঃসরাণি ত্রিমর্গোদিতানি সর্ব্বাণ্যমূনি। যথা যথা দোষময়ং গণঃ। পুরাতনলোহিতশালিঃ। গোভবতক্রপয়োদধীনি। ধন্বামিষং। মুদ্গরসঃ। সিতা। পুরাণকুষ্মাণ্ডফলং। পটোলং। মহার্দ্রকং। গোক্ষুরকঃ। কুমারী। গুবাকখর্জ্জূরনারিকেলতালদ্রুমাণাং শিরাংসি। পথ্যা। তালাস্থিমজ্জা। ত্রপুষং। ক্রুটিঃ। শীতপানং। শীতাশনং। প্রনীরনীরং। হিমবালুকা ॥ * ॥ মূত্রকৃচ্ছ্রে অপথ্যং। মদ্যং। শ্রমঃ। নিধুবনং। গজবাজিযানং। সর্ব্বং বিরুদ্ধাশনং। বিষমাশনং। তাম্বূলং। মৎস্যঃ। লবণং। আর্দ্রকং। তৈলভৃষ্টং। পিণ্যাকং। হিঙ্গু। তিলঃ। সর্ষপঃ। বেগরোধঃ। মাষঃ। করীরঃ। অতিতীক্ষ্ণং। বিদাহি। রূক্ষং। অম্লঃ ॥ * ॥ অথ মূত্রাঘাতে পথ্যং। অভ্যঞ্জনং। স্নেহঃ। বিরেকঃ। বস্তিঃ। স্বেদঃ। অবগাহঃ। উত্তরবস্তিঃ। পুরাতনলোহিতশালিঃ। ধন্বভবমাংসং। মদ্যং। তক্রং। পয়ঃ। দধি। মাষযূষঃ। পুরাণকুষ্মাণ্ডফলং। পটোলং। মহার্দ্রকং। তালফলাস্থিমজ্জা। হরীতকী। কোমলনারিকেলং। গুবাকখর্জ্জূরনারিকেলতালদ্রুমাণাং মস্তকানি ॥ * ॥ মূত্রাঘাতে অপথ্যং। সর্ব্বাণি বিরুদ্ধানি। ব্যায়ামঃ। মার্গঃ। শীতলং। রূক্ষং। বিদাহি। বিষ্টম্ভি। ব্যবায়ঃ। বেগধারণং।

করীরং। বমনং ॥*॥ অথাশ্মর্য্যাং পথ্যং। বস্তিঃ। বিরেকঃ। বমনং। লঙ্ঘনং। স্বেদঃ। অবগাহঃ। বারিসেচনং। যবাঃ। কুলথাঃ। প্রপুরাণশালয়ঃ। মদ্যং। ধন্বাগুজসম্ভবরসঃ। পুরাণকুষ্মাণ্ডফলং। কশেরুকং। গোকণ্টকঃ। বারুণশাকং। আর্দ্রকং। পাষাণভেদী। যবশূকঃ। রেণুঃ। ছিন্না। অশ্মনাং সমাকর্ষণং ॥*॥ অশ্মর্য্যাং অপথ্যং। মূত্রস্য শুক্রস্য চ বেগধারণং। অম্লঃ। বিষ্টম্ভি। রূক্ষং। গুর্ব্বন্নপানং। বিরুদ্ধপানাশনং ॥*॥ অথ প্রমেহে পথ্যং। পূর্ব্বং লঙ্ঘনং। বমনং। বিরেচনং। প্রোদ্বর্ত্তনং। শমনং। দীপনং। নীবারঃ। কঙ্গুঃ। যবঃ। বৈণবঃ। কোরদূষঃ। শ্যামাকঃ। জূর্ণঃ। কুরুবিল্বঃ। মুকুষ্টকঃ। গোধূমঃ। শালিঃ। কলমঃ। পুরাতনকুলথঃ। মুদ্গাঢ়কীচণকযূষরসাঃ। তিলাঃ। লাজাঃ। পুরাতনসুরা। মধু। বাট্যমণ্ডঃ। তক্রং। রাসভজলং। মহিষীজলং। কহ্বঃ। জাঙ্গলাঃ কপোতশশতিত্তিরিলাববর্হিভৃঙ্গেণবর্ত্তকশুকাদয়ঃ। শোভাঞ্জনং। কুলকং। কঠিল্লকং। কর্কোটকং। তলকং। বার্হতং। ঔড়ুম্বরং। লশুনং। নবীনমোচং। পত্তূরং। গোক্ষুরকং। মূষিকপর্ণিশাকং। মন্দারপত্রং। অমৃতা। ত্রিফলা। কপিত্থং। জম্বুঃ। কশেরু। কমলোৎপলকন্দবীজং। খর্জ্জুরলাঙ্গলিকতালতরূণাং মস্তকং। ব্যোষং। তিন্দুকফলং। খদিরঃ। কলিঙ্গঃ। তিক্তঃ। কষায়ঃ। হস্ত্যশ্ববাহনং। অতিভ্রমণং। রবিকিরণঃ। ব্যায়ামঃ ॥ * ॥

প্রমেহে অপথ্যং। মূত্রবেগঃ। ধূমপানং। স্বেদঃ। রক্তমোক্ষণং। সদাসনং। দিবানিদ্রা। নবান্নং। দধি। আনূপমাংসং। নিষ্পাবং। পিষ্টান্নং। মৈথুনং। সৌবীরকং। সুরা। শুক্তং। তৈলং। ক্ষীরং। ঘৃতং। গুড়ঃ। তুম্বী। তালাস্থিমজ্জা। বিরুদ্ধাশনং। কুষ্মাণ্ডং। ইক্ষুঃ। দুষ্টাম্বু। স্বাদু। অম্লঃ। লবণং। অভিষ্যন্দি ॥*॥ অথ মেদসি পথ্যং। চিন্তা। শ্রমঃ। জাগরণং। ব্যবায়ঃ। প্রোদ্বর্ত্তনং। লঙ্ঘনং। আতপঃ। হস্ত্যশ্বযানং। ভ্রমণং। বিরেকঃ। প্রচ্ছর্দ্দনং। অপতর্পণং। পুরাতনা বৈণবকোরদূষশ্যামাকনীবারপ্রিয়ঙ্গুজুর্ণাঃ। যবঃ। কুলত্থঃ। চণকঃ। মসূরঃ। মুদ্গঃ। তুবরী। মধু। লাজাঃ। কটুতিক্তকষায়াণি। তক্রং। সুরা। চিঙ্গটমৎস্যঃ। দগ্ধবার্ত্তাকুঃ। ফলত্রয়ং। যবাসকং। শিরীষলোধ্রহরীতকীনাং চূর্ণেন গাত্রবিলেপনং। কটুত্রয়ং। সর্ষপতৈলং। এলা। সর্ব্বাণি রূক্ষাণি। মুখ্যতৈলং। পত্রশাকঃ। অগুরুলেপনং। প্রতপ্তনীরাণি। শিলাজতুনি। ভোজনাৎ প্রাক্ বারিপানং ॥ * ॥ মেদসি অপথ্যং। স্নানং। রসায়নং। শালিঃ। গোধূমঃ। সুখশীলতা। ক্ষীরং। ইক্ষুবিকৃতিঃ। মাষঃ। সৌহিত্যং। স্বেদনানি। মৎস্যঃ। মাংসং। দিবানিদ্রা। স্রক্। গন্ধঃ। মধুরাণি। সমগ্রভোজনস্য পশ্চাৎ জলপানং। অতিমাত্রোপচিতে বিশেষাদ্বমনক্রিয়া ॥*॥ অথোদররোগে পথ্যং। বিরেচনং। লঙ্ঘনং। অব্দসম্ভবকুলত্থমুদ্গারুণশালি-

যবাঃ। জাঙ্গলমৃগপক্ষিণঃ। সিতা। সুরা। মাক্ষিকং। সীধুঃ। মাধ্বীকং। ষাড়বঃ। তক্রং। রসোনং। রুবুতৈলং। আর্দ্রকং। শালিঞ্চশাকং। কুলকং। ক পুনর্নবা। শিগ্রুফলং। হরীতকী। তাম্বূলং। এলা। যবশূকং। আয়সং। অজাগবোষ্ট্রী-মহিষীণাং পয়ঃ মূত্রঞ্চ। লঘূনি। তিক্তানি। দীপনানি। বস্ত্রেণ সম্বেষ্টনং। অগ্নিকর্ম্ম। বিষপ্রয়োগঃ। বিশেষতঃ প্লীহসমুদ্ভবে বামে অগ্রবাহৌ ধমনীব্যধঃ। বদ্ধাহ্বয়ে উদকজে ক্ষতোত্থিতে নাভেরধঃ যথাবিধি-শস্ত্রবিধিঃ। সমীরণোত্থে আদিতঃ ঘৃত-পানং। অভ্যঞ্জনং। অনুবাসনং ॥ * ॥ উদররোগে অপথ্যং। সস্নেহনং। ধূম-পানং। জলপানং। সিরাব্যধঃ। ছর্দ্দিঃ। যানং। দিবানিদ্রা। ব্যায়ামঃ। পিষ্ট-বৈকৃতং। ঔদকানূপমাংসং। পত্রশাকং। তিলঃ। উষ্ণানি। বিদাহীনি। লবণাশনং। শমীধান্যং। বিরুদ্ধান্নং। দুষ্টনীরং। গুরূণি। মহেন্দ্রগিরিজাতানাং নদীনাং জলং। বিষ্টম্ভীনি। ছিদ্রসমুদ্ভবে বিশে-ষতঃ স্বেদঃ ॥ * ॥ অথ শোথে পথ্যং। সংশোধনং। লঙ্ঘনং। অস্র-মোক্ষঃ। স্বেদঃ। প্রলেপঃ। পরিষেচনং। পুরাতনশালিযবকুলত্থমুদ্গাঃ। গোধা। শল্লকঃ। ভুজঙ্গভুকৃতিত্তিরিতাম্রচূড়লাবা-দয়ো জাঙ্গলবিষ্কিরাঃ। কূর্ম্মঃ। শৃঙ্গী। প্রপুরাণসর্পিঃ। তক্রং। সুরা। মাক্ষিকং। আসবঃ। নিষ্পাবঃ। কঠিল্লকং। রক্ত-শিগ্রু। রসোনং। কর্কোটকং। মানমূলং। সুবর্চ্চলা। গৃঞ্জনকঃ। পটোলং। বেত্রাগ্রং। বাড়িঙ্গনং। মূলকং। পুনর্নবা। চিত্রকং। পারিভদ্রঃ। শ্রীপর্ণং। নিম্বঃ। ক্ষুরপল্লবং। এরণ্ডতৈলং। কটুকা। হরিদ্রা। হরীতকী। ক্ষারনিষেবণং। ভল্লাতকং। গুগ্গুলুঃ। আয়সং। কটূনি। তিক্তানি। দীপনানি। গোঽজামহিষীভবমূত্রাণি। কস্তূরিকা। শিলাজতু। পাণ্ডুরোগোক্তবহ্নিকর্ম্ম ॥ * ॥ শোথে অপথ্যং। পবনসলিলং। বেগ-রোধঃ। বিরুদ্ধপানাশনং। বিষমাশনং। মৃদ্ভক্ষণং। গ্রাম্যাজ্জানূপে পিশিতলবণে। শুষ্কশাকং। নবান্নং। গৌড়ং। পিষ্টান্নং। দধি। কৃশরং। বিজ্জলং। মদ্যং। অম্লং। ধানাঃ। বল্লূরং। গুরু। অসাত্ম্যং। বিদাহি। অরাত্রৌ স্বপ্নঃ। মৈথুনং ॥ * ॥ অথ বৃদ্ধিব্রধ্নাধিকারে পথ্যং। সংশো-ধনং। বস্তিঃ। অস্থিমোক্ষঃ। স্বেদঃ। প্রলেপঃ। অরুণশালয়ঃ। এরণ্ডতৈলং। সুরভীজলং। ধন্বামিষং। শিগ্রুফলং। পটোলং। পুনর্নবা। গোক্ষুরঃ। অগ্নিমন্থঃ। তাম্বূলং। পথ্যা। সরলা। রসোনং। বাড়িঙ্গনং। গৃঞ্জনকং। মধূনি। কৌস্তং ঘৃতং। তপ্তজলং। তক্রং। আমবাতা-পহমগ্নিকারি চাম্লপানং। পুরাণসুরা। অর্দ্ধেন্দুবদ্বংক্ষণয়োর্দ্দাহঃ। আমাশয়ে বাহু-শিরাব্যধঃ ॥ * ॥ ব্রধ্নবৃদ্ধ্যাবপথ্যং। বিরুদ্ধ-পানান্নং। অসাত্ম্যসেবা। সংক্ষোভণং। হস্তিহয়াদিযানং। আনূপমাংসানি। দধীনি। মাষাঃ। দুগ্ধানি। পিষ্টান্নং। উপোদিকা। গুরূণি। শুক্রোত্থিতবেগ-

রোধঃ ॥ * ॥ অথ গলগণ্ডাদৌ পথ্যং ছর্দ্দিঃ। বিরেচনং। নস্যং। স্বেদঃ। ধূমঃ শিরাব্যধঃ। অগ্নিকর্ম্ম। ক্ষারযোগঃ প্রলেপঃ। লঙ্ঘনং। পুরাণঘৃতপানং। জীর্ণলোহিতশালয়ঃ। যবাঃ। মুদ্গাঃ। পটোলং। রক্তশিগ্রু। কঠিল্লকং। শালিঞ্চ-শাকং। বেত্রাগ্রং। রূক্ষাণি। কটূনি। সর্ব্বাণি দীপনানি। গুগ্গুলুঃ। শিলাজতু। বিশেষতঃ জিহ্বাতলস্থসিরাদ্বয়-চ্ছেদঃ। মণিবন্ধোর্দ্ধং অঙ্গুলান্তরাস্তিস্রো রেখাঃ কার্য্যাঃ। গলগণ্ডগণ্ডমালাপচী-গ্রন্থ্যর্ব্বুদাতুরে যথাদোষং যথাবস্থং এতৎ সর্ব্বং পথ্যং ॥ * ॥ গলগণ্ডে অপথ্যং। সর্ব্বক্ষীরেক্ষুবিকৃতিঃ। আনূপমাংসং। পিষ্টান্নং। অম্লং। মধুরং। গুরুদ্রব্যং। অভিষ্যন্দিদ্রব্যং ॥*॥ অথ শ্লীপদে পথ্যং। প্রচ্ছর্দ্দনং। লঙ্ঘনং। অস্রমোক্ষঃ। স্বেদঃ। বিরেকঃ। পরিলেপনং। পুরাতনষষ্টিক-শালয়ঃ। যবাঃ। কুলত্থাঃ। লশুনং। পটোলং। বার্ত্তাকুঃ। শোভাঞ্জনং। কারবেল্লং। পুনর্নবা। মূলকং। পূতিকা। এরণ্ডতৈলং। সুরভীজলং। কটূনি। তিক্তানি। দীপনানি। বাতোদ্ভবে গুল্‌ফোপরিষ্টাৎ চতুরঙ্গুলে সিরাব্যধঃ। পৈত্তিকে গুল্‌ফতলে শিরাব্যধঃ। কফজে অঙ্গুষ্ঠমূলে সিরাব্যধঃ ॥ * ॥ শ্লীপদে অপথ্যং। পিষ্টান্নং। দুগ্ধবিকৃতং। গুড়ঃ। আনূপমাংসং। স্বাদুরসঃ। পারিপাত্রসহ্যবিন্ধ্য-নদীজলং। পিচ্ছিলং। গুরুদ্রব্যং। অভিষ্যন্দিদ্রব্যং ॥ * ॥ অথ বিদ্রধৌ পথ্যং।

আমাবস্থে রেচনলেপস্বেদাস্রমোক্ষণানি। জীর্ণশ্যামাককলমৌ। কুলত্থঃ। লশুনং। রক্তশিগ্রু। নিষ্পাবঃ। কারবেল্লঃ। পুনর্নবা। শ্রীপর্ণী। চিত্রকং। ক্ষৌদ্রং। শোথোক্তানি সর্ব্বাণি। পক্বাবস্থে শস্ত্রকর্ম্ম। পুরাণরক্তশালিঃ। ঘৃতং। তৈলং। মুদ্গরসঃ। বিলেপী। ধন্বজরসাঃ। শালিঞ্চশাকং। কদলং। পটোলং। হিমবালুকা। চন্দনং। তপ্তাম্বু। শীতাম্বু। ব্রণোদিতং সর্ব্বং ॥ * ॥ বিদ্রধাবপথ্যং। আমাবস্থে শোথোক্তান্যপথ্যানি। পক্বাবস্থে ব্রণোক্তান্যপথ্যানি ॥ * ॥ অথ ব্রণশোথব্রণ-সদ্যোব্রণনাড়ীব্রণেষু পথ্যং। বিম্লাপনং। রক্তমুক্তিঃ। উপনাহঃ। বিপাটনং। শোধনং। রোপণং। পুরাণসিতশালয়ঃ। যবঃ। ষষ্টিকঃ। গোধূমঃ। জাঙ্গলমৃগ-পক্ষিণঃ। বিলেপী। লাজমণ্ডঃ। কটুতৈলং। ঘৃতং। মধু। তৈলং। মসূরং। তুবরী। মুদ্গযূষঃ। শর্করা। আষাঢ়ফলং। বার্ত্তাকুঃ। কর্কোটকং। পটোলং। কারবেল্লং। নিম্বপত্রং। বেত্রাগ্রং। বালমূলকং। সুনিষণ্ণকং। শালিঞ্চশাকং। তণ্ডুলীয়ঃ। বাস্তূকং। ত্রিফলা। পনসং। চোচং। দাড়িমং। কটুকাফলং। জীবন্তী। সৈন্ধবং। দ্রাক্ষা। স্বাদুতিক্তকষায়াঃ। স্নিগ্ধোষ্ণদ্রবোত্তরান্নং। এষণং। শমনং। দাহঃ। স্বেদনং। বন্ধনক্রিয়া। ব্রণাবচূর্ণনং। লেপঃ। ধূপনং। পত্রধারণং। উশীরং। বালব্যজনং। চন্দনং। তিললেপনং। তপ্তশীতাম্বু। কর্পূরং। পক্বতঃ

পরা বৈকৃতাঃ ॥ * ॥ ব্রণশোথব্রণসদ্যো-ব্রণনাড়ীব্রণেষু অপথ্যং। নবধান্যং। তিলঃ। কলায়ঃ। মাষঃ। কুলত্থঃ। কৃষরঃ। হিমাম্বুঃ। বিবিধক্ষীরেক্ষুবিকারঃ। অম্লানি। পত্রশাকং। অজাঙ্গলমাংসং। অসাত্ম্যমন্নং। বিদাহি। বিষ্টম্ভি। গুরূণি। কটু। অম্লং। শীতং। লবণং। ব্যবায়ঃ। ব্যায়ামঃ। উচ্চৈঃ পরিভাষণং। প্রিয়া-সমালোকনং। অহ্নি নিদ্রা। প্রজাগরং। নিতান্তচংক্রমণং। যথাস্থিতং প্রাগধি-রোপণং। নস্যং। তাম্বূলং। অজীর্ণতা। প্রচণ্ডবাতঃ। আতপঃ। ধূমঃ। বৃষ্টিঃ। রজঃ। ভয়ং। ক্রোধঃ। বমিঃ। প্রহর্ষঃ। শোকঃ। বিরুদ্ধাশনং। অম্বুপানং। তীক্ষ্ণং। উষ্ণং। রূক্ষং। বিঘট্টনং। কণ্ডূয়নং। কাষ্ঠনখাদিতোদঃ। নিরন্নভাবঃ। বিষমোপ-চারঃ ॥ * ॥ অথ ভগ্নে পথ্যং। শীতাম্বু। চন্দনং। পঙ্কপ্রদেহঃ। বন্ধনক্রিয়া। শালিঃ। প্রিয়ঙ্গুঃ। গোধূমঃ। মুদ্গসতী-লয়োর্যূষঃ। নবনীতং। ঘৃতং। ক্ষীরং। তৈলং। মাংসরসঃ। মধু। পটোলং। লশুনং। শিগ্রু। পত্তূরং। বালমূলকং। দ্রাক্ষা। ধাত্রী। বজ্রবল্লী। লাক্ষা। বৃংহণং ॥ * ॥ ভগ্নে অপথ্যং। লবণং। কটুকং। ক্ষারঃ। অম্লঃ। মৈথুনং। আতপঃ। ব্যায়ামঃ। রূক্ষান্নং ॥ * ॥ অথ ভগন্দরে পথ্যং। আমে সংশোধনং। লেপঃ। লঙ্ঘনং। রক্তমোক্ষণং। পক্বে যথাবিধিশস্ত্রবহ্নিক্ষারকর্ম্মাণি। সর্ষপঃ। শালিঃ। মুদ্গঃ। বিলেপী। জাঙ্গলরসঃ। পটোলং। শিগ্রু। বেত্রাগ্রং। পত্তূরং। বালমূলকং। তিলসর্ষপয়োস্তৈলং। তিক্ত-বর্গঃ। ঘৃতং। মধু ॥ * ॥ ভগন্দরে অপথ্যং। বিরুদ্ধান্নপানানি। বিষমাশনং। আতপঃ। ব্যায়ামঃ। মৈথুনং। যুদ্ধং। পৃষ্ঠযানং। গুরূণি। রূঢ়ব্রণোঽপি নরঃ সম্বৎসরং এতৎ সর্ব্বং পরিহরেৎ ॥ * ॥ অথোপ-দংশে পথ্যং। ছর্দ্দিঃ। বিরেকঃ। ধ্বজ-মধ্যনাড়ীবেধঃ। জলৌকা। পরিপাতনং। সেকঃ। প্রলেপঃ। যবঃ। শালয়ঃ। ধন্বা-মিষং। মুদ্গরসঃ। ঘৃতং। কঠিল্লকং। শিগ্রুফলং। পটোলং। শালিঞ্চশাকং। নবমূলকং। তিক্তং। কষায়ং। মধু। কূপবারি। তৈলং ॥ * ॥ উপদংশে অপথ্যং। দিবানিদ্রা। মূত্রবেগঃ। গুর্ব্বন্নং। মৈথুনং। গুড়ঃ। আয়াসঃ। অম্লং। তক্রং ॥ * ॥ অথ শূকদোষে পথ্যং। লেপঃ। বিরেকঃ। অসৃঙ্মোক্ষঃ। সর্পিঃপানং। শালিঃ। যবঃ। জাঙ্গল-মাংসং। মুদ্গযূষঃ। কঠিল্লকং। পটোলং। শিগ্রু। কর্কোটং। পত্তূরং। বালমূলকং। বেত্রাগ্রং। আষাঢ়ফলং। দাড়িমং। সৈন্ধবং। বচা। কূপোদকং। গন্ধসারঃ। তুবরী। হিমবালুকা। তক্রং। কষায়ং। তৈলং ॥ * ॥ শূকদোষে অপথ্যং। মূত্র-বেগঃ। দিবানিদ্রা। ব্যায়ামঃ। মৈথুনং। গুড়ঃ। বিদাহি। গুরুদ্রব্যং। তক্রং ॥ * ॥ অথ কুষ্ঠরোগে পথ্যং। পক্ষাৎ পক্ষাৎ ছর্দ্দনং। মাসাৎ মাসাদ্বিরেচনং। ত্র্যহাৎ ত্র্যহাৎ নস্যং। ষষ্ঠে ষষ্ঠে মাসি

অস্রমোক্ষণং। সর্পির্লেপঃ। পুরাণাঃ যব-গোধূমশালিমুদ্গাঢ়কীমসূরাঃ। মাক্ষিকং। জাঙ্গলামিষং। আষাঢ়ফলং। বেত্রাগ্রং। পটোলং। বৃহতীফলং। কাকমাচী। নিম্বপত্রং। লশুনং। হিলমোচিকা। পুনর্নবা। মেষশৃঙ্গং। চক্রমর্দ্দদলং। ভল্লাতকং। পক্বতালং। খদিরঃ। চিত্রকঃ। বরা। জাতীফলং। নাগপুষ্পং। কুঙ্কুমং। প্রতনহবিঃ। কোষাতকী। করঞ্জোম্য-তিলসর্ষপনিম্বেঙ্গুদীভবতৈলং। লঘূনি অন্নানি। সরলদেবাহ্বশিংশপাগুরুসম্ভব-স্নেহঃ। গোখরোষ্ট্রাশ্বমহিষীণাং মূত্রাণি। কস্তূরিকা। গন্ধসারঃ। তিক্তানি। ক্ষার-কর্ম্ম ॥ * ॥ কুষ্ঠরোগে অপথ্যং। পাপ-কর্ম্ম। কৃতঘ্নভাবঃ। গুরুনিন্দা। গুরু-ধর্ষণং। বিরুদ্ধপানাশনং। দিবানিদ্রা। চণ্ডাংশুতাপঃ। বিষমাশনং। স্বেদঃ। রতং। বেগরোধঃ। ইক্ষুঃ। ব্যায়ামঃ। অম্লং। তিলঃ। মাষঃ। দ্রবগুরুনবান্নানাং ভোজনং। বিদাহি। বিষ্টম্ভি। মূলকং। সহ্যাদ্রিবিন্ধ্যাদ্রিসমুদ্ভবনদীজলং। আনূপ-মাংসং। দধি। দুগ্ধং। মদ্যং। গুড়ঃ ॥*॥ অথ শীতপিত্তোদর্দ্দকোঠরোগেষু পথ্যং। ছর্দ্দিঃ। বিরেচনং। লেপঃ। অসৃঙ্মোক্ষঃ। পুরাণশালিঃ। জাঙ্গলামিষমুদ্গকুলত্থানাং যূষঃ। কর্কোটকং। কারবেল্লং। শিগ্রু। মূলকপোতিকা। শালিঞ্চশাকং। বেত্রাগ্রং। দাড়িমং। ত্রিফলা। মধু। কটুতৈলং। তপ্তনীরং। পিত্তশ্লেষ্মহর-দ্রব্যং। সর্ব্বকটুতিক্তকষায়াণি ॥ * ॥

শীতপিত্তাদাবপথ্যং। বিবিধক্ষীরেক্ষু-বিকারঃ। মৎস্যঃ। উদকানূপভবামিষং। নবীনমদ্যং। বমিবেগরোধঃ। প্রাগ্দক্ষিণাশা-পবনঃ। অহ্নি নিদ্রা। স্নানং। বিরুদ্ধা-শনং। আতপঃ। স্নিগ্ধং। অম্লং। মধুরং। কষায়ঃ। গুর্ব্বন্নপানানি ॥ * ॥ অথাম্ল-পিত্তে পথ্যং। ঊর্দ্ধগে পূর্ব্বং বমনং। অধোগে পূর্ব্বং বিরেচনং। পশ্চাদন্না-শনং। নিরূহঃ। শালিঃ। যবঃ। গোধূমঃ। মুদ্গাঃ। জাঙ্গলজরসঃ। তপ্তশীতজলানি। শর্করা। মধু। শক্তুঃ। কর্কোটকং। কারবেল্লং। পটোলং। হিলমোচিকা। বেত্রাগ্রং। বৃদ্ধকুষ্মাণ্ডং। রম্ভাপুষ্পং। বাস্তূকং। কপিত্থং। দাড়িমং। ধাত্রী। তিক্তানি। কফপিত্তহরপানান্নং ॥ * ॥ অম্লপিত্তে অপথ্যং। নবান্নং। বিরুদ্ধ-দ্রব্যং। পিত্তকোপকরদ্রব্যং। বেগরোধঃ। তিলঃ। মাষঃ। কুলত্থঃ। তৈলভক্ষণং। অবিদুগ্ধং। ধান্যাম্লং। লবণং। অম্লং। কটু। গুর্ব্বন্নং। দধি। মৎস্যঃ ॥ * ॥ অথ বিসর্পে পথ্যং। বিরেকঃ। বমনং। লেপঃ। লঙ্ঘনং। রক্তমোক্ষণং। পুরাণা যবগোধূমকঙ্গুষষ্টিকশালয়ঃ। মুদ্গাঃ মসূরঃ। চণকঃ। তুবরী। জাঙ্গলজরসঃ নবনীতং। ঘৃতং। দ্রাক্ষা। দাড়িমং। কারবেল্লকং। বেত্রাগ্রং। কুলকং। ধাত্রী। খদিরঃ। নাগকেশরং। লাক্ষা। শিরীষঃ। কর্পূরং। চন্দনং। তিললেপনং। হ্রীবেরকং। মুস্তকং। সকলানি তিক্তানি ॥*॥ বিসর্পে অপথ্যং। ব্যায়ামঃ।

অহ্নি শয়নং। সুরতং। প্রবাতঃ। ক্রোধঃ। শোকঃ। বমনং। বেগঃ। অসূয়নং। শাকং। বিরুদ্ধাশনং। দধি। কূর্চ্চিকা। সৌবীরকাদি। অনেকবিধকিলাটঃ। গুর্ব্বন্নপানং। লশুনং। কুলত্থঃ। মাষঃ। তিলঃ। সকলমজাঙ্গলমাংসং। স্বেদঃ। বিদাহি। লবণং। অম্লং। কটু। মদ্যং। অর্কপ্রভা॥ * ॥ অথ বিস্ফোটে পথ্যং। বিরেচনং। ছর্দ্দনং। লেপঃ। লঙ্ঘনং। পুরাতনষষ্টিকশালয়ঃ। যবঃ। মুদ্গঃ। মসূরঃ। চণকঃ। মুকুষ্টকঃ। ধন্বামিষং। গব্যঘৃতং। কঠিল্লকং। বেত্রাগ্রং। আষাঢ়ফলং। পটোলং। জ্যোতিষ্মতী। নিম্বদলং। চন্দনং। তৈলং। সিতাভ্রঃ। তিললেপঃ। লঙ্ঘনং। বালং॥ * ॥ বিস্ফোটে অপথ্যং। স্বেদঃ। ব্যবায়ঃ। ব্যায়ামঃ। ক্রোধঃ। গুর্ব্বন্নং। আতপঃ। বমিবেগঃ। পত্রশাকং। প্রবাতঃ। দিবা-স্বপ্নঃ। গ্রাম্যোদকং। আনূপমাংসং। বিরুদ্ধান্যশনানি। তিলঃ। মাষঃ। কুলত্থঃ। লবণাম্লকটূনি। বিদাহি। রূক্ষং। উষ্ণং॥ * ॥ অথ মসূর্য্যাং পথ্যং। পূর্ব্বং লঙ্ঘনবান্তিরেচনশিরাবেধাঃ। শশাঙ্কো-জ্জ্বলজীর্ণষষ্টিকশালয়ঃ। চণকঃ। মুদ্গঃ। মসূরঃ। যবঃ। কপোতচটকদাত্যূহক্রৌঞ্চ-জীবঞ্জীবশুকাদয়ঃ পক্ষিণঃ। নঙ্গলঃ। কাঠিল্লং। আষাঢ়কং। কর্কোটং। কদলং। শিগ্রু। রুচকং। দ্রাক্ষা। দাড়িমং। মেধ্যবৃংহণান্নপানং। কোলং। মাষরসঃ। অক্ষোঃ সেকবিধৌ গবেধুমধুকোদ্ভূত-সুশীতোদকং। শম্বূকোদরকোষনীরং। কর্পূরচূর্ণং। পক্কে মুদ্গরসঃ। জাঙ্গলরসঃ। শালিঞ্চশাকং। ঘৃতং। নির্গুণ্ডীজলং। যক্ষধূপবিহিতো ধূপঃ। শশ্বদ্‌গোময়ভস্ম-গুণ্ডনং। শুষ্কে শিলাপিষ্টয়োঃ পিচু-মর্দ্দপত্রনিশয়োরালেপঃ। শেষে ব্রণোক্ত-ক্রিয়া॥ * ॥ মসূর্য্যামপথ্যং। রক্তং। স্বেদঃ। শ্রমঃ। তৈলং। গুর্ব্বন্নং। ক্রোধঃ। আতপঃ। দুষ্টাম্বু। দুষ্টপবনঃ। বিরুদ্ধাশনং। নিষ্পাবঃ। আনূপশাকং। লবণং। বিষমাশনং। কটু। অম্লং। বেগরোধঃ॥ * ॥ অথ ক্ষুদ্ররোগে পথ্যা-পথ্যং। যথা। ক্ষুদ্ররোগেষু সর্ব্বেষু নানা-রোগানুকারিষু। দোষান্ দুষ্যানবস্থাশ্চ নিরীক্ষ্য মতিমান্ ভিষক্॥ তস্য তস্য চ রোগস্য পথ্যাপথ্যানি সর্ব্বশঃ। যথা-দোষং যথাদুষ্টং যথাদৃষ্টঞ্চ কল্পয়েৎ॥*॥ অথ মুখরোগে পথ্যং। স্বেদঃ। বিরেকঃ। বমনং। গণ্ডূষঃ। প্রতিসারণং। কবলঃ। অসৃক্‌স্রুতিঃ। নস্যং। ধূমঃ। শস্ত্রাগ্নি-কর্ম্মণী। তৃণধান্যং। যবঃ। মুদ্গঃ। কুলত্থঃ। জাঙ্গলরসঃ। বৃহৎপ্রো কারবেল্লং। পটোলং। বালমূলকং কর্পূরনীরং। তাম্বুলং। তপ্তাম্বু। খদিরঃ ঘৃতং। কটু। তিক্তং॥ * ॥ মুখরোগে অপথ্যং। দন্তকাষ্ঠং। স্নানং। অম্লং। মৎস্যঃ। আনূপামিষং। দধি। ক্ষীরং। গুড়ঃ। মাংসং। রূক্ষান্নং। কঠিনাশনং। অধোমুখশয়নং। গুরু। অভিষ্যন্দকারি। দিবানিদ্রা॥ * ॥ অথ কর্ণরোগে পথ্যং।

স্বেদঃ। বিরেকঃ। বমনং। নস্যং। ধূমঃ। সিরাব্যধঃ। গোধূমঃ। শালিঃ। মুদ্গঃ। যবঃ। প্রতনহবিঃ। লাবঃ। ময়ূরঃ। হরিণঃ। তিত্তিরিঃ। বনকুক্কুটঃ। পটোলং। শিগ্রু। বার্ত্তাকুঃ। সুনিষণ্ণং। কঠিল্লকং। রসায়নদ্রব্যং। ব্রহ্মচর্য্যং। অভাষণং॥*॥ কর্ণরোগে অপথ্যং। বিরুদ্ধান্নপানং। বেগরোধঃ। প্রজল্পনং। দন্তকাষ্ঠং। শিরঃস্নানং। ব্যবায়ঃ। শ্লেষ্মলং। গুরু। কণ্ডূয়নং। তুষারঃ॥*॥ অথ নাসারোগে পথ্যং। নির্ব্বাতনিলয়স্থিতিঃ। প্রগাঢ়োষ্ণীষধারণং। গণ্ডূষঃ। লঙ্ঘনং। নস্যং। ধূমঃ। ছর্দ্দিঃ। সিরাব্যধঃ। কটুচূর্ণং নাসারন্ধ্রে নিঃক্ষিপ্য ত্রিঃ প্রবেশনং। স্বেদঃ। স্নেহঃ। শিরোঽভ্যঙ্গঃ। পুরাণা যবশালয়ঃ। কুলত্থমুদ্গয়োর্যূষঃ। গ্রাম্যজাঙ্গলজা রসাঃ। বার্ত্তাকুঃ। কুলকং। শিগ্রু। কর্কোটঃ। বালমূলকং। লশুনং। দধি। তপ্তাম্বু। বারুণী। কটুত্রয়ং। কটু। অম্লং। লবণং। স্নিগ্ধং। উষ্ণং। লঘুভোজনং॥*॥ নাসারোগে অপথ্যং। বিরুদ্ধান্নং। দিবাস্বপ্নঃ। অভিষ্যন্দি। গুরূণি। স্নানং। ক্রোধঃ। শকৃন্মূত্রবাষ্পাণাং বেগধারণং। শোকঃ। দ্রবং। ভূশয্যা॥*॥ অথ নেত্ররোগে পথ্যং। আশ্চ্যোতনং। লঙ্ঘনং। অঞ্জনং। স্বেদঃ। বিরেকঃ। প্রতিসারণং। প্রপূরণং। নস্যং। অসৃঙ্মোক্ষঃ। শস্ত্রক্রিয়া। লেপনং। আজ্যপানং। সেকঃ। মনোনির্ব্বৃতিঃ। অঙ্ঘ্রিপূজা। মুদ্গঃ। যবঃ। লোহিতশালিঃ। লাবঃ। ময়ূরঃ। বনকুক্কুটঃ। কূর্ম্মঃ। কুলিঙ্গঃ। কপিঞ্জলঃ। কৌম্ভং হবিঃ। বন্যকুলত্থযূষঃ। পেয়া। বিলেপী। লশুনং। পটোলং। বার্ত্তাকুঃ। কর্কোটকঃ। কারবেল্লং। নবীনমোচং। নবমূলকং। পুনর্নবা। মার্কবঃ। কাকমাচী। পত্তূরশাকং। কুমারিকা। দ্রাক্ষা। কুস্তুম্বুরু। মাণিমন্থং। লোধ্রং। বরা। ক্ষৌদ্রং। উপানহৌ। নারীপয়ঃ। চন্দনং। ইন্দুখণ্ডং। তিক্তং। লঘু॥*॥ নেত্ররোগে অপথ্যং। ক্রোধঃ। শোকঃ। মৈথুনং। অশ্রুবায়ুবিণ্মূত্রনিদ্রাবমীনাং বেগরোধঃ। সূক্ষ্মেক্ষণং। দন্তবিঘর্ষণং। স্নানং। নিশাভোজনং। আতপঃ। প্রজল্পনং। ছর্দ্দনং। অম্বুপানং। মধূকপুষ্পং। দধি। পত্রশাকং। কঠিল্লকং। পিণ্যাকঃ। বিরূঢ়কং। মৎস্যঃ। সুরা। অজাঙ্গলমাংসং। তাম্বূলং। অম্লং। লবণং। বিদাহি। তীক্ষ্ণং। কটু। উষ্ণং। গুর্ব্বন্নপানং॥*॥ অথ শিরোরোগে পথ্যং। স্বেদঃ। নস্যং। ধূমপানং। বিরেকঃ। লেপঃ। ছর্দ্দিঃ। লঙ্ঘনং। শীর্ষবস্তিঃ। রক্তোন্মুক্তিঃ। বহ্নিকর্ম্ম। উপনাহঃ। জীর্ণসর্পিঃ। শালিঃ। ষষ্টিকঃ। যূষঃ। দুগ্ধং। ধন্বমাংসং। পটোলং। শিগ্রু। দ্রাক্ষা। বাস্তুকং। কারবেল্লং। আম্রং। ধাত্রী। দাড়িমং। মাতুলুঙ্গং। তৈলং। তক্রং। কাঞ্জিকং। নারিকেলং। পথ্যা। কুষ্ঠং। ভৃঙ্গরাজঃ। কুমারী। মুস্তঃ। উশীরং। চন্দ্রিকা। গন্ধসারঃ। কর্পূরং॥*॥

শিরোরোগে অপথ্যং। ক্ষবজৃম্ভমূত্রবাস্প-নিদ্রাবিষ্ঠানাং বেগধারণং। অঞ্জনং। দুষ্টনীরং। বিরুদ্ধান্নং। সহ্যবিন্ধ্যসরিজ্জলং। দন্তকাষ্ঠং। দিবানিদ্রা ॥ * ॥ অথ স্ত্রীরোগে পথ্যং। যৎ পথ্যং যদপথ্যঞ্চ রক্তপিত্তেষু কীর্ত্তিতং। প্রদরেষু যথাদোষং তত্তন্নারী ভজেত্ত্যজেৎ ॥ বাতব্যাধিমতাং পথ্যমপথ্যঞ্চ যদীরিতং। যোনিব্যাপৎসু সর্ব্বাসু তদ্বিদ্যাচ্চ যথামলং ॥ * ॥ অথ গর্ব্ভিণীপথ্যং। শালিঃ। ষষ্টিকঃ। মুদ্গঃ। গোধূমঃ। লাজশক্তুঃ। নবনীতং। ঘৃতং। ক্ষীরং। রসালা। মধু। শর্করা। পনসং। কদলং। ধাত্রী। দ্রাক্ষা। অম্লং। স্বাদু। শীতলং। কস্তূরী। চন্দনং। মালা। কর্পূরং। অনুলেপনং। চন্দ্রিকা। স্নানং। অভ্যঙ্গঃ। মৃদুশয্যা। হিমানিলঃ। সন্তর্পণং। প্রিয়বাক্। মনোরমবিহারঃ। প্রিয়ঙ্করান্নপানং ॥ * ॥ গর্ব্ভিণ্যা অপথ্যং। স্বেদনং। বমনং। ক্ষারঃ। কলহঃ। বিষমাশনং। অসাত্ম্যং। নক্তসঞ্চারঃ। চৌর্য্যং। অপ্রিয়দর্শনং। অতিব্যবায়ঃ। আয়াসঃ। ভারঃ। গুরুপ্রাবরণং। অকালজাগরণং স্বপ্নশ্চ। কঠিনোৎকটকাসনং। শোকঃ। ক্রোধঃ। ভয়ং। উদ্বেগঃ। শ্রদ্ধা। বেশবিধারণং। উপবাসঃ। অধ্বগমনং। তীক্ষ্ণোষ্ণগুরুবিষ্টম্ভিভোজনং। নক্তং নিরগমনং। শ্বভ্রকূপেক্ষণং। মদ্যং। আমিষং। উত্তানশয়নং। স্ত্রাণামনীপ্সিতং ॥ * ॥ অষ্টমমাসমারভ্য গর্ব্ভিণ্যা অপথ্যং যথা। তথা রক্তস্রুতিং শুদ্ধিং বস্তিমায়াসতোঽষ্টমাৎ। এভির্গর্ব্ভঃ স্রবে-দামঃ কুক্ষৌ শুষ্যেন্ম্রিয়েত বা ॥ ভজেন্ন নিত্যং তিক্তাম্লকটূষণকষায়কান্। বাতৈশ্চ ভবেদ্গর্ব্ভঃ কুব্জান্ধজড়বামনঃ ॥ পিত্তলৈঃ খলতী পিঙ্গঃ শ্বিত্রী পঙ্গুঃ কফাত্মভিঃ। অপথ্যমিদমুদ্দিষ্টং গর্ব্ভিণীনাং মহর্ষিভিঃ ॥ * ॥ অথ প্রসূতায়াঃ পথ্যং। লঙ্ঘনং। মৃদুস্বেদঃ। গর্ব্তকোষ্ঠবিশোধনং। অভ্যঞ্জনং। তৈলপানং। কটুতিক্তোষ্ণসেবনং। দীপনং। পাচনং। মদ্যং। পুরাণষষ্টিশালয়ঃ। কুলত্থঃ। লশুনং। শিগ্রু। বার্ত্তাকুঃ। বালমূলকং। পটোলং। মাতুলুঙ্গং। তাম্বূলং। দাড়িমদ্বয়ং। শ্লেষ্মানিলঘ্নানি। সপ্তাহাৎ পরং কিঞ্চিৎ বৃংহণং। দ্বাদশাহাৎ পরং আমিষং। সার্দ্ধমাসাৎ পরং আহারাদিযন্ত্রণাত্যাগঃ ॥ * ॥ প্রসূতায়া অপথ্যং। শ্রমঃ। নস্যং। রক্তমুক্তিঃ। মৈথুনং। বিষমাশনং। বিরুদ্ধান্নং। বেগরোধঃ। অসাত্ম্যং। অতিভোজনং। দিবানিদ্রা। অভিষ্যন্দি। বিষ্টম্ভি। গুরুভোজনং ॥ * ॥ সূতিকাখ্যেষু রোগেষু বাতশ্লেষ্মোচিতানি চ। তত্তদ্রোগানুকূল্যেন পথ্যাপথ্যানি নির্দ্দিশেৎ ॥ * ॥ অথ বালরোগে পথ্যং। নৃণাং জ্বরাদিষু যৎ পথ্যাপথ্যং বালানামৌচিত্যাৎ তদ্বিধেয়ং। মন্দাগ্নৌ যৎ পথ্যাপথ্যং বালানাং পারিগর্ভিকে তদ্বিধেয়ং। আগন্তুকোন্মাদিনাং যৎ পথ্যাপথ্যং বালানাং গ্রহরোগিণাং তদ্যোজ্যং ॥ * ॥ অথ বিষরোগে পথ্যং। অরিষ্টাবন্ধনং।

মন্ত্রক্রিয়া। ছর্দ্দিঃ। বিরেচনং। রূষণং। শোণিতাকৃষ্টিঃ। পরিষেকঃ। অবগাহনং। হৃদয়াবরণং। নস্যং। অঞ্জনং। প্রতিসারণং। উৎকর্ত্তনং। প্রধমনং। প্রলেপঃ। বহ্নিকর্ম্ম। উপধানং। প্রতিবিষং। ধূপঃ। সংজ্ঞাপ্রবোধনং। শালিঃ। ষষ্টিকঃ। কোরদূষঃ। প্রিয়ঙ্গুঃ। মুদ্গঃ। হরেণুঃ। তৈলং। সর্পিঃ। শিখিতিত্তিরিলাবৈণগোধাখুশ্বাবিদামিষং। বার্ত্তাকুঃ। কুলকং। ধাত্রী। নিষ্পাবঃ। তণ্ডুলীয়ঃ। মণ্ডূকপর্ণী। জীবন্তী। সুনিষণ্ণং। উপোদিকা। কালশাকং। লশুনং। দাড়িম্বং। বিকঙ্কতং। প্রাচীনামলকং। পথ্যা। কপিত্থং। নাগকেশরং। গোচ্ছাগনরমূত্রাণি। তক্রং। শীতাম্বু। শর্করা। অবিদাহীন্যন্নানি। সৈন্ধবং। মধু। কুঙ্কুমং। পশ্চিমোত্তরবাতঃ। হরিদ্রা। সিতচন্দনং। মুস্তং। শিরীষঃ। কস্তূরী। তিক্তানি। মধুরাণি। হেমচূর্ণং ॥*॥ বিষরোগে অপথ্যং। ক্রোধঃ। বিরুদ্ধাশনং। অধ্যশনং। ব্যবায়ঃ। তাম্বূলং। আয়াসঃ। প্রবাতঃ। সর্ব্বাম্লং। সর্ব্বলবণং। নানাবিধসংস্বেদনং। নিদ্রা। ভয়ং। ধূমবিধিঃ। ক্ষুধা॥*॥ অথ রোগসঙ্করে পথ্যং। এষাং গদানাং যদি সঙ্করঃ স্যাত্তত্র প্রযত্নেন ভিষঙ্মনীষী। উক্তেষু পথ্যেষু বিরোধি যদ্যত্তত্তৎ প্রযুঞ্জীত চিকিৎসিতেষু ॥ * ॥ রোগসঙ্করে অপথ্যং। অপথ্যানি চ সর্ব্বাণি তত্তদ্রোগোচিতানি চ। রূক্ষলাবলবিদ্বেদ্যো বর্জ্জয়েদ্ব্যাধিসঙ্করে ॥*॥ অথ বাতিকরোগে পথ্যং। অভ্যঙ্গঃ। পরিমর্দ্দনং। শমনং সংস্নেহনং। বৃংহণং। স্নেহঃ। স্বেদনং। আসনা। শয়নং। সংবাহনং। বস্তিঃ। নস্যং। প্রাবরণং। সমীরণপরিত্যাগঃ। অবগাহঃ। শিরোবস্তিঃ। বিস্মরণং। দিবাকরকরঃ। স্নানং। বিস্মাপনং। তৈলদ্রোণী। সরসতা। গাঢ়োপনাহঃ। সুরা। ভূশয্যা। সুখশীলতা। স্বাদ্বম্লা রসাঃ। মজ্জা। তৈলং। বসা। ঘৃতং। নবমাষঃ। কুলত্থঃ। তিলঃ। গোধূমঃ। মুদ্গঃ। কলমঃ। শালিঃ। ষষ্টিকঃ। পেয়া। ধান্যজলং। পয়ঃ। কৃষরঃ। মস্তুঃ। সুখোষ্ণোদকং। গোমূত্রং। নলদাম্বু। দধি। পয়ঃপেটী। যবঃ। কূর্চ্চিকা। আনূপাঃ রুরুখড়্গিকোলমহিষাঃ। এণঃ। ধন্বোদ্ভবাঃ সর্পদ্বিট্‌কুক্কবাকুতিত্তিরিকুলিঙ্গাঃ। কুম্ভীরঃ। তিমিঙ্গিলঃ। মকরঃ। গণ্ডূপদঃ। কচ্ছপঃ। রোহিতমৎস্যঃ বর্ম্মিঃ। মদ্গুরঃ। সিলিন্ধঃ। এরঙ্গঃ। শৃঙ্গী। ইল্লিশঃ। প্রোষ্ঠী। গর্গরঃ। পর্ব্বতঃ অন্যে জলজন্তবঃ। বার্ত্তাকুঃ। কুলকং। শিগ্রু। লশুনং। দ্রাক্ষা। আম্রং। আম্রাতকং। ধাত্রী। দাড়িমং। অম্লবেতসফলং। কোলং। কপিত্থং। শিবা। পক্কতালং। বকুলং। গোকণ্টকঃ। বাস্তূকং। শুক্লাক্ষী। গণিকা। সরসা। মন্দারপত্রং। তাম্বুলং। সিতশর্করা। লবণঃ। লোধ্রঃ। তুরুষ্কঃ। অগুরু। শ্রীবাসঃ। সুরদারু। গুগ্‌গুলুঃ। গ্রন্থ্যাহ্বঃ। কুঙ্কুমং। স্নিগ্ধোষ্ণবিধিঃ। সংচূর্ণিতং হেম রজতং সীসকঞ্চ। জাত্যুৎপাটনমল্লিকাপুষ্পাণাং বিশালা

মালা ॥ * ॥ বাতিকরোগে অপথ্যং। চিন্তা। জাগরণং। অস্যগ্মোক্ষঃ। বমিঃ। লঙ্ঘনং। ব্যায়ামঃ। গজবাজিবাহনবিধিঃ। সন্ধারণং। মৈথুনং। আঘাতঃ। অপতর্পণং। প্রপতনং। ধাতুক্ষয়ঃ। ক্ষোভণং। শোকঃ। চংক্রমণং। বিরুদ্ধাশনং। সম্পকভুক্তক্রমঃ। বৃদ্ধত্বং। জলদাগমঃ। রজনীশেষঃ। অপরাহ্লঃ। ভয়ং। রূক্ষাত্যল্পকষায়তিক্তকটুকক্ষারাতিশীতানামশনং। তৃণধান্যং। উদ্রিকা। আঢ়কী। কঙ্গুঃ। উদ্দালঃ। মুকুষ্টকঃ। কোদ্রবঃ। যবঃ। শ্যামাকঃ। জূর্ণাদয়ঃ। শিম্বী। জম্বু। রাজমাষঃ। চণকঃ। মুদ্গঃ। কুলত্থঃ। বিষং। শালূকং। ক্রমুকং। কশেরু। তলকং। কঠিল্লকং। তিন্দুকং। কর্কোটং। নবতালশস্যং। তালাস্থিমজ্জা। নদীতড়াগজলং। করকা। নিষ্কারবীজং। পিণ্যাকঃ। শিশিরাম্বু। রাসভপয়ঃ। পত্রশাকং। ত্রিবৃৎ। ভূনিম্বং। কটুকা। করীরং। অখিলশুষ্কামিষং। মাক্ষিকং। ধূমঃ। বদ্ধমরুৎ। রজঃ। পরিভবঃ। খট্বা ॥ * ॥ অথ পৈত্তিকে পথ্যং। সর্পিঃপানবিধিঃ। বিরেচনং। অস্যগ্মোক্ষঃ। সিতশালিঃ। গোধূমঃ। আঢ়কিঃ। ধান্যকং। চণকঃ। মুদ্গঃ। মসূরঃ। যবঃ। পর্য্যুষিতমণ্ডঃ। পয়ঃ। পয়ঃপেটী। বরা। মাক্ষিকং। লাজাঃ। ধম্বরসঃ। ঘৃতানি। সিতা। শীতোদকং। উদ্ভিদঃ। কর্কোটং। কদলং। কণ্টকিফলং। বেত্রাগ্রং। আষাঢ়কং। মৃদ্বীকা। কোমলকুলকং। কুষ্মাণ্ডং। ইর্ব্বারুঃ। তুম্বী। পর্পটকঃ। অল্পমারিষদলং। কঠিল্লকং। দাড়িমং। ধাত্রী। কোমলতালশস্যং। অভয়া। খর্জূরং। ঔডুম্বরং। বিশ্বং। কষায়ঃ। তিক্তঃ। মধুরঃ। মধূকং। বরী। কাংস্যং। অয়ঃ। রজতং। হেম। কটুকা। নিম্বঃ। ত্রিবৃৎ। চন্দনং। হর্ম্ম্যং। ভূমিগৃহং। সুশীতলবনং। ধারাগৃহং। চন্দ্রিকা। রম্ভাম্ভোরুহনব্যপত্রশয়নং। শীতাঃ প্রদেহাঃ। ভূশয্যা। মণিঃ। প্রদোষসময়ঃ। গীতং। প্রিয়ালিঙ্গনং। স্নানং। মিত্রসমাগমঃ। প্রিয়কথা। মন্দানিলঃ। অভ্যুক্ষণং। বাদিত্রশ্রবণং। মনোরমস্তরভাবাঃ। সুলাস্যেক্ষণং। পুন্নাগোৎপলপাটলাজসুমনঃকহ্লারপুষ্পাণি। কর্পূরং। প্রনীরনীরং। শীতক্রিয়া ॥ * ॥ পৈত্তিকে অপথ্যং। ধূমঃ। স্বেদনং। আতপঃ। নিধুবনং। সন্ধারণং। ক্রোধঃ। ক্ষারঃ। অধ্বা। গজবাজিবাহনবিধিঃ। তীক্ষ্ণকর্ম্ম। ব্যায়ামঃ। অন্নবিদাহকারিসময়ঃ। গ্রীষ্মঃ। বিরুদ্ধাশনং। মধ্যাহ্নঃ। জলদাত্যয়ঃ। রজনীমধ্যং। মধ্যবয়ঃ। ব্রীহিঃ। বেণুফলং। তিলঃ। লশুনং। মাষঃ। কুলত্থঃ। গুড়ঃ। নিষ্পাবঃ। মদিরা। অতসী। প্রহীজলং। ধান্যাম্লং। উষ্ণোদকং। জম্বীরং। নলদাম্বু। হিঙ্গু। লকুচং। মূত্রং। ভল্লাতকং। তাম্বূলং। দধি। সর্ষপঃ। বদরং। তৈলাশনং। তিন্তিড়ী। কটু। অম্লং। লবণং। বিদাহি ॥ * ॥ অথ শ্লৈষ্মিকে পথ্যং। ছর্দ্দিঃ। লঙ্ঘনং। অঞ্জনং। নিধুবনং।

প্রোদ্বর্ত্তনং। স্বেদনং। চিন্তা। জাগরণং। শ্রমঃ। অতিগমনং। তৃড়্বেগধারণং। গণ্ডূষঃ। প্রতিসারণং। প্রধমনং। হস্ত্যশ্বযানং। ধূমঃ। প্রাবরণং। নিযুদ্ধং। অতিসংক্ষোভঃ। নস্যং। ভয়ং। রূক্ষোষ্ণবিধিঃ। পুরাতনশালিঃ। ষষ্টিকা। নিষ্পাবঃ। তৃণধান্যং। চণকঃ। মুদ্গাঃ। কুলত্থরসঃ। ক্ষারঃ। সর্ষপতৈলং। উষ্ণজলং। ধন্বামিষং। রাজিকা। বেত্রাগ্রং। কূলকং। কঠিল্লকং। বার্ত্তাকুঃ। উড়ুম্বরং। কর্কোটং। লশুনং। মোচকুসুমং। শক্রাশনং। শূরণঃ। নিম্বং। মূলকপোতিকা। বরুণঃ। তিক্তা। ত্রিবৃৎ। মাক্ষিকং। তাম্বূলং। নলদাম্বু। জীর্ণমদিরা। ব্যোষং। বরা। গোজলং। লাজাঃ। সুভৃষ্টতণ্ডুলভবং। তিক্তং। সুখোষ্ণালয়ঃ। কাংস্যং। অয়ঃ। অঞ্জনং। মৌক্তিকং। কটুঃ। কষায়রসঃ॥ *॥ শ্লৈষ্মিকে অপথ্যং। স্নেহঃ। অভ্যঞ্জনং। আসনং। অহ্নি শয়নং। স্নানং। বিরুদ্ধাশনং। পূর্ব্বাহ্নঃ। শিশিরঃ। বসন্তসময়ঃ। রাত্র্যাদিঃ। আদ্যবয়ঃ। ভুক্তমাত্রসময়ঃ। অন্নপানকরণং। মাষঃ। নবতণ্ডুলঃ। মৎস্যঃ। মাংসং। ইক্ষুবিকৃতিঃ। দুগ্ধবিকৃতিঃ। তালাস্থিমজ্জা। দ্রবঃ। পেয়া। ভব্যং। উপোদিকা। পনসং। ছত্রাকং। আষাঢ়কং। খর্জ্জূরং। অনুলেপনং। পয়ঃপেটী। পয়ঃ। পায়সঃ। স্বাদু। অম্লং। লবণং। গুরূণি। তুহিনং। সন্তর্পণং॥ *॥ অথ বসন্তর্ত্তৌ পথ্যং। বমনং। ব্যবায়ঃ। ব্যায়ামঃ। ভেদঃ। ভ্রমণং। অগ্নিসেবা। কটুঃ। তিক্তঃ। বিদাহি। তীক্ষ্ণং। কষায়ঃ। মধ্বোদনং॥ *॥ বসন্তর্ত্তাবপথ্যং। দিবানিদ্রা। সন্তর্পণং। আলস্যং। সুধাংশুসেবা। পিণ্ডালুকং। স্বাদু। গুরূদকান্নং। পিষ্টং। দধি। ক্ষীরং। ঘৃতং॥ *॥ অথ গ্রীষ্মর্ত্তৌ পথ্যং। চন্দনং। শীতবাতঃ। ছায়া। অম্বু। কক্ষাশয়নং। প্রসূনং। সদ্যঃপয়োভাবিতশীতভক্তং। বিশিষ্টদ্রব্যং। প্রিয়ভোজনং॥*॥ গ্রীষ্মর্ত্তাবপথ্যং। কটু। তিক্তং। উষ্ণং। ক্ষারং। অম্লং। রৌদ্রং। ভ্রমণং। অগ্নিসেবা। উন্নিদ্রতা। ভাস্করতপ্ততোয়স্নানং। অতিপানং। দধি। তক্রং। তৈলং॥ *॥ অথ বর্ষাসু পথ্যং। লবণং। অম্লং। মিষ্টং। সারং। প্রিয়ং। স্নিগ্ধং। গুরু। উষ্ণং। বল্যং। অভ্যঙ্গঃ। উদ্বর্ত্তনং। অগ্নিসেবা। তপ্তাম্বপানং। দধি॥ *॥ বর্ষাস্বপথ্যং। পূর্ব্বপবনঃ। বৃষ্টিঃ। ঘর্ম্মঃ। হিমঃ। শ্রমঃ। নদীনীরং। দিবাস্বপ্নঃ। রূক্ষং। নিত্যমৈথুনং॥ *॥ শরদি পথ্যং। শীতরসাম্বুপানং। তরুচ্ছায়া। চন্দনং। ইন্দুসেবা। সিতা। মুদ্গাঃ। মসূরং। গব্যদুগ্ধং। ইক্ষুঃ। শাল্যোদনং॥ *॥ শরদ্যপথ্যং। লবণং। অম্লং। তীক্ষ্ণং। কটু। পিষ্টং। অতসী। বিদাহি। সুরা। নালং। দধি। তক্রং। তৈলং। ক্রোধঃ। উপবাসঃ। আতপঃ। মৈথুনং॥ *॥ অথ হিমর্ত্তৌ পথ্যং। তপ্তজলং। উপনাহঃ।

পয়ঃ। অন্নং। পানং। ঘৃতং। স্ত্রীসেবা। বহ্নিসেবা। গুরূণি। যথেষ্টভুক্তং ॥ * ॥ হিমর্ত্তাবপথ্যং। দিবানিদ্রা। কুভোজনং। অভোজনং। লঙ্ঘনং। পুরাতনান্নং। লঘুপাকি। শৈত্যং। বার্য্যোদনং। শীতজলাবগাহঃ ॥ * ॥ শিশিরে পথ্যং। স্ত্রী। বহ্নিসেবা। মৎস্যঃ। অজমাংসং। দধি। দুগ্ধং। সর্পিঃ ॥ * ॥ শিশিরেঽপথ্যং। তীক্ষ্ণোষ্ণকটূম্লকষায়তিক্তানি। সামুদ্রকং। আর্দ্রভোজনং। দিবানিদ্রা। চন্দনং। চন্দ্রসেবা। শীতজলস্নানাদি ॥ * ॥ মাঘে বিশেষো যথা। মাঘে চ শীতদ্রবমিষ্টপিষ্টং কন্দঃ কদল্যা গুরুশালিভক্তং। ইতি ষড়্ তুপথ্যাপথ্যাধিকারঃ ॥ * ॥ আগন্তুকজ্বরাণাং পথ্যাপথ্যং জ্বরাধিকারে ন লিখিতমতোঽত্র লিখ্যতে। অভিঘাতসমুত্থানে পানাভ্যঙ্গৌ চ সর্পিষঃ। ক্ষতজে ব্রণজে চাপি ক্ষতব্রণচিকিৎসিতং ॥ ওষধীগন্ধবিষজে বিষপিত্তপ্রসাধনং। অভিচারাভিশাপোত্থে জপহোমাদি ভেষজং ॥ উৎপাতগ্রহপীড়োত্থে দানস্বস্ত্যয়নাদয়ঃ। ক্রোধোত্থিতে পিত্তহরং কামজে কামজিৎক্রিয়া ॥ কামশোকভয়োদ্ভুতে সর্ব্বা বাতহরী ক্রিয়া। আশ্বাসনঞ্চেষ্টলাভো হর্ষদায়ীনি যানি চ॥ বিশেষতঃ পুনশ্চাত্র কামক্রোধসমুত্থিতে। ভয়শোকসমুদ্ভূতে কামক্রোধোক্তমৌষধং॥ ভূতাভিষঙ্গজে ভূতবন্ধাবেশনতাড়নং। মনঃক্ষোভসমুৎপন্নে মনসঃ সান্ত্বনানি চ ॥ ইত্যাগন্তুজ্বরে পূর্ব্বৈর্ভিষগ্‌ভিঃ পথ্যমিষ্যতে। বিষ্ণোর্নামসহস্রস্য পাঠনং শ্রবণং শ্রুতেঃ॥ দেবানাং ব্রাহ্মণানাঞ্চ গুরূণামপি পূজনং। ব্রহ্মচর্য্যং তপো হোমঃ প্রদানং নিয়মো জপঃ ॥ সাধুনাং দর্শনং সত্যং রত্নৌষধিবিধারণং। মঙ্গলাচরণঞ্চেতি বর্গঃ সর্ব্বান্ জ্বরান্ জয়েৎ ॥ * ॥ আগন্তুকজ্বরে অপথ্যং। অধিবাসনকর্ম্মাণি রক্তস্রগ্বস্ত্রধারণং। বমিবেগং দন্তকাষ্ঠমসাত্ম্যমপি ভোজনং ॥ বিরুদ্ধান্যন্নপানানি বিদাহীনি গুরূণি চ। দুষ্টাম্বু ক্ষারমম্লানি পত্রশাকং বিরূঢ়কং ॥ নলদাম্বু চ তাম্বূলং কসিঙ্গং লকুচং ফলং। আড়ীমৎস্যঞ্চ পিণ্যাকং ছত্রাকং পিষ্টবৈকৃতং ॥ অভিষ্যন্দীনি চৈতানি জ্বরিতঃ পরিবর্জ্জয়েৎ ॥ ইতি পথ্যাপথ্যবিনিশ্চয়ঃ সমাপ্তঃ ॥

পদ স্থৈর্য্যে। ইতি কবিকল্পদ্রুমঃ ॥ পদতি। ইতি দুর্গাদাসঃ ॥

পদ ত ক ঙ গতৌ। ইতি কবিকল্পদ্রুমঃ ॥ ক ঙ পদয়তে। ইতি দুর্গাদাসঃ ॥

পদ য ঙ ঔ গত্যাং। ইতি কবিকল্পদ্রুমঃ ॥ য ঙ পদ্যতে। ঔ পত্তা। ইতি দুর্গাদাসঃ ॥

পদং (ক্লী) ব্যবসায়ঃ। ত্রাণং। স্থানং। চিহ্নং। পাদঃ। বস্তু। ইত্যমরঃ ॥ শব্দঃ। বাক্যং। প্রদেশঃ। পাদচিহ্নং। শ্লোকপাদঃ। কিরণে পুং। ইতি মেদিনী ॥ পদলক্ষণং যথা। বর্ণাঃ পদং প্রয়োগার্হানন্বিতৈকার্থবোধকাঃ। ইতি সাহিত্যদর্পণঃ ॥ * ॥ শ্রীকৃষ্ণপদচিহ্নং যথা। সৌবর্ণীং রাজতীং বাপি পাষাণনির্ম্মিতা-

মপি। পাদয়োশ্চাঙ্কিতাং কৃত্বা পূজাঞ্চৈব সমাচরেৎ॥ দক্ষিণস্য পদাঙ্গুষ্ঠমূলে চক্রং বিভর্ত্ত্যজঃ। তত্র নম্রজনস্যোগ্রসংসারচ্ছেদনায় সঃ॥ মধ্যমাঙ্গুলিমূলে তু ধত্তে কমলমচ্যুতঃ। ধাতুশ্চিত্তদ্বিরেফাণাং লোভমায়াতি শোভনং॥ পদ্মস্যাধো ধ্বজং ধত্তে সর্ব্বানর্থজয়ধ্বজং। কনিষ্ঠামূলতো বজ্রং ভক্তপাপাদ্রিভেদনং॥ পার্ষ্ণিমধ্যেঽঙ্কুশং ভক্তচিত্তেভবশকারণং। ভোগসম্পন্ময়ং ধত্তে যবমঙ্গুষ্ঠপর্ব্বণি॥ তথা বামাঙ্গুষ্ঠমূলে পাঞ্চজন্যস্য লক্ষণং। সর্ব্ববিদ্যাপ্রকাশায় ধত্তে চ ভগবানজঃ॥ ইতি পাদ্মে পাতালখণ্ডে ১২ অধ্যায়ঃ॥

পদকঃ (পুং) পদং বেত্তি যঃ। পদজ্ঞাতা। ইতি মুগ্ধবোধব্যাকরণং॥ স্বনামখ্যাতকণ্ঠভূষণঞ্চ। দেবপদচিহ্নাদিযুক্তত্বাৎ॥

পদগঃ (পুং) পদাতিকঃ। ইত্যমরঃ॥ পদ্ভ্যাং গমনকর্ত্তরি ত্রি॥

পদন্যাসঃ (পুং) গোক্ষুরঃ। ইতি শব্দচন্দ্রিকা॥ পদস্য বিন্যাসঃ। যথা। পদন্যাসো গেহাদ্বহিরহিফণারোহণসমঃ স্বগেহাদন্যৎ স্যাদ্ভুবনমপরদ্বীপতুলিতং। বচো লোকালভ্যং কৃপণধনতুল্যং মৃগদৃশঃ পুমানন্যঃ কান্তাদ্বিধুরিব চতুর্থীসমুদিতঃ॥ ইতি রসমঞ্জরী॥

পদভঞ্জনং (ক্লী) নিরুক্তং। গূঢ়ার্থশব্দব্যাখ্যা। ইতি হেমচন্দ্রঃ॥

পদভঞ্জিকা (স্ত্রী) পঞ্জিকা। টিপ্পনী। ইতি হেমচন্দ্রঃ॥

পদবিঃ / পদবী (স্ত্রী) পদ্ধতী। পন্থাঃ। ইত্যমরঃ॥

পদমালা (স্ত্রী) মোহনশীলা বিদ্যা। যথা পদমালাং মহাবিদ্যাং সর্ব্বদেবনমস্কৃতাং। যাচয়ামি সুরেশানমুমাদেহার্দ্ধধারিণং॥ ইতি দেবীপুরাণে ৯ অধ্যায়ঃ॥ অস্যা বিবরণং তত্রৈব দ্রষ্টব্যং। পদশ্রেণী চ॥

পদষ্ঠীবং (ক্লী) যুগপদুপস্থিতচরণজানুনী। পদঞ্চ অষ্ঠীবা চ দ্বয়োঃ সমাহারঃ। ইতি ব্যাকরণং॥

পদাঙ্কঃ (পুং) ক্রমাঙ্কঃ। পাদচিহ্নং। যথা। শাকে শায়কবেদষোড়শমিতে শ্রীকৃষ্ণশর্ম্মার্পয়ন্নানন্দপ্রদনন্দনন্দনপদদ্বন্দ্বারবিন্দং হৃদি। চক্রে কৃষ্ণপদাঙ্কদূতমতুলং প্রীতিপ্রদং শৃণ্বতাং ধীরঃ শ্রীরঘুরামরায়নৃপতেরাজ্ঞাং গৃহীত্বাদরাৎ॥ ইতি পদাঙ্কদূতকাব্যং॥

পদাঙ্গী (স্ত্রী) হংসপদী। ইতি রাজনির্ঘণ্টঃ॥

পদাজিঃ (পুং) পদাতিকঃ। ইত্যমরঃ॥

পদাতঃ (পুং) পাদাতিকঃ। ইতি শব্দরত্নাবলী॥

পদাতিঃ (পুং) পদ্ভ্যামতি গচ্ছতি সততং যঃ। পেয়াদা ইতি ভাষা। তৎপর্য্যায়ঃ। পত্তিঃ ২ পতগঃ ৩ পাদাতিকঃ ৪ পদাজিঃ ৫ পদগঃ ৬ পদিকঃ ৭। ইত্যমরঃ॥ পদাতিকঃ ৮ পাদাৎ ৯ পাদাবিকঃ ১০ পদাৎ ১১ পায়িকঃ ১২ শবরালিঃ ১৩। ইতি শব্দরত্নাবলী॥

পদাতিকঃ (পুং) পদাতিঃ। ইতি শব্দরত্নাবলী॥

পদারঃ (পুং) পাদধুলিঃ। পাদালিন্দঃ। ইতি মেদিনী॥

পদার্থঃ (পুং) পদানাং ঘটপটাদীনাং অর্থোঽভিধেয়ঃ। তৎপর্য্যায়ঃ। ভাবঃ ২ ধর্ম্মঃ ৩ তত্ত্বং ৪ সত্ত্বং ৫ বস্তু ৬। ইতি জটাধরঃ॥ *॥ সপ্ত পদার্থা যথা। দ্রব্যং গুণাস্তথা কর্ম্ম সামান্যং সবিশেষকং। সমবায়স্তথাভাবঃ পদার্থাঃ সপ্ত কীর্ত্তিতাঃ॥ সপ্তানামপি সাধর্ম্ম্যং জ্ঞেয়ত্বাদিকমিষ্যতে। দ্রব্যাদয়ঃ পঞ্চ ভাবা অনেকে সমবায়িনঃ॥ সত্তাবন্তস্ত্রয়স্ত্বাদ্যা গুণাদির্নির্গুণক্রিয়ঃ। ইতি ভাষাপরিচ্ছেদঃ॥ এতে পদার্থা বৈশেষিকপ্রসিদ্ধাঃ। নৈয়ায়িকানামপ্যবিরুদ্ধাঃ। ইতি সিদ্ধান্তমুক্তাবলী॥ গোতমোক্তষোড়শপদার্থা ন্যায়শব্দে দ্রষ্টব্যাঃ॥

পদাসনং (ক্লী) পাদপীঠং। পা রাখা টুল্ ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

পদিকঃ (পুং) পদাতিঃ। ইত্যমরঃ॥

পদগঃ (পুং) পদাতিকঃ। ইত্যমরঃ॥

পদ্ধতিঃ }
পদ্ধতী } (স্ত্রী) পংক্তিঃ। বর্ত্ম। ইতি মেদিনী॥ গ্রন্থার্থবোধকগ্রন্থঃ। ইতি হেমচন্দ্রঃ॥ পদবী। সা চ ঘোষবস্থমিত্রাদিরূপা। যথা। ষষ্ঠেঽন্নপ্রাশনং মাসি যদ্বেষ্টং মঙ্গলং কুলে ইতি মনুবচনাৎ চূড়াকার্য্যা যথাকুলমিতি যাজ্ঞবল্ক্যবচনাৎ। দেশানুশিষ্টং কুলধর্ম্মমুখ্যং সগোত্রধর্ম্মং নহি সংত্যজেচ্চ ইতি বামনপুরাণাচ্চ সংস্কারমাত্রে কুলধর্ম্মানুরোধেন কালান্তরে মঙ্গলবিশেষাচরণবৎ শূদ্রাণাং নামকরণে বস্থঘোষাদিরূপপদ্ধতিযুক্তনামত্বঞ্চ বোধ্যং। এবমেব কুল্লূকভট্টঃ। ইত্যুদ্বাহতত্ত্বং॥

পদ্মিমং (ক্লী) পদস্য শীতলতা। ইতি সংক্ষিপ্তসারব্যাকরণ

পদ্মং (ক্লী পুং) স্বনামখ্যাতপুষ্পবিশেষঃ। তৎপর্য্যায়ঃ। নলিনং ২ অরবিন্দং ৩ মহোৎপলং ৪ সহস্রপত্রং ৫ কমলং ৬ শতপত্রং ৭ কুশেশয়ং ৮ পঙ্কেরুহং ৯ তামরসং ১০ সারসং ১১ সরসীরুহং ১২ বিসপ্রসূনং ১৩ রাজীবং ১৪ পুষ্করং ১৫ অম্ভোরুহং ১৬। ইত্যমরঃ॥ পঙ্কেজং ১৭ অম্ভোজং ১৮ অম্বুজং ১৯ সরসিজং ২০ শ্রীবাসং ২১ শ্রীপর্ণং ২২ ইন্দিরালয়ং ২৩ জলেজাতং ২৪ অব্জং ২৫ কঞ্জং ২৬ নলং ২৭ নালীকং ২৮ নালিকং ২৯ বনজং ৩০ অম্লানং ৩১ পুটকং ৩২ অব্জঃ ৩৩। ইতি শব্দরত্নাবলী॥ অস্য গুণাঃ। কষায়ত্বং। মধুরত্বং। শীতত্বং। পিত্তকফাস্রনাশিত্বঞ্চ। ইতি রাজবল্লভঃ॥ অবশিষ্টং কমলশব্দে দ্রষ্টব্যং॥ *॥ পদ্মকং। তচ্চ গজস্য মুখাদিস্থো বিন্দুসমূহঃ। ব্যূহবিশেষঃ। নিধিভেদঃ। সংখ্যান্তরং। তচ্চ দশার্ব্বুদং। দশশঙ্খশ্চ। ইতি মেদিনী॥ পদ্মকাষ্ঠৌষধিঃ। ইতি ধরণিঃ॥ পুষ্করমূলং। সীসকং। ইতি রাজনির্ঘণ্টঃ॥ *॥ শরীরস্থষট্পদ্মানি যথা। মূলাধারে ত্রিকোণাখ্যে ইচ্ছাজ্ঞানক্রিয়াত্মকে। মধ্যে স্বয়ম্ভুলিঙ্গস্তু কোটিসূর্য্যসমপ্রভং॥ তদূর্দ্ধে কামবীজস্তু কলশান্তীন্দুনাদকং। তদূর্দ্ধে তু শিখাকারা কুণ্ডলী ব্রহ্মবিগ্রহা॥ তদ্বাহ্যে হেমবর্ণাভং ব-স-বর্ণচতুর্দ্দলং। দ্রুতহেমসমপ্রখ্যং পদ্মং

তত্র বিভাবয়েৎ ॥ তদূর্দ্ধেঽগ্নিসমপ্রখ্যং ষড়্দলং হীরকপ্রভং। বাদিলান্তষড়র্ণেন যুক্তাধিষ্ঠানসংজ্ঞকং ॥ মূলমাধারষট্‌কানাং মূলাধারং ততো বিদুঃ।১। স্বশব্দেন পরং লিঙ্গং স্বাধিষ্ঠানং ততো বিদুঃ ॥ ২ ॥ তদূর্দ্ধে নাভিদেশে তু মণিপূরং মহৎপ্রভং। মেঘাভং বিদ্যুদাভঞ্চ বহুতেজোময়ং ততঃ ॥ মণিবদ্ভিন্নং তৎ পদ্মং মণিপূরং তথোচ্যতে। দশভিশ্চ দলৈর্যুক্তং ডাদি-ফান্তাক্ষরান্বিতং ॥ শিবেনাধিষ্ঠিতং পদ্মং বিশ্বালোকৈককারণং।৩। তদূর্দ্ধেঽনাহতং পদ্মমুদ্যদাদিত্যসন্নিভং ॥ কাদি-ঠান্তাক্ষরৈরর্কপত্রৈশ্চ সমধিষ্ঠিতং। তন্মধ্যে বাণলিঙ্গন্তু সূর্য্যাযুতসমপ্রভং ॥ শব্দব্রহ্মময়ং শব্দোঽনাহতস্তত্র দৃশ্যতে। তেনাহতাখ্যং পদ্মং তন্মুনিভিঃ পরি-কীর্ত্ত্যতে ॥ আনন্দসদনং তত্তু পুরুষাধি-ষ্ঠিতং পরং।৪। তদূর্দ্ধন্তু বিশুদ্ধাখ্যং দলষোড়শপঙ্কজং ॥ স্বরৈঃ ষোড়শকৈ-র্যুক্তং ধূম্রবর্ণং মহৎপ্রভং। বিশুদ্ধং তনুতে যস্মাৎ জীবস্য হংসলোকনাৎ ॥ বিশুদ্ধং পদ্মমাখ্যাতমাকাশাখ্যং মহৎ পরং।৫। আজ্ঞাচক্রং তদূর্দ্ধে তু আত্ম-নাধিষ্ঠিতং পরং ॥ আজ্ঞা সংক্রমণং তত্র গুরোরাজ্ঞেতি কীর্ত্তিতং।৬। কৈলা-সাখ্যং তদূর্দ্ধে তু বোধনীস্তু তদূর্দ্ধতঃ ॥ এবঞ্চ শিবচক্রাণি প্রোক্তানি তব সুব্রত। সহস্রারাম্বুজং বিন্দুস্থানং তদূর্দ্ধমীরিতং ॥ ইতি তন্ত্রসারঃ ॥

পদ্মঃ (পুং) দাশরথিঃ। নাগবিশেষঃ। ইতি ধরণিঃ ॥ পদ্মোত্তরাত্মজঃ। স তু দ্বাদশ-জিনচক্রবর্ত্ত্যন্তর্গতচক্রবর্ত্তিবিশেষঃ। বল-দেবঃ। ইতি হেমচন্দ্রঃ ॥ ষোড়শরতি-বন্ধান্তর্গতপ্রথমবন্ধঃ। যথা। হস্তাভ্যাঞ্চ সমালিঙ্গ্য নারী পদ্মাসনোপরি। রমে-দ্গাঢ়ং সমাকৃষ্য বন্ধোঽয়ং পদ্মসংজ্ঞকঃ ॥ ইতি রতিমঞ্জরী ॥

পদ্মকং (ক্লী) বিন্দুজালকং। গজস্য মুখা-দিস্থো বিন্দুসমূহঃ। ইত্যমরভরতৌ ॥ পদ্মকাষ্ঠং। ইতি মেদিনীধরণ্যৌ ॥ কুষ্ঠং। ইতি রাজনির্ঘণ্টঃ ॥

পদ্মকন্দঃ (পুং) কমলকন্দঃ। তৎপর্য্যায়ঃ। শালূকং ২ পদ্মমূলং ৩ কটাহ্বয়ং ৪ শালুকং ৫ জলালূকং ৬। অস্য গুণাঃ। কটুত্বং। বিষ্টম্ভিত্বং। রূক্ষত্বং। রুচ্যত্বং। কষায়ত্বং। কফপিত্তকাশতৃষ্ণাদাহবিনাশি-ত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ অপি চ। পদ্মাদিকন্দঃ শালূকং করহাটশ্চ কথ্যতে। মৃণালমূলং ভিস্যাণ্ডং জলালূকঞ্চ কথ্যতে ॥ শালূকং শীতলং বৃষ্যং পিত্তদাহাস্রনুদ্-গুরু। দুর্জরং স্বাদুপাকঞ্চ স্তন্যানিলকফ-প্রদং ॥ সংগ্রাহি মধুরং রূক্ষং ভিস্যাণ্ডমপি তদ্গুণং। ইতি ভাবপ্রকাশঃ ॥

পদ্মকাষ্ঠং (ক্লী) ওষধিবিশেষঃ। তৎপর্য্যায়ঃ। পদ্মকং ২ পীতকং ৩ পীতং ৪ মালয়ং ৫ শীতলং ৬ হিমং ৭ শুভং ৮ কেদারজং ৯ রক্তং ১০ পাটলাপুষ্পসন্নিভং ১১ পদ্ম-বৃক্ষং ১২। অস্য গুণাঃ। শীতলত্বং। তিক্তত্বং। রক্তপিত্তবিনাশিত্বং। মোহ-দাহজ্বরভ্রান্তিকুষ্ঠবিস্ফোটশান্তিকারিত্বঞ্চ।

ইতি রাজনির্ঘণ্টঃ ॥ অপি চ। পদ্মকং পদ্মগন্ধি স্যাত্তথা পদ্মাহ্বয়ং স্মৃতং। পদ্মকং তুবরং তিক্তং শীতলং বাতলং লঘু ॥ বিসর্পদাহবিস্ফোটকুষ্ঠশ্লেষ্মাস্রপিত্তহৃৎ। গর্ভসংস্থাপনং রুচ্যং বমিব্রণতৃষাপ্রণুৎ ॥ ইতি ভাবপ্রকাশঃ ॥

পদ্মকী [ন্] (পুং) ভূর্জ্জবৃক্ষঃ। ইতি শব্দমালা ॥

পদ্মকেশরঃ (পুং ক্লী) কিঞ্জল্কঃ। ইতি রাজনির্ঘণ্টঃ ॥

পদ্মগন্ধং, পদ্মগন্ধি (ত্রি) পদ্মস্যেব গন্ধো যস্য তৎ। ইতি মুগ্ধবোধব্যাকরণং ॥

পদ্মগর্ভঃ (পুং) ব্রহ্মা। ইতি শব্দরত্নাবলী ॥

পদ্মচারিণী (স্ত্রী) উত্তরাপথভবস্বনামখ্যাতবৃক্ষবিশেষঃ। তৎপর্য্যায়ঃ। অব্যথা ২ অতিচরা ৩ পদ্মা ৪ চারটী ৫। ইত্যমরঃ ॥ অস্যাঃ পর্য্যায়ান্তরং গুণাশ্চ স্থলপদ্মিনীশব্দে দ্রষ্টব্যাঃ ॥

পদ্মদর্শনঃ (পুং) শ্রীবাসঃ। লোবান্ ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥

পদ্মতন্তুঃ (পুং) মৃণালং। ইতি রাজনির্ঘণ্টঃ ॥

পদ্মনাভঃ (পুং) বিষ্ণুঃ। ইত্যমরঃ ॥ শয়নে তস্য স্মরণীয়ত্বং যথা। ঔষধে চিন্তয়েদ্বিষ্ণুং ভোজনে চ জনার্দ্দনং। শয়নে পদ্মনাভঞ্চ বিবাহে চ প্রজাপতিং ॥ ইত্যাদি বৃহন্নন্দিকেশ্বরপুরাণং ॥ ভাবিজিনবিশেষঃ। ইতি হেমচন্দ্রঃ ॥

পদ্মনাভিঃ (পুং) পদ্মনাভঃ। ইতি দ্বিরূপকোষঃ ॥

পদ্মনালং (ক্লী) মৃণালং। যথা। কর্ণিকা পদ্মনালন্তু মৃণালং তন্তুলং বিসং। ইতি হেমচন্দ্রঃ

পদ্মপত্রং (ক্লী) পুষ্করমূলং। ইত্যমরঃ ॥ কমলদলঞ্চ ॥

পদ্মপর্ণং (ক্লী) পদ্মপত্রং। পুষ্করমূলং। ইত্যমরটীকা ॥

পদ্মপলাশলোচনঃ (পুং) বিষ্ণুঃ। পদ্মপুষ্পদলাকারচক্ষুর্বিশিষ্টত্বাৎ। যথা। নান্যং ততঃ পদ্মপলাশলোচনাদ্দুঃখচ্ছিদন্তে মৃগয়ামি কঞ্চন। যো মৃগ্যতে হস্তগৃহীতপদ্ময়া শ্রিয়েতরৈরঙ্গ বিমৃগ্যমাণয়া ॥ ইতি শ্রীভাগবতে ৪ স্কন্ধঃ ॥

পদ্মপাণিঃ (পুং) ব্রহ্মা। ইতি শব্দরত্নাবলী ॥ বুদ্ধঃ। সূর্য্যঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

পদ্মপুষ্পঃ (পুং) কর্ণিকারবৃক্ষঃ। পিকাঙ্গপক্ষী। ইতি শব্দচন্দ্রিকা ॥

পদ্মপ্রভঃ (পুং) চতুর্বিংশতিবৃত্তার্হদন্তর্গতন্। ইতি হেমচন্দ্রঃ ॥ পদ্মতুল্যপ্রভাযুক্তে ত্রি ॥

পদ্মপ্রিয়া (স্ত্রী) জরৎকারুমুনিপত্নী। মনসাদেবী। ইতি শব্দরত্নাবলী ॥

পদ্মবন্ধঃ (পুং) চিত্রকাব্যবিশেষঃ। শব্দালঙ্কারপ্রভেদঃ। যথা। পদ্মাদ্যাকারহেতুত্বে বর্ণানাং চিত্রমুচ্যতে। অস্য চ তথাবিধসন্নিবেশবশেন চমৎকারবিধায়িনামপি বর্ণানাং তথাবিধশ্রোত্রাকাশসমবায়বিশেষবশেন চ চমৎকারবিধায়িভির্বর্ণৈরভেদেনোপচারত্বাচ্ছব্দালঙ্কারত্বং। উদাহরণং যথা। মারমা সুষমা চারু রুচা মার

বধূত্তমা। মাত্ত ধূর্ত্ততমা বাসা সা বা মা মেস্ত মা রমা ॥ ইতি সাহিত্যদর্পণঃ ॥ অথ পদ্মদলেষু বর্ণবিন্যাসক্রমঃ ॥

বন্ধুঃ (পুং) সূর্য্যঃ। ইতি শব্দরত্নাবলী ॥ ভ্রমরঃ। ইতি শব্দচন্দ্রিকা ॥

পদ্মভূঃ (পুং) ব্রহ্মা। ইতি হলায়ুধঃ ॥

পদ্মমুখী (স্ত্রী) দুরালভা। ইতি শব্দচন্দ্রিকা ॥ পদ্মসদৃশমুখবিশিষ্টে ত্রি ॥

পদ্মযোনিঃ (পুং) ব্রহ্মা। যথা। অস্মাচ্চ কারণাদ্ব্রহ্মন্ পুত্রো ভবতু মে ভবান্। পদ্মযোনিরিতি খ্যাতো মৎপ্রিয়ার্থং জগন্ময়ঃ ॥ ইতি কৌর্ম্মে ৯ অধ্যায়ঃ ॥

পদ্মরাগঃ (পুং) রক্তবর্ণমণিবিশেষঃ। মাণিক ইতি ভাষা। তৎপর্য্যায়ঃ। শোণরত্নং ২ লোহিতকঃ ৩। ইত্যমরঃ ॥ লোহিতং ৪ কুরুবিন্দকং ৫। ইতি শব্দরত্নাবলী ॥ রাজনির্ঘণ্টোক্তপর্য্যায়গুণৌ মাণিক্যশব্দে দ্রষ্টব্যৌ। তস্য বর্ণো যথা। সিংহলে তু ভবেদ্রক্তং পদ্মরাগমনুত্তমং। পীতং কাণপুরোদ্ভুতং কুরুবিন্দমিতি স্মৃতং ॥ অশোকপল্লবচ্ছায়মমুং সৌগন্ধিকং বিদুঃ। তুম্বুরে ছায়য়া নীলং নীলগন্ধি প্রকীর্ত্তিতং ॥ উত্তমং সিংহলোদ্ভূতং নিকৃষ্টং তুম্বুরোদ্ভবং। মধ্যমং মধ্যমং জ্ঞেয়ং মাণিক্যং ক্ষেত্রভেদতঃ ॥ * ॥ তথা চ। বন্ধূকগুঞ্জাসকলেন্দ্রগোপজবাসনাসৃক্‌সমবর্ণশোভাঃ। ভ্রাজিষ্ণবো দাড়িমবীজবর্ণাস্তথাপরে কিংশুকপুষ্পভাসঃ ॥ সিন্দূরপদ্মোৎপলকুঙ্কুমানাং লাক্ষারসস্যাপি সমানবর্ণাঃ। সান্দ্রে নিরাগে প্রভয়া স্বয়ৈব ভান্তি স্বলক্ষ্ম্যা স্ফুটমধ্যশোভাঃ ॥ ভানোশ্চ ভাসামনুবেধযোগমাসাদ্য রশ্মিপ্রকরেণ দূরং। পার্শ্বানি সর্ব্বাণ্যনুরঞ্জয়ন্তি গুণোপপন্নাঃ স্ফটিকপ্রসূতাঃ ॥ কুসুম্ভনীলীব্যতিমিশ্ররাগপ্রত্যগ্ররক্তাম্বরতুল্যভাসঃ। তথাপরে রুক্ষরকণ্টকারীপুষ্পত্বিষো হিঙ্গুলকত্বিষোঽন্যে ॥ চকোরপুংস্কোকিলসারসানাং নেত্রাবভাসশ্চ ভবন্তি কেচিৎ। অন্যে পুনর্নাতিবিপুষ্পিতানাং তুল্যত্বিষঃ কোকনদোদরাণাং ॥ প্রভাবকাঠিন্যগুরুত্বযোগৈঃ প্রায়ঃ সমানাঃ স্ফটিকোদ্ভবানাং। আনীলরক্তোৎপলচারুভাসঃ সৌগন্ধিকাখ্যা মণয়ো ভবন্তি ॥ যো মন্দরাজঃ কুরুবিন্দজেষু স এব জাতঃ স্ফটিকোদ্ভবেষু। নিরর্চ্চিষোঽন্তর্ব্বহুলী ভবন্তি প্রভাববন্তোঽপি ন তৎসমানাঃ ॥ যে তু রাবণগঙ্গায়াং জায়ন্তে কুরুবিন্দকাঃ। পদ্মরাগা ঘনং রাগং বিভ্রাণাঃ স্বস্ফুটার্চ্চিষঃ ॥ বর্ণানুযায়িনস্তেষামন্ধ্রদেশে তথাপরে।

ন জায়ন্তে তু যে কেচিৎ মূল্যলেশমবাপ্নুয়ুঃ॥ তথৈব স্ফটিকোত্থানাং দেশে তুম্বুরসংজ্ঞকে। সধর্ম্মাণঃ প্রজায়ন্তে স্বল্পমূল্যা হি তে স্মৃতাঃ॥ * ॥ অথ জাত্যাদি। মাণিক্যস্য প্রবক্ষ্যামি যথাজাতিচতুষ্টয়ং। ব্রহ্মক্ষত্রিয়বৈশ্যাশ্চ শূদ্রশ্চাথ যথাক্রমং॥ রক্তশ্বেতো ভবেদ্বিপ্রস্তুতিরক্তস্তু ক্ষত্রিয়ঃ। রক্তপীতো ভবেদ্বৈশ্যো রক্তনীলস্তথান্ত্যজঃ। পদ্মরাগো ভবেদ্বিপ্রঃ কুরুবিন্দস্তু বাহুজঃ। সৌগন্ধিকো ভবেদ্বৈশ্যো মাংসখণ্ডস্তথান্ত্যজঃ॥ শোণপদ্মসমাকারঃ খদিরাঙ্গারসপ্রভঃ। পদ্মরাগো দ্বিজঃ প্রোক্তশ্ছায়াভেদেন সর্ব্বদা॥ গুঞ্জাসিন্দুরবন্ধূকনাগরঙ্গসমপ্রভঃ। দাড়িমীকুসুমাভাসঃ কুরুবিন্দস্তু বাহুজঃ॥ হিঙ্গুলাভাশোকপুষ্পাভমীষৎপীতলোহিতং। জবালাক্ষারসপ্রায়ং বৈশ্যং সৌগন্ধিকং বিদুঃ॥ আরক্তঃ কান্তিহীনশ্চ চিক্কণশ্চ বিশেষতঃ। মাংসখণ্ডসমাভাসো হ্যন্ত্যজঃ পাপনাশনঃ॥ মাংসখণ্ডস্তু নীলগন্ধেঃ সংজ্ঞা॥ * ॥ অথ দোষাঃ। মাণিক্যস্য সমাখ্যাতা অষ্টৌ দোষা মুনীশ্বরৈঃ। দ্বিচ্ছায়ঞ্চ দ্বিরূপঞ্চ সম্ভেদঃ কর্করস্তথা॥ অশোভনং কোকিলঞ্চ জলং ধূম্রাভিধঞ্চ বৈ। গুণাশ্চত্বার আখ্যাতাশ্ছায়াঃ ষোড়শ কীর্ত্তিতাঃ॥ ছায়াস্তু পূর্ব্বোক্তা এব। ছায়াদ্বিতয়সম্বন্ধাদ্দ্বিচ্ছায়ং বন্ধুনাশনং। দ্বিরূপং দ্বিপদন্তেন মাণিক্যেন পরাভবঃ॥ সম্ভেদো ভিন্নমিত্যুক্তং শস্ত্রঘাতবিধায়কঃ। কর্করং কর্করাযুক্তং পশুবন্ধুবিনাশকৃৎ॥ দুগ্ধেনেব সমালিপ্তমঘনীপুটমুচ্যতে। অশোভনং সমুদ্দিষ্টং মাণিক্যং বহুদুঃখকৃৎ॥ মধুবিন্দুসমচ্ছায়ং কোকিলং পরিকীর্ত্তিতং। আয়ুর্লক্ষ্মীযশো হন্তি সদোষং তন্ন ধারয়েৎ॥ রাগহীনং জলং প্রোক্তং ধনধান্যাপবাদকৃৎ। ধূম্রং ধূমসমাকারং বৈদ্যুতং ভয়মাবহেৎ॥ তথা। শোভাদ্বিতয়বন্তো যে মণয়ঃ ক্ষতিকারকাঃ। উভয়ত্র পদং যেষাং তেন চ স্যাৎ পরাভবঃ॥ ভিন্নেন যুদ্ধে মৃত্যুঃ স্যাৎ কর্করন্ধননাশকৃৎ। দুগ্ধেনেব সমালিপ্তঃ পুটকে যস্তু সম্ভবেৎ॥ দুঃখকৃৎ স সমাখ্যাতো ন নৃপৈ রক্ষণীয়কঃ। মধুবিন্দুসমা শোভা কোকিলানাং প্রকীর্ত্তিতা॥ তেষাঞ্চ বহুভেদাঃ স্যুর্ন তে ধার্য্যাঃ কদাচন। *। অথ গুণাঃ। গুরুত্বং স্নিগ্ধতা চৈব বৈমল্যমতিরক্ততা॥ তথা চ। বর্ণাধিকং গুরুত্বঞ্চ স্নিগ্ধতা সমতাচ্ছতা। অর্চ্চিষ্মত্তা মহত্তা চ মণীনাং গুণসংগ্রহঃ॥ * ॥ ফলং। যে কর্করাশ্ছিদ্রমলোপদিগ্ধাঃ প্রভাবিমুক্তাঃ পরুষা বিবর্ণাঃ। ন তে প্রশস্তা মণয়ো ভবন্তি সমানতো জাতিগুণৈঃ সমস্তৈঃ॥ দোষোপসৃষ্টং মণিমপ্রবোধাদ্বিভর্ত্তি যঃ কশ্চন কঞ্চিদেকং। তং বন্ধুদুঃখায় সবন্ধুবিত্তনাশাদয়ো দোষগণা ভজন্তে॥ সপত্নমধ্যেঽপি কৃতাধিবাসং প্রমাদবৃত্তাবপি বর্ত্তমানং। ন পদ্মরাগস্য মহাগুণস্য ভর্ত্তারমাপৎ সমুপৈতি ক্বাচিৎ॥ দোষোপসর্গপ্রভবাশ্চ যে তে নোপদ্রবাস্তং সমভিদ্রবন্তি। গুণৈঃ সমুখ্যৈঃ

সকলৈরুপেতং যঃ পদ্মরাগং প্রযতো বিভর্ত্তি॥ * ॥ পরীক্ষা যথা। বালার্ক-করসংস্পর্শাৎ যঃ শিখাং লোহিতাং বমেৎ। রঞ্জয়েদাশ্রমন্বাপি স মহাগুণ উচ্যতে॥ দুগ্ধে শতগুণে ক্ষিপ্তো রঞ্জয়েদ্যঃ সমন্ততঃ। বমেচ্ছিখাং লোহিতাং বা পদ্মরাগঃ স উত্তমঃ॥ অন্ধকারে মহাঘোরে যো ন্যস্তঃ সন্ মহামণিঃ। প্রকাশয়তি সূর্য্যাভঃ স শ্রেষ্ঠঃ পদ্মরাগকঃ॥ পদ্মকোষে তু যন্ন্যস্তং বিকাশয়তি তৎক্ষণাৎ। পদ্মরাগবরো হ্যেষ দেবানামপি দুর্লভঃ॥ সর্ব্বারিষ্টপ্রশমনাঃ সর্ব্বসম্পত্তিদায়কাঃ। চত্বারস্তু ময়োদ্দিষ্টা গুণিনশ্চ যথোত্তরং॥ যো মণির্দৃশ্যতে দূরাজ্জ্বলদগ্নিসমচ্ছবিঃ। বংশকান্তিঃ স বিজ্ঞেয়ঃ সর্ব্বসম্পত্তিকারকঃ॥ পঞ্চ সপ্ত নব বিংশতি রাগঃ ক্ষিপ্ত এব সকলঃ খলুঃ বস্ত্রে। বর্জ্জয়েদ্বমতি বা করজালমুত্তরোত্তরমহাগুণিনস্তে॥ নীলং রসং দুগ্ধরসং জলং বা যে রঞ্জয়ন্তি দ্বিশতপ্রমাণং। তে তে যথাপূর্ব্বমতিপ্রশস্তাঃ সৌভাগ্যসম্পত্তিবিধানদায়কাঃ॥ * ॥ পরিমাণং। গুঞ্জাফলপ্রমাণস্তু দশসপ্তত্রিগুঞ্জকান্। পদ্মরাগস্তুলয়তি যথাপূর্ব্বং মহাগুণঃ॥ ক্রোষ্টুকোলফলাকারো দ্বাদশাষ্টাব্ধিগুঞ্জকান্। পদ্মরাগস্তুলয়তি যথাপূর্ব্বং মহাগুণঃ॥ বদরীফলতুল্যো যঃ স্বরদিগ্বসুমাষকঃ। তথা ধাত্রীফলত্রিংশদ্বিংশতিদ্ব্যষ্টমাষকঃ॥ তথাক্ষফলতুল্যো যো বহ্নিপক্ষৈকমাষকঃ। তাম্বূলফলমানো যশ্চতুস্ত্রিদ্বিকতোলকঃ॥ বিম্বীফলসমাকারো বসুষড়্দশতোলকঃ। অতঃপরং প্রমাণেন মানেন চ ন লভ্যতে। যদি লভ্যেত পুণ্যেন তদা সিদ্ধিমবাপ্নুয়াৎ॥ কেচিচ্চারুতরাঃ সন্তি জাতীনাং প্রতিরূপকাঃ। বিজাতয়ঃ প্রযত্নেন বিদ্বাংস্তানুপলক্ষয়েৎ॥ কলসপুরোদ্ভবসিংহলতুম্বুরুদেশোত্থমুক্তমালীয়াঃ। শ্রীপর্ণিকাশ্চ সদৃশা বিজাতয়ঃ পদ্মরাগাণাং॥ তুষোপসর্গাৎ কলসাভিধানমাতাম্রভাবাদপি তুম্বুরুত্থং। কার্ষ্ণ্যাত্তথা সিংহলদেশজাতং মুক্তাভিধানং নভসঃ স্বভাবাৎ। শ্রীপর্ণকং দীপ্তিনিরাকৃতিত্বাদ্বিজাতিলিঙ্গাশ্রয় এবভেদঃ॥ তথা চ। স্নেহপ্রদেহো মৃদুতা লঘুত্বং বিজাতিলিঙ্গং খলু সার্ব্বজন্যং। যঃ শ্যামিকাং পুষ্যতি পদ্মরাগো যো বা তুষাণামিব চূর্ণমধ্যঃ॥ স্নেহপ্রদিগ্ধো ন চ যো বিভাতি যো বা প্রমৃষ্টঃ প্রজহাতি দীপ্তিং। আক্রান্তমূর্দ্ধা চ তথাঙ্গুলিভ্যাং যঃ কালিকাং পার্শ্বগতাং বিভর্ত্তি॥ সম্প্রাপ্য চ্যোৎক্ষেপপথানুবৃত্তিং বিভর্ত্তি যঃ সর্ব্বগুণানতীব। তুল্যপ্রমাণস্য চ তুল্যজাতের্যো বা গুরুত্বেন ভবেন্ন তুল্যঃ॥ প্রাপ্যাপি রত্নাকরজাং স্বজাতিং লক্ষেদ্গুরুত্বেন গুণেন বিদ্বান্॥ অপ্রণশ্যতি সন্দেহে শিলায়াং পরিঘর্ষয়েৎ। ঘৃষ্টো যোহত্যন্তশোভাবান্ গরিমাণং ন মুঞ্চতি। স জ্ঞেয়ঃ শুদ্ধজাতিস্তু জ্ঞেয়াশ্চান্যে বিজাতয়ঃ॥ স্বজাতকং সমুখেন বিলিখেদ্বা পরস্পরং। বজ্রস্বা কুরুবিন্দস্বা বিমুচ্যান্যোন্য-

কেনচিৎ। ন শক্যং লেখনং কর্ত্তুং পদ্মরাগেন্দ্রনীলয়োঃ ॥ জাত্যস্য সর্ব্বেঽপি মণের্ন জাতু বিজাতয়ঃ কান্তিসমানবর্ণাঃ। তথাপি নানাকরণার্থমেবং ভেদপ্রকারঃ পরমঃ প্রদিষ্টঃ ॥ গুণোপপন্নেন সহাববদ্ধো মণিস্তু ধার্য্যো বিগুণেন জাত্যঃ। ন কৌস্তুভেনাপি সহাববদ্ধং বিদ্বান্ বিজাতিং বিভৃয়াৎ কদাচিৎ ॥ চণ্ডাল একোঽপি যথা দ্বিজাতীন্ সমেত্য ভূরীনপহন্ত্যযত্নাৎ। তথা মণীন্ ভূরিগুণোপপন্নান্ শক্নোতি বিদ্রাবয়িতুং বিজাতঃ ॥ * ॥ অথ মূল্যং। বালার্কাভিমুখং কৃত্বা দর্পণে ধারয়েন্মণিং। তত্র কান্তিবিভাগেন ছায়াভাগং বিনির্দ্দিশেৎ ॥ বজ্রস্য যত্তণ্ডুলসংখ্যয়োক্তং মূল্যং সমুন্নাপিতগৌরবস্য। তৎপদ্মরাগস্য গুণান্বিতস্য স্যান্মাষকাখ্যা তুলিতস্য মূল্যং ॥ যন্মূল্যং পদ্মরাগস্য সগুণস্য প্রকীর্ত্তিতং। তাবন্মূল্যং তথাশুদ্ধে কুরুবিন্দে বিধীয়তে ॥ সগুণে কুরুবিন্দে চ যাবন্মূল্যং প্রকীর্ত্তিতং। তাবন্মূল্যচতুর্থাংশহীনং স্যাদ্বৈ সুগন্ধিকে ॥ যাবন্মূল্যং সমাখ্যাতং বৈশ্যবর্ণে চ সূরিভিঃ। তাবন্মূল্যচতুর্থাংশং হীয়তে শূদ্রজন্মনি ॥ পদ্মরাগঃ পণং যস্তু ধত্তে লাক্ষারসপ্রভঃ। কার্ষাপণসহস্রাণি ত্রিংশন্মূল্যং লভেত সঃ ॥ ইন্দ্রগোপকসঙ্কাশঃ কর্ষত্রয়ধৃতো মণিঃ। দ্বাবিংশতিং সহস্রাণাং তস্য মূল্যং বিনির্দ্দিশেৎ ॥ একোনো নূয়তে যস্তু জবাকুসুমসন্নিভঃ। কার্ষাপণসহস্রাণি তস্য মূল্যং চতুর্দ্দশ ॥ বালাদিত্যদ্যুতিনিভঃ কর্ষং যস্তু প্রতুল্যতে। কার্ষাপণশতানাস্তু মূল্যং সদ্ভিঃ প্রকীর্ত্তিতং ॥ যস্তু দাড়িমপুষ্পাভঃ কর্ষার্দ্ধেন তু সম্মিতঃ। কার্ষাপণশতানাস্তু বিংশতিং মূল্যমাদিশেৎ ॥ চত্বারো মাষকা যস্তু রক্তোৎপলদলপ্রভঃ। মূল্যং তস্য বিধাতব্যং সূরিভিঃ শতপঞ্চকং ॥ দ্বিমাষকো যস্তু গুণৈঃ সর্ব্বৈরেব সমন্বিতঃ। তস্য মূল্যং বিধাতব্যং দ্বিশতং তত্ত্ববেদিভিঃ ॥ মাষকৈকমিতো যস্তু পদ্মরাগো গুণান্বিতঃ ॥ শতৈকসম্মিতং বাচ্যং মূল্যং রত্নবিচক্ষণৈঃ ॥ অতোঽন্যূনপ্রমাণাস্তু পদ্মরাগা গুণোত্তরাঃ। স্বর্ণদ্বিগুণমূল্যেন মূল্যং তেষাং প্রকল্পয়েৎ ॥ কার্ষাপণঃ সমাখ্যাতঃ পুরাণদ্বয়সম্মিতঃ। অন্যে কুসুম্ভপানীয়মঞ্জিষ্ঠোদকসন্নিভাঃ ॥ কাষায়া ইতি বিখ্যাতাঃ স্ফটিকপ্রভবাশ্চ তে। তেষাং দোষান্ গুণান্ বাপি পদ্মরাগবদাদিশেৎ ॥ মূল্যমল্পন্তু বিজ্ঞেয়ং ধারণেঽল্পফলং তথা। ব্রহ্মক্ষত্রিয়বৈশ্যান্ত্যাশ্চতুর্ধা যে প্রকীর্ত্তিতাঃ ॥ চতুর্বিধৈর্নৃপতিভির্ধার্য্যা সম্পত্তিহেতবে। অতোঽন্যথা ধৃতঃ কুর্য্যাদ্রোগশোকভয়ক্ষয়ং ॥ ইতি যুক্তিকল্পতরৌ পদ্মরাগপরীক্ষা ॥

পদ্মলাঞ্ছনঃ (পুং) ব্রহ্মা। সূর্য্যঃ। কুবেরঃ। রাজা। ইতি মেদিনী ॥

পদ্মলাঞ্ছনা (স্ত্রী) তারা। লক্ষ্মীঃ। সরস্বতী। ইতি মেদিনী ॥

পদ্মবর্ণকং (ক্লী) পুষ্করমূলং। ইতি জটাধরঃ ॥ পদ্মতুল্যবর্ণযুক্তে ত্রি ॥

পদ্মবাসা (স্ত্রী) লক্ষ্মীঃ। ইতি হেমচন্দ্রঃ ॥

পদ্মবীজং (ক্লী) কমলবীজং। তৎপর্য্যায়ঃ। পদ্মাক্ষং ২ গালোড্যং ৩ কন্দলী ৪ ভেণ্ডা ৫ ক্রৌঞ্চাদনী ৬ ক্রৌঞ্চা ৭ শ্যামা ৮ পদ্মকর্কটী ৯। অস্য গুণাঃ। কটুত্বং। স্বাদুত্বং। পিত্তচ্ছর্দ্দিদাহাস্রশোষনাশিত্বং। পাচনত্বং। রুচিকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ পদ্মবীজং হিমং স্বাদু কষায়ং তিক্তকং গুরু। বিষ্টম্ভি বৃষ্যং রূক্ষঞ্চ গর্ভসংস্থাপকং পরং॥ কফবাতকরং বল্যং গ্রাহি পিত্তাস্রদাহনুৎ। ইতি ভাবপ্রকাশঃ।

পদ্মবীজাভং (ক্লী) মখান্নং। মাখানা ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

পদ্মা (স্ত্রী) লক্ষ্মীঃ। লবঙ্গং। পদ্মচারিণী। ইত্যমরঃ॥ পন্নগী। সা তু মনসা। ফঞ্জিকা। ইতি মেদিনীশব্দরত্নাবল্যৌ॥ বৃত্তার্হন্মাতা। ইতি হেমচন্দ্রঃ॥ কুসুম্ভপুষ্পং। ইতি রত্নমালা॥ বৃহদ্রথরাজকন্যা কল্কিদেবেন বিবাহিতা। যথা। হরেরাগমনং শ্রুত্বা সহর্ষোঽভূদ্বৃহদ্রথঃ। পুরোধসা ব্রাহ্মণৈশ্চ পাত্রৈর্মিত্রৈঃ সুমঙ্গলৈঃ॥ বাদ্যতাণ্ডবগীতৈশ্চ পূজায়োজনপাণিভিঃ। জগামানয়িতুং কল্কিং সার্দ্ধং নিজজনৈঃ প্রভুঃ॥ ততো জলাশয়াভ্যাসং গত্বা বিষ্ণুযশঃসুতং। মণিবেদিকমাসীনং ভুবনৈকগতিং পতিং॥ দদর্শ পুরতো রাজা রূপশীলগুণাকরং। সাশ্রুঃ সপুলকঃ শং দৃষ্ট্বা সাধুতমর্চ্চয়ৎ॥ জ্ঞানাগোচরমেতন্মে তবাগমনমীশ্বর। যথা মান্ধাতৃপুত্রস্য যদুনাথেন কাননে॥ ইত্যুক্ত্বা তং পূজয়িত্বা সমানীয় নিজাশ্রমে। হর্ম্ম্যপ্রাসাদসংবাধে স্থাপয়িত্বা দদৌ সুতাং॥ পদ্মাং পদ্মবিশালাক্ষীং পদ্মনেত্রায় পদ্মিনীং। পদ্মজাদেশিতঃ পদ্মনাভায়াদাদ্ যথা শ্রিয়ং॥ কল্কির্লব্ধ্বা প্রিয়াং ভার্য্যাং সিংহলে সাধুসংকৃতঃ। সমুবাস বিশেষজ্ঞঃ সমীক্ষ্য দ্বীপমুত্তমং॥ ইতি কল্কিপুরাণে ১০ অধ্যায়ঃ॥

পদ্মাকরঃ (পুং) পদ্মজনকজলাশয়ঃ। তৎপর্য্যায়ঃ। তড়াগঃ ২ কাসারঃ ৩ সরসী ৪ সরঃ ৫। ইত্যমরঃ॥ সরোজিনী ৬। ইতি জটাধরঃ॥ সরোবরঃ ৭ তড়াকঃ ৮ তটাকঃ ৯ সরসং ১০ সরং ১১ সরকং ১২। ইতি শব্দরত্নাবলী॥ পঞ্চ সদৈবাগাধে মহাজলাশয়ে সপদ্মে যোগ্যতয়া নিষ্পদ্মে চ। পঞ্চৈব সরোমাত্রে। ইতি পঞ্জিকাকোঙ্ককটাদয়োঽপি। পদ্মাকরাদিদ্বয়ং সপদ্মাগাধজলাশয়ে। কাসারাদিত্রয়ং কৃত্রিমপদ্মাকরে। ইতি স্বাম্যাদয়ঃ। পদ্মাকরাদিদ্বয়ং পদ্মযুক্তজলাশয়মাত্রে। কাসারাদিত্রয়ং সরোবরমাত্রে। ইত্যন্যে। পদ্মানামাকর উৎপত্তিস্থানং পদ্মাকরঃ ক্বচিৎ পদ্মশূন্যেঽপি যোগ্যতয়েতি সুভূতিঃ। ইতি ভরতঃ॥

পদ্মাটঃ (পুং) চক্রমর্দ্দঃ। ইত্যমরঃ॥

পদ্মালয়া (স্ত্রী) লক্ষ্মীঃ। লবঙ্গং। ইত্যমরঃ॥

পদ্মাবতী (স্ত্রী) মনসাদেবী। নদীবিশেষঃ। পদ্মা ইতি খ্যাতা। ইতি শব্দরত্নাবলী॥ পদ্মচারিণী। ইতি জটাধরঃ॥ জয়দেব-

পত্নী। যথা। জয়তি পদ্মাবতীরমণজয়দেবকবিভারতীভণিতমতিশাতং। ইতি গীতগোবিন্দঃ ॥

পদ্মাবতীপ্রিয়ঃ (পুং) জরৎকারুমুনিঃ। ইতি শব্দরত্নাবলী ॥ জয়দেবশ্চ ॥

পদ্মাসনং (ক্লী) যোগাসনবিশেষঃ। যথা। বামোরূপরি দক্ষিণং নিয়মতঃ সংস্থাপ্য বামং তথা দক্ষোরূপরি পশ্চিমেন বিধিনা ধৃত্যা করাভ্যাং ধৃতং। অঙ্গুষ্ঠং হৃদয়ে নিধায় চিবুকং নাসাগ্রমালোকয়েদেতদ্ব্যাধিবিকারনাশনকরং পদ্মাসনং প্রোচ্যতে॥ অন্যদত্রাপি। বামোরূপরি দক্ষিণং হি চরণং সংস্থাপ্য বামং তথাপ্যন্যোরূপরি তস্য বন্ধনবিধৌ ধৃত্বা করাভ্যাং দৃঢ়ং। অঙ্গুষ্ঠং হৃদয়ে নিধায় চিবুকং নাসাগ্রমালোকয়েদেতদ্ব্যাধিবিনাশকারি যমিনাং পদ্মাসনং প্রোচ্যতে ॥ ইতি গোরক্ষসংহিতা ॥ পূজার্থং ধাতুময়পদ্মাকারাসনঞ্চ। রতিবিষয়কপদ্মাসনন্তু পদ্মশব্দে দ্রষ্টব্যং ॥

পদ্মাসনঃ (পুং) ব্রহ্মা। কমলাসনঃ। ইত্যমরদর্শনাৎ ॥

পদ্মাহ্বা (স্ত্রী) পদ্মচারিণী। ইতি রাজনির্ঘণ্টঃ ॥

পদ্মাক্ষং (ক্লী) পদ্মবীজং। ইতি হারাবলী ॥ পদ্মতুল্যাক্ষে ত্রি ॥

পদ্মিনী (স্ত্রী) পদ্মযুক্তদেশঃ। পদ্মসমূহঃ। পদ্মলতা। ইতি ভরতঃ ॥ তৎপর্য্যায়ঃ। নলিনী ২ বিসিনী ৩। ইত্যমরঃ ॥ মৃণালিনী ৪ কমলিনী ৫ পুটকিনী ৬ পঙ্কজিনী ৭ সরোজিনী ৮। ইতি মাধবঃ নালিকিনী৯ নালীকিনী১০অরবিন্দিনী১১। ইতি কোষান্তরং ॥ অম্ভোজিনী ১২ পুষ্করিণী ১৩ জম্বালিনী ১৪। ইতি শব্দরত্নাবলী ॥ অব্জিনী ১৫। তস্যা লক্ষণং যথা। মূলনালদলোৎফুল্লফলৈঃ সমুদিতঃ পুনঃ। পদ্মিনী প্রোচ্যতে প্রাজ্ঞৈর্বিসিন্যাদিশ্চ সা স্মৃতা ॥ তস্যা গুণাঃ। পদ্মিনী মধুরা তিক্তা কষায়া শিশিরা পরা। পিত্তক্রিমিশোষবান্তিভ্রান্তিসন্তাপদোষহৃৎ ॥ ইতি রাজনির্ঘণ্টঃ ॥ * ॥ চতুর্ব্বিধস্ত্রীমধ্যে স্ত্রীবিশেষঃ। তস্যা লক্ষণং যথা। ভবতি কমলনেত্রা নাসিকা ক্ষুদ্ররন্ধ্রা অবিরলকুচযুগ্মা দীর্ঘকেশী কৃশাঙ্গী। মৃদুবচনসুশীলা নৃত্যগীতানুরক্তা সকলতনুসুবেশা পদ্মিনী পদ্মগন্ধা ॥ ইতি রতিমঞ্জরী ॥ * ॥ সরোবরং। পদ্মং। ইতি বিশ্বঃ ॥ মৃণালং। ইতি শব্দমালা ॥ হস্তিনী। ইতি ধরণিঃ ॥

পদ্মিনীকণ্টকঃ (পুং) ক্ষুদ্ররোগবিশেষঃ। পদ্মকাঁটা ইতি ভাষা। তল্লক্ষণং যথা। কণ্টকৈরাচিতং বৃত্তং কণ্ডুমৎপাণ্ডুমণ্ডলং। পদ্মিনীকণ্টকপ্রখ্যৈস্তদাখ্যং কফবাতজং ॥ আচিতং ব্যাপ্তং। পদ্মিনীকণ্টকপ্রখ্যৈঃ পদ্মিনীনালকণ্টকসদৃশৈঃ। তদাখ্যং পদ্মিনীকণ্টকনামকং ॥ * ॥ তচ্চিকিৎসা যথা। পদ্মিনীকণ্টকে রোগে ছর্দ্দয়েন্নিম্ববারিণা। তেনৈব সিদ্ধং সক্ষৌদ্রং সর্পিঃ পাতুং প্রদাপয়েৎ ॥ নিম্বারগ্বধকল্কৈর্ব্বা মুহুরুদ্বর্ত্তনং হিতং। চতুর্গুণেন নিম্বোত্থপত্রক্কাথেন গোঘৃতং ॥ পচেত্ততস্তু নিম্বস্য কৃতমালস্য

পত্রজৈঃ। কল্কৈর্ভূয়ঃ পচেৎ সিদ্ধং তৎ পিবেৎ পলসংমিতং ॥ পদ্মিনীকণ্টকাদ্রোগান্মুক্তো ভবতি নান্যথা। ইতি নিম্বাদিঘৃতং। ইতি ভাবপ্রকাশঃ ॥

পদ্মিনীকান্তঃ (পুং) সূর্য্যঃ। ইতি জটাধরঃ ॥

পদ্মিনীবল্লভঃ (পুং) সূর্য্যঃ। ইতি শব্দরত্নাবলী ॥

পদ্মী [ন্] (পুং) হস্তী। ইত্যমরঃ ॥

পদ্মেশয়ঃ (পুং) বিষ্ণুঃ। ইতি হেমচন্দ্রঃ ॥

পদ্মোত্তরঃ (পুং) কুসুম্ভঃ। ইতি রাজনির্ঘণ্টঃ ॥

পদ্মোত্তরাত্মজঃ (পুং) জিনচক্রবর্ত্তিবিশেষঃ। ইতি হেমচন্দ্রঃ ॥

পদ্মোদ্ভবঃ (পুং) ব্রহ্মা। অব্জযোনিরিত্যমরদর্শনাৎ ॥

পদ্মোদ্ভবা (স্ত্রী) মনসা দেবী। যথা। কান্ত্যা কাঞ্চনসন্নিভাং সুবদনাং পদ্মাসনাং শোভনাং নাগেন্দ্রৈঃ কৃতশেখরাং বিষহরীং পদ্মোদ্ভবাং জাঙ্গলীং ॥ ইতি তস্যাঃ পৌরাণিকধ্যানং ॥

পদ্যং (ক্লী) কবিকৃতিঃ। শ্লোকঃ। ইত্যমরঃ ॥ তস্য লক্ষণং। পদ্যং চতুষ্পদী তচ্চ বৃত্তং জাতিরিতি দ্বিধা। বৃত্তমক্ষরসংখ্যাতং জাতির্মাত্রাকৃতা ভবেৎ ॥ ইতি ছন্দোমঞ্জরী ॥ শাঠ্যং। ইতি জটাধরঃ ॥

পদ্যঃ (পুং) শূদ্রঃ। ইতি মেদিনী ॥

পদ্যা (স্ত্রী) স্তুতিঃ। ইতি বিশ্বঃ ॥ পন্থাঃ। ইত্যমরঃ ॥

পদ্রঃ (পুং) গ্রামঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥ গ্রামপথঃ। ইত্যুণাদিকোষঃ ॥ ভূলোকঃ। দেশভেদঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ ॥

পদ্বঃ (পুং) ভূলোকঃ। রথঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ ॥ পন্থাঃ। ইত্যুণাদিকোষঃ ॥

পদ্বা [ন্] (পুং) পন্থাঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ ॥

পন ঙ ঈড়ে। ইতি কবিকল্পদ্রুমঃ ॥ ঈড়ঃ স্তুতিঃ। পনায়তি পনায়তে বিষ্ণুং ধীরঃ। আয়াস্তত্বাদুভয়পদমিতি বোপদেবঃ। অরে তু আয়স্যাপ্রাপ্তিপক্ষে আত্মনেপদমেব। ঙ অপনিষ্ট পেনে পনিতা পনিষীষ্ট পনিষ্যতে অপনিষ্যতে। ইতি দুর্গাদাসঃ ॥

পনসঃ (পুং) ফলবৃক্ষবিশেষঃ। কাঁটাল ইতি ভাষা। তৎপর্য্যায়ঃ। কণ্টকিফলঃ ২। ইত্যমরঃ ॥ মহাসর্জ্জঃ ৩ ফলিনঃ ৪ ফলবৃক্ষকঃ ৫ স্থূলঃ ৬ কণ্টফলঃ ৭ মূলফলদঃ ৮ অপুষ্পফলদঃ ৯ পূতফলঃ ১০ চম্পকোষঃ ১১ চম্পালুঃ ১২ কণ্টকীফলঃ ১৩ রসালঃ ১৪ মৃদঙ্গফলঃ ১৫ পানসঃ ১৬। ইতি শব্দরত্নাবলী ॥ অস্য ফলগুণাঃ। মধুরত্বং। সুপিচ্ছিলত্বং। গুরুত্বং। হৃদ্যত্বং। বলবীর্য্যবৃদ্ধিদত্বং। শ্রমদাহবিশোষনাশিত্বং। রুচিকারিত্বং। গ্রাহিত্বং। পরমদুর্জ্জরত্বঞ্চ। তদ্বীজগুণাঃ। ঈষৎকষায়ত্বং। মধুরত্বং। বাতলত্বং। গুরুত্বং। রুচ্যত্বং। তৎফলবিকারত্বগ্দোষনাশিত্বঞ্চ। বালস্তু নীরসং হৃদ্যং মধ্যং পকস্তু দীপনং। রুচিদং লবণাভ্যক্তং

পনসস্য ফলং স্মৃতং ॥ ইতি রাজ-নির্ঘণ্টঃ ॥*॥ পনসঃ কণ্টকিফলঃ ফণাশো-হতিবৃহৎফলঃ। পনসং শীতলং পক্কং স্নিগ্ধং পিত্তানিলাপহং ॥ তর্পণং বৃংহণং স্বাদু মাংসলং শ্লেষ্মলং ভৃশং। বল্যং শুক্রপ্রদং হন্তি রক্তপিত্তক্ষতক্ষয়ান্ ॥ আমন্তদেব বিষ্টম্ভি বাতলং তুবরং গুরু। দাহকৃন্মধুরং বল্যং কফমেদোবিমর্দ্দনং ॥ পনসোদ্ভূতবীজানি বৃষ্যাণি মধুরাণি চ। গুরূণি বদ্ধবর্চাংসি সৃষ্টমূত্রাণি সংবদেৎ ॥ অন্যচ্চ। মজ্জা পনসজো বৃষ্যো বাতপিত্ত-কফাপহঃ। বিশেষাৎ পনসং বর্জ্জ্যং গুল্মিভির্মন্দবহ্নিভিঃ ॥ অলং পনস-পাকায় ফলং কদলসম্ভবং। ইতি ভাব-প্রকাশঃ ॥*॥ কণ্টাফলং সুমধুরং বৃংহণং স্নিগ্ধশীতলং। দুর্জরং বাতপিত্তঘ্নং শ্লেষ্ম-শুক্রবলপ্রদং ॥ তদেব সর্পিষা যুক্তং স্নিগ্ধং হৃদ্যং বলপ্রদং। ছর্দ্দিঘ্নং ন চ চক্ষুষ্যং বৃষ্যঞ্চ বাতপিত্তনুৎ ॥ কণ্টাফল-মপক্কন্তু কষায়ং স্বাদু বাতলং। রক্ত-পিত্তহরং স্বাদু তৎফলাস্থ্যপি তদ্গুণং ॥ ইতি রাজবল্লভঃ ॥

পনসতালিকা (স্ত্রী) কণ্টকিফলং। ইতি শব্দমালা ॥

পনসিকা (স্ত্রী) ক্ষুদ্ররোগবিশেষঃ। স চ কর্ণমধ্যজাতব্রণঃ। তল্লক্ষণং যথা। কর্ণস্যা-ভ্যন্তরে জাতাং পিড়কামুগ্রবেদনাং। স্থিরাং পনসিকাং তান্তু বিদ্যাদ্বাতকফো-ত্থিতাং ॥ * ॥ তচ্চিকিৎসা যথা। ভিষক্ পনসিকাং পূর্ব্বং স্বেদয়েদথ লেপয়েৎ। কল্কৈর্ম্মনঃশিলাকুষ্ঠনিশাতালকদারুজৈঃ ॥ পক্কাং বিজ্ঞায় তাং ভিত্ত্বা ব্রণবৎ সমুপা-চরেৎ। ইতি ভাবপ্রকাশঃ ॥

পন্থাঃ [ইন্] (পুং) পথন্তি যান্ত্যনেন। রাস্তা ইতি ভাষা। তৎপর্য্যায়ঃ। অয়নং২ বর্ত্ম ৩ মার্গঃ ৪ অধ্বা ৫ পদবী ৬ সৃতিঃ ৭ সরণিঃ ৮ পদ্ধতিঃ ৯ পদ্যা ১০ বর্ত্তনী ১১ একপদী ১২। ইত্যমরঃ ॥ পথঃ ১৩ পদবিঃ ১৪ পদবীঃ ১৫ সরণী ১৬ শরণিঃ ১৭ পদ্ধতী ১৮ বর্ত্তনিঃ ১৯। ইতি ভরতঃ ॥ শরণী ২০ বাটঃ ২১ ধর্ম্মবর্ত্তনং ২২ মাথঃ ২৩ বিবধঃ ২৪ বীবধঃ ২৫। ইতি শব্দরত্না-বলী ॥ * ॥ তস্য লক্ষণং। ত্রিংশদ্ধনূংষি বিস্তীর্ণো দেশমার্গস্তু তৈঃ কৃতঃ। বিংশ-দ্ধনুগ্রামমার্গঃ সীমামার্গো দশৈব তু ॥ ধনূংষি দশ বিস্তীর্ণঃ শ্রীমান্রাজপথঃ কৃতঃ। নৃবাজিরথনাগানামসম্বাধঃ সুসঞ্চরঃ ॥ ধনূংষি চৈব চত্বারি শাখারথ্যাস্তু নির্ম্মিতাঃ। ত্রিকরাশ্চোপরথ্যাস্তু দ্বিকরাপ্যুপরক্ষকা ॥ জঙ্ঘাপথশ্চতুষ্পাদস্ত্রিপাদস্য গৃহান্তরং। বৃতীপাদস্ত্বর্দ্ধপাদঃ প্রাগ্বংশঃ পাদকঃ স্মৃতঃ ॥ অবকরঃ পরীবারঃ পাদমাত্রঃ সমন্ততঃ। ইতি দেবীপুরাণে গোপুর-দ্বারলক্ষণাধ্যায়ঃ ॥ * ॥ চতুষ্পথলক্ষণাদি যথা। একলিঙ্গে শ্মশানে বা শূন্যাগারে চতুষ্পথে। তত্রস্থঃ সাধয়েদ্যোগী বিদ্যাং ত্রিভুবনেশ্বরীং ॥ চতুষ্পথন্তু তৎ প্রোক্তং ত্রিকোণং যত্র বর্ত্ততে। ইতি নীলতন্ত্রং ॥*॥ পথগমনগুণাঃ। অধ্বা মেদঃকফস্থৌল্য-সৌকুমার্য্যবিনাশনঃ। যত্তু চংক্রমণং

নাতিদেহপীড়াকরং ভবেৎ ॥ তদায়ুর্বল-মেধাগ্নিপ্রদমিন্দ্রিয়শোধনং। ইতি রাজবল্লভঃ ॥ * ॥ ব্রাহ্মণাদিভ্যঃ পথাবকাশো দেয়ো যথা। পন্থা দেয়ো ব্রাহ্মণায় স্ত্রিয়ৈ রাজ্ঞে হ্যচক্ষুষে। বৃদ্ধায় ভারযুক্তায় রোগিণে দুর্ব্বলায় চ ॥ ইতি কৌর্ম্মে উপবিভাগে ১১ অধ্যায়ঃ ॥ * ॥ গোপথ-দানফলং যথা। গোমার্গস্য তথা কর্ত্তা গোলোকে ক্রীড়তে চিরং। ইতি প্রতিষ্ঠাতত্ত্বে হয়শীর্ষপঞ্চরাত্রং ॥ * ॥ অস্যাচারাদাবুপচারো যথা। বেদা বি-ভিন্নাঃ স্মৃতয়ো বিভিন্না নাসৌ মুনির্যস্য মতং ন ভিন্নং। ধর্ম্মস্য তত্ত্বং নিহিতং গুহায়াং মহাজনো যেন গতঃ স পন্থাঃ ॥ ইতি ধর্ম্মবকপ্রশ্নে যুধিষ্ঠিরোত্তরং ॥ * ॥ নরকবিশেষঃ। যত্রাটাট্যতে। ইতি মনৌ ৪ অধ্যায়ঃ ॥

পন্নং (ত্রি) চ্যুতং। গলিতং। ইত্যমরঃ ॥

পন্নঃ (পুং) অধোগমনং। ইতি সিদ্ধান্ত-কৌমুদ্যামুণাদিবৃত্তিঃ ॥

পন্নগঃ (পুং) সর্পঃ। ইত্যমরঃ ॥ ওষধীভেদঃ। পদ্মকাষ্ঠং। ইতি মেদিনী ॥

পন্নগকেশরঃ (পুং) নাগকেশরপুষ্পং। ইতি রাজনির্ঘণ্টঃ ॥

পন্নগাশনঃ (পুং) গরুড়ঃ। ইত্যমরঃ ॥

পন্নগী (স্ত্রী) পন্নগপত্নী। মনসা দেবী। যথা। পঞ্চম্যামসিতে পক্ষে সমুত্তিষ্ঠতি পন্নগী। ইতি তিথিতত্ত্বং ॥ সর্পিণীক্ষুপঃ। ইতি রাজনির্ঘণ্টঃ ॥

পন্নদ্ধা (স্ত্রী) চর্ম্মপাদুকা। ইতি হেমচন্দ্রঃ ॥

পন্নদ্ধ্রী (স্ত্রী) চর্ম্মপাদুকা। ইতি ত্রিকাণ্ড-শেষঃ ॥

পপিঃ (পুং) চন্দ্রঃ। পানকর্ত্তরি ত্রি। ইতি সংক্ষিপ্তসারব্যাকরণং ॥

পপীঃ (পুং) সূর্য্যঃ। চন্দ্রঃ। ইত্যুণাদিকোষঃ ॥

পপুঃ (পুং) পালকঃ। ধাত্র্যাং স্ত্রী। ইত্যু-ণাদিকোষঃ ॥

পমরা (স্ত্রী) গন্ধদ্রব্যবিশেষঃ। সল্লকী ইতি খ্যাতা। অস্যানুলেপনগুণঃ। পরমালক্ষ্মী-রক্ষোজ্বরনাশিত্বং। ইতি রাজবল্লভঃ ॥

পম্পা (স্ত্রী) ওড্রদেশস্থনদীবিশেষঃ। ইত্যু-ণাদিকোষঃ ॥

পম্ব গতৌ। ওষ্ঠ্যবর্গশেষোপধঃ। পম্বতি। ইতি দুর্গাদাসঃ ॥

পয ঙ গতৌ। ইতি কবিকল্পদ্রুমঃ ॥ ঙ পয়তে। ইতি দুর্গাদাসঃ ॥

পয়ঃ [স্] (ক্লী) জলং। দুগ্ধং। ইতি মেদিনী ॥

পয়ঃকন্দা (স্ত্রী) ক্ষীরবিদারী। ইতি রাজ-নির্ঘণ্টঃ ॥

পয়ঃফেনী (স্ত্রী) দুগ্ধফেনীক্ষুপঃ। ইতি রাজ-নির্ঘণ্টঃ ॥

পয়শ্চয়ঃ (পুং) জলসমূহঃ। তৎপর্য্যায়ঃ। পূরঃ ২ বেণিঃ ৩। ইতি জটাধরঃ ॥

পয়স্যং (ত্রি) পয়োবিকারঃ। ঘৃতদধ্যাদি। ইত্যমরঃ ॥ পয়োহিতং। ইতি মেদিনী ॥

পয়স্যঃ (পুং) বিড়ালঃ। ইতি শব্দচন্দ্রিকা ॥

পয়স্যা (স্ত্রী) দুগ্ধিকা। ক্ষীরকাকোলী। স্বর্ণ-ক্ষীরী। ইতি মেদিনী ॥ অর্কপুষ্পিকা। ইতি রত্নমালা ॥ কুটুম্বিনীক্ষুপঃ। ইতি

রাজনির্ঘণ্টঃ ॥ আমিক্ষা । ইতি হেমচন্দ্রঃ ॥

পয়ঃস্বলঃ (পুং) ছাগঃ । ইতি রাজনির্ঘণ্টঃ ॥

পয়স্বিনী (স্ত্রী) নদী । ধেনুঃ । রাত্রিঃ । ইতি মেদিনী ॥ কাকোলী । ক্ষীরকাকোলী । দুগ্ধফেনী । ক্ষীরবিদারী । ছাগী । ইতি রাজনির্ঘণ্টঃ ॥ জীবন্তী । ইতি ভাবপ্রকাশঃ ॥

পয়োগড়ঃ (পুং) ঘনোপলঃ । দ্বীপঃ । ইতি শব্দমালা ॥

পয়োঘনঃ (পুং) ঘনোপলঃ । ইতি হারাবলী ॥

পয়োজন্মা [ন্] (পুং) মেঘঃ । ইতি শব্দমালা ॥

পয়োধরঃ (পুং) স্ত্রীস্তনঃ । মেঘঃ । ইত্যমরঃ ॥ কোষকারঃ । নারিকেলং । কশেরু । ইতি মেদিনী ॥

পয়োধরাঃ [স্] (পুং) সমুদ্রঃ । জলাধারঃ । ইত্যুণাদিকোষঃ ॥

পয়োধিঃ (পুং) সমুদ্রঃ । ইতি রাজনির্ঘণ্টঃ ॥

পয়োধিকং (ক্লী) সমুদ্রফেনঃ । ইতি রাজনির্ঘণ্টঃ ॥

পয়োনিধিঃ (পুং) সমুদ্রঃ । যথা । ন গণিতং যদি জন্ম পয়োনিধৌ হরশিরঃস্থিতিভূরপি বিস্মৃতা । ইতি নৈষধচতুর্থসর্গঃ ॥

পয়োরঃ (পুং) খদিরঃ । ইতি শব্দচন্দ্রিকা ॥

পয়োলতা (স্ত্রী) ক্ষীরবিদারী । ইতি রাজনির্ঘণ্টঃ ॥

পয়োব্রতঃ (পুং) পয়োমাত্রপানরূপব্রতবিশেষঃ । যথা । পুণ্যাং তিথিং সমাসাদ্য যুগমন্বন্তরাদিকং । পয়োব্রতস্ত্রিরাত্রং স্যাদেকরাত্রমথাপি বা ॥ ইতি মাৎস্যে ২৫২ অধ্যায়ঃ ॥ * ॥ দ্বাদশাহসাধ্যবিষ্ণুব্রতবিশেষঃ । যথা । কশ্যপ উবাচ । এতন্মে ভগবান্ পৃষ্টঃ প্রজাকামস্য পদ্মজঃ । যদাহ তে প্রবক্ষ্যামি ব্রতং কেশবতোষণং ॥ ফাল্গুনস্যামলে পক্ষে দ্বাদশাহং পয়োব্রতঃ । অর্চ্চয়েদরবিন্দাক্ষং ভক্ত্যা পরময়ান্বিতঃ ॥ সিনীবাল্যাং মৃদালিপ্য স্নায়াৎ ক্রোড়বিদীর্ণয়া । যদি লভ্যেত বৈ স্রোতস্যেতন্মন্ত্রমুদীরয়েৎ ॥ ত্বং দেব্যাদিবরাহেণ রসায়াঃ স্থানমিচ্ছতা । উদ্ধৃতাসি নমস্তুভ্যং পাপ্মানং মে প্রণাশয় ॥ নির্ব্বর্ত্তিতাত্মনিয়মো দেবমর্চ্চেৎ সমাহিতঃ । অর্চ্চায়াং স্থণ্ডিলে সূর্য্যে জলে বহ্নৌ গুরাবপি ॥ নমস্তুভ্যং ভগবতে পুরুষায় মহীয়সে । সর্ব্বভূতনিবাসায় বাসুদেবায় সাক্ষিণে ॥ নমোঽব্যক্তায় সূক্ষ্মায় প্রধানপুরুষায় চ । চতুর্বিংশদ্‌গুণজ্ঞায় গুণসংখ্যানহেতবে ॥ নমো দ্বিশীর্ষ্ণে ত্রিপদে চতুঃশৃঙ্গায় তন্তবে । সপ্তহস্তায় যজ্ঞায় ত্রয়ীবিদ্যাত্মনে নমঃ ॥ নমঃ শিবায় রুদ্রায় নমঃ শক্তিধরায় চ । সর্ব্ববিদ্যাধিপতয়ে ভূতানাং পতয়ে নমঃ ॥ নমো হিরণ্যগর্ব্ভায় প্রাণায় জগদাত্মনে । যোগৈশ্বর্য্যশরীরায় নমস্তে যোগহেতবে ॥ নমস্ত আদিদেবায় সাক্ষিভূতায় তে নমঃ । নারায়ণায় ঋষয়ে নরায় হরয়ে নমঃ ॥ নমো মরকতশ্যামবপুষেঽধিগতশ্রিয়ে । কেশবায় নমস্তুভ্যং নমস্তে পীতবাসসে ॥ ত্বং সর্ব্ববরদঃ পুংসাং বরেণ্য বরদর্ষভ । অতস্তে শ্রেয়সে ধীরাঃ পাদরেণুমুপাসতে ॥ অন্ববর্ত্তন্ত যং

দেবাঃ শ্রীশ্চ তৎপাদপদ্ময়োঃ। স্পৃহয়ন্ত ইবামোদং ভগবান্মে প্রসীদতাং ॥ এতৈর্ম্মন্ত্রৈর্হৃষীকেশমাবাহনপুরস্কৃতং। অর্চ্চয়েচ্ছ্রদ্ধয়া যুক্তঃ পাদ্যোপস্পর্শনাদিভিঃ ॥ অর্চ্চিত্বা গন্ধমাল্যাদ্যৈঃ পয়সা স্নপয়েদ্বিভুং। বস্ত্রোপবীতাভরণপাদ্যোপস্পর্শনৈস্ততঃ ॥ গন্ধধূপাদিভিশ্চার্চ্চেদ্দ্বাদশাক্ষরবিদ্যয়া। শৃতং পয়সি নৈবেদ্যং শাল্যন্নং বিভবে সতি ॥ সসর্পিঃ সগুড়ং দত্ত্বা জুহুয়ান্মূলবিদ্যয়া। নিবেদিতং তদ্ভক্তায় দদ্যাদ্ভুঞ্জীত বা স্বয়ং ॥ দত্ত্বাচমনমর্চ্চিত্বা তাম্বূলঞ্চ নিবেদয়েৎ। জপেদষ্টোত্তরশতং স্তুবীত স্তুতিভিঃ প্রভুং ॥ কৃত্বা প্রদক্ষিণং ভূমৌ প্রণমেদ্দণ্ডবন্মুদা। কৃত্বা শিরসি তচ্ছেষং দেবমুদ্বাসয়েত্ততঃ ॥ দ্ব্যবরান্ ভোজয়েদ্বিপ্রান্ পায়সেন যথোচিতং। ভুঞ্জীত তৈরনুজ্ঞাতঃ শেষং সেষ্টঃ সভাজিতৈঃ ॥ ব্রহ্মচার্য্যথ তদ্রাত্র্যাং শ্বোভূতে প্রথমেঽহনি। স্নাতঃ শুচির্যথোক্তেন বিধিনা সুসমাহিতঃ ॥ পয়সা স্নাপয়িত্বার্চ্চেদ্যাবদ্ব্রতসমাপনং। পয়োভক্ষ্যো ব্রতমিদং চরেদ্বিষ্ণ্বর্চ্চনাদৃতঃ ॥ পূর্ব্ববজ্জুহুয়াদগ্নিং ব্রাহ্মণাংশ্চাপি ভোজয়েৎ। এবন্ত্বহরহঃ কুর্য্যাদ্দ্বাদশাহং পয়োব্রতং ॥ হরেরারাধনং হোমমর্হণং দ্বিজতর্পণং। প্রতিপদ্দিনমারভ্য যাবৎ শুক্লত্রয়োদশীং ॥ ব্রহ্মচর্য্যমধঃস্বপ্নং স্নানং ত্রিসবনঞ্চরেৎ। বর্জ্জয়েদসদালাপং ভোগানুচ্চাবচাংস্তথা॥ অহিংস্রঃ সর্ব্বভূতানাং বাসুদেবপরায়ণঃ। ত্রয়োদশ্যামথো বিষ্ণোঃ স্নপনং পঞ্চকৈর্বিভোঃ ॥ কারয়েচ্ছাস্ত্রদৃষ্টেন বিধিনা বিধিকোবিদৈঃ। পূজাঞ্চ মহতীং কুর্য্যাদ্বিত্তশাঠ্যবিবর্জ্জিতঃ ॥ চরুং নিরূপ্য পয়সি শিপিবিষ্টায় বিষ্ণবে। সূক্তেন তেন পুরুষং যজেত সুসমাহিতঃ ॥ নৈবেদ্যঞ্চাতিগুণবদ্দদ্যাৎ পুরুষতুষ্টিদং। আচার্য্যং জ্ঞানসম্পন্নং বস্ত্রাভরণধেনুভিঃ ॥ তোষয়েদৃত্বিজশ্চৈব তদ্বিধ্যারাধনং হরেঃ। ভোজয়েত্তান্ গুণবতা সদন্নেন শুচিস্মিতে ॥ অন্যাংশ্চ ব্রাহ্মণান্ শক্ত্যা যে চ তত্র সমাগতাঃ। দক্ষিণাং গুরবে দদ্যাদৃত্বিগ্ভ্যশ্চ যথার্হতঃ ॥ অন্নাদ্যেনাশ্বপাকাংশ্চ প্রীণয়েৎ সমুপাগতান্। ভুক্তবৎস্বথ সর্ব্বেষু দীনান্ধকৃপণেষু চ ॥ বিষ্ণোস্তৎ প্রীণনং বিদ্বান্ ভুঞ্জীত সহ বন্ধুভিঃ। নৃত্যবাদিত্রগীতৈশ্চ স্তুতিভিঃ স্বস্তিবাচনৈঃ ॥ কারয়েত্তৎকথাভিশ্চ পূজাং ভগবতোঽন্বহং। এতৎ পয়োব্রতং নাম পুরুষারাধনং পরং ॥ পিতামহেনাভিহিতং ময়া তে সমুদাহৃতং। ত্বঞ্চানেন মহাভাগে সম্যক্ চীর্ণেন কেশবং ॥ আত্মনা শুদ্ধভাবেন নিয়তাত্মা ভজাব্যয়ং। অয়ং বৈ সর্ব্বযজ্ঞাখ্যঃ সর্ব্বব্রতমিতি স্মৃতং ॥ তপঃসারমিদং ভদ্রে দানঞ্চেশ্বরতর্পণং। ত এব নিয়মাঃ সাক্ষাত্ত এব চ যমোত্তমাঃ ॥ তপো দানং ব্রতং যজ্ঞো যেন তুষ্যত্যধোক্ষজঃ। তস্মাদেতদ্ব্রতং ভদ্রে প্রযতা শ্রদ্ধয়াচর ॥ ভগবান্ পরিতুষ্টস্তে বরানাশু বিধাস্যতি। ইতি শ্রীভাগবতে ৮ স্কন্ধে ১৬ অধ্যায়ঃ ॥

পয়োষ্ণিজাতা (স্ত্রী) সরস্বতী নদী। ইতি রাজনির্ঘণ্টঃ॥

পয়োষ্ণী (স্ত্রী) নদীবিশেষঃ। সা বিন্ধ্যাচলদক্ষিণে প্রসিদ্ধা। অস্যা জলগুণাঃ। পয়োষ্ণীসলিলং রুচ্যং পবিত্রং পাপনাশনং। সর্ব্বাময়হরং সৌখ্যবলকান্তিপ্রদং লঘু॥ ইতি রাজনির্ঘণ্টঃ॥

পরং (ক্লী) কেবলং। ইতি মেদিনী॥ মোক্ষঃ। যথা। কৈবল্যমমৃতং পরং। ইতি মুক্তিপর্য্যায়ে রত্নাবলী॥

পরং [ম্] ব্য নিয়োগঃ। ক্ষেপঃ। ইতি মেদিনী॥

পরঃ (পুং) শত্রুঃ। ইত্যমরঃ॥ ব্রহ্মণ আয়ুঃ। যথা। কালসংখ্যাং সমাসেন পূর্ব্বার্দ্ধদ্বয়কল্পিতাং। স এব স্যাৎ পরঃ কালস্তদন্তে পরিপূজ্যতে॥ নিজেন তস্যামানেন চায়ুর্ব্বর্ষশতং স্মৃতং। তৎ পরাখ্যং তদর্দ্ধঞ্চ পরার্দ্ধমভিধীয়তে॥ অপি চ। ত্রীণি কল্পশতানি স্যুস্তথা ষষ্টির্দ্বিজোত্তমাঃ। ব্রহ্মণঃ কথিতং বর্ষং পরাখ্যং তচ্চ তৎপদং॥ ইতি কৌর্ম্মে ৫ অধ্যায়ঃ॥

পরঃ (ত্রি) শ্রেষ্ঠঃ। অরিঃ। দূরঃ। অন্যঃ। উত্তরঃ। ইতি মেদিনী॥ *॥ ন্যায়মতে দ্রব্যগুণকর্ম্মবৃত্তিসত্তা। ইয়ং ব্যাপকজাতিঃ। যথা। সামান্যং দ্বিবিধং প্রোক্তং পরঞ্চাপরমেব চ। দ্রব্যাদিত্রিকবৃত্তিস্তু সত্তা পরতয়োচ্যতে॥ পরভিন্না তু যা জাতিঃ সৈবাপরতয়োচ্যতে। দ্রব্যত্বাদিকজাতিস্তু পরাপরতয়োচ্যতে॥ ব্যাপকত্বাৎ পরাপি স্যাৎ ব্যাপ্যত্বাদপরাপি চ। ইতি ভাষাপরিচ্ছেদঃ॥ *॥ পরান্নাদিভক্ষণাদেঃ শ্রীনাশকত্বং যথা। পরান্নঞ্চ পরস্বঞ্চ পরশয্যা পরস্ত্রিয়ঃ। পরবেশ্মনি বাসশ্চ শক্রাদপি হরেচ্ছ্রিয়ং॥ ইতি গরুড়পুরাণং॥ *॥ শ্রেষ্ঠবাচকপরশব্দপ্রয়োগা যথা। অন্নদাতুঃ শতগুণোঽভীষ্টদেবঃ পরঃ স্মৃতঃ। গুরুস্তস্মাচ্ছতগুণো বিদ্যামন্ত্রপ্রদায়কঃ॥ অজ্ঞানতিমিরাচ্ছন্নং জ্ঞানদীপেন চক্ষুষা। যঃ সর্ব্বার্থং দর্শয়তি তৎপরঃ কোঽপি বান্ধবঃ॥ গুরুদত্তেন মন্ত্রেণ তপসেষ্টসুরং লভেৎ। সর্ব্বজ্ঞত্বং সর্ব্বসিদ্ধিং তৎপরঃ কোঽপি বান্ধবঃ॥ পিতরং মাতরং ভার্য্যাং গুরুপত্নীং গুরুং পরং। যো ন পুষ্ণাতি কাপট্যাৎ স মহাপাতকী শিব॥ নাস্তি বেদাৎ পরং শাস্ত্রং নহি কৃষ্ণাৎ পরঃ সুরঃ। নাস্তি গঙ্গাসমং তীর্থং ন পুষ্পং তুলসীপরং॥ ক্ষমাবতী ভূপরা ন পুত্রান্নাস্তি পরঃ প্রিয়ঃ। ন চ দৈবাৎ পরঃ শক্তো ব্রতং নৈকাদশীং বিনা॥ শালগ্রামাৎ পরো যন্ত্রো ন ক্ষেত্রং ভারতাং পর। পরং পুণ্যস্থলানাঞ্চ পুণ্যং বৃন্দাবনং যথা মোক্ষদানাং যথা কাশী বৈষ্ণবানাং যথা শিবঃ। ন পার্ব্বতী পরা সাধ্বী ন গণেশাৎ পরো বশী॥ ন চ বিদ্যাসমো বন্ধুর্নাস্তি কশ্চিদ্‌গুরোঃ পরঃ। ইতি ব্রহ্মবৈবর্ত্তপুরাণে গণপতিখণ্ডে ৪৪ অধ্যায়ঃ॥

পরঃশতং (ত্রি) শতাৎ পরং। শতাধিকসংখ্যা। ইত্যমরঃ॥

পরঃসহস্রং (ত্রি) সহস্রাৎ পরং। সহস্রাধিকসংখ্যা। ইত্যমরটীকা॥

পরঃশ্বঃ [স্] ব্য শ্বঃ পরাহঃ। পরশু ইতি ভাষা। ইত্যমরঃ॥ শ্বো দিনাৎ পরমহঃ পরঃশ্বঃ পরঃ সহস্রবৎ পারস্করাদিত্বাৎ সুট্ পরঃশ্ব ইতি মধুঃ। সুটং নেচ্ছন্ত্যন্যে পরশ্ব ইত্যাহুঃ। অতিক্রান্তে পূর্ব্বতরে দিনে পরশ্বো জাত ইতি প্রয়োগো গৌপঃ তত্র পরঞ্চ তৎ শ্বশ্চেতি কর্ম্মধারয়ঃ। ইতি ভরতঃ॥

পরকীয়ং (ত্রি) পরসম্বন্ধি। পরশব্দস্য টেঃ পূর্ব্বেণ অকা পরকঃ তস্যেদমিত্যর্থে ঈয়-প্রত্যয়নিষ্পন্নং॥

পরকীয়া (স্ত্রী) নায়িকাভেদঃ। অস্যা লক্ষণং যথা। অপ্রকটপরপুরুষানুরাগা। সা চ দ্বিবিধা। পরোঢ়া ১ কন্যকা চ ২। কন্যায়াঃ পিত্রাদ্যধীনতয়া পরকীয়ত্বং। অস্যা গুপ্তৈব সকলা চেষ্টা॥ *॥ পরোঢ়া যথা। অয়ং রেবাকুঞ্জঃ কুসুমশরসেবাসমুচিতঃ সমীরো-হয়ং বেলাদরবিদলদেলাপরিমলঃ। ইয়ং প্রাবৃড়্ধন্যা নবজলদবিন্যাসচতুরা পরা-ধীনং চেতঃ সখি কিমপি কর্ত্তুং মৃগ-য়তে॥ *॥ গুপ্তাবিদগ্ধালক্ষিতাকুলটানু-শয়ানামুদিতাপ্রভৃতীনাং পরকীয়ায়াং এবান্তর্ভাবঃ। গুপ্তা ত্রিবিধা। বৃত্তসুরত-গোপনা ১ বর্ত্তিষ্যমাণসুরতগোপনা ২ বর্ত্ত-মানসুরতগোপনা চ ৩। ত্রিবিধা যথা। শ্বশ্রুঃ ক্রুধ্যতু বিদ্বিষন্তু সুহৃদো নিন্দন্তু বা যাতরস্তস্মিন্ কিন্তু ন মন্দিরে সখি পুনঃ স্বাপো বিধেয়ো ময়া। আখো-রাক্রমণায় কোণকুহরাদুৎফালমাতন্বতী মার্জ্জারী নখরৈঃ খরৈঃ কৃতবতী কাং কাং ন মে দুর্দ্দশাং॥*॥ বিদগ্ধা দ্বিবিধা। বাগ্বিদগ্ধা ১ ক্রিয়াবিদগ্ধা চেতি ২। প্রথমা যথা। নিবিড়তমতমালমল্লিবল্লী-বিচকিলরাজিবিরাজিতোপকণ্ঠে। পথিক-সমুচিতস্তবাদ্যতীব্রে সবিতরি তত্র সরি-ত্তটে নিবাসঃ॥ দ্বিতীয়া যথা। দাসায় ভবন-নাথে বদরীমপনেতুমাদিশতি। হেমন্তে হরিণাক্ষী পয়সি কুঠারং বিনিক্ষিপতি॥ *॥ লক্ষিতা যথা। যদ্ভূতং তদ্ভূতং যদ্ভূয়াত্তদপি বা ভূয়াৎ। যদ্ভবতু তদ্ভবতু বা বিফলস্তব গোপনায়াসঃ॥ *॥ কুলটা যথা। এতে বারিকণান্ কিরন্তি পুরুষান্ বর্ষন্তি নাম্ভোধরাঃ শৈলাঃ শাদ্বলমুদ্বমন্তি ন সৃজন্ত্যেতে পুনর্নায়কান্। ত্রৈলোক্যে তরবঃ ফলানি সুবতে নৈবারভন্তে জনান্ ধাতঃ কাতরমালপামি কুলটাহেতোস্ত্বয়া কিং কৃতং॥ অপি চ। পৃথ্বী তাবত্রি-কোণা বিপুলনদনদীগ্রামরুদ্ধং তদর্দ্ধং তস্যামেবাস্তি শৈলো বিপিনমপি তথা ক্ষেত্রকাসারকূপাঃ। লোকানামর্দ্ধনারী শিশুরপি জরসঃ কোহপি রোগী বিবেকী মিথ্যাবাদো মমায়ং মুখরমুখরবঃ পুংশ্চলী পুংশ্চলীতি॥ *॥ অনুশয়ানা ত্রিবিধা। বর্ত্তমানস্থানবিঘট্টনেন ভাবিস্থানাভাব-শঙ্কয়া স্বানধিষ্ঠিতসঙ্কেতস্থলে ভর্ত্তুর্গম-নানুমানেন প্রত্যেকং উদাহরণানি। সমুপাগতবতি চৈত্রে নিপততি পত্রে লবঙ্গলতিকায়াঃ। সুদৃশঃ কপোলপালী শিব শিব তালীদলদ্যুতিং লেভে॥ *॥ নিদ্রালুকেকিমিথুনানি কপোতপোত-

ব্যাধূতনূতনমহীরুহপল্লবানি। তত্রাপি তস্মিন বনানি কিয়ন্তি সন্তি খিদ্যস্ব ন প্রিয়তমস্য গৃহং প্রযাহি॥ কর্ণকল্পিত-রসালমঞ্জরীপিঞ্জরীকৃতকপোলমণ্ডলঃ। নিষ্পতন্নয়নবারিধারয়া রাধয়া মধুরিপু-র্নিরীক্ষ্যতে॥ * ॥ মুদিতা যথা। গোষ্ঠেষু তিষ্ঠতি পতির্বধিরা ননন্দা নেত্রদ্বয়স্য ন চ পাটবমস্তি যাতুঃ। ইত্থং নিগদ্য সুতনুঃ কুচকুম্ভসীম্নি রোমাঞ্চকঞ্চুকমুদঞ্চিতমাততান॥ * ॥ কন্যকা যথা। কিঞ্চিৎকুঞ্চিত-হারযষ্টি সরলভ্রূবল্লিসাচিস্মিতং প্রান্তভ্রান্ত-বিলোচনদ্যুতিভুজা পর্য্যস্তকর্ণোৎপলং। অঙ্গুল্যা স্ফুরদঙ্গুলীয়করুচা কর্ণস্য কণ্ডূয়নং কুর্ব্বাণা নৃপ কন্যকা সুকৃতিনং সব্যাজমালোকতে॥ ইতি রসমঞ্জরী॥

পরগ্রন্থিঃ (পুং) পর্ব্বাবধিঃ। অঙ্গুলিপর্ব্ব। ইতি হারাবলী॥

পরচ্ছন্দঃ (ত্রি) পরাধীনঃ। ইতি হেমচন্দ্রঃ॥

পরচ্ছিদ্রং (ক্লী) পরদোষঃ। যথা। নীচঃ সর্ষপমাত্রাণি পরচ্ছিদ্রাণি পশ্যতি। আত্মনো বিল্বমাত্রাণি পশ্যন্নপি ন পশ্যতি॥ ইতি গরুড়পুরাণং॥

পরজাতঃ (ত্রি) পরৈরেধিতঃ। ঔদাসীন্যেন পরপুষ্টঃ। পরপোষিতত্বাৎ পরস্মাজ্জাতঃ। ইত্যমরভরতৌ॥ অন্যোনোৎপন্নশ্চ॥

পরজিতঃ (ত্রি) পরপুষ্টঃ। শত্রুণা পরাজিতঃ। ইতি কেচিৎ॥

পরঞ্জঃ (পুং) তৈলযন্ত্রং। ছুরিকাফলঃ ফেনঃ। ইতি মেদিনী॥

পরঞ্জনঃ (পুং) বরুণঃ। ইতি হেমচন্দ্রঃ॥

পরঞ্জয়ঃ (পুং) বরুণঃ। ইতি ত্রিকাণ্ডশেষঃ॥ শত্রুজয়কর্ত্তা। পরান্ জয়তীতি খপ্রত্যয়-নিষ্পন্নঃ॥

পরতন্ত্রঃ (ত্রি) পরাধীনঃ। ইত্যমরঃ॥

পরত্রভীরুঃ (ত্রি) ধার্ম্মিকঃ। পরকালভয়শীলঃ। যথা। পরত্রভীরুং ধর্ম্মিষ্ঠমুদ্যুক্তং ক্রোধ-বর্জ্জিতং। ইতি মিতাক্ষরায়াং কাত্যায়নঃ॥

পরত্বং (ক্লী) পরতা। পরস্য ভাবঃ। ন্যায়-মতে তদ্দ্বিবিধং। দৈশিকং ১। তত্তু বহুতরসূর্য্যসংযোগজ্ঞানজন্যগুণঃ। কালিকং২ তচ্চ বহুতরকালান্তরিতত্বজ্ঞানজন্যগুণঃ। এতদ্দ্বয়ং মূর্ত্তপদার্থগুণঃ। দৈশিকপরত্ব-স্যাসমবায়িকারণং দিক্‌শরীরসংযোগঃ। কালিকপরত্বস্যাসমবায়িকারণং কালপিণ্ড-সংযোগঃ। তে অপেক্ষাবুদ্ধিজন্যে। তন্নাশ-নাশ্যে চ। যথা। পরত্বঞ্চাপরত্বঞ্চ দ্বিবিধং পরিকীর্ত্তিতং। দৈশিকং কালিকঞ্চাপি মূর্ত্ত এব তু দৈশিকং॥ পরত্বং সূর্য্যসং-যোগভূয়স্ত্বজ্ঞানতো ভবেৎ। অপরত্বং তদল্পত্ববুদ্ধিতঃ স্যাদিতীরিতং॥ তয়োরসম-বায়ী তু দিক্‌সংযোগস্তদাশ্রয়ে। দিবা-করপরিস্পন্দপূর্ব্বোৎপন্নত্ববুদ্ধিতঃ॥ পরত্ব-মপরত্বন্তু তদনন্তরবুদ্ধিতঃ। অত্র ত্বসমবায়ী তু সংযোগঃ কালপিণ্ডয়োঃ॥ অপেক্ষা বুদ্ধিনাশাচ্চ নাশস্তেষাং নিরূপিতঃ। ইতি ভাষাপরিচ্ছেদঃ॥

পরদারঃ (পুং) পরভার্য্যা। তদ্গমনে দোষো যথা। পরদাররতাশ্চৈব পরদ্রব্যহরাশ্চ যে। অধোঽধো নরকে যান্তি পীড্যন্তে

যমকিঙ্করৈঃ॥ ইতি কর্ম্মলোচনং॥ ব্রাহ্মণঃ ক্ষত্রিয়ো বৈশ্যো যো রতঃ পরযোষিতি। যাতি তস্যা পূজিতস্য রুষ্টা লক্ষ্মীর্গৃহাদপি॥ ইহাতিনিন্দ্যঃ সর্ব্বত্র নাধিকারী স্বকর্ম্মসু। পরত্রৈবান্ধকূপে চ যাবদ্বর্ষশতং বসেৎ॥ অপি চ। কিন্তুজ্জপেন তপসা মৌনেন চ ব্রতেন চ। সুরার্চ্চনেন তীর্থেন স্ত্রীভির্যস্য মনো হৃতং॥ সর্ব্বমায়াকরণ্ডশ্চ ধর্ম্মমার্গার্গলং নৃণাং। ব্যবধানঞ্চ তপসাং দোষাণামাশ্রমং পরং॥ কর্ম্মবন্ধনিবন্ধানাং নিগড়ং কঠিনং সুত। প্রদীপরূপং কীটানাং মীনানাং বড়িশং যথা॥ বিষকুম্ভং দুগ্ধমুখমারম্ভে মধুরোপমং। পরিণামে দুঃখবীজং সোপানং নরকস্য চ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ৩০। ৬১ অধ্যায়ঃ॥ *॥ যস্তু পাণিগৃহীতীং তাং হিত্বান্যাং যোষিতং ব্রজেৎ। অগম্যাগমনং তদ্ধি সদ্যো নরককারণং॥ নিত্যং নৈমিত্তিকং কাম্যং যাগযোগ্যব্রতাদিকং। ক্ষেত্রতীর্থাটনং তস্মিন্ বাসো ধর্ম্মক্রিয়াদিকং॥ স্বাধ্যায়াদি তপো দৈবং পৈত্রং কর্ম্ম বরাননে। যাত্যেতন্নিষ্ফলং সর্ব্বং পরস্ত্রীগমনান্নৃণাং॥ পরদারাভিগমনাৎ কোটি একাদশীব্রতং। অপরং কিমু বক্তব্যং নিষ্ফলং নিরয়ে স্থিতিঃ॥ সত্যং সত্যং পুনঃ সত্যং সত্যমেব ব্রবীমি তে। পরযোনৌ পতন্ বিন্দুঃ কোটিপূজাং বিনশ্যতি॥ ইতি পাদ্মোত্তরখণ্ডে ৭৫ অধ্যায়ঃ॥ *॥ অপি চ। ত্যাজ্যং ধর্ম্মান্বিতৈর্নিত্যং পরদারোপসেবনং। নয়ন্তি পরদারা হি নরকানেকবিংশতিং॥ সর্ব্বেষামেব বর্ণানামেষ ধর্ম্মো ধ্রুবোঽন্ধক॥ এবং পুরা সুরপতে দেবর্ষিরসিতোঽব্যয়ঃ। প্রাহ ধর্ম্মব্যবস্থানং খগেন্দ্রায়ারুণায় হি॥ তস্মাৎ সুদূরতো বর্জ্জেৎ পরদারান্ বিচক্ষণঃ। নয়ন্তি নিকৃতিপ্রজ্ঞং পরদারাঃ পরাভবং॥ ইতি বামনে ৬৩ অধ্যায়ঃ॥

পরদুঃখং (ক্লী) অন্যজনপীড়া। যথা। ত্যক্ত্বাত্মসুখভোগেচ্ছাং সর্ব্বসত্ত্বসুখৈষিণঃ। ভবন্তি পরদুঃখেন সাধবো নিত্যদুঃখিতাঃ॥ পরদুঃখাতুরা নিত্যং স্বসুখানি মহান্ত্যপি। নাপেক্ষন্তে মহাত্মানঃ সর্ব্বভূতহিতে রতাঃ॥ ইত্যগ্নিপুরাণং॥

পরদ্বেষী [ন্] (ত্রি) বিদূষকঃ। পরদ্বেষ্টা। ইতি শব্দমালা॥

পরধ্যানং (ক্লী) ধ্যানবিশেষঃ। যথা। ধ্যেয়ে মনোনিশ্চলতাং যাতি ধ্যেয়ং বিচিন্তয়ন্। যত্তদ্ধ্যানং পরং প্রোক্তং মুনিভির্ধ্যানচিন্তকৈঃ॥ ইতি গরুড়পুরাণং॥

পরন্তপঃ (ত্রি) পরতাপী। পরান্ তপতি যঃ। ইতি মুগ্ধবোধব্যাকরণং॥

পরপদং (ক্লী) শ্রেষ্ঠস্থানং। মুক্তিঃ। যথা। কল্যাণানাং নিদানং কলিমলমথনং জীবনং সজ্জনানাং পাথেয়ং যন্মুমুক্ষোঃ সপদি পরপদপ্রাপ্তয়ে প্রস্থিতস্য। ইতি মহানাটকং॥

পরপাকনিবৃত্তঃ (পুং) পরোদ্দেশ্যকপাকরহিতঃ। পঞ্চযজ্ঞাকর্ত্তা। যথা। গৃহীত্বাগ্নিং সমারোপ্য পঞ্চযজ্ঞান্ন নির্ব্বপেৎ।

পরপাকনিবৃত্তোঽসৌ মুনিভিঃ পরিকীর্ত্তিতঃ ॥ ইতি মিতাক্ষরায়াং প্রায়শ্চিত্তাধ্যায়ঃ ॥

পরপাকরতঃ (পুং) পরপাকরুচিঃ। প্রাতঃ পঞ্চযজ্ঞান্নির্ব্বর্ত্য পরান্নভোজী। যথা। পঞ্চযজ্ঞান্ স্বয়ং কৃত্বা পরান্নমুপজীবতি। সততং প্রাতরুত্থায় পরপাকরতস্তু সঃ ॥ ইতি মিতাক্ষরায়াং প্রায়শ্চিত্তাধ্যায়ঃ ॥*॥ এতয়োরন্নভোজনে দোষো যথা। পরপাকনিবৃত্তস্য পরপাকরতস্য চ। অপচস্য চ ভুক্ত্বান্নং দ্বিজশ্চান্দ্রায়ণঞ্চরেৎ ॥ ইতি মিতাক্ষরায়াং প্রায়শ্চিত্তাধ্যায়ঃ ॥

পরপিণ্ডাদঃ (ত্রি) পরান্নোপজীবী। ইত্যমরঃ ॥

পরপুরুষঃ (ত্রি) বিষ্ণুঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ অন্যপুমান্। উপনায়কঃ। যথা। রাজন্ জীবাবধানং কুরু শৃণু নিভৃতং প্রেয়সীনাং কুচেষ্টা একা তে কীর্ত্তিকান্তা জগদটনপরা বিশ্বভোগ্যাপরা শ্রীঃ। যা বা পাণৌ গৃহীতা বিধিবদসিলতা শুদ্ধধারেতি মত্বা সোৎকণ্ঠং সাপি নিত্যং পরপুরুষশতং মারভাবাদুপৈতি ॥ ইতি কর্ণাটরাজপ্রতি কালিদাসঃ ॥

পরপুষ্টঃ (পুং) কোকিলঃ। ইতি মেদিনী ॥ পরেণ পোষিতে ত্রি। ইতি ধরণিঃ ॥

পরপুষ্টমহোৎসবঃ (পুং) আম্রঃ। ইতি শব্দমালা ॥

পরপুষ্টা (স্ত্রী) বেশ্যা। ইতি মেদিনী ॥ পরাশ্রয়া। পরসাড়া ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥

পরপূর্ব্বা (স্ত্রী) পরোঽন্যঃ পূর্ব্বো ভর্ত্তা যস্যাঃ সা। অস্যা লক্ষণং যথা। পতিং হিত্বাপকৃষ্টং স্বমুৎকৃষ্টং যা নিষেবতে। নিন্দ্যৈব সা ভবেল্লোকে পরপূর্ব্বেতি চোচ্যতে ॥ ইতি মানবে ৫ অধ্যায়ঃ ॥ অস্যাঃ প্রকারো যথা। পরপূর্ব্বাঃ স্ত্রিয়স্ত্বন্যাঃ সপ্ত প্রোক্তা যথাক্রমং। পুনর্ভূস্ত্রিবিধা তাসাং স্বৈরিণী তু চতুর্বিধা ॥ ইতি মিতাক্ষরায়াং নারদঃ ॥

পরপ্রতিনপ্তা [ঋ] } (পুং) বৃদ্ধপ্রপৌত্রঃ।
পরপ্রপৌত্রঃ } ইতি হেমচন্দ্রঃ ॥

পরভাগঃ (পুং) গুণোৎকর্ষঃ। ইতি হেমচন্দ্রঃ ॥ সুসম্পৎ। ইতি ত্রিকাণ্ডশেষঃ ॥ শেষাংশশ্চ ॥

পরভুক্তা (স্ত্রী) অন্যপুরুষসম্ভোগবিশিষ্টা। যথা। পরভুক্তাঞ্চ কান্তাঞ্চ যো ভুঙ্‌ক্তে স নরাধমঃ। স পচ্যতে কালসূত্রে যাবচ্চন্দ্রদিবাকরৌ ॥ ন সা দৈবে ন সা পৈত্রে পাকার্হা পাপসংযুতা। তস্যা আলিঙ্গনে ভর্ত্তা ভ্রষ্টশ্রীস্তেজসা হতঃ ॥ দেবতাঃ পিতরস্তস্য হব্যদানে চ তর্পণে। সুখিনো ন ভবন্ত্যেবমিত্যাহ কমলোদ্ভবঃ ॥ তস্মাদ্‌যত্নেন ভার্য্যাঞ্চ রক্ষণং কুরুতে সুধীঃ। অন্যথা পাপিনীভর্ত্তা নিশ্চিতং নরকং ব্রজেৎ ॥ পদে পদে সাবধানঃ কান্তাং রক্ষতি পণ্ডিতঃ। ন প্রতীতিস্থলী যোষা দোষাণাঞ্চ করণ্ডিকা ॥ কলত্রং পাকপাত্রঞ্চ সদা রক্ষিতুমর্হতি। পরস্পর্শাদশুদ্ধাঞ্চ শুদ্ধাং স্বস্পর্শনে সদা ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ১৮ অধ্যায়ঃ ॥*॥ অন্যেন ভক্ষিতে ত্রি ॥

পরভৃৎ (পুং) কাকঃ। ইত্যমরঃ॥

পরভৃতঃ (পুং) কোকিলঃ। ইত্যমরঃ॥ পর-পোষিতে ত্রি॥

পরম্ ব্য নিয়োগঃ। ক্ষেপঃ। ইতি মেদিনী॥ পশ্চাৎ॥

পরমং ব্য অনুজ্ঞা। হাঁ ইতি ভাষা। ইতি মেদিনী॥ তথা চ। ওমেবং পরমং মতে। ইত্যমরঃ॥ ত্রীণি মতে অনুমতৌ। ওঁ কুরু ওমিত্যুক্তবতঃ। এবং বাঢ়ং এবং যদাথ ভগবান্। পরমন্তে আবসং মমেদং পরমং। ত্রয়ং প্রকারেঽপি। ইতি ভরতঃ॥

পরমঃ (ত্রি) পরঃ। উৎকৃষ্টঃ। ইতি মেদিনী॥ প্রধানং। আদ্যঃ। ওঙ্কারঃ। ইতি বিশ্বঃ॥ অগ্রেসরঃ। ইতি হেমচন্দ্রঃ॥

পরমগতিঃ (স্ত্রী) মুক্তিঃ। মোক্ষহেতৌ ত্রি। যথা। গুণাতীতোঽপীশস্ত্রিগুণসচিবস্ত্র্যক্ষরময়স্ত্রিমূর্ত্তির্যঃ সৃষ্টিস্থিতিবিলয়কর্ম্মাণি কুরুতে। কৃপাপারাবারঃ পরমগতিরেষ ত্রিজগতাং নমস্তস্মৈ কস্মৈচিদমিতমহিম্নে পুরভিদে॥ ইতি মঙ্গলবাদঃ॥ তস্যা লক্ষণং যথা। যাং বিপ্রাঃ সর্ব্বতঃ শান্তা বিশুদ্ধা জ্ঞাননিশ্চয়াঃ। গতিং গচ্ছন্তি সন্তুষ্টাস্তামাহুঃ পরমাং গতিং॥ ইতি মহাভারতে মোক্ষধর্ম্মঃ॥

পরমগবঃ (পুং স্ত্রী) শ্রেষ্ঠগৌঃ। পরমশ্চাসৌ গৌশ্চেতীতি কর্ম্মধারয়সমাসে বোপদেবঃ॥

পরমপদঃ (পুং ক্লী) শ্রেষ্ঠস্থানং। পরদেবতাচরণঃ। যথা। স্বপুষ্পৈরাকীর্ণং কুসুমধনুষো মন্দিরমহো পুরো ধ্যায়ন্ ধ্যায়ন্ যদি জপতি ভক্তস্তব মনুং। স গন্ধর্ব্বশ্রেণীপতিরপি কবিত্বামৃতনদীনদীনঃ পর্য্যন্তে পরমপদলীনঃ প্রভবতি॥ ইতি কর্পূরাখ্যস্তোত্রং॥

পরমব্রহ্ম [ন্] (ক্লী) পরমেশ্বরঃ। নারায়ণঃ। যথা। সত্যতপা উবাচ। যদেতৎ পরমং ব্রহ্ম ত্বয়া প্রোক্তং মহামুনে। তস্য রূপং ন জানন্তি যোগিনোঽপি মহাত্মনঃ॥ অনামগোত্ররহিতমমূর্ত্তং মূর্ত্তিবর্জ্জিতং। কথং তজ্জ্ঞায়তে ব্রহ্ম সংজ্ঞানামবিবর্জ্জিতং॥ তত্তস্য সংজ্ঞাং কথয় যেন জানাম্যহং গুরো॥ দুর্ব্বাসা উবাচ। যদেতৎ পরমং ব্রহ্ম বেদবাদেষু পঠ্যতে। স দেবঃ পুণ্ডরীকাক্ষঃ স্বয়ং নারায়ণঃ পরঃ॥ স যজ্ঞৈর্বিবিধৈরিষ্টৈর্দানৈর্দত্তৈশ্চ সত্তম। প্রাপ্যতে পরমো দেবঃ স্বয়ং নারায়ণো হরিঃ॥ ইতি বরাহপুরাণং॥

পরমর্ষিঃ (পুং) ভেলাদিঋষিবিশেষঃ। ইতি ত্রিকাণ্ডশেষঃ॥ অস্য ব্যুৎপত্তির্যথা। ঋষিহিংসাগতৌ ধাতুর্বিদ্যাসত্যতপঃশ্রুতৈঃ। এষ সন্নিচয়ো যস্মাৎ ব্রাহ্মণশ্চ ততস্ত্বৃষিঃ॥ নিবৃত্তিসমকালস্তু বুদ্ধ্যা ব্যক্তিমৃষিস্ত্বয়ং। ঋষতে পরমং যস্মাৎ পরমর্ষিস্ততঃ স্মৃতঃ॥ গত্যর্থাদৃষতের্ধাতোর্নামানি বৃত্তিকারণং। যস্মাদেষ স্বয়ং ভূতস্তস্মাচ্চ ঋষিতা মতা॥ ইতি মাৎস্যে ১২০ অধ্যায়ঃ॥

পরমস্বধর্ম্মা [ন্] (ত্রি) পরমস্বো ধর্ম্মো যস্য। ইতি কর্ম্মধারয়পূর্ব্বপদবহুব্রীহৌ সিদ্ধান্তকৌমুদী॥

পরমহংসঃ (পুং) সন্ন্যাসিবিশেষঃ। অস্য লক্ষণং যথা। জাতরূপধরো নির্দ্বন্দ্বো নিরাগ্রহস্তত্ত্বব্রহ্মমার্গে সম্যক্ সম্পন্নঃ শুদ্ধমানসঃ প্রাণসংধারণার্থং যথোক্তকালে ভৈক্ষমাচরন্ লাভালাভৌ সমৌ কৃত্বা শূন্যাগারদেবগৃহতৃণকূটবল্মীকবৃক্ষমূলকুলালশালাগ্নিহোত্রনদীপুলিনগিরিকুহরকন্দরকোটরনিকরস্থণ্ডিলেষ্বনিকেতবাসী নিষ্প্রযত্নো নির্ম্মমঃ শুক্লধ্যানপরায়ণঃ অধ্যাত্মনিষ্ঠঃ শুভাশুভকর্ম্মনির্মূলনায় সংন্যাসেন দেহত্যাগং করোতি যঃ স এব পরমহংসো নামেতি জীবন্মুক্তিবিবেকঃ॥

পরমাণুঃ (পুং) পৃথিব্যাদিভূতচতুষ্টয়ানাং দ্ব্যণুকানামবয়বঃ। স চ নিত্যঃ নিরবয়বঃ ততঃ সূক্ষ্মমপি নাস্তি। যথা। নিত্যানিত্যা চ সা দ্বেধা নিত্যা স্যাদণুলক্ষণা। অনিত্যা তু তদন্যা স্যাৎ সৈবাবয়বযোগিনী॥ পারিমাণ্ডল্যনামকতৎপরিমাণন্তু ন কস্যাপি কারণং। যথা। পারিমাণ্ডল্যভিন্নানাং কারণত্বমুদাহৃতং॥ জলাদিপরমাণুরূপস্য নিত্যত্বং। পার্থিবপরমাণুরূপস্যানিত্যত্বং। যথা। জলাদিপরমাণৌ তন্নিত্যমন্যৎ সহেতুকং। ইতি ভাষাপরিচ্ছেদঃ॥ তৈরেব পরমাণুভিরাদ্যুপাদানৈর্দ্ব্যণুকত্রসরেণ্বাদিক্রমেণ স্থূলক্ষিতিজলতেজোমরুতঃ সৃজতি পরমেশ্বরঃ। যথা আয়োজনং পরমাণুকর্ম্ম তথা চ সর্গাদ্যকালীনং দ্ব্যণুকারম্ভকপরমাণুকর্ম্ম যত্নজন্যং প্রযত্নবদাত্মসংযোগজন্যং বা কর্ম্মত্বাৎ অস্মদাদিশরীরকর্ম্মবৎ ইতি কুসুমাঞ্জলিঃ॥ প্রলয়েঽতিস্থূলস্থূলনাশানন্তরং পরমাণুক্রিয়াবিভাগপূর্ব্বসংযোগনাশাদিক্রমেণ দ্ব্যণুকনাশাত্তিষ্ঠন্তি পরমাণব এবেতি। যথা। দোধূয়মানাস্তিষ্ঠন্তি প্রলয়ে পরমাণবঃ। ইতি প্রাচীনকারিকা॥ তস্য মহত্ত্বাভাবাদতীন্দ্রিয়ত্বং। যথা। মহত্ত্বং ষড়্বিধে হেতুরিতি ভাষাপরিচ্ছেদঃ॥*॥ কালবিশেষঃ। যথা। স কালঃ পরমাণুর্বৈ যো ভুঙ্‌ক্তে পরমাণুতাং। সতো বিশেষভুগ্‌যস্তু কালঃ স পরমো মহান্॥ ৫॥ অণুর্দ্বৌ পরমাণূ স্যাত্ত্রসরেণুস্ত্রয়ঃ স্মৃতঃ। জালার্করশ্ম্যবগতঃ খমেবানুপতন্নগাৎ॥ ৬॥ ইতি শ্রীভাগবতে ৩ স্কন্ধে ১১ অধ্যায়ঃ॥ অস্যার্থঃ। এতদেব প্রপঞ্চয়তি স ইত্যাদিনা। সতঃ প্রপঞ্চস্য পরমাণুতাং পরমাণ্বস্থাং যো ভুঙ্‌ক্তে স কালঃ পরমাণুঃ তস্যৈবাবিশেষং সাকল্যং যো ভুঙ্‌ক্তে স পরমমহান্। অয়মর্থঃ গ্রহর্ক্ষতারাচক্রস্থ ইত্যাদিনা যৎ সূর্য্যপর্য্যটনং বক্ষ্যতি তত্র সূর্য্যো যাবতা পরমাণুদেশমতিক্রামতি তাবান্ কালঃ পরমাণুঃ। যাবতা চ দ্বাদশরাশ্যাত্মকং সর্ব্বং ভুবনকোষমতিক্রামতি স পরমমহান্ সংবৎসরাত্মকঃ তস্যৈবাবৃত্ত্যা যুগমন্বন্তরাদিক্রমেণ দ্বিপরার্দ্ধান্তত্বমিতি। তথা চ পঞ্চমে সূর্য্যগত্যৈব কালাদিবিভাগং বক্ষ্যতি। ৫। ইদানীং দ্ব্যণুকাদিলক্ষণপূর্ব্বকং মধ্যমকালাবস্থাং কথয়তি দ্বৌ পরমাণূ অণুঃ স্যাৎ ত্রয়োঽণবস্ত্রসরেণুঃ স তু প্রত্যক্ষ ইত্যাহ জালার্কেতি গবাক্ষপ্রবিষ্টেষ্বর্করশ্মিষ্ববগত

কোঽসৌ যোঽতিলঘুত্বেন খমেবানুপতন্ অগাৎ গতঃ। ন গামিতি পাঠে খমেবানুপতন্নবগতঃ ন তু গাং পৃথ্বীং। ৬। ইতি শ্রীধরস্বামী॥

পরমাণ্বঙ্গকঃ (পুং) বিষ্ণুঃ। ইতি শব্দমালা॥

পরমাত্মা [ন্] (পুং) পরং ব্রহ্ম। তৎপর্য্যায়ঃ। আপোজ্যোতিঃ ২ চিদাত্মা ৩। যথা। পরমাত্মা পরং ব্রহ্ম নির্গুণঃ প্রকৃতেঃ পরঃ। কারণং কারণানাঞ্চ শ্রীকৃষ্ণো ভগবান্ স্বয়ং॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ২৩ অধ্যায়ঃ॥

পরমাদ্বৈতঃ (পুং) বিষ্ণুঃ। যথা। নমস্তে জ্ঞানসদ্ভাব নমস্তে জ্ঞানদায়ক। নমস্তে পরমাদ্বৈত নমস্তে পুরুষোত্তম॥ ইতি গরুড়পুরাণং॥

পরমান্নং (ক্লী) দেবপিত্রন্নত্বাৎ পরমমুৎকৃষ্টমন্নং। পরমাণামুৎকৃষ্টানাং দেবাদীনামন্নমিতি বা। ইতি ভরতঃ॥ তৎপর্য্যায়ঃ। পায়সঃ ২। ইত্যমরঃ॥ ক্ষীরিকা ৩। তস্য পাকপ্রকারো যথা। শুদ্ধেঽর্দ্ধপক্কে দুগ্ধে তু ঘৃতাক্তাংস্তণ্ডুলান্ ক্ষিপেৎ। তে সিদ্ধাঃ ক্ষীরিকা খ্যাতা সা সিতাজ্যযুতোত্তমা॥ অস্য গুণাঃ। ক্ষীরিকা দুর্জ্জরা বল্যা ধাতুপুষ্টিপ্রদা গুরু। বিষ্টম্ভিনী হরেৎ পিত্তরক্তপিত্তাগ্নিমারুতান্॥ ইতি ভাবপ্রকাশঃ

পরমায়ুঃ [স্] (ক্লী) জীবিতকালঃ। যথা। শতং বর্ষাণি বিংশত্যা নিশাভিঃ পঞ্চভিঃ সহ। পরমায়ুরিদং প্রোক্তং নরাণাং করিণামিহ॥ অব্দা দ্বাত্রিংশদশ্বানাং শুনাং দ্বাদশ বৎসরাঃ। পঞ্চবিংশতিবর্ষাণি খরস্য করভস্য চ॥ চতুর্বিংশতিরব্দানাং বৃষস্য মহিষস্য চ। মৃগশূকরবস্তাদিপশূনাং ষড়্দশাম্বিতাঃ॥ ইতি শব্দমালা॥ * ॥ অথায়ুরানয়নং। অজ্ঞানাদায়ুষঃ সর্ব্বং বিফলং কীর্ত্তিতঞ্চ যৎ। তস্মাদানয়নং তস্য স্ফুটার্থমভিধীয়তে॥ নীচান্তরস্য খেটস্য ভাগস্তুঙ্গগুণো ভবেৎ। চেষ্টা কেন্দ্রস্তু চেৎ ষড়্ভাদধিকং চক্রশোধিতং॥ নান্যথা তস্য ভাগাদি চেষ্টা গুণক উচ্যতে। গুণশ্চেৎ ষষ্টি৬০তো ন্যূনং তদা দ্ব্যাপ্তং সখানলঃ ৩০॥ এবং তুঙ্গগুণশ্চেষ্টা গুণো যৎ স্যাৎ তয়োর্দ্ধলাৎ। মূলং কলাদিকং তৎ স্যাদ্গুণকস্ফুট উচ্যতে॥ অথাশ্রয়গুণং বক্ষ্যে ক্ষেত্রাদিসপ্তবর্গজং। বর্গে ক্ষেত্রাদিকে স্বর্ক্ষে গ্রাহ্যস্ত্রিংশৎ ৩০ কলা গুণঃ॥ অধিমিত্রগৃহে তত্ত্বং ২৫ মিত্রে বিত্র্যংশজাতয়ঃ। ২১। ৪০। সমে পঞ্চদশ গ্রাহ্যাঃ শত্রৌ স্বত্র্যংশকোরগাঃ ৮। ২০॥ পঞ্চাত্যরৌ ৫ তদৈক্যং যৎ ক্ষেত্রোত্থগুণযুক্ পুনঃ। স্বর্ক্ষে বর্গোত্তমে স্বাংশে স্বত্র্যংশে স্যাদয়ং গুণঃ॥ অধীষ্টর্ক্ষে যুগাংশোনস্ত্র্যংশোনো মিত্রবেশ্মনি। সমে দ্ব্যাপ্তো রিপৌ ত্র্যাপ্তো যুগাংশস্তুতিশত্রুভে॥ এবং স্যাদাশ্রয়গুণো বিশেষো যঃ স উচ্যতে। স্বত্র্যংশকঃ স্বাংশকো বা বর্গোত্তমগতোঽপি বা॥ যদি স্যাদধিমিত্রর্ক্ষে তদা তত্রাশ্রয়ে গুণে। গজনেত্রে সমুদ্রাক্ষী ২৮। ৩৪ কলাদ্যং মিশ্রয়েদ্‌বুধঃ। এবং মিত্রগৃহে তদ্বত্তুপস্ত্রিংশদ্-

বিমিশ্রয়েৎ ১৬। ৩০। শক্রক্ষেত্রে তু ষড়্‌লিপ্তাং কুনেত্রবিকলাং ত্যজেৎ ॥৬।২১। অধিশক্রগৃহে বাণস্ত্র্যব্ধী ৫। ৪৩ লিপ্তাদিকং ত্যজেৎ। আশ্রয়স্য গুণস্যাস্য বধঃ স্ফুটগুণস্য যঃ ॥ তন্মূলং কর্ম্মযোগ্যঃ স্যাদ্‌গুণ আয়ুর্ব্বিধৌ স্মৃতঃ। খেটানাঞ্চ তনোর্ভাগাঃ খাব্ধি ৪০ শিষ্টাঃ কলীকৃতাঃ॥ পুনঃ শূন্যরসা ৬০ ভ্যস্তাঃ ক্রমাৎ স্যাদায়ুষঃ পলং। জন্মলগ্নং গ্রহেণোনং ন্যূনং চক্রার্দ্ধতো যদি ॥ তৎকলা স্যাত্তদাহারো নায়ং ষড়্‌ভাধিকে বিধিঃ। খখধৃত্যা ১৮০০ খখাঙ্কেন ৯০০ গুণিতং পলমায়ুষঃ ॥ ক্রমতঃ পাপসৌম্যানাং হারাপ্তং শোধনং ভবেৎ। খখধৃত্যূনহারশ্চেদ্ধারো হারদলং ক্রমাৎ ॥ আয়ুঃ পলঘ্নং শূন্যাভ্রং ধৃত্যাপ্তা শোধনং তথা। আয়ুঃপলং শোধনোনমেবং চক্রার্দ্ধশোধনং ॥ চক্রার্দ্ধশোধনে ত্বেকরাশৌ দ্ব্যাদিগ্রহে সতি। একস্যাধিকবীর্য্যস্য হানিং সত্যঃ প্রভাসতে ॥ আয়ুঃপলং হতং স্বীয়ৈর্গুণৈর্যোগৈ্যঃ কলাদিভিঃ। ষষ্ট্যাপ্তং ৬০ তৎ পুনঃ সূর্য্যসহস্রা১২০০০প্তাঃ সমাদয়ঃ॥ তনোরায়ুঃপলং সূর্য্যসহস্রা ১২০০০ প্তাঃ সমাদয়ঃ। চেল্লগ্নং বলবদ্যোজ্যা রাশিতুল্যাঃ সমাস্তথা ॥ দ্বাদশাহতভাগাদ্যৈর্দিনাদ্যৈশ্চাপি সংযুতাঃ। এবং সূর্য্যাদিলগ্নানামংশায়ুঃ প্রস্ফুটং ভবেৎ ॥ সূচ্চান্তরিতখেটস্য কলা আয়ুঃপলং ভবেৎ। তচ্চেৎ ষড়্‌ভঃ কলান্যূনং তদা তাং দ্বিগুণাচ্চ্যুতং ॥ অথবা। স্বনীচান্তরিতঃ খেটঃ সষড়্‌ভঃ সকলীকৃতঃ। আয়ুঃপলমিদং প্রাজ্ঞৈর্জ্ঞেয়ং পৈণ্ডাদিকত্রয়ে ॥ ত্র্যংশোনং শক্রভস্থস্য বিনারমায়ুষঃ পলং। অস্তগস্য দ্বিভাগোনং হিত্বা শুক্রশনৈশ্চরৌ ॥ একস্য যদি খেটস্য ত্র্যংশার্দ্ধহানিসম্ভবঃ। অধিকৈকা তদা হানিঃ কর্ত্তব্যাত্র বিপশ্চিতা ॥ চক্রার্দ্ধশোধনং কার্য্যং পূর্ব্ববৎ সতি সম্ভবে। এবমায়ুঃপলং পৈণ্ডে জীবঃ প্রোক্তে নিসর্গজে ॥ পৈণ্ডং যথাগতং সৌরের্ভানোর্ব্বিংশাংশবর্জ্জিতং। চন্দ্রস্য বেদভাগাঢ্যং ভৃগোর্ব্বিংশাংশ২০ সংযুতং॥ কুজগুর্ব্বোর্যুগাং৪শোনং জ্ঞস্যার্দ্ধং তৎ শরাংশযুক্‌। আয়ুঃপলং নিসর্গাখ্যে রবিকব্যোর্যথাগতং ॥ দশাংশোনদলং জ্ঞস্য জীবস্য বিদ্দশাংশকং। দশাংশং ভূমিপুত্রস্য বিংশত্যংশং নিশাপতেঃ ॥ দশঘ্নং শ্রুতিভির্ভক্তং শনেরায়ুঃপলং ভবেৎ। জীবোক্তং সপ্তভাগোনং সর্ব্বেষামায়ুষঃ পলং॥ আয়ুঃপলস্য খাভ্রাষ্টদিগ্‌ভাগেন ১০৮০০ সমাযুতং। ইত্থমায়ুঃপলং খাষ্টদশাপ্তং ১০৮০ স্যাৎ সমাদিকং॥ পৈণ্ডনৈসর্গ্যজীবোক্তে ভবেদায়ুঃ খগামিনাং। অথবা। রবেরায়ুঃপলং ত্র্যাপ্তং বিনখাংশং দিনাদিকং। পৈণ্ডমায়ুর্ভবেদিন্দোর্ব্বাণঘ্নং ৫ দ্বাদশো১২দ্ধৃতং ॥ কুজগুর্ব্বোর্যুগে৪নাপ্তং বুধস্য পঞ্চভির্হৃতং। কবেঃ শৈল৭হতং বিংশত্যা ২০ প্তং শৌরের্গুণো৩দ্ধৃতং ॥ বিধোরায়ুঃপলং লব্ধং খরসৈঃ স্যাদ্দিনাদিকং ॥ নিসর্গে শশিপুত্রস্য রাম ৩ ঘ্নং খযমো২০দ্ধৃতং।

রবিকব্যোর্গুণেনাপ্তং কুজস্য খগুণোদ্ধৃতং॥ গুরোস্ত্রিঘ্নং খচন্দ্রা১০প্তং শনেস্তর্কাং৬শতোল্লিতং ॥ অথবা । আয়ুঃপলমিনাদীনাং খাব্ধিষণ্ণাগ৮৬৪০ভাগযুক্। দ্বিঘ্নং সপ্তাপ্তমায়ুঃ স্যাদ্দিনাদ্যং জীবভাষিতং ॥ বিরাশিলগ্নবিকলা খখখার্কে১২০০০হৃতা তনোঃ। তদংশকসমং জ্ঞেয়মায়ুঃ পৈণ্ডাদিকত্রয়ে ॥ অংশতুল্যং তনোরায়ুর্ব্বদন্তি বহবো বুধাঃ । কেচিদ্রাশিসমং কেচিত্তস্য যস্যাধিপো বলী ॥ লগ্নস্ফুটস্য লিপ্তাভির্হন্যাদায়ুর্দ্ব্যচারিণাং। প্রত্যেকং চন্দ্রলিপ্তাভি ২১৬০০০ র্ভজেদ্বর্ষাধিকং ভবেৎ ॥ অনেন হীনস্বস্বায়ুর্লগ্নে পাপগ্রহে সতি। দৃষ্টে তু সৌম্যখেটেন তস্যার্দ্ধেন তদা বিযুক্ ॥ ব্যাখানমুৎপলস্যৈব বৃহজ্জাতকভাষিতং। কেচিৎ প্রাহুর্লগ্নরাশিং ত্যক্ত্বা লিপ্তাদিকা ক্রিয়া ॥ অন্যে লগ্নস্থপাপস্য ভাবোত্থফলতাড়িতং। পুরাপ্তং শোধ্যমায়ুর্যৎ তৎ ষষ্ট্যাপ্তং বিশোধয়েৎ ॥ তত্রাপি লগ্নে পাপৌ চেৎ বলিষ্ঠস্য ফলেন তৎ। সাম্যে পুষ্টফলেনৈব ক্রিয়া কার্য্যা বিচক্ষণৈঃ ॥ পাপেঽপি লগ্নে লগ্নেশে ন কর্ত্তব্যা স্থিয়ং ক্রিয়া। অংশায়ুষি ন কার্য্যৈবং হানিঃ প্রাজ্ঞৈঃ কথঞ্চন ॥ লগ্নস্য বীর্য্যাদংশোত্থং পৈণ্ডং ভানোর্ব্বলাধিকাৎ। নিসর্গোঽয়ং বিধোর্ব্বীর্য্যাদায়ুঃ সাধ্যং বিচক্ষণৈঃ ॥ চে-শেদ্বলহীনাঃ স্যুর্জীবোক্তং সাধয়েত্তদা। লগ্নেন্দ্বোর্লগ্নভান্বোশ্চ সূর্য্যেন্দ্বো সমবীর্য্যয়োঃ॥ তদায়ুষো যদৈক্যার্দ্ধ তদুক্তং শ্রীধরাদিভিঃ। নাক্ষত্রসাবনাদায়ুঃ পৃথক্শূন্যনগাংশকৈঃ ॥ সাষ্টসূর্য্যাংশকৈ১২৮র্হীনং সৌরং বর্ষাদিকং ভবেৎ ॥ পথ্যাশিনঃ সধর্ম্মা যে সচ্ছীলাঢ্যা জিতেন্দ্রিয়াঃ। গুরুদেবদ্বিজে ভক্তাস্তেষামেবায়ুরীরিতং ॥ যে পাপা লুব্ধকৃপণা দেবব্রাহ্মণনিন্দকাঃ। বন্ধুগুর্ব্বঙ্গনাসক্তাস্তেষাং মৃত্যুরকালজঃ ॥ ইতি তোষণ্যামায়ুর্দায়াধ্যায়ঃ ॥

পরমায়ুষঃ (পুং) অসনবৃক্ষঃ। ইতি শব্দচন্দ্রিকা ॥

পরমার্থঃ (পুং) উৎকৃষ্টবস্তু। যথার্থঃ। যথা। প্রপঞ্চো যদি বর্ত্তেত নিবর্ত্তেত ন সংশয়ঃ। মায়ামাত্রমিদং দ্বৈতমদ্বৈতং পরমার্থতঃ ॥ ইতি মাণ্ডূক্যবার্ত্তিকং ॥

পরমার্হতঃ (পুং) জৈনরাজর্ষিবিশেষঃ। ইতি হেমচন্দ্রঃ ॥

পরমৃত্যুঃ (পুং) কাকঃ। পরেভ্যো মৃত্যুরস্য। ইতি ত্রিকাণ্ডশেষঃ ॥

পরমেশ্বরঃ (পুং) শিবঃ। ইতি হলায়ুধঃ ॥ বিষ্ণুঃ। যথা। ইদন্ত দ্বাদশং প্রোক্তং পত্রং বৈ কেশবস্য হি। দ্বাদশারং তথা চক্রং যন্নাভিভুজং তথা ॥ ত্রিব্যূহস্ত্বেকমূর্ত্তিশ্চ তথোক্তঃ পরমেশ্বরঃ। ইতি বনে ৫৮ অধ্যায়ঃ ॥

পরমেষ্ঠিনী (স্ত্রী) ব্রাহ্মী। বামনহাটী ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥ পরমেষ্ঠিনঃ শক্তিশ্চ ॥

পরমেষ্ঠী [ন্] (পুং) ব্রহ্মা। ইত্যমরঃ ॥ জিনঃ। ইতি হেমচন্দ্রঃ ॥ শালগ্রাম-

বিশেষঃ। যথা। পরমেষ্ঠী চ শুক্লাভঃ পদ্মচক্রসমন্বিতঃ। চিত্রাকৃতিস্তথা পৃষ্ঠে শুষিরঞ্চাতিপুষ্কলং ॥ পরমেষ্ঠী লোহিতাভশ্চক্রমেকং তথা যুতং। বিম্বাকৃতিস্তথা রেখা শুষিরঞ্চাতিপুষ্কলং ॥ ইতি ব্রহ্মপুরাণং ॥ পরমেষ্ঠী চ শুক্লাভশ্চক্রপদ্মসমন্বিতঃ। স বর্ত্তুলস্তথা পীতঃ পৃষ্ঠে চ শুষিরং ধ্রুবং ॥ ইতি পুরাণসংগ্রহঃ ॥ পরমেষ্ঠী তু রক্তাভশ্চক্রপদ্মসমন্বিতঃ। দ্বিধাকৃতস্তথা পৃষ্ঠে শুষিরঞ্চাপি বর্ত্তুলং ॥ পীতবর্ণযুতো বাপি ভুক্তিমুক্তিবরপ্রদঃ ॥ ইতি বৈশ্বানরসংহিতা ॥*॥ গুরুবিশেষঃ। যথা। আদৌ সর্ব্বত্র দেবেশি মন্ত্রদঃ পরমো গুরুঃ। পরাপরগুরুস্ত্বং হি পরমেষ্ঠী ত্বহং গুরুঃ ॥ ইতি বৃহন্নীলতন্ত্রে ২ পটলঃ ॥ মন্ত্রদাতা গুরুঃ প্রোক্তো মন্ত্রস্ত পরমো গুরুঃ। পরাপরগুরুস্ত্বং হি পরমেষ্ঠিগুরুস্ত্বহং ॥ ইতি তন্ত্রান্তরং ॥

পরম্পরঃ (পুং) প্রপৌত্রাদিঃ। মৃগভেদঃ। ইতি হেমচন্দ্রঃ ॥ প্রপৌত্রতনয়ঃ। ইতি মেদিনী ॥

পরম্পরা (স্ত্রী) অন্বয়ঃ সন্তানঃ। বধঃ। হিংসা। ইতি হেমচন্দ্রঃ পরীপাটী। অনুক্রমঃ। ইতি শব্দরত্নাবলী। যথা। ইমং বিবস্বতে যোগং প্রোক্তবানহমব্যয়ং। বিবস্বান্ মনবে প্রাহ মনুরিক্ষ্বাকবেঽব্রবীৎ ॥ এবং পরম্পরাপ্রাপ্তং তথা রাজর্ষয়ো বিদুঃ। স কালেনেহ মহতা যোগো নষ্টঃ পরন্তপ ॥ ইতি শ্রীভগবদ্গীতায়াং ৪ অধ্যায়ঃ ॥

পরম্পরাকং (ক্লী) যজ্ঞার্থপশুহননং। তৎপর্য্যায়ঃ। শমনং ২ প্রোক্ষণং ৩। ইত্যমরঃ ॥ ঘাতনং ৪ বধঃ ৫। ইতি শব্দরত্নাবলী ॥

পরম্পরীণং (ত্রি) পরম্পরাপ্রাপ্তং। যথা। লক্ষ্মীং পরম্পরীণাং ত্বং পুত্রপৌত্রীণতাং নয়। ইতি ভট্টিঃ ॥

পররুঃ (পুং) কেশরাজঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

পরলোকঃ (পুং) লোকান্তরং। তচ্চ স্বর্গাদি। যথা। সমজ্ঞানাম্নভূয়িষ্ঠপান্থবৈমত্যমেত্য যং। লোকে প্রয়াতি পন্থানং পরলোকেন তং কুতঃ ॥ ইতি নৈষধঃ ॥

পরলোকগমঃ (পুং) মৃত্যুঃ। ইতি হেমচন্দ্রঃ ॥

পরবশঃ (ত্রি) অন্যবশীভূতঃ। তৎপর্য্যায়ঃ। পরায়ত্তঃ ২ পরাধীনঃ ৩ পরচ্ছন্দঃ ৪ পরবান্ ৫। ইতি হেমচন্দ্রঃ ॥

পরবাণিঃ (পুং) ধর্ম্মাধ্যক্ষঃ। বৎসরঃ। ইতি মেদিনী ॥ কার্ত্তিকেয়বাহনো ময়ূরঃ। ইতি শব্দমালা ॥

পরবান্ [ৎ] (ত্রি) পরাধীনঃ। ইত্যমরঃ ॥

পরব্রতঃ (পুং) ধৃতরাষ্ট্রঃ। ইতি শব্দরত্নাবলী ॥

পরশং (ক্লী) রত্নবিশেষঃ। যথা। মুক্তামাণিক্যপরশমণিরত্নাকরান্বিতং। কৃষ্ণভ্রমরিন্দ্রনীলমণিরাজিবিরাজিতং ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ৪ অধ্যায়ঃ ॥

পরশব্যং (ত্রি) পরশবে হিতং। তস্মৈ

হিতাদাবুদন্তগবাদের্যৎ। ইতি সংক্ষিপ্ত-সারসূত্রং ॥

পরশুঃ (পুং) অস্ত্রবিশেষঃ। টাঙ্গী ইতি ভাষা। তৎপর্য্যায়ঃ। পশু´ঃ ২ পরশ্বধঃ ৩ পর্শ্বধঃ ৪ স্বধিতিঃ ৫ কুঠারঃ ৬। ইতি হেমচন্দ্রঃ ॥

পরশুধরঃ (পুং) গণেশঃ। ইতি হলায়ুধঃ ॥

পরশুরামঃ (পুং) ভগবতঃ ষোড়শাবতারঃ। যথা। অবতারে ষোড়শমে পশ্যন্ ব্রহ্মদ্রুহো নৃপান্। ত্রিঃসপ্তকৃত্বঃ কুপিতো নিঃক্ষত্রামকরোন্মহীং ॥ ইতি শ্রীভাগবতে ১ স্কন্ধে ২ অধ্যায়ঃ ॥ তৎপর্য্যায়ঃ। জামদগ্ন্যঃ ২ পশু´রামঃ ৩ পরশুরামকঃ ৪ ভার্গবঃ ৫ ভৃগুপতিঃ ৬ ভৃগুলাপতিঃ ৭। ইতি শব্দরত্নাবলী ॥ অস্যোৎপত্ত্যাদিকং যথা। মার্কণ্ডেয় উবাচ। অথ কালে ব্যতীতে তু জমদগ্নির্মহাতপাঃ। বিদর্ভরাজস্য সুতাং প্রযত্নেন জিতাং স্বয়ং ॥ ভার্য্যার্থে প্রতিজগ্রাহ রেণুকাং লক্ষণান্বিতাং। সা তস্মাৎ সুষুবে পুত্ত্রান্ চতুরো বেদসম্মতান্ ॥ রুমণ্বন্তং সুষেণঞ্চ বিশ্বং বিশ্বাবসুন্তথা। পশ্চাত্তস্যাং স্বয়ং জজ্ঞে ভগবান্ মধুসূদনঃ ॥ কার্ত্তবীর্য্যবধায়াশু শক্রাদ্যৈঃ সকলৈঃ সুরৈঃ। যাচিতঃ পঞ্চমঃ সোঽভূত্তেষাং রামাহ্বয়স্তু যঃ ॥ ভারাবতরণার্থায় জাতঃ পরশুনা সহ। সহজঃ পরশুস্তস্য তং জহাতি কদাচন ॥ অয়ং নিজপিতামহ্যাশ্চরুভুক্তিবিপর্য্যয়াৎ। ব্রাহ্মণঃ ক্ষত্রিয়াচারো রামোঽভূৎ ক্রূরকর্ম্মকৃৎ ॥ স বেদানখিলান্ জ্ঞাত্বা ধনুর্বেদাংশ্চ সর্ব্বশঃ। স্বতাতাৎ কৃতকৃত্যোঽভূদ্বেদবিদ্যাবিশারদঃ ॥ ইতি কালিকাপুরাণে ৮৫ অধ্যায়ঃ ॥ অবশিষ্টং পাদ্মোত্তরখণ্ডে ৫০ অধ্যায়ে দ্রষ্টব্যং ॥

পরশ্বঃ [স্] ব্য শ্বঃ পরদিনং। আগামিদিনাৎ পরদিনং। ইত্যমরঃ ॥ অস্য টীকা পরশ্বঃশব্দে দ্রষ্টব্যা। গতদিনাৎ পূর্ব্বদিনং। পশু´ ইতি ভাষা। যথা। পরশ্বশ্চ মহাভাগ স্নাতুং গঙ্গাহ্রদং গতা। অবতীর্ণা বিকৃষ্টাস্মি বৃদ্ধনাগেন কেনচিৎ ॥ ইতি মার্কণ্ডেয়পুরাণে অবীক্ষিচ্চরিতং ॥

পরশ্বধঃ (পুং) কুঠারঃ। ইত্যমরঃ ॥

পরসংজ্ঞকঃ (পুং) আত্মা। ইতি শব্দরত্নাবলী ॥

পরস্বধঃ (পুং) পরশ্বধঃ। কুঠারঃ। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

পরস্পরং (ত্রি) অন্যোন্যং। ইতরেতরং। যথা। বনানি তোয়ানি চ নেত্রকল্পৈঃ পুষ্পৈঃ সরোজৈশ্চ নিলীনভৃঙ্গৈঃ। পরস্পরাং বিস্ময়বন্তি লক্ষ্মীমালোকয়াঞ্চক্রুরিবাদরেণ ॥ ইতি ভট্টিদ্বিতীয়সর্গঃ ॥

পরস্মৈপদং (ক্লী) দশলকারাণাং প্রত্যেকং পূর্ব্বনববিভক্তয়ঃ। যথা। লড়াদিষু পূর্ব্বে নব পরস্মৈপদং পরে নব আত্মনেপদং পরিভাষ্যন্তে। ইতি সংক্ষিপ্তসারব্যাকরণং ॥ বোপদেবেনাস্য পসংজ্ঞা কৃতা। যথা। নবশঃ পমে ঞিতোঽন্যঙিদ্ভ্যাং ঘে। ইতি মুগ্ধবোধব্যাকরণং ॥

পরক্ষেত্রং (ক্লী) পরপত্নী। পরশরীরং।

পরভূমিঃ। যথা। বৃষাপেহি পরক্ষেত্রাদায়াতি ক্ষেত্ররক্ষকঃ। ইতি চন্দ্রালোকঃ॥

পরা ব্য বিমোক্ষঃ। প্রাধান্যং। প্রাতিলোম্যং। ধর্ষণং। আভিমুখ্যং। ভৃশার্থং। বিক্রমঃ। গতিঃ। বধঃ। ইতি মেদিনী ॥*॥ উপসর্গবিশেষঃ। অস্যার্থঃ। ভঙ্গঃ। অনাদরঃ। প্রত্যাবৃত্তিঃ। ন্যগ্‌ভাবঃ। ইতি মুগ্ধবোধটীকায়াং দুর্গাদাসঃ॥

পরা (স্ত্রী) বন্ধ্যাকর্কোটকী। ইতি রাজনির্ঘণ্টঃ॥ নাভিরূপমূলাধারাৎ প্রথমোদিতনাদস্বরূপবর্ণঃ। যথা। মূলাধারাৎ প্রথমমুদিতো যস্তু ভাবঃ পরাখ্যঃ। ইত্যলঙ্কারকৌস্তুভে ১ কিরণঃ॥

পরাকঃ (পুং) ব্রতবিশেষঃ। খড়্গঃ। ইতি মেদিনী॥ ক্ষুদ্রঃ। রোগবিশেষঃ। জন্তুবিশেষঃ। ইতি বিশ্বঃ॥ *॥ পরাকব্রতমাহ মনুঃ। যতাত্মনোঽপ্রমত্তস্য দ্বাদশাহমভোজনং। পরাকো নাম কৃচ্ছ্রোঽয়ং সর্ব্বপাপাপনোদনঃ॥ পরাকে পঞ্চ ধেনবঃ পরাকস্য প্রাজাপত্যপঞ্চকতুল্যত্বাৎ। যথা অঙ্গিরাঃ। ষড়্ভির্ব্বর্ষৈঃ কৃচ্ছ্রচারী ব্রহ্মহা তু বিশুধ্যতি। মাসি মাসি পরাকেণ ত্রিভির্ব্বর্ষৈর্ব্যপোহতি॥ অত্র ষড়্ভির্ব্বর্ষৈঃ সাশীতিশতপ্রাজাপত্যানি পূর্ব্বমুক্তানি তথা প্রতিমাস্যেকৈকপরাকেণ বর্ষে দ্বাদশ পরাকাঃ বর্ষত্রয়ে ষট্‌ত্রিংশৎ পরাকাঃ। ততশ্চ ষট্‌ত্রিংশৎ পরাকাশীত্যুত্তরপ্রাজাপত্যশতয়োঃ প্রত্যেকং ব্রহ্মবধপাপক্ষয়ৈককার্য্যকরত্বাৎ তুল্যত্বং ষট্‌ত্রিংশতশ্চ পঞ্চগুণমশীত্যুত্তরশতং ভবতীতি। অতঃ প্রাজাপত্যপঞ্চকতুল্যঃ পরাকঃ। ইতি প্রায়শ্চিত্ততত্ত্বং॥*॥ দ্বাদশাহোপবাসেন পরাকঃ সর্ব্বপাপহা। একৈকং বর্দ্ধয়েৎ পিণ্ডং শুক্লে কৃষ্ণে চ হ্রাসয়েৎ॥ ইতি গরুড়পুরাণে প্রায়শ্চিত্তপ্রকরণং॥

পরাক্ [চ্] (ত্রি) পরা অঞ্চতি। প্রতিলোমগমনাশ্রয়ঃ। ইত্যঞ্চধাতোঃ ক্বিপ্‌প্রত্যয়নিষ্পন্নঃ॥

পরাক্‌পুষ্পী (স্ত্রী) অপামার্গঃ। ইতি রাজনির্ঘণ্টঃ॥

পরাক্রমঃ (পুং) পরাক্রম্যতেঽনেন। তৎপর্য্যায়ঃ। দ্রবিণং ২ তরঃ ৩ সহঃ ৪ বলং ৫ শৌর্য্যং ৬ স্থাম ৭ শুষ্মং ৮ শক্তিঃ ৯ প্রাণঃ ১০। ইত্যমরঃ॥ মহঃ ১১ শুষ্ম ১২ সামর্থ্যং ১৩। ইতি শব্দরত্নাবলী॥ বিক্রমঃ॥ উদ্যোগঃ। ইতি মেদিনী॥ নিষ্ক্রান্তিঃ। ইতি শব্দরত্নাবলী॥

পরাগঃ (পুং) পুষ্পধূলিঃ। তৎপর্য্যায়ঃ। সুমনোরজঃ ২ কৌসুমরেণুঃ ৩। ইত্যমরঃ॥ পুষ্পরেণুঃ ৪। ইতি শব্দরত্নাবলী॥ ধূলিঃ॥ স্নানীয়দ্রব্যং॥ গিরিপ্রভেদঃ॥ বিখ্যাতিঃ॥ উপরাগঃ॥ চন্দনং। ইতি মেদিনী॥ স্বচ্ছন্দগমনং। ইতি শব্দরত্নাবলী॥

পরাঙ্গদঃ (পুং) শিবঃ। ইতি শব্দমালা॥

পরাঙ্গবঃ (পুং) সমুদ্রঃ। ইতি ত্রিকাণ্ডশেষঃ॥

পরাঙ্মুখঃ (ত্রি) বিমুখঃ। তৎপর্য্যায়ঃ। পরাচীনঃ ২। ইত্যমরঃ॥

পরাচিতঃ (ত্রি) পরপুষ্টঃ। পরদ্বারা প্রতিপালিতঃ। তৎপর্য্যায়ঃ। পরিস্কন্দঃ ২

পরজাতঃ ৩ পরৈধিতঃ ৪। ইত্যমরঃ॥ পরিষ্কন্দঃ ৫। ইতি ভরতঃ॥

পরাচীনঃ (ত্রি) পরাঙ্মুখঃ। ইত্যমরঃ॥

পরাজয়ঃ (পুং) রণে ভঙ্গঃ। ইত্যমরঃ॥ তৎপর্য্যায়ঃ। ভঙ্গঃ ২ হারী ৩ হারিঃ ৪ পরাভবঃ ৫। ইতি শব্দরত্নাবলী॥

পরাজিতঃ (ত্রি) কৃতপরাজয়ঃ। হারিতঃ। তৎপর্য্যায়ঃ। পরাভূতঃ ২ বিজিতঃ ৩ নির্জিতঃ ৪ জিতঃ ৫। ইতি শব্দরত্নাবলী॥

পরাঙ্গঃ (পুং) তৈলযন্ত্রঃ। ফেনঃ। ছুরিকাদলং। ইতি শব্দরত্নাবলী॥

পরাৎপরঃ (পুং) শ্রেষ্ঠাদপি শ্রেষ্ঠঃ। স চ শ্রীকৃষ্ণঃ। যথা। দেবাঃ কালস্য কালোঽহং বিধাতুর্বিধিরেব চ। সংহারকর্ত্তুঃ সংহর্ত্তা পাতুঃ পাতা পরাৎপরঃ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ৬ অধ্যায়ঃ॥

পরাৎপ্রিয়ঃ (পুং) তৃণবিশেষঃ। উলু ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥

পরাদনঃ (পুং) পারসীকঘোটকঃ। ইতি ত্রিকাণ্ডশেষঃ॥

পরাধীনঃ (ত্রি) পরবশঃ। তৎপর্য্যায়ঃ। পরতন্ত্রঃ ২ পরবান্ ৩ নাথবান্ ৪। ইত্যমরঃ॥ তস্য জীবন্মৃতত্বং যথা। স্বাধীনবৃত্তেঃ সাফল্যং ন পরাধীনবৃত্তিতা। যে পরাধীনকর্ম্মাণো জীবন্তোঽপি চ তে মৃতাঃ॥ ইতি গরুড়পুরাণে ১১৩ অধ্যায়ঃ॥

পরানসা (স্ত্রী) চিকিৎসা। ইতি শব্দচন্দ্রিকা॥

পরান্নং (ক্লী) অন্যস্বামিকভক্তপিষ্টকাদি॥ পরকর্ত্তৃকশস্যপাকজদ্রব্যমাত্রং। পরস্পৃষ্টান্নং। তস্য ত্যাজ্যত্বং যথা। পরান্নং পরবাসশ্চ নিত্যং ধর্ম্মরতস্ত্যজেৎ। ইতি স্মৃতিঃ॥ সংযমদিনে তস্য ত্যাজ্যত্বং যথা। কাংস্যং মাংসং মসূরঞ্চ চণকং কোরদূষকং। শাকং মধু পরান্নঞ্চ ত্যজেদুপবসন্ স্ত্রিয়ং॥ *॥ পারণদিনে তস্য ত্যাজ্যত্বং যথা। অভ্যঙ্গঞ্চ পরান্নঞ্চ তৈলং নির্ম্মাল্যলঙ্ঘনং। তুলসীচয়নং দ্যূতং পুনর্ভোজনমেব চ॥ বস্ত্রপীড়াং তথা ক্ষারং দ্বাদশ্যাং বর্জ্জয়েদ্বুধঃ॥ *॥ তদ্ভোক্তুর্যাগাদের্বিফলত্বং যথা। পরপাকেন জুষ্টস্য দ্বিজস্য গৃহমেধিনঃ। ইষ্টং দত্তং তপোঽধীতং যস্যান্নং তস্য তদ্ভবেৎ॥ *॥ তদ্ভুক্ত্বা পুত্ত্রোৎপাদনে দোষো যথা। যস্যান্নেন তু ভুক্তেন ভার্য্যাং সমধিগচ্ছতি। যস্যান্নং তস্য তে পুত্ত্রা অন্নাদ্রেতঃ প্রবর্ত্ততে॥ *॥ ব্রাহ্মণাদিস্বামিকান্নভোজনে দোষো যথা। ব্রাহ্মণান্নেন দারিদ্র্যং ক্ষত্রিয়ান্নেন প্রেষ্যতাং। বৈশ্যান্নেন তু শূদ্রত্বং শূদ্রান্নৈর্নরকং ব্রজেৎ॥ ইত্যেকাদশীতত্ত্বং॥ *॥ পরান্নভোজনেন তীর্থগমনে ফলস্যাল্পত্বং যথা। ষোড়শাংশং স লভতে যঃ পরান্নেন গচ্ছতি। অর্দ্ধং তীর্থফলং তস্য যঃ প্রসঙ্গেন গচ্ছতি॥ ইতি প্রায়শ্চিত্ততত্ত্বং॥ *॥ মহাগুরুনিপাতে তস্য ত্যাজ্যত্বং যথা। অন্যশ্রাদ্ধং পরান্নঞ্চ গন্ধং মাল্যঞ্চ মৈথুনং। বর্জ্জয়েদ্‌গুরুপাতে তু যাবৎ পূর্ণো ন বৎসরঃ॥ ইতি শুদ্ধিতত্ত্বং॥ *॥ তদ্ভোক্তুর্মন্ত্রসিদ্ধিহানির্যথা। জিহ্বা দগ্ধা পরান্নেন

করৌ দগ্ধৌ প্রতিগ্রহাৎ। মনো দগ্ধং পরস্ত্রীভিঃ কথং সিদ্ধির্ব্বরাননে॥ ইতি তন্ত্রং ॥ * ॥ তদ্ভোজনে প্রতিপ্রসবো যথা। গুর্ব্বন্নং মাতুলান্নং বা শ্বশুরান্নং তথৈব চ। পিতুঃ পুত্রস্য চৈবান্নং ন পরান্নমিতি স্মৃতিঃ ॥ ইত্যেকাদশীতত্ত্বং ॥

পরান্নঃ (ত্রি) পরান্নোপজীবী। তৎপর্য্যায়ঃ। পরপিণ্ডাদঃ ২। ইত্যমরঃ ॥

পরাপং (ত্রি) পরেপং। ইতি সিদ্ধান্তকৌমুদী॥

পরাপরং (ক্লী) পরূষকং। ইতি ভাবপ্রকাশঃ॥ পরমপরঞ্চ ॥

পরাপরগুরুঃ (পুং) গুরুবিশেষঃ। স তু ভগবতী। অস্য প্রমাণং পরমেষ্ঠিশব্দে দ্রষ্টব্যং ॥

পরাভবঃ (পুং) তিরস্কারঃ। বিনাশঃ। ইতি মেদিনী॥ আদ্যস্য পর্য্যায়ঃ। ন্যক্কারঃ ২ তিরস্ক্রিয়া ৩ পরিভাবঃ ৪ বিপ্রকারঃ ৫ পরিভবঃ ৬ অভিভবঃ ৭ অত্যাকারঃ ৮ নিকারঃ ৯। ইতি হেমচন্দ্রঃ॥

পরাভূতঃ (ত্রি) পরাজিতঃ। ইত্যমরঃ॥

পরামর্শঃ (পুং) যুক্তিঃ। বিবেচনং। তৎপর্য্যায়ঃ। বিতর্কঃ ২ উন্নয়নং ৩ বিমর্ষণং ৪ অধ্যাহারঃ ৫ তর্কঃ ৬ ঊহঃ ৭। ইতি হেমচন্দ্রঃ॥ ব্যাপ্তিবিশিষ্টপক্ষধর্ম্মতাজ্ঞানং। যথা। ব্যাপ্যস্য পক্ষধর্ম্মত্বধীঃ পরামর্শ উচ্যতে। ইতি ভাষাপরিচ্ছেদঃ॥ অস্যার্থঃ ব্যাপ্তিবিশিষ্টস্য পক্ষেণ সহ বৈশিষ্ট্যাবগাহিজ্ঞানমনুমিতিজনকং। তচ্চ ব্যাপ্যঃ পক্ষে ইতি জ্ঞানং পক্ষো ব্যাপ্যবান্ ইতি জ্ঞানং বা। ইতি সিদ্ধান্তমুক্তাবলী॥ স চানুমিতৌ ব্যাপারঃ। যথা। ব্যাপারস্তু পরামর্শঃ করণং ব্যাপ্তিধী-র্ভবেৎ। ইতি ভাষাপরিচ্ছেদঃ॥ অস্যার্থঃ। অনুমায়ামনুমিতৌ ব্যাপ্তিজ্ঞানং কারণং পরামর্শো ব্যাপারঃ। তথা হি। যেন পুরুষেণ মহানসাদৌ ধূমে বহ্নের্ব্যাপ্তির্গৃহীতা পশ্চাচ্চ স এব পুরুষঃ ক্বচিৎ পর্ব্বতাদৌ অবিচ্ছিন্নমূলাং ধূমরেখাং পশ্যতি তদনন্তরং ধূমো বহ্নিব্যাপ্য ইত্যেবং রূপং ব্যাপ্তিস্মরণং তস্য পুরুষস্য ভবতি পশ্চাচ্চ বহ্নিব্যাপ্যধূমবান্ পর্ব্বত ইতি জ্ঞানং ভবতি স এব পরামর্শ ইত্যুচ্যতে। ইতি সিদ্ধান্তমুক্তাবলী॥

পরামৃতং (ক্লী) বর্ষণং। ইতি ত্রিকাণ্ডশেষঃ॥

পরামৃষ্টঃ (ত্রি) সম্বদ্ধঃ। সম্বন্ধযুক্তঃ। যথা। ক্লেশকর্ম্মবিপাকাশয়ৈরপরামৃষ্টঃ। ইতি কুসুমাঞ্জলিকারিকাব্যাখ্যানে রামভদ্রঃ॥ কৃতপরামর্শঃ। বিবেচিতঃ। ইতি পরাপূর্ব্বমৃশধাতোঃ কর্ম্মণি ক্তপ্রত্যয়েন সিদ্ধঃ॥

পরায়ণং (ত্রি) আসঙ্গবচনং। ইত্যমরঃ॥ পরং কেবলময়নমাসক্তিস্থানমিতি পরায়ণং। যথা ধর্ম্মপরায়ণো ধর্ম্মাসক্তঃ। ইতি ভরতঃ॥ আশ্রয়ঃ। তৎপরং। অভীষ্টং। ইতি মেদিনী॥

পরায়ত্তং (ত্রি) পরাধীনং। যথা। তত্রায়ত্তবশাধীনচ্ছন্দবন্তঃ পরাৎপরে। ইতি হেমচন্দ্রঃ॥

পরারি ব্য পূর্ব্বতরবৎসরঃ। গতত্তৃতীয়বর্ষঃ। ইত্যমরভরতৌ ॥ পরশব্দো ত্রি ॥

পরারিক্তঃ (ত্রি) পূর্ব্বতরবৎসরসম্বন্ধী। পরারি-ভব ইত্যর্থে ত্বপ্রত্যয়নিষ্পন্নঃ। ইতি ব্যাকরণং ॥

পরারুঃ (পুং) কারবেল্লঃ। ইতি ত্রিকাণ্ড-শেষঃ ॥

পরারুকঃ (পুং) প্রস্তরঃ। ইতি ত্রিকাণ্ড-শেষঃ ॥

পরার্দ্ধং (ক্লী) দশমধ্যসংখ্যা। লক্ষলক্ষ-কোটিঃ। ইদং চরমসংখ্যা অষ্টাদশাঙ্ক-পর্য্যন্তং। ইতি হেমচন্দ্রঃ জ্যোতিষশ্চ ॥ ব্রহ্মণ আয়ুষোঽর্দ্ধং। যথা। নিজেন তস্য মানেন চায়ুর্ব্বর্ষশতং স্মৃতং। তৎ পরাখ্যং তদর্দ্ধঞ্চ পরার্দ্ধমভিধীয়তে ॥ ইতি কৌর্ম্মে ৫ অধ্যায়ঃ ॥

পরার্দ্ধ্যঃ (ত্রি) প্রধানঃ। শ্রেষ্ঠঃ। ইত্য-মরঃ ॥

পরাবতং (ক্লী) পরূষকং। ইতি রাজনির্ঘণ্টঃ ॥

পরাবর্ত্তঃ (পুং) পরিবর্ত্তঃ। বিনিময়ঃ। ইতি হেমচন্দ্রঃ ॥

পরাবহঃ (পুং) সপ্তবায়ন্তর্গতসপ্তমবায়ুঃ। স তু পরিবহবায়োরূর্দ্ধস্থিতঃ। ইতি সিদ্ধান্ত-শিরোমণিঃ ॥

পরাবিদ্ধঃ (পুং) কুবেরঃ। ইতি শব্দমালা ॥

পরাবেদী (স্ত্রী) বৃহতী। ইতি কেচিৎ ॥

পরাশরঃ (পুং) ব্যাসপিতা। শক্তিমুনিপুত্রঃ। যথা। সুতং ত্বজনয়চ্ছক্তেরদৃশ্যন্তী পরা-শরং। কালী পরাশরাৎ জজ্ঞে কৃষ্ণদ্বৈপা-য়নং মুনিং ॥ ইত্যগ্নিপুরাণং ॥

পরাশরী [ন্] (পুং) পারাশরী। চতুর্থা-শ্রমী। পরাশরেণ প্রোক্তং ভিক্ষুসূত্রং পারাশরং তদ্বিদ্যতেঽস্যাধ্যয়নায়েতি ষঃ ইন্ চ। পরাশরীতি হ্রস্বাদিশ্চ। ইত্য-মরটীকায়াং ভরতঃ ॥

পরাশ্রয়া (স্ত্রী) বৃক্ষোপরিজাতলতাবিশেষঃ। পরসাড়া ইতি ভাষা। তৎপর্য্যায়ঃ। বন্দা ২ বৃক্ষাদনী ৩ বৃক্ষরুহা ৪ জীব-ন্তিকা ৫ বশিনী ৬ পুত্রিণী ৭ বন্দ্যা ৮ পরপুষ্টা ৯। ইতি শব্দচন্দ্রিকা ॥

পরাসনং (ক্লী) মারণং। বধঃ। ইত্যমরঃ ॥

পরাসুঃ (ত্রি) মৃতঃ। ইত্যমরঃ ॥

পরাসুতা (স্ত্রী) মৃতত্বং। নিদ্রাপরবশতা। ইতি পুরাণং ॥

পরাস্কন্দী [ন্] (পুং) চৌরঃ। ইত্যমরঃ ॥

পরাস্তং (ত্রি) নিরস্তং। পরাজিতং। যথা। হ্রীর্গিরাস্তু বরমস্তু পুনর্ম্মাস্বীকৃতৈব পর-বাগপরাস্তা। ইতি নৈষধে ৫ সর্গঃ ॥

পরাহঃ (পুং) পরদিনং। যথা। পূর্ব্বাহে তদ্বিধত্বেঽপি পরাহে ত্রিসন্ধ্যব্যাপিত্বে পরাহ এব। ইতি সাবিত্রীব্রতে তিথি-তত্ত্বং ॥

পরাহ্ণঃ (পুং) অপরাহ্ণঃ। বিকালঃ। পরঞ্চ তদহশ্চেতি কর্ম্মধারয়ঃ ॥

পরি ব্য সর্ব্বতোভাবঃ। বর্জ্জনং। ব্যাধিঃ। শেষঃ। ইত্থম্ভূতঃ। আখ্যানং। ভাগঃ। বীপ্সা। আলিঙ্গনং। লক্ষণং। দোষা-খ্যানং। নিরসনং। পূজা। ব্যাপ্তিঃ। ভূষণং। ইতি মেদিনী ॥ উপরমঃ। শোকঃ। ইতি হেমচন্দ্রঃ ॥ সন্তোষভাষণং।

ইতি শব্দরত্নাবলী ॥ উপসর্গবিশেষঃ। অস্ত্যার্থঃ। সর্ব্বতোভাবঃ। অতিশয়ঃ। বীপ্সা। ইত্থম্ভাবঃ। চিহ্নং। ভাগঃ। ত্যাগঃ। নিয়মঃ। ইতি মুগ্ধবোধটীকায়াং দুর্গাদাসঃ ॥

পরিকথা (স্ত্রী) বাঙ্ময়ভেদঃ। যথা। অথ বাঙ্ময়ভেদাঃ স্যুশ্চম্পুঃ খণ্ডকথা কথা। আখ্যায়িকা পরিকথা কলাপকবিশেষকৌ॥ ইতি ত্রিকাণ্ডশেষঃ ॥

পরিকম্পঃ (পুং) ভয়ং। কম্পঃ। ইতি মেদিনী॥

পরিকরঃ (পুং) পর্য্যঙ্কঃ। পরিবারঃ। ইত্যমরঃ॥ সমারম্ভঃ। বৃন্দঃ। ইতি শব্দরত্নাবলী॥ প্রগাঢ়গাত্রিকাবন্ধঃ। বিবেকঃ। ইতি বিশ্বঃ॥ সহকারী। যথা। পরিকরঃ সহকারী স চ ব্যাপ্তিপক্ষধর্ম্মত্বাদিঃ। ইতি সামান্যনিরুক্তৌ জগদীশঃ॥

পরিকর্ত্তা [ঋ] (পুং) অনূঢ়জ্যেষ্ঠে কনিষ্ঠবিবাহস্য যাজকঃ। ইত্যুদ্বাহতত্ত্বং ॥

পরিকর্ম্ম [ন্] (ক্লী) কুঙ্কুমাদিনা শরীরশোভাধানরূপসংস্কারঃ। ইতি ভরতঃ॥ স্নানোদ্বর্ত্তনাদি। ইতি স্বামী॥ শরীরসংস্কারমাত্রং। ইত্যন্যে॥ তৎপর্য্যায়ঃ। অঙ্গসংস্কারঃ ২। ইত্যমরঃ॥ প্রতিকর্ম্ম ৩। ইতি শব্দরত্নাবলী॥

পরিকর্ম্মা [ন্] (পুং) পরিচারকঃ। সেবকঃ। ইতি রত্নমালা॥

পরিকর্ম্মী [ন্] (ত্রি) পরিকর্ম্মা। ইতিহেমচন্দ্রঃ॥

পরিকাঙ্ক্ষিতঃ (ত্রি) তপস্বী। ইতি শব্দরত্নাবলী॥

পরিকূটং (ক্লী) পুরদ্বারকূটকং। তৎপর্য্যায়ঃ। হস্তিনখঃ ২ নগরদ্বারকূটকং ৩। ইতি হেমচন্দ্রঃ॥

পরিক্রমঃ (পুং) ক্রীড়ার্থং পদ্ভ্যাং গমনং। তৎপর্য্যায়ঃ। বিহারঃ ২। ইত্যমরঃ॥ প্রদক্ষিণং। যথা। বরাহ উবাচ। শৃণু ভদ্রে মহাপুণ্যং পৃথিব্যাং সর্ব্বতো দিশং। পরিক্রম্য যথাধ্বানং প্রমাণগণিতং শুভং॥ ভূম্যাঃ পরিক্রমে সম্যক্ প্রমাণং যোজনানি চ। ষষ্টিকোটিসহস্রাণি ষষ্টিকোটিশতানি চ॥ তীর্থান্যেতানি দেবাশ্চ তারকাশ্চ নভস্তলে। গণিতানি সমস্তানি বায়ুনা জগদায়ুষা॥ ব্রহ্মণা লোমশেনৈব নারদেন ধ্রুবেণ চ। জাম্ববতা সপুত্রেণ রাবণেন হনূমতা॥ এতৈরনেকধা দেবৈ সসাগরবনা মহী। ক্রমিতা বালিনা চৈব বাহ্যমণ্ডলরেখয়া॥ অন্তরাভ্রমণেনৈব সুগ্রীবেণ মহাত্মনা। তথা চ পূর্ব্বদেবেন্দ্রৈঃ পঞ্চভিঃ পাণ্ডুনন্দনৈঃ॥ যোগসিদ্ধৈস্তথা কৈশ্চিন্মার্কণ্ডেয়মুখৈরপি। ক্রমিতা ন ক্রমিষ্যন্তি ন পূর্ব্বে নাপরে জনাঃ॥ অল্পসত্ত্ববলোপেতৈঃ প্রাণিভিশ্চাল্পবুদ্ধিভিঃ। মনসাপি ন শক্যন্তে গমনস্য চ কা কথা॥ সপ্তদ্বীপে তু তীর্থানি ভ্রমণাদ্যৎ ফলং ভবেৎ। প্রাপ্যতে চাধিকং তস্মান্মথুরায়াঃ পরিক্রমে॥ মথুরাং সমনুপ্রাপ্য যস্তু কুর্য্যাৎ প্রদক্ষিণং। প্রদক্ষিণীকৃতা তেন সপ্তদ্বীপা বসুন্ধরা॥ তস্মাৎ সর্ব্বপ্রযত্নেন সর্ব্বকামানভীপ্সুভিঃ। কর্ত্তব্যা মথুরাং প্রাপ্য নরৈঃ সম্যক্ প্রদক্ষিণা॥ ইতি বরাহপুরাণং॥

পরিক্রমসহঃ (পুং) ছাগলঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

পরিক্রিয়া (স্ত্রী) পরিখাজলাদিনা বেষ্টনং। তৎপর্য্যায়ঃ। পরিসর্পঃ ২। ইত্যমরঃ ॥

পরিখা (স্ত্রী) রাজধান্যাদিবেষ্টনখাতং। গড়খাই ইতি খানা ইতি চ যস্যাঃ প্রসিদ্ধিঃ। ইতি ভরতঃ ॥ তৎপর্য্যায়ঃ। খেয়ং ২। ইত্যমরঃ ॥ তস্যা মানং যথা। প্রস্থে চ পরিখামানং শতহস্তং প্রশস্তকং। পরিতঃ শিবিরাণাঞ্চ গম্ভীরং দশহস্তকং ॥ সঙ্কেতপূর্ব্বকঞ্চৈব পরিখাদ্বারমীপ্সিতং। শত্রোরগম্যং মিত্রস্য গম্যমেব সুখেন চ ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ১০২ অধ্যায়ঃ ॥

পরিখ্যাতঃ (ত্রি) বিখ্যাতঃ। পরি সর্ব্বতোভাবেন খ্যাতঃ প্রথিতঃ। ইতি পরিপূর্ব্বখ্যাধাতোঃ কর্ত্তরি ক্তপ্রত্যয়নিষ্পন্নঃ ॥

পরিগণিতঃ (ত্রি) সর্ব্বতোভাবেন গণনাযুক্তঃ। যথা। পরিগণিতব্যতিরিক্তেষু সংসর্গকৃতবিশেষো নাদরণীয়ঃ পরিগণনানর্থক্যাৎ। ইতি জীমূতবাহনঃ ॥

পরিগতঃ (ত্রি) প্রাপ্তঃ। বিস্মৃতঃ। জ্ঞাতঃ। চেষ্টিতঃ। ইতি মেদিনী ॥ গতঃ। ইতি হেমচন্দ্রঃ ॥ বেষ্টিতঃ। যথা। অথ সবল্কদুকূলকুথাদিভিঃ পরিগতোজ্জ্বলচুল্কতবালধিঃ। ইতি ভট্টিকাব্যে দশমঃ সর্গঃ ॥

পরিগৃহ্যা (স্ত্রী) নারী। ইতি শব্দচন্দ্রিকা ॥

পরিগ্রহঃ (পুং) প্রতিগ্রহঃ। সৈন্যপশ্চাদ্ভাগঃ। পত্নী। ভার্য্যা। পরিজনঃ। পরিবারঃ। আদানং। স্বীকারঃ। মূলং। কন্দঃ। শাপঃ। শপথঃ। ইত্যমরভরতৌ ॥ রাহুবক্ত্রস্থভাস্করঃ। ইত্যজয়ঃ ॥

পরিগ্রাহঃ (পুং) যজ্ঞবেদিবিশেষঃ। ইতি কেচিৎ ॥

পরিঘঃ (পুং) লোহবদ্ধলগুড়ঃ। লোহময়লগুড়ঃ। লোহমুখলগুড়ঃ। তৎপর্য্যায়ঃ। পরিঘাতনঃ২। ইত্যমরঃ ॥ পরিঘাতকঃ৩। ইতি শব্দরত্নাবলী ॥ পরিঘাতঃ। পরিতো হননং। ইত্যমরভরতৌ ॥ বিষ্কম্ভাদিসপ্তবিংশতিযোগান্তর্গত ঊনবিংশতিযোগঃ। অর্গলঃ। ইতি মেদিনী ॥ মুদ্গরঃ। শূলঃ। ইত্যজয়ঃ ॥ কলসঃ। কাচঘটঃ। গোপুরং। সদ্ম। ইতি শব্দরত্নাবলী ॥*॥ অথ পরিঘযোগজাতফলং। উৎপত্তিকালে পরিঘো যদি স্যান্নরস্তদা বংশকুঠারকল্পঃ। অসত্যসাক্ষী ক্ষময়া বিহীনঃ স্বল্পানুভোক্তা বিজিতারিপক্ষঃ ॥ ইতি কোষ্ঠীপ্রদীপঃ ॥

পরিঘাতঃ (পুং) অস্ত্রং। হননং। ইতি ধরণিঃ ॥

পরিঘাতনঃ (পুং) পরিঘাস্ত্রং। ইত্যমরঃ ॥ সর্ব্বতোভাবেন হননে ক্লী ॥

পরিঘোষঃ (পুং) শব্দঃ। মেঘশব্দঃ। অবাচ্যঃ। ইতি মেদিনী ॥

পরিচয়ঃ (পুং) সমন্তাৎ চয়নং। বিশেষেণ জ্ঞানং। চেনা ইতি ভাষা। তৎপর্য্যায়ঃ। সংস্তবঃ ২। ইত্যমরঃ ॥ প্রণয়ঃ ৩। ইতি ভরতঃ ॥

পরিচরঃ (পুং) যুদ্ধকালে পরপ্রহারাৎ রথরক্ষকঃ। প্রজাসামন্তব্যবস্থাপনকারী।

ইতি কেচিৎ॥ সেনায়াং রাজ্ঞো দণ্ডনায়কঃ। ইত্যন্যে। ইতি ভরতঃ॥ তৎপর্য্যায়ঃ। পরিধিস্থঃ ২। ইত্যমরঃ॥ সহায়ঃ ৩। ইতি রত্নমালা॥

পরিচরণকর্ম্ম [ন্] (ক্লী) পরিচর্য্যা। তদ্বৈদিকপর্য্যায়াঃ। ইরজ্যতি ১ বিধেম ২ সপর্য্যতি ৩ নমস্যতি ৪ দুরস্যতি ৫ ঋধ্নোতি ৬ ঋণদ্ধি ৭ ঋচ্ছতি ৮ সপতি ৯ বিবাসতি ১০। ইতি দশ পরিচরণকর্ম্মাণঃ। ইতি বেদনিঘণ্টৌ ৩ অধ্যায়ঃ॥

পরিচর্য্যা (স্ত্রী) সেবা। তৎপর্য্যায়ঃ। বরিবস্যা ২ শুশ্রূষা ৩ উপাসনং ৪। ইত্যমরঃ॥ পরিসর্য্যা ৫ উপাসনা ৬ উপাস্তিঃ ৭। ইতি ভরতঃ॥ শুশ্রূষণা ৮। ইতি শব্দরত্নাবলী॥

পরিচায্যঃ (পুং) যজ্ঞাগ্নিঃ। তৎপর্য্যায়ঃ। সমূহ্যঃ ২ উপচায্যঃ ৩। ইত্যমরঃ॥

পরিচারকঃ (ত্রি) সেবকঃ। চাকর ইতি ভাষা। তৎপর্য্যায়ঃ। ভৃত্যঃ ২ দাসেরঃ ৩ দাসেয়ঃ ৪ দাসঃ ৫ গোপ্যকঃ ৬ চেটকঃ ৭ নিযোজ্যঃ ৮ কিঙ্করঃ ৯ প্রেষ্যঃ ১০ ভুজিষ্যঃ ১১। ইত্যমরঃ॥ ডিঙ্গরঃ ১২ চেটঃ ১৩ গোপ্যঃ ১৪ পরাচিতঃ ১৫ পরিস্কন্দঃ ১৬ পরিকর্ম্মী ১৭। ইতি হেমচন্দ্রঃ॥

পরিচার্য্যঃ (ত্রি) সেব্যঃ। পরিচর্য্যতেঽসৌ। ইতি পরিপূর্ব্বচরধাতোঃ কর্ম্মণি ঘ্যণ্॥

পরিচিতঃ (ত্রি) পরিচয়বিশিষ্টঃ। জ্ঞাতঃ। যথা। ত্যক্তব্যেয়ং চিরপরিচিতা জন্মভূমীতি বুদ্ধ্যা মা খিদ্যস্ব ত্রিভুবনজনত্রাণহেতো ক্রমাঙ্ক। কিন্তু ত্যাজ্যং ভবতি মহতাং চেৎ পরস্যোপকারো বারাণস্যা মুনিরপি গতো দক্ষিণাংশামগস্ত্যঃ॥ ইতি পদাঙ্কদূতঃ॥

পরিচেয়ং (ত্রি) পরিচয়যোগ্যং। পরিচয়নীয়ং। পরিচেতব্যং। ইতি পরিপূর্ব্বচিধাতোঃ কর্ম্মণি যৎপ্রত্যয়েন নিষ্পন্নং॥

পরিচ্ছদঃ (পুং) পরিবারঃ। ইতি হেমচন্দ্রঃ॥ হস্ত্যশ্ববস্ত্রকম্বলাদি। যথা। পরিচ্ছদে নৃপার্হেঽর্থে পরিবর্হোঽব্যয়াঃ পরে। ইত্যস্য টীকায়াং ভরতঃ॥ আচ্ছাদনং। যথা। পয়ঃফেননিভা শয্যা দান্তা রুক্মপরিচ্ছদা। ইতি শ্রীভাগবতং॥

পরিচ্ছন্দঃ (পুং) পরিচ্ছদঃ। ইতি হলায়ুধঃ॥

পরিচ্ছন্নঃ (ত্রি) পরিচ্ছদবিশিষ্টঃ। সর্ব্বতোভাবেনাচ্ছাদিতঃ। সংবৃতঃ। ইতি পরিপূর্ব্বচ্ছদধাতোঃ কর্ত্তরি কর্ম্মণি চ ক্তপ্রত্যয়নিষ্পন্নঃ॥

পরিচ্ছিন্নঃ (ত্রি) পরিচ্ছেদবিশিষ্টঃ। অবধিপ্রাপ্তঃ। যথা। পরিচ্ছিন্নামেবং ত্বয়ি পরিণতা বিভ্রতি গিরং ন বিদ্মস্তত্তত্ত্বং বয়মিহ হি যত্ত্বং ন ভবসি। ইতি মহিম্নঃ স্তোত্রং॥ সর্ব্বতোভাবেন ছেদবিশিষ্টশ্চ॥

পরিচ্ছেদঃ (পুং) গ্রন্থবিচ্ছেদঃ। যথা। সর্গবর্গপরিচ্ছেদোদ্ঘাতাধ্যায়াঙ্কসংগ্রহাঃ। উচ্ছ্বাসঃ পরিবর্ত্তশ্চ পটলঃ কাণ্ডমস্ত্রিয়াং॥ স্থানং প্রকরণং পর্ব্বাহ্নিকঞ্চ গ্রন্থসন্ধয়ঃ। ইতি ত্রিকাণ্ডশেষঃ॥ সীমা। অবধিঃ। যথা। পরিচ্ছেদাতীতঃ সকলবচনানামবিষয়ঃ পুনর্জন্মন্যস্মিন্নমনুভবপথং যো ন

গতবান্ । বিবেকপ্রধ্বংসাদুপচিতমহামোহগহনো বিকারঃ কোঽপ্যন্তর্জড়য়তি চ তাপঞ্চ কুরুতে ॥ ইতি মালতীমাধবঃ ॥

পরিজনঃ (পুং) পরিবারঃ । পোষ্যবর্গঃ । যথা । যদৃদ্ধিং সূত্রাম্নো বরদ পরমোচ্চৈরপি সতীমধশ্চক্রে বাণঃ পরিজনবিধেয়স্ত্রিভুবনঃ । ইতি মহিম্নঃ স্তোত্রং ॥ নিয়তসন্নিধিবর্ত্তিপরিচারকঃ । যথা । কিরীটং বৈরিঞ্চং পরিহর পুরঃ কৈটভভিদঃ কঠোরে কোটীরে স্খলসি জহি জম্ভারিমুকুটং । প্রণম্রেষ্বেতেষু প্রসভমভিযাতস্য ভবনং হরস্যাভ্যুত্থানে তব পরিজনোক্তির্বিজয়তে ॥ ইত্যানন্দলহরীশ্লোকব্যাখ্যায়াং গোপীরমণতর্কপঞ্চাননঃ ॥

পরিজন্মা [ন্] (পুং) চন্দ্রঃ । অগ্নিঃ । ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥

পরিজবা [ন্] (পুং) ইন্দ্রঃ । অগ্নিঃ । ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ ॥

পরিজল্পিতং (ক্লী) দশাঙ্গচিত্রজল্পান্তর্গতদ্বিতীয়জল্পনং । যথা । প্রভোর্নির্দ্দয়তাশাঠ্যচাপলাদ্যুপপাদনাৎ । স্ববিচক্ষণতাব্যক্তির্ভঙ্গ্যা স্যাৎ পরিজল্পিতং ॥ ইত্যুজ্জ্বলনীলমণিঃ ॥

পরিডীনকং (ক্লী) পক্ষিগতিবিশেষঃ । যথা । ডীনং প্রডীনমুড্ডীনং সংডীনং পরিডীনকং । ইতি জটাধরঃ ॥

পরিণতং (ত্রি) পক্বং । ইত্যমরঃ ॥ তির্য্যগ্‌ঘাতিগজঃ । ইতি হেমচন্দ্রঃ ॥ সর্ব্বতোভাবেন নতঞ্চ ॥

পরিণয়ঃ (পুং) বিবাহঃ । ইত্যমরঃ ॥

পরিণামঃ (পুং) বিকারঃ । প্রকৃতেরন্যথাভাবঃ । যথা । মুখস্য বিকারঃ ক্রোধরক্ততা । কেচিত্তু । প্রকৃতিধ্বংসজন্যবিকারঃ । যথা কাষ্ঠস্য বিকারো ভস্ম । মৃৎপিণ্ডস্য ঘটঃ । ইত্যমরভরতৌ ॥ চরমঃ । শেষঃ । যথা । পরিণামসুখে গরীয়সি ব্যথকেঽস্মিন্ বচসি ক্ষতৌজসাং । অতিবীর্য্যবতীব ভেষজে বহুরল্পীয়সি দৃশ্যতে গুণঃ ॥ ইতি ভারবৌ দ্বিতীয়সর্গঃ ॥

পরিণামদর্শী [ন্] (ত্রি) চরমকালপ্রেক্ষী । পশ্চাদ্দর্শী । বিষয়াদেঃ শেষদ্রষ্টা । ইতি ভারতং ॥

পরিণামশূলঃ (পুং) রোগবিশেষঃ । তস্যোৎপত্তির্যথা । স্বৈর্নিদানৈঃ প্রকুপিতো বায়ুঃ সন্নিহিতে যদা । কফপিত্তে সমাবৃত্য শূলকারী ভবেদ্বলী ॥ তস্য লক্ষণং যথা । ভুক্তে জীর্য্যতি যচ্ছূলং তদেব পরিণামজং । তস্য লক্ষণমপ্যেতৎ সমাসেনাভিধীয়তে ॥ বাতিকস্য তস্য লক্ষণং যথা । আধ্মানাটোপবিণ্মূত্রবিবন্ধারতিবেপনৈঃ । স্নিগ্ধোষ্ণোপশমপ্রায়ং বাতিকং তদ্বদেদ্‌ভিষক্ ॥ পৈত্তিকস্য তস্য লক্ষণং যথা । তৃষ্ণাদাহারতিস্বেদকট্বম্ললবণোত্তরং । শূলং শীতশমপ্রায়ং পৈত্তিকং লক্ষয়েদ্ভিষক্ ॥ শ্লৈষ্মিকস্য তস্য লক্ষণং যথা । ছর্দ্দিহৃল্লাসসম্মোহং স্বল্পরুগ্দীর্ঘসন্ততি । কটুতিক্তোপশান্তৌ চ তদ্বিজ্ঞেয়ং কফাত্মকং ॥ ত্রিদোষজস্য তস্য লক্ষণং যথা । সংসৃষ্টলক্ষণং বুদ্ধা দ্বিদোষং পরিকল্পয়েৎ । ত্রিদোষজমসাধ্যন্তু ক্ষীণমাংসবলানলং ॥

ইতি মাধবকরঃ ॥ তস্যৌষধং যথা। লৌহচূর্ণসমাযুক্তং ত্রিফলাচূর্ণমেব বা। মধুনা স্বাদিতং রুদ্র পরিণামাখ্যশূলনুৎ॥ ইতি গরুড়পুরাণং ॥

পরিণায়ঃ (পুং) শারীণাং সমন্তান্নয়নং। ইত্যমরঃ ॥ পরেরিতো দীর্ঘত্বে পরীণায়শ্চ। ইতি ভরতঃ ॥

পরিণাহঃ (পুং) বিস্তারঃ। ওসার ইতি চৌড়া ইতি চ ভাষা। তৎপর্য্যায়ঃ। বিশালতা ২। ইত্যমরঃ ॥

পরিণেতা [ঋ] (পুং) ভর্ত্তা। ইতি রাজনির্ঘণ্টঃ ॥

পরিতঃ [স্] ব্য সর্ব্বতঃ। চতুর্দ্দিগভিব্যাপ্তৌ। ইত্যমরঃ ॥

পরিতাপঃ (পুং) দুঃখং। নরকান্তরং। ইতি মেদিনী ॥ শোকঃ। ইতি শব্দরত্নাবলী ॥ ভয়ং। কম্পঃ। ইতি বিশ্বঃ ॥ অত্যুষ্ণতা। চ ॥

পরিতুষ্টঃ (ত্রি) পরিতোষযুক্তঃ। সন্তুষ্টঃ। যথা। যৎ প্রার্থ্যতে ত্বয়া ভূপ ত্বয়া চ কুলনন্দন। মত্তস্তৎ প্রাপ্যতাং সর্ব্বং পরিতুষ্টা দদামি তৎ॥ ইতি মার্কণ্ডেয়পুরাণং ॥

পরিতোষঃ (পুং) সর্ব্বতোভাবেন তুষ্টিঃ। সন্তোষঃ। যথা। ত্বামুদর সাধুমন্যে শাকৈরপি যদসি লব্ধপরিতোষং। হতহৃদয়ং হ্যধিকাধিকবাঞ্ছাশতদুর্ভরং ন পুনঃ॥ ইতি শান্তিশতকং ॥

পরিত্যাগঃ (পুং) সর্ব্বতোভাবেন বর্জ্জনং। তৎপর্য্যায়ঃ। ছোরণং ২। ইতি ত্রিকাণ্ডশেষঃ ॥ * ॥ গুরোরপ্যবলিপ্তস্য কার্য্যাকার্য্যমজানতঃ। উৎপথপ্রতিপন্নস্য পরিত্যাগো বিধীয়তে॥ ইতি মৎস্যসূক্তং ॥

পরিত্রাণং (ক্লী) মারণোদ্যতস্য নিবারণং। তৎপর্য্যায়ঃ। পর্য্যাপ্তিঃ ২ হস্তবারণং ৩। ইত্যমরঃ ॥ রক্ষণং। যথা। পরিত্রাণায় সাধূনাং বিনাশায় চ দুষ্কৃতাং। ধর্ম্মসংস্থাপনার্থায় সম্ভবামি যুগে যুগে॥ ইতি শ্রীভগবদ্গীতায়াং ৪ অধ্যায়ঃ ॥

পরিদানং (ক্লী) পরীবর্ত্তঃ। বিনিময়ঃ। ইত্যমরঃ ॥

পরিদায়ী [ন্] (পুং) অনূঢ়জ্যেষ্ঠে তৎকনিষ্ঠায় কন্যাদাতা। যথা হারীতঃ। জ্যেষ্ঠেঽনির্ব্বিষ্টে কনীয়ান্ নির্ব্বিশন্ পরিবেত্তা ভবতি পরিবিন্নো জ্যেষ্ঠঃ পরিবেদনীয়া কন্যা পরিদায়ী দাতা পরিকর্ত্তা যাজকস্তে সর্ব্বে পতিতাঃ। ইত্যুদ্বাহতত্ত্বং ॥

পরিদেবনং (ক্লী) অনুশোচনোক্তিঃ। বিলাপঃ। ইত্যমরঃ ॥

পরিদেবনা (স্ত্রী) শোকনিমিত্তো বিলাপঃ। যথা। অব্যক্তাদীনি ভূতানি ব্যক্তমধ্যানি ভারত। অব্যক্তনিধনান্যেব তত্র কা পরিদেবনা॥ ইতি শ্রীভগবদ্গীতাদ্বিতীয়াধ্যায়শ্লোকব্যাখ্যানে শ্রীধরস্বামী ॥ অপি চ। ন মন্ত্রবলবীর্য্যেণ প্রজ্ঞয়া পৌরুষেণ চ। অলভ্যং লভতে মর্ত্ত্যস্তত্র কা পরিদেবনা॥ অব্যক্তাদীনি ভূতানি ব্যক্তমধ্যানি শৌনক। অব্যক্তনিধনান্যেব তত্র কা

পরিদেবনা ॥ অযাচিতো ময়া লব্ধস্ত্বৎ-প্রেষিতঃ পুনঃ কৃতঃ। যত্রাগতস্তত্র গতস্তত্র কা পরিদেবনা ॥ একবৃক্ষে যদা রাত্রৌ নানাপক্ষিসমাগমঃ। প্রভাতে দশ দিশো যান্তি তত্র কা পরিদেবনা ॥ এক-সার্থপ্রযাতানাং সর্ব্বেষান্তত্র গামিনাং। যদ্যেকস্ত্বরিতো যাতি কা তত্র পরিদেবনা ॥ ইতি গরুড়পুরাণে ১১১ অধ্যায়ঃ ॥

পরিধানং (ক্লী) পরিধেয়বস্ত্রং। তৎপর্য্যায়ঃ। অন্তরীয়ং ২ উপসংব্যানং ৩ অধো-হংশুকং ৪। ইত্যমরঃ ॥

পরিধায়ঃ (পুং) জনস্থানং। পরিচ্ছেদঃ। নিতম্বঃ। ইতি মেদিনী ॥

পরিধিঃ (পুং) পরিবেশঃ। চন্দ্রসূর্য্যসমীপ-মণ্ডলং। যজ্ঞিয়তরুশাখা। যজ্ঞিয়তরোঃ পলাশাদের্যজ্ঞে পশুবন্ধনার্থং যা শাখা নিখায়তে তস্যাং। ইত্যমরভরতৌ ॥ ভূগোলাদের্বেষ্টনং। যথা। ব্যাসেভ-নন্দাগ্নিহতে বিভক্তে খবাণসূর্য্যৈঃ পরি-ধিস্তু সূক্ষ্মঃ ॥ ইতি লীলাবতী ॥

পরিধিস্থঃ (পুং) পরিচরঃ। ইত্যমরঃ ॥ যুদ্ধ-কালে পরপ্রহারাৎ রথরক্ষকে। প্রজা-সামন্তব্যবস্থাপনকারিণীতি কেচিৎ। সেনায়াং রাজ্ঞো দণ্ডনায়কঃ। ইত্যন্যে। ইতি ভরতঃ ॥

পরিধেয়ং (ত্রি) পরিধানীয়ং। পরিধাতব্যং। পরিধানোপযুক্তবস্ত্রাদি। যথা। ন তু স্ব-ভোগ্যতয়াপি প্রাপ্তে পরিধেয়াদৌ স্মৃতে-রদৃষ্টার্থত্বাপত্তেঃ। ইতি বিবাদচিন্তা-মণিঃ ॥

পরিপণং (ক্লী) মূলধনং। পুঁজি ইতি ভাষা। ইত্যমরঃ ॥

পরিপন্থকঃ (পুং) শত্রুঃ। ইতি হেমচন্দ্রঃ ॥

পরিপন্থী [ন্] (ত্রি) শত্রুঃ। ইত্যমরঃ ॥

পরিপাকঃ (পুং) পরিপক্বতা। যথা। ইত্য-দ্ভুতং কেবলবহ্নিপক্বমাংসেন মৎস্যঃ পরিপাকমেতি। ইতি ভাবপ্রকাশঃ ॥ নৈপুণ্যং। যথা। বীক্ষ্য তস্য বিনয়ে পরি-পাকং পাকশাসনপদং স্পৃশতোহপি। ইতি নৈষধপঞ্চমসর্গঃ ॥

পরিপাকিনী (স্ত্রী) ত্রিবৃতা। ইতি শব্দ চন্দ্রিকা ॥

পরিপাটিঃ (স্ত্রী) পারিপাট্যবিশিষ্টঃ। পরি ভাগে ভাগেন পাটিঃ পাটনং গতির্যস্যাং। তৎপর্য্যায়ঃ। আনুপূর্ব্বী ২ আবৃৎ ৩ অনুক্রমঃ ৪ পর্য্যায়ঃ ৫। ইত্যমরঃ ॥ আনুপূর্ব্ব্যং ৬ পরিপাটী ৭। ইতি ভরতঃ ॥ আনুপূর্ব্বং ৮ আনুপূর্ব্বকং ৯। ইতি টীকান্তরং ॥ ক্রমঃ ১০। ইতি জটাধর-শব্দরত্নাবল্যৌ ॥

পরিপিষ্টকং (ক্লী) সীসকং। ইতি রাজ-নির্ঘণ্টঃ ॥

পরিপুষ্করা (স্ত্রী) গোড়ুম্বা। রাজগোমক্ ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥

পরিপূতং (ক্লী) অপাস্ততুষধান্যং। যথা। পরি-পূতেষু ধান্যেষু শাকমূলফলেষু চ। নির-ন্বয়ে শতং দণ্ডঃ সান্বয়েহর্দ্ধশতং দমঃ ॥ ইতি মনুঃ ॥ সর্ব্বতোভাবেন পবিত্রঞ্চ ॥

পরিপূর্ণতা (স্ত্রী) পরিপূর্ণত্বং। সম্পূর্ণতা। তৎপর্য্যায়ঃ। আভোগঃ ২। ইত্যমরঃ ॥

পরিপূর্ণত্বং (ক্লী) পরিপূর্ণতা। সম্পূর্ণত্বং। ইতি জটাধরঃ॥

পরিপেলং (ক্লী) পরিপেলবং। কৈবর্ত্তীমুস্তকং। ইতি শব্দমালা॥ তন্ত্রান্তরে যথা। পরিপেলং প্লবং বল্যং তৎকুটন্নটসংজ্ঞকং। জায়তে মুস্তকাকারং শেবালকুলসঞ্চয়ে॥ ইত্যমরটীকায়াং ভরতঃ॥

পরিপেলবং (ক্লী) কৈবর্ত্তীমুস্তকং। ইত্যমরঃ॥

পরিপ্লবং (ত্রি) চঞ্চলং। ইত্যমরঃ॥

পরিপ্লুতঃ (ত্রি) জলাদিপ্লাবিতঃ। যথা। আবাং জহি ন যত্রোর্ব্বী সলিলেন পরিপ্লুতা। ইতি মার্কণ্ডেয়ে দেবীমাহাত্ম্যে ১ অধ্যায়ঃ॥

পরিপ্লুতা (স্ত্রী) মদিরা। ইতি হেমচন্দ্রঃ॥ গ্রাম্যধর্ম্মে বেদনাবতী যোনিঃ। যথা। পরিপ্লুতায়াং ভবতি গ্রাম্যধর্ম্মে রুজা ভৃশং। ইতি যোনিব্যাপন্নিদানে মাধবকরঃ॥ আপ্লুতে ত্রি॥

পরিবর্হঃ (পুং) পরিচ্ছদঃ। হস্ত্যশ্ববস্ত্রকম্বলাদি। নৃপার্হোঽর্থঃ। রাজযোগ্যদ্রব্যং সিতচ্ছত্রাদি। নৃপার্হং সিতচ্ছত্রাদি অর্থো ধনমিতি কেচিৎ। ইত্যমরভরতৌ॥

পরিভবঃ (পুং) অনাদরঃ। ইত্যমরঃ॥

পরিভাবঃ (পুং) পরিভবঃ। ইত্যমরঃ॥

পরিভাষণং (ক্লী) সনিন্দ উপালম্ভঃ। ইত্যমরঃ॥ উপালম্ভো দুর্ব্বাদঃ। নিন্দয়া সহ বর্ত্তমানো য উপালম্ভস্তত্র স নিন্দে পরিভাষণং। উপালম্ভো গুণাবিষ্করণেন স্তুতিপূর্ব্বকোঽপি ভবতি। যথা মহাকুলস্য ভবতঃ কিমিদমুচিতং ভবতি। অত্র তু সম্ভতৌ ন পরিভাষণং। টীকান্তরেঽপি বন্ধুলস্য তবাগম্যাগমনং যোগ্যমিতি নিন্দাপূর্ব্বঃ। মহাকুলস্য তব কথং বিপ্রবধঃ। ইতি স্তুতিপূর্ব্বশ্চ উপালম্ভঃ। ইতি ভরতঃ॥ *॥ নিয়মঃ। ইতি মেদিনী॥ আলাপঃ। ইতি বিশ্বঃ॥

পরিভাষা (স্ত্রী) পরিষ্কৃতং ভাষণং। পদার্থবিবেচকাচার্য্যাণাং যুক্তিযুক্তা বাক্। ইতি কাব্যপ্রকাশটীকায়াং চণ্ডীদাসঃ॥ তৎপর্য্যায়ঃ। প্রজ্ঞপ্তিঃ ২ শৈলী ৩ সঙ্কেতঃ ৪ সময়কারঃ ৫। ইতি ত্রিকাণ্ডশেষঃ॥ গ্রন্থস্য সংক্ষেপনির্ব্বাহার্থসঙ্কেতবিশেষঃ। যথা চপোদিতেত্যাদি। ইতি মুগ্ধবোধটীকায়াং দুর্গাদাসঃ॥ ন খলু প্রতিহন্যতে কুতশ্চিৎ পরিভাষেব গরীয়সী যদেতি চ মাঘষোড়শসর্গঃ॥

পরিভূতং (ত্রি) অনাদৃতং। তৎপর্য্যায়ঃ। অবগণিতং ২ অবমতং ৩ অবজ্ঞাতং ৪ অবমানিতং ৫। ইত্যমরঃ॥ অভিভূতং ৬। ইতি জটাধরঃ॥ অপ্রস্তুতং ৭। ইতি শব্দরত্নাবলী॥

পরিভ্রমঃ (পুং) সর্ব্বতোভ্রমণং। পরিপূর্ব্বভ্রমধাতোর্ভাবে অল্প্রত্যয়নিষ্পন্নঃ॥

পরিমণ্ডলং (ত্রি) বর্ত্তুলং। ইতি হেমচন্দ্রঃ॥

পরিমলঃ (পুং) বিমর্দ্দনং। কুঙ্কুমাদিমর্দ্দনং। বিমর্দ্দোত্থজনমনোহরগন্ধঃ। সুরতাদিবিমর্দ্দোত্থবিলেপনকুঙ্কুমাদিগন্ধঃ। ইত্যমরভরতৌ॥ সুরভিমাল্যগন্ধাদিধারণেনোৎপন্নো হৃদ্যো গন্ধঃ। ইতি স্বামী॥

তৎপর্য্যায়ঃ। আমোদঃ ২ গন্ধঃ৩ সৌরভ্যং৪ সৌরভং ৫। ইতি রাজনির্ঘণ্টঃ॥ পণ্ডিত-সমূহঃ। ইতি শব্দরত্নাবলী॥

পরিমাণং (ক্লী) পরিমীয়তেঽনেন। পরিমিত-ব্যবহারাসাধারণকারণং। ইতি সিদ্ধান্ত-মুক্তাবলী॥ মাপ ইতি ভাষা। তৎপর্য্যায়-প্রকারা যথা। যৌতবং দ্রুবয়ং পায্য-মিতি মানার্থকং ত্রয়ং। মানং তুলাঙ্গুলি-প্রস্থৈর্গুঞ্জাঃ পঞ্চাদ্যমাষকঃ॥ তে ষোড়-শাক্ষঃ কর্ষোঽস্ত্রী পলং কর্ষচতুষ্টয়ং। সুবর্ণবিস্তৌ হেম্নোঽক্ষে কুরুবিস্তস্তু তৎ-পলে॥ তুলা স্ত্রিয়াং পলশতং ভারঃ স্যাদ্বিংশতিস্তুলাঃ। আচিতং দশভারাঃ স্যুঃ শাকটো ভার আচিতঃ॥ কার্ষাপণঃ কার্ষিকশ্চ তাম্রিকে কার্ষিকে পণঃ। অস্ত্রিয়া বাঢ়কদ্রোণৌ খারীবাহো নিকু-ঞ্চকঃ॥ কুড়বঃ প্রস্থ ইত্যাদ্যাঃ পরিমাণা-র্থকাঃ পৃথক্। ইত্যমরঃ॥ *॥ ন্যায়মতে তদ্যথা। পরিমাণং ভবেন্মানব্যবহারস্য কারণং। অণু দীর্ঘং মহদ্ধ্রস্বমিতি তদ্ভেদ ঈরিতঃ॥ অনিত্যে তদনিত্যং স্যান্নিত্যে নিত্যমুদাহৃতং। সংখ্যাতঃ পরিমাণাচ্চ প্রচয়াদপি জায়তে॥ অনিত্যং দ্ব্যণুকাদৌ তু সংখ্যাজন্যমুদাহৃতং। পরিমাণং ঘটাদৌ তু পরিমাণজমুচ্যতে॥ প্রচয়ঃ শিথিলাখ্যো যঃ সংযোগস্তেন জন্যতে। পরিমাণস্তূল-কাদৌ নাশস্ত্বাশ্রয়নাশতঃ॥ ইতি ভাষা-পরিচ্ছেদঃ॥

পরিমার্গ্যং (ত্রি) পরিমৃজ্যং। পরিশোধনীয়ং। পরিপূর্ব্বমৃজধাতোর্ঘ্যণ্প্রত্যয়নিষ্পন্নং॥

পরিমার্জনং (ক্লী) খাদ্যভেদঃ। মধুমস্তকং। যথা। মধুতৈলঘৃতৈর্মধ্যে বেষ্টিতাঃ সমিতা-শ্চ যে। মধুমস্তকমুদ্দিষ্টং তস্যাখ্যা পরিমার্জ্জনং॥ ইতি শব্দচন্দ্রিকা॥ পরি-শোধনঞ্চ॥

পরিমিতং (ত্রি) যুক্তং। ইতি ত্রিকাণ্ডশেষঃ॥ পরিমাণবিশিষ্টং। যথা। দ্রবিণং পরি-মিতমধিকব্যয়িনং জনমাকুলীকুরুতে। ক্ষীণাঞ্চলমিব পীনস্তনজঘনায়াঃ কুলী-নায়াঃ॥ ইত্যুদ্ভটঃ॥

পরিমৃজ্যং (ত্রি) পরিমার্গ্যং। পরিপূর্ব্বমৃজ-ধাতোঃ ক্যপ্প্রত্যয়নিষ্পন্নং॥

পরিমেয়ং (ত্রি) পরিমাণবিশিষ্টং। পরি-মাতব্যং। পরিমাণীয়ং। পরিপূর্ব্বমাধাতো-র্যপ্রত্যয়নিষ্পন্নং॥

পরিমোষী [ন্] (ত্রি) পরিমোষণশীলঃ। চৌরঃ। পরিপূর্ব্বমুষধাতোঃ কর্ত্তরি ণিন্-প্রত্যয়নিষ্পন্নঃ॥

পরিমোক্ষঃ (পুং) মলত্যাগঃ। যথা। পায়ু-র্যমস্য মিত্রস্য পরিমোক্ষস্য নারদ। হিংসায়া নির্ঋতের্মৃত্যোর্নিরয়স্য গুদং স্মৃতং॥ ইতি শ্রীভাগবতে ২ স্কন্ধে ৬ অধ্যায়ে ১০ শ্লোকঃ॥ পরিমোক্ষস্য মলত্যাগস্য। পায়ুরিন্দ্রিয়ং গুদং স্থানং। নির্ঋতেরলক্ষ্ম্যাঃ। ইতি তট্টীকায়াং শ্রীধর-স্বামী॥ *॥ পরিত্রাণং। যথা বিষ্ণুধর্ম্মো-ত্তরে। সর্ব্বাশুভানাং পরিমোক্ষকারি সংপূজনং দেববরস্য বিষ্ণোঃ। ইতি তিথ্যাদিতত্ত্বং॥

পরিরম্ভঃ (পুং) আলিঙ্গনং। ইত্যমরঃ॥

পরিবৎসরঃ (পুং) বৎসরঃ। ইতি জটাধরঃ॥ বৎসরবিশেষঃ। যথা। শকাব্দাৎ পঞ্চভিঃ শেষাৎ সমাদ্যাদিষু বৎসরাঃ। সম্পরী দানুপূর্ব্বাশ্চ তথোদাপূর্ব্বকা মতাঃ॥ ইতি মলমাসতত্ত্বং॥ পরিপূর্ব্বে তথাদানং যবানাঞ্চ দ্বিজোত্তমাঃ। ইতি বিষ্ণুধর্ম্মোত্তরং॥

পরিবর্জ্জনং (ক্লী) মারণং। ইত্যমরঃ॥ পরিত্যাগঃ। যথা। গোপ্যো ন দোষো মথুরাঙ্গনানাং ধূর্ত্তস্য কৃষ্ণস্য হি রীতিরেষা। বিপর্য্যয়ো যেন কৃতঃ স্বপিত্রোস্তস্যোপপত্নীপরিবর্জ্জনং কিং॥ ইত্যুদ্ভটঃ॥ *॥ পরিবর্জ্জনীয়া যথা। একশয্যাসনং পংক্তিভাণ্ডপক্বান্নমিশ্রণং। যাজনাধ্যয়নে যোনিস্তথৈব সহভোজনং॥ সহাধ্যায়স্তু দশমঃ সহযাজনমেব চ। একাদশ সমুদ্দিষ্টা দোষাঃ সাঙ্কর্য্যসঙ্গিতাঃ॥ সমীপে চাপ্যবস্থানাৎ পাপং সংক্রমতে নৃণাং। তস্মাৎ সর্ব্বপ্রযত্নেন সাঙ্কর্য্যং পরিবর্জ্জয়েৎ॥ ইতি কৌর্ম্মে উপবিভাগে ১৫ অধ্যায়ঃ॥ যস্মিন্দেশে ন সম্মানো ন প্রীতির্ন চ বান্ধবাঃ। ন চ বিদ্যাগমঃ কশ্চিত্তং দেশং পরিবর্জ্জয়েৎ॥ ইতি চাণক্যং॥ ব্রাহ্মণং বালিশং ক্ষত্রমযোদ্ধারং বিশং জড়ং। শূদ্রমক্ষরসংযুক্তং দূরতঃ পরিবর্জ্জয়েৎ॥ কুভার্য্যাঞ্চ কুমিত্রঞ্চ কুরাজানং কুসৌহৃদং। কুবন্ধুঞ্চ কুদেশঞ্চ দূরতঃ পরিবর্জ্জয়েৎ॥ ইতি গরুড়পুরাণে ১১৩ অধ্যায়ঃ॥

পরিবর্ত্তঃ (পুং) বিনিময়ঃ। কূর্ম্মরাজঃ। অপবর্ত্তনং। ইতি মেদিনী॥ যুগান্তঃ। ইতি হেমচন্দ্রঃ॥ গ্রন্থবিচ্ছেদঃ। ইতি জটাধরঃ॥ মৃত্যুপুত্রস্য দুঃসহস্যৌরসেন কলিকন্যানির্ম্মাষ্টিগর্ভজাতাষ্টপুত্রান্তর্গততৃতীয়পুত্রঃ। তস্য পুত্ত্রয়োঃ কর্ম্মাদি যথা। পরিবর্ত্তসুতৌ দ্বৌ তু বিরূপবিকৃতৌ দ্বিজ। তৌ তু বৃক্ষাদ্রিপরিখাপ্রাকারাম্ভোধিসংশ্রয়ৌ॥ গুর্ব্বিণ্যাঃ পরিবর্ত্তন্তৌ কুরুতঃ পাদপাদিষু। ক্রোষ্টুকে পরিবর্ত্তঃ স্যাদ্গর্ত্তস্যান্যোদরান্ততঃ॥ ন বৃক্ষঞ্চৈব নৈবাদ্রিং ন প্রাকারং পয়োনিধিং। পরিখাং ন সমাক্রামেদবলা গর্ব্ভধারিণী॥ ইতি মার্কণ্ডেয়পুরাণং॥

পরিবর্ত্তনং (ক্লী) পরিবর্ত্তঃ। তৎপর্য্যায়ঃ। পরিদানং ২ বিনিময়ঃ ৩ নৈমেয়ঃ ৪ ব্যতিহারঃ ৫ পরাবর্ত্তঃ ৬ বৈমেয়ঃ ৭ বিময়ঃ ৮। ইতি হেমচন্দ্রঃ॥

পরিবর্ত্তিকা (স্ত্রী) মেঢ্রজাতক্ষুদ্ররোগবিশেষঃ। তল্লক্ষণমাহ। মর্দ্দনাৎ পীড়নাদ্বাপি তথৈবাপ্যভিঘাততঃ। মেঢ্রচর্ম্ম যদা বায়ুর্ভজতে সর্ব্বতশ্চরন্॥ তদা বাতোপসৃষ্টস্তু তচ্চর্ম্ম পরিবর্ত্ততে। সবেদনং সদাহঞ্চ পাকঞ্চ ব্রজতি কর্হিচিৎ॥ মণেরধস্তাৎ কোষস্তু গ্রন্থিরূপেণ লম্বতে। মারুতাগন্তুসম্ভূতাং বিদ্যাত্তাং পরিবর্ত্তিকাং॥ সকণ্ডুঃ কঠিনা বাপি সৈব শ্লেষ্মসমন্বিতা। অস্যাং বাতজায়ামপি পিত্তানুবন্ধো বোদ্ধব্যো দাহপাকভাবাৎ। কোষঃ চর্ম্মকোষঃ॥ *॥ অথ তস্যাশ্চিকিৎসা। পরিবৃত্তং ঘৃতাভ্যক্তং সুস্বিন্নমুপনাহয়েৎ। ত্রিরাত্রং পঞ্চরাত্রং বা বাতঘ্নৈঃ শাল্বণাদিভিঃ॥

ততোঽভ্যজ্য শনৈশ্চর্ম্ম পাটয়েৎ পীড়য়েন্মণিং। প্রবিষ্টে চর্ম্মণি মণৌ স্বেদয়েদুপনাহয়েৎ॥ দদ্যাদ্বাতহরান্ বস্তীন্ স্নিগ্ধান্যন্নানি ভোজয়েৎ। ইতি ভাবপ্রকাশঃ॥

পরিবসথঃ (পুং) গ্রামঃ। ইতি হেমচন্দ্রঃ॥

পরিবহঃ (পুং) সপ্তবায়ন্তর্গতষষ্ঠবায়ুঃ। স তু সুবহবায়োরুপরিস্থিতঃ। ইতি সিদ্ধান্তশিরোমণিঃ॥

পরিবাদঃ (পুং) অপবাদঃ। বীণাবাদনবস্তু। ইতি মেদিনী॥

পরিবাদকঃ (ত্রি) পরিবাদকর্ত্তা। পরিপূর্ব্ববদধাতোঃ কর্ত্তরি ণকপ্রত্যয়নিষ্পন্নঃ॥

পরিবাদিনী (স্ত্রী) সপ্ততন্ত্রীযুক্তবীণা। ইত্যমরঃ॥ পরিবাদবিশিষ্টা চ॥

পরিবাদী [ন্] (ত্রি) পরিবাদকর্ত্তা। ইতি পরিপূর্ব্ববদধাতোঃ শীলার্থে কর্ত্তরি ণিন্প্রত্যয়নিষ্পন্নঃ। পরিবাদবিশিষ্টঃ। ইতি পরিবাদশব্দাদস্ত্যর্থে ইন্প্রত্যয়েন সিদ্ধঃ॥

পরিবাপঃ (পুং) পর্য্যুপ্তিঃ। বপনং। জলস্থানং। পরিচ্ছদঃ। ইতি মেদিনী॥

পরিবাপনং (ক্লী) মুণ্ডনং। ইতি হেমচন্দ্রঃ॥

পরিবাপিতং (ত্রি) মুণ্ডিতং। ইত্যমরঃ॥

পরিবারঃ (পুং) পরিজনঃ। খড়্গকোষঃ। পরিচ্ছদঃ। ইতি মেদিনী॥

পরিবাহঃ (পুং) পরীবাহঃ। জলোচ্ছ্বাসঃ। ইত্যমরটীকায়াং রমানাথঃ॥

পরিবিন্নঃ (পুং) পরিবিত্তিঃ। যথা। জ্যেষ্ঠেঽনির্বিষ্টে কনীয়ান্ নির্ব্বিষন্ পরিবেত্তা ভবতি পরিবিন্নো জ্যেষ্ঠঃ পরিবেদনীয়া কন্যা পরিদায়ী দাতা পরিকর্ত্তা যাজকঃ তে সর্ব্বে পতিতাঃ। ইত্যুদ্বাহতত্ত্বং॥

পরিবিত্তিঃ (পুং) পরিবেত্তৃজ্যেষ্ঠঃ। কৃতবিবাহস্যানূঢ়জ্যেষ্ঠভ্রাতা। ইত্যমরঃ॥

পরিবিন্দন্ [ৎ] (পুং) পরিবেদনকর্ত্তা। যথা। দেশান্তরস্থক্লীবৈকবৃষণানসহোদরান্। বেশ্যাভিসক্তপতিতশূদ্রতুল্যাতিরোগিণঃ॥ জড়মূকান্ধবধিরকুব্জবামনকুণ্ঠকান্। অতিবৃদ্ধানভার্য্যাংশ্চ কৃষিসক্তান্ নৃপস্য চ॥ ধনবৃদ্ধিপ্রসক্তাংশ্চ কামতঃ কারিণস্তথা। কুলোটোম্মত্তচৌরাংশ্চ পরিবিন্দন্ ন দুষ্যতি॥ ইত্যুদ্বাহতত্ত্বে ছন্দোগপরিশিষ্টং॥

পরিবিষ্ণু (ক্লী) সর্ব্বতো বিষ্ণুঃ। বিষ্ণুং বিষ্ণুং পরি ইত্যব্যয়ীভাবসমাসে দুর্গাদাসঃ॥

পরিবৃংহিতং (ত্রি) সর্ব্বতোভাবেন দীপ্তিবিশিষ্টং। সর্ব্বতোভাবেন করিগর্জ্জিতং। সর্ব্বতোভাবেন বৃদ্ধিবিশিষ্টং। সর্ব্বতোভাবেন ধ্বনিবিশিষ্টং। ইতি বৃহিধাতোঃ কর্ম্মণি ক্তপ্রত্যয়নিষ্পন্নং॥

পরিবৃঢ়ঃ (ত্রি) অধিপঃ। প্রভুঃ। ইত্যমরঃ॥

পরিবৃতঃ (ত্রি) আবৃতঃ। বেষ্টিতঃ। যথা। ব্যবহারান্নৃপঃ পশ্যেৎ সভ্যৈঃ পরিবৃতোঽন্বহং। ইতি মিতাক্ষরা॥

পরিবৃত্তিঃ (পুং) পরিবিত্তিঃ। ইতি হড্ডঃ॥

পরিবৃহিতং (ত্রি) সর্ব্বতোভাবেন বৃদ্ধিবিশিষ্টং। সর্ব্বতোভাবেনোদ্যমবিশিষ্টং। ইতি বৃহধাতোঃ কর্ম্মণি ক্তপ্রত্যয়নিষ্পন্নং॥

পরিবেত্তা [ঋ] (পুং) অনূঢ়জ্যেষ্ঠে কৃতবিবাহকনিষ্ঠঃ। ইত্যুদ্বাহতত্ত্বং ॥

পরিবেদনং (ক্লী) বিবাহঃ। অগ্ন্যাধানং। যথা। ক্লীবে দেশান্তরগতে পতিতে ভিক্ষুকেঽপি বা। যোগশাস্ত্রাভিযুক্তে চ ন দোষঃ পরিবেদনে ॥ ইত্যুদ্বাহতত্ত্বে শাতাতপঃ॥ সর্ব্বতোভাবেন জ্ঞানং। সর্ব্বতোভাবেন বিচারণং। সর্ব্বতোভাবেন বিদ্যমানত্বং। সর্ব্বতোভাবেন লাভঃ। ইতি তত্তদর্থকবিদধাতোরনট্‌প্রত্যয়নিষ্পন্নং ॥

পরিবেদিনী (স্ত্রী) পরিবেত্তুঃস্ত্রী। ইতি হেমচন্দ্রঃ॥

পরিবেদনীয়া (স্ত্রী) অনূঢ়জ্যেষ্ঠে তৎকনিষ্ঠেন বিবাহিতা কন্যা। অস্য প্রমাণং পরিদায়িশব্দে দ্রষ্টব্যং ॥

পরিবেশঃ (পুং) বেষ্টনং। পরিধিঃ। ইতি মেদিনী ॥ বাতেন মণ্ডলীভূতাঃ সূর্য্যাচন্দ্রমসোঃ করাঃ। মালাভা ব্যোম্নি তন্বতে পরিবেশঃ প্রকীর্ত্তিতঃ॥ ইতি ভরতধৃতসাহসাঙ্কঃ ॥

পরিবেষঃ (পুং) পরিবৃতিঃ। পরিধিঃ। পরিবেষণং। ইতি হেমচন্দ্রঃ ॥

পরিবেষকঃ (পুং) পরিবেষ্টা। পরিবেষণকর্ত্তা। তস্য লক্ষণং যথা। স্নাতশ্চন্দনচর্চ্চিতঃ সুবসনঃ স্রগ্বী প্রসন্নাননঃ স্পষ্টাত্মা সুভগঃ প্রসন্নহৃদয়ঃ শ্রীকান্তপূজারতঃ। স্বামিস্নেহপরঃ স্বপাকনিপুণঃ প্রৌঢ়ো বদান্যঃ শুচির্বিপ্রো বা পরিবেষকস্তু কুলজশ্চান্যোঽপি বা ভূপতেঃ॥ ইতি পাকরাজেশ্বরঃ ॥

পরিবেষণং (ক্লী) বেষ্টনং। ভোজনার্থং ভোজনপাত্রে অন্নাদের্দানং। অথ শ্রাদ্ধে পরিবেষণং মনুঃ। পাণিভ্যান্তূপসংগৃহ্য স্বয়মন্নস্য বর্দ্ধিতং। বিপ্রান্তিকে পিতৄন্ ধ্যায়ন্ শনকৈরুপনিক্ষিপেৎ ॥ অন্নস্যেতি তৃতীয়ার্থে ষষ্ঠী বর্দ্ধিতং পূরিতং পাত্রমিতি শেষঃ। উপনিক্ষিপেৎ পরিবেষণার্থং। তথা চ পাকস্থাল্যা আকৃষ্য প্রথমং ভোজনপাত্রে ন দেয়ং কিন্তু স্থাল্যাদিকং পাণিভ্যাং পাত্রসমীপে ভূমৌ সংস্থাপ্য পশ্চাৎ পাণিভ্যাং পাত্রান্তরিতাভ্যাং শ্রাদ্ধে পরিবেষয়েৎ। উভাভ্যামপি হস্তাভ্যামাকৃষ্য পরিবেষয়েদিতি মৎস্যপুরাণাৎ। যত্তু শ্রাদ্ধে পরিবেষণন্তু দক্ষিণপাণিমাত্রেণৈবাঙ্গানভিধানাদিতি মৈথিলোক্তং তন্ন। একেন পাণিনা দত্তং শূদ্রাদত্তং ন ভক্ষয়েদিত্যাদি পুরাণীয়েন একপাণিদত্তশূদ্রাদত্তভক্ষণনিষেধেন তন্মাত্রপরিবেষণস্যাপি নিষিদ্ধত্বাৎ পাণিভ্যামপি পাত্রান্তরিতং কৃত্বা দেয়ং। হস্তদত্তাশ্চ যে স্নেহা লবণং ব্যঞ্জনানি চ। দাতারং নোপতিষ্ঠন্তে ভোক্তা ভুঙ্‌ক্তে চ কিল্বিষং ॥ তস্মাদন্তরিতং দেয়ং পর্ণেনাথ তৃণেন বা। প্রদদ্যান্ন তু হস্তেন নায়সেন কদাচন ॥ ইতি বশিষ্ঠবচনেন সামান্যতোঽভিধানাৎ। পিতৃভক্তিতরঙ্গিণ্যামপ্যেবং। মনুঃ। গুণাংশ্চ সূপশাকাদ্যান্ পয়ো দধি ঘৃতং মধু। বিন্যসেদ্‌যত্নতঃ সম্যগ্‌ভূমাবেব সমাহিতঃ॥ আমিষং পানপাত্রঞ্চ ভোক্তুর্দক্ষিণতো ন্যসেৎ।

ভক্ষ্যং ভোজ্যঞ্চ বিবিধং মূলানি চ ফলানি চ ॥ হৃদ্যানি চৈব মাংসানি পানানি সুরভীণি চ। উপনীয় চ তৎ সর্ব্বং শনকৈঃ সুসমাহিতঃ॥ পরিবেষয়েৎ প্রযতো গুণান্ সর্ব্বান্ প্রচোদয়ন্। গুণান্ উপকরণানি ভূমাবেব ন তু ব্যঞ্জনাদিপাত্রাণি অন্নাদি পাত্রোপরি নিক্ষিপেৎ । ইতি শ্রাদ্ধতত্ত্বং ॥

পরিবেষিকা (স্ত্রী) পরিবেষণকর্ত্রী। তস্যা লক্ষণং যথা। স্নাতা বিশুদ্ধবসনা নবধূপিতাঙ্গী কর্পূরসৌরভমুখী নয়নাভিরামা। বিম্বাধরা শিরসি বদ্ধসুগন্ধিপুষ্পা মন্দস্মিতা ক্ষিতিভৃতাং পরিবেষিকা স্যাৎ ॥ ইতি পাকরাজেশ্বরঃ ॥

পরিবেষ্টিতং (ত্রি) সর্ব্বতোভাবেন বেষ্টিতং। তৎপর্য্যায়ঃ। পরিক্ষিপ্তং ২ বলয়িতং ৩ নিবৃতং ৪ পরিষ্কৃতং ৫ পরীতং ৬। ইতি হেমচন্দ্রঃ ॥

পরিব্যাধঃ (পুং) অম্বুবেতসঃ। দ্রুমোৎপলঃ। ইত্যমরঃ ॥

পরিব্রজ্যা (স্ত্রী) তপস্যা। ইতি হেমচন্দ্রঃ ॥

পরিব্রাট্ [জ্] } পরিব্রাড়্ } (পুং) চতুর্থাশ্রমী। তৎপর্য্যায়ঃ। ভিক্ষুঃ ২ কর্ম্মন্দী ৩ পারাসরী ৪ মস্করী ৫। ইত্যমরঃ ॥ সন্ন্যাসী ৬ শ্রমণঃ ৭। ইতি জটাধরঃ ॥ পরিব্রাজকঃ ৮ পরাশরী ৯ ব্রজকঃ ১০। ইতি শব্দরত্নাবলী ॥ তস্য লক্ষণং যথা। সর্ব্বারম্ভপরিত্যাগো ভৈক্ষ্যাশ্যং ব্রহ্মমূলতা। নিষ্পরিগ্রহতাদ্রোহসমতা সর্ব্বজন্তুষু ॥ প্রিয়াপ্রিয়পরিষঙ্গে সুখদুঃখাবিকারিতা। সংবাহ্যাভ্যন্তরং শৌচং সুখদুঃখাবিকারিতা ॥ সর্ব্বেন্দ্রিয়সমাহারো ধারণা ধ্যাননিত্যতা। ভাবসংশুদ্ধিরিত্যেষ পরিব্রাড়্ধর্ম্ম্য উচ্যতে॥ ইতি গরুড়পুরাণং ॥

পরিব্রাজঃ } পরিব্রাজকঃ } (পুং) পরিব্রাট্। ইত্যমরটীকায়াং রমানাথঃ ॥

পরিব্রাজিঃ (স্ত্রী) শ্রাবণী। থুলকুড়ী ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

পরিশঙ্কনীয়ঃ (ত্রি) সর্ব্বতোভাবেন শঙ্কাবিষয়ঃ। যথা। শাস্ত্রং সুচিন্তিতমপি প্রতিচিন্তনীয়মারাধিতোঽপি নৃপতিঃ পরিশঙ্কনীয়ঃ। অঙ্কে স্থিতাপি যুবতিঃ পরিরক্ষণীয়া শাস্ত্রে নৃপে চ যুবতৌ চ কুতো বশিত্বং ॥ ইত্যুদ্ভটঃ ॥

পরিশিষ্টং (ক্লী) পরিশেষবিশিষ্টং। অবশিষ্টার্থবোধকগ্রন্থঃ। ইতি হেমচন্দ্রঃ ॥

পরিশুষ্কং (ক্লী) মাংসব্যঞ্জনভেদঃ। যথা। মাংসং বহুঘৃতৈর্ভৃষ্টং সিক্তঞ্চেচ্চাম্বুনা মুহুঃ। জীরকাদ্যৈঃ সমাযুক্তং পরিশুষ্কং তদুচ্যতে॥ ইতি শব্দচন্দ্রিকা ॥ সর্ব্বতোনীরসে ত্রি ॥

পরিশোধঃ (পুং) পরিশোধনং। সর্ব্বতোভাবেন শুদ্ধিঃ। পরিপূর্ব্বশুধধাতোরল্প্রত্যয়নিষ্পন্নঃ ॥

পরিশোষঃ (পুং) সর্ব্বতোভাবেন শুষ্কতা। যথা। মার্ত্তণ্ডে পরিশোষমেতি সলিলং। ইত্যাদি জ্যোতিস্তত্ত্বং ॥

পরিশ্রমঃ (পুং) পরিশ্রান্তিঃ। তৎপর্য্যায়ঃ। শ্রমঃ ২ ক্লমঃ ৩ ক্লেশঃ ৪ প্রয়াসঃ ৫

আয়াসঃ ৬ ব্যায়ামঃ ৭। ইতি হেমচন্দ্রঃ

পরিশ্রয়ঃ (পুং) সভা। আশ্রয়ঃ। ইতি মেদিনী॥

পরিশ্রান্তঃ (ত্রি) সর্ব্বতোভাবেন শ্রান্তিযুক্তঃ। পরিপূর্ব্বশ্রমধাতোঃ কর্ত্তরি ক্তপ্রত্যয়নিষ্পন্নঃ॥

পরিশ্রুতঃ (ত্রি) সর্ব্বতোভাবেন শ্রবণবিশিষ্টঃ। পরিপূর্ব্বশ্রুধাতোঃ ক্তপ্রত্যয়নিষ্পন্নঃ॥

পরিশ্লেষঃ (পুং) আশ্লেষঃ। পরিপূর্ব্বশ্লিষধাতোর্ভাবে অল্‌প্রত্যয়নিষ্পন্নঃ॥

পরিষৎ [দ্] (স্ত্রী) সভা। ইত্যমরঃ। পরিষত্ত্বং যথা। একবিংশতিসংখ্যাকৈর্মীমাংসান্যায়পারগৈঃ। বেদাঙ্গকুশলৈশ্চৈব পরিষত্ত্বং প্রকল্পয়েৎ॥ ইতি প্রায়শ্চিত্তবিবেকঃ॥

পরিষদঃ (পুং) পারিষদঃ। অনুচরঃ। ইতি ভরতকৃতদ্বিরূপকোষঃ॥

পরিষদ্যঃ (পুং) পরিষদ্বলঃ। ইতি ভরতদ্বিরূপকোষঃ॥

পরিষদ্বলঃ (পুং) সভাসদঃ। পারিষদঃ। ইতি শব্দরত্নাবলী॥

পরিষ্কন্দঃ (ত্রি) পরিস্কন্দঃ। পরপুষ্টঃ। ইত্যমরটীকায়াং রমানাথঃ॥

পরিষ্কণ্ণঃ (ত্রি) পরিস্কন্দঃ। ইত্যমরটীকায়াং রায়মুকুটঃ॥

পরিষ্কারঃ (পুং) অলঙ্কারঃ। ইত্যমরঃ॥ সংস্কারঃ। শুদ্ধিঃ॥

পরিষ্কৃতঃ (ত্রি) ভূষিতঃ। অলঙ্কৃতঃ। ইত্যমরঃ॥ বেষ্টিতঃ। ইতি হেমচন্দ্রঃ॥

আহিতসংস্কারঃ। ইতি বেদিশব্দটীকায়াং ভরতঃ

পরিষ্কৃতভূমিঃ (স্ত্রী) বেদিঃ। পরিষ্কৃতা যজ্ঞার্থং পশুবন্ধনায় যজ্ঞপাত্রাসাদনায় চাহিতসংস্কারা ভূমিঃ। ইত্যমরভরতৌ॥

পরিষ্টোমঃ (পুং) পরিস্তোমঃ। ইত্যমরটীকায়াং স্বামী॥

পরিষ্বঙ্গঃ (পুং) আলিঙ্গনং। ইত্যমরঃ॥

পরিসভ্যঃ (পুং) পরিষদ্যঃ। সভাসদঃ। সর্ব্বতোভাবেন সভায়াং সাধুঃ ইত্যর্থে যপ্রত্যয়ঃ॥

পরিসরঃ (পুং) পর্য্যন্তভূঃ। নদীনগরপর্ব্বতাদেরুপান্তভূমিঃ। ইত্যমরভরতৌ॥ মৃত্যুঃ। বিধিঃ। ইতি মেদিনী॥

পরিসর্পঃ (পুং) পরিক্রিয়া। পরিজনাদিনা বেষ্টনং। সমন্তাৎ সর্পণং। ইত্যমরভরতৌ॥

পরিসর্য্যা (স্ত্রী) পরীসারঃ। সর্ব্বতোগমনং ভূমৌ সর্ব্বতোভ্রমণং। ইতি সর্ব্বস্বং॥ অনুসরণং। ইতি কেচিৎ। ইত্যমরভরতৌ॥

পরিস্কন্দঃ (পুং) পরপুষ্টঃ। পরেণ প্রতিপালিতঃ। ইত্যমরঃ॥

পরিস্কন্নঃ (পুং) পরিস্কন্দঃ। ইত্যমরটীকায়াং রায়মুকুটঃ॥

পরিস্তোমঃ (পুং) গজপৃষ্ঠস্থচিত্রকম্বলঃ। হাতীর পিঠের ঝুল ইতি ভাষা। ইত্যমরঃ

পরিস্পন্দঃ (পুং) কুসুমপ্রকরাদেঃ পত্রাবল্যাদেশ্চ রচনা। ইত্যমরঃ॥ পরিকরঃ

পরিবারঃ। ইতি হেমচন্দ্রঃ ॥ সর্ব্বতো-ভাবেন স্পন্দনঞ্চ ॥

পরিস্পন্দনং (ক্লী) সর্ব্বতোভাবেন কম্পনং। যথা। কোঽপি পরিস্পন্দনসাধনসাধ্যঃ। যথা গমনাদিঃ। কোঽপ্যপরিস্পন্দনসাধনসাধ্যঃ। যথা অবস্থানাদিঃ। ইতি গোয়ীচন্দ্রঃ ॥

পরিস্পন্দমানঃ (ত্রি) সর্ব্বতোভাবেন কম্পমানঃ। যথা। অনবরতপরিস্পন্দমানা পরিমিতপবনাদিপরমাণুচেতনসংযোগসন্তানান্তঃপাতিব্যক্তীনামবিরতমেবোপরমাৎ। ইতি সামান্যলক্ষণায়াং শিরোমণিঃ ॥

পরিস্যন্দঃ (পুং) পরিস্পন্দঃ। ইত্যমরটীকায়াং ভরতঃ ॥

পরিস্রুৎ (স্ত্রী) বরুণাত্মজা। মদিরা। ইত্যমরঃ ॥

পরিস্রুতঃ (ত্রি) স্রবযুক্তঃ। সর্ব্বতোভাবেন ক্ষরিতঃ। ইতি মেদিনী ॥

পরিস্রুতা (স্ত্রী) বারুণী। মদিরা। ইতি মেদিনী ॥

পরিহারঃ (পুং) অবজ্ঞা। অনাদরঃ। ইতি শব্দরত্নাবলী ॥

পরিহার্য্যঃ (পুং) পারিহার্য্যঃ। বলয়ঃ। ইতি ভরতদ্বিরূপকোষঃ ॥ পরিহরণীয়ে ত্রি ॥

পরিহাসঃ (পুং) পরিহসনং। ঠাট্টা ইতি ভাষা। পরীহাসঃ। যথা। পরিহাসঃ কেলিমুখঃ কেলির্দেবননর্ম্মণী। ইতি ত্রিকাণ্ডশেষঃ ॥ তৎপর্য্যায়ঃ। ক্রীড়ঃ ২ দেবনা ৩। ইতি শব্দরত্নাবলী ॥ বর্করা ৪। ইতি জটাধরঃ

পরিক্ষিৎ (পুং) অভিমন্যুপুত্রঃ। তৎপর্য্যায়ঃ। পরীক্ষিৎ ২ পারীক্ষিতঃ ৩ পরিক্ষিতঃ ৪। ইতি শব্দরত্নাবলী ॥

পরিক্ষিপ্তং (ত্রি) পরিখাদিনা বেষ্টিতং। তৎপর্য্যায়ঃ। নিবৃতং ২। ইত্যমরঃ ॥ সর্ব্বতোভাবেন ক্ষেপযুক্তঞ্চ ॥

পরীণায়ঃ (পুং) পরিণায়ঃ। শারীণাং সমন্তান্নয়নং। ইত্যমরটীকায়াং ভরতঃ ॥

পরীতং (ত্রি) পরিবেষ্টিতং ইতি হেমচন্দ্রঃ ॥

পরীতৎ (ত্রি) সর্ব্বতোভাবেন বিস্তৃতং। পরিপূর্ব্বতনধাতোঃ ক্বিপ্‌প্রত্যয়নিষ্পন্নং। ইতি মুগ্ধবোধব্যাকরণং ॥

পরীভাবঃ (পুং) পরিভাবঃ। অনাদরঃ। ইত্যমরটীকায়াং ভরতঃ ॥

পরীরং (ক্লী) ফলং। ইত্যুণাদিকোষঃ ॥

পরীরম্ভঃ (পুং) পরিরম্ভঃ। আলিঙ্গনং। ইতি ভরতদ্বিরূপকোষঃ ॥

পরীবর্ত্তঃ (পুং) পরিবর্ত্তনং। তৎপর্য্যায়ঃ। প্রতিদানং ২ নৈমেয়ঃ ৩ নিময়ঃ ৪। ইত্যমরঃ ॥ পরিবর্ত্তঃ ৫ বৈমেয়ঃ ৬ বিনিময়ঃ ৭ পরিদানং ৮। ইতি শব্দরত্নাবলী ॥ কূর্ম্মরাজঃ। ইতি জটাধরঃ ॥

পরীবাদঃ (পুং) দোষোল্লাসঃ। তৎপর্য্যায়ঃ। কুৎসা ২ নিন্দা ৩ জুগুপ্সা ৪ গর্হা ৫ গর্হণং ৬ নিন্দনং ৭ কুৎসনং ৮ পরিবাদঃ ৯ জুগুপ্সনং ১০ আক্ষেপঃ ১১ অবর্ণঃ ১২ নির্বাদঃ ১৩ অপক্রোশঃ ১৪ ভংসনং ১৫ উপক্রোশঃ ১৬ অপবাদঃ ১৭ অববাদঃ ১৮। ইতি শব্দরত্নাবলী ॥

বীণাদিবাদনং। যেন কাষ্ঠবিশেষাদিনা বীণাদির্বাদ্যতে সঃ। ইতি জটাধরঃ॥

পরীবারঃ (পুং) খড়্গকোষঃ। জঙ্গমঃ। পরিচ্ছদঃ। ইত্যমরঃ॥ পরীবারঃ পরিজনে খড়্গকোষে পরিচ্ছদে। ইত্যনেকত্র দর্শনাৎ। জঙ্গমো জঙ্গমবিশেষঃ পরিজন ইত্যর্থঃ। খড়্গকোষোঽসিবায়কঃ মেয়ান্ ইতি খ্যাতঃ। পরিচ্ছদঃ শোভাজনকমুপকরণং ছত্রচামরাদিঃ সভ্যজনাদিশ্চ এষু পরীবারঃ। ইতি তট্টীকায়াং ভরতঃ॥

পরীবাহঃ (পুং) জলোচ্ছ্বাসঃ। ইত্যমরঃ॥ রাজযোগ্যবস্তু। ইতি মেদিনী॥

পরীষ্টিঃ (স্ত্রী) অন্বেষণা। ইত্যমরঃ॥ পরিচর্য্যা। প্রাকাম্যং। ইতি মেদিনী॥

পরীসারঃ (পুং) পরিসর্য্যা। সর্ব্বতোগমনং। ইত্যমরঃ॥

পরীহারঃ (পুং) অবজ্ঞা। ইতি শব্দরত্নাবলী॥

পরীহাসঃ (পুং) পরিহসনং। তৎপর্য্যায়ঃ। দ্রবঃ ২ কেলিঃ ৩ ক্রীড়া ৪ লীলা ৫ নর্ম্ম ৬। ইত্যমরঃ॥ পরিহাসঃ ৭ কেলিমুখং ৮ দেবনং ৯। ইতি ত্রিকাণ্ডশেষঃ॥

পরীক্ষকঃ (ত্রি) নিরূপকঃ। তৎপর্য্যায়ঃ। কারণিকঃ ২। ইত্যমরঃ॥ পরীক্ষতে অবধারয়তি প্রমাণেন। যথা বহ্নিনা পরীক্ষকঃ স্বর্ণস্য স্বর্ণকারঃ। কারণৈর্হেতুভিশ্চরতি কারণিকঃ। ইতি ভরতঃ॥

পরীক্ষণং (ক্লী) পরীক্ষা। রাজ্ঞা ধর্ম্মকামার্থভয়ৈরমাত্যাদের্ভাবতত্ত্বনিরূপণং। ইতি ভরতঃ॥ যথা। ভেদোপজাপাবুপধা- ধর্ম্মাদ্যৈর্যৎ পরীক্ষণং। ইত্যমরঃ॥ সর্ব্বতোভাবেন দর্শনঞ্চ॥

পরীক্ষা (স্ত্রী) দিব্যং। অথ দিব্যানি। তত্র বৃহস্পতিঃ। ধটোঽগ্নিরুদকঞ্চৈব বিষং কোষশ্চ পঞ্চমং। ষষ্ঠঞ্চ তণ্ডুলাঃ প্রোক্তং সপ্তমং তপ্তমাষকং॥ অষ্টমং ফালমিত্যুক্তং নবমং ধর্ম্মজং স্মৃতং। দিব্যান্যেতানি সর্ব্বাণি নির্দ্দিষ্টানি স্বয়ম্ভুবা॥ অথ কিন্তদ্দিব্যং। তত্র মানুষপ্রমাণানির্ণয়স্যাপি নির্ণায়কং যত্তদ্দিব্যমিতি লোকপ্রসিদ্ধং। এতদ্যদ্যপি শপথানামস্তি তথাপি কালান্তরনির্ণায়কত্বেন তেষাং ভেদাৎ। অপিনা মানুষপ্রমাণসত্ত্বেঽপি যত্র ধটাদীনামঙ্গীকারস্তত্রাপি তদ্ভবতি ইতি সূচিতং। অতএব লিখিতসাক্ষিভুক্তিলক্ষণত্রিবিধমানুষপ্রমাণভিন্নপ্রমাণং যত্তদ্দিব্যং প্রমাণং তৎ প্রমাণং ন ভাবৈকগোচরং কিন্তু ভাবাভাবাবিশেষেণ গোচরয়তীতি। তত্র মহাভিযোগেষু দিব্যান্যাহ যাজ্ঞবল্ক্যঃ। তুলাগ্ন্যাপো বিষং কোষো দিব্যানীহ বিশুদ্ধয়ে। মহাভিযোগেষ্বেতানি শীর্ষকস্থেঽভিযোক্তরি॥ বিশুদ্ধয়ে সন্দিগ্ধার্থস্য সন্দেহনিবৃত্তয়ে মহাভিযোগেষু মহাপাতকাদিগুরুতরাভিযোগেষু। শীর্ষকস্থ ইতি শীর্ষকং প্রধানং ব্যবহারস্য চতুর্থপাদো জয়পরাজয়লক্ষণঃ। তেন দণ্ডো লক্ষ্যতে তত্র তিষ্ঠতীতি শীর্ষকস্থঃ তৎপ্রযুক্তদণ্ডভাগীত্যর্থঃ। মহাভিযোগান্ স্পষ্টয়তি কালিকাপুরাণং। পরদারাভিশাপে চ চৌর্য্যাগম্যাগমেষু চ

মহাপাতকশস্তেষু স্যাদ্দিব্যং নৃপসাহসে॥ প্রতিপত্তৌ বিবাদে চ পণস্য স্থাপনে কৃতে। তত্রৈব স্থাপয়েদ্দিব্যং শিরঃপূর্ব্বং মহীপতিঃ॥ পরদারাভিশাপে চ বহবো যত্র বাদিনঃ। শিরোহীনং ভবেদ্দিব্যমাত্মনঃ শুদ্ধিকারণাৎ॥ পিতামহঃ। শিরঃস্থায়িবিহীনানি দিব্যানি পরিবর্জ্জয়েৎ। চত্বারি তু ধটাদীনি কোষশ্চৈবাশিরাঃ স্মৃতঃ॥ মহাভিযোগেতরেঽপি কোষমাহ স্মৃতিঃ। কোষমল্পে চ দাপয়েৎ। যাজ্ঞবল্ক্যেনাভিযোক্তুর্বাদিনঃ শিরোবর্ত্তিত্বাভিধানাদভিযোজ্যস্য দিব্যকর্ত্তৃত্বং প্রতিপাদিতং। ব্যক্তমাহ কাত্যায়নঃ। ন কশ্চিদভিযোক্তারং দিব্যেষু বিনিযোজয়েৎ। অভিযুক্তায় দাতব্যং দিব্যং দিব্যবিশারদৈঃ॥ প্রত্যর্থিস্বীকারেণার্থিনোঽপি দিব্যমাহ যাজ্ঞবল্ক্যঃ। রুচ্যা বান্যতরঃ কুর্য্যাদিতরো বর্ত্তয়েচ্ছিরঃ। বিনাপি শীর্ষকান্ কুর্য্যান্নৃপদ্রোহেঽথ পাতকে॥ ইতরোঽভিযুক্তঃ শিরঃ শারীরদণ্ডমর্থদণ্ডম্বা বর্ত্তয়েৎ স্বীকুর্য্যাৎ। বৃহস্পতিঃ। স্নেহাৎ ক্রোধাল্লোভতো বা ভেদমায়ান্তি সাক্ষিণঃ। বিধিদৃষ্টস্য দিব্যস্য ন ভেদো জায়তে ক্বচিৎ॥ ভেদঃ সত্যাদ্বৈপরীত্যং। যত্তু কাত্যায়নবচনং। ক্রিয়া ন দৈবিকী প্রোক্তা বিদ্যমানেষু সাক্ষিষু। লেখ্যে চ সতি বাদেষু ন স্যাদ্দিব্যং ন সাক্ষিণ ইতি তদ্গুণান্বিতসাক্ষিসত্ত্বে। যথা ব্যাসঃ। মণিমন্ত্রৌষধিবলাৎ প্রদত্তং বা বিধানতঃ। বিসম্বদেদ্দিব্যমপি ন তু সাক্ষী গুণান্বিতঃ॥

অতএব নারদঃ। যুক্তিষ্বপ্যবসন্নাসু শপথৈনৈনমর্দ্দয়েৎ। এনং বিপর্য্যয়মাণমর্থং অর্দ্দয়েৎ পীড়য়েৎ। নির্দ্ধারয়েদিতি যাবৎ॥*॥ শপথানাহ নারদঃ। সত্যবাহনশস্ত্রাণি গোবীজকনকানি চ। দেবতাপিতৃপাদাংশ্চ দত্তানি সুকৃতানি চ॥ স্পৃশেচ্ছিরাংসি পুত্ত্রাণাং দারাণাং সুহৃদান্তথা। অভিযোগেষু সর্ব্বেষু কোষপানমথাপি বা॥ ইত্যেতে শপথাঃ প্রোক্তা মনুনা স্বল্পকারণাৎ। বৃহস্পতিঃ। যথোক্তবিধিনা দেয়ং দিব্যং দিব্যবিশারদৈঃ। অযথোক্তপ্রদত্তন্তু ন শক্তং সাধ্যসাধনে॥ অদেশকালদত্তানি বহির্বাদিকৃতানি চ। ব্যভিচারং সদা ত্বেবং কুর্ব্বন্তীহ ন সংশয়ঃ॥ বহির্বাদিকৃতমভিযোক্তারং বিনা কৃতং। এতচ্চ প্রায়িকং আত্মশুদ্ধিপরাণামভিযোক্তারং বিনাপি দিব্যবিধানাৎ। তথা চ নারদঃ। রাজভিঃ শঙ্কিতানাঞ্চ নির্দ্দিষ্টানাঞ্চ দস্যুভিঃ। আত্মশুদ্ধিপরাণাঞ্চ দেয়ং দিব্যং শিরো বিনা॥*॥ অথ দিব্যদেশাঃ। কাত্যায়নঃ। ইন্দ্রস্থানেঽভিশস্তানাং মহাপাতকিনাং নৃণাং। নৃপদ্রোহপ্রবৃত্তানাং রাজদ্বারে প্রযোজয়েৎ॥ প্রাতিলোম্যপ্রসূতানাং দিব্যং দেয়ং চতুষ্পথে। অতোঽন্যেষু চ কার্য্যেষু সভামধ্যে বিদুর্ব্বুধাঃ॥ ইন্দ্রস্থানে ইন্দ্রধ্বজস্থানে॥ * ॥ অথ দিব্যকালাঃ॥ পিতামহঃ। চৈত্রো মার্গশিরাশ্চৈব বৈশাখশ্চ তথৈব হি। এতে সাধারণা মাসা দিব্যানামবিরোধিনঃ॥ ধটঃ সর্ব্বর্ত্তুকঃ প্রোক্তো বাতে

বাতি বিবর্জ্জয়েৎ। অগ্নিঃ শিশিরহেমন্ত-বর্ষাসু পরিকীর্ত্তিতঃ ॥ শরদ্গ্রীষ্মে তু সলিলং হেমন্তে শিশিরে বিষং। কোষস্তু সর্ব্বদা দেয়স্তুলা স্যাৎ সার্ব্বকালিকীতি ॥ মিতাক্ষরায়াং নারদঃ। ন শীতে তোয়-শুদ্ধিঃ স্যান্নোষ্ণকালেহগ্নিশোধনং। ন প্রাবৃষি বিষং দদ্যাৎ প্রবাতে ন তুলাং নৃপ ॥ নারদঃ। পূর্ব্বাহ্ণে সর্ব্বদিব্যানাং প্রদানং পরিকীর্ত্তিতং। নাপরাহ্ণে ন সন্ধ্যায়াং ন মধ্যাহ্নে কদাচন ॥ শীতে হেমন্তশিশিরবর্ষাসু। উষ্ণকালে গ্রীষ্ম-শরদোঃ। বর্ষাসু বিষনিষেধশ্চতুর্থবাতি-রিক্তপরঃ। বর্ষে চতুর্থবা মাত্রা ইতি বক্ষ্য-মাণনারদবচনাৎ। তণ্ডুলাদীনান্তু বিশেষা-নভিধানাৎ সার্ব্বকালিকত্বং। অত্র বিষে বিশেষতো বর্ষানিষেধাৎ বক্ষ্যমাণবচনে সিংহস্থরবাবেব পরীক্ষামাত্রনিষেধাচ্চ দিব্যান্তরং সিংহেতরত্র বর্ষাস্বপি কুর্ব্বীত। অতো যাম্যায়নে হরৌ সুপ্তে সর্ব্বকর্ম্মাণি বর্জ্জয়েদিত্যস্য ন বিষয়ঃ। জ্যোতিষে। সিংহস্থে মকরস্থে চ জীবে চাস্তমিতে তথা। মলমাসে ন কর্ত্তব্যা পরীক্ষা জয়-কাঙ্ক্ষিণা ॥ রবিশুদ্ধৌ গুরৌ চৈব ন শুক্রেহস্তঙ্গতে পুনঃ। সিংহস্থে চ রবৌ নৈব পরীক্ষা শস্যতে বুধৈঃ ॥ নাষ্টম্যাং ন চতুর্দ্দশ্যাং প্রায়শ্চিত্তপরীক্ষণে। ন পরীক্ষা বিবাহশ্চ শনিভৌমদিনে তথা ॥ রবিশুদ্ধৌ গুরৌ চৈবেত্যত্র শস্যত ইতি শেষঃ। তথা চ দীপিকায়াং। নো শুক্রাস্তেহষ্টমেহর্কে গুরুসহিতরবৌ জন্ম-মাসেহষ্টমেন্দৌ বিষ্টৌ মাসে মলাখ্যে কুজশনিদিবসে জন্মতারাসু চাথ। নাড়ীনক্ষত্রহীনে গুরুরবিরজনীনাথতারা-বিশুদ্ধৌ প্রাতঃ কার্য্যা পরীক্ষা দ্বিতনুচর-গৃহাংশোদয়ে শস্তলগ্নে ॥ * ॥ পিতামহঃ। প্রত্যক্ষং দাপয়েদ্দিব্যং রাজা বাধিকৃতো-হপি বা। ব্রাহ্মণানাং শ্রুতবতাং প্রকৃ-তীনান্তথৈব চ ॥ ব্রাহ্মণানাং প্রকৃতীনাঞ্চ প্রত্যক্ষং দিব্যং দাপয়েদিত্যন্বয়ঃ। প্রকৃ-তয়স্তু স্বাম্যমাত্যঃ সুহৃৎ কোষো রাষ্ট্রদুর্গ-বলানি চ। রাজ্যাঙ্গানি প্রকৃতয়ঃ পৌরাণাং শ্রেণয়োহপি চেতি অমরসিংহোক্তাঃ ॥*॥ অথ দিব্যবিশেষাধিকারিণঃ। নারদঃ। ব্রাহ্মণস্য ধটো দেয়ঃ ক্ষত্রিয়স্য হুতা-শনঃ। বৈশ্যস্য সলিলং দেয়ং শূদ্রস্য বিষমেব তু ॥ সাধারণঃ সমস্তানাং কোষঃ প্রোক্তো মনীষিভিঃ। বিষবর্জ্জং ব্রাহ্মণস্য সর্ব্বেষান্তু তুলা স্মৃতা ॥ যৎ পুনরনেন সব্রতানাং ভৃশার্ত্তানাং ব্যাধিতানাং তপ-স্বিনাং। স্ত্রীণাঞ্চ ন ভবেদ্দিব্যং যদি ধর্ম্ম-স্ত্বপেক্ষিতঃ ॥ ইতি স্ত্র্যাদীনাং দিব্যং নিষিদ্ধং তত্তুলেতরবিষয়কমিতি শূল-পাণিঃ ॥ মিতাক্ষরায়ান্তু। স্ত্রীপুংসয়ো-র্ব্বিবাদেন স্ত্রীণাং দিব্যমিতি রুচ্যা বান্য-তরঃ কুর্য্যাদিতি বিকল্পনিষেধার্থমেত-দুক্তং ভবতি। অবষ্টব্ধাভিযোগেষু স্ত্র্যাদীনামভিযোক্তৃত্বে অভিযোজ্যানামেব দিব্যং এতেষামভিযোজ্যত্বেহপি অভি-যোক্তৃণামেব দিব্যং পরস্পরাভিযোগে তু বিকল্প এব তত্রাপি তুলৈবেতি নিয়ম্যতে।

তথা মহাপাতকাদিশঙ্কাভিযোগে তু স্ত্র্যাদীনাং তুলৈব। যথা যাজ্ঞবল্ক্যঃ। তুলা স্ত্রীবালবৃদ্ধান্ধপঙ্গুব্রাহ্মণরোগিণাং। অগ্নির্জলং বা শূদ্রস্য যবাঃ সপ্ত বিষস্য বা॥ স্ত্রীমাত্রং জাতিবয়োঽবস্থাবিশেষানাদরেণ বাল আষোড়শাদ্বর্ষাজ্জাতিবিশেষানাদরেণ বৃদ্ধোঽশীতিপারগঃ। এতচ্চ বচনং সর্ব্বদিব্যসাধারণেষু মার্গশিরশ্চৈত্রবৈশাখেষু স্ত্র্যাদীনাং সর্ব্বদিব্যসমবধানবিধানে নিয়মার্থকতয়ার্থবৎ। ন চ সর্ব্বকালং স্ত্রীণাস্তুলৈবেতি। স্ত্রীণান্তু ন বিষং প্রোক্তং ন চাপি সলিলং স্মৃতং। ধটকোষাদিভিস্তাসামন্তস্তত্ত্বং বিচারয়েৎ॥ ইতি বিষসলিলব্যতিরিক্তধটকোষাদিভিঃ শুদ্ধিবিধানাৎ। এবং বালাদিষ্বপি যোজনীয়ং। তথা ব্রাহ্মণাদীনামপি ন সার্ব্বকালিকস্তুলাদিনিয়মঃ। সর্ব্বেষামেব বর্ণানাং কোষাচ্ছুদ্ধির্বিধীয়তে। সর্ব্বাণ্যেতানি সর্ব্বেষাং ব্রাহ্মণস্য বিষং বিনা॥ ইতি পিতামহস্মরণাৎ। তস্মাৎ সাধারণে কালে বহুদিব্যসমবধানে তুলাদিনিয়মার্থমেবেদং বচনং। কালান্তরে তু তত্তৎকালবিহিতং সর্ব্বেষাং। তথা হি বর্ষাস্বগ্নিরেব সর্ব্বেষাং হেমন্তশিশিরয়োস্তু ক্ষত্রিয়াদীনাং ত্রয়াণাং অগ্নিবিষয়োর্বিকল্পঃ ব্রাহ্মণস্য তু অগ্নিরেব ন কদাচিদ্বিষং ব্রাহ্মণস্য বিষং বিনেতি নিষেধাৎ। গ্রীষ্মশরদোস্তু সলিলমেব। যেষাং কুষ্ঠ্যাদীনাস্তু বিশেষেণাগ্ন্যাদিনিষেধঃ। কুষ্ঠিনাং বর্জ্জয়েদগ্নিং সলিলং শ্বাসকাসিনাং। পিত্তশ্লেষ্মবতাং নিত্যং বিষন্তু পরিবর্জ্জয়েদিতি বচনাত্তেষামগ্ন্যাদি কালেঽপি সাধারণং তুলাদ্যেব দিব্যং ভবতি। যথা। তোয়মগ্নির্বিষঞ্চৈব দাতব্যং বলিনাং নৃণামিতি স্মরণাৎ। দুর্ব্বলানামপি সর্ব্বথা বিষনিষেধাৎ তৎকালানতিক্রমেণ জাতিবয়োঽবস্থাশ্রিতানি দিব্যানি দেয়ানি। অত্র চ যস্য যানি বিশেষসামান্যপর্য্যুদস্তেতরবিহিতানি তানি মুখ্যকল্পানুকল্পরূপাণি বেদিতব্যানি। যথা। ব্রাহ্মণস্য ধটো মুখ্যঃ কোষস্ত্বনুকল্পঃ। জলাগ্নী আপৎকল্পৌ প্রাগুক্তনারদবচনে এবকারশ্রুতের্মুখ্যকল্পাদিত্বং ন তু প্রশস্ততমাদিত্বমিতি। এবঞ্চাত্রাপি অযথোক্তপ্রদত্তন্তু ন শক্তং সাধ্যসাধনে ইতি প্রাগুক্তং বোধ্যং। স্মৃতিঃ। অবষ্টম্ভাভিযুক্তানাং ধটাদীনি বিনির্দ্দিশেৎ। তণ্ডুলৈশ্চৈব কোষশ্চ শঙ্কাস্বেব ন সংশয়ঃ॥ অবষ্টম্ভোঽত্র নিশ্চয়ঃ। শিরোবর্ত্তিরিতি কেচিৎ। ইতি ব্যবহারদীপিকা॥ কাত্যায়নঃ। অস্পৃশ্যাধমদাসানাং ম্লেচ্ছানাং পাপকারিণাং। প্রতিলোমপ্রসূতানাং নিশ্চয়ো ন তু রাজনি॥ তৎপ্রসিদ্ধানি দিব্যানি সময়ে তেষু নির্দ্দিশেৎ। তৎপ্রসিদ্ধানি সর্পঘটাদীনি। তথা দেশকালাবিরোধে তু যথাযুক্তং প্রকল্পয়েৎ। অন্যেন হারয়েদ্দিব্যং বিধিরেষ বিপর্য্যয়ে॥ অন্যেন প্রতিনিধিনা হারয়েৎ কারয়েৎ। বিপর্য্যয়ে অভিযুক্তস্যাসামর্থ্যে। অতএব মহাপাতক্যাদীনামন্যদ্বারা দিব্যমাহ স এব। মাতাপিতৃদ্বিজগুরুবালস্ত্রীরাজঘাতিনাং। মহা-

পাতকযুক্তানাং নাস্তিকানাং বিশেষতঃ ॥ লিঙ্গিনাং প্রমদানাঞ্চ মন্ত্রযোগক্রিয়াবতাং। বর্ণসঙ্করজাতানাং পাপাভ্যাসপ্রবর্ত্তিনাং ॥ এতেম্বেবাভিযোগেষু নিন্দ্যেম্বেব প্রযত্নতঃ। ইত্যাদ্যভিধায় দিব্যং প্রকল্পয়েম্নৈব রাজা ধর্ম্মপরায়ণঃ। এতৈরেব প্রযুক্তানাং সাধূনাং দিব্যমর্হতি ॥ কাত্যায়নঃ। ন লৌহশিল্পিনামগ্নিং সলিলং নাম্বুসেবিনাং। তণ্ডুলৈর্ন নিযুঞ্জীত ব্রাহ্মণং মুখরোগিণং ॥ নারদঃ। ক্লীবাতুরান্ সত্ত্বহীনান্ পরিতাপার্দ্দিতান্নরান্। বালবৃদ্ধাতুরাদীংশ্চ পরীক্ষেত ধটে সদা ॥ নার্ত্তানাং তোয়শুদ্ধিঃ স্যান্ন বিষং পিত্তরোগিণাং। শ্বিত্র্যন্ধকুনখাদীনাং নাগ্নিকর্ম্ম বিধীয়তে ॥ ন মজ্জনং স্ত্রীবালয়োর্ধর্ম্মশাস্ত্রবিশারদৈঃ। নিরুৎসাহান্ ব্যাবিক্লিশানার্ত্তাংস্তোয়ে নিমজ্জয়েৎ ॥ ন চাপি হারয়েদগ্নিং ন বিষেণ বিশোধয়েৎ। যত্তু। স্থাবরেষু বিবাদেষু দিব্যানি পরিবর্জ্জয়েদিতি পিতামহবচনং তল্লিখিতসামন্তাদিসত্ত্বে দিব্যনিষেধকং। যদ্যপি। অলেখ্যসাক্ষিকে দিব্যং ব্যবহারে বিনির্দ্দিশেদিতি স্মৃতের্বিবাদান্তরেঽপি লেখ্যাদিসত্ত্বে দিব্যানাদরস্তথাপি ঋণাদানাদিবিবাদে সাক্ষ্যুপন্যাসে কৃতেঽপি প্রত্যর্থী যদি দণ্ডাঙ্গীকারেণ দিব্যমঙ্গীকরোতি তদা দিব্যমপি ভবতি সাক্ষিণাং দোষসম্ভবাদ্দিব্যস্য তু নির্দোষত্বেন বস্তুতত্ত্ববিষয়ত্বাৎ তল্লক্ষণত্বাচ্চ ধর্ম্মস্য। যথাহ নারদঃ। তত্র সত্যে স্থিতো ধর্ম্মো ব্যবহারস্তু সাক্ষিণি। দৈবসাধ্যে পৌরুষস্তু ন লেখ্যস্তু প্রযোজয়েৎ ॥ স্থাবরবিবাদে তু প্রত্যর্থিনা দণ্ডাঙ্গীকারেণ দিব্যাবলম্বনে কৃতে সামন্তাদিদৃষ্টপ্রমাণসম্ভাবেঽপি দিব্যং গ্রাহ্যমিতি বিকল্পনিবারণায় স্থাবরেম্বিত্যাদি পিতামহবচনং নাত্যন্তিকদিব্যনিরাকরণায় লিখিতাদ্যভাবে স্থাবরাদিষু নির্ণয়াপ্রসক্তেঃ ॥ * ॥ অথ দ্রব্যসংখ্যয়া দিব্যবিশেষাঃ। বিষ্ণুঃ। অথ সময়ক্রিয়ারাজদ্রোহসাহসেষু যথাকামং নিঃক্ষেপর্ণস্তেয়েম্বর্থপ্রমাণাদিতি। সময়ো দিব্যং রাজদ্রোহাদিষু যথাকামং রাজেচ্ছানুরোধাদ্দিব্যং নিঃক্ষেপাদিষু তু ধনপ্রমাণতারতম্যাদিত্যর্থঃ। বৃহস্পতিঃ। সংখ্যা রশ্মিরজোমূলা মনুনা সমুদাহৃতা। কার্ষাপণান্তা সা দিব্যে নিযোজ্যা বিনয়ে তথা ॥ বিষং সহস্রেঽপহৃতে পাদোনে চ হুতাশনঃ। ত্রিভাগোনে চ সলিলমর্দ্ধে দেয়ো ধটঃ সদা ॥ চতুঃশতাভিযোগে তু দাতব্যস্তপ্তমাষকঃ। ত্রিশতে তণ্ডুলা দেয়াঃ কোষশ্চৈব তদর্দ্ধকে ॥ শতে হৃতেঽপহৃতে চ দাতব্যং ধর্ম্মশোধনং। গোচৌরস্য প্রদাতব্যং সভ্যৈঃ ফালং প্রযত্নতঃ॥ এষা সংখ্যা নিকৃষ্টানাং মধ্যানাং দ্বিগুণা স্মৃতা। চতুর্গুণোত্তমানাস্তু কল্পনীয়া পরীক্ষকৈঃ ॥ রশ্মিরজঃ। জালান্তরগতে ভানৌ যৎ সূক্ষ্মং দৃশ্যতে রজঃ। প্রথমং তৎ প্রমাণানাং ত্রসরেণুং প্রচক্ষতে ॥ ইতি মনূক্তং ॥ কার্ষাপণান্তা পণান্তা কার্ষাপণঃ পণ ইতি পর্য্যায়দর্শনাৎ। বিনয়ে দণ্ডে। এবঞ্চ সহস্র ইত্যাদৌ পণ ইতি জ্ঞেয়ং

উপক্রমাৎ নিকৃষ্টানাং জাতিকর্ম্মগুণৈঃ। নাসহস্রাদ্ধরেদগ্নিং ন তুলাং ন বিষস্তথেতি যাজ্ঞবল্ক্যবচনং মধ্যমোত্তমবিষয়ত্বেন বৃহস্পতিবচনৈকবাক্যত্বাদবিরুদ্ধং। সহস্রেষু ধটং দদ্যাৎ সহস্রার্দ্ধে তথায়সং। অর্দ্ধস্যার্দ্ধে তু সলিলং তস্যার্দ্ধে তু বিষং স্মৃতং॥ ইতি বচনং যত্রাল্পাপরাধে পাতিত্যং তদ্বিষয়মিতি। এতৎ সর্ব্বং স্তেয়সাহসবিষয়ং। অপহ্নবে তু কাত্যায়নঃ। দত্তস্যাপহ্নবো যত্র প্রমাণং তত্র কারয়েৎ। স্তেয়সাহসয়োর্দ্দিব্যং স্বল্পেঽপ্যর্থে প্রদাপয়েৎ॥ সর্ব্বদ্রব্যপ্রমাণন্তু জ্ঞাত্বা হেম প্রকল্পয়েৎ। হেমপ্রমাণযুক্তন্তু তদা দিব্যং প্রদাপয়েৎ॥ জ্ঞাত্বা সংখ্যাং সুবর্ণানাং শতনাশে বিষং স্মৃতং। অশীতেশ্চ বিনাশে তু দদ্যাচ্চৈব হুতাশনং॥ ষষ্ট্যা নাশে জলং দেয়ং চত্বারিংশতি বৈ ধটং। বিংশদ্দশবিনাশে তু কোষপানং বিধীয়তে॥ পঞ্চাধিকস্য বা নাশে ততোঽর্দ্ধার্দ্ধস্য তণ্ডুলাঃ। ততোঽর্দ্ধার্দ্ধবিনাশে তু স্পৃশেৎ পুত্ত্রাদিমস্তকান্॥ ততোঽর্দ্ধার্দ্ধবিনাশে তু লৌকিক্যশ্চ ক্রিয়াঃ স্মৃতাঃ। এবং বিচারয়ন্রাজা ধর্ম্মার্থাভ্যাং ন হীয়তে॥ সুবর্ণানাং পঞ্চ কৃষ্ণলকো মাষস্তে সুবর্ণস্তু ষোড়শ ইত্যুক্তাশীতিরক্তিকাপরিমিতহেম্নাং নাশে অপহ্নবে বা দশাধিকস্য পঞ্চাধিকস্য বা বিংশস্য নাশে কোষপানমিত্যর্থঃ। তণ্ডুলাঃ পুনরল্পচৌর্য্যাভিশঙ্কায়ামেব ন তু সাহসাদৌ। চৌর্য্যে চ তণ্ডুলা দেয়া নান্যত্রেতি বিনিশ্চয় ইতি পিতামহস্মৃতেঃ। তপ্তমাষস্তু মহাচৌর্য্যাভিশঙ্কায়াং। মহাচৌর্য্যাভিযুক্তানাং তপ্তমাষো বিধীয়তে। ইতি স্মৃতেঃ॥ ব্যবহারমাতৃকায়াং। সমত্বং সাক্ষিণাং যত্র দিব্যৈস্তমপি শোধয়েৎ। প্রাণান্তিকবিবাদেষু বিদ্যমানেষু সাক্ষিষু॥ দিব্যমালম্বতে বাদী ন পৃচ্ছেত্তত্র সাক্ষিণঃ॥ ইতি দিব্যতত্ত্বং॥ *॥ ধটাদিনববিধপরীক্ষা তত্তৎশব্দে দ্রষ্টব্যা॥

পরীক্ষিৎ, পরীক্ষিতঃ (পুং) অভিমন্যুপুত্ত্রঃ। স যুধিষ্ঠিরাদনন্তরং কলিযুগস্যারম্ভে রাজচক্রবর্ত্তী আসীৎ। যথা। অভিমন্যোরুত্তরায়াং পরিক্ষীণেষু কুরুষশ্বত্থামপ্রযুক্তব্রহ্মাস্ত্রেণ গর্ভ এব ভস্মীকৃতো ভগবতঃ সকলসুরাসুরবন্দিতচরণযুগলস্য আত্মেচ্ছয়া কারণমানুষরূপধারিণোঽনুভাবাৎ পুনর্জীবিতমবাপ্য পরীক্ষিজ্জজ্ঞে। যোঽয়ং সাম্প্রতমেব ভূমণ্ডলং খণ্ডিতায়তি ধর্ম্মেণ পালয়তি। ইতি বিষ্ণুপুরাণে ৪ অংশে ২০ অধ্যায়ঃ॥ যাতে কৃষ্ণে চকারোঽথ সোঽভিষেকং পরীক্ষিতঃ। প্রযাস্যন্তি যদা চৈতে পূর্ব্বাষাঢ়াং মহর্ষয়ঃ॥ তদা নন্দাৎ প্রভৃত্যেষ কলির্বৃদ্ধিং গমিষ্যতি। যস্মিন্ কৃষ্ণো দিবং যাতস্তস্মিন্নেব তদাহনি॥ প্রতিপন্নং কলিযুগং তস্য সংখ্যা নিবোধ মে। ইতি তত্রৈব ২৪ অধ্যায়ঃ॥

পরুঃ (পুং) সমুদ্রঃ। স্বর্গলোকঃ। গ্রন্থিঃ। পর্ব্বতঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥

পরুঃ [স্] (ক্লী) গ্রন্থিঃ। ইত্যমরঃ॥

পরুৎ ব্য গতবৎসরঃ। ইত্যমরঃ॥

পরুত্নঃ (ত্রি) পরুদ্ভবঃ। পূর্ব্বাব্দভবঃ। পরুচ্ছব্দাৎ ভবার্থে ত্নপ্রত্যয়নিষ্পন্নঃ। ইতি ব্যাকরণং ॥

পরুদ্বারঃ (পুং) ঘোটকঃ। ইতি শব্দমালা ॥

পরুষং (ক্লী) নিষ্ঠুরবাক্যং। ইত্যমরঃ ॥ নীলঝিণ্টী। ইতি শব্দচন্দ্রিকা ॥ পরুষফলং। ইতি ভাবপ্রকাশঃ ॥

পরুষং (ত্রি) কর্ব্বুরঃ। রূক্ষঃ। নিষ্ঠুরোক্তিঃ। ইতি মেদিনী ॥

পরুষোক্তিকঃ (ত্রি) নিষ্ঠুরবক্তা। ইতি জটাধরঃ ॥

পরূষং (ক্লী) ফলবৃক্ষভেদঃ। পরুষফল ইতি বঙ্গভাষা। ফরূসা ইতি ফলুহে ইতি চ হিন্দী ভাষা। তৎপর্য্যায়ঃ। পরূষকং ২ নাগদলোপমং ৩। ইতি রত্নমালা ॥ পরুষং ৪ অল্পাস্থি ৫ পরাপরং ৬। ইতি ভাবপ্রকাশঃ ॥ নীলচর্ম্ম ৭ গিরিপীলু ৮ পরাবতং ৯ নীলমণ্ডলং ১০ পরুঃ ১১। অস্য গুণাঃ। অম্লত্বং। কটুত্বং। কফার্ত্তিবাতনাশিত্বঞ্চ। তদামফলগুণঃ। পিত্তদত্বং। উষ্ণত্বঞ্চ। তৎপক্বফলগুণাঃ। মধুরত্বং। রুচিপ্রদত্বং। পিত্তশোফহরত্বং। তর্পণত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ পরূষকং কষায়াম্লমামং পিত্তকরং লঘু। তৎ পক্বং মধুরং পাকে শীতং বিষ্টম্ভি বৃংহণং ॥ হৃদ্যং তৃট্‌পিত্তদাহাস্রজ্বরক্ষয়সমীরহৃৎ। ইতি ভাবপ্রকাশঃ ॥

পরূষকং (ক্লী) পরূষং। ইতি রাজনির্ঘণ্টঃ ॥

পরেতঃ (ত্রি) মৃতঃ। ইত্যমরঃ ॥ ভূতান্তরে পুং। ইতি মেদিনী ॥

পরেতরাট্ [জ্] (পুং) প্রেতরাজঃ। যমঃ। ইত্যমরঃ ॥

পরেদ্যবি ব্য পরস্মিন্নহনি। পরদিনং। ইতি মুগ্ধবোধব্যাকরণং ॥ যথা। পরেদ্যর্ব্যদ্যপূর্ব্বেদ্যুরন্যেদ্যুশ্চাপি চিন্তয়ন্। বৃদ্ধিক্ষয়ৌ মুনীন্দ্রাণাং প্রিয়ম্ভাবুকতামগাৎ ॥ ইতি ভট্টিঃ ॥

পরেদ্যুঃ [স্] ব্য পরদিনং। ইতি মুগ্ধবোধব্যাকরণং ॥

পরেপং (ত্রি) পরা গতা আপো যত্র। ইতি সিদ্ধান্তকৌমুদী ॥

পরেষ্টুকা (স্ত্রী) বহুসূতিঃ। বহুপ্রসূতা গৌঃ। ইত্যমরঃ ॥

পরৈধিতঃ (ত্রি) ঔদাসিন্যেন পরপুষ্টঃ। পরেণ সম্বর্দ্ধিতঃ। তৎপর্য্যায়ঃ। পরাচিতঃ ২ পরিষ্কন্দঃ ৩ পরজাতঃ ৪। ইত্যমরঃ ॥ কোকিলে পুং। ইতি শব্দমালা ॥

পরোপকারঃ (পুং) পরেষামুপকৃতিঃ। অন্যসম্বন্ধিহিতং। যথা। এষ মে প্রবরো ভাতি শুদ্ধধর্ম্মপ্রদো বিধিঃ। পরোপকরণাদন্যৎ সর্ব্বমল্পং স্মৃতং বুধৈঃ ॥ পরোপকারিভির্দত্তা স্বপ্রাণা ঋষিভিঃ পুরা। অদ্ভিঃ প্রেতোপকারঃ স্যাৎ কিন্ন লব্ধং ময়া পুনঃ ॥ দধীচিনা পুরা গীতঃ শ্লোকশ্চ শ্রূয়তে ভুবি। সর্ব্বধর্ম্মময়ঃ সারঃ সর্ব্বধর্ম্মজ্ঞসম্মতঃ ॥ পরোপকারঃ কর্ত্তব্যঃ প্রাণৈঃ কণ্ঠগতৈরপি। পরোপকারজং পুণ্যং তুল্যং ক্রতুশতৈরপি ॥ ইতি পদ্মোত্তরখণ্ডে ২২ অধ্যায়ঃ ॥

পরোবরীণঃ (ত্রি) শ্রেষ্ঠাশ্রেষ্ঠযুক্তঃ।

পরাংশ্চাবরাংশ্চানুভবতি অবরস্যোত্বং নিপাত্যতে। ইতি সিদ্ধান্তকৌমুদী ॥

পরোষ্ণী (স্ত্রী) তৈলপ্রায়িকা। ইত্যমরঃ ॥

পরোক্ষং (ক্লী) অপ্রত্যক্ষং। অসাক্ষাৎ। যথা। পরোক্ষে কার্য্যহন্তারং প্রত্যক্ষে প্রিয়বাদিনং। বর্জয়েত্তাদৃশং মিত্রং বিষকুম্ভং পয়োমুখং ॥ ইতি চাণক্যং ॥ তদ্বিশিষ্টে ত্রি ॥

পরোক্ষঃ (পুং) তপস্বী। ইতি শব্দমালা ॥

পর্কটিঃ } (স্ত্রী) প্লক্ষবৃক্ষঃ। ইত্যমরটীকায়াং পর্কটী } ভরতঃ ॥ পাকুড় ইতি ভাষা। তস্য গুণাঃ। প্লক্ষঃ কষায়ঃ শিশিরো ব্রণযোনিগদাপহঃ। দাহপিত্তকফাস্রঘ্নঃ শোথহা রক্তপিত্তহৃৎ ॥ ইতি ভাবপ্রকাশঃ ॥

পর্কটী [ন্] (পুং) বৃক্ষবিশেষঃ। পাকুড় ইতি ভাষা। তৎপর্য্যায়ঃ। প্লক্ষঃ ২ জটী ৩। ইত্যমরঃ ॥ কমণ্ডলুতরুঃ ৪। ইতি রত্নমালা ॥ কপীতনঃ ৫ ক্ষীরী ৬ সুপার্শ্বঃ ৭ কমণ্ডলুঃ ৮ শৃঙ্গী ৯ অবরোহঃ ১০ শাখী ১১ গর্দ্দভাণ্ডঃ ১২ পীতনঃ ১৩ দৃঢ়প্ররোহঃ ১৪ প্লক্ষকঃ ১৫ প্লবঙ্গঃ ১৬ মহাবলঃ ১৭। অস্য গুণাঃ। কটুত্বং। কষায়ত্বং। শিশিরত্বং। রক্তদোষমূর্চ্ছাভ্রমপ্রলাপনাশিত্বঞ্চ। বিশেষতো হ্রস্বপ্লক্ষস্যৈতে গুণাঃ। ইতি রাজনির্ঘণ্টঃ ॥

পর্জ্জনী (স্ত্রী) দারুহরিদ্রা। ইত্যমরঃ ॥

পর্জ্জন্যঃ (পুং) ইন্দ্রঃ। শব্দায়মানমেঘঃ। ইত্যমরঃ ॥ মেঘশব্দঃ। ইতি বিশ্বঃ ॥ অগর্জ্জন্নপি মেঘঃ। ইতি ভরতঃ ॥ যথা। যজ্ঞাদ্ভবতি পর্জ্জন্যঃ পর্জ্জন্যাদন্নসম্ভবঃ। ইত্যাদি শ্রীভগবদ্গীতা ॥

পর্জ্জন্যা (স্ত্রী) দারুহরিদ্রা। ইতি রাজনির্ঘণ্টঃ ॥

পর্ণ ৎ ক হারিত্যে। ইতি কবিকল্পদ্রুমঃ ॥ হরিৎ পীতবর্ণস্তস্য ভাবঃ হারিত্যং। পর্ণয়তি পর্ণাপয়তি চম্পকং। ইতি দুর্গাদাসঃ ॥

পর্ণং (ক্লী) পত্রং। ইত্যমরঃ ॥ তাম্বূলং। যথা। অনিধায় মুখে পর্ণং পূগং স্বাদয়তে নরঃ। মতিভ্রংশো দরিদ্রঃ স্যাদন্তে ন স্মরতে হরিং ॥ ইতি রাজনির্ঘণ্টঃ ॥ * ॥ তাম্বূলধারিলক্ষণং যথা। অনাহার্য্যোহনৃশংসশ্চ দৃঢ়ভক্তিশ্চ পার্থিবে। তাম্বূলধারী ভবতি নারী বাপ্যথ তদ্গুণা ॥ ইতি মাৎস্যে ১৮৯ অধ্যায়ঃ ॥

পর্ণঃ (পুং) পলাশবৃক্ষঃ। ইত্যমরঃ ॥

পর্ণকারঃ (পুং) বারজীবী। বারুই ইতি ভাষা। ইতি কেচিৎ ॥

পর্ণকৃচ্ছ্রং (ক্লী) পত্রকৃচ্ছ্রব্রতং। যথা। পর্ণোডুম্বররাজীববিল্বপত্রকুশোদকৈঃ। প্রত্যেকং প্রত্যহাভ্যস্তৈঃ পর্ণকৃচ্ছ্র উদাহৃতঃ ॥ ইতি গরুড়পুরাণং ॥

পর্ণখণ্ডঃ (পুং) বনস্পতিঃ। ইতি শব্দচন্দ্রিকা ॥ তাম্বূলৈকাংশশ্চ ॥

পর্ণচোরকঃ (পুং) চোরকনামগন্ধদ্রব্যং। ইতি রাজনির্ঘণ্টঃ ॥

পর্ণধ্বৎ [স্] (ত্রি) পত্রধ্বংসকর্ত্তা। ইতি পর্ণোপপদাৎ ধ্বন্সধাতোঃ কর্ত্তরি ক্বিপ্প্রত্যয়নিষ্পন্নঃ ॥

পর্ণনরঃ (পুং) পিত্রাদিশবাস্থ্যলাভে দাহার্থ-তৎপ্রতিনিধীভূতশরপলাশপত্ররচিতোর্ণা-তন্তুবেষ্টিতযবপিষ্টলিপ্তনরাকারপুত্তলকঃ। যথা। আশ্বলায়নগৃহ্যপরিশিষ্টং। অস্থি-নাশে পলাশবৃন্তানাং ত্রীণি ষষ্টিশতানি পুরুষপ্রতিকৃতিং কৃত্বা অশীত্যর্দ্ধন্তু শিরসি গ্রীবায়াং দশ যোজয়েৎ। উরসি ত্রিংশতং দদ্যাৎ বিংশতিং জঠরে তথা॥ বাহুভ্যাঞ্চ শতং দদ্যাৎ দদ্যাদঙ্গুলিভির্দশ। দ্বাদ-শার্দ্ধং বৃষণয়োরষ্টার্দ্ধং শিশ্ন এব চ॥ ঊরুভ্যান্তু শতং দদ্যাৎ ত্রিংশতং জানু-জঙ্ঘয়োঃ। পাদাঙ্গুলীষু চ দশ এতৎ প্রেতস্য লক্ষণং॥ ঊর্ণাসূত্রেণ সংবেষ্ট্য যবপিষ্টেন লেপয়েৎ। আদিপুরাণং। তদ-লাভে পলাশোত্থৈঃ পত্রৈঃ কার্য্যঃ পুমা-নপি। শতৈস্ত্রিভিস্তথা ষষ্ট্যা শরপত্রৈ-র্বিধানতঃ॥ তদলাভে অস্থ্যলাভে। অত্র পলাশপত্রশরপত্রয়োঃ তুল্যত্বেনোপাদানাৎ আশ্বলায়নসূত্রেঽপি প্রতিকৃতৌ শরপত্রস্য লাভঃ। অত্রাচারাদযোগ্যত্বাচ্চ শরপত্রৈঃ পুত্তলকং কৃত্বা শিরঃপ্রভৃতিষু পলাশ-পত্রাণি দেয়ানি। ততো বেষ্টনং ঊর্ণা-সূত্রেণ লেপনং যবপিষ্টেনেতি। অশৌ-চাভ্যন্তরদাহে শেষাহেন শুদ্ধিঃ। তদুত্তর-পর্ণনরদাহে তু ত্রিরাত্রং। এবং পর্ণনরং দগ্ধ্বা ত্রিরাত্রমশুচির্ভবেদিত্যাদি পুরা-ণাৎ। যজ্ঞপার্শ্বঃ। পুত্রাশ্চেদুপলভ্যেরন্ তদস্থীনি কদাচন। তদলাভে পলাশস্য সম্ভবে হি পুনঃ ক্রিয়া॥ হি যস্মাত্তদলাভে অস্থ্নামপ্রাপ্তৌ পলাশস্য তৎকৃতপুত্তলস্য দাহক্রিয়া। পুনরপি সম্ভবে অস্থিলাভে পুনরপি অস্থিদাহক্রিয়া বিহিতা তস্মাদ্যদি পুনরস্থীনি প্রাপ্যন্তে তদা পুনর্দাহে ত্রিরাত্রা-শৌচে কর্ত্তব্যে ন পুনঃ পিণ্ডদানং বক্ষ্য-মাণযুক্তেঃ। বিষ্ণুঃ। ত্রিপক্ষে তু গতে পর্ণনরং দহ্যাদনগ্নিকঃ। ত্রিপক্ষাভ্যন্তরে রাজন্নৈব পর্ণনরং দহেৎ॥ তদূর্দ্ধমষ্টমীং প্রাপ্য দর্শং বাপি বিচক্ষণঃ। দহেদিতি শেষঃ। অস্যার্থঃ। অশৌচাভ্যন্তরে যদি পর্ণনরদাহং ন কুর্য্যাত্তদা মরণদিনাবধি-ত্রিপক্ষানন্তরং কার্য্য ইতি হরিদাসতর্কা-চার্য্যাঃ॥ যাদবভট্টোঽপ্যেবং। ব্যবহারো-ঽপি ঈদৃশ এব। পর্ণনরং দহেন্নৈব বিনা দর্শং কদাচন। অস্থ্নামলাভে দর্শে তু ততঃ পর্ণনরং দহেদিতি দীপকলিকায়াং সুমন্তু-বচনাৎ দর্শে পর্ণনরদাহঃ। দর্শমিত্যত্রা-ষ্টমীমিতি ক্বচিৎ পাঠঃ। অত্রাষ্টমী কৃষ্ণা পিতৃকর্ম্মণি কৃষ্ণপক্ষস্য প্রাশস্ত্যোক্তেঃ। ইতি শুদ্ধিতত্ত্বং॥

পর্ণভেদিনী (স্ত্রী) প্রিয়ঙ্গুঃ। ইতি রাজ-নির্ঘণ্টঃ॥

পর্ণভোজনঃ (পুং) ছাগলঃ। ইতি শব্দরত্না-বলী॥ পত্রভক্ষকে ত্রি। পত্রভক্ষণে ক্লী॥

পর্ণমাচালঃ (পুং) কর্ম্মরঙ্গবৃক্ষঃ। ইতি শব্দ-মালা॥

পর্ণমৃগঃ (পুং) মৃগগণবিশেষঃ। যথা। বনৌকো-বৃক্ষমার্জারবৃক্ষমর্কটিকাদয়ঃ। এতে পর্ণ-মৃগাঃ প্রোক্তাঃ সুশ্রুতাদ্যৈর্মহর্ষিভিঃ॥ বনৌকো বানরঃ বৃক্ষমার্জারো বৃক্ষবিড়ালঃ বৃক্ষমর্কটিকা রুষী ইতি লোকে। এতেষা

মাংসগুণাঃ। স্মৃতাঃ পর্ণমৃগা বৃষ্যাশ্চক্ষুষ্যাঃ শোষিণে হিতাঃ। শ্বাসার্শঃকাসশমনাঃ সৃষ্টমূত্রপুরীষকাঃ॥ ইতি ভাবপ্রকাশঃ॥

পর্ণলতা (স্ত্রী) নাগবল্লী। ইতি রাজনির্ঘণ্টঃ॥

পর্ণবল্লী (স্ত্রী) পলাশীলতা। ইতি রাজনির্ঘণ্টঃ॥

পর্ণশালা (স্ত্রী) মুনীনাং পত্ররচিতগৃহং। তৎপর্য্যায়ঃ। উটজং ২। ইত্যমরঃ॥ পর্ণাটজং ৩। ইতি শব্দরত্নাবলী॥ পর্ণবতী শালা। পর্ণপ্রধানা শালা বা। ইতি ভরতঃ॥

পর্ণসিঃ (পুং) পদ্মং। ইত্যুণাদিকোষঃ॥ জলগৃহং। জলটুঙ্গী ইতি ভাষা। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥ শাকং। আভরণক্রিয়া। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥

পর্ণাশনঃ (পুং) মেঘঃ। ইতি শব্দমালা॥

পর্ণাসঃ (পুং) তুলসী। ইত্যমরঃ॥

পর্ণিনী (স্ত্রী) মাষপর্ণী। ইতি রত্নমালা॥

পর্ণী [ন্] (পুং) বৃক্ষঃ। ইতি হেমচন্দ্রঃ॥

পর্ণোটজং (ক্লী) পর্ণশালা। ইতি শব্দরত্নাবলী॥

পর্দ্দ ঙ অপানোৎসর্গে। ইতি কবিকল্পদ্রুমঃ॥ ঙ পর্দ্দতে বৃদ্ধঃ। ইতি দুর্গাদাসঃ॥

পর্দ্দঃ (পুং) কেশসমূহঃ। ইত্যুণাদিকোষঃ॥ অপানোৎসর্গশ্চ॥

পর্দ্দনং (ক্লী) অপানোৎসর্গঃ। পাদ্ ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

পর্পং (ক্লী) নবতৃণং। গৃহং। ইত্যুণাদিকোষঃ॥ খঞ্জবাহ্যশকটং। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥

পর্পটঃ (পুং) বৃক্ষবিশেষঃ। ক্ষেতপাপড়া ইতি বঙ্গভাষা। দবনপাপর ইতি হিন্দীভাষা। তৎপর্য্যায়ঃ। ত্রিযষ্টিঃ ২ তিক্তঃ ৩। ইতি রত্নমালা॥ চরকঃ ৪ রেণুঃ ৫ তৃষ্ণারিঃ ৬ বরকঃ ৭ অরকঃ ৮ শীতঃ ৯ শীতপ্রিয়ঃ ১০ পাংশুঃ ১১ কল্পাঙ্গঃ ১২ কর্ম্মকণ্টকঃ ১৩ কৃশশাখঃ ১৪ প্রগন্ধঃ ১৫ সুতিক্তঃ ১৬ রক্তপুষ্পকঃ ১৭ পিত্তারিঃ ১৮ কটুপত্রঃ ১৯ বক্রঃ ২০। অস্য গুণাঃ। শীতলত্বং। তিক্তত্বং। পিত্তশ্লেষ্মজ্বররক্তদাহারুচিগ্লানিমদভ্রমনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ *॥ পর্পটো বরতিক্তশ্চ স্মৃতঃ পর্পটকশ্চ সঃ। কথিতঃ পাংশুপর্য্যায়স্তথা কবচনামকঃ॥ পর্পটো হন্তি পিত্তাস্রভ্রমতৃষ্ণাকফজ্বরান্। সংগ্রাহী শীতলস্তিক্তো দাহনুদ্বাতলো লঘুঃ॥ ইতি ভাবপ্রকাশঃ॥ *॥ পিষ্টকভেদঃ। পাপর ইতি ভাষা। তস্য গুণঃ। লঘুত্বং। রূক্ষত্বঞ্চ। ইতি রাজবল্লভঃ॥ ধূমসীরচিতা হিঙ্গুহরিদ্রালবণৈর্যুতাঃ। জীরকস্বর্জিকাত্যাঞ্চ তনকৃত্য চ বেল্লিতাঃ॥ পর্পটাস্তে সদাঙ্গারভৃষ্টাঃ পরমরোচকাঃ। দীপনাঃ পাচনা রূক্ষা গুরবঃ কিঞ্চিদীরিতাঃ॥ মৌদ্গাশ্চ তদ্‌গুণাঃ প্রোক্তা বিশেষাল্লঘবো হিতাঃ। চণকস্য গুণৈর্যুক্তাঃ পর্পটাশ্চণকোদ্ভবাঃ॥ স্নেহে ভৃষ্টাস্তু তে সর্ব্বে ভবেয়ুর্মধ্যমা গুণৈঃ। ইতি ভাবপ্রকাশঃ॥

পর্পটক্রমঃ (পুং) কুম্ভীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

পর্পটী (স্ত্রী) সৌরাষ্ট্রমৃত্তিকা। ইতি রত্নমালা॥

পিষ্টকভেদঃ। ইত্যুণাদিকোষঃ॥ উত্তরদেশভবসুগন্ধিদ্রব্যং। পপরীতি প্রসিদ্ধং। পদ্মাবতীতি চ। তৎপর্য্যায়ঃ। রঞ্জনী ২ কৃষ্ণা ৩ জতুকা ৪ জননী ৫ জনী ৬ জতুকৃষ্ণা ৭ সংস্পর্শা ৮ জতুকৃৎ ৯ চক্রবর্ত্তিনী ১০। অস্যা গুণাঃ। তুবরত্বং। তিক্তত্বং। শিশিরত্বং। বর্ণকৃত্ত্ব। লঘুত্বং। বিষব্রণকণ্ডুকফপিত্তাস্রকুষ্ঠনাশিত্বঞ্চ। ইতি ভাবপ্রকাশঃ॥

পর্পরীকঃ (পুং) সূর্য্যঃ। ইত্যুণাদিকোষঃ॥ বহ্নিঃ। ইতি ত্রিকাণ্ডশেষঃ॥ জলাশয়ঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥

পর্পিকঃ (পুং স্ত্রী) খঞ্জঃ। পর্পেণ গচ্ছতীতি সিদ্ধান্তকৌমুদী॥

পর্ব্ব গতৌ। ইতি কবিকল্পদ্রুমঃ॥

পর্য্যঙ্কঃ (পুং) খট্বা। পালঙ্গ ইতি ভাষা। ইত্যমরঃ॥ তৎপর্য্যায়ঃ। পর্য্যস্তিকা ২ পরিকরঃ ৩ অবসক্থিকা ৪। ইতি হেমচন্দ্রঃ॥

পর্য্যঙ্কপাদিকা (স্ত্রী) কোলশিম্বী। ইতি রাজনির্ঘণ্টঃ॥

পর্য্যঙ্কবন্ধনং (ক্লী) বস্ত্রাদিনা পৃষ্ঠজানুজঙ্ঘাবন্ধনং। ফাঁড়্বাঁধা ইতি ভাষা। যথা। পাদপ্রসারণঞ্চাগ্রে তথা পর্য্যঙ্কবন্ধনং। ইত্যপরাধগণনায়াং হরিভক্তিবিলাসঃ॥

পর্য্যটনং (ক্লী) সর্ব্বতোভাবেনাটনং। পুনঃপুনর্গমনং। ভ্রমণং। তৎপর্য্যায়ঃ। ব্রজ্যা২ অটাট্যা ৩। ইত্যমরঃ॥

পর্য্যনুযোগঃ (পুং) জিজ্ঞাসা। ইতি হলায়ুধঃ॥

পর্য্যন্তঃ (পুং) শেষসীমা। ইতি দুর্গাদাসঃ॥

পর্য্যন্তভূঃ (স্ত্রী) নদীনগরপর্ব্বতাদেরুপান্তভূমিঃ। তৎপর্য্যায়ঃ। পরিসরঃ ২। ইত্যমরঃ॥

পর্য্যন্তিকা (স্ত্রী) গুণভ্রংশঃ। ইতি হারাবলী॥

পর্য্যন্যঃ (পুং) ইন্দ্রঃ। শব্দায়মানমেঘঃ। মেঘশব্দঃ। ইত্যুণাদিকোষঃ॥

পর্য্যয়ঃ (পুং) ক্রমোল্লঙ্ঘনং। ব্যতিক্রমঃ। শাস্ত্রতো লোকব্যবহারাচ্চ প্রাপ্তস্যার্থস্য পরিত্যাগঃ। তৎপর্য্যায়ঃ। অতিপাতঃ ২ উপাত্যয়ঃ ৩। ইত্যমরভরতৌ॥ বিপর্য্যয়ঃ৪ অত্যয়ঃ৫ অতিপতনং৬ ব্যত্যয়ঃ৭ অতিক্রমঃ ৮। ইতি শব্দরত্নাবলী॥

পর্য্যয়ণং (ক্লী) অশ্বসজ্জা। জিন্ ইতি ভাষা। ইতি শব্দমালা॥

পর্য্যবস্থা (স্ত্রী) বিরোধনং। ইত্যমরঃ॥

পর্য্যবস্থাতা [ঋ] (ত্রি) পর্য্যবস্থাকর্ত্তা। বিরোধী। ইতি হলায়ুধঃ॥

পর্য্যবস্থানং (স্ত্রী) বিরোধঃ। ইতি জটাধরঃ॥ সর্ব্বতোভাবেনাবস্থিতিশ্চ॥

পর্য্যস্তঃ (ত্রি) পতিতঃ। হতঃ। ইতি মেদিনী॥

পর্য্যস্তিকা (স্ত্রী) খট্বা। ইতি হেমচন্দ্রঃ॥

পর্য্যাণং (ক্লী) অশ্বপল্যয়নং। জিন্ ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

পর্য্যাপ্তং (ক্লী) যথেষ্টং। তৃপ্তিঃ। শক্তিঃ। নিবারণং। ইতি মেদিনী॥ প্রাপ্তৌ ত্রি॥

পর্য্যাপ্তিঃ (স্ত্রী) পরিত্রাণং। মারণোদ্যতস্য নিবারণং। ইত্যমরভরতৌ॥ প্রকাশঃ। প্রাপ্তিঃ। ইতি শব্দরত্নাবলী॥ স্বরূপ-

সম্বন্ধবিশেষঃ। স চ সর্ব্বেষামেব পদার্থানাং বিশিষ্টবুদ্ধিনিয়ামকঃ। পদার্থভেদেন নানা যথা। পর্য্যাপ্তিশ্চায়মেকো ঘট ইমৌ দ্বৌ ইত্যাদি প্রতীতিসাক্ষিকঃ স্বরূপসম্বন্ধবিশেষঃ। ইতি দীধিতিঃ॥ সমবায়েন গুণে গুণস্যাসত্ত্বেঽপি চত্বারো গুণা ইত্যাদি প্রতীত্যা গুণাদিষু সংখ্যাদিমত্ত্বনিয়ামকোঽপি তাদৃশসম্বন্ধঃ। ইতি সামান্যাভাবে জগদীশঃ॥ দ্বিতীয়ব্যুৎপত্তিবাদে গদাধরভট্টাচার্য্যশ্চ॥

পর্য্যায়ঃ (পুং) পর্য্যয়ণং। ক্রমঃ। তৎপর্য্যায়ঃ। আনুপূর্ব্বী ২ আবৃৎ ৩ পরিপাটী ৪ অনুক্রমঃ ৫। ইত্যমরঃ॥ আনুপূর্ব্ব্যং ৬ আনুপূর্ব্বং ৭ আনুপূর্ব্বকং ৮ পরিপাটিঃ৯। ইতি ভরতাদয়ঃ॥ প্রকারঃ। অবসরঃ। ইতি মেদিনী॥ নির্ম্মাণং। দ্রব্যধর্ম্মঃ। ইতি হেমচন্দ্রঃ॥ ক্রমেণৈকার্থবাচকাঃ শব্দাঃ পর্য্যায়াঃ। ইতি বিজয়রক্ষিতঃ॥ সম্পর্কবিশেষঃ। যেন সহ যৎসম্পর্কঃ সম্বন্ধস্তেন সহ তৎপর্য্যায়ঃ। যথা। সমানং কুলভাবঞ্চ দানাদানন্তথৈব চ। তয়োর্ব্বংশসমানং হি পর্য্যায়ঞ্চ প্রচক্ষতে॥ ইতি কুলদীপিকা॥

পর্য্যায়শয়নং (ক্লী) প্রহরিকাদীনাং ক্রমেণ শয়নং। তৎপর্য্যায়ঃ। উপশায়ঃ ২ বিশায়ঃ ৩। ইত্যমরভরতৌ॥

পর্য্যাসঃ (পুং) পতনং। হননং। ইতি পর্য্যস্তশব্দার্থদর্শনাৎ॥

পর্য্যুদঞ্চনং (ক্লী) ঋণং। ইত্যমরঃ॥

পর্য্যুদস্তঃ (ত্রি) পর্য্যুদাসবিশিষ্টঃ। বিধ্যন্বয়িভেদাত্মকনঞর্থযুক্তঃ। যথা। যদ্যপি পর্য্যুদস্তরাত্র্যাদিষু শ্রাদ্ধাদিকরণে বিধেরৌদাসীন্যান্ন ফলং ন বা প্রত্যবায় ইতি সিদ্ধান্তঃ। ইতি মলমাসতত্ত্বং॥

পর্য্যুদাসঃ (পুং) পরি সর্ব্বতোভাবেন উদাস্যতে বিধির্যত্র সঃ। ইতি ব্যুৎপত্তিঃ। তস্য লক্ষণং। সামান্যশাস্ত্রপ্রাপ্তনিষেধস্যৈব পর্য্যুদাসত্বং। ইতি শ্রাদ্ধবিবেকঃ॥ অপি চ। প্রাধান্যন্তু বিধের্যত্র প্রতিষেধেঽপ্রধানতা। পর্য্যুদাসঃ স বিজ্ঞেয়ো যত্রোত্তরপদেন নঞ্॥ ইতি মলমাসতত্ত্বং॥ অস্যোদাহরণং। অমাবস্যায়াং পিতৃভ্যো দদ্যাৎ রাত্রৌ শ্রাদ্ধং ন কুর্ব্বীত। অত্র শ্রাদ্ধকরণে রাত্রেঃ পর্য্যুদাসঃ॥

পর্য্যুষিতং (ত্রি) ব্যুষ্টং। বাসি ইতি ভাষা। তস্যাভক্ষণীয়ত্বং যথা। ভক্তং পর্য্যুষিতোচ্ছিষ্টং শ্বস্পৃষ্টং পতিতেক্ষিতং। উদক্যাস্পৃষ্টসংঘৃষ্টং পর্য্যায়াপ্তঞ্চ বর্জ্জয়েৎ॥ ইতি গরুড়পুরাণং॥ যাতযামং গতরসং পূতিপর্য্যুষিতঞ্চ যৎ। উচ্ছিষ্টমপি চামেধ্যং ভোজনং তামসপ্রিয়ং॥ ইতি ভগবদ্গীতা॥ *॥ তস্য ভক্ষ্যত্বং যথা। মন্ত্রাভিমন্ত্রিতং শস্তং ন চ পর্য্যুষিতং নৃপ। অন্যত্র ফলমাংসেভ্যঃ শুষ্কশাকাদিকাত্তথা॥ তন্বদ্বাদরিকেভ্যশ্চ গুড়পক্বেভ্য এব চ॥ ইত্যাহ্নিকতত্ত্বং॥ তুলসীযুক্তপুষ্পে পর্য্যুসিতদোষাভাবো যথা। তুলসীলগ্নপুষ্পাণি পদ্মং গঙ্গোদকং কুশাঃ। ন পর্য্যুষিতদোষোঽত্র ছিন্নভিন্নং ন দুষ্যতি॥ ইতি পুরাণং॥

পর্য্যুষিতভোজী [ন্] (ত্রি) বৃষ্টদ্রব্য-ভোক্তা। ইতি কলাপব্যাকরণং ॥

পর্য্যেষণা (স্ত্রী) অন্বেষণা। ইত্যমরঃ ॥ তর্কাদিনা যথাবোধিতধর্ম্মাদ্যন্বেষণে। অন্বেষণমাত্রেঽপি। ইতি ভরতঃ ॥

পর্ব্ব গতৌ। পর্ব্বতি। ইতি দুর্গাদাসঃ ॥

পর্ব্ব পূর্ত্তৌ। ইতি কবিকল্পদ্রুমঃ ॥ পর্ব্বতি পয়সা কুম্ভং চেটী। ইতি দুর্গাদাসঃ ॥

পর্ব্ব [ন্] (ক্লী) মহঃ। গ্রন্থিঃ। প্রস্তাবঃ। লক্ষণান্তরং। দর্শপ্রতিপদোঃ সন্ধিঃ। বিষুবৎপ্রভৃতি। ইতি মেদিনী ॥ গ্রন্থবিচ্ছেদঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ ক্ষণঃ। ইতি শব্দচন্দ্রিকা ॥ * ॥ পঞ্চপর্ব্বাণি যথা। বিষ্ণুপুরাণং। চতুর্দ্দশ্যষ্টমী চৈব অমাবাস্যাথ পূর্ণিমা। পর্ব্বাণ্যেতানি রাজেন্দ্র রবিসংক্রান্তিরেব চ ॥ স্ত্রীতৈলমাংসসম্ভোগী পর্ব্বস্বেতেষু বৈ পুমান্। বিণ্মূত্রভোজনং নাম প্রয়াতি নরকং মৃতঃ ॥ পর্ব্বসু কর্ত্তব্যাকর্ত্তব্যানি যথা। ব্রহ্মপুরাণে। নিত্যং দ্বয়োরয়নয়োর্নিত্যং বিষুবতোর্দ্বয়োঃ। চন্দ্রার্কয়োর্গ্রহণয়োর্ব্যতীপাতেষু পর্ব্বসু ॥ অহোরাত্রোষিতঃ স্নানং শ্রাদ্ধং দানং তথা জপং। যঃ করোতি প্রসন্নাত্মা তস্য স্যাদক্ষয়ঞ্চ তৎ ॥ পরাশরভাষ্যে কূর্ম্মপুরাণং। অনধ্যায়স্তু নাঙ্গেষু নেতিহাসপুরাণয়োঃ। ন ধর্ম্মশাস্ত্রেষন্যেষু পর্ব্বস্বেতানি বর্জ্জয়েৎ ॥ পৈঠীনসিঃ। ন পর্ব্বসু তৈলং ক্ষৌরং মাংসমভ্যুপেয়াৎ নামাবস্থায়াং হরিতমপি ছিন্দ্যাৎ। ইতি তিথ্যাদিতত্ত্বং ॥

পর্ব্বকং (ক্লী) উরুপর্ব্ব। আঁটু ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥

পর্ব্বকারী [ন্] (পুং) ধনাদিলোভেনাপর্ব্বসু অমাবাস্যাক্রিয়াপ্রবর্ত্তকঃ। যথা। সূচী মাহিষকশ্চৈব পর্ব্বকারী চ যো দ্বিজঃ। ইতি বিষ্ণুপুরাণে দ্বিতীয়াংশে ৬ অধ্যায়ঃ ॥

পর্ব্বগামী [ন্] (পুং) পর্ব্বসু স্ত্রীগামী। ইতি পূর্ব্বোক্তশ্লোকে পর্ব্বকারীত্যত্র পর্ব্বগামীতি পাঠদ্বৈধে স্বামী ॥

পর্ব্বতঃ (পুং) পর্ব্বণি ভাগাঃ সন্ত্যত্র। পাহাড় ইতি ভাষা। তৎপর্য্যায়ঃ। মহীধ্রঃ ২ শিখরী ৩ ক্ষ্মাভৃৎ ৪ অহার্য্যঃ ৫ ধরঃ ৬ অদ্রিঃ ৭ গোত্রঃ ৮ গিরিঃ ৯ গ্রাবা ১০ অচলঃ ১১ শৈলঃ ১২ শিলোচ্চয়ঃ ১৩। ইত্যমরঃ ॥ স্থাবরঃ ১৪ সানুমান্ ১৫ পৃথুশেখরঃ ১৬ ধরণীকীলকঃ ১৭ কুট্টারঃ ১৮ জীমূতঃ ১৯ ধাতুভৃৎ ২০ ভূধরঃ ২১ স্থিরঃ ২২ কুলীরঃ ২৩ কটকী ২৪ শৃঙ্গী ২৫ নির্ঝরী ২৬ অগঃ ২৭ নগঃ ২৮ দন্তী ২৯। ইতি শব্দরত্নাবলী ॥ ধরণীধ্রঃ ৩০ ভূভৃৎ ৩১ ক্ষিতিভৃৎ ৩২ অবনীধরঃ ৩৩ কুধরঃ ৩৪ ধরাধরঃ ৩৫ প্রস্থবান্ ৩৬ বৃক্ষবান্ ৩৭। ইতি রাজনির্ঘণ্টঃ ॥ * ॥ সুমেরোঃ পূর্ব্বে পর্ব্বতা যথা। শীতান্তশ্চক্রমুঞ্জশ্চ কুলীরোঽথ কঙ্কবান্। মণিশৈলোঽথ বৃষবান্ মহানীলো ভবাচলঃ ॥ সুবিন্দুর্মন্দরো বেণুঃ সুমেঘো নিমিষস্তথা। দেবশৈলস্য পূর্ব্বেণ মন্দরস্য মহাচলাঃ ॥ * ॥ সুমেরোর্দক্ষিণে পর্ব্বতা যথা। ত্রিকূটঃ শিখরাদ্রিশ্চ কলিঙ্গোঽথ পতঙ্গকঃ। রুচকঃ

সানুমাংশ্চৈব তাম্রকোঽথ বিশাখবান্॥ শ্বেতোদরঃ সমলশ্চ বসুধারশ্চ রত্নবান্। একশৃঙ্গো মহাশৈলো গজশৈলঃ পিশাচকঃ॥ পঞ্চশৈলোঽথ কৈলাসো হিমবাংশ্চাচলোত্তমঃ। ইত্যেতে দক্ষিণে পার্শ্বে মেরোঃ প্রোক্তা মহাচলাঃ॥ *॥ সুমেরোঃ পশ্চিমে পর্ব্বতা যথা। সুচক্ষুঃ শিশিরশ্চৈব বৈদূর্য্যঃ পিঙ্গলস্তথা। পিঞ্জরোঽথ তথা ভদ্রঃ সুরসঃ কপিলো মধুঃ॥ অঞ্জনঃ কুক্কুটঃ কৃষ্ণঃ পাণ্ডুরশ্চাচলোত্তমঃ। সহস্রশিখরশ্চাদ্রিঃ পারিপাত্রঃ স শৃঙ্গবান্॥ পশ্চিমেন তথা মেরোর্বিষ্কম্ভাৎ পশ্চিমাদ্‌বহিঃ। এতেঽচলাঃ সমাখ্যাতাঃ শৃণুষ্বাতস্তথোত্তরান্॥ *॥ মেরোরুত্তরে পর্ব্বতা যথা॥ শঙ্খকূটোঽথ ঋষভো হংসনাভো তথাচলো। কপিলেন্দ্রস্তথা শৈলঃ সানুমান্নীল এব চ। শতশৃঙ্গঃ স্বর্ণশৃঙ্গঃ তুন্নাকো মেঘপর্ব্বতঃ॥ বিরাজাখ্যো বরাহাদ্রির্ময়ূরো রুচিরস্তথা। ইত্যেতে কথিতা ব্রহ্মন্মেরোরুত্তরতো নগাঃ॥ ইতি মার্কণ্ডেয়পুরাণং॥ *॥ সপ্তকুলপর্ব্বতাদি যথা। সপ্ত যেঽস্মিন্ মহাপর্ব্বা বিস্তৃতাঃ কুলপর্ব্বতাঃ। মহেন্দ্রো মলয়ঃ সহ্যঃ শুক্তিমানৃক্ষমানপি॥ বিন্ধ্যশ্চ পারিপাত্রশ্চ ইত্যেতে কুলপর্ব্বতাঃ। তেষাং সহস্রশশ্চান্যে পর্ব্বতাস্তু সমীপতঃ॥ অবিজ্ঞাতাঃ পর্ব্ববন্তো বিপুলাশ্চিত্রসানবঃ। অন্যে তেভ্যোঽপরিজ্ঞাতা হ্রস্বাঃ স্বল্পোপজীবিনঃ॥ তৈর্বিমিশ্রা জনপদা আর্য্যা ম্লেচ্ছাশ্চ সর্ব্বশঃ। ইতি মাৎস্যে ৯৫ অধ্যায়ঃ॥ *॥ বিংশতিঃ শ্রেষ্ঠপর্ব্বতা যথা। হিমবান্ হেমকূটশ্চ নিষধো নীলপর্ব্বতঃ। শ্বেতশ্চ শৃঙ্গবান্ মেরুর্মাল্যবান্ গন্ধমাদনঃ॥ মহেন্দ্রো মলয়ঃ সহ্যঃ শুক্তিমানৃক্ষমানপি। বিন্ধ্যশ্চ পারিপাত্রশ্চ কৈলাসো মন্দরস্তথা॥ লোকালোকো মহাংস্তেষু তথৈবোত্তরমানসঃ। এতে বিংশতির্বিখ্যাতাঃ পর্ব্বতাস্তেষু বরাঃ॥ *॥ জম্বুদ্বীপবর্ষবিভাজকপর্ব্বতা যথা। লঙ্কাদেশাদ্ধিমগিরিরুদক্ হেমকূটশ্চ তস্মাত্তস্মাচ্চান্যো নিষধ ইতি তে সিন্ধুপর্য্যন্তদৈর্ঘ্যাঃ। এবং সিদ্ধাড়দগপি পুরাচ্ছৃঙ্গবচ্ছুক্লনীলা বর্ষাণ্যেষাং জগুরিহ বুধা অন্তরে দ্রোণিদেশান্॥ ইতি সিদ্ধান্তশিরোমণিঃ॥ *॥ পর্ব্বতানাং পক্ষোৎপত্তির্যথা। ততোঽদ্রয়ো জাতপক্ষা বিষ্ণোশ্চৈব তু মায়য়া। প্রস্থিতা মেদিনীং ত্যক্ত্বা যথাপূর্ব্বং নিবেশিতাঃ॥ তৎ স্থানমসুরাণাস্তু ধাত্রাদিষ্টং জলার্ণবে। প্রতীচ্যাং পর্ব্বতাঃ সর্ব্বে নিমমজ্জুর্যথা গজাঃ॥ তত্রাসুরেভ্যঃ শংসুস্তে আধিপত্যং সুরাশ্রয়ং। তচ্ছ্রুত্বৈবাসুরাঃ সর্ব্বে চক্রুরুদ্যোগমুত্তমং॥ *॥ যুদ্ধজয়ানন্তরং তেষাং পক্ষচ্ছেদো যথা। ধরণ্যাস্তু গিরীন্ স্থাপ্য স্বেষু স্থানেষু গোঃপতিঃ। চিচ্ছেদ পবিনা পক্ষান্ সর্ব্বেষাং ভুবিচারিণাং॥ একঃ সপক্ষো মৈনাকঃ সুরৈস্তৎসময়ে কৃতঃ॥ ইত্যগ্নিপুরাণং॥ *॥ পর্ব্বতানাং স্থাবরজঙ্গমরূপে যথা। নদ্যশ্চ পর্ব্বতাঃ সর্ব্বে দ্বিরূপাশ্চ স্বভাবতঃ। তোয়ং

নদীনাং রূপস্তু শরীরমপরস্তথা। স্থাবরং পর্ব্বতানান্তু রূপং কায়স্তথাপরঃ। শুক্তীনামথ কম্বূনাং তথৈবান্তর্গতা তনুঃ॥ বহিরস্থিস্বরূপস্তু সর্ব্বদৈব প্রবর্ত্ততে। এবং জলং স্থাবরশ্চ নদীপর্ব্বতয়োস্তথা॥ অন্তর্ব্বসতি কায়স্তু সততং নোপপদ্যতে। আপ্যায্যতে স্থাবরেণ শরীরং পর্ব্বতস্য তু ॥ তথা নদীনাং কায়স্তু তোয়েনাপ্যায্যতে সদা। নদীনাং কামরূপিত্বং পর্ব্বতানান্তথৈব চ॥ জগৎস্থিত্যোঃ পুরা বিষ্ণুঃ কল্পয়ামাস যত্নতঃ। তোয়হানৌ নদীদুঃখঞ্জায়তে সততন্দ্বিজাঃ॥ বিশীর্ণে স্থাবরে দুঃখং জায়তে গিরিকায়গং। ইতি কালিকাপুরাণে ২২ অধ্যায়ঃ॥ * ॥ অতঃ পরং পর্ব্বতেষু দেবানামবকাশা বর্ণ্যন্তে। তত্র যোঽসৌ শান্তাখ্যঃ পর্ব্বতস্তস্যোপরি মহেন্দ্রস্য ক্রীড়াস্থানং তত্র দেবরাজস্য পারিজাতকবৃক্ষবনং। তস্য পূর্ব্বপার্শ্বে কুঞ্জরো নাম গিরিঃ তস্যোপরি দানবানামষ্টৌ পুরাণি চ। তথা বজ্রকেতুপর্ব্বতে রাক্ষসানামনেকানি পুরাণি তে চ নাম্না নীলকাঃ কামরূপিণঃ মহানীলে চ শৈলেন্দ্রে পুরাণি পঞ্চদশ সহস্রাণি কিন্নরাণাং খ্যাতানি তত্র দেবতাশ্চন্দ্রাদয়ো রাজানঃ পঞ্চদশ কিন্নরাণাং গর্ব্বিতাঃ তানি সৌবর্ণানি বিলপ্রবেশনানি চ পুরাণি চন্দ্রোদয়ে চ পর্ব্বতবরে নাগানামধিবাসঃ তে চ বিলপ্রবেশাসেবিতেষু বৈনতেয়বিষয়াবর্ত্তিনো ব্যবস্থিতানুরাগে চ দানবেন্দ্রা ব্যবস্থিতা বেণুবত্যপি বিদ্যাধরপুরত্রয়ং ত্রিংশদ্যোজনশতবিস্তীর্ণমেকৈকং তাবদায়তং উলূকরোমসমমহাবেত্রাদয়শ্চ রাজানো বিদ্যাধরাণাঞ্চ একৈকেন্ত শৈলরাজনি স্বয়মেব গরুড়ো ব্যবস্থিতঃ। কুঞ্জরে তু পর্ব্বতবরে নিত্যং পশুপতিঃ স্থিতঃ বৃষভাঙ্কো মহাদেবঃ শঙ্করো যোগিনাং প্রভুঃ অনেকগুণভূতকোটিসহস্রপরিবারো ভগবানাদিপুরুষো ব্যবস্থিতঃ। বসুধারে চায়ুষ্মতাং বসূনাঞ্চ সমাবাসঃ বসুধাররত্নধারয়োর্মূর্দ্ধ্নি অষ্টৌ সপ্ত চ সংখ্যয়া পুরাণি বসুসপ্তর্ষীণাঞ্চ। একশৃঙ্গে চ পর্ব্বতোত্তমে প্রজাপতেঃ স্থানং চতুর্ব্বক্ত্রস্য ব্রহ্মণঃ। গজপর্ব্বতে চ মহাভূতপরিবৃতা স্বয়মেব ভগবতী তিষ্ঠতি। বসুধারে চ পর্ব্বতবরে মুনিসিদ্ধবিদ্যাধরাণামায়তনং চতুরশীত্যপরপূর্য্যো মহাপ্রাকারতোরণাঃ তত্র চানেকপর্ব্বতা নাম গন্ধর্ব্বা যুদ্ধশালিনো বসন্তি তেষাঞ্চাধিপতির্দেবো রাজরাজৈকপিঙ্গলঃ। সুররাক্ষসাঃ পঞ্চকূটে দানবাঃ শতশৃঙ্গে যক্ষাণাং পুরশতং। প্রভেদকস্য পশ্চিমেন দেবদানবসিদ্ধাদীনাং পুরাণি তস্য গিরের্মূর্দ্ধ্নি মহতী সোমশিলা তিষ্ঠতি তস্যাঞ্চ পর্ব্বণি পর্ব্বণি সোমঃ স্বয়মেবাবতরতি। তস্যৈবোত্তরপার্শ্বে ত্রিকূটং নাম তত্র ব্রহ্মা তিষ্ঠতি ক্বচিত্তত্র চ বহ্ন্যায়তনং তত্র মূর্ত্তিমান্ বহ্নিরুপাস্যতে দেবৈঃ। উত্তরে চ শৃঙ্গাক্ষে পর্ব্বতবরে দেবতানামায়তনানি পূর্ব্বেণ নারায়ণস্যায়তনং মধ্যে ব্রহ্মণঃ শঙ্করস্য চ পশ্চিমে তত্র যক্ষাদীনাং কানিচিৎ পুরাণি। তস্য চোত্তর-

তীরে জাতুচ্ছমহাপর্ব্বতে ত্রিংশদেযাজন-মণ্ডলং নন্দজং নাম সরস্তত্র নন্দো নাম নাগরাজো বসতি শতশীর্ষঃ প্রচণ্ড ইতি। ইত্যেতেঽষ্টৌ দেবপর্ব্বতা বিজ্ঞেয়াঃ। তেনানুক্রমেণ হেমরজতরত্নবৈদূর্য্যমনঃশিলাদিবর্ণাঃ। ইয়ঞ্চ পৃথ্বী লক্ষকোটিশতানেকসংখ্যাতা পূর্ণা তেষু চ সিদ্ধবিদ্যাধরাণাং নিলয়াঃ। তদ্‌যথা মেরোঃ পার্শ্বতঃ কেশরবলয়ালবালং সিদ্ধলোকেতি কীর্ত্ত্যতে ইয়ঞ্চ পৃথ্বী পদ্মাকারেণ ব্যবস্থিতা এষ সর্ব্বপুরাণেষু ক্রমঃ সামান্যঃ প্রতিপাদ্যতে। ইতি বরাহপুরাণং ॥ * ॥ হিমালয়াদিপর্ব্বতবাসিনো যথা। রক্ষঃপিশাচা যক্ষাশ্চ সর্ব্বে হৈমবতাস্তু তে। হেমকূটে তু গন্ধর্ব্বা বিজ্ঞেয়াশ্চাপ্সরোগণাঃ ॥ সর্ব্বে নাগাশ্চ নিষধে শেষবাসুকিতক্ষকাঃ। মহামেরৌ ত্রয়স্ত্রিংশৎ ক্রীড়ন্তে যাজ্ঞিকাঃ সুরাঃ ॥ নীলে তু বৈদূর্য্যময়ে সিদ্ধা ব্রহ্মর্ষয়োঽবসন্ ॥ দৈত্যানান্দানবানাঞ্চ শ্বেতপর্ব্বত উচ্যতে। শৃঙ্গবান্ পর্ব্বতশ্রেষ্ঠঃ পিতৄণাং প্রতিসঞ্চরঃ ॥ ইত্যেতানি ময়োক্তানি নব বর্ষাণি ভাগশঃ। ইতি মাৎস্যে ৯৫ অধ্যায়ঃ ॥ * ॥ অথ পর্ব্বতনদীজলগুণাঃ। হিমবৎপ্রভবা যাশ্চ জলং তাস্বমৃতোপমং। পারিপাত্রভবা যাশ্চ বিন্ধ্যর্ক্ষপ্রভবাশ্চ যাঃ ॥ শিরোহৃদ্রোগকুষ্ঠানাং তা হেতুঃ শ্লীপদস্য চ। চন্দ্রার্ককরসংস্পৃষ্টং বায়ুনাস্ফালিতং মুহুঃ ॥ পর্ব্বতোপরি যদ্বারি সমং পৌরন্দরেণ তৎ। তস্যানুগুণমুদ্দিষ্টং শৈলপ্রস্রবণোদ্ভবং ॥ লেখনং দীপনং রূক্ষং কিঞ্চিদ্বাতপ্রকোপণং। ইতি রাজবল্লভঃ ॥ * ॥ পর্ব্বতে বর্ণনীয়ানি যথা। শৈলে মেঘৌষধীধাতুবংশকিন্নরনির্ঝরাঃ। শৃঙ্গপাদগুহারত্নবনজীবাদ্যুপত্যকাঃ ॥ ইতি কবিকল্পলতা ॥ * ॥ অথ কৈলাসপর্ব্বতবর্ণনং। মধ্যে হিমবতঃ পৃষ্ঠে কৈলাসো নাম পর্ব্বতঃ। তস্মিন্নিধিপতিঃ শ্রীমান্ কুবেরঃ সহ রাক্ষসৈঃ ॥ অপ্সরঃসহিতো রাজা মোদতে হ্যলকাধিপঃ। কৈলাসপাদসম্ভূতং পুণ্যং শীতজলং শুভং ॥ মন্দোদকং নাম সরঃ পয়স্তু দধিসন্নিভং। তস্মাৎ প্রভবতে দিব্যা নদী মন্দাকিনী শুভা ॥ দিব্যঞ্চ চন্দনন্তত্র তস্যাস্তীরে মহদ্বনং। প্রাগুত্তরেণ কৈলাসং দিব্যং সৌগন্ধিকং গিরিং ॥ সর্ব্বধাতুময়ং দিব্যং শবলং পর্ব্বতং প্রতি। চন্দ্রপ্রভো নাম গিরিঃ শুশুভে রত্নসন্নিভঃ ॥ তৎসমীপে সরো দিব্যমচ্ছোদন্নাম বিশ্রুতং। তস্মাৎ প্রভবতে দিব্যা নদী হ্যচ্ছোদকা শুভা ॥ তস্যাস্তীরে বনং দিব্যং মহচ্চৈত্ররথং শুভং। তস্মিন্ গিরৌ নিবসতি মণিভদ্রঃ সহানুগঃ ॥ যক্ষসেনাপতিঃ ক্রূরৈর্গুহ্যকৈঃ পরিবারিতঃ। পুণ্যা মন্দাকিনী চৈব নদী হ্যচ্ছোদকা শুভা ॥ মহীমণ্ডলমধ্যে তু প্রবিষ্টা তু মহোদধিং। * । কৈলাসাদ্দক্ষিণপ্রাচ্যাং শিবং সর্ব্বৌষধিং গিরিং ॥ মনঃশিলাময়ং দিব্যং শবলং পর্ব্বতং প্রতি। লোহিতো হেমশৃঙ্গস্তু গিরিঃ সূর্য্যপ্রভো মহান্ ॥ তস্য পাদে মহদ্দিব্যং

লোহিতং সুমহৎ সরঃ। তস্মাৎ প্রভবতে পুণ্যো লোহিতশ্চ নদো মহান্॥ দেবারণ্যং বিশোকঞ্চ তস্য তীরে মহদ্বনং। তস্মিন্ গিরৌ নিবসতি যক্ষো মণিধরো বলী॥ সৌম্যৈঃ সধার্ম্মিকৈশ্চৈব গুহ্যকৈঃ পরিবারিতঃ। *। কৈলাসাৎ পশ্চিমোদীচ্যাং ককুদ্মানোষধীগিরিঃ॥ ককুদ্মতি চ রুদ্রস্য চোৎপত্তিস্ত্রিককুদ্মিনঃ। তদঞ্জনং ত্রৈককুদং শৈলং ত্রিককুদং প্রতি॥ সর্ব্বধাতুময়স্তত্র সুমহদ্বৈদ্যুতো গিরিঃ। তস্য পাদে মহদ্দিব্যং মানসং সিদ্ধসেবিতং॥ তস্মাৎ প্রভবতে পুণ্যা সরযূর্লোকপাবনী। তস্যাস্তীরে বনং দিব্যং বৈভ্রাজন্নাম বিশ্রুতং॥ কুবেরানুচরস্তস্মিন্ প্রহেতি তনয়ো বলী। নাম্না বৈ ব্রহ্মধামেতি রাক্ষসোঽনন্তবিক্রমঃ॥ *॥ কৈলাসাৎ পশ্চিমামাশাং দিব্যঃ সর্বৌষধিগিরিঃ। অরুণঃ পর্ব্বতশ্রেষ্ঠো রুক্মধাতুবিভূষিতঃ॥ ভবস্য দয়িতঃ শ্রীমান্ পর্ব্বতো হেমসন্নিভঃ। শাতকৌম্ভময়ৈর্দ্দিব্যৈঃ শিলাজালৈঃ সমন্ততঃ॥ শতসংখ্যৈস্তাপনীয়ৈঃ শৃঙ্গৈর্দ্দিবমিবোল্লিখন্। যুক্তবান্ সুমহদ্দিব্যৈর্দুর্গশৈলো মহোচ্ছ্রিতঃ॥ তস্মিন্ গিরৌ নিবসতি গিরীশো ধূম্রলোহিতঃ। তস্য পাদে মহদ্দিব্যং সরঃ কাঞ্চনবালুকং॥ তস্য পাদাৎ প্রভবতি শৈলোদং নাম তৎ সরঃ। তস্মাৎ প্রভবতে পুণ্যা নদী শৈলোদকা শুভা॥ সা বঙ্‌ক্ষুশীতয়োর্মধ্যে প্রবিষ্টা পশ্চিমোদধিং। *। অভ্যন্তরেণ কৈলাসং শিবং সর্ব্বৌষধিং গিরিং॥ গৌরস্তু পর্ব্বতশ্রেষ্ঠঃ হরিতালময়ং প্রতি। হিরণ্যশৃঙ্গঃ সুমহান্ দিব্যৌষধিময়ো গিরিঃ॥ তস্য পাদে মহদ্দিব্যং সরঃ কাঞ্চনবালুকং। রম্যং বিন্দুসরো নাম যত্র রাজা ভগীরথঃ॥ গঙ্গার্থে স তু রাজর্ষিরুবাস বহুলাঃ সমাঃ। দিবং যাস্যন্তি মে পূর্ব্বে গঙ্গাতোয়পরিপ্লুতাঃ॥ তত্র ত্রিপথগা দেবী প্রথমন্তু প্রতিষ্ঠিতা। ইতি মাৎস্যে ১০১ অধ্যায়ঃ॥*॥*॥ অথ দশধা কৃত্রিমপর্ব্বতদানং। প্রথমো ধান্যশৈলঃ স্যাদ্দ্বিতীয়ো লবণাচলঃ। গুড়াচলস্তৃতীয়স্তু চতুর্থো হেমপর্ব্বতঃ॥ পঞ্চমস্তিলশৈলঃ স্যাৎ ষষ্ঠঃ কার্পাসপর্ব্বতঃ। সপ্তমো ঘৃতশৈলশ্চ রত্নশৈলস্তথাষ্টমঃ॥ রাজতো নবমস্তদ্বদ্দশমঃ শর্করাচলঃ। বক্ষ্যে বিধানমেতেষাং যথাবদনুপূর্ব্বশঃ॥ অয়নে বিষুবে পুণ্যে ব্যতীপাতে দিনক্ষয়ে। শুক্লপক্ষে তৃতীয়ায়ামুপরাগে শশিক্ষয়ে॥ বিবাহোৎসবযজ্ঞেষু দ্বাদশ্যামথবা পুনঃ। শুক্লায়াং পঞ্চদশ্যাং বা পুষ্যর্ক্ষে বা বিধানতঃ॥ ধান্যশৈলাদয়ো দেয়া যথাশাস্ত্রং বিজানতা। *। তীর্থে বায়তনে বাপি গোষ্ঠে বা ভবনাঙ্গনে॥ মণ্ডপং কারয়েদ্ভক্ত্যা চতুরস্রমুদঙ্মুখং। প্রাগুদক্প্লবনঞ্চৈব প্রাঙ্মুখং বা বিধানতঃ॥ গোময়েনানুলিপ্তায়াং ভূমাবাস্তীর্য্য বৈ কুশান্। তন্মধ্যে পর্ব্বতং কুর্য্যাদ্বিষ্কম্ভপর্ব্বতান্বিতং॥ ধান্যদ্রোণসহস্রেণ ভবেদ্গিরিরিহোত্তমঃ। মধ্যমঃ পঞ্চশতিকঃ কনিষ্ঠঃ স্যাত্ত্রিভিঃ শতৈঃ॥ মেরুর্মহাব্রীহিময়স্তু

মধ্যে স্বর্ণবৃক্ষত্রয়সংযুতঃ স্যাৎ। পূর্ব্বেণ মুক্তাফলবজ্রযুক্তো যাম্যেন গোমেদক-পুষ্পরাগৈঃ॥ পশ্চাচ্চ গারুত্মতনীলরত্নৈঃ সৌম্যেন বৈদূর্য্যসরোজরাগৈঃ। শ্রীখণ্ড-খণ্ডৈরভিতঃ প্রবাললতান্বিতঃ শুক্তিশিলা-তলঃ স্যাৎ॥ ব্রহ্মাথ বিষ্ণুর্ভগবান্ মুরারি-র্দিবাকরোঽপ্যত্র হিরণ্ময়ঃ স্যাৎ। মূর্দ্ধন্যব-স্থানমমৎসরেণ কার্য্যস্ত্বনেকে চ পুন-র্দ্বিজাঃ॥ চত্বারি শৃঙ্গাণি চ রাজতানি নিতম্ব-ভাগেষ্বপি রাজতঃ স্যাৎ। তথেক্ষুবংশা-বৃতকন্দরস্তু ঘৃতোদকপ্রস্রবণশ্চ দিক্ষু॥ শুক্লাম্বরাণ্যম্বুধরাবলী স্যাৎ পূর্ব্বেণ নীলানি চ দক্ষিণেন। বাসাংসি পশ্চাদথ কর্ব্বুরাণি রক্তানি চৈবোত্তরতো ঘনালী॥ রৌপ্যান্মহেন্দ্রপ্রমুখানথাষ্টৌ সংস্থাপ্য লোকাধিপতীন্ ক্রমেণ। নানাফলালী চ সমন্ততঃ স্যান্মনোরমং মাল্যবিলেপনঞ্চ॥ বিতানকঞ্চোপরি পঞ্চবর্ণমম্লানপুষ্পাভরণং সিতং বা। ইত্থং নিবেশ্যামরশৈলমগ্র্য-মতস্তু বিষ্কম্ভগিরীন্ ক্রমেণ॥ তুরীয়-ভাগেন চতুর্দ্দিশঞ্চ সংস্থাপয়েৎ পুষ্প-বিলেপনাঢ্যান্। পূর্ব্বেণ মন্দরমনেক-ফলাবলীভির্যুক্তং যবৈঃ কনকভদ্রকদম্ব-চিহ্নং॥ কামেন কাঞ্চনময়েন বিরাজমান-মাকারয়েৎ কুসুমবস্ত্রবিলেপনাঢ্যং। ক্ষীরা-রুণোদসরসাথ বনেন চৈব রৌপ্যেণ শক্তিঘটিতেন বিরাজমানং॥ যাম্যেন গন্ধমদনশ্চ নিবেশনীয়ো গোধূমসঞ্চয়ময়ঃ কলধৌতজো বা। হৈমেন যক্ষপতিনা হৃতমানসেন বস্ত্রৈশ্চ রাজতবনেন চ সংযুতঃ স্যাৎ॥ পশ্চাত্তিলাচলমনেকসুগন্ধি-পুষ্পং সৌবর্ণপিপ্পলহিরণ্ময়হংসযুক্তং। আকারয়েদ্রজতপুষ্পবনেন তদ্বদ্বস্ত্রান্বিতং দধিসিতোদসরস্তথাগ্রে॥ সংস্থাপ্য তং বিপুলশৈলমথোত্তরেণ শৈলং সুপার্শ্বমপি তাম্রময়ং সুবস্ত্রং। পুষ্পৈশ্চ হেমবট-পাদপশেখরন্তমাকারয়েৎ কনকধেনুবি-রাজমানং॥ মাক্ষীকভদ্রসরসা চ বনেন তদ্বদ্রৌপ্যেণ ভাস্বরবতা চ যুতং বিধায়। হোমশ্চতুর্ভিরথ বেদপুরাণবিদ্ভির্দান্তৈ-রনিন্দ্যচরিতাকৃতিভির্দ্বিজেন্দ্রৈঃ॥ পূর্ব্বেণ হস্তমিতমত্র বিধায় কুণ্ডং কার্য্যস্তিলৈর্যব-ঘৃতেন সমিৎকুশৈশ্চ। রাত্রৌ চ জাগর-মনুদ্ধতগীততূর্য্যৈরাবাহনঞ্চ কথয়ামি শিলোচ্চয়ানাং॥ ত্বং সর্ব্বদেবগণধামনিধে বিরুদ্ধমস্মদ্গৃহেষ্বমরপর্ব্বত নাশয়াশু। ক্ষেমং বিধৎস্ব কুরু শান্তিমনুত্তমাং নঃ সংপূজিতঃ পরমভক্তিমতা ময়া হি॥ ত্বমেব ভগবানীশো ব্রহ্মা বিষ্ণুর্দিবাকরঃ। মূর্ত্তামূর্ত্তজগদ্বীজস্ত্বং নঃ পাহি সনাতনঃ যস্মাত্ত্বং লোকপালানাং বিশ্বমূর্ত্তেশ্চ মন্দিরং। রুদ্রাদিত্যবসূনাঞ্চ তস্মাচ্ছান্তিং প্রযচ্ছ মে॥ যস্মাদশূন্যমমরৈর্নারীভিশ্চ শিরস্তব। তস্মান্মামুদ্ধরাশেষদুঃখসংসার-সাগরাৎ॥ এবমভ্যর্চ্চ্য তং মেরুং মন্দর-ঞ্চাভিপূজয়েৎ। যস্মাচ্চৈত্ররথেন ত্বং ভদ্রাশ্বে চ বিশেষতঃ। শোভসে মন্দর ক্ষিপ্রমতস্তুষ্টিকরো ভব॥ যস্মাচ্চূড়ামণি-র্জম্বুদ্বীপে ত্বং গন্ধমাদন। গান্ধর্ব্ববন-শোভাবাংস্ততঃ কীর্ত্তির্দৃঢ়াস্তু মে॥ যস্মাত্ত্বং

কেতুমালেন বৈভ্রাজেন বনেন চ। হিরণ্ময়শ্চ শিখরস্তস্মাৎ পুষ্টির্ধ্রুবাস্তু মে॥ উত্তরৈঃ কুরুভির্যস্মাৎ সাবিত্রেণ বনেন চ। সুপার্শ্বরাজসে নিত্যমতঃ শ্রীরক্ষয়াস্তু মে॥ এবমামন্ত্র্য তান্ সর্ব্বান্ প্রভাতে বিমলে পুনঃ। স্নাত্বাথ গুরবে দদ্যান্মধ্যমং পর্ব্বতোত্তমং॥ বিষ্কম্ভান্ পর্ব্বতান্দদ্যাদৃত্বিগ্‌ভ্যঃ ক্রমশো মুনে। গাবো দেয়াশ্চতুর্ব্বিংশদথবা দশ নারদ॥ শক্তিতঃ সপ্ত চাষ্টৌ বা পঞ্চ দদ্যাদশক্তিমান্। একাপি গুরবে দেয়া কপিলাথ পয়স্বিনী। পর্ব্বতানামশেষাণামেষ এব বিধিঃ স্মৃতঃ॥ ত এব পূজনে মন্ত্রাস্ত এবোপস্করাঃ স্মৃতাঃ। গ্রহাণাং লোকপালানাং ব্রহ্মাদীনাঞ্চ সর্ব্বদা॥ স্বমন্ত্রেণৈব সর্ব্বেষু হোমঃ শৈলেষু পঠ্যতে। উপবাসী ভবেন্নিত্যমশক্তৌ নক্তমিষ্যতে॥ বিধানং সর্ব্বশৈলানাং ক্রমশঃ শৃণু নারদ। দানকালে চ যে মন্ত্রাঃ পর্ব্বতেষু চ যৎ ফলং॥ অন্নং ব্রহ্ম যতঃ প্রোক্তমন্নং প্রাণাঃ প্রকীর্ত্তিতাঃ। অন্নাদ্ভবন্তি ভূতানি জগদন্নেন বর্ত্ততে॥ অন্নমেব ততো লক্ষ্মীরন্নমেব জনার্দ্দনঃ। ধান্যপর্ব্বতরূপেণ পাহি তস্মান্নগোত্তম॥ অনেন বিধিনা যস্তু দদ্যাদ্ধান্যময়ং গিরিং। মন্বন্তরশতং সাগ্রং দেবলোকে মহীয়তে॥ অপ্সরোগণগন্ধর্ব্বৈরাকীর্ণেন বিরাজিতা। বিমানেন দিবঃ পৃষ্ঠমায়াতি সুরসেবিতং॥ ততঃ কর্ম্মক্ষয়ে রাজ্যমাপ্নোতীহ ন সংশয়ঃ।*।১। অথাতঃ সংপ্রবক্ষ্যামি লবণাচলমুত্তমং। যৎপ্রদাতা নরো লোকং প্রাপ্নোতি শিবসংযুতং॥ উত্তমঃ ষোড়শদ্রোণঃ কর্ত্তব্যো লবণাচলঃ। মধ্যমঃ স্যাত্তদর্দ্ধেন চতুর্ভিরধমঃ স্মৃতঃ॥ বিত্তহীনো যথাশক্ত্যা দ্রোণাদূর্দ্ধন্তু কারয়েৎ। চতুর্থাংশেন বিষ্কম্ভান্ পর্ব্বতান্ কারয়েৎ পৃথক্॥ বিধানং পূর্ব্ববৎ কুর্য্যাৎ ব্রহ্মাদীনাঞ্চ সর্ব্বদা। তদ্বদ্ধেমতনূন্ সর্ব্বান্ লোকপালান্নিবেশয়েৎ॥ সরাংসি কামদেবাদীংস্তদ্বচ্চাত্র নিবেশয়েৎ। কুর্য্যাজ্জাগরমত্রাপি দানমন্ত্রং নিবোধত॥ সৌভাগ্যরসসংভূতো যতোঽয়ং লবণো রসঃ। তথাত্মকত্বেন চ মাং পাহি পাপান্নগোত্তম॥ যস্মাদন্নরসাঃ সর্ব্বে নোৎকটা লবণং বিনা। প্রিয়ঞ্চ শিবয়োর্নিত্যং তস্মাচ্ছান্তিপ্রদো ভব॥ বিষ্ণুদেহসমুদ্ভূতং যস্মাদারোগ্যবর্দ্ধনং। তস্মাৎ পর্ব্বতরূপেণ পাহি সংসারসাগরাৎ॥ অনেন বিধিনা যস্তু দদ্যাল্লবণপর্ব্বতং। উমালোকে বসেৎ কল্পং ততো যাতি পরাং গতিং॥ * ॥ ২ ॥ অতঃ পরং প্রবক্ষ্যামি গুড়পর্ব্বতমুত্তমং। যৎপ্রদানান্নরঃ স্বর্গমাপ্নোতি সুরপূজিতঃ॥ উত্তমো দশভির্ভারৈর্মধ্যমঃ পঞ্চভির্ম্মতঃ। ত্রিভির্ভারৈঃ কনিষ্ঠঃ স্যাৎ তদর্দ্ধেনাল্পবিত্তবান্॥ তদ্বদামন্ত্রণং পূজাং হৈমবৃক্ষসুরার্চ্চনং। বিষ্কম্ভপর্ব্বতাস্তদ্বৎ সরাংসি বনদেবতাঃ॥ হোমজাগরণন্তদ্বৎ লোকপালাধিবাসনং। ধান্যপর্ব্বতবৎ কুর্য্যাদিমং মন্ত্রমুদীরয়েৎ॥ যথা দেবেষু বিশ্বাত্মা প্রবরোঽয়ং জনার্দ্দনঃ। সামবেদস্তু বেদানাং মহাদেবস্তু

যোগিনাং ॥ প্রণবঃ সর্ব্বমন্ত্রাণাং নারীণাং পার্ব্বতী যথা। তথা রসানাং প্রবরঃ সদৈবেক্ষুরসো মতঃ ॥ মম তস্মাৎ পরাং লক্ষ্মীং গুড়পর্ব্বত দেহি বৈ। যস্মাৎ সৌভাগ্যদায়িন্যা ভ্রাতা ত্বং গুড়পর্ব্বত ॥ নিবাসস্ত্বং হি পার্ব্বত্যাস্তস্মান্মাং পাহি সর্ব্বদা। অনেন বিধিনা যস্তু দদ্যাদ্গুড়-ময়ং গিরিং ॥ পূজ্যমানঃ সগন্ধর্ব্বৈর্গৌরী-লোকে মহীয়তে। পুনঃ কল্পশতান্তে তু সপ্তদ্বীপাধিপো ভবেৎ ॥ আয়ুরারোগ্য-সম্পন্নঃ শত্রুভিশ্চাপরাজিতঃ ।*। ৩। অথ পাপহরং বক্ষ্যে সুবর্ণাচলমুত্তমং। যস্য প্রদানাদ্ভুবনং বৈরিঞ্চং যাতি মানবঃ ॥ উত্তমঃ পলসাহস্রো মধ্যমঃ পঞ্চভিঃ শতৈঃ। তদর্দ্ধেনাধমস্তদ্বদল্পবিত্তোঽপি শক্তিতঃ ॥ দদ্যাদেকপলাদূর্দ্ধং যথাশক্ত্যা বিমৎসরঃ। ধান্যপর্ব্বতবৎ সর্ব্বং বিদধ্যা-ন্মুনিপুঙ্গব ॥ বিষ্কম্ভশৈলাংস্তদ্বচ্চ ঋত্বিগ্‌ভ্যঃ প্রতিপাদয়েৎ। নমস্তে ব্রহ্মবীজায় ব্রহ্ম-গর্ভায় বৈ নমঃ ॥ যস্মাদনন্তফলদস্তস্মাৎ পাহি শিলোচ্চয়। যস্মাদগ্নেরপত্যং ত্বং তস্মাদ্রত্নং জগৎপতে ॥ হেমপর্ব্বতরূপেণ তস্মাৎ পাহি নগোত্তম। অনেন বিধিনা যস্তু দদ্যাৎ কনকপর্ব্বতং ॥ স যাতি পরমং ব্রহ্মলোকমানন্দকারকং। তত্র কল্পশত-স্তিষ্ঠেত্ততো যাতি পরাং গতিং ॥*॥ ৪॥ অতঃ পরং প্রবক্ষ্যামি তিলশৈলং বিধা-নতঃ। যৎপ্রদানান্নরো যাতি বিষ্ণুলোক-মনুত্তমং ॥ উত্তমো দশভির্দ্রোণৈঃ পঞ্চভি-র্মধ্যমো মতঃ। ত্রিভিঃ কনিষ্ঠো বিপ্রেন্দ্র তিলশৈলঃ প্রকীর্ত্তিতঃ॥ পূর্ব্ববচ্চাপরং সর্ব্বং বিষ্কম্ভপর্ব্বতাদিকং। দানমন্ত্রং প্রবক্ষ্যামি যথাবন্মুনিসত্তম ॥ যস্মান্মধুবধে বিষ্ণোর্দ্দেহাৎ স্বেদসমুদ্ভবাঃ। তিলাঃ কুশাশ্চ সমিধস্তস্মাচ্ছান্ত্যৈ ভবন্ত্বিহ ॥ হব্য-কব্যেষু যস্মাচ্চ তিলা এবাভিরক্ষণং। ভবা-দুদ্ধর শৈলেন্দ্র তিলাচল নমোঽস্তু তে ॥ ইত্যামন্ত্র্য চ যো দদ্যাত্তিলাচলমনুত্তমং। স বৈষ্ণবং পদং যাতি পুনরাবৃত্তিদুর্লভং ॥ দীর্ঘায়ুষ্ট্বমবাপ্নোতি পুত্রপৌত্রৈশ্চ মানবঃ। পিতৃভির্দেবগন্ধর্ব্বৈঃ পূজ্যমানো দিবং ব্রজেৎ ॥*॥ ৫॥ অথাতঃ সংপ্রবক্ষ্যামি কার্পাসাচলমুত্তমং। যৎপ্রদানান্নরো নিত্য-মাপ্নোতি পরমং পদং ॥ কার্পাসপর্ব্বত-স্তদ্বদ্বিংশদ্ভারৈরিহোত্তমঃ। দশভির্ম্মধ্যমঃ প্রোক্তঃ কনিষ্ঠঃ পঞ্চভির্ম্মতঃ ॥ ভারে-ণাল্পধনো দদ্যাদ্বিত্তশাঠ্যেন বর্জ্জিতঃ। ধান্য-পর্ব্বতবৎ সর্ব্বমাসাদ্য মুনিপুঙ্গব ॥ প্রভা-তায়াস্তু শর্ব্বর্য্যাং দদ্যাদিদমুদীরয়েৎ। ত্বমেবাবরণং যস্মাল্লোকানামিহ সর্ব্বদা ॥ কার্পাসাদ্রে নমস্তস্মাদঘৌঘধ্বংসনো ভব। ইতি কার্পাসশৈলেন্দ্রং যো দদ্যাৎ শর্ব্ব-সন্নিধৌ ॥ রুদ্রলোকে বসেৎ কল্পং ততো রাজা ভবেদিহ।*। ৬। অথাতঃ সংপ্র-বক্ষ্যামি ঘৃতাচলমনুত্তমং। তেজোঽমৃত-ময়ং দিব্যং মহাপাতকনাশনং ॥ বিংশত্যা ঘৃতকুম্ভানামুত্তমঃ স্যাদ্ঘৃতাচলঃ। দশভি-র্মধ্যমঃ প্রোক্তঃ পঞ্চভিস্ত্ববরঃ স্মৃতঃ ॥ অল্পবিত্তোঽপি কুর্ব্বীত দ্বাভ্যামিহ বিধা-নতঃ। বিষ্কম্ভান্ পর্ব্বতাংস্তদ্বচ্চতুর্ভাগেন

কল্পয়েৎ ॥ শালিতণ্ডুলপাত্রাণি কুম্ভোপরি নিবেশয়েৎ। কারয়েৎ সংহতানুচ্চান্ যথা-শোভং বিধানতঃ॥ বেষ্টয়েৎ শুক্ল-বাসোভিরিক্ষুদণ্ডফলাদিকৈঃ। ধান্যপৰ্ব্বত-বৎ সৰ্ব্বং বিধানমিহ পঠ্যতে॥ অধি-বাসনপূৰ্ব্বন্তু তদ্বদ্ধোমসুরার্চ্চনং। প্রভা-তায়ান্তু শৰ্ব্বৰ্য্যাং গুরবে চ নিবেদয়েৎ॥ বিষ্কম্ভপৰ্ব্বতাংস্তদ্বদৃত্বিগ্ভ্যঃ শান্তমানসঃ। সংযোগাদ্ঘৃতমুৎপন্নংযস্মাদমৃততেজসোঃ॥ তস্মাদ্ঘৃতার্চ্চিবিশ্বাত্মা প্রীয়তামত্র শঙ্করঃ। যস্মাত্তেজোময়ং ব্রহ্ম ঘৃতে তচ্চ ব্যব-স্থিতং॥ ঘৃতপৰ্ব্বতরূপেণ তস্মান্মাং পাহি ভূধর। অনেন বিধিনা দদ্যাদ্ঘৃতাচলমনু-ত্তমং॥ মহাপাতকযুক্তোঽপি লোক-মায়াতি শাঙ্করং। হংসসারসযুক্তেন কিঙ্কিণীজালমালিনা॥ বিমানেনাপ্সরো-ভিশ্চ সিদ্ধবিদ্যাধরৈর্ব্বৃতঃ। বিহরেৎ পিতৃভিঃ সাৰ্দ্ধং যাবদাভূতসংপ্লবং॥ *॥ ৭॥ অতঃ পরং প্রবক্ষ্যামি রত্নাচলমনুত্তমং। মুক্তাফলসহস্রেণ পৰ্ব্বতঃ স্যাদনুত্তমঃ॥ মধ্যমঃ পঞ্চশতিকস্ত্রিশতৈরবরঃ স্মৃতঃ। চতুর্থাংশেন বিষ্কম্ভাঃ পৰ্ব্বতাঃ স্যুঃ সম-ন্ততঃ॥ পূৰ্ব্বেণ বজ্রগোমেদৈর্দক্ষিণেনেন্দ্র-নীলকৈঃ। পুষ্পরাগযুতৈঃ কাৰ্য্যো বিদ্বদ্ভি-র্গন্ধমাদনঃ॥ বৈদূৰ্য্যবিদ্রুমৈঃ পশ্চাৎ সংমিশ্রো বিপুলোঽচলঃ। পদ্মরাগৈঃ স-সৌবর্ণৈরুত্তরেণ তু বিন্যসেৎ॥ ধান্য-পৰ্ব্বতবৎ সৰ্ব্বমত্রাপি পরিকল্পয়েৎ। তদ্ব-দাবাহনং কৃত্বা বৃক্ষান্ দেবাংশ্চ কাঞ্চ-নান্॥ পূজয়েৎ পুষ্পপানীয়ৈঃ প্রভাতে চাথ পূৰ্ব্ববৎ। পূৰ্ব্ববৎ গুরুঋত্বিগ্ভ্যঃ কল্প মন্ত্রানুদীরয়েৎ॥ যথা দেবগণাঃ সৰ্ব্বে সৰ্ব্বরত্নেষ্ববস্থিতাঃ। ত্বঞ্চ রত্নময়ো নিত্য-মতঃ পাহি মহাচল॥ যস্মাদ্রত্নপ্রদানেন তুষ্টিং প্রকুরুতে হরিঃ। সদানন্দপ্রদানেন তস্মান্নঃ পাহি পৰ্ব্বত॥ অনেন বিধিনা যস্তু দদ্যাদ্রত্নমহাগিরিং। স যাতি বৈষ্ণবং লোকমমরেশ্বরপূজিতঃ॥ যাবৎ কল্পশতং সাগ্রং বাসশ্চেহ নরাধিপ। রূপারোগ্য-গুণোপেতঃ সপ্তদ্বীপাধিপো ভবেৎ॥ ব্রহ্ম-হত্যাদিকং কিঞ্চিদ্যদত্রামুত্র বা কৃতং। তৎ সৰ্ব্বং নাশমায়াতি গিরিৰ্ব্বজ্রহতো যথা॥ *॥ ৮॥ অতঃ পরং প্রবক্ষ্যামি রৌপ্যাচলমনুত্তমং। যৎপ্রদানান্নরো যাতি সোমলোকং দ্বিজোত্তম॥ দশভিঃ পল-সাহস্রৈরুত্তমো রজতাচলঃ। পঞ্চভির্ম্মধ্যমঃ প্রোক্তস্তদৰ্দ্ধেনাবরঃ স্মৃতঃ॥ অশক্তো বিংশতেরূৰ্দ্ধং কারয়েৎ শক্তিতঃ সদা। বিষ্কম্ভপৰ্ব্বতাংস্তদ্বত্তুরীয়াংশেন কল্পয়েৎ॥ পূৰ্ব্ববদ্রাজতান্ কুৰ্য্যান্মন্দরাদীন্ বিধা-নতঃ। কলধৌতময়াংস্তত্র লোকেশান্ রচয়েদ্বুধঃ॥ ব্রহ্মবিষ্ণ্বর্কবৎ কাৰ্য্যো নিতম্বোঽত্র হিরণ্ময়ঃ। রাজতং স্যাদ্-যদন্যেষাং সৰ্ব্বন্তদিহ কাঞ্চনং॥ শেষঞ্চ পূৰ্ব্ববৎ কুৰ্য্যাদ্ধোমজাগরণাদিকং। প্রদ-দ্যাত্তং প্রভাতে তু গুরবে রৌপ্যপৰ্ব্বতং॥ বিষ্কম্ভশৈলানৃত্বিগ্ভ্যঃ পূজ্যবস্ত্রবিভূষণৈঃ। ইমং মন্ত্রং পঠন্ দদ্যাদ্দর্ভপাণির্বিমৎসরঃ॥ পিতৃণাং বল্লভং যস্মাদ্বিষ্ণোৰ্ব্বা শঙ্করস্য চ। রজতং পাহি তস্মান্নঃ শোকসংসার-

সাগরাৎ ॥ ইত্থং নিবেশ্য যো দদ্যাদ্ রজতাচলমুত্তমং। গবামযুতদানস্য ফলং প্রাপ্নোতি মানবঃ ॥ সোমলোকে স গন্ধর্ব্বৈঃ কিন্নরাপ্সরসাঙ্গণৈঃ। পূজ্যমানো বসেদ্বিদ্বান্ যাবদাহূতসংপ্লবং ॥ * ॥ ৯ ॥ অথাতঃ সংপ্রবক্ষ্যামি শর্করাশৈলমুত্তমং। যস্য প্রদানাদ্বিষ্ণ্বর্করুদ্রাস্তুষ্যন্তি সর্ব্বদা ॥ অষ্টভিঃ শর্করাভারৈরুত্তমঃ স্যান্মহাচলঃ। চতুর্ভির্মধ্যমঃ প্রোক্তো ভারাভ্যামধমঃ স্মৃতঃ ॥ সার্দ্ধভারেণ শৈলন্তু যঃ কুর্য্যাৎ স্বল্পবিত্তবান্। বিষ্কম্ভপর্ব্বতান্ কুর্য্যাত্তুরীয়াংশেন মানবঃ ॥ ধান্যপর্ব্বতবৎ সর্ব্বমাসাদ্য মেরুসংযুতং। মেরোরুপরি তদ্বচ্চ স্থাপ্যং হেমতরুত্রয়ং ॥ মন্দারঃ পারিজাতশ্চ তৃতীয়ঃ কল্পপাদপঃ। এতদ্বৃক্ষত্রয়ং মূর্দ্ধ্নি সর্ব্বেষ্বপি নিবেশয়েৎ ॥ হরিচন্দনসন্তানৌ পূর্ব্বপশ্চিমভাগয়োঃ। নিবেশ্যৌ সর্ব্বশৈলেষু বিশেষাচ্ছর্করাচলে ॥ মন্দরে কামদেবস্তু প্রত্যগবক্ত্রঃ সদা ভবেৎ। গন্ধমাদনশৃঙ্গেষু ধনদঃ স্যাদুদঙ্মুখঃ ॥ প্রাঙ্মুখো বেদমূর্ত্তিশ্চ হংসঃ স্যাদ্বিপুলাচলে। হৈমী সুপার্শ্বসুরভী দক্ষিণাভিমুখী ভবেৎ ॥ ধান্যপর্ব্বতবৎ সর্ব্বমাবাহনমথাদিকং। কৃত্বাথ গুরবে দদ্যান্মধ্যমং পর্ব্বতোত্তমং। ঋত্বিগ্‌ভ্যশ্চ নরঃ শৈলানিমান্মন্ত্রানুদীরয়েৎ ॥ সৌভাগ্যামৃতসারোঽয়ং পরমঃ শর্করাযুতঃ। তৎ সদানন্দকারী ত্বং ভব শৈলেন্দ্র সর্ব্বদা ॥ অমৃতং পিবতাং যে তু নিপেতুর্ভুবি শীকরাঃ। দেবানান্তৎসমুত্থোঽয়ং পাহি নঃ শর্করাচল ॥ মনোভবধনুর্মধ্যাদুদ্ভূতা শর্করা যতঃ। তন্ময়োঽসি মহাশৈল পাহি সংসারসাগরাৎ ॥ যো দদ্যাৎ শর্করাশৈলমনেন বিধিনা নরঃ। সর্ব্বপাপবিনির্ম্মুক্তঃ প্রয়াতি শিবমন্দিরং ॥ চন্দ্রাদিত্যপ্রতাকাশমধিরুহ্যানুজীবিভিঃ। সহৈব যানমাতিষ্ঠেৎ স তু বিষ্ণুপ্রচোদিতঃ ॥ ততঃ কল্পশতান্তে তু সপ্তদ্বীপাধিপো ভবেৎ। আয়ুরারোগ্যসম্পন্নো যাবজ্জন্মার্ব্বুদত্রয়ং। ভোজনং শক্তিতঃ কুর্য্যাৎ সর্ব্বশৈলেষ্বমৎসরঃ। সর্ব্বত্রাক্ষারলবণমশ্নীয়াত্তদনুজ্ঞয়া। পর্ব্বতোপস্করান্ সর্ব্বান্ প্রাপয়েৎ ব্রাহ্মণালয়ং ॥ ১০ ॥ ইতি মাৎস্যে ৭৭ অধ্যায়ঃ ॥ দেবর্ষিবিশেষঃ। যথা। কশ্যপান্নারদশ্চৈব পর্ব্বতোঽরুন্ধতী তথা। ইত্যগ্নিপুরাণং ॥ মৎস্যবিশেষঃ। পাব্‌দা ইতি ভাষা। অস্য গুণাঃ। বায়ুনাশিত্বং। স্নিগ্ধত্বং। বলশুক্রকারিত্বঞ্চ। ইতি রাজবল্লভঃ ॥ বৃক্ষঃ। শাকভেদঃ। ইতি মেদিনী ॥

পর্ব্বতকাকঃ (পুং) দ্রোণকাকঃ। ইতি হেমচন্দ্রঃ ॥

পর্ব্বতজা (স্ত্রী) নদী। ইতি হেমচন্দ্রঃ ॥ গিরিভববস্তুনি ত্রি ॥

পর্ব্বততৃণং (ক্লী) তৃণভেদঃ। সও ইতি হিন্দী ভাষা। তৎপর্য্যায়ঃ। তৃণাঢ্যং২ পত্রাঢ্যং৩ মৃগপ্রিয়ং ৪। অস্য গুণাঃ। বলপুষ্টিকরত্বং। রুচ্যত্বং। পশূনাং সর্ব্বদা প্রিয়ত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

পর্ব্বতমোচা (স্ত্রী) গিরিকদলী। ইতি রাজনির্ঘণ্টঃ ॥

পর্ব্বতরাজঃ (পুং) হিমালয়গিরিঃ। অস্য প্রমাণং বক্ষ্যমাণশব্দে দ্রষ্টব্যং ॥

পর্ব্বতরাজপুত্ত্রী (স্ত্রী) দুর্গা। যথা। জিকন-ধনঞ্জয়সংগ্রহয়োঃ। শক্রধ্বজাৎ পক্ষযুতে দশাহে মূলর্ক্ষযুক্তা সিতসপ্তমী যা। আরভ্য তস্যাং দশমীঞ্চ যাবৎ প্রপূজয়েৎ পর্ব্বত-রাজপুত্ত্রীং ॥ ইতি তিথ্যাদিতত্ত্বং ॥

পর্ব্বতবাসিনী (স্ত্রী) আকাশমাংসী। ইতি রাজনির্ঘণ্টঃ ॥ গায়ত্ত্রী। যথা। উত্তরে শিখরে দেবি ভূম্যাং পর্ব্বতবাসিনি। ব্রহ্ম-যোনিসমুৎপন্নে গচ্ছ দেবি যথাসুখং ॥ ইতি যজুর্ব্বেদীয়গায়ত্ত্রীবিসর্জ্জনমন্ত্রঃ ॥ কালী। যথা। উত্তরে শিখরে দেবি ভূম্যাং পর্ব্বতবাসিনি। ব্রহ্মযোনিসমুৎপন্নে গচ্ছ দেবি মমান্তরং ॥ ইতি শ্যামাপূজায়াং বিসর্জনমন্ত্রঃ ॥

পর্ব্বতাধারা (স্ত্রী) পৃথিবী। ইতি হেম-চন্দ্রঃ

পর্ব্বতারিঃ (পুং) ইন্দ্রঃ। ইতি শব্দরত্না-বলী ॥

পর্ব্বতাশয়ঃ (পুং) মেঘঃ। ইতি শব্দচন্দ্রিকা ॥

পর্ব্বতাশ্রয়ঃ (পুং) শরভঃ। ইতি রাজ-নির্ঘণ্টঃ ॥ পর্ব্বতবাসিনি ত্রি ॥

পর্ব্বতীয়ঃ (ত্রি) পর্ব্বতসম্বন্ধী। পর্ব্বতভবঃ। পাহাড়িয়া ইতি ভাষা। ইতি পর্ব্বত-শব্দাৎ ভবার্থে ঈয়প্রত্যয়নিষ্পন্নঃ ॥

পর্ব্বতোর্ম্মিঃ (পুং) মৎস্যবিশেষঃ। ইতি কস্মিন্ ভূরিপ্রয়োগে প্রমাদলিখনং পর্ব্বতোবর্ম্মিরিতি মৎস্যদ্বয়বোধকপাঠঃ সাধুঃ ॥

পর্ব্বধিঃ (পুং) চন্দ্রঃ। ইতি ত্রিকাণ্ডশেষঃ

পর্ব্বপুষ্পী (স্ত্রী) রামদূতীবৃক্ষঃ। নাগদন্তী ইতি শব্দচন্দ্রিকা রত্নমালা চ ॥

পর্ব্বপূর্ণতা (স্ত্রী) সম্ভারঃ। আয়োজনং ইতি ভূরিপ্রয়োগঃ ॥ পর্ব্বণঃ পূর্ণত্বঞ্চ ॥

পর্ব্বমূলা (স্ত্রী) শ্বেতা। ইতি রাজনির্ঘণ্টঃ ॥

পর্ব্বযোনিঃ (পুং) ইক্ষ্বাদি। ইতি হেম-চন্দ্রঃ

পর্ব্বরীণং (ক্লী) পর্ব্ব। ইতি শব্দরত্নাবলী ॥

পর্ব্বরীণঃ (পুং) পর্ণবৃন্তরসঃ। গর্ব্বঃ। মারুতঃ। পর্ণশিরা। মৃতকং। দ্যূত-কম্বলঃ। পত্রচূর্ণরসঃ। ইতি শব্দরত্না-বলী ॥ পর্পরীণ ইতি মেদিন্যাং পাঠঃ ॥

পর্ব্বরুট্ [হ্] (পুং) দাড়িমঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

পর্ব্ববল্লী (স্ত্রী) মালাদূর্ব্বা। ইতি রাজনির্ঘণ্টঃ ॥

পর্ব্বসন্ধিঃ (পুং) প্রতিপৎপঞ্চদশ্যোরন্তরং। ইত্যমরঃ ॥ প্রতিপৎপঞ্চদশ্যোর্যন্মধ্যং স পর্ব্বসন্ধিঃ। কিম্বা স সন্ধিঃ পর্ব্বেত্যন্বয়ঃ। পঞ্চদশানাং পূরণী পঞ্চদশী সংখ্যায়া ডড়িতি ডট্ টিত্ত্বাদীপ্। পঞ্চদশীশব্দেন পূর্ণিমামাবাস্যয়োর্দ্বয়োর্গ্রহণং। অতএব পৌর্ণমাস্যা অমাবাস্যা বা শেষসার্দ্ধদণ্ড-চতুষ্টয়ং প্রতিপদশ্চ প্রথমসার্দ্ধদণ্ডচতু-ষ্টয়ং পর্ব্বসন্ধিরিতি বৃদ্ধাঃ ॥ সৈংহিকেয়ো যদা রাহুর্গ্রসতে পর্ব্বসন্ধিষিতি যমঃ ॥ পর্ব্বণোঃ সন্ধিঃ পর্ব্বসন্ধিঃ পৃধাতোর্বনিপি পর্ব্বপূরণে ইত্যস্য নাম্নীত্যনি বা পর্ব্ব। প্রতিপৎপঞ্চদশ্যোস্তু সন্ধিঃ পর্ব্বাথ দিক্ ককুবিতি স্বামী ॥ দর্শপ্রতিপদোঃ সন্ধৌ

গ্রন্থিপ্রস্তাবয়োরপি। পর্ব্বশব্দো হি বিষুবৎপ্রভৃতিষ্বপি দৃশ্যতে॥ ইতি রত্নঃ। ইতি ভরতঃ॥

পর্ব্বিতঃ (পুং) পর্ব্বতমৎস্যঃ। ইতি শব্দরত্নাবলী॥

পর্শুঃ (পুং) পরশুঃ। ইতি হেমচন্দ্রঃ॥

পর্শুকা (স্ত্রী) পার্শ্বাস্থি। ইত্যমরঃ॥

পর্শুপাণিঃ (পুং) গণেশঃ। ইতি হেমচন্দ্রঃ॥

পর্শুরামঃ (পুং) পরশুরামঃ। ইতি শব্দরত্নাবলী॥

পর্শ্বধঃ (পুং) কুঠারঃ। ইতি জটাধরঃ॥

পর্ষ ঙ স্নেহে। ইতি কবিকল্পদ্রুমঃ॥ রেফোপধঃ। স্নেহ ইহ আর্দ্রীভাবঃ। ঙ পর্ষতে পয়সা পটঃ। স্পর্ষ ইতি চতুর্ভুজঃ। স্পর্ষতে পস্পর্ষে। ইতি দুর্গাদাসঃ॥

পর্ষৎ [দ্] (স্ত্রী) সভা। ইত্যুণাদিকোষঃ॥

পর্ষদ্বলঃ (ত্রি) পারিষদঃ। ইতি শব্দরত্নাবলী॥

পল ক রক্ষে। ইতি কবিকল্পদ্রুমঃ॥ ক পালয়তি। হ্রস্ববত্তৈবেষ্টসিদ্ধে দীর্ঘিণোহপি পাঠঃ কানুবন্ধানামিদনুবন্ধবৎ ণেরনিত্যতাং বোধয়তি। তেন পালতি পলতি। ইত্যপি সিদ্ধং। ইতি দুর্গাদাসঃ॥

পল জ গতৌ। ইতি কবিকল্পদ্রুমঃ॥ জ পালঃ পলঃ। ইতি দুর্গাদাসঃ॥

পলং (ক্লী) আমিষং। কর্ষচতুষ্টয়ং। ইত্যমরঃ॥ তত্তু শাস্ত্রে তোলকচতুষ্টয়ং। বৈদ্যকে অষ্টতোলকং। লৌকিকে সাষ্টরক্তিদ্বিমাষকতোলকত্রিতয়ং। তৎপর্য্যায়ঃ। মুষ্টিঃ ২ প্রকুঞ্চঃ ৩ চতুর্থিকা ৪ বিল্বং ৫ ষোড়শিকাম্রং ৬। ইতি বৈদ্যকপরিভাষা॥ পলস্তু লৌকিকৈর্ম্মানৈঃ সাষ্টরক্তিদ্বিমাষকং। তোলকত্রিতয়ং জ্ঞেয়ং জ্যোতির্জ্ঞৈঃ স্মৃতিসম্মতং॥ ইতি তিথ্যাদিতত্ত্বং॥ * ॥ বিঘটিকা। ইতি রাজনির্ঘণ্টঃ॥ সা তু ঘটিকাষষ্টিভাগৈকভাগঃ। ষষ্টিবিপলশ্চ। পলদণ্ডয়োঃ প্রমাণন্তু। দশগুর্ব্বক্ষরোচ্চারকালঃ প্রাণঃ ষড়াত্মকৈঃ। তৈঃ পলং স্যাত্তু তৎষষ্ট্যা দণ্ড ইত্যভিধীয়তে॥ তেন চ। মা কান্তে পক্ষস্যান্তে পর্য্যাকাশে দেশে স্বাপ্সীঃ কান্তং বক্ত্রং বৃত্তং পূর্ণং চন্দ্রং মত্বা রাত্রৌ চেৎ। ক্ষুৎক্ষামঃ প্রাটংশ্চেতশ্চেতো রাহুঃ ক্রূরঃ প্রাদ্যাত্তস্মাদ্ধান্তে হর্ম্ম্যস্যান্তে শয্যেকান্তে কর্ত্তব্যা॥ অস্যৈকপাঠাৎ পলং ষষ্টিপাঠাদ্দণ্ডঃ। ইতি জ্যোতিস্তত্ত্বং॥

পলঃ (পুং) পলালঃ। ইতি হেমচন্দ্রঃ॥

পলক্যা (স্ত্রী) পালঙ্ক্যশাকঃ। ইতি রাজনির্ঘণ্টঃ॥

পলগণ্ডঃ (পুং) লেপকঃ। রাজ্ ইতি ভাষা। ইত্যমরঃ॥

পলঙ্কটঃ (ত্রি) ভয়শীলঃ। ভীরুঃ। ইতি ত্রিকাণ্ডশেষঃ॥

পলঙ্করঃ (পুং) পিত্তং। ইতি ত্রিকাণ্ডশেষঃ॥

পলঙ্কষঃ (পুং) রাক্ষসঃ। ইতি মেদিনী॥ কণগুগ্গুলুঃ। ইতি রাজনির্ঘণ্টঃ॥

পলঙ্কষা (স্ত্রী) গোক্ষুরকঃ। রাস্না। গুগ্গুলুঃ। কিংশুকঃ। মুণ্ডীরী। লাক্ষা। ইতি

মেদিনী ॥ ক্ষুদ্রগোক্ষুরকঃ। মহাশ্রাবণী। মক্ষিকা। ইতি রাজনির্ঘণ্টঃ ॥

পলপ্রিয়ঃ (পুং) দ্রোণকাকঃ। ইতি রাজনির্ঘণ্টঃ ॥ মাংসাশিনি ত্রি ॥

পলভা (স্ত্রী) মেষসংক্রমণাদর্ব্বাক্ সপাদাষ্টদিনে মধ্যাহ্নে দ্বাদশাঙ্গুলশঙ্কুজা ছায়া। তৎপর্য্যায়ঃ। পলবিভা ২ বিষুবৎপ্রভা ৩। যথা। মেষাদিগে সায়নভাগসূর্য্যে দিনার্দ্ধজা ভা পলভা ভবেৎ সা। ইতি গ্রহলাঘবঃ ॥ পলভয়োদ্ভূতচরখণ্ডকৈঃ ক্রমোৎক্রমৈস্থৈর্হীনান্বিতৈর্লঙ্কোদয়ৈঃ স্বদেশীয়োদয়া ভবন্তি। অন্যৎস্পষ্টাধিকারেঽপি চরসংস্কৃতা গ্রহাঃ স্পষ্টা ভবন্তীতি প্রয়োজনং ॥ ক্রিয়তুলাধরসংক্রমপূর্ব্বতোঽয়নলবোত্থদিনৈর্বিষুবদ্দিনং। মকরকর্কটসংক্রমতোঽয়নং দ্যুদলভা বিষুবদ্দিবসেঽক্ষভা ॥ ইতি সিদ্ধান্তশিরোমণিঃ ॥ এবং বিষুবতী ছায়া স্বদেশে যা দিনার্দ্ধজা। দক্ষিণোত্তররেখায়াং সা তত্র বিষুবৎপ্রভা ॥ ইতি সূর্য্যসিদ্ধান্তঃ ॥ অজতুলাদিগতস্য রবের্দ্দিনে দ্যুদলভার্কমিতাঙ্গুলশঙ্কুজা। পলবিভাখেতি বৃদ্ধবশিষ্ঠসিদ্ধান্তঃ ॥

পললং (ক্লী) মাংসং। ইত্যমরঃ ॥ পঙ্কং। তিলচূর্ণং। ইতি মেদিনী ॥ পললং তিলকল্কং স্যাত্তিলচূর্ণঞ্চ পিষ্টকঃ। পললং মধুরং রুচ্যং পিত্তাস্রবলপুষ্টিদং ॥ ইতি রাজনির্ঘণ্টঃ ॥ সৈক্ষবতিলচূর্ণং। তিলকুটা ইতি ভাষা। যথা। পললন্তু সমাখ্যাতং সৈক্ষবং তিলপিষ্টকং। পললং মলকৃদ্ বৃষ্যং বাতঘ্নং কফপিত্তকৃৎ ॥ বৃংহণং গুরু বৃষ্যঞ্চ স্নিগ্ধং মূত্রনিবর্ত্তকং। ইতি বৈদ্যকং ॥

পললঃ (পুং) রাক্ষসঃ। ইতি মেদিনী ॥

পললজ্বরঃ (পুং) পিত্তং। ইতি হারাবলী ॥

পললাশয়ঃ (পুং) গণ্ডরোগঃ। ইতি শব্দরত্নাবলী ॥

পলবঃ (পুং) মৎস্যধারণোপায়ঃ। পোলো ইতি ভাষা। তৎপর্য্যায়ঃ। প্লবঃ ২ পঞ্জরাখেটঃ ৩। ইতি ত্রিকাণ্ডশেষঃ ॥

পলাগ্নিঃ (পুং) পিত্তং। ইতি হারাবলী ॥

পলাঙ্গঃ (পুং) শিশুমারঃ। ইতি হারাবলী ॥

পলাণ্ডুঃ (পুং) মূলবিশেষঃ। পেয়াজ্ ইতি ভাষা। তৎপর্য্যায়ঃ। সুকন্দকঃ ২ ইত্যমরঃ ॥ লোহিতকন্দঃ ৩। ইতি রত্নমালা ॥ তীক্ষ্ণকন্দঃ ৪ উষ্ণঃ ৫ মুখদূষণঃ ৬ শূদ্রপ্রিয়ঃ ৭ কৃমিঘ্নঃ ৮ দীপনঃ ৯ মুখগন্ধকঃ ১০ বহুপত্রঃ ১১ বিশ্বগন্ধঃ ১২ রোচনঃ ১৩ পলাণ্ডূঃ ১৪ সুকুন্দকঃ ১৫। ইতি শব্দরত্নাবলী ॥ অস্য গুণাঃ। কটুত্বং। বল্যত্বং। কফপিত্তবান্তিদোষনাশিত্বং। গুরুত্বং। বৃষ্যত্বং। রোচনত্বং। স্নিগ্ধত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ পলাণ্ডুর্যবনেষ্টশ্চ দুর্গন্ধো মুখদূষকঃ। পলাণ্ডুস্তু গুণৈর্জ্জ্ঞেয়ো রসোনসদৃশো গুণৈঃ ॥ স্বাদুপাকরসোঽনুষ্ণঃ কফকৃন্নাতিপিত্তলঃ। হরতে কেবলং বাতং বলবীর্য্যকরো গুরুঃ ॥ ইতি ভাবপ্রকাশঃ ॥ * ॥ পলাণ্ডুভক্ষণে দোষো যথা। পলাণ্ডুং বিড়্বরাহঞ্চ ছত্রাকং গ্রামকুক্কুটং। লশুনং গৃঞ্জনঞ্চৈব জগ্ধ্বা চান্দ্রায়ণঞ্চরেৎ ॥ ইতি প্রায়শ্চিত্তবিবেকে যাজ্ঞবল্ক্যঃ ॥

পলাদঃ (পুং স্ত্রী) রাক্ষসঃ। ইতি জটাধরঃ॥

পলাদনঃ (পুং স্ত্রী) রাক্ষসঃ। ইতি হেমচন্দ্রঃ॥ মাংসভক্ষণশীলে ত্রি॥

পলান্নং (ক্লী) মাংসাদিযুক্তসিদ্ধভক্তং। পোলাও ইতি ভাষা। তস্য পাকপ্রকারো দ্রব্যাণি চ যথা। ছাগমাংসং ১ শরাবঃ। ঘৃতং।০ শরাবপাদঃ। ত্বচং ৩ মাষকং। লবঙ্গং ৩ মাষকং। এলা ৩ মাষকং। তণ্ডুলং ১ শরাবঃ। মরিচং ২ তোলকং। তেজপত্রং ২ তোলকং। কুঙ্কুমং ১ মাষকং। আর্দ্রকং ২ তোলকং। লবণং ৬ তোলকং। ধন্যাকং ২ তোলকং। দ্রাক্ষা ৵০ শরাবপাদার্দ্ধং। ছাগমাংসং সূক্ষ্মং খোরয়িত্বা শুষ্কপ্রলেহপাককরণানন্তরং পাত্রান্তরে তেজপত্রোপরি অল্লাখণ্ডগন্ধদ্রব্যেণ সহ প্রথমং সজ্জীকর্ত্তব্যং। ততস্তণ্ডুলং জলেনার্দ্ধসিদ্ধং কৃত্বা মণ্ডগালনপূর্ব্বকমল্লাখণ্ডগন্ধদ্রব্যেণ সহ তন্মাংসোপরি সজ্জীকর্ত্তব্যং। এবংপ্রকারেণ বারং বারং সজ্জীকৃত্য তদুপরি অবশিষ্টঘৃতক্ষেপণেন দণ্ডদ্বয়ং তপ্তাঙ্গারোপরি রক্ষেৎ। ইতি পাকরাজেশ্বরঃ॥ * ॥ অত্র মাংসস্থানে মৎস্যফলমূলাদিকং গন্ধদ্রব্যেণ সহ দধিযোগং ঘৃতপরিমাণস্যাধিক্যঞ্চ ভবিতুমর্হতি॥

পলাপঃ (পুং) কণ্ঠপাশকঃ। হস্তিকপোলঃ। ইতি শব্দমালা॥

পলায়নং (ক্লী) ভয়াদিনা স্থানান্তরগমনং। পালান ইতি পীঠদেওন ইতি চ ভাষা। তৎপর্য্যায়ঃ। অপযানং ২ সংদাবঃ ৩ দ্রবঃ ৪ বিদ্রবঃ ৫ উপক্রমঃ ৬ সংদ্রাবঃ ৭ উদ্দ্রাবঃ ৮ প্রদ্রাবঃ ৯। ইতি হেমচন্দ্রঃ॥ নিদ্রাবঃ ১০ উদ্দ্রবঃ ১১ সন্দ্রাপঃ ১২ দ্রাবঃ ১৩ শৃগালিকা ১৪ অপক্রমঃ ১৫ চংক্রমঃ ১৬। ইতি শব্দরত্নাবলী॥

পলায়িতঃ (ত্রি) পলায়নবিশিষ্টঃ। তৎপর্য্যায়ঃ। নষ্টঃ ২ গৃহীতদিক্ ৩ তিরোহিতঃ ৪। ইতি হেমচন্দ্রঃ॥

পলালঃ (পুং ক্লী) নিষ্ফলকাণ্ডঃ। শস্যশূন্যধান্যনালঃ। পোয়াল ইতি ভাষা। ইত্যমরঃ॥

পলালদোহদঃ (পুং) আম্রবৃক্ষঃ। ইতি শব্দমালা॥

পলাশং (ক্লী) পত্রং। ইত্যমরঃ॥

পলাশঃ (পুং) স্বনামখ্যাতবৃক্ষঃ। স তু ব্রহ্মণঃ স্বরূপঃ। যথা। সূত উবাচ। অশ্বত্থরূপো ভগবান্ বিষ্ণুরেব ন সংশয়ঃ। রুদ্ররূপো বটস্তদ্বৎ পলাশো ব্রহ্মরূপধৃক্॥ দর্শনস্পর্শসেবাসু তে বৈ পাপহরাঃ স্মৃতাঃ। দুঃখাপদ্ব্যাধিদুষ্টানাং বিনাশকারিণো ধ্রুবং॥ ঋষয় ঊচুঃ। কথং বৃক্ষত্বমাপন্না ব্রহ্মবিষ্ণুমহেশ্বরাঃ। এতৎ কথয় সর্ব্বজ্ঞ সংশয়োঽত্র মহান্ হি নঃ॥ সূত উবাচ। পার্ব্বতীশিবয়োর্দেবৈঃ সুরতং কুর্ব্বতোঃ কিল। অগ্নিং ব্রাহ্মণবেশেন প্রেষ্য বিঘ্নং কৃতং পুরা॥ ততস্তু পার্ব্বতী ক্রুদ্ধা শশাপ ত্রিদিবৌকসঃ। রেতঃসেকসুখভ্রংশকম্পমানা তদা রুষা॥ পার্ব্বত্যুবাচ। ক্রিমিকীটাদয়োঽপ্যেতে জানন্তি সুরতেঃ সুখং।

তস্মান্মম সুখভ্রংশাদ্‌যূয়ং বৃক্ষত্বমাপ্স্যথ ॥ সূত উবাচ। এবং সা পার্ব্বতী দেবী অশপৎ ক্রুদ্ধমানসা। তস্মাদ্‌বৃক্ষত্বমাপন্না ব্রহ্মবিষ্ণুমহেশ্বরাঃ ॥ ইতি পাদ্মোত্তরখণ্ডে ১৬০ অধ্যায়ঃ॥ তৎপর্য্যায়ঃ। কিংশুকঃ২ পর্ণঃ ৩ বাতপোথঃ ৪। ইত্যমরঃ ॥ যাজ্ঞিকঃ ৫ ত্রিপর্ণঃ ৬ বক্রপুষ্পঃ ৭ পূতদ্রুঃ ৮ ব্রহ্মবৃক্ষকঃ ৯ ব্রহ্মোপনেতা ১০ কাষ্ঠদ্রুঃ ১১। অস্য গুণাঃ। কষায়ত্বং। উষ্ণত্বং। ক্রিমিদোষবিনাশিত্বঞ্চ ॥ তদ্বীজগুণঃ। পামকণ্ডূতিদদ্রুত্বগ্‌দোষনাশিত্বং ॥ তৎপুষ্পগুণঃ। উষ্ণত্বং। কণ্ডূকুষ্ঠনাশিত্বঞ্চ ॥ তৎপুষ্পং চতুর্ব্বিধং যথা। রক্তঃ পীতঃ সিতো নীলঃ কুসুমৈস্তু বিভাব্যতে। কিংশুকৈর্গুণসাম্যোঽপি সিতো বিজ্ঞানদঃ স্মৃতঃ ॥ ইতি রাজনির্ঘণ্টঃ ॥ পলাশঃ কিংশুকঃ পর্ণো যাজ্ঞিকো রক্তপুষ্পকঃ। ক্ষারশ্রেষ্ঠো বাতপোথো ব্রহ্মবৃক্ষঃ সমিদ্‌বরঃ ॥ পলাশো দীপনো বৃষ্যঃ সরোষ্ণো ব্রণগুল্মজিৎ। কষায়ঃ কটুকস্তিক্তঃ স্নিগ্ধো গুদজরোগজিৎ ॥ ভগ্নসন্ধানকৃদ্দোষগ্রহণ্যর্শঃক্রিমীন্ হরেৎ। তৎপুষ্পং স্বাদু পাকে তু কটু তিক্তং কষায়কং ॥ বাতলং কফপিত্তাস্রকৃচ্ছ্রজিদ্‌গ্রাহি শীতলং। তৃড়্‌দাহশমনং বাতরক্তকুষ্ঠহরং পরং ॥ ফলং লঘূষ্ণং মেহার্শঃক্রিমিবাতকফাপহং। বিপাকে কটুকং রূক্ষং কুষ্ঠগুল্মোদরপ্রণুৎ ॥ ইতি ভাবপ্রকাশঃ ॥ পলাশভেদা যথা। তদ্ভেদে স্যাৎ কিংশুলুকঃ কিঞ্চলো হস্তিকর্ণকঃ। ইতি শব্দরত্নাবলী ॥ * ॥ শটী। রাক্ষসঃ। ইতি মেদিনী ॥ হরিতঃ। মগধদেশঃ। ইতি শব্দরত্নাবলী ॥

পলাশঃ (ত্রি) হরিদ্বর্ণবিশিষ্টঃ। ইতি মেদিনী॥ নির্দ্দয়ঃ। ইতি ধরণিঃ॥

পলাশকঃ (পুং) শটী। ইতি জটাধরঃ॥ পলাশবৃক্ষঃ। ইতি শব্দরত্নাবলী॥

পলাশপর্ণী (স্ত্রী) অশ্বগন্ধা। ইতি রাজনির্ঘণ্টঃ॥

পলাশাখ্যঃ (পুং) নাড়ীহিঙ্গু। ইতি রাজনির্ঘণ্টঃ॥

পলাশান্তা (স্ত্রী) গন্ধপত্রা। ইতি রাজনির্ঘণ্টঃ॥

পলাশী [ন্] (পুং) বৃক্ষঃ। ইত্যমরঃ॥ রাক্ষসঃ। ইতি মেদিনী॥ ক্ষীরিবৃক্ষঃ। ইতি রত্নমালা॥

পলাশী (স্ত্রী) লাক্ষা। লতাবিশেষঃ। তৎপর্য্যায়ঃ। পত্রবল্লী ২ পর্ণবল্লী ৩ পলাশিকা ৪ সুরপর্ণী ৫ সুপর্ণী ৬ দীর্ঘবল্লী ৭ বিষাদনী ৮ অম্লপত্রী ৯ দীর্ঘপত্রী ১০ রসাম্লা ১১ অম্লিকা ১২ অম্লাতকী ১৩ কাঞ্জিকা ১৪। অস্যা গুণাঃ। মধুরত্বং। অম্লত্বং। মুখদোষারোচকনাশিত্বং। পথ্যত্বং। পিত্তকোপকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

পলিক্নী (স্ত্রী) বৃদ্ধা। ইত্যমরঃ॥ বালগর্ব্বিণী গৌঃ। ইতি হেমচন্দ্রঃ॥

পলিঘঃ (পুং) কাচকলসঃ। ঘটঃ। প্রাকারঃ। গোপুরং। ইতি মেদিনী॥

পলিতং (ক্লী) জরসা কেশাদৌ শৌক্ল্যং। কেশপাকঃ। ইত্যমরঃ॥ তস্য নিদানং

যথা। ক্রোধশোকশ্রমকৃতঃ শরীরোষ্মা শিরোগতঃ। পিত্তঞ্চ কেশান্ পচতি পলিতং তেন জায়তে ॥ ইতি মাধবকরঃ ॥ তচ্চিকিৎসা যথা। লৌহচূর্ণস্য কর্ষস্তু দশার্দ্ধকৃতমজ্জতঃ। ধাত্রীফলদ্বয়ং পথ্যে দ্বে তথৈকং বিভীতকং ॥ পিষ্ট্বা লোহময়ে ভাণ্ডে স্থাপয়েন্নিশি বাসয়েৎ। লেপোঽয়মচিরাদ্ধন্তি পলিতং নেহ সংশয়ঃ ॥ দশার্দ্ধং পঞ্চকর্ষাণি। কাশ্মর্য্যা মূলমাদৌ সহচরকুসুমং কেতকস্যাপি মূলং লৌহং চূর্ণং সভৃঙ্গং ত্রিফলপলযুতং তৈলমেভিঃ পচেয়ুঃ। কৃত্বা লোহস্য ভাণ্ডে ক্ষিতিতলনিহিতং স্থাপয়েন্মাসমেকং কেশাঃ কাশপ্রকাশা অপি মধুপনিভা অস্য যোগাদ্ভবন্তি ॥ ত্রিফলা নীলিকাপত্রং ভৃঙ্গরাজোঽয়সো রজঃ। অবীমূত্রেণ সংপিষ্টং লেপাৎ কৃষ্ণীকরং পরং ॥ ইতি ভাবপ্রকাশঃ ॥ শৈলজং। তাপঃ। কর্দ্দমঃ। ইতি মেদিনী ॥ কেশপাশঃ। ইতি হেমচন্দ্রঃ ॥

পলিতঃ (পুং) বৃদ্ধঃ। ইতি জটাধরঃ ॥

পলিতা (স্ত্রী) বৃদ্ধা। ইতি জটাধরঃ ॥

পল্যঙ্কঃ (পুং) পর্য্যঙ্কঃ। ইত্যমরঃ ॥

পল্যয়নং (ক্লী) পর্য্যাণং। ঘোড়ার জিন্ ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥

পল্যূল ৎ ক লূনিপূত্যোঃ। ইতি কবিকল্পদ্রুমঃ ॥ যকারযুক্তৈকলকারমধ্যঃ হ্রস্বমধ্যশ্চ। লূনিশ্ছেদঃ। পূতিঃ পবিত্রীকরণং। অপপল্যূলৎ তৃণং লোকঃ। পল্যূলয়তি জনং গঙ্গা। ইতি দুর্গাদাসঃ ॥

পল্যূল ৎ ক লূনিপূত্যোঃ। ইতি কবিকল্পদ্রুমঃ ॥ যকারযুক্তৈকলকারমধ্যঃ দীর্ঘমধ্যশ্চ। লূনিশ্ছেদঃ। পূতিঃ পবিত্রীকরণং। অপপল্যূলৎ তৃণং লোকঃ। পল্যূলয়তি জনং গঙ্গা। ইতি দুর্গাদাসঃ ॥

পল্ল গতৌ। ইতি কবিকল্পদ্রুমঃ ॥ পল্লতি। ইতি দুর্গাদাসঃ ॥

পল্লঃ (পুং) স্থূলকুশূলকং। পালুই ইতি মরাই ইতি চ ভাষা। ইতি মেদিনী ॥

পল্লবঃ (পুং ক্লী) নবপত্রাদিযুক্তশাখাগ্রপর্ব্ব। ইতি ভরতঃ ॥ নবপত্রস্তবকঃ। ইতি মধুঃ ॥ পর্ব্বপত্রাদিসংঘাতে শাখায়াঃ পল্লবো মতঃ। ইতি কোষান্তরং ॥ তৎপর্য্যায়ঃ। কিসলয়ং ২। ইত্যমরঃ ॥ প্রবালং ৩ নবপত্রং ৪। ইতি রাজনির্ঘণ্টঃ ॥ বলং ৫ কিসলং ৬ কিশলং ৭ কিশলয়ং ৮ বিটপঃ ৯। ইতি শব্দরত্নাবলী ॥ পত্রযৌবনং ১০। ইতি জটাধরঃ ॥ বিটপঃ। বিস্তরঃ। বলং। শৃঙ্গারঃ। অলক্তরাগঃ। ইতি বিশ্বমেদিন্যৌ ॥ বলমিত্যত্র বনমিতি ক্বচিৎ পাঠঃ। বলয়ঃ। চাপলঃ। ইতি শব্দরত্নাবলী ॥

পল্লবকঃ (পুং) বেশ্যাপতিঃ। মৎস্যবিশেষঃ। ইতি হলায়ুধঃ ॥

পল্লবদ্রুঃ (পুং) অশোকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

পল্লবাধারঃ (পুং) শাখা। ইতি শব্দচন্দ্রিকা ॥

পল্লবিকঃ (ত্রি) কামুকঃ। ইতি হেমচন্দ্রঃ ॥

পল্লবিতং (ক্লী) লাক্ষারক্তঃ। ইতি মেদিনী ॥

পল্লবিতঃ (ত্রি) সপল্লবঃ। পল্লবযুক্তঃ। ততং। বিস্তৃতং। ইতি মেদিনী॥

পল্লবী [ন্] (পুং) বৃক্ষঃ। ইতি শব্দমালা॥

পল্লিঃ (স্ত্রী) গ্রামকঃ। কুটী। ইতি হেমচন্দ্রঃ॥ কুটীসমুদায়ঃ। গ্রামঃ। ইত্যন্যে॥ গৃহমিতি ভট্টঃ॥ কুটীগ্রামকয়োঃ পল্লীতি শাশ্বতঃ॥ স্থানমিতি স্বামী॥ পতন্তি ভরণেন ভ্রমণেন চ জীবন্তীতি ক্বিপি পতো গাবঃ তে লীয়ন্তেঽত্র পল্লিঃ নাম্নীতি ডিঃ পাচ্ছোণাদীতি ঈপি পল্লী চ গোপপল্লীপ্রভৃতি চ। ইত্যাভীরপল্লিশব্দটীকায়াং ভরতঃ॥

পল্লিকা (স্ত্রী) গৃহগোধিকা। ইতি রাজনির্ঘণ্টঃ॥

পল্লিবাহঃ (পুং) তৃণভেদঃ। যথা। পল্লিবাহো দীর্ঘতৃণঃ সুপত্রস্তাম্রবর্ণকঃ। অদৃঢ়ঃ শাকপত্রাদিঃ পশূনামবলপ্রদঃ॥ ইতি রাজনির্ঘণ্টঃ॥

পল্লী (স্ত্রী) স্বল্পগ্রামঃ। কুটী। ইতি বিশ্বমেদিন্যৌ॥ নগরভেদঃ। স তু দক্ষিণদেশে প্রসিদ্ধঃ ত্রিচনাপল্ল্যাদিঃ। ইতি শব্দরত্নাবলী॥ ক্ষুদ্রজন্তুবিশেষঃ। টিকৃটিকী ইতি ভাষা। তৎপর্য্যায়ঃ। মুষলী ২ গৃহগোধা ৩ বিশম্বরা ৪ জ্যেষ্ঠা ৫ কুড্যমৎস্যঃ ৬ পল্লিকা ৭ গৃহগোধিকা ৮। ইতি রাজনির্ঘণ্টঃ॥ গৃহগোলিকা ৯ মাণিক্যা ১০ ভিত্তিকা ১১ গৃহোলিকা ১২। ইতি হেমচন্দ্রঃ॥ অবশিষ্টং জ্যেষ্ঠীশব্দে দ্রষ্টব্যং॥

পল্বলং (ক্লী পুং) অল্পসরঃ। ইত্যমরঃ॥ তস্য লক্ষণং যথা। অল্পং সরঃ পল্বলং স্যাদ্যত্র চন্দ্রর্ক্ষগে রবৌ। ন তিষ্ঠতি জলং কিঞ্চিত্তত্রত্যং বারি পাল্বলং॥ তজ্জলগুণাঃ। পাল্বলং বার্য্যভিষ্যন্দি গুরু স্বাদু ত্রিদোষকৃৎ। ইতি ভাবপ্রকাশঃ॥ পাল্বলং গুর্ব্বভিষ্যন্দি বিষ্টম্ভি দোষলং পরং। ইতি রাজবল্লভঃ॥

পবং (ক্লী) গোময়ং। ইতি শব্দচন্দ্রিকা॥

পবঃ (পুং) নিষ্পাবঃ। স চ ধান্যাদীনাং নির্বুষীকরণং। শাল্যাদেঃ শোধনং বহুলীকরণং। ইত্যমরভরতৌ॥ বায়ুঃ। ইতি শব্দচন্দ্রিকা॥

পবনং (ক্লী) কুম্ভকারস্য আমঘটাদিপাকস্থানং। পোয়ান্ ইতি ভাষা। ইতি মেদিনী॥ পয়নমিতি প্রমাদপাঠঃ। জলং। ইতি শব্দমালা॥ প্রযতে ত্রি। ইতি শব্দরত্নাবলী॥ পবিত্রীকরণঞ্চ॥

পবনঃ (পুং) নিষ্পাবঃ। বায়ুঃ। ইতি মেদিনী॥ অষ্টৌ বাহ্যপবনা যথা। ভূবায়ুরাবহ ইহ প্রবহস্তদূর্দ্ধঃ স্যাদুদ্বহস্তদনু সংবহসংজ্ঞকশ্চ। অন্যঃ পরোঽপি সুবহঃ পরিপূর্ব্বকোঽস্মাদ্বাহঃ পরাবহ ইমে পবনাঃ প্রসিদ্ধাঃ॥ ইতি সিদ্ধান্তশিরোমণিঃ॥ *॥ সপ্ত পবনাধিপা যথা। শাকঃ শরাব্ধিসংযুক্তো মুনিভির্ভাগহারিতঃ। আবহাদিক্রমেণৈব সপ্ত বাতাঃ প্রকীর্ত্তিতাঃ॥ আবহঃ প্রবহশ্চৈব সম্বহো নিবহস্তথা। উদ্বহো বিবহো বায়ুঃ সপ্ত বাতাঃ প্রকীর্ত্তিতাঃ॥ ইতি জ্যোতিস্তত্ত্বং॥ অন্যদ্ বায়ুশব্দে দ্রষ্টব্যং॥

পবনবিজয়ঃ (পুং) শুভাশুভসূচকশ্বাসবায়ুজয়োপায়কগ্রন্থবিশেষঃ। যথা। সূত উবাচ। হরেঃ শ্রুত্বা হরো গৌরীং দেহস্থং জ্ঞানমব্রবীৎ। কুজো বহ্নী রবিঃ শৌরিরাপঃ প্রকীর্ত্তিতাঃ॥ বায়ুসংস্থাস্থিতো রাহুর্দক্ষরন্ধ্রাবভাসকঃ। গুরুঃ শুক্রস্তথা সৌম্যশ্চন্দ্রশ্চৈব চতুর্থকঃ॥ বামনাড্যাস্তু মধ্যস্থান্ কারয়েদাত্মনস্তথা। যদাচার ইড়াযুক্তস্তদা কর্ম্ম সমাচরেৎ॥ স্থানসেবাং তথা ধ্যানং বাণিজ্যং রাজদর্শনং। অন্যানি শুভকর্ম্মাণি কারয়েত প্রযত্নতঃ॥ দক্ষনাড়ীপ্রবাহে তু শনির্ভৌমশ্চ সৈংহিকঃ। ইনশ্চৈব-তথাপ্যেব পাপানামুদয়ো ভবেৎ॥ শুভাশুভবিবেকো হি জ্ঞায়তে তু স্বরোদয়াৎ। দেহমধ্যে স্থিতা নাড্যো বহুরূপাঃ সুবিস্তরাঃ॥ নাভেরধস্তাদযঃ কন্দো অঙ্কুরাস্তত্র নির্গতাঃ। দ্বাসপ্ততিসহস্রাণি নাভিমধ্যে ব্যবস্থিতাঃ॥ চক্রবচ্চ স্থিতাস্তাস্তু সর্ব্বাঃ প্রাণহরাঃ স্মৃতাঃ। তাসাং মধ্যে ত্রয়ঃ শ্রেষ্ঠা বামদক্ষিণমধ্যমাঃ॥ বামা সোমাত্মিকা প্রোক্তা দক্ষিণা রবিসন্নিভা। মধ্যমা চ ভবেদগ্নিঃ ফলতী কালরূপিণী॥ বামা হ্যমৃতরূপা চ জগদাপ্যায়নে স্থিতা। দক্ষিণা রৌদ্রভাগেন জগচ্ছোষয়তে সদা॥ দ্বয়োর্বাহে তু মৃত্যুঃ স্যাৎ সর্ব্বকার্য্যবিনাশিনী। নির্গমে চ ভবেদ্বামা প্রবেশে দক্ষিণা স্মৃতা॥ কারয়েৎ ক্রূরকর্ম্মাণি প্রাণে পিঙ্গলসংস্থিতে। ইড়াচারে তথা সৌম্যং চন্দ্রসূর্য্যগতস্তথা॥ যাত্রায়াং সর্ব্বকার্য্যেষু বিষাপহরণে ইড়া। ভোজনে মৈথুনে যুদ্ধে পিঙ্গলা সিদ্ধিদায়িকা॥ উচ্চাটমারণাদ্যেষু কর্ম্মস্বেতেষু পিঙ্গলা। মৈথুনে চৈব সংগ্রামে ভোজনে সিদ্ধিদায়িকা॥ শোভনেষু চ কার্য্যেষু যাত্রায়াং বিষকর্ম্মণি। শান্তিমুক্ত্যর্থসিদ্ধৌ চ ইড়া যোজ্যা নরাধিপৈঃ॥ দ্বাভ্যাঞ্চৈব প্রবাহে চ ক্রূরসৌম্যবিবর্জনে। বিষুবতীস্তু জানীয়াৎ সংস্মরেত্তু বিচক্ষণঃ॥ সৌম্যাদিশুভকার্য্যেষু লাভাদিজয়জীবিতে। গমনাগমনে চৈব বামা সর্ব্বত্র পূজিতা॥ যুদ্ধাদিভোজনে ঘাতে স্ত্রীণাঞ্চৈব তু সঙ্গমে। প্রশস্তা দক্ষিণা নাড়ী প্রবেশে ক্ষুদ্রকর্ম্মণি॥ শুভাশুভানি কার্য্যাণি লাভালাভৌ জয়াজয়ৌ। জীবাজীবায় যৎ পৃচ্ছেন্ন সিধ্যতি চ মধ্যমা॥ বামাচারেঽথবা দক্ষে প্রত্যয়ে যত্র নায়কঃ। তত্রস্থঃ পৃচ্ছতে যস্তু তত্র সিদ্ধির্ন সংশয়ঃ॥ বৈচ্ছন্দো বামদেবস্তু যদা বহতি চাত্মনি। তত্র ভাগে স্থিতঃ পৃচ্ছেৎ সিদ্ধির্ভবতি নিষ্ফলা॥ বামে বা দক্ষিণে বাপি যত্র সংক্রমতে শিরা। ঘোরে ঘোরাণি কর্ম্মাণি সৌম্যে বৈ মধ্যমানি চ॥ প্রস্থিতে ভাগতো হংসে দ্বাভ্যাং বৈ সর্ব্ববাহিনি। তদা মৃত্যুং বিজানীয়াদ্যোগী যোগবিশারদঃ॥ যত্র যত্র স্থিতঃ পৃচ্ছেদ্বামদক্ষিণসংমুখঃ। তত্র তত্র সমং দিশ্যাদ্বাতস্যোদয়নং সদা॥ অগ্রতো বামিকা শ্রেষ্ঠা পৃষ্ঠতো দক্ষিণা শুভা। বামেন বামিকা প্রোক্তা দক্ষিণে দক্ষিণা শুভা॥ জীবো জীবতি জীবেন যচ্ছূন্যং তৎ স্বরো ভবেৎ। যৎকিঞ্চিৎ কার্য্যমুদ্দিষ্টং জয়াদিশুভলক্ষণং॥ তৎ

সর্ব্বং পূর্ণনাড্যাস্তু জায়তে নির্ব্বিকল্পকং। অন্যনাড্যাদিপর্য্যন্তপক্ষত্রয়মুদাহৃতং ॥ যাবৎ ষষ্ঠীস্তু পৃচ্ছায়াং পূর্ণায়াং প্রথমো জয়েৎ। রিক্তায়াস্তু দ্বিতীয়স্তু কথয়েত্তদশঙ্কিতঃ॥ বামাচারঃ সমং বায়ুর্জায়তে কর্ম্ম সিদ্ধিদং। প্রবৃত্তে দক্ষিণে মার্গে বিষমে বিষমাক্ষরং ॥ অন্যত্র বামবাহে তু নাম বৈ বিষমাক্ষরং। তদাসৌ জয়মাপ্নোতি যোধঃ সংগ্রামমধ্যতঃ ॥ দক্ষবাতপ্রবাহে তু যদি নাম সমাক্ষরং। জায়তে নাত্র সন্দেহো নাড়ীমধ্যে তু লক্ষয়েৎ ॥ পিঙ্গলান্তর্গতে প্রাণে সমানীয়াহবঞ্জয়েৎ। যাবন্নাড্যোদয়ং চারস্তাং দিশং যাবদাজয়েৎ। ন জাতু জয়তে সোঽপি নাত্র কার্য্যা বিচারণা ॥ অথ সংগ্রামমধ্যে তু যত্র নাড়ী সদা বহেৎ। সা দিশা জয়মাপ্নোতি শূন্যে ভঙ্গং বিনির্দ্দিশেৎ ॥ জাতচারে জয়ং বিদ্যান্মৃতকে মৃতমাদিশেৎ। জয়ং পরাজয়ঞ্চৈব যো জানাতি স পণ্ডিতঃ ॥ বামে বা দক্ষিণে বাপি যত্র সঞ্চরতে শিরা। কৃত্বা তৎপদমাদৌ তু যাত্রাং নয়তি শোভনাং ॥ শশিসূয্যপ্রবাহে তু সতি যুদ্ধং সমাচরেৎ। তত্রস্থঃ পৃচ্ছতে যস্তু স সাধুর্জ্জয়তে ধ্রুবং ॥ যাং দিশং বহতে বায়ুস্তাং দিশং যাবদাজয়েৎ। জয়তে নাত্র সন্দেহ ইন্দ্রো যদ্যগ্রতঃ স্থিতঃ ॥ মেষাদ্যা দশ যা নাড্যো দক্ষিণা বামসংস্থিতাঃ। চরস্থিরদ্বিমার্গে তাস্তাদৃশে তাদৃশঃ ক্রমাৎ ॥ নির্গমে নির্গমং যাতি সংগ্রহে সংগ্রহং বিদুঃ। পৃচ্ছকস্য বচঃ শ্রুত্বা ঘণ্টাকারেণ লক্ষয়েৎ ॥ বামে বা দক্ষিণে বাপি পঞ্চতত্ত্বস্থিতঃ শিবে। ঊর্দ্ধেঽগ্নিরধ আপশ্চ তির্য্যক্‌সংস্থঃ প্রভঞ্জনঃ। মধ্যে তু পৃথিবী জ্ঞেয়া নভঃ সর্ব্বত্র সর্ব্বদা ॥ ঊর্দ্ধে মৃত্যুরধঃ শান্তিস্তির্য্যক্ চোদ্‌ঘাটয়েৎ সুধীঃ। মধ্যে হৃস্তং বিজানীয়ান্মোক্ষঃ সর্ব্বত্র সর্ব্বগে ॥ ইতি গারুড়ে পবনবিজয়াদি ৬৭ অধ্যায়ঃ ॥

পবনব্যাধিঃ (পুং) উদ্ধবঃ। শ্রীকৃষ্ণস্য সখা। ইতি ত্রিকাণ্ডশেষঃ ॥ বায়ুরোগশ্চ ॥

পবনাত্মজঃ (পুং) হনূমান্। ইতি শব্দরত্নাবলী ॥ হব্যবাহনঃ। ইতি মৎস্যপুরাণং ॥ বায়োরগ্নিরিতি স্মরণাৎ ॥

পবনালঃ (পুং) ধান্যবিশেষঃ। দেধান ইতি পোনরী ইতি চ ভাষা। তৎপর্য্যায়ঃ। দেবধান্যং ২ চূর্ণাহ্বঃ ৩ জুহুলঃ ৪ জুললঃ ৫ বীজপুষ্পঃ ৬ পুষ্পগন্ধঃ ৭। অস্য গুণাঃ। হিতত্বং। স্বাদুত্বং। লোহিতত্বং। শ্লেষ্মপিত্তনাশিত্বং। অবৃষ্যত্বং। তুবরত্বং। রূক্ষত্বং। ক্লেদকারিত্বং। লঘুত্বঞ্চ। ইতি ভাবপ্রকাশঃ ॥

পবনাশঃ (পুং) সর্পঃ। ইতি হলায়ুধঃ ॥

পবনাশনঃ (পুং) সর্পঃ। ইত্যমরঃ ॥

পবনাশনাশঃ (পুং) গরুড়ঃ। ইতি হলায়ুধঃ ॥ ময়ূরঃ। যথা। স্বযোনিভক্ষ্যধ্বজসম্ভবানাং শ্রুত্বা নিনাদং গিরিগহ্বরেষু। তমোঽরিবিম্বপ্রতিবিম্বধারী রুরাব কান্তে পবনাশনাশঃ ॥ ইত্যুত্তরচোরপঞ্চাশিকা ॥

পবনেষ্টঃ (পুং) মহানিম্বঃ। ইতি রত্নমালা ॥

পবনোম্বুজং (ক্লী) পরূষং। ইতি শব্দচন্দ্রিকা ॥

পবমানঃ (পুং) বায়ুঃ। ইত্যমরঃ॥ নির্মথ্যাগ্নিঃ। স চ গার্হপত্যাগ্নিঃ। যথা। অথ যঃ পবমানস্তু নির্ম্মথ্যোঽগ্নিঃ স উচ্যতে। স চ বৈ গার্হপত্যোঽগ্নিঃ প্রথমো ব্রহ্মণঃ স্মৃতঃ॥ ইতি মাৎস্যে ৪৮ অধ্যায়ঃ॥

পবমানাত্মজঃ (পুং) হব্যবাহনঃ। যথা। পবমানাত্মজো হ্যগ্নির্হব্যবাহন উচ্যতে। ইতি মাৎস্যে ৪৮ অধ্যায়ঃ॥

পবাকা (স্ত্রী) বাত্যা। চক্রবাতঃ। ইত্যুণাদিকোষঃ॥

পবিঃ (পুং) বজ্রং। ইত্যমরঃ॥

পবিতঃ (ত্রি) পূতঃ। ইতি মুগ্ধবোধব্যাকরণং॥ মরীচে ক্লী। ইতি রাজনির্ঘণ্টঃ॥

পবিতা [ঋ] (ত্রি) পবিত্রতাকারকঃ। যথা। তনুশ্রিয়া যস্য তৃণং স মন্মথঃ কুলশ্রিয়া যঃ পবিতাস্মদন্বয়ং। ইতি নৈষধঃ॥

পবিত্রং (ক্লী) বর্ষণং। কুশং। তাম্রং। পয়ঃ। ইতি মেদিনী॥ ঘর্ষণং। ইতি বিশ্বঃ॥ অর্ঘোপকরণং। ইতি হেমচন্দ্রঃ॥ যজ্ঞোপবীতং। ইতি ত্রিকাণ্ডশেষঃ॥ ঘৃতং। মধু। ইতি রাজনির্ঘণ্টঃ॥ পার্ব্বণশ্রাদ্ধাদাবর্ঘার্থং হোমাদাবাজ্যসংস্কারাদ্যর্থঞ্চ সাগ্রনির্গর্ভকুশান্তরবেষ্টিতপ্রাদেশমাত্রকুশপত্রদ্বয়ং। যথা। অনন্তর্গর্ভিণং সাগ্রং কৌশং দ্বিদলমেব চ। প্রাদেশমাত্রং বিজ্ঞেয়ং পবিত্রং যত্র কুত্রচিৎ॥ ইতি শ্রাদ্ধতত্ত্বং॥

পবিত্রঃ (ত্রি) ব্রতাদিনা শুদ্ধঃ। তৎপর্য্যায়ঃ। প্রযতঃ ২ পূতঃ ৩। এতত্রয়ং প্রাণিবিষয়মাত্রং। শুচিঃ ৪ শুদ্ধঃ ৫ পবিত্রিতঃ ৬। ইতি শব্দরত্নাবলী॥ পুণ্যঃ ৭ পাবনঃ ৮ ইতি জটাধরঃ॥ শুদ্ধদ্রব্যং। তৎপর্য্যায়ঃ। পূতং ২ মেধ্যং ৩। এতত্রয়ং অপ্রাণিদ্রব্যবিষয়ং। ইতি ব্রহ্মবর্গে বিশেষ্যনিঘ্নে চ অমরভরতৌ॥ শুদ্ধ্যং ৪ শুচি ৫ পুণ্যং ৬ পূতিবৎ ৭। ইতি জটাধরঃ॥

পবিত্রঃ (পুং) তিলবৃক্ষঃ। পুত্রজীববৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

পবিত্রকং (ক্লী) জালং। ইতি শব্দরত্নাবলী॥ শণসূত্রজালং। ইত্যমরঃ॥ ক্ষত্রিয়স্য যজ্ঞোপবীতং। যথা। কার্পাসমুপবীতং স্যাদ্বিপ্রস্যোর্দ্ধবৃতং ত্রিবৃৎ। শণসূত্রময়ং রাজ্ঞো বৈশ্যস্যাবিকসৌত্রিকং॥ ইতি মনুবচনাৎ পবিত্রকমপি তদুচ্যতে। ইত্যমরটীকায়াং ভরতঃ॥

পবিত্রকঃ (পুং) কুশঃ। দমনকঃ। অশ্বত্থঃ। উডুম্বরঃ। ইতি রাজনির্ঘণ্টঃ॥

পবিত্রধান্যং (ক্লী) যবঃ। ইতি রাজনির্ঘণ্টঃ॥

পবিত্রা (স্ত্রী) তুলসী। ইতি শব্দমালা॥ নদীভেদঃ। ইতি হেমচন্দ্রঃ॥ হরিদ্রা। অশ্বত্থীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

পবিত্রারোপণং (ক্লী) শ্রীকৃষ্ণসম্প্রদানকোপবীতদানরূপোৎসববিশেষঃ। যথা। শ্রাবণস্য সিতে পক্ষে দ্বাদশ্যাং বৈষ্ণবৈর্মুদা। কর্ত্তব্যঃ কৃষ্ণদেবস্য পবিত্রারোপণোৎসবঃ॥ *॥ অথ তন্নিত্যতা বহ্বৃচপরিশিষ্টে। স স্নাতঃ সর্ব্বতীর্থেষু সর্ব্বযজ্ঞেষু দীক্ষিতঃ। হরিশ্চ প্রীতিমাপ্নোতি যঃ পবিত্রং সমাচরেৎ॥ বিধিনা শাস্ত্রদৃষ্টেন যো ন কুর্য্যাৎ পবিত্রকং। হরন্তি

রাক্ষসাস্তস্য বর্ষপূজাদিকং ফলং ॥ যোগসারে চ পবিত্রোৎপত্ত্যুপাখ্যানেন নাগরাজং পবিত্রং প্রতি শ্রীরুদ্রেণ বরদানং। যে ত্বাং ন বহু মন্যন্তে যথা সম্ভাবিতো ময়া। জপহোমাদিকং তেষাং ফলং ত্বামেতু নিশ্চয়াৎ ॥ বিষ্ণুরহস্যে। ন করোতি বিধানেন পবিত্রারোপণন্তু যঃ। তস্য সাম্বৎসরী পূজা নিষ্ফলা মুনিসত্তম ॥ তস্মাদ্ভক্তিসমাযুক্তৈর্নরৈর্বিষ্ণুপরায়ণৈঃ। বর্ষে বর্ষে তু কর্ত্তব্যং পবিত্রারোপণং হরেঃ॥ * ॥ অথ পবিত্রারোপণমাহাত্ম্যং। তত্র বৌধায়নঃ। যাবাংস্তন্তুঃ পবিত্রস্য তাবৎ স্বর্গে মহীয়তে। আয়ুরারোগ্যমৈশ্বর্য্যং বিপুলং তস্য বর্দ্ধতে॥ মহাসংহিতায়াং। সম্বৎসরেণ যা পূজা কৃতা বৈ মন্ত্রিণা দ্বিজ। পবিত্রদানাৎ পূর্ণা স্যাদিত্যাহ ভগবান্ হরিঃ॥ বিষ্ণুরহস্যে। পবিত্রারোপণং বিষ্ণোর্ভুবি মুক্তিপ্রদায়কং। স্ত্রীপুংকীর্ত্তিপ্রদং পুণ্যং সুখসম্পদ্ধনাবহং॥ পুণ্যানাস্তু তথা পুণ্যং সর্ব্বপাপহরন্তু বৈ। পবিত্রারোপণং তস্মাৎ পবিত্রং পরমং স্মৃতং॥ সম্বৎসরে নরো ভক্ত্যা সমভ্যর্চ্চ্য জনার্দ্দনং। যৎ ফলং সমবাপ্নোতি পবিত্রারোপণেন তৎ॥ কিঞ্চ। পাবয়ত্যেনসো নিত্যং ত্রায়তে ভববন্ধনাৎ। পবিত্রং তেন বিখ্যাতং ব্রাহ্মং তেজোঽভিধীয়তে॥ বিষ্ণ্বাখ্যয়া তু বিখ্যাতং তদা লোকে বিধীয়তে। স এব সূত্ররূপেণ যজ্ঞেশঃ কর্ম্মণাং প্রভুঃ॥ তদেব ত্রিগুণীসূত্রং ততং নারায়ণাখ্যয়া। ত্রিদেবাত্মা ত্রিবেদাত্মা ত্র্যক্ষরঃ প্রণবঃ স্মৃতঃ॥ * ॥ অথ পবিত্রারোপণবিধিঃ। সৌবর্ণৈ রাজতৈস্তাম্রৈঃ ক্ষৌমৈঃ সূত্রৈস্তু পাদ্মিকৈঃ। কার্পাসৈর্বা পবিত্রাণীষ্যতে কাশৈঃ কুশৈরপি॥ তত্র কার্পাসিকং সূত্রং ব্রাহ্মণীকর্ত্তিতং শুভং। আনীয় ত্রিগুণীকৃত্য পুনস্ত্রিগুণয়েচ্ছুচিঃ॥ পঞ্চগব্যেন তৎ প্রোক্ষ্য প্রক্ষাল্য শুচিনাম্বুনা। মূলেনাষ্টোত্তরশতং মন্ত্রেণাথাভিমন্ত্রয়েৎ॥ ত্রীণি সাষ্টশতেনাস্য তস্যার্দ্ধেনাস্য চার্দ্ধতঃ। জানূরুনাভিদঘ্নানি পবিত্রাণ্যাচরেৎ প্রভোঃ॥ ষট্‌ত্রিংশদ্‌গ্রন্থয়স্তেষামাদ্যে কার্য্যাস্তু মধ্যমে। চতুর্ব্বিংশতিরন্তে চ দ্বাদশ গ্রন্থয়ো বুধৈঃ॥ অঙ্গুষ্ঠপর্ব্বমাত্রন্তু কুর্য্যাদ্‌গ্রন্থিমথোত্তমে। তদর্দ্ধং মধ্যমে কুর্য্যাত্তদর্দ্ধঞ্চ কনীয়সি॥ গ্রন্থীন্ কুর্ব্বীত সর্ব্বত্র সুবৃত্তান্ সুমনোহরান্। ন বৈ বিষমসংখ্যাকান্ গ্রন্থীন্ কুর্ব্বীত কুত্রচিৎ॥ অষ্টোত্তরসহস্রেণ তৎসূত্রস্য পবিত্রকং। অষ্টোত্তরশতং গ্রন্থিং বনমালাখ্যমাচরেৎ॥ আরভ্য মুকুটং যা তু সূত্রৈর্বিরচিতা শুভা। আপাদলম্বিনী মালা বনমালা প্রকীর্ত্তিতা॥ কুর্য্যাদ্‌গান্ধপবিত্রঞ্চ সূত্রৈর্দ্বাদশভিঃ শুভৈঃ। অরত্নিপ্রমিতং তচ্চ দ্বাদশগ্রন্থিকং কৃতী॥ পবিত্রাণি পরীবারদেবতানাং সমাচরেৎ। সূত্রৈস্তৈরৃতুসংখ্যাকৈঃ কলাসংখ্যার্কসংখ্যকৈঃ॥ তেষু গ্রন্থীন্ যথাশোভং বদ্ধা বহ্নের্গুরোরপি। সপ্তবিংশতিভিঃ সূত্রৈঃ ষড়্‌বিংশতিভিরাত্মনঃ॥ যথাসম্ভবমন্যেষাং পবিত্রাণি চ কারয়েৎ। সম্পাদয়েচ্চ

সর্ব্বাণি শোভনান্যেব যত্নতঃ ॥ তথা চোক্তং। বিশোভসূত্রদানেন কর্ত্তুঃ স্যাদশুভং ফলং। পবিত্রং পরয়া ভক্ত্যা তস্মাৎ কুর্ব্বীত শোভনমিতি ॥ রঞ্জয়িত্বাথ কাশ্মীরাগুরুগোরোচনাদিনা। বস্ত্রেণাচ্ছাদ্য পটলে স্থাপয়েত্তানি বৈণবে॥ ইতি পবিত্রবিনির্ম্মাণং ॥ * ॥ কৃত্বা কৃত্যং দশম্যাঞ্চ পবিত্রারোপণায় হি। কৃষ্ণং বিজ্ঞাপ্য তত্রাদ্রিং যথা প্রাগ্লিখিতং নয়েৎ ॥ একাদশ্যাং প্রভাতে চ নিত্যকৃত্যং সমাপ্য হি। দেবালয়মুপস্কৃত্য মণ্ডলং রচয়েৎ শুভং ॥ কৃত্বা কৃষ্ণস্য নিত্যার্চ্চাং পবিত্রারোপণার্থকাং। পূজাং বিশেষতঃ কৃত্বা কৃষ্ণং বিজ্ঞাপয়েদিদং ॥ ক্রিয়ালোপবিঘাতার্থং যত্ত্বয়া বিহিতং প্রভো। ময়ৈতৎ ক্রিয়তে দেব ভবত্তুষ্ট্যৈ পবিত্রকং ॥ ন মে বিঘ্নো ভবত্বত্র কুরু নাথ দয়াং ময়ি। সর্ব্বথা সর্ব্বদা বিষ্ণো মম ত্বং পরমা গতিঃ ॥ * ॥ দেবস্য সর্ব্বতো ন্যস্যেদ্দন্তকাষ্ঠং জলং কুশান্। মৃত্তিকাঞ্চ হরিদ্রাঞ্চ কুঙ্কুমং রোচনানি চ ॥ উপানহৌ সিতং ছত্রং চামরং ব্যজনং তথা। যবা ব্রীহ্যাদিধান্যানি যথাস্থানং পৃথক্ পৃথক্ ॥ কুম্ভং শুদ্ধাম্বুনা পূর্য্য সর্ব্বতোভদ্রমণ্ডলে। দেবাগ্রতো নিধায়াস্মিন্ পবিত্রাণ্যধিবাসয়েৎ ॥ * ॥ অথ পবিত্রাধিবাসনং। ভগবৎপুরতস্তানি পটলস্থানি পূজয়ন্। আদাবাবাহয়েন্মুলযুজা তন্মনুনা বুধঃ ॥ তন্মন্ত্রশ্চায়ং। ওঁ সাম্বৎসরস্য যাগস্য পবিত্রীকরণায় ভোঃ। বিষ্ণুলোকাৎ পবিত্রাদ্য আগচ্ছেহ নমোঽস্তু তে ॥ তেষ্বাবাহ্য যথাস্থানং ব্রহ্মাদ্যা দেবতাস্ততঃ। তত্তন্মন্ত্রৈঃ সন্নিধাপ্যাক্ষতগন্ধাদিনার্চ্চয়েৎ ॥ তত্র তত্র তা দেবতাশ্চোক্তাঃ। ব্রহ্মবিষ্ণুমহাদেবাস্ত্রিসূত্রীদেবতাঃ স্মৃতাঃ। প্রণবঃ সোমবহ্নী চ ব্রহ্মা নাগঃ শশী রবিঃ॥ শিবশ্চ বিশ্বদেবাশ্চ নবসূত্র্যধিদেবতাঃ। ক্রিয়া চ পৌরুষী বীরা চতুর্থী চাপরাজিতা। জয়া চ বিজয়া চৈব মুক্তিদা চ সদাশিবা। মনোময়ী তু নবমী দশমী সর্ব্বতোমুখী। গ্রন্থীনাং দেবতাস্ত্বেতাস্তাস্তত্র বিনিবেশয়েৎ। তন্মন্ত্রাশ্চৈতে। ওঁ সর্ব্বাভরণচিত্রাঙ্গ সর্ব্বদেবনমস্কৃত। লাবণ্যরূপবিশ্বাত্মন্ জ্যেষ্ঠসূত্রং সমাশ্রয়। ওঁ সর্ব্বলক্ষ্মীকর শ্রীশ সর্ব্বজ্ঞানরসাত্মক। নিবৃত্তরূপবিশ্বাত্মন্ মধ্যসূত্রং সমাশ্রয়। অতিবেগমরুদ্যানে পুরুষাত্মন্ দিবস্পতে। কনীয়ো হে প্রভো দেব তেজসা সূত্রমাশ্রয়॥ যত্র মন্ত্রো ন বর্ত্তেত তত্তন্নামৈব তত্র চ। নমোঽন্তং সচতুর্থীকমূহ্যঃ প্রাগ্লিখনান্মনুঃ ॥ * ॥ অথ কৃষ্ণকরাম্ভোজে পট্টসূত্রেণ নির্ম্মিতং। বিতস্তিমাত্রং বধ্নীয়াৎ ডোরকং মঙ্গলাত্মকং ॥ তত্র মন্ত্রঃ। ওঁ সম্বৎসরকৃতার্চ্চায়াঃ সম্পূর্ণফলদায়ি যৎ। পবিত্রীকরণায়ৈতৎ কৌতুকং ধরতে নমঃ॥ ততো গন্ধপবিত্রঞ্চ গৃহীত্বা ধূপিতং বুধঃ। ভগবন্তং নমস্কৃত্য ভক্ত্যা সংপ্রার্থয়েদিদং ॥ আমন্ত্রিতোঽসি দেবেশ সার্দ্ধং দেবগণেশ্বরৈঃ। মন্ত্রেশে-

লোকপালৈশ্চ সহিতঃ পরিবারকৈঃ ॥ আগচ্ছ ভগবন্নীশ বিধিসংপূর্ত্তিকারক। প্রাতস্ত্বাং পূজয়িষ্যামি সান্নিধ্যং কুরু কেশব ॥ ততশ্চ। বিষ্ণুতেজোদ্ভবং রম্যং সর্ব্বপাতকনাশনং। সর্ব্বকামপ্রদং দেব তবাঙ্কে ধারয়াম্যহং ॥ অনেন মনুনা বিদ্বান্ মূলসংপুটিতেন হি। দদ্যাৎ গন্ধপবিত্রং তচ্ছ্রীকৃষ্ণচরণাব্জয়োঃ॥ নীরাজ্য দেবং স্তুত্বা চ দত্ত্বা পুষ্পাঞ্জলিং ততঃ। তৎপবিত্রাণি তৎকুম্ভমপ্যস্ত্রমনুনাথবা ॥ নৃসিংহমনুনা রক্ষেৎ কবচেনাবগুণ্ঠয়েৎ। গীতনৃত্যাদিনা কুর্য্যাদ্বিধিবজ্জাগরং নিশি ॥ * ॥ অথ পবিত্রার্পণং। প্রাতঃকৃত্যানি নির্ব্বৃত্য নিত্যপূজাং বিধায় চ। বিশেষতোঽর্চ্চয়েদ্দেবং পবিত্রাণি চ পূজয়েৎ ॥ মহাবাদিত্রঘোষেণ নামসংকীর্ত্তনোৎসবৈঃ। মূলসংপুটিতেনৈব পবিত্রাণ্যর্পয়েৎ ক্রমাৎ॥ বক্ষ্যমাণেন মন্ত্রেণ ভক্ত্যা কৃষ্ণায় বৈষ্ণবঃ। পূজাং কৃত্বা পরীবারদেবানাং তান্যথার্পয়েৎ ॥ অর্পণমন্ত্রঃ। কৃষ্ণ কৃষ্ণ নমস্তুভ্যং গৃহাণেদং পবিত্রকং। পবিত্রকরণার্থায় বর্ষপূজাফলপ্রদং ॥ পবিত্রকং কুরুষ্বাদ্য যন্ময়া দুষ্কৃতং কৃতং। শুদ্ধো ভবাম্যহং দেব ত্বৎপ্রসাদাজ্জনার্দ্দন ॥ মহাপূজাং ততঃ কৃত্বা স্তুত্বা নত্বার্থয়েৎ প্রভুং। বনমালাং যথা দেব কৌস্তুভং সততং হৃদি ॥ তদ্বৎ পবিত্রতন্তূংশ্চ পূজাঞ্চ হৃদয়ে বহ। জানতাজানতা বাপি ন কৃতং যত্তবার্চ্চনং ॥ কেনচিদ্বিঘ্নদোষেণ পরিপূর্ণন্তদস্তু মে ॥ * ॥ অথাগ্নিং বিধিনাভ্যর্চ্চ্য পবিত্রং তস্য চার্পয়েৎ। কৃষ্ণে নিবেদয়েন্মন্ত্রহীন ইত্যাদিনা কৃতং॥ গুরুঞ্চ শক্ত্যা সংপূজ্য পবিত্রং গুরবেঽর্পয়েৎ। বৈষ্ণবেভ্যঃ পবিত্রাণি দত্ত্বৈকং ধারয়েৎ স্বয়ং ॥ সংপূজ্য বৈষ্ণবান্ বিপ্রান্ শক্ত্যা সংভোজ্য বন্ধুভিঃ। সমং মহাপ্রসাদান্নং সুখং ভুঞ্জীত বৈষ্ণবঃ ॥ * ॥ অথ পবিত্রবিসর্জনবিধিঃ। তন্ত্রে। মাসং পক্ষমহোরাত্রং ত্রিরাত্রং ধারয়েত্তথা। দেবং তং সূত্রসন্দর্ভং দেশকালানুসারতঃ ॥ প্রত্যহং স্নানকর্ম্মাদি সূত্রাণ্যুত্তার্য্য কারয়েৎ। অভিষিচ্যাথ তোয়েন পুনর্দ্দেবে নিবেদয়েৎ ॥ অথান্তে দেবমভ্যর্চ্চ্য বিশেষাৎ পুষ্পচন্দনৈঃ। নৈবেদ্যং বিবিধং দত্ত্বা ততঃ সূত্রং বিসর্জয়েৎ ॥ ওঁ সাম্বৎসরীং শুভাং পূজাং সম্পাদ্য বিধিবন্মম। ব্রজেদানীং পবিত্র ত্বং বিষ্ণুলোকং বিসর্জ্জিতং ॥ যাবদ্দেবে পবিত্রাণি তাবত্তিষ্ঠেৎ সমাহিতঃ। ব্রহ্মচারী হবিষ্যাশী দেবপূজাপরায়ণঃ ॥ তৎফলঞ্চোক্তং বৌধায়নেন। এবং যঃ কুরুতে বিদ্বান্ বর্ষে বর্ষে ন সংশয়ঃ। স যাতি পরমং স্থানং যত্র দেবো নৃকেশরী ॥*॥ অথ তত্র মুখ্যগৌণকালনির্ণয়ঃ। মুখ্যকালস্য চৈবাস্য বিঘ্নতোপগমে সতি। ভাদ্রাদাবপি কর্ত্তব্যং পবিত্রারোপণং প্রভোঃ ॥ তথা চ বিষ্ণুরহস্যে। শ্রাবণস্য সিতে পক্ষে কর্কটস্থে দিবাকরে। দ্বাদশ্যাং বাসুদেবায় পবিত্রারোপণং স্মৃতং ॥ সিংহস্থে বা রবৌ কার্য্যং কন্যায়াঞ্চ গতেঽথবা। তস্যামেব তিথৌ সম্যক্ তুলা-

সংস্থে কথঞ্চন ॥ মন্ত্রতন্ত্রপ্রকাশে চ। কর্কটঞ্চ গতে সূর্য্যে তথা সিংহগতেঽপি বা। দ্বাদশ্যাং শুক্লপক্ষস্য হরের্দদ্যাৎ পবিত্রকং ॥ অথ চেদ্বিঘ্নপাতেন মুখ্যকালো ন লভ্যতে। কন্যাগতেঽপি কুর্ব্বীত যাবন্নোত্তিষ্ঠতে হরিঃ ॥ ইতি হরিভক্তিবিলাসঃ ॥

পবিত্রারোহণং (ক্লী) পবিত্রারোপণং। যথা। আষাঢ়শুক্লপক্ষস্য যাষ্টমী শ্রাবণস্য চ। পবিত্রারোহণং কুর্য্যাদ্দেব্যাঃ প্রীতিকরং পরং ॥ দুর্গাতন্ত্রেণ মন্ত্রেণ দুর্গাবীজেন ভৈরব। বৈষ্ণবীতন্ত্রমন্ত্রেণ পবিত্রারোহণঞ্চরেৎ ॥ বিশেষাৎ শ্রাবণারভ্য দেব্যাঃ কুর্য্যাৎ পবিত্রকং। সর্ব্বেষামপি দেবানাং পবিত্রারোহণঞ্চরেৎ ॥ * ॥ আষাঢ়ে শ্রাবণে বাপি সম্বৎসরফলপ্রদং। প্রতিপদ্ধনদস্যোক্তা পবিত্রারোহণে তিথিঃ ॥ শ্রিয়া দেব্যা দ্বিতীয়া তু তিথীনামুত্তমা তিথিঃ। তৃতীয়া ভবভাবিন্যাশ্চতুর্থী তৎসুতস্য চ ॥ পঞ্চমী সোমরাজস্য ষষ্ঠী প্রোক্তা গুহস্য চ। সপ্তমী ভাস্করস্যোক্তা দুর্গায়াশ্চ তথাষ্টমী ॥ মাতৃণাং নবমী প্রোক্তা বাসুকের্দশমী স্মৃতা। একাদশী ঋষীণাঞ্চ দ্বাদশী চক্রপাণিনঃ ॥ ত্রয়োদশী ত্বনঙ্গস্য মম চৈব চতুর্দ্দশী। ব্রহ্মণো দিক্পতীনাঞ্চ পৌর্ণমাসী তিথির্মতা ॥ * ॥ পবিত্রারোহণং যো বৈ দেবানাং ন সমাচরেৎ। তস্য সাম্বৎসরীপূজাফলং হরতি কেশবঃ ॥ তস্মাদযত্নেন কর্ত্তব্যং পবিত্রারোহণং পরং। কৃতে বহুফলপ্রাপ্তিস্তৎপূজা সফলা ভবেৎ ॥ * ॥ পবিত্রং যেন সূত্রেণ যথা কার্য্যং বিজানতা। তৎ শৃণুষ্ব প্রমাণঞ্চ রচনাসু চ ভৈরব ॥ প্রথমং দর্ভসূত্রঞ্চ পদ্মসূত্রং ততঃ পরং। ততঃ ক্ষৌমং সুপুণ্যং স্যাৎ কার্পাসকমতঃ পরং। পট্টসূত্রং তথান্যেন পবিত্রাণি চ কারয়েৎ ॥ পবিত্রাণি বিচিত্রাণি কর্ত্তব্যাণি প্রযত্নতঃ। গন্ধমাল্যৈঃ সুরভিভিরর্চ্চিতানি যথোদিতং॥ কন্যা চ কর্ত্তয়েৎ সূত্রং প্রমদা বা পতিব্রতা। বিধবা সাধুশীলা চ দুঃশীলা নহি কর্ত্তয়েৎ ॥ যৎ সূচিভিন্নং দগ্ধঞ্চ ভস্মধূমাভিগুণ্ঠিতং। তদ্বর্জয়ত যত্নেন সূত্রমস্মিন্ পবিত্রকে ॥ উপযুক্তঞ্চাখুদষ্টং মদ্যরক্তাদিদূষিতং। মলিনং নীলরক্তঞ্চ যত্নেন পরিবর্জ্জয়েৎ। সূত্রৈঃ পবিত্রং কুর্ব্বীত কনিষ্ঠোত্তমমধ্যমং ॥ * ॥ কনিষ্ঠকং পবিত্রন্তু সপ্তবিংশতিতন্তুভিঃ। মর্ত্যলোকে যশঃকীর্ত্তিসুখসৌভাগ্যবর্দ্ধনং॥ চতুঃপঞ্চাশতা প্রোক্তং তন্তূনাং মধ্যমং পরং। দিব্যভোগাবহং পুণ্যং স্বর্গসৌখ্যপ্রদায়কং ॥ উত্তমঞ্চৈব তন্তূনামষ্টোত্তরশতেন বৈ। তদ্দত্ত্বা তু মহাদেব্যৈ শিবসাযুজ্যমাপ্নুয়াৎ ॥ উত্তমং বাসুদেবায় দদ্যাদ্যদি পবিত্রকং। তদায়াতি হরের্লোকং সাধকো নাত্র সংশয়ঃ ॥ অষ্টোত্তরসহস্রন্তু রত্নমালেতি গীয়তে। পবিত্রন্তু মহাদেব্যা ভুক্তিমুক্তিপ্রদায়কং ॥ রত্নমালাস্তু যো যচ্ছেন্মহাদেব্যৈ পবিত্রকং। কল্পকোটিসহস্রাণি স্বর্গে স্থিত্বা শিবো ভবেৎ ॥ এতত্তু নাগহারাখ্যং

শঙ্করস্য পবিত্রকং। অষ্টোত্তরসহস্রেণ তন্তুনাং সুমনোহরং॥ যৎ প্রযচ্ছতি মহ্যন্তু স যাবান্ তন্তুসঞ্চয়ঃ। তাবৎকল্প-সহস্রাণি মম লোকে প্রমোদতে॥ অষ্টো-ত্তরসহস্রেণ বনমালা হরেঃ স্মৃতা। তন্তুনাং তস্য দানেন বিষ্ণুসাযুজ্যমাপ্নুয়াৎ॥ * ॥ যৎ কনিষ্ঠং পবিত্রন্তু নাভিমাত্রং ভবেত্তু তৎ। দ্বাদশগ্রন্থিসংযুক্তং প্রমাণেন নিযোজয়েৎ॥ ঊরুপ্রমাণং মধ্যং স্যাৎ গ্রন্থীনাং তত্র যোজয়েৎ। চতুর্ব্বিংশতি-মপ্যস্য মালামাত্মন এব চ॥ পবিত্র-মুত্তমং প্রোক্তং জানুমাত্রঞ্চ ভৈরব। ষট্-ত্রিংশত্তস্তুগ্রন্থীনাং যোজয়েদাত্মমানতঃ॥ শতমষ্টোত্তরং কার্য্যং গ্রন্থীনাং স্ববিধা-নতঃ। নাগহারাদ্বয়ং তদ্বদর্থেষু চ বিধা-নতঃ॥ পবিত্রং ক্রিয়তে যেন সূত্রেণ গ্রন্থয়ঃ পুনঃ। তদন্যবর্ণসূত্রেণ কর্ত্তব্যা লক্ষণান্বিতাঃ॥ গ্রন্থিস্তু সপ্তভিঃ কুর্য্যাদ্-বেষ্টনৈস্তু কনিষ্ঠকে। দ্বিগুণৈর্মধ্যমে কুর্য্যাত্রিগুণৈরুত্তমে তথা॥ * ॥ অধিবাস্য পবিত্রাণি পূর্ব্বস্মিন্দিবসে পুনঃ। মন্ত্র-ন্যাসং পবিত্রেষু কুর্য্যাত্তত্র পরেঽহনি॥ দুর্গাবীজেন মন্ত্রেণ মন্ত্রন্যাসং দ্বিজ-শ্চরেৎ। বৈষ্ণবীতন্ত্রমন্ত্রেণ কুর্য্যুরন্যে চ ভৈরব॥ প্রতিগ্রন্থি স্বয়ং কুর্য্যান্মন্ত্রন্যাসং বিচক্ষণঃ। অঙ্গুষ্ঠাগ্রেণ জপ্যন্তু মালায়া-মিহ ভৈরব॥ যাবন্তো গ্রন্থয়শ্চাত্র তাব-ন্ত্যেব চ সংন্যসেৎ। মন্ত্রাণি তস্য তেন স্যাৎ দেবাঙ্গোপনিযোজনং॥ দুর্গা-তন্ত্রেণ মন্ত্রেণ তত্ত্বন্যাসন্তু কারয়েৎ। একত্র ন্যস্য সকলং যজ্ঞপাত্রে পবিত্রকং॥ তস্মিন্নিধায় পুষ্পাণি গন্ধাদি চ সুশো-ভনং। তত্ত্বন্যাসং ততঃ কুর্য্যাদঙ্গুল্যগ্রেণ ভৈরব॥ বিষ্ণোস্তু মূলমন্ত্রেণ তত্ত্বন্যাসন্তু কারয়েৎ। ইদং বিষ্ণুরিতি প্রোক্তং মন্ত্র-ন্যাসে দ্বিজস্য হি॥ * ॥ শূদ্রাণাং মন্ত্র-বিন্যাসে মন্ত্রো বৈ দ্বাদশাক্ষরঃ। প্রাসা-দেন তু মন্ত্রেণ মন্ত্রন্যাসো মম স্মৃতঃ॥ অনেন মন্ত্রন্যাসন্তু দানঞ্চানেন কারয়েৎ। কুঙ্কুমোশীরখর্জ্জুরৈশ্চন্দনাদিবিলেপনৈঃ॥ পবিত্রাণি বিলিপ্যাথ তত্ত্বন্যাসন্তু যোজ-য়েৎ। সম্পূজ্য বিধিবদ্দেবীং মণ্ডলে প্রযতো নরঃ॥ বৈষ্ণবীতন্ত্রমন্ত্রেণ দুর্গা-মন্ত্রেণ ভৈরব। দুর্গাবীজেন দদ্যাত্তু দেব্যা মূর্দ্ধ্নি পবিত্রকং॥ যস্য দেবস্য যা পূজা তস্য তস্যৈব মণ্ডলং। যস্য যস্য তু যো মন্ত্রো যথাধ্যানাদিপূজনং॥ তন্দেবং তেন ভাবেন পূজয়িত্বা প্রযত্নতঃ। তস্যৈব বীজ-মন্ত্রাভ্যাং মূর্দ্ধ্নি দদ্যাৎ পবিত্রকং॥ পবিত্রং মম যো দদ্যাদ্দেবেভ্যশ্চ পবিত্রকং। সর্ব্বে-ষামেব দেবানাং সম্পূর্ণার্থঞ্চ ভৈরব॥ * ॥ অগ্নির্ব্রহ্মা ভবানী চ গজবক্ত্রো মহোরগঃ। স্কন্দো ভানুর্মাতৃগণো দিক্‌পালাশ্চ নব গ্রহাঃ॥ এষাং ঘটেষু প্রত্যেকং পূজয়িত্বা যথাবিধি। মূর্দ্ধ্নি পবিত্রমেকৈকং দদ্যা-দেভ্যঃ সমাহিতঃ॥ * ॥ পঞ্চগব্যচরুং কৃত্বা দেব্যৈ দত্ত্বাহুতিত্রয়ং। তেনৈব বহ্নয়ে দত্ত্বা শম্ভবে চ যথাবিধি॥ আজ্যৈরষ্টোত্তরশতং তিলৈরাজ্যৈস্তথৈব চ। অষ্টোত্তরশতং দদ্যান্মহাদেব্যৈ চ

সাধকঃ॥ এবমেবং বিধানেন বিষ্ণ্বাদীনাঞ্চ বৈষ্ণবঃ। পবিত্রারোপণং কুর্য্যাদ্ধর্ম্মকামার্থসিদ্ধয়ে॥ * ॥ নৈবেদ্যৈর্ব্বিবিধৈঃ পেয়ৈর্বটপিষ্টকমোদকৈঃ। কুষ্মাণ্ডৈর্নারিকেলৈশ্চ খর্জ্জূরৈঃ পনসৈস্তথা॥ আম্রদাড়িমকর্কারুদ্রাক্ষাদিবিবিধৈঃ ফলৈঃ। ভক্ষ্যভোজ্যাদিভিঃ সর্ব্বৈর্ম দ্যৈর্মাংসৈস্তথোদনৈঃ॥ গন্ধৈঃ পুষ্পৈস্তথা ধূপৈর্দীপৈশ্চ সুমনোহরৈঃ। বাসোভির্ভূষণৈশ্চৈব ভবানীং সাধকো যজেৎ॥ নটনর্ত্তকসংঘৈশ্চ বেশ্যাভিরপি ভৈরব। নৃত্যগীতৈঃ সমুদিতো জাগরং কারয়েন্নিশি॥ ভোজয়েদ্‌ব্রাহ্মণাংশ্চাপি জ্ঞাতীনপি দ্বিজোত্তমৈঃ। পবিত্রারোহণে বৃত্তে দক্ষিণামুপদাপয়েৎ॥ হিরণ্যং গাং তিলং বাসো ঘৃতং বা শাকমেব বা। ইমং মন্ত্রং ততঃ পশ্চাৎ সাধকঃ সমুদীরয়েৎ॥ মণিবিদ্রুমমালাভির্মন্দারকুসুমাদিভিঃ। ইয়ং সাম্বৎসরী পূজা তবাস্তু পরমেশ্বরি॥ * ॥ ততো বিসর্জয়েদ্দেবীং পূজাভিঃ প্রীতিপর্ত্তিভিঃ। এবং কৃতে পবিত্রাণাং দানে দেব্যা যথাবিধি॥ সম্বৎসরস্য যা পূজা সম্পূর্ণা বৎস জায়তে। কল্পকোটিশতং যাবদ্দেবী গেহে বসেন্নরঃ। অত্রাপি সুখসৌভাগ্যসমৃদ্ধিরতুলা ভবেৎ॥ ইতি কালিকাপুরাণে ৫৮ অধ্যায়ঃ॥ গরুড়পুরাণে ৪২।৪৩ অধ্যায়েঽপ্যেতদ্দ্রষ্টব্যং॥

পবিত্রিতঃ (ত্রি) পবিত্রমস্য জাত ইত্যর্থে ইতপ্রত্যয়নিষ্পন্নঃ। ইতি ব্যাকরণং॥ তৎপর্য্যায়ঃ। পবিত্রঃ ২ প্রযতঃ ৩ পূতঃ ৪ শুচিঃ ৫ শুদ্ধঃ ৬। ইতি শব্দরত্নাবলী

পশ ক বন্ধে। ইতি কবিকল্পদ্রুমঃ॥ ক পাশয়তি। ইতি দুর্গাদাসঃ॥

পশ ঞ বাধে। গ্রন্থে। ইতি কবিকল্পদ্রুমঃ॥ ঞ পশতি পশতে। বাধো বিহতিঃ গ্রন্থো গ্রন্থনং। গ্রন্থস্থানে স্পর্শনং পঠন্তি কেচিৎ। ইতি দুর্গাদাসঃ॥

পশ ৎ ক অনুপসর্গাদ্বন্ধবাধয়োঃ। স্পর্শগত্যোঃ। ইতি কবিকল্পদ্রুমঃ॥ তালব্যোপধঃ। পশয়তি। অনুপসর্গাদিতি সোপসর্গস্য প্রয়োগো নিষিধ্যতে। বাধো বিহতিঃ। ইতি দুর্গাদাসঃ॥

পশব্যং (ত্রি) পশুসম্বন্ধি। পশোরিদমিত্যর্থে যৎপ্রত্যয়নিষ্পন্নং। ইতি সংক্ষিপ্তসারব্যাকরণং॥

পশুঃ (পুং) জন্তুবিশেষঃ। তস্য ব্যুৎপত্তির্যথা। পশয়ন্তি পশ্যন্তি পার্শ্বহস্তাভ্যাং হিতাহিতং। ইতি ভরতঃ॥ তস্য লক্ষণং। লোমবল্লাঙ্গূলবত্ত্বং। ইতি ভাষারত্নে কণাদঃ॥ তদ্ভেদা যথা। সিংহঃ ১ ব্যাঘ্রঃ ২ তরক্ষুঃ ৩ বরাহঃ ৪ কপিঃ ৫ ভল্লুকঃ ৬ খড়্গী ৭ মহিষঃ ৮ শৃগালঃ ৯ বিড়ালঃ ১০ গোধা ১১ শ্বাবিৎ ১২ হরিণঃ ১৩ কৃষ্ণসারঃ ১৪ রুরুঃ ১৫ ন্যঙ্কুঃ ১৬ রঙ্কুঃ ১৭ শম্বরঃ ১৮ রৌহিষঃ ১৯ গোকর্ণঃ ২০ পৃষতঃ ২১ এণঃ ২২ ঋষ্যঃ ২৩ রোহিতঃ ২৪ চমরঃ ২৫ গন্ধর্ব্বঃ ২৬ শরভঃ ২৭ রামঃ ২৮ সৃমরঃ ২৯ গবয়ঃ ৩০ শশঃ ৩১ খট্টাশঃ ৩২ গৌঃ ৩৩ উষ্ট্রঃ ৩৪ ছাগঃ ৩৫ মেষঃ ৩৬ খরঃ ৩৭ হস্তী ৩৮ অশ্বঃ ৩৯। ইত্যমরঃ॥ * ॥ তত্র গ্রাম্যারণ্যভেদেন চতুর্দ্দশ-

বিধাঃ পশবো যথা। গৌরবিরজোঽশ্বো-ঽশ্বতরো গর্দ্দভো মনুষ্যশ্চেতি সপ্ত গ্রাম্যাঃ পশবঃ। মহিষবানরঋক্ষসরীসৃপ-রুরুপৃষতমৃগাশ্চেতি সপ্তারণ্যাঃ পশবঃ। ইতি দুর্গোৎসবতত্ত্বে পৈঠীনসিঃ ॥ * ॥ বৈদ্যকে ভূশয়জাঙ্গলভেদেন স দ্বিবিধঃ। তত্র বিলশায়িত্বাৎ ভূশয়া নকুলগোধা-দয়ঃ। তেষাং মাংসগুণাঃ। প্রহসা ভূশয়া-নূপবারিজা বারিচারিণঃ। গুরূষ্ণমধুরাঃ স্নিগ্ধা বাতঘ্নাঃ শুক্রবর্দ্ধনাঃ ॥ স্থলজা জাঙ্গলাঃ প্রোক্তা মৃগা জঙ্গলচারিণঃ। জাঙ্গলা হরিণচ্ছাগাদয়ঃ। তেষাং মাংস-গুণাঃ। লঘবঃ শীতমধুরাঃ সকষায়া হিতা নৃণাং ॥ * ॥ তেষামবয়বাদীনাং গুণঃ। গুরুভক্ষা বহুভুজো যে চোপচিতমেদসঃ। একদেহেঽপি পূর্ব্বার্দ্ধং মৃগাণাং পক্ষিণাং পরং। সর্ব্বেষাঞ্চ শিরঃস্কন্ধপ্লীহচর্ম্মযকৃদ্-গুদং ॥ পাদপুচ্ছান্ত্রমস্তিষ্কমুষ্কক্রোড়াঃ সমেহনাঃ। ধাতবঃ শোণিতাদ্যাশ্চ গুরবঃ স্যুঃ পরস্পরং ॥ ইতি রাজবল্লভঃ ॥ * ॥ ছাগাদৌ পশুপদপ্রয়োগমাহ যজ্ঞপার্শ্বঃ। উষ্ট্রো বা যদি বা মেষশ্ছাগো বা যদি বা হয়ঃ। পশুস্থানে নিযুক্তানাং পশুশব্দো-ঽভিধীয়তে॥ ইতি বলিদানপ্রকরণে তিথি-তত্ত্বং ॥ * ॥ অবৈধপশুহননে দোষো যথা। বসেৎ স নরকে ঘোরে দিনানি পশুরোমভিঃ। সম্মিতানি দুরাচারো যো হন্ত্যবিধিনা পশূন্ ॥ ইতি গারুড়ে ৯৫ অধ্যায়ঃ ॥ * ॥ পশ্বধিষ্ঠাত্রী দেবতা যথা। সিংহে বসতি দুর্গা চ শরভে চ প্রজাপতিঃ। এণে চ বসতে বায়ুর্মেষে চৈব চ চন্দ্রমাঃ ॥ নক্ষত্রাণি চ শশকে কৃষ্ণসারে হরিঃ স্বয়ং। শতক্রতুর্গবাং পৃষ্ঠে গবয়ে ভুবনানি চ ॥ শল্লকে মঙ্গলা-ন্যষ্টৌ গজে বিষ্ণুর্গণেশ্বরঃ। অশ্বে তু দ্বাদশাদিত্যা ব্রাহ্মণে সর্ব্বদেবতাঃ ॥ ব্রহ্মা তু চামরে চৈব ছাগলে তু তথানলঃ। এত-স্মাৎ কারণাদেতে পূজ্যা বন্দ্যাঃ প্রযত্নতঃ ॥ ইতি মৎস্যসূক্ততন্ত্রে ৩৯ পটলঃ ॥ * ॥ প্রমথঃ। দেবঃ। প্রাণিমাত্রং। ইতি শব্দ-রত্নাবলী ॥ ছগলঃ। যজ্ঞঃ। সংসারিণা-মাত্মা। ইতি ধরণিঃ ॥ যজ্ঞোড়ুম্বরঃ। ইতি শব্দচন্দ্রিকা ॥ * ॥ * ॥ সাধকানাং ভাব-ত্রয়াণাং প্রথমো ভাবঃ। তস্য নির্ণয়ো যথা। ষষ্ঠপটলে। পশুভাবস্থিতাং নাথ দেবতাং শৃণু বিস্তরাৎ। দুর্গাপূজাং বিষ্ণু-পূজাং শিবপূজাঞ্চ নিত্যশঃ ॥ অবশ্যং হি যঃ করোতি স পশুরুত্তমঃ স্মৃতঃ। কেবলং শিবপূজাঞ্চ যঃ করোতি চ সাধকঃ ॥ পশূনাং মধ্যতঃ শ্রীমান্ শিবয়া সহ চোত্তমঃ। কেবলং বৈষ্ণবো ধীরঃ পশূনাং মধ্যমঃ স্মৃতঃ ॥ ভূতানাং দেবতানাঞ্চ সেবাং কুর্ব্বন্তি সর্ব্বদা। পশূনামধমাঃ প্রোক্তা নরকস্থা ন সংশয়ঃ ॥ ত্বৎসেবাং মম সেবাঞ্চ ব্রহ্মবিষ্ণ্বাদিসেবনং। কৃত্বান্য-সর্ব্বভূতানাং নায়িকানাং মহাপ্রভো ॥ যক্ষিণীনাং ভূতিনীনাং ততঃ সেবাং শুভপ্রদাং। যঃ পশুর্ব্রহ্মকৃষ্ণাদিসেবাঞ্চ কুরুতে সদা ॥ তথা শ্রীতারকব্রহ্মসেবা যে বা নরোত্তমাঃ। তেষামসাধ্যা ভুভাদি-

দেবতা সর্ব্বকামদা ॥ বর্জ্জয়েৎ পশুমার্গেণ বিষ্ণুসেবাপরো জনঃ। দ্বিতীয়পটলে। নিত্যশ্রাদ্ধং তথা সন্ধ্যাবন্দনং পিতৃতর্পণং। দেবতাদর্শনং পীঠদর্শনং তীর্থদর্শনং ॥ গুরোরাজ্ঞাপালনঞ্চ দেবতানিত্যপূজনং। পশুভাবস্থিতো মর্ত্ত্যো মহাসিদ্ধিং লভেদ্ধ্রুবং ॥ ষষ্ঠপটলে। পুনর্ভাবং পশোরেব শৃণুবাদরপূর্ব্বকং। অকস্মাৎ সিদ্ধিমাপ্নোতি পশুর্নারায়ণোপমঃ ॥ বৈকুণ্ঠনগরে যাতি চতুর্ভুজকলেবরঃ। শঙ্খচক্রগদাপদ্মহস্তো গরুড়বাহনঃ ॥ মহাধর্ম্মস্বরূপোঽসৌ মহাবিদ্যাপ্রসাদতঃ। পশুভাবং মহাভাবং ভাবানাং সিদ্ধিদং পরং ॥ আদৌ ভাবং পশোঃ কৃত্বা পশ্চাৎ কুর্য্যাদবশ্যকং। বীরভাবং মহাভাবং সর্ব্বভাবোত্তমোত্তমং ॥ তৎপশ্চাদতিসৌন্দর্য্যং দিব্যভাবং মহাফলং ॥ ইতি রুদ্রযামলে উত্তরখণ্ডং ॥ * ॥ তস্য কালো যথা। আদৌ দশমদণ্ডেন পশুভাবমথাপি বা। ইতি তত্রৈব। জন্মমাত্রং পশুভাবং বর্ষষোড়শকাবধি। ইতি বামকেশ্বরে ৫১ পটলঃ॥*॥ পশুভাবকর্ত্তব্যাকর্ত্তব্যগর্ভতদ্ভাবনিন্দামাহ। পশুভাবরতা যে চ কেবলং পশুরূপিণঃ। রাত্রৌ যন্ত্রঞ্চ মন্ত্রঞ্চ ন স্পৃশেৎ ন জপেৎ কচিৎ ॥ সংশয়ো বলিদানে চ তন্ত্রে চ সংশয়ঃ সদা। মন্ত্রে চাক্ষরবুদ্ধিশ্চ অবিশ্বাসো গুরৌ সদা ॥ প্রতিমাসু শিলাবুদ্ধির্ভেদকো দৈবতে পুনঃ। নিরামিষেণ দেবেশি দেবতায়াঃ প্রপূজনং ॥ অজ্ঞানেন সদা স্নানং প্রত্যহং দেহতাড়নং। সর্ব্বেষাঞ্চৈব নিন্দাস্তু যঃ কুর্য্যাচ্চ মহেশ্বরি ॥ স এব পশুভাবেন অধমঃ পরিকীর্ত্তিতঃ। ইতি রুদ্রযামলে উত্তরখণ্ডে ৬ পটলঃ ॥ * ॥ রাত্রৌ নৈব যজেদ্দেবীং সন্ধ্যায়াং বা পরাহ্লকে। ঋতুকালং বিনা দেবি রমণং পরিবর্জ্জয়েৎ ॥ মাংসাদিকং মহেশানি ত্যজেৎ পঞ্চসু পর্ব্বসু। যদন্যদ্বেদবিহিতং কুর্য্যান্নিয়মতৎপরঃ ॥ ইতি নিত্যাতন্ত্রে ১ পটলঃ ॥ * ॥ পশূনাং ব্রতভঙ্গপ্রায়শ্চিত্তং যথা। পশূনাং ব্রতভঙ্গাদৌ বিধিং প্রথমতঃ শৃণু। ব্রতভঙ্গে নিত্যভঙ্গে নিত্যপূজাদিকর্ম্মণি। সহস্রং প্রজপেন্মন্ত্রী ব্রতদোষোপশান্তয়ে ॥ ইতি রুদ্রযামলে উত্তরখণ্ডে ২ পটলঃ ॥

পশু ব্য দর্শনং। ইতি মেদিনী ॥

পশুক্রিয়া (স্ত্রী) মৈথুনং। ইতি হেমচন্দ্রঃ ॥

পশুগায়ত্রী (স্ত্রী) বলিদানীয়পশুকর্ণজপ্যমন্ত্রবিশেষঃ। যথা। পশুকর্ণে পশুগায়ত্রীং জপেৎ। সা যথা। পশুপাশায় বিদ্মহে শিরশ্ছেদায় ধীমহি তন্নঃ পশুঃ প্রচোদয়াৎ। ইতি দুর্গোৎসবপ্রয়োগঃ ॥

পশুপতিঃ (পুং) শিবঃ। ইত্যমরঃ ॥ তস্য ব্যুৎপত্তির্যথা। অহঞ্চ সর্ব্ববিদ্যানাং পতিরাদ্যঃ সনাতনঃ। অহং বৈ পতিভাবেন পশুমধ্যে ব্যবস্থিতঃ ॥ অতঃ পশুপতির্নাম ত্বং লোকে খ্যাতিমেষ্যসি। ইতি বরাহপুরাণং ॥ অয়ং যজমানমূর্ত্তিঃ। যথা। পশুপতয়ে যজমানমূর্ত্তয়ে নমঃ। ইত্যষ্টমূর্ত্তিপূজায়াং ভবিষ্যপুরাণং ॥

পশুপল্বলং (ক্লী) কৈবর্ত্তীমুস্তকং। ইতি শব্দচন্দ্রিকা॥

পশুপাশকঃ (পুং) রতিবন্ধবিশেষঃ। যথা। স্ত্রিয়মানতপূর্ব্বাঙ্গীং স্বপাদান্তঃ পদদ্বয়ং। ঊর্দ্ধাংশেন রমেৎ কামী বন্ধোঽয়ং পশুপাশকঃ॥ ইতি রতিমঞ্জরী॥

পশুপ্রেরণং (ক্লী) গবাদীনাং চালনং। তৎপর্য্যায়ঃ। উদজঃ ২। ইত্যমরঃ॥

পশুমোহনিকা (স্ত্রী) কটুীলতা। ইতি রাজনির্ঘণ্টঃ॥

পশুরজ্জুঃ (স্ত্রী) পশূনামশ্বাদীনাং বন্ধনায় রজ্জুঃ। তৎপর্য্যায়ঃ। দামনী ২। ইত্যমরঃ॥ বন্ধনী ৩। ইতি শব্দরত্নাবলী॥

পশুরাজঃ (পুং) সিংহঃ। ইতি শব্দচন্দ্রিকা॥

পশুহরীতকী (স্ত্রী) আম্রাতকফলং। ইতি ত্রিকাণ্ডশেষঃ॥

পশ্চাৎ ব্য প্রতীচী। চরমং। ইত্যমরঃ॥ অধিকারঃ। ইতি মেদিনী॥

পশ্চাত্তাপঃ (পুং) অনুশোচনং। চরমে শোকঃ। পস্তান ইতি ভাষা। তৎপর্য্যায়ঃ। অনুতাপঃ ২ বিপ্রতীসারঃ ৩। ইত্যমরঃ॥

পশ্চার্দ্ধঃ (ত্রি) শেষার্দ্ধঃ। অপরার্দ্ধঃ। তস্য লক্ষণং প্রমাণঞ্চ যথা। অপরস্যার্দ্ধে পশ্চভাবো বক্তব্যঃ। অপরশ্চাসাবর্দ্ধশ্চ পশ্চার্দ্ধঃ। ইতি সিদ্ধান্তকৌমুদী॥ গ্রীবাভঙ্গাভিরামং মুহুরনুপততি স্যন্দনে বদ্ধ-পশ্চার্দ্ধেন প্রবিষ্টঃ শরপতনভয়াদ্‌ভূয়সা পূর্ব্বকায়ং। ইত্যভিজ্ঞানশকুন্তলং॥

পশ্চিমং (ত্রি) পশ্চাদ্ভবং। ইত্যমরঃ॥

পশ্চিমা (স্ত্রী) অস্তাচলাবচ্ছিন্নদিক্। তৎপর্য্যায়ঃ। প্রতীচী ২ বারুণী ৩ প্রত্যক্ ৪। তদ্দিগ্‌ভববায়ুগুণাঃ। পশ্চিমো মারুতস্তীক্ষ্ণঃ কফমেহবিশোষণঃ। সদ্যঃ প্রাণহরো দুষ্টঃ শোষকারী শরীরিণাং॥ ইতি রাজনির্ঘণ্টঃ॥ অপি চ। পশ্চিমোঽগ্নিবপুর্ব্বর্ণবলারোগ্যবিবর্দ্ধনঃ। কষায়ঃ শোষণঃ স্বর্য্যো রোচনো বিশদো লঘুঃ॥ অপাং লঘুত্ববৈশদ্যশৈত্যবৈমল্যকারকঃ। সর্ব্বদ্রব্যেষ্বভিব্যক্তপ্রভাবরসবীর্য্যকৃৎ॥ ব্রণসংরোপণস্বচ্যো দাহশোথতৃষাপহঃ। ইতি রাজবল্লভঃ॥ *॥ তদ্দিগধিপতির্বরুণঃ। যথা। ইন্দ্রো বহ্নিঃ পিতৃপতির্নৈঋর্তো বরুণো মরুৎ। কুবের ঈশঃ পতয়ঃ পূর্ব্বাদীনাং দিশাং ক্রমাৎ॥ ইত্যমরঃ॥ তদ্দিক্‌পতয়ো মিথুনতুলাকুম্ভরাশয়শ্চ। যথা। প্রাগাদিককুভান্নাথা যথাসংখ্যং প্রদক্ষিণং। মেষাদ্যা রাশয়ো জ্ঞেয়াস্ত্রিরাবৃত্তিপরিভ্রমাৎ॥ ইতি জ্যোতিস্তত্ত্বং॥

পশ্য ব্য প্রশংসা। বিস্ময়ঃ। ইতি শব্দরত্নাবলী॥

পশ্যতিকর্ম্মা [ন্] (পুং) দর্শনকর্ম্মা। তদ্বৈদিকপর্য্যায়াঃ। চিক্যাৎ ১ চাকনৎ ২ আচক্ষ্ম ৩ চষ্টে ৪ বিচষ্টে ৫ বিচর্ষণিঃ ৬ বিশ্বচর্ষণিঃ ৭ অবচাকশৎ ৮। ইত্যষ্টৌ পশ্যতিকর্ম্মাণঃ। ইতি বেদনিঘণ্টৌ ৩ অধ্যায়ঃ॥

পশ্যতোহরঃ (ত্রি) চৌরঃ। যথা। যঃ পশ্যতো

হরেদর্থং স চৌরঃ পশ্যতোহরঃ। ইতি হেমচন্দ্রঃ॥

পশ্যন্ [ৎ] (ত্রি) পশ্যতি যঃ। ঈক্ষণকর্ত্তা। দৃশধাতোঃ শতৃপ্রত্যয়নিষ্পন্নঃ। ইতি ব্যাকরণং

পশ্যন্তী (স্ত্রী) মূলাধারোত্থিতহৃদয়গতনাদ-রূপবর্ণঃ। যথা। মূলাধারাৎ প্রথমমুদিতো যস্তু তারঃ পরাখ্যঃ পশ্চাৎ পশ্যন্ত্যথ হৃদয়গো বুদ্ধিযুঙ্মধ্যমাখ্যঃ। ইত্যলঙ্কার-কৌস্তুভঃ॥

পশ্বাচারঃ (পুং) আচারবিশেষঃ। যথা। বেদো-ক্তেন যজেদ্দেবীং কামসঙ্কল্পপূর্ব্বকং। স এব বৈদিকাচারঃ পশ্বাচারঃ স উচ্যতে॥ ইত্যাচারভেদতন্ত্রং॥

পষ ক বন্ধে। ইতি কবিকল্পদ্রুমঃ॥ ক পাষ-য়তি। তালব্যান্ত এবায়মিতি বহবঃ। দন্ত্যান্ত ইতি কেচিৎ। মূর্দ্ধন্যান্তপাঠস্তু কস্যচিদনুরোধাৎ। ইতি দুর্গাদাসঃ॥

পষ ঞ বাধে। গ্রন্থে। ইতি কবিকল্পদ্রুমঃ॥ ঞ পষতি পষতে। বাধো বিহতিঃ। গ্রন্থো গ্রন্থনং। গ্রন্থনস্থানে স্পর্শনং কেচিৎ পঠন্তি। ইতি দুর্গাদাসঃ॥

পষ ৎ ক অনুপসর্গাদ্বন্ধবাধয়োঃ। স্পর্শ-গত্যোঃ। ইতি কবিকল্পদ্রুমঃ॥ মূর্দ্ধন্যো-পধঃ। ক পষয়তি। অনুপসর্গাদিতি সোপসর্গস্য প্রয়োগো নিষিধ্যতে। বাধো বিহতিঃ। ইতি দুর্গাদাসঃ॥

পস ই ক নাশে। ইতি কবিকল্পদ্রুমঃ॥ নাশ ইহ নষ্টীকরণং। ই ক পংসয়তি পাপং গঙ্গা। ইতি দুর্গাদাসঃ॥

পস ক বন্ধে। ইতি কবিকল্পদ্রুমঃ॥ ক পাস-য়তি। পৃথক্পাঠাদয়ং ন ঞিৎ। অন্যথা পস কি ঞ ইত্যনেনৈবেষ্টসিদ্ধে পৃথক্-পাঠোঽনর্থকং স্যাৎ। ইতি দুর্গাদাসঃ॥

পস ঞ বাধে। গ্রন্থে। ইতি কবিকল্পদ্রুমঃ॥ ঞ পসতি পসতে। ইতি দুর্গাদাসঃ॥

পস্ত্যং (ক্লী) গৃহং। ইতি হেমচন্দ্রঃ॥

পহ্লবঃ (পুং) শ্মশ্রুধারিম্লেচ্ছজাতিবিশেষঃ। তস্য বিবরণং যথা। সগরস্তাং প্রতিজ্ঞাঞ্চ গুরোর্বাক্যং নিশম্য চ। ধর্ম্মং জঘান তেষাং বৈ বেশান্যত্বং চকার হ॥ অর্দ্ধং শকানাং শিরসো মুণ্ডয়িত্বা ব্যসর্জয়ৎ। জবনানাং শিরঃ সর্ব্বং কাম্বোজানান্তথৈব চ॥ পারদা মুক্তকেশাশ্চ পহ্লবাঃ শ্মশ্রু-ধারিণঃ। নিঃস্বাধ্যায়বষট্কারাঃ কৃতাস্তেন মহাত্মনা॥ শকা জবনকাম্বোজাঃ পারদাঃ পহ্লবাস্তথা। কোলাঃ সর্পাঃ সমহিষা দার্ব্বাশ্চোলাঃ সকেরলাঃ॥ বশিষ্ঠবচনা-দ্রাজন্ সগরেণ মহাত্মনা। ইতি হরি-বংশঃ॥

পহ্লিকা (স্ত্রী) বারিপ্রশ্নী। ইতি শব্দমালা॥

পক্ষ ক পরিগ্রহে। ইতি কবিকল্পদ্রুমঃ॥ ক পক্ষয়তি। ইতি দুর্গাদাসঃ॥

পক্ষ ৎ ক পরিগ্রহে। ইতি কবিকল্পদ্রুমঃ পক্ষয়তি পক্ষাপয়তি। ইতি দুর্গাদাসঃ॥

পক্ষঃ (পুং) পঞ্চদশাহোরাত্রাঃ। স চ দ্বিবিধঃ। শুক্লপক্ষঃ পূর্ব্বসংজ্ঞঃ কৃষ্ণপক্ষোঽপর-সংজ্ঞঃ। তদ্ভেদেন ব্যবস্থা যথা। শুক্ল-পক্ষে তিথির্গ্রাহ্যা যস্যামভ্যুদিতো রবিঃ। কৃষ্ণপক্ষে তিথির্গ্রাহ্যা যস্যামস্তমিতো

রবিঃ॥ অত্রামাবাস্যাবত্তিথিক্ষয়বৃদ্ধিভ্যাং ন ব্যবস্থা কিন্তু রবেরুদয়াস্তময়সম্বন্ধাচ্ছুক্ল-কৃষ্ণপক্ষাভ্যাং ব্যবস্থা সা চ যুগ্মাদ্যনাগ্রাতিথিকর্ম্মপরা সামান্যবিশেষন্যায়াৎ। ইতি তিথ্যাদিতত্ত্বং ॥ পক্ষিণামবয়ববিশেষঃ। পাখা ইতি ভাষা। তৎপর্য্যায়ঃ। গরুৎ ২ ছদঃ ৩ পত্রং ৪ পতত্রং ৫ তনূরুহং ৬। শরপক্ষঃ। তীরের পাখা ইতি ভাষা। তৎপর্য্যায়ঃ। বাজঃ ২। সহায়ঃ। কচাৎ পরে সমূহার্থঃ। যথা কেশপক্ষঃ। ইত্যমরঃ॥ পার্শ্বঃ। গৃহং। সাধ্যং। বিরোধঃ। বলং। সখা। চুল্লীরন্ধ্রং। রাজকুঞ্জরঃ। ইতি মেদিনী॥ বিহগঃ। বলয়ং। শুদ্ধঃ। ইতি শব্দরত্নাবলী॥ বর্গঃ। পিচ্ছং। দেহাঙ্গং। ইতি হেমচন্দ্রঃ॥

পক্ষঃ [স্] (ক্লী) গরুৎ। যথা। পক্ষসী চ স্মৃতৌ পক্ষৌ। ইতি ভরতধৃতশুভাঙ্কঃ॥

পক্ষকঃ (পুং) পক্ষদ্বারং। পার্শ্বদ্বারং। খড়কীদ্বার ইতি ভাষা। ইত্যমরঃ॥ পার্শ্বমাত্রং। ইতি মেদিনী॥ সহায়ঃ। ইতি শব্দরত্নাবলী॥

পক্ষঘাতঃ } পক্ষাঘাতঃ } (পুং) স্বনামখ্যাতবাতরোগবিশেষঃ। তল্লক্ষণাদি যথা।

গৃহীত্বার্দ্ধং ততো বায়ুঃ শিরাস্নায়ূ বিশোষ্য চ। পক্ষমন্যতমং হন্তি সন্ধিবন্ধান্ বিমোক্ষয়ন্॥ কৃৎস্নোঽর্দ্ধকায়স্তস্য স্যাদকর্ম্মণ্যো বিচেতনঃ। একাঙ্গবাতং তং কেচিদন্যে পক্ষবধং বিদুঃ॥ অর্দ্ধং অর্দ্ধনারীশ্বরবৎ। পক্ষং বাহুপার্শ্বোরুজঙ্ঘাদিভাগং। অন্যতমং বামং দক্ষিণং বা। বিমোক্ষয়ন্ শিথিলীকুর্ব্বন্। অকর্ম্মণ্যঃ কর্ম্মাসমর্থঃ। বিচেতনঃ ঈষৎ স্পর্শাদিজ্ঞানযুক্তঃ॥ *॥ অস্য সাধ্যাসাধ্যজ্ঞানার্থমাহ। দাহসন্তাপমূর্চ্ছাঃ স্যুর্ব্বায়ৌ পিত্তসমন্বিতে। শৈত্যশোথগুরুত্বানি তস্মিন্নেব কফাবৃতে॥ দাহো বাহ্যঃ। সন্তাপঃ আভ্যন্তরঃ। এতচ্চ লক্ষণমন্যত্রাপি বাতব্যাধৌ বোদ্ধব্যং। সামান্যতো বায়াবিতি নির্দ্দিষ্টত্বাৎ॥ *॥ পক্ষাঘাতস্য সাধ্যত্বাদিকমাহ। শুদ্ধবাতহতং পক্ষং কৃচ্ছ্রসাধ্যতমং বিদুঃ। সাধ্যমন্যেন সংযুক্তমসাধ্যং ক্ষয়হেতুকং॥ শুদ্ধঃ কেবলঃ। অন্যেন পিত্তেন কফেন বা। ক্ষয়হেতুকং ক্ষয়ো ধাতুক্ষয়ঃ। তৎ কুপিতং বাতনিমিত্তকং॥ *॥ অপরমসাধ্যলক্ষণমাহ। গর্ব্ভিণীসূতিকাবালবৃদ্ধক্ষীণেষ্বসৃক্ক্ষয়ে। পক্ষাঘাতং পরিহরেৎ বেদনারহিতো যদি॥ বেদনারহিতো যদীতি ভিন্নমসাধ্যলক্ষণং॥ *॥ অথ তস্য চিকিৎসা। মাষাত্মগুপ্তাবাতারিবাট্যালকজটাশৃতং। হিঙ্গুসৈন্ধবসংযুক্তং পক্ষাঘাতং বিনাশয়েৎ॥ মাষিকে হিঙ্গুসিন্ধূত্থে জরণাদ্যাস্তু শাণিকাঃ। মাষাদিক্বাথঃ॥১॥ গ্রন্থিকাগ্নিকণাশুণ্ঠীরাস্নাসৈন্ধবকল্কিতং। মাষক্বাথশৃতং তৈলং পক্ষাঘাতং ব্যপোহতি॥ গ্রন্থিকাদিতৈলং॥ ২॥ মাষাত্মগুপ্তাতিবিষারুবূকরাস্নাশতাহ্বালবণৈঃ সুপিষ্টৈঃ। চতুর্গুণে মাষবলাকষায়ে তৈলং শৃতং হন্তি হি পক্ষঘাতং॥ মাষাদিতৈলং॥ ৩॥ ইতি ভাবপ্রকাশঃ॥ *॥ পক্ষাঘাতস্তু জন্মান্তরীয়মহাপাতকশেষ-

পাপচিহ্নবিশেষঃ। যথা। পূর্ব্বজন্মকৃতং পাপং নরকস্য পরিক্ষয়ে। বাধতে ব্যাধিরূপেণ তস্য কৃচ্ছ্রাদিভিঃ শমঃ॥ কুষ্ঠঞ্চ রাজযক্ষ্মা চ প্রমেহো গ্রহণী তথা। মূত্রকৃচ্ছ্রাশ্মরীকাশা অতিসারভগন্দরৌ॥ দুষ্টব্রণং গণ্ডমালা পক্ষাঘাতোঽক্ষিনাশনং। ইত্যেবমাদয়ো রোগা মহাপাপোদ্ভবা গদাঃ॥ * ॥ তৎপ্রায়শ্চিত্তং যথা। লক্ষমুচ্চাবচং পুষ্পং প্রদদ্যাৎ কেশবার্চ্চনে। দদ্যাৎ দ্বিজসহস্রায় মিষ্টান্নং দ্বিজভোজনে॥ ইতি মলমাসতত্ত্বং॥ কিঞ্চ। কুনখী শ্যাবদন্তশ্চ দ্বাদশরাত্রং কৃচ্ছ্রং চরিত্বা উদ্ধরেয়াতাং তদ্দন্তনখাবিতি। অত্র দ্বাদশরাত্রং পরাকরূপং। তত্র পঞ্চ ধেনবঃ। ন তু প্রাজাপত্যং তদ্দাহকর্ত্তুর্ব্রতিচান্দ্রায়ণেন বিষমশিষ্টত্বাৎ। অত্র বহূনামেকধর্ম্মাণামিতি বচনাদাকাঙ্ক্ষিতত্বাৎ কুষ্ঠ্যাদীনামপি প্রায়শ্চিত্তং। অতএব প্রায়শ্চিত্তবিবেকেঽপ্যুক্তং। এবং দুশ্চর্ম্মাদিষ্বপ্যূহ্যং। ইতি শুদ্ধিতত্ত্বং॥

পক্ষচরঃ (পুং) চন্দ্রঃ। পৃথক্চারিগজঃ। ইতি মেদিনী॥

পক্ষজঃ (পুং) চন্দ্রঃ। ইতি ত্রিকাণ্ডশেষঃ॥

পক্ষজন্মা [ন্] (পুং) চন্দ্রঃ। ইতি শব্দরত্নাবলী॥ পক্ষজাতে ত্রি॥

পক্ষতা (স্ত্রী) অনুমিৎসাবিরহবিশিষ্টসিদ্ধ্যভাবঃ। ইয়মনুমিতিকারণং। তচ্চ পর্ব্বতে বহ্ন্যনুমিতৌ অনুমিৎসাবিরহবিশিষ্টপর্ব্বতধর্ম্মিকবহ্নিনিশ্চয়াভাবঃ। যথা। সিসাধয়িষয়া শূন্যা সিদ্ধির্যত্র ন তিষ্ঠতি। স পক্ষস্তত্র বৃত্তিত্বজ্ঞানাদনুমিতির্ভবেৎ॥ ইতি ভাষাপরিচ্ছেদঃ॥

পক্ষতিঃ (স্ত্রী) প্রতিপত্তিথিঃ। পক্ষমূলং। ডানক ইতি ভাষা। ইত্যমরঃ॥

পক্ষদ্বারং (ক্লী) পার্শ্বদ্বারং। খড়কীদ্বার ইতি ভাষা। ইত্যমরঃ॥

পক্ষধরঃ (পুং) চন্দ্রঃ। ইতি জটাধরঃ॥ পক্ষধারণকর্ত্তরি ত্রি॥

পক্ষপাতঃ (পুং) অন্যায্যসাহায্যকরণং। গণতাকরণং। যথা। ঈশ্বরত্ববিষয়ে বিপশ্চিতাং পক্ষপাতকরণে ন কারণং। ইত্যুত্তরমীমাংসায়াং সংক্ষেপশারীরং॥ পক্ষিণাং জ্বরঃ। যদুক্তং পক্ষপাতঃ পতঙ্গানাং। ইতি বিজয়রক্ষিতঃ॥

পক্ষপাতিতা (স্ত্রী) সহায়তা। যথা। ন সুবর্ণময়ী তনুঃ পরং ননু কিং বাগপি তাবকী তথা। ন পরং পথি পক্ষপাতিতানবলম্বে কিমু মাদৃশেঽপি সা॥ ইতি নৈষধং॥

পক্ষপালিঃ (পুং) খড়্কিকা। খড়কীদ্বার ইতি ভাষা। ইতি শব্দরত্নাবলী॥

পক্ষভাগঃ (পুং) হস্তিপার্শ্বভাগঃ। ইত্যমরঃ॥

পক্ষমূলং (ক্লী) পক্ষতিঃ। ডানক ইতি ভাষা। ইত্যমরঃ॥

পক্ষবাহনঃ (পুং) পক্ষী। ইতি শব্দচন্দ্রিকা॥

পক্ষসুন্দরঃ (পুং) লোধ্রঃ। ইতি হারাবলী॥

পক্ষান্তঃ (পুং) অমাবস্যা। পূর্ণিমা। তৎপর্য্যায়ঃ। পঞ্চদশী ২। ইত্যমরঃ॥

অর্কেন্দুবিশ্লেষঃ ৩ পর্ব্ব ৪। ইতি রাজনির্ঘণ্টঃ ॥ পক্ষাবসরঃ ৫। ইতি শব্দরত্নাবলী ॥

পক্ষালুঃ (পুং) পক্ষী। ইতি শব্দচন্দ্রিকা ॥

পক্ষাবসরঃ (পুং) পূর্ণিমা। অমাবস্যা। ইতি শব্দরত্নাবলী ॥

পক্ষিণী (স্ত্রী) আগামিবর্ত্তমানাহর্যুক্তা রাত্রিঃ। ইত্যমরঃ ॥ যথা। দ্বাবহ্নাবেকরাত্রিশ্চ পক্ষিণীত্যভিধীয়তে। ইতি শুদ্ধিতত্ত্বং ॥ পূর্ণিমা। বিহগী। শাকিনীভেদঃ। ইতি মেদিনী ॥

পক্ষিপানীয়শালিকা (স্ত্রী) চুণ্টীবৃতালবালং। পক্ষিজলপানস্থানং। ইতি ভূরিপ্রয়োগঃ ॥

পক্ষিলঃ (পুং) বাৎস্যায়নমুনিঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

পক্ষিশালা (স্ত্রী) নীড়ং। তৎপর্য্যায়ঃ। কুলায়িকা ২। ইতি ত্রিকাণ্ডশেষঃ ॥

পক্ষিসিংহঃ (পুং) গরুড়ঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

পক্ষিস্বামী [ন্] (পুং) গরুড়ঃ। ইতি হেমচন্দ্রঃ ॥

পক্ষ্মা [ন্] (পুং) বাণঃ। ইতি ধরণিঃ ॥

পক্ষী [ন্] (পুং স্ত্রী) পক্ষো বিদ্যতে যস্য। পাখী ইতি চিড়িয়া ইতি চ ভাষা। তৎপর্য্যায়ঃ। খগঃ ২ বিহঙ্গঃ ৩ বিহগঃ ৪ বিহঙ্গমঃ ৫ বিহায়াঃ ৬ শকুন্তিঃ ৭ শকুনিঃ ৮ শকুন্তঃ ৯ শকুনঃ ১০ দ্বিজঃ ১১ পতত্রী ১২ পত্রী ১৩ পতগঃ ১৪ পতন্ ১৫ পত্ররথঃ ১৬ অণ্ডজঃ ১৭ নগৌকাঃ ১৮ বাজী ১৯ বিকিরঃ ২০ বিঃ ২১ বিষ্কিরঃ ২২ পতত্রিঃ ২৩ নীড়োদ্ভবঃ ২৪ গরুত্মান্ ২৫ পিচ্ছন্ ২৬ নভসঙ্গমঃ ২৭। ইত্যমরঃ ॥ নাড়ীচরণঃ ২৮ কণ্ঠাগ্নিঃ ২৯ পতঙ্গঃ ৩০ অগৌকাঃ ৩১ চঞ্চুভৃৎ ৩২ ছুরণ্ডঃ ৩৩ সরণ্ডঃ ৩৪। ইতি শব্দরত্নাবলী ॥ পিপ্তিষুঃ ৩৫ পত্রবাহঃ ৩৬ দ্যুগঃ ৩৭। ইতি রাজনির্ঘণ্টঃ ॥ * ॥ গুরুভক্ষবহুভক্ষ্যস্থূলকায়পক্ষিণাং পূর্ব্বার্দ্ধস্য শ্রেষ্ঠত্বং যথা। গুরুভক্ষা বহুভুজো যে চোপচিতমেদসঃ। একদেহেঽপি পূর্ব্বার্দ্ধং মৃগাণাং পক্ষিণাং পরং ॥ * ॥ পক্ষিণামঙ্গাদীনামুত্তরোত্তরং গুরুত্বং যথা। সর্ব্বেষাঞ্চ শিরঃস্কন্ধপ্লীহচর্ম্মযকৃদ্গুদং। পাদপুচ্ছান্ত্রমস্তিষ্কমুষ্ক-ক্রোড়াঃ সমেহনাঃ ॥ ধাতবঃ শোণিতাদ্যাশ্চ গুরবঃ স্যুঃ পরস্পরং। * । অস্যাণ্ডগুণাঃ। মৎস্যকূর্ম্মখগাণ্ডানি স্বাদুবাজীকরাণি চ। কটুপাকানি রুচ্যানি বাতশ্লেষ্মহরাণি চ ॥ ইতি রাজবল্লভঃ ॥ * ॥ তেষামুৎপত্তির্যথা। অরুণস্য ভার্য্যা শ্যেনী বীর্য্যবন্তৌ মহাবলৌ। সম্পাতিশ্চ জটায়ুশ্চ প্রসূতৌ পক্ষিসত্তমৌ ॥ সম্পাতির্জনয়ন্ গৃধ্রান্ কাকাঃ পুত্রা জটায়ুষঃ। ভার্য্যা গরুত্মতশ্চাপি ভাসী ক্রৌঞ্চী শুনী শুকী ॥ ধৃতরাষ্ট্রী গরুত্মাংস্তু শুন্যাং জজ্ঞে চ ষট্ সুতান্। ত্রিশিখঞ্চ সুনেত্রঞ্চ সুমুখং সুনসন্তথা ॥ সুরূপস্তু সুপর্ব্বাণং তেষাং পুত্রা অনন্তকাঃ। চতুর্দ্দশসহস্রাণি ক্রূরাণাং পন্নগাশিনাং ॥ সপ্তদ্বীপেষ্বিমে সন্তি গারুড়াস্তে মহাবলাঃ। ভাসীপুত্রাস্তথা ভাসা উলূকাঃ কাককুক্কুটাঃ ॥ ময়ূরাঃ

কলবিঙ্কাশ্চ কপোতী চৈব তিত্তিরী। ক্রৌঞ্চ্যাং বাধ্রীণসা আসন্ কুররাঃ সারসা বকাঃ॥ ধৃতরাষ্ট্রী কলহংসান্ ধার্ত্তরাষ্ট্রাংশ্চ ভামিনী। চক্রবাকাংশ্চ বিহগান্ সশ্যেনানোদকান্ দ্বিজান্॥ অন্যানপি দ্বিজান্ জজ্ঞে পুত্ত্রপৌত্ত্রাননন্তকান্। ইত্যগ্নিপুরাণে কাশ্যপীয়বংশঃ॥

পক্তৃঃ (ত্রি) পাককর্ত্তা। পচধাতোঃ তৃ প্রত্যয়নিষ্পন্নঃ। ইতি মুগ্ধবোধব্যাকরণং॥

পক্ষ্ম [ন্] (ক্লী) অক্ষিলোম। নেত্রচ্ছদলোম। কিঞ্জল্কঃ। কেশরঃ। তন্ত্বাদেরণীয়ান্। সূত্রাদেরত্যল্পভাগঃ। ইত্যমরভরতৌ॥ গরুৎ। পক্ষঃ। ইত্যমরমালা॥

পা পানে। ইতি কবিকল্পদ্রুমঃ॥ অস্যৈব পিবাদেশঃ। পিবতি পয়ঃ পান্থঃ। ইতি দুর্গাদাসঃ॥

পা ল রক্ষণে। ইতি কবিকল্পদ্রুমঃ॥ ল পাতি। ইতি দুর্গাদাসঃ॥

পাঃ (ত্রি) পানকর্ত্তা। রক্ষণকর্ত্তা। পাধাতোঃ কর্ত্তরি ক্বিপা নিষ্পন্নঃ॥

পাংশবঃ (পুং) লবণবিশেষঃ। পাঙ্গা লোন ইতি ভাষা। তৎপর্য্যায়ঃ। রোমকং ২ ঔদ্ভিজ্জং ৩ বস্তুকং ৪ বস্তুপাংশুঃ ৫ ঊষরজং ৬ ঔষরং ৭ ঐরিণং ৮ ঔর্ব্বং ৯ সহং ১০। অস্য গুণাঃ। তীক্ষ্ণত্বং। অত্যুষ্ণত্বং। কটুত্বং। তিক্তত্বং। দীপনত্বং। দাহশোষকরত্বং। গ্রাহিত্বং। পিত্তকোপকরত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ ঔদ্ভিদং পাংশুলবণং যজ্জাতং ভূমিতঃ স্বয়ং। ক্ষারং গুরু কটু স্নিগ্ধং শ্লেষ্মলং বাতনাশনং॥ ইতি ভাবপ্রকাশঃ॥

পাংশুঃ (পুং) ধূলিঃ। ইত্যমরঃ॥ শস্যার্থচিরসঞ্চিতগোময়ঃ। সার ইতি ভাষা। ইতি মেদিনী॥ পর্পটঃ। কর্পূরবিশেষঃ। ইতি রাজনির্ঘণ্টঃ॥

পাংশুকাসীসং (ক্লী) কাসীসং। ইতি রাজনির্ঘণ্টঃ॥

পাংশুকুলী (স্ত্রী) রাজমার্গঃ। যথা। রথ্যা পাংশুকুলী ভবেৎ। ইতি হারাবলী॥

পাংশুকূলং (ক্লী) অনামপট্টোলিকা। যথা শাসনং ধর্ম্মকীলঃ স্যান্মুকুতিঃ শূদ্রশাসনং। পট্টোলিকা কৢপ্তকীলা পাংশুকূলং ন কস্যচিৎ॥ ইতি ত্রিকাণ্ডশেষঃ॥

পাংশুচত্বরঃ (পুং) ঘনোপলঃ। ইতি শব্দমালা॥

পাংশুচন্দনঃ (পুং) শিবঃ। ইতি ত্রিকাণ্ডশেষঃ॥

পাংশুচামরঃ (পুং) পটবাসঃ। তাঁবু ইতি ভাষা। ইতি জটাধরঃ॥ দূর্ব্বাঞ্চিততটীভূমিঃ। বর্দ্ধাপকঃ। প্রশংসা। পুরোটিঃ। ধূলিগুচ্ছকঃ। ইতি মেদিনী॥

পাংশুজং (ক্লী) পাংশুলবণং। পাঙ্গা লোন ইতি ভাষা। তৎপর্য্যায়ঃ। ঊষং ২ ঔদ্ভিদং ৩ পাক্যং ৪ লবণং ৫ পটু ৬। ইতি রত্নমালা॥ অস্য গুণাঃ। ভেদকত্বং। পাচনত্বং। পিত্তকারিত্বং। ইতি রাজবল্লভঃ॥

পাংশুপত্ত্রং (ক্লী) বাস্তূকং। ইতি শব্দমালা॥

পাংশুমর্দ্দনঃ (পুং) কেদারঃ। ইতি ত্রিকাণ্ড-শেষঃ ॥

পাংশুরঃ (পুং) দংশকঃ। ডাঁশ ইতি ভাষা। পীঠসর্পী। খঞ্জঃ। ইতি হারাবলী ॥

পাংশুরাগিণী (স্ত্রী) মহামেদা। ইতি রাজ-নির্ঘণ্টঃ ॥

পাংশুলঃ (পুং) হরঃ। পাপী। ইতি শব্দ-রত্নাবলী ॥ পুংশ্চলঃ। শম্ভোঃ খট্টাঙ্গং। ইতি মেদিনী ॥ পূতিকঃ। কাঁটাকরঞ্জ ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥ পাংশু-যুক্তে ত্রি। ইতি ধরণিঃ ॥

পাংশুলা (স্ত্রী) কুলটা। ভূমিঃ। ইতি শব্দ-রত্নাবলী ॥ কেতকী। রজস্বলা। ইতি রাজনির্ঘণ্টঃ ॥

পাংসনঃ (ত্রি) দূষকঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

পাংস্থঃ (পুং) ধূলিঃ। চিরসঞ্চিতগোময়ং। সার ইতি ভাষা। ইত্যুণাদিকোষঃ ভরতশ্চ ॥

পাকঃ (পুং) পচনং। ক্লেদনং। তৎপর্য্যায়ঃ। পচা ২। ইত্যমরঃ ॥ রন্ধনং। স তু সপ্ত-প্রকারো যথা। ভর্জনং তলনং স্বেদঃ পচনং ক্বথনং তথা। তান্দূরং পুটপাকশ্চ পাকঃ সপ্তবিধো মতঃ ॥ ভর্জনং কেবল-পাত্রে। তলনং স্নেহদ্রব্যে। স্বেদনং অগ্ন্যুত্তাপে। পচনং জলে। ক্বথনং সিদ্ধ-দ্রব্যরসগ্রহণে। তান্দুরং দ্বারবদ্ধতপ্তযন্ত্রে। পুটপাকঃ অধোর্দ্ধাগ্নিতাপে জ্ঞেয়ঃ। ইতি পাকরাজেশ্বরঃ ॥ স্থালীমার্জনাদ্যোদন-পরীক্ষান্তো ব্যাপারনিচয়ঃ পাকঃ। ইতি স্মৃতিঃ ॥ * ॥ পাকভাণ্ডস্য ত্যাজ্যত্বং যথা। নিত্যং নূতনভাণ্ডেন কর্ত্তব্যঃ পাক এব চ। অথবা পক্ষপর্য্যন্তং ততস্ত্যাজ্যং মনীষিভিঃ ॥ ইতি ব্রহ্মবৈবর্ত্তপুরাণং ॥ * ॥ পাককালে শূদ্রায়াগ্নিদাননিষেধো যথা। শূদ্রায়াগ্নিঞ্চ যো দদ্যাৎ পাককালে বিশেষতঃ। শূদ্রাপক্বং ভবেদন্নং ব্রাহ্মণঃ শূদ্রতামিয়াৎ ॥ ইতি কর্ম্মলোচনং ॥ * ॥ একোদ্দিষ্টশ্রাদ্ধে তস্য নিত্যত্বং যথা। একোদ্দিষ্টন্তু কর্ত্তব্যং পাকেনৈব সদা স্বয়ং। অভাবে পাকপাত্রাণাং তদহঃসমু-পোষণং ॥ ইতি শ্রাদ্ধতত্ত্বং ॥ * ॥ তস্য বিধির্যথা। পূর্ব্বাশাভিমুখো ভূত্বা উত্তরাশা-মুখেন বা। পচেদন্নঞ্চ মধ্যাহ্নে সায়াহ্নে চ বিবর্জ্জয়েৎ ॥ অগ্ন্যাশাভিমুখে পক্বমমৃতান্নং বিজানতা। পূর্ব্বামুখো ধর্ম্মকামঃ শোক-হানিশ্চ দক্ষিণে ॥ শ্রীকামশ্চোত্তরমুখে পতিকামশ্চ পশ্চিমে। ঐশান্যাভিমুখে পক্ত্বা দরিদ্রো জায়তে নরঃ ॥ * ॥ যদা তু আয়সে পাত্রে পক্বমশ্নাতি বৈ দ্বিজঃ। স পাপিষ্ঠোঽপি ভুঙ্‌ক্তেঽন্নং রৌরবে পরি-পচ্যতে ॥ তাম্রে পক্ত্বা চক্ষুর্হানির্মনৌ ভবতি বৈ ক্ষয়ং। *। পিতৃভ্যাং পক্বমন্নঞ্চ পিতৃব্যেণ যশস্বিনি। পুণ্ডরীকস্য যজ্ঞস্য লভতে ফলমীপ্সিতং ॥ বাতুলেন তু যৎ পক্বং ভগিন্যা চ কনিষ্ঠয়া। অসগোত্রেণ যৎ পক্বং শোণিতং তদপি স্মৃতং ॥ অভ-ক্তেন চ যৎ পক্বং স্ত্রিয়া পক্বন্তথৈব চ। পক্বপাত্রে চ যৎ পক্বং তৎ সর্ব্বং নিষ্ফলং ভবেৎ ॥ * ॥ উড়ুম্বরেণ কাষ্ঠেন কদম্বস্য দলেন চ। শালেন করমর্দ্দেন

উদরাবর্ত্তকেন চ ॥ পক্বান্নং নৈব ভুঞ্জীত ভুক্ত্বা রাত্রিমুপাবসেৎ। *। গর্হিতান্নমবীরান্নং ভুক্ত্বা কৃচ্ছ্রং সমাচরেৎ। অপ্রজা যা তু বনিতা নাশ্নীয়াদেব তদ্গৃহে॥ শালকাষ্ঠস্য পক্বান্নং শিরীষকস্য চৈব হি। কলিচণ্ডাতকস্যৈব বজ্রাবারুণকস্য চ। ভেরণ্ডশাল্মলের্বাপি পক্বান্নং গর্হিতং স্মৃতং ॥*॥ যদা মৃন্ময়পাত্রে তু পকং বৈ সার্ব্বকালিকং। মাসে পক্ষে তথাষ্টৌ চ তৎপাকং বিসৃজেৎ গৃহী॥ ধনুঃপাকে তথা সিংহে মিথুনে বা বরাননে। যঃ কুর্য্যাদ্ভোজনং দেবি কৃচ্ছ্রেণৈব বিশুধ্যতি ॥ * ॥ একদা তু জলং দদ্যাদ্দ্বিবারং ন প্রদাপয়েৎ। ত্রিভাগং পূরয়েৎ পাত্রং পশ্চাত্তোয়ং ন দাপয়েৎ॥ ইতি মৎস্যসূক্তে ৪২ পটলঃ ॥ * ॥ পরিণতঃ। শিশুঃ। জরসা কেশস্য শৌক্ল্যং। স্থাল্যাদি। ইতি মেদিনী॥ পেচকঃ। রাষ্ট্রাদি। ভঙ্গঃ। ভীতিঃ। ইতি শব্দরত্নাবলী॥ দৈত্যঃ। ইতি হেমচন্দ্রঃ॥ পানকর্ত্তরি ত্রি। পিবতি স্তন্যাদিকং। ইতি শিশুপর্য্যায়পাকশব্দে ভরতঃ॥

পাককৃষ্ণঃ (পুং) কৃষ্ণফলপাকঃ। পানী আমলা। ইতি শব্দচন্দ্রিকা॥

পাককৃষ্ণফলঃ (পুং) পাককৃষ্ণঃ। ইতি শব্দমালা॥

পাকজং (ক্লী) কাচলবণং। পরিণামশূলং। ইতি রাজনির্ঘণ্টঃ॥

পাকপুটী (স্ত্রী) কুম্ভশালা। পোয়ান্ ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

পাকফলঃ (পুং) ফলপাকঃ। পানী আমলা ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥

পাকভাণ্ডং (ক্লী) পাকপাত্রং। যথা। যস্য যস্য তু বর্ণস্য যদ্যৎ স্যাৎ পশ্চিমন্ত্বহঃ। স তত্র গৃহশুদ্ধিঞ্চ বস্ত্রশুদ্ধিং করোত্যপি॥ পশ্চিমন্ত্বহঃ অশৌচান্তদিনং। গৃহশুদ্ধিং প্রাক্তনপাকভাণ্ডত্যাগোল্লেপনাদিনা। ইতি শুদ্ধিতত্ত্বং॥

পাকমৎস্যঃ (পুং) মৎস্যব্যঞ্জনং। তৎপর্য্যায়ঃ। মৎস্যলং ২। ইতি শব্দচন্দ্রিকা॥

পাকযজ্ঞঃ (পুং) বৃষোৎসর্গগৃহপ্রতিষ্ঠাদীনাং হোমঃ। চরুহোমাঙ্গককর্ম্ম। যথা। প্রায়শ্চিত্তে বিধুশ্চৈব পাকযজ্ঞে তু সাহসঃ। ইতি তিথিতত্ত্বং॥

পাকযাজ্ঞিকঃ (পুং) পাকযজ্ঞকর্ত্তা। পাকযজ্ঞং করোতীতি ষ্ণিকপ্রত্যয়নিষ্পন্নঃ॥

পাকরঞ্জনং (ক্লী) তেজপত্রং। ইতি শব্দচন্দ্রিকা॥

পাকলং (ক্লী) কুষ্ঠৌষধিঃ। ইত্যমরঃ॥

পাকলঃ (পুং) কুঞ্জরজ্বরঃ। ইতি মেদিনী॥ বোধনদ্রব্যং। অনিলঃ। অনলঃ। ইতি বিশ্বঃ॥ ব্রণাদিপাককারিণি ত্রি॥

পাকলিঃ (স্ত্রী) বৃক্ষবিশেষঃ। ইতি রত্নমালা॥ রোহিণীতি কেচিৎ॥

পাকলী (স্ত্রী) কর্কটী। ইতি শব্দমালা॥

পাকশালা (স্ত্রী) রন্ধনগৃহং। তৎপর্য্যায়ঃ। রসবতী ২। ইতি জটাধরঃ॥ পাকস্থানং ৩ মহানসং ৪। ইত্যমরঃ॥ অগ্নিকোণে তস্যাঃ কর্ত্তব্যতা যথা। প্রাচ্যাং দিশি স্নানগৃহমাগ্নেয্যাং পচনালয়ং। শয়নং

যাম্যদিগ্‌ভাগে নৈঋর্ত্যাং শস্ত্রমন্দিরং ॥ প্রতীচ্যাং ভোজনগৃহং বায়ুভাগে সভাগৃহং। ভাণ্ডারসদনং সৌম্যে ঐশান্যাং দেবতালয়ং॥ ইতি মুহূর্ত্তচিন্তামণিটীকায়াং পীযূষধারায়াং কশ্যপবচনং ॥

পাকশাসনঃ (পুং) ইন্দ্রঃ। ইত্যমরঃ ॥ তন্নামকারণং যথা। পাকং জঘান তীক্ষ্ণাগ্রৈঃ স্মার্গণৈঃ কঙ্কবাসসৈঃ। তত্র নাম বিভুর্লেভে শাসনত্বাচ্ছরৈর্দৃঢ়ৈঃ ॥ পাকশাসনতাং শক্রঃ সর্ব্বামরপতির্বিভুঃ। ইতি বামনপুরাণং ॥

পাকশাসনিঃ (পুং) ইন্দ্রপুত্ত্রঃ। জয়ন্তঃ। ইত্যমরঃ ॥

পাকশুক্লা (স্ত্রী) খড়ী। যথা। পাকশুক্লা শিলাধাতুঃ কঠিনী কক্খটী খড়ী। ইতি শব্দচন্দ্রিকা ॥

পাকস্থানং (ক্লী) মহানসং। ইত্যমরঃ ॥

পাকা (স্ত্রী) বালিকা। ইতি জটাধরঃ ॥

পাকারিঃ (পুং) শ্বেতকাঞ্চনং। ইতি রত্নমালা ॥

পাকিমং (ত্রি) পক্তিমং। পাকেন নিষ্পন্নং। ইতি ত্রিকাণ্ডশেষঃ ॥

পাকুকঃ (পুং) সূপকারঃ। ইত্যুণাদিকোষঃ ॥

পাক্যং (ক্লী) বিড়্‌লবণং। ইত্যমরঃ ॥ পাংশুলবণং। ইতি রত্নমালা ॥

পাক্যঃ (পুং) যবক্ষারঃ। ইত্যমরঃ ॥

পাখণ্ডঃ (পুং) পাষণ্ডঃ। ইত্যমরটীকায়াং ভানুদীক্ষিতঃ ॥

পাগলঃ (পুং) উন্মত্তঃ। বাতুলঃ। যথা। পাগলায়াঙ্গহীনায় চান্ধায় বধিরায় চ। জড়ায় চৈব মূর্খায় ক্লীবতুল্যায় পাপিনে। ব্রহ্মহত্যাং লভেৎ সোঽপি যঃ স্বকন্যাং দদাতি চ ॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ১৪ অধ্যায়ঃ ॥

পাচকং (ক্লী) পিত্তবিশেষঃ। যথা। পাচকং ভ্রাজকঞ্চৈব রঞ্জকালোচকে তথা। সাধকঞ্চৈব পঞ্চেতি পিত্তনামান্যনুক্রমাৎ ॥ ইতি শব্দচন্দ্রিকা ॥ পাচকাদীনাং স্থানান্যাহ। অগ্ন্যাশয়ে যকৃৎপ্লীহ্নোর্হৃদয়ে লোচনদ্বয়ে। ত্বচি সর্ব্বশরীরেষু পিত্তং নিবসতি ক্রমাৎ ॥ অথ তেষাং কর্ম্মাণ্যাহ। পাচকং পচতে ভুক্তং শেষাগ্নিবলবর্দ্ধনং। রসমূত্রপুরীষাণি বিরেচয়তি নিত্যশঃ ॥ ইতি ভাবপ্রকাশঃ ॥

পাচকঃ (পুং) অগ্নিঃ। ইতি হলায়ুধঃ ॥ সূপকারঃ। পাককর্ত্তা। যথা। পুত্ত্রপৌত্ত্রগুণোপেতঃ শাস্ত্রজ্ঞো মিষ্টপাচকঃ। শূরশ্চ কঠিনশ্চৈব সূপকারঃ স উচ্যতে ॥ ইতি চাণক্যং ॥ অন্নাদিপাককারকৌষধাদৌ ত্রি ॥

পাচনং (ক্লী) প্রায়শ্চিত্তং। ইতি মেদিনী ॥ দোষপাচককাথৌষধং। তস্য দানকালঃ। জ্বরিতং ষড়হেঽতীতে লঘ্বন্নপ্রতিভোজিতং। সপ্তাহাৎ পরতোঽস্তব্ধে সামে স্যাৎ পাচনং জ্বরে ॥ ইতি সারকৌমুদী ॥ * ॥ সর্ব্বেষাং পাচনদ্রব্যাণাং পরিমাণং যথা। দশরক্তিকমাষেণ গৃহীত্বা তোলকদ্বয়ং। দত্ত্বাম্ভঃ ষোড়শগুণং গ্রাহ্যং পাদাবশেষিতং ॥ ইতি পরিভাষা ॥ * ॥ অথ সর্ব্বজ্বরে পাচনং। নাগরং দেবকাষ্ঠঞ্চ ধন্যাকং বৃহতীদ্বয়ং। দদ্যাৎ পাচনকং পূর্ব্বং জ্বরিতায় জ্বরাপহং ॥

নাগরাদি ॥ ১॥*॥ অথ বাতিকজ্বরে। বিল্বাদি-পঞ্চমূলস্য ক্বাথঃ স্যাদ্বাতিকজ্বরে। বিল্বাদি-পঞ্চমূলী ॥ ২॥ পাচনং পিপ্পলীমূলগুড়ূচী বিশ্বজোঽথবা॥ পিপ্পলীমূলাদি ॥ ৩ ॥ কিরাতাব্দামৃতোদীচ্যবৃহতীদ্বয়গোক্ষুরৈঃ। সস্থিরাকলসীবিল্বৈঃ ক্বাথো বাতজ্বরাপহঃ॥ কিরাতাদি ॥ ৪ ॥ রাস্না বৃক্ষাদনী দারু সরলং সৈলবালুকং। কষায়ঃ শর্করা-ক্ষৌদ্রযুক্তো বাতজ্বরাপহঃ॥ রাস্নাদি ॥৫॥ বিল্বাদিপঞ্চমূলী চ গুড়ূচ্যামলকে তথা। কুস্তুম্বুরুসমো হ্যেষ কষায়ো বাতিকে জ্বরে॥ বিল্বাদিপঞ্চমূল্যাদি ॥ ৬॥ পিপ্পলী-শারিবাদ্রাক্ষাশতপুষ্পাহরেণুভিঃ। কৃতঃ কষায়ঃ সগুড়ো হন্যাচ্ছ্বসনজং জ্বরং॥ পিপ্পল্যাদি ॥ ৭ ॥ গুড়ূচী শারিবা দ্রাক্ষা শতপুষ্পা পুনর্নবা। সগুড়োঽয়ং কষায়ঃ স্যাদ্বাতজ্বরবিনাশনঃ॥ গুড়ূচ্যাদি ॥ ৮ ॥ দ্রাক্ষাগুড়ূচীকাশ্মর্য্যত্রায়মাণাঃ সশারিবাঃ। নিঃক্বাথ্য সগুড়ং ক্বাথং পিবেদ্বাতজ্বরা-পহং॥ দ্রাক্ষাদি ॥ ৯ ॥ * ॥ অথ পৈত্তিক-জ্বরে। কলিঙ্গং কটুফলং মুস্তং পাঠা তিক্তকরোহিণী। পক্বং সশর্করং পীতং পাচনং পৈত্তিকে জ্বরে॥ কলিঙ্গাদি ॥১০॥ সক্ষৌদ্রং পাচনং পৈত্তে তিক্তাব্দেন্দ্রযবৈঃ শৃতং। তিক্তাদি ॥ ১১ ॥ লোধ্রোৎপলা-মৃতাপদ্মশারিবাণাং সশর্করঃ। ক্বাথঃ পিত্তজ্বরং হন্যাদথবা পর্পটোদ্ভবঃ॥ লোধ্রাদি ॥ ১২ ॥ ১৩ ॥ পটোলযব-নিঃক্বাথো মধুনা মধুরীকৃতঃ। তীব্রপিত্ত-জ্বরামর্দ্দী পানাতৃড়্দাহনাশনঃ॥ যব-পটোলং ॥ ১৪ ॥ দুরালভাপর্পটকপ্রিয়ঙ্গু-ভূনিম্ববাসাকটুরোহিণীনাং। জলং পিবে-চ্ছর্করয়াবগাঢ়ং তৃষ্ণাস্রপিত্তজ্বরদাহযুক্তঃ॥ দুরালভাদি ॥ ১৫ ॥ ত্রায়মাণা চ মধুকং পিপ্পলীমূলমেব চ। কিরাততিক্তকং মুস্তং মধুকং সবিভীতকং॥ সশর্করং পীত-মেতৎ পিত্তজ্বরনিবর্হণং। ত্রায়মাণাদি॥১৬॥ মৃদ্বীকা মধুকং নিম্বং কটুকারোহিণীসমাঃ। অবশ্যায়স্থিতং পাক্যমেতৎ পিত্তজ্বরা-পহং॥ মৃদ্বীকাদি ॥ ১৭ ॥ একঃ পর্পটকঃ শ্রেষ্ঠঃ পিত্তজ্বরবিনাশনঃ। কিং পুনর্যদি যুজ্যেত চন্দনোদীচ্যনাগরৈঃ॥ পর্পট-কাদি ॥ ১৮ ॥ বিশ্বাম্বুপর্পটোশীরঘনচন্দন-সাধিতং। দদ্যাৎ সুশীতলং বারি তৃট্-ছর্দ্দিজ্বরদাহনুৎ॥ বিশ্বাদি ॥ ১৯ ॥ পর্পটা-মৃতধাত্রীণাং ক্বাথঃ পিত্তজ্বরং জয়েৎ। পর্পটাদি ॥ ২০ ॥ দ্রাক্ষারগ্বধয়ো-শ্চাপি ॥ ২১ ॥ কাশ্মর্য্যস্যাথবা পুনঃ ॥২২॥ দ্রাক্ষাভয়াপর্পটকাব্দতিক্তাক্বাথং সসং-পাকফলং বিদধ্যাৎ। প্রলাপমূর্চ্ছাভ্রম-দাহশোষতৃষ্ণান্বিতে পিত্তভবে জ্বরে তু॥ দ্রাক্ষাদি ॥ ২৩॥ ব্যুষিতং ধন্যাকজলং প্রাতঃ পীতং সশর্করং পুংসাং। অন্ত-র্দ্দাহং শময়ত্যচিরাদ্দূরপ্ররূঢ়মপি ॥২৪॥*॥ অথ কফজ্বরে। মাতুলুঙ্গশিফাবিশ্বব্রহ্মী-গ্রন্থিকসংযুতং। কফজ্বরেঽম্বু সক্ষারং পাচনস্বা কণাদিকং॥ মাতুলুঙ্গাদি ॥ ২৫ ॥ কটুকং চিত্রকং নিম্বং হরিদ্রেঽতিবিষে বচাং। কুষ্ঠমিন্দ্রযবং মুর্ব্বাং পটোলঞ্চাপি সাধিতং॥ পিবেন্মরিচসংযুক্তং সক্ষৌদ্রং

শ্লৈষ্মিকে জ্বরে। কটুকাদি ॥ ২৬ ॥ নিম্ববিশ্বামৃতাদারুশটীভূনিম্বপৌষ্করং। পিপ্পল্যৌ বৃহতী চেতি ক্বাথো হন্তি কফজ্বরং ॥ নিম্বাদি ॥ ২৭ ॥ সিন্ধুবারদলক্বাথং শোষণং কফজে জ্বরে। জঙ্ঘয়োশ্চ বলে ক্ষীণে কর্ণে বা পিহিতে পিবেৎ ॥ সিন্ধুবারাদি ॥২৮॥ আমলক্যভয়া কৃষ্ণা চিত্রকশ্চেত্যয়ং গণঃ। সর্ব্বজ্বরকফাতঙ্কভেদী দীপনপাচনঃ ॥ আমলক্যাদি ॥ ২৯ ॥ ত্রিফলাপটোলবাসাচ্ছিন্নরুহাতিক্তরোহিণীষড়্গ্রন্থাঃ। ত্রিফলাদি ॥ ৩০ ॥ মধুনা শ্লেষ্মসমুত্থে দশমূলী বাসকস্য বা ক্বাথঃ ॥ ৩১ ॥ মুস্তং বৎসকবীজানি ত্রিফলা কটুরোহিণী। পরূষকাণি চ ক্বাথঃ কফজ্বরবিনাশনঃ ॥ মুস্তাদি ॥ ৩২ ॥ * ॥ অথ বাতপৈত্তিকজ্বরে। সংসৃষ্টদোষেষু হিতং সংসৃষ্টমথ পাচনং ॥ বিশ্বামৃতাব্দভূনিম্বৈঃ পঞ্চমূলীসমন্বিতৈঃ। কৃতঃ কষায়ো হন্ত্যাশু বাতপিত্তোদ্ভবং জ্বরং ॥ নবাঙ্গং ॥ ৩৩ ॥ ত্রিফলাশাল্মলীরাস্নারাজবৃক্ষাটরূষকৈঃ। শৃতমম্বু হরেত্তূর্ণং বাতপিত্তোদ্ভবং জ্বরং ॥ ত্রিফলাদি ॥ ৩৪ ॥ কিরাততিক্তকং মুস্তং দ্রাক্ষামামলকীং শটীং। নিক্বাথ্য পিত্তানিলজে ক্বথিতং সগুড়ং পিবেৎ ॥ কিরাততিক্তকাদি ॥ ৩৫ ॥ নিদিগ্ধিকাবলারাস্নাত্রায়মাণামৃতাযুতৈঃ। মসূরবিদলৈঃ ক্বাথো বাতপিত্তজ্বরং জয়েৎ ॥ নিদিগ্ধিকাদি ॥৩৬॥ গুড়ূচী পর্পটং মুস্তং কিরাতং বিশ্বভেষজং। বাতপিত্তজ্বরে দেয়ং পঞ্চভদ্রমিদং শুভং ॥ পঞ্চভদ্রং ॥ ৩৭ ॥ মধুকং শারিবে দ্রাক্ষা মধূকং চন্দনোৎপলং কাশ্মরী পদ্মকং লোধ্রং ত্রিফলাং পদ্মকেশরং ॥ পরূষকং মৃণালঞ্চ ন্যসেদুত্তমবারিণি। মধুলাজসিতাযুক্তং তৎ পীতং ব্যুষিতং নিশি ॥ বাতপিত্তজ্বরদাহং তৃষ্ণামূর্চ্ছাবমিভ্রমান্। শময়েদ্রক্তপিত্তঞ্চ জীমূতানিব মারুতঃ ॥ মধুকাদি ॥ ৩৮ ॥ * ॥ অথ পিত্তশ্লৈষ্মিকজ্বরে। পটোলং চন্দনং মূর্ব্বাতিক্তাপাঠামৃতাগণঃ। পিত্তশ্লেষ্মানিলচ্ছর্দ্দিজ্বরকণ্ডুবিষাপহঃ ॥ পটোলাদি ॥৩৯॥ গুড়ূচীনিম্বধন্যাকং পদ্মকং রক্তচন্দনং। এষ সর্ব্বজ্বরান্ হন্তি গুড়ূচ্যাদিস্তু দীপনঃ ॥ হৃল্লাসারোচকচ্ছর্দ্দিপিপাসাদাহনাশনঃ। গুড়ূচ্যাদি ॥ ৪০ ॥ কিরাতং নাগরং মুস্তং গুড়ূচীঞ্চ কফাধিকে। পাঠোদীচ্যমৃণালৈস্তু সহ পিত্তাধিকে পিবেৎ॥ চাতুর্ভদ্রকপাঠাসপ্তকৌ ॥ ৪১ ॥ ৪২ ॥ গুড়ূচী চন্দনং পদ্মং নাগরেন্দ্রযবাসকং। অভয়ারগ্বধোশীরং পাঠা ধান্যাব্দরোহিণী ॥ কষায়ং পায়য়েদেতৎ পিপ্পলীচূর্ণসংযুতং। পিত্তশ্লেষ্মহরং তন্দ্রাপিপাসাদাহনাশনং ॥ বিণ্মূত্রানিলবিষ্টম্ভত্রিদোষপ্রভবস্য চ। গুড়ূচ্যাদিগণো হ্যেষ পাচনো দীপনঃ পরঃ ॥ গুড়ূচ্যাদিগণঃ ॥ ৪৩ ॥ কণ্টকার্য্যমৃতা ভার্গী নাগরেন্দ্রযবাসকং। ভূনিম্বং চন্দনং মুস্তং পটোলং কটুরোহিণী ॥ কষায়ং পায়য়েদেতৎ পিত্তশ্লেষ্মজ্বরাপহং। দাহতৃষ্ণারুচিচ্ছর্দ্দিকাসহৃৎ পার্শ্বশূলনুৎ ॥ কণ্টকার্য্যাদি ॥ ৪৪ ॥ সপত্রপুষ্পবাসায়া রসঃ ক্ষৌদ্রসিতাযুতঃ। কফপিত্তজ্বরং হন্তি

সাস্রপিত্তং সকামলং ॥ বাসাদি ॥ ৪৫ ॥ পটোলঃ পিচুমর্দ্দশ্চ ত্রিফলা মধুকং বলা। সাধিতোঽয়ং কষায়ঃ স্যাৎ পিত্তশ্লেষ্মভবে জ্বরে ॥ পটোলাদি ॥ ৪৬ ॥ গুড়ূচীন্দ্রযবারিষ্টং পটোলং কটুরোহিণী। নাগরং চন্দনং মুস্তং পিপ্পলীচূর্ণসংযুতং ॥ অমৃতাষ্টক ইত্যেষ পিত্তশ্লেষ্মজ্বরাপহঃ। হৃল্লাসারোচকচ্ছর্দ্দিতৃষ্ণাদাহনিবারণঃ ॥ অমৃতাষ্টকং ॥ ৪৭ ॥ পটোলযবধান্যাকমুদ্গামলকচন্দনং। পৈত্তিকে শ্লেষ্মপিত্তোত্থে জ্বরতৃট্ছর্দ্দিদাহনুৎ ॥ পটোলাদি ॥ ৪৮ ॥ ক্ষুদ্রামৃতাভ্যাং সহ নাগরেণ সপুষ্করঞ্চেতি কিরাততিক্তং। পিবেৎ কষায়ং ত্বিহ পঞ্চতিক্তং জ্বরং নিহন্ত্যষ্টবিধং সমগ্রং॥ ক্ষুদ্রাদি ॥ ৪৯ ॥ * ॥ অথ বাতশ্লৈষ্মিকজ্বরে। দীপনং কফবিচ্ছেদি বাতপিত্তানুলোমনং। জ্বরঘ্নং পাচনং ভেদি শৃতং ধান্যপটোলয়োঃ ॥ ধান্যপটোলং ॥ ৫০ ॥ মুস্তনাগরভূনিম্বং ত্রয়মেতত্ত্রিকার্ষিকং। কফবাতপ্রশমনং পাচনং জ্বরনাশনং॥৫১॥ পিপ্পলী পিপ্পলীমূলং চব্যং চিত্রকনাগরং। দীপনীয়ঃ শৃতো বর্গঃ কফানিলগদাপহঃ ॥ পঞ্চকোলং ॥ ৫২ ॥ পিপ্পলীভিঃ শৃতং তোয়মনভিষ্যন্দি দীপনং। বাতশ্লেষ্মবিকারঘ্নং প্লীহজ্বরবিনাশনং ॥ পিপ্পলীক্বাথঃ ॥ ৫৩ ॥ আরগ্বধগ্রন্থিকমুস্ততিক্তাহরীতকীভিঃ ক্বথিতঃ কষায়ঃ। সামে সশূলে কফবাতযুক্তে জ্বরে হিতো দীপনপাচনশ্চ ॥ আরগ্বধাদি ॥ ৫৪ ॥ ক্ষুদ্রামৃতানাগরপুষ্করাহ্বয়ৈঃ কৃতঃ কষায়ঃ কফমারুতোত্তরে। সশ্বাসকাসারুচিপার্শ্বরুক্করে জ্বরে ত্রিদোষপ্রভবে চ শস্যতে ॥ ক্ষুদ্রাদি ॥ ৫৫ ॥ দশমূলীরসঃ পেয়ঃ কণাযুক্তঃ কফানিলে। অবিপাকেঽতিতন্দ্রায়াং পার্শ্বরুক্শ্বাসকাসকে ॥ দশমূলং ॥ ৫৬ ॥ মুস্তং পর্পটকং শুণ্ঠী গুড়ূচী সদুরালভা। কফবাতারুচিচ্ছর্দ্দিদাহশ্বাসজ্বরাপহা ॥ মুস্তাদি ॥ ৫৭ ॥ দারুপর্পটভার্গ্যব্দবচাধন্যাককট্ফলৈঃ। সাভয়াবিশ্বপূতীকৈঃ ক্বাথো হিঙ্গুমধূৎকটঃ ॥ কফবাতজ্বরে পীতো হিক্কাশ্বাসগলগ্রহান্। কাসশোষপ্রসেকাংশ্চ হন্যাৎ তরুমিবাশনিঃ ॥ দার্ব্বাদি ॥ ৫৮ ॥ * ॥ অথ ত্রিদোষজজ্বরে। পঞ্চমূলীকিরাতাদির্গণো যোজ্যস্ত্রিদোষজে। পিত্তোৎকটে চ মধুনা কণয়া চ কফোৎকটে ॥ চতুর্ভদ্রপঞ্চমূলং ॥ ৫৯ ॥ বিল্বশ্যোণাকগাম্ভারীপাটলাগণিকারিকাঃ। দীপনং কফবাতঘ্নং পঞ্চমূলমিদং মহৎ ॥ বৃহৎপঞ্চমূলী ॥ ৬০ ॥ শালপর্ণী পৃশ্নিপর্ণী বৃহতীদ্বয়গোক্ষুরং। বাতপিত্তজ্বরহরং কনীয়ঃ পঞ্চমূলকং ॥ স্বল্পপঞ্চমূলী ॥ ৬১ ॥ উভয়ং দশমূলঞ্চ সন্নিপাতজ্বরাপহং। কাসে শ্বাসে চ তন্দ্রায়াং পার্শ্বশূলে চ শস্যতে ॥ পিপ্পলীচূর্ণসংযুক্তং কণ্ঠহৃদ্‌গ্রহনাশনং। দশমূলং ॥ ৬২ ॥ চিরজ্বরে বাতকফোল্বণে বা ত্রিদোষজে বা দশমূলমিশ্রঃ। কিরাততিক্তাদিগণঃ প্রযোজ্যঃ শুদ্ধ্যর্থিনে বা ত্রিবৃতা বিমিশ্রঃ ॥ চতুর্দ্দশাঙ্গং ॥ ৬৩ ॥ দশমূলং শটী শৃঙ্গী পৌষ্করং সদুরালভং। ভার্গী কুটজবীজঞ্চ পটোলং কটুরোহিণী ॥

অষ্টাদশাঙ্গ ইত্যেষ সন্নিপাতজ্বরাপহঃ। কাসহৃল্লাসপার্শ্বার্ত্তিশ্বাসহিক্কাবমীহরঃ॥ বাতশ্লেষ্মহরোঽষ্টাদশাঙ্গঃ॥ ৬৪॥ ভূনিম্বদারুদশমূলমহৌষধাব্দতিক্তেন্দ্রবীজধনিকেভকণাকষায়ঃ। তন্দ্রীপ্রলাপকসনারুচিদাহমোহশ্বাসাদিযুক্তমখিলং জ্বরমাশু হন্তি॥ অষ্টাদশাঙ্গং॥ ৬৫॥ মুস্তপর্পটকোশীরদেবদারুমহৌষধং। ত্রিফলা ধন্বযাসশ্চ নীলী কম্পিল্লকং ত্রিবৃৎ॥ কিরাততিক্তকং পাঠা বলা কটুকরোহিণী। মধুকং পিপ্পলীমূলং মুস্তাদ্যো গণ উচ্যতে॥ অষ্টাদশাঙ্গমুদিতমেতদ্বা সন্নিপাতনুৎ। পিত্তোত্তরে সন্নিপাতে হিতঞ্চোক্তং মনীষিভিঃ॥ মন্যাস্তম্ভ উরোঘাত উরঃপার্শ্বশিরোগ্রহে। ৬৬। দ্রাক্ষামৃতা শটী শৃঙ্গী মুস্তকং রক্তচন্দনং। নাগরং কটুকং পাঠা ভূনিম্বং সদুরালভং॥ উশীরং পদ্মকং ধান্যং বালকং কণ্টকারিকা। পুষ্করং পিচুমর্দ্দশ্চ দশাষ্টাঙ্গমিদং শুভং॥ জীর্ণজ্বরারুচিশ্বাসকাসশ্বযথুনাশনং। অপরাষ্টাদশাঙ্গং॥ ৬৭॥ শটী পুষ্করমূলঞ্চ ব্যাঘ্রী শৃঙ্গী দুরালভা। গুড়ূচী নাগরং পাঠা কিরাতং কটুরোহিণী॥ এষ শট্যাদিকো বর্গঃ সন্নিপাতজ্বরাপহঃ। কাসহৃদ্গ্রহপার্শ্বার্ত্তিশ্বাসে তন্দ্র্যাঞ্চ শস্যতে॥ শট্যাদি॥ ৬৮॥ বৃহত্যৌ পুষ্করং ভার্গী শটী শৃঙ্গী দুরালভা। বৎসকস্য চ বীজানি পটোলং কটুরোহিণী॥ বৃহত্যাদির্গণঃ প্রোক্তঃ সন্নিপাতজ্বরাপহঃ। কাসাদিষু চ সর্ব্বেষু হিতঃ সোপদ্রবেষু চ॥ বৃহত্যাদিগণঃ॥ ৬৯॥

ভার্গী পুষ্করমূলঞ্চ রাস্নাবিল্বযমানিকাঃ। নাগরং দশমূলঞ্চ পিপ্পলীঞ্চাপ্সু সাধয়েৎ॥ সন্নিপাতজ্বরে দেয়ং হৃৎপার্শ্বানাহশূলিনাং। কাসশ্বাসাগ্নিমান্দ্যঞ্চ তন্দ্রাঞ্চ বিনিবর্ত্তয়েৎ॥ ভার্গ্যাদি॥ ৭০॥ দ্বিপঞ্চমূলী ষড়্গ্রন্থা বিশ্বগৃধ্রনখীদ্বয়ং। কফবাতহরঃ ক্বাথঃ সন্নিপাতহরঃ পরঃ॥ দ্বিপঞ্চমূল্যাদি॥ ৭১॥ কারবীপুষ্করৈরণ্ডত্রায়ন্তীনাগরামৃতাঃ। দশমূলীশটীশৃঙ্গীযাসভার্গীপুনর্নবাঃ॥ তুল্যা মূত্রেণ নিষ্ক্বাথ্য পীতশ্চেতোবিশোধনঃ। অভিন্যাসং জ্বরং ঘোরমাশু ঘ্নন্তি সমুদ্ধতং॥ দশমূল্যাদি॥ ৭২॥ মাতুলুঙ্গাশ্মভিদ্বিল্বব্যাঘ্রীপাঠোরুবূকজঃ। ক্বাথো লবণমূত্রাঢ্যোঽভিন্যাসানাহশূলনুৎ॥ মাতুলুঙ্গাদি॥ ৭৩॥ কণ্ঠরোধকফশ্বাসহিক্কাসংন্যাসপীড়িতঃ। মাতুলুঙ্গার্দ্রকরসং দশমূলাম্ভসা পিবেৎ॥ মাতুলুঙ্গার্দ্রকরসযুক্তদশমূলং॥ ৭৪॥ ব্যোষাব্দত্রিফলাতিক্তাপটোলারিষ্টবাসকৈঃ। ভূনিম্বামৃতযাসৈশ্চ ত্রিদোষজ্বরনুৎ জলং॥ ব্যোষাদি॥ ৭৫॥ ত্রিবৃদ্বিশালাত্রিফলাকটুকারগ্বধৈঃ কৃতঃ। সক্ষারো ভেদনঃ ক্বাথঃ পেয়ঃ সর্ব্বজ্বরাপহঃ॥ ত্রিবৃতাদি॥ ৭৬॥ *॥ অথ জীর্ণজ্বরে। নিদিগ্ধিকানাগরকামৃতানাং ক্বাথং পিবেন্মিশ্রিতপিপ্পলীকং। জীর্ণজ্বরারোচককাসশূলশ্বাসাগ্নিমান্দ্যার্দ্দিতপীনসেষু। হস্ত্যূর্দ্ধগাময়ং প্রায়ঃ সায়ং তেনায়মিষ্যতে॥ নিদিগ্ধিকাদি॥ ৭৭॥ পিপ্পলীচূর্ণসংযুক্তঃ ক্বাথশ্ছিন্নরুহোদ্ভবঃ। জীর্ণজ্বরকফধ্বংসী পঞ্চমূলীকৃতোঽথবা॥

কাসাজীর্ণারুচিশ্বাসহৃৎ পাণ্ডুক্রিমিরোগনুৎ ॥ ৭৮ ॥ * ॥ অথ সন্ততাদিজ্বরে। মধুকং চন্দনং মুস্তং ধাত্রী ধান্যমুশীরকং। ছিন্নোদ্ভবা পটোলঞ্চ ক্বাথং সমধুশর্করং ॥ জ্বরং পঞ্চবিধং হন্যাৎ সন্ততাদ্যং সুদারুণং। বাতিকং পৈত্তিকঞ্চৈব শ্লৈষ্মিকং সান্নিপাতিকং ॥ আমং বিপাচয়ত্যাশু নিরামং শময়ত্যপি। মধুকাদ্যং ॥ ৭৯ ॥ কলিঙ্গকাঃ পটোলস্য পত্রং কটুকরোহিণী ॥ ৮০ ॥ পটোলং শারিবা মুস্তং পাঠা কটুকরোহিণী ॥৮১॥ নিম্বং পটোলং ত্রিফলাং মৃদ্বীকাং মুস্তবৎসকৌ ॥ ৮২ ॥ কিরাততিক্তমমৃতাং চন্দনং বিশ্বভেষজং ॥ ৮৩ ॥ গুড়ূচ্যামলকং মুস্তং৮৪ মর্দ্ধশ্লোকসমাপনাঃ। কষায়াঃ শময়ন্ত্যাশু পঞ্চ পঞ্চবিধান্ জ্বরান্॥ সন্ততং সততান্যেদ্যুস্তৃতীয়কচতুর্থকান্। গুড়ূচীমুস্তধাত্রীণাং কষায়ন্বা সমাক্ষিকং ॥ মুস্তামলকগুড়ূচীবিশ্বৌষধকণ্টকারিকাক্বাথঃ। পীতঃ সকণাচূর্ণঃ সমধুর্বিষমজ্বরং হন্তি ॥ মুস্তাদি ॥ ৮৫ ॥ * ॥ অথ তৃতীয়কজ্বরে। মহৌষধামৃতামুস্তচন্দনোশীরধান্যকৈঃ। ক্বাথস্তৃতীয়কং হন্তি শর্করামধুযোজিতঃ ॥ মহৌষধাদি ॥ ৮৬ ॥ * ॥ অথ চাতুর্থকজ্বরে। বাসাধাত্রীস্থিরাদারুপথ্যানাগরসাধিতঃ। সিতামধুযুতঃ ক্বাথশ্চাতুর্থকনিবারণঃ ॥ ৮৭ ॥ ইতি জ্বরাধিকারঃ ॥ * ॥ অথ জ্বরাতীসারে। পাঠেন্দ্রযবভূনিম্বমুস্তপর্পটকামৃতাঃ। জয়ন্ত্যামমতীসারং সজ্বরং সমহৌষধাঃ ॥ পাঠাদি ॥ ৮৮ ॥ নাগরাতিবিষামুস্তভূনিম্বামৃতবৎসকৈঃ। সর্ব্বজ্বরহরঃ ক্বাথঃ সর্ব্বাতীসারনাশনঃ॥ নাগরাদি ॥ ৮৯ ॥ হ্রীবেরাতিবিষামুস্তবিল্বধান্যকনাগরৈঃ। পিবেৎ পিচ্ছাবিবন্ধঘ্নং শূলদোষামপাচনং ॥ সরক্তং হন্ত্যতীসারং সজ্বরং বাথ বিজ্বরং॥ হ্রীবেরাদি ॥ ৯০ ॥ গুড়ূচ্যতিবিষাধান্যশুণ্ঠীবিল্বাব্দবালকৈঃ। পাঠাভূনিম্বকুটজচন্দনোশীরপদ্মকৈঃ॥ কষায়ঃ শীতলঃ পেয়ো জ্বরাতীসারশান্তয়ে। হৃল্লাসারোচকচ্ছর্দ্দিপিপাসাদাহনাশনঃ॥ বৃহদ্গুড়ূচ্যাদি॥৯১॥ উশীরং বালকং মুস্তং ধন্যাকং বিশ্বভেষজং। সমঙ্গা ধাতকী লোধ্রং বিল্বং দীপনপাচনং॥ হন্ত্যরোচকপিচ্ছামং বিবন্ধং সাতিবেদনং। সশোণিতমতীসারং সজ্বরং বাথ বিজ্বরং ॥ উশীরাদি ॥ ৯২ ॥ পঞ্চমূলীবলাবিল্বগুড়ূচীমুস্তনাগরৈঃ। পাঠাভূনিম্বহ্রীবেরকুটজত্বক্‌ফলৈঃ শৃতং ॥ হন্তি সর্ব্বানতীসারান্ জ্বরদোষং বমিং তথা। সশূলোপদ্রবং শ্বাসং কাসং হন্যাৎ সুদারুণং ॥ পঞ্চমূল্যাদি ॥৯৩॥ কলিঙ্গাতিবিষাশুণ্ঠীকিরাতাম্বুযবাসকং। জ্বরাতীসারসন্তাপং নাশয়েদবিকল্পতঃ ॥ কলিঙ্গাদি ॥ ৯৪ ॥ বৎসকস্য ফলং দারু রোহিণী গজপিপ্পলী। বৎসকাদি ॥ ৯৫ ॥ শ্বদংষ্ট্রা পিপ্পলী ধান্যং বিল্বং পাঠা যমানিকা ॥ শ্বদংষ্ট্রাদি ॥ ৯৬ ॥ দ্বাবপ্যেতৌ সিদ্ধিযোগৌ শ্লোকার্দ্ধেনাভিভাষিতৌ। জ্বরাতীসারশমনৌ বিশেষাদ্দাহনাশনৌ ॥ নাগরামৃতভূনিম্ববিল্ববালকবৎসকৈঃ। সমুস্তাতিবিষোশীরৈর্জ্বরাতীসারনুজ্জলং॥ নাগ-

রাদি ॥৯৭॥ মুস্তকবিল্বাতিবিষাপাঠাভূনিম্ববৎসকৈঃ ক্বাথঃ। মকরন্দগর্ব্বযুক্তো জ্বরাতিসারৌ জয়েদ্ঘোরৌ ॥ মুস্তকাদি ॥ ৯৮ ॥ ঘনজলপাঠাতিবিষাপথ্যোৎপলধান্যরোহিণীবিশ্বৈঃ। সেন্দ্রযবৈঃ শৃতমম্ভঃ সাতীসারং জ্বরং জয়তি ॥ ঘনাদি ॥ ৯৯ ॥ দশমূলীকষায়েণ বিশ্বমক্ষসমং পিবেৎ। জ্বরে চৈবাতিসারে চ সশোথে গ্রহণীগদে ॥ দশমূলশুণ্ঠী ॥ ১০০ ॥ কিরাতাব্দামৃতাবিশ্বচন্দনোদীচ্যবৎসকৈঃ। শোথাতীসারশমনং বিশেষাৎ জ্বরনাশনং ॥ কিরাতাদি ॥১০১॥ ইতি জ্বরাতীসারাধিকারঃ ॥ * ॥ অথাতীসারে। ধান্যকং নাগরং মুস্তং বালকং বিল্বমেব চ। আমশূলবিবন্ধঘ্নং পাচনং বহ্নিদীপনং ॥ ধান্যপঞ্চকং ॥১০২॥ ইদং ধান্যচতুষ্কং স্যাৎ পৈত্তে শুণ্ঠীং বিনা পুনঃ। ধান্যচতুষ্কং ॥ ১০৩ ॥ কঞ্চটদাড়িমজম্বুশৃঙ্গাটকপত্রবিল্বহ্রীবেরং। জলধরনাগরসহিতং গঙ্গামপি বেগিনীং রুন্ধ্যাৎ॥ কঞ্চটাদি ॥ ১০৪ ॥ কিরাততিক্তকং মুস্তং বৎসকং সরসাঞ্জনং। পিবেৎ পিত্তাতিসারঘ্নং সক্ষৌদ্রং বেদনাপহং ॥ কিরাততিক্তকাদি ॥ ১০৫ ॥ কুটজত্বক্‌ফলং মুস্তং ক্বাথয়িত্বা জলং পিবেৎ। অতীসারং জয়েদাশু শর্করামধুযোজিতং ॥ কুটজাদি ॥ ১০৬ ॥ বিল্বচূতাস্থিনির্য্যূহঃ পীতঃ সক্ষৌদ্রশর্করঃ। নিহন্যাচ্ছর্দ্দ্যতীসারং বৈশ্বানর ইবাহুতিং॥ বিল্বাদিকাথঃ॥১০৭॥ পটোলযবধন্যাকক্বাথঃ পেয়ঃ সুশীতলঃ। শর্করামধুসংমিশ্রশ্ছর্দ্দ্যতীসারনাশনঃ ॥ পটোলাদিক্বাথঃ ॥১০৮॥ কুটজং দাড়িমং মুস্তং ধাতকী বিল্ববালকং। লোধ্রচন্দনপাঠাশ্চ কষায়ং মধুনা পিবেৎ ॥ সামে সশূলে রক্তে চ পিচ্ছাস্রাবে চ শস্যতে। কুটজাদিরিতি খ্যাতঃ সর্ব্বাতীসারনাশনঃ॥ কুটজাদি ॥ ১০৯ ॥ সমঙ্গাতিবিষা মুস্তং বিল্বং হ্রীবেরধাতকী। কুটজত্বক্‌ফলং বিশ্বং ক্বাথঃ সর্ব্বাতিসারনুৎ ॥ সমঙ্গাদি ॥ ১১০ ॥ কুটজত্বক্‌কৃতক্বাথো ঘনীভূতঃ সুশোভনঃ। লোহিতোঽতিবিষাযুক্তঃ সর্ব্বাতীসারনাশনঃ॥ কুটজক্বাথঃ॥ ১১১ ॥ সবৎসকঃ সাতিবিষঃ সবিল্বঃ সোদীচ্যমুস্তৈশ্চ কৃতঃ কষায়ঃ। সামে সশূলে সহশোণিতে চ চিরপ্রবৃত্তেঽপি হিতোঽতিসারে ॥ বৎসকাদি ॥ ১১২ ॥ কষায়ো মধুনা পীতস্ত্বচো দাড়িমবৎসকাৎ। সদ্যো জয়েদতীসারং সরক্তং দুর্নিবারণং ॥ কুটজদাড়িমং ॥ ১১৩ ॥ * ॥ অথ গ্রহণ্যাং। গ্রহণীমাশ্রিতং দোষমতীসারবদাচরেৎ। অতীসারোক্তবিধিনা তস্যামঞ্চ বিপাচয়েৎ ॥ নাগরাতিবিষামুস্তক্বাথঃ স্যাদামপাচনঃ। নাগরাদি ॥ ১১৪ ॥ * ॥ অথাগ্নিমান্দ্যে ॥ বিশ্বাভয়াগুড়ূচীনাং কষায়েণ ষড়ূষণং। পিবেৎ শ্লেষ্মণি মন্দেঽগ্নৌ ত্বক্‌পত্রসুরভীকৃতং ॥ পঞ্চকোলং সমরিচং ষড়ূষণমুদাহৃতং। সষড়ূষণবিশ্বাদি ॥ ১১৫ ॥ * ॥ অথামাজীর্ণে। ধান্যনাগরসংসিদ্ধং তোয়ং দদ্যাদ্বিচক্ষণঃ। আমাজীর্ণপ্রশমনং দীপনং বস্তিশোধনং। ধান্যশুণ্ঠী ॥ ১১৬ ॥ * ॥ অথ পাণ্ডুরোগে

ফলত্রিকামৃতাবাসাতিক্তাভূনিম্বনিম্বজঃ । ক্বাথঃ ক্ষৌদ্রযুতো হন্যাৎ পাণ্ডুরোগং সকামলং ॥ ফলত্রিকাদি ॥ ১১৭ ॥*॥ অথ রক্তপিত্তে । জলং খর্জ্জুরমৃদ্বীকামধুকৈঃ সপরূষকৈঃ । শৃতশীতং প্রযোক্তব্যং তর্পণার্থং সশর্করং ॥ খর্জ্জুরাদিজলং ॥১১৮॥*॥ অথ রাজযক্ষ্মণি । ধন্যাকপিপ্পলীবিশ্বদশমূলীজলং পিবেৎ । পার্শ্বশূলজ্বরশ্বাসপীনসাদিনিবৃত্তয়ে ॥ ধন্যাকাদি ॥ ১১৯ ॥ অশ্বগন্ধামৃতাভীরুদশমূলীবলাবৃষাঃ। পুষ্করাতিবিষে ঘ্নন্তি ক্ষয়ং ক্ষীররসাশিনঃ । অশ্বগন্ধাদি ॥ ১২০ ॥ দশমূলবলারাস্নাপুষ্করসুরদারুনাগরৈঃ ক্বথিতং। পেয়ং পার্শ্বাংসশিরোরুক্ক্ষতকাসাদিশান্তয়ে সলিলং ॥ দশমূলাদি ॥ ১২১ ॥ ইতি রাজযক্ষ্মাধিকারঃ ॥*॥ অথ কাসে। পঞ্চমূলীকৃতঃ ক্বাথঃ পিপ্পলীচূর্ণসংযুতঃ। রসান্নমশ্নতো নিত্যং বাতকাসমুদস্যতি ॥ পিপ্পলীচূর্ণযুক্তপঞ্চমূলী ॥ ১২২ ॥ পৌষ্করং কট্ফলং ভার্গীপিপ্পলীবিশ্বসাধিতং। পিবেৎ ক্বাথং কফোদ্রেকে কাসে শ্বাসে চ হৃদ্গ্রহে ॥ পৌষ্করাদি ॥ ১২৩ ॥ পিপ্পলীচূর্ণসংযুক্তং দশমূলীজলং পিবেৎ ॥ পিপ্পলীচূর্ণযুক্তদশমূলী ॥ ১২৪ ॥ কট্ফলং কতৃণং ভার্গী মুস্তং ধান্যং বচাভয়া। শৃঙ্গী পর্পটকং শুণ্ঠী সুরাহ্বঞ্চ জলে শৃতং ॥ মধুহিঙ্গুযুতং পেয়ং কাসে বাতকফাত্মকে। কণ্ঠরোগে মুখে শূলে শ্বাসহিক্কাজ্বরেষু চ ॥ কট্ফলাদি ॥ ১২৫ ॥ কণ্টকারীকৃতঃ ক্বাথঃ সকৃষ্ণঃ সর্ব্বকাসহা। কণ্টকারীক্বাথঃ॥১২৬॥

ইতি কাসাধিকারঃ ॥ * ॥ অথ হিক্কায়াং। অমৃতানাগরফঞ্জীব্যাঘ্রীপর্ণাশসাধিতক্বাথঃ। পীতঃ সকণাচূর্ণঃ কাসশ্বাসৌ জয়ত্যাশু ॥ অমৃতাদি ॥ ১২৭ ॥ দশমূলী কষায়স্তু পুষ্করেণাবচূর্ণিতঃ। কাসশ্বাসপ্রশমনঃ পার্শ্বহৃচ্ছূলনাশনঃ॥ কুষ্ঠচূর্ণযুক্তদশমূলী ॥১২৮॥ কুলত্থনাগরব্যাঘ্রীবাসাভিঃ ক্বথিতং জলং। পীতং পুষ্করসংযুক্তং হিক্কাশ্বাসনিবারণং॥ কুলত্থাদি ॥ ১২৯ ॥ শৃঙ্গীমহৌষধকণাঘনপৌষ্করাণাং চূর্ণং শটীমরিচশর্করয়া বিমিশ্রং। ক্বাথেন পীতমমৃতাবৃষপঞ্চমূল্যাঃ শ্বাসং ত্র্যহেণ বিনিহন্ত্যতিদোষমুগ্রং ॥ শৃঙ্গ্যাদি ॥ ১৩০ ॥ ইতি হিক্কাশ্বাসাধিকারঃ ॥ * ॥ অথ ছর্দ্দ্যাং। কষায়ো ভৃষ্টমুদ্গস্য সলাজমধুশর্করঃ। নিহন্ত্যাচ্ছর্দ্দ্যতীসারং বৈশ্বানর ইবাহুতিং ॥ ভৃষ্টমুদ্গকষায়ঃ ॥ ১৩১ ॥ গুড়ূচীত্রিফলারিষ্টপটোলৈঃ ক্বথিতং পিবেৎ। ক্ষৌদ্রযুক্তং নিহন্ত্যাশু ছর্দ্দিং পিত্তাম্লসম্ভবাং ॥ গুড়ূচ্যাদি ॥ ১৩২ ॥ ক্বাথঃ পর্পটজঃ পীতঃ সক্ষৌদ্রশ্ছর্দ্দিনাশনঃ॥ পর্পটক্বাথঃ॥১৩৩॥ কৃতং গুড়ূচ্যা বিধিবৎ কষায়ং হিমসংজ্ঞিতং। তিস্বম্বপি ভবেৎ পথ্যং মাক্ষিকেণ সমাযুতং ॥ দ্রব্যাদাপোথিতাত্তোয়ে প্রতপ্তে নিশি সংস্থিতাৎ। কষায়ো যোঽভিনির্যাতি স শীতঃ সমুদাহৃতঃ ॥ গুড়ূচীশীতকষায়ঃ ॥ ১৩৪ ॥ শ্রীফলস্য গুড়ূচ্যা বা কষায়ো মধুসংযুতঃ। পেয়শ্ছর্দ্দিত্রয়ে শীতো দূর্ব্বা বা তণ্ডুলাম্বুনা ॥ বিল্বমূলগুড়ূচীকষায়ৌ ॥ ১৩৫ ॥ জম্ব্বাম্র-

পল্লবগবেধুকধান্যসেব্যন্ত্রীবেরবারি পিবতো মধুনাল্পমল্পং। ছর্দ্দিঃ প্রয়াতি শমনং ত্রিসুগন্ধিযুক্তা লীঢ়া নিহন্তি মধুনাথ দুরালভা বা॥ জম্ব্যাদিবারি॥ ১৩৬॥ ইতি ছর্দ্দ্যধিকারঃ॥ *॥ অথ মূর্চ্ছায়াং। মহৌষধামৃতাক্ষৌদ্রং পৌষ্করং গ্রন্থিকোদ্ভবং। পিবেৎ কণাযুতং ক্বাথং মূর্চ্ছা যেষু গদেষু চ॥ মহৌষধাদি॥ ১৩৭॥ পিবেদ্দুরালভাক্বাথং সঘৃতং ভ্রমশান্তয়ে॥ দুরালভাক্বাথঃ॥ ১৩৮॥ ইতি মূর্চ্ছাধিকারঃ॥ *॥ অথোন্মাদে। দশমূলাম্বু সঘৃতং যুক্তং মাংসরসেন বা। সসিদ্ধার্থকচূর্ণং বা পুরাণং বৈককং ঘৃতং॥ ঘৃতাদিযুক্তদশমূলং॥ ১৩৯॥ *॥ অথাপস্মারে। হৃৎকম্পোঽক্ষিরুজা যস্য স্বেদো হস্তাদিশীততা। দশমূলীজলং তস্য কল্যাণাজ্যঞ্চ যোজয়েৎ॥ দশমূলীকল্যাণঘৃতৌ॥১৪০॥*॥ অথ বাতরোগে। পঞ্চমূলীকৃতঃ ক্বাথো দশমূলীকৃতোঽথবা। রূক্ষঃ স্বেদস্তথা নস্যং মন্যাস্তম্ভে প্রশস্যতে॥ পঞ্চমূলীদশমূলীক্বাথৌ॥ ১৪১॥ অর্দ্দিতে নবনীতেন খাদেন্মাষেণ্ডবীং নরঃ। ক্ষীরমাংসরসৈর্ভুক্ত্বা দশমূলীজলং পিবেৎ॥ দশমূলী॥ ১৪২॥ মাষবলাশুকশিম্বাকতৃণরাস্নাশ্বগন্ধোরুবূকাণাং। ক্বাথো নস্যনিপীতো রামঠলবণান্বিতঃ কোষ্ণঃ॥ অপহরতি পক্ষবাতং মন্যাস্তম্ভং সকর্ণনাদরুজং। দুর্জয়মর্দ্দিতবাতং সপ্তাহাজ্জয়তি চাবশ্যং॥ মাষবলাদি॥ ১৪৩॥ দশমূলীবলামাষক্বাথং তৈলাজ্যমিশ্রিতং। সায়ং ভুক্ত্বা পিবেন্নস্যং বিশ্বচ্যামবরাহুকে॥ দশমূল্যাদি॥ ১৪৪॥ মাষাত্মগুপ্তৈকেরণ্ডবাট্যালকশৃতং পিবেৎ। হিঙ্গুসৈন্ধরসংযুক্তং পক্ষাঘাতনিবারণং॥ মাষাদি॥১৪৫॥ বাতঘ্নৈর্দশমূল্যা চ নরং কুব্জমুপাচরেৎ। বাতঘ্নগণদশমূলীকষায়ৌ॥ ১৪৬॥ দশমূলী বলা রাস্না গুড়ূচী বিশ্বভেষজং। পিবেদেরণ্ডতৈলেন গৃধ্রসীখঞ্জপঙ্গুষু॥ এরণ্ডতৈলযুক্তদশমূল্যাদি॥ ১৪৭॥ শেফালিকাদলক্বাথো মৃদ্বগ্নিপরিসাধিতঃ। দুর্ব্বারং গৃধ্রসীরোগং পীতমাত্রং সমুদ্ধরেৎ॥ শেফালীক্বাথঃ॥ ১৪৮॥ পঞ্চমূলীকষায়স্তু রুবুতৈলবিমিশ্রিতং। ত্রিবৃতৈর্বাথবা যুক্তং গৃধ্রসীগুল্মশূলনুৎ॥ এরণ্ডতৈলযুক্তপঞ্চমূলী॥ ১৪৯॥ দশমূলীকষায়েণ পিবেদ্বা নাগরাম্ভসা। কটীশূলেষু সর্ব্বেষু তৈলমেরণ্ডসম্ভবং॥ এরণ্ডতৈলযুক্তদশমূলীশুণ্ঠীক্বাথৌ॥১৫০॥ গুগ্‌গুলুং ক্রোষ্টুশীর্ষে তু গুড়ূচীত্রিফলাম্ভসা। ক্ষীরেণৈরণ্ডতৈলঞ্চ পিবেদ্বা বৃদ্ধদারকং॥ গুগ্‌গুলুযুক্তগুড়ূচীত্রিফলাক্বাথঃ॥ ১৫১॥ ইতি বাতব্যাধ্যধিকারঃ॥ *॥ অথ বাতরক্তে। অমৃতানাগরধন্যাককর্ষত্রয়েণ পাচনকং সিদ্ধং। জয়তি সরক্তং বাতং সামং কুষ্ঠান্যশেষাণি॥ অমৃতাদি॥ ১৫২॥ বৎসাদন্যুদ্ভবঃ ক্বাথঃ পীতো গুগ্‌গুলুসংযুতঃ। সমীরণসমাযুক্তং শোণিতং সংপ্রধাবয়েৎ॥ বৎসাদনীক্বাথঃ॥ ১৫৩॥ বাসাগুড়ূচীচতুরঙ্গুলানামেরণ্ডতৈলেন পিবেৎ কষায়ং। ক্রমেণ সর্ব্বাঙ্গজমপ্যশেষং

জয়েদস্থ্বাতভবং বিকারং॥ বাসাদি॥১৫৪॥ লীঢ়া মুণ্ডিতিকাচূর্ণং মধুসর্পিঃসমন্বিতং। ছিন্নাক্বাথং পিবন্ হন্তি বাতরক্তং সুদুস্তরং ॥ গুড়ূচীক্বাথঃ ॥ ১৫৫ ॥ তিস্রোঽথবা পঞ্চ গুড়েন পথ্যা জগ্ধ্বা পিবেচ্ছিন্নরুহাকষায়ং। সবাতরক্তং শময়ত্যুদীর্ণমাজানুসংস্থঞ্চ নিহন্ত্যবশ্যং॥ গুড়ূচীকষায়ঃ ॥ ১৫৬ ॥ ইতি বাতরক্তাধিকারঃ ॥ * ॥ অথোরুস্তম্ভে। শিলাজতুং গুগ্গুলুস্বা পিপ্পলীমথ নাগরং। ঊরুস্তম্ভে পিবেন্মূত্রৈর্দশমূলীরসেন বা ॥ শিলাজত্বাদিযুক্তদশমূলী ॥ ১৫৭ ॥ ভল্লাতকামৃতাশুণ্ঠীদারুপথ্যাপুনর্নবাঃ। পঞ্চমূলীদ্বয়োন্মিশ্রা ঊরুস্তম্ভনিবারণাঃ ॥ ভল্লাতকাদি ॥ ১৫৮ ॥ পিপ্পলী পীপ্পলীমূলং ভল্লাতকাথ এব বা। কল্কো বা সমধুর্দেয় ঊরুস্তম্ভবিনাশনঃ॥ পিপ্পল্যাদি ॥ ১৫৯ ॥ ইত্যূরুস্তম্ভাধিকারঃ ॥ * ॥ অথামবাতে। শটীশুণ্ঠ্যভয়া চোগ্রা দেবাহ্বাতিবিষামৃতা। কষায়মামবাতস্য পাচনং রূক্ষভোজনং ॥ শট্যাদি ১৬০ ॥ শটী বিশ্বৌষধং কল্কং বর্ষাভূক্বাথসংযুতং। সপ্তরাত্রং পিবেজ্জন্তুরামবাতবিপাচনং ॥ পুনর্নবাক্বাথঃ॥ ১৬১ ॥ দশমূলামৃতৈরণ্ডরাস্নানাগরদারুভিঃ। ক্বাথোরুবুকতৈলেন সামং হন্ত্যনিলং গুরুং ॥ রাস্নাদশমূলং ॥ ১৬২ ॥ দশমূলীকষায়েণ পিবেদ্বা নাগরাম্ভসা। কুক্ষিবস্তিকটীশূলে তৈলমেরণ্ডসম্ভবং॥ এরণ্ডতৈলযুক্তদশমূলশুণ্ঠীক্বাথৌ॥ ১৬৩ ॥ রাস্নাং গুড়ূচীমেরণ্ডং দেবদারু মহৌষধং। পিবেৎ সর্ব্বাঙ্গবাতে চ সামে সন্ধ্যস্থিমজ্জগে ॥ রাস্নাপঞ্চকং ॥ ১৬৪ ॥ রাস্নামৃতারগ্বধদেবদারুত্রিকণ্টকৈরণ্ডপুনর্নবানাং। ক্বাথং পিবেন্নাগরচূর্ণমিশ্রং জঙ্ঘোরুপৃষ্ঠত্রিকপার্শ্বশূলী ॥ রাস্নাসপ্তকং ॥ ১৬৫ ॥ শুণ্ঠীগোক্ষুরকক্বাথঃ প্রাতঃ প্রাতর্নিষেবিতঃ। সামে বাতে কটীশূলে পাচনো রুক্প্রণাশনঃ ॥ গোক্ষুরশুণ্ঠী ॥ ১৬৬ ॥ আমবাতে কণাযুক্তং দশমূলীজলং পিবেৎ। কণাযুক্তদশমূলী ॥ ১৬৭ ॥ ইত্যামবাতাধিকারঃ ॥*॥ অথ শূলে। বলাপুনর্নবৈরণ্ডবৃহতীদ্বয়গোক্ষুরৈঃ। সহিঙ্গু লবণং পীতং সদ্যো বাতরুজাপহং ॥ বলাদি ॥ ১৬৮ ॥ বিশ্বমেরণ্ডজং মূলং ক্বাথং পীত্বা জলং পিবেৎ। হিঙ্গুসৌবর্চ্চলোপেতং সদ্যঃ শূলনিবারণং ॥ বিশ্বাদি ॥ ১৬৯ ॥ হিঙ্গুপুষ্করমূলাভ্যাং হিঙ্গুসৌবর্চ্চলেন বা। বিশ্বৈরণ্ডযবক্বাথঃ সদ্যঃ শূলনিবারণঃ ॥ হিঙ্গুপুষ্করমূলযুক্তবিশ্বৈরণ্ডযবক্বাথঃ ॥ ১৭০ ॥ তদ্বদ্রুবুযবক্বাথো হিঙ্গুসৌবর্চলান্বিতঃ। রুব্বাদি ॥ ১৭১ ॥ বৃহত্যৌ গোক্ষুরৈরণ্ডকুশকাসেক্ষুবালিকাঃ। পীতাঃ পিত্তভবং শূলং সদ্যো হন্তি সুদারুণং॥ বৃহত্যাদি॥ ১৭২॥ শতাবরীসযষ্ট্যাহ্ববাট্যালকুশগোক্ষুরৈঃ। শৃতশীতং পিবেত্তোয়ং সগুড়ক্ষৌদ্রশর্করং॥ পিত্তাসৃগ্দাহশূলঘ্নং সদ্যো দাহজ্বরাপহং। শতাবর্য্যাদি॥১৭৩॥ ত্রিফলানিম্বযষ্ট্যাহ্বকটুকারগ্বধৈঃ শৃতং। পায়য়েন্মধুসংমিশ্রং দাহশূলোপশান্তয়ে ॥

ত্রিফলাদি ॥ ১৭৪ ॥ তৈলমেরণ্ডজং বাপি মধুকক্কাথসংযুতং। শূলং পিত্তোদ্ভবং হন্যাদ্গুল্মং পৈত্তিকমেব চ॥ মধুক-ক্বাথঃ॥১৭৫॥ ত্রিফলারগ্বধক্বাথং সক্ষৌদ্রং শর্করান্বিতং। পায়য়েদ্রক্তপিত্তঘ্নং দাহ-শূলনিবারণং ॥ ত্রিফলারগ্বধক্বাথঃ॥১৭৬॥ বিল্বমূলমথৈরণ্ডং চিত্রকং বিশ্বভেষজং হিঙ্গুসৈন্ধবসংযুক্তং সদ্যঃ শূলনিবারণং॥ বিল্বমূলাদি ॥ ১৭৭ ॥ সক্ষারং বা পিবেৎ ক্বাথং বিল্বাদেঃ কফশূলবান্। বিল্বাদি-ক্বাথঃ ॥ ১৭৮ ॥ মাতুলুঙ্গরসো বাপি শিগ্রু-ক্বাথস্তথাপরঃ। সক্ষারো মধুনা পীতঃ পার্শ্বহৃদ্বস্তিশূলনুৎ ॥ শিগ্রুক্বাথঃ ॥ ১৭৯ ॥ আমশূলে ক্রিয়া কার্য্যা কফশূলবিনা-শিনী। সেব্যমামহরং সর্ব্বং যদন্যদগ্নি-বর্দ্ধনং ॥ পটোলত্রিফলারিষ্টক্বাথং স-মধুকং পিবেৎ। পিত্তশ্লেষ্মজ্বরচ্ছর্দ্দিদাহ-শূলোপশান্তয়ে॥ পটোলাদি ॥ ১৮০ ॥ বিশ্বোরুবূকদশমূলযবাম্ভসা তু দ্বিক্ষার-হিঙ্গুলবণত্রয়পুষ্করাণাং। চূর্ণং পিবেদ্ধৃদয়-পার্শ্বকটীগ্রহামপক্বাশয়াংশভূশরুগ্জ্বরগুল্ম-শূলী ॥ বিশ্বাদি ॥ ১৮১॥ ক্বাথেন চূর্ণপানং যত্তত্র ক্বাথপ্রধানতা। প্রবর্ত্ততে ন তেনাত্র চূর্ণাপেক্ষী চতুর্দ্রবঃ ॥ চূর্ণং সমং রুচক-হিঙ্গুমহৌষধানাং শুণ্ঠ্যম্বুনা কফসমীরণ-পিত্তজেষু। হৃৎপার্শ্বপৃষ্ঠজঠরার্ত্তিবিসূচিকাসু পেয়ং তথা যবরসেন তু বিড়্বিবন্ধে॥১৮২॥ সমং শুণ্ঠ্যম্বুনেত্যেবং যোজনাং ক্রিয়তে বুধৈঃ। তেনাম্লমানমেবাত্র হিঙ্গু সংপরি-দীয়তে ॥ রুচকাদি ॥ ১৮৩ ॥ হিঙ্গু সৌব-র্চ্চলং পথ্যা বিড়সৈন্ধবতুম্বরু। পৌষ্করঞ্চ পিবেচ্চূর্ণং দশমূলযবাম্ভসা ॥ পার্শ্বহৃৎ-কটিপৃষ্ঠাংশশূলে তন্ত্রাপতানকে। শোথ-শ্লেষ্মশ্বাসকে চ কর্ণরোগে চ শস্যতে॥ হিঙ্গ্বাদিচূর্ণযুক্তদশমূলীযবক্বাথঃ ॥ ১৮৪ ॥ এরণ্ডবিশ্ববৃহতীদ্বয়মাতুলুঙ্গপাষাণভিদ্বিকট-মূলকৃতঃ কষায়ঃ। সক্ষারহিঙ্গুলবণো রুবু-তৈলমিশ্রঃ শ্রোণ্যংশমেঢ্রহৃদয়স্তনবক্ষসি যঃ॥ এরণ্ডসপ্তকঃ ॥ ১৮৫ ॥ এরণ্ডফল-মূলানি বৃহতীদ্বয়গোক্ষুরং। পর্ণিন্যঃ সহ-দেবা চ সিংহপুচ্ছীক্ষুরালিকা॥ তুল্যৈ-রেতৈঃ শৃতং তোয়ং যবক্ষারযুতং পিবেৎ। পৃথগ্দোষভবং শূলং হন্যাৎ সর্ব্বভব-ন্তথা ॥ এরণ্ডদ্বাদশকঃ ॥ ১৮৬ ॥ ইতি শূলাধিকারঃ ॥ * ॥ অথোদাবর্ত্তে। শ্যামা দন্তী দ্রবন্তী ত্বক্ মহাশ্যামা স্নুহী ত্রিবৃৎ। সপ্তলা শঙ্খিনী শ্বেতা রাজবৃক্ষঃ স-তিন্দুকঃ॥ কম্পিল্লকঃ করঞ্জশ্চ হেমক্ষীরী-ত্যয়ং গণঃ। সর্পিস্তৈলরজঃক্বাথকল্কেষ্বন্য-তমেন চ॥ উদাবর্ত্তোদরানাহবিষগুল্মাদি-নাশনঃ। প্রত্যেকং শ্যামাদিগণক্বাথঃ॥১৮৭॥ ইত্যুদাবর্ত্তাধিকারঃ। আনাহেঽপি॥ * ॥ অথ হৃদ্রোগে। বাতোপসৃষ্টে হৃদয়ে বাম-য়েৎ স্নিগ্ধমাতুরং। দ্বিপঞ্চমূলীক্বাথেন সস্নেহলবণেন চ ॥ স্নেহলবণযুক্তদশ-মূলী ॥ ১৮৮ ॥ নাগরম্বা পিবেদুষ্ণং কষায়-ঞ্চাগ্নিবর্দ্ধনং। কাসশ্বাসানিলহরং শূল-হৃদ্রোগনাশনং ॥ নাগরক্বাথঃ ॥ ১৮৯ ॥ বচানিম্বকষায়াভ্যাং বান্তং হৃদি কফো-খিতে। বাতহৃদ্রোগহৃচ্চূর্ণং পিপ্পল্যাদিঞ্চ

পায়য়েৎ ॥ বচানিম্বকষায়ৌ ॥ ১৯০ ॥ হিঙ্গূগ্রগন্ধাবিড়বিশ্বকৃষ্ণাকুষ্ঠাভয়াচিত্রকযাবশূকং । পিবেৎ সসৌবর্চ্চলপুষ্করাঢ্যং যবাম্ভসা শূলহৃদাময়ঘ্নং ॥ হিঙ্গ্বাদিচূর্ণযুক্তযবক্বাথঃ ॥ ১৯১ ॥ দশমূলকষায়স্তু লবণক্ষারসংযুতং । কাসং শ্বাসঞ্চ হৃদ্রোগং গুল্মশূলঞ্চ নাশয়েৎ ॥ লবণক্ষারযুক্তদশমূলী ॥ ১৯২ ॥ ইতি হৃদ্রোগাধিকারঃ ॥*॥ অথ মূত্রকৃচ্ছ্রে। অমৃতা নাগরং ধাত্রী বাজিগন্ধা ত্রিকণ্টকং । প্রপিবেদ্বাতরোগার্ত্তঃ সশূলো মূত্রকৃচ্ছ্রবান্ ॥ অমৃতাদি ॥ ১৯৩ ॥ কুশঃ কাশঃ শরো দর্ভ ইক্ষুশ্চেতি তৃণোদ্ভবং । পিত্তকৃচ্ছ্রহরং পঞ্চমূলং বস্তিবিশোধনং ॥ তৃণপঞ্চমূলং ॥ ১৯৪ ॥ এতৎ সিদ্ধং পয়ঃ পীত্বা মেঢ্রগং হন্তি শোণিতং । শতাবরীকাশকুশশ্বদংষ্ট্রাবিদারিশালীক্ষুকশেরুকাণাং । ক্বাথং সুশীতং মধুশর্করাক্তং পিবন্ জয়েৎ পৈত্তিকমূত্রকৃচ্ছ্রং ॥ শতাবর্য্যাদি ॥ ১৯৫ ॥ হরীতকীগোক্ষুররাজবৃক্ষপাষাণভিদ্ধন্বযবাসকানাং । ক্বাথং পিবেন্মাক্ষিকসংপ্রযুক্তং কৃচ্ছ্রে সদাহে সরুজে বিবন্ধে ॥ হরীতক্যাদি ॥১৯৬॥ শ্বদংষ্ট্রা বিশ্বতোয়ন্বা কফকৃচ্ছ্রবিনাশনং। শ্বদংষ্ট্রাবিশ্বকষায়ৌ ॥১৯৭॥ বৃহতীধাবনীপাঠাযষ্টীমধুকপিঙ্গলাঃ॥ পাচনীয়ো বৃহত্যাদিঃ কৃচ্ছ্রদোষত্রয়াপহঃ॥১৯৮॥ ক্বাথং গোক্ষুরবীজস্য যবক্ষারযুতং পিবেৎ । মূত্রকৃচ্ছ্রং শকৃজ্জঞ্চ পীতঃ শীঘ্রং নিবারয়েৎ ॥ যবক্ষারযুক্তগোক্ষুরবীজক্কাথঃ ॥ ১৯৯ ॥ ক্রিয়া হিতা ত্বশ্মরিশর্করায়াং বা মূত্রকৃচ্ছ্রে কফমারুতোত্থে । যন্মূত্রকৃচ্ছ্রে বিহিতস্তু পৈত্তে তৎ কারয়েচ্ছোণিতমূত্রকৃচ্ছ্রে ॥ ত্রিকণ্টকারগ্বধদর্ভকাশদুরালভাপর্ব্বতভেদপথ্যাঃ । নিঘ্নন্তি পীতা মধুনাশ্মরীঞ্চ সংপ্রাপ্তমৃত্যোরপি মূত্রকৃচ্ছ্রং ॥ ত্রিকণ্টকাদি ॥ ২০০ ॥ কষায়োঽতিবলামূলসাধিতোঽশেষকৃচ্ছ্রজিৎ । অতিবলাকষায়ঃ ॥ ২০১ ॥ ইতি মূত্রকৃচ্ছ্রাধিকারঃ ॥ * ॥ অথ মূত্রাঘাতে। মূত্রাঘাতান্ যথাদোষং মূত্রকৃচ্ছ্রহরৈর্জয়েৎ । পিবেচ্ছিলাজতুক্বাথে গণে বীরতরাদিকে ॥ শিলাজতুযুক্তবীরতরাদিক্বাথঃ ॥ ২০২ ॥ রসং দুরালভায়া বা কষায়ং বাসকস্য বা। দুরালভারসবাসকষায়ৌ ॥ ২০৩ ॥ * ॥ অথাশ্মর্য্যাং। বরুণস্য ত্বচং শ্রেষ্ঠাং শুণ্ঠীগোক্ষুরসংযুতাং । যবক্ষারগুড়ং দত্ত্বা ক্বাথয়িত্বা পিবেদ্ধিতাং॥ অশ্মরীং বাতজাং হন্তি চিরকালানুবন্ধিনীং । বরুণত্বগাদি ॥ ২০৪ ॥ বীরতরঃ সহচরৌ দর্ভো বৃক্ষাদনী নলঃ । গুন্দ্রা কাশকুশাবশ্মভেদমোরটটুণ্টুকাঃ। কুরুণ্টকোঽথ বশিরো বসুকঃ সাগ্নিমন্থকঃ। ইন্দীবরী শ্বদংষ্ট্রা চ তথা কাপোতবক্রকঃ। বীরতরাদিরিত্যেষ গণো বাতবিকারনুৎ অশ্মরীশর্করামূত্রকৃচ্ছ্রাঘাতরুজাপহঃ॥ বীরতরাদিগণক্বাথঃ ॥ ২০৫ ॥ শুণ্ঠ্যগ্নিমন্থপাষাণশিগ্রুবরুণগোক্ষুরৈঃ । অভয়ারগ্বধফলৈঃ ক্বাথং কুর্য্যাদ্বিচক্ষণঃ ॥ রামঠক্ষারলবণচূর্ণং দত্ত্বা পিবেন্নরঃ । অশ্মরীমূত্রকৃচ্ছ্রঘ্নং পাচনং দীপনং পরং ॥ হন্যাৎ

কোষ্ঠাশ্রিতং বাতং কট্যুরুগুদমেঢ্রগং। শুণ্ঠ্যাদি ॥ ২০৬ ॥ বরুণত্বক্‌কষায়স্তু পীতস্তু গুড়সংযুতং। অশ্মরীং পাতয়ত্যাশু বস্তিশূলবিনাশনং ॥ বরুণক্কাথঃ ॥ ২০৭ ॥ পিবেদ্বরুণমূলত্বক্‌ক্কাথং তৎকল্কসংযুতং। বরুণকল্কযুক্তবরুণত্বক্‌কষায়ঃ ॥ ২০৮॥ ক্কাথশ্চ শিগ্রুমূলোত্থঃ কদুষ্ণোঽশ্মরিঘাতনঃ॥ শিগ্রু ক্কাথঃ ॥২০৯॥ নাগরবরুণকগোক্ষুরপাষাণভিৎকপোতবঙ্কজঃ ক্কাথঃ। গুড়যাবশূকমিশ্রঃ পীতো হন্ত্যশ্মরীমুগ্রাং ॥ নাগরাদি॥ ২১০ ॥ বরুণত্বক্‌শিলাভেদশুণ্ঠীগোক্ষুরকৈঃ কৃতঃ। কষায়ঃ ক্ষারসংযুক্তঃ শর্করাঞ্চ ভিনত্ত্যপি॥ বরুণত্বগাদি॥ ২১১ ॥ শ্বদংষ্ট্রৈরগুপত্রাণি নাগরং বরুণত্বচং। এতৎক্কাথবরং প্রাতঃ পিবেদশ্মরিভেদনং ॥ শ্বদংষ্ট্রাদি ॥ ২১২ ॥ এলোপকুল্যামধুকাশ্মভেদকৌন্তীশ্বদংষ্ট্রাবৃষকোরুবূকৈঃ। ক্কাথং পিবেদশ্মজতুপ্রগাঢ়ং সশর্করে সাশ্মরিমূত্রকৃচ্ছ্রে ॥ এলাদি॥ ২১৩॥ শুক্রাশ্মর্য্যাস্তু সামান্যো বিধিরশ্মরিনাশনঃ। ইত্যশ্মরীশর্করাধিকারঃ॥ *॥ অথ মেহে॥ দূর্ব্বাকশেরুপূতীককুম্ভীকপ্লবশৈবলং। জলে নিঃক্কথিতং পীতং শুক্রমেহহরং পরং॥ দূর্ব্বাদি ॥ ২১৪ ॥ ত্রিফলারগ্বধদ্রাক্ষাকষায়ো মধুনা যুতঃ। পীতো নিহন্তি ফেনাখ্যং প্রমেহং নিয়তং নৃণাং॥ ত্রিফলাদি ॥২১৫॥ লোধ্রাভয়াকট্‌ফলমুস্তকানাং বিড়ঙ্গপাঠার্জ্জুনধন্বনানাং। কদম্বশালার্জ্জুনদীপ্যকানাং বিড়ঙ্গদার্ব্বীধবশল্যকানাং॥ চত্বার এতে মধুনা কষায়াঃ কফপ্রমেহেষু নিষেবণীয়াঃ। অশ্বত্থাচ্চতুরঙ্গুল্যা ন্যগ্রোধাদেঃ ফলত্রয়াৎ। সজিঙ্গিরক্তসারাচ্চ ক্কাথাঃ পঞ্চ সমাক্ষিকাঃ॥ নীলহারিদ্রশুক্লাখ্যান্ ক্ষারমাঞ্জিষ্ঠসাহ্বয়ান্। মেহান্ হন্যুঃ ক্রমাদেতে সক্ষৌদ্রো রক্তমেহজিৎ॥ ক্কাথঃ খর্জ্জূরকাশ্মর্য্যতিন্দুকাস্থ্যমৃতাকৃতঃ। খর্জ্জূরাদি ॥ ২১৬ ॥ লোধ্রার্জ্জুনোশীরকুচন্দনানা২১৭মরিষ্টসেব্যামলকাভয়ানাং।২১৮। ধাত্র্যর্জ্জুনারিষ্টকবৎসকানাং২১৯ নীলোৎপলৈলাতিনিশার্জ্জুনানাং ॥ ২২০ ॥ চত্বার এতে বিহিতাঃ কষায়াঃ পিত্তপ্রমেহে মধুসংপ্রযুক্তাঃ॥ কষায়চতুষ্টয়ং ॥২২১॥ ছিন্নাবহ্নিকষায়েণ পাঠাকুটজরামঠং। তিক্তাং কুষ্ঠঞ্চ সঞ্চূর্ণ্য সর্পির্মেহে পিবেন্নরঃ॥ ছিন্নাবহ্নিকষায়ঃ ॥ ২২২ ॥ কদরখদিরপূগক্কাথং ক্ষৌদ্রাহ্বয়ে পিবেৎ। কদরাদি ॥ ২২৩ ॥ অগ্নিমন্থকষায়স্তু বসামেহে প্রযোজয়েৎ॥ অগ্নিমন্থকষায়ঃ॥২২৪॥ পাঠাশিরীষদুস্পর্শমূর্ব্বাঃ কিংশুকতিন্দুকৌ। কপিত্থানাং ভিষক্ ক্কাথং হস্তিমেহে প্রযোজয়েৎ ॥ পাঠাদি ॥ ২২৫ ॥ কষায়স্ত্রিফলাদারুমুস্তকৈরথবা কৃতঃ। ত্রিফলাদি ॥২২৬॥ ফলত্রিকং দারুনিশাং বিশালাং মুস্তঞ্চ নিক্কাথ্য নিশাংশকল্কং। পিবেৎ কষায়ং মধুসংপ্রযুক্তং সর্ব্বপ্রমেহেষু সমুত্থিতেষু ॥ ফলত্রিকাদি ॥ ২২৭ ॥ কটঙ্কটেরীমধুকত্রিফলাচিত্রকৈঃ সমৈঃ। সিদ্ধঃ কষায়ঃ পাতব্যঃ

প্রমেহাণাং বিনোত্থিতঃ ॥ কটঙ্কটে-র্য্যাদি ॥ ২২৮ ॥ ত্রিফলাদারুদার্ব্ব্যব্দকাথঃ ক্ষৌদ্রেণ মেহহা। ত্রিফলাদি ॥ ২২৯ ॥ কুটজাসনদার্ব্ব্যব্দফলত্রয়ভবোঽথবা ॥ কুট-জাদি ॥ ২৩০ ॥ ইতি প্রমেহাধি-কারঃ ॥ * ॥ অথোদরে। পয়সা সত্রিবৃৎ-কল্কেনোরুবূকশৃতেন বা। সপ্তলাত্রায়-মাণাভ্যাং শৃতেনারগ্বধেন বা ॥ ত্রিবৃৎ-কল্কযুক্তারগ্বধকাথৈরণ্ডকাথৌ ॥ ২৩১ ॥ সন্নিপাতোদরে সর্ব্বাং যথোক্তাং কার-য়েৎ ক্রিয়াং। পীতঃ প্লীহোদরং হন্যাৎ পিপ্পলীমরিচান্বিতঃ ॥ অম্লবেতসসংযুক্তঃ শিগ্রুকাথঃ সসৈন্ধবঃ ॥ শিগ্রুকাথঃ ॥ ২৩২ ॥ দশমূলদারুনাগরচ্ছিন্নরুহাপুনর্নবাকাথঃ। জয়তি জলোদরশোথশ্লীপদগলগণ্ডবাত-রোগাংশ্চ ॥ দশমূলাদি ॥২৩৩॥ হরীতকী-নাগরদেবদারুপুনর্নবাচ্ছিন্নরুহাকষায়ঃ। স-গুগ্‌গুলুর্মূত্রযুতশ্চ পেয়ঃ শোথোদরাণাং প্রবরঃ প্রয়োগঃ ॥ হরীতক্যাদি ॥ ২৩৪ ॥ এরণ্ডতৈলং দশমূলমিশ্রং গোমূত্রযুক্ত-স্ত্রিফলারসো বা। নিহন্তি বাতোদরশোথ-শূলং কাথঃ সমূত্রো দশমূলজশ্চ ॥ এরণ্ড-তৈলেন গোমূত্রেণ বা যুক্তা দশমূলী ॥২৩৫॥ পুনর্নবানিম্বপটোলশুণ্ঠীতিক্তামৃতাদার্ব্বভ-য়াকষায়ঃ। সর্ব্বাঙ্গশোথোদরকাসশূল-শ্বাসান্বিতং পাণ্ডুগদং নিহন্তি ॥ পুনর্নবা-ষ্টকং ॥ ২৩৬ ॥ পুনর্নবাদার্ব্বভয়াগুড়ূচীং পিবেৎ সমূত্রাং মহিষাক্ষযুক্তাং। ত্বগ্দোষ-শোথোদরপাণ্ডুরোগস্থৌল্যপ্রসেকোর্দ্ধকফা-ময়েষু ॥ পুনর্নবাচতুষ্কং ॥ ২৩৭ ॥ ইতি উদরাধিকারঃ ॥ * ॥ অথ শোথে। শুণ্ঠী-পুনর্নবৈরণ্ডপঞ্চমূলশৃতং জলং। বাতিকে শ্বযথৌ শস্তং পানাহারপরিগ্রহে ॥ শুণ্ঠ্যাদি ॥ ২৩৮ ॥ দশমূলং সর্ব্বথা চ শস্তং বাতে বিশেষতঃ। দশমূলং ॥ ২৩৯ ॥ ক্ষীরাশনঃ পিত্তকৃতেঽথ শোথে ত্রিবৃদ্-গুড়ূচীত্রিফলাকষায়ং। পিবেদ্গবাং মূত্র-বিমিশ্রিতস্বা ফলত্রিকাচূর্ণমথাক্ষমাত্রং ॥ ত্রিবৃতাদি ॥ ২৪০ ॥ অভয়া দারু মধুকং তিক্তা দন্তী সপিপ্পলী। পটোলং চন্দনং দার্ব্বী ত্রায়মাণেন্দ্রবারুণী ॥ এষাং কাথঃ সসর্পিষ্কঃ শ্বযথুজ্বরদাহহা। বীসর্পতৃষ্ণা-সন্তাপসন্নিপাতবিষাপহঃ ॥ অভয়াদি॥২৪১॥ পুনর্নবাবিশ্বত্রিবৃদ্গুড়ূচীসম্পাকপথ্যামরদা-রুকল্কং। শোথে কফোত্থে মহিষাক্ষমূত্র-যুক্তং পিবেদ্বা সলিলং তথৈষাং ॥ পুন-র্নবাসপ্তকং ॥ ২৪২ ॥ পুনর্নবাদারুশুণ্ঠী-কাথে মূত্রেঽথ কেবলে। দশমূলজলে বাপি গুগ্‌গুলুঃ শোথনাশনঃ ॥ গুগ্‌গুলু-যুক্তপুনর্নবাদিদশমূলকাথৌ ॥ ২৪৩ ॥ সিংহাস্যামৃতভণ্টাকীকাথং কৃত্বা সমা-ক্ষিকং। পীত্বা শোথং জয়েজ্জন্তুঃ কাসং শ্বাসং জ্বরং বমিং ॥ সিংহাস্যাদি ॥ ২৪৪ ॥ ভূনিম্ববিশ্বকল্কং জগ্ধ্বা পেয়ঃ পুনর্নবা-কাথঃ। অপহরতি নিয়তমাশু শোথং সর্ব্বাঙ্গগং নৃণাং ॥ পুনর্নবাক্বাথঃ ॥ ২৪৫ ॥ ইতি শোথাধিকারঃ ॥ * ॥ অথান্ত্রবৃদ্ধৌ। পুনর্নবায়াস্তৈলম্বা তৈলং নারায়ণন্তথা। পানে বস্তৌ রুবোস্তৈলং পেয়ম্বা দশকা-ম্ভসা ॥ রুবুতৈলযুক্তদশমূলং ॥ ২৪৬ ॥

রাস্নাযষ্ট্যমৃতৈরণ্ডবলাগোক্ষুরসাধিতঃ । ক্বাথোঽন্ত্রবৃদ্ধিং হন্ত্যাশু রুবুতৈলেন মিশ্রিতঃ ॥ রাস্নাদি ॥ ২৪৭ ॥ ইতি ব্রধ্নবৃদ্ধ্যধিকারঃ ॥ * ॥ অথ বিদ্রধৌ। পুনর্নবাদারুবিশ্বদশমূলাভয়াম্ভসা । গুগ্গুলুং রুবুতৈলম্বা পিবেন্মারুতবিদ্রধৌ ॥ পুনর্নবাদি ॥ ২৪৮ ॥ পিবেদ্বা ত্রিফলাক্বাথং ত্রিবৃৎকল্কাক্ষসংযুতং । ত্রিবৃৎকল্কযুক্তত্রিফলাক্বাথঃ ॥ ২৪৯ ॥ দশমূলীকষায়েণ সন্দোহনরসেন বা। শোথং ব্রণং বা কোষ্ণেন সশূলং পরিষেচয়েৎ ॥ দশমূলীকষায়ঃ ॥ ২৫০ ॥ ক্বাথো বংশত্বগেরণ্ডশ্বদংষ্ট্রাশ্মভিদা কৃতঃ। সহিঙ্গুসৈন্ধবঃ পীতঃ কোষ্ঠস্থং স্রাবয়েদসৃক্ ॥ বংশত্বগাদিক্বাথঃ ॥ ২৫১ ॥ * ॥ অথোপদংশে। পটোলনিম্বত্রিফলাগুড়ূচীক্বাথং পিবেদ্বা খদিরাশনাভ্যাং। সগুগ্গুলুং বা ত্রিফলাযুতম্বা সর্ব্বোপদংশাপহরঃ প্রয়োগঃ ॥ পটোলাদি ॥ ২৫২ ॥ ত্রিফলায়াঃ কষায়েণ ভৃঙ্গরাজরসেন বা। ব্রণপ্রক্ষালনং কুর্য্যাদুপদংশপ্রশান্তয়ে॥ ত্রিফলাক্বাথঃ॥২৫৩॥ জয়াজাত্যশ্বমারার্কসম্পাকানাং দলৈঃ পৃথক্। কৃতং প্রক্ষালনে ক্বাথং মেঢ্রপাকে প্রযোজয়েৎ ॥ জয়াদিক্বাথঃ ॥ ২৫৪ ॥ * ॥ অথ ভগ্নে। ন্যগ্রোধাদিকষায়স্তু সুশীতং পরিষেচনে। ন্যগ্রোধাদি ॥ ২৫৫ ॥ * ॥ অথ কুষ্ঠে। ত্রিফলাপটোলরজনীমঞ্জিষ্ঠারোহিণীবচানিম্বৈঃ। এষ কষায়োঽভ্যস্তো নিহন্তি কফপিত্তজং কুষ্ঠং ॥ নবকষায়ঃ ॥ ২৫৬ ॥ পটোলখদিরারিষ্টত্রিফলাকৃষ্ণবেত্রজং। তিক্তাশনঃ পিবেৎ ক্বাথং কুষ্ঠী কুষ্ঠং ব্যপোহতি ॥ পটোলাদি ॥ ২৫৭ ॥ ধাত্রীখদিরয়োঃ ক্বাথং পীত্বা বল্গুজসংযুতং । শঙ্খেন্দুধবলং শ্বিত্রং তূর্ণং হন্তি ন সংশয়ঃ ॥ ধাত্রীখদিরক্বাথঃ ॥ ২৫৮ ॥ * ॥ অথ শীতপিত্তে। উদর্দ্দে বমনং কার্য্যং পটোলারিষ্টবারিণা। পটোলারিষ্টজলং ॥২৫৯॥*॥ অথাম্লপিত্তে। নিস্তুষযবরবৃষধাত্রীক্বাথস্ত্রিসুগন্ধিযুতঃ পীতঃ। অপনয়তি চাম্লপিত্তং যদি ভুঙ্ক্তে মুদ্গযূষেণ ॥ নিস্তুষযবাদি ॥ ২৬০ ॥ কফপিত্তবমীকণ্ডুজ্বরবিস্ফোটদাহহা। পাচনো দীপনঃ ক্বাথঃ শৃঙ্গবেরপটোলয়োঃ ॥ শৃঙ্গবেরপটোলক্বাথঃ ॥ ২৬১ ॥ পটোলং নাগরং ধান্যং ক্বাথয়িত্বা জলং পিবেৎ। কণ্ডূপামার্ত্তিশূলঘ্নং কফপিত্তাগ্নিমান্দ্যজিৎ ॥ পটোলাদি ॥ ২৬২ ॥ পটোলবিশ্বামৃতরোহিণীকৃতং জলং পিবেৎ পিত্তকফোচ্ছ্রয়ে চ। শূলভ্রমারোচকবহ্নিমান্দ্যকাসজ্বরচ্ছর্দ্দিনিবারণন্তৎ ॥ পটোলাদি ॥ ২৬৩ ॥ যবকৃষ্ণাপটোলানাং ক্বাথং ক্ষৌদ্রযুতং পিবেৎ। নাশয়েদম্লপিত্তঞ্চ অরুচিঞ্চ বমিন্তথা ॥ যবাদি ॥ ২৬৪ ॥ বাসামৃতাপর্পটকভূনিম্বনিম্বমার্কবৈঃ। ত্রিফলাকুলকৈঃ ক্বাথঃ সক্ষৌদ্রশ্চাম্লপিত্তহা ॥ দশাঙ্গং ॥ ২৬৫ ॥ ফলত্রিকং পটোলঞ্চ তিক্তাক্বাথঃ সিতাযুতঃ। পীতঃ শীতকমধ্বক্তো জ্বরচ্ছর্দ্দ্যম্লপিত্তজিৎ ॥ ফলত্রিকাদি ॥ ২৬৬ ॥ পটোলধন্যাকমহৌষধাব্দৈঃ কৃতঃ কষায়ো

বিনিহন্তি শীঘ্রং। মন্দানলং পিত্তবলাস-দাহচ্ছর্দ্দিজ্বরামানিলশূলরোগান্ ॥ পটোলাদি ॥ ২৬৭॥ ছিন্নোদ্ভবানিম্বপটোলপত্রং ফলত্রয়ং সুক্কথিতং সুশীতং। ক্ষৌদ্রান্বিতং পীতমনেকরূপং সুদারুণং হন্তি তদম্লপিত্তং ॥ ছিন্নোদ্ভবাদি ॥ ২৬৮॥ পটোলত্রিফলানিম্বশৃতং মধুযুতং পিবেৎ। পিত্তশ্লেষ্মজ্বরচ্ছর্দ্দিদাহশূলোপশান্তয়ে ॥ পটোলাদি॥ ২৬৯ ॥ সিংহাস্যামৃতভণ্টাকী: ক্বাথং কৃত্বা সমাক্ষিকং। অম্লপিত্তং জয়েজ্জন্তুঃ কাসং শ্বাসং জ্বরং বমিং ॥ সিংহাস্যাদি ॥২৭০॥ ইতি অম্লপিত্তাধিকারঃ ॥*॥ অথ বিসর্পে। তৃণবর্জ্জং প্রযোক্তব্যং পঞ্চমূলচতুষ্টয়ং ॥ পঞ্চমূলত্রয়ং ॥ ২৭১ ॥ মস্তারিষ্টপটোলানাং ক্বাথঃ সর্ব্ববিসর্পনুৎ॥ মুস্তাদি ॥২৭২॥ ধাত্রীপটোলমুদ্গানামথবা ঘৃতসংপ্লুতঃ। ধাত্র্যাদি ॥ ২৭৩ ॥ অমৃতবৃষপটোলং নিম্বপত্রৈরুপেতং ত্রিফলখদিরসারং ব্যাধিঘাতঞ্চ তুল্যং। ক্বথিতমিদমশেষং গুগ্গুলোর্ভাগযুক্তং জয়তি বিষবিসর্পান্ কুষ্ঠমষ্টাদশাখ্যং ॥ নবকষায়ঃ ॥ ২৭৪ ॥ অমৃতবৃষপটোলং মুস্তকং সপ্তপর্ণং খদিরমসিতবেত্রং নিম্বপত্রং হরিদ্রে। বিবিধবিষবিসর্পান্ কুষ্ঠবিস্ফোটকণ্ডূরপনয়তি মসূরীং শীতপিত্তং জ্বরঞ্চ ॥ অমৃতাদি ॥ ২৭৫ ॥ পটোলামৃতভূনিম্ববাসকারিষ্টপর্পটৈঃ। খদিরাব্দযুতৈঃ ক্বাথো বিস্ফোটার্ত্তিজ্বরাপহঃ ॥ পটোলাদি ॥ ২৭৬ ॥ পটোলত্রিফলারিষ্টগুড়ূচীমুস্তচন্দনৈঃ। সমূর্ব্বা রোহিণী পাঠা রজনী সদুরালভা ॥ কষায়ং পায়য়েদেতৎ পিত্তশ্লেষ্মজ্বরাপহং। কণ্ডূত্বগ্দোষবিস্ফোটবিষবীসর্পনাশনং ॥ পটোলাদি ॥ ২৭৭ ॥ ভূনিম্ববাসাকটুকাপটোলফলত্রিকাচন্দননিম্বসিদ্ধঃ। বিসর্পদাহজ্বরবক্ত্রশোষবিস্ফোটতৃষ্ণাবমিনুৎ কষায়ঃ॥ ভূনিম্বাদি॥ ২৭৮॥ সকফে পিত্তযুক্তে তু ত্রিফলাং যোজয়েন্নরঃ। দুরালভাং পর্পটকং পটোলং কটুকান্তথা ॥ কোষ্ণং গুগ্গুলুসংযুক্তং পিবেদ্বা খদিরাষ্টকং। দুরালভাদি ॥২৭৯॥ কুণ্ডলী পিচুমর্দ্দাম্বু খদিরেন্দ্রযবাম্বু বা। বিস্ফোটান্নাশয়ত্যাশু বায়ুর্জলধরানিব ॥ কুণ্ডল্যাদি ॥ ২৮০ ॥ * ॥ অথ মসূর্য্যাং। দুরালভাং পর্পটকং ভূনিম্বং কটুরোহিণীং। শ্লৈষ্মিক্যাং পিত্তজায়াম্বা পানে নিঃক্বাথ্য দাপয়েৎ ॥ দুরালভাদি ॥ ২৮১ ॥ নিম্বং পর্পটকং পাঠাং পটোলং কটুরোহিণীং। বাসাং দুরালভাং ধাত্রীমুশীরং চন্দনদ্বয়ং॥ এষ নিম্বাদিকঃ ক্বাথঃ পীতঃ শর্করয়া যুতঃ। হন্তি ত্রিদোষমসূরীং ক্ষয়বীসর্পসম্ভবাং ॥ উত্থিতা প্রবিশেদ্বা তু পুনস্তাং বাহ্যতো নয়েৎ। নিম্বাদি ॥২৮২॥ পটোলকুণ্ডলীমুস্তবৃষধন্বযবাসকৈঃ। ভূনিম্বনিম্বকটুকাপর্পটৈশ্চ শৃতং জলং ॥ মসূরীং শময়েদামাং পক্বাঞ্চৈব বিশোষয়েৎ। নাতঃ পরতরং কিঞ্চিদ্বিস্ফোটজ্বরশান্তয়ে ॥ পটোলাদি ॥ ২৮৩ ॥ পটোলমূলারুণতণ্ডুলীয়কং পিবেদ্ধরিদ্রামলকল্কসংযুতং। মসূরিবিস্ফোটবিদাহশান্তয়ে তদেব পিত্তাস্রবমিজ্বরাপহং ॥ পটোলাদি ॥ ২৮৪ ॥

পটোলমূলারুণতণ্ডুলীয়কং তথৈব ধাত্রী-খদিরেণ সংযুতং। পিবেজ্জলং সুক্কথিতং সুশীতং মসূরিকারোগবিনাশনং পরং ॥ পটোলমূলাদি ॥ ২৮৫ ॥ খদিরত্রিফলা-রিষ্টপটোলামৃতবাসকৈঃ । ক্বাথোঽষ্ট-কাঙ্গো জয়তি রোমান্তীঞ্চ মসূরিকাং ॥ বীসর্পকুষ্ঠবিস্ফোটকণ্ডাদীনপি পানতঃ । খদিরাষ্টকং ॥ ২৮৬ ॥ অমৃতাদিকষায়স্তু জয়েৎ পিত্তকফাত্মিকাঃ। অমৃতাদি॥২৮৭॥ জাতীপত্রং সমঞ্জিষ্ঠং দার্ব্বীং পূগফলং শমীং । ধাত্রীফলং সমধুকং ক্বথিতং মধু-সংযুতং ॥ মুখরোগে কণ্ঠরোগে গণ্ডু-ষার্থং প্রশস্যতে। জাতীপত্রাদি ॥ ২৮৮ ॥ অক্ষ্ণোঃ সেকং প্রশংসন্তি গবেধুমধুকা-ম্বুনা। গবেধুমধুকক্বাথঃ ॥ ২৮৯ ॥ বেদনা-দাহশান্ত্যর্থং স্বরাণাঞ্চ বিশুদ্ধয়ে । স-গুগ্‌গুলুং বরাক্বাথং যুঞ্জ্যাদ্বা খদিরা-ষ্টকং॥ বরাক্বাথখদিরাষ্টকৌ ॥ ২৯০ ॥ নিম্বাতিমুক্তকাশোকপ্লক্ষবেতসপল্লবৈঃ । নিশাপর্য্যুষিতঃ ক্বাথো মসূরীভয়নাশনঃ॥ নিম্বাদি ॥ ২৯১ ॥ ইতি মসূর্য্যধিকারঃ॥*॥ অথ মুখরোগে । বৃহতীভূমিকদম্বককণ্ট-কার্য্যাঃ ক্বাথঃ। গণ্ডূসতৈলযুক্তঃ ক্রিমিদ-স্তস্য বেদনাশমনঃ॥ বৃহত্যাদি ॥ ২৯২ ॥ ক্বাথপানস্তু দার্ব্বীত্বঙ্‌নিম্বতার্ক্ষ্যকলিঙ্গজং। হরীতকীকষায়ো বা পেয়ো মাক্ষিকসং-যুতঃ॥ দার্ব্ব্যাদিহরীতকীকষায়ৌ॥ ২৯৩॥ কটুকাতিবিষাদারুপাঠামুস্তকলিঙ্গকাঃ । গোমূত্রক্বথিতাঃ পেয়াঃ কণ্ঠরোগবিনা-শনাঃ ॥ কটুকাদি ॥ ২৯৪ ॥ * ॥ মুখ-পাকে । জাতীপত্রামৃতাদ্রাক্ষাযাসদার্ব্বী-ফলত্রিকৈঃ । ক্বাথঃ ক্ষৌদ্রযুতঃ শীতো গণ্ডূষো মুখপাকনুৎ ॥ জাতীপত্রাদি॥২৯৫॥ পটোলনিম্বজম্ব্রাম্রমালতীনবপল্লবাঃ। পঞ্চ-পল্লবকঃ শ্রেষ্ঠঃ কষায়ো মুখধাবনে ॥ পটোলাদি ॥ ২৯৬ ॥ পঞ্চবল্ককষায়ো বা ত্রিফলাক্বাথ এব বা। মুখপাকেষু সক্ষৌদ্রঃ প্রযোজ্যো মুখধাবনে ॥ পঞ্চবল্কত্রিফলা-কষায়ৌ॥ ২৯৭ ॥ স্বরসঃ ক্বথিতো দার্ব্ব্যা ঘনীভূতো রসক্রিয়া । সক্ষৌদ্রা মুখ-রোগাসৃগ্দোষনাড়ীব্রণাপহা ॥ দার্ব্বী-ক্বাথঃ ॥ ২৯৮ ॥ সপ্তচ্ছদোশীরপটোল-মুস্তহরীতকীতিক্তকরোহিণীভিঃ। যষ্ট্যাহ্ব-রাজদ্রুমচন্দনৈশ্চ ক্বাথং পিবেৎ পাক-হরং মুখস্য ॥ সপ্তচ্ছদযষ্ট্যাহ্ব্যাদি-কষায়ৌ ॥ ২৯৯ ॥ পটোলশুণ্ঠীত্রিফলা-বিশালাত্রায়ন্তিতিক্তাত্রিবৃতামৃতানাং । পীতঃ কষায়ো মধুনা নিহন্তি মুখে স্থিত-স্তস্য গদানশেষান্ ॥ পটোলাদি ॥ ৩০০ ॥ ক্বথিতাস্ত্রিফলাপাঠামৃদ্বীকাজাতিপল্লবাঃ । নিষেব্যা ভক্ষণীয়া বা ত্রিফলা মুখ-পাকহা ॥ ত্রিফলাদি ॥ ৩০১ ॥ ইতি মুখরোগাধিকারঃ ॥ * ॥ অথ প্রদরে। দার্ব্বীরসাঞ্জনবৃষাব্দকিরাতবিল্বভল্লাতকৈ-রবক্বতো মধুনা কষায়ঃ। পীতো জয়-ত্যতিবলং প্রদরং সশূলং পীতা-সিতারুণবিলোহিতনীলকৃষ্ণং ॥ দার্ব্ব্যা-দি ॥ ৩০২ ॥ * ॥ অথ যোনিব্যাপদি। গুড়ূচীত্রিফলাদন্তীক্বাথৈশ্চ পরিষেচনং। গুড়ূচীত্রিফলাদন্তীক্বাথাঃ ॥ ৩০৩ ॥ * ॥

অথ গর্ব্বিণ্যাং। চন্দনং শারিবালোধ্র-মৃদ্বীকাশর্করান্বিতং। এষ ক্বাথঃ প্রদাতব্যো গর্ব্বিণ্যা জ্বরশান্তয়ে॥ চন্দনাদি ॥ ৩০৪ ॥ হ্রীবেরারলুরক্তচন্দনবলাধন্যাকবৎসাদনীমুস্তোশীরযবাসপর্পটবিষাক্বাথং পিবেদ্গর্ব্বিণী। নানাবর্ণরুজাতিসারকগদে গর্ব্বাশ্রিতে বা জ্বরে যোগোঽয়ং মুনিভিঃ পুরা নিগদিতঃ সূত্যাময়েষূত্তমঃ॥ বৃহৎহ্রীবেরাদি॥৩০৫॥*॥ অথ স্তনরোগে। হরিদ্রাদিং বচাদিম্বা প্রপিবেৎ স্তন্যবৃদ্ধয়ে। হরিদ্রাদিবচাদিক্বাথৌ॥ ৩০৬॥ তত্র বাতাত্মকে স্তন্যে দশমূলীজলং পিবেৎ। দশমূলক্বাথঃ॥৩০৭॥ পিত্তদুষ্টেঽমৃতাভীরুপটোলং নিম্বচন্দনং। ধাত্রী কুমারশ্চ পিবেৎ ক্বাথয়িত্বা সশারিবং ॥ অমৃতাদি॥ ৩০৮॥ কফে বা ত্রিফলাচব্যভূনিম্বকটুরোহিণী। ত্রিফলাদি ॥ ৩০৯॥ ধাত্রী স্তন্যবিশুদ্ধ্যর্থং মুদ্গাষ্টকরসাশনা। ভার্গীদারুবচাপাঠাঃ পিবেৎ সাতিবিষাঃ শৃতাঃ ॥ ভার্গ্যাদি॥ ৩১০॥ সঘৃতং ত্রিফলাক্বাথং স্তনরোগহরং পিবেৎ। সঘৃতত্রিফলাক্বাথঃ॥ ৩১১॥*॥ অথ সূতিকারোগে। অমৃতানাগরসহচরভদ্রোৎকটপঞ্চমূলজলদজলং। শৃতশীতং মধুযুক্তং নিবারয়তি সূতিকাতঙ্কং॥ সূতিকাদশমূলং ॥ ৩১২॥ সহচরপুষ্করবেতসমূলং বৈকঙ্কতদারুকুলত্থসমং। জলমত্র সসৈন্ধবহিঙ্গুযুতং সদ্যো জ্বরসূতিকশূলহরং॥ সহচরাদি॥ ৩১৩॥ দশমূলীকৃতঃ ক্বাথঃ সদ্যঃ সূতীরুজাপহঃ। দশমূলী ॥ ৩১৪॥*॥ অথ মক্কল্লশূলে। সূতায়া হৃচ্ছিরোবস্তিশূলং মক্কল্লসংজ্ঞিতং। যবক্ষারং পিবেত্তত্র মস্তুনোষ্ণোদকেন বা॥ পিপ্পল্যাদিগণক্বাথং পিবেদ্বা লবণান্বিতং। পিপ্পল্যাদিগণক্বাথঃ॥ ৩১৫॥ ইতি স্ত্রীরোগাধিকারঃ॥*॥ অথ বালরোগে। ভৈষজ্যং পূর্ব্বমুদ্দিষ্টং নরাণাং যজ্জ্বরাদিষু। কার্য্যন্তদেব বালানাং মাত্রা তস্য কনীয়সী॥ হরিদ্রাদ্বয়যষ্ট্যাহ্বসিংহীশক্রযবৈঃ কৃতঃ। শিশোর্জ্বরাতিসারঘ্নঃ কষায়ঃ স্তন্যদোষজিৎ॥ হরিদ্রাদি॥ ৩১৬॥ বিল্বঞ্চ পুষ্পাণি চ ধাতকীনাং জলং সলোধ্রং গজপিপ্পলী চ। ক্বাথাবলেহৌ মধুনা বিমিশ্রৌ বালেষু যোজ্যাবতিসারিতেষু॥ বিল্বাদিক্বাথঃ॥ ৩১৭॥ সমঙ্গাধাতকীলোধ্রশারিবাভিঃ শৃতং জলং। দুর্ব্বারেঽপি শিশোর্দেয়মতীসারে সমাক্ষিকং॥ সমঙ্গাদি॥ ৩১৮॥ নাগরাতিবিষামুস্তবালকেন্দ্রযবৈঃ শৃতং। কুমারং পায়য়েৎ প্রাতঃ সর্ব্বাতীসারনাশনং॥ নাগরাদি ॥ ৩১৯॥ বিল্বমূলকষায়েণ লাজাশ্চৈব সশর্করাঃ। আলোড্য পায়য়েদ্বালং ছর্দ্যতীসারনাশিনীঃ॥ সশর্করলাজযুক্তবিল্বমূলকষায়ঃ॥ ৩২০॥ পটোলত্রিফলারিষ্টহরিদ্রাকথিতং পিবেৎ। ক্ষতবিস্ফোটবীসর্পজ্বরাণাং শান্তয়ে শিশুঃ॥ পটোলাদি॥ ৩২১॥*॥ অথ বিষে। কটভ্যর্জ্জুনশৌরীয়শেলুক্ষীরিদ্রুমত্বচঃ। কষায়কল্কচূর্ণাঃ স্যুঃ কীটলূতাব্রণাপহাঃ॥

কটভ্যাদি ॥ ৩২২ ॥ ইতি চক্রপাণিদত্তঃ ॥

পাচনং (ত্রি) পাচয়িতা। ইতি মেদিনী ॥*॥ অথ বিশিষ্টদ্রব্যাজীর্ণে বিশিষ্টং পাচনদ্রব্যমাহ। অলং পনসপাকায় ফলং কদলসম্ভবং। কদলস্য তু পাকায় বুধৈরভিহিতং ঘৃতং ॥ ঘৃতস্য পরিপাকায় জম্বীরস্য রসো হিতঃ ॥ নারিকেলফলতালবীজয়োঃ পাচকং সপদি তণ্ডুলং বিদুঃ। ক্ষীরমাশু সহকারপাচনং চারমজ্জনি হরীতকী হিতা ॥ মধূকমালূরনৃপাদনানাং পরূষখর্জ্জূরকপিত্থকানাং। পাকায় পেয়ং পিচুমর্দবীজং ঘৃতেঽপি তক্রেঽপি তদেব দেয়ং ॥ খর্জ্জূরশৃঙ্গাটকয়োঃ প্রশস্তং বিশ্বৌষধং কুত্র চ ভদ্রমুস্তং। যজ্ঞাঙ্গবোধিদ্রুফলেষু শীতং প্লক্ষে তথা বার্য্যুষিতং প্রণীতং ॥ তণ্ডুলেষু পয়সঃ পয়ো হিতং দীপ্যকস্তু চিপিটে কণাযুতং। যষ্টিকা দধিজলেন জীর্য্যতে কর্কটী চ সুমনেষু গীর্য্যতে ॥ সুমনেষু গোধূমেষু। গীর্য্যতে কথ্যতে। গোধূমমাষহরিমন্থসতীলমুদ্গপাকো ভবেজ্‌ঝটিতি মাতুলপুত্রকেণ। খণ্ডঞ্চ খণ্ডয়তি মাষভবন্ত্বজীর্ণং তৈলং কুলত্থমথবা বিদধাতি জীর্ণং ॥ মাতুলপুত্রকঃ ধুস্তূরফলং ॥ কঙ্গুশ্যামাকনীবারাঃ কুলত্থক্বাবিলম্বিতং। দধ্নো জলেন জীর্য্যন্তি বৈদলাঃ কাঞ্জিকেন তু ॥ পিষ্টান্নং শীতলং বারি কৃশরাং সৈন্ধবং পচেৎ। মাষেণ্ডরীনিম্বমূলং পায়সং মুদ্গযূষকৈঃ ॥ বটো বেশবারাম্লবঙ্গেন ফেনীশমং পর্পটঃ শিগ্রুবীজেন যাতি। কণামূলতো লড্ডুকাপূপশট্টাবিপাকো ভবেচ্ছষ্কুলীমণ্ডয়োশ্চ ॥ বেসবারঃ বেসর ইতি লোকে। তদ্যথা। স্নেহো নিশাহিঙ্গুলবঙ্গকৈলাধন্যাকজীরার্দ্রকনাগরাণি। অম্লোষণং সৈন্ধবপর্ণমম্লে যথোচিতং সংস্কৃতয়ে প্রণীতমিতি ॥ শট্টা শট্টকঃ পানকবিশেষঃ। মণ্ডঃ মাণ্ডে ইতি লোকে। কিমত্র চিত্রং বহুমৎস্যমাংসভোজী সুখী কাঞ্জিকপানতঃ স্যাৎ। ইত্যদ্ভুতং কেবলবহ্নিপক্বমাংসেন মৎস্যঃ পরিপাকমেতি ॥ আমমাম্রফলং মীনে তদ্বীজং পিশিতে হিতং। কূর্ম্মমাংসং যবক্ষারাচ্ছীঘ্রং পাকমুপৈতি হি ॥ কপোতপারাবতনীলকণ্ঠকপিঞ্জলানাং পিশিতানি ভুক্ত্বা। কাসস্য মূলং পরিপীয় পিষ্টং সুখী ভবেন্না বহুশো হি দৃষ্টং ॥ কপোতো ধবলপাণ্ডুঃ। শাকানি সর্ব্বাণ্যপি যান্তি পাকং ক্ষারেণ সদ্যস্তিলনালজেন। চঞ্চুকসিদ্ধার্থকবাস্তুকানাং গায়ত্রিসারকথিতেন পাকঃ ॥ চঞ্চুক চেচু ইতি লোকে। গায়ত্রী খদিরঃ ॥ পলঙ্কিকাকেমুককারবেল্লীবার্ত্তাকুবংশাঙ্কুরমূলকানাং। উপোদিকালাবুপটোলকানাং সিদ্ধার্থকো মেঘরবস্য পক্তা ॥ মেঘরবঃ চবরাঙ্গী ইতি লোকে। বিপচ্যতে শূরণকং গুড়েন তথালুকং তণ্ডুলজোদকেন। পিণ্ডালুকং জীর্য্যতি কোরদূষাৎ কশেরুপাকঃ কিল নাগরেণ ॥ লবণস্তণ্ডুলতোয়াৎ সর্পির্জম্বীরকাদম্লাৎ। মরিচাদপি তচ্ছীঘ্রং পাকং যাত্যেব কাঞ্জিকাত্তৈলং ॥ ক্ষীরং

জীর্য্যতি তক্রেণ তদ্গব্যং কোষ্ণমণ্ডকাৎ। মাহিষং মাণিমন্থেন শঙ্খচূর্ণেন তদ্দধি ॥ মুণ্ডকঃ মাণ্ডে ইতি লোকে। রসালা জীর্য্যতি ব্যোষাৎ খণ্ডং নাগরভক্ষণাৎ। সিতা নাগরমুস্তেন তথেক্ষুশ্চাদ্রিকারসাৎ॥ জরামিরা গৈরিকচন্দনাভ্যামভ্যেতি শীঘ্রং মুনিভিঃ প্রণীতং। উষ্ণেন শীতং শিশিরেণ চোষ্ণং জীর্ণো ভবেৎ ক্ষারগণস্তথান্নৈঃ ॥ ইরা মদিরা। তপ্তং তপ্তং হেম-বা তারময়ো তোয়ে ক্ষিপ্তং সপ্তকৃত্বস্তদম্ভঃ। পীত্বাজীর্ণং তোয়জাতং নিহন্যাত্তত্র ক্ষৌদ্রং ভদ্রমুস্তং বিশেষাৎ ॥ তত্র তোয়াজীর্ণে। ইতি ভাবপ্রকাশে জঠরাগ্নিবিকারাজীর্ণবিসূচিকালসকবিলম্বিকাচিকিৎসা ॥

পাচনঃ (পুং) অগ্নিঃ। ইতি মেদিনী ॥ অম্লরসঃ। ইতি হেমচন্দ্রঃ ॥ রক্তেরণ্ডঃ। ইতি রাজনির্ঘণ্টঃ ॥

পাচনকঃ (পুং) টঙ্কণঃ। ইতি হেমচন্দ্রঃ ॥

পাচনী (স্ত্রী) হরীতকী। ইতি মেদিনী ॥

পাচলং (ক্লী) পাচনং। ইতি মেদিনী ॥

পাচলঃ (পুং) পাচকঃ। অগ্নিঃ। রাধনদ্রব্যং। বায়ুঃ। ইতি শব্দরত্নাবলী ॥

পাচী (স্ত্রী) লতাবিশেষঃ। পাচি ইতি পচ্চে ইতি চ হিন্দী ভাষা। তৎপর্য্যায়ঃ। মরকতপত্রী ২ হরিতলতা ৩ হরিতপত্রিকা ৪ পত্রী ৫ সুরভিঃ ৬ মালারিষ্টা ৭ গারুত্মতপত্রিকা ৮। অস্যা গুণাঃ। কটুত্বং। তিক্তত্বং। উষ্ণত্বং। কষায়ত্বং। বাতদোষগ্রহভূতবিকারনাশিত্বং। ত্বগ্দোষপ্রশমনত্বং। ব্রণেষু হিতত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

পাজঃ [স্] (ক্লী) বলং। ইত্যুণাদিকোষঃ ॥

পাঞ্চকপালঃ (ত্রি) পঞ্চকপালযাগসম্বন্ধী। পঞ্চকপালস্যায়ং। ইত্যর্থে ষ্ণপ্রত্যয়নিষ্পন্নঃ ॥

পাঞ্চজন্যঃ (পুং) বিষ্ণুশঙ্খঃ। ইত্যমরঃ ॥ পঞ্চজনো নাম দৈত্যঃ সমুদ্রে তিমিরূপ আসীৎ তদস্থিজত্বাৎ। ইতি ভরতঃ ॥ অগ্নিঃ। ইতি মেদিনী ॥

পাঞ্চজন্যধরঃ (পুং) বিষ্ণুঃ। ইতি হারাবলী ॥

পাঞ্চলিকা (স্ত্রী) পঞ্চালিকা। ইতি ভরতদ্বিরূপকোষঃ ॥

পাঞ্চশব্দিকং (ক্লী) পঞ্চপ্রকারবাদ্যং। যথা। অঙ্গজং চর্ম্মজঞ্চৈব তন্ত্রজং কাংস্যজং তথা। ফুৎকৃতঞ্চেতি মুনিভিঃ কথিতং পাঞ্চশব্দিকং ॥ ইতি স্কান্দে রেবাখণ্ডং ॥

পাঞ্চার্থিকঃ (পুং) পাশুপতঃ। যথা। পাঞ্চার্থিকঃ পাশুপতশ্চিদ্রূপঃ স্ফূর্ত্তিমান্মতঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

পাঞ্চালং (ক্লী) শাস্ত্রং। যথা। পিতৃহূর্প-পুর্য্যা দ্বার্দ্দক্ষিণেন পুরঞ্জনঃ। রাষ্ট্রং দক্ষিণপঞ্চালং যাতি শ্রুতধরান্বিতঃ ॥ ইতি শ্রীভাগবতে ৪ স্কন্ধে পুরঞ্জনোপাখ্যানে ২৫ অধ্যায়ঃ ॥ পঞ্চানাং বিষয়াণামন্যতোঽনবগতানাং প্রকাশনায়ালমিতি পঞ্চালং শাস্ত্রং। ইতি। প্রবৃত্তঞ্চ নিবৃত্তঞ্চ শাস্ত্রং পঞ্চালসংজ্ঞকং। ইতি চ তট্টীকায়াং শ্রীধরস্বামী ॥ অত্র পঞ্চালমিতি পাঠঃ কিন্তু স্বার্থে ষ্ণপ্রত্যয়ে পাঞ্চালমপি ভবতি ॥

পাঞ্চালঃ (ত্রি) পঞ্চালদেশোদ্ভবঃ। যথা। তথাভূতাং দৃষ্ট্বা নৃপসদসি পঞ্চালতনয়ামিতি বেণীসংহারঃ॥

পাঞ্চালাঃ (পুং) দেশবিশেষঃ। স তু দ্রুপদরাজনগরং। অধুনা ফরক্কাবাদ ইতি খ্যাতঃ। যথা। পাঞ্চালাশ্চেদিমৎস্যাশ্চ সূরসেনাঃ পটচ্চরাঃ। ইত্যাদি বিরাটপর্ব্ব॥

পাঞ্চালিকা (স্ত্রী) বস্ত্রদন্তাদিকৃতপুত্তলিকা। তৎপর্য্যায়ঃ। পুত্রিকা ২। ইত্যমরঃ॥ পঞ্চালিকা ৩। ইতি ভরতঃ॥ শালভঞ্জী ৪। ইতি হেমচন্দ্রঃ॥ পাঞ্চালী ৫ শালভঞ্জিকা ৬। ইতি জটাধরঃ॥

পাঞ্চালী (স্ত্রী) পাঞ্চালিকা। পাণ্ডবপত্নী। তৎপর্য্যায়ঃ। কৃষ্ণা ২ পাণ্ডুশর্ম্মিলা ৩ পার্ব্বতী ৪ দ্রৌপদী ৫ যাজ্ঞসেনী ৬ বেদিজা ৭। ইতি জটাধরঃ॥ সৈরিন্ধ্রী ৮ নিত্যযৌবনা ৯। ইতি হেমচন্দ্রঃ॥

পাট্ ব্য সম্বোধনং। ইত্যমরঃ॥

পাটকঃ (পুং) মহাকিষ্কুঃ। কটকান্তরং। বাদ্যং। অক্ষাদিচালনং। মূলদ্রব্যাপচয়ঃ। রোধঃ। ইতি মেদিনী॥ গ্রামৈকদেশঃ। ইতি হেমচন্দ্রঃ॥

পাটচ্চরঃ (পুং) চৌরঃ। ইত্যমরঃ॥

পাটনং (ক্লী) ছেদনং। যথা। অস্থিভঙ্গং গবাং কৃত্বা লাঙ্গূলচ্ছেদনং তথা। পাটনে কর্ণশৃঙ্গাণাং মাসার্দ্ধন্তু যবান্ পিবেৎ॥ ইতি প্রায়শ্চিত্ততত্ত্বে যমঃ॥

পাটলং (ক্লী) পাটলীপুষ্পং। ইত্যমরঃ॥ গোলাবাখ্যপুষ্পমিতি কেচিৎ॥

পাটলঃ (পুং) শ্বেতরক্তবর্ণঃ। গোলাবিরঙ্গ ইতি ভাষা। আশুধান্যং। ইত্যমরঃ॥ অস্য গুণাঃ। অত্যুষ্ণত্বং। বদ্ধনিষ্যন্দিত্বং। ত্রিদোষকারিত্বঞ্চ। ইতি রাজবল্লভঃ॥ তদ্বর্ণযুক্তে ত্রি॥

পাটলদ্রুমঃ (পুং) পুন্নাগবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

পাটলা (স্ত্রী) দুর্গা। যথা। অপর্ণানেকপর্ণা চ পাটলা পাটলাবতী। ইতি তন্ত্রসারে তস্যাঃ শতনামস্তোত্রং॥ পুষ্পবৃক্ষবিশেষঃ। পারুল ইতি ভাষা। তৎপর্য্যায়ঃ। পাটলিঃ ২ অমোঘা ৩ কাচস্থালী ৪ ফলেরুহা ৫ কৃষ্ণবৃন্তা ৬ কুবেরাক্ষী ৭। ইত্যমরঃ॥ তাম্রপুষ্পী ৮ কুম্ভিকা ৯ সুপুষ্পিকা ১০ বসন্তদূতী ১১ স্থালী ১২ স্থিরগন্ধা ১৩ অম্বুবাসী ১৪ কালবৃন্তী ১৫। ইতি রাজনির্ঘণ্টঃ॥ মধুদূতী ১৬ কালাস্থলী ১৭ অলিবল্লভা ১৮। ইতি ভাবপ্রকাশঃ॥ কামদূতী ১৯ কুম্ভী ২০ তোয়াধিবাসিনী ২১। ইতি রত্নমালা॥ অস্যা গুণাঃ। তিক্তত্বং। কটুত্বং। উষ্ণত্বং। কফবাতশোফাধ্মানবমিশ্বাসসন্নিপাতনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ তুবরত্বং। অনুষ্ণত্বং। দোষত্রয়ারুচিহিক্কাতৃষ্ণানাশিত্বঞ্চ॥ তৎপুষ্পগুণাঃ। কষায়ত্বং। মধুরত্বং। হিমত্বং। হৃদ্যত্বং। কফাস্রনাশিত্বঞ্চ। তৎফলগুণাঃ। পিত্তাতিসারদাহনাশিত্বং। হিক্কাস্রপিত্তকারিত্বঞ্চ। ইতি ভাবপ্রকাশঃ॥ * ॥ তদুৎপত্তির্যথা। গতে ব্রহ্মণি সর্ব্বোঽপি তপঃ সংহৃত্য তং তদা।

লিঙ্গং চিত্রবনে সূক্ষ্মং প্রতিষ্ঠাপ্য চচার হ ॥ বিচরন্তং তদা ভূয়ো মহেশং কুসুমায়ুধঃ। আরাৎ স্থিত্বাগ্রতো ধন্বী সন্তাপয়িতুমুদ্যতঃ॥ ততস্তমগ্রতো দৃষ্ট্বা ক্রোধাধ্মাতদৃশা হরঃ। স্মরমালোকয়ামাস শিখাগ্রাচ্চরণান্তিকং ॥ আলোকিতস্ত্রিনেত্রেণ মদনো দ্যুতিমানপি। প্রাদহ্যত তদা ব্রহ্মন্ পাদাদারভ্য কক্ষবৎ ॥ প্রদহ্যমানৌ চরণৌ দৃষ্ট্বাসৌ কুসুমায়ুধঃ। উৎসসর্জ ধনুঃ শ্রেষ্ঠং তজ্জগামাথ পঞ্চধা ॥ যদাসীন্মুষ্টিবন্ধন্তু রুক্মপৃষ্ঠং মহাপ্রভং। স চম্পকতরুর্জাতঃ সুগন্ধাঢ্যো গুণাকৃতিঃ॥ নাহস্থানং শুভাকারং যদাসীদ্বজ্রভূষিতং। তজ্জাতং কেশবারণ্যং বকুলং নামতো নগেঃ॥ যা চ কোটী শুভা হ্যাসীদিন্দ্রনীলবিভূষিতা। জাতা সা পাটলা রম্যা ভৃঙ্গরাজিবিভূষিতা॥ ইতি বামনে ৬ অধ্যায়ঃ॥ রক্তলোধ্রঃ। ইতি শব্দচন্দ্রিকা॥

পাটলাপুষ্পসন্নিভং (ক্লী) পদ্মকাষ্ঠং। ইতি রাজনির্ঘণ্টঃ॥

পাটলিঃ (পুং স্ত্রী) পাটলীপুষ্পবৃক্ষঃ। ইত্যমরঃ॥

পাটলিপুত্রং (ক্লী) নগরবিশেষঃ। পাটনা ইতি খ্যাতঃ। তৎপর্য্যায়ঃ। কুসুমপুরং২। ইতি হেমচন্দ্রঃ॥ পুষ্পপুরং ৩ পাটলিপুত্রকং ৪। ইতি ত্রিকাণ্ডশেষঃ॥

পাটলী (স্ত্রী) কটভীবৃক্ষঃ। মুষ্ককবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

পাটবং (ক্লী) পটুতা। যথা। পাটবং সংস্কৃতোক্তিষু। ইতি হিতোপদেশঃ॥ আরোগ্যং। ইতি রাজনির্ঘণ্টঃ॥

পাটবিকঃ (ত্রি) পটুঃ। ধূর্ত্তঃ। ইতি ত্রিকাণ্ডশেষঃ॥

পাটহিকা (স্ত্রী) গুঞ্জা। ইতি হারাবলী॥

পাটিতং (ত্রি) কৃতপাটনং। তৎপর্য্যায়ঃ। দারিতং ২ ভিন্নং ৩। ইতি হেমচন্দ্রঃ॥

পাটী (স্ত্রী) বলাক্ষুপঃ। ইতি রাজনির্ঘণ্টঃ॥ পরিপাটী। অনুক্রমঃ। যথা। পাটীং সদ্গণিতস্য বচ্মি চতুরপ্রীতিপ্রদাং প্রস্ফুটাং। ইত্যাদি লীলাবতী॥

পাটীরঃ (পুং) পটীরঃ। ইতি বিশ্বঃ॥

পাট্যং (ক্লী) পট্টশাকং। যথা। পাট্যশাকন্তু মধুরং ভুর্জরং গুরুপাকি চ। ইতি রাজবল্লভঃ॥

পাঠঃ (পুং) বিধিনা বেদস্যাভ্যসনং। শিষ্যাণামধ্যাপনং। তৎপর্য্যায়ঃ। মহাযজ্ঞঃ ২ ব্রহ্মযজ্ঞঃ ৩ পঠনং ৪ পাঠনা ৫ পাঠনং ৬ অধ্যয়নং ৭ অধ্যাপনং ৮ অধ্যাপনা ৯ অভ্যসনং ১০। ইত্যমরভরতৌ॥ নিপাঠঃ ১১ নিপঠঃ ১২। ইতি সঙ্কীর্ণবর্গে অমরঃ॥*॥ মাহাত্ম্যাদিপাঠে তু ওঁ নারায়ণায় নমঃ ওঁ নরায় নমঃ ওঁ নরোত্তমায় নমঃ ওঁ দেব্যৈ সরস্বত্যৈ নমঃ ওঁ ব্যাসায় নমঃ। ইতি নত্বা পাঠ্যং। নারায়ণং নমস্কৃত্য নরঞ্চৈব নরোত্তমং। দেবীং সরস্বতীং ব্যাসং ততো জয়মুদীরয়েৎ॥ ইতি বিধেঃ। এবঞ্চ ভাগবতীয়সূতোক্তৌ উদীরয়েৎ ইত্যস্য স্বয়ন্তথা উদীরয়ন্নন্যান্ পৌরাণিকানুপশিক্ষয়তীতি শ্রীধরস্বামিব্যাখ্যানমনুশাসনবিরুদ্ধং। চৈবেতি ভারতপাঠাচ্চকারেণ ব্যাসো লব্ধঃ। ভাগবতে চৈবে-

ত্যত্র ব্যাস ইতি সাক্ষাল্লিখিতং। জয়-পদার্থমাহ ব্রহ্মচারিকাণ্ডে ভবিষ্যপুরাণং। অষ্টাদশপুরাণানি রামস্য চরিতন্তথা। বিষ্ণুধর্ম্মাদি শাস্ত্রাদি শিবধর্ম্মাশ্চ ভারত॥ কার্ষ্ণ্যঞ্চ পঞ্চমো বেদো যন্মহাভারতং স্মৃতং। কার্ষ্ণ্যং কৃষ্ণদ্বৈপায়নপ্রণীতং। সৌরাশ্চ ধর্ম্মা রাজেন্দ্র মানবোক্তা মহীপতে। জয়েতি নাম এতেষাং প্রবদন্তি মনীষিণঃ॥ জয়ত্যনেন সংসারমিতি জয়স্তত্তদ্গ্রন্থঃ। এবঞ্চার্থানবলোকনাৎ আচারাদ্বা স্তোত্রাদাবেষ শ্লোকঃ পঠ্যতে। মৎস্যসূক্তে বারাহীতন্ত্রে চ। প্রণবঞ্চাদৌ জপ্ত্বা চ স্তোত্রং বা সংহিতাং পঠেৎ। অন্তে চ প্রণবং দদ্যাদিত্যুবাচাদিপূরুষঃ॥ সর্ব্বত্র পাঠে বিজ্ঞেয়ো হ্যন্যথা বিফলং ভবেৎ। শুদ্ধেনানন্যচিত্তেন পঠিতব্যং প্রযত্নতঃ॥ ন কার্য্যাসক্তমনসা কার্য্যং স্তোত্রস্য বাচনং। আধারে স্থাপয়িত্বা তু পুস্তকং বাচয়েৎ সুধীঃ॥ হস্তসংস্থাপনাদেব যস্মাদল্পফলং ভবেৎ। স্বয়ঞ্চ লিখিতং যত্তু কৃতিনা লিখিতঞ্চ যৎ॥ অব্রাহ্মণেন লিখিতং তচ্চাপি বিফলং ভবেৎ। ঋষিচ্ছন্দাদিকং ন্যস্য পঠেৎ স্তোত্রং বিচক্ষণঃ॥ স্তোত্রে ন দৃশ্যতে যত্র প্রণবন্যাসমাচরেৎ। সঙ্কল্পিতে স্তোত্রপাঠে সংখ্যাং কৃত্বা পঠেৎ সুধীঃ॥ অধ্যায়ং প্রাপ্য বিরমেন্ন তু মধ্যে কদাচন। কৃতে বিরামে মধ্যে তু অধ্যায়াদিং পঠেন্নরঃ॥ ততশ্চ মার্কণ্ডেয়পুরাণীয়দেবীমাহাত্ম্যস্যাদৌ ঋষিচ্ছন্দাদিকং পঠেৎ। তদ্যথা। প্রথমচরিতস্য ব্রহ্মা ঋষির্মহাকালী দেবতা গায়ত্রী ছন্দো নন্দা শক্তী রক্তদন্তিকা বীজমগ্নিস্তত্ত্বং মহাকালীপ্রীত্যর্থং জপে বিনিয়োগঃ। মধ্যমচরিতস্য বিষ্ণুর্ঋষির্মহালক্ষ্মীর্দ্দেবতানুষ্টুপ্ ছন্দঃ শাকম্ভরী শক্তির্দুর্গা বীজং সূর্য্যস্তত্ত্বং মহালক্ষ্মীপ্রীত্যর্থং জপে বিনিয়োগঃ। উত্তরচরিতস্য রুদ্র ঋষিঃ সরস্বতী দেবতা উষ্ণিক্ ছন্দো ভীমাশক্তির্ভ্রামরী বীজং বায়ুস্তত্ত্বং সরস্বতীপ্রীত্যর্থং জপে বিনিয়োগঃ॥ নৈয়তকালিককল্পতরৌ ভবিষ্যপুরাণং। ইতিহাসপুরাণানি শ্রুত্বা ভক্ত্যা মহীপতে। মুচ্যতে সর্ব্বপাপেভ্যো ব্রহ্মহত্যাদিভির্বিভো॥ ব্রাহ্মণং বাচকং বিদ্যান্নান্যবর্ণজমাদরাৎ। শ্রুত্বান্যবর্ণজাদ্রাজন্ বাচকান্নরকং ব্রজেৎ॥ তথা। দেবার্চ্চামগ্রতঃ কৃত্বা ব্রাহ্মণানাং বিশেষতঃ। গ্রন্থিঞ্চ শিথিলং কুর্য্যাদ্বাচকঃ কুরুনন্দন॥ পুনর্ব্বধ্নীত তৎ সূত্রং ন মুক্ত্বা ধারয়েৎ কচিৎ। হিরণ্যং রজতং গাশ্চ তথা কাংস্যোপদোহনাঃ॥ দত্ত্বা তু বাচকায়েহ শ্রুতস্যাপ্নোতি যৎ ফলং। কাংস্যোপদোহনাঃ কাংস্যক্রোড়াঃ। বাচকঃ পূজিতো যেন প্রসন্নাস্তস্য দেবতাঃ॥ তথা। জ্ঞাত্বা সর্ব্বসমাপ্তিঞ্চ পূজয়েদ্বাচকং বুধঃ। আত্মানমপি বিক্রীয় য ইচ্ছেৎ সফলং ক্রতুং॥ তথা। বিস্পষ্টমদ্রুতং শান্তং স্পষ্টাক্ষরপদন্তথা। কলস্বরসমাযুক্তং রসভাবসমন্বিতং॥ বুধ্যমানঃ সদর্থং বৈ গ্রন্থার্থং কৃৎস্নশো নৃপ। ব্রাহ্মণাদিষু সর্ব্বেষু

গ্রন্থার্থঞ্চার্পয়েন্নৃপ ॥ য এবং বাচয়েদ্ব্রহ্মন্ স বিপ্রো ব্যাস উচ্যতে ॥ তথা । সপ্তস্বরসমাযুক্তং কালে কালে বিশাম্পতে । প্রদর্শয়ন্রসান্ সর্ব্বান্ বাচয়েদ্বাচকো নৃপ ॥ ইতি তিথ্যাদিতত্ত্বং ॥ * ॥ পাঠস্যাষ্টাদশ দোষা যথা । শঙ্কিতং ভীতমুদ্ঘুষ্টমব্যক্তমনুনাসিকং । বিস্বরং বিরসঞ্চৈব বিশ্লিষ্টং বিসমাহতং ॥ কাকস্বরং শিরসিতং তথা স্থানবিবর্জ্জিতং । ব্যাকুলং তালহীনঞ্চ পাঠদোষাশ্চতুর্দ্দশ ॥ সংগীতং শিরসঃ কম্পমল্পকণ্ঠমনর্থকং । ইতি মার্কণ্ডেয়পুরাণং ॥ * ॥ অধ্যয়নক্রমো যথা । আচম্য প্রযতো নিত্যমধীয়ীত উদঙ্মুখঃ । উপসংগৃহ্য তৎপাদৌ বীক্ষ্যমাণো গুরোর্মুখং ॥ * ॥ অধ্যাপনক্রমো যথা । অধীষ্ব ভো ইতি ব্রূয়াদ্বিরামোঽস্ত্বিতি চাচমেৎ । প্রাক্ কূলান্ পর্য্যুপাসীনঃ পবিত্রৈশ্চৈব পাবিতঃ ॥ প্রাণায়ামৈস্ত্রিভিঃ পূতস্তত ওঙ্কারমর্হতি । ব্রাহ্মণঃ প্রণবং কুর্য্যাদন্তে চ বিধিবদ্দ্বিজাঃ ॥ কুর্য্যাদধ্যাপনং নিত্যং স ব্রহ্মাদীনি পূর্ব্বতঃ । সর্ব্বেষামেব ভূতানাং বেদশ্চক্ষুঃ সনাতনঃ ॥ অধীয়ীতাধ্যয়ন্নিত্যং ব্রাহ্মণ্যাদ্ধীয়তেঽন্যথা । ইতি কৌর্ম্মে উপবিভাগে ১৩ অধ্যায়ঃ ॥ * ॥ পাঠনিষেধকালো যথা । গ্রহণেঽনধ্যায়ো ন দৃষ্টোপরাগমাত্রবিষয়ঃ । ত্র্যহং ন কীর্ত্তয়েদ্‌ব্রহ্ম রাজ্ঞো রাহোশ্চ সূতকে । ইতি মনুবচনেন সামান্যতো নিষেধাৎ ॥ এষ ত্র্যহানধ্যায়ো গ্রস্তাস্তবিষয় ইতি মিতাক্ষরা অন্যত্র ত্বহোরাত্রমনধ্যায়ো যাজ্ঞবল্ক্যাৎ । যথা । সন্ধ্যাগর্জ্জিতনির্ঘাতভূকম্পোল্কানিপাতনে । সমাপ্য বেদং দ্যুনিশমারণ্যকমধীত্য চ ॥ পঞ্চদশ্যাং চতুর্দ্দশ্যামষ্টম্যাং রাহুসূতকে । ঋতুসন্ধিষু ভুক্ত্বা বা শ্রাদ্ধিকং প্রতিগৃহ্য চ ॥ দ্যুনিশমহোরাত্রং । চৈত্রশ্রাবণমার্গশীর্ষাণামাদিপ্রতিপদো নিত্যাঃ ইতি ব্রহ্মচারিকাণ্ডধৃতহারীতবচনে এতাসামনধ্যায়ে নিত্যত্বাভিধানাদন্যাসাং কাম্যত্বং । আদিপ্রতিপদঃ শুক্লপ্রতিপদঃ ॥ সা চ যৌধিষ্ঠিরী সেনা গাঙ্গেয়শরতাড়িতা । প্রতিপৎ পাঠশীলানাং বিদ্যেব তনুতাং গতা ॥ ইতি ব্যাসবচনমপি তাবন্মাত্রপরং ॥ * ॥ গোতমোক্তাকালিকানধ্যায়া যথা । আকালিকনির্ঘাতভূকম্পরাহুদর্শনোল্কা ইতি আকালিকা ইতি । নিমিত্তকালমারভ্য পরেদ্যুর্যাবৎ স এব কালস্তাবদাকালস্তত্র ভবাঃ ॥ তথা । বিদ্যুৎস্তনিতবর্ষেষু মহোল্কানাঞ্চ সংপ্লবে । আকালিকমনধ্যায়মেতেষু মনুরব্রবীৎ ॥ * ॥ উল্কাদিষু প্রতিপ্রসবমাহ মনুঃ । বেদোপকরণে চৈব স্বাধ্যায়ে চৈব নিত্যকে । নানুরোধোঽস্ত্যনধ্যায়ে হোমমন্ত্রেষু চৈব হি ॥ পরাশরভাষ্যে কূর্ম্মপুরাণং । অনধ্যায়স্তু নাঙ্গেষু নেতিহাসপুরাণয়োঃ । ন ধর্ম্মশাস্ত্রেষ্বন্যেষু পর্ব্বস্বেতানি বর্জ্জয়েৎ ॥ নারদঃ । অয়নে বিষুবে চৈব শয়নে বোধনে হরেঃ । অনধ্যায়স্তু কর্ত্তব্যো মন্বাদিষু যুগাদিষু ॥ * ॥ সন্ধ্যাগর্জনে শাস্ত্রচিন্তানিন্দামাহ কৃত্যচিন্তামণৌ দুর্ব্বাসাঃ । সন্ধ্যায়াং গর্জিতে মেঘে

শাস্ত্রচিন্তাং করোতি যঃ। চত্বারি তস্য নশ্যন্তি আয়ুর্বিদ্যা যশো বলং ॥ প্রাদুষ্কৃতেষগ্নিষু তু বিদ্যুৎস্তনিতনিস্বনে। সজ্যোতিঃ স্যাদনধ্যায় ইত্যাহ ভগবান্ মনুঃ॥ ইতি মনুবচনং বর্ষাবিষয়ং ॥ * ॥ অষ্টম্যাদিষু বিশেষমাহ হেমাদ্রিধৃতাপস্তম্বঃ। উদয়াস্তমিতে বাপি মুহূর্ত্তত্রয়গামি যৎ। তদ্দিনং তদহোরাত্রমনধ্যায়বিদো বিদুঃ॥ কেচিদাহুঃ ক্বচিদ্দেশে যাবত্তু দিননাড়িকাঃ। তাবদেব ত্বনধ্যায়ো ন তন্মিশ্রে দিনান্তরে॥ তদ্দিনং তাং তিথিং প্রাপ্যেত্যর্থঃ। দিনান্তরে তিথ্যন্তরে। অত্র পূর্ব্ববচনমুত্তরমীমাংসাধ্যায়িভিঃ পরিগৃহীতং। পরবচনস্তু অন্যগ্রন্থপরং। যত্তু নির্ণয়ামৃতধৃতং। প্রতিপল্লেশমাত্রেণ কলামাত্রেণ চাষ্টমী। দিনং দূষয়তে সর্ব্বং সুরা গব্যঘটং যথা ॥ তদ্দূষয়ত ইত্যভিধানাৎ পূর্ব্ববর্ত্তিতামাত্রেণ সর্ব্বদিনদূষণায়। রাজমার্ত্তণ্ডে। প্রে কো চৈ চা দ্বিতীয়াস্তাঃ প্রেতপক্ষে গতে তু যা। যা তু কোজাগরে জাতে চৈত্রাবল্যাঃ পরেঽপি যা॥ চাতুর্মাস্যে সমাপ্তে চ দ্বিতীয়া যা ভবেত্তিথিঃ। সর্ব্বাস্বেতাস্বনধ্যায়ঃ পুরাণৈঃ পরিকীর্ত্তিতঃ॥ ইতি তিথ্যাদিতত্ত্বং ॥

পাঠকঃ (ত্রি) উপাধ্যায়ঃ। ইতি হেমচন্দ্রঃ॥ ধর্ম্মভাণকঃ। ইতি ত্রিকাণ্ডশেষঃ॥

পাঠভূঃ (স্ত্রী) ব্রহ্মারণ্যং। বেদাদিপাঠস্থানং। ইতি ত্রিকাণ্ডশেষঃ॥

পাঠমঞ্জরী (স্ত্রী) শারী পক্ষিণী। ইতি শব্দমালা॥

পাঠশালা (স্ত্রী) অধ্যয়নগৃহং। পাঠস্য অধ্যয়নস্য শালা গৃহং। ইতি ষষ্ঠীতৎপুরুষসমাসনিষ্পন্না॥

পাঠশালিনী (স্ত্রী) শারী পক্ষিণী। ইতি শব্দমালা॥

পাঠা (স্ত্রী) লতাবিশেষঃ। আকনাদি ইতি ভাষা। তৎপর্য্যায়ঃ। অম্বষ্ঠা ২ অম্বষ্ঠিকা ৩ প্রাচীনা ৪ পাপচেলিকা ৫ যূথিকা ৬ স্থাপনী ৭ শ্রেয়সী ৮ রিদ্ধকর্ণিকা ৯ একাষ্ঠীলা ১০ কুচেলী ১১ দীপনী ১২ বনতিক্তিকা ১৩ তিক্তপুষ্পা ১৪ বৃহত্তিক্তা ১৫ শিশিরা ১৬ বৃকী ১৭ মালতী ১৮ বরা ১৯ দেবী ২০ বৃত্তপর্ণী ২১। অস্যা গুণাঃ। তিক্তত্বং। গুরুত্বং। উষ্ণত্বং। বাতপিত্তজ্বরপিত্তদাহাতীসারশূলনাশিত্বং। ভগ্নসন্ধানকারিত্বঞ্চ। ইতি বৈদ্যকং ॥ * ॥ অম্বষ্ঠা বালিকা বালা শঠাম্বা বালিকাম্বিকা। অম্বা চ মাচিকা চৈব দৃঢ়বল্কা ময়ূরিকা॥ গন্ধপর্ণী চিত্রপুষ্পী শ্রেয়সী সুখবাচিকা। ছিন্নপত্রী ভূরিমল্লিবিজ্ঞেয়া ষোড়শাহ্বয়া॥ অম্বষ্ঠা সকষায়াম্লা কফকণ্ঠরুজাপহা। বাতাময়বলাসঘ্নী রুচিকৃদ্দীপনী পরা॥ ইতি রাজনির্ঘণ্টঃ॥ পাঠাম্বষ্ঠাম্বষ্ঠকী চ প্রাচীনা পাপচেলিকা। একাষ্ঠীলা রসা প্রোক্তা পাঠিকা বরতিক্তিকা॥ পাঠোষ্ণা কটুকা তীক্ষ্ণা বাতশ্লেষ্মহরী লঘুঃ। হন্তি শূলজ্বরচ্ছর্দ্দিকুষ্ঠাতীসারহৃদ্রুজঃ॥ দাহকণ্ডূবিষশ্বাসকৃমিগুল্মগলব্রণান্। ইতি ভাবপ্রকাশঃ

পাঠিকা (স্ত্রী) পাঠা। ইতি ভাবপ্রকাশঃ॥

পাঠী [ন্] (পুং) চিত্রকবৃক্ষঃ। ইত্যমরঃ ॥ পাঠবিশিষ্টশ্চ ॥

পাঠীকুটঃ (পুং) চিত্রকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

পাঠীনঃ (পুং) মৎস্যবিশেষঃ। বোয়ালি ইতি ভাষা। তৎপর্য্যায়ঃ। সহস্রদংষ্ট্রঃ ২। ইত্যমরঃ ॥ সহস্রদংষ্ট্রী ৩ বোদালঃ ৪ বদালকঃ ৫। ইতি শব্দরত্নাবলী॥ অস্য গুণাঃ। শ্লেষ্মলত্বং। স্নিগ্ধত্বং। মধুরত্বং। কষায়ত্বং। বল্যত্বং। বৃষ্যত্বং। পাকে কটুত্বং। রোচনত্বং। বাতপিত্তজিত্বঞ্চ। ইতি রাজবল্লভঃ ॥ পাঠকঃ। গুগ্‌গুলুদ্রুমঃ। ইতি মেদিনী ॥

পাঠ্যং (ত্রি) পঠনীয়ং। পঠিতব্যং। যথা তিষ্ঠ রে তিষ্ঠ কণ্ঠোষ্ঠং কুণ্ঠয়ামি হঠাদহং। অপষ্ঠু পঠতঃ পাঠ্যমধিগোষ্ঠি শঠস্য তে। ইতি নৈষধে ১৭ সর্গঃ ॥

পাণঃ (পুং) পাণিঃ। ইতি শব্দচন্দ্রিকা ॥

পাণিঃ (স্ত্রী) পণ্যবীথী। হট্টঃ। ইত্যুণাদিকোষঃ ॥

পাণিঃ (পুং) পণ্যতে ব্যবহ্রিয়তে অনেন। স চ মণিবন্ধাবধ্যঙ্গুলিপর্য্যন্তভাগঃ। স তু গর্ভস্থবালকস্য মাসদ্বয়েন ভবতি। ইতি সুখবোধঃ ॥ তৎপর্য্যায়ঃ। পঞ্চশাখঃ ২ শয়ঃ ৩ সমঃ ৪ হস্তঃ ৫ করঃ ৬। ইত্যমরভরতৌ॥ ভুজঃ ৭। ইতি জটাধরঃ॥ কুলিঃ ৮। ইতি শব্দরত্নাবলী ॥ ভুজাদলঃ ৯। ইতি ত্রিকাণ্ডশেষঃ ॥ কুলিকবৃক্ষঃ। কুলিয়াকড়া ইতি ভাষা। ইতি রত্নমালা ॥

পাণিকচ্ছপিকা (স্ত্রী) কূর্ম্মমুদ্রা। যথা। পাণিকচ্ছপিকাং কুর্য্যাৎ কূর্ম্মমন্ত্রেণ সাধকঃ। তত্র সংস্কৃতপুষ্পেণ পূজয়েদাত্মনো বপুঃ ॥ পূজিতং তেন পুষ্পেণ দেবত্বং স্বস্য জায়তে। কূর্ম্মমন্ত্রো যথা। দ্বিতীয়ং বৈষ্ণবীতন্ত্রং বীজং বিন্দিন্দুসংযুতং। ষষ্ঠস্বরো পরিচরং কূর্ম্মবীজং প্রকীর্ত্তিতং ॥ ইতি কালিকাপুরাণে ৫৬ অধ্যায়ঃ ॥

পাণিগৃহীতী (স্ত্রী) বিধানেনোঢ়া। ইত্যমরঃ॥

পাণিগ্রহণং (ক্লী) বিবাহঃ। ইতি হেমচন্দ্রঃ॥

পাণিঘঃ (পুং) পাণিবাদঃ। পাণিনা মৃদঙ্গাদিবাদ্যং। পাণিং বা হন্তি যঃ। যঃ পাণিনৈব মৃদঙ্গাদিবাদ্যমুৎপাদয়তি. তত্র। যঃ পাণিনা মৃদঙ্গমিব পাণিং বাদয়তি তত্র চ। ইত্যমরভরতৌ ॥

পাণিঘাতঃ (পুং) পাণিনাহননং। ইতি সিদ্ধান্তকৌমুদী ॥

পাণিজঃ (পুং) নখঃ। ইতি হলায়ুধঃ ॥

পাণিতলং (ক্লী) কর্ষপরিমাণং। তোলকদ্বয়ং। ইতি বৈদ্যকপরিভাষা ॥ হস্তাধোভাগশ্চ ॥

পাণিনঃ (পুং) পাণিনিমুনিঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

পাণিনিঃ (পুং) মুনিবিশেষঃ। তৎপর্য্যায়ঃ। আহিকঃ ২ দাক্ষীপুত্রঃ ৩ শালঙ্কী ৪ পাণিনঃ ৫ শাণোত্তরীয়ঃ ৬। ইতি ত্রিকাণ্ডশেষঃ ॥

পাণিনীয়ং (ত্রি) পাণিনিনা কৃতং। ইতি মুগ্ধবোধব্যাকরণং ॥

পাণিন্ধমঃ (ত্রি) পাণিং ধমতি যঃ। হস্তকর্ম্মতাকাগ্নিসংযোগকর্ত্তা। এবং শব্দকর্ত্তা চ। ইতি মুগ্ধবোধব্যাকরণং ॥

পাণিন্ধয়ঃ (ত্রি) পাণিদ্বারা পানকর্ত্তা। ইতি মুগ্ধবোধব্যাকরণং ॥

পাণিপাদং (ক্লী) পাণিশ্চ পাদশ্চ দ্বয়োঃ সমাহারঃ। ইতি ব্যাকরণং ॥

পাণিপীড়নং (ক্লী) পাণিগ্রহণং। বিবাহঃ। ইত্যমরঃ ॥

পাণিভুক্ [জ্] (পুং) উড়ুম্বরবৃক্ষঃ। ইতি শব্দচন্দ্রিকা। পাণিকরণকভোক্তরি ত্রি ॥

পাণিমর্দ্দঃ (পুং) করমর্দ্দকঃ। ইতি রাজনির্ঘণ্টঃ ॥

পাণিমুক্তং (ক্লী) অস্ত্রং। ইতি হলায়ুধঃ ॥

পাণিরুহঃ (পুং) নখঃ। ইতি রাজনির্ঘণ্টঃ ॥

পাণিবাদঃ (ত্রি) পাণিঘঃ। মৃদঙ্গাদিবাদকঃ। ইত্যমরঃ ॥

পাণিবাদকঃ (ত্রি) পাণিবাদঃ। ইতি হেমচন্দ্রঃ

পাণিসর্গ্যা (স্ত্রী) রজ্জুঃ। ইতি মুগ্ধবোধব্যাকরণং ॥

পাণীতলং (ক্লী) তোলকদ্বয়ং। যথা। বিড়ালপদকর্ষৌ চ পাণীতলমুড়ুম্বরং। ইতি শব্দমালা ॥

পাণৌকরণং (ক্লী) বিবাহঃ। ইতি জটাধরঃ ॥

পাণ্ডরং (ক্লী) কুন্দপুষ্পং। গৈরিকং। ইতি শব্দচন্দ্রিকা

পাণ্ডরঃ (পুং) মরুবকবৃক্ষঃ ॥ শ্বেতবর্ণঃ তদ্বতি ত্রি। ইত্যুণাদিকোষঃ ॥

পাণ্ডরপুষ্পিকা (স্ত্রী) শীতলাবৃক্ষঃ। ইতি শব্দচন্দ্রিকা ॥

পাণ্ডবঃ (পুং) পাণ্ডুনন্দনঃ। পঞ্চপাণ্ডবোৎপত্তির্যথা। বৈশম্পায়ন উবাচ। সম্বৎসরধৃতে গর্ব্ভে গান্ধার্য্যা জনমেজয়। আহ্বয়ামাস বৈ কুন্তী গর্ব্ভার্থে ধর্ম্মমচ্যুতং ॥ সা বলিং ত্বরিতা দেবী ধর্ম্মায়োপজহার হ। জজাপ মন্ত্রং বিধিবদ্দত্তং দুর্ব্বাসসা পুরা ॥ সংগম্য সা তু ধর্ম্মেণ যোগমূর্ত্তিধরেণ হ। লেভে পুত্রং বরারোহা সর্ব্বপ্রাণিহিতং বরং ॥ ঐন্দ্রে চন্দ্রসমাযুক্তে মুহূর্ত্তেঽভিজিতেঽষ্টমে। দিবামধ্যগতে সূর্য্যে তিথৌ পুণ্যেঽভিপূজিতে ॥ সমৃদ্ধযশসং কুন্তী সুসাব প্রবরং সুতং। জাতমাত্রে সুতে তস্মিন্ বাগুবাচা

এষ ধর্ম্মভৃতাং শ্রেষ্ঠো ভবিষ্যতি নরোত্তমঃ। বিক্রান্তঃ সত্যবাক্ চৈব রাজা পৃথ্ব্যাং ভবিষ্যতি ॥ যুধিষ্ঠির ইতি খ্যাতঃ পাণ্ডোঃ প্রথমজঃ সুতঃ। ভবিতা প্রথিতো রাজা ত্রিষু লোকেষু বিশ্রুতঃ। যশসা তেজসা চৈব বৃত্তেন চ সমন্বিতঃ ॥ ১ ॥*॥ ধার্ম্মিকং তং সুতং লব্ধ্বা পাণ্ডুস্তাং পুনরব্রবীৎ। প্রাহুঃ ক্ষাত্রং বলং জ্যেষ্ঠং বলজ্যেষ্ঠং সুতং বৃণু ॥ ততস্তথোক্তা ভর্ত্রা তু বায়ুমেবাজুহাব সা। তস্মাজ্জজ্ঞে মহাবাহুর্ভীমো ভীমপরাক্রমঃ ॥ তমপ্যতিবলং জাতং বাগুবাচাশরীরিণী। সর্ব্বেষাং বলিনাং শ্রেষ্ঠো জাতোঽয়মিতি ভারত ॥ ইদমত্যদ্ভুতঞ্চাসীজ্জাতমাত্রে বৃকোদরে। যদঙ্কাৎ পতিতো মাতুঃ শিলাং গাত্রৈঃ

রচূর্ণয়ৎ॥ কুন্তী ব্যাঘ্রভয়োদ্বিগ্না সহসোৎপতিতা কিল। নান্ববুধ্যত তং সুপ্তমুৎসঙ্গে স্বে বৃকোদরং॥ বজ্রসংহননঃ সোঽথ কুমারো ন্যপতদ্গিরৌ। পততা তেন শতধা শিলা গাত্রৈর্বিচূর্ণিতা॥ তাং শিলাং চূর্ণিতাং দৃষ্ট্বা পাণ্ডুর্বিস্ময়মাগতঃ। যস্মিন্নহনি ভীমস্তু জজ্ঞে ভরতসত্তম॥ দুর্য্যোধনোঽপি তত্রৈব প্রজজ্ঞে বসুধাধিপ॥২॥*॥ জাতে বৃকোদরে পাণ্ডুরিদং ভূয়োঽন্বচিন্তয়ৎ। কথন্নু মে বরঃ পুত্রো লোকশ্রেষ্ঠো ভবেদিতি॥ দৈবে পুরুষকারে চ লোকোঽয়ং সংপ্রতিষ্ঠিতঃ। তত্র দৈবন্তু বিধিনা কালযুক্তেন লভ্যতে॥ ইন্দ্রো হি রাজা দেবানাং প্রধান ইতি নঃ শ্রুতং। অপ্রমেয়বলোৎসাহো বীর্য্যবানমিতদ্যুতিঃ॥ তং তোষয়িত্বা তপসা পুত্রং লপ্স্যে মহাবলং। যং দাস্যতি স মে পুত্রং স গরীয়ান্ ভবিষ্যতি॥ কর্ম্মণা মনসা বাচা তস্মাত্তপ্স্যে মহত্তপঃ। ততঃ পাণ্ডুর্মহারাজো মন্ত্রয়িত্বা মহর্ষিভিঃ॥ দিদেশ কুন্ত্যাঃ কৌরব্যো ব্রতং সাম্বৎসরং শুভং। আত্মনা চ মহাবাহুরেকপাদস্থিতোঽভবৎ॥ উগ্রং স তপ আতস্থে পরমেণ সমাধিনা। আরিরাধয়িষুর্দেবং ত্রিদশানাং তমীশ্বরং॥ সূর্য্যেণ সহ ধর্ম্মাত্মা পর্য্যবর্ত্তত ভারত। তস্য কালেন মহতা বাসবঃ প্রত্যপদ্যত॥ শক্র উবাচ। পুত্রং তব প্রদাস্যামি ত্রিষু লোকেষু বিশ্রুতং। ব্রাহ্মণানাং গবাঞ্চৈব সুহৃদাঞ্চার্থসাধকং॥ দুর্হৃদাং শোকজননং সর্ব্ববান্ধবনন্দনং। সুতং তেঽগ্র্যং প্রদাস্যামি সর্ব্বামিত্রবিনাশনং॥ ইত্যুক্তঃ কৌরবো রাজা বাসবেন মহাত্মনা। উবাচ কুন্তীং ধর্ম্মাত্মা দেবরাজবচঃ স্মরন্॥ উদকস্তব কল্যাণি তুষ্টো দেবগণেশ্বরঃ। দাতুমিচ্ছতি মে পুত্রং যথাসঙ্কল্পিতং হৃদা॥ অতিমানুষকর্ম্মাণং যশস্বিনমরিন্দমং। নীতিমন্তং মহাত্মানমাদিত্যসমতেজসং॥ দুরাধর্ষং ক্রিয়াবন্তমতীবাদ্ভুতদর্শনং। পুত্রং জনয় সুশ্রোণি ধাম ক্ষত্রিয়তেজসাং॥ লব্ধঃ প্রসাদো দেবেন্দ্রাৎ তমাহ্বয় শুভাননে॥ এবমুক্তা ততঃ শক্রমাজুহাব যশস্বিনী। অথাজগাম দেবেন্দ্রো জনয়ামাস চার্জ্জুনং॥ জাতমাত্রে কুমারে তু তস্মিন্ বাগশরীরিণী। মহাগম্ভীরনির্ঘোষা নভো নাদয়তী তদা॥ শৃণ্বতাং সর্ব্বভূতানাং তেষাঞ্চাশ্রমবাসিনাং। কুন্তীমাভাষ্য বিস্পষ্টমুবাচেদং শুচিস্মিতাং॥ কার্ত্তবীর্য্যসমঃ কুন্তি শিবিতুল্যপরাক্রমঃ। এষ শক্র ইবাজেয়ো যশস্তে প্রথয়িষ্যতি॥ আদিত্যা বিষ্ণুনা প্রীতির্যথাভূদভিবর্দ্ধিতা। তথা বিষ্ণুসমঃ প্রীতিম্বর্দ্ধয়িষ্যতি তে সুতঃ॥ এষ মদ্রান্ বশে কৃত্বা কুরূংশ্চ সহ সোমকৈঃ। চেদিকাশিকরূষাংশ্চ কুরুলক্ষ্ম প্রধাস্যতি॥ এতস্য ভুজবীর্য্যেণ খাণ্ডবে হব্যবাহনঃ। মেদসা সর্ব্বভূতানাং তৃপ্তিং যাস্যতি বৈ পরাং॥ গ্রামণীয়ান্ মহীপালান্ এষ জিত্বা মহাবলঃ। ভ্রাতৃভিঃ সহিতো বীরস্ত্রীন্ মেধানাহরিষ্যতি॥ জামদগ্ন্যসমঃ কুন্তি বায়ুবেগপরাক্রমঃ। এষ বীর্য্যবতাং শ্রেষ্ঠো

ভবিষ্যতি মহাযশাঃ ॥ তথা দিব্যানি চাস্ত্রাণি নিখিলেনাহরিষ্যতি। বিপ্রনষ্টাং শ্রিয়ঞ্চায়মাহর্ত্তা পুরুষর্ষভঃ॥ এতামত্যদ্ভুতাং বাচং কুন্তী শুশ্রাব ভারত। বাচমুচ্চারিতামুচ্চৈস্তাং নিশম্য তপস্বিনাং ॥ বভূব পরমো হর্ষঃ শতশৃঙ্গনিবাসিনাং। তথা দেবরথানাঞ্চ সেন্দ্রাণাঞ্চ দিবৌকসাং॥ আকাশে দুন্দুভীনাঞ্চ বভূব তুমুলঃ স্বনঃ। উদতিষ্ঠন্মহাঘোষঃ পুষ্পবৃষ্টিভিরাবৃতঃ ॥*॥ বৈশম্পায়ন উবাচ। কুন্তীপুত্রেষু জাতেষু ধৃতরাষ্ট্রাত্মজেষু চ। মদ্ররাজসুতা পাণ্ডুং রহো বচনমব্রবীৎ ॥ ন মেঽস্তি ত্বয়ি সন্তাপো বিগুণেঽপি পরন্তপ। নাবরত্বে বরার্হায়াঃ স্থিত্বা চানঘ নিত্যদা ॥ গান্ধার্য্যাশ্চৈব নৃপতে জাতং পুত্রশতন্তথা। শ্রুত্বা ন মে তথা দুঃখমভবৎ কুরুনন্দন ॥ ইদন্তু মে মহদ্দুঃখং তুল্যতায়ামপুত্রতা। দিষ্ট্যা ত্বিদানীং ভর্ত্তুর্মে কুন্ত্যামপ্যস্তি সন্ততিঃ ॥ যদি চাপত্যসন্ধানং কুন্তিরাজসুতা ময়ি। কুর্য্যাদনুগ্রহো মে স্যাত্তব চাপি হিতং ভবেৎ ॥ স্তম্ভো হি মে সপত্নীত্বাৎ বক্তুং কুন্তিসুতাং প্রতি। যদি তু ত্বং প্রসন্নো মে স্বয়মেনাং প্রচোদয় ॥ পাণ্ডুরুবাচ। মমাপ্যেষ সদা মাদ্রি হৃদ্যর্থঃ পরিবর্ত্ততে ॥ ন তু তাং প্রসহে বক্তুমিষ্টানিষ্টবিবক্ষয়া। তব ত্বিদং মতং মত্বা প্রযতিষ্যাম্যতঃ পরং ॥ মন্যে ধ্রুবং ময়োক্তা সা বচনং প্রতিপৎস্যতে। বৈশম্পায়ন উবাচ। ততঃ কুন্তীং পুনঃ পাণ্ডুর্বিবিক্ত ইদমব্রবীৎ ॥ কুলস্য মম সন্তানং লোকস্য চ কুরু প্রিয়ং। মম বা পিণ্ডনাশায় পূর্ব্বেষামপি চাত্মনঃ॥ মৎপ্রিয়ার্থঞ্চ কল্যাণি কুরু কল্যাণমুত্তমং। যশসোঽর্থায় চৈব ত্বং কুরু কর্ম্ম সুদুষ্করং ॥ এবমুক্তাব্রবীন্মাদ্রীং সকৃচ্চিন্তয় দৈবতং। তস্মাত্তে ভবিতাপত্যমনুরূপমসংশয়ং ॥ ততো মাদ্রী বিচার্য্যৈবং জগাম মনসাশ্বিনৌ। তাবাগম্য সুতৌ তস্যাং জনয়ামাসতুর্যমৌ ॥ নকুলং সহদেবঞ্চ রূপেণাপ্রতিমৌ ভুবি। তথৈব তাবপি যমৌ বাগুবাচাশরীরিণী॥ রূপসত্ত্বগুণোপেতাবেতাবত্যশ্বিনাবপি । ভাসতস্তেজসাত্যর্থং রূপদ্রবিণসম্পদা ॥ নামানি চক্রিরে তেষাং শতশৃঙ্গনিবাসিনঃ। ভক্ত্যা চ কর্ম্মণা চৈব তথাশীর্ভির্বিশাম্পতে ॥ জ্যেষ্ঠং যুধিষ্ঠিরেত্যেবং ভীমসেনেতি মধ্যমং। অর্জুনেতি তৃতীয়ঞ্চ কুন্তীপুত্রানকল্পয়ন্ ॥ পূর্ব্বজং নকুলেত্যেবং সহদেবেতি চাপরং। মাদ্রীপুত্রাবকথয়ংস্তে বিপ্রাঃ প্রীতমানসাঃ ॥ ইতি মহাভারতে আদিপর্ব্ব ॥ * ॥ তেষাং পুত্রা যথা। প্রতিবন্ধ্যঃ সুতঃ সোমঃ শ্রুতকীর্ত্তিস্তু চার্জ্জুনাৎ। শতানীকঃ শ্রুতকর্ম্মা দ্রৌপদ্যাঃ পঞ্চ বিক্রমাৎ ॥ * ॥ তেষাং ভার্য্যা যথা। যৌধেয়ী চ হিড়িম্বা চ কাশী চৈব সুভদ্রিকা। বিজয়া বৈ বেণুমতী পঞ্চভ্যস্তু সুতাঃ ক্রমাৎ ॥ দেবকো ঘটোৎকচশ্চ অভিমন্যুশ্চ সর্ব্বশঃ। অহোত্রো নিরপত্রশ্চ পরিক্ষিদভিমন্যুজঃ ॥ ইতি গারুড়ে ১৩৯ অধ্যায়ঃ ॥

পাণ্ডবেয়ঃ (ত্রি) পাণ্ডোরপত্যং। ইতি মুগ্ধবোধব্যাকরণং ॥

পাণ্ডবাভীলঃ (পুং) কৃষ্ণঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

পাণ্ডবায়নঃ (পুং) কৃষ্ণঃ। ইতি হেমচন্দ্রঃ ॥

পাণ্ডিত্যং (ক্লী) পণ্ডিতধর্ম্মকর্ম্মণী। যথা। রসজ্ঞা পাণ্ডিত্যচ্ছিদুরশশিধামভ্রমভরান্। ইতি মুরারিঃ ॥

পাণ্ডুঃ (পুং) পাণ্ডুরফলীক্ষুপঃ। পটোলঃ। ইতি রাজনির্ঘণ্টঃ ॥ শুক্লপীতমিশ্রিতবর্ণঃ। তৎপর্য্যায়ঃ। হরিণঃ ২ পাণ্ডুরঃ ৩। ইত্যমরঃ ॥ পাণ্ডরঃ ৪। ইতি হড্ডঃ ॥ সিতপাতসমাযুক্তঃ পাণ্ডুবর্ণঃ প্রকীর্ত্তিতঃ। ইতি সুভূতিঃ ॥ ভেদোঽপি দৃশ্যতে যথা। পাণ্ডুরস্তু রক্তপীতভাগী প্রত্যূষচন্দ্রবৎ। পাণ্ডুস্তু পীতভাগার্দ্ধঃ কেতকীধূলিসন্নিভঃ ॥ ইতি ভরতঃ ॥ তদ্বতি ত্রি। ইত্যমরঃ ॥ নৃপতিবিশেষঃ। স তু শান্তনুপুত্রবিচিত্রবীর্য্যস্য ক্ষেত্রে ব্যাসাজ্জাতঃ। পাণ্ডবপিতা চ। নাগভেদঃ। শ্বেতহস্তী। সিতবর্ণঃ। রোগবিশেষঃ। ইতি শব্দরত্নাবলী ॥ * ॥ পাণ্ডুরোগনিদানং যথা। পাণ্ডুরোগাঃ স্মৃতাঃ পঞ্চ বাতপিত্তকফৈস্ত্রয়ঃ। চতুর্থঃ সন্নিপাতেন পঞ্চমো ভক্ষণান্মৃদঃ ॥ ব্যায়ামমম্লং লবণানি মদ্যং মৃদং দিবাস্বপ্নমতীবতীক্ষ্ণং। নিষেবমাণস্য সমেত্য রক্তং দোষাস্ত্বচং পাণ্ডরতাং নয়ন্তি ॥ * ॥ তস্য পূর্ব্বরূপাণি যথা। ত্বক্স্ফোটনষ্ঠীবনগাত্রসাদমৃদ্ভক্ষণপ্রেক্ষণকূটশোথাঃ। বিণ্মূত্রপীতত্বমথাবিপাকো ভবিষ্যতস্তস্য পুরঃসরাণি ॥ * ॥ বাতিকস্য তস্য লক্ষণং যথা। ত্বঙ্মূত্রনয়নাদীনাং রূক্ষকৃষ্ণারুণাভতাঃ। বাতপাণ্ড্বাময়ে কম্পতোদানাহভ্রমাদয়ঃ॥*॥ পৈত্তিকস্য লক্ষণং যথা। পীতমূত্রশকৃন্নেত্রো দাহতৃষ্ণাজ্বরান্বিতঃ। ভিন্নবিট্কোঽতিপীতাভঃ পিত্তপাণ্ড্বাময়ী নরঃ ॥ * ॥ শ্লৈষ্মিকস্য লক্ষণং যথা। কফপ্রসেকশ্বযথুতন্দ্রালস্যাতিগৌরবৈঃ। পাণ্ডুরোগী কফাচ্ছুক্লৈস্ত্বঙ্মূত্রনয়নাননৈঃ ॥ * ॥ ত্রিদোষজস্য লক্ষণং যথা। জ্বরারোচকহৃল্লাসচ্ছর্দ্দিতৃষ্ণাক্লমান্বিতঃ। পাণ্ডুরোগী ত্রিভির্দোষৈস্ত্যাজ্যঃ ক্ষীণো হতেন্দ্রিয়ঃ ॥ * ॥ মৃজ্জস্য সংপ্রাপ্তির্যথা। মৃত্তিকাদনশীলস্য কুপ্যত্যন্যতমো মলঃ। কষায়া মারুতং পিত্তমূষরা মধুরা কফং ॥ কোপয়েন্মৃদ্রসাদীংশ্চ রৌক্ষ্যাদ্ভুক্তঞ্চ রূক্ষয়েৎ। পূরয়ত্যবিপক্কৈব স্রোতাংসি বিরুণদ্ধ্যপি ॥ ইন্দ্রিয়াণাং বলং হত্বা তেজো বীর্য্যৌজসী তথা। পাণ্ডুরোগং করোত্যাশু বলবর্ণাগ্নিনাশনং ॥ * ॥ মৃত্তিকাভক্ষণজন্যপাণ্ডুলক্ষণং যথা। মৃদ্ভক্ষণাদ্ভবেৎ পাণ্ডুস্তন্দ্রালস্যনিপীড়িতঃ। সকাসশ্বাসশূলার্শঃসদারুচিসমন্বিতঃ ॥ শূনাক্ষিকূটগণ্ডভ্রূঃ শূনপান্নাভিমেহনঃ। কৃমিকোষ্ঠোঽতিসার্য্যেত মলং সাসৃক্কফান্বিতং ॥ * ॥ তস্য অসাধ্যলক্ষণং যথা। জ্বরারোচকহৃল্লাসচ্ছর্দ্দিতৃষ্ণাক্লমান্বিতঃ। পাণ্ডুরোগী ত্রিভির্দোষৈস্ত্যাজ্যঃ ক্ষীণো হতেন্দ্রিয়ঃ ॥ পাণ্ডুরোগশ্চিরোৎপন্নঃ খরীভূতো ন সিধ্যতি। কালপ্রকর্ষাচ্ছূনানাং যো বা পীতানি

পশ্যতি ॥ বদ্ধাল্পবিট্ সহরিতং সকফং যোঽতিসার্য্যতে। দীনঃ শ্বেতাতিদিগ্ধাঙ্গ শ্ছর্দ্দিমূর্চ্ছাতৃষান্বিতঃ ॥ স নাস্ত্যসৃক্ক্ষয়াদ্ যশ্চ পাণ্ডুঃ শ্বেতত্বমাপ্নুয়াৎ ॥ পাণ্ডুদন্ত-নখো যস্তু পাণ্ডুনেত্রশ্চ যো ভবেৎ। পাণ্ডুসংঘাতদর্শী চ পাণ্ডুরোগী বিনশ্যতি ॥ অন্তেষু শূনং পরিহীণমধ্যং ম্লানং তথান্তেষু চ মধ্যশূনং। গুদে চ শেফস্যথ মুষ্কয়োশ্চ শূনং প্রতাম্যন্তমসংজ্ঞকল্পং ॥ বিবর্জ্জয়েৎ পাণ্ডুকিনং যশোঽর্থী তথাতি-সারজ্বরপীড়িতঞ্চ ॥ ইতি মাধবকরঃ ॥ * ॥ তস্যৌষধং যথা। লোহচূর্ণং তক্রপীতং পাণ্ডুরোগহরং ভবেৎ। ইতি গারুড়ে ১৮০ অধ্যায়ঃ ॥ অপি চ। সপ্তরাত্রং গবাং মূত্রে ভাবিতং চায়সো রজঃ। পাণ্ডুরোগপ্রশান্ত্যর্থং পয়সা প্রপিবে-ন্নরঃ ॥ ১ ॥ গোমূত্রসিদ্ধং মণ্ডুরচূর্ণং সগুড়-মশ্নতঃ। পাণ্ডুরোগঃ ক্ষয়ং যাতি পঙ্‌ক্তি-শূলঞ্চ দারুণং ॥ ২ ॥ অয়োমলং সুসন্তপ্তং ভূয়ো গোমূত্রসাধিতং। মধুসর্পির্যুতং লীঢ়া পাণ্ডুরোগী সুখী ভবেৎ ॥ ৩ ॥ পুন-র্নবাত্রিবৃদ্ব্যোষবিড়ঙ্গং দারু চিত্রকং। কুষ্ঠং হরিদ্রে ত্রিফলা দন্তী চব্যং কলি-ঙ্গকং ॥ কটুকা পিপ্পলীমূলং মুস্তং শৃঙ্গী চ কারবী। যমানী কট্‌ফলঞ্চেতি পৃথক্-পলমিতং মতং ॥ ৪ ॥ ইতি ভাবপ্রকাশঃ ॥

পাণ্ডুঃ (স্ত্রী) মাষপর্ণী। মাষাণী ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥ পাণ্ডুবর্ণস্ত্রী। ইতি মুগ্ধবোধব্যাকরণং ॥

পাণ্ডুকঃ (পুং) পাণ্ডুরোগঃ। পাণ্ডুরাজা। ইতি শব্দরত্নাবলী ॥ পাণ্ডুবর্ণঃ। ইতি হলায়ুধঃ ॥

পাণ্ডুকণ্টকঃ (পুং) অপামার্গঃ। ইতি রাজ-নির্ঘণ্টঃ ॥

পাণ্ডুকম্বলঃ (পুং) শ্বেতপ্রাবারঃ। প্রস্তর-ভেদঃ। ইতি মেদিনী ॥ পাণ্ডুবর্ণকম্বলঃ। ইতি ভরতঃ ॥

পাণ্ডুকম্বলী [ন্] (পুং) পাণ্ডুবর্ণকম্বলাবৃত-রথঃ। ইত্যমরঃ ॥ পাণ্ডুকম্বলযুক্তে ত্রি ॥

পাণ্ডুতরুঃ (পুং) ধববৃক্ষঃ। ইতি রাজ-নির্ঘণ্টঃ ॥

পাণ্ডুনাগঃ (পুং) পুন্নাগবৃক্ষঃ। ইতি শব্দ-রত্নাবলী ॥ শ্বেতহস্তিসর্পৌ চ ॥

পাণ্ডুপত্রী (স্ত্রী) রেণুকা। ইতি রাজনির্ঘণ্টঃ ॥

পাণ্ডুপৃষ্ঠঃ (ত্রি) পাণ্ডুবর্ণপৃষ্ঠযুতঃ। অলক্ষণঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

পাণ্ডুফলঃ (পুং) পটোলঃ। ইতি রাজ-নির্ঘণ্টঃ ॥

পাণ্ডুফলা (স্ত্রী) চির্ভিটা। ইতি রাজনির্ঘণ্টঃ ॥

পাণ্ডুভূমঃ (ত্রি) পাণ্ডুবর্ণভূমিযুক্তদেশঃ। যথা। পাণ্ডুদক্ কৃষ্ণতো ভূমিঃ পাণ্ডূদক্ কৃষ্ণ-মৃত্তিকা। ইতি হেমচন্দ্রঃ ॥

পাণ্ডুমৃৎ (স্ত্রী) পাণ্ডুভূমিঃ। খটী। ইতি রাজনির্ঘণ্টঃ ॥

পাণ্ডুরঃ (পুং) শ্বেতপীতমিশ্রিতবর্ণঃ। তদ্বতি ত্রি। ইত্যমরঃ ॥ কামলারোগঃ। ইতি শব্দরত্নাবলী ॥ শ্বিত্ররোগে ক্লী। ইতি হলায়ুধঃ ॥

পাণ্ডুরঙ্গঃ (পুং) ফলশাকবিশেষঃ। পাটুরাঙ্গা ইতি ভাষা। অস্য গুণাঃ। ক্রিমিশ্লেষ্ম-

পিত্তনাশিত্বং। তিক্তত্বং। লঘুত্বঞ্চ। ইতি রাজবল্লভঃ॥ [শেষঃ॥

পাণ্ডুরদ্রুমঃ (পুং) কুটজবৃক্ষঃ। ইতি ত্রিকাণ্ড-

পাণ্ডুরপৃষ্ঠঃ (ত্রি) লক্ষণহীনঃ। ইতি হেমচন্দ্রঃ॥ পাণ্ডুবর্ণপৃষ্ঠযুক্তশ্চ॥

পাণ্ডুরফলী (স্ত্রী) ক্ষুদ্রক্ষুপবিশেষঃ। তৎপর্য্যায়ঃ। পাণ্ডুঃ ২ ধূসরা ৩ বৃত্তবীজকা ৪ ভূরিপলিতদা ৫ পাণ্ডুফলী ৬। অস্যা গুণাঃ। শিশিরত্বং। গৌল্যত্বং। কৃচ্ছ্রাস্রদোষপিত্তমূত্রাঘাতনাশিত্বং। বল্যত্বং। বৃষ্যত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

পাণ্ডুরা (স্ত্রী) মাষপর্ণী। ইতি রাজনির্ঘণ্টঃ॥ পাণ্ডুরবর্ণা চ॥

পাণ্ডুরাগঃ (পুং) দমনকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ পাণ্ডুবর্ণযুক্তে ত্রি॥

পাণ্ডুরেক্ষুঃ (পুং) শ্বেতেক্ষুঃ। ইতি রাজনির্ঘণ্টঃ॥

পাণ্ডুলেখঃ (পুং) পাণ্ডুলিপিঃ। মুসবিদা ইতি পারস্যভাষা। যথা ব্যাসঃ। পাণ্ডুলেখেন ফলকে ভূমৌ বা প্রথমং লিখেৎ। ন্যূনাধিকস্তু সংশোধ্য পশ্চাৎ পত্রে নিবেশয়েৎ॥ ফলকং কাষ্ঠাদিপট্টকং। ইতি ব্যবহারতত্ত্বং॥

পাণ্ডুলোমশা (স্ত্রী) মাষপর্ণী। ইতি রত্নমালা॥ পাণ্ডুবর্ণলোমযুক্তা চ॥

পাণ্ডুশর্করা (স্ত্রী) রোগবিশেষঃ। যথা। পিষ্টং বৈ মালতীমূলং গ্রীষ্মকালে সমাহৃতং। সাধিতং ছাগদুগ্ধেন পীতং শর্করয়ান্বিতং॥ হরেন্মূত্রনিরোধঞ্চ হরেদ্বৈ পাণ্ডুশর্করাং। ইতি গারুড়ে ১৮২ অধ্যায়ঃ॥

পাণ্ডুলোমা (স্ত্রী) মাষপর্ণী। ইতি জটাধরঃ॥ পাণ্ডুবর্ণলোমযুক্তে ত্রি॥

পাণ্ডুশর্ম্মিলা (স্ত্রী) দ্রৌপদী। ইতি ত্রিকাণ্ডশেষঃ॥

পাণ্ডুসোপাকঃ (পুং) বর্ণসঙ্করবিশেষঃ। স তু চাণ্ডালাদ্বৈদেহ্যাং জাতঃ॥

পাণ্যঃ (ত্রি) স্তুত্যঃ। স্তবনীয়ঃ। যথা। অবদ্যপণ্যেতিসূত্রে পাণ্যমন্যৎ স্তুত্যই-মিত্যর্থঃ। ইতি কৌমুদী॥

পাতঃ (পুং) পতনং। ত্রাতে ত্রি। ইতি মেদিনী॥ রাহুঃ। যথা। তাড়িতঃ খদহনৈর্দিনসঙ্খ্যঃ ষট্কষট্কশরহৃৎফলমাংশাঃ। স্বং ধ্রুবে কুমুদিনীপতিপাতো রাহুমাহুরিহ কেহপি তদেব॥ ইতি সিদ্ধান্তশিরোমণিঃ॥

পাতকং (ক্লী) পাতয়তি অধো গময়তি যৎ তৎ। নরকসাধনমিতি যাবৎ। তৎপর্য্যায়ঃ। অশুভং ২ দুষ্কৃতং ৩ দুরিতং ৪ পাপং ৫ এনঃ ৬ পাপ্মা ৭ কিল্বিষং ৮ কলুষং ৯ কিণ্বং ১০ কল্মষং ১১ বৃজিনং ১২ তমঃ ১৩ অংহঃ ১৪ কল্কং ১৫ অঘং ১৬ পঙ্কং ১৭। ইতি হেমচন্দ্রঃ॥ তত্তু নববিধং যথা। অতিপাতকং ১ মহাপাতকং ২ অনুপাতকং ৩ উপপাতকং ৪ সঙ্করীকরণং ৫ অপাত্রীকরণং ৬ জাতিভ্রংশকরং ৭ মলাবহং ৮ প্রকীর্ণকং ৯। ইতি প্রায়শ্চিত্তবিবেকঃ॥ এষাং বিবরণং তত্তচ্ছব্দে দ্রষ্টব্যং॥ কায়বাঙ্মনঃকৃতানি দশবিধপাপানি যথা। অদত্তানামুপাদানং হিংসা চৈবাবিধানতঃ। পরদারোপসেবা

চ কায়িকং ত্রিবিধং স্মৃতং ॥ পারুষ্যমনৃতঞ্চৈব পৈশুন্যঞ্চাপি সর্ব্বশঃ। অসম্বদ্ধপ্রলাপশ্চ বাঙ্ময়ং স্যাচ্চতুর্ব্বিধং ॥ পরদ্রব্যেষ্বভিধ্যানং মনসানিষ্টচিন্তনং। বিতথাভিনিবেশশ্চ ত্রিবিধং কর্ম্ম মানসং ॥ ইতি তিথ্যাদিতত্ত্বং ॥

পাতঙ্গিঃ (পুং) শনৈশ্চরঃ। ইতি শব্দরত্নাবলী ॥

পাতঞ্জলং (ক্লী) পতঞ্জলিমুনিপ্রণীতপাদচতুষ্টয়াত্মকযোগকাণ্ডনিরূপকদর্শনশাস্ত্রবিশেষঃ। তত্র প্রথমে পাদে। অথ যোগানুশাসনমিতি যোগশাস্ত্রারম্ভে প্রতিজ্ঞাং বিধায় যোগশ্চিত্তবৃত্তিনিরোধ ইত্যাদিনা যোগলক্ষণমভিধায় সমাধিং সপ্রপঞ্চং নিরদিক্ষদ্ভগবান্ পতঞ্জলিঃ ॥১॥ দ্বিতীয়ে। তপঃস্বাধ্যায়েশ্বরপ্রণিধানানি ক্রিয়াযোগ ইত্যাদিনা ব্যুত্থিতচিত্তস্য ক্রিয়াযোগং যমাদীনি পঞ্চ বহিরঙ্গানি সাধনানি ॥ ২ ॥ তৃতীয়ে দেশবন্ধশ্চিত্তস্য ধারণেত্যাদিনা ধারণাধ্যানসমাধিত্রয়মন্তরঙ্গং সংযমপদবাচ্যং তত্রাবান্তরফলং বিভূতিজাতং ॥ ৩ ॥ চতুর্থে। জন্মৌষধিমন্ত্রতপঃসমাধিজাঃ সিদ্ধয় ইত্যাদিনা সিদ্ধিপ্রপঞ্চনপুরঃসরং পরমং প্রয়োজনং কৈবল্যং ॥ ৪ ॥ প্রধানাদীনি পঞ্চবিংশতিতত্ত্বানি সাঙ্খ্যোক্তান্যেবাত্রাপি। ষড়্‌বিংশস্তু পরমেশ্বরোঽধিকঃ। ইতি সর্ব্বদর্শনসংগ্রহঃ ॥

পাতনং (ক্লী) অধো নয়নং। যথা উর্দ্ধাধস্তির্য্যক্‌পাতনাদিভী রসস্য নানাবিধা শুদ্ধিরুক্তা। ইতি রত্নাবলী ॥

পাতা [ঋ] (ত্রি) রক্ষিতা। যথা। সংহারকর্ত্তুঃ সংহর্ত্তা পাতুঃ পাতা পরাৎপরঃ। মমাজ্ঞয়ায়ং সংহর্ত্তা নাম্না তেন হরঃ স্মৃতঃ ॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ৬ অধ্যায়ঃ ॥ গন্ধপত্রঃ। বাবুই ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥

পাতালং (ক্লী) বিবরং। বড়বানলঃ। ইতি মেদিনী ॥ লগ্নাচ্চতুর্থস্থানং। যথা। পাতালং হিবুকঞ্চৈব সুহৃদ্বন্ধুশ্চতুর্থকং। ইতি জ্যোতিস্তত্ত্বং ॥ স্বনামখ্যাতগর্ত্তঃ। তৎপর্য্যায়ঃ। অধোভুবনং ২ বলিসদ্ম ৩ রসাতলং ৪ নাগলোকঃ ৫। ইত্যমরঃ ॥ অধঃ ৬ উরগস্থানং ৭ ॥ * ॥ সপ্ত পাতালানি যথা। অতলং নিতলঞ্চৈব বিতলঞ্চ গভস্তিমৎ। তলং সুতলপাতালে পাতালানি তু সপ্ত বৈ ॥ ইতি শব্দরত্নাবলী ॥ শেষ উবাচ। কথয়ামি মহাভাগ পাতালস্য বিনির্ণয়ং। ক্রমাদেব নিবোধৈতৎ সাবধানো দ্বিজর্ষভ ॥ পাতালানি চ সপ্তৈব মুনয়ঃ সংপ্রচক্ষতে। অতলং বিতলঞ্চৈব সুতলঞ্চ তলাতলং ॥ মহাতলঞ্চ বিখ্যাতং ততো জ্ঞেয়ং রসাতলং। ততঃ পাতালমিত্যেবং সপ্ত পাতালসংজ্ঞকাঃ ॥ এতে স্বর্গাধিকসুখা বিলস্বর্গাঃ প্রকীর্ত্তিতাঃ। সমৃদ্ধভবনোদ্যানবিহারাক্রীড়চত্বরাঃ ॥ যা চ সা মেদিনী ব্রহ্মন্ ধত্তে স্থাবরজঙ্গমান্। অধস্তস্যা যদতলং যোজনাযুততো দ্বিজ ॥ ময়পুত্রো মহামায়ো বসত্যত্র মহাসুরঃ। যেন সৃষ্টাঃ পুরা মায়াঃ ষড়ূর্দ্ধনর্ত্তিতঃ কিল ॥ ১ ॥ তদধো বিতলং নাম

যোজনানাং ততোঽযুতে। হরো বিহরতে তত্র ভগবান্ হাটকেশ্বরঃ ॥ সুপার্শ্বদৈর্ভূতগণৈর্ভবান্যা চ সহ প্রভুঃ। প্রবৃত্তা চ সরিৎ তত্র হাটকী নাম বিস্তৃতা ॥২॥ অধঃ সুতলমিত্যেতৎ যোজনানাং ততোঽযুতে। তত্রোদারশ্রবাঃ পুণ্যশ্লোকো বৈরোচনির্ব্বলিঃ ॥ ৩ ॥ তলাতলং ততোঽধস্তাৎ সুতলাদ্যোজনাযুতে। ময়ো নাম দানবেন্দ্রস্ত্রিপুরাধিপতির্ম্মহান্। নিবসত্যত্র সুচিরং মায়ানাং পরমাশ্রয়ঃ ॥ ৪ ॥ মহাতলে ততোঽধস্তাদ্যোজনানামথাযুতে। সর্পাণাং কাদ্রবেয়াণাং গণঃ ক্রোধবশাহ্বয়ঃ ॥ গরুড়াৎ সর্ব্বদা ভীতঃ সকুটুম্বঃ সুহৃদ্বৃতঃ। নিবসত্যনধিজ্ঞাতঃ পক্ষিরাজেন গহ্বরে ॥ ৫ ॥ রসাতলে ততোঽধস্তাদ্যোজনানামথাযুতে। নিবসন্তি দানবাশ্চ শক্রাদ্ভীতা নিরন্তরং ॥ ৬ ॥ পাতালে তু ততোঽধস্তাদ্যোজনানাং দ্বিজাযুতে। নাগলোকেশ্বরাঃ শূরা নিবসন্তি মহাবলাঃ ॥ ৭ ॥ ইতি পাদ্মে পাতালখণ্ডে ১।২।৩ অধ্যায়ঃ ॥ * ॥ অপি চ। অতলং সুতলঞ্চৈব বিতলঞ্চ গভস্তিমৎ। মহাতলং রসাতলং পাতালং সপ্তমং স্মৃতং ॥ রুক্মভৌমং শিলাভৌমং পাতালং নীলমৃত্তিকং। রক্তপীতশ্বেতকৃষ্ণভৌমানি চ ভবন্ত্যপি ॥ পাতালানাঞ্চ সপ্তানাং লোকানাঞ্চ যদন্তরং। শুষিরং তানি কথ্যন্তে ভুবনানি চতুর্দ্দশ ॥ অষ্টাবিংশতিবিখ্যাতাস্ততো নরককোটয়ঃ। নরকাণামধস্তাত্তু ধূমঃ কালাগ্নিসম্ভবঃ ॥ তস্যাধস্তাদনন্তাখ্যো রুদ্রঃ সর্ব্বময়ো মহান্। তদধো ধর্ম্মচক্রস্তু যেনেদং ধার্য্যতে জগৎ ॥ ইত্যগ্নিপুরাণং ॥ * ॥ অন্যচ্চ। দশসাহস্রমেকৈকং পাতালং মুনিসত্তম। অতলং বিতলঞ্চৈব নিতলঞ্চ গভস্তিমৎ ॥ মহাখ্যং সুতলঞ্চাগ্র্যং পাতালঞ্চাপি সপ্তমং। কৃষ্ণাশুক্লারুণাপীতাশর্করাশৈলকাঞ্চনাঃ ॥ ভূময়ো যত্র মৈত্রেয় বরপ্রাসাদশোভিতাঃ। তেষু দানবদৈতেয়জাতয়ঃ শতসংঘশঃ ॥ নিবসন্তি মহাভাগা অহয়শ্চ মহামুনে। স্বর্লোকাদপি রম্যাণি পাতালানীতি নারদ ॥ দিবার্করশ্ময়ো যত্র প্রভাং তন্বন্তি নাতপং। শশিনশ্চ ন শীতায় নিশি দ্যোতায় কেবলং ॥ পাতালানামধশ্চাস্তে বিষ্ণোর্যা তামসী তনুঃ। শেষাখ্যা যদ্গুণান্ বক্তুং ন শক্তা দৈত্যদানবাঃ ॥ যোঽনন্তঃ পঠ্যতে সিদ্ধৈর্দ্দেবদেবর্ষিপূজিতঃ। যস্যৈষা সকলা পৃথ্বী ফণামণিশিখারুণা। আস্তে কুসুমমালেব কস্তদ্বীর্য্যং বদিষ্যতি যদা বিজৃম্ভতেঽনন্তো মদাঘূর্ণিতলোচনঃ। তদা চলতি ভূরেষা সাদ্রিতোয়াব্ধিকাননা ॥ ইতি বিষ্ণুপুরাণে ২ অংশে ৫ অধ্যায়ঃ ॥

পাতালঃ (পুং) ঔষধপাকার্থযন্ত্রবিশেষঃ। ইতি শব্দচন্দ্রিকা ॥ তৎপ্রকারো যথা। ঊর্দ্ধমাপস্তলে বহ্নির্মধ্যে তু রসসংগ্রহঃ। পাতালযন্ত্রমেতদ্ধি শোধয়েৎ সূতকাদিকং ॥ ইতি বৈদ্যকং ॥

পাতালগরুড়ী (স্ত্রী) লতাবিশেষঃ। ছেউড়া ইতি হিন্দীভাষা। তৎপর্য্যায়ঃ। বৎসাদনী ২ সোমবল্লী ৩ তিক্তাঙ্গা ৪ মেচকাভিধা ৫ তার্ক্ষী ৬ সৌপর্ণী ৭ গারুড়ী ৮

দীর্ঘকাণ্ডা ৯ দৃঢ়কাণ্ডা ১০ মহাবলা ১১ দীর্ঘবল্লী ১২ দৃঢ়লতা ১৩। অস্যা গুণাঃ। মধুরত্বং। পিত্তদাহাস্রদোষবিষদোষনাশিত্বং। বৃষ্যত্বং। সন্তর্পণত্বং। রুচ্যত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অপি চ। ছিলিহিণ্ডো মহামূলঃ পাতালগরুড়াহ্বয়ঃ। ছিলিহিণ্ডঃ পরং বৃষ্যঃ কফঘ্নঃ পবনাপহঃ॥ ইতি ভাবপ্রকাশঃ॥

পাতালনিলয়ঃ (পুং) দৈত্যঃ। ইতি হলায়ুধঃ॥ সর্পঃ। ইতি রাজনির্ঘণ্টঃ॥

পাতালৌকাঃ [স্] (পুং) দৈত্যঃ। ইতি হেমচন্দ্রঃ॥ পাতালবাসিনি ত্রি॥

পাতিঃ (পুং) প্রভুঃ। স্বামী। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥

পাতিকঃ (পুং) শিশুমারঃ। ইতি শব্দমালা॥

পাতিলী (স্ত্রী) বাগুরা। নারী। মৃৎপাত্রভেদঃ। পাতিল্ ইতি ভাষা। ইতি মেদিনী॥

পাতুকঃ (ত্রি) পতয়ালুঃ। পতনশীলঃ। ইত্যমরঃ॥ প্রপাতে জলহস্তিনি চ পুং। ইতি মেদিনী॥

পাত্রঃ (ত্রি) পাতি রক্ষতি ক্রিয়ামাধেয়ম্বা। পিবন্ত্যনেনেতি বা। তৎপর্য্যায়ঃ। অমত্রং ২ ভাজনং ৩। ইত্যমরঃ॥ ভাণ্ডং ৪ কোশঃ ৫ কোষঃ ৬ পাত্রী ৭ কোশী ৮ কোষী ৯ কোশিকা ১০ কোষিকা ১১। ইতি শব্দরত্নাবলী॥ পাধাতোস্ত্রপ্রত্যয়নিষ্পন্নত্বাদেকতকারবানয়ং॥

পাত্রং (ক্লী) যোগ্যং। স্রুবাদি। রাজমন্ত্রী। তীরদ্বয়ান্তরং। পাতার ইতি ভাষা। ইতি মেদিনী॥ পর্ণং। নাট্যানুকর্ত্তা। ইতি হেমচন্দ্রঃ॥ আঢ়কপরিমাণং। ইতি বৈদ্যকপরিভাষা॥ * ॥ পাত্রাণাং বিধির্যথা। হেমপাত্রেণ সর্ব্বাণি লভতে চেতি তাম্মুনে। অর্ঘ্যং দত্ত্বা তু রৌপ্যেণ আয়ূ রাজ্যসুতান্ লভেৎ॥ তাম্রপাত্রেণ সৌভাগ্যং ধর্ম্মং মৃণ্ময়সম্ভবৈঃ। বার্ক্ষপাত্রাণি রম্যাণি নৈষ্ঠিকাদিষু কারয়েৎ॥ শৈলানি ক্রূরজাতীনাং রক্তানি সর্ব্বকামিনাং। ধাতূত্তমানি পাত্রাণি নৃপরাষ্ট্রবিবৃদ্ধয়ে॥ ত্রপুসীসকলোহানি অন্ত্যজাদিষু কারয়েৎ। বিবাহযজ্ঞশ্রাদ্ধেষু প্রতিষ্ঠাসু বিশেষতঃ॥ পাত্রাণাঞ্চাদরঃ কার্য্যঃ পাত্রাণ্যেবোত্তমানি চ। পাত্রেষু পৃথিবী দুগ্ধা সুধা পাত্রেষু ধার্য্যতে॥ দেবাঃ সোমঃ ক্রতুর্যজ্ঞঃ পাত্রাণ্যেবং বিদুর্বুধাঃ। বলিহোমক্রিয়াদীনি বিনা পাত্রৈর্ন সিধ্যতি॥ তস্মাদ্যজ্ঞাঙ্গমেবাতঃ পাত্রঞ্চাগ্র্যং মহামুনে॥ * ॥ তৎপরিমাণাদি যথা। ষট্ত্রিংশদঙ্গুলং পাত্রঞ্চোত্তমং পরিকীর্ত্তিতং। মধ্যমং তত্ত্রিভাগেন ভাগং কন্যসমীরিতং॥ বস্বঙ্গুলপ্রমাণন্তু তৎ পাত্রং কারয়েৎ ক্বচিৎ। নানাবিচিত্ররূপাণি পৌণ্ডরীকাকৃতীনি চ॥ শঙ্খনীলোৎপলাকারপাত্রাণি পরিকল্পয়েৎ। রত্নাদিরচিতান্ কুর্য্যাৎ কাঞ্চীমূলসুসঙ্কিতান্॥ যথাশোভং যথালাভং তথা পাত্রাণি কারয়েৎ॥ বিনা পাত্রেণ যঃ কুর্য্যাৎ প্রতিষ্ঠাযাজ্ঞিকীং ক্রিয়াং। বিফলা ভবতে সর্ব্বা বাহনাদিধনাপহা॥ ইতি দেবীপুরাণং॥ * ॥

ভোজনপাত্রাণি ভোজনশব্দে দ্রষ্টব্যানি ॥

পাত্রটঃ (পুং) কর্পটকঃ । কৃশে ত্রি । ইতি শব্দরত্নাবলী ॥

পাত্রটীরঃ (পুং) যুক্তব্যাপারমন্ত্রী । লৌহপাত্রং । কাংস্যপাত্রং । রজতপাত্রং । সিংহানং । পাবকঃ । ইতি শব্দমালা মেদিনী চ ॥ পিঙ্গাশঃ । বায়সঃ । কঙ্কঃ । ইতি শব্দরত্নাবলী ॥

পাত্রপালঃ (পুং) তুলাধটঃ । পাতওয়ার ইতি ভাষা । ইতি জটাধরঃ ॥

পাত্রসংস্কারঃ (পুং) পুরোটিঃ । রায়ভাটী ইতি ভাষা । ইতি শব্দচন্দ্রিকা ॥ ভাজনশুদ্ধিশ্চ ॥

পাত্রী (স্ত্রী) পাত্রং । ইতি ত্রিলিঙ্গসংগ্রহে অমরঃ ॥

পাত্রীয়ং (ক্লী) যজ্ঞপাত্রং । ইতি ত্রিকাণ্ডশেষঃ ॥

পাত্রীরঃ (পুং) যজ্ঞদ্রব্যং । ইতি ভূরিপ্রয়োগঃ ॥

পাত্রেসমিতঃ (ত্রি) ভোজনাদন্যত্র যো ন মিলিতঃ সঃ । ভোজনেম্বেব দক্ষঃ । যথা । স পাত্রেসমিতোঽন্যত্র ভোজনান্মিলিতো ন যঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ পাপিবিশেষঃ। যথা । নিধায় হৃদয়ে পাপং যঃ পরং শংসতি স্বয়ং । স পাত্রেসমিতোঽথ স্যাদিতি শব্দমালা ॥

পাত্রোপকরণং (ক্লী) উপভূষণং । যথা । রীতিবর্গাদিসংজাতং পাত্রোপকরণাদিকং । দ্দ্যাদায়সবর্জ্জন্তু ভূষণং ন কদাচন ॥ ঘণ্টাচামরকুম্ভাদিপাত্রোপকরণাদিকং । তদ্ভূষণান্তরে দদ্যাদযস্মাত্তদুপভূষণং ॥ ইতি কালিকাপুরাণে ৬৮ অধ্যায়ঃ ॥

পাত্রং (ক্লী) পাপিত্রাতা । যথা ভবিষ্যপুরাণে । সর্ব্বেষামেব পাত্রাণাং পরং পাত্রং মহেশ্বরঃ । পতন্তং ত্রায়তে যস্মাদতীব নরকার্ণবাৎ ॥ মহেশ্বর ইতি প্রদর্শকং হেতোরবিশেষাৎ। তথা নন্দিপুরাণং । পাত্রাণ্যাধ্যাত্মিকা মুখ্যা বিশুদ্ধাশ্চাগ্নিহোত্রিণঃ । দেবতাশ্চ তথা মুখ্যা গোদানং হ্যেতদুত্তমং ॥ ইতি প্রায়শ্চিত্ততত্ত্বং ॥

পাত্রতা (স্ত্রী) পাত্রত্বং । পাত্রস্য ভাবঃ । বিদ্যাতপস্যাচারযুক্ততা । যথা । ন বিদ্যয়া কেবলয়া তপসা বাপি পাত্রতা । যত্র বৃত্তমিমে চোভে তদ্ধি পাত্রং প্রচক্ষ্যতে ॥ ইতি শুদ্ধিতত্ত্বং ॥

পাথং (ক্লী) জলং । ইতি মেদিনী ॥

পাথঃ (পুং) সূর্য্যঃ । অগ্নিঃ । ইতি মেদিনী ॥

পাথঃ [স্] (ক্লী) জলং । ইত্যমরঃ ॥

পাথিঃ [স্] (পুং) সমুদ্রঃ । ইত্যুণাদিকোষঃ ॥ চক্ষুঃ । ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥ কীলালে ক্লী । ইত্যুণাদিকোষঃ ॥

পাথেয়ং (ক্লী) পথি ব্যয়িতব্যদ্রব্যং । পথখরচ ইতি ভাষা । ইতি হেমচন্দ্রঃ ॥ তৎপর্য্যায়ঃ। শম্বলং২। ইত্যমরঃ ॥ সম্বলং৩। ইতি ভরতঃ ॥ কন্যারাশিঃ । যথা । ক্রিয়তাবুরিজিতুমকুলীরলেয়পাথেয়যুককৌর্প্যাখ্যাঃ । তৌক্ষিক আকোকেরো হৃদ্রোগশ্চান্ত্যভঞ্চেত্থং ॥ ইতি জ্যোতিস্তত্ত্বং ॥

পাথোজং (ক্লী) কমলং। ইতি রাজনির্ঘণ্টঃ॥

পাথোদঃ (পুং) মেঘঃ। ইতি ত্রিকাণ্ডশেষঃ॥

পাথোধরঃ (পুং) মেঘঃ। ইতি হলায়ুধঃ॥

পাথোধিঃ (পুং) সমুদ্রঃ। ইতি ত্রিকাণ্ডশেষঃ॥

পাথোনিধিঃ (পুং) সমুদ্রঃ। ইতি শব্দরত্নাবলী॥

পাদ্ (পুং) পাদঃ। ইতি জটাধরঃ॥

পাদঃ (পুং) পদ্যতে গম্যতে অনেন। পা ইতি ভাষা। স তু গর্ভস্থবালকস্য মাসদ্বয়েন ভবতি। যথা। মাসেন তু শিরো দ্বাভ্যাং বাহ্বঙ্‌ঘ্র্যাদ্যঙ্গবিগ্রহঃ। ইতি ভাগবতীয়তৃতীয়স্কন্ধঃ॥ তৎপর্য্যায়ঃ। পৎ ২ অঙ্‌ঘ্রিঃ ৩ চরণঃ ৪। ইত্যমরঃ॥ অংঘ্রিঃ ৫। ইতি শব্দরত্নাবলী॥ * ॥ ঋগ্বেদীয়মন্ত্রচতুর্থাংশঃ। শ্লোকচতুর্থাংশঃ। যথা। পাদাশ্চেল্লোপে সত্যেব পূর্য্যেত। ইহ ঋক্ পাদ এব গৃহ্যতে। ইতি বামনঃ॥ অবিশেষাৎ শ্লোকপাদোঽপি। ইত্যপরে। ইতি সিদ্ধান্তকৌমুদী॥ * ॥ পাদদ্বারা পাদাক্রমণাদিনিষেধো যথা। পাদেন নাক্রমেৎ পাদমুচ্ছিষ্টং নৈব লঙ্ঘয়েৎ। ন সংহতাভ্যাং পাণিভ্যাং কণ্ডূয়েদাত্মনঃ শিরঃ॥ ইতি কর্ম্মলোচনং॥ * ॥ পাদচালনাদিনিষেধো যথা। ন পাদচালনং কুর্য্যাৎ পাদেন বা কদাচন। নাগ্নৌ প্রতাপয়েৎ পাদৌ ন কাংস্যে ধাবয়েদ্‌বুধঃ॥ নাতিপ্রসারয়েদ্দেবং ব্রাহ্মণান্ গামথাপি বা। বায়্বগ্নিনৃপবিপ্রাণাং সূর্য্যং বা শশিনং প্রতি॥ ইতি কৌর্ম্মে উপবিভাগে ১৫ অধ্যায়ঃ॥ * ॥ পাদেন্দ্রিয়স্যাধ্যাত্মত্বং তস্মিন্নধিভূতমধিদৈবতঞ্চ যথা। অতঃ পরং প্রবক্ষ্যামি সর্ব্বং বিবিধমিন্দ্রিয়ং। পাদাবধ্যাত্মমিত্যাহুর্ব্রাহ্মণাস্তত্ত্বদর্শিনঃ॥ অধিভূতস্তু গন্তব্যং বিষ্ণুস্তত্রাধিদৈবতং। ইতি মহাভারতে আশ্বমেধিকপর্ব্বণি ৪২ অধ্যায়ঃ॥ * ॥ বুধ্নঃ। বৃক্ষমূলং। তুরীয়াংশঃ। চতুর্থভাগঃ। শৈলপ্রত্যন্তপর্ব্বতঃ। মহাদ্রিসমীপে ক্ষুদ্রপর্ব্বতঃ। ময়ূখঃ। কিরণঃ। ইতি মেদিনী॥

পাদকটকঃ (পুং) নূপুরঃ। রবশূন্যহংসাকৃতিচরণভূষণং। বেঁক মল ইতি ভাষা। তৎপর্য্যায়ঃ। হংসকঃ ২। ইত্যমরভরতৌ॥

পাদকৃচ্ছ্রঃ (পুং) ব্রতবিশেষঃ। যথা। একভক্তেন নক্তেন তথৈবাযাচিতেন চ। উপবাসেন চৈকেন পাদকৃচ্ছ্র উদাহৃতঃ॥ ইতি গারুড়ে ১০৩ অধ্যায়ঃ॥

পাদগণ্ডিরঃ (পুং) শ্লীপদং। গোদ ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ॥

পাদগ্রহণং (ক্লী) অভিবাদনং। পাদস্পর্শপূর্ব্বকপ্রণামঃ। ইত্যমরঃ॥ তন্নিষেধো যথা। সমিদ্বার্য্যুদকুম্ভপুষ্পান্নহস্তো নাভিবাদয়েৎ যচ্চাপ্যেবং যুক্তং। ইতি বৌধায়নঃ॥ জপযজ্ঞজলস্থঞ্চ সমিৎপুষ্পকুশানলান্। দন্তকাষ্ঠঞ্চ ভক্ষ্যঞ্চ বহন্তং নাভিবাদয়েৎ॥ ইতি লঘুহারীতঃ॥ ন পুষ্পাক্ষতপাণির্নাশুচির্ন জপন্ ন দেবপিতৃকার্য্যং কুর্ব্বন্। অভিবাদয়েদিত্যনুবৃত্তৌ শঙ্খলিখিতৌ॥ * ॥ তদ্বিধিঃ। লৌকিকং বৈদিকং বাপি তথাধ্যাত্মিকমেব বা।

আদদীত যতো জ্ঞানং তং পূর্ব্বমভিবাদয়েৎ ॥ ঊর্দ্ধং প্রাণা হ্যুৎক্রামন্তি যূনঃ স্থবির আয়তি। প্রত্যুত্থানাভিবাদাভ্যাং পুনস্তান্ প্রতিপদ্যতে ॥ * ॥ তৎপ্রকারঃ। অভিবাদাৎ পরং বিপ্রো জ্যায়াংসমভিবাদয়ন্। অসৌ নামাহমস্মীতি স্বং নাম পরিকীর্ত্তয়েৎ ॥ নামধেয়স্য যে কেচিদভিবাদং ন জানতে। তান্ প্রাজ্ঞোঽহমিতি ব্রূয়াৎ স্ত্রিয়ঃ সর্ব্বাস্তথৈব চ ॥ ভোঃ শব্দং কীর্ত্তয়েদন্তে স্বস্য নাম্নোঽভিবাদনে। নাম্নাং স্বরূপভাবো হি ভো ভাব ঋষিভিঃ স্মৃতঃ ॥ ইতি মনুঃ ॥

পাদচত্বরঃ (পুং) ছাগঃ। সৈকতং। পিপ্পলঃ। করকঃ। পরদোষৈকপ্রবক্তা। ইতি মেদিনী ॥

পাদচারী [ন্] (পুং) পদাতিঃ। ইতি হেমচন্দ্রঃ ॥ পদ্ভ্যাং গমনশীলে ত্রি ॥

পাদজঃ (পুং) শূদ্রঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

পাদত্রাণং (ক্লী) পাদুকা। ইতি জটাধরঃ ॥

পাদপঃ (পুং) বৃক্ষঃ। ইত্যমরঃ ॥ পাদপীঠঃ। ইতি মেদিনী ॥

পাদপরুহা (স্ত্রী) বন্দাকঃ। ইতি রাজনির্ঘণ্টঃ ॥

পাদপা (স্ত্রী) পাদুকা। ইতি মেদিনী ॥

পাদপাশঃ (পুং) অশ্বপাদরজ্জুঃ। তৎপর্য্যায়ঃ। দামাঞ্চনং ২। ইতি হেমচন্দ্রঃ ॥

পাদপাশী (স্ত্রী) খড্ডুকা। খেড়ুয়া ইতি ভাষা। শৃঙ্খলা। শিকলী ইতি ভাষা। ইতি মেদিনী ॥

পাদপীঠং (স্ত্রী) পাদস্থাপনাসনং। পা রাখা টুল ইতি ভাষা। তৎপর্য্যায়ঃ। পদাসনং ২। ইতি হেমচন্দ্রঃ ॥

পাদপীঠিকা (স্ত্রী) নাপিতাদিশিল্পং। যথা। নাপিতাদিকশিল্পে তু কারিকা পাদপীঠিকা। ইতি শব্দমালা ॥

পাদপ্রধারণং (ক্লী) পাদুকা। ইতি কেচিৎ ॥

পাদপ্রহারঃ (পুং) পদাঘাতঃ। লাতি ইতি ভাষা। যথা। নায়িকাপাদপ্রহারাদিনা নায়কস্য কোপাদিবর্ণনং। ইতি কাব্যপ্রকাশে সপ্তমোল্লাসঃ ॥

পাদপ্রক্ষালনং (ক্লী) চরণধৌতং। পা ধোওয়া ইতি ভাষা। অস্য গুণাঃ। মেধাজনকত্বং। পবিত্রত্বং। আয়ুষ্যত্বং। অলক্ষ্মীকলিনাশকত্বঞ্চ। ইতি রাজবল্লভঃ ॥

পাদবন্ধনং (ক্লী) গোমহিষ্যাদিধনং। ইতি জটাধরঃ ॥ যাদবশব্দটীকায়াং ভরতশ্চ ॥ চরণোদ্দানঞ্চ ॥

পাদমূলং (ক্লী) চরণাধোভাগঃ। যথা। পাদমূলং গোহিরং স্যাৎ পার্ষ্ণিস্তু ঘুটয়োরধঃ। ইতি হেমচন্দ্রঃ ॥

পাদরজ্জুঃ (স্ত্রী) হস্তিপাদবন্ধনরজ্জুঃ। তৎপর্য্যায়ঃ। পারী ২। ইতি জটাধরঃ ॥ চরণবন্ধনদামমাত্রঞ্চ ॥

পাদরথী (স্ত্রী) পাদুকা। ইতি ত্রিকাণ্ডশেষঃ ॥

পাদরক্ষণং (ক্লী) পাদুকা। ইতি হেমচন্দ্রঃ ॥

পাদরোহণঃ (পুং) বটবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

পাদবল্মীকং (ক্লী) শ্লীপদং। ইতি হেমচন্দ্রঃ ॥

পাদবিকঃ (পুং) পথিকঃ। পদবীং ধাবতি ইত্যর্থে ঠক্‌প্রত্যয়নিষ্পন্নঃ। ইতি সিদ্ধান্তকৌমুদী

পাদবিরজাঃ [স্] (স্ত্রী) পাদুকা। ইতি হারাবলী॥

পাদশঃ [স্] ব্য পাদং পাদং। পাদশব্দাৎ বীপ্সায়াং চশস্‌প্রত্যয়নিষ্পন্নং। ইতি ব্যাকরণং॥

পাদশৈলঃ (পুং) প্রত্যন্তপর্ব্বতঃ। ইতি শব্দরত্নাবলী॥

পাদশোথঃ (পুং) পাদগতশোফঃ। যথা। অনন্যোপদ্রবকৃতঃ শোথঃ পাদসমুত্থিতঃ। পুরুষং হন্তি নারীন্তু মুখজো গুহ্যজো দ্বয়ং॥ ইতি মাধবকরঃ॥

পাদস্ফোটঃ (পুং) রোগবিশেষঃ। তৎপর্য্যায়ঃ। বিপাদিকা ২। ইত্যমরঃ॥ স্ফুটী ৩ স্ফুটিঃ ৪ পাদস্ফোটিঃ ৫। ইতি শব্দরত্নাবলী॥ স তু একাদশক্ষুদ্রকুষ্ঠান্তর্গততৃতীয়কুষ্ঠং। যথা। বৈপাদিকং পাণিপাদস্ফুটনং তীব্রবেদনং। পাণিপাদস্ফুটনং পাণ্যোঃ পাদয়োশ্চ স্ফুটনং বিদারণং যেন তৎ। ইতি মাধবকরঃ॥ অস্য চিকিৎসা কুষ্ঠশব্দে দ্রষ্টব্যা॥

পাদহারকঃ (ত্রি) চরণদ্বারা হরণকর্ত্তা। পাদাভ্যাং হ্রিয়তেঽসৌ। পাদশব্দাৎ নিপাতনাৎ কর্ম্মণি ণকপ্রত্যয়ান্তঃ। ইতি মুগ্ধবোধব্যাকরণং॥

পাদাগ্রং (ক্লী) চরণাগ্রভাগঃ। তৎপর্য্যায়ঃ। প্রপদং ২। ইত্যমরঃ॥

পাদাঙ্গদং (ক্লী) নূপুরং। ইত্যমরঃ॥

পাদাৎ (পুং) পাদাতিঃ। ইতি শব্দরত্নাবলী॥

পাদাতং (ক্লী) পত্তিসংহতিঃ। পদাতিসমূহঃ। ইত্যমরঃ॥

পাদাতঃ (পুং) পাদাতিঃ। যথা। পদাতিপত্তিপাদাতপাদাতিকপদাজয়ঃ। ইত্যমরমালা॥

পাদাতিঃ } (পুং) পদাতিঃ। ইতি হেমচন্দ্রঃ॥
পাদাতিকঃ }

পাদারকঃ (পুং) পোলিন্দঃ। ইতি ত্রিকাণ্ডশেষঃ॥

পাদালিন্দঃ (পুং) নৌকা। ইতি হারাবলী॥

পাদাবর্ত্তঃ (পুং) অরঘট্টকঃ। রহট্ ইতি হিন্দী ভাষা। ইতি হেমচন্দ্রঃ॥

পাদাবিকঃ (পুং) পদাতিঃ। ইতি শব্দরত্নাবলী॥

পাদী [ন্] (পুং) পাদবিশিষ্টজলজন্তুগণঃ। অস্য গণনা গুণাশ্চ যথা। কুম্ভীরকূর্ম্মনক্রাশ্চ গোধামকরশঙ্কবঃ। ঘণ্ডিকঃ শিশুমারশ্চেত্যাদয়ঃ পাদিনঃ স্মৃতাঃ॥ পাদিনোঽপি চ যে তে তু কোষস্থানাং গুণৈঃ সমাঃ। ইতি ভাবপ্রকাশঃ॥ চতুর্থাংশভাগী। যথা। সর্ব্বেষামর্দ্ধিনো মুখ্যাস্তদর্দ্ধেনার্দ্ধিনোঽপরে। তৃতীয়িনস্তৃতীয়াংশাশ্চতুর্থাংশাস্তু পাদিনঃ॥ ইতি মলমাসতত্ত্বং॥

পাদুকঃ (ত্রি) গমনশীলঃ। পদধাতোঃ কর্ত্তরি ঞুকপ্রত্যয়নিষ্পন্নঃ। ইতি মুগ্ধবোধব্যাকরণং

পাদুকা (স্ত্রী) চর্ম্মাদিনির্ম্মিতপাদাচ্ছাদনং।

জুতা ইতি ভাষা। তৎপর্য্যায়ঃ। পাদূঃ ২ উপানৎ ৩। ইত্যমরঃ॥ পন্নদ্ধা ৪ পাদরক্ষিকা ৫ প্রাণিহিতা ৬। ইতি হেমচন্দ্রঃ॥ পন্নদ্ধী ৭ পাদরথী ৮। ইতি ত্রিকাণ্ডশেষঃ॥ কৌষী ৯। ইতি শব্দরত্নাবলী ॥ * ॥ তস্যা ধারণবিধির্যথা। বর্ষাতপাদিকে ছত্রী দণ্ডী রাত্র্যটবীষু চ। শরীরত্রাণকামো বৈ সোপানৎকঃ সদা ব্রজেৎ॥ ইতি জ্যোতিস্তত্ত্বং॥ * ॥ অস্যা ধারণগুণাঃ। পাদপ্রধারণং বৃষ্যমোজস্যং চক্ষুষোর্হিতং। সুখপ্রচারমায়ুষ্যং বল্যং পাদরুজাপহং॥ * ॥ তস্যা অধারণে দোষা যথা। পাদাভ্যামনুপানস্ত্যাং নৃণাং চংক্রমণং সদা। অনারোগ্যমনায়ুষ্যমিন্দ্রিয়ঘ্নমদৃষ্টিকৃৎ॥ ইতি রাজবল্লভঃ॥ * ॥ তস্যা দানফলং যথা। দহ্যমানায় বিপ্রায় যঃ প্রযচ্ছত্যুপানহৌ। ন তস্য মানসো দাহঃ কদাচিদপি জায়তে॥ যানঞ্চাশ্বতরীযুক্তং তস্য হেমময়ং শুভং। উপতিষ্ঠতি বিপ্রর্ষে সর্ব্বরত্নবিভূষিতং॥ * ॥ দানমন্ত্র যথোৎপন্নং তত্তে বক্ষ্যামি পার্থিব। শৃণুষ্বৈকমনা ভূপ লোকে সর্ব্বসুখপ্রদং॥ জমদগ্নির্মুনিঃ পূর্ব্বং তপঃস্বাধ্যায়কর্শিতঃ। বাণখড়্গধরো ধন্বী বভূব সততোদ্যতঃ॥ ধনুর্ব্বেদে তথা বেদে সর্ব্বাস্ত্রপারগোঽভবৎ। ক্ষিপন্ বাণাংস্তথা শশ্বৎ ভার্য্যয়ানুগতো হি সঃ॥ কদা নিদাঘকালে তু ক্ষিপন্ বাণান সহস্রশঃ। তস্মৌ স্থাণুরিবাসহ্যঃ প্রতিলক্ষং মহামুনিঃ॥ নিদাঘতীব্রসন্তাপাদগচ্ছন্ত্যাঃ দততং ভয়াৎ। ভর্ত্তুঃ স্নেহাত্তথা যান্ত্যাস্তস্যাশ্চণ্ডায়তে রবিঃ॥ ক্ষুত্তৃষ্ণাশ্রমতাপার্ত্তা তথা যাতুং ন সাশকৎ। সুতাপাদ্দেশবিভ্রষ্টা রেণুকা চ তপস্বিনী॥ তাং দৃষ্ট্বা স মুনিঃ প্রাহ ভার্য্যাং কিন্তে ভবেচ্চিরং। কোপার্ত্তমাহ ভর্ত্তারং ন কোপং কর্ত্তুমর্হসি॥ নিদাঘতীব্রসন্তাপাৎ ভ্রষ্টপাদা তৃষার্দ্দিতা। ঘৃণিমদ্ঘৃণিভিঃ স্পৃষ্টা ন শশাকাহ মার্গিতুং॥ ইত্যুক্তে স ক্রুধাবিষ্টঃ প্রাহ সন্ধায় কার্ম্মুকং। পৃষৎকং মাং ন জানাতি সূর্য্যো বিভ্রংশমীযিবান॥ যঃ সন্তপতি মে ভার্য্যাং সাধ্বীং ধর্ম্মপরায়ণাং। সাধ্বসাধু অজানন্ বৈ ফলমাপ্নোতু তস্য হি॥ ইত্যুক্ত্বা স্থানমাতস্থাবর্কবিভ্রংশহেতবে। প্রতীক্ষ্য হি সুঘোরেণ ক্রুররূপধরো মুনিঃ॥ তং বিজ্ঞায় মুনিং সূর্য্যো দ্বিজোঽভূচ্চেদমব্রবীৎ। কিমালোকয়সে সূর্য্যং পুনঃ পুনরতীব হি॥ সুবাণাঙ্কিতপাণিস্ত্বং কথয়স্বাখিলং মুনে। ইত্যুক্তঃ স তমাহেদং পাতয়িষ্যাম্যহং রবিং॥ দ্বিজস্তু তমুবাচাথ মুনে চিত্রং বিভাতি মে। মাতুরঙ্কগতো যদ্বদ্বালশ্চন্দ্রং জিঘৃক্ষতি॥ যোজনানাং সহস্রাণি নিমেষাদযাতি যো দশ। বিপ্র মুক্তেন বাণেন তং কথং পাতয়িষ্যসি॥ তচ্ছ্রুত্বা যমদগ্নিস্তং প্রাহ শৃণু দ্বিজোত্তম। পাতয়িষ্যাম্যহং যদ্বদিমং সূর্য্যং নভস্থলাৎ॥ বিয়চ্চরস্তদা সূর্য্যো মর্ত্যলোকে হ্যতন্দ্রিতঃ। মধ্যাহ্নে স্থিরতামেতি সর্ব্বলোকান্দদর্শিবান্॥ তৎকালে সুমহল্লক্ষ্যং ভবিষ্যতি দিবাকরঃ। এবং তং পাতয়িষ্যামি পশ্যতস্তে দ্বিজোত্তম॥

তচ্ছ্রুত্বা সহসোদ্বিগ্নস্তস্য প্রত্যক্ষতাং যযৌ। সূর্য্যস্তং ক্ষময়ামাস দত্ত্বা ছত্রমুপানহৌ॥ ততঃপ্রভৃতি তচ্ছত্রং দ্বিজানাং পরিগীয়তে। দত্তং তৈর্ধার্য্যতেঽন্যেষাং ক্ষত্রিয়াণাং দ্বিজোত্তম॥ * ॥ যো দদাতি দ্বিজেভ্যস্তু তৃতীয়ায়ামুপানহৌ। বৈশাখে শুক্লপক্ষে তু সচ্ছত্রং কনকান্বিতং॥ ন তস্য মানুষো দাহো মৃত্যুলোকেঽভিজায়তে। সর্ব্বব্যাধিবিনির্ম্মুক্তঃ শ্রিয়ং পুত্রাংশ্চ বিন্দতি॥ কালাদিহ যদা যাতি মম লোকে দ্বিজোত্তম। যানং বাশ্বতরীযুক্তং সর্ব্বহেমময়ং শুভং॥ দিব্যাঙ্গনাভিরাকীর্ণং সর্ব্বরত্নবিভূষিতং। উপতিষ্ঠতি বিপ্রেন্দ্র সর্ব্বকামফলপ্রদং॥ ইত্যগ্নিপুরাণং॥ * ॥ বিষ্ণুগৃহে সপাদুকগমনে দোষো যথা। বরাহ উবাচ। বহন্নুপানহৌ পদ্ভ্যাং যস্তু মামুপচাক্রমেৎ। চর্ম্মকারস্তু জায়েত বর্ষাণাস্তু ত্রয়োদশ॥ তত্র জন্মপরিভ্রষ্টঃ শূকরো জায়তে পুনঃ। শূকরাচ্চ পরিভ্রষ্টঃ শ্বা চ তত্রৈব জায়তে॥ ততঃ শ্বত্বাৎ পরিভ্রষ্টো মানুষশ্চৈব জায়তে। মদ্ভক্তশ্চ বিনীতশ্চ অপরাধবিবর্জ্জিতঃ॥ মুক্ত্বা তু সর্ব্বসংসারং মম লোকায় গচ্ছতি॥ য এতেন বিধানেন বসুধে কর্ম্ম কারয়েৎ। ন স লিপ্যতি পাপেন এবমেতন্ন সংশয়ঃ॥ ইতি বরাহপুরাণে উপানহাপরাধপ্রায়শ্চিত্তং॥ * ॥ অথ দেবতাপাদুকানির্ম্মাণপূজনবিধিঃ। যথা। মণিরত্নময়ী কার্য্যা হেমরূপ্যময়ী পি বা। চন্দনেনাপি কর্ত্তব্যা পাদুকাপ্রতিমাপি বা॥ শ্রীপর্ণা শ্রীক্রুমা চাপি দেবদারুময়ী পি বা। ষড়ঙ্গুলা চ সা কার্য্যা পাদুকে পূজয়েৎ সদা॥ ইতি দেবীপুরাণং॥ * ॥ গুরুপাদুকাস্তোত্রং যথা। ব্রহ্মরন্ধ্রসরসীরুহোদরে নিত্যলগ্নমবদাতমদ্ভুতং। কুণ্ডলীবিবরকাণ্ডমণ্ডিতং দ্বাদশার্ণসরসীরুহং ভজে॥ ১॥ তস্য কন্দলিতকর্ণিকাপুটে ক্লৃপ্তরেখমকথাদিরেখয়া। কোণলক্ষিতহলক্ষমণ্ডলীভাবলক্ষ্যমবলালয়ং ভজে॥ ২॥ তৎপুটে পটুতড়িৎকড়ারিমস্পর্দ্ধমানমণিপাটলপ্রভং। চিন্তয়ামি হৃদি চিন্ময়ং বপুর্বিন্দুনাদমণিপীঠমণ্ডলং॥ ৩॥ ঊর্দ্ধমস্য হুতভুক্শিখাসখং তদ্বিলাসপরিবৃংহণাস্পদং। বিশ্বঘস্মরমহোৎসদোৎকটং ব্যামৃষাদিযুগমাদিহংসয়োঃ॥ ৪॥ তত্র নাথচরণারবিন্দয়োঃ কুঙ্কুমাসবঝরীমরন্দয়োঃ। দ্বন্দ্বমিন্দুমকরন্দশীতলং মানসং স্মরতি মঙ্গলাস্পদং॥ ৫॥ পাদুকাপঞ্চকস্তোত্রং পঞ্চবক্ত্রাদ্বিনির্গতং। ষড়াম্নায়ফলোপেতং প্রপঞ্চে চাতিদুর্লভং॥ ইতি রুদ্রযামলঃ॥

পাদুকাকারঃ (পুং) চর্ম্মকারঃ। ইতি হলায়ুধঃ॥

পাদুকাকৃৎ (পুং) চর্ম্মকারঃ। ইতি হেমচন্দ্রঃ॥

পাদূঃ (স্ত্রী) পাদুকা। ইত্যমরঃ॥

পাদূকৃৎ (পুং) চর্ম্মকারঃ। ইত্যমরঃ॥

পাদোদকং (ক্লী) চরণধৌতজলং। চরণামৃতং। যথা। হৃদি রূপং মুখে নাম নৈবেদ্যমুদরে হরেঃ। পাদোদকঞ্চ

নির্ম্মাল্যং মস্তকে যস্য সোঽচ্যুতঃ ॥ নৈবেদ্যমন্নং তুলসীবিমিশ্রং বিশেষতঃ পাদজলং পিবেচ্চ। যোঽশ্নাতি নিত্যং প্রযতো মুরারেঃ প্রাপ্নোতি সুপ্রেমযুতাং স ভক্তিং ॥ হত্যাং হন্তি যদঙ্ঘ্রি-সঙ্গতুলসীস্তেয়ঞ্চ পাদোদকং নৈবেদ্যং বহুমদ্যপানদুরিতং গুর্ব্বঙ্গনাসঙ্গমং। ভক্ত্যাধীনমতিঃ স্থিতির্হরিজনে তৎসংগতিঃ সঙ্গজা শালগ্রামশিলাদিমূর্ত্তিমহিতাং জানন্তি কে বৈ হরেঃ ॥ ইতি পাদ্মোত্তরখণ্ডে ১০০ অধ্যায়ঃ ॥ * ॥ অথ শ্রীচরণোদকাভিষেকমাহাত্ম্যং পদ্মপুরাণে। স স্নাতঃ সর্ব্বতীর্থেষু সর্ব্বযজ্ঞেষু দীক্ষিতঃ। শালগ্রামশিলাতোয়ৈর্যোঽভিষেকং সমাচরেৎ॥ গঙ্গাগোদাবরীরেবানদ্যো মুক্তিপ্রদাস্তু যাঃ। নিবসন্তি সতীর্থাস্তাঃ শালগ্রামশিলাজলে ॥ কোটিতীর্থসহস্রৈস্তু সেবিতৈঃ কিং প্রয়োজনং। তীর্থং যদি ভবেৎ পুণ্যং শালগ্রামশিলোদ্ভবং ॥ তত্রৈব গৌতমাম্বরীষসম্বাদে। যেষাং ধৌতানি গাত্রাণি হরেঃ পাদোদকেন বৈ। অম্বরীষ কুলে তেষাং দাসোঽস্মি বশগঃ সদা ॥ রাজন্নেতানি তাবচ্চ তীর্থানি ভুবনত্রয়ে। যাবন্ন প্রাপ্যতে তোয়ং শালগ্রামাভিষেকজং ॥ স্কান্দে কার্ত্তিকমাহাত্ম্যে। গৃহেঽপি বসতস্তস্য গঙ্গাস্নানং দিনে দিনে। শালগ্রামশিলাতোয়ৈর্যোঽভিষিঞ্চতি মানবঃ ॥ তত্রৈবান্যত্র। যানি কানি চ তীর্থানি ব্রহ্মাদ্যা দেবতাস্তথা। বিষ্ণুপাদোদকস্যৈতে কলাং নার্হন্তি ষোড়শীং ॥ শালগ্রামোদ্ভবো দেবো দেবো দ্বারবতীভবঃ। উভয়োঃ স্নানতোয়েন ব্রহ্মহত্যা নিবর্ত্ততে ॥ কিঞ্চ। স বৈ চাবভৃতস্নাতঃ স চ গঙ্গাজলাপ্লুতঃ। বিষ্ণুপাদোদকং কৃত্বা শঙ্খে যঃ স্নাতি মানবঃ ॥ শ্রীনৃসিংহপুরাণে। গঙ্গাপ্রয়াগগয়নৈমিষপুষ্করাণি পুণ্যানি যানি কুরুজাঙ্গলযামুনানি। কালেন তীর্থসলিলানি পুনন্তি পাপং পাদোদকং ভগবতঃ প্রপুনাতি সদ্যঃ ॥ স্মৃতৌ চ। ত্রিরাত্রিফলদা নদ্যো যাঃ কাশ্চিদসমুদ্রগাঃ। সমুদ্রগাশ্চ পক্ষস্য মাসস্য সরিতাং পতিঃ ॥ ষণ্মাসফলদা গোদা বৎসরস্য তু জাহ্নবী। পাদোদকং ভগবতো দ্বাদশাব্দফলপ্রদং ॥ তন্নিত্যতা চ গরুড়পুরাণে। জলঞ্চ যেষাং তুলসীবিমিশ্রিতং পাদোদকং চক্রশিলাসমুদ্ভবং। নিত্যং ত্রিসন্ধ্যং প্লবতে ন গাত্রং খগেন্দ্র তে ধর্ম্মবহিষ্কৃতা নরাঃ ॥ * ॥ অথ শ্রীচরণোদকপানমাহাত্ম্যং। পাদ্মে গৌতমাম্বরীষসম্বাদে। হরেঃ স্নানাবশেষন্তু জলং যস্যোদরে স্থিতং। অম্বরীষ প্রণম্যোচ্চৈঃ পাদপাংশুঃ প্রগৃহ্যতাং ॥ তত্রৈব দেবদূতবিকুণ্ডলসংবাদে। যে পিবন্তি নরা নিত্যং শালগ্রামশিলাজলং। পঞ্চগব্যসহস্রৈস্তু সেবিতৈঃ কিং প্রয়োজনং ॥ কোটিতীর্থসহস্রৈস্তু সেবিতৈঃ কিং প্রয়োজনং। নিত্যং যদি পিবেৎ পুণ্যং শালগ্রামশিলাজলং ॥ শালগ্রামশিলাতোয়ং যঃ পিবেদ্বিন্দুনা সমং। মাতুঃ স্তন্যং পুনর্নৈব স পিবেন্মুক্তিভাগ্নরঃ ॥ কিঞ্চ।

দহন্তি নরকান্ সর্ব্বান্ গর্ভবাসঞ্চ দারুণং। পীতং যৈস্তু সদা নিত্যং শালগ্রামশিলাজলং॥ তত্রৈব শ্রীযমধূম্রকেতুসংবাদে। শালগ্রামশিলাতোয়ং বিন্দুমাত্রং তু যঃ পিবেৎ। সর্ব্বপাপৈঃ প্রমুচ্যেত মুক্তিমার্গে কৃতোদ্যমঃ॥ তত্রৈব পুলস্ত্যভগীরথসংবাদে। পাদোদকস্য মাহাত্ম্যং ভগীরথ দদামি তে। পাবনং সর্ব্বতীর্থেভ্যো হত্যাকোটিবিনাশনং॥ ধৃতে শিরসি পীতে চ সর্ব্বাস্তুষ্যন্তি দেবতাঃ। প্রায়শ্চিত্তন্তু পাপানাং কলৌ পাদোদকং হরেঃ॥ কিঞ্চ। ত্রিভিঃ সারস্বতং তোয়ং সপ্তাহেন তু নার্মদং। সদ্যঃ পুনাতি গাঙ্গেয়ং দর্শনাদেব যামুনং॥ পুনন্ত্যেতানি তোয়ানি স্নানদর্শনকীর্ত্তনৈঃ। পুনাতি স্মরণাদেব কলৌ পাদোদকং হরেঃ॥ অর্চ্চিতৈঃ কোটিভির্লিঙ্গৈর্নিত্যং যৎ ক্রিয়তে ফলং। তৎ ফলং শতসাহস্রং পীতৈঃ পাদোদকৈর্হরেঃ॥ অশুচির্বা দুরাচারো মহাপাতকসংযুতঃ। স্পৃষ্ট্বা পাদোদকং বিষ্ণোঃ সদা শুদ্ধ্যতি মানবঃ॥ পাপকোটিযুতো যস্তু মৃত্যুকালে শিরে মুখে। দেহে পাদোদকং যস্য ন প্রয়াতি যমালয়ং॥ ন দানং ন হবির্যেষাং স্বাধ্যায়ো ন সুরার্চ্চনং। তেঽপি পাদোদকং পীত্বা প্রয়ান্তি পরমাং গতিং॥ বিশাখাঋক্ষসংযুক্তা বৈশাখী কিং করিষ্যতি। পিণ্ডারকে মহাতীর্থে উজ্জয়িন্যাং ভগীরথ॥ মাঘমাসে প্রয়াগে তু স্নানং বৈ কিং করিষ্যতি। প্রয়াগং সততং তস্য যস্য পাদোদকং হরেঃ॥ কার্ত্তিকে কার্ত্তিকীযোগে কিং করিষ্যতি পুষ্করে। নিত্যন্তু পুষ্করং তস্য যস্য পাদোদকং হরেঃ॥ প্রবোধবাসরে প্রাপ্তে মথুরায়াঞ্চ তস্য কিং। নিত্যঞ্চ যামুনং স্নানং যস্য পাদোদকং হরেঃ॥ কাশ্যামুত্তরবাহিন্যাং গঙ্গায়াস্তু মৃতস্য কিং। যস্য পাদোদকং বিষ্ণোর্মুখে চৈবাবতিষ্ঠতে॥ কিঞ্চ। হিত্বা পাদোদকং বিষ্ণোর্যোঽন্যতীর্থানি গচ্ছতি। অনর্ঘ্যরত্নমুৎসৃজ্য লোষ্ট্রং বাঞ্ছতি দুর্ম্মতিঃ॥ কুরুক্ষেত্রসমো দেশো বিন্দুপাদোদকং মতঃ। পতেদ্যত্রাক্ষয়ং পুণ্যং নিত্যং ভবতি তদ্গৃহে॥ গয়াপিণ্ডসমং পুণ্যং পুত্রাণামপি জায়তে। পাদোদকেন দেবস্য যে কুর্য্যুঃ পিতৃতর্পণং॥ নাসুরাণাং ভয়ং তস্য প্রেতজন্তুং ন রাক্ষসং। ন রোগস্য ভয়ং চৈব নাস্তি বিঘ্নকৃতং ভয়ং॥ ন দুষ্টা নৈব ঘোরাক্ষাশ্চাপদোত্থভয়ং নহি। গ্রহাঃ পীড়াং ন কুর্ব্বন্তি বৈরা নশ্যন্তি দারুণাঃ॥ কিং তস্য তীর্থগমনে দেবর্ষীণাঞ্চ দর্শনে। যস্য পাদোদকং মূর্দ্ধ্নি শালগ্রামশিলোদ্ভবং॥ প্রীতো ভবতি মার্ত্তণ্ডঃ প্রীতো ভবতি কেশবঃ। ব্রহ্মা ভবতি সুপ্রীতঃ প্রীতো ভবতি শঙ্করঃ॥ পাদোদকস্য মাহাত্ম্যং যঃ পঠেৎ কেশবাগ্রতঃ। স যাতি পরমং স্থানং যত্র দেবো জনার্দ্দনঃ॥ ব্রহ্মাণ্ডপুরাণে শ্রীব্রহ্মনারদসম্বাদে। প্রায়শ্চিত্তং যদি প্রাপ্তং কৃচ্ছ্রং বা ত্বঘমর্ষণং। সোঽপি পাদোদকং পীত্বা শুদ্ধিং প্রাপ্নোতি তৎক্ষণাৎ॥ অশৌচং নৈব

বিদ্যেত সূতকে মৃতকেঽপি চ। যেষাং পাদোদকং মূর্দ্ধ্নি প্রাশনং যে প্রকুর্ব্বতে ॥ অন্তকালেঽপি যস্যেহ দীয়তে পাদয়োর্জলং। সোঽপি সদ্গতিমাপ্নোতি সদাচারৈর্ব্বহিষ্কৃতঃ ॥ অপেয়ং পিবতে যস্তু ভুঙ্‌ক্তে যশ্চাপ্যভোজনং। অগম্যাগমনা যে বৈ পাপাচারাশ্চ যে নরাঃ। তেঽপি পূজ্যা ভবন্ত্যাশু সদ্যঃ পাদাম্বুসেবনাৎ॥ কিঞ্চ। অপবিত্রং যদন্নং স্যাৎ পানীয়ং চাপি পাপিনাং। ভুক্ত্বা পীত্বা বিশুদ্ধঃ স্যাৎ পীত্বা পাদোদকং হরেঃ॥ তপ্তকৃচ্ছ্রাৎ পঞ্চগব্যাৎ মহাকৃচ্ছ্রাদ্বিশিষ্যতে। চান্দ্রায়ণাৎ পাদকৃচ্ছ্রাৎ পরাকাদপি সুব্রত। কায়শুদ্ধির্ভবেদাশু পীত্বা পাদোদকং হরেঃ॥ অগুরুং কুঙ্কুমং চাপি কর্পূরং চানুলেপনং। বিষ্ণুপাদাম্বুসংলগ্নং তদ্বৈ পাবনপাবনং॥ দৃষ্টিপূতন্তু যত্তোয়ং বিষ্ণুনা প্রভবিষ্ণুনা। তদ্বৈ পাপহরং পুত্র কিং পুনঃ পাদয়োর্জলং॥ এতদর্থমহং পুত্র শিরসা বিষ্ণুতৎপরঃ। ধারয়ামি পিবাম্যদ্য মাহাত্ম্যং বিদিতং মম॥ প্রিয়স্ত্বমগ্রজঃ পুত্র ত্বদর্থং গদিতং ময়া। রহস্যং মে ত্বনর্হস্য ন বক্তব্যং কদাচন॥ ধারয়স্ব সদা মূর্দ্ধ্নি প্রাশনং কুরু নিত্যশঃ। জন্মমৃত্যুজরাদুঃখৈর্ম্মোক্ষং যাস্যসি পুত্রক॥ বিষ্ণুধর্ম্মোত্তরে। সদ্যঃ ফলপ্রদং পুণ্যং সর্ব্বপাপবিনাশনং। সর্ব্বমঙ্গলমঙ্গল্যং সর্ব্বদুঃখবিনাশনং। দুঃস্বপ্ননাশনং পুণ্যং বিষ্ণুপাদোদকং শুভং ॥ সর্ব্বোপদ্রবহন্তারং সর্ব্বব্যাধিবিনাশনং। সর্ব্বোৎপাতপ্রশমনং সর্ব্বতাপনিবারণং॥ সর্ব্বকল্যাণসুখদং সর্ব্বকামফলপ্রদং। সর্ব্বসিদ্ধিপ্রদং ধন্যং সর্ব্বধর্ম্মবিবর্দ্ধনং॥ সর্ব্বশত্রুপ্রশমনং সর্ব্বভোগপ্রদায়কং। সর্ব্বতীর্থস্য ফলদং মূর্দ্ধ্নি পাদাম্বুধারণং॥ প্রয়াগস্য প্রভাসস্য পুষ্করস্য চ সেবনে। পৃথূদকস্য তীর্থস্য আচান্তো লভতে ফলং। চক্রতীর্থে ফলং যাদৃক্ তাদৃক্ পাদাম্বুধারণাৎ॥ সরস্বত্যাং গয়ায়াঞ্চ গত্বা নৎ প্রাপ্নুয়াৎ ফলং। তৎ ফলং লভতে শ্রেষ্ঠং মূর্দ্ধ্নি পাদাম্বুধারণাৎ॥ স্কান্দে। পাদোদকস্য মাহাত্ম্যং দেবো জানাতি শঙ্করঃ। বিষ্ণুপাদচ্যুতা গঙ্গা শিরসা যেন ধারিতা॥ স্থানং নৈবাস্তি পাপস্য দেহিনাং দেহমধ্যতঃ। সবাহ্যাভ্যন্তরং যস্য ব্যাপ্তং পাদোদকেন বৈ॥ পাদোদং বিষ্ণুনৈবেদ্যমুদরে যস্য তিষ্ঠতি। নাশ্রয়ং লভতে পাপং স্বয়মেব বিনশ্যতি॥ মহাপাপগ্রহগ্রস্তো ব্যাপ্তো রোগশতৈরপি। হরেঃ পাদোদকং পীত্বা মুচ্যতে নাত্র সংশয়ঃ॥ শিরসা তিষ্ঠতে যেষাং নিত্যং পাদোদকং হরেঃ। কিং করিষ্যন্তি তে লোকে তীর্থকোটিমনোরথৈঃ॥ অয়মেব পরো ধর্ম্ম ইদমেব পরন্তপঃ। ইদমেব পরং তীর্থং বিষ্ণুপাদাম্বু যৎ পিবেৎ ॥ তত্রৈব শিবোমাসম্বাদে। বিলয়ং যান্তি পাপানি পীতে পাদোদকে হরেঃ। কিং পুনর্বিষ্ণুপাদোদং শালগ্রামশিলাপ্লুতং॥ বিশেষেণ হরেৎ পাপং ব্রহ্মহত্যাদিকং প্রিয়ে॥ পীতে পাদোদকে বিষ্ণোর্যদি প্রাণৈর্বিমুচ্যতে।

হত্বা যমভটান্ সর্ব্বান্ বৈষ্ণবং লোকমাপ্নুয়াৎ ॥ তত্রৈব শিবকার্ত্তিকেয়সম্বাদে শালগ্রামশিলামাহাত্ম্যে। ছিন্নস্তেন মহাসেন গর্ভবাসঃ সুদারুণঃ। পীতং যেন সদা বিষ্ণোঃ শালগ্রামশিলাজলং ॥ যে পিবন্তি নরা নিত্যং শালগ্রামশিলাজলং। পঞ্চগব্যসহস্রৈস্তু প্রাশিতৈঃ কিং প্রয়োজনং ॥ প্রায়শ্চিত্তে সমুৎপন্নে কিং দানৈঃ কিমুপোষণৈঃ। চান্দ্রায়ণৈশ্চ তীর্থৈশ্চ পীত্বা পাদোদকং শুচিঃ ॥ বৃহন্নারদীয়ে লুব্ধকোপাখ্যানারম্ভে। হরিপাদোদকং যস্তু ক্ষণমাত্রঞ্চ ধারয়েৎ। স স্নাতঃ সর্ব্বতীর্থেষু বিষ্ণোঃ প্রিয়তরস্তথা ॥ অকালমৃত্যুশমনং সর্ব্বব্যাধিবিনাশনং। সর্ব্বদুঃখোপশমনং হরিপাদোদকং শুভং ॥ তত্রৈব তদুপাখ্যানান্তে। হরিপাদোদকস্পর্শাল্লুব্ধকো বীতকল্মষঃ। দিব্যং বিমানমারুহ্য মুনিমেনমথাব্রবীৎ ॥ হরিপাদোদকং যস্মান্ময়ি ত্বং ক্ষিপ্তবান্ মুনে। প্রাপিতোঽস্মি ত্বয়া তস্মাৎ তদ্বিষ্ণোঃ পরমং পদং ॥ হরিভক্তিসুধোদয়ে। পাদং পূর্ব্বং কিল স্পৃষ্ট্বা গঙ্গাভূৎ স্বর্গমোক্ষদা। বিষ্ণোঃ সদ্যস্তু তৎসঙ্গি পাদাম্বু কথনীড্যতে ॥ তাপত্রয়ানলো যোঽসৌ ন শাম্যেৎ সকলাব্ধিভিঃ। দ্রুতং শাম্যতি সোঽল্পেন শ্রীমদ্বিষ্ণুপদাম্বুনা ॥ অঘাস্ত্রাভেদ্যকবচং ভবাগ্নিস্তম্ভনৌষধং। সর্ব্বাঙ্গৈঃ সর্ব্বথা ধার্য্যং পাদ্যং শুচিসদঃ সদা ॥ অমৃতত্বাবহং নিত্যং বিষ্ণুপাদাম্বু যঃ পিবেৎ। স পিবত্যমৃতং নিত্যং মাসে মাসে তু দেবতাঃ ॥ মাহাত্ম্যমিয়দিত্যস্য যো বক্তা সোঽপি নির্ভয়ঃ। ন ত্বনর্ঘ্যমণের্মূল্যং কলয়ন্নঘমশ্নুতে ॥ অন্যত্রাপি। স ব্রহ্মচারী স ব্রতী আশ্রমী চ সদা শুচিঃ। বিষ্ণুপাদোদকং যস্য মুখে শিরসি বিগ্রহে ॥ জন্মপ্রভৃতিপাপানাং প্রায়শ্চিত্তং যদীচ্ছতি। শালগ্রামশিলাবারি পাপহারি নিষেব্যতাং ॥ অতএব তেজোদ্রবিণপঞ্চরাত্রে শ্রীব্রহ্মোক্তং। পীঠপ্রণালাদুদকং পৃথগাদায় পুত্রক। সিঞ্চয়েন্মূর্দ্ধ্নি ভক্তানাং সর্ব্বতীর্থময়ং হি তদিতি ॥ পাদোদকস্য মাহাত্ম্যং বিখ্যাতং সর্ব্বশাস্ত্রতঃ। লেখিতুং শক্নুয়াৎ কো হি সিন্ধূর্ম্মীন্ গণয়ন্নপি ॥ বিশেষতশ্চ পাদোদং তুলসীদলসংযুতং। শঙ্খে কৃত্বা বৈষ্ণবেভ্যো দত্ত্বা প্রাগ্বৎ পিবেৎ স্বয়ং ॥ অথ শঙ্খকৃতপাদোদকমাহাত্ম্যং স্কান্দে ব্রহ্মনারদসম্বাদে। কৃত্বা পাদোদকং শঙ্খে বৈষ্ণবানাং মহাত্মনাং। যো দদ্যাত্তুলসীমিশ্রং চান্দ্রায়ণশতং লভেৎ ॥ গৃহীত্বা কৃষ্ণপাদাম্বু শঙ্খে কৃত্বা তু বৈষ্ণবঃ। যো বহেৎ শিরসা নিত্যং স মুনিস্তাপসোত্তমঃ ॥ পাদ্মে দেবদূতবিকুণ্ডলসম্বাদে। শালগ্রামশিলাতোয়ং যদি শঙ্খভৃতং পিবেৎ। হত্যাকোটিবিনাশং তু কুরুতে নাত্র সংশয়ঃ ॥ অগস্ত্যসংহিতায়াঞ্চ। শালগ্রামশিলাতোয়ং তুলসীদলবাসিতং। যে পিবন্তি পুনস্তেষাং স্তন্যপানং ন বিদ্যতে ॥ শ্রীবিষ্ণোর্বৈষ্ণবানাঞ্চ পাবনঞ্চরণোদকং। সর্ব্বতীর্থময়ং পীত্বা কুর্য্যাদাচমনং নহি ॥ তদুক্তং স্কান্দে

শ্রীশিবেন। বিষ্ণোঃ পাদোদকং পীত্বা পশ্চাদশুচিশঙ্কয়া। আচামতি চ যো মোহাদ্‌ ব্রহ্মহা স নিগদ্যতে ॥ শ্রুতিশ্চ। ভগবান্‌ পবিত্রং ভগবৎপাদৌ পবিত্রং ভগবৎ-পাদোদকং পবিত্রং ন তৎপান আচ-মনীয়ং যথা হি সোম ইতি। সৌপর্ণে চ। বিষ্ণুপাদোদকং পীত্বা ভক্তপাদোদকং তথা। য আচামতি সংমোহাৎ ব্রহ্মহা স নিগদ্যতে ॥ ইতি শ্রীহরিভক্তিবিলাসঃ ॥

পাদ্যং (ক্লী) পাদায় বারি। পাদপ্রক্ষালনার্থ-জলং। ইত্যমরঃ ॥ তৎপাত্রলক্ষণং যথা। পাদাবনেজনজলগ্রহণং পাত্রমদ্ভুতং। লৌহজং বা সরোজাতং হৈমং রাজত-মেব বা ॥ তাম্রমচরণর্মাপি বায়বেনং সতা-মিতি। ইতি বৈখানসগ্রন্থঃ ॥ ষড়ঙ্গুলং প্রবিস্তারমুৎসেধঞ্চতুরঙ্গুলং। ওষ্ঠমেকা-ঙ্গুলং কুর্য্যান্নাসিকাং চতুরঙ্গুলাং ॥ পৃষ্ঠে পাদসমাযুক্তং চতুরঙ্গুলমানতঃ। পাদ্য-পাত্রমিতি খ্যাতং সর্ব্বদেবপ্রপূজনে ॥ ইতি সিদ্ধান্তশেখরঃ ॥

পানং (ক্লী) পীতিঃ। দ্রবদ্রব্যস্য গলাধঃ-করণং। ভাজনং। রক্ষণং। ইতি মেদিনী ॥

পানঃ (পুং) শৌণ্ডিকঃ। ইতি জটাধরঃ ॥ নিঃশ্বাসঃ। ইতি হেমচন্দ্রঃ ॥

পানকং (ক্লী) পানদ্রব্যবিশেষঃ। তৎপ্রকারো যথা। যথোক্তপরিমিতশর্করানিম্বুরস-যুক্তোঽথবাম্লাম্লযুক্তঃ পক্করসঃ। ইতি পাকরাজেশ্বরঃ ॥

পানগোষ্ঠিকা (স্ত্রী) যত্র সম্ভূয় পীয়তে। মদ্যপানচক্রং। তৎপর্য্যায়ঃ। আপানং ২। ইত্যমরঃ ॥ * ॥ চক্রানুষ্ঠানং যথা শ্যামা-রহস্যধৃতং। চক্রাকারেণ পংক্ত্যাকারেণ বা ভিন্নভিন্নাসনে স্বশক্তিযুক্তশ্চেৎ যুগ্ম-যুগ্মক্রমেণ পদ্মাসনেনোপবিশ্য সাময়িক-ললাটে চন্দনং দত্বা শিবশক্তিবুদ্ধ্যা পুষ্পঞ্চ দদ্যাৎ। ততো যদি গুরুস্তত্র তিষ্ঠতি তদাদৌ গন্ধাদিনা তং পূজয়িত্বা তৎপাত্রে পুষ্পং দত্বা শুদ্ধিসহিতং তস্মৈ সমর্প্য প্রণমেৎ। গুরোরভাবে তৎ পাত্রং জলে ক্ষিপেৎ। ততঃ শক্তিপাত্রং শুদ্ধিসহিতং শক্তৈ্য দত্বা সাময়িকেভ্যোঽপি জ্যেষ্ঠানু-ক্রমেণ বীরপাত্রাৎ পরামৃতং শুদ্ধিসহিতং দদ্যাৎ। ততঃ সাময়িকোঽপি ভক্ত্যা হস্তদ্বয়েন সংগৃহ্য তদুপরি মূলমন্ত্রমষ্টধা জপ্ত্বা পূর্ব্ববদানন্দভৈরবং ভৈরবীঞ্চ সন্তর্প্য গুরূন্‌ দেবতাঞ্চ সন্তর্পয়েৎ। স্বস্বকল্পোক্ত-বিধিনা ভূতশুদ্ধিং কুর্য্যাৎ। ততশ্চক্র-নায়কস্তৈঃ সহ পাত্রবন্দনং কুর্য্যাদ্যথা। শ্রীমদ্ভৈরবশেখরপ্রবিলসচ্চন্দ্রামৃতপ্লাবিতং ক্ষেত্রাধীশ্বরযোগিনীসুরগণৈঃ সিদ্ধৈঃ সমা-রাধিতং। আনন্দার্ণবকং মহাত্মকমিদং সাক্ষাত্রিখণ্ডামৃতং বন্দে শ্রীপ্রথমং করা-ম্বুজগতং পাত্রং বিশুদ্ধিপ্রদং ॥ ইত্যভি-মন্ত্র্য বামহস্তেন পাত্রমুত্তোল্য অন্যোন্য-বন্দনং কৃত্বা গৃহ্লামীতি গুরুশক্তিসাধকে-শ্বরাণামাজ্ঞাং গৃহ্লীয়াৎ। তে জুষস্বেতি ব্রূয়ুঃ। ততো মূলাধারাৎ কুণ্ডলিনীং ইষ্ট-দেবতাস্বরূপাং আজিহ্বান্তাং বিভাব্য গুরুপাদুকাং স্মৃত্বা শিবোঽহমিতি বিচিন্ত্য

হস্তাভ্যাং পাত্রং ধৃত্বা মূলমুচ্চরন্ কুণ্ডলিনীমুখে দেবীং তর্পয়েৎ। এতদুক্তমুদয়াকরপদ্ধত্যাং। কৃত্বা মন্ত্রতনুং স্মরেৎ গুরুপদং দেবীং বলাং চিন্ময়ীং পশ্চাৎ বারত্রয়ং মদাসবব্রতং দীপৈর্যুতং কজ্জলৈঃ। পুষ্পাদিম্বভিমন্ত্রিতঞ্চ নিবিড়ং সম্মোহকধ্বংসকং যে সঞ্চিন্ত্য পিবন্তি যান্তি খলু তে ভুক্তিঞ্চ মুক্তিং পরাং॥ তন্ত্রান্তরে চ। সিন্দূরতিলকং ভালে পাণৌ চ মদিরাসবং। কৃত্বা পিবেদ্‌গুরুং ধ্যায়ংস্তথা দেবীঞ্চ চিন্ময়ীং॥ ততঃ পাত্রমাধারোপরি সংস্থাপ্য পুনস্তেন ক্রমেণ পরামৃতং গৃহীত্বা পাত্রবন্দনং কুর্য্যাৎ। যথা। মদ্যং মীনরসাবহং যদি তয়া দত্তঞ্চ পেয়াদিভিঃ কিঞ্চিচ্চঞ্চলরক্তপঙ্কজদৃশা তস্যৈ সমাবেদিতং। বামে স্বাত্মবিশুদ্ধিশুদ্ধিকমলং পাণৌ বিধায়াত্মকে বন্দে পাত্রমহং দ্বিতীয়মধুনানন্দৈকসম্বর্দ্ধনং॥ ততঃ পূর্ব্ববৎ পাত্রং স্বীকৃত্য অন্যৎপাত্রবন্দনং কুর্য্যাৎ। যথা। সর্ব্বাম্নায়কলাকলাপকলিতং কৌতূহলদ্যোতনং চন্দ্রোপেন্দ্রমহেন্দ্রশম্ভুবরুণব্রহ্মাদিভিঃ সেবিতং। ধ্যাতং দেবগণৈঃ পরং মুনিগণৈর্ম্মোক্ষার্থিভিঃ সর্ব্বদা বন্দে পাত্রমহং তৃতীয়মধুনা চাত্মাববোধক্ষমং॥ তৃতীয়পাত্রাভিবন্দনং কৃত্বান্যৎপাত্রবন্দনং কুর্য্যাৎ। যথা। হৈমং মীনরসাবহং হরিহরব্রহ্মাদিভিঃ সেবিতং মুদ্রামৈথুনধর্ম্মকর্ম্মনিরতং ক্ষারাম্লতিক্তাশ্রয়ং। আচার্য্যাষ্টকসিদ্ধিভৈরবকলামাংসেন সংশোধিতং পায়াৎ পঞ্চমকারতত্ত্বসহিতং পাত্রং চতুর্থং নমঃ॥ ইতি চতুর্থপাত্রবন্দনং কৃত্বান্যৎপাত্রবন্দনং কুর্য্যাদ্যথা। আধারে ভুজগাধিরাজবলয়ে পাত্রং মহীমণ্ডলং মদ্যং সপ্তসমুদ্রবারি পিশিতং চাষ্টৌ চ দিগ্‌দন্তিনঃ। সোঽহঙ্কৈব বিভাবয়ন্ প্রতিদিনং তারাগণৈ রক্ষিতোঽপ্যাদিত্যপ্রমুখৈঃ সুরাসুরগণৈরাজ্ঞাকরৈঃ কিঙ্করৈঃ॥ ইতি পঞ্চমপাত্রং স্বীকুর্য্যাৎ। ততো যাবদ্দৃষ্ট্যাদিকং ন চলতি তাবৎ পানাদিকং কার্য্যং। অথাস্য প্রমাণং যথা রুদ্রযামলে। সাধকেভ্যশ্চ শক্তিভ্যো দদ্যান্নির্ম্মাল্যচন্দনং। সাময়িকৈঃ সমং কুর্য্যাদ্দেবি পানাদিভক্ষণং॥ অন্যত্রাপি। নিবিশেচ্চক্ররূপেণ পংক্ত্যাকারেণ বা যথা। শক্তিযুক্তো বসেদ্বাপি যুগ্মযুগ্মবিধানতঃ। শিবশক্তিধিয়া সর্ব্বং চক্রমধ্যে সমর্পয়েৎ॥ তন্ত্রান্তরে চ। ততঃ পুষ্পং সমাদায় গুরোঃ পাত্রে নিবেদয়েৎ। গুরবে চ নিবেদ্যাথ শক্ত্যৈ দত্ত্বা স্বয়ং হরেৎ॥ ভাবচূড়ামণৌ চ। সাক্ষাদ্‌যদি গুরুর্ন স্যাত্তদা তোয়ে বিসর্জ্জয়েৎ। এতৎ সর্ব্বং কলীতরপরং। দিব্যবীরময়ো ভাবঃ কলৌ নাস্তি কদাচন। ইতি কালীবিলাসবচনাৎ॥

পানপাত্রং (ক্লী) মদ্যপানপাত্রং। মদ্যপানস্য ভাজনং। তৎপর্য্যায়ঃ। চষকঃ ২ সরকঃ ৩ অনুতর্ষণং ৪। ইত্যমরঃ॥ পূর্ব্বদ্বয়ং মদ্যপানপাত্রে শেষদ্বয়ং মদ্যপরিবেশনপাত্রে। ইতি ভরতঃ॥ চষকং ৫ অনুতর্ষঃ ৬ পারী ৭ পারীকং ৮। ইতি শব্দরত্নাবলী॥ *॥ অথ পানপাত্রপরিমাণাদি যথা কুলসারে।

নয়নাগ্নিবাণসংখ্যকর্ষৈস্তু পরমেশ্বরি। হেতুপাত্রং প্রকর্ত্তব্যমিত্যুক্তং কুলসাধনে ॥ ইতোঽপ্যধিকপাত্রস্তু ন কর্ত্তব্যঞ্চ সাধকৈঃ॥ কর্ষং লৌকিকতোলকমিত্যর্থঃ। তদুক্তং কুলোত্তমে। গুঞ্জা দ্বাদশ মাষঃ স্যাত্তদষ্টৌ কর্ষ উচ্যতে। অথোত্তরতন্ত্রে। অনুজ্ঞাং পুরতো লব্ধা গৃহ্লামীতি স্বয়ং বদেৎ। জুষস্বেত্যভ্যনুজ্ঞাতো গুরুণা বা কুলীনকৈঃ॥ গৃহ্লীয়াচ্চ স্বয়ং সিদ্ধো বদ্ধপদ্মাসনঃ সুধীঃ। কুলার্ণবে। একাসনে নিবিষ্টা যে ভুঞ্জীরংশ্চৈব ভাজনে। একপাত্রে পিবেদ্দ্রব্যং তে যান্তি নরকাধমে॥ একপাত্রমিতি সর্ব্বৈর্মিলিত্বা নৈকপাত্রে পিবেৎ। ন তু প্রতিবারং দ্রব্যপানে ভিন্নভিন্নপাত্রং কার্য্যং অননুষ্ঠানলক্ষণাপত্তেঃ সম্প্রদায়বিরোধাচ্চ॥

পানবণিক্ [জ্] (পুং) শৌণ্ডিকঃ। ইতি হেমচন্দ্রঃ॥

পানভাজনং (ক্লী) পানপাত্রং। তৎপর্য্যায়ঃ। কংসঃ ২। ইত্যমরঃ॥ কাম্যতেঽসৌ কংসঃ কমুকৃঙ্স্পৃহি নাম্নীতি সঃ দন্ত্যান্তঃ। স্বার্থে ষ্ণে কাংস্যঞ্চ। স্বর্ণরজতাদিনির্ম্মিতে পাত্রমাত্রেঽপি কংসঃ। কংসঃ স্যাৎ তৈজসে দ্রব্যে পানপাত্রেঽপি কাংস্যবদিতি শাশ্বতঃ॥ পাত্রান্তরে পানপাত্রে কাংস্যং কংসে চ তৈজসে। ইতি রভসঃ॥ পীয়তে পানং মদ্যাদি তস্য ভাজনং পানভাজনং। ইতি ভরতঃ॥

পানসং (ক্লী) পনসভবমদ্যং। ইতি জটাধরঃ॥ পনসসম্বন্ধিনি ত্রি॥

পানাত্যয়ঃ (পুং) মদাত্যয়রোগঃ। ইতি রাজনির্ঘণ্টঃ॥

পানিলং (ক্লী) পানপাত্রং। ইতি শব্দচন্দ্রিকা॥

পানীয়ং (ক্লী) জলং। ইত্যমরঃ॥ পাতব্যে রক্ষণীয়ে চ ত্রি॥ *॥ পানার্হদ্রব্যবিশেষঃ। পানা ইতি বঙ্গভাষা। শরবৎ ইতি পারস্যভাষা। তত্র অম্লিকাপানীয়ং পিত্তবমিনাশকং। মিষ্টদাড়িমীপানীয়ং প্রতিশ্যায়কাশনাশকং। অম্লদাড়িমীপানীয়ং উদরবিকারে ধারকং ক্ষুধাবৃদ্ধিকারকঞ্চ। নিম্বুপানীয়ং ছর্দিহৃল্লাসপিত্তজ্বরনিবারকং সকলাহারপাচকঞ্চ। নাগরঙ্গপানীয়ং কাসপিত্তবিনাশকং অন্তঃকরণপ্রাশস্ত্যজনকঞ্চ। সেবচন্দনপানীয়ং বলকারকং উন্মাদমূর্চ্ছারোগশান্তিকারকং রতিশক্তিবর্দ্ধকং উদরবিকারোপকারকঞ্চ। ইতি পাকরাজেশ্বরঃ॥ জলদানবিধির্যথা। যম উবাচ। এতত্তে কথিতং বিপ্র মম লোকে তু দুর্লভং। পানীয়ং সন্ততন্তস্মাদাতব্যং সুখমিচ্ছতা॥ অতোঽর্দ্ধং কারয়েৎ কূপং বাপীং বা বহুপল্বলং। বহুলোকাকুলে দেশে সর্ব্বসত্ত্বোপজীবিতং॥ ইত্যগ্নিপুরাণং॥ *॥ তদ্দানানন্তরং পাঠ্যমন্ত্রো যথা। পানীয়ং প্রাণিনঃ প্রাণাঃ পানীয়ং পাবনং মহৎ। পানীয়স্য প্রদানেন তৃপ্তির্ভবতি শাশ্বতী॥ ইতি স্মৃতিঃ॥ *॥ তৎপর্য্যায়ঃ। পানীয়জীবনবনামৃতপুষ্করাম্ভঃপাথোঽম্বুশম্বরপয়ঃসলিলোদকানি। আপঃ কবারুণকবন্ধজলানি নীরং কীলালবারিকমলানি বিষার্ণসী চ॥ ভুবনং দহনারাতির্বার্স্তোয়ং

সর্ব্বতোমুখং। ক্ষীরং ঘনরসং নিম্নগং মেঘপ্রসবো রসঃ ॥ * ॥ অস্য সাধারণ-গুণাঃ। পানীয়ং মধুরং হিমঞ্চ রুচিদং তৃষ্ণাবিশোষাপহং মোহভ্রান্তিমপাকরোতি কুরুতে ভুক্তান্নপক্তিং পরাং। নিদ্রালস্যনিরাসনং বিষহরং শ্রান্তার্ত্তি-সন্তর্পণং নৃণাং ধীবলবীর্য্যবৃদ্ধিজননং নষ্টাঙ্গপুষ্টিপ্রদং ॥ * ॥ সদ্যো বৃষ্ট্যম্বু ভূমিস্থং কলুষং দোষদায়কং। চিরস্থিতং লঘু স্বচ্ছং পথ্যং স্বাদু সুখাবহং ॥ * ॥ দেশভূমিবিশেষজলগুণাঃ। জাতং তাম্রমৃদস্তদেব সলিলং বাতাদিদোষপ্রদং দেশাজ্জাড্যকরঞ্চ দুর্জ্জরতরং দোষাবহং ধূসরাৎ। বাতঘ্নঞ্চ শিলাশিরোত্থমমলং পথ্যং লঘু স্বাদুকং শ্রেষ্ঠং শ্যামমৃদস্ত্রিদোষশমনং সর্ব্বাময়ঘ্নং জলং ॥ ইতি রাজনির্ঘণ্টঃ ॥ * ॥ পিচ্ছিলং কৃমিলং ক্লিন্নং পর্ণশৈবালকর্দ্দমৈঃ। বিবর্ণং বিরসং সান্দ্রং দুর্গন্ধি ন হিতং জলং ॥ * ॥ চন্দ্রার্ককরসংজুষ্টং বায়ুনা স্ফালিতং মুহুঃ। পর্ব্বতোপরি যদ্বারি সমং পৌরন্দরেণ তৎ ॥ তস্যানুগুণমুদ্দিষ্টং শৈল-প্রস্রবণোদ্ভবং। লেখনং দীপনং রূক্ষং কিঞ্চিদ্বাতপ্রকোপণং ॥ ইতি রাজবল্লভঃ ॥

পানীয়নকুলঃ (পুং) উদ্রঃ। উদ্বিড়াল ইতি ভাষা। যথা। উদ্রস্তু জলমার্জারঃ পানীয়-নকুলো বসী। ইতি হেমচন্দ্রঃ ॥

পানীয়পৃষ্ঠজঃ (পুং) কুম্ভী। পানা ইতি ভাষা। ইতি রত্নমালা ॥

পানীয়ফলং (ক্লী) মখান্নং। মাখানা ইতি ভাষা। ইতি ভাবপ্রকাশঃ ॥

পানীয়মূলকং (ক্লী) সোমরাজী। ইতি শব্দচন্দ্রিকা ॥

পানীয়বর্ণিকা (স্ত্রী) বালুকা। ইতি রাজনির্ঘণ্টঃ ॥

পানীয়শালিকা (স্ত্রী) জলাবস্থানগৃহং। পানিশালা ইতি জলছত্র ইতি চ ভাষা। তৎপর্য্যায়ঃ। প্রপা ২। ইত্যমরঃ ॥ তৎকর্ত্তৃফলং যথা। কূপারামপ্রপাকারী তথা বৃক্ষাদিরোপকঃ। কন্যাপ্রদঃ সেতুকারী স্বর্গমাপ্নোত্যসংশয়ং ॥ ইত্যুদ্বাহতত্ত্বে যমঃ ॥

পানীয়ামলকং (ক্লী) প্রাচীনামলকং। পানি আমলা ইতি ভাষা। অস্য গুণাঃ। দোষত্রয়জ্বরনাশিত্বং। ইতি ভাবপ্রকাশঃ ॥ মুখশুদ্ধিমলবদ্ধকারিত্বং। অম্লত্বং। স্বাদুত্বঞ্চ। ইতি রাজবল্লভঃ ॥

পানীয়ালুঃ (পুং) কন্দবিশেষঃ। পনিয়ালু ইতি হিন্দীভাষা। তৎপর্য্যায়ঃ। জলালুঃ২ ক্ষুপালুঃ ৩ বালুকঃ ৪। অস্য গুণঃ। ত্রিদোষনাশিত্বং। সন্তর্পণকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

পানীয়াশ্মা (স্ত্রী) বল্বজা। ইতি রাজনির্ঘণ্টঃ ॥

পান্থঃ (ত্রি) পথিকঃ। ইত্যমরঃ ॥

পাপং (ক্লী) অধর্ম্মং। দুরদৃষ্টং। তৎপর্য্যায়ঃ। পঙ্কং ১ পাপ্মা ২ পাপং ৩ কিল্বিষং ৪ কল্মষং ৫ কলুষং ৬ বৃজিনং ৭ এনঃ ৮ অঘং ৯ অংহং ১০ দুরিতং ১১ দুষ্কৃতং ১২। ইত্যমরঃ ॥ পাতকং ১৩

তুস্তং ১৪ কণ্বং ১৫ শল্যং ১৬ পাপকং ১৭। ইতি শব্দরত্নাবলী॥ তদ্দশবিধং যথা। প্রাণাভিপাতনং স্তৈন্যং পরদারমথাপি চ। ত্রীণি পাপানি কায়েন সর্ব্বতঃ পরিবর্জ্জয়েৎ॥ অসৎপ্রলাপং পারুষ্যং পৈশুন্যমনৃতন্তথা। চত্বারি বাচা রাজেন্দ্র ন জল্পেত ন চিন্তয়েৎ॥ অনভিধ্যা পরস্বেষু সর্ব্বসত্ত্বেষু সৌহৃদং। কর্ম্মণাং ফলমস্তীতি ত্রিবিধং মনসা চরেৎ॥ ইতি শান্তিপর্ব্বণি দানধর্ম্মঃ॥ স্মৃত্যুক্তান্যেতানি পাতকশব্দে লিখিতানি॥ *॥ পাপস্য পুরুষত্রয়ানুবর্ত্তিত্বং যথা। নাধর্ম্মশ্চরিতো রাজন্ সদ্যঃ ফলতি গৌরিব। শনৈরাবর্ত্তমানস্তু মূলান্যপি নিকৃন্ততি॥ যদি নাত্মনি মিত্রেষু ন চেৎ পুত্রেষু নপ্তৃষু। পাপমাচরিতং কর্ম্ম ত্রিবর্গমনুবর্ত্ততে॥ ফলত্যেবং ধ্রুবং পাপং গুরুভুক্তমিবোদরে। ইতি মাৎস্যে ২৮ অধ্যায়ঃ॥ *॥ তীর্থস্য পাপনাশকত্বং তত্র কৃতপাপস্য বজ্রলেপত্বঞ্চ। যথা। অন্যত্র হি কৃতং পাপং তীর্থমাসাদ্য গচ্ছতি। তীর্থে তু যৎ কৃতং পাপং বজ্রলেপো ভবিষ্যতি॥ মথুরায়াং কৃতং পাপং তত্রৈব চ বিনশ্যতি। এষা পুরী মহাপুণ্যা যস্যাং পাপং ন বিদ্যতে॥ ইতি বারাহে মথুরামাহাত্ম্যং॥ *॥ শেষপাপলক্ষণং যথা। অতঃ পরং প্রবক্ষ্যামি শেষপাপস্য লক্ষণং। ঋণং দেবর্ষিভূতানাং মনুষ্যাণাং বিশেষতঃ॥ পিতৃণাঞ্চ দ্বিজশ্রেষ্ঠ সর্ব্ববর্ণেষু চৈকতঃ। ওঁকারাদিনিবৃত্তিশ্চ পাপকার্য্যকৃতিশ্চ যা॥ হত্যাদিকং মহাপাপং ত্বগম্যাগমনং তথা। ঘৃতাদিবিক্রয়ং ঘোরং চাণ্ডালাদিপ্রতিগ্রহং॥ স্বদোষগোপনং পাপং পরদোষপ্রকাশনং। ঈর্ষাবিদ্ধং বাক্যদুষ্টং নিষ্ঠুরত্বং ষড়ম্বরং॥ ঢাকিত্বং তালবাদিত্বং নাম্না বাচাপ্যধর্ম্মজঃ। মারণত্বমধার্ম্মিক্যং নরকাবহমুচ্যতে॥ এতৈঃ পাপৈস্তু সংযুক্তঃ পচ্যতে যদি শঙ্করঃ। ইতি বামনে ৫৮ অধ্যায়ঃ॥ *॥ সাঙ্কর্য্যনামকপাপানি যথা। একশয্যাশনং পংক্তির্ভাণ্ডপক্বান্নমিশ্রণং। যাজনাধ্যাপনে যোনিস্তথৈব সহভোজনং॥ সহাধ্যায়স্তু দশমঃ সহযাজনমেব চ। একাদশ সমুদ্দিষ্টা দোষাঃ সাঙ্কর্য্যসংজ্ঞিতাঃ॥ সমীপে চাপ্যবস্থানাৎ পাপং সংক্রমতে নৃণাং। তস্মাৎ সর্ব্বপ্রযত্নেন সাঙ্কর্য্যং পরিবর্জ্জয়েৎ॥ ইতি কৌর্ম্মে উপবিভাগে ১৫ অধ্যায়ঃ॥*॥ আলাপাদ্গাত্রসংস্পর্শাৎ সংবাসাৎ সহভোজনাৎ। আসনাচ্ছয়নাদ্যানাৎ পাপং সংক্রমতে নৃণাং॥ আসনাদেকশয্যায়া ভোজনাৎ পংক্তিসঙ্করাৎ। ততঃ সংক্রমতে পাপং ঘটাদ্ঘট ইবোদকং॥ ইতি গারুড়ে নীতিসারে ১১২ অধ্যায়ঃ॥ *॥ রাষ্ট্রাদিকৃতপাপেন রাজাদীনাং পরস্পরং পাপিত্বং যথা। রাজা রাষ্ট্রকৃতাৎ পাপাৎ পাপী ভবতি বৈ হরে। তথৈব রাজ্ঞঃ পাপেন তদ্রাজ্যস্থাস্তু যে জনাঃ॥ বর্ণাশ্রমাদয়ঃ সর্ব্বে পাপিনো নাত্র সংশয়ঃ। ভার্য্যাংহোদুষ্কৃতী স্বামী বৃজিনাৎ স্বামিনো-

হবলা॥ তথা দেশিকপাপাত্তু শিষ্যঃ স্যাৎ পাতকী সদা। শিষ্যাদ্ধি পাপিনো নিত্যং গুরুর্ভবতি দুষ্কৃতী॥ পাতকী যজমানঃ স্যাৎ পাপিনোঽঙ্গ পুরোধসঃ। পুরোহিতস্তথা পাপী যজমানাংহসো ধ্রুবং॥*॥ অদত্তপুণ্যপাপভাগিত্বং যথা। অদত্তানি চ পুণ্যানি পাপানি চ যথা প্রিয়ে। প্রাপ্যাণি কর্ম্মণা যেন তদ্‌যথাবন্নিশাময়॥ দেশগ্রামকুলানি স্যুর্ভাগভাঞ্জিকৃতাদিষু। কলৌ তু কেবলং কর্ত্তা ফলভুক্ পুণ্যপাপয়োঃ॥ অকৃতেঽপি চ সংসর্গে ব্যবস্থেয়মুদাহৃতা। সংসর্গাৎ পুণ্যপাপানি যথা যান্তি নিবোধ তৎ॥ একত্র মৈথুনাদ্‌যানাদেকপাত্রস্থভোজনাৎ। ফলার্দ্ধং প্রাপ্নুয়ান্মর্ত্ত্যো যথাবৎ পুণ্যপাপয়োঃ॥ স্পর্শনাদ্ভাষণাদ্বাপি পরস্য স্তবনাদপি। দশাংশং পুণ্যপাপানাং নিত্যং প্রাপ্নোতি মানবঃ॥ দর্শনশ্রবণাভ্যাঞ্চ মনোধ্যানাত্তথৈব চ। পরস্য পুণ্যপাপানাং শতাংশং প্রাপ্নুয়ান্নরঃ॥ পরস্য নিন্দাপৈশুন্যং ধিক্কারঞ্চ করোতি যঃ। তৎকৃতং পাতকং প্রাপ্য স্বপুণ্যং প্রদদাতি সঃ॥ কুর্ব্বতঃ পুণ্যকর্ম্মাণি সেবাং যঃ কুরুতে পরঃ। পত্নী ভৃত্যোঽথ শিষ্যো বা সজাতীয়োঽপি মানবঃ। তস্য সেবানুরূপেণ তস্য তৎপুণ্যভাগ্‌ভবেৎ॥ একপংক্তেস্ততো যস্তু লঙ্ঘয়ন্ পরিবেশয়েৎ। তস্য পাপশতাংশস্তু লভতে পরিবেশকঃ॥ স্নানসন্ধ্যাদিকং কুর্ব্বন্ সংস্পৃশেদ্বা প্রভাষতে। স পুণ্যকর্ম্মষষ্ঠাংশং দদ্যাত্তস্মৈ সুনিশ্চিতং॥ ধর্ম্মোদ্দেশেন যো দ্রব্যং পরং যাচয়তে নরঃ। তৎপুণ্যং কর্ম্মজং তস্য ধনং দত্ত্বাপ্নুয়াৎ ফলং॥ অপহৃত্য পরদ্রব্যং পুণ্যকর্ম্ম করোতি যঃ। কর্ম্মকৃৎ পাপভোক্তাত্র ধনিনস্তস্তবেৎ ফলং॥ নাপনুদ্য ঋণং যস্তু পরস্য ম্রিয়তে নরঃ। ধনী তৎ পুণ্যমাপ্নোতি স্বধনস্যানুরূপতঃ॥ বুদ্ধিদস্ত্বনুমন্তা চ যশ্চোপকরণপ্রদঃ। বলকৃচ্চাপি ষষ্ঠাংশং প্রাপ্নুয়াৎ পুণ্যপাপয়োঃ॥ প্রজাভ্যঃ পুণ্যপাপানাং রাজা ষষ্ঠাংশমুদ্ধরেৎ। শিষ্যাদ্‌গুরুঃ স্ত্রিয়া ভর্ত্তা পিতা পুত্রাত্তথৈব চ। স্বপতেরপি পুণ্যস্য ভার্য্যার্দ্ধং সমবাপ্নুয়াৎ॥ পরহস্তেন দানাদি কুর্ব্বতঃ পুণ্যকর্ম্মণঃ। বিনা ভৃতকশিষ্যাভ্যাং কর্ত্তা ষষ্ঠাংশমাহরেৎ॥ বৃত্তিদো বৃত্তিসংভোক্তুঃ পুণ্যং ষষ্ঠাংশমাহরেৎ। আত্মনো বা পরস্যাপি যদি সেবাং ন কারয়েৎ॥ শ্রীকৃষ্ণ উবাচ। ইত্থং হ্যদত্তান্যপি পুণ্যপাপান্যায়ান্তি নিত্যং পরসঞ্চিতানি। শৃণুষ্ব চাস্মিন্নিতিহাসমগ্র্যং পুরাভবং পুণ্যমতিপ্রিয়ঞ্চ॥ ইতি পাদ্মোত্তরখণ্ডে ৭১।১৫৭ অধ্যায়ঃ॥*॥ ক্ষুদ্রজন্তুপ্রভৃতীনাং বধে পাপং তৎপ্রায়শ্চিত্তঞ্চ যথা। বধে চ ক্ষুদ্রজন্তূনাং হিংসকানাঞ্চ পণ্ডিতঃ। কার্ষাপণং সমুৎসৃজ্য মৃত্যুকালে প্রমুচ্যতে॥ অহিংসকানাং ক্ষুদ্রাণাং বধে শতগুণং ধ্রুবং। প্রায়শ্চিত্তং মৃত্যুকালে কথিতং পদ্মযোনিনা॥ বধে বিশিষ্টজন্তূনাং পশ্বাদীনাঞ্চ কামতঃ। ততঃ শতগুণং পাপং নিশ্চিতং মনুরব্রবীৎ॥ নরাণাং

ম্লেচ্ছজাতীনাং বধে শতগুণং ততঃ ॥ ম্লেচ্ছানাঞ্চ শতানাঞ্চ যৎ পাপং লভতে বধে। সচ্ছূদ্রৈকস্য চ বধে তৎ পাপং লভতে পুমান্ ॥ সচ্ছূদ্রাণাং শতানাঞ্চ যৎ পাপং লভতে বধে। তৎ পাপং লভতে নূনং গোবধেনৈব নিশ্চিতং ॥ গবাং দশগুণং পাপং ব্রাহ্মণস্য বধে ভবেৎ। বিপ্রহত্যাসমং পাপং স্ত্রীবধে লভতে নরঃ ॥ * ॥ পাপিদর্শনজন্যপাপং যথা। পাপং যদ্দর্শনে তাত কথয়ামি নিশাময়। দুঃস্বপ্নং পাপবীজঞ্চ কেবলং বিঘ্নকারণং ॥ গোঘ্নঞ্চ ব্রহ্মঘ্নং বাপি কৃতঘ্নং কুটিলং তথা। দেবঘ্নং পিতৃমাতৃঘ্নং পাপং বিশ্বাসঘাতিনং ॥ মিথ্যাসাক্ষ্যপ্রদাতারং পঞ্চাতিথ্যবিবঞ্চকং। গ্রামযাজিনমেবেতি দেববিপ্রস্বহারিণং ॥ অশ্বত্থঘাতিনং দুষ্টং শিববিষ্ণুবিনিন্দকং। অদীক্ষিতমনাচারং সন্ধ্যাহীনং দ্বিজন্তথা ॥ দেবলং বৃষবাহঞ্চ শূদ্রাণাং সূপকারকং। শবদাহী চ শূদ্রাণাং শূদ্রশ্রাদ্ধান্নভোজিনং ॥ অবীরাং ছিন্ননাসাঞ্চ দেবব্রাহ্মণনিন্দকং। পতিভক্তিবিহীনাঞ্চ বিষ্ণুভক্তিবিহীনকং ॥ শূদ্রাণাং বিধবাঞ্চৈব চণ্ডালং ব্যভিচারিণীং। শশ্বৎ কোপযুতং দুষ্টম্বণগ্রস্তঞ্চ জারজং ॥ চৌরং মিথ্যাবাদিনঞ্চ শরণাগতঘাতিনং। মাংসাপহারিণঞ্চৈব ব্রাহ্মণং বৃষলীপতিং ॥ ব্রাহ্মণীগামিনং শূদ্রং দ্বিজং বার্দ্ধুষিকন্তথা। অগম্যাগামিনং দুষ্টং চতুর্ব্বর্ণং নরাধমং ॥ মাতা সপত্নী মাতা চ শ্বশ্রূশ্চ ভগিনী সুতা। গুরুপত্নী পুত্রপত্নী সোদরস্য প্রিয়া সতী ॥ মাতৃস্বসা পিতৃস্বসা ভাগিনেয়প্রিয়া তথা। মাতুলানী নবোঢ়া চ পিতৃব্যস্ত্রী রজস্বলা ॥ পিতৃমাতৃপ্রসূশ্চৈব চাগম্যাষ্টাদশ স্মৃতাঃ। কীর্ত্তিতাঃ সামবেদে চ পরিপাল্যাঃ সতাং ব্রজ ॥ এতান্ দৃষ্ট্বা চ স্পৃষ্ট্বা চ ব্রহ্মহত্যাং লভেন্নরঃ। তস্মাদ্দেবাদিমান্ দৃষ্ট্বা সূর্য্যং দৃষ্ট্বা হরিং স্মরেৎ ॥ কামতো যদি পশ্যন্তি তত্তুল্যাস্তে ভবন্তি বৈ। তস্মাৎ সন্তো ন পশ্যন্তি পাপভীতা ব্রজেশ্বর ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ৭।৭৮ অধ্যায়ঃ ॥

পাপকং (ক্লী) পাপং। ইতি শব্দরত্নাবলী ॥

পাপকৃৎ (ত্রি) পাপকর্ত্তা। যথা। খ্যাপনেনানুতাপেন তপসাধ্যয়নেন চ। পাপকৃন্মুচ্যতে পাপাদ্দানেন চ দমেন চ ॥ ইতি প্রায়শ্চিত্ততত্ত্বং ॥

পাপগ্রহঃ (পুং) অর্দ্ধোনচন্দ্রঃ। কুজঃ। রাহুঃ। শনিঃ। এতৈর্যুক্তো বুধঃ। রবিঃ। যথা। অর্দ্ধোনেন্দুঃ কুজো রাহুঃ শনিস্তৈর্যুত ইন্দুজঃ। রবিঃ পাপা ভবন্ত্যেতে শুভাশ্চান্যে প্রকীর্ত্তিতাঃ ॥ ইতি জ্যোতিঃসারসংগ্রহঃ ॥

পাপঘ্নঃ (পুং) তিলঃ। ইতি রাজনির্ঘণ্টঃ ॥ পাপনাশকে ত্রি। ইতি মুগ্ধবোধব্যাকরণং

পাপচেলিকা (স্ত্রী) পাঠা। আকনাদি ইতি ভাষা। ইতি রত্নমালা ॥

পাপচেলী (স্ত্রী) পাঠা। ইত্যমরঃ ॥

পাপনাপিতঃ (পুং) ধূর্ত্তনাপিতঃ। ইতি সংক্ষিপ্তসারব্যাকরণং ॥

পাপপতিঃ (পুং) উপপতিঃ। ইতি ত্রিকাণ্ড-শেষঃ ॥

পাপপুরুষঃ (পুং) পাপময়াঙ্গনরঃ। যথা।

বামপার্শ্বস্থিতং পাপপুরুষং কজ্জলপ্রভং।
ব্রহ্মহত্যাশিরস্কঞ্চ স্বর্ণস্তেয়ভুজদ্বয়ং ॥
সুরাপানহৃদা যুক্তং গুরুতল্পকটিদ্বয়ং।
তৎসংসর্গি পদদ্বন্দ্বমঙ্গপ্রত্যঙ্গপাতকং ॥
উপপাতকরোমাণং রক্তশ্মশ্রুবিলোচনং।
খড়্গচর্ম্মধরং ক্রুদ্ধমেবং কুক্ষৌ বিচিন্তয়েৎ ॥ ইতি ভূতশুদ্ধিপ্রকরণে তন্ত্রসারঃ ॥*॥ সৃষ্ট্যাদৌ পুরুষশ্রেষ্ঠঃ সংসারং সচরাচরং। সর্ব্বেষাং দমনার্থায় সৃষ্টবান্ পাপপূরুষং ॥ দ্বিজাতিহত্যামূর্দ্ধানং মদিরাপানলোচনং। সুবর্ণস্তেয়বদনং গুরুতল্পগতিশ্রুতিং ॥ স্ত্রীহত্যানাসিকঞ্চৈব গোহত্যাদোষবাহুকং। ন্যাসাপহরণগ্রীবং ভ্রূণহত্যাগলন্তথা ॥ পরস্ত্রীগতিবুক্কালং সুহৃল্লোকবধোদরং। শরণাপন্নহত্যাদিনাভিং গর্ব্বকথাকটিং ॥ গুরুনিন্দাসকৃথিভাগং কন্যাবিক্রয়শেফসং। বিশ্বাসবাক্যকথনপায়ুং পিতৃবধাঙ্ঘ্রিকং ॥ উপপাতকরোমাণং মহাকায়ং ভয়ঙ্করং। কৃষ্ণবর্ণং পিঙ্গনেত্রং স্বাশ্রয়াত্যন্তদুঃখদং ॥ ইতি পাদ্মে ক্রিয়াযোগসারে ২১ অধ্যায়ঃ ॥

পাপমুক্তঃ (ত্রি) পাপাম্মুক্তঃ। নিষ্পাপঃ। ইতি সংক্ষিপ্তসারব্যাকরণং ॥ স চ যথা। যঃ সমঃ সর্ব্বভূতেষু জিতাত্মা শান্তমানসঃ। স পাপেভ্যো বিমুচ্যেত জ্ঞানবান্ স চ বেদবিৎ ॥ গুণাগুণপরিজ্ঞাতা হৃক্ষয়স্য ক্ষয়স্য চ। ধ্যানেনৈব হৃসংমূঢ়ঃ স পাপেভ্যঃ প্রমুচ্যতে ॥ স্বদেহে পরদেহে চ সুখদুঃখেন নিত্যশঃ। বিচারজ্ঞো ভবেদ্যস্তু স মুচ্যেতৈনসো ধ্রুবং ॥ অহিংসঃ সর্ব্বভূতেষু তৃষ্ণাক্রোধবিবর্জিতঃ। শুভন্যাসঃ সদা যশ্চ স পাপেভ্যঃ প্রমুচ্যতে ॥ প্রাণায়ামৈশ্চ নির্দহ্য অধঃসন্ধারণানি চ। ব্যবস্থিতমনা যস্তু স পাপেভ্যঃ প্রমুচ্যতে ॥ নিরাশীঃ সর্ব্বতস্তিষ্ঠেদিষ্টার্থেষু ন লোলুপঃ। পরীতাত্মা ত্যজেৎ প্রাণান্ সর্ব্বপাপাৎ প্রমুচ্যতে ॥ শ্রদ্দধানো জিতক্রোধঃ পরদ্রব্যবিবর্জ্জিতঃ। অনসূয়শ্চ যো মর্ত্যঃ স পাপেভ্যঃ প্রমুচ্যতে ॥ গুরুশুশ্রূষয়া যুক্তো হ্যহিংসানিরতশ্চ যঃ। ক্ষুদ্রশ্চ ক্ষুদ্রশীলশ্চ স পাপেভ্যঃ প্রমুচ্যতে ॥ প্রশস্তানি চ যঃ কুর্য্যাদপ্রশস্তানি বর্জয়েৎ। যোঽভিগচ্ছতি তীর্থানি বিশুদ্ধেনান্তরাত্মনা। পাপাদুপরতো নিত্যং স পাপেভ্যঃ প্রমুচ্যতে ॥ উত্থায় ব্রাহ্মণং গচ্ছেন্নরো ভক্ত্যা সমন্বিতঃ। অভিগম্য প্রযত্নেন স পাপেভ্যঃ প্রমুচ্যতে ॥ ইতি বরাহপুরাণং ॥

পাপরোগঃ (পুং) মসূরীরোগঃ। ইতি শব্দরত্নাবলী ॥

পাপর্দ্ধিঃ (স্ত্রী) মৃগয়া। ইতি হেমচন্দ্রঃ ॥

পাপলং (ক্লী) পরিমাণবিশেষঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ ॥ পাপগ্রাহকে ত্রি ॥

পাপশমনী (স্ত্রী) শমীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥ পাতকনাশিকা চ ॥

পাপাত্মা [ন্] (পুং) পাপী। যথা।

পাপাত্মনাং শৃণু গতিং বিস্তরেণ বদাম্যহং। ষড়শীতিসহস্রাণি যোজনানি দুরাত্মনাং ॥ প্রোক্তো মার্গস্য বিস্তারঃ সর্ব্বদুঃখান্বিতস্য চ। ক্বচিৎ ক্বচিৎ জ্বলদ্বহ্নিঃ সন্তপ্তঃ কর্দ্দমঃ ক্বচিৎ ॥ ক্বচিৎ ক্বচিৎ দ্বিজশ্রেষ্ঠ সন্তপ্তং তাম্রবালুকং। ক্বচিৎ ক্বচিত্তীক্ষ্ণশিলাঃ ক্বচিত্তপ্তশিলাস্তথা ॥ ক্বচিৎ ক্বচিচ্ছস্ত্রবৃষ্টিঃ ক্বচিদঙ্গারবর্ষণং। কুত্রচিদ্বহ্নিবৃষ্টিশ্চ কুত্রচিৎ পঙ্কবর্ষণং ॥ উষ্ণাম্বুবর্ষণং ক্বাপি ক্বচিৎ পাষাণবর্ষণং। জ্বলদগ্নিরিব ক্বাপি সন্তপ্তো বাতি মারুতঃ ॥ গভীরা অন্ধকূপাশ্চ তৃণাবৃতমুখা দ্বিজ। ক্বাপি কণ্টকবৃক্ষাশ্চ নারাচসমকণ্টকাঃ ॥ পাষাণশ্রেণয়ঃ ক্বাপি দুরারোহাঃ সপন্নগাঃ। ক্বচিদ্গাঢ়ান্ধকারাশ্চ ক্বচিৎ শোণিতকন্ধরাঃ ॥ ক্বচিদ্বীরণবৃক্ষাশ্চ ক্বচিৎ কাশাঃ ক্বচিৎ শরাঃ। ক্বচিৎ ক্বচিৎ শর্করাশ্চ লোষ্টবশ্চ ক্বচিৎ ক্বচিৎ ॥ ক্বচিদস্থ্নাং রাশয়শ্চ দুর্গন্ধা মাংসরাশয়ঃ। ক্বচিৎ কণ্টকরাশিশ্চ শৈবালানি ক্বচিৎ ক্বচিৎ ॥ কীলকা বলয়ঃ ক্বাপি ক্বচিদ্ব্যাঘ্রাস্তথা শিবাঃ। খড়্গিনঃ করিণঃ ক্বাপি ক্বচিদৃক্ষা ভয়ঙ্করাঃ ॥ এবং বহুবিধক্লেশে ছায়াজলবিবর্জ্জিতে। তস্মিন্ মার্গে দ্বিজশ্রেষ্ঠ পাপিনো যান্তি দুঃখিনঃ ॥ নগ্না বিমুক্তকেশাশ্চ প্রেতাকারভয়ঙ্করাঃ। গচ্ছন্তি পাপিনস্তত্র শুষ্ককণ্ঠৌষ্ঠতালুকাঃ ॥ ইতি ক্রিয়াযোগসারে ২২ অধ্যায়ঃ ॥

পাপান্তং (ক্লী) তীর্থবিশেষঃ। তস্য নামান্তরং। পৃথূদকং অনুকীর্ণঞ্চ। যথা। পৃথূদকে মহাতীর্থে ত্বনুকীর্ণেতি নামতঃ। জুহাব ধৃতরাষ্ট্রস্য রাষ্ট্রং নরপতেস্ততঃ ॥ হূয়মানে তদা রাষ্ট্রে প্রবৃত্তে যজ্ঞকর্ম্মণি। অক্ষীয়ত ততো রাষ্ট্রং নৃপতের্দুষ্কৃতেন বৈ ॥ ততঃ স চিন্তয়ামাস ব্রাহ্মণস্য বিচেষ্টিতং। পুরোহিতেন সংযুক্তো রত্নান্যাদায় সর্ব্বশঃ ॥ প্রসাদনার্থং বিপ্রস্য অনুকীর্ণং যযৌ তদা। প্রসাদিতঃ স রাজ্ঞা চ তুষ্টঃ প্রোবাচ তং নৃপং ॥ ব্রাহ্মণা নাবমন্তব্যাঃ পুরুষেণ বিজানতা। ব্রাহ্মণশ্চেদবজ্ঞাতো নশ্যেৎত্রিপুরুষং কুলং ॥ এবমুক্ত্বা স নৃপতিমাজ্যেন পয়সা পুনঃ। উত্থাপয়ামাস মৃতাংস্তস্য রাজ্ঞো হিতে স্থিতঃ ॥ তস্মিংস্তীর্থে তু যঃ স্নাতি শ্রদ্দধানো জিতেন্দ্রিয়ঃ। স প্রাপ্নোতি নরো নিত্যং মনসা চিন্তিতং ফলং ॥ তত্তু তীর্থং সুবিখ্যাতং পাপান্তং নাম নামতঃ। যস্যেহ যজ্ঞতৃপ্তস্য মধু সুস্রাব বৈ নদী ॥ তস্মিন্ স্নাতোঽথ ভক্ত্যা চ মুচ্যতে সর্ব্বপাতকৈঃ। ফলং প্রাপ্নোতি যজ্ঞস্য অশ্বমেধস্য মানবঃ ॥ পাপান্তমিতি বিখ্যাতং তীর্থং পুণ্যতমং দ্বিজাঃ। ইতি বামনপুরাণে ৩৮ অধ্যায়ঃ ॥

পাপী [ন্] (পুং) পাপযুক্তঃ। যথা। রুধিরৌঘপ্লুতাঃ কেচিৎ কেচিৎ কর্দ্দমভূষিতাঃ। কেচিৎ কেচিৎ কৃশাঙ্গাশ্চ পথি গচ্ছন্তি পাপিনঃ ॥ ক্রন্দন্তো ব্যথয়া কেচিৎ স্রবদ্বাষ্পাকুলেক্ষণাঃ। শোচন্তঃ স্বানি কর্ম্মাণি কেচিদ্গচ্ছন্তি পাপিনঃ ॥ কস্যচিচ্চর্ম্মপাশস্য বন্ধনং পাপিনো গলে। কঙ্কালে কস্যচিদ্বক্ষঃ কস্যচিচ্চ ভুজদ্বয়ে ॥ কস্যচিন্নাসিকারন্ধ্রে নির্দ্দয়ৈর্যমকিঙ্করৈঃ।

অঙ্কুশাগ্রং বিনিক্ষিপ্য ক্রোধেনাকৃষ্যতে দ্বিজ ॥ ঘ্রাণে সূচিসমুৎকীর্ণে পাশং দত্ত্বা দৃঢ়ং রুষা। আকৃষ্যতে যমপ্রেষ্যৈঃ কেষাঞ্চিৎ সঞ্চিতৈনসাং ॥ শিক্যস্থান্ গুরুপাষাণান্ বহন্তঃ কর্ণরন্ধ্রকৈঃ। অয়োভারাংশ্চ শিশ্নাগ্রৈর্ব্রজন্তি পথি পাপিনঃ ॥ কাংশ্চিদ্‌গৃহীত্বা কেশেষু কাংশ্চিৎ কর্ণেষু পাপিনঃ। কাংশ্চিদ্‌গুদেষু পাদেষু নয়ন্তি যমকিঙ্করাঃ ॥ গ্রীবাসু পাপিনঃ কাংশ্চিৎ করপ্রহরণৈর্দৃঢ়ৈঃ। ক্ষিপ্ত্বা ক্ষিপ্ত্বা যমপ্রেষ্যা নয়ন্তি যমমন্দিরং ॥ যান্ত্যধঃশিরসঃ কেচিদূর্দ্ধপাদাস্তথাপরে। গচ্ছন্তি বাহুভিঃ কেচিদেকপাদাশ্চ কেচন ॥ ইত্যেবং বিকৃতাকারা আর্ত্তরাববিরাবিণঃ। যমদূতৈস্তাড্যমানাঃ পাপিনোঽপি চ তৎপথি ॥ ইতি পাদ্মে ক্রিয়াযোগসারে ২২ অধ্যায়ঃ ॥

পাপ্মা [ন্] (পুং) পাপং। ইত্যমরঃ ॥

পাম [ন্] (ক্লী) বিচর্চ্চিকা। ইত্যমরঃ ॥

পামঘ্নঃ (পুং) গন্ধকঃ। ইতি জটাধরঃ ॥

পামঘ্নী (স্ত্রী) কটুকা। ইতি রাজনির্ঘণ্টঃ

পামনঃ (ত্রি) পামরোগবিশিষ্টঃ। তৎপর্য্যায়ঃ। কচ্ছুরঃ ২। ইতি হেমচন্দ্রঃ ॥

পামরঃ (ত্রি) খলঃ। নীচঃ। ইতি মেদিনী ॥ মূর্খঃ। ইতি হেমচন্দ্রঃ ॥

পামরোদ্ধারা (স্ত্রী) গুড়ূচী। ইতি শব্দচন্দ্রিকা ॥

পামা [ন্] (স্ত্রী) কচ্ছুঃ। পাঁচড়া ইতি ভাষা। ইত্যমরঃ ॥ অস্যা ঔষধং যথা। হরিদ্রা হরিতালঞ্চ দূর্ব্বাগোমূত্রসৈন্ধবং। অয়ং লেপো হন্তি দদ্রুং পামানং বৈ পরং তথা ॥ অপি চ। মাহিষং নবনীতঞ্চ সিন্দূরঞ্চ মরীচকং। পামা বিলেপিতা নশ্যেৎ বহুলাপি বৃষধ্বজ ॥ অন্যচ্চ। মরীচং ত্রিবৃতং কুষ্ঠং হরিতালং মনঃশিলা। দেবদারু হরিদ্রে দ্বে কুষ্ঠং মাংসী চ চন্দনং ॥ বিশালা করবীরঞ্চ অর্কক্ষীরং সকৃৎ পলং। এষাঞ্চ কার্ষিকো ভাগো বিষস্যার্দ্ধপলং ভবেৎ ॥ প্রস্থং কটুকতৈলস্য গোমূত্রেঽষ্টগুণে পচেৎ। মৃৎপাত্রে লৌহপাত্রে বা শনৈর্মৃদ্বগ্নিনা পচেৎ ॥ পামা বিচর্চ্চিকা চৈব দদ্রুবিস্ফোটকানি চ। অভ্যঙ্গেন প্রণশ্যন্তি কোমলত্বঞ্চ জায়তে ॥ প্রসৃতান্যপি শ্বিত্রাণি তৈলেনানেন ম্রক্ষয়েৎ। চিরোত্থিতমপি শ্বিত্রং বিবর্ণং তৎক্ষণাদ্ভবেৎ ॥ ইতি গারুড়ে ১৭৪। ১৭৮ অধ্যায়ঃ ॥

পামারিঃ (পুং) গন্ধকঃ। ইতি হেমচন্দ্রঃ ॥

পায়সঃ (পুং ক্লী) শ্রীবাসঃ। টারপিন্ ইতি ভাষা। পয়সা সংস্কৃতঃ। পরমান্নং। ইত্যমরমেদিনীকরৌ ॥ অস্য পাকপ্রকারো গুণাশ্চ। অতপ্ততণ্ডুলো ধৌতঃ পরিভৃষ্টো ঘৃতেন চ। খণ্ডযুক্তেন দুগ্ধেন পাচিতঃ পায়সো ভবেৎ ॥ পায়সঃ কফকৃদ্বল্যো বিষ্টম্ভী মধুরো গুরুঃ। *। তস্য পিত্র্যুদ্দেশেন গঙ্গাম্ভসি নিঃক্ষেপে ফলং যথা। পিতৃনুদ্দিশ্য যো ভক্ত্যা পায়সং মধুসংযুতং। গুড়সর্পিস্তিলৈঃ সার্দ্ধং গঙ্গাম্ভসি বিনিঃক্ষিপেৎ ॥ তৃপ্তা ভবন্তি পিতরস্তস্য বর্ষশতং হরে। যচ্ছন্তি বিবিধান্

কামান্ পরিতুষ্টাঃ পিতামহাঃ ॥ ইতি স্কান্দে কাশীখণ্ডে ২৭ অধ্যায়ঃ ॥ চন্দ্রপ্রভপায়সো যথা। ভৃষ্টজীরচতুর্জাতশ্চন্দ্রকান্তঃ সুরোচনঃ। ইতি রাজবল্লভঃ ॥ * ॥ পয়োবিকারে ত্রি। যথা। কন্দুপক্কানি তৈলেন পায়সং দধি শক্তবঃ। দ্বিজৈরেতানি ভোজ্যানি শূদ্রগেহকৃতান্যপি॥ ইতি তিথিতত্ত্বে বরাহপুরাণং ॥

পায়িকঃ (পুং) পদাতিকঃ। ইতি শব্দরত্নাবলী ॥

পায়ুঃ (পুং) মলদ্বারং। স তু গর্ত্তস্থস্য সপ্তভির্মাসৈর্ভবতি। ইতি সুখবোধঃ ॥ তৎপর্য্যায়ঃ। অপানং ২ গুদং ৩ চ্যুতিঃ ৪ অধোমর্ম্ম ৫ শকৃদ্দ্বারং ৬ ত্রিবলীকং ৭ বলিঃ ৮। ইতি হেমচন্দ্রঃ ॥ তস্যাধ্যাত্মাদি যথা। অবাগ্‌গতিরপানশ্চ পায়ুরধ্যাত্মমুচ্যতে। অধিভূতং বিসর্গশ্চ মিত্রস্তত্রাধিদৈবতং॥ ইতি মহাভারতে আশ্বমেধিকপর্ব্ব ॥

পায্যং (ক্লী) পরিমাণং। ইত্যমরঃ ॥ পানং। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ ॥ জলং। নিন্দনীয়ে ত্রি। ইতি বিশ্বঃ ॥

পার ৎ ক কর্ম্মসমাপ্তৌ। ইতি কবিকল্পদ্রুমঃ ॥ অপপারৎ। ইতি দুর্গাদাসঃ ॥

পারং (ক্লী) পরতীরং। নদীলঙ্ঘনাদ্‌গন্তব্যতীরং। ইত্যমরঃ ॥

পারঃ (পুং) পারদঃ। ইত্যমরটীকায়াং সারসুন্দরী ॥ প্রান্তভাগে পুং ক্লী। ইতি মেদিনী ॥

পারকঃ (ত্রি) পূর্ত্তিকারকঃ। পালনকারকঃ। প্রীতিকারকঃ। ব্যায়ামকারকঃ। এম্বর্থেষু পৃধাতোঃ কর্ত্তরি ণকপ্রত্যয়নিষ্পন্নঃ ॥

পারক্ [জ্] (পুং) সুবর্ণং। ইত্যুণাদিকোষঃ ॥

পারক্যং (ক্লী) পরলোকহিতকর্ম্ম। যথা। পাদেন তস্য পারক্যং কুর্য্যাৎ সঞ্চয়মাত্মবান্। অর্দ্ধেন চাত্মভরণং নিত্যনৈমিত্তিকন্তথা ॥ পাদস্যার্দ্ধার্দ্ধমর্থস্য মূলভূতং বিবর্দ্ধয়েৎ। এবমাচরতঃ পুংসো হ্যর্থঃ সাফল্যমৃচ্ছতি ॥ ইতি মার্কণ্ডেয়পুরাণং ॥

পারগঃ (ত্রি) পারগামী। তৎপর্য্যায়ঃ। কর্ত্তরীকঃ ২। ইতি শব্দমালা ॥

পারগতঃ (পুং) জিনঃ। ইতি হেমচন্দ্রঃ॥ পারগে ত্রি ॥

পারজায়িকঃ (পুং) পারদায়িকঃ। ইতি মহাভারতে রাজধর্ম্মঃ ॥

পারটীটঃ (পুং) প্রস্তরঃ। ইতি ত্রিকাণ্ডশেষঃ

পারণঃ (পুং) মেঘঃ। ইতি শব্দমালা ॥

পারণং (ক্লী) } উপবাসব্রতানন্তরদিবসকর্ত্তব্য-
পারণা (স্ত্রী) } প্রাথমিকভোজনং। যথা। পারণং পাবনং পুংসাং সর্ব্বপাপপ্রণাশনং। উপবাসাঙ্গভূতঞ্চ ফলদং শুদ্ধিকারণং ॥ সর্ব্বেম্বেবোপবাসেষু দিবাপারণমিষ্যতে। অন্যথা ফলহানিঃ স্যাদৃতে ধারণপারণং ॥ ন রাত্রৌ পারণং কুর্য্যাদৃতে বৈ রোহিণীব্রতাৎ। নিশায়াং পারণং কুর্য্যাদ্বর্জ্জয়িত্বা মহানিশাং ॥ পূর্ব্বাহ্ণে পারণং শস্তং কৃত্বা বিপ্র সুরার্চ্চনং। সর্ব্বেষাং সম্মতং কুর্য্যাদৃতে বৈ রোহিণী-

ব্রতং ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ৮ অধ্যায়ঃ ॥*॥ অথ শ্রীকৃষ্ণজন্মাষ্টমীব্রতপারণকালঃ। অষ্টম্যামথ রোহিণ্যাং ন কুর্য্যাৎ পারণং ক্বচিৎ। হন্যাৎ পুরাকৃতং কর্ম্ম উপবাসার্জ্জিতং ফলং॥ তিথিরষ্টগুণং হন্তি নক্ষত্রঞ্চ চতুর্গুণং। তস্মাৎ প্রযত্নতঃ কুর্য্যাত্তিথিভান্তে চ পারণং॥ অত্রোভয়বিয়োগে পারণমুক্তং। যদা সার্দ্ধপ্রহরনিশাভ্যন্তরে একস্যৈব বিয়োগস্তদৈকতরবিয়োগেঽপি পারণং। তথা চ নারদীয়ে। তিথিনক্ষত্রসংযোগে উপবাসো যদা ভবেৎ। পারণন্তু ন কর্ত্তব্যং যাবন্নৈকস্য সংক্ষয়ঃ॥ সাংযোগিকে ব্রতে প্রাপ্তে যদ্যপ্যেকো বিযুজ্যতে। তত্রৈব পারণং কুর্য্যাদেবং বেদবিদো বিদুঃ॥ যদৈকস্যাপি সার্দ্ধপ্রহরনিশাভ্যন্তরে ন বিয়োগস্তদা তয়োরবিয়োগেঽপি প্রাতরুৎসবান্তে পারণং। তিথ্যন্তে চোৎসবান্তে বা ব্রতী কুর্ব্বীত পারণং। ইত্যুক্তত্বাৎ॥ * ॥ মহাষ্টম্যুপবাসপারণং মৎস্যমাংসোপহারেণ কর্ত্তব্যং। যথা। অষ্টম্যাং সমুপোষ্যৈব নবম্যামপরেঽহনি। মৎস্যমাংসোপহারেণ দদ্যান্নৈবেদ্যমুত্তমং॥ তেনৈব বিধিনান্নন্তু স্বয়ং ভুঞ্জীত নান্যথা॥ স্ত্রিয়াস্তু পশুমাংসভক্ষণনিন্দয়া ন তেন পারণং কিন্তু মৎস্যেন। অষ্টম্যুপবাসপারণে রবিবারাদৌ মাংসনিষেধঃ। এবং মাংসাশনত্যাগকৃতনিয়মেন নিয়োগাদিষ্বপি মাংসং বর্জ্জনীয়ং॥ * ॥ অথ শ্রীরামনবমীব্রতপারণকালঃ। নবমী চাষ্টমীবিদ্ধা ত্যাজ্যা বিষ্ণুপরায়ণৈঃ। উপোষণং নবম্যাং বৈ দশম্যামেব পারণং॥ *॥ অথৈকাদশীব্রতপারণকালঃ। মন্ত্রং জপিত্বা হরয়ে নিবেদ্যোপোষণং ব্রতী। দ্বাদশ্যাং পারণং কুর্য্যাদ্বর্জ্জয়িত্বা হ্যুপোদকীং॥ দ্বাদশীলঙ্ঘনে দোষমাহ নারদীয়ং। মহাহানিকরী হ্যেষা দ্বাদশী লঙ্ঘিতা নৃণাং। বিষ্ণুধর্ম্মোত্তরে। দ্বাদশ্যাঃ প্রথমঃ পাদো হরিবাসরসংজ্ঞিতঃ। তমতিক্রম্য কুর্ব্বীত পারণং বিষ্ণুতৎপরঃ॥ * ॥ অথ শ্রবণদ্বাদশ্যুপবাসপারণকালঃ। তিথিনক্ষত্রসংযোগে উপবাসো যদা ভবেৎ। তাবদেব ন ভোক্তব্যং যাবন্নৈকস্য সংক্ষয়ঃ॥ বিশেষেণ মহীপাল শ্রবণং বর্দ্ধতে যদি। তিথিক্ষয়েণ ভোক্তব্যং দ্বাদশীং নৈব লঙ্ঘয়েৎ॥ তিথিক্ষয়েণ একাদশীক্ষয়েণ ভোক্তব্যং দ্বাদশ্যাং পারয়েদিত্যর্থঃ ॥*॥ অথ শিবরাত্র্যুপবাসপারণকালঃ। জয়ন্তী শিবরাত্রিশ্চ কার্য্যে ভদ্রজয়ান্বিতে। কৃতোপবাসং তিথ্যন্তে তদা কুর্য্যাচ্চ পারণং॥ তিথ্যন্তে পারণন্তু জয়ন্তীমাত্রপরং। অত্র চতুর্দ্দশ্যামেব তৎ। ব্রহ্মাণ্ডোদরমধ্যে তু যানি তীর্থানি সন্তি বৈ। পূজিতানি ভবন্তীহ ভূতাহে পারণে কৃতে॥ * ॥ পারণদিনে বর্জ্জ্যানি যথা ব্রহ্মাণ্ডপুরাণং। কাংস্যং মাংসং সুরাং ক্ষৌদ্রং লোভং বিতথভাষণং। ব্যায়ামঞ্চ ব্যবায়ঞ্চ দিবাস্বপ্নং তথাঞ্জনং॥ শিলাপিষ্টং মসূরাংশ্চ দ্বাদশৈতানি বৈষ্ণবঃ। দ্বাদশ্যাং বর্জয়েন্নিত্যং সর্ব্ব-

পাপৈঃ প্রমুচ্যতে ॥ সূরিসন্তোষে। কাংস্যং মাংসং মসূরঞ্চ চণকং কোরদূষকং। শাকং মধু পরান্নঞ্চ ত্যজেদুপবসন্ স্ত্রিয়ং ॥ অত্রোপবসন্নিতি তদ্দিনে ভোজনাসম্ভবাৎ সামীপ্যাৎ পূর্ব্বাপরয়োর্গ্রহণং। ইতি তিথ্যাদিতত্ত্বং ॥

পারতঃ (পুং) পারদঃ। ইতি হেমচন্দ্রঃ ॥

পারতন্ত্র্যং (ক্লী) পরতন্ত্রতা। পরাধীনত্বং। অন্যায়ত্ততা। যথা। দোষাণাং সমবেতানাং বিকল্পেঽংশাংশকল্পনা। স্বাতন্ত্র্যপারতন্ত্র্যাভ্যাং ব্যাধেঃ প্রাধান্যমাদিশেৎ ॥ ইতি মাধবকরঃ ॥

পারত্রিকং (ত্রি) পারলৌকিকং। পরত্র ভবমিত্যর্থে ষ্ণিকপ্রত্যয়নিষ্পন্নং ॥

পারদঃ (পুং) ধাতুবিশেষঃ। পারা ইতি ভাষা। তৎপর্য্যায়ঃ। রসরাজঃ ২ রসনাথঃ ৩ মহারসঃ ৪ রসঃ ৫ মহাতেজঃ ৬ রসলেহঃ ৭ রসোত্তমঃ ৮ সূতরাট্ ৯ চপলঃ ১০ জৈত্রঃ ১১ শিববীজং ১২ শিবঃ ১৩ অমৃতং ১৪ রসেন্দ্রঃ ১৫ লোকেশঃ ১৬ দুর্দ্ধরঃ ১৭ প্রভুঃ ১৮ রুদ্রজঃ ১৯ হরতেজঃ ২০ রসধাতুঃ ২১ অচিন্ত্যজঃ ২২ খেচরঃ ২৩ অমরঃ ২৪ দেহদঃ ২৫ মৃত্যুনাশকঃ ২৬ সূতঃ ২৭ স্কন্দঃ ২৮ স্কন্দাংশকঃ ২৯ দেবঃ ৩০ দিব্যরসঃ ৩১ রসায়নশ্রেষ্ঠঃ ৩২ যশোদঃ ৩৩। ইতি রাজনির্ঘণ্টঃ ॥ সূতকঃ ৩৪ সিদ্ধধাতুঃ ৩৫ পারতঃ ৩৬। ইতি শব্দরত্নাবলী ॥ হরবীজং ৩৭ রজস্বলঃ ৩৮। ইতি হেমচন্দ্রঃ ॥ শিববীর্য্যং ৩৯ শিবাহ্বয়ঃ ৪০। ইতি ভাবপ্রকাশঃ ॥ * ॥ অস্য গুণাঃ। ক্রিমিকুষ্ঠনাশিত্বং। চক্ষুষ্যত্বং। রসায়নত্বঞ্চ। ইতি রাজবল্লভঃ ॥ অস্য ভস্মনঃ পূর্ণবীর্য্যং মাসত্রয়পর্য্যন্তং তিষ্ঠতি। ইতি পরিভাষা ॥ * ॥ অপি চ। পারদঃ সকলরোগনাশকঃ ষড়্রসো নিখিলযোগবাহকঃ। পঞ্চভূতময় এষ কীর্ত্তিতো দেহলোহবরসিদ্ধিকারকঃ ॥ মূর্চ্ছিতো হরতে ব্যাধীন্ বদ্ধঃ খেচর সিদ্ধিদঃ। সর্ব্বসিদ্ধিকরো লীনো নিরুত্থো দেহসিদ্ধিদঃ ॥ বিবিধব্যাধিভয়োদয়মরণজরাসংকটেঽপি মর্ত্ত্যেভ্যঃ। পারং দদাতি যস্মাত্তস্মাদয়ং পারদঃ কথিতঃ ॥ ইতি রাজনির্ঘণ্টঃ ॥ * ॥ তস্যোৎপত্তিলক্ষণে যথা। শিবাঙ্গাৎ প্রচ্যুতং রেতঃ পতিতং ধরণীতলে। তদ্দেহসারজাতত্বাচ্ছুক্লমচ্ছমভূচ্চ তৎ ॥ অত্র ভেদেন বিজ্ঞেয়ং শিববীর্য্যং চতুর্ব্বিধং। শ্বেতং রক্তং তথা পীতং কৃষ্ণং তত্তু ভবেৎ ক্রমাৎ ॥ ব্রাহ্মণঃ ক্ষত্রিয়ো বৈশ্যঃ শূদ্রশ্চ খলু জাতিতঃ। শ্বেতং শস্তং রুজাং নাশে রক্তং কিল রসায়নে ॥ ধাতুবাদে তু তৎ পীতং খে গতৌ কৃষ্ণমেব চ ॥ * ॥ পারদঃ ষড়্রসঃ স্নিগ্ধস্ত্রিদোষঘ্নো রসায়নঃ। যোগবাহী মহাবৃষ্যঃ সদা দৃষ্টিবলপ্রদঃ ॥ সর্ব্বাময়হরঃ প্রোক্তো বিশেষাৎ সর্ব্বকুষ্ঠনুৎ ॥ স্বস্থো রসো ভবেদ্ব্রহ্মা বদ্ধো জ্ঞেয়ো জনার্দ্দনঃ। রঞ্জিতঃ ক্রামিতশ্চাপি সাক্ষাদ্দেবো মহেশ্বরঃ ॥ মূর্চ্ছিত্বা হরতি রুজং বন্ধনমনুভূয় খে গতিং কুরুতে। অজরীকরোতি হি মৃতঃ

কোঽন্যঃ করুণাকরঃ সূতাৎ ॥ রসামৃতে।

যস্য রোগস্য যো যোগস্তেনৈব সহ যোজিতঃ। রসেন্দ্রো হন্তি তং রোগং নরকুঞ্জরবাজিনাং ॥ * ॥ তস্য দোষা যথা। মলং বিষং বহ্নিগিরিত্বচাপলং নৈসর্গিকং দোষমুষন্তি পারদে। উপাধিজৌ দ্বৌ ত্রিপুনাগযোগজৌ দোষৌ রসেন্দ্রে কথিতৌ মুনীশ্বরৈঃ ॥ মলেন মূর্চ্ছা মরণং বিষেণ দাহোঽগ্নিনা কষ্টতরঃ শরীরে। দেহস্য জাড্যং গিরিণা সদা স্যাচ্চাঞ্চল্যতো বীর্য্যহৃতিশ্চ পুংসাং ॥ বঙ্গেন কুষ্ঠং ভুজগেন গণ্ডো ভবেদতোঽসৌ পরিশোধনীয়ঃ ॥ বহ্নির্বিষং মলঞ্চেতি মুখ্যা দোষাস্ত্রয়ো রসে। এতে কুর্ব্বন্তি সন্তাপং মৃতিং মূর্চ্ছাং নৃণাং ক্রমাৎ ॥ অন্যেঽপি দোষাঃ কথিতা ভিষগ্‌ভিঃ পারদে যদি। তথাপ্যেতে ত্রয়ো দোষা হরণীয়া বিশেষতঃ ॥ সংস্কারহীনং খলু সূতরাজং যঃ সেবতে তস্য করোতি বাধাং। দেহস্য নাশং বিদধাতি নূনং কষ্টাংশ্চ রোগান্ জনয়েন্নরাণাং ॥*॥ মারিতস্য মূর্চ্ছিতস্য তস্য গুণাঃ। পারদঃ কৃমিকুষ্ঠঘ্নো জয়দো দৃষ্টিদঃ সরঃ। মৃত্যুহৃচ্চ মহাবীর্য্যো যোগবাহী জরাহরঃ ॥ স্মৃত্যোজোরূপদো বৃষ্যো বৃদ্ধিকৃদ্ধাতুবর্দ্ধনঃ। ষণ্ডত্বনাশনঃ শূরঃ খেচরঃ সিদ্ধিদঃ পরঃ ॥ পারদঃ সকলরোগহা স্মৃতঃ ষড়্‌রসো নিখিলযোগবাহকঃ। পঞ্চভূতময় এষ কীর্ত্তিতস্তেন তদ্‌গুণগণৈর্বিরাজতে ॥ * ॥ অথ রসস্য শোধনবিধিঃ।

তত্র স্বেদনং। নানাধান্যৈর্যথা প্রাপ্তৈস্তুষবর্জ্জৈর্জলান্বিতৈঃ। মৃদ্ভাণ্ডং পূরিতং রক্ষেদ্যাবদম্লত্বমাপ্নুয়াৎ ॥ তন্মধ্যে ভৃঙ্গরাণ্‌ মণ্ডী বিষ্ণুক্রান্তা পুনর্নবা। মীনাক্ষী চৈব সর্পাক্ষী সহদেবী শতাবরী ॥ ত্রিফলা গিরিকর্ণী চ হংসপাদী চ চিত্রকঃ। সমূলং কুট্টয়িত্বা তু যথালাভং বিনিঃক্ষিপেৎ ॥ পূর্ব্বাম্লভাণ্ডমধ্যে তু ধান্যাম্লকমিদং স্মৃতং। স্বেদনাদিষু সর্ব্বত্র রসরাজস্য যোজয়েৎ ॥ বিষ্ণুক্রান্তা গিরিকর্ণী চ অপরাজিতৈব শ্বেতনীলপুষ্পভেদাৎ। অত্যম্লমারণালং বা তদভাবে প্রযোজয়েৎ। তদভাবে ধান্যাম্লাভাবে। ত্র্যূষণং লবণং রাজী রজনী ত্রিফলার্দ্রকং। মহাবলা নাগবলা মেঘনাদঃ পুনর্নবা ॥ মেষশৃঙ্গী চিত্রকঞ্চ নবসারং সমং সমং। এতৎ সমস্তং ব্যস্তং বা পূর্ব্বাম্লেনৈব পেষয়েৎ ॥ প্রলিম্পেত্তেন কল্কেন বস্ত্রমঙ্গুলমাত্রকং। তন্মধ্যে নিঃক্ষিপেৎ সূতং বদ্ধা তন্ত্রিদিনং পচেৎ ॥ দোলাযন্ত্রেঽম্লসংযুক্তে জায়তে স্বেদিতো রসঃ। মেঘনাদঃ চবরাই শাকবিশেষঃ। মেষশৃঙ্গী মেঢ়াশৃঙ্গী। তদলাভে কর্কটশৃঙ্গী গ্রাহ্যা। নবসারং নৌসাদর। অন্যচ্চ। মূলকানলসিন্ধূত্থত্র্যূষণার্দ্রকরাজিকাঃ। রসস্য ষোড়শাংশেন দ্রব্যং যুঞ্জ্যাৎ পৃথক্ পৃথক্ ॥ দ্রব্যেষনুক্তমানেষু মতং মানমিদং বুধৈঃ। পটাবৃতেষু চৈতেষু সূতং প্রক্ষিপ্য কাঞ্জিকে ॥ স্বেদয়েদ্দিনমেকঞ্চ দোলাযন্ত্রেণ বুদ্ধিমান্। স্বেদাত্তীব্রো ভবেৎ সূতো মর্দ্দনাচ্চ সুনির্ম্মলঃ ॥ মূলকং

মুরই। অনলশ্চিত্রকং। ত্র্যুষণং ত্রিকটু। রাজিকা রাই॥ * ॥ অথ মর্দ্দনং। ইষ্টিকাচূর্ণচূর্ণাভ্যামাদৌ মর্দ্দ্যো রসস্ততঃ। দধ্না গুড়েন সিন্ধূত্থরাজিকাগৃহধূমকৈঃ॥ অন্যচ্চ। কুমারিকাচিত্রকরক্তসর্ষপৈঃ কৃতৈঃ কষায়ৈর্বৃহতীবিমিশ্রিতৈঃ। ফলত্রিকেণাপি বিমর্দ্দিতো রসো দিনত্রয়ং সর্ব্বমলৈর্বিমুচ্যতে॥*॥ অথ মূর্চ্ছনং। ত্র্যুষণং ত্রিফলাবন্ধ্যাকন্দৈঃ ক্ষুদ্রাদ্বয়ান্বিতৈঃ। চিত্রকোর্ণানিশাক্ষারকন্যার্ককনকদ্রবৈঃ॥ সূতং কৃতেন যূষেণ বারান্ সপ্তাভিমূর্চ্ছয়েৎ। ইত্থং সংমূর্চ্ছিতঃ সূতস্ত্যজেৎ সপ্তাপি কঞ্চুকান্॥ বন্ধ্যাকন্দং বাঁঝখখসাকন্দ। ক্ষুদ্রাদ্বয়ং ছোটীকটৈয়া বড়ীকটৈয়া। ঊর্ণা ঊর্ণামেষকা। নিশা হরিদ্রা। ক্ষারঃ যবক্ষারঃ। কন্যা কুমারিকা। অর্কঃ অর্কপত্ররসঃ। কনকঃ ধত্তুরপত্ররসঃ॥ * ॥ অথোর্দ্ধপাতনং। ময়ূরগ্রীবতাপ্যাভ্যাং নষ্টপিষ্টীকৃতস্য চ। যন্ত্রে বিদ্যাধরে কুর্য্যাদ্রসেন্দ্রস্যোর্দ্ধপাতনং॥ সূতঃ স্যাদূর্দ্ধপাতেন সর্ব্বদোষবিবর্জ্জিতঃ। ময়ূরগ্রীবা তুতিয়া। তাপ্যঃ স্বর্ণমাষী। নষ্টপিষ্টীকৃতস্য কুমারিকাদ্রবযোগেন তাবন্মর্দ্দনং কর্ত্তব্যং যাবৎ পারদঃ পৃথঙ্ন দৃশ্যতে ইত্যর্থঃ। বিদ্যাধরযন্ত্রে ডমরুযন্ত্রে॥ * ॥ অথাধঃপাতনং। ত্রিফলাশিগ্রুশিখিভির্লবণাসুরিসংযুতৈঃ। নষ্টপিষ্টং রসং কৃত্বা লেপয়েদূর্দ্ধভাজনং॥ ততো দীপ্তৈরধঃপাতমুপলৈস্তস্য কারয়েৎ। যন্ত্রে ভূধরসংজ্ঞে তু ততঃ সূতো বিশুদ্ধ্যতি॥ স্বেদনাদিক্রিয়াভিস্তু শোধিতোঽসৌ যদা ভবেৎ। তদা কার্য্যাণি কুরুতে প্রযোজ্যঃ সর্ব্বকর্ম্মসু॥*॥ অথ মুখ্যদোষহরশোধনবিধিঃ। গৃহকন্যা হরতি মলং ত্রিফলাগ্নিং চিত্রকো বিষং হন্তি। তস্মাদেভির্মিশ্রৈর্বারান্ সংমূর্চ্ছয়েৎ সপ্ত ॥ * ॥ অথ সর্ব্বদোষহরঃ সংক্ষিপ্তঃ শোধনবিধিঃ। কুমারিকাচিত্রকরক্তসর্ষপৈঃ কৃতৈঃ কষায়ৈর্বৃহতীবিমিশ্রিতৈঃ। ফলত্রিকেণাপি বিমর্দ্দিতো রসো দিনত্রয়ং সর্ব্বমলৈর্বিমুচ্যতে॥ এবং কদর্থিতঃ সূতঃ ষণ্ডো ভবতি নিশ্চিতং। বহ্ন্যৌষধীকষায়েণ স্বেদিতঃ স বলী ভবেৎ॥ সর্পাক্ষীচিঞ্চিকাবন্ধ্যাভৃঙ্গাব্দৈঃ স্বেদিতো বলী। ততঃ স পাবকদ্রাবৈঃ স্বিন্নঃ স্যাদতিদীপ্তিমান॥ সর্পাক্ষী নাগফণী। চিঞ্চিকা অম্বিলী। বন্ধ্যা বাঁঝখখসা। ভৃঙ্গঃ ভৃঙ্গরাজঃ। অব্দো মুস্তা। পাবকঃ চিত্রকঃ॥*॥ অথ রসস্য মারণবিধিঃ। ধূমসারং রসং তোরীং গন্ধকং নবসাদরং। যামৈকং মর্দ্দয়েদম্লৈর্ভাগং কৃত্বা সমং সমং॥ কাচকূপ্যাং বিনিঃক্ষিপ্য তাঞ্চ মৃদ্বস্ত্রমুদ্রয়া। বিলিপ্য পরিতো বক্ত্রে মুদ্রাং দত্ত্বা বিশোষয়েৎ॥ অধঃসচ্ছিদ্রপিঠরীমধ্যে কূপীং নিবেশয়েৎ। পিঠরীং বালুকাপূরৈর্ভৃত্বা বা কূপিকাগলং॥ নিবেশ্য চুল্ল্যাং তদধো বহ্নিং কুর্য্যাচ্ছনৈঃ শনৈঃ। তস্মাদপ্যধিকং কিঞ্চিৎ পাবকং জ্বালয়েৎ ক্রমাৎ॥ এবং দ্বাদশভির্যামৈর্ম্রিয়তে রস উত্তমঃ। স্ফোটয়েৎ স্বাঙ্গশীতং তমূর্দ্ধগং গন্ধকং ত্যজেৎ॥ অধঃস্থঞ্চ মৃতং সূতং গৃহ্নীয়াত্তস্তু মাত্রয়া।

যথোচিতানুপানেন সর্ব্বকর্ম্মসু যোজয়েৎ ॥ * ॥ অথান্যপ্রকারঃ। অপামার্গস্য বীজানাং মূষাযুগ্মং প্রকল্পয়েৎ। তৎসংপুটে ক্ষিপেৎ সূতং মলপূদুগ্ধমিশ্রিতং ॥ মলপূঃ কাষ্ঠোডুম্বরিকা। দ্রোণপুষ্পীপ্রসূনানি বিড়ঙ্গমিরিমেদকঃ। এতচ্চূর্ণমধশ্চোর্দ্ধং দত্ত্বা মুদ্রাং প্রদীপয়েৎ॥ তদ্গোলমাধমেৎ সম্যক্ মৃন্মূষাসংপুটে সুধীঃ। মুদ্রাং দত্ত্বা শোষয়িত্বা ততো গজপুটে পচেৎ ॥ একেনৈব পুটেনৈব সূতকং ভস্ম জায়তে। তৎ প্রযোজ্যং যথাস্থানে যথামাত্রং যথাবিধি ॥ * ॥ অথান্যপ্রকারঃ। কাষ্ঠোডুম্বরিকাদুগ্ধে রসং কিঞ্চিদ্বিমর্দ্দয়েৎ। তদ্দুগ্ধঘৃষ্টহিঙ্গোশ্চ মূষাযুগ্মং প্রকল্পয়েৎ ॥ ক্ষিপ্ত্বা তৎসংপুটে সূতং তত্র মুদ্রাং প্রদীপয়েৎ। ধৃত্বা তদ্গোলকং প্রাজ্ঞো মৃন্মূষাসংপুটেঽধিকে। পচেদ্গজপুটে তেন সূতকং যাতি ভস্মতাং ॥ * ॥ অন্যঃ প্রকারঃ। নাগবল্লীরসৈর্ঘৃষ্টঃ কর্কোটীকন্দগর্ভিতঃ। মৃন্মূষাসংপুটে পক্বঃ সূতো যাত্যেব ভস্মতাং ॥ ইতি ভাবপ্রকাশঃ ॥ * ॥ অথ পারদশিবলিঙ্গনির্ম্মাণবিধিঃ। পারদে শিবনির্ম্মাণে নানাবিঘ্নং যতঃ প্রিয়ে। অতএব মহেশানি শান্তিস্বস্ত্যয়নং চরেৎ ॥ পারদং শিববীজং হি তাড়নং নহি কারয়েৎ॥ তাড়নাদ্বিত্তনাশঃ স্যাত্তাড়নাদ্বিত্তহীনতা। তাড়নাদ্রোগযুক্তত্বং তাড়নান্মরণং ভবেৎ॥ দ্বাদশং পার্থিবং লিঙ্গমুপচারৈশ্চ যোড়শৈঃ। পট্টাদিসূত্রনির্ম্মাণরচিতং শুক্লমেব বা। পুরুষস্য যথাযোগ্যং যুগ্মবস্ত্রং নিবেদয়েৎ ॥ ভোগযোগ্যং প্রদাতব্যং মধুপর্কং কুলেশ্বরি। অলঙ্কারং যথাশক্তি দদ্যাৎ কল্যাণহেতবে ॥ পূজয়েদ্বহুযত্নেন বিল্বপত্রেণ পার্ব্বতি। তোড়লোক্তেন বিধিনা প্রত্যেকেনাযুতং জপেৎ ॥ আদৌ পঞ্চাক্ষরং মন্ত্রমষ্টোত্তরশতং জপেৎ। পূজান্তে প্রজপেৎ পশ্চাৎ প্রাসাদাখ্যং মহামনুং ॥ দক্ষিণান্তং সমাচর্য্য হবিষ্যাশী জিতেন্দ্রিয়ঃ। তাম্বূলঞ্চ তথা মৎস্যং বর্জয়েন্ন কদাচন। অস্মিংস্তন্ত্রে হবিষ্যান্নং তাম্বূলং মীনমুত্তমং॥ হোময়েৎ পরমেশানি দশাংশং বা শতাংশকং। হোমস্য দক্ষিণা কার্য্যা তদা বিঘ্নৈর্ন লিপ্যতে॥ ততঃ পরস্মিন্ দিবসে পারদং আনয়েৎ সুধীঃ। তস্যোপরি জপেন্মন্ত্রং সর্ব্ববন্ধং নবাত্মকং॥ ব্যোমবীজং শিবার্ণঞ্চ বর্ণাদ্যং বিন্দুমস্তকং। বায়ুবীজং চেন্দুযুতং ত্রিতয়ং ত্র্যম্বকং প্রিয়ে॥ ইমং মন্ত্রং মহেশানি প্রজপেদৌষধোপরি ॥ পারদে প্রজপেন্মন্ত্রমষ্টোত্তরশতং যদি। তদৈবৌষধযোগেন বদ্ধো ভবতি নান্যথা॥ ততঃ পরস্মিন্ দিবসে শৃণু যৎ প্রাণবল্লভে। বরয়েৎ সর্ব্বকর্ত্তারং যথোক্তবিভবাবধি ॥ সুবর্ণং চম্পকাকারং কর্ণযুগ্মে নিবেশয়েৎ। চতুষ্কোণযুতং স্বর্ণং গ্রীবায়াং সুমনোহরং ॥ হস্তদ্বয়ে মহেশানি দদ্যাদ্বলয়যুগ্মকং। বলয়ং শুক্লবর্ণঞ্চ অঙ্গুরীয়ং তথৈব চ ॥ ঊর্ম্মীং দদ্যাৎ পীতবর্ণাং ক্ষৌমবস্ত্রযুগং শিবে। এবং কৃত্বা

মহেশানি শিবরূপং বিচিন্তয়েৎ ॥ অথাতঃ সংপ্রবক্ষ্যামি বিধানং শৃণু পার্ব্বতি ॥ প্রস্তরে চৈব সংস্থাপ্য ঝিণ্টীপত্ররসেন চ। প্রণবেন সমালোড্য কুর্য্যাৎ কর্দ্দমবৎ প্রিয়ে ॥ নির্ম্মাণযোগ্যং তদ্দ্রব্যং যদি স্যাৎ সুরসুন্দরি। তদা নির্ম্মায় তল্লিঙ্গং পুনর্দৃঢ়তরঞ্চরেৎ ॥ খপুষ্পসংযুতে বস্ত্রে অঙ্গারে চ করীষকে। কিঞ্চিদুষ্ণং প্রকর্ত্তব্যং যতো দৃঢ়তরং ভবেৎ ॥ ইতি মাতৃকাভেদতন্ত্রে ৮ পটলঃ ॥ * ॥ সগররাজকৃতমুক্তকেশম্লেচ্ছজাতিবিশেষঃ। অস্য বিবরণং পহ্নবশব্দে দ্রষ্টব্যং ॥

পারদণ্ডকঃ (পুং) দেশবিশেষঃ। ইতি শব্দরত্নাবলী ॥ স তু ওড্রদেশৈকভাগ ইতি কেচিৎ ॥

পারদারিকঃ (পুং) পারজায়িকঃ। পরদাররতঃ। পরদারান্ গচ্ছতি ইত্যর্থে টিকণ্প্রত্যয়নিষ্পন্নঃ। ইতি সিদ্ধান্তকৌমুদী ॥ পুষ্পকাণ্ডজয়ডিণ্ডিমায়িতং যত্র গোতমকলত্রকামিনঃ। পারদারিকবিলাসসাহসং দেবভর্ত্তুরুদটঙ্কি ভিত্তিষু ॥ ইতি নৈষধে ১৮ সর্গঃ ॥ তস্য দোষা যথা। যঃ পরস্ত্রীষু নিরতস্তস্য শ্রীর্বা কুতো যশঃ। স চ নিন্দ্যঃ পাপযুক্তঃ শশ্বৎ সর্ব্বসভাসু চ ॥ ইতি ব্রহ্মবৈবর্ত্তে গণেশখণ্ডে ২১ অধ্যায়ঃ ॥

পারদার্য্যং (ক্লী) পরদারগমনং। যথা। ভৃতাদধ্যয়নাদানং ভৃতকাধ্যাপনন্তথা। পারদার্য্যং পারিবিত্তং বার্দ্ধুষ্যং লবণক্রিয়া ॥ ইত্যুপপাতকগণনে যাজ্ঞবল্ক্যঃ ॥

পারদেশ্যঃ (ত্রি) প্রোষিতঃ। পারদেশিকঃ। পথিকঃ। পরদেশং গত ইত্যর্থে ষ্ণ্যপ্রত্যয়নিষ্পন্নঃ ॥

পারমহংস্যং (ত্রি) পরমহংসসম্বন্ধি। যথা। শ্রীমদ্ভাগবতং পুরাণমমলং যদ্বৈষ্ণবানাং প্রিয়ং যস্মিন্ পারমহংস্যমেকমমলং জ্ঞানং পরং গীয়তে। যত্র জ্ঞানবিরাগভক্তিসহিতং নৈষ্কর্ম্ম্যমাবিষ্কৃতং তচ্ছৃণ্বন্ সুপঠন্ বিচারণপরো ভক্ত্যা বিমুচ্যেন্নরঃ ॥ ইতি শ্রীভাগবতে ১২ স্কন্ধে ১৩ অধ্যায়ঃ ॥ পারমহংস্যং পরমহংসৈঃ প্রাপ্যং। ইতি তট্টীকায়াং শ্রীধরস্বামী ॥

পারমার্থিকঃ (ত্রি) পরমার্থযুক্তঃ। যথা। *গতানুগতিকো লোকো ন লোকঃ পারমার্থিকঃ।* ইতি পুরাণং ॥ মুখ্যং। যথা। ত্রিচতুঃপঞ্চসপ্তাষ্টনবদ্বাদশ এব চ। ক্রমেণ ঘটিকা হেতাস্তৎপুণ্যং পারমার্থিকং ॥ ইতি তিথ্যাদিতত্ত্বং ॥

পারম্পর্য্যং (ক্লী) আম্নায়ঃ। কুলক্রমঃ। ইতি হেমচন্দ্রঃ ॥ তথা চ। যস্মিন্ দেশে য আচারঃ পারম্পর্য্যক্রমাগতঃ। তত্র তং নাবমন্যেত ধর্ম্মস্তত্রৈব তাদৃশঃ ॥ ইতি বিবাদভঙ্গার্ণবঃ ॥ পরম্পরায়া ভাবশ্চ ॥

পারম্পর্য্যোপদেশঃ (পুং) উপদেশপরম্পরা। তৎপর্য্যায়ঃ। ঐতিহ্যং ২ ইতিহ ৩। ইত্যমরঃ ॥ পরম্পরৈব পারম্পর্য্যং স্বার্থে ষ্ণ্যঃ পারম্পর্য্যেণোপদেশঃ পারম্পর্য্যোপদেশঃ তত্র ইতিহশব্দোঽব্যয়ঃ। যথা ইতিহ বৃদ্ধৈরুক্তং ইহ বটে যক্ষঃ প্রতিবসতীতি। ইতি এবংরূপং হন্তি গচ্ছতি

ইতিহ হনজনাদিতি ডঃ। ইতিহশব্দাৎ স্বার্থে ষ্ণ্যে ঐতিহ্যং। ইতি ভরতঃ ॥

পারলৌকিকঃ (ত্রি) পরলোকসম্বন্ধী। যথা। দানপাত্রমধমর্ণমিহৈকগ্রাহিকোটিগুণিতং দিবি দায়ি। সাধুরেতি সুকৃতৈর্যদি কর্ত্তুং পারলৌকিককুশীদমসীদৎ ॥ ইতি নৈষধপঞ্চমসর্গঃ ॥

পারবতঃ (পুং) পারাবতঃ। ইতি দ্বিরূপকোষঃ ॥

পারশবঃ (পুং) শূদ্রায়াং বিপ্রতনয়ঃ। ইত্যমরঃ ॥ স তু নিষাদজাতিঃ। যথা। ব্রাহ্মণাদ্বৈশ্যকন্যায়ামম্বষ্ঠো নাম জায়তে। নিষাদঃ শূদ্রকন্যায়াং যঃ পারশব উচ্যতে ॥ শূদ্রকন্যায়ামূঢ়ায়াং নিষাদ উৎপদ্যতে যতঃ সংজ্ঞান্তরেণ পারশবশ্চোচ্যতে। তস্যোপনয়নসংস্কারনিষেধমাহ। স পারয়ন্নেব শবস্তস্মাৎ পারশবঃ স্মৃতঃ। স জীবন্নেব শবতুল্যঃ। ইতি মনুকুল্লূকভট্টৌ ॥ পরস্ত্রীতনয়ঃ। শস্ত্রং। তত্তু লৌহং। ইতি মেদিনী ॥ পরশুজাতে ত্রি ॥

পারশীকঃ (পুং) পারসীকঃ। ইত্যমরটীকায়াং রমানাথঃ ॥

পারশ্বধঃ (পুং) পরশ্বধধারী। পারশ্বধিকঃ। ইতি হেমচন্দ্রঃ ॥

পারশ্বধিকঃ (পুং) পরশুহেতিকঃ। কুঠারধারী। তৎপর্য্যায়ঃ। পারশ্বধঃ ২ পরশ্বধায়ুধঃ ৩। ইতি হেমচন্দ্রঃ ॥

পারসিকঃ (পুং) পারসীকঃ। ইতি শব্দরত্নাবলী ॥

পারসী (স্ত্রী) পারস্যভাষা। পারসদেশভববিদ্যাদি। তদারম্ভদিনং যথা। জ্যেষ্ঠাশ্লেষামঘাপূর্ব্বারেবতীভরণীদ্বয়ে। বিশাখার্দ্রোত্তরাষাঢ়শতভে পাপবাসরে ॥ লগ্নে স্থিরে সচন্দ্রে চ পারসীমারবীং পঠেৎ। ইতি গণপতিমুহূর্ত্তঃ ॥

পারসীকঃ (পুং) পারসীকদেশোদ্ভবঘোটকঃ। তৎপর্য্যায়ঃ। বানায়ুজঃ ২। ইতি কেচিদিত্যমরটীকায়াং ভরতঃ ॥ পরাদনঃ ৩ আবট্টজঃ ৪। ইতি ত্রিকাণ্ডশেষঃ ॥ দেশবিশেষঃ। তৎপর্য্যায়ঃ। পারসিকঃ ২। ইতি শব্দরত্নাবলী ॥ তদ্দেশোদ্ভবে ত্রি ॥

পারস্ত্রৈণেয়ঃ (ত্রি) পরস্ত্রিয়াঃ সুতঃ। ইত্যমরঃ ॥

পারা (স্ত্রী) নদীবিশেষঃ। সা তু পারিপাত্রপর্ব্বতোদ্ভবা। ইতি মেদিনী ॥

পারাপতঃ (পুং) পারাবতঃ। ইত্যমরটীকায়াং রমানাথঃ ॥

পারাপারঃ (পুং) পারাবারঃ। ইতি দ্বিরূপকোষঃ ॥

পারায়ণং (ক্লী) সাকল্যবচনং। ইত্যমরঃ ॥ পারং সমাপ্তিং অয়তে গচ্ছতি প্রাপ্নোতি পারায়ণং নন্দ্যাদিত্বাদনঃ। আবিষ্টলিঙ্গত্বাদ্ভিন্নলিঙ্গেন সামানাধিকরণ্যেঽপি ক্লীবমেব পারায়ণং। যথা ধাতুপারায়ণং। রত্নপারায়ণং নাম লঙ্কেতি মম মৈথিলীতি ভট্টিঃ। ইতি ভরতঃ ॥ * ॥ পুরাণপাঠঃ। তত্র শ্রীভাগবতপাঠানুক্রমো যথা। শ্রীপার্ব্বত্যুবাচ। স্কন্ধৈর্দ্বাদশভিঃ প্রোক্তং শ্রীমদ্ভাগবতং প্রভো। শুকস্তচ্ছ্রাবয়ামাস মহারাজং পরীক্ষিতং ॥ সপ্তাহেনেতি

ভগবন্ শ্রূয়তে তত্র তত্র হ। তস্যানুক্রমমিচ্ছামি শ্রোতুং তৎফলমেব চ॥ সদাশিব উবাচ। সাধু পৃষ্টম্মহাভাগে লোকে যৎ প্রচরিষ্যতি। পারায়ণমিতি খ্যাতং সদ্যো মুক্তিপ্রদং নৃণাং॥ শুকস্যোক্তিক্রমেণৈব পঠেদ্ভাগবতন্তু যঃ। শ্রাবয়েচ্ছৃণুয়াদ্বাপি তস্যানন্তং ফলং ভবেৎ॥ কৃতনিত্যক্রিয়ঃ প্রাতঃ কুশহস্তঃ কৃতাসনঃ। দেবদ্বিজগুরূন্নত্বা ধ্যাত্বা বিষ্ণুং সনাতনং॥ দ্বৈপায়নং নমস্কৃত্য শুকদেবঞ্চ ভক্তিতঃ। হিরণ্যাক্ষবধং যাবৎ প্রথমেঽহনি কীর্ত্তয়েৎ॥ চরিতং ভরতস্যাপি দ্বিতীয়েঽথ তৃতীয়কে। মথনঞ্চামৃতস্যাপি যত্র কূর্ম্মঃ স্বয়ং হরিঃ॥ চতুর্থদিবসে চৈব দশমে হরিজন্ম চ। পঞ্চমে তু পঠেদ্বিদ্বান্ রুক্মিণ্যা হরণাবধি॥ ষষ্ঠে চোদ্ধবসম্বাদং সপ্তমে তু সমাপয়েৎ। অধ্যায়ং প্রাপ্য বিরমেন্ন তু মধ্যে কদাচন॥ কৃতে বিরামে মধ্যে তু অধ্যায়াদিং পঠেৎ পুনঃ। পঠেদর্থং বুধ্যমানঃ শ্রাবয়েদ্বৈষ্ণবোত্তমে॥ শ্রোতা তু প্রাঙ্মুখো ভূত্বা শৃণুয়াদ্ভক্তিতৎপরঃ। অধ্যায়ে স্বর্ণমাষৈকং তথা দদ্যাচ্চ দক্ষিণাং॥ সমাপ্তৌ চ ততো ধেনুং স্বর্ণশৃঙ্গীং নিবেদয়েৎ। কুর্য্যাচ্চ বৈষ্ণবং হোমং সাত্বতান্ ভোজয়েত্ততঃ॥ এবং যঃ কুরুতে দেবি পাঠং ভাগবতস্য তু। শ্রবণং শ্রাবণাং বাপি স ইষ্টাং গতিমাপ্নুয়াৎ। এতৎ পারায়ণং নাম সর্ব্বকামফলপ্রদং॥ পাঠকালে তু ত্রিদশা মুনয়শ্চ তপোধনাঃ। পার্শ্বদাশ্চ তথা বিষ্ণোঃ সান্নিধ্যং তত্র কুর্ব্বতে॥ এতত্তে কথিতং দেবি পারায়ণবিধানকং। বিষ্ণুপ্রীতিকরং পুণ্যং কিম্ভূয়ঃ শ্রোতুমিচ্ছসি॥ ইতি পাদ্মে পাতালখণ্ডে পারায়ণমাহাত্ম্যে ৭১ অধ্যায়ঃ॥ * ॥ অপি চ। কুমারা ঊচুঃ। অথ তে সংপ্রবক্ষ্যামঃ সপ্তাহগ্রহণে বিধিং। সহায়ৈর্ব্বসুভিশ্চৈব প্রায়ঃ সাধ্যো বিধিঃ স্মৃতঃ॥ দৈবজ্ঞন্তু সমাহূয় মুহূর্ত্তং পৃচ্ছ যত্নতঃ। বিবাহে যাদৃশং বিত্তং তাদৃশং পরিকল্পয়েৎ॥ নভস্য আশ্বিনোর্জ্জৌ চ মার্গশীর্ষঃ শুচির্নভাঃ। এতে মাসাঃ কথারম্ভে শ্রোতৃণাং মোক্ষসূচকাঃ॥ মাসানাং নির্ণয়ে যানি তানি ত্যাজ্যানি সর্ব্বথা। সহায়াশ্চ ত এবাত্র কর্ত্তব্যাঃ সোদ্যমাশ্চ যে॥ দেশে দেশে তথা যেয়ং বার্ত্তা প্রেষ্যা প্রযত্নতঃ। ভবিষ্যতি কথা চাত্র আগন্তব্যং কুটুম্বিভিঃ॥ দূরে হরিকথাঃ কেচিদ্দূরে চাচ্যুতকীর্ত্তনাঃ। স্ত্রিয়ঃ শূদ্রাদয়ো যে চ তেষাং বোধো যতো ভবেৎ॥ দেশে দেশে বিরক্তা যে বৈষ্ণবাঃ কীর্ত্তনোৎসুকাঃ। তেষ্বেব পত্রং প্রেষ্যঞ্চ তল্লেখনমিতীরিতং॥ সতাং সমাজো ভবিতা সপ্তরাত্রং সুদুর্লভঃ। অপূর্ব্বরসরূপৈব কথা চাত্র ভবিষ্যতি॥ শ্রীভাগবতপীযুষকথাসু রসলম্পটাঃ। ভবন্তশ্চ তদা শীঘ্রমায়াস্ত প্রেমতৎপরাঃ॥ নাবকাশঃ কদাচিদ্বা দিনমাত্রং তথাপি বা। সর্ব্বথা গমনং কার্য্যং ক্ষণোঽত্রৈব সুদুর্লভঃ॥ এবমাকারণং তেষাং কর্ত্তব্যং বিনয়েন চ। আগন্তুকানাং সর্ব্বেষাং বাসস্থানানি

কল্পয়েৎ ॥ তীর্থে চৈব বনে চাপি গৃহে বা শ্রবণং স্মৃতং। বিশালা বসুধা যত্র কর্ত্তব্যং তৎকথাস্থলং ॥ শোধনং মার্জনং ভূমের্লেপনং ধাতুমণ্ডনং। গৃহোপস্কর-মুদ্ধৃত্য গৃহকোণে নিবেশয়েৎ ॥ অর্ব্বাক্ পঞ্চাহতো যত্নাদাস্তীর্ণানি প্রলেপয়েৎ। কর্ত্তব্যং মণ্ডপং প্রোচ্চৈঃ কদলীষণ্ড-মণ্ডিতং ॥ ফলপুষ্পদলৈর্বিশ্বক্ বিতানে চ বিরাজিতং। চতুর্দ্দিক্ষু ধ্বজারোপো বহু-সম্পদ্বিরাজিতঃ ॥ ঊর্দ্ধং সপ্তৈব লোকাশ্চ কল্পনীয়াঃ সুবিস্তরং। তেষু বিপ্রা বির-ক্তাশ্চ স্থাপনীয়াঃ প্রবুধ্য চ ॥ পূর্ব্বং তেষা-মাসনানি কর্ত্তব্যাণি যথোত্তরং। বক্ত-শ্চাপি তথা দিব্যমাসনং পরিকল্পয়েৎ ॥ উদঙ্মুখো ভবেদ্বক্তা শ্রোতা বৈ প্রাঙ্-মুখস্তদা। প্রাঙ্মুখোঽথ ভবেদ্বক্তা শ্রোতা চোদঙ্মুখস্তদা ॥ অথবা পূর্ব্বদিক্ জ্ঞেয়া পূজ্যপূজকমধ্যতঃ। শ্রোতৃণামাগমঃ প্রোক্তো দেশকালাদিকোবিদৈঃ ॥ বিরক্তো বৈষ্ণবো বিপ্রো বেদশাস্ত্রবিশুদ্ধিমান্। দৃষ্টান্তকুশলো ধীরো বক্তা কার্য্যোঽতি-নিস্পৃহঃ ॥ অনেককর্ম্মবিভ্রান্তাঃ স্ত্রৈণাঃ পাষণ্ডবাদিনঃ। শুকশাস্ত্রকথোচ্চারে ত্যাজ্যাস্তে যেঽপ্যপণ্ডিতাঃ ॥ বক্তুঃ পার্শ্বে সমর্থার্থমন্যঃ স্থাপ্যস্তথাবিধঃ। পণ্ডিতঃ সংশয়চ্ছেত্তা লোকবোধনতৎপরঃ ॥ বক্ত্রা-ক্ষৌরং প্রকর্ত্তব্যং দিনাদর্বাক্ ব্রতাপ্তয়ে। অরুণোদয়েঽসৌ নির্ব্বত্য শৌচং স্নানং সমাচরেৎ ॥ মণ্ডলঞ্চ প্রকর্ত্তব্যং তত্র স্থাপ্যো হরিস্তথা। কৃষ্ণমুদ্দিশ্য মন্ত্রেণ চরেৎ পূজাবিধিং ক্রমাৎ। প্রদক্ষিণনমস্কারান্ পূজান্তে স্তুতিমাচরেৎ ॥ সংসার-সাগরে মগ্নং দীনং মাং করুণানিধে। কর্ম্মগ্রাহগৃহীতাঙ্গং মামুদ্ধর ভবার্ণবাৎ ॥ শ্রীমদ্ভাগবতস্যাপি ততঃ পূজা প্রযত্নতঃ। কর্ত্তব্যা বিধিনা প্রীত্যা ধূপদীপসমন্বিতা ॥ ততস্তু শ্রীফলং ধৃত্বা নমস্কারং সমাচরেৎ। স্তুতিঃ প্রসন্নচিত্তেন কর্ত্তব্যা কেবলং তদা ॥ শ্রীমদ্ভাগবতাখ্যস্ত্বং প্রত্যক্ষঃ কৃষ্ণ এব হি। স্বীকৃতোঽসি ময়া নাথ মুক্ত্যর্থং ভব-সাগরে ॥ মনোরথো মদীয়োঽয়ং সফলঃ সর্ব্বথা ত্বয়া। নির্বিঘ্নেনৈব কর্ত্তব্যো দাসোঽহং তব কেশব ॥ এবং দীনং বচঃ প্রোক্ত্বা বক্তারঞ্চাথ পূজয়েৎ। সংভূষ্য বস্ত্রভূষাভিঃ পূজান্তে তঞ্চ সংস্তবেৎ ॥ শুকরূপপ্রবোধজ্ঞঃ সর্ব্বশাস্ত্রবিশারদঃ। এতৎকথাপ্রকাশেন মদজ্ঞানং বিনাশয় ॥ তদগ্রে নিয়মঃ পশ্চাৎ কর্ত্তব্যঃ শ্রেয়সে মুদা। সপ্তরাত্রং যথাশক্ত্যা ধারণীয়ঃ স এব হি ॥ বরণং পঞ্চবিপ্রাণাং কথাভাগ-নিবৃত্তয়ে। কর্ত্তব্যং তৈর্হরের্জপ্যং দ্বাদ-শাক্ষরবিদ্যয়া ॥ ব্রাহ্মণান্ বৈষ্ণবান্ চান্যান্ তথা কীর্ত্তনকারিণঃ। নত্বা সংপূজ্য দত্তার্ঘ্যং স্বয়মাসনমাবিশেৎ ॥ লোকচিন্তা-ধনাগারপুত্রচিন্তাচ্যুতশ্চ যঃ। কথাচিন্তা-শুদ্ধমতিঃ স লভেৎ ফলমুত্তমং ॥ আসূর্য্যো-দয়মারভ্য সার্দ্ধং ত্রিপ্রহরান্তকং। বাচ-নীয়া কথা সম্যক্ ধীরকণ্ঠং সুধীমতা ॥ কথাবিরামঃ কর্ত্তব্যো মধ্যাহ্নে ঘটিকা-দ্বয়ং। তৎকথামনুকার্য্যং বৈ কীর্ত্তনং

বৈষ্ণবৈস্তদা ॥ মলমূত্রজয়ার্থং হি লঘ্বাহারঃ সুখাবহঃ। হবিষ্যান্নেন কর্ত্তব্যো হ্যেকবারং কথার্থিনা ॥ উপোষ্য সপ্তরাত্রং বা শক্তিশ্চেৎ শৃণুয়াত্তদা। ঘৃতপানং পয়ঃপানং কৃত্বা বা শৃণুয়াৎ সুখং ॥ ফলাহারেণ বা শ্রাব্যমেকভক্তেন বা পুনঃ। সুখসাধ্যং ভবেদ্যত্তু কর্ত্তব্যং শ্রবণায় তৎ ॥ ভোজনন্তু বরং মন্যে কথাশ্রবণকারকং। নোপবাসো বরঃ প্রোক্তঃ কথাবিঘ্নকরো যদি ॥ সপ্তাহব্রতিনাং পুংসাং নিয়মান্ শৃণু নারদ। বিষ্ণুদীক্ষাবিহীনানাং নাধিকারঃ কথাশ্রবে ॥ ব্রহ্মচর্য্যমধঃসুপ্তিঃ পত্রাবল্যাঞ্চ ভোজনং। কথাসমাপ্তৌ ভক্তিঞ্চ কুর্য্যান্নিত্যং কথাব্রতী ॥ দ্বিদলং মধু তৈলঞ্চ গরিষ্ঠান্নন্তথৈব চ। ভাবদুষ্টং পর্য্যুষিতং জহ্যান্নিত্যং কথাব্রতী ॥ বৃন্তাকঞ্চ কলিঙ্গঞ্চ দগ্ধমন্নং মসূরিকাং। নিষ্পাবমামিষাদ্যঞ্চ বর্জয়েত্তু কথাব্রতী ॥ পলাণ্ডুং লশুনং হিঙ্গুং মূলকং গৃঞ্জনন্তথা। লালিকামূলকুষ্মাণ্ডং নৈবাদ্যাচ্চ কথাব্রতী ॥ দেববৈষ্ণববিপ্রাণাং গুরুগোব্রতিনান্তথা। স্ত্রীরাজমহতাং নিন্দাং বর্জয়েচ্চ কথাব্রতী ॥ কামং ক্রোধং মদং দানং মৎসরং লোভমেব চ। দম্ভং মোহং তথা দ্বেষং দূরয়েচ্চ কথাব্রতী ॥ রজস্বলান্ত্যজম্লেচ্ছপতিতব্রাত্যকৈস্তথা। দ্বিজদ্বিড়্‌বেদবাহ্যৈশ্চ ন বদেদ্যঃ কথাব্রতী ॥ সত্যং শৌচং দয়াং মৌনং মার্জনং বিনয়ন্তথা। উদারং মানসং তদ্বৎ কুর্য্যাদেবং কথাব্রতী ॥ দরিদ্রশ্চ ক্ষয়ী রোগী নির্ভাগ্যঃ পাপকর্ম্মবান্।

অনপত্যো মোক্ষকামঃ শৃণুয়াৎ স কথামিমাং ॥ অপুষ্পা কাকবন্ধ্যা চ বন্ধ্যা যা চ মৃতার্ভকা। স্রবদ্গর্ভা চ যা নারী তয়া শ্রাব্যা প্রযত্নতঃ ॥ এতেন বিধিনা দত্তং তদক্ষয়তরং ভবেৎ। অত্যুত্তমাদিনা সপ্তকোটিযজ্ঞফলপ্রদা ॥ এবং কৃত্বা ব্রতবিধিমুদ্যাপনমথাচরেৎ। তজ্জন্মাষ্টমীব্রতবৎ কর্ত্তব্যং ফলকাঙ্ক্ষিভিঃ ॥ অকিঞ্চনেষু ভক্তেষু প্রায়ো নোদ্যাপনাগ্রহঃ। শ্রবণেনৈব পূতাস্তে নিষ্কামা বৈষ্ণবা যতঃ ॥ এবং নগাহযজ্ঞেঽস্মিন্ সমাপ্তে শ্রোতৃভিস্তদা। পুস্তকস্য চ বক্তুশ্চ পূজা কার্য্যাতিভক্তিতঃ ॥ প্রসাদস্তুলসীমালা শ্রোতৃভ্যশ্চাথ দীয়তাং। মৃদঙ্গতালললিতং কীর্ত্তনং কীর্ত্ত্যতাং ততঃ ॥ জয়শব্দো নমঃশব্দঃ শঙ্খশব্দশ্চ গীয়তাং। বিপ্রেভ্যো যাচকেভ্যশ্চ বিত্তমন্নঞ্চ দীয়তাং ॥ বিরক্তশ্চেদ্ভবেৎ শ্রোতা গীতা বাচ্যা পরেঽহনি। গৃহস্থশ্চেত্তদা হোমঃ কর্ত্তব্যঃ কর্ম্মশান্তয়ে ॥ প্রতিশ্লোকঞ্চ জুহুয়াদ্বিধিনা দশমস্য চ। পায়সং দধি সর্পিশ্চ তিলাদিমধুসংযুতং ॥ অথবা হবনং কুর্য্যাদ্গায়ত্র্যা সুসমাহিতঃ। তন্ময়ত্বাৎ পুরাণস্য পরমস্যাস্য তত্ত্বতঃ ॥ হোমাশক্তৌ বুধো হৌম্যং দদ্যাত্তৎফলসিদ্ধয়ে। নানাচ্ছিদ্রনিরোধার্থং ন্যূনতাধিক্যতাখ্যয়োঃ ॥ দোষয়োঃ প্রশমার্থস্তু পঠেন্নামসহস্রকং। তেন স্যাৎ সফলং সর্ব্বং নাস্ত্যস্মাদধিকং যতঃ ॥ দ্বাদশ ব্রাহ্মণান্ পশ্চাদ্ভোজয়েন্মধুপায়সৈঃ। দদ্যাৎ সুবর্ণং ধেনুঞ্চ ব্রতপূর্ণত্বসিদ্ধয়ে ॥ শক্তৌ পলত্রয়মিতং

স্বর্ণসিংহং বিধায় চ। তত্রাস্য পুস্তকং স্থাপ্য লিখিতং ললিতাক্ষরং ॥ সংপূজ্যাবাহনাদ্যৈস্তদুপচারৈঃ সদক্ষিণং। বস্ত্রভূষণগন্ধাদ্যৈঃ পূজিতায় যতাত্মনে॥ আচার্য্যায় সুধীর্দত্ত্বা মুক্তঃ স্যাদ্ভববন্ধনৈঃ। এবং কৃতে বিধানে চ সর্ব্বপাপনিবারণে। ফলদং স্যাৎ পুরাণন্তু শ্রীমদ্ভাগবতং শুভং ॥ ধর্ম্মার্থকামমোক্ষাণাং সাধনং নাত্র সংশয়ঃ। ইতি তে কথিতং সর্ব্বং কিং ভূয়ঃ শ্রোতুমিচ্ছসি ॥ শ্রীমদ্ভাগবতেনৈব ভক্তিমুক্তিঃ প্রকাশিতা। ইতি পাদ্মোত্তরখণ্ডে শ্রীভাগবতমাহাত্ম্যে ৬ অধ্যায়ঃ ॥

পারায়ণিকঃ (পুং) পাঠকঃ। ছাত্রঃ। পারায়ণতুরায়ণেত্যাদিনা ঠক্প্রত্যয়নিষ্পন্নঃ। ইতি সিদ্ধান্তকৌমুদী ॥

পারারুকঃ (পুং) প্রস্তরঃ। ইতি শব্দরত্নাবলী ॥

পারাবতঃ (পুং) পারাবতি দেশে জাতঃ পক্ষিবিশেষঃ। পায়রা ইতি ভাষা। তৎপর্য্যায়ঃ। ছেদ্যকণ্ঠঃ ২ কপোতঃ ৩ রক্তলোচনঃ ৪। ইতি রভসঃ ॥ পারাপতঃ ৫ কলরবঃ ৬ অরুণলোচনঃ ৭ মদনকাকুরবঃ ৮ কামী ৯ রক্তেক্ষণঃ ১০ মদনমোহনবাগ্বিলাসী ১১ কণ্ঠীরবঃ ১২ গৃহকপোতকঃ ১৩। অস্য মাংসগুণাঃ। স্নিগ্ধত্বং। মধুরত্বং। গুরুত্বং। শীতলত্বং। পিত্তাস্রদাহনাশিত্বং। বল্যত্বং। বীর্য্যবৃদ্ধিদাতৃত্বং। ইতি রাজনির্ঘণ্টঃ ॥ রসে পাকে স্বাদুত্বং। কষায়ত্বং। বিশদত্বঞ্চ। ইতি রাজবল্লভঃ ॥ তদ্ভেদো যথা। পারাপতোহন্যো বঙ্গেশী কামুকো ঘুল্ঘুলারবঃ। পারাবতাঙ্ঘ্রিপিচ্ছশ্চ জ্ঞেয়ো গলরবশ্চ সঃ ॥ ইতি রাজনির্ঘণ্টঃ ॥ মর্কটঃ। তিন্দুকঃ। ইতি মেদিনী ॥ গিরিঃ। ইতি হেমচন্দ্রঃ ॥

পারাবতপদী (স্ত্রী) পারাবতাঙ্ঘ্রিঃ। নয়াফট্কী ইতি ভাষা। ইতি রত্নমালা ॥ কাকজঙ্ঘা। ইতি রাজনির্ঘণ্টঃ ॥

পারাবতাঙ্ঘ্রিঃ (পুং) জ্যোতিষ্মতী। ইত্যমরঃ ॥

পারাবতাঙ্ঘ্রিপিচ্ছঃ (পুং) বঙ্গেশীয়পারাবতঃ। ইতি রাজনির্ঘণ্টঃ ॥

পারাবতী (স্ত্রী) গোপগীতং। নদীভেদঃ। লবলীফলং। ইতি মেদিনী ॥

পারাবারং (ক্লী) তটদ্বয়ং। ইতি মেদিনী ॥

পারাবারঃ (পুং) সমুদ্রঃ। ইত্যমরঃ ॥

পারাবারীণঃ (ত্রি) পারাবারে গচ্ছতি যঃ। পারাবারশব্দাৎ খীন্প্রত্যয়নিষ্পন্নঃ ॥

পারাশরং (ক্লী) পরাশরোক্তভিক্ষুসূত্রং। ইতি পারাশরিশব্দটীকায়াং ভরতঃ ॥

পারাশরঃ (পুং) ব্যাসদেবঃ। ইতি শব্দরত্নাবলী ॥ পরাশরসম্বন্ধিনি ত্রি ॥

পারাশরকল্পিকঃ (পুং) পারাশরকল্পাধ্যায়ী। পারাশরকল্পবেত্তা। ইতি সিদ্ধান্তকৌমুদী ॥

পারাশরিঃ (পুং) বেদব্যাসঃ। ইতি ভূরিপ্রয়োগঃ ॥

পারাশরী [ন্] (পুং) মস্করী। চতুর্থাশ্রমী। পরাশরেণ প্রোক্তং ভিক্ষুসূত্রং ইত্যর্থে ঞে পারাশরং তদ্বিদ্যতেঽস্যাধ্যয়নায়েতি নৈকাজাদিতি ইন্। ইত্যমরভরতৌ ॥

পারাশর্য্যঃ (পুং) ব্যাসঃ। ইতি শব্দরত্নাবলী ॥

পারিকাঙ্ক্ষী [ন্] (পুং) তপস্বী। ইত্যমরঃ॥ মস্করী। ইতি হেমচন্দ্রঃ॥

পারিজাতঃ (পুং) পারিভদ্রবৃক্ষঃ। সুরতরুঃ। ইতি মেদিনী॥ অস্যোৎপত্তিহরণে যথা। অদিত্যানুকৃতানুজ্ঞো দেবরাজো জনার্দ্দনং। যথাবৎ পূজয়ামাস বহুমানপুরঃসরং॥ ততো দদর্শ কৃষ্ণোঽপি সত্যভামাসহায়বান্। দেবোদ্যানানি সর্ব্বাণি নন্দনাদীনি সত্তম॥ দদর্শ চ সুগন্ধাঢ্যং মঞ্জরীপুঞ্জধারিণং। শৈত্যাহ্লাদকরং দিব্যং বালপল্লবশোভিতং॥ মথ্যমানেঽমৃতে জাতং জাতরূপময়ত্বচং। পারিজাতং জগন্নাথঃ কেশবঃ কেশিসূদনঃ॥ তং দৃষ্ট্বা প্রাহ গোবিন্দং সত্যভামা দ্বিজোত্তম। কস্মান্ন দ্বারকামেষ নীয়তে কৃষ্ণ পাদপঃ॥ ইত্যুক্তঃ স প্রহস্যৈনং পারিজাতং গরুত্মতি। আরোপয়ামাস হরিস্তমূচুর্ব্বনচারিণঃ॥ ভোঃ শচী দেবরাজস্য মহিষী তৎপরিগ্রহং। পারিজাতং ন গোবিন্দ হর্ত্তুমর্হসি পাদপং॥ শচীবিভূষণার্থায় দেবৈরমৃতমন্থনে। উৎপাদিতোঽয়ং ন ক্ষেমী গৃহীত্বৈনং গমিষ্যসি॥ অবশ্যমস্য দেবেন্দ্রো নিষ্কৃতিং কৃষ্ণ যাস্যতি। বজ্রোদ্যতকরং শক্রমনুযাস্যন্তি চামরাঃ॥ তদলং সকলৈর্দেবৈর্বিগ্রহেণ তবাচ্যুত। বিপাককটু যৎ কর্ম্ম ন তচ্ছংসন্তি পণ্ডিতাঃ॥ ইত্যুক্তে তৈরুবাচৈতান্ সত্যভামাতিকোপিনী। কা শচী পারিজাতস্য কোঽয়ং শক্রঃ সুরাধিপঃ॥ সামান্যঃ সর্ব্বলোকানাং যদ্যেযোঽমৃতমন্থনে। সমুৎপন্নঃ সুরাঃ কস্মাদেকো গৃহ্লাতি বাসবঃ॥ যথা সুধা যথৈবেন্দুর্যথা শ্রীর্ব্বনরক্ষিণঃ। সামান্যঃ সর্ব্বলোকস্য পারিজাতস্তথা তরুঃ॥ ভর্ত্তৃবাহুমহাগর্ব্বা রুণদ্ধ্যেনং যথা শচী। তৎ কথ্যতামলং ক্ষান্ত্যা সত্যাহারয়তি দ্রুমং॥ কথ্যতাং বৈ দ্রুতং গত্বা পৌলম্যাং বচনং মম। সত্যভামা বদত্যেতদিতি গর্ব্বোদ্ধতাক্ষরং॥ যদি ত্বং দয়িতা ভর্ত্তুর্যদি বশ্যঃ পতিস্তব। মদ্ভর্ত্তুর্হরতো বৃক্ষং তৎ কারয় নিবারণং॥ জানামি তে পতিং শক্রং জানামি ত্রিদশেশ্বরং। পারিজাতং তথাপ্যেনং মানুষী হারয়ামি তে॥ শ্রীপরাশর উবাচ। ইত্যুক্তা রক্ষিণো গত্বা শচ্যা ঊচুর্যথোদিতং। শচী চোৎসাহয়ামাস শ্রুতার্থা ত্রিদশাধিপং॥ ততঃ সমস্তদেবানাং সৈন্যৈঃ পরিবৃতো হরিঃ। প্রযযৌ পারিজাতার্থমিন্দ্রো যোধয়িতুং দ্বিজ॥ ততঃ পরিঘনিস্ত্রিংশগদাশূলবরায়ুধাঃ। বভূবুস্ত্রিদশাঃ সজ্জাঃ শক্রে বজ্রকরে স্থিতে॥ ততো নিরীক্ষ্য গোবিন্দো নাগরাজোপরিস্থিতং। শক্রং দেবপরীবারং যুদ্ধায় সমুপস্থিতং॥ চকার শঙ্খনির্ঘোষং দিশঃ শব্দেন পূরয়ন্। মুমোচ চ শরব্রাতং সহস্রাযুতসম্মিতং॥ ছিন্নেষ্বশেষবাণেষু শস্ত্রেষ্বস্ত্রেষু সত্বরং। জগ্রাহ বাসবো বজ্রং কৃষ্ণশ্চক্রং সুদর্শনং॥ ততো হাহাকৃতং সর্ব্বং ত্রৈলোক্যং দ্বিজসত্তম। বজ্রচক্রধরৌ দৃষ্ট্বা দেবরাজজনার্দ্দনৌ॥ ক্ষিপ্তং বজ্রমথেন্দ্রেণ জগ্রাহ ভগবান্ হরিঃ। ন

মুমোচ তথা চক্রং শক্র তিষ্ঠেতি চাব্রবীৎ ॥ প্রনষ্টবজ্রং দেবেশং গরুড়ক্ষতবাহনং । সত্যভামাব্রবীদ্বীরং পলায়নপরায়ণং ॥ ত্রৈলোক্যেশ্বর নো যুক্তং শচীভর্ত্তুঃ পলায়নং । পারিজাতস্রগাভোগা ত্বামুপস্থাস্যতে শচী ॥ শ্রীপরাশর উবাচ । ইত্যুক্তো বৈ নিববৃতে দেবরাজস্তয়া দ্বিজ । প্রাহ চৈনামলং চণ্ডি সখি খেদাতিবিস্তরৈঃ ॥ ন চাপি সর্গসংহারস্থিতিকর্ত্তাখিলস্য যঃ । জিতস্য তেন মে ব্রীড়া জায়তে বিশ্বরূপিণা ॥ যস্মিন্ জগৎ সকলমেতদনাদিমধ্যে যস্মাদ্যতশ্চ ন ভবিষ্যতি সর্ব্বভূতাৎ। তেনোদ্ভবপ্রলয়পালনকারণেন ব্রীড়া কথং ভবতি দেবি নিরাকৃতস্য ॥ সংস্তুতো ভগবানিত্থং দেবরাজেন কেশবঃ । প্রহস্য ভাবগম্ভীরমুবাচেন্দ্রং দ্বিজোত্তম ॥ দেবরাজো ভবানিন্দ্রো বয়ং মর্ত্যা জগৎপতে। ক্ষন্তব্যং ভবতৈবৈতদপরাধং কৃতং ময়া ॥ পারিজাততরুশ্চায়ং নীয়তামুচিতাস্পদং । গৃহীতোঽয়ং ময়া শক্র সত্যা বচনকারণাৎ ॥ শ্রীশক্র উবাচ । বিমোহয়সি মামীশ মর্ত্ত্যোঽহমিতি কিং বদন্ । জানীমস্ত্বাং ভগবতো ন তু সূক্ষ্মবিদো বয়ং ॥ নীয়তাং পারিজাতোঽয়ং কৃষ্ণ দ্বারবতীং পুরীং । মর্ত্ত্যলোকে ত্বয়া মুক্তে নায়ং বৈ স্থাস্যতে ভুবি ॥ তথেত্যুক্ত্বা চ দেবেন্দ্রমাজগাম ভুবং হরিঃ। হর্ষমুৎপাদয়ামাস দ্বারকাবাসিনাং দ্বিজ ॥ অবতীর্য্যাথ গরুড়াৎ সত্যভামাসহায়বান্ । নিষ্কুটে স্থাপয়ামাস পারিজাতং মহাতরুং ॥ যমভ্যেত্য জনঃ সর্ব্বো জাতিং স্মরতি পৌর্ব্বিকীং । বাস্যতে যস্য পুষ্পাণাং গন্ধেনোর্ব্বী ত্রিযোজনা ॥ ততস্তে যাদবাঃ সর্ব্বে দেহবন্ধানমানুষান্ । দদৃশুঃ পাদপে তস্মিন্ কুর্ব্বন্তো মুখদর্শনং ॥ ইতি বিষ্ণুপুরাণে পঞ্চমেঽংশে পারিজাতহরণে ৩০ । ৩১ অধ্যায়ঃ ॥

পারিজাতকঃ (পুং) দেবতরুঃ । তৎপর্য্যায়ঃ । মন্দারঃ ২ । ইত্যমরঃ ॥ পারিণোঽদ্রের্জাতঃ পারিজাতঃ ততঃ স্বার্থে কঃ । পারে জাতো বিষ্ণুপদ্যাঃ পারিজাতেতি শব্দিতঃ । ইত্যাগমঃ ॥ * ॥ পারিভদ্রবৃক্ষঃ । পালিতামাদার ইতি ভাষা । পারি পারং প্রাপ্তুং জাতং জন্ম যস্য । পারিভদ্রে তু মন্দারুর্ম্মন্দারঃ পারিজাতকঃ । ইতি হড্ডচন্দ্রঃ ॥ ইত্যমরটীকায়াং ভরতঃ ॥

পারিণায্যং (ক্লী) গৃহোপকরণং । তত্তু শয্যাসনাদি । যথা মনুঃ । অর্থস্য সংগ্রহে চৈনাং ব্যয়ে চৈব নিযোজয়েৎ । শৌচে ধর্ম্মেঽন্নপক্তৌ চ পারিণায্যস্য রক্ষণে ॥ পারিণায্যস্য গৃহোপকরণস্য শয্যাসনাদেঃ । ইত্যুদ্বাহতত্ত্বং ॥ * ॥ পরিণয়নকাললব্ধং স্ত্রীধনং । যথা । মাতুঃ পরিণয়নকাললব্ধন্তু পুত্রসত্ত্বেঽপি ক্রমেণ অনূঢ়োঢ়দুহিত্রোরেবাধিকারঃ । মাতুঃ পারিণায্যং স্ত্রিয়ো ভজেরন্নিতি বশিষ্ঠোক্তেঃ । ইতি দায়তত্ত্বং ॥

পারিণায্যং (ত্রি) পরিণয়লব্ধং ধনং । যথা । মাতুঃ পারিণায্যং স্ত্রিয়ো বিভজেরন্ । ইতি দায়ভাগধৃতবশিষ্ঠবচনং ॥

পারিণাহ্যং (ত্রি) গৃহোপকরণশয্যাসনকুণ্ডকটাহাদি। যথা। অর্থস্য সংগ্রহে চৈনাং ব্যয়ে চৈব নিযোজয়েৎ। শৌচে ধর্ম্মেঽন্নপক্ত্যাঞ্চ পারিণাহ্যস্য চেক্ষণে॥ ইতি মানবে ৯ অধ্যায়ঃ॥ অস্য ব্যাখ্যা যথা। পারিণাহ্যস্য গৃহোপকরণস্য শয্যাসনকুণ্ডকটাহাদেরবেক্ষণে এনাং নিযোজয়েৎ। ইতি কুল্লূকভট্টঃ॥

পারিতথ্যা (স্ত্রী) সীমন্তিকাস্থিতস্বর্ণাদিরচিতপট্টিকা। সিঁতী ইতি ভাষা। তৎপর্য্যায়ঃ। বালপাশ্যা ২। ইত্যমরঃ॥

পারিতোষিকং (ত্রি) আনতিকরং। পরিতোষজনকদ্রব্যং। যথা। মমাপি চন্দ্রশেখর শরাসনারোপণপ্রথমবাদিনঃ পারিতোষিকং ধারয়সি। ইতি মুরারিঃ॥

পারীন্দ্রঃ (পুং) সিংহঃ। ইতি হেমচন্দ্রঃ॥

পারিপন্থিকঃ (পুং) চৌরঃ। ইতি হেমচন্দ্রঃ॥

পারিপাট্যং (ক্লী) পরিপাট্যা ভাবঃ। পরিপাটীশব্দাৎ ভাবে ষ্যপ্রত্যয়ঃ॥

পারিপাত্রঃ (পুং) পর্ব্বতবিশেষঃ। তৎপর্য্যায়ঃ। পারিযাত্রঃ ২। ইতি শব্দরত্নাবলী॥ স তু বিন্ধ্যস্য পশ্চিমে মালবদেশস্য সীমাপর্ব্বতঃ॥

পারিপাত্রকঃ (পুং) পারিপাত্রপর্ব্বতঃ। ইত্যমরঃ॥

পারিপার্শ্বিকঃ (পুং) নট্যাঃ পার্শ্বস্থঃ। ইতি হেমচন্দ্রঃ॥ পার্শ্ববর্ত্তী। যথা। মাঠরঃ পিঙ্গলো দণ্ডশ্চণ্ডাংশোঃ পারিপার্শ্বিকাঃ। ইত্যমরঃ॥

পারিপ্লবং (ত্রি) চঞ্চলং। ইত্যমরঃ॥ আকুলঃ। ইতি মেদিনী॥

পারিভদ্রঃ (পুং) বৃক্ষবিশেষঃ। পালিতামাদার ইতি ভাষা। তৎপর্য্যায়ঃ। নিম্বতরুঃ ২ মন্দারঃ ৩ পারিজাতকঃ ৪। ইত্যমরঃ॥ রক্তকুসুমঃ ৫ কৃমিঘ্নঃ ৬ বহুপুষ্পঃ ৭ রক্তকেসরঃ ৮। ইতি রাজনির্ঘণ্টঃ॥ অস্য গুণঃ। অনিলশ্লেষ্মশোথমেদঃকৃমিনাশিত্বং। অস্য পুষ্পগুণঃ। পিত্তরোগকর্ণব্যাধিনাশিত্বং। ইতি ভাবপ্রকাশঃ॥ নিম্ববৃক্ষঃ। দেবদারু। ইতি মেদিনী॥ সরলবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

পারিভদ্রকঃ (পুং) দেবদারুবৃক্ষঃ। ইত্যমরঃ॥ নিম্ববৃক্ষঃ। কুষ্ঠৌষধে ক্লী। ইতি রাজনির্ঘণ্টঃ॥

পারিভাব্যং (ক্লী) কুষ্ঠৌষধং। ইত্যমরঃ॥ পরিভুবো ভাবঃ। জামিনী ইতি ভাষা। যথা। সাক্ষিত্বং পারিভাব্যঞ্চ দানং গ্রহণমেব চ। বিভক্তা ভ্রাতরঃ কুর্য্যুর্নাবিভক্তাঃ পরস্পরং॥ ইতি দায়ভাগঃ॥

পারিভাষিকং (ক্লী) পরিভাষয়ার্থবোধকং পদং। যথা। তত্রাধুনিকসঙ্কেতঃ পরিভাষা তয়া অর্থবোধকং পদং পারিভাষিকং। যথা শাস্ত্রকারাদিসঙ্কেতিতনদীবৃদ্ধ্যাদিপদং। ইতি শক্তিবাদে গদাধরঃ॥

পারিমাণ্ডল্যং (ক্লী) পরমাণুপরিমাণং। যথা। পারিমাণ্ডল্যভিন্নানাং কারণত্বমুদাহৃতং। ইতি ভাষাপরিচ্ছেদঃ॥

পারিমুখিকঃ (ত্রি) পরিমুখেণ তিষ্ঠতি যঃ।

সম্মুখবর্ত্তী। পরিমুখশব্দাৎ ষ্ণিকপ্রত্যয়নিষ্পন্নঃ ॥

পারিযাত্রঃ (পুং) পারিপাত্রপর্ব্বতঃ। ইতি শব্দরত্নাবলী ॥

পারিযাত্রিকঃ (পুং) পারিযাত্রঃ। ইতি হেমচন্দ্রঃ ॥

পারিযানিকঃ (পুং) অধ্বরথঃ। পরিঘাতিকোঽপি পাঠঃ। ইতি হেমচন্দ্রঃ ॥

পারিরক্ষকঃ (পুং) মস্করী। তাপসঃ। ইতি হেমচন্দ্রঃ ॥

পারিশঃ (পুং) বৃক্ষবিশেষঃ। পলাশপিপুল ইতি গজহণ্ড ইতি চ ভাষা। তৎপর্য্যায়ঃ। ফলীশঃ ২ কপিচূতঃ ৩ কমণ্ডলুঃ ৪ গর্দ্দভাণ্ডঃ ৫ কন্দরালঃ ৬ কপীতনঃ ৭ সুপার্শ্বকঃ ৮। অস্য গুণাঃ। দুর্জরত্বং। স্নিগ্ধত্বং। ক্রিমিশুক্রকফপ্রদত্বং। ফলে অম্লত্বং। মূলে মধুরত্বং। কষায়ত্বং। স্বাদুমজ্জকত্বঞ্চ। ইতি ভাবপ্রকাশঃ ॥

পারিষদঃ (পুং) পরিষদি তিষ্ঠতি যঃ। সভাস্থঃ। তৎপর্য্যায়ঃ। সভ্যঃ ২ সভাস্তারঃ ৩ সভাসৎ ৪ পরিষদ্বলঃ ৫ পর্ষদ্বলঃ ৬ পারিষদ্যঃ ৭ পার্ষদঃ ৮। ইতি শব্দরত্নাবলী ॥ পরিষৎসম্বন্ধিনি ত্রি ॥

পারিষদ্যঃ (পুং) পারিষদঃ। ইতি শব্দরত্নাবলী ॥

পারিহারিকঃ (ত্রি) পরিহারকর্ত্তা। পরিহারং করোতি যঃ। ইত্যর্থে ষ্ণিকপ্রত্যয়নিষ্পন্নঃ ॥

পারিহার্য্যঃ (পুং) বলয়ঃ। ইত্যমরঃ ॥ পরিহারত্বে ক্লী ॥

পারিহাস্যং (ক্লী) পরিহাসস্য ভাবঃ। পরিহাসদ্বারা কৃতং। যথা।— সাঙ্কেত্যং পারিহাস্যং বা স্তোভং হেলনমেব বা। বৈকুণ্ঠনামগ্রহণমশেষাঘহরং বিদুঃ ॥ ইতি শ্রীভাগবতে ৬ স্কন্ধে অজামিলোপাখ্যানে ২ অধ্যায়ঃ ॥ নন্বয়ং পুত্রনামাগ্রহীৎ ন ভগবন্নাম তত্রাহুঃ। সাঙ্কেত্যং পুত্রাদৌ সঙ্কেতিতং। পারিহাস্যং পরিহাসেন কৃতং। স্তোভং গীতালাপপূরণার্থে কৃতং। হেলনং কিং বিষ্ণুনেতি সাবজ্ঞমপি চ বৈকুণ্ঠনামোচ্চারণং। ইতি তট্টীকায়াং শ্রীধরস্বামী ॥

পারী (স্ত্রী) পূরঃ। জলসমূহঃ। কর্করী। হস্তিপাদরজ্জুঃ। ইতি মেদিনী ॥ পাত্রী। পরাগঃ। ইতি বিশ্বঃ ॥ পানপাত্রং। ইতি ত্রিকাণ্ডশেষঃ ॥ দোহনপাত্রং। ইতি জটাধরঃ ॥

পারীণঃ (ত্রি) পারগমনকর্ত্তা। পারং গচ্ছতি ইত্যর্থে খীনপ্রত্যয়নিষ্পন্নঃ ॥

পারীন্দ্রঃ (পুং) সিংহঃ। অজগরসর্পঃ। ইতি হেমচন্দ্রঃ ॥

পারীরণঃ (পুং) কমঠঃ। দণ্ডঃ। পটশাটকঃ। ইতি বিশ্বঃ ॥

পারীক্ষিতঃ (পুং) পরীক্ষিতরাজঃ। ইতি শব্দরত্নাবলী ॥ জনমেজয়ঃ। পরীক্ষিতোঽপত্যং ইত্যর্থে ষ্ণপ্রত্যয়নিষ্পন্নঃ ॥

পারুঃ (পুং) বহ্নিঃ। সূর্য্যঃ। ইত্যুণাদিকোষঃ ॥

পারুষ্যং (ক্লী) অপ্রিয়ভাষণং। তৎপর্য্যায়ঃ। অভিবাদঃ ২। ইত্যমরঃ ॥ তত্তু চতুর্বিধবাঙ্ময়পাপান্তর্গতপাপবিশেষঃ। যথা।

পারুষ্যমনৃতঞ্চৈব পৈশুন্যঞ্চাপি সর্ব্বশঃ।
অসম্বদ্ধপ্রলাপশ্চ বাঙ্ময়ং স্যাচ্চতুর্ব্বিধং।
ইতি তিথ্যাদিতত্ত্বং॥ পরুষত্বং। দুর্ব্বাক্যং
ইতি মেদিনী॥ ইন্দ্রস্য বনং। ইতি বিশ্বঃ॥
অগুরু। ইতি শব্দচন্দ্রিকা॥

পারুষ্যঃ (পুং) বৃহস্পতিঃ। ইতি মেদিনী॥

পারেরকঃ (পুং) খড়্গঃ। ইতি শব্দমালা॥

পার্ঘটং (ক্লী) পাংশু। ইতি হারাবলী॥

পার্থঃ (পুং) পৃথিবীপালঃ। পৃথাপুত্ত্রঃ।
অর্জ্জুনবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

পার্থক্যং (ক্লী) পৃথক্‌ত্বং। পৃথক্ ইত্যস্য ভাব
ইত্যর্থে ষ্যঞ্প্রত্যয়নিষ্পন্নং॥

পার্থবং (ক্লী) পৃথুতা। পৃথোর্ভাব ইতি ভাবার্থে
ষ্ণপ্রত্যয়নিষ্পন্নং॥

পার্থিবং (ক্লী) তগরপুষ্পং। ইতি রাজনির্ঘণ্টঃ॥

পার্থিবঃ (পুং) রাজা। ইত্যমরঃ॥ শরাবঃ।
ইতি ত্রিকাণ্ডশেষঃ॥ পৃথিবীবিকৃতৌ ত্রি।
ইতি মেদিনী॥

পার্থিবী (স্ত্রী) সীতা। ইতি মেদিনী॥

পার্পরঃ (পুং) যমঃ। ইতি জটাধরঃ॥

পার্ব্বণঃ (পুং) মৃগবিশেষঃ। ইতি শব্দ-
চন্দ্রিকা॥ অমাবস্যাপর্ব্বসামান্যয়োঃ
কর্ত্তব্যশ্রাদ্ধং। যথা। অমাবস্যাং যৎ
ক্রিয়তে তৎ পার্ব্বণমুদাহৃতং। ক্রিয়তে
পর্ব্বণি বা যত্তৎ পার্ব্বণমুদাহৃতং॥ ইতি
ভবিষ্যপুরাণং॥ পর্ব্বণি যৎ ক্রিয়তে
ইত্যনেনামাবাস্যায়াঃ পর্ব্বত্বাত্তচ্ছ্রাদ্ধস্য
বৈদিকপ্রয়োগাধীনযৌগিকত্বেন পার্ব্বণত্ব-
প্রাপ্তৌ অমাবাস্যায়াং পৃথগভিধানং তদমা-
বাস্যাশ্রাদ্ধস্য রূঢ়িত্বার্থং তেন পার্ব্বণেন
বিধানেনেত্যাদৌ যৌগিকনানাবয়বশক্ত্য-
পেক্ষয়া একস্যাঃ সমুদায়শক্তের্লঘুত্বাৎ
অমাবাস্যাপার্ব্বণাতিদেশো লভ্যতে ন তু
পূপাষ্টকাদিপার্ব্বণধর্ম্মাতিদেশঃ। ইতি
শ্রাদ্ধতত্ত্বং॥ *॥ সামগানাং তস্য প্রয়োগো
যথা। বিপ্রাপ্রাপ্ত্যা শ্রাদ্ধকৃতৌ সুখার্থং
ক্রমসূচনং। শ্রাদ্ধপূর্ব্বদিনে মাংসস্ত্রীত্যাগ-
শ্চৈকভোজনং॥ শ্রাদ্ধাহে দন্তকাষ্ঠস্য
ত্যাগঃ স্নানং তথোষসি। যাম্যাস্যত্বং
পাদশৌচে বাস্ত্বর্চ্চা বিষ্ণুচিন্তনং॥ তস্মৈ
পূজা মূল্যদানং পরভূস্বামিনেঽথবা। তৎ
পিতৃভ্যশ্চাগ্রদানং রক্ষাদীপকুশদ্বিজাঃ॥
শ্রাদ্ধানুজ্ঞা চ গায়ত্ত্রী দেবতাভ্য ইতি
ত্রিধা। মৃজ্জলপ্রোক্ষণং রক্ষাজলস্থাপন-
মেকতঃ॥ পূর্ব্বং বিপ্রকরে তোয়ং কুশা-
সনমনন্তরং। দক্ষিণে দেববিপ্রস্য পিতৃ-
বিপ্রস্য বামতঃ॥ আবাহনার্ঘ্যে ন্যুব্জঞ্চ
ততো গন্ধাদিপঞ্চকং। ঐশানীক্রমতো
রেখা প্রাগগ্রা দেবমণ্ডলে॥ নৈর্ঋতী-
ক্রমতো রেখা দক্ষাগ্রা পিতৃমণ্ডলে।
পাত্রাণাং তেষু বিন্যাসো হোমপ্রশ্নোঽগ্নি-
হোমকঃ॥ হুতশেষপ্রদানঞ্চ পাত্রালম্ভোঽন্ন-
বেশনং। ইদমিত্যঙ্গুলেঃ ক্ষেপস্তূষ্ণীং
দৈবে যবস্য চ॥ পিত্রে মন্ত্রেণ নিঃক্ষেপ-
স্তিলস্যাপহতা ইতি। মধুনোঽন্নে চ
নিঃক্ষেপো গায়ত্ত্র্যাস্ত্রির্জপস্ততঃ॥ মধু-
বাতা ত্যৃচা চৈব মধুশব্দত্রয়েণ চ।
অন্নাভিমন্ত্রণং তস্য দানং জলনিবেদনং॥
গায়ত্ত্র্যাদিত্রিকজপোঽপ্যন্নহীনজপস্তথা।
দ্বিজাভাবেঽপি তৃপ্ত্যর্থং গায়ত্ত্র্যাদিত্রিকস্য

চ ॥ পুণ্যাখ্যানস্য চ জপঃ সতিলপ্রোক্ষিতে কুশে। অগ্নিদগ্ধেতিমন্ত্রাভ্যাং সতিলান্ন-নিবেদনং ॥ হস্তক্ষালশ্চাচমনং হরিস্মৃতি-র্জলস্য চ। পিত্রাদিক্রমতো দানং গায়ত্র্যাদিজপঃ পুনঃ॥ শেষান্নপিণ্ডয়োঃ প্রশ্নো নিহন্মীতি চ মণ্ডলে। অপহতানিহন্মিভ্যাং রেখাযুগ্মং পিতৃক্রমাৎ॥ আস্তরো দেবতে-ত্যস্য জপ আবাহনং তিলৈঃ। অবনে-জনদানঞ্চ মধুবাতা মধুত্রয়ং ॥ অক্ষন্নমী পিণ্ডদানং দর্ভলেপাপঘর্ষণং। আচমনং স্মৃতির্বিষ্ণোঃ পাত্রক্ষালাবনেজনং॥ অত্রে-ত্যাদিজপো বামাবর্ত্তেনোদঙ্মুখস্ততঃ। আবৃত্যামীজপশ্চৈব শ্বাসত্যাগোঽঞ্জলি-স্ততঃ॥ নম ইত্যাদিকজপো বাসোদানঞ্চ পূজনং। বসন্তায় জপশ্চৈব দ্বিজাগ্রভূমি-সেচনং॥ দৈবাদিব্রাহ্মণে দানং জলাদি-ত্রিতয়স্য চ। শিবা ইত্যাদিনাক্ষয্যমঘোরা গোত্রমিত্যপি ॥ সপবিত্রকুশাঃ পিণ্ডে স্বধাবাচনমূর্জনং। ন্যুব্জোত্থানং পিতুঃ পক্ষে দক্ষিণাদানমগ্রতঃ॥ বিশ্বেদেবাশ্চ দাতারো দেবতেতিজপস্ত্রিধা। বিসর্জনং বাজ ইতি আমাবেতি প্রদক্ষিণং॥ অন্নাদেঃ প্রতিপত্তিশ্চ বামদেব্যজপস্ত্রিধা। দীপপ্রচ্ছাদনং হস্তক্ষালমাচমনে তথা॥ অচ্ছিদ্রবাচনং বিষ্ণুস্মরণং শেষভোজনং। উপবাসদিনে ঘ্রাণং মাংসেতরাশিতা-ব্রতে॥ তদ্দিনে মৈথুনত্যাগঃ শ্রাদ্ধকৃচ্ছ্রাদ্ধ-ভোজিনোঃ॥ *॥ যজুষাং বিশেষো যথা। আস্তরো দেবতাভ্যশ্চ তিলপুষ্পজলৈ-স্ততঃ। অবনেজনপিণ্ডৌ চ হস্তালেপাপ-ঘর্ষণং॥ হস্তক্ষালশ্চাচমনং বিষ্ণোঃ সং-স্মরণায় বৈ। অত্রেত্যাদিজপো বামা-বর্ত্তেনোদঙ্মুখস্ততঃ॥ আবৃত্যামীজপশ্চৈব শ্বাসঃ প্রত্যবনেজনং। নীবীবিস্রংসনঞ্চৈব তথৈবাচমনদ্বয়ং॥ নমো বঃ পিতরঃ স্বস্বা-য়েত্যাদিকষড়ঞ্জলিঃ। ঋতুনত্যর্থমেবায়ং বাসঃ পিণ্ডপ্রপূজনং॥ দৈবাদিব্রাহ্মণে দানং জলাদিত্রিতয়স্য চ। শিবা ইত্যা-দিনাক্ষয্যমঘোরা গোত্রমিত্যপি॥ দাতারো-ঽস্মঞ্চনঞ্চৈব এতাঃ সত্যাশিষোঽস্ত্বিতি। সপবিত্রকুশাঃ পিণ্ডে স্বধাবাচনমূর্জনং॥ আঘ্রাণঞ্চৈব পিণ্ডানাং তেষামুত্তোলন-স্ততঃ। ন্যুব্জোত্থানং পিতুঃ পক্ষে দক্ষিণা-দানমগ্রতঃ॥ বিশ্বেদেবাশ্চ প্রীয়ন্তাং দৈবে বা জলমিত্যপি। বিসর্জনং বাজ ইতি আমাবেতি প্রদক্ষিণং॥ অন্যৎ সর্ব্বং সমানং। ইতি শ্রাদ্ধপ্রয়োগতত্ত্বং॥

পার্ব্বতঃ (পুং) মহানিম্বঃ। ঘোড়ানিম্ ইতি ভাষা। ইতি রত্নমালা॥ পর্ব্বতসম্বন্ধিনি ত্রি॥

পার্ব্বতী (স্ত্রী) দুর্গা। ইত্যমরঃ॥ তস্যা ব্যুৎপত্তির্যথা। তিথিভেদে কল্পভেদে পর্ব্ব-ভেদপ্রভেদতঃ। খ্যাতৌ তেষু চ বিখ্যাতা পার্ব্বতী তেন কীর্ত্তিতা॥ মহোৎসববিশে-ষশ্চ পর্ব্বস্বিতি প্রকীর্ত্তিতং। তস্যাধি-দেবী যা সা চ পার্ব্বতী পরিকীর্ত্তিতা॥ পর্ব্বতস্য সুতা দেবী সাবির্ভূতা চ পর্ব্বতে। পর্ব্বতাধিষ্ঠাতৃদেবী পার্ব্বতী তেন কীর্ত্তিতা॥ ইতি প্রকৃতিখণ্ডে দুর্গো-পাখ্যানে ৫৪ অধ্যায়ঃ॥ শল্লকী। গোপাল-

পুত্রিকা। ইতি মেদিনী ॥ দ্রৌপদী। জীবনী। ইতি বিশ্বঃ ॥ সৌরাষ্ট্রমৃত্তিকা। ইতি রত্নমালা॥ ক্ষুদ্রপাষাণভেদা। ধাতকী। সৈংহলী। ইতি রাজনির্ঘণ্টঃ ॥

পার্ব্বতীনন্দনঃ (পুং) কার্ত্তিকেয়ঃ। ইত্যমরঃ ॥

পার্ব্বতীয়কুমারঃ (পুং) পার্ব্বতীপুত্রঃ। যথা। স্বানুশাখবিশাখাশ্চ নৈগমেয়স্তথৈব চ। পার্ব্বতীয়াঃ কুমারাশ্চ চত্বারঃ পরিকীর্ত্তিতাঃ ॥ ইত্যগ্নিপুরাণং ॥

পার্ব্বতেয়ং (ক্লী) সৌবীরাঞ্জনং। ইতি শব্দচন্দ্রিকা ॥

পার্ব্বতেয়ঃ (পুং) সূর্য্যাবর্ত্তবৃক্ষঃ। সূলচিয়া ইতি ভাষা। ইতি রত্নমালা ॥ পর্ব্বতজাতে ত্রি ॥

পার্শবঃ (পুং) পর্শুধারিযোদ্ধা। পর্শুনা যুধ্যতে ইত্যর্থে ষ্ণপ্রত্যয়নিষ্পন্নঃ ॥

পার্শ্বং (ক্লী পুং) কক্ষাধোভাগঃ। পাশ ইতি ভাষা। ইত্যমরঃ ॥

পার্শ্বং (ক্লী) চক্রোপান্তং। পর্শুগণঃ। পার্শ্বাস্থিসমূহঃ। ইতি মেদিনী ॥

পার্শ্বঃ (পুং) জিনঃ। সমীপে ত্রি। ইতি হেমচন্দ্রঃ ॥

পার্শ্বকঃ (ত্রি) শাঠ্যেন বিভবান্বেষী। যথা। কুসৃত্যা বিভবান্বেষী পার্শ্বকঃ সন্ধিজীবকঃ। ইতি হেমচন্দ্রঃ ॥ স্বার্থে কে পার্শ্বার্থোঽপি ॥

পার্শ্বতঃ [স্] ব্য পার্শ্বাৎ। পার্শ্বে। ইত্যাদি। সর্ব্ববিভক্তেস্তসিবিধানাৎ। ইতি সংক্ষিপ্তসারব্যাকরণং ॥

পার্শ্বতীয়ঃ (ত্রি) পার্শ্বসম্বন্ধী। পার্শ্বতো ভবঃ। ইতি সিদ্ধান্তকৌমুদী ॥

পার্শ্বপরিবর্ত্তনং (ক্লী) কটিদানং। কর্ণিকাপরিবৃত্তিঃ। পাশফেরাণ ইতি ভাষা। শ্রীহরেঃ পার্শ্বপরিবর্ত্তনোৎসবো যথা। ভাদ্রস্য শুক্লৈকাদশ্যাং শয়নোৎসববৎ প্রভোঃ। কটিদানোৎসবং কুর্য্যাদ্বৈষ্ণবৈঃ সহ বৈষ্ণবঃ ॥ তথা চ ভবিষ্যোত্তরে। প্রাপ্তে ভাদ্রপদে মাসি একাদশ্যাং সিতেঽহনি। কটিদানং ভবেদ্বিষ্ণোর্মহাপাতকনাশনং ॥ জলাশয়ান্তিকং নীত্বা সংপূজ্যাভ্যর্চ্চ্য চ প্রভুং। কর্ণিকাপরিবৃত্তিঞ্চ দক্ষিণাঙ্গে প্রকল্পয়েৎ ॥ অস্য ব্যাখ্যা। শয়নোৎসবাৎ কথঞ্চিদ্বিশেষমনুবাদপূর্ব্বকং লিখতি। জলেতি ত্রিভিঃ কর্ণিকায়াঃ কট্যাঃ পরিবৃত্তিং দক্ষিণাঙ্গে প্রকল্পয়েদিতি পূর্ব্বং বামাঙ্গেন সুপ্তস্যাধুনা দক্ষিণাঙ্গেন শায়য়েদিত্যর্থঃ। তৎকালবিশেষশ্চ পূর্ব্বমেব নির্ণীতোঽস্তি। অভ্যর্থনামন্ত্রঃ। দেবদেব জগন্নাথ যোগিগম্য নিরঞ্জন। কটিদানং কুরুষ্বাদ্য মাসি ভাদ্রপদে শুভে ॥ মহাপূজাং ততঃ কৃত্বা বৈষ্ণবান্ পরিতোষ্য চ। দেবং স্বমন্দিরে নীত্বা যথাপূর্ব্বং নিবেশয়েৎ ॥ ইতি শ্রীহরিভক্তিবিলাসে ১৫ বিলাসঃ ॥

পার্শ্বপিপ্পলং (ক্লী) হরীতকীবিশেষঃ। গজহড় ইতি হিন্দীভাষা। ইতি ভাবপ্রকাশঃ ॥

পার্শ্বভাগঃ (পুং) পক্ষভাগঃ। হস্ত্যাদেঃ পার্শ্বদেশঃ। ইত্যমরঃ ॥

পার্শ্বশূলঃ (পুং ক্লী) শূলরোগবিশেষঃ

তস্যৌষধং। যথা। শতপুষ্পা দেবদারু শালপর্ণী বচাগুরু। কুষ্ঠং মাংসী সৈন্ধবঞ্চ পলমেকং পুনর্নবা ॥ পানে নস্যে তথাভ্যঙ্গে তৈলমেতৎ প্রদাপয়েৎ। হৃচ্ছূলং পার্শ্বশূলঞ্চ গণ্ডমালাঞ্চ নাশয়েৎ ॥ ইতি গারুড়ে ১৮৯ অধ্যায়ঃ ॥

পার্শ্বস্থঃ (পুং) পার্শ্বস্থিতনটঃ। ইতি হেমচন্দ্রঃ ॥ সমীপস্থিতে ত্রি ॥

পার্শ্বাস্থি (ক্লী) শরীরপার্শ্বস্থিতাস্থি। পাঁজরা ইতি ভাষা। তৎপর্য্যায়ঃ। পর্শুকা ২। ইত্যমরঃ ॥

পার্শ্বিকং (ত্রি) পার্শ্বস্যেদং। পার্শ্বজাতং। পার্শ্বশব্দাৎ ষ্ণিকপ্রত্যয়নিষ্পন্নং ॥

পার্শ্বৈকাদশী (স্ত্রী) ভাদ্রশুক্লৈকাদশী। তদ্বিবরণং পার্শ্বপরিবর্ত্তনশব্দে দ্রষ্টব্যং ॥

পার্শ্বোদরপ্রিয়ঃ (পুং) কর্কটঃ। ইতি হেমচন্দ্রঃ ॥

পার্ষতী (স্ত্রী) দ্রৌপদী। ইতি ত্রিকাণ্ডশেষঃ ॥

পার্ষদঃ (ত্রি) পারিষদঃ। ইতি শব্দরত্নাবলী ॥

পার্ষদ্যঃ (ত্রি) পার্ষদঃ। ইতি ভরতঃ ॥

পার্ষ্ণিঃ (পুং স্ত্রী) গুল্ফস্যাধোভাগঃ। পাদগ্রন্থ্যধরঃ। গোড়মুড়া ইতি গোড়ারি ইতি চ ভাষা। ইত্যমরঃ ॥ স তু গর্ভস্থস্য মাসদ্বয়েন ভবতি। ইতি সুখবোধঃ ॥ সৈন্যপৃষ্ঠং। ইতি মেদিনী ॥ পৃষ্ঠং। ইতি হলায়ুধঃ ॥ জিগীষা। যথা। সৈন্যপৃষ্ঠে পুমান্ পার্ষ্ণিঃ পশ্চাৎ পদজিগীষয়োঃ। ইতি রত্নকোষঃ ॥

পার্ষ্ণিঃ (স্ত্রী) উন্মদস্ত্রী। ইতি মেদিনী ॥ কুন্তী। ইতি ধরণিঃ ॥

পার্ষ্ণিগ্রাহঃ (পুং) পৃষ্ঠতঃ শত্রুঃ। শত্রুজয়োদ্যতস্য বিজিগীষোস্তৎশত্রুপক্ষপাতেন পার্ষ্ণিং পশ্চাৎ পদং গৃহ্লাতি যাতি যঃ। ইত্যমরভরতৌ ॥

পার্ষ্ণিত্রং (ক্লী) পশ্চাৎ রক্ষকসেনা। আতোঽনুপসর্গাৎ ক ইতি সূত্রেণ পার্ষ্ণিশব্দাৎ ত্রৈঙ্ধাতোঃ কপ্রত্যয়নিষ্পন্নং। ইতি সিদ্ধান্তকৌমুদী ॥

পাল ক রক্ষে। ইতি কবিকল্পদ্রুমঃ ॥ ক পালয়তি। হ্রস্ববতৈবেষ্টসিদ্ধে দীর্ঘিণোঽপি পাঠঃ। কানুবন্ধানামিদনুবন্ধবৎ ঞেরনিত্যতাং বোধয়তি। তেন পালতি পলতি ইত্যপি সিদ্ধং। ইতি দুর্গাদাসঃ ॥

পালঃ (পুং) পতদ্গ্রহঃ। পিক্‌দান্ ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥ পালকে ত্রি। যথা। দিবাবক্তব্যতা পালে রাত্রৌ স্বামিনি তদ্‌গৃহে। যোগক্ষেমেঽন্যথা চেত্তু পালো বক্তব্যতামিয়াৎ ॥ ইতি মনুঃ

পালকঃ (পুং) ঘোটকরক্ষকঃ। তৎপর্য্যায়ঃ। অশ্বরক্ষঃ ২ বল্লভঃ ৩। ইতি জটাধরঃ ॥ চিত্রকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥ পালনকর্ত্তরি ত্রি। যথা। গোপালকো গবাং গোষ্ঠে যস্তু ধূমং ন কারয়েৎ। মক্ষিকালীননরকে মক্ষিকাভিঃ স ভক্ষ্যতে ॥ ইতি প্রায়শ্চিত্ততত্ত্বং ॥

পালকাপ্যঃ (পুং) মুনিবিশেষঃ। তৎপর্য্যায়ঃ। করেণুভূঃ ২। ইতি হেমচন্দ্রঃ ॥ ধন্বন্তরিঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

পালঘ্নঃ (পুং) ছত্রা। ইত্যমরঃ ॥

পালঙ্কঃ (পুং) শল্লকী। শাকভেদঃ। পালঙ্ ইতি ভাষা। প্রাজিপক্ষী। বাজ ইতি ভাষা। ইতি মেদিনী॥

পালঙ্কী (স্ত্রী) কুন্দুরুনামগন্ধদ্রব্যং। ইত্যমরঃ॥ শাকভেদঃ। পালঙ্ ইতি ভাষা। অস্যা গুণাঃ। কফপিত্তবাতবিবন্ধনাশিত্বং। রূক্ষত্বঞ্চ। ইতি রাজবল্লভঃ॥

পালঙ্ক্যং (ক্লী) শাকভেদঃ। পালঙ্ ইতি ভাষা। তৎপর্য্যায়ঃ। পলক্যা ২ মধুরা ৩ ক্ষুরপত্রিকা ৪ সুপত্রা ৫ স্নিগ্ধপত্রা ৬ গ্রামীণা ৭ গ্রাম্যবল্লভা ৮। অস্য গুণাঃ। ঈষৎ কটুত্বং। মধুরত্বং। পথ্যত্বং। শীতলত্বং। রক্তপিত্তহরত্বং। গ্রাহিত্বং। পরমতর্পণত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

পালঙ্ক্যা (স্ত্রী) কুন্দুরুঃ। কুন্দুরুখোটী ইতি ভাষা। ইত্যমরঃ॥ পালঙ্কশাকঃ। তৎপর্য্যায়ঃ। বাস্তুকাকারা ২ ছুরিকা ৩ চীরিতচ্ছদা ৪। অস্যা গুণাঃ। বাতলত্বং। শীতত্বং। শ্লেষ্মলত্বং। ভেদনত্বং। গুরুত্বং। বিষ্টম্ভিত্বং। মদশ্বাসপিত্তরক্তবিষাপহত্বঞ্চ। ইতি ভাবপ্রকাশঃ॥

পালনং (ক্লী) সদ্যঃপ্রসূতায়া গোঃ ক্ষীরং। ইতি শব্দচন্দ্রিকা॥ রক্ষণং। যথা। অভিষেকাদিগুণযুক্তস্য রাজ্ঞঃ প্রজাপালনং পরমো ধর্ম্মঃ। ইতি মিতাক্ষরা॥

পালাশং (ক্লী) তমালপত্রং। তেজপাত ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

পালাশঃ (পুং) হরিদ্বর্ণঃ। তদ্বর্ণবিশিষ্টে পলাশবৃক্ষসম্বন্ধিনি চ ত্রি। ইত্য-

পালাশষণ্ডঃ (পুং) মগধদেশঃ। ইতি শব্দরত্নাবলী॥ পলাশসমূহশ্চ॥

পালিঃ (স্ত্রী) কর্ণলতাগ্রং। অশ্রিঃ। পঙ্‌ক্তিঃ। অঙ্কপ্রভেদঃ। ছাত্রাদিদেয়ং। ইতি মেদিনী॥ যূকা। জাতশ্মশ্রুস্ত্রী। প্রান্তঃ। সেতুঃ। কল্পিতভোজনং। প্রশংসা। উৎসঙ্গঃ। প্রস্থঃ। ইতি হেমচন্দ্রঃ॥

পালিকা (স্ত্রী) অশ্রিঃ। ইতি শব্দরত্নাবলী॥ কর্ণপত্রং। ইতি শব্দচন্দ্রিকা॥ দধ্যাদিচ্ছেদনী। তৎপর্য্যায়ঃ। কুন্তলিকা ২। ইতি হারাবলী॥

পালিতঃ (ত্রি) রক্ষিতঃ। যথা। চিত্রলেখা তমাজ্ঞায় পৌত্রং কৃষ্ণস্য যোগিনী। যযৌ বিহায়সা রাজন্ দ্বারকাং কৃষ্ণপালিতাং॥ ইতি শ্রীভাগবতীয়দশমস্কন্ধে ৬২ অধ্যায়ঃ॥ কায়স্থস্য পদ্ধতিবিশেষশ্চ॥

পালিন্দঃ (পুং) কুন্দুরুকঃ। ইতি রাজনির্ঘণ্টঃ॥

পালিন্দী (স্ত্রী) শ্যামালতা। ইতি রত্নমালা॥ পালিন্ধী। ত্রিবৃতা। ইতি দ্বিরূপকোষঃ॥

পালিন্ধী (স্ত্রী) কৃষ্ণত্রিবৃতা। ইত্যমরঃ॥

পালী (স্ত্রী) যুকা। সশ্মশ্রুযোষিৎ। ইতি মেদিনী॥ শ্রেণী। ইতি শব্দরত্নাবলী॥ স্থালী। ইতি শব্দচন্দ্রিকা॥

পাবকঃ (পুং) অগ্নিঃ। ইত্যমরঃ॥ বৈদ্যুতাগ্নিঃ। যথা। পাবকঃ পবমানশ্চ শুচিরগ্নিশ্চ তে ত্রয়ঃ। নির্ম্মথ্যঃ পবমানঃ স্যাদ্বৈদ্যুতঃ পাবকঃ স্মৃতঃ॥ যশ্চাসৌ তপতে সূর্য্যঃ শুচিরগ্নিস্ত্বসৌ স্মৃতঃ। ইতি কৌর্ম্মে ১২ অধ্যায়ঃ॥ স চ ব্রহ্মণো

মানসপুত্রাদভিমানিনামকাগ্নেঃ স্বাহায়াং জাতঃ। যথা। যোঽসাবগ্নিরভীমানী স্মৃতঃ স্বায়ম্ভুবেঽন্তরে। ব্রহ্মণো মানসঃ পুত্ত্রস্তস্মাৎ স্বাহা ব্যজীজনৎ॥ পাবকং পবমানঞ্চ শুচিরগ্নিশ্চ যঃ স্মৃতঃ। ইতি মাৎস্যে ৪৮ অধ্যায়ঃ॥ *॥ সদাচারঃ। বহ্নিমন্থঃ। চিত্রকঃ। ভল্লাতকঃ। বিড়ঙ্গঃ। ইতি মেদিনী॥ শোধয়িতৃনরঃ। ইতি হেমচন্দ্রঃ॥ রক্তচিত্রকঃ। কুসুম্ভঃ। ইতি রাজনির্ঘণ্টঃ॥

পাবকারণিঃ (পুং) অগ্নিমন্থঃ। ইতি শব্দমালা॥

পাবকিঃ (পুং) কার্ত্তিকেয়ঃ। যথা। কথং তং কৃত্তিকাপুত্ত্রমুক্তবান্ তং সুরং গুরুং। কথঞ্চ পাবকিরসৌ কথং বা মাতৃনন্দনঃ॥ ইতি বরাহপুরাণং॥

পাবনং (ক্লী) জলং। কৃচ্ছ্রং। ইতি মেদিনী॥ গোময়ং। ইতি শব্দচন্দ্রিকা॥ রুদ্রাক্ষং। কুষ্ঠং। ইতি রাজনির্ঘণ্টঃ॥ চিত্রকং। অধ্যাসঃ। প্রায়শ্চিত্তং। ইতি বিশ্বঃ॥

পাবনঃ (পুং) ব্যাসঃ। পাবকঃ। ইতি মেদিনী॥ সিহ্লকঃ। ইতি বিশ্বঃ॥ পীতভৃঙ্গরাজঃ। ইতি রাজনির্ঘণ্টঃ॥ সিদ্ধঃ। পবিত্রে পাবয়িতরি চ ত্রি। ইতি হেমচন্দ্রঃ॥

পাবনধ্বনিঃ (পুং) শঙ্খঃ। ইতি রাজনির্ঘণ্টঃ॥ পবিত্রশব্দশ্চ॥

পাবনী (স্ত্রী) হরীতকী। ইতি বিশ্বঃ॥ তুলসী। গৌঃ। ইতি রাজনির্ঘণ্টঃ॥ গঙ্গা। যথা। ব্রহ্মাণ্ডং খণ্ডয়ন্তী হরশিরসি জটাবল্লিমুল্লাসয়ন্তী স্বর্লোকাদাপতন্তী কনকগিরিগুহাগণ্ডশৈলাৎ স্খলন্তী। ক্ষৌণীপৃষ্ঠে লুঠন্তী দুরিতচয়চমূর্নির্ভরং ভর্ৎসয়ন্তী পাথোধিং পূরয়ন্তী সুরনগরসরিৎ পাবনী নঃ পুনাতু॥ ইতি শঙ্করাচার্য্যকৃতগঙ্গাষ্টকং॥

পাশঃ (পুং) কচান্তে সংহার্থঃ। কর্ণান্তে শোভনার্থঃ। ছাত্রাদ্যন্তে নিন্দার্থঃ। পক্ষ্যাদিবন্ধনং। ইতি বিশ্বঃ॥ শস্ত্রভেদঃ। ইতি শব্দরত্নাবলী॥

পাশকঃ (পুং) দ্যূতবিশেষঃ। পাশা ইতি ভাষা। তৎপর্য্যায়ঃ। অক্ষঃ২ দেবনঃ ৩। ইত্যমরঃ॥ সারিঃ ৪ শারিঃ ৫ সারঃ ৬ শারঃ ৭ পাশঃ ৮। ইতি শব্দরত্নাবলী॥

পাশপাণিঃ (পুং) বরুণঃ। ইতি হলায়ুধঃ॥

পাশবপালনং (ক্লী) ঘাসঃ। ইতি শব্দচন্দ্রিকা॥

পাশিতঃ (ত্রি) পাশযুক্তঃ। বদ্ধঃ। ইতি ধরণিঃ॥

পাশী [ন্] (পুং) বরুণঃ। ইত্যমরঃ॥ ব্যাধঃ। ইতি মেদিনী॥ যমঃ। ইতি কশ্চিৎ॥ পাশধরে ত্রি। ইতি বিশ্বঃ॥

পাশীকৃতঃ (ত্রি) পাশবদ্ধঃ। অভূততদ্ভাবে চ্বিপ্রত্যয়নিষ্পন্নঃ॥

পাশুপতঃ (পুং) বকপুষ্পং। পশুপত্যধিদৈবতঃ। তদ্ভক্তঃ। ইতি মেদিনী॥

পাশুপতব্রতং (ক্লী) পশুপতিব্রতবিশেষঃ। যথা। যথা পশুপতির্নিত্যং হত্বা সর্ব্বমিদং জগৎ। ন লিপ্যতে পুনঃ সোঽপি যো নিত্যং ব্রতমাচরেৎ॥ ইহজন্মকৃতং পাপ

পূর্ব্বজন্মকৃতঞ্চ যৎ। ব্রতং পাশুপতং নাম কৃত্বা হন্তি দ্বিজোত্তম ॥ দ্বাদশ্যামেকভক্তাশী ত্রয়োদশ্যামযাচিতং। চতুর্দ্দশ্যাং তথা নক্তমুপবাসং পরেঽহনি ॥ গোবৃষঞ্চৈব হৈরণ্যং রৌপ্যং তাম্রময়স্তথা। সৌবর্ণং কারয়েৎ পত্রং গুঞ্জাশীত্যা পৃথক্ পৃথক্ ॥ তত্রৈবোল্লেখয়েন্মূর্ত্তিং শিবায়াশ্চ শিবস্য চ। তৎপ্রমাণং বৃষং কুর্য্যাদ্রৌপ্যং হেম্নশ্চতুর্গুণৈঃ ॥ রৌপ্যাদষ্টগুণং তাম্রং তদর্দ্ধং বাপি কারয়েৎ। ক্ষারপত্রে সমারোপ্য বস্ত্রোত্তমযুতন্তথা ॥ ত্রয়োদশ্যামেকভক্তং রিক্তায়াং নক্তমাচরেৎ। কুর্য্যাদযাচিতং দর্শে পাদকৃচ্ছ্রব্রতঞ্চরেৎ ॥ গন্ধপুষ্পৈঃ স্থনৈবেদ্যৈর্ব্বস্ত্রাভরণদীপকৈঃ। গঙ্গাধরং সমভ্যর্চ্চ্য প্রার্থয়েৎ প্রবরং বরং ॥ গঙ্গাধর মহাদেব সর্ব্বলোকচরাচর। জহি মে সর্ব্বপাপানি পূজিতস্ত্বিহ শঙ্কর ॥ শঙ্করায় নমস্তুভ্যং সর্ব্বপাপহরায় চ। যথা যমং ন পশ্যামি তথা মে কুরু শঙ্কর ॥ যমমার্গং যথা শম্ভো ন পশ্যামি কদাচন। সংপূজিতো ময়া ভক্ত্যা তথা মে কুরু শঙ্কর ॥ গঙ্গাধর ধরাধীশ পরাৎপর বরপ্রদ। শ্রীকণ্ঠ নীলকণ্ঠস্ত্বমুমাকান্ত নমোঽস্তু তে ॥ সংপূজ্যৈবংবিধানেন প্রতিপদ্যাদিতে রবৌ। হৈরণ্যাদীন্ গোবৃষাংশ্চ ব্রাহ্মণেভ্যো নিবেদয়েৎ ॥ যথা ত্বং সর্ব্বগঃ সর্ব্বঃ সর্ব্ববাসস্ত সর্ব্বহৃৎ। ন লিপ্যসে বিকুর্ব্বাণস্তথা মাং কুরু শঙ্কর ॥ এবং স্তুত্বা নমস্কৃত্য বৃষাদীংশ্চ যথোদিতান্। গুর্ব্বাদিভ্যো দ্বিজেভ্যশ্চ শঙ্করঃ প্রীয়তামিতি ॥ এবং ব্রতমিদং কৃত্বা বৃষং দদ্যাদ্দ্বিজাতয়ে। যমমার্গং মহাঘোরং ন পশ্যতি কদাচন ॥ যঃ করোতি ব্রতেনৈব সর্ব্বপাপপ্রণাশনং। ন স লিপ্যেত পাপেন পদ্মপত্রমিবাম্ভসা ॥ ব্রহ্মহত্যাদিভিঃ পাপৈরগম্যাগমনাদিভিঃ। মুচ্যতে পাতকেভ্যোঽথ হ্যভক্ষ্যাপেয়জৈঃ পুমান্ ॥ যঃ করোতি মহাভাগ দানং সর্ব্বসুখাবহং। হত্বা পাপান্যশেষাণি স্বর্গলোকং স গচ্ছতি ॥ ইতি বহ্নিপুরাণে পাশুপতব্রতদানাধ্যায়ঃ ॥

পাশুপতাস্ত্রং (ক্লী) পশুপতেঃ শূলাস্ত্রং। তস্য স্বরূপং যথা। গজাননোঽপি সঞ্চিন্ত্য যত্তৎ পাশুপতং পরং। মহারূপং মহাকায়ং যুগান্তাগ্নিসমপ্রভং ॥ পঞ্চবক্ত্রং মহাঘোরং দশবাহুং ত্রিলোচনং। সৌম্যং ঘোরং সুঘোরাস্যমূর্দ্ধকেশং ভয়োৎকটং ॥ জটাভারেন্দুগঙ্গাহিধ্রিয়মাণং শিবাঙ্গজং। বেণুবীণাশঙ্খঘণ্টং ডমরুকারাবসংকুলং ॥ শিবারাবং ভয়াত্রাসি গৃধ্রবায়সচেষ্টিতং। উল্কাদণ্ডজ্বলজ্বালং গোনাশকৃতভূষণং ॥ ললম্মেখলনাগেন্দ্রং গজচর্ম্মার্দ্রবাসসং। কেকরং তর্জমানন্তু শূলখট্টাঙ্গধারিণং ॥ গ্রসমানং সমস্তেদং ত্রৈলোক্যং সচরাচরং। পুরতো বিঘ্ননাশস্য লেলিহানং ব্যবস্থিতং ॥ ইতি দেবীপুরাণং ॥

পাশুপাল্যং (ক্লী) বৈশ্যবৃত্তিঃ। পশূন্ গোমহিষ্যাদীন্ পালয়তি পশুপালঃ ঢাৎ যণ্। পশুপালস্য ভাবঃ কর্ম্ম বা ইত্যর্থে ষ্ণ্যপ্রত্যয়নিষ্পন্নং। ইত্যমরভরতৌ ॥

পাশ্চাত্যঃ (ত্রি) পশ্চাদ্ভবঃ। পশ্চিমদেশজাতঃ। ইতি মুগ্ধবোধব্যাকরণং ॥

পাশ্চাত্যাকরসম্ভবং (ক্লী) সাম্ভরীলবণং। তৎপর্য্যায়ঃ। রোমকং ২ রামলবণং ৩। ইতি রত্নমালা ॥

পাশ্যা (স্ত্রী) পাশসমূহঃ। ইত্যমরঃ ॥

পাষকঃ (পুং) পাদাভরণবিশেষঃ। পাযুলী ইতি ভাষা। যথা। রত্নপাষকষট্‌কৈশ্চ বিরাজিতপদাঙ্গুলৈঃ। ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ৪ অধ্যায়ঃ ॥

পাষণ্ডঃ (পুং) বেদবিরুদ্ধাচারবান্। সর্ব্ববর্ণচিহ্নধারী। বৌদ্ধক্ষপণকাদিঃ। ইতি ভরতঃ॥ তৎপর্য্যায়ঃ। সর্ব্বলিঙ্গী ২। ইত্যমরঃ॥ কৌলিকঃ ৩ পাষণ্ডিকঃ ৪। ইতি শব্দরত্নাবলী ॥ * ॥ পাষণ্ডাদিসম্ভাষণে দোষো যথা। তস্মাৎ পাষণ্ডিভিঃ পাপৈরালাপং স্পর্শনং ত্যজেৎ। বিশেষতঃ ক্রিয়াকালে যজ্ঞাদৌ চাপি দীক্ষিতঃ॥ ক্রিয়াহানির্গৃহে যস্য মাসমেকং প্রজায়তে। তস্যাবলোকনাৎ সূর্য্যং পশ্যেত মতিমান্ নরঃ॥ কিং পুনর্যৈস্তু সংত্যক্তা ত্রয়ী সর্ব্বাত্মনা দ্বিজ। পাষণ্ডভোজিভিঃ পাপৈর্ব্বেদবাদবিরোধিভিঃ ॥ পাষণ্ডিনো বিকর্ম্মস্থান্ বৈড়ালব্রতিকান্ শঠান্। হেতুকান্ বকব্রতীংশ্চ বাঙ্মাত্রেণাপি নার্চ্চয়েৎ ॥ দূরাপাস্তস্তু সংসর্গঃ সহাস্যা বাপি পাপিভিঃ। পাষণ্ডিভির্দুরাচারৈস্তস্মাত্তান্ পরিবর্জ্জয়েৎ ॥ এতে নগ্নাস্তবাখ্যাতা দৃষ্ট্যা শ্রাদ্ধোপঘাতকাঃ। যেষাং সম্ভাষণাৎ পুংসাং দিনপুণ্যং প্রণশ্যতি ॥ এতে পাষণ্ডিনামানো হ্যেতান্ন আলপেদ্বুধঃ। পুণ্যং নশ্যতি সম্ভাষাদেতেষাং তদ্দিনোদ্ভবং ॥ পুংসাং জটাধরণমৌণ্ড্যবতাং বৃথৈব মোঘাশিনামখিলশৌচনিরাকৃতানাং। তোয়প্রদানপিতৃপিণ্ডবহিষ্কৃতানাং সম্ভাষণাদপি নরা নরকং প্রয়ান্তি ॥ ইতি বিষ্ণুপুরাণে ৩ অংশে ১৮ অধ্যায়ঃ ॥ * ॥ পাষণ্ডাদীনাং লক্ষণং যথা। ভ্রষ্টঃ স্বধর্ম্মাৎ পাষণ্ডো বিকর্ম্মস্থো নিষিদ্ধকৃৎ। যস্য ধর্ম্মধ্বজো নিত্যং সুরধ্বজ ইবোত্থিতঃ॥ প্রচ্ছন্নানি চ পাপানি বৈড়ালং নাম তদ্‌ব্রতং। তদ্বান্ বৈড়ালব্রতিকঃ। প্রিয়ং বক্তি পুরোঽন্যত্র বিপ্রিয়ং কুরুতে ভৃশং। ব্যক্তাপরাধচেষ্টশ্চ শঠোঽয়ং কথিতো বুধৈঃ॥ সন্দেহকৃদ্ধেতুভির্যঃ সৎকর্ম্মসু সহৈতুকঃ। অর্ব্বাগ্‌দৃষ্টির্নৈকৃতিকঃ স্বার্থসাধনতৎপরঃ॥ শঠো মিথ্যাবিনীতশ্চ বকব্রতিরুদাহৃত ইতি। এতট্টীকায়াং স্বামী ॥ * ॥ অপি চ। সদাশিব উবাচ। যেঽন্যদেবং পরত্বেন বদন্ত্যজ্ঞানমোহিতাঃ। নারায়ণাজ্জগদ্বন্দ্যং তে বৈ পাষণ্ডিনস্তথা॥ কপালভস্মাস্থিধরা যে হ্যবৈদিকলিঙ্গিনঃ। ঋতে বনস্থাশ্রমাশ্চ জটাবল্কলধারিণঃ। অবৈদিকক্রিয়োপেতাস্তে বৈ পাষণ্ডিনস্তথা॥ শঙ্খচক্রোর্দ্ধপুণ্ড্রাদিচিহ্নৈঃ প্রিয়তমৈর্হরেঃ। রহিতা যে দ্বিজা দেবি তে বৈ পাষণ্ডিনো মতাঃ॥ শ্রুতিস্মৃত্যুক্তমাচারং যস্তু নাচরতি দ্বিজঃ। স পাষণ্ডীতি বিজ্ঞেয়ঃ সর্ব্বলোকেষু গর্হিতঃ॥ সমস্ত-

যজ্ঞভোক্তারং বিষ্ণুং ব্রহ্মণ্যদৈবতং ॥ উদস্য দেবতাশ্চৈব জুহোতি চ দদাতি চ। স পাষণ্ডীতি বিজ্ঞেয়ঃ স্বতন্ত্রো বাপি কর্ম্মসু ॥ স্বাতন্ত্র্যাৎ ক্রিয়তে যৈস্তু কর্ম্ম বেদোদিতং মহৎ। বিনা বৈ ভগবৎ-প্রীত্যা তে বৈ পাষণ্ডিনঃ স্মৃতাঃ ॥ যস্তু নারায়ণং দেবং ব্রহ্মরুদ্রাদিদৈবতৈঃ। সমত্বেনৈব বীক্ষেত স পাষণ্ডী ভবেৎ সদা ॥ অনাস্থা ক্রিয়তে যৈস্তু মনোবাক্-কায়কর্ম্মভিঃ। বাসুদেবং ন জানাতি স পাষণ্ডী ভবেৎ দ্বিজঃ॥ হরের্নামকমন্ত্রাভ্যাং লোকাঃ সদ্ভির্বিবর্জ্জিতাঃ। যদি বর্ণা-শ্রমাদ্যা যে তে বৈ পাষণ্ডিনঃ স্মৃতাঃ ॥ বর্ণানাং গুরবো নিত্যং শিবে যদ্য-প্যবৈষ্ণবাঃ। ভগবদ্ধর্ম্মরহিতা বৈষ্ণবাদি-বিনিন্দকাঃ ॥ রজস্তমোময়া জীবহিংসকা জীবভক্ষকাঃ। অসৎপ্রতিগ্রহরতা দেবলা গ্রামযাজকাঃ ॥ ভ্রষ্টাচারাস্তথা ব্রাত্যা নানাবিবুধপূজকাঃ। দেবতোচ্ছিষ্টশ্রাদ্ধাদি-ভোজিনঃ শূদ্রবৎক্রিয়াঃ ॥ বিবিধাসৎকর্ম্ম-রতা ভক্ষণাদ্যবিচারিণঃ। লোভমোহমদ-ক্রোধকামাহঙ্কারিণঃ সদা॥ এবম্বিধাঃ পার-দারিকাদ্যা যেঽত্র শুভাননে। অন্যেষাং কা কথা তত্র পাষণ্ডা ব্রাহ্মণাঃ স্মৃতাঃ ॥ বর্ণা-শ্রমাদ্যা যে মর্ত্যাঃ স্বস্বধর্ম্মবিবর্জ্জিতাঃ। তে বৈ পাষণ্ডিনো দেবি নারায়ণবহির্মুখাঃ ॥ সর্ব্বাশিনো দ্বিজা যেঽপি সর্ব্ববিক্রয়িণ-স্তথা। ষড়্‌বেদাচাররহিতাস্তে বৈ পাষ-ণ্ডিনো মতাঃ ॥ যে ত্বসদ্ভক্ষপানাদিরতা লোকা নিরন্তরং। শিবে পাষণ্ডিনো জ্ঞেয়া ইহ তে নাত্র সংশয়ঃ॥ বিষ্ণুবৈষ্ণবগোভূমি-দেবাদিষু বিশেষতঃ। অশ্বত্থতুলসীতীর্থ-ক্ষেত্রাদিষু মহাগুরৌ ॥ লক্ষ্মীসরস্বতীগঙ্গা-যমুনাসু বরাননে। স্মৃতাঃ পাষণ্ডিনস্তেঽপি যে ন সেবাপরায়ণাঃ ॥ রুদ্রাক্ষেন্দ্রাক্ষ-ভদ্রাক্ষস্ফাটিকাক্ষাদিধারিণঃ। জটিলা ভস্মলিপ্তাঙ্গাস্তে বৈ পাষণ্ডিনঃ প্রিয়ে ॥ অসিজীবী মসীজীবী ধাবকঃ পাচকস্তথা। এতে পাষণ্ডিনো বিপ্রা মাদকদ্রব্য-ভোজিনঃ ॥ দেবি কার্ষ্ণাদয়ো ভক্তা অনন্যশরণাস্তু যে। পাষণ্ডসঙ্গং ন কুর্য্যু-স্তদ্গেহে পানভোজনে ॥ যদি দৈববশা-ল্লোভান্মোহাত্তস্যান্নভোজনং। তৎস্পর্শ-জলপানঞ্চ চক্রুস্তৎসঙ্গমাদিকং ॥ তৎপান-ভোজনালাপসঙ্গালিঙ্গনতোঽচিরাৎ। পাষ-ণ্ডিনো বৈষ্ণবাঃ স্যুরন্যেষামপি কা কথা ॥ কিমত্র বহুনোক্তেন ব্রাহ্মণা যে হ্যবৈষ্ণবাঃ। অসদাচরণাশ্চেৎ স্যুস্তদা পাষণ্ডিনঃ স্মৃতাঃ ॥ এতদ্ভোজনপানাদিকর্ম্মভির্বৈষ্ণবা জনাঃ। পাষণ্ডিনস্তথা স্যুর্ব্বৈ জটাভস্মাদি-ধারিণঃ ॥ ইতি পাদ্মোত্তরখণ্ডে পাষণ্ডা-চরণং নাম ৪২ অধ্যায়ঃ ॥ * ॥ তস্য ত্যাজ্যত্বং যথা। ত্যজ পাষণ্ডসংসর্গং সঙ্গং ভজ সতাং সদা। কামং ক্রোধঞ্চ লোভঞ্চ মোহঞ্চ মদমৎসরৌ॥ ইতি পাদ্মে ক্রিয়াযোগসারে ১৬ অধ্যায়ঃ ॥ * ॥ তস্য রাষ্ট্রাদ্বহিষ্কর্ত্তব্যতা যথা। কিতবান্ কুশীলবান্ ক্রূরান্ পাষণ্ডস্থাংশ্চ মানবান্। বিকর্ম্মস্থান্ শৌণ্ডিকাংশ্চ ক্ষিপ্রং নির্ব্বা-সয়েৎ পুরাৎ ॥ এতে রাষ্ট্রে বর্ত্তমানা

রাজ্ঞঃ প্রচ্ছন্নতস্করাঃ। বিকর্ম্মক্রিয়য়া নিত্যং বাধন্তে ভদ্রিকাঃ প্রজাঃ॥ ইতি মানবে ৯ অধ্যায়ঃ॥ অপি চ। আক্রুদ্ধাংশ্চ তথা লুব্ধান্ দৃষ্টার্থাতত্ত্বভাষিণঃ। পাষণ্ডিনস্তাপসাদীন্ পররাষ্ট্রেষু যোজয়েৎ॥ ইতি যুক্তিকল্পতরুঃ॥

পাষণ্ডকঃ (পুং) পাষণ্ডঃ। ইতি শব্দরত্নাবলী॥

পাষণ্ডী [ন্] (পুং) পাষণ্ডঃ। ইতি জটাধরঃ॥

পাষাণঃ (পুং) প্রস্তরঃ। তৎপর্য্যায়ঃ। গ্রাবঃ২ উপলঃ ৩ অশ্মা ৪ শিলা ৫ দৃষৎ ৬। ইত্যমরঃ॥ দৃশৎ ৭। ইতি ভরতঃ॥ প্রস্তরঃ ৮ পারাবুকঃ ৯ পারটীটঃ ১০ মৃন্মরুঃ ১১ কাচকঃ ১২। ইতি শব্দরত্নাবলী॥

পাষাণগর্দ্দভঃ (পুং) হনুসন্ধিজক্ষুদ্ররোগবিশেষঃ। তল্লক্ষণমাহ। বাতশ্লেষ্মসমুদ্ভূতঃ শ্বযথুর্হনুসন্ধিজঃ। স্থিরো মন্দরুজঃ স্নিগ্ধো জ্ঞেয়ঃ পাষাণগর্দ্দভঃ॥ স্থিরঃ কঠিনঃ॥*॥ তচ্চিকিৎসা যথা। পাষাণগর্দ্দভং পূর্ব্বং স্বেদয়েৎ কুশলো ভিষক্। ততঃ পনসিকাপ্রোক্তৈঃ কল্কৈরুষ্ণৈঃ প্রলেপয়েৎ॥ বাতশ্লৈষ্মিকশোথঘ্নৈঃ কল্কৈরন্যৈশ্চ লেপয়েৎ। পরিপাকগতং ভিত্ত্বা ব্রণবত্তমুপাচরেৎ॥ জলৌকাভির্হৃতে রক্তে স শাম্যতি বিনৌষধং। এতৎ স্থলেষু বহুষু প্রেক্ষিতং লিখিতং ততঃ॥ ইতি ভাবপ্রকাশঃ॥

পাষাণচতুর্দ্দশী (স্ত্রী) বৃশ্চিকরাশিস্থরবিকশুক্লপক্ষীয়চতুর্দ্দশী। যথা ভবিষ্যে। বৃশ্চিকে শুক্লপক্ষে তু যা পাষাণচতুর্দ্দশী। তস্যামারাধয়েদ্গৌরীং নক্তং পাষাণভোজনৈঃ॥ পাষাণভোজনৈঃ পাষাণাকারপিষ্টকভোজনৈঃ। ইতি তিথ্যাদিতত্ত্বং॥

পাষাণদারকঃ (পুং) টঙ্কঃ। ইতি হেমচন্দ্রঃ॥

পাষাণদারণঃ (পুং) টঙ্কঃ। ইত্যমরঃ॥

পাষাণভেদনঃ (পুং) বৃক্ষবিশেষঃ। হাথাজুড়ী ইতি ভাষা। তৎপর্য্যায়ঃ। অশ্মঘ্নঃ ২ শিলাভেদঃ ৩ অশ্মভেদকঃ ৪ শ্বেতা ৫ উপলভেদী ৬ পলভিৎ ৭ শিলগর্ভজঃ ৮। অস্য গুণাঃ। মধুরত্বং। তিক্তত্বং। মেহতৃড়্দাহমূত্রকৃচ্ছ্রাশ্মরীনাশিত্বং। শীতলত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অপি চ। পাষাণভেদকোঽশ্মঘ্নো গিরিভিদ্ভিন্নযোজনী। অশ্মভেদো হিমস্তিক্তঃ কষায়ো বস্তিশোধনঃ॥ ভেদনো হন্তি দোষার্শোগুল্মকৃচ্ছ্রাশ্মহৃদ্রুজঃ। যোনিরোগান্ প্রমেহাংশ্চ প্লীহাশূলব্রণানি চ॥ ইতি ভাবপ্রকাশঃ॥

পাষাণভেদী [ন্] (পুং) বৃক্ষবিশেষঃ। পাথরচূর ইতি ভাষা। তৎপর্য্যায়ঃ। অশ্মভেদঃ ২ শিলাভেদঃ ৩ অশ্মভিৎ ৪। ইতি রত্নমালা॥

পাষাণী (স্ত্রী) ক্ষুদ্রপাষাণঃ। স তু পরিমাপকবিশেষঃ। বাট্খারা ইতি ভাষা। তৎপর্য্যায়ঃ। পৃষাকরা ২। ইতি শব্দচন্দ্রিকা॥

পাহাতঃ (পুং) ব্রহ্মদারুবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

পাক্ষায়ণঃ (ত্রি) পক্ষসম্বন্ধী। পক্ষে ভবঃ। পক্ষশব্দাৎ ষ্ণায়নপ্রত্যয়নিষ্পন্নঃ॥

পাক্ষিকঃ (ত্রি) পক্ষপাতী। যথা। স কো রাজা ন শাস্তা যঃ প্রজাবধ্যশ্চ পাক্ষিকঃ। ইতি ব্রহ্মবৈবর্ত্তে গণপতিখণ্ডে ১৪অধ্যায়ঃ॥ পক্ষিঘাতকশ্চ॥

পি. শ গতৌ। ইতি কবিকল্পদ্রুমঃ॥ শ পিয়তি। ইতি দুর্গাদাসঃ॥

পিকঃ (পুং) কোকিলঃ। ইত্যমরঃ॥

পিকপ্রিয়া (স্ত্রী) মহাজম্বূঃ। ইতি রাজনির্ঘণ্টঃ॥

পিকবন্ধুঃ (পুং) আম্রবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ॥

পিকরাগঃ (পুং) আম্রবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

পিকবল্লভঃ (পুং) আম্রবৃক্ষঃ। ইতি ভাবপ্রকাশঃ॥

পিকাঙ্গঃ (পুং) পক্ষিবিশেষঃ। ইতি শব্দচন্দ্রিকা॥

পিকানন্দঃ (পুং) বসন্তকালঃ। ইতি রাজনির্ঘণ্টঃ॥

পিকাক্ষঃ (পুং) রোচনী। ইতি শব্দচন্দ্রিকা॥

পিকী (স্ত্রী) কোকিলা। ইতি রাজনির্ঘণ্টঃ॥

পিকেক্ষণা (স্ত্রী) কোকিলাক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ কোকিলচক্ষুস্তুল্যচক্ষুর্যুক্তা চ॥

পিক্কঃ (পুং) হস্তিশাবকঃ। ইতি শব্দমালা॥

পিঙ্গং (ক্লী) বালকঃ। ইতি মেদিনী॥ হরিতালং। ইতি রাজনির্ঘণ্টঃ॥

পিঙ্গঃ (পুং) পিঙ্গলবর্ণঃ। তদ্বতি ত্রি। ইত্যমরঃ॥ মূষকঃ। ইতি রাজনির্ঘণ্টঃ॥

পিঙ্গকপিশা (স্ত্রী) তৈলপায়িকা। ইতি হেমচন্দ্রঃ॥

পিঙ্গচক্ষুঃ [স্] (পুং) কুম্ভীরঃ। ইতি হেমচন্দ্রঃ॥

পিঙ্গজটঃ (পুং) শিবঃ। ইতি হেমচন্দ্রঃ॥

পিঙ্গলং (ক্লী) রীতিঃ। ইতি রাজনির্ঘণ্টঃ॥

পিঙ্গলঃ (পুং) নীলপীতমিশ্রিতবর্ণঃ। তৎপর্য্যায়ঃ। কড়ারঃ ২ কপিলঃ ৩ পিঙ্গঃ ৪ পিশঙ্গঃ ৫ কদ্রুঃ ৬। তদ্বতি ত্রি। ইত্যমরঃ॥ কেচিৎ দ্বয়ং দ্বয়ং পর্য্যায়মাহুঃ। অত্র নীলপীতঃ কপিলঃ। রোচনাভঃ পিশঙ্গঃ। কনকপিঙ্গলঃ কদ্রুঃ। ইতি সুভূতিঃ॥ পিশঙ্গো রোচনা পাণ্ডুঃ কদ্রুঃ কনকপিঙ্গলঃ। ইতি নামমালা॥ পিঙ্গদীপশিখাভঃ স্যাৎ পিশঙ্গঃ পদ্মধূলিবৎ। পীতনীলহরিদ্রক্তঃ কড়ারস্তৃণবহ্নিবৎ॥ অয়ন্তুদ্রিক্তঃ পীতাঙ্গঃ কপিলো রোচনাচ্ছবিরিত্যন্যত্র ভেদোঽপি দৃশ্যতে। অল্পভেদত্বাদিহাসৌ নাদৃতঃ। ইতি তট্টীকায়াং ভরতঃ॥ * ॥ নাগভেদঃ। রুদ্রঃ। চণ্ডাংশুপারিপার্শ্বিকঃ। নিধিভেদঃ। কপিঃ। অগ্নিঃ। ইতি মেদিনী॥ মুনিবিশেষঃ। নকুলঃ। স্থাবরবিষবিশেষঃ। ইতি হেমচন্দ্রঃ॥ ক্ষুদ্রোলূকঃ। ইতি রাজনির্ঘণ্টঃ॥ প্রভবাদিষষ্টিবর্ষান্তর্গতৈকপঞ্চাশত্তমবর্ষঃ। যথা। দেশভঙ্গোঽথ দুর্ভিক্ষং সমাসাৎ কথয়াম্যহং। পিঙ্গলে চারুপদ্মাক্ষি দুর্ভিক্ষং নর্ম্মদাতটে॥ ইতি জ্যোতিস্তত্ত্বং॥ * ॥ পিঙ্গলাচার্য্যকৃতচ্ছন্দোগ্রন্থবিশেষঃ। যথা। জো বিবিহমত্তসায়রপারং পত্তো বিবিমলমই হেলং। পঢ়মং ভাসতরণ্ডো ণাওসো পিঙ্গলো জয়ই॥

অস্য ব্যাখ্যা। অথ ছন্দঃশাস্ত্রকর্ত্তুঃ পিঙ্গলাচার্য্যস্য স্তুতিরূপং মঙ্গলং নির্বিঘ্নগ্রন্থপরিসমাপ্তয়ে গ্রন্থকৃৎ করোতি। বিবিধা নানাপ্রকারকবিন্যাসবিশিষ্টা মাত্রা যত্র তদ্বিবিধমাত্রং ছন্দঃকদম্বং তদেবং সাগরঃ অতিদুর্গমত্বাৎ ভাষা এব তরণ্ডা নৌর্যস্য। প্রাকৃতে হ্রস্বতা তেন ভাষয়ৈব ছন্দঃশাস্ত্রমুক্তবানিত্যবগম্যতে। কেচিত্তু লঘুগুরুরূপা যা বিবিধা মাত্রা সৈব সাগরঃ তৎপারং প্রাপ্তঃ অপিরবধারণে। বিমলয়া মত্যা হেলা যত্র তদ্যথা স্যাৎ নির্ম্মলবুদ্ধ্যা হেলয়ৈব পারং গত ইত্যর্থঃ। প্রথমমিত্যনেন ছন্দঃশাস্ত্রস্য প্রথমপ্রণেতায়মিত্যবগম্যতে। অর্থান্তরমপ্যনেনৈব ব্যজ্যতে যো বিবিধমাত্রাভিঃ সাগরপারং প্রাপ্তঃ বিঃ পক্ষী অর্থাদ্গরুড়ঃ তস্য বিমলমতৌ হেলা যত্র তৎ যথা স্যাৎ ভাষা অনুনয়বাক্ সৈব নৌর্যস্য ঈদৃশো নাগো জয়তি। এবং হি শ্রূয়তে ভোক্তুমুদ্যতং গরুড়ং দৃষ্ট্বা সকৌশলং সবিনয়ং তমুবাচ ভো গরুড়মমেদং কৌশলং পশ্য যদ্যেকবারলিখিতং ময়া লিখ্যতে তদা মাং ভক্ষ ইত্যুক্ত্বা সাগরতীরং ষড়্বিংশত্যক্ষরপর্য্যন্তং প্রস্তারং প্রদর্শ্য সমুদ্রং প্রবিবেশ গরুড়োঽপি বঞ্চনাং গুরুত্বেন তঞ্চ মত্বা তদ্দেশাদ্বিররাম এতাদৃশং বুদ্ধিগৌরবং যস্য অতএব জয়তি উৎকর্ষেণ বর্ত্ততে তং প্রতি প্রণতোঽস্মীতি ব্যজ্যতে অথবা গাথায়াং ভগণোপন্যাসো মঙ্গলার্থঃ প্রথমং ভৃত্যোদাসীনয়োর্ভগণজগণয়োর্যোগোঽনুচিতোঽপি কণ্ঠমিত্যবহিতৈর্ভাব্যং। ইতি পিঙ্গলগ্রন্থস্তট্টীকা চ॥

পিঙ্গললোহং (ক্লী) পিত্তলং। ইতি রাজনির্ঘণ্টঃ॥

পিঙ্গলা (স্ত্রী) বামনাখ্যদক্ষিণদিগ্গজস্য গজিনী। ইত্যমরঃ॥ কুমুদস্য করিণী। বেশ্যাবিশেষঃ। ইতি মেদিনী॥ তস্যা উপাখ্যানং যথা। পিঙ্গলা নাম বেশ্যাসীদ্বিদেহনগরে পুরা। তস্যা মে শিক্ষিতং কিঞ্চিন্নিবোধ নৃপনন্দন॥ সা স্বৈরিণ্যেকদা কান্তং সঙ্কেত উপনেষ্যতী। অভূৎ কালে বহির্দ্বারি বিভ্রতী রূপমুত্তমং॥ মার্গ আগচ্ছতো বীক্ষ্য পুরুষান্ পুরুষর্ষভ। তান্ শুল্কদান্ বিত্তবতঃ কান্তান্ মেনেঽর্থকামুকী॥ আগতেষ্বপযাতেষু সা সঙ্কেতোপজীবিনী। অপ্যন্যো বিত্তবান্ কোঽপি মামুপৈষ্যতি ভূরিদঃ॥ এবং দুরাশয়া ধ্বস্তনিদ্রাদ্বার্য্যবলম্বতী। নির্গচ্ছন্তী প্রবিশতী নিশীথং সমপদ্যত॥ তস্যা বিত্তাশয়া শুষ্যদ্বক্ত্রায়া দীনচেতসঃ। নির্ব্বেদঃ পরমো জজ্ঞে চিন্তাহেতুঃ সুখাবহঃ॥ তস্যা নির্ব্বিন্নচিত্তায়া গীতং শৃণু যথা মম॥ নির্ব্বেদ আশাপাশানাং পুরুষস্য যথা হ্যসিঃ। নহ্যঙ্গাজাতনির্ব্বেদো দেহবন্ধং জিহাসতি॥ পিঙ্গলোবাচ। অহো মে মোহবিততিং পশ্যতাং বিজিতাত্মনঃ। যা কান্তাদসতঃ কামং কাময়ে যেন বালিশা॥ সন্তং সমীপে রমণং রতিপ্রদং বিত্তপ্রদং নিত্যমিমং বিহায়। অকামদং দুঃখভয়াধিশোকমোহপ্রদং তুচ্ছমহং ভজেঽজ্ঞা॥

অহো মহাত্মা পরিতাপিতো বৃথা সাঙ্কেত্যবৃত্ত্যাতিবিগর্হ্য বার্ত্তয়া। স্ত্রৈণান্নরাদযার্থতৃষোঽনুশোচ্যাৎ ক্রীতেন বিত্তং রতিমাত্মনেচ্ছতী॥ যদস্থিভির্নির্ম্মিতবংশবংশ্যস্থূণং ত্বচা রোমনখৈঃ পিনদ্ধং। ক্ষরন্নবদ্বারমগারমেতদ্বিণ্মূত্রপূর্ণং মদুপৈতি কান্যা॥ বিদেহানাং পুরে হ্যস্মিন্নহমেকৈব মূঢ়ধীঃ। যান্যমিচ্ছত্যসত্যস্মাদাত্মানঃ কামমচ্যুতাৎ॥ সুহৃৎ প্রেষ্ঠতমো নাথ আত্মা চায়ং শরীরিণাং। তং বিক্রীয়াত্মনৈবাহং রমে যেন যথা রমা॥ কিয়ৎ প্রিয়ন্তে ব্যভজন কামা যে কামদা নরাঃ। অভেদ্যবন্তো ভার্য্যায়া দেবা বা কালবিদ্রুতাঃ॥ নূনং মে ভগবান্ প্রীতো বিষ্ণুঃ কেনাপি কর্ম্মণা। নির্ব্বেদোঽয়ং দুরাশায়া যন্মে জাতঃ সুখাবহঃ॥ মৈবং স্যুর্মন্দভাগ্যায়াঃ ক্লেশা নির্ব্বেদহেতবঃ। যেনানুবন্ধং নির্হৃত্য পুরুষঃ শমমৃচ্ছতি॥ তেনোপকৃতমাদায় শিরসা গ্রাম্যসঙ্গতাঃ। ত্যক্ত্বা দুরাশাঃ শরণং ব্রজামি তমধীশ্বরং॥ সন্তুষ্টা শ্রদ্দধত্যেতদযথালাভেন জীবতী। বিহরাম্যমুনৈবাহমাত্মনা রমণেন বৈ॥ সংসারকূপে পতিতং বিষয়ৈর্ম্মুষিতেক্ষণং। গ্রস্তং কালাহিনাত্মানং কোঽন্যস্ত্রাতুমধীশ্বরঃ॥ আত্মৈব হ্যাত্মনো গোপ্তা নির্ব্বিদ্যেত যদাখিলাৎ। অপ্রমত্ত ইদং পশ্যেদ্‌গ্রস্তং কালাহিনা জগৎ॥ শ্রীব্রাহ্মণ উবাচ। এবং ব্যবসিতমতির্দুরাশাং কান্ততর্ষজাং। ছিত্ত্বোপশমমাস্থায় শয্যামুপবিবেশ সা॥ আশা হি পরমং দুঃখং নৈরাশ্যং পরমং সুখং। যথা সংছিদ্য কান্তাশাং সুখং সুষ্বাপ পিঙ্গলা॥ ইতি শ্রীভাগবতে একাদশস্কন্ধে শ্রীভগবদুদ্ধবসংবাদে পিঙ্গলাগীতমষ্টমোঽধ্যায়ঃ॥ *॥ কর্ণিকা। নাড়ীবিশেষঃ। ইতি হেমচন্দ্রঃ॥ পক্ষিভেদঃ। রাজরীতিঃ। ইতি রাজনির্ঘণ্টঃ॥ শিংশপাবৃক্ষঃ। ইতি রত্নমালা॥ *॥ অথ পিঙ্গলাদিনাড়ীনিরূপণং। দক্ষিণাংশঃ স্মৃতঃ সূর্য্যো বামভাগো নিশাকরঃ। নাড়ীদশ বিদুস্তাসু মুখ্যাস্তিস্রঃ প্রকীর্ত্তিতাঃ॥ ইড়া বামে তনোর্ম্মধ্যে সুষুম্না পিঙ্গলা পরে। মধ্যা তাস্বপি নাড়ী স্যাদগ্নীসোমস্বরূপিণী॥ অত্রেড়া বামবৃক্কাধঃস্থা ধনুর্বক্রা বামনাসাপর্য্যন্তং গতা এবং পিঙ্গলা দক্ষিণাণ্ডাধঃস্থা ধনুর্বক্রা দক্ষিণনাসান্তং গতা পৃষ্ঠবংশান্তর্গতা সুষুম্না ইত্যর্থঃ। ইতি সারদাতিলকং॥ নাড়ীনাং সংবহো দেবি কঞ্জযোনিঃ খগাণ্ডবৎ। তত্র নাড্যঃ সমুৎপন্নাঃ সহস্রাণাং দ্বিসপ্ততিঃ॥ কঞ্জস্য পদ্মস্য যোনিরুৎপত্তিস্থানং শালূকমিতি যাবৎ। প্রধানাঃ প্রাণবাহিন্যো ভূয়স্তত্র দশ স্মৃতাঃ। ইড়া চ পিঙ্গলা চৈব সুষুম্না চ তৃতীয়িকা॥ গান্ধারী হস্তিজিহ্বা চ পূষা চৈব যশস্বিনী। অলম্বুষা কুহূশ্চৈব শঙ্খিনী চ দশ স্মৃতাঃ॥ এবং নাড়ীময়ং চক্রং বিজ্ঞেয়ং শক্তিচক্রকে। ইড়ায়াঃ পিঙ্গলায়াশ্চ মধ্যে যা সা সুষুম্নিকা॥ ইয়ং ত্রিগুণা জ্ঞেয়া ব্রহ্মবিষ্ণুশিবাত্মিকা। রজোগুণা চ বজ্রাখ্যা চিত্রিণী সত্ত্বসংবৃতা॥ তমোগুণা ব্রহ্মনাড়ী কার্য্যভেদক্রমেণ চ॥

ইতি নিরুত্তরতন্ত্রপ্রথমপটলঃ ॥ ইড়াপিঙ্গলয়োঃ স্বরূপং যথা। ইড়া চ শঙ্খচন্দ্রাভা তস্যা বামে ব্যবস্থিতা। পিঙ্গলা সিতরক্তাভা দক্ষিণং পার্শ্বমাশ্রিতা॥ ইতি যোগার্ণবঃ॥ ইড়ায়াং সংশ্রিতশ্চন্দ্রঃ পিঙ্গলায়াং দিবাকরঃ। ইতি তন্ত্রান্তরং॥

পিঙ্গলিকা (স্ত্রী) বলাকা। ইতি জটাধরঃ॥

পিঙ্গসারঃ (পুং) হরিতালং। ইতি রাজনির্ঘণ্টঃ॥

পিঙ্গস্ফটিকঃ (পুং) গোমেদমণিঃ। ইতি রাজনির্ঘণ্টঃ॥

পিঙ্গা (স্ত্রী) গোরোচনা। হিঙ্গুঃ। নালিকা। চণ্ডিকা। ইতি মেদিনী॥ হরিদ্রা। ইতি শব্দচন্দ্রিকা॥ বংশরোচনা। ইতি রাজনির্ঘণ্টঃ॥

পিঙ্গাশঃ (পুং) পল্লীপতিঃ। মৎস্যভেদঃ। পাঙ্গাশ ইতি ভাষা। জাত্যস্বর্ণে ক্লী। ইতি মেদিনী॥

পিঙ্গাশী (স্ত্রী) নীলিকা। ইতি মেদিনী॥

পিঙ্গাস্যঃ (পুং) পিঙ্গাশমৎস্যঃ। ইতি শব্দরত্নাবলী॥

পিঙ্গাক্ষঃ (পুং) শিবঃ। ইতি ত্রিকাণ্ডশেষঃ॥

পিঙ্গী (স্ত্রী) শমীবৃক্ষঃ। ইতি মেদিনী॥

পিঙ্গেক্ষণঃ (পুং) শিবঃ। ইতি হেমচন্দ্রঃ॥

পিচণ্ডঃ (পুং) পশোরবয়বঃ। উদরং। ইতি হেমচন্দ্রঃ॥

পিচণ্ডিলঃ (ত্রি) তুন্দিলঃ। ইতি হেমচন্দ্রঃ॥

পিচব্যঃ (পুং) কার্পাসঃ। ইতি হেমচন্দ্রঃ॥

পিচিণ্ডঃ (পুং) উদরং। ইত্যমরঃ॥ তস্য লক্ষণং যথা। ভোগাঢ্যাঃ সমজঠরা নিঃস্বাঃ স্যুর্ঘটসন্নিভাঃ। সর্পোদরা দরিদ্রাঃ স্যুরিতি গারুড়ে ৬৩ অধ্যায়ঃ॥ পশোরবয়বঃ। ইতি মেদিনী॥

পিচিণ্ডিকা (স্ত্রী) পিণ্ডিকা। পায় ডিম্ ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

পিচিণ্ডিলঃ (পুং) বৃহদুদরযুক্তঃ। ইত্যমরঃ॥ তৎপর্য্যায়ঃ। পিচণ্ডিলঃ ২ বৃহৎকুক্ষিঃ ৩ তুন্দী ৪ তুন্দিকঃ ৫ তুন্দিলঃ ৬ উদরী ৭ উদরিলঃ ৮। ইতি হেমচন্দ্রঃ॥

পিচুঃ (পুং) কার্পাসতূলঃ। ইত্যমরঃ॥ কুষ্ঠভেদঃ। কর্ষঃ। অসুরবিশেষঃ। ইতি মেদিনী॥ ভৈরবঃ। শস্যভেদঃ। ইতি বিশ্বঃ॥

পিচুকঃ (পুং) মদনবৃক্ষঃ। ময়না ইতি ভাষা। ইতি রত্নমালা॥

পিচুতুলং (ক্লী) তূলঃ। ইতি ত্রিকাণ্ডশেষঃ॥

পিচুমন্দঃ (পুং) নিম্ববৃক্ষঃ। ইতি হেমচন্দ্রঃ

পিচুমর্দ্দঃ (পুং) নিম্ববৃক্ষঃ। ইত্যমরঃ॥

পিচুলঃ (পুং) ঝাবুকঃ। ইজ্জলঃ। জলবায়সঃ। ইতি মেদিনী॥ তূলঃ। ইত্যমরটীকায়াং সারসুন্দরী॥

পিচ্চ ক ছেদে। ইতি কবিকল্পদ্রুমঃ॥ ক পিচ্চয়তি। ইতি দুর্গাদাসঃ॥

পিচ্চটং (ক্লী) সীসকং। রঙ্গং। নেত্ররোগে পুং। ইতি মেদিনী॥

পিচ্ছ শ বাধে। ইতি কবিকল্পদ্রুমঃ॥ শ পিচ্ছতী পিচ্ছন্তী। বাধো বিহিতিঃ। ইতি দুর্গাদাসঃ॥

পিচ্ছং (ক্লী) ময়ূরপুচ্ছং। তৎপর্য্যায়ঃ।

শিখণ্ডঃ ২ বর্হং ৩। ইত্যমরঃ॥ শিখিপুচ্ছং ৪ শিখণ্ডকং ৫। ইতি শব্দরত্নাবলী॥ চূড়া। ইতি মেদিনী॥

পিচ্চঃ (পুং) লাঙ্গুলং। ইতি মেদিনী॥

পিচ্ছলদলা (স্ত্রী) বদরীবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ॥

পিচ্ছবাণঃ (পুং) শ্যেনপক্ষী। ইতি রাজনির্ঘণ্টঃ॥

পিচ্ছা (স্ত্রী) শাল্মলীবেষ্টঃ। ইত্যমরঃ॥ পূগঃ। ছটা। কোষঃ। মোচা। ভক্তসম্ভূতমণ্ডং। পঙ্‌ক্তিঃ। অশ্বপদাময়ঃ। ইতি মেদিনী॥ চোলিকা। ফণিলালা। ইতি হারাবলী॥ শিংশপাবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

পিচ্ছিকা (স্ত্রী) চামরবিশেষঃ। যথা। পিচ্ছিকাং ভ্রাময়িত্বা বহুবিধং হাস্যং কৃত্বা পণমহইং দস্‌স চরণে ইদং অলিং অপিণা কুণামস্ম। ইতি রত্নাবলীনাটকে ৪ অঙ্কঃ॥

পিচ্ছিতিকা (স্ত্রী) শিংশপা। ইতি শব্দচন্দ্রিকা॥

পিচ্ছিলং (ত্রি) ভক্তমণ্ডযুক্তং। ইতি রায়মুকুটঃ॥ সরসব্যঞ্জনাদি। ইতি ভরতঃ॥ সূপাদি। ইতি রমানাথঃ॥ স্নিগ্ধসূপাদি। ইতি ভানুদীক্ষিতঃ॥ মণ্ডযুক্তভক্তং। জলযুক্তব্যঞ্জনং। ইতি নীলকণ্ঠঃ॥ তৎপর্য্যায়ঃ। বিজিলং ২। ইত্যমরঃ॥ বিজয়িনং ৩ বিজিনং ৪ বিজ্জলং ৫ ইজ্জলং ৬ ল্যালসীকং ৭। ইতি বাচস্পতিঃ। পিচ্ছযুক্তশ্চ॥

পিচ্ছিলঃ (পুং) শ্লেষ্মান্তকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ

পিচ্ছিলকঃ (পুং) ধন্বনবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ

পিচ্ছিলচ্ছদা (স্ত্রী) উপোদকী। ইতি রাজনির্ঘণ্টঃ॥

পিচ্ছিলত্বক্ [চ্] (পুং) নাগরঙ্গবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ॥ ধন্বনবৃক্ষঃ। ইতি রত্নমালা॥

পিচ্ছিলসারঃ (পুং) মোচরসঃ। ইতি রাজনির্ঘণ্টঃ

পিচ্ছিলা (স্ত্রী) পোতিকা। শিংশপা। শাল্মলিঃ। সিন্ধুভেদঃ। ইতি মেদিনী॥ কোকিলাক্ষঃ। বৃশ্চিকাক্ষুপঃ। শূলীতৃণং। অতসী। ইতি রাজনির্ঘণ্টঃ॥ কচ্বী। ইতি শব্দচন্দ্রিকা॥

পিজ ই ক ভাষট্টার্থে। ইতি কবিকল্পদ্রুমঃ॥ ই ক পিঞ্জয়তি। ভাঃ দীপ্তিঃ। ষট্টার্থো নিকেতনহিংসাবলদানানি। ইতি দুর্গাদাসঃ॥

পিজ ই ল ঙ বর্ণপূজয়োঃ। ই পিঞ্জতে। ল ঙ পিঙ্‌ক্তে। ইতি দুর্গাদাসঃ॥

পিঞ্জং (ক্লী) বলং। ব্যাকুলে ত্রি। ইতি মেদিনী॥

পিঞ্জঃ (পুং) বধঃ। ইত্যমরঃ॥ কর্পূরভেদঃ। ইতি রাজনির্ঘণ্টঃ॥

পিঞ্জটঃ (পুং) নেত্রমলং। পিঁচুটি ইতি ভাষা। যথা। দূষীকা দুষিকা দূষিঃ পিঞ্জেটপিঞ্জটাবপি। ইতি শব্দরত্নাবলী॥

পিঞ্জনং (ক্লী) কার্পাসস্ফোটনধনুঃ।

তৎপর্য্যায়ঃ। বিহননং ২ তূলস্ফোটন-কার্ম্মুকং ৩। ইতি হেমচন্দ্রঃ॥

পিঞ্জরং (ক্লী) হরিতালং। ইত্যমরঃ॥ স্বর্ণং। ইতি মেদিনী॥ নাগকেশরং। ইতি রাজ-নির্ঘণ্টঃ॥ পক্ষ্যাদিবন্ধনগৃহং। কায়াস্থি-বৃন্দং। ইত্যমরটীকায়াং রামাশ্রমঃ॥

পিঞ্জরঃ (পুং) অশ্বভেদঃ। পীতরক্তবর্ণঃ। ইতি হেমচন্দ্রঃ॥ পীতে ত্রি। ইতি মেদিনী॥

পিঞ্জরকং (ক্লী) হরিতালং। ইতি রাজ-নির্ঘণ্টঃ॥

পিঞ্জলং (ক্লী) কুশপত্রং। হরিতালং। ইতি ধরণিঃ॥

পিঞ্জলঃ (পুং) অত্যন্তব্যাকুলসৈন্যাদিঃ। ইত্য-মরঃ॥

পিঞ্জলী (স্ত্রী) কুশান্তরবেষ্টিতপ্রাদেশমাত্রসাগ্র-কুশপত্রদ্বয়ং। অস্যা নামান্তরং পবিত্রং। যথা অনন্তর্গর্ব্ভিণং সাগ্রং কৌশং দ্বিদল-মেব চ। প্রাদেশমাত্রং বিজ্ঞেয়ং পবিত্রং যত্র কুত্রচিৎ॥ এতদেব হি পিঞ্জল্যা লক্ষণং সমুদাহৃতং। ইতি ছন্দোগ-পরিশিষ্টং॥

পিঞ্জা (স্ত্রী) তূলং। হরিদ্রা। ইতি মেদিনী॥ হিংসা। ইতি ত্রিকাণ্ডশেষঃ॥ ছড়ী। ছড়া ইতি ভাষা। যথা। প্রোৎকলঃ সিংহলা স্থানশ্ছড়ী পিঞ্জা ছটাপি চ। ইতি শব্দমালা॥

পিঞ্জানং (ক্লী) স্বর্ণং। ইতি রাজনির্ঘণ্টঃ॥

পিঞ্জিকা (স্ত্রী) তূলনালিকা। পাঁইজ ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ॥

পিঞ্জূলং (ক্লী) বর্ত্তিকা। ইত্যুণাদিকোষঃ॥

পিঞ্জূষঃ (পুং) কর্ণমলং। ইতি হেমচন্দ্রঃ॥

পিঞ্জেটঃ (পুং) নেত্রমলং। ইতি শব্দরত্না-বলী॥

পিঞ্জোলা (স্ত্রী) পত্রকাহলা। পত্রশব্দঃ। ইতি হারাবলী॥

পিট সংহতৌ। ধ্বনৌ। ইতি কবিকল্পদ্রুমঃ॥ পেটতি জনঃ কিঞ্চিদ্রাশীকরোতি শব্দা-য়তে বা। ইতি দুর্গাদাসঃ॥

পিটং (ক্লী) চালঃ। ইতি ত্রিকাণ্ডশেষঃ॥

পিটঃ (পুং) পেটঃ। পেটারা ইতি ভাষা। ইতি ধরণিঃ॥

পিটকঃ (পুং) বংশবেত্রাদিময়সমুদ্গকঃ। পেটারী ইতি পেটা ইতি পেড়া ইতি চ খ্যাতঃ। তৎপর্য্যায়ঃ। পেটকঃ ২ পেড়া ৩ মঞ্জূষা ৪। ইত্যমরঃ॥ আদ্যৌ স্বল্পপেটি-কায়াং। পরৌ মহাপেটিকায়াং। ইতি স্বামী॥ পেটঃ ৫ পেটিকা ৬ তরিঃ ৭ তরী ৮ মঞ্জুষা ৯ পেড়িকা ১০। ইতি শব্দরত্না-বলী॥ বিস্ফোটে ত্রি। ইতি মেদিনী॥

পিটঙ্কাশঃ (পুং) পর্ব্বতোর্ম্মিমৎস্যঃ। ইতি ভূরিপ্রয়োগঃ॥

পিটঙ্কোকী (স্ত্রী) ইন্দ্রবারুণী। ইতি রত্নমালা॥

পিটাকঃ (পুং) মুনিবিশেষঃ। ইত্যুণাদি-কোষঃ॥

পিট্টকং (ক্লী) দন্তকিট্টকং। ইতি শব্দরত্না-বলী॥

পিঠ ক্লিশি। বধে। ইতি কবিকল্পদ্রুমঃ॥ ওষ্ঠ্য-বর্গাদ্যাদিঃ। পেঠতি পিপিঠতুঃ। ক্লিশি দুঃখানুভবে। ইতি দুর্গাদাসঃ॥

পিষ্টরং (ক্লী) মুস্তা। মস্থানদগুঃ। ইতি মেদিনী ॥

পিঠরঃ (পুং) গৃহভেদঃ। তৎপর্য্যায়ঃ। কুদ্রঙ্কঃ ২ উদঘাটঃ ৩। ইতি ত্রিকাণ্ডশেষঃ ॥ স্থালী। ইত্যমরঃ ॥

পিঠরা (স্ত্রী) স্থালী। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

পিড ই ক সংহৃতৌ। ইতি কবিকল্পদ্রুমঃ ॥ ই ক পিণ্ডয়তি। সংহতিঃ রাশীকরণং। ইতি দুর্গাদাসঃ ॥

পিড ই ঙ সংহতৌ। ইতি কবিকল্পদ্রুমঃ ॥ ই পিণ্ড্যতে। ঙ পিণ্ডতে। ইতি দুর্গাদাসঃ ॥

পিড়কঃ (পুং) স্ফোটকঃ। ইতি হেমচন্দ্রঃ ॥

পিড়কা (স্ত্রী) স্ফোটকবিশেষঃ। প্রমেহজা সা দশবিধা। যথা। শরাবিকা কচ্ছপিকা জালিনী বিনতালজী। মসূরিকা সর্ষপিকা পুত্রিণী সবিদারিকা ॥ বিদ্রধিশ্চেতি পিড়কাঃ প্রমেহোপেক্ষয়া দশ। তাসাং প্রত্যেকলক্ষণং যথা। সন্ধিমর্ম্মসু জায়ন্তে মাংসলেষু চ ধামসু। অন্তোন্নতা চ তদ্রূপা নিম্নমধ্যা শরাবিকা ॥ ১ ॥ সদাহা কূর্ম্মসংস্থানা জ্ঞেয়া কচ্ছপিকা বুধৈঃ। ২। জালিনী তীব্রদাহার্ত্তিমাংসজালসমাবৃতা ॥ ৩ ॥ অবগাঢ়রুজা ক্লেদা পৃষ্ঠে বাপ্যুদরেঽপি বা। মহতী পিড়কা নীলা বিনতা নাম সা স্মৃতা ॥ ৪ ॥ রক্তাসিতা স্ফোটচিতা দারুণা ত্বলজী ভবেৎ। ৫। মসূরফলসংস্থানা বিজ্ঞেয়া সা মসূরিকা ॥ ৬ ॥ গৌরসর্ষপসংস্থানা তৎপ্রমাণা চ সর্ষপী।৭। মহত্যল্পচিতা জ্ঞেয়া পিড়কা চাপি পুত্রিণী ॥ ৮ ॥ বিদারী কন্দবদ্বৃত্তা কঠিনা চ বিদারিকা। ৯। বিদ্রধের্লক্ষণৈর্যুক্তা জ্ঞেয়া বিদ্রধিকা তু সা ॥ ১০ ॥ * ॥ কুষ্ঠপিড়কা যথা। কণ্ডূবিপ্লুযকশ্চৈব কুষ্ঠে শোণিতসংশ্রিতে। বাহুল্যং বক্ত্রশোষশ্চ কার্কশ্যং পিড়কোদ্গমঃ ॥ * ॥ পিড়কাবিশেষা যথা। যবাকারা সুকঠিনা গ্রথিতা মাংসসংশ্রিতা। পিড়কা শ্লেষ্মবাতাভ্যাং যবপ্রখ্যেতি সোচ্যতে ॥ ঘনামবক্ত্রাং পিড়কামুন্নতাং পরিমণ্ডলাং। অন্ত্রালজীমল্পপূযাং তাং বিদ্যাৎ কফবাতজাং ॥ ১ ॥ বিবৃতাস্যাং মহাদাহাং পক্কোড়ুম্বরসন্নিভাং। পরিমণ্ডলাং পিত্তকৃতাং বিবৃতাং নাম তাং বিদুঃ ॥ ২ ॥ গ্রথিতাঃ পঞ্চ বা ষড়্ বা দারুণাঃ কচ্ছপোপমাঃ। কফানিলাভ্যাং পিড়কা জ্ঞেয়াঃ কচ্ছপিকা বুধৈঃ ॥ ৩ ॥ গ্রীবাংসকক্ষাকরপাদদেশে সন্ধৌ গলে বা ত্রিভিরেব দোষৈঃ। গ্রন্থিঃ সবল্মীকবদক্রিয়াণাং জাতঃ ক্রমেণৈব গতঃ প্রবৃদ্ধিঃ ॥ মুখৈরনেকৈঃ স্রুতিতোদবদ্ভিবিসর্পবৎ সর্পতি চোন্নতাগ্রৈঃ। বল্মীকমাহুর্ভিষজো বিকারং নিষ্প্রত্যনীকং চিরজং বিশেষাৎ ॥ ৪ ॥ পদ্মকর্ণিকবন্মধ্যে পিড়কাভিঃ সদাচিতাং। ইন্দ্রবৃদ্ধাস্তু তাং বিদ্যাদ্বাতপিত্তোত্থিতাং ভিষক্ ॥ ৫ ॥ মণ্ডলং বৃত্তমুৎসন্নং সরক্তং পিড়কাচিতং। রুজাকরীং গর্দ্দভিকাং তাং বিদ্যাদ্বাতপিত্তজাং ॥ ৬ ॥ বাতশ্লেষ্মসমুদ্ভূতঃ শ্বযথুর্হনুসন্ধিজঃ। স্থিরো মন্দরুজঃ স্নিগ্ধো

জ্ঞেয়ঃ পাষাণগর্দ্দভঃ ॥ ৭ ॥ কর্ণস্থাভ্যন্তরে জাতাং পিড়কামুগ্রবেদনাং। স্থিরাং পনসিকান্তাস্তু বিদ্যাদন্তঃপ্রপাকিণীং ॥ ৮ ॥ বিসর্পবৎ সর্পতি যঃ শোথস্তনুরপাকবান্। দাহজ্বরকরঃ পিত্তাৎ স জ্ঞেয়ো জালগর্দ্দভঃ ॥ ৯ ॥ পিড়কামুত্তমাঙ্গস্থাং বৃত্তামত্যুগ্ররুগ্জ্বরাং। সর্ব্বাত্মিকাং সর্ব্বলিঙ্গাং জানীয়াদিরিবেল্লিকাং ॥ ১০ ॥ বাহুপার্শ্বাংসকক্ষেষু কৃষ্ণস্ফোটাং সবেদনাং। পিত্তপ্রকোপসম্ভূতাং কক্ষামিত্যভিনির্দ্দিশেৎ ॥ ১১ ॥ একামেতাদৃশীং দৃষ্ট্বা পিড়কাং স্ফোটসন্নিভাং। ত্বগ্‌গতাং পিত্তকোপেন গন্ধনামাং প্রচক্ষতে ॥ ১২ ॥ কক্ষভাগেষু যে স্ফোটা জায়ন্তে মাংসদারুণাঃ। অন্তর্দ্দাহজ্বরকরা দীপ্তপাবকসন্নিভাঃ ॥ সপ্তাহাদ্দ্বাদশাহাদ্বা পক্ষাদ্বা ঘ্নন্তি মানবং। তামগ্নিরোহিণীং বিদ্যাদসাধ্যাং সন্নিপাততঃ ॥ ১৩ ॥ নখমাংসমধিষ্ঠায় বাতঃ পিত্তঞ্চ দেহিনাং। কুরুতে দাহপাকৌ চ ব্যাধিন্তং চিপ্যমাদিশেৎ ॥ তদেবাল্পতরৈর্দ্দোষৈঃ কুনখং পরুষং বদেৎ ॥ ১৪ ॥ গম্ভীরামল্পসংরম্ভাং সবর্ণামুপরিস্থিতাং। পাদস্যানুশয়ীং তাস্তু বিদ্যাদন্তঃপ্রপাকিণীং ॥ ১৫ ॥ বিদারীকন্দবদ্‌বৃত্তাং কক্ষাবঙ্ক্ষণসন্ধিষু। বিদারীমিতি তাং বিদ্যাৎ সর্ব্বজাং সর্ব্বলক্ষণাং ॥ ১৬ ॥ ইতি মাধবকরঃ ॥

পিণ্ডং (ক্লী পুং) আজীবনং। অয়ঃ। ইতি মেদিনী ॥ শ্রাদ্ধশেষদ্রব্যনির্ম্মিতবিল্বফলাকারপিত্রুদ্দেশ্যকদেয়ান্নং। যজুর্ব্বেদিনাং পিণ্ডশব্দো নপুংসকলিঙ্গেন প্রযুজ্যতে। যথা। অবনিক্তং পিণ্ডং দদ্যাদসাবেতৎ ত ইতি শ্রাদ্ধবিবেকধৃতপিণ্ডপিতৃযজ্ঞীয়কাত্যায়নবচনে পিণ্ডবিশেষণে এতদিতি নপুংসকনির্দ্দেশাৎ ভাষেতৈতচ্চ বৈ পিণ্ডং যজ্ঞদত্তস্য পূরকমিতি ঋষ্যশৃঙ্গবচনেঽপি তথা দর্শনাচ্চ। ছন্দোগানাং পিণ্ডশব্দঃ পুংলিঙ্গেন প্রযুজ্যতে। দর্ভেষু মধু মধু মধ্বিত্যক্ষন্নমী মদন্ত ইতি জপিত্বা ত্রীংস্ত্রীন্ পিণ্ডান্ দদ্যাদিতি গোভিলসূত্রে পিণ্ডানিতি পুংলিঙ্গনির্দ্দেশাৎ। ইতি শ্রাদ্ধতত্ত্বং ॥ গয়াদাবাত্মপিণ্ডদানবিধির্যথা। গয়ান্তং পিণ্ডদানঞ্চ গয়ান্তং তীর্থমেব চ। পঞ্চকান্তং কামরূপং পিচ্ছিলান্তং সরিৎ শুভে ॥ জনার্দ্দনস্য হস্তে তু পিণ্ডং দদ্যাৎ স্বকং নরঃ। বিরজে চ তথা চাশ্বকর্ণে রামে চ সোমকে ॥ জীবৎপিণ্ডপ্রদানেন অল্পায়ুর্জায়তে নরঃ। যত্রাগম্যে মহাক্ষেত্রে স্বকং পিণ্ডং দদেত্তু যঃ। মাসদ্বয়াধিকং বর্ষমায়ুষো বর্দ্ধতে ক্রমাৎ ॥ ইতি যোগিনীতন্ত্রে প্রথমতমে ২ ভাগে ৫ পটলঃ ॥ অন্যৎ গয়াশব্দে দ্রষ্টব্যং ॥

পিণ্ডঃ (পুং) বোলঃ। বলং। সান্দ্রং। দেহৈকদেশঃ। অগারৈকদেশঃ। দেহমাত্রং। নিবাপঃ। গোলঃ। সিহ্লকঃ। ওড্রপুষ্পং। ইতি মেদিনী ॥ বৃন্দং। কবলঃ। ইতি হেমচন্দ্রঃ ॥ গজকুম্ভঃ। ইত্যমরঃ ॥ মদনবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥ * ॥ নিবাপস্য পিতৃদেয়স্য বিধির্যথা। যাবদন্নমুপাদায় হবিষোঽর্ভকমর্ভকং। চরুণা

সহ সন্নীয় পিণ্ডদানমুপক্রমেৎ ॥ শ্রাদ্ধার্থান্ধবিষোঽন্নাদেঃ সকাশাৎ যাবদ্‌ভক্ষ্যমোদনব্যঞ্জনাদি ততোঽল্পাল্পং গৃহীত্বা বদগ্নৌ করণশেষেণ সহ সন্নীয় মিশ্রীকৃত্য পিণ্ডদানমারভেতেত্যর্থঃ। মধ্বাজ্যতিলসংযুক্তং সর্ব্বব্যঞ্জনসংযুতং। উষ্ণমাদায় পিণ্ডন্ত কৃত্বা বিল্বফলোপমং॥ দদ্যাৎ পিতামহাদিভ্যো দর্ভমূলাদ্যথাক্রমং। অত্র পিতামহপদং পিতৃপরং বচনান্তরৈকবাক্যত্বাৎ। সপিত্রে প্রথমং পিণ্ডং দদ্যাদুচ্ছিষ্টসন্নিধৌ। পিতামহায় চৈবাথ তৎপিত্রে চ ততঃ পরং॥ দর্ভমূলে লেপভুজস্তর্পয়েল্লেপঘর্ষণৈঃ। পিণ্ডৈর্মাতামহাংস্তদ্বদ্গন্ধমাল্যাদিসংযুতৈঃ॥ প্রীণয়িত্বা দ্বিজাগ্র্যাণাং দদ্যাদাচমনন্ততঃ। ইতি শ্রাদ্ধতত্ত্বং ॥ * ॥ অন্নাদ্যভাবে ফলাদিনাপি তস্য কর্ত্তব্যত্বং যথা। ঐঙ্গুদং বদরোন্মিশ্রং পিণ্যাকং দর্ভসংস্তরে। ন্যপ্যপিণ্ডং সতো রাম ইদং বচনমব্রবীৎ॥ ইদং ভুঙ্‌ক্ষ্ব মহারাজ প্রীতো যদশনা বয়ং। যদন্নাঃ পুরুষা রাজংস্তদন্নাঃ পিতৃদেবতাঃ ॥ ইত্যযোধ্যাকাণ্ডং ॥ * ॥ পূরকপিণ্ডবিধির্যথা। ততশ্চোত্তরপূর্ব্বস্যামগ্নিং প্রজ্বালয়েদ্দিশি। তণ্ডুলপ্রসৃতিং তত্র প্রক্ষাল্য দ্বিঃ পচেৎ স্বয়ং॥ সপবিত্রৈস্তিলৈর্মিশ্রাং কেশকীটবিবর্জিতাং। দ্বারোপান্তে ততঃ ক্ষিপ্ত্বা শুদ্ধাম্বা গৌরমৃত্তিকাং॥ তৎপৃষ্ঠে প্রস্তরেদ্দর্ভান্ যাম্যাগ্রান্ দেশসম্ভবান্। ততোঽবনেজনন্দদ্যাৎ সংস্মরন্ গোত্রনামনী॥ তিলসর্পির্মধুক্ষীরৈঃ সক্তিতং তপ্তমেব হি। দদ্যাৎ প্রেতায় পিণ্ডন্ত দক্ষিণাভিমুখস্থিতঃ॥ ফলমূলগুড়ক্ষীরতিলমিশ্রন্ত কুত্রচিৎ। অর্ঘ্যৈঃ পুষ্পৈস্তথা দীপৈর্ধূপৈস্তোয়ৈঃ সুশীতলৈঃ॥ ঊর্ণাতন্তুময়ৈঃ শুদ্ধৈর্বাসোভিঃ পিণ্ডমর্চ্চয়েৎ। প্রয়াতি যাবদাকাশং পিণ্ডাদ্বাষ্পময়ী শিখা॥ তাবত্তু সংমুখস্তিষ্ঠেৎ সর্ব্বং তোয়ে ততঃ ক্ষিপেৎ। দিবসে দিবসে দেয়ঃ পিণ্ড এবংক্রমেণ তু॥ সদ্যঃশৌচেঽপি দাতব্যাঃ সর্ব্বেঽপি যুগপত্তথা। ত্র্যহাশৌচে প্রদাতব্যাঃ প্রথমে ত্বেক এব হি॥ দ্বিতীয়েঽহনি চত্বারস্তৃতীয়ে পঞ্চ চৈব হি। একস্তোয়াঞ্জলিস্ত্বেবং পাত্রমেকঞ্চ দীয়তে॥ দ্বিতীয়ে দ্বৌ তৃতীয়ে ত্রীন্ চতুর্থে চতুরস্তথা। পঞ্চমে পঞ্চ ষষ্ঠে ষট্ সপ্তমে সপ্ত এব চ॥ অষ্টমেঽষ্টৌ চ নবমে নবৈব দশমে দশ। যেন স্যুঃ পঞ্চপঞ্চাশত্তোয়স্যাঞ্জলয়ঃ ক্রমাৎ॥ তোয়পাত্রাণি তাবন্তি সংযুক্তানি জলাদিভিঃ। ইতি শুদ্ধিতত্ত্বং ॥ * ॥ গয়ায়ামাত্মপিণ্ডদানপ্রমাণং যথা। স্বকর্ম্মধর্ম্মযোগেন ধনমুচ্চাবচং বহু। উপার্জয়িত্বা প্রযযৌ গয়াতীর্থমনুত্তমং॥ পিণ্ডনির্ব্বপণং তত্র প্রেতানামনুপূর্ব্বশঃ। চকার স্বপিতৄণাঞ্চ দায়াদানামনন্তরং॥ আত্মনশ্চ মহাবুদ্ধির্মহাবেদ্যাং তিলৈর্বিনা। পিণ্ডনির্ব্বপণং চক্রে তথান্যেষাঞ্চ গোত্রিণাং॥ এবং প্রদত্তেষ্বথ বৈ পিণ্ডেষু প্রেতভাবতঃ। বিমুক্তাস্তে দ্বিজ প্রেতা

ব্রহ্মলোকং ততো গতাঃ ॥ ইতি বামনে ৭৬ অধ্যায়ঃ ॥

পিণ্ডকং (ক্লী) বোলং। পিণ্ডমূলং। ইতি রাজনির্ঘণ্টঃ ॥

পিণ্ডকঃ (পুং) সিহ্লনামগন্ধদ্রব্যং। ইত্যমরঃ ॥ পিশাচঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ পিণ্ডালুঃ। ইতি রাজনির্ঘণ্টঃ ॥

পিণ্ডকন্দঃ (পুং) পিণ্ডালুঃ। ইতি রাজনির্ঘণ্টঃ॥

পিণ্ডখর্জ্জূরঃ (পুং) স্বনামখ্যাতখর্জ্জূরঃ। তৎপর্য্যায়ঃ। রাজজম্বুঃ ২ পিণ্ডী ৩। ইতি জটাধরঃ ॥

পিণ্ডখর্জ্জুরী (স্ত্রী) পিণ্ডখর্জ্জূরঃ। তৎপর্য্যায়ঃ। দীপ্যা ২ স্বপিণ্ডা ৩ মধুরস্রবা ৪ ফলপুষ্পা ৫ স্বাদুপিণ্ডা ৬ হয়ভক্ষা ৭ পিণ্ডখর্জ্জুরিকা ৮। অস্যা গুণাঃ। গৌল্যত্বং। হিমত্বং। পিত্তদাহার্ত্তিশ্বাসভ্রমনাশিত্বং। বীর্য্যবৃদ্ধিদত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অপি চ। পিণ্ডখর্জ্জূরিকা ত্বন্যা সা দেশে পশ্চিমে ভবেৎ। খর্জ্জূরী গোস্তনাকারা পরাদ্দ্বীপাদিহাগতা ॥ জায়তে পশ্চিমে দেশে সা ছোহোরেতি কীর্ত্ত্যতে। খর্জ্জূরীত্রিতয়ং শীতং মধুরং রসপাকয়োঃ ॥ স্নিগ্ধং রুচিকরং হৃদ্যং ক্ষতক্ষয়হরং গুরু। তর্পণং রক্তপিত্তঘ্নং পুষ্টিবিষ্টম্ভিশুক্রদং ॥ কোষ্ঠমারুতকৃদ্বল্যম্বাহ্যবাতকফাপহং। জ্বরাভিঘাতক্ষুৎতৃষ্ণাকাসশ্বাসনিবারকং ॥ মদমূর্চ্ছামরুৎপিত্তমদ্যোদ্ভূতগদান্তকৃৎ। মহতীভ্যাং গুণৈরল্পস্বল্পখর্জ্জূরিকা স্মৃতা ॥ খর্জ্জূরীতরুতোয়ন্তু মদপিত্তকরং ভবেৎ। বাতশ্লেষ্মহরং রুচ্যং দীপনং বলশুক্রকৃৎ ॥ অথ পিণ্ডখর্জ্জূরভেদঃ। সুনেপালী তু মৃদ্বল্পা বলিহীনফলা চ সা। সুনেপালী শ্রমভ্রান্তিদাহমূর্চ্ছাস্রপিত্তহৃৎ ॥ ইতি ভাবপ্রকাশঃ ॥

পিণ্ডগোসঃ (পুং) গন্ধরসঃ। ইত্যমরটীকায়াং রমানাথঃ ॥

পিণ্ডতৈলকঃ (পুং) তুরুষ্কঃ। ইতি রাজনির্ঘণ্টঃ ॥

পিণ্ডদঃ (পুং) পিণ্ডদানকর্ত্তা। যথা। লেপভাজশ্চতুর্থাদ্যাঃ পিত্রাদ্যাঃ পিণ্ডভাগিনঃ। পিণ্ডদঃ সপ্তমস্তেষাং সাপিণ্ড্যং সাপ্তপৌরুষং ॥ ইতি শুদ্ধিতত্ত্বং ॥ অপি চ। গাঙ্গেনেহ পরাং সিদ্ধিং প্রাপ্যন্তে বারিণা নরাঃ। পৈত্র্যাঃ পশ্চাৎ ক্রিয়াঃ কার্য্যাঃ সর্ব্বাশ্চৈবৌর্দ্ধদেহিকাঃ॥ ক্রিয়াং করোতি যঃ পূর্ব্বাং পিতৃণাং যশ্চ পিণ্ডদঃ। প্রায়শ্চিত্তমচীর্ণং তৎপ্রায়শ্চিত্তী ভবেত্তু সঃ ॥ ইত্যগ্নিপুরাণং ॥

পিণ্ডপদং (ক্লী) অঙ্কবিশেষঃ। যথা। রূপাষ্টকৈর্বিনিহতো ভবনস্য বন্ধঃ কর্ত্তুঃ স্বমৃক্ষমিহ যুগ্মশরৈকনিঘ্নং। একীকৃতং রসনিশাকরযুগ্মভুক্তশেষং ততো ভবতি পিণ্ডপদং গৃহস্য ॥ রূপাষ্টকৈরেকাশীত্যা বিনিহতঃ পূরিতঃ ভবনস্য বন্ধঃ দীর্ঘপ্রস্তারমিলিতহস্তাঃ স্বমৃক্ষং তৎসংখ্যানং যুগ্মশরৈকনিঘ্নং দ্বিপঞ্চাশদুত্তরশতপূরিতং একীকৃতং পূর্ব্বাঙ্কেণ মিলিতং রসনিশাকরযুগ্মভুক্তশেষং ষোড়শাধিকদ্বিশতহৃতাবশিষ্টং তৎ সংখ্যানং পিণ্ডপদসংজ্ঞং গৃহস্য ভবতি। ইতি জ্যোতিস্তত্ত্ব

পিণ্ডপাদঃ (পুং) হস্তী। ইতি ত্রিকাণ্ডশেষঃ॥
পিণ্ডপুষ্পং (ক্লী) অশোকপুষ্পং। জবাপুষ্পং। পদ্মপুষ্পং। ইতি মেদিনী॥ তগরপুষ্পং। ইতি শব্দরত্নাবলী॥
পিণ্ডপুষ্পকঃ (পুং) বাস্তূকং। ইতি শব্দমালা॥
পিণ্ডফলা (স্ত্রী) কটুতুম্বী। ইতি জটাধরঃ॥
পিণ্ডমুস্তা (স্ত্রী) নাগরমুস্তা। ইতি রাজনির্ঘণ্টঃ॥
পিণ্ডমূলং (ক্লী) গর্জ্জরং। মূলকভেদঃ। তৎপর্য্যায়ঃ। গজাণ্ডং ২ পিণ্ডকং ৩ পিণ্ডমূলকং ৪। অস্য গুণাঃ। কটুত্বং। উষ্ণত্বং। গুল্মবাতাদিদোষনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥
পিণ্ডলঃ (পুং) সেতুঃ। ইতি হারাবলী॥
পিণ্ডবীজকঃ (পুং) কর্ণিকারবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥
পিণ্ডসঃ (পুং) ভিক্ষাশী। ভিক্ষোপজীবী। ইতি শব্দমালা॥
পিণ্ডা (স্ত্রী) পিণ্ডায়সং। কস্তূরীভেদঃ। সা কুলত্থিকাতঃ কিয়ৎস্থূলা। ইতি রাজনির্ঘণ্টঃ॥ বংশপত্রী। ইতি ভাবপ্রকাশঃ॥
পিণ্ডাতঃ (পুং) সিহ্লকঃ। ইতি রত্নমালা॥
পিণ্ডাভ্রং (ক্লী) ঘনোপলঃ। ইতি শব্দমালা॥
পিণ্ডায়সং (ক্লী) তীক্ষ্ণায়সং। ইতি রাজনির্ঘণ্টঃ॥
পিণ্ডারং (ক্লী) ফলশাকবিশেষঃ। পিণ্ডারা ইতি হিন্দী ভাষা। অস্য গুণাঃ। শীতলত্বং। বল্যত্বং। পিত্তনাশিত্বং। রুচিকারিত্বং। পাকে লঘুত্বং। বিশেষেণ বিষশান্তিকরত্বঞ্চ। ইতি ভাবপ্রকাশঃ॥
পিণ্ডারঃ (পুং) ক্ষপণকঃ। গোপঃ। মহিষীরক্ষকঃ। দ্রুমভেদঃ। ইতি মেদিনী॥ বিকঙ্কতবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥
পিণ্ডালুঃ (পুং) কন্দগুড়ূচী। কন্দভেদঃ। পেড়ালু ইতি হিন্দী ভাষা। চুবড়ি আলু ইতি বঙ্গভাষা। তৎপর্য্যায়ঃ। গ্রন্থিলঃ ২ পিণ্ডকন্দঃ ৩ গ্রন্থিঃ ৪ রোমশঃ ৫ রোমকন্দঃ ৬ রোমালুঃ ৭ তাম্বূলপত্রঃ ৮ নানাকন্দঃ ৯ পিণ্ডকঃ ১০। অস্য গুণাঃ। মধুরত্বং। শীতত্বং। মূত্রকৃচ্ছ্রদাহশোষপ্রমেহনাশিত্বং। বৃষ্যত্বং। সন্তর্পণত্বং। গুরুত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥
পিণ্ডালুকং (ক্লী) আলুবিশেষঃ। গোল আলু ইতি গুড় আলু ইতি চুবড়ি আলু ইতি চ ভাষা। অস্য গুণাঃ। কফহরত্বং। গুরুত্বং। বাতপ্রকোপণত্বঞ্চ। ইতি রাজবল্লভঃ॥
পিণ্ডাহ্বা (স্ত্রী) নাড়ীহিঙ্গু। ইতি রাজনির্ঘণ্টঃ॥
পিণ্ডিঃ (স্ত্রী) পিণ্ডিকা। ইত্যমরটীকায়াং রমানাথঃ॥
পিণ্ডিকা (স্ত্রী) রথনাভিঃ। ইত্যমরঃ॥ সা রথচক্রমধ্যে মণ্ডলাকারা যস্যাং সর্ব্বাণি কাষ্ঠান্যাসজ্যন্তে। ইতি রায়মুকুটঃ॥ পিচিণ্ডিকা। সা জানুনোঽধোমাংসলপ্রদেশঃ। পায়ের ডিম্ ইতি ভাষা। ইতি হেমচন্দ্রঃ॥ শ্বেতাম্লিঃ। ইতি রাজনির্ঘণ্টঃ॥ পীঠঃ। যথা। সূত উবাচ। পিণ্ডিকালক্ষণং বক্ষ্যে যথাবদনুপূর্ব্বশঃ। পীঠোচ্ছ্রায়ং যথাবচ্চ ভাগান্ ষোড়শ কারয়েৎ॥ ভূমাবেকঃ প্রতিষ্ঠঃ স্যাচ্চতুর্ভির্জগতী মতা। বৃত্তো ভাগস্তথৈকঃ স্যাৎ বৃত্তপট্টস্য

ভাগতঃ ॥ ভাগৈস্ত্রিভিস্তথা কণ্ঠং কণ্ঠপট্টস্তু ভাগতঃ। ভাগেন বৃত্তপট্টস্তু শেষভাগেন পট্টিকী ॥ প্রচিন্ত্যং ভাগমেকৈকং জগতী যাবদেব তু। নির্গমস্তু পুরস্তস্যা যাবদ্ বিশেষপট্টিকাঃ ॥ পীঠিকানান্তু সর্ব্বাসামেতৎ সামান্যলক্ষণং। নিঃশেষাদেবতাভেদাচ্ছৃণুধ্বং দ্বিজসত্তমাঃ ॥ স্থণ্ডিলা বাথ বাপী চ যক্ষী বেদী চ মণ্ডলা। পূর্ণচন্দ্রা চ বজ্রী চ পদ্মা বার্দ্ধশশিস্তথা ॥ ত্রিকোণা দশমী তাসাং সংস্থানঞ্চ নিবোধত। স্থণ্ডিলা চতুরস্রা তু বর্জিতা মেখলাদিভিঃ ॥ বাপী দ্বিমেখলা জ্ঞেয়া যক্ষী চৈব ত্রিমেখলা। চতুরস্রায়তাং বেদীং ন তাং লিঙ্গেষু যোজয়েৎ ॥ মণ্ডলা বর্ত্তুলা যা তু মেখলাভির্গণপ্রিয়া। রিক্তা দ্বিমেখলা মধ্যে পূর্ণচন্দ্রা তু সা ভবেৎ ॥ মেখলাত্রয়সংযুক্তা ষড়স্রা বজ্রিকা ভবেৎ। ষোড়শাস্রা ভবেৎ পদ্মা কিঞ্চিদ্ধ্রস্বা চ মূলতঃ ॥ তথৈব ধনুরাকারা সার্দ্ধচন্দ্রা প্রশস্যতে। ত্রিশূলসদৃশা তদ্বৎত্রিকোণানূর্দ্ধতো মতা॥ প্রাগুদক্প্রবণা তদ্বৎপ্রশস্তা লক্ষণান্বিতা। পরিবেষস্ত্রিভাগেন নির্দেশস্তত্র কারয়েৎ ॥ বিস্তারন্তৎপ্রমাণস্তু মূলে চাগ্রে তদূর্দ্ধতঃ। জলবাহশ্চ কর্ত্তব্যস্ত্রিভাগেন সুশোভনঃ ॥ লিঙ্গস্যার্দ্ধত্রিভাগেন স্থৌল্যেন সমধিষ্ঠিতা। মেখলা তু ত্রিভাগেন খাতং বৈ তৎপ্রমাণতঃ ॥ অথবা পাদহীনস্তু শোভনঙ্কারয়েৎ সদা। উত্তরস্থং প্রমাণস্তু প্রমাণাদধিকম্ভবেৎ ॥ স্থণ্ডিলায়ামথারোগ্যং ধনধান্যঞ্চ পুষ্কলং। গোপ্রদা তু ভবেৎ যক্ষী বেদী সম্পৎপ্রদা ভবেৎ ॥ মণ্ডলায়াং ভবেৎ কীর্ত্তির্ব্বরদা পূর্ণচন্দ্রিকা। আয়ুঃপ্রদা ভবেদ্বজ্রী পদ্মা সৌভাগ্যদায়িনী॥ পুত্রপ্রদার্দ্ধচন্দ্রা স্যাৎ ত্রিকোণা শত্রুনাশিনী। দেবস্য যজনার্থন্তু পিণ্ডিকা দশ কীর্ত্তিতাঃ॥ শৈলে শৈলময়ীং দদ্যাৎ পার্থিবে পার্থিবীন্তথা। দারুজে দারুজাং কুর্য্যান্মিশ্রে মিশ্রান্তথৈব চ। নান্যযোনিস্তু কর্ত্তব্যা সদা শুভফলেপ্সুভিঃ ॥ অর্চ্চায়ামসমং দৈর্ঘ্যং লিঙ্গায়ামসমং তথা। যস্য দেবস্য যা পত্নী তাং পীঠে পরিকল্পয়েৎ ॥ এবমেতৎ সমাখ্যাতং সমাসাৎ পীঠলক্ষণং। ইতি মৎস্যপুরাণে পীঠিকানুকীর্ত্তনং ২৩৬ অধ্যায়ঃ ॥

পিণ্ডিতং (ত্রি) গণিতং। ঘনং। ইতি বিশ্বমেদিন্যৌ॥ গুণিতং। ইতি হেমচন্দ্র ॥ তুরুস্কে পুং। ইতি রাজনির্ঘণ্টঃ॥

পিণ্ডিলঃ (পুং) সেতুঃ। ইতি ত্রিকাণ্ডশেষঃ॥ গণকঃ। ইত্যুণাদিকোষঃ॥

পিণ্ডিলা (স্ত্রী) গোড়ুম্বা। ইতি শব্দচন্দ্রিকা॥

পিণ্ডী [ন্] (ত্রি) শরীরী। যথা। যথা সূর্য্যং বিনা ভূমির্গৃহং দীপবিবর্জ্জিতং। লিঙ্গহীনো যথা পিণ্ডী জয়শ্রীস্ত্বাং বিনা তথা॥ ইতি জৈমিনিভারতে আশ্বমেধিকপর্ব্বণি ৩৮ অধ্যায়ঃ॥

পিণ্ডী (স্ত্রী) পিণ্ডীতগরঃ। অলাবূঃ। খর্জূরবিশেষঃ। ইতি মেদিনী॥ জ্ঞাননিরূপণার্থকোপন্যাসঃ। ইতি ধরণিঃ॥ পিণ্ডিকা। ইত্যমরটীকায়াং রায়মুকুটঃ॥ পিণ্ডং। যথা। নীতায় তুরগায়াশু ভক্তপিণ্ডীং

সুগন্ধিনীং। দদ্যাৎ পুরোহিতস্তত্র সংমন্ত্র্য শান্তিমন্ত্রকৈঃ ॥ ইতি কালিকাপুরাণে ৮৩ অধ্যায়ঃ ॥

পিণ্ডীতকঃ (পুং) মদনবৃক্ষঃ। ইত্যমরঃ॥ তগরঃ। ফণিজ্ঝকঃ। ইতি বিশ্বঃ ॥

পিণ্ডীতগরঃ (পুং) তগরবিশেষঃ। তৎপর্য্যায়ঃ। কফবর্দ্ধনঃ ২। ইতি ত্রিকাণ্ডশেষঃ ॥

পিণ্ডীতগরকঃ (পুং) তগরং। ইতি রাজনির্ঘণ্টঃ ॥

পিণ্ডীতরুঃ (পুং) মহাপিণ্ডীতরুঃ। ইতি রাজনির্ঘণ্টঃ ॥

পিণ্ডীপুষ্পঃ (পুং) অশোকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

পিণ্ডীরঃ (পুং) দাড়িমবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ হিণ্ডীরঃ। ইত্যমরটীকায়াং রায়মুকুটঃ ॥ নীরসে ত্রি। ইতি হারাবলী ॥

পিণ্ডীশূরঃ (পুং) স্বগেহমাত্রে বসন্ পরদ্বেষী। তৎপর্য্যায়ঃ। গেহেনর্দী ২ গেহেশূরঃ৩। ইতি হেমচন্দ্রঃ ॥

পিণ্ডোলিঃ (স্ত্রী) ভুক্তসমুজ্ঝিতঃ। ইতি হেমচন্দ্রঃ ॥

পিণ্যা (স্ত্রী) জ্যোতিষ্মতী। পণ্যতে স্তূয়তে রোগহন্তৃত্বাৎ পণ্যা পণ ঙ ব্যবহৃতৌ স্তুতৌ মূর্দ্ধন্যান্তঃ তব্যানীয়যা ইতি যঃ নিপাতনাদৎ ইৎ। পণ্যেতি পঠতি স্বামী। ইত্যমরভরতৌ ॥

পিণ্যাকঃ (পুং ক্লী) তিলকল্কঃ। হিঙ্গু। বাহ্লীকং। সিহ্লকঃ। ইতি মেদিনী ॥ আদ্যস্য ভক্ষণে দোষো যথা। পিণ্যাকং ভক্ষয়িত্বা তু যো বৈ মামুপসর্পতি। তস্য বৈ শৃণু সুশ্রোণি প্রায়শ্চিত্তং সুশোভনং ॥ উলূকো দশবর্ষাণি কচ্ছপস্তু সমাস্ত্রয়ঃ। জায়তে মানবস্তত্র মম কর্ম্মপরায়ণঃ ॥ ইতি বরাহপুরাণং ॥

পিতরৌ (পুং) জনকজনয়িত্র্যৌ। মাতা চ পিতা চেতি বিগ্রহে বিকল্পাদেকশেষে পিতরাবিতি প্রাঞ্চঃ। ইতি ভরতঃ ॥ তৎপর্য্যায়ঃ। মাতাপিতরৌ ২ মাতরপিতরৌ ৩ তাতজনয়িত্র্যৌ ৪। ইত্যমরঃ ॥ তয়োরভক্ত্যা পালনে দোষো যথা। পিতৃমাতৃগুরূংশ্চাপি ভক্তিহীনেন পালয়েৎ। বাচা চ তাড়য়েন্নিত্যং স্বামিনং কুলটা চ যা ॥ সা কৃতঘ্নীতি বিখ্যাতা পাপিনাং ভারতে নরঃ। বহ্নিকুণ্ডং মহাঘোরং স চ সা চ প্রয়াতি চ ॥ তত্র বহ্নৌ বসত্যেব যাবচ্চন্দ্রদিবাকরৌ। ততো ভবেজ্জলৌকা চ জন্মসপ্ত ততঃ শুচিঃ ॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ৪৯ অধ্যায়ঃ ॥

পিতা [ঋ] (পুং) পাতি রক্ষত্যপত্যং যঃ। বাপ্ ইতি ভাষা। তৎপর্য্যায়ঃ। তাতঃ ২ জনকঃ ৩। ইত্যমরঃ ॥ প্রসবিতা৪ বপ্তা৫ জনয়িতা ৬ গুরুঃ ৭ জন্মদঃ ৮ জন্যঃ ৯ জনিতা১০। ইতি শব্দরত্নাবলী ॥ বীজী১১ বপ্রঃ ১২। ইতি হেমচন্দ্রঃ ॥ * ॥ তস্য মান্যত্বং লক্ষণঞ্চ যথা। মান্যঃ পূজ্যশ্চ সর্ব্বেভ্যঃ সর্ব্বেষাং জনকো ভবেৎ। অহো যস্য প্রসাদেন সর্ব্বান্ পশ্যতি মানবঃ ॥ জনকো জন্মদাতা চ রক্ষণাচ্চ পিতা নৃণাং। তাতো বিস্তীর্ণকরণাৎ

কলয়া স প্রজাপতিঃ॥ ইতি ব্রহ্মবৈবর্ত্তে গণপতিখণ্ডে ৪৪ অধ্যায়ঃ॥ * ॥ স চ গুরুঃ। যথা। উপাধ্যায়ঃ পিতা জ্যেষ্ঠো ভ্রাতা চৈব মহীপতিঃ। মাতুলঃ শ্বশুরস্ত্রাতা মাতামহপিতামহৌ॥ বন্ধুর্জ্যেষ্ঠপিতৃব্যশ্চ পুংস্বেতে গুরবঃ স্মৃতাঃ। ইতি কৌর্ম্মে উপবিভাগে ১১ অধ্যায়ঃ॥ * ॥ সোঽপি মহাগুরুঃ। যথা। মহাগুরুনাহ বিষ্ণুঃ। ত্রয়ঃ পুরুষস্যাতিগুরবো ভবন্তি মাতা পিতাচার্য্যশ্চেতি। ইতি শুদ্ধিতত্ত্বং॥ * ॥ কামাসক্তস্য পিতুর্ব্বচনমগ্রাহ্যং যথা। পিতুর্ব্বচো হি মা কার্ষীঃ কামব্যাসক্তচেতসঃ। আত্মানঞ্চাভিষিঞ্চস্ব তদর্থং ক্ষত্রিয়ো হ্যসি॥ ইত্যাগ্নেয়ে শ্রীরামং প্রতি কৌশল্যাবাক্যং॥ * ॥ তস্য পুত্রকৃতধর্ম্মাধর্ম্মভাগিত্বং যথা। যঃ পিতা স তু পুত্রোঽয়মিতি বৈ বৈদিকী শ্রুতিঃ। নিগদ্যতে পুরাণে তু তাং শৃণুষ্ব যথাতথং॥ ন্যগ্রোধস্য সুশাখায়াঃ শটাস্তাস্তু গতা ভুবি। প্ররোহানুপপদ্যন্তে মূলভ্রংশাস্তথা সুতাঃ॥ তদ্বিধানুপপদ্যন্তে তথান্যে তে চ তাদৃশাঃ। তেভ্যশ্চান্যে প্ররোহন্তি ব্রীহিভ্যোঽপি যথা তথা॥ এবং পুত্রৈঃ কৃতো ধর্ম্মস্তথাধর্ম্মশ্চ ভূপতে। পিতা সংলিপ্যতে তেন মা চ ত্বং সংশয়ং কৃথাঃ॥ ন ধর্ম্মিণাং নরাণান্তু বীজনাশো ভবেদিহ। সর্ব্বথা শংসতে লোকে বীজাৎ পুনঃ সমুচ্ছ্রয়ঃ॥ ইত্যাগ্নেয়ে পাপনাশনবৃষদানাধ্যায়ঃ॥ * ॥ তস্মিন্ জীবতি বাহ্বোস্তিলকনিষেধো যথা। ন বাহ্বোস্তিলকং কুর্য্যাৎ যস্য জীবন্ পিতা স্থিতঃ। তথা জ্যেষ্ঠঃ সোদরশ্চ যস্য জীবতি স তথা॥ ইতি বৃহদ্ধর্ম্মপুরাণং॥ * ॥ উৎপাদকপিত্রপেক্ষয়া মন্ত্রদাতৃপিতুর্গুরুত্তরত্বং যথা। উৎপাদকব্রহ্মদাত্রোর্গরীয়ান্ ব্রহ্মদঃ পিতা। তস্মান্মন্যেত সততং পিতুরপ্যধিকং গুরুং॥ ইতি তন্ত্রসারঃ॥ * ॥ পঞ্চপিতরো যথা। অন্নদাতা ভয়ত্রাতা যস্য কন্যা বিবাহিতা। জনয়িতা চোপনেতা চ পঞ্চৈতে পিতরঃ স্মৃতাঃ॥ ইতি চাণক্যং॥ * ॥ সপ্ত পিতরো যথা। কন্যাদাতান্নদাতা চ জ্ঞানদাতাভয়প্রদঃ। জন্মদো মন্ত্রদো জ্যেষ্ঠভ্রাতা চ পিতরঃ স্মৃতাঃ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ৩৫ অধ্যায়ঃ॥ * ॥ একত্রিংশৎপিতৃগণা যথা। বিশ্বো বিশ্বভুগারাধ্যো ধর্ম্মো ধন্যঃ শুভাসনঃ। ভূমিদো ভূমিকৃদ্ভূতিঃ পিতৃণাং যে গণা নব॥ কল্যাণঃ কল্যদঃ কল্যতরঃ কল্যতরাশ্রয়ঃ। কল্যতাহেতুরনঘঃ ষড়িমে তে গণাঃ স্মৃতাঃ॥ বরো বরেণ্যো বরদো ভূতিদঃ পুষ্টিদস্তথা। বিশ্বপাতা তথা ধাতা সপ্তৈতে চ গণাঃ স্মৃতাঃ॥ মহান্ মহাত্মা মহিতো মহিমাবান্মহাবলঃ। গণাঃ পঞ্চ তথৈবৈতে পিতৃণাং পাপনাশনাঃ॥ সুখদো ধনদশ্চান্যো ধর্ম্মদোঽন্যশ্চ ভূতিদঃ। পিতৃণাং কথ্যতে চৈতত্তথা গণচতুষ্টয়ং॥ একত্রিংশৎপিতৃগণা যৈর্ব্যাপ্তমখিলং জগৎ। তে মেঽত্র তৃপ্তাস্তুষ্যন্তু দিশন্তু চ সদা হিতং॥ ইতি গারুড়ে পিতৃস্তোত্রং ৮৯ অধ্যায়ঃ॥

পিতামহঃ (পুং) ব্রহ্মা। পিতৃপিতা। ঠাকুরদাদা ইতি ভাষা। ইত্যমরঃ॥ শেষস্য পর্য্যায়ঃ। আর্য্যকঃ ২। ইতি শব্দমালা॥

পিতামহী (স্ত্রী) পিতামহপত্নী। ঠাকুরমা ইতি ভাষা। ইতি জটাধরঃ॥ পৌত্রৈঃ পিতামহধনবিভাগকরণে পিতামহ্যৈ মাতৃবদ্ভাগো দেয়ঃ। যথা। অসুতাশ্চ পিতুঃ পত্ন্যঃ সমানাংশাঃ প্রকীর্ত্তিতাঃ। পিতামহ্যশ্চ সর্ব্বাস্তা মাতৃতুল্যাঃ প্রকীর্ত্তিতাঃ॥ ইতি দায়ভাগে ব্যাসঃ॥

পিতৃকং (ত্রি) পিতৃসম্বন্ধি। যথা। পৈত্রঞ্চ পিতৃকঞ্চাপি পিত্র্যঞ্চ পিতুরাগতং। ইতি শব্দমালা॥

পিতৃকাননং (ক্লী) শ্মশানং। ইতি জটাধরঃ॥

পিতৃগৃহং (ক্লী) শ্মশানং। ইতি হেমচন্দ্রঃ॥ পিতৃবেশ্ম চ॥

পিতৃতর্পণং (ক্লী) পিতৃতীর্থং। তত্তু তর্জন্যঙ্গুষ্ঠয়োর্ম্মধ্যং। ইতি শব্দচন্দ্রিকা॥ নিবাপঃ। ইতি হেমচন্দ্রঃ॥ তিলঃ। ইতি রাজনির্ঘণ্টঃ॥ পিতৃতীর্থেন পিত্রুদ্দেশ্যকজলদানং। তস্যানুষ্ঠানং তর্পণশব্দে দ্রষ্টব্যং। পিতৃণাং তৃপ্তিমাত্রঞ্চ॥

পিতৃতিথিঃ (স্ত্রী) অমাবাস্যা। যথা। অমাবাস্যাদিনং যোহস্তু তস্যাং কুশতিলোদকৈঃ। তর্পিতা মানুষৈস্তৃপ্তিং পরাং গচ্ছত নান্যথা॥ ইতি বারাহে পিতৃসর্গস্থিতিবর্ণনং॥

পিতৃতীর্থং (ক্লী) গয়া। ইতি জটাধরঃ॥ ২২০ পিতৃবল্লভতীর্থানি মৎস্যপুরাণে শ্রাদ্ধকল্পে ২৩ অধ্যায়ে দ্রষ্টব্যানি॥ তর্জ্জন্যঙ্গুষ্ঠয়োর্ম্মধ্যং। ইত্যমরঃ॥ অন্তরাঙ্গুষ্ঠদেশিন্যোঃ পিতৃণাং তীর্থমুত্তমং। ইতি কৌর্ম্মে উপবিভাগে ১১ অধ্যায়ঃ॥

পিতৃদানং (ক্লী) পিত্রাদ্যুদ্দেশেনান্নবস্ত্রাদিদানং। পিতৃপদং মৃতোপলক্ষণং তেন মাত্রাদেরপি গ্রহণং। তৎপর্য্যায়ঃ। নিবাপঃ ২। ইত্যমরঃ॥ নিবপনং ৩ পিতৃদানকং ৪। ইতি শব্দরত্নাবলী॥ মৃতমুদ্দিশ্য যদ্দানং নিবাপঃ স প্রকীর্ত্তিতঃ। ইতি ভরতঃ॥

পিতৃদানকং (ক্লী) পিত্রুদ্দেশ্যকদানং। ইতি শব্দরত্নাবলী॥

পিতৃপতিঃ (পুং) যমঃ। ইত্যমরঃ॥

পিতৃপক্ষঃ (পুং) গৌণাশ্বিনকৃষ্ণপক্ষঃ। স তু প্রেতপক্ষঃ। তত্র শ্রাদ্ধফলং যথা। হেমাদ্রিমাধবসংগ্রহয়োর্নাগরখণ্ডং। আষাঢ্যাঃ পঞ্চমে পক্ষে কন্যাসংস্থে দিবাকরে। যো বৈ শ্রাদ্ধং নরঃ কুর্য্যাদেকস্মিন্নপি বাসরে। তস্য সংবৎসরং যাবৎ তৃপ্তাঃ স্যুঃ পিতরো ধ্রুবং॥ নভা বাথ নভস্যো বা মলমাসো যদা ভবেৎ। সপ্তমঃ পিতৃপক্ষঃ স্যাদন্যত্রৈব তু পঞ্চমঃ॥ ইতি মলমাসতত্ত্বং॥

পিতৃপিতা [ঋ] (পুং) পিতামহঃ। ইত্যমরঃ॥

পিতৃপ্রসূঃ (স্ত্রী) সন্ধ্যা। ইত্যমরঃ॥ পিতামহী চ॥

পিতৃপ্রিয়ঃ (পুং) ভৃঙ্গরাজঃ। ইতি রাজনির্ঘণ্টঃ॥

পিতৃভোজনঃ (পুং) মাষঃ। ইতি রাজনির্ঘণ্টঃ॥ পিতৃণাং ভক্ষণে ক্লী॥

পিতৃভ্রাতা [ঋ] (পুং) পিতৃব্যঃ। ইত্যমরঃ॥

পিতৃযজ্ঞঃ (পুং) তর্পণং। যথা। অধ্যাপনং ব্রহ্মযজ্ঞঃ পিতৃযজ্ঞস্তু তর্পণং। হোমো দৈবো বলির্ভৌতো নৃযজ্ঞোঽতিথিপূজনং॥ ইতি মনুঃ॥

পিতৃলোকঃ (পুং) পিতৄণাং ভুবনং। যথা। মার্কণ্ডেয় উবাচ। সর্ব্বেষামেব দেবানামাদ্যো নারায়ণো গুরুঃ। তস্মাদ্‌ব্রহ্মা সমুৎপন্নঃ সোঽপি সপ্তাসৃজন্মুনীন্॥ মা যজস্বেতি তেনোক্তাস্তদা তে পরমেষ্ঠিনঃ। আত্মনাত্মানমেবাগ্রে অযজন্ত ইতি শ্রুতিঃ॥ তেষাং বৈ ব্রহ্মজাতানাং মহাবৈকারিকর্ম্মণাং। অপশ্যদ্ব্যভিচারেণ মহানেষ কৃতো যতঃ। প্রভ্রষ্টজ্ঞানিনঃ সর্ব্বে ভবিষ্যথ ন সংশয়ঃ॥ এবং শপ্তাস্ততস্তেঽপি ব্রহ্মণাত্মসমুদ্ভবাঃ। সদ্যোবংশকরান্ পুত্রানুৎপাদ্য ত্রিদিবং যযুঃ॥ ততস্তেষু প্রযাতেষু ত্রিদিবং ব্রহ্মবাদিষু। তৎপুত্রাঃ শ্রাদ্ধদানেন তর্পয়ামাসুরঞ্জসা॥ তে চ বৈমানিকাঃ সর্ব্বে ব্রহ্মণঃ সপ্ত মানসাঃ। তৎপিণ্ডদানমন্ত্রোক্তং প্রপশ্যন্তো ব্যবস্থিতাঃ॥ গৌরমুখ উবাচ। যে চ তে পিতরো ব্রহ্মন্ স্বঞ্চ কালং সমাসতে। কিয়ন্তো বৈ পিতৃগণাস্তস্মিন্ লোকে ব্যবস্থিতাঃ॥ মার্কণ্ডেয় উবাচ। প্রবর্ত্তন্তে বরাঃ কেচিদ্দেবানাং সোমবর্দ্ধনাঃ। তে মরীচ্যাদয়ঃ সপ্ত স্বর্গে তে পিতরঃ স্মৃতাঃ॥ চত্বারো মূর্ত্তিমন্তো বৈ ত্রয়স্ত্বন্যে হ্যমূর্ত্তয়ঃ। তেষাং লোকনিসর্গঞ্চ কীর্ত্তয়িষ্যামি তচ্ছৃণু॥ প্রভাবঞ্চ মহর্ষে ত্বং বিস্তরেণ নিবোধ মে। ধর্ম্মমূর্ত্তিধরাস্তেষাং ত্রয়োঽন্যে পরমা গণাঃ। তেষাং নামানি লোকাংশ্চ কীর্ত্তয়িষ্যামি তচ্ছৃণু॥ লোকাঃ সন্তানকামায় যত্র তিষ্ঠন্তি ভাস্বরাঃ। অমূর্ত্তয়ঃ পিতৃগণাস্তে বৈ পুত্রাঃ প্রজাপতেঃ॥ বিরাজস্য প্রজাঃ শ্রেষ্ঠাস্তে বৈরাজা ইতি স্মৃতাঃ। দেবানাং পিতরস্তে হি তান্ যজন্তীহ দেবতাঃ॥ এতে বৈ লোকবিভ্রষ্টা লোকান্ প্রাপ্য সনাতনান্। পুনর্যুগশতান্তেষু জায়ন্তে ব্রহ্মবাদিনঃ॥ তে প্রাপ্য তাং স্মৃতিং ভূয়ঃ সিদ্ধিযোগমনুত্তমং। চিন্ত্য যোগগতিং শুদ্ধাং পুনরাবৃত্তিদুর্লভাঃ॥ এতেঽস্মিন্ পিতরঃ শ্রাদ্ধে যোগিনাং যোগবর্দ্ধনাঃ। আপ্যায়িতাস্তু তে পূর্ব্বং যেঽপি যোগবলে রতাঃ॥ তস্মাৎ শ্রাদ্ধানি দেয়ানি যোগিনাং যোগসত্তমৈঃ। এষ বৈ প্রথমঃ সর্গঃ সোমপানামনুত্তমঃ॥ এতে ত একতনবো বর্ত্তন্তে দ্বিজসত্তমাঃ। ভূর্লোকবাসিনা যাজ্যা ভুবর্লোকনিবাসিনঃ॥ স্বর্গলোকা মরীচ্যাদ্যাস্তেষাং যাজ্যা মহর্গতাঃ। কল্পবাসিকসংজ্ঞানাং তেষামপি জনে স্থিতাঃ॥ সনকাদ্যাস্ততস্তেষাং বৈরাজাস্তপসি স্থিতাঃ। তেষাং সত্যগতাঃ প্রোক্তা ইত্যেষা পিতৃসন্ততিঃ॥ সপ্তধা সপ্তলোকেষু আদিমন্বন্তরক্রিয়া। অন্যেষাং বসবঃ সাধ্যা রুদ্রাদিত্যাশ্বিনাবিতি॥ অগ্রতঃ সর্ব্ববর্ণানাং সাধারণ্যেন সংস্থিতাঃ। ঋষয়শ্চ তদুৎপন্না ইতি সপ্তবিধা গণাঃ॥ তেষাং

কল্যাস্তু সংজাতা মহতী পিতৃসন্ততিঃ। অগ্নিস্বাত্তাশ্চ মারীচা বৈরাজা বর্হিসংজ্ঞিতাঃ ॥ সুকালা নাম পিতরো বশিষ্ঠস্য প্রজাপতেঃ। তেঽপি যাজ্যাস্ত্রিভির্বর্ণৈর্ন শূদ্রেণ পৃথক্ কৃতং ॥ বর্ণত্রয়াভ্যনুজ্ঞাতঃ শূদ্রঃ সর্ব্বান্ পিতৃন্ যজেৎ। ন তু তস্য পৃথক্ সন্তি পিতরঃ শূদ্রজাতয়ঃ ॥ মুক্তচেতনকা ব্রহ্মন্ ন দৃশ্যন্তে পিতৃস্বপি। বিশেষশাস্ত্রদৃষ্ট্যা তু পুরাণানাঞ্চ দর্শনাৎ॥ এবং ঋষিস্তৈতৈঃ শাস্ত্রৈর্জ্ঞাত্বা যাজকসম্ভবাৎ। স্বয়ং সৃষ্ট্যা স্মৃতির্লব্ধা পুত্রাণাং ব্রহ্মণা ততঃ ॥ পরং নির্ব্বাণমাপন্নাস্তেঽপি জ্ঞানিন এব চ। বৈশ্যাদীনাং কশ্যপাদ্যা বর্ণানাং বসবাদয়ঃ ॥ অবিশেষেণ বিজ্ঞেয়া গন্ধর্বাদ্যা অপি ধ্রুবং। এষ তে পৈতৃকঃ সর্গ উদ্দেশেন মহামুনে। কথিতো নান্ত এবাস্য বর্ষকোট্যা হি দৃশ্যতে ॥ ইতি বারাহে শ্রাদ্ধকল্পঃ ॥*॥ অপি চ। পিতৄণাং সম্ভবং রাজন্ কথ্যমানং নিবোধ মে। পূর্ব্বং প্রজাপতির্ব্রহ্মা সিসৃক্ষুর্বিবিধাঃ প্রজাঃ ॥ একাগ্রমানসঃ সর্ব্বাস্তন্মাত্রা মনসো বহিঃ। কৃত্বা পরমকং ব্রহ্ম ধ্যায়ন্ সর্ব্বেষু রূপকৈঃ ॥ তস্যাত্মনি তদা যোগং গতস্য পরমেষ্ঠিনঃ। তন্মাত্রা নির্যযুর্দ্দেহাদ্ধূমবর্ণকৃতত্বিষঃ ॥ পিবাম ইতি ভাষন্তঃ সুরাং সোমমিতোঽসকৃৎ। ঊর্দ্ধং জিগমিষন্তো বৈ অধঃসংস্থাস্তপস্বিনঃ ॥ তান্ দৃষ্ট্বা সহসা ব্রহ্মা তির্য্যক্‌সংস্থাংস্তদোন্মুখান্। ভবন্তঃ পিতরঃ সন্তু সর্ব্বেষাং গৃহমেধিনাং ॥ ঊর্দ্ধবক্ত্রাস্তু যে তত্র তে নান্দীমুখসংজ্ঞিতাঃ ॥ ইত্যুক্ত্বা তু তদা ব্রহ্মা তেষাং পন্থানমাকরোৎ। দক্ষিণায়নসংজ্ঞস্তু পিতৄণাস্তু পিতামহঃ ॥ তুষ্ণীং সসর্জ ভূতানি তমূচুঃ পিতরস্ততঃ। বৃত্তিং নো দেহি ভগবন্ যয়া বিন্দামহে সুখং ॥ ব্রহ্মোবাচ। অমাবাস্যাদিনং বোঽস্তু তস্যাং কুশতিলোদকৈঃ। তর্পিতা মানুষৈস্তৃপ্তিং পরাং গচ্ছত নান্যথা ॥ তিলা দেয়াস্তথৈতস্যামুপোষ্য পিতৃভক্তিতঃ। পরমং তস্য সন্তুষ্টাঃ পরং যচ্ছত মা চিরং ॥ ইতি বারাহে পিতৃসর্গস্থিতিবর্ণনং ॥ * ॥ পিতৃশ্রাদ্ধবিশেষে দেবতাবিশেষাঃ পিতৃগণাশ্চ যথা। ক্রতুর্দক্ষো বসুঃ সত্যঃ কামঃ কালস্তথা ধ্বনিঃ। রোচকশ্চাদ্রবাশ্চৈব তথা চান্যঃ পুরূরবাঃ ॥ বিশ্বেদেবা ভবন্ত্যেতে দশ সর্ব্বত্র পূজিতাঃ। বিশ্বদেবৌ ক্রতুদক্ষৌ সর্ব্বাস্বিষ্টিষু বিশ্রুতৌ ॥ নিত্যং নান্দীমুখশ্রাদ্ধে বসুসত্যৌ চ পৈতৃকে। নবান্নালম্ভনে দেবৌ কামকালৌ সদৈব হি ॥ অপি কন্যাগতে সূর্য্যে শ্রাদ্ধে চ ধ্বনিরোচকৌ। পুরূরবাশ্চাদ্রবাশ্চ বিশ্বদেবৌ চ পর্ব্বণি ॥ সুভাস্বরা বর্হিষদো হ্যগ্নিস্বাত্তাস্তথৈব চ। আজ্যপাশ্চোপহূতাশ্চ ক্রব্যাদাশ্চ সুকালিনঃ। এতে পিতৃগণাঃ সপ্ত পৌরাণাঃ কেচিদেব হি ॥ ইত্যগ্নিপুরাণং ॥ * ॥ অগ্নিস্বাত্তাদেরুৎপত্তির্যথা ততো নিগৃহ্যেন্দ্রিয়কং বিকারং চতুরাননঃ জিঘৃক্ষুরপি তত্যাজ তাং সন্ধ্যাং কামরূপিণীং ॥ তৎশরীরাত্তু ঘর্ম্মাম্ভো যৎ পপাত দ্বিজোত্তমাঃ। অগ্নিস্বাত্তা বর্হিষদো

জাতাঃ পিতৃগণাস্ততঃ ॥ ভিন্নাঞ্জননিভাঃ সর্ব্বে ফুল্লরাজীবলোচনাঃ। নিতান্ত-সংযতাঃ পুণ্যাঃ সংসারবিমুখাঃ পরে ॥ সহস্রাণাং চতুঃষষ্টিরগ্নিস্বাত্তাঃ প্রকীর্ত্তিতাঃ। ষড়শীতিসহস্রাণি তথা বর্হিষদো দ্বিজাঃ॥ ইতি কালিকাপুরাণে ২ অধ্যায়ঃ॥*॥ তেষাং তর্পণবিধির্যথা। অপসব্যং ততঃ কৃত্বা সব্যং জানু চ ভূতলে। অগ্নিস্বাত্তাং-স্তথা সৌম্যান্ হবিষ্মতস্তথোষ্মপান্ ॥ সুকালিনো বর্হিষদস্তথা চৈবাজ্যপান্ পুনঃ। তর্পয়েত্তু পিতৄন্ ভক্ত্যা সতিলোদক-চন্দনৈঃ॥ দর্ভপাণিস্তু বিধিবৎ প্রেতাং-স্তাংস্তর্পয়েত্ততঃ। পিত্রাদীন্নামগোত্রেণ তথা মাতামহানপি। সন্তর্প্য বিধিবদ্ভক্ত্যা ইমং মন্ত্রমুদীরয়েৎ॥ যে বান্ধবাবান্ধবা বা যেঽন্যজন্মনি বান্ধবাঃ। তে তৃপ্তিমখিলাং যান্তু যশ্চাস্মত্তোঽভিবাঞ্ছতি॥ ইতি মাৎস্যে স্নানবিধৌ ৮৪ অধ্যায়ঃ॥

পিতৃবনং (ক্লী) শ্মশানং। ইত্যমরঃ॥

পিতৃবনেচরঃ (পুং) শিবঃ। ইতি কেচিৎ॥

পিতৃবন্ধুঃ (পুং) পিতামহভগিনীপুত্ত্রঃ। পিতামহীভগিনীপুত্ত্রঃ। পিতুর্মাতুলপুত্ত্রঃ। ইত্যুদ্বাহতত্ত্বং॥

পিতৃবসতিঃ (স্ত্রী) শবশয়নস্থানং। শ্মশানং। ইত্যমরটীকায়াং রমানাথঃ॥

পিতৃবান্ধবঃ (পুং) পিতৃবন্ধুঃ। যথা। পিতুঃ পিতুঃস্বসুঃ পুত্ত্রাঃ পিতুর্মাতুঃস্বসুঃ সুতাঃ। পিতুর্মাতুলপুত্ত্রাশ্চ বিজ্ঞেয়াঃ পিতৃবান্ধবাঃ॥ ইত্যুদ্বাহতত্ত্বং॥

পিতৃব্যঃ (পুং) পিতৃভ্রাতা। ইত্যমরঃ॥ অপি চ। পিতৃব্যো জনকভ্রাতা জ্যেষ্ঠতাতো-ঽগ্রজো যদি। পিতুঃ কনিষ্ঠভ্রাতা তু খুল্ল-তাতোঽভিধীয়তে॥ ইতি শব্দরত্নাবলী॥

পিতৃষ্বসা [ঋ] (স্ত্রী) পিতুর্ভগিনী। পিসী ইতি ভাষা। যথা। মাতৃষ্বসা মাতুলানী পিতৃব্যস্ত্রী পিতৃষ্বসা। শ্বশ্রূঃ পূর্ব্বজপত্নী চ মাতৃতুল্যাঃ প্রকীর্ত্তিতাঃ॥ ইতি দায়-ভাগঃ॥

পিতৃষ্বস্রীয়ঃ (ত্রি) পিতৃষ্বসুরপত্যং। পিতৃ-ভাগিনেয়ঃ। ইতি মুগ্ধবোধব্যাকরণং॥

পিতৃসন্নিভঃ (পুং) পিতৃতুল্যঃ। তৎপর্য্যায়ঃ। মনোজবঃ ২ মনোজবসঃ ৩। ইত্যমর-ভরতৌ॥

পিতৃসূঃ (স্ত্রী) সন্ধ্যা। ইতি শব্দমালা॥

পিতৃহূঃ (পুং) দক্ষিণকর্ণঃ। যথা। পিতৃহূ-র্নৃপপুর্য্যা দ্বার্দক্ষিণেন পুরঞ্জনঃ। ইতি শ্রীভাগবতে ৪ স্কন্ধে পুরঞ্জনোপাখ্যানে ২৫ অধ্যায়ঃ॥ শাস্ত্রে চ প্রথমং শ্রোতব্যং কর্ম্মকাণ্ডং ইত্যেতাবতা সামান্যেন প্রবৃত্ত-সংজ্ঞকস্য কর্ম্মকাণ্ডস্য দক্ষিণকর্ণেন শ্রবণ-মিষ্যতে। ততস্তদর্থমনুষ্ঠায় পিতৃভি-রাহূতঃ পিতৃলোকপ্রাপকং পিতৃযানং প্রপদ্যতে। তদনেন প্রকারেণ পিতৄণা-মাহ্বানমনেন ভবতি পিতৃহূর্দক্ষিণঃ কর্ণঃ। ইতি তট্টীকায়াং শ্রীধরস্বামী॥

পিত্তং (ক্লী) শরীরস্থধাতুবিশেষঃ। তৎ-পর্য্যায়ঃ। মায়ুঃ ২। ইত্যমরঃ॥ পল-জ্বলঃ ৩। ইতি শব্দরত্নাবলী॥ তেজঃ ৪ তিক্তধাতুঃ ৫ উষ্মা ৬ অগ্নিঃ ৭ অনলঃ ৮। অস্য গুণাঃ। পিত্তঞ্চ তিক্তাম্লরসঞ্চ সারকং

তূষ্ণং দ্রবং তীক্ষ্ণমিদং মধ্যে বহু। বর্ষান্তকালে ভৃশমর্দ্ধরাত্রে মধ্যন্দিনে তপ্ত্যদিতে চ'কুপ্যন্তি॥ ইতি রাজনির্ঘণ্টঃ॥ *॥ অপি চ। সর্ব্বং পিত্তমপস্মারকুষ্ঠদুষ্টব্রণাপহং। চক্ষুষ্যং কটু তীক্ষ্ণোষ্ণমুন্মাদক্রিমিনাশনং॥ ইতি রাজবল্লভঃ॥ *॥ পিত্তস্য স্বরূপমাহ। পিত্তমুষ্ণং দ্রবং পীতং নীলং সত্ত্বগুণোত্তরং। সরং কটু লঘু স্নিগ্ধং তীক্ষ্ণমম্লস্তু পাকতঃ॥ পীতং নিরামং। নীলং সামং। একং পিত্তং বাতবন্নামস্থানকর্ম্মভেদৈঃ পঞ্চবিধং॥ *॥ তেষাং পিত্তানাং নামান্যাহ। পাচকং রঞ্জকঞ্চাপি সাধকালোচকে তথা। ভ্রাজকঞ্চেতি পিত্তস্য নামানি স্থানভেদতঃ॥ *॥ অথ পাচকাদীনাং স্থানান্যাহ। অগ্ন্যাশয়ে যকৃৎপ্লীহ্নোর্হৃদয়ে লোচনদ্বয়ে। ত্বচি সর্ব্বশরীরেষু পিত্তং নিবসতি ক্রমাৎ॥ *॥ অথ তেষাং কর্ম্মাণ্যাহ। পাচকং পচতে ভুক্তং শেষাগ্নিবলবর্দ্ধনং। রসমূত্রপুরীষাণি বিরেচয়তি নিত্যশঃ॥ পাচকং পিত্তমামপক্বাশয়মধ্যস্থং ষড়্বিধমাহারং ভোজ্যং ভক্ষ্যং চর্ব্ব্যং লেহ্যং চূষ্যং পেয়ং পচতে দোষরসমূত্রপুরীষাণি পৃথক্ করোতি চ। তদগ্ন্যাশয়স্থমেবাত্মশক্ত্যা রসরঞ্জনহৃদয়স্থকফতমোঽপনোদনরূপগ্রহণপ্রভাপ্রকাশনাভ্যঙ্গলেপাদিপাচনাদ্যগ্নিকর্ম্মণা শেষাণাং পিত্তস্থানানামনুগ্রহং করোতি। শেষাণ্যপি পিত্তস্থানানি যকৃৎপ্লীহাদীনি ভাগেন গত্বা তত্র তত্র রসরঞ্জনাদিকর্ম্মভিরুপকরোতীত্যর্থঃ। কথম্ভূতং পাচকপিত্তং শেষাগ্নিবলবর্দ্ধনং শেষা অগ্নয়ঃ পৃথিব্যাদিমহাভূতগতাঃ। যত উক্তং চরকেণ। ভৌমা প্যাগ্নেয়বায়ব্যাঃ পঞ্চোষ্মাণঃ সনাভসা ইতি। উষ্মাণোঽগ্নয়ঃ। যত উক্তং বাগ্‌ভটে। দোষধাতুমলাদীনামুষ্মেত্যাত্রেয়শাসনমিতি। দোষধাতুমলাদীনামুষ্মৈবাগ্নিরিত্যর্থঃ। রসাদিধাতুগতাশ্চ সপ্ত তেষাং বলবর্দ্ধনং। যথা গৃহে স্থাপিতানি রত্নানি খদ্যোতবদদূরভাস্বরাণি তান্যপি দীপজ্যোতিষা দূরপ্রকাশকানি ভবন্তি। তথা অগ্ন্যাশয়স্থপাচকাগ্নিতেজসা সর্ব্বে অগ্নয়ো বলবন্তো ভবন্তি। তথা চ বাগ্‌ভটঃ। অন্নস্য পক্তা সর্ব্বেষাং পক্তৃণামধিকো মতঃ। তন্মূলাস্তে হি তদ্‌বৃদ্ধিক্ষয়বৃদ্ধিক্ষয়াত্মকা ইতি॥ ননু পিত্তাদন্যোঽগ্নিরাহোস্বিৎ পিত্তমেবাগ্নিরিতি সন্দেহঃ। উচ্যতে পিত্তস্যোষ্ণাদিগুণাদাহারপাচনরঞ্জনদর্শনাদিকর্ম্মণশ্চ ন খলু পিত্তব্যতিরেকেণান্যোঽগ্নিঃ তস্মাদগ্নিরূপস্যৈব পিত্তস্য স্থানভেদাৎ পাচকরঞ্জকসাধকালোচকভ্রাজকসংজ্ঞাঃ। তথা চ বাগ্‌ভটে। পাচকং তিলমানং স্যাৎ কাঠিন্যান্নাস্য দোষতা। অনুগৃহ্লাত্যবিকৃতং পিত্তং পাকোষ্মদর্শনৈঃ॥ ক্ষুতৃড়্‌রুচিপ্রভামেধাধীশৌর্য্যতনুমার্দ্দবৈঃ। পিত্তং পঞ্চাত্মকং তচ্চ পক্বামাশয়মধ্যগং॥ পঞ্চভূতাত্মকত্বেঽপি যত্তৈজসগুণোদয়াৎ। ত্যক্তদ্রবত্বং পাকাদিকর্ম্মণানলশব্দিতং॥ পচত্যন্নং বিভজতে সারকিট্টৌ পৃথক্ তথা। তত্রস্থমেব পিত্তানাং শেষাণামপ্যনুগ্রহং॥ করোতি বলদানেন পাচকং

নাম তৎ স্মৃতং। নমু যদি পিত্তাগ্নো-রভেদস্তদা কথং ঘৃতং পিত্তস্য শমনমগ্নে-র্দীপনমিতি। তথা মৎস্যাঃ পিত্তং কুর্ব্বন্তি ন চ তেঽগ্নিদীপ্তিকরা ইতি। তথা পিত্তা-ধিক্যাত্তীক্ষ্ণোঽগ্নিরিত্যপি কথং স্যাৎ তথা সমদোষঃ সমাগ্নিশ্চেত্যপি বক্তুং ন যুজ্যতে। তথা দ্রবং স্নিগ্ধমধোগঞ্চ পিত্তং বহ্নিরতোঽন্যথেতি। অত্রোচ্যতে। পিত্ত-মগ্নেঃ সততাধিষ্ঠানং। তথা চোক্তং তন্ত্রান্তরে। অগ্নির্ভিন্নগুণৈর্যুক্তঃ পিত্তং ভিন্নগুণৈস্তথা। দ্রবং স্নিগ্ধমধোগঞ্চ পিত্তং বহ্নিরতোঽন্যথা॥ তস্মাত্তেজোময়ং পিত্তং পিত্তোষ্মা যঃ স শক্তিমান্। স সঞ্চরতি কুক্ষিস্থঃ সর্ব্বতো ধমনীমুখৈঃ॥ স কায়াগ্নিঃ স কায়োষ্মা স পক্তা স চ জীবনং। অনন্য-গতিরিত্যেবং দেহে কায়াগ্নিরুচ্যতে॥ অন্যচ্চ। বামপার্শ্বাশ্রিতং নাভেঃ কিঞ্চিৎ সোমস্য মণ্ডলং। তন্মধ্যে মণ্ডলং সৌর্য্যং তন্মধ্যেঽগ্নির্ব্যবস্থিতঃ॥ জরায়ুমাত্রপ্রচ্ছন্নঃ কাচকোষস্থদীপবৎ। তথা চ মধুকোষে। দ্রবতেজঃসমুদায়াত্মকস্য পিত্তস্য তেজো-ভাগোঽগ্নিরিতি। তেন পিত্তমপ্যগ্নিবৎ মন্যতে। অগ্নিতাপিতায়োগোলকবৎ। পরমার্থতস্তু অগ্নিঃ পিত্তাদ্ভিন্ন এবেতি সিদ্ধান্তঃ। অতএবাহ রসপ্রদীপে। জাঠরো ভগবানগ্নিরীশ্বরোঽন্নস্য পাচকঃ। সৌক্ষ্ম্যা-দ্রসানাদদানো বিবেক্তুং নৈব শক্যতে॥ নাভৌ মধ্যে শরীরস্য বিশেষাৎ সোম-মণ্ডলং। সোমমণ্ডলমধ্যস্থং বিদ্যাৎ সূর্য্যস্য মণ্ডলং॥ প্রদীপবত্তত্র নৃণাং স্থিতো মধ্যে হুতাশনঃ॥ সূর্য্যো দিবি যথা তিষ্ঠংস্তেজো-যুক্তৈর্গভস্তিভিঃ। বিশোষয়তি সর্ব্বাণি পল্বলানি সরাংসি চ॥ তদ্বচ্ছরীরিণাং ভুক্তং ত্বনলো নাভিমাশ্রিতঃ। ময়ূখৈঃ পচতে ক্ষিপ্রং নানাব্যঞ্জনসংস্কৃতং॥ স্থূলকায়েষু সত্ত্বেষু যবমাত্রপ্রমাণতঃ। হ্রস্ব-কায়েষু সত্ত্বেষু তিলমাত্রপ্রমাণতঃ॥ কৃমি-কীটপতঙ্গেষু চাণুমাত্রোঽবতিষ্ঠতে॥ ইতি। পুনঃ প্রকৃতমনুসরতি। রঞ্জকং নাম যৎ পিত্তং তদ্রসং শোণতাং নয়েৎ। যত্তু সাধকসংজ্ঞং তৎ কুর্য্যাদ্‌বুদ্ধিং ধৃতিং স্মৃতিং॥ ধৃতিং মেধাং। যদালোচকসংজ্ঞং তদ্রূপগ্রহণকারণং। ভ্রাজকং কান্তিকারি স্যাল্লেপাভ্যঙ্গাদিপাচকং॥ *॥ পিত্তপ্রকৃ-তিকো যথা। পিত্তপ্রকৃতিকো যাদৃক্ তাদৃশোঽথ নিগদ্যতে। অকালপলিতো গৌরঃ ক্রোধী স্বেদী চ বুদ্ধিমান্॥ বহুভুক্ তাম্রনেত্রশ্চ স্বপ্নে জ্যোতীংষি পশ্যতি। শ্যামকেশঃ ক্ষমী স্থূলো বহুবীর্য্যো মহা-বলঃ॥ পিত্তং বহ্নির্বহ্নিজং বা তদস্মাৎ পিত্তোদ্রিক্তস্তীব্রতৃষ্ণো বুভুক্ষুঃ। গৌরো-ষ্ণাঙ্গস্তাম্রহস্তোঽঙ্ঘ্রিরক্তঃ শূরো মানী পিঙ্গকেশোঽল্পলোমা॥ *॥ পিত্তপ্রকৃতিক-মৃগা যথা। ব্যাঘ্রর্ক্ষকপিমার্জারযক্ষো-লূকাশ্চ পৈত্তিকাঃ॥ *॥ পিত্তস্যোপশম-হেতুমাহ। তিক্তস্বাদুকষায়শীতপবনচ্ছায়া-নিশাবীজনজ্যোৎস্নাভূগৃহযন্ত্রবারিজলদস্ত্রী-গাত্রসংস্পর্শনং। সর্পিঃক্ষীরবিরেকসেক-রুধিরস্রাবপ্রদেহাদিকং পানাহারবিহার-ভেষজমিদং পিত্তং প্রশান্তিং নয়েৎ॥ *॥

অথ পিত্তপ্রকোপকারণানি। কট্বম্লোষ্ণবিদাহিতীক্ষ্ণলবণক্রোধোপবাসাতপস্ত্রীসংভোগিতৃষাক্ষুধাভিহননব্যায়ামমদ্যাদিভিঃ। ভুক্তেঽজীর্য্যতি ভোজনে চ শরদি গ্রীষ্মে তথা প্রাণিনাং মধ্যাহ্নে চ তথার্দ্ধরাত্রসময়ে পিত্তপ্রকোপো ভবেৎ॥ ইতি ভাবপ্রকাশঃ ॥ * ॥ স তু জ্বরজনকমন্দাগ্নের্জনকঃ। মন্দাগ্নিস্তস্য জনকো মন্দাগ্নের্জনকাস্ত্রয়ঃ। পিত্তশ্লেষ্মসমীরাশ্চ প্রাণিনাং দুঃখদায়কাঃ॥ ইতি ব্রহ্মবৈবর্ত্তে ব্রহ্মখণ্ডে ১৬ অধ্যায়ঃ॥

পিত্তঘ্নী (স্ত্রী) গুড়ূচী। ইতি শব্দচন্দ্রিকা॥

পিত্তজ্বরঃ (পুং) পৈত্তিকজ্বরঃ। যথা। বিশেষতঃ কোমলনারিকেলং নিহন্তি পিত্তজ্বরমূত্রদোষান্। ইতি রাজনির্ঘণ্টঃ॥ অস্য লক্ষণং জ্বরশব্দে দ্রষ্টব্যং ॥ * ॥ অথ পিত্তজ্বরচিকিৎসা। আমাশয়স্থো হত্বাগ্নিং সামো মার্গান্ পিধাপয়ন্। বিদধাতি জ্বরং দোষস্তস্মাল্লঙ্ঘনমাচরেৎ॥ ইতি বচনাৎ সামান্যতো জ্বরিমাত্রস্য যাবদারোগ্যদর্শনং লঙ্ঘনাভিধানে পিত্তজ্বরিণো লঙ্ঘনবিধানে বিশেষমাহ সুশ্রুতঃ। পৈত্তিকে দশরাত্রেণ জ্বরে যুঞ্জীত ভেষজমিতি। দশরাত্রেণ লঙ্ঘনবতা ব্যতীতেনেত্যর্থঃ। কিন্তদ্ভেষজং তদাহ। তিক্তামুস্তাযবৈঃ পাঠাকট্‌ফলাভ্যাং সহোদকং। পক্কং সশর্করং পীতং পাচনং পৈত্তিকে জ্বরে॥ তিক্তাদিক্বাথঃ॥ পর্পটো বাসকস্তিক্তা কৈরাতো ধন্বযাসকঃ। প্রিয়ঙ্গুশ্চ কৃতঃ ক্বাথ এষ শর্করয়া যুতঃ॥ পিপাসাদাহপিত্তাস্রযুক্তং পিত্তজ্বরং হরেৎ। পর্পটাদিক্বাথঃ॥ দ্রাক্ষা হরীতকী মুস্তা কটুকা কৃতমালকঃ। পর্পটশ্চ কৃতঃ ক্বাথ এষ পিত্তজ্বরাপহঃ॥ মুখশোষপ্রলাপান্তর্দাহমূর্চ্ছাভ্রমপ্রণুৎ। পিপাসারক্তপিত্তানাং শমনো ভেদনো মতঃ॥ দ্রাক্ষাদিক্বাথঃ॥ পটোলমথ ধন্যাকং মধুকং মধুসংযুতং। হন্তি পিত্তজ্বরং দাহং তৃষ্ণাঞ্চাতিপ্রমাথিনীং॥ পটোলাদিক্বাথঃ॥ গুড়ূচ্যামলকীযুক্তঃ কেবলো বাপি পর্পটঃ। পিত্তজ্বরং হরেত্তূর্ণং দাহশোষভ্রমান্বিতং॥ গুড়ূচ্যাদিক্বাথঃ॥ একঃ পর্পটকঃ শ্রেষ্ঠঃ পিত্তজ্বরবিনাশনঃ। কিং পুনর্যদি যুজ্যেত চন্দনোশীরবালকৈঃ॥ হ্রীবেরচন্দনোশীরঘনপর্পটসাধিতং। দদ্যাৎ সুশীতলং বারি তৃট্‌ছর্দ্দিজ্বরদাহনুৎ॥ হ্রীবেরাদিক্বাথঃ॥ ভূনিম্বাতিবিষালোধ্রমুস্তকেন্দ্রযবামৃতাঃ। বালকং ধান্যকং বিল্বং কষায়ো মাক্ষিকান্বিতঃ॥ বিড়্‌ভেদশ্বাসকাসাংশ্চ রক্তপিত্তজ্বরং হরেৎ। ভূনিম্বাদিক্বাথঃ॥ দ্রাক্ষাচন্দনপদ্মানি মুস্তা তিক্তামৃতাপি চ। ধাত্রী বালমুশীরঞ্চ লোধ্রেন্দ্রযবপর্পটাঃ॥ পরূষকং প্রিয়ঙ্গুশ্চ যবাসো বাসকস্তথা। মধুকং কুলকং বাপি কিরাতো ধান্যকং তথা॥ এষাং ক্বাথো নিহন্ত্যেব জ্বরং পিত্তসমুত্থিতং। তৃষাং দাহং প্রলাপঞ্চ রক্তপিত্তং ভ্রমং ক্লমং॥ মূর্চ্ছাং ছর্দ্দিং তথা শূলং মুখশোষমরোচকং। কাসং শ্বাসঞ্চ হৃল্লাসং নাশয়েন্নাত্র সংশয়ঃ॥ মহাদ্রাক্ষাদিক্বাথঃ। সসিতো নিশি পর্য্যুষিতঃ প্রাতর্ধন্যাকতণ্ডুলক্বাথঃ।

পীতঃ শময়ত্যচিরাদন্তর্দ্দাহং জ্বরং পৈত্তং ॥ ধন্যাককাথঃ ॥ অমৃতায়া হিমঃ প্রাতঃ সসিতঃ পৈত্তিকজ্বরং। বাসায়াশ্চ তথা কাসরক্তপিত্তজ্বরান্ জয়েৎ ॥ অমৃতাবাসা-কাথৌ ॥ গুড়ূচী ভূমিনিম্বশ্চ বালং বীরণ-মূলকং। লঘুমুস্তং ত্রিবৃদ্ধাত্রী দ্রাক্ষা বাসা চ পর্প টঃ ॥ এষাং কাথো হরত্যেব জ্বরং পিত্তকৃতং দ্রুতং। সোপদ্রবমপি প্রাত-র্নিপীতো মধুনা সহ ॥ গুড়ূচ্যাদিকাথঃ ॥ পলাশস্য বদর্য্যা বা নিম্বস্য মৃদুপল্লবৈঃ। অম্লপিষ্টৈঃ প্রলেপোঽয়ং হন্যাদ্দাহযুতং জ্বরং॥ উত্তানসুপ্তস্য গভীরতাম্রকাংস্যাদি-পাত্রে নিহিতে চ নাভৌ। শীতাম্বুধারা বহুলা পতন্তী নিহন্তি দাহং ত্বরিতং জ্বরঞ্চ ॥ পক্বদাড়িমবীজৈর্বা ধানাকল্কেন চ কচিৎ। পথ্যাং তৈলঘৃতক্ষৌদ্রৈর্লিহন্ দাহজ্বরাপহা॥ কাসাসৃক্পিত্তবীসর্পশ্বাসান্ হন্তি বমীনপি। তৈলঘৃতক্ষৌদ্রৈরিত্যত্র ন সমুচ্চয়ঃ তেন কেবলেন ক্ষৌদ্রেণাপি লিহ্যাৎ। কাঞ্জিকার্দ্রপটেনাবগুণ্ঠনং দাহ-নাশনং। অথ গোতক্রসুস্বিন্নশীতলীকৃত-বাসসা। দ্রাক্ষামলককল্কেন কবলোঽত্র হিতো মতঃ ॥ ইতি কবলঃ ॥ * ॥ অথাম্ল-মাহ। দাহবম্যর্দ্দিতং ক্ষামং নিরন্নং তৃষয়া-ন্বিতং। শর্করামধুসংযুক্তং পায়য়েল্লাজ-তর্পণং॥ লাজতর্পণং লাজশক্তুরূপতর্পণং। সন্তর্পণস্বরূপমুক্তং সামান্যজ্বরচিকিৎ-সায়াং। মুদ্গযূষৌদনো দেয়ঃ সিতয়া পৈত্তিকে জ্বরে॥ হর্ম্মে শুভ্রাভ্রসঙ্কাশে শশাঙ্ককরশীতলে। মলয়োদকসংসিক্তে সুপ্যাৎ পিত্তজ্বরী নরঃ॥ হারাবলীচন্দন-শীতলানাং সুগন্ধপুষ্পাম্বরভূষিতানাং। নিতম্বিনীনাং সুপয়োধরাণামালিঙ্গনঞ্চাশু হরন্তি দাহং ॥ আহ্লাদঞ্চাস্য বিজ্ঞায় তাশ্চ স্ত্রী রময়েৎ পুনঃ। হিতঞ্চ ভোজয়েৎ দন্নং প্রাপ্নোতি সুরতং মহৎ॥ বাপ্যঃ কমলহাসিন্যো জলযন্ত্রগৃহাঃ শুভাঃ। নার্য্যশ্চন্দনদিগ্ধাঙ্গ্যো দাহদৈন্যহরা মতাঃ॥ ইতি পিত্তজ্বরাধিকারঃ। ইতি ভাব-প্রকাশঃ ॥ * ॥ পিত্তশ্লেষ্মজ্বরনাশকৌষধং যথা। গুড়ূচীপদ্মকারিষ্টধন্যাকং রক্ত-চন্দনং। পিত্তশ্লেষ্মজ্বরচ্ছর্দ্দিদাহতৃষ্ণাঘ্ন-মগ্নিকৃৎ ॥ ইতি গারুড়ে ১৮৮ অধ্যায়ঃ ॥

পিত্তদ্রাবী [ন্] (পুং) মধুরজম্বীরঃ। ইতি রাজনির্ঘণ্টঃ ॥

পিত্তরক্তং (ক্লী) রোগবিশেষঃ। তৎপর্য্যায়ঃ। রক্তপিত্তং ২ পিত্তাস্রং ৩ পিত্ত-শোণিতং ৪। ইতি রাজনির্ঘণ্টঃ ॥ অস্য বিবরণং রক্তপিত্তশব্দে দ্রষ্টব্যং ॥

পিত্তলং (ক্লী) ধাতুবিশেষঃ। পিতল ইতি ভাষা। তৎপর্য্যায়ঃ। আরকূটং ২ রীতিঃ৩ পতিকাবেরং ৪ দ্রব্যদারু ৫। ইতি জটা-ধরঃ॥ রীতী ৬। ইতি শব্দরত্নাবলী ॥ মিশ্রং ৭। ইতি রত্নমালা ॥ আরঃ ৮ রাজরীতিঃ ৯ ব্রহ্মরীতিঃ ১০ কপিলা ১১ পিঙ্গলা ১২। ইতি ভাবপ্রকাশঃ॥ ক্ষুদ্র-সুবর্ণঃ ১৩ সিংহলং ১৪ পিঙ্গলকং ১৫ পীতলকং ১৬ লোহিতকং ১৭ পিঙ্গল-লোহং ১৮ পীতকং ১৯। রীতিকাযুগল-ঃ। তিক্তত্বং। শীতলত্বং। রসে

লবণত্বং। শোধনত্বং। পাণ্ডুবাতকৃমিপ্লীহপিত্তনাশিত্বঞ্চ। শুক্লা স্নিগ্ধা মৃদুঃ শীতা সুরঙ্গা সূত্রপত্রিণী। হেমোপমা শুভা স্বচ্ছা জাত্যা রীতিঃ প্রকীর্ত্তিতা ॥ ইতি রাজনির্ঘণ্টঃ ॥ * ॥ রীতিরপ্যুপধাতুঃ স্যাৎ তাম্রস্য যসদস্য চ। পিত্তলস্য গুণা জ্ঞেয়া স্বযোনিসদৃশা জনৈঃ ॥ সংযোগস্য প্রভাবেণ তস্যান্যেঽপি গুণাঃ স্মৃতাঃ। রীতিকাযুগলং রূক্ষং তিক্তঞ্চ লবণং রসে ॥ শোধনং পাণ্ডুরোগঘ্নং কৃমিঘ্নং নাতিলেখনং। ইতি ভাবপ্রকাশঃ ॥ * ॥ ভূর্জপত্রং। ইতি শব্দমালা ॥ পিত্তযুক্তে ত্রি। ইতি মেদিনী ॥

পিত্তলা (স্ত্রী) তোয়পিপ্পলী। ইতি মেদিনী ॥

পিত্তারিঃ (পুং) পর্প্পটঃ। লাক্ষা। বর্ব্বরং। ইতি রাজনির্ঘণ্টঃ ॥

পিত্র্যং (ক্লী) মধু। ইতি রাজনির্ঘণ্টঃ ॥ পিতৃতীর্থং। তত্তু তর্জ্জন্যঙ্গুষ্ঠান্তঃ। ইতি হেমচন্দ্রঃ ॥ পিতৃসম্বন্ধিনি ত্রি। যথা। জ্যেষ্ঠ এব তু গৃহ্লীয়াৎ পিত্র্যং ধনমশেষতঃ। শেষাস্তমুপজীবেয়ুর্যথৈব পিতরন্তথা ॥ ইতি দায়ভাগঃ ॥

পিত্র্যঃ (পুং) জ্যেষ্ঠভ্রাতা। ইতি হেমচন্দ্রঃ ॥ মাষঃ। ইতি রাজনির্ঘণ্টঃ ॥

পিত্র্যা (স্ত্রী) মঘানক্ষত্রং। ইতি হেমচন্দ্রঃ ॥ পৌর্ণমাসী। ইতি শব্দমালা ॥

পিৎসন্ [ৎ] (পুং) পক্ষী। ইত্যমরঃ ॥ প্রতিপন্নে পতনেচ্ছৌ চ ত্রি। ইতি বিশ্বঃ ॥

পিৎসলং (ক্লী) পন্থাঃ। ইত্যুণাদিকোষঃ ॥

পিধানং (ক্লী) ছদনং। ইত্যমরঃ ॥ উদঞ্চনং। ইতি হেমচন্দ্রঃ

পিনদ্ধঃ (ত্রি) পরিহিতবস্ত্রাদি। তৎপর্য্যায়ঃ। আমুক্তঃ ২ প্রতিমুক্তঃ ৩ অপিনদ্ধঃ ৪। ইত্যমরঃ ॥

পিনাকঃ (পুং ক্লী) শিবধনুঃ। তৎপর্য্যায়ঃ। অজগবং ২। শূলং। ইত্যমরঃ ॥ শূলমপি শাঙ্করমিহেতি কেচিৎ। ইতি ভরতঃ ॥ পাংশুবর্ষণং। ইতি মেদিনী ॥

পিনাকী [ন্] (পুং) শিবঃ। ইত্যমরঃ ॥

পিন্যাসং (ক্লী) হিঙ্গু। ইতি জটাধরঃ ॥

পিপতিষন্ [ৎ] (ত্রি) পতনেচ্ছুঃ। বিহঙ্গমে পুং। ইতি মেদিনী ॥

পিপতিষুঃ (পুং) পক্ষী। ইতি রাজনির্ঘণ্টঃ ॥

পিপাসা (স্ত্রী) পানেচ্ছা। তৎপর্য্যায়ঃ। তৃষ্ণা ২ তর্ষঃ ৩ উপলাসিকা ৪ তৃট্ ৫ তৃষা ৬ উদন্যা ৭। ইতি হেমচন্দ্রঃ ॥

পিপাসিতঃ (ত্রি) পিপাসাযুক্তঃ। তৃষিতঃ। ইতি হলায়ুধঃ ॥

পিপাসুঃ (ত্রি) পানেচ্ছুঃ। তৎপর্য্যায়ঃ। তৃষিতঃ ২ তৃষ্ণক্ ৩। ইতি হেমচন্দ্রঃ ॥

পিপীতকঃ (পুং) ব্রাহ্মণবিশেষঃ। অস্য প্রমাণং পিপীতকীশব্দে দ্রষ্টব্যং ॥

পিপীতকী (স্ত্রী) বৈশাখশুক্লদ্বাদশী। তত্র কর্ত্তব্যব্রতং যথা। শতানীক উবাচ। জলদানস্য মাহাত্ম্যং যত্ত্বয়া পরিকীর্ত্তি তদহং শ্রোতুমিচ্ছামি পিপীতকীকথাং শুভাং ॥ পুরা কেন কৃতঞ্চৈতৎ কেন চৈতৎ প্রকাশিতং। কথং পিপাতকীনাম বিধানঞ্চৈব কীদৃশং। তৎ সর্ব্বং ব্রূহি

দেবর্ষে যদি তুষ্টো ময়ি প্রভো॥ নারদ উবাচ। শৃণু রাজন্ প্রবক্ষ্যামি দ্বাদশীং তাং পিপীতকীং। যাং কৃত্বা যমলোকাদ্বৈ প্রাপ্যতে বৈষ্ণবং পদং॥ পিপীতক ইতি খ্যাতো ব্রাহ্মণঃ সংশিতব্রতঃ। তপঃস্বাধ্যায়নিরতঃ সর্ব্বপ্রাণিহিতে রতঃ॥ শান্তো দান্তঃ ক্ষমাযুক্তো বলিহোমপরায়ণঃ। নিবসন্ নির্জনেঽরণ্যে বহূন্ কালান্ দ্বিজোত্তমঃ। চিরং কৃত্বা তপোঽরণ্যে কালে মৃত্যুমুপেয়িবান্॥ ততঃ কালেন কিয়তা যমদূতৈর্মহাবলৈঃ। নীয়মানঃ স বিপ্রেন্দ্রো যমলোকং ভয়াবহং। দদর্শ বহুশস্তত্র নরান্নিরয়সংস্থিতান্॥ অসিপত্রাদ্যনেকেষু কুম্ভীপাকেষু সংস্থিতান্। কৃতার্ত্তরাবাংস্তান্ দৃষ্ট্বা বিষাদমগমদ্দ্বিজঃ। ক্ষুৎপিপাসাকুলো ভূত্বা প্রেতরাজবশং গতঃ॥ বহূন্ বস্ত্রাবৃতান্ কুম্ভান্ দদৃশেঽতিমনোহরান্। প্রদেশানীপ্সিতাংস্তত্র প্রাসাদৈরুপশোভিতান্॥ গীতবাদ্যাদিনৃত্যৈশ্চ সেব্যমানঃ সমন্ততঃ। ক্বচিৎ প্রহরমাণাংশ্চ কিঙ্করৈর্যমশাসনৈঃ॥ নীয়মানাংস্ততঃ প্রেতান্ বধ্যমানান্ স্বকর্ম্মভিঃ। শোকসন্তাপসংযুক্তান্ তৃষয়া পরিপাড়িতঃ॥ সংপশ্যমানো রাজেন্দ্র যযাচে কিঙ্করান্ জলং। বহুশো যাচ্যমানৈশ্চ কিঙ্করৈরভিতাড়িতঃ॥ স নীয়মানো দদৃশে বহুশাখং দ্রুমোত্তমং। সুচ্ছায়ং শীতলং রম্যং মহান্তং পিপ্পলদ্রুমং॥ তত্রৈব সজলান্ কুম্ভান্ মাল্যগ্রীবান্ সুশোভিতান্। দদর্শ বস্ত্রাবৃতমুখান্ সুবাসিতসুশীতলান্॥

রক্ষন্তি বহবস্তত্র কিঙ্করাঃ শস্ত্রপাণয়ঃ। তোয়দর্শনমাত্রেণ সাহ্লাদো ব্রাহ্মণোঽভবৎ॥ বিনয়াবনতো ভূত্বা যযাচে কিঙ্করাজ্জলং। ব্রাহ্মণ উবাচ। যমদূতা মহাত্মানস্তোয়ং মে দীয়তামিতি। অপ্রাপ্য তোয়ং প্রাণাম্মে বিনাশো জায়তে ধ্রুবং॥ তস্মাত্তোয়প্রদানেন প্রাণান্রক্ষত মেঽধুনা। শ্রুত্বা বিপ্রস্য তদ্বাক্যং তমূচুর্যমকিঙ্করাঃ॥ ন কৃতং কর্ম্ম তদ্বিপ্র যেন তোয়ঞ্চ লভ্যতে॥ প্রার্থয়ানঃ পুনস্তোয়ং যমদূতৈঃ স তাড়িতঃ॥ তৃষার্ত্তবচনং শ্রুত্বা যমঃ প্রোবাচ তং দ্বিজং। ব্রূহি ত্বং বিপ্র মা রোদীঃ কা তে পীড়াস্তি চেতসি॥ পুনর্যযাচে তত্তোয়ং তৃষাব্যাকুলচেতনঃ। শ্রুত্বা বিপ্রস্য তদ্বাক্যং তমুবাচ স ধর্ম্মরাট্॥ ত্বয়া তন্ন কৃতং কর্ম্ম যেন বৈ লভ্যতে জলং। ব্রাহ্মণ উবাচ। ত্বয়ি প্রসন্নে দিক্পাল তত্তোয়ং দুর্লভং ন মে। তস্মাত্তোয়প্রদানেন প্রাণরক্ষাং কুরু প্রভো। ইত্থং বহুবিধৈর্ব্বাক্যৈর্যমঃ প্রীতোঽভবত্তদা॥ যম উবাচ। বরং বরয় বিপ্রেন্দ্র যত্তে মনসি বর্ত্ততে। ব্রাহ্মণ উবাচ। যদি তুষ্টোঽসি মে দেব যেন প্রাপ্তোঽস্মি তজ্জলং। তৎ কুরুষ্ব ধর্ম্মরাজ সর্ব্বপ্রাণেশ্বর প্রভো॥ যম উবাচ। বৈষ্ণবং তদ্ব্রতং বিপ্র কুরু গত্বা নিজালয়ং। বিধানং শৃণু বিপ্রেন্দ্র দ্বাদশী যাদৃশী ভবেৎ॥ বৈশাখে শুক্লপক্ষস্য দ্বাদশী বৈষ্ণবী তিথিঃ। তস্যাং সুশীতলজলৈঃ স্নাপয়েৎ কেশবং প্রভুং॥ পূজয়েদ্গন্ধপুষ্পাদ্যৈর্ধূপদীপৈর্বিধানতঃ। নৈবেদ্য-

র্বিবিধৈশ্চৈব তাম্বুলৈরথ বাসসা ॥ জপ্ত্বা তু বৈষ্ণবং মন্ত্রং দণ্ডবৎ প্রণমেত্ততঃ। দদ্যাদ্দ্বিজেভ্যো বিধিবৎ কুম্ভাংস্তোয়সমন্বিতান্ ॥ প্রথমেঽব্দে চতুঃকুম্ভান্ দদ্যাল্লবণসংযুতান্। মালাভিরঙ্কিতগ্রীবান্ সুশীতলজলান্বিতান্ ॥ শুক্লবস্ত্রাবৃতমুখানুপবীতসুসংযুতান্। ধনুর্ব্বাণসমাযুক্তান্ সভোজ্যদক্ষিণান্বিতান্ ॥ দ্বিতীয়েঽষ্টৌ ঘটান্দদ্যাদ্দধিশর্করসংযুতান্। তৃতীয়ে দ্বাদশ ঘটান্ তিলমোদকসংযুতান্ ॥ চতুর্থে ষোড়শঘটান্ দুগ্ধলড্ডুকসংযুতান্। দদ্যাৎ সংপূজ্য দেবেশং দ্বিজাতিভ্যঃ প্রযত্নতঃ ॥ দক্ষিণাং শক্তিতো দদ্যাৎ ভোজ্যঞ্চৈব বিশেষতঃ। যত্র কুত্রাপি সংগচ্ছেন্ন কুত্রাপি তৃষান্বিতঃ ॥ ততো দ্বিজো গৃহং গত্বা চকার দ্বাদশীব্রতং। অন্তে জগাম স্বর্লোকং বৈষ্ণবং পদমুত্তমং ॥ পিপীতকীতিনাম্নাতো বিখ্যাতা বৈষ্ণবী তিথিঃ। নরো যঃ কুরুতে ভক্ত্যা নারী বা ভক্তিসংযুতা। ইহ পুত্ত্রাদিসম্পন্না ধনধান্যসুতান্বিতা ॥ ইতি ভবিষ্যপুরাণে পিপীতকীব্রতকথা সমাপ্তা ॥

পিপীলকঃ (পুং) পীলকঃ। ডেউয়া পিঁপীড়া ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥

পিপীলিকা (স্ত্রী) হীনাঙ্গী। ক্ষুদে পিঁপীড়া ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥ তৎপর্য্যায়ঃ। পিপীলিকঃ ২ পিপীলঃ ৩ পীলকঃ ৪। ইতি শব্দরত্নাবলী ॥ পিপীলী ৫ পিপিলী ৬ স্ত্রীসংজ্ঞা ৭। ইতি রাজনির্ঘণ্টঃ ॥ হীরা ৮। ইতি ত্রিকাণ্ডশেষঃ ॥

পিপীলী (স্ত্রী) পিপীলিকা। ইতি রাজনির্ঘণ্টঃ ॥

পিপ্পটা (স্ত্রী) খাদ্যদ্রব্যবিশেষঃ। তৎপর্য্যায়ঃ। গুড়শর্করা ২। ইতি ত্রিকাণ্ডশেষঃ ॥

পিপ্পলং (ক্লী) জলং। বস্ত্রচ্ছেদভেদঃ। ইতি মেদিনী ॥

পিপ্পলঃ (পুং) অশ্বত্থবৃক্ষঃ। নিরংশুকঃ। পক্ষিভেদঃ। ইতি মেদিনী ॥ * ॥ অশ্বত্থস্বরূপং যথা। নারদ উবাচ। অনায়াসেন যন্মর্ত্ত্যঃ সর্ব্বান্ কামানবাপ্নুয়াৎ। সর্ব্বদেবাত্মকঞ্চৈব তন্মে ব্রূহি পিতামহ ॥ ব্রহ্মোবাচ। শৃণু নারদ যত্নেন শুদ্ধং সর্ব্বাত্মকং গুরুং। প্রদক্ষিণীকৃত্য নিত্যং নরাণাং সর্ব্বকামদং ॥ পূজয়েৎ পরয়া ভক্ত্যা সর্ব্বসিদ্ধিযুতো ভবেৎ। অশ্বত্থং পূজয়েদ্বিপ্র সর্ব্বসিদ্ধিবিধায়কং ॥ * ॥ অশ্বত্থদক্ষিণে রুদ্রঃ পশ্চিমে বিষ্ণুরেব চ। ব্রহ্মা চোত্তরতস্তস্য পূর্ব্বে চেন্দ্রাদিদেবতাঃ ॥ স্কন্ধে স্কন্ধে চ পত্রেষু ব্রাহ্মণা ঋষয়ঃ স্মৃতাঃ। তস্য মূলে সর্ব্ববেদাঃ শ্রদ্ধা তস্য ক্রমাশ্রিতা ॥ নদীনদাঃ সাগরাদ্যাঃ পূর্ব্বস্যান্দিশি সংস্থিতাঃ। লোকধর্ম্মান্ সমাশ্রিত্য তস্মাত্তং সেবয়েন্নরঃ ॥ পুরাণস্মৃতিমন্ত্রেভ্যঃ সারমুদ্ধৃত্য সঞ্চিতং। নিষ্ঠাপ্রতিষ্ঠিতং সম্যগশ্বত্থং সেবয়েন্নরঃ ॥ ত্বং ক্ষীরী ফলিতশ্চৈব শীতলশ্চ বনস্পতে। ত্বামারাধ্য নরো হন্যাৎ দৈহিকাধিষ্ঠিতং মলং ॥ অশ্বত্থ যস্মাৎ ত্বয়ি বৃক্ষরাজ নারায়ণস্তিষ্ঠতি সর্ব্বকারণং। অতঃ শুচিস্ত্বং সততং তরূণাং বিশেষতোঽরিষ্ট-

বিনাশনোঽসি ॥ * ॥ ক্ষীরোদমথনে চৈব যথা শ্রীস্ত্বামুপাসতে। সত্যেন তেন বৃক্ষেন্দ্র আশীর্ময়ি নিষেবতু ॥ * ॥ একাদশোঽসি রুদ্রাণাং বসূনাঞ্চাষ্টমস্তথা। নারায়ণোঽসি দেবানাং বৃক্ষাণামসি পিপ্পলঃ ॥ অগ্নিগর্ভস্ত্বমশ্বত্থ দেবগর্ভঃ প্রজাপতিঃ। হরির্যথৈব শ্রীগর্ভো যজ্ঞগর্ভ নমোঽস্তু তে ॥ অরাতেরগ্নিরশ্বত্থ পরাপর নমোঽস্তু তে। নির্বাতে ত্বভিবর্ষস্তু স্বস্তি তেঽস্তু নমোঽস্তু তে ॥ * ॥ অক্ষিস্পন্দং ভুজস্পন্দং দুঃস্বপ্নং দুর্নিরীক্ষিতং। শত্রূণাঞ্চ সমুত্থানমশ্বত্থ শময়াশু মে ॥ যং স্পৃষ্ট্বা মুচ্যতে রোগৈঃ সর্ব্বপাপৈঃ প্রমুচ্যতে। সমাশ্লিষ্য চ দীর্ঘায়ুস্তমশ্বত্থং নমাম্যহং ॥ অশ্বত্থ সুমহাভাগ সর্ব্বদা প্রিয়দর্শন। দিব্যান্নভোজনং দেহি শত্রূণাঞ্চ পরাজয়ং॥ আয়ুঃ প্রজাং ধনং ধান্যং সৌভাগ্যং সর্ব্বদা সুখং। দেহি দেব মহাবৃক্ষ ত্বামহঞ্চাভিবাদয়ে॥ অশ্বত্থ দেবমূলস্ত্বমৃষিভিঃ প্রোচ্যতে সদা ॥ * ॥ ব্রহ্মহা গুরুহা চৈব দরিদ্রো ব্যাধিপীড়িতঃ। আবৃত্য দশলক্ষন্তু শুদ্ধঃ পাপাতিগো ভবেৎ ॥ * ॥ ব্রহ্মচারী হবিষ্যাশী অধঃশায়ী জিতেন্দ্রিয়ঃ। পাপাপহন্তা মর্ত্যস্তু ব্রতমেতৎ সমাচরেৎ॥ একহস্তং দ্বিহস্তং বা কুর্য্যাদ্‌গোময়লেপনং। অশ্বত্থে স্থাপিতে যস্তু মূলে স্নপনমাচরেৎ ॥ ধনায়ুঃসন্ততৈর্বৃদ্ধো নরকাত্তারয়েৎ পিতৄন॥ * ॥ অশ্বত্থমূলমাসাদ্য শাকেনাম্বোদকেন বা। একং বা ভোজয়েদ্বিপ্রং কোটি কোটি ফলং ভবেৎ ॥ * ॥ অশ্বত্থমূলমাসাদ্য তপো হোমঃ সুরার্চ্চনং। অক্ষয়ং মুনিশার্দ্দূল ব্রহ্মণো বচনং যথা ॥ * ॥ এবং সমর্চ্চিতোঽশ্বত্থঃ সর্ব্বসৌখ্যপ্রদো ভবেৎ। যজ্ঞার্থং ছেদিতোঽশ্বত্থঃ সর্ব্বারোগ্যপ্রদো ভবেৎ ॥ * ॥ অশ্বত্থঃ পূজিতো, যেন পূজিতাঃ সর্ব্বদেবতাঃ। অশ্বত্থশ্ছেদিতো যেন ছেদিতাঃ সর্ব্বদেবতাঃ॥ অন্তঃশুদ্ধঃ সুসন্তুষ্টোঽশ্বত্থো দেবময়ো গুরুঃ। স সেব্যঃ পূজনীয়শ্চ ঋণত্রয়বিনাশকঃ ॥ ভৃগ্বর্কবারে ভৌমে চ মধ্যাহ্নে নিশি সন্ধ্যয়োঃ। অশ্বত্থদর্শনং কার্য্যং কুলক্ষয়ভয়াত্মভিঃ ॥ * ॥ অশ্বত্থস্য জলে যস্য ছায়া তিষ্ঠতি কুত্রচিৎ। তৎ প্রয়াগসমং তীর্থং তত্র সন্নিহিতো হরিঃ ॥ তস্মাৎ কার্ত্তিকমাসেঽত্র পূর্ব্বোক্তবিধিনা মুনে। অশ্বত্থং সেচয়েদ্বিদ্বান্ সংপ্রদক্ষিণমাদিশেৎ ॥ পাপোপহতমর্ত্যানাং পাপনাশো ভবেদ্ধ্রুবং। সকামো লভতে কামং নিষ্কামো মোক্ষমাপ্নুয়াৎ ॥ যঃ পঠেৎ শৃণুয়াদ্বাপি অশ্বত্থস্য সমীপতঃ। সর্ব্বান্ কামানবাপ্নোতি বিষ্ণুসাযুজ্যমাপ্নুয়াৎ ॥ ইতি পাদ্মোত্তরখণ্ডে ১২৬ অধ্যায়ঃ ॥ * ॥ ঋষয় উচুঃ। কথং ত্বয়াশ্বত্থবটৌ গোব্রাহ্মণসমৌ কৃতৌ। সর্ব্বেভ্যোঽপি তরুভ্যস্তৌ কথং পূজ্যতমৌ কৃতৌ ॥ সূত উবাচ। অশ্বত্থরূপো ভগবান্ বিষ্ণুরেব ন সংশয়ঃ। রুদ্ররূপো বটস্তদ্বৎ পলাশো ব্রহ্মরূপধৃক্ ॥ দর্শনস্পর্শসেবাসু তে বৈ পাপহরাঃ স্মৃতাঃ। দুঃখাপদ্ব্যাধিদুষ্টানাং বিনাশ-

কারিণোঽধ্রুবং ॥ ঋষয় ঊচুঃ। কথং বৃক্ষত্ব-মাপন্না ব্রহ্মবিষ্ণুমহেশ্বরাঃ। এতৎ কথয় সর্ব্বজ্ঞ সংশয়োঽত্র মহান্ হি নঃ॥ সূত উবাচ। পার্ব্বতীশিবয়োর্দ্দেবৈঃ সুরতং কুর্ব্বতোঃ কিল। অগ্নিং ব্রাহ্মণবেশেন প্রেষ্য বিঘ্নঃ কৃতঃ পুরা॥ ততস্তু পার্ব্বতী ক্রুদ্ধা শশাপ ত্রিদিবৌকসঃ। রেতঃসেক-সুখভ্রংশকম্পমানা তদা রুষা॥ পার্ব্ব-ত্যুবাচ। ক্রিমিকীটাদয়োঽপ্যেতে জানন্তি সুরতেঃ সুখং। তস্মান্মম সুখভ্রংশাদ্যূয়ং বৃক্ষত্বমাপ্স্যথ॥ সূত উবাচ। এবং সা পার্ব্বতী দেবী অশপৎ ক্রুদ্ধমানসা। তস্মাদ্-বৃক্ষত্বমাপন্না ব্রহ্মবিষ্ণুমহেশ্বরাঃ॥ তস্মা-দিমৌ বিষ্ণুমহেশ্বরাবুভৌ বভূবতুর্বোধি-বটৌ মুনীশ্বরাঃ। বোধিস্ত্বয়ং চার্কিদিনং বিনৈব ন স্পৃশ্যতামর্কজবারযোগাৎ॥ *॥ ঋষয় ঊচুঃ। অস্পৃশ্যত্বং কথং যাতঃ সূত বোধিতরুঃ স্বয়ং। স্পৃশ্যত্বঞ্চ কথং প্রাপ্ত-স্তথায়ং শনিবাসরে॥ সূত উবাচ। সমুদ্র-মথনাদ্যানি রত্নান্যাপুঃ সুরোত্তমাঃ। শ্রেষ্ঠঞ্চ কৌস্তুভং তেষু বিষ্ণবে প্রদদুঃ সুরাঃ॥ যাবদঙ্গীচকারাসৌ লক্ষ্মীং ভার্য্যার্থমাত্মনঃ। তাবৎ বিজ্ঞাপয়ামাস লক্ষ্মীস্তং চক্রপাণিনং॥ লক্ষ্মীরুবাচ। অসংস্কৃত্য কথং জ্যেষ্ঠাং কনিষ্ঠা পরি-ণীয়তে। তস্মাত্ত্বমগ্রজামেতামলক্ষ্মীং মধু-সূদন॥ বিবাহোদ্বহ মাং পশ্চাদেষ ধর্ম্মঃ সনাতনঃ। তস্মাদ্ধর্ম্মব্যতিক্রামং ন কুর্য্যা মধুসূদন॥ সূত উবাচ। ইতি তদ্বচনং শ্রুত্বা স বিষ্ণুর্লোকভাবনঃ। উদ্দালকায় মুনয়ে সুদীর্ঘতপসে তদা। আপ্তবাক্যানু-রোধেন তামলক্ষ্মীং দদৌ কিল॥ স্থূলোষ্ঠীং শুষ্কবদনাং বিরূপাং বিভ্রতীং তনুং। প্রবদারক্তনয়নাং রূক্ষপিঙ্গশিরো-রুহাং॥ স মুনির্বিষ্ণুবাক্যাত্তামঙ্গীকৃত্য স্বমাশ্রমং। বেদধ্বনিসমাযুক্তমানয়ামাস ধর্ম্মবিৎ॥ হোমধূমসুগন্ধাঢ্যং বেদঘোষেণ নাদিতং। আশ্রমন্তং বিলোক্যাথ ব্যথিতা সাব্রবীদিদং॥ জ্যেষ্ঠোবাচ। নহি বাসোঽনু-রূপোঽয়ং বেদধ্বনিযুতো মম। নাত্রা-গমিষ্যে ভো ব্রহ্মন্ নয়স্বান্যত্র মাং ধ্রুবং॥ উদ্দালক উবাচ। কথং নায়াসি কিঞ্চাত্র বর্ত্ততে স্বমতং তব। তব যোগ্যা চ বসতিঃ কা ভবেত্তদ্বদস্ব মাং॥ জ্যেষ্ঠো-বাচ। বেদধ্বনির্ভবেদ্যস্মিন্নতিথীনাঞ্চ পূজনং। যজ্ঞদানাদিকং যত্র নৈব তত্র বসাম্যহং॥ পরস্পরানুরাগেণ দাম্পত্যং যত্র বিদ্যতে। পিতৃদেবার্চ্চনং যত্র তত্র নৈব বসাম্যহং॥ দানশৌচে ন বিদ্যেতে পরদ্রব্যাপহারিণঃ। পরদাররতা যত্র তত্র স্থানে রতির্ম্মম॥ বৃদ্ধসজ্জনবিপ্রাণাং যত্র স্যাদপমাননং। নিষ্ঠুরং ভাষণং যত্র তত্র সম্যগ্বসাম্যহং॥ সূত উবাচ। ইতি তদ্-বচনং শ্রুত্বা বিষণ্ণবদনোঽভবৎ। উদ্দা-লকস্ততো বাক্যং তামলক্ষ্মীমুবাচ হ॥ উদ্দালক উবাচ। অশ্বত্থবৃক্ষমূলেঽস্মিন্ অলক্ষ্মি শ্রূয়তাং ক্ষণং। আশ্রমস্থান-মালোক্য যাবদায়াম্যহং পুনঃ॥ সূত উবাচ। ইতি তাং তত্র সংস্থাপ্য জগা-মোদ্দালকো মুনিঃ। প্রতীক্ষন্তী চিরং

তত্র যদা তং ন দদর্শ সা। তদা রুরোদ করুণং ভর্ত্তুস্ত্যাগেন দুঃখিতা ॥ তত্তস্যাঃ ক্রন্দিতং লক্ষ্মীর্বৈকুণ্ঠভবনেঽশৃণোৎ। তদা বিজ্ঞাপয়ামাস বিষ্ণুমুদ্বিগ্নমানসা ॥ লক্ষ্মীরুবাচ। স্বামিন্ মদ্ভগিনী জ্যেষ্ঠা স্বামিত্যাগেন দুঃখিতা। তামাশ্বাসয়িতুং যাহি কৃপালো যদ্যহং প্রিয়া ॥ সূত উবাচ। লক্ষ্ম্যা সহ ততো বিষ্ণুস্তত্রাগাৎ কৃপয়ান্বিতঃ। আশ্বাসয়ন্নলক্ষ্মীং তামিদং বাক্যমথাব্রবীৎ ॥ বিষ্ণুরুবাচ। অশ্বত্থবৃক্ষমাসাদ্য সদালক্ষ্মি স্থিরা ভব। মমাংশসম্ভবো হ্যেষ আবাসস্তে ময়া কৃতঃ ॥ মন্দবারে সদা নূনং লক্ষ্মীরত্রাগমিষ্যতি। অস্পৃশ্যোঽসৌ ভবেত্তস্মান্মন্দবারং বিনা কিল ॥ প্রত্যব্দমর্চ্চয়িষ্যন্তি ত্বাং জ্যেষ্ঠাং গৃহধর্ম্মিণঃ। তেম্বিয়ং শ্রীঃ কনিষ্ঠা তে সদা তিষ্ঠত্বনাময়া ॥ ইতি পাদ্মোত্তরখণ্ডে ১৬০। ১৬১ অধ্যায়ঃ ॥

পিপ্পলকং (ক্লী) স্তনবৃন্তং। সীবনসূত্রং। ইতি মেদিনী ॥

পিপ্পলিঃ (স্ত্রী) পিপ্পলী। ইতি শব্দরত্নাবলী ॥

পিপ্পলী (স্ত্রী) বৃক্ষবিশেষঃ। পিঁপুল ইতি ভাষা। তৎপর্য্যায়ঃ। কৃষ্ণা ২ উপকুল্যা ৩ বৈদেহী ৪ মাগধী ৫ চপলা ৬ কণা ৭ উষণা ৮ শৌণ্ডী ৯ কোলা ১০। ইত্যমরঃ ॥ ঊষণা ১১ পিপ্পলিঃ ১২। ইতি ভরতঃ ॥ কৃকলা ১৩ কটুবীজা ১৪ কোরঙ্গী ১৫ তিক্ততণ্ডুলা ১৬ শ্যামা ১৭ দন্তফলা ১৮ মগধোদ্ভবা ১৯। অস্যা গুণাঃ। জ্বরনাশিত্বং। বৃষ্যত্বং। স্নিগ্ধত্বং। উষ্ণত্বং। কটুত্বং। তিক্তত্বং। দীপনত্বং। মারুতশ্বাসকাসশ্লেষ্মক্ষয়াপহত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ স্বাদুপাকত্বং। রসায়নত্বং। লঘুত্বং। পিত্তলত্বং। রেচনত্বং। কুষ্ঠপ্রমেহগুল্মার্শঃপ্লীহশূলামনাশিত্বঞ্চ ॥ আর্দ্রায়াস্তস্যা গুণাঃ। কফপ্রদত্বং। স্নিগ্ধত্বং। শীতলত্বং। মধুরত্বং। গুরুত্বং। পিত্তপ্রশমনত্বঞ্চ। রাজবল্লভে তু কফাপহত্বং ॥ মধুযুক্তায়াস্তস্যা গুণাঃ। মেদঃকফশ্বাসকাসজ্বরহরত্বং। বৃষ্যত্বং। মেধাগ্নিবর্দ্ধনত্বঞ্চ ॥ গুড়পিপ্পলীগুণাঃ। জীর্ণজ্বরে অগ্নিমান্দ্যে চ শস্তত্বং। কাসাজীর্ণারুচিশ্বাসহৃৎপাণ্ডুকৃমিনাশিত্বঞ্চ। দ্বিগুণাৎ পিপ্পলীচূর্ণাদ্গুড়োঽত্র ভিষজাং মতঃ। ইতি ভাবপ্রকাশঃ ॥

পিপ্পলীকা (স্ত্রী) অশ্বত্থীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

পিপ্পলীমূলং (ক্লী) স্বনামখ্যাতমূলং। পিঁপুলমূল ইতি ভাষা। তৎপর্য্যায়ঃ। গ্রন্থিকং ২ চটিকাশিরঃ ৩। ইত্যমরঃ ॥ ষড়্গ্রন্থি ৪। ইতি রত্নমালা ॥ মূলং ৫ কোলমূলং ৬ কটুগ্রন্থি ৭ কটুমূলং ৮ কটূষণং ৯ সর্ব্বগ্রন্থি ১০ পত্রাঢ্যং ১১ বিরূপং ১২ শোষসম্ভবং ১৩ সুগন্ধি ১৪ গ্রন্থিলং ১৫। ইতি রাজনির্ঘণ্টঃ ॥ উষণং ১৬। অস্য গুণাঃ। দীপনত্বং। কটুত্বং। পাচনত্বং। লঘুত্বং। রূক্ষত্বং। পিত্তকরত্বং। ভেদকত্বং। কফবাতোদরানাহপ্লীহগুল্মকৃমিশ্বাসক্ষয়াপহত্বঞ্চ। ইতি ভাবপ্রকাশঃ ॥ উষ্ণত্বং। রোচনত্বং। ইতি রাজনির্ঘণ্টঃ ॥

পিপ্পিকা (স্ত্রী) দন্তমলং। ইতি হেমচন্দ্রঃ ॥

পিপ্লুঃ (পুং) জটুলঃ। ইত্যমরঃ ॥

পিয়ালঃ (পুং) বৃক্ষবিশেষঃ। অস্যৈব বীজং চিরৌঞ্জীতি খ্যাতং। তৎপর্য্যায়ঃ। রাজাদনং ২ সন্নকদ্রুঃ ৩ ধনুষ্পটঃ ৪। ইত্যমরঃ ॥ রাজাতনং ৫ রাজাতনঃ ৬ প্রিয়ালঃ ৭ সন্নঃ ৮ কদ্রুঃ ৯ ধনুঃ ১০ পটঃ ১১। ইতি তট্টীকা ॥ হ্রস্বসন্নকঃ ১২ ধন্বপটঃ ১৩ পিয়ালকঃ ১৪। ইতি শব্দরত্নাবলী ॥ খরস্কন্ধঃ ১৫ চারঃ ১৬ বহুলবল্কলঃ ১৭ তাপসেষ্টঃ ১৮। তস্য গুণাঃ। পিত্তকফাস্রনাশিত্বং। ইতি ভাবপ্রকাশঃ ॥ অস্য ফলগুণাঃ। মধুরত্বং। স্নিগ্ধত্বং। বৃংহণত্বং। বাতপিত্তনাশিত্বঞ্চ। ইতি রাজবল্লভঃ ॥ গুরুত্বং। সরত্বং। দাহজ্বরতৃষাপহত্বঞ্চ। তস্য মজ্জগুণাঃ। মধুরত্বং। বৃষ্যত্বং। পিত্তানিলাপহত্বং। হৃদ্যত্বং। অতিদুর্জরত্বং। স্নিগ্ধত্বং। বিষ্টম্ভিত্বং। আমবর্দ্ধনত্বঞ্চ। ইতি ভাবপ্রকাশঃ ॥

পিল ক নুদি। ইতি কবিকল্পদ্রুমঃ ॥ ক পেলয়তি। নুদি প্রেরণে। ইতি দুর্গাদাসঃ ॥

পিলুকঃ (পুং) পীলুবৃক্ষঃ। ইতি শব্দরত্নাবলী ॥

পিলুপর্ণী (স্ত্রী) মোরটা। ইতি রত্নমালা ॥

পিল্লঃ (পুং) ক্লেদযুক্তচক্ষুঃ। তদ্‌যুক্তে ত্রি। ইত্যমরঃ ॥

পিল্লকা (স্ত্রী) হস্তিনী। ইতি শব্দমালা ॥

পিব ই সেচনে। ইতি কবিকল্পদ্রুমঃ ॥ ই পিম্ব্যতে। ইতি দুর্গাদাসঃ ॥

পিশ শ প অবয়বে। ইতি কবিকল্পদ্রুমঃ ॥ শ প পিংশতি পটঃ অবয়বী স্যাদিত্যর্থঃ। ইতি দুর্গাদাসঃ ॥

পিশঙ্গঃ (পুং) পিঙ্গলবর্ণঃ। তদ্বতি ত্রি। ইত্যমরঃ ॥

পিশাচঃ (পুং) দেবযোনিবিশেষঃ। পিচাশ ইতি ভাষা। ইত্যমরঃ ॥ তস্য লোকো যথা। অন্তরীক্ষচরা যে চ ভূতপ্রেতপিশাচকাঃ। বর্জয়িত্বা রুদ্রগণাংস্তে তত্রৈব চরন্তি হি ॥ নোর্দ্ধং বিক্রমণে শক্তিস্তেষাং সম্ভৃতপাপ্মনাং। অত ঊর্দ্ধং হি বিপ্রেন্দ্র রাক্ষসা যে কৃতৈনসঃ। তে তু সূর্য্যাদধঃ সর্ব্বে বিহরন্ত্যূর্দ্ধবর্জিতাঃ ॥ ইতি পাদ্মে স্বর্গখণ্ডে ১৫ অধ্যায়ঃ ॥ প্রেতঃ। যথা। অশৌচান্তাদ্দ্বিতীয়েহহ্নি যস্য নোৎসৃজ্যতে বৃষঃ। পিশাচত্বং ভবেত্তস্য দত্তৈঃ শ্রাদ্ধশতৈরপি ॥ ইতি শুদ্ধিতত্ত্বং ॥

পিশাচকী [ন্] (পুং) কুবেরঃ। ইতি হেমচন্দ্রঃ ॥

পিশাচদ্রুঃ (পুং) শাখোটবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

পিশাচবৃক্ষঃ (পুং) শাখোটবৃক্ষঃ। ইতি রত্নমালা ॥

পিশাচসভং (ক্লী) পিশাচানাং সভা। ইতি নপুংসকলিঙ্গসংগ্রহটীকায়াং ভরতঃ ॥

পিশাচী (স্ত্রী) পিশাচিকা। স্ত্রী পিশাচী। ইতি শব্দমালা ॥ গন্ধমাংসী। ইতি রাজনির্ঘণ্টঃ ॥

পিশিতং (ক্লী) মাংসং। ইত্যমরঃ ॥

পিশিতা (স্ত্রী) জটামাংসী। ইতি মেদিনী ॥

পিশিতাশী [ন্] (পুং) শাস্কুলঃ। মাংস-ভক্ষকঃ। ইতি হেমচন্দ্রঃ ॥

পিশী (স্ত্রী) জটামাংসী। ইতি রাজনির্ঘণ্টঃ ॥

পিশুনং (ক্লী) কুঙ্কুমং। ইত্যমরঃ ॥

পিশুনঃ (পুং) কপিবক্ত্রঃ। নারদঃ। কাকঃ। সূচকে ক্রূরে চ ত্রি। ইতি মেদিনী ॥

পিশুনঃ (ত্রি) অপ্রকাশেনানুচিতপ্রবোধকঃ। পরস্পরভেদশীলঃ। ইত্যমরটীকায়াং ভরতঃ ॥ তৎপর্য্যায়ঃ। দ্বিজিহ্বঃ সূচকঃ কর্ণেজপঃ পিশুন ইত্যপি। দুর্জনো দুর্ব্বিধো বিশ্বকদ্রুশ্চ পিশুনঃ খলঃ ॥ ইতি জটাধরঃ ॥ * ॥ কর্ণেজপঃ সূচকঃ স্যাদনৌচিত্যপ্রবোধকে। পরস্পরং ভেদশীলে পিশুনো দুর্জনঃ খলঃ ॥ ইতি শব্দরত্নাবলী ॥

পিশুনা (স্ত্রী) পৃক্কা। পিড়িংশাক ইতি ভাষা। ইতি মেদিনী ॥

পিষ ধ ঔ ৯ চূর্ণনে। ইতি কবিকল্পদ্রুমঃ ॥ ধ পিনষ্টি লোকো গোধূমং। ঔ পেষ্টা। ৯ অপিষৎ। ইতি দুর্গাদাসঃ ॥

পিষ্টং (ক্লী) সীসকং। ইতি রত্নমালা ॥ পিষ্টকঃ। যথা। অন্নাদষ্টগুণং পিষ্টং পিষ্টাদষ্টগুণং পয়ঃ। পয়সোঽষ্টগুণং মাংসং মাংসাদষ্টগুণং ঘৃতং। ঘৃতাদষ্টগুণং তৈলং মর্দ্দনান্ন চ ভক্ষণাৎ ॥ * ॥ অস্য গুণাঃ। পিষ্টং প্রাণকরং রূক্ষং বিদাহি গুরু দুর্জ্জরং ॥ * ॥ শালিপিষ্টময়া ভক্ষ্যাঃ কফপিত্তবিনাশনাঃ। * । বৈদলা গুরবো ভক্ষ্যা বিষ্টম্ভিস্সৃষ্টমারুতাঃ ॥ * ॥ সগুড়াঃ সতিলাশ্চৈব সক্ষৌদ্রক্ষারশর্করাঃ। ভক্ষ্যা বল্যাশ্চ হৃদ্যাশ্চ গুরবো বৃংহণাঃ পরং ॥ * ॥ সস্নেহাঃ স্নেহসিক্তাশ্চ ভক্ষ্যা গোধূমসম্ভবাঃ। গুরবস্তর্পণা হৃদ্যা বলোপচয়বর্দ্ধনাঃ ॥ * ॥ মর্দ্দিতাং সমিতাং ক্ষীরনারিকেলঘৃতাদিভিঃ। অবগাহ্য ঘৃতে পক্ত্বা ঘৃতপূরোঽয়মুচ্যতে ॥ * ॥ ঘৃতপূরো গুরুর্বৃষ্যঃ কফকৃদ্রক্তমাংসদঃ। রক্তপিত্তহরো হৃদ্যঃ স্বাদুঃ পিত্তহরোঽগ্নিদঃ ॥ * ॥ গোধূমচূর্ণং সমিতা। সমিতা মধুদুগ্ধেন খণ্ডেলামরিচাদিভিঃ। ঘৃতে পক্ত্বা ক্ষিপেৎ খণ্ডে সংযাবো বৃংহণো গুরুঃ ॥ * ॥ সমিতা বেষ্টিতা মধ্যে মধু দত্ত্বা ঘৃতে শৃতা। মধুমস্তকমুদ্দিষ্টং তদ্বৃষ্যং গুরু দুর্জরং ॥ * ॥ ইতি রাজবল্লভঃ ॥ পর্পটশস্কুলীফেনকবটলড্ডুকানাং গুণাস্তত্তচ্ছব্দে দ্রষ্টব্যাঃ ॥ * ॥ চূর্ণীকৃতে ত্রি ॥

পিষ্টকং (ক্লী) তিলচূর্ণং। ইতি রাজনির্ঘণ্টঃ ॥

পিষ্টকঃ (পুং) পিষ্টানাং তণ্ডুলাদীনাং বিকারঃ। পিটা ইতি ভাষা। তৎপর্য্যায়ঃ। পূপঃ ২ অপূপঃ ৩। ইত্যমরঃ ॥ আপূপঃ ৪ পিষ্টঃ ৫। ইতি শব্দরত্নাবলী ॥ অস্য গুণাঃ পিষ্টশব্দে দ্রষ্টব্যাঃ। নেত্ররোগবিশেষঃ। ইতি মেদিনী ॥ তস্য লক্ষণং। শ্লেষ্মা মারুতকোপেন শুক্লে পিষ্টসমুন্নতং। পিষ্টবৎ পিষ্টকং বিদ্ধি মলাক্তাদর্শসন্নিভং ॥ ইতি মাধবকরঃ ॥

পিষ্টপং (ক্লী পুং) ভুবনং। ইত্যমররত্নকোষৌ ॥

পিষ্টপচনং (ক্লী) পিষ্টপাকপাত্রং। তেলানী

ইতি খ্যাতং। ইতি সুভূতিঃ॥ তৎপর্য্যায়ঃ। ঋজীষং ২। ইত্যমরঃ॥ ঋর্চীসং ৩। ইতি স্বামী॥ পিষ্টপাকভৃৎ ৪। ইতি হেমচন্দ্রঃ॥

পিষ্টপাকভৃৎ (ক্লী) পিষ্টকপাকপাত্রং। ইতি হেমচন্দ্রঃ॥

পিষ্টপূরঃ (পুং) বটকঃ। ইতি ভূরিপ্রয়োগঃ॥ পিষ্টকবিশেষঃ। তৎপর্য্যায়ঃ। ঘৃতপূরঃ ২ ঘৃতবরঃ ৩ ঘার্ত্তিকঃ ৪। ইতি হেমচন্দ্রঃ॥

পিষ্টবর্ত্তিঃ (পুং) মুদ্গমসূরাদিপিষ্টং। তৎপর্য্যায়ঃ। চমসিঃ ২। ইতি হেমচন্দ্রঃ॥

পিষ্টসৌরভং (ক্লী) চন্দনং। ইতি হারাবলী॥

পিষ্টাতঃ (পুং) পটবাসচূর্ণং। ইতি ভরতঃ॥ বস্ত্রাদিবাসনার্থং একীকৃতগন্ধদ্রব্যচূর্ণং। ইতি সারসুন্দরী॥ বুক্কা। ইতি ভানুদীক্ষিতঃ॥ আবীর ইতি খ্যাতঃ। ইতি রমানাথনীলকণ্ঠৌ॥ তৎপর্য্যায়ঃ। পটবাসকঃ ২। ইত্যমরঃ॥ ধূলিগুচ্ছকঃ ৩। ইতি ত্রিকাণ্ডশেষঃ॥

পিষ্টিকং (ক্লী) তণ্ডুলোদ্ভবতবক্ষীরং। ইতি রাজনির্ঘণ্টঃ॥

পিষ্টিকা (স্ত্রী) পিষ্টদ্বিদলঃ। পিঠী ইতি হিন্দীভাষা। যথা। দালিঃ সংস্থাপিতা তোয়ে ততোঽপহতকঞ্চুকা। শিলায়াং সাধু সংপিষ্টা পিষ্টিকা কথিতা বুধৈঃ॥ ইতি ভাবপ্রকাশঃ॥

পিষ্টোড়ী (স্ত্রী) শ্বেতাম্লিঃ। ইতি রাজনির্ঘণ্টঃ॥

পিস ই কি দ্যুতৌ। ইতি কবিকল্পদ্রুমঃ॥ ই পিংস্যতে। কি পিংসয়তি পিংসতি। দ্যুতির্দীপ্তিঃ। ইতি দুর্গাদাসঃ॥

পিস ঋ গত্যাং। ইতি কবিকল্পদ্রুমঃ॥ ঋ অপিপেসৎ অপিপিসৎ পিপেসতুঃ পিপিসতুঃ। ইতি দুর্গাদাসঃ॥

পিস ক ষট্টার্থে। গত্যাং। ইতি কবিকল্পদ্রুমঃ॥ ক পেসয়তি। মূর্দ্ধন্যান্তোঽয়মিতি কেচিৎ। ষট্টার্থো নিকেতনহিংসাবলদানানি। ইতি দুর্গাদাসঃ॥

পিহিতং (ত্রি) আচ্ছাদিতং। তৎপর্য্যায়ঃ। সংবীতং ২ রুদ্ধং ৩ আবৃতং ৪ সংবৃতং ৫ ছন্নং ৬ স্থগিতং ৭ অপবারিতং ৮ অন্তর্হিতং ৯ তিরোধানং ১০। ইতি হেমচন্দ্রঃ॥

পী ঙ য পানে। ইতি কবিকল্পদ্রুমঃ॥ ঙ য পীয়তে। ইতি দুর্গাসঃ॥

পীঠং (ত্রি) উপবেশনাধারঃ। পিড়া চৌকী ইত্যাদি ভাষা। ইত্যমরঃ॥ তৎপর্য্যায়ঃ। আসনং ২ উপাসনং ৩ পীঠী ৪ বিষ্টরঃ ৫। ইতি শব্দরত্নাবলী॥ ব্রতিনামাসনং। তত্তু কুশাসনাদি। তৎপর্য্যায়ঃ। বিষ্টরঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥ বৃষী ৩। ইতি হেমচন্দ্রঃ॥ *॥ অথ পীঠোদ্দেশঃ। ধাতুপাষাণকাষ্ঠৈশ্চ পীঠস্ত্রিবিধ উচ্যতে। ধাতবশ্চ শিলাশ্চৈব কাষ্ঠানি বিবিধানি চ॥ তদত্র সংপ্রবক্ষ্যামি যদ্‌যেষামুপযুজ্যতে। *। অথ মানং। হস্তদ্বয়স্তু দৈর্ঘ্যেণ তদর্দ্ধে পরিণাহতঃ। তদর্দ্ধেনোন্নতঃ পীঠঃ সুখ ইত্যভিধীয়তে॥ হস্তদ্বয়-

দ্বয়াধিক্যাৎ পঞ্চপাঠা ভবন্তি হি। সুখং জয়ঃ শুভঃ সিদ্ধিঃ সম্পচ্চেতি যথাক্রমং॥ ধনভোগসুখৈশ্বর্য্যবাঞ্ছিতার্থপ্রদায়কঃ। সমদীর্ঘসুখাবাপ্তির্বিষমে বিষমাপদঃ॥ আয়ামপরিণাহাভ্যাং হস্তদ্বয়মিতো হি যঃ। অর্দ্ধহস্তোন্নতঃ পীঠো জারকো নাম বিশ্রুতঃ॥ দৈর্ঘ্যোন্নতিপরীণাহৈশ্চতুর্হস্তমিতো হি যঃ। রাজপীঠ ইতি জ্ঞেয়ঃ সকলার্থপ্রসাধকঃ। অত্রাভিষেকমিচ্ছন্তি ক্ষিতিপস্য পুরাবিদঃ॥ দৈর্ঘ্যোন্নতিপরীণাহৈঃ ষড়্‌হস্তমিতো হি যঃ। রাজ্ঞাং চিত্তপ্রসাদার্থং কেলিপীঠাভিধানকঃ॥ দৈর্ঘ্যোন্নতিপরীণাহৈরষ্টহস্তমিতো হি যঃ। অঙ্গপীঠো হ্যয়ং নাম্না ভবেৎ পঞ্চসুখপ্রদঃ॥ কানকো রাজপীঠঃ স্যাজ্জয়ো বা রাজতঃ সুখঃ। রাজ্ঞামেবোপযোক্তব্যো লঘবশ্চোত্তরোত্তরং॥ রাজপীঠে চিরায়ুঃ স্যাজ্জয়ে সর্ব্বাং মহীং জয়েৎ। জারকো জারয়েচ্ছত্রূন্ সুখে সুখমবাপ্নুয়াৎ॥ রাজতঃ কীর্ত্তিজননো ধনবৃদ্ধিকরঃ পরঃ। তাম্রঃ প্রতাপজননো বিপক্ষক্ষয়কারকঃ॥ লৌহস্তূচ্চাটনে সার্ব্বঃ সর্ব্বকর্ম্মসু যুজ্যতে। ত্রপুসীসকরঙ্গাদ্যাঃ শত্রুক্ষয়ফলপ্রদাঃ॥ ইতি ধাতুপীঠাঃ॥ *॥ অথ শিলাপীঠাঃ। রাজপীঠো বজ্রপাণেরেব নান্যস্য দৃশ্যতে। পদ্মরাগো দিনেশস্য চান্দ্রকান্তো বিধোরপি॥ রাহোর্মারকতঃ পীঠঃ শনের্নীলসমুদ্ভবঃ। গোমেদকস্তু সৌম্যস্য স্ফাটিকস্তু বৃহস্পতেঃ॥ শুক্রস্য বৈদূর্য্যভবঃ প্রাবালো মঙ্গলস্য হি। ইত্থং পুরাণবার্ত্তা॥ *॥ যো যস্য হি দশাজাতঃ পীঠস্তস্য হি তন্ময়ঃ। স্ফাটিকস্তু মহীন্দ্রাণাং সর্ব্বেষামেব যুজ্যতে॥ অভিষেকে চ যাত্রায়ামুৎসবে জয়কর্ম্মণি। অয়স্কান্তোপঘটিতঃ সংগ্রামে পীঠ ইষ্যতে॥ গরুড়োদ্গাররচিতে বর্ষাসু নৃপতির্বসেৎ। শুদ্ধরত্নময়ং পীঠং ভজতে ঘনগর্জিতে॥ সামান্যঃ প্রাস্তরঃ পীঠো বিলাসায় মহীভুজাং। এষাং মানং গুণাশ্চাপি বিজ্ঞেয়া ধাতুপীঠবৎ॥ *॥ অথ কাষ্ঠপীঠাঃ। তদ্যথা মানং পূর্ব্ববদেব। সম্পত্তিসুখবৃদ্ধ্যর্থং গাম্ভারীজনিতো জয়ঃ। জারকো রোগনাশায় সুখঃ শত্রুবিনাশনঃ॥ সিদ্ধিঃ সর্ব্বার্থসংসিদ্ধ্যৈ বিজয়ায় চ বৈরিণাং। শুভঃ স্যাদভিষেকে চ সম্পদ্বৈরিনিবারণঃ॥ পালাশো রাজকঃ পীঠঃ সুখসম্পত্তিকারকঃ। জয়ঃ স্যাদভিষেকে চ শুভঃ শত্রুবিনাশনঃ॥ সুখো রোগবিনাশায় সিদ্ধিঃ সর্ব্বার্থদায়িকা। সম্পদুচ্চাটনবিধৌ বিজ্ঞেয়ং পীঠলক্ষণং॥ চান্দনস্তু সুখঃ পীঠো অভিষেকে মহীভুজাং। জয়ঃ স্যাদ্রোগনাশায় শুভঃ সৌখ্যং প্রযচ্ছতি॥ জারকো গ্রহতুষ্ট্যর্থং অন্যে তু রতিদুষ্করাঃ। যজ্ঞতো নির্ম্মিতাস্তে তু সাম্রাজ্যফলদায়কাঃ॥ কালেয়কো যাবকো হি ভূভুজামভিষেচনে। পীঠানগুরুকাদীনামন্যে চন্দনবদ্বিদুঃ॥ বাকুলস্তু শুভঃ পীঠো ভূভুজামভিষেচনে। জয়ো রোগবিনাশায় সুখসম্পত্তিকারকঃ॥ সিদ্ধিঃ সিদ্ধিপ্রদা সম্পৎ সংগ্রামে বিজয়প্রদঃ। জারকো

জরণায় স্যাদিতি ভোজস্য সম্মতং ॥ এবং সুগন্ধিকুসুমাঃ সসারা যে চ পাদপাঃ। বাকুলের সমঃ কার্য্য এবং পীঠস্য নির্ণয়ঃ॥ যে শুষ্ককাষ্ঠা বৃক্ষাস্ত মৃদবো লঘবোঽথবা। গাম্ভারীসদৃশঃ পীঠস্তেষাং কার্য্যস্তথা গুণঃ॥ ফলিনশ্চ সসারাশ্চ রক্তসারাশ্চ যে নগাঃ। তেষাং পানসবৎ পীঠস্তথৈব গুণমাবহেৎ ॥ * ॥ অথ নিষেধঃ। বিজ্ঞেয়ো নিন্দিতঃ পীঠো লৌহোত্থঃ সর্ব্বধাতুজে। শিলোত্থঃ শার্করো বর্জ্যঃ কর্করশ্চ বিশেষতঃ ॥ কাষ্ঠজেষু চ পীঠেষু নাসারা নাতিসারিণঃ। তথা হি। আম্রজম্বুকদম্বানামাসনং বংশনাশনং ॥ ভোজস্ত্বাহ। গুরুঃ পীঠো গৌরবায় লঘুর্লাঘবকারকঃ॥ পরাশরস্তু। নাগ্রন্থিনাতিগ্রন্থিশ্চ নাগুরুর্নাসমাকৃতিঃ। পীঠঃ স্যাৎ সুখসম্পত্ত্যৈ নাতিদীর্ঘো ন বামনঃ॥ যে চান্যে পীঠসদৃশা দৃশ্যাঃ শিল্পিবিনির্ম্মিতাঃ। গুণান্দোষাংশ্চ মানঞ্চ তেষাং পীঠবদাদিশেৎ॥ বিচার্য্যানেন বিধিনা যঃ শুদ্ধং পীঠমাচরেৎ। তস্য লক্ষ্মীরিয়ং বেশ্ম কদাচিন্ন বিমুঞ্চতি॥ অজ্ঞানাদথবা মোহাদ্যোঽন্যথা পীঠমাচরেৎ। এতানি তস্য নশ্যন্তি লক্ষ্মীরায়ুর্ব্বলং কুলং ॥ ইতি যুক্তিকল্পতরৌ পীঠোদ্দেশঃ ॥ * ॥ কৃতযুগে দক্ষক্রতৌ শিবনিন্দাং শ্রুত্বা প্রাণাংস্ত্যক্তবত্যাঃ সত্যাঃ শরীরং শিরসি ধৃত্বা ভ্রমতি শিবে বিষ্ণুনা চক্রেণ ছিন্নাস্তস্যা অবয়বা যত্র যত্র পতিতাস্ত এব দেশা একপঞ্চাশন্মহাপীঠা অভবন্। ইতি পৌরাণিকী বার্ত্তা॥ * ॥ তেষাং নিরূপণং যথা। ঈশ্বর উবাচ। মাতঃ পরাপরে দেবি সর্ব্বজ্ঞানময়ীশ্বরি। কথ্যতাং মে সর্ব্বপীঠং শক্তিভৈরবদেবতা ॥ দেব্যুবাচ। শৃণু বৎস প্রবক্ষ্যামি দয়ালো ভক্তবৎসল। যাভির্বিনা ন সিধ্যন্তি জপসাধনতৎক্রিয়াঃ॥ পঞ্চাশদেকপীঠানি এবং ভৈরবদেবতাঃ। অঙ্গপ্রত্যঙ্গপাতেন বিষ্ণুচক্রক্ষতেন চ॥ মমান্যবপুষো দেব হিতায় ত্বয়ি কথ্যতে। ব্রহ্মরন্ধ্রং হিঙ্গুলায়াং ভৈরবো ভীমলোচনঃ॥ কোট্টরী সা মহামায়া ত্রিগুণা যা দিগম্বরী। ১। শর্করারে ত্রিনেত্রং মে দেবী মহিষমর্দ্দিনী॥ ক্রোধীশো ভৈরবস্তত্র সর্ব্বসিদ্ধিপ্রদায়কঃ। ২। সুগন্ধায়াং নাসিকা মে দেবস্ত্র্যম্বকভৈরবঃ॥ সুন্দরী সা মহাদেবী সুনন্দা তত্র দেবতা। ৩। কাশ্মীরে কণ্ঠদেশশ্চ ত্রিসন্ধ্যেশ্বরভৈরবঃ॥ মহামায়া ভগবতী গুণাতীতা বরপ্রদা। ৪। জ্বালামুখ্যাং মহাজিহ্বা দেব উন্মত্তভৈরবঃ॥ অম্বিকা সিদ্ধিদানাম্নী ৫ স্তনং জালন্ধরে মম। ভীষণো ভৈরবস্তত্র দেবী ত্রিপুরমালিনী ॥ ৬ ॥ হার্দ্দপীঠং বৈদ্যনাথে বৈদ্যনাথস্তু ভৈরবঃ। দেবতা জয়দুর্গাখ্যা৭ নেপালে জানুনী মম॥ কপালী ভৈরবঃ শ্রীমান্ মহামায়া চ দেবতা। ৮। মানসে দক্ষহস্তো মে দেবী দাক্ষায়ণী হর॥ অমরো ভৈরবস্তত্র সর্ব্বসিদ্ধিপ্রদায়কঃ। ৯। উৎকলে নাভিদেশশ্চ বিরজাক্ষেত্রমুচ্যতে॥ বিমলা সা মহাদেবী জগন্নাথস্তু ভৈরবঃ।১০। গণ্ডক্যাং গণ্ডপাতঞ্চ তত্র সিদ্ধির্ন সংশয়ঃ॥

তত্র সা গণ্ডকী চণ্ডী চক্রপাণিস্তু ভৈরবঃ । ১১ । বহুলায়াং বামবাহুর্ব্বহুলাখ্যা চ দেবতা ॥ ভীরুকো ভৈরবো দেবঃ সর্ব্বসিদ্ধিপ্রদায়কঃ । ১২ । উজ্জয়িন্যাং কূর্পরঞ্চ মাঙ্গল্যঃ কপিলাম্বরঃ ॥ ভৈরবঃ সিদ্ধিদঃ সাক্ষাদ্দেবী মঙ্গলচণ্ডিকা । ১৩ । চট্টলে দক্ষবাহুর্মে ভৈরবশ্চন্দ্রশেখরঃ ॥ ব্যক্তরূপা ভগবতী ভবানী তত্র দেবতা । বিশেষতঃ কলিযুগে বসামি চন্দ্রশেখরে ॥ ১৪ ॥ ত্রিপুরায়াং দক্ষপাদো দেবতা ত্রিপুরা মতা । ভৈরবস্ত্রিপুরেশশ্চ সর্ব্বাভীষ্টফলপ্রদঃ ॥ ১৫ ॥ ত্রিস্রোতায়াং বামপাদো ভ্রামরী ভৈরবোঽম্বরঃ । ১৬ । যোনিপীঠং কামগিরৌ কামাখ্যা তত্র দেবতা ॥ যত্রাস্তে দ্বিগুণাতীতা রক্তপাষাণরূপিণী । যত্রাস্তে মাধবঃ সাক্ষাদুমানন্দোঽথ ভৈরবঃ ॥ সর্ব্বদা বিহরেদ্দেবী তত্র মুক্তির্ন সংশয়ঃ । তত্র শ্রীভৈরবী দেবী তত্র নক্ষত্রদেবতা ॥ প্রচণ্ডচণ্ডিকা তত্র মাতঙ্গী ত্রিপুরাম্বিকা । বগলা কমলা তত্র ভুবনেশী সুধূমিনী ॥ এতানি বরপীঠানি সংসন্তি বরভৈরব । এবং তা দেবতাঃ সর্ব্বা এবন্তে দশ ভৈরবাঃ ॥ ১৭ ॥ সর্ব্বত্র বিরলা চাহং কামরূপে গৃহে গৃহে । গৌরীশিখরমারুহ্য পুনর্জন্ম ন বিদ্যতে ॥ ১৮ ॥ করতোয়াং সমাসাদ্য যাবৎ শিখরবাসিনীং। শতযোজনবিস্তীর্ণং ত্রিকোণং সর্ব্বসিদ্ধিদং ॥ দেবা মরণমিচ্ছন্তি কিং পুনর্মানবাদয়ঃ । ভূতধাত্রী মহামায়া ভৈরবঃ ক্ষীরখণ্ডকঃ ॥ যুগাদ্যায়াং মহাদেব দক্ষাপদো মম । ১৯ । নকুলীশঃ কালিপীঠে দক্ষপাদাঙ্গুলীষু চ ॥ সর্ব্বসিদ্ধিকরী দেবী কালিকা তত্র দেবতা । ২০। অঙ্গুলীষু চ হস্তস্য প্রয়াগে ললিতা ভবঃ ॥ জয়ন্ত্যাং বামজঙ্ঘাঞ্চ জয়ন্তী ক্রমদীশ্বরঃ । ২১ । ভুবনেশী সিদ্ধিরূপা কিরীটস্থা কিরীটতঃ ॥ দেবতা বিমলা নাম্নী সম্বর্ত্তো ভৈরবস্তথা । ২২ । বারাণস্যাং বিশালাক্ষী দেবতা কালভৈরবঃ ॥ মণিকর্ণীতি বিখ্যাতা কুণ্ডলঞ্চ মম শ্রুতেঃ।২৩। কন্যাশ্রমে চ পৃষ্ঠং মে নিমিষো ভৈরবস্তথা ॥ সর্ব্বাণী দেবতা তত্র ২৪ কুরুক্ষেত্রে চ গুল্ফতঃ । স্থাণুর্নাম্না চ সাবিত্রী দেবতা২৫মণিবেদকে ॥ মণিবন্ধে চ গায়ত্রী সর্ব্বানন্দস্তু ভৈরবঃ । ২৬ । শ্রীশৈলে চ মম গ্রীবা মহালক্ষ্মীস্তু দেবতা ॥ ভৈরবঃ শম্বরানন্দো দেশে দেশে ব্যবস্থিতঃ । ২৭ । কাঞ্চীদেশে চ কঙ্কালো ভৈরবো রুরুনামকঃ ॥ দেবতা দেবগর্ব্ভাখ্যা ২৮ নিতম্বঃ কালমাধবে । ভৈরবশ্চাসিতাঙ্গশ্চ দেবী কালী চ মুক্তিদা ॥ দৃষ্ট্বা দৃষ্ট্বা মহাদেব মন্ত্রসিদ্ধিমবাপ্নুয়াৎ । কুজবারে ভূততিথৌ নিশার্দ্ধে যস্তু সাধকঃ ॥ নত্বা প্রদক্ষিণীকৃত্য মন্ত্রসিদ্ধিমবাপ্নুয়াৎ । ২৯ । শোণাখ্যা ভদ্রসেনস্তু নর্ম্মদাখ্যে নিতম্বকঃ ॥ ৩০ ॥ রামগিরৌ স্তনান্যঞ্চ শিবানী চণ্ডভৈরবঃ । ৩১ । বৃন্দাবনে কেশজালে উমানাম্নী চ দেবতা ॥ ভূতেশো ভৈরবস্তত্র সর্ব্বসিদ্ধিপ্রদায়কঃ । ৩২ । সংহারাখ্য ঊর্দ্ধদন্তে দেবী

মঙ্গরায়ণী শুচৌ ॥ অধোদন্তে মহারুদ্রো বারাহী পঞ্চসাগরে । ৩৩ । করতোয়াতটে তল্পং বামে বামনভৈরবঃ ॥ অপর্ণা দেবতা তত্র ব্রহ্মরূপা করোদ্ভবা । ৩৪ । শ্রী-পর্ব্বতে দক্ষতল্পং তত্র শ্রীসুন্দরী পরা ॥ সর্ব্বসিদ্ধিকরী সর্ব্বা সুন্দরানন্দভৈরবঃ।৩৫। কপালিনী ভীমরূপা বামগুল্ফো বিভাষকে ॥ ৩৬ ॥ উদরঞ্চ প্রভাসে মে চন্দ্র-ভাগা যশস্বিনী । বক্রতুণ্ডো ভৈরব৩৭ শ্চোর্দ্ধোষ্ঠো ভৈরবপর্ব্বতে ॥ অবন্তী চ মহাদেবী লম্বকর্ণস্তু ভৈরবঃ । ৩৮। চিবুকে ভ্রামরী দেবী বিকৃতাক্ষো জলে স্থলে ।৩৯। গণ্ডো গোদাবরীতীরে বিশ্বেশী বিশ্ব-মাতৃকা। দণ্ডপাণির্ভৈরবস্তু বামগণ্ডে তু রাকিণী ॥ অমায়ী ভৈরবো বৎস সর্ব্ব-শৈলাত্মকোপরি । ৪০ । রত্নাবল্যাং দক্ষ-স্কন্ধঃ কুমারী ভৈরবঃ শিবঃ॥ ৪১ ॥ মিথি-লায়াং উমা দেবী বামস্কন্ধো মহোদরঃ।৪২। নলাহাট্যাং নলাপাতো যোগেশো ভৈরব-স্তথা ॥ তত্র সা কালিকা দেবী সর্ব্বসিদ্ধি-প্রদায়িকা । ৪৩ । কর্ণাটে চৈব কর্ণং মে অভীরুর্নাম ভৈরবঃ ॥ দেবতা জয়দুর্গাখ্যা নানাভোগপ্রদায়িনী । ৪৪ । বক্রেশ্বরে মনঃপাতং বক্রনাথস্তু ভৈরবঃ ॥ নদী পাপহরা তত্র দেবী মহিষমর্দ্দিনী । ৪৫ । যশোরে পাণিপদ্মঞ্চ দেবতা যশরেশ্বরী ॥ চণ্ডশ্চ ভৈরবো যত্র তত্র সিদ্ধিমবাপ্নু-য়াৎ । ৪৬। অট্টহাসে চোষ্ঠপাতো দেবী সা ফুল্লরা স্মৃতা ॥ বিশ্বেশো ভৈরবস্তত্র সর্ব্বাভীষ্টপ্রদায়কঃ । ৪৭ । হারপাতো নন্দিপুরে ভৈরবো নন্দিকেশ্বরঃ ॥ নন্দিনী সা মহাদেবী তত্র সিদ্ধির্ন সংশয়ঃ । ৪৮ । লঙ্কায়াং নূপুরশ্চৈব ভৈরবো রাক্ষসেশ্বরঃ ॥ ইন্দ্রাক্ষী দেবতা তত্র ইন্দ্রেণোপাসিতা পুরা । ৪৯ । বিরাটদেশমধ্যে তু পাদাঙ্গুলি-নিপাতনং ॥ ভৈরবঃ অমৃতাক্ষশ্চ দেবী তত্রাম্বিকা স্মৃতা । ৫০ । মাগধে দক্ষজঙ্ঘা মে ব্যোমকেশস্তু ভৈরবঃ ॥ সর্ব্বানন্দকরী দেবী সর্ব্বকামফলপ্রদা । ৫১। এতাস্তে কথিতাঃ পুত্র পীঠনাথাধিদেবতাঃ ॥ ক্ষেত্রাধীশং বিনা দেবং পূজয়েৎ পীঠ-দেবতাং। ভৈরবৈর্হ্রিয়তে সর্ব্বং জপ-পূজাদিসাধনং ॥ অজ্ঞাত্বা ভৈরবং পীঠং পীঠশক্তিঞ্চ শঙ্কর। প্রাণনাথ ন সিধ্যেত কল্পকোটিজপাদিভিঃ॥ ন দেয়ং পর-শিষ্যেভ্যো নিন্দকায় দুরাত্মনে। শঠায় বঞ্চকায়েদং দত্ত্বা মৃত্যুমবাপ্নুয়াৎ ॥ দদ্যাৎ শান্তায় শিষ্যায় নৈষ্ঠিকায় শুচৌ প্রিয়ে। সাধকায় কুলীনায় মন্ত্রী মন্ত্রার্থসিদ্ধয়ে ॥ ইতি তন্ত্রচূড়ামণৌ শিবপার্ব্বতীসংবাদে একপঞ্চাশদ্বিদ্যোৎপত্তৌ পীঠনির্ণয়ঃ সমাপ্তঃ ॥ * ॥ অন্যানি পীঠাদীনি কালী-পুরাণে ১৮।৫০।৬১ অধ্যায়ে দ্রষ্টব্যানি ॥*॥ পীঠন্যাসস্তু ন্যাসশব্দে দ্রষ্টব্যঃ। পীঠ-দেবতাপূজনং ন্যাসক্রমেণৈব ॥

পীঠকেলিঃ (পুং) পীঠমর্দ্দনায়কঃ। যথা। ষিড়্গো ব্যলীকঃ ষট্প্রজ্ঞঃ কামকেলি-বিদূষকঃ। পীঠকেলিঃ পীঠমর্দ্দো ভবিল-শ্ছিত্বরো বিটঃ ॥ ইতি ত্রিকাণ্ডশেষঃ ॥

পীঠমর্দ্দঃ (পুং) নায়কবিশেষঃ। তস্য লক্ষণং।

কুপিতস্ত্রীপ্রসাদকঃ। উদাহরণং যথা। কোঽয়ং কোপবিধিঃ প্রযচ্ছ করুণাগর্ত্তং বচো জায়তাং পীযূষদ্রবদীর্ঘিকাপরিমলৈরামোদিতা মেদিনী। আস্তাং বা স্পৃহয়ালু লোচনমিদং ব্যাবর্ত্তয়ন্তী মুহুর্যস্মৈ কুপ্যসি তস্য সুন্দরি তপোবৃন্দানি বন্দামহে॥ নর্ম্মসচিবোঽপ্যয়মেব। ইতি রস-

পীঠসর্পী [ন্] (ত্রি) খঞ্জঃ। তৎপর্য্যায়ঃ। পাংশুরঃ ২। ইতি হারাবলী॥

পীঠী (স্ত্রী) আসনং। পীঁড়ী ইতি ভাষা। ইতি শব্দরত্নাবলী॥

পীড ঋ ক বাধে। গাহে। ইতি কবিকল্পদ্রুমঃ॥ বাধো বিহতিঃ। গাহো বিলোড়নং। ঋ অপীপিড়ৎ অপিপীড়ৎ। ক পীড়য়তি শত্রুং লোকঃ। পীড়য়তি স্তনং কামী। ইতি দুর্গাদাসঃ॥

পীড়নং (ক্লী) শস্যাদিসম্পন্নদেশস্য পরচক্রেণ পীড়নং। শত্রুকৃতগাঢ়প্রহারঃ। ইতি কেচিৎ। পদাক্রমণং। ইতি কেচিৎ। ইতি ভরতঃ॥ তৎপর্য্যায়ঃ। অবমর্দ্দঃ ২। ইত্যমরঃ॥ দুঃখনং। যথা। ভরণং পোষ্যবর্গস্য প্রশস্তং স্বর্গসাধনং। নরকং পীড়নে চাস্য তস্মাদযত্নেন তং ভরেৎ॥ ইতি দায়ভাগধৃতমনুবচনং॥ মর্দ্দনং। টিপন চাপন ইত্যাদি ভাষা। যথা। গর্ভোঽভিঘাতবিষমাশনপীড়নাদ্যৈঃ পক্বং দ্রুমাদিব ফলং পততি ক্ষণেন। ইতি মাধবকরঃ॥

পীড়া (স্ত্রী) পীড়নং। তৎপর্য্যায়ঃ। বাধা ২ ব্যথা ৩ দুঃখং ৪ অমানস্যং ৫ প্রসূতিজং ৬ কষ্টং ৭ কৃচ্ছ্রং ৮ আভীলং ৯। ইত্যমরঃ॥ আবাধা ১০। ইতি হলায়ুধঃ॥ আমানস্যং ১১। ইতি রায়মুকুটঃ॥ এষাং পীড়াদীনাং মধ্যে বিশেষ্যগামিনো যে দুঃখকষ্টকৃচ্ছ্রাভীলাস্তে ত্রিলিঙ্গাঃ। সা আধ্যাত্মিকাধিভৌতিকাধিদৈবিকতাপত্রয়ভেদেন ত্রিবিধা। আধ্যাত্মিকোঽপি দ্বিবিধঃ। যথা। আধ্যাত্মিকাদি মৈত্রেয় জ্ঞাত্বা তাপত্রয়ং বুধঃ। উৎপন্নজ্ঞানবৈরাগ্যঃ প্রাপ্নোত্যাত্যন্তিকং লয়ং॥ আধ্যাত্মিকো বৈ দ্বিবিধঃ শারীরো মানসস্তথা। শারীরো বহুভির্ভেদৈর্ভিদ্যতে শ্রূয়তাঞ্চ সঃ॥ শিরোরোগপ্রতিশ্যায়জ্বরশূলভগন্দরৈঃ। গুল্মার্শঃশ্বয়থুশ্বাসচ্ছর্দ্দ্যাদিভিরনেকধা॥ তথাক্ষিরোগাতীসারকুষ্ঠাঙ্গাময়সংজ্ঞকৈঃ। ভিদ্যতে দেহজস্তাপো মানসং শ্রোতুমর্হসি॥ অঙ্গাময়ো বাতজলোদরাদিঃ ১॥ *॥ কামক্রোধভয়দ্বেষলোভমোহবিষাদজঃ। শোকাসূয়াবমানের্ষ্যামাৎসর্য্যাদিভয়স্তথা॥ মানসোঽপি দ্বিজশ্রেষ্ঠ তাপো ভবতি নৈকধা॥২॥ *॥ ইত্যেবমাদিভির্ভেদৈস্তাপো হ্যাধ্যাত্মিকঃ স্মৃতঃ॥*॥ মৃগপক্ষিমনুষ্যাদ্যৈঃ পিশাচোরগরাক্ষসৈঃ। সরীসৃপাদ্যৈশ্চ নৃণাং জন্যতে চাধিভৌতিকঃ॥ *॥ শীতোষ্ণবাতবর্ষাম্বুবৈদ্যুতাদিসমুদ্ভবঃ। তাপো দ্বিজবরশ্রেষ্ঠ কথ্যতে চাধিদৈবিকঃ॥ গর্ভজন্মজরাজ্ঞানমৃত্যুনারকজং তথা। দুঃখং সহস্রশো ভেদৈর্ভিদ্যতে মুনিসত্তম॥ ইতি বিষ্ণুপুরাণে ৬ অংশে ৫ অধ্যায়ঃ॥ *॥

কৃপা। শিরোমালা। সরলদ্রুঃ। ইতি মেদিনী॥

পীড়িতং (ত্রি) স্ত্রীণাং করণং। যন্ত্রিতং। বাধিতং। ইতি মেদিনী॥ মর্দ্দিতং। ইতি হেমচন্দ্রঃ॥ ইতপ্রত্যয়ান্তঃ পীড়াপর্য্যায়োঽপ্যত্র॥

পীতং (ক্লী) পানং। ইতি মেদিনী॥ হরিতালং। ইতি রাজনির্ঘণ্টঃ॥

পীতঃ (পুং) বর্ণবিশেষঃ। হল্‌দিয়া ইতি ভাষা। তৎপর্য্যায়ঃ। গৌরঃ ২ হরিদ্রাভঃ ৩। ইত্যমরঃ॥ কুসুম্ভঃ। অঙ্কোঠঃ। শাখোটঃ। পুষ্পরাগঃ। ইতি রাজনির্ঘণ্টঃ॥ *॥ পীতবস্তূনি যথা। পীতানি ব্রহ্ম১জীবে২ন্দ্র৩গরুড়ে৪শ্বরদৃ৫গ্‌জটাঃ৬। গৌরী ৭ দ্বাপর ৮ গোমূত্র ৯ মধু১০ বীররসা১১ রজঃ১২॥ হরিদ্রা ১৩ রোচনা ১৪ রীতি১৫ গন্ধকে ১৬ দীপ১৭চম্পকে ১৮। কিঞ্জল্ক ১৯ বল্ককে ২০ শালি ২১ হরিতাল ২২ মনঃশিলাঃ ২৩॥ কর্ণিকারং ২৪ চক্রবাক ২৫ বানরৌ ২৬ শারিকামুখং২৭। কেশবাংশুক ২৮ মণ্ডূক ২৯ সরাগ ৩০ কনকাদয়ঃ ৩১॥ *॥ পীতশ্বেতবাচকানি যথা। পীতশ্বেতৌ গৌর১দ্বিজরাজ২কপর্দ্দ৩শম্ভু৪হরি৫তার্ক্ষ্যাঃ৬। হৈমস্তোমা৭ ষ্টাপদ৮ মহারজত৯চন্দ্র১০কলধৌতাঃ১১॥ অস্যার্থঃ। গৌরঃ শ্বেতপীতয়োঃ। দ্বিজরাজো গরুড়চন্দ্রয়োঃ। কপর্দ্দঃ শম্ভুজটাজূটকপর্দ্দয়োঃ। শম্ভুর্ব্রহ্মত্রিলোচনয়োঃ। হরিঃ পিঙ্গলসিংহয়োঃ। তার্ক্ষ্যো গরুড়ঃ পক্ষে উচ্চৈঃশ্রবাঃ। হৈমস্তোমঃ হেম্নোঽয়ং হৈমঃ পক্ষে হিমস্যায়ং। অষ্টাপদং সুবর্ণশরভয়োঃ। মহারজতং সুবর্ণরূপ্যয়োঃ। চন্দ্রঃ স্বর্ণশশাঙ্কয়োঃ। কলধৌতং হেমরূপ্যয়োঃ। সুশোভিতারকূটশ্রীঃ স্বর্ণস্তোমসমদ্যুতিঃ। দহনোপলসৎকান্তির্গাঙ্গেয়চ্ছবিপেশলঃ॥ অস্যার্থঃ। তারকূটো রূপ্যসমূহঃ পক্ষে আরকূটো রীতিঃ। সুশোভনমর্ণঃ কনকঞ্চ। গোপতিতার্ক্ষ্যকান্তিঃ রবিগরুড়চ্ছবিঃ। পক্ষে গোপতিরিন্দ্রঃ তস্য তার্ক্ষ্যস্তুরঙ্গঃ। বামদেবগিরির্মনোজ্ঞমেরুঃ কৈলাসশ্চ॥ *॥ পীতশ্যামবাচকানি যথা। পীতশ্যামৌ কৃষ্ণাম্বর ১ মধুজিৎ ২ ধ্বান্তজেতারঃ৩ বিদ্যুৎকান্তঃ৪ধ্বান্তদ্বেষি৫হরি৬ স্বর্ণবচ্ছায়াঃ ৭। অস্যার্থঃ। কৃষ্ণাম্বরং বিষ্ণুবস্ত্রে হর্য্যাকাশয়োঃ। মধুজিৎ মধুতুল্যবিষ্ণ্বোঃ। ধ্বান্তজেতা সূর্য্যতমস্তুল্যয়োঃ। বিদ্যুৎকান্তঃ মেঘতড়িৎমনোজ্ঞয়োঃ। ধ্বান্তদ্বেষী সূর্য্যান্ধকারতুল্যয়োঃ। হরিঃ কপিকৃষ্ণয়োঃ। স্বর্ণবচ্ছায়ঃ সুবর্ণসুন্দরসমুদ্রতুল্যশোভয়োঃ। ইতি কবিকল্পলতা॥

পীতং (ত্রি) পীতবর্ণযুক্তং। ইতি মেদিনী॥ কৃতপানং। যথা। হালাহলমপি পীতং বহুশো ভিক্ষাপি ভক্ষিতা ভবতা। অনয়োরবগতরসয়োঃ কিয়দন্তরং বদ যোগিন্॥ ই৲

পীতকং (ক্লী) হরিতালং। ইত্যমরঃ॥ কুঙ্কুমং ইতি জটাধরঃ॥ অগুরু। পদ্মকাষ্ঠং। রীতিঃ। মাক্ষিকং। ইতি রাজনির্ঘণ্টঃ

নন্দীবৃক্ষঃ। পীতশালঃ। ইতি রত্নমালা ॥ শ্যোনাকপ্রভেদঃ। হরিদ্রুঃ। কিংকিরাতবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

পীতকদলী (স্ত্রী) স্বর্ণকদলী। ইতি রাজনির্ঘণ্টঃ ॥

পীতকদ্রুমঃ (পুং) হরিদ্রুবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

পীতকন্দং (ক্লী) গর্জ্জরং। ইতি রাজনির্ঘণ্টঃ ॥

পীতকরবীরকঃ (পুং) পীতবর্ণকরবীরপুষ্পবৃক্ষঃ। তৎপর্য্যায়ঃ। পীতপ্রসবঃ ২ সুগন্ধিকুসুমঃ ৩। অস্য গুণাঃ সামান্যকরবীরগুণতুল্যাঃ। ইতি রাজনির্ঘণ্টঃ ॥

পীতকাবেরং (ক্লী) কুঙ্কুমং। পিত্তলং। ইতি মেদিনী ॥

পীতকাষ্ঠং (ক্লী) পীতচন্দনং। ইতি রাজনির্ঘণ্টঃ ॥

পীতকীলা (স্ত্রী) আবর্ত্তকীলতা। ইতি রাজনির্ঘণ্টঃ ॥

পীতঘোষা (স্ত্রী) পীতপুষ্পঘোষালতা। ইতি রত্নমালা ॥ অস্যাঃ পর্য্যায়ঃ ঘোষকশব্দে দ্রষ্টব্যঃ ॥

পীতচন্দনং (ক্লী) পীতবর্ণচন্দনং। তত্তু দ্রবিড়দেশে প্রসিদ্ধং। কলম্বক ইতি খ্যাতং। তৎপর্য্যায়ঃ। পীতগন্ধং ২ কালেয়ং ৩ পীতকং ৪ মাধবপ্রিয়ং ৫ কালেয়কং ৬ পীতকাষ্ঠং ৭ বর্ব্বরং ৮। ইতি রাজনির্ঘণ্টঃ ॥ কালীয়কং ৯ কালীয়ং ১০ পীতাভং ১১ হরিচন্দনং ১২ হরিপ্রিয়ং ১৩ কালসারং ১৪ কালানুসার্য্যকং ১৫। অস্য গুণঃ। রক্তচন্দনগুণতুল্যগুণত্বং। ব্যঙ্গনাশিত্বঞ্চ। ইতি ভাবপ্রকাশঃ ॥ শীতলত্বং। তিক্তত্বং। কুষ্ঠশ্লেষ্মকণ্ডুবিচর্চ্চিকাদদ্রুক্রিমিনাশিত্বং। কান্তিকরত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

পীতচম্পকঃ (পুং) প্রদীপঃ। ইতি জটাধরঃ ॥ পীতবর্ণচম্পকপুষ্পবৃক্ষশ্চ ॥

পীততণ্ডুলঃ (পুং) কঙ্গুনী। ইতি রাজনির্ঘণ্টঃ ॥

পীততণ্ডুলা (স্ত্রী) ক্ষবিকাবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

পীততুণ্ডঃ (পুং) কারণ্ডবপক্ষী। তৎপর্য্যায়ঃ। চঞ্চুসূচিঃ ২ সুগৃহঃ ৩। ইতি ত্রিকাণ্ডশেষঃ ॥

পীততা (স্ত্রী) হরিদ্রাভতা। পীতত্বং। পীতশব্দাৎ ভাবার্থে তপ্রত্যয়নিষ্পন্না। ইতি ব্যাকরণং ॥

পীততৈলা (স্ত্রী) জ্যোতিষ্মতী লতা। ইতি জটাধরঃ ॥ মহাজ্যোতিষ্মতী। ইতি রাজনির্ঘণ্টঃ ॥

পীতদারু (ক্লী) দেবদারু। ইত্যমরঃ ॥ সরলঃ। ইতি রত্নমালা ॥ হরিদ্রুঃ। ইতি রাজনির্ঘণ্টঃ ॥

পীতদুগ্ধা (স্ত্রী) ধেনুষ্যা। দুগ্ধবন্ধকৈঃ সংস্থিতা গৌঃ। ইতি হেমচন্দ্রঃ ॥ পীতং দুগ্ধং যস্যা যয়া বা ॥

পীতদ্রুঃ (পুং) সরলবৃক্ষঃ। দারুহরিদ্রা। ইত্যমরঃ ॥

পীতনং (ক্লী) কুঙ্কুমং। হরিতালং। পীতদারু। ইত্যমরমেদিন্যৌ ॥

পীতনঃ (পুং) প্লক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥ আম্রাতকঃ। ইতি মেদিনী ॥

পীতনকঃ (পুং) আম্রাতকঃ। ইতি রাজনির্ঘণ্টঃ ॥

পীতপর্ণী (স্ত্রী) শ্বিত্রঘ্নী। বিছিটি। ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥

পীতপাদা (স্ত্রী) শারিকাপক্ষী। ইতি হেমচন্দ্রঃ ॥ পীতচরণযুক্তে ত্রি ॥

পীতপুষ্পং (ক্লী) আহুল্যবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥ হরিদ্রাভকুসুমঞ্চ ॥

পীতপুষ্পঃ (পুং) কর্ণিকারবৃক্ষঃ। ইতি শব্দচন্দ্রিকা ॥ চম্পকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ পীতঝিণ্টী। পিণ্ডীতকভেদঃ। ইতি রত্নমালা ॥

পীতপুষ্পা (স্ত্রী) ইন্দ্রবারুণী। ঝিঞ্ঝরিষ্টাক্ষুপঃ। আঢ়কী। ইতি রাজনির্ঘণ্টঃ ॥

পীতপুষ্পী (স্ত্রী) শঙ্খপুষ্পী। সহদেবী। মহাকোষাতকী। ত্রপুষী। ইতি রাজনির্ঘণ্টঃ ॥

পীতফলঃ (পুং) শাখোটবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ কর্ম্মারবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

পীতফলকঃ (পুং) শাখোটবৃক্ষঃ। ইতি ভাবপ্রকাশঃ ॥

পীতবালুকা (স্ত্রী) হরিদ্রা। ইতি ত্রিকাণ্ডশেষঃ ॥ পীতবর্ণসিকতা চ ॥

পীতভৃঙ্গরাজঃ (পুং) পীতবর্ণভৃঙ্গরাজঃ। পীত কেশুরিয়া ইতি ভাষা। তৎপর্য্যায়ঃ। স্বর্ণভৃঙ্গারঃ ২ হরিপ্রিয়ঃ ৩ দেবপ্রিয়ঃ ৪ বন্দনীয়ঃ ৫ পাবনঃ ৬। অস্য গুণাঃ। তিক্তত্বং। উষ্ণত্বং। চক্ষুষ্যত্বং। কেশরঞ্জনত্বং। কফামশোফনাশিত্বং। তত্র নীলো রসায়নঃ। ইতি রাজনির্ঘণ্টঃ ॥

পীতমণিঃ (পুং) পুষ্পরাগঃ। ইতি রাজনির্ঘণ্টঃ ॥

পীতমাক্ষিকং (ক্লী) মাক্ষিকং। ইতি রাজনির্ঘণ্টঃ ॥

পীতমুদ্গঃ (পুং) মুদ্গবিশেষঃ। সোণা মুগ ইতি ভাষা। তৎপর্য্যায়ঃ। বসুঃ ২ খণ্ডীরঃ ৩ প্রবেলঃ ৪ যশঃ ৫ সারদঃ ৬। ইতি হেমচন্দ্রঃ ॥

পীতমূলকং (ক্লী) গর্জ্জরং। ইতি রাজনির্ঘণ্টঃ ॥

পীতযূথী (স্ত্রী) স্বর্ণযূথী। ইতি রাজনির্ঘণ্টঃ ॥

পীতরক্তং (ক্লী) পুষ্পরাগমণিঃ। ইতি রাজনির্ঘণ্টঃ ॥

পীতরাগং (ক্লী) কিঞ্জল্কং। শিক্থকং ইতি রাজনির্ঘণ্টঃ ॥ পীতবর্ণে পুং। তদ্বতি ত্রি॥

পীতরোহিণী (স্ত্রী) কাশ্মরী। ইতি ভাবপ্রকাশঃ ॥

পীতলঃ (পুং) পীতবর্ণঃ। তদ্‌যুক্তে ত্রি। ইতি হেমচন্দ্রঃ ॥

পীতলকং (ক্লী) পিত্তলং। ইতি রাজনির্ঘণ্টঃ ॥

পীতলোহং (ক্লী) পিত্তলভেদঃ। ইতি হেমচন্দ্রঃ ॥

পীতবাসাঃ [স্] (পুং) শ্রীকৃষ্ণঃ। ইতি হলায়ুধঃ ॥ পীতবস্ত্রযুক্তে ত্রি ॥

পীতবীজা (স্ত্রী) মেথিকা। ইতি রাজনির্ঘণ্টঃ ॥ পীতবর্ণবীজযুক্তে ত্রি ॥

পীতবৃক্ষঃ (পুং) শ্যোনাকপ্রভেদঃ। সরলবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

পীতশালঃ (পুং) অসনবৃক্ষঃ। ইতি শব্দচন্দ্রিকা ॥

পীতসারং (ক্লী) পীতবর্ণচন্দনকাষ্ঠং। হরিচন্দনং। ইতি শব্দচন্দ্রিকা॥

পীতসারঃ (পুং) মলয়জঃ। গোমেদকমণিঃ। ইতি মেদিনী॥ অঙ্কোঠবৃক্ষঃ। ইতি জটাধরঃ॥ তুরুষ্কঃ। বীজকঃ। ইতি রাজনির্ঘণ্টঃ॥

পীতসারকঃ (পুং) নিম্ববৃক্ষঃ। অঙ্কোঠবৃক্ষঃ ইতি রাজনির্ঘণ্টঃ॥

পীতসারি (ক্লী) স্রোতোঽঞ্জনং। ইতি শব্দচন্দ্রিকা॥

পীতসালকঃ (পুং) পীতবর্ণসালবৃক্ষঃ। পেয়াসাল ইতি ভাষা। তৎপর্য্যায়ঃ। সর্জ্জকঃ ২ অসনঃ ৩ বন্ধূকঃ ৪ পুষ্পপ্রিয়কঃ ৫ জীবকঃ ৬। ইত্যমরঃ॥ অস্য পর্য্যায়ান্তরং গুণাশ্চ অসনশব্দে দ্রষ্টব্যাঃ॥

পীতস্ফটিকঃ (পুং) পুষ্পরাগমণিঃ। ইতি রাজনির্ঘণ্টঃ॥

পীতা (স্ত্রী) হরিদ্রা। ইত্যমরঃ॥ দারুহরিদ্রা। মহাজ্যোতিষ্মতী॥ কপিলশিংশপা। প্রিয়ঙ্গুঃ। গোরোচনা। ইতি রাজনির্ঘণ্টঃ॥ অতিবিষা। ইতি শব্দচন্দ্রিকা॥

পীতাঙ্গঃ (পুং) শ্যোনাকপ্রভেদঃ। ইতি রাজনির্ঘণ্টঃ॥

পীতাব্ধিঃ (পুং) অগস্ত্যমুনিঃ। ইতি হেমচন্দ্রঃ॥

পীতাম্বরঃ (পুং) বিষ্ণুঃ। ইত্যমরঃ॥ শৈলূষঃ। ইতি মেদিনী॥ পীতবস্ত্রযুক্তে ত্রি। হরিদ্রাভবসনে ক্লী॥

পীতাশ্মা [ন্] (পুং) পুষ্পরাগমণিঃ। ইতি রাজনির্ঘণ্টঃ॥

পীতিঃ (পুং) ঘোটকঃ। ইত্যমরঃ॥

পীতিঃ (স্ত্রী) পানং। ইতি মেদিনী॥ শুণ্ডা। ইতি শব্দচন্দ্রিকা॥

পীতিকা (স্ত্রী) হরিদ্রা। ইতি রত্নমালা॥ দারুহরিদ্রা। ইতি রাজনির্ঘণ্টঃ॥ স্বর্ণযূথী। ইতি জটাধরঃ॥

পীতী [ন্] (পুং) পীতিঃ। ঘোটকঃ। ইত্যমরটীকায়াং রায়মুকুটঃ॥

পীতুঃ (পুং) সূর্য্যঃ। অগ্নিঃ। ইত্যুণাদিকোষঃ॥ যূথপতিঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥

পীথং (ক্লী) জলং। ইতি হেমচন্দ্রঃ॥ ঘৃতং। ইত্যুণাদিকোষঃ॥ সূর্য্যঃ। অগ্নিঃ। কালঃ। ইতি ত্রিকাণ্ডশেষঃ॥

পীথিঃ (পুং) পীতিঃ। ঘোটকঃ। ইত্যমরটীকায়াং স্বামী॥

পীনঃ (ত্রি) স্থূলঃ। ইত্যমরঃ॥

পীনসঃ (পুং) নাসিকারোগবিশেষঃ। পীনাস ইতি ভাষা। তৎপর্য্যায়ঃ। প্রতিশ্যায়ঃ ২। ইত্যমরঃ॥ অপীনসঃ ৩ প্রতিশ্যাঃ ৪। ইতি ভরতঃ॥ নাসিকাময়ঃ ৫। ইতি শব্দরত্নাবলী॥ তস্য নিদানং যথা। আনহ্যতে যস্য বিশুষ্যতে চ প্রক্লিদ্যতে ধূপ্যতি চৈব নাসা। ন বেত্তি যো গন্ধরসাংশ্চ জন্তুর্জুষ্টং ব্যবস্যেৎ খলু পীনসেন॥ তঞ্চানিলশ্লেষ্মভবং বিকারং ব্রুয়াৎ প্রতিশ্যায়সমানলিঙ্গং। ইতি মাধবকরঃ॥ *॥ আমপীনসলক্ষণং যথা। শিরোগুরুত্বমরুচির্নাসাস্রাবস্তনুস্বরঃ। ক্ষামঃ ষ্ঠীবতি চাভীক্ষ্ণমামপীনসলক্ষণং॥ *॥ পক্কপীনস-

লক্ষণং যথা। আমলিঙ্গান্বিতঃ শ্লেষ্মা ঘনঃ খেষু নিমজ্জতি। স্বরবর্ণবিশুদ্ধিশ্চ পক্ক-পীনসলক্ষণং ॥ * ॥ তস্যৌষধানি যথা। সর্ব্বেষু সর্ব্বকালং পীনসরোগেষু জাত-মাত্রেষু। মরিচং গুড়েন দধ্না ভুঞ্জীত নরঃ সুখং লভতে ॥ ১ ॥ কট্‌ফলং পৌষ্করং শৃঙ্গী ব্যোষং যাসশ্চ কারবী। এষাং চূর্ণং কষায়ং বা দদ্যাদার্দ্রকজৈ রসৈঃ ॥ পীনসে স্বরভেদে চ নাসাস্রাবে হলীমকে। সন্নিপাতে কফে বাতে কাসে শ্বাসে চ শস্যতে ॥ ২ ॥ ব্যোষচিত্রক-তালীশতিন্তিড়ীকাম্লবেতসং। সচব্যাজাজি-তুল্যাংশমেলাত্বক্‌পত্রপাদিকং ॥ ব্যোষা-দিকমিদং চূর্ণং পুরাণগুড়মিশ্রিতং। পীনসশ্বাসকাসঘ্নং রুচিস্বরকরং পরং ॥৩॥ ইতি ভাবপ্রকাশঃ ॥ * ॥ পিপ্পলীত্রিফলা-চূর্ণং মধুসৈন্ধবসংযুতং। সর্ব্বরোগজ্বর-শ্বাসশোষপীনসহৃৎস্তবেৎ ॥ ইতি গারুড়ে ১৮৯ অধ্যায়ঃ ॥

পীনসা (স্ত্রী) কর্কটী। ইতি রাজনির্ঘণ্টঃ ॥

পীনসী [ন্] (ত্রি) পীনসরোগী। পীনস-শব্দাদস্ত্যর্থে ইন্‌প্রত্যয়নিষ্পন্নঃ ॥

পীনোধ্নী (স্ত্রী) পীবরস্তনী গৌঃ। ইত্যমরঃ ॥

পীপরিঃ (পুং) হ্রস্বপ্লক্ষঃ। ইতি রাজ-নির্ঘণ্টঃ ॥

পীয প্রীণনে। ইতি কবিকল্পদ্রুমঃ ॥ পীযূষং সৌত্রধাতুরয়ং। ইতি দুর্গাদাসঃ ॥

পীয়ুঃ (পুং) কালঃ। রবিঃ। ঘূকঃ। ইতি মেদিনী ॥ কাকঃ। ইতি সংক্ষিপ্তসারো-ণাদিবৃত্তিঃ ॥

পীযূষং (ক্লী) অমৃতং। ইত্যমরঃ ॥ দুগ্ধং। ইতি রাজনির্ঘণ্টঃ ॥

পীযূষঃ (পুং ক্লী) অভিনবং পয়ঃ। নবপ্রসূতায়া গোঃ সপ্তদিনাভ্যন্তরীণদুগ্ধং। ইত্যমর-ভরতৌ ॥ অথ পীযূষপেযূষে নবং সপ্ত-দিনাবধি। ইতি শব্দার্ণবঃ ॥ আসপ্তরাত্র-প্রভবং ক্ষীরং পেয়ূষ উচ্যতে। ইতি হারাবলী ॥

পীযূষমহাঃ [স্] (পুং) চন্দ্রঃ। ইতি শব্দ-রত্নাবলী ॥

পীযূষরুচিঃ (পুং) চন্দ্রঃ। ইতি হলায়ুধঃ ॥ অমৃতপ্রিয়শ্চ ॥

পীল রোধে। ইতি কবিকল্পদ্রুমঃ ॥ দীর্ঘী। রোধঃ ক্রিয়ানিরোধঃ জড়ীভাবঃ ইত্যর্থঃ। পীলতি পশুঃ। ইতি দুর্গাদাসঃ ॥

পীলকঃ (পুং) পিপীলিকা। ইতি হেমচন্দ্রঃ ॥

পীলুঃ (পুং) প্রসূনং। পরমাণুঃ। মতঙ্গজঃ। অস্থিখণ্ডং। তালকাণ্ডঃ। ইতি মেদিনী ॥ বাণঃ। কৃমিঃ। ইতি ধরণিঃ ॥ কোঙ্কণাদি-দেশে প্রসিদ্ধঃ ফলবৃক্ষবিশেষঃ। পীল ইতি ভাষা। তৎপর্য্যায়ঃ। গুড়ফলঃ ২ স্রংসী ৩। ইত্যমরঃ ॥ শীতসহঃ ৪ ধানী ৫ বিরেচনঃ ৬ ফলশাখী ৭ শ্যামঃ ৮ করভ-বল্লভঃ ৯। অস্য ফলগুণাঃ। শ্লেষ্মবায়ু-গুল্মনাশিত্বং। পিত্তদত্বং। ভেদকত্বং। যৎ স্বাদু তিক্তং তৎ নাত্যুষ্ণং ত্রিদোষ-হরত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

পীলুনী (স্ত্রী) মূর্ব্বা। ইতি রত্নমালা ॥

পীলুপত্রঃ (পুং) মোরটালতা। ইতি রাজ-নির্ঘণ্টঃ ॥

পীলুপর্ণী (স্ত্রী) মূর্ব্বা। বিম্বিকা। ওষধিভেদঃ। ইতি মেদিনী॥

পীব স্থৌল্যে। ইতি কবিকল্পদ্রুমঃ॥ পীবতি লোকঃ স্থূলঃ স্যাদিত্যর্থঃ। ইতি দুর্গাদাসঃ॥

পীব [ন্] (ত্রি) স্থূলং। ইত্যমরঃ॥

পীবরঃ (ত্রি) উপচিতাবয়বঃ। মোটা ইতি ভাষা। তৎপর্য্যায়ঃ। পীনঃ ২ পীবা ৩ স্থূলঃ ৪। ইত্যমরঃ॥

পীবরস্তনী (স্ত্রী) পীনোধ্নী। ইত্যমরঃ॥ স্থূলস্তনযুক্তা নারী চ॥

পীবা [ন্] (পুং) বলবান্। বায়ুঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥ স্থূলঃ। ইত্যমরঃ॥

পীবা (স্ত্রী) উদকং। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥

পীবরা (স্ত্রী) অশ্বগন্ধা। শতাবরী। ইতি রাজনির্ঘণ্টঃ॥ স্থূলা চ॥

পীবরী (স্ত্রী) শতমূলী। ইতি রত্নমালা॥ শালপর্ণী। ইতি ভাবপ্রকাশঃ॥ তরুণী। গৌঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥

পুংলিঙ্গং (ক্লী) পুংচিহ্নং। শিশ্নঃ। শব্দবাচকতায়াং পুং। ইতি জুমরঃ॥

পুংবৃষঃ (পুং) গন্ধমূষিকঃ। ছুঁচা ইতি ভাষা। ইতি শব্দমালা॥ পুংগবশ্চ॥

পুংশ্চলঃ (পুং) ব্যভিচারী। যথা। ললাটোপস্থতাস্তিস্রো রেখাঃ স্যুঃ শতবর্ষিণাং। নৃপত্বং স্যাচ্চতস্যভিরায়ুঃ পঞ্চনবত্যথ॥ অরেখেণায়ুর্নবতির্বিচ্ছিন্নাভিশ্চ পুংশ্চলাঃ। ইতি গারুড়ে ৬৬ অধ্যায়ঃ॥

পুংশ্চলী (স্ত্রী) অসতী। ইত্যমরঃ॥ অস্যা অমরোক্তপর্য্যায়াঃ কুলটাশব্দে লিখিতাঃ। তদতিরিক্তপর্য্যায়া যথা। ধৃষ্টা ১ দুষ্টা ২ ধর্ষিতা ৩। ইতি শব্দরত্নাবলী॥ লঙ্কা ৪ নিশাচরী ৫ ত্রপারণ্ডা ৬। ইতি জটাধরঃ॥ তস্যাশ্চরিত্রদোষাদি যথা। অহো কো বেদ ভুবনে দুর্জ্ঞেয়ং পুংশ্চলীমনঃ। পুংশ্চল্যাং যো হি বিশ্বস্তো বিধিনা স বিড়ম্বিতঃ। বহিষ্কৃতশ্চ যশসা ধর্ম্মেণ স্বকুলেন চ॥ বাঞ্ছিতং নূতনং প্রাপ্য বিনশ্যতি পুরাতনং। সদা স্বকর্ম্মসাধ্যা সা কো বা তস্যাঃ প্রিয়োঽপ্রিয়ঃ॥ দৈবে কর্ম্মণি পৈত্রে চ পুত্রে বন্ধৌ ন ভর্ত্তরি। দারুণং পুংশ্চলীচিত্তং সদা শৃঙ্গারকর্ম্মণি॥ প্রাণাধিকং রতিজ্ঞং সাম্বতদৃষ্ট্যা হি পুংশ্চলী। রত্নপ্রদং রত্যবিজ্ঞং বিষদৃষ্ট্যা হি পশ্যতি॥ সর্ব্বেষাং স্থলমস্ত্যেব পুংশ্চলীনাং ন কুত্রচিৎ। দারুণা পুংশ্চলীজাতির্নরজাতিভ্য এব চ॥ নিষ্কৃতিঃ কর্ম্মভোগান্তে সর্ব্বেষামস্তি নিশ্চিতং। ন পুংশ্চলীনাং বিপ্রেন্দ্র যাবচ্চন্দ্রদিবাকরৌ॥ অন্যাসাং কামিনীনাঞ্চ কীটং হস্তঞ্চ যা দয়া। সা নাস্তি পুংশ্চলীনাস্তু কান্তং হন্তুং পুরাতনং॥ রতিজ্ঞং নূতনং প্রাপ্য বিষতুল্যং পুরাতনং। কান্তং দৃষ্ট্বা হিনস্ত্যেব সোপায়েনাবলীলয়া॥ * ॥ পৃথিব্যাং যানি পাপানি পুংশ্চলীষ্বেব ভারতে। তিষ্ঠন্তি তাভ্যো ন পরাঃ পাপিষ্ঠাঃ সন্তি কেচন॥*॥ পুংশ্চলীপরিপকান্নং সর্ব্বপাতকমিশ্রিতং। দৈবে কর্ম্মণি পৈত্রে চ দেয়ং ন চ যথা

জলং ॥ অন্নং বিষ্ঠা পয়ো মূত্রং পুংশ্চলীনাঞ্চ নিশ্চিতং। দত্ত্বা পিতৃভ্যো দেবেভ্যো ভুক্ত্বা চ নরকং ব্রজেৎ ॥ শতবর্ষং কালসূত্রে পচত্যেব সুদারুণে। ঘোরান্ধকারে কৃময়স্তং দশন্তি দিবানিশং ॥ পুংশ্চল্যন্নঞ্চ যো ভুঙ্‌ক্তে দৈবাদযদি নরাধমঃ। সপ্তজন্মকৃতং পুণ্যং তস্য নশ্যতি নিশ্চিতং ॥ আয়ুঃশ্রীযশসাং হানিরিহ লোকে পরত্র চ। তস্মাদযত্নাদ্রক্ষণীয়ং পাকপাত্রং কলত্রকং ॥ * ॥ পুংশ্চলীদর্শনে পুণ্যং যাত্রাসিদ্ধির্ভবেদ্ধ্রুবং। স্পর্শনে চ মহাপাপং তীর্থস্নানাদ্বিশুধ্যতি ॥ স্নানং দানং ব্রতঞ্চৈব জপশ্চ দেবপূজনং। নিষ্ফলং পুংশ্চলীনাঞ্চ ভারতে জীবনং বৃথা ॥ * ॥ উপস্থিতসকামপুংশ্চলীত্যাগে দোষো যথা। রহস্যুপস্থিতাং কামাৎ পুংশ্চলীঞ্চেজ্জিতেন্দ্রিয়ঃ। পরিত্যজেদ্ধর্ম্মভয়াদধর্ম্মান্নরকং ব্রজেৎ ॥ * ॥ সর্ব্বদৈব তস্যাস্তপস্বিত্যাজ্যত্বং গর্হিতত্বঞ্চ যথা। উপস্থিতা চ যা যোষিদত্যাজ্যা রাগিণামপি। শ্রুতৌ শ্রুতমিতি ত্যাজ্যা সর্ব্বদৈব তপস্বিনাং ॥ অহো সর্ব্বৈঃ পরিত্যাজ্যা পুংশ্চলী চ বিশেষতঃ। ধনায়ুঃপ্রাণযশসাং নাশিনী দুঃখদায়িনী ॥ স্বকার্য্যতৎপরা শশ্বৎ পরকার্য্যবিঘাতিনী। নিষ্ঠুরা নরঘাতিভ্যঃ সর্ব্বাপদ্বীজরূপিণী ॥ বিদ্যুদ্দীপ্তির্জলে রেখা লোভান্মৈত্রী যথা ভবেৎ। পরদ্রোহাদযথা সম্পৎ কুলটাপ্রেমতৎপরং ॥ সর্ব্বেভ্যো হিংস্রজন্তুভ্যো বিপদ্বীজা সদৈব সা। যো বিশ্বসেত্তাং সংমূঢ়ো বিপত্তস্য পদে পদে ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ২৩।২৪।৩২ অধ্যায়ঃ ॥

পুংশ্চিহ্নং (ক্লী) শিশ্নঃ। ইতি হেমচন্দ্রঃ ॥

পুংস ক মর্দ্দে। ইতি কবিকল্পদ্রুমঃ ॥ ওষ্ঠ্যবর্গশেষোপধঃ। সংযোগাদনুস্বারঃ। তেন ক্বিপি পুংসোঽস্ত্রাবিত্যস্তি পুমান্। মর্দ্দোঽভিমর্দ্দনং। ক পুংসয়তি খলং রাজা। ইতি দুর্গাদাসঃ ॥

পুংসবনং (ক্লী) দুগ্ধং। ইতি হেমচন্দ্রঃ ॥ সংস্কারবিশেষঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ অস্যেতিকর্ত্তব্যতা যথা। গর্ভস্য তৃতীয়মাসোপক্রমে যচ্ছুদ্ধদিনং তস্মিন্ পতিঃ কৃতনিত্যক্রিয়ঃ কৃতবৃদ্ধিশ্রাদ্ধঃ চন্দ্রনামানমগ্নিং সংস্থাপ্য বিরূপাক্ষজপান্তাং কুশণ্ডিকাং সমাপ্য কৃতস্নানাং বধূমগ্নেঃ পশ্চিমায়াং দিশি স্বদক্ষিণতঃ কুশেষু প্রাঙ্মুখীমুপবেশ্য প্রকৃতকর্ম্মারম্ভে প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ হুত্বা মহাব্যাহৃতিহোমং কুর্য্যাৎ। যথা। প্রজাপতির্ঋষির্গায়ত্রী ছন্দোঽগ্নির্দেবতা মহাব্যাহৃতিহোমে বিনিয়োগঃ ওঁ ভূঃ স্বাহা। প্রজাপতির্ঋষিরুষ্ণিক্ ছন্দো বায়ুর্দেবতা মহাব্যাহৃতিহোমে বিনিয়োগঃ ওঁ ভুবঃ স্বাহা। প্রজাপতির্ঋষিরনুষ্টুপ্ ছন্দঃ সূর্য্যো দেবতা মহাব্যাহৃতিহোমে বিনিয়োগঃ ওঁ স্বঃ স্বাহা। ততঃ পতিরুত্থায় বধূপৃষ্ঠদেশে স্থিতো বধূদক্ষিণস্কন্ধং স্পৃষ্ট্বা অবতীর্ণেন দক্ষিণহস্তেন অব্যবহিতং বধূনাভিদেশং স্পৃশন্ জপতি। প্রজাপতির্ঋষিরনুষ্টুপ্ ছন্দো মিত্রাবরুণাগ্নিবায়বো দেবতাঃ

পুংসবনে বিনিয়োগঃ। ওঁ পুমাংসৌ মিত্রাবরুণৌ পুমাংসাবশ্বিনাবুভৌ। পুমানগ্নিশ্চ বায়ুশ্চ পুমান্ গর্ভ্রস্তবোদরে ॥ ইত্যেকং পুংসবনং ॥ * ॥ অপরপুংসবনকর্ম্মার্থঞ্চ বটবৃক্ষস্য পূর্ব্বোত্তরশাখায়াং ফলযুগলশালিনীং কৃমিভিরনুপহতাং বটশুঙ্গাং যবানাং মাষাণাং বা ত্রিভিস্ত্রিভির্গুড়কৈঃ সপ্ত বারান্ সপ্তভির্মন্ত্রৈঃ ক্রীণীয়াৎ। সপ্তানাং মন্ত্রাণামৃষ্যাদয়ঃ সাধারণাঃ। প্রজাপতির্ঋষিঃ সোমবরুণবসুরুদ্রাদিত্যমরুদ্‌বিশ্বেদেবা দেবতা ন্যগ্রোধশুঙ্গাপরিক্রয়ণে বিনিয়োগঃ ওঁ যদ্যসি সৌমী সোমায়ত্বা রাজ্ঞে পরিক্রীণামি। ইতি গুড়কত্রয়েণ একং ক্রয়ণং ॥ ১ ॥ ওঁ যদ্যসি বারুণী বরুণায়ত্বা রাজ্ঞে পরিক্রীণামি। ইতি গুড়কত্রয়েণ দ্বিতীয়ং ক্রয়ণং ॥ ২ ॥ ওঁ যদ্যসি বসুভ্যো বসুভ্যস্ত্বা পরিক্রীণামি। ইতি গুড়কত্রয়েণ তৃতীয়ং ক্রয়ণং ॥ ৩ ॥ ওঁ যদ্যসি রুদ্রেভ্যো রুদ্রেভ্যস্ত্বা পরিক্রীণামি। ইতি গুড়কত্রয়েণ চতুর্থং ক্রয়ণং ॥৪॥ ওঁ যদ্যসি আদিত্যেভ্য আদিত্যেভ্যস্ত্বা পরিক্রীণামি। ইতি গুড়কত্রয়েণ পঞ্চমং ক্রয়ণং ॥৫॥ ওঁ যদ্যসি মরুদ্ভ্যো মরুদ্ভ্যস্ত্বা পরিক্রীণামি। ইতি গুড়কত্রয়েণ ষষ্ঠং ক্রয়ণং ॥ ৬ ॥ ওঁ যদ্যসি বিশ্বেভ্যো দেবেভ্যো বিশ্বেভ্যো দেবেভ্যস্ত্বা পরিক্রীণামি। ইতি গুড়কত্রয়েণ সপ্তমং ক্রয়ণং ॥ ৭ ॥ ততঃ ক্রীতাং বটশুঙ্গাং অনেন মন্ত্রেণ বৃক্ষাদাহরেৎ। প্রজাপতির্ঋষিরোষধ্যো দেবতা ন্যগ্রোধশুঙ্গাচ্ছেদনে বিনিয়োগঃ। ওঁ ওষধয়ঃ সুমনসো ভূত্বা অস্যাং বীর্য্যং সমাধত্ত ইয়ং কর্ম্ম করিষ্যতি। ততস্তাং তৃণবেষ্টিতামন্তরীক্ষেণানীয় অন্তরীক্ষে স্থাপয়েৎ। ততঃ কৃতশোভননাম্নোঽগ্নেরুত্তরতঃ প্রক্ষালিতশিলায়াং ব্রহ্মচারী গর্ভ্রবতী বা শ্রুতস্বাধ্যায়হীনো বা ব্রাহ্মণঃ প্রাঙ্মুখ আচারতো নীহারজলেন অনাবৃত্তলোষ্টেন পুনঃ পুনঃ পেষয়েৎ। ততোঽগ্নেঃ পশ্চিমত উত্তরাগ্রেষু কুশেষু পশ্চিমাভিমুখীং বধূং পূর্ব্বদিগানতমস্তকাং কৃত্বা তৎপৃষ্ঠদেশে স্থিতঃ পতির্দক্ষিণপাণেরঙ্গুষ্ঠানামিকাভ্যাং বস্ত্রবদ্ধাং পেষিতবটশুঙ্গাং গৃহীত্বা গর্ভ্রবত্যা দক্ষিণনাসাবিবরে শুঙ্গারসং নিঃক্ষিপতি। প্রজাপতির্ঋষিরনুষ্টুপ্ ছন্দোঽগ্নীন্দ্রবৃহস্পতয়ো দেবতা ন্যগ্রোধশুঙ্গারসস্য দানে বিনিয়োগঃ। ওঁ পুমানগ্নিঃ পুমানিন্দ্রঃ পুমান্ দেবো বৃহস্পতিঃ। পুমাংসং পুত্রং বিন্দস্ব তং পুমাননুজায়তাং ॥ ততো মহাব্যাহৃতিহোমং কৃত্বা তূষ্ণীং প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধমগ্নৌ হুত্বা প্রকৃতং কর্ম্ম সমাপ্য উদীচ্যং শাট্যায়নহোমাদিবামদেব্যগানান্তং কর্ম্ম কৃত্বা কর্ম্মকারয়িতৃব্রাহ্মণায় দক্ষিণাং দদ্যাদিতি পুংসবনং। ইতি দশকর্ম্মপদ্ধতৌ ভবদেবভট্টঃ ॥ * ॥ অথ পুংসবনোক্তবারাঃ। রবিমঙ্গলবৃহস্পতয়ঃ। নক্ষত্রাণি। পূর্ব্বাষাঢ়োত্তরাষাঢ়াপূর্ব্বভাদ্রপদুত্তরভাদ্রপদপুষ্যপুনর্ব্বসুমূলার্দ্রারেবতীহস্তাশ্রবণামৃগশিরসঃ। তিথয়ঃ। নন্দা ভদ্রাঃ। লগ্নানি। কুম্ভ-

সিংহধনুর্মীনমিথুনানি । স্ত্রিয়াশ্চন্দ্রাদিশুদ্ধৌ দশযোগভঙ্গবিষ্টিভদ্রাত্র্যহস্পর্শাদীন্ পরিত্যজ্য গর্ত্তধারণদিনাবধিতৃতীয়মাসে কর্ত্তব্যং । ইতি জ্যোতিষং ॥ স্ত্রীকর্ত্তব্যব্রতবিশেষঃ । যথা । শ্রীরাজোবাচ । ব্রতং পুংসবনং ব্রহ্মন্ ভবতা যদুদীরিতং । তস্য বেদিতুমিচ্ছামি যেন বিষ্ণুঃ প্রসীদতি ॥ শ্রীশুক উবাচ । শুক্লে মার্গশিরে পক্ষে যোষিদ্ভর্ত্তুরনুজ্ঞয়া । আরভেত ব্রতমিদং সর্ব্বকামিকমাদিতঃ ॥ নিশম্য মরুতাং জন্ম ব্রাহ্মণানমুমন্ত্র্য চ । স্নাত্বা শুক্লদতী শুক্লে বসীতালঙ্কৃতাম্বরে । পূজয়েৎ প্রাতরাশাৎ প্রাক্ ভগবন্তং শ্রিয়া সহ ॥ অলং তে নিরপেক্ষায় পূর্ণকাম নমোঽস্তু তে । মহাবিভূতিপতয়ে নমঃ সকলসিদ্ধয়ে ॥ যথা ত্বং কৃপয়া ধৃত্যা তেজসা মহিমৌজসা । জুষ্ট ঈশগুণৈঃ সর্ব্বৈস্ততোঽসি ভগবান্ প্রভুঃ ॥ বিষ্ণুপত্নি মহামায়ে মহাপুরুষলক্ষণে । প্রীয়েথা মে মহাভাগে লোকমাতর্নমোঽস্তু তে ॥ ওম্ নমো ভগবতে মহাপুরুষায় মহানুভাবায় মহাবিভূতিপতয়ে সহ মহাবিভূতিভির্ব্বলিমুপহরামীতি । অনেনাহরহর্ম্মন্ত্রেণ বিষ্ণোঃ আবাহনার্ঘ্যপাদ্যোপস্পর্শনস্নানবাসোপবীতভূষণগন্ধপুষ্পধূপদীপোপহারাদ্যুপচারান্ সুসমাহিতোপাহরেৎ । হবিঃশেষঞ্চ জুহুয়াদনলে দ্বাদশাহুতীঃ । ওম্ নমো ভগবতে মহাপুরুষায় মহাবিভূতিপতয়ে স্বাহেতি । শ্রিয়ং বিষ্ণুঞ্চ বরদাবাশিষাং প্রভবাবুভৌ । ভক্ত্যা সংপূজয়েন্নিত্যং যদীচ্ছেৎ সর্ব্বসম্পদঃ ॥ প্রণমেদ্দণ্ডবদ্ভূমৌ ভক্তিপ্রহ্বেণ চেতসা । দশবারং জপেন্মন্ত্রং ততঃ স্তোত্রমুদীরয়েৎ ॥ যুবাস্তু বিশ্বস্য বিভূ জগতঃ কারণং পরং । ইয়ং হি প্রকৃতিঃ সূক্ষ্মা মায়াশক্তির্দুরত্যয়া । তস্যা অধীশ্বরঃ সাক্ষাৎ ত্বমেব পুরুষঃ পরঃ ॥ ত্বং সর্ব্বযজ্ঞ ইজ্যেয়ং ক্রিয়েয়ং ফলভুগ্‌ভবান্ । গুণব্যক্তিরিয়ং দেবী ব্যঞ্জকো গুণভুগ্‌ভবান্ ॥ ত্বং হি সর্ব্বশরীর্য্যাত্মা শ্রীঃ শরীরেন্দ্রিয়াসবঃ । নামরূপে ভগবতী প্রত্যয়স্ত্বমপাশ্রয়ঃ ॥ যথা যুবাং ত্রিলোকস্য বরদৌ পরমেষ্ঠিনৌ । তথা ম উত্তমশ্লোক সন্তু সত্যা মহাশিষঃ ॥ ইত্যভিষ্টূয় বরদং শ্রীনিবাসং শ্রিয়া সহ । তন্নিসার্য্যোপহরণং দত্ত্বাচমনমর্চ্চয়েৎ ॥ ততঃ স্তুবীত স্তোত্রেণ ভক্তিপ্রহ্বেণ চেতসা । যজ্ঞোচ্ছিষ্টমবঘ্রায় পুনরভ্যর্চ্চয়েদ্ধরিং ॥ পতিঞ্চ পরয়া ভক্ত্যা মহাপুরুষচেতসা । প্রিয়ৈস্তৈস্তৈরুপনমেৎ প্রেমশীলঃ স্বয়ং পতিঃ ॥ বিভৃয়াৎ সর্ব্বকর্ম্মাণি পত্ন্যা উচ্চাবচানি চ । কৃতমেকতরেণাপি দম্পত্যোরুভয়োরপি ॥ পত্ন্যাং কুর্য্যাদনর্হায়াং পতিরেতৎ সমাহিতঃ । বিষ্ণোর্ব্রতমিদং বিভ্রন্ন বিহন্যাৎ কথঞ্চন ॥ বিপ্রান্ স্ত্রিয়ো বীরবতীঃ স্রগ্‌গন্ধবলিমণ্ডনৈঃ । অর্চ্চেদহরহর্ভক্ত্যা দেবং নিয়মমাস্থিতা ॥ উদ্বাস্য দেবং স্বে ধাম্নি তন্নিবেদিতমগ্রতঃ । অদ্যাদাত্মবিশুদ্ধ্যর্থং সর্ব্বকামসমৃদ্ধয়ে ॥ এতেন পূজাবিধিনা মাসান্ দ্বাদশহায়নং ।

নীত্বাথোপরমেৎ সাধ্বী কার্ত্তিকে চরমেঽহনি॥ শ্বোভূতেঽপ উপস্পৃশ্য কৃষ্ণমর্ভ্যর্চ্চ্য পূর্ব্ববৎ। পয়ঃশৃতেন জুহুয়াচ্চরুণা সহ সর্পিষা। প্বাকযজ্ঞবিধানেন দ্বাদশৈবাহুতীঃ পতিঃ॥ আশিষঃ শিরসাদায় দ্বিজৈঃ প্রীতৈঃ সমীরিতাঃ। প্রণম্য শিরসা ভক্ত্যা ভুঞ্জীত তদনুজ্ঞয়া॥ আচার্য্যমগ্রতঃ কৃত্বা বাগ্‌যতঃ সহ বন্ধুভিঃ। দদ্যাৎ পত্ন্যৈ চরোঃ শেষং সুপ্রজস্ত্বং সুসৌভগং॥ এতচ্চরিত্বা বিধিবদ্‌ব্রতং বিভোরভীপ্সিতার্থং লভতে পুমানিহ। স্ত্রী চৈতদাস্থায় লভেত সৌভগং শ্রিয়ং প্রজাং জীবপতিং যশো গৃহং॥ কন্যা চ বিন্দেত সমগ্রলক্ষণং পতিং ত্ববীরা হতকিল্বিষাঙ্গতিং। মৃতপ্রজা জীবসুতা ধনেশ্বরী সুদুর্ভগা সুভগা রূপমগ্রিয়ং॥ বিন্দেদ্‌বিরূপা বিরুজা বিমুচ্যতে য আময়াবীন্দ্রিয়কল্যদেহং। এতৎ পঠন্নভ্যুদয়ে চ কর্ম্মণ্যনন্ততৃপ্তিঃ পিতৃদেবতানাং॥ তুষ্টাঃ প্রযচ্ছন্তি সমস্তকামান্ হোমাবসানে হুতভুক্ শ্রীর্হরিশ্চ। রাজন্মহন্মরুতাং জন্মপুণ্যং দিতেব্র্রতঞ্চাভিহিতং মহত্তে॥ ইতি শ্রীভাগবতে ৬ স্কন্ধে পুংসবনব্রতকথনং ১৯ অধ্যায়ঃ॥

পুংস্কোকিলঃ (পুং) পুরুষপিকপক্ষী। পুম্‌স্‌শব্দেন কোকিলশব্দস্য কর্ম্মধারয়সমাসে তস্যান্তলোপে পুংসঃ সম্মিতি মস্য সনি কৃতে মস্যানুস্বারে নিষ্পন্নঃ। ইতি মুগ্ধবোধব্যাকরণং॥ [স্বক্ষ॥

পুংস্ত্বং (ক্লী) শুক্রং। ইতি হেমচন্দ্রঃ॥ পুরুষ-

পুংস্ত্ববিগ্রহঃ (পুং) ভূতৃণং। ইতি রাজনির্ঘণ্টঃ॥

পুক্কশঃ (পুং) চণ্ডালঃ। ইত্যমরঃ॥

পুক্কষঃ (পুং) চণ্ডালঃ। ইত্যমরটীকায়াং ভরতঃ॥

পুক্কসঃ (পুং) চণ্ডালঃ। অধমে ত্রি। ইতি মেদিনীশব্দরত্নাবল্যৌ॥

পুক্কসী (স্ত্রী) কালিকা। নীলী। ইতি মেদিনাশব্দরত্নাবল্যৌ॥

পুঙ্খঃ (পুং) কাণ্ডমূলং। পুঙ্কল ইতি খ্যাতং। ইত্যমরঃ॥

পুঙ্গঃ (পুং ক্লী) সমূহঃ। ইতি শব্দচন্দ্রিকা॥

পুঙ্গলঃ (পুং) আত্মা। ইতি ভূরিপ্রয়োগঃ॥

পুঙ্গবঃ (পুং) বৃষঃ। ঔষধভেদঃ। উত্তরপদস্থঃ শ্রেষ্ঠবাচকঃ। ইতি মেদিনী॥ ঋষভৌষধং। মহোক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

পুচ্ছ প্রসাদে। ইত্যমরটীকায়াং রায়মুকুটধৃতধাতুঃ॥

(পুং ক্লী) লাঙ্গূলং। ইত্যমরঃ॥ পশ্চাদ্ভাগে পুং। ইতি মেদিনী॥ লোমবল্লাঙ্গুলে কলাপে চ ক্লী। ইত্যুণাদিকোষঃ॥

পুচ্ছটি (ক্লী) অঙ্গুলিমোটনং। আঙ্গুলমট্‌কান ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ॥

পুচ্ছদা (স্ত্রী) লক্ষ্মণাকন্দঃ। ইতি রাজনির্ঘণ্টঃ॥

পুচ্ছী [ন্] (পুং) অর্কবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ কুক্কুটঃ। ইতি শব্দচন্দ্রিকা॥ লাঙ্গুলযুক্তে ত্রি॥

পুঞ্জঃ (পুং০) সমূহঃ। রাশিঃ। ইত্যমরঃ ॥

পুট ক চূর্ণে। ভাসি। ইতি কবিকল্পদ্রুমঃ॥ ক পোটয়তি। ভাসি দীপ্তৌ। ইতি দুর্গাদাসঃ॥

পুট ৎ ক সংসর্গে। ইতি কবিকল্পদ্রুমঃ॥ পুটয়তি পুষ্পং সূত্রেণ জনঃ সংসৃজতীত্যর্থঃ। ইতি দুর্গাদাসঃ॥

পুট শি শ্লেষে। ইতি কবিকল্পদ্রুমঃ॥ শি পুটতি অপুটীৎ পুপোট। শ্লেষঃ সম্বন্ধীভাবঃ। ইতি দুর্গাদাসঃ॥

ং (ক্লী) জাতীফলং। ইতি রাজনির্ঘণ্টঃ॥ উপর্য্যধোভাবাপন্নসংযুক্তমৃদাদিকপালদ্বয়রূপৌষধপাকপাত্রং। ধাত্বাদিমারণোপযুক্তান্ পুটপ্রকারানাহ রসপ্রদীপে। লোহাদেরপুনর্ভাবস্তদ্‌গুণত্বং গুণাঢ্যতা। সলিলে তরণঞ্চাপি তৎসিদ্ধিঃ পুটনাদ্ভবেৎ॥ গম্ভীরে বিস্তৃতে কুণ্ডে দ্বিহস্তে চতুরস্রকে। বনোপলসহস্রেণ পূরিতে পুটনৌষধং॥ কোষ্ঠে রুদ্ধং প্রযত্নেন গোবিষ্ঠোপরি ধারয়েৎ। বনোপলসহস্রার্দ্ধং কোষ্ঠিকোপরি নিঃক্ষিপেৎ॥ বহ্নিং বিনিঃক্ষিপেত্তত্র মহাপুটমিতি স্মৃতং॥ ১॥ কোষ্ঠং মূষা। গোবিষ্ঠা গোইঠা। মহাপুটঃ॥ সপাদহস্তমানেন কুণ্ডে নিম্নে তথায়তে। বনোপলসহস্রেণ পূর্ণমধ্যে বিধারয়েৎ॥ পুটনদ্রব্যসংযুক্তাং কোষ্ঠিকাং মুদ্রিতাং মুখে। অর্দ্ধোহর্দ্ধানি করণ্ডানি অর্দ্ধান্যুপরি নিঃক্ষিপেৎ॥ এতদ্গজপুটং প্রোক্তং খ্যাতং সর্ব্বপুটোত্তমং॥ হস্তশ্চতুর্ব্বিংশত্যঙ্গুলপ্রমাণঃ স সপাদঃ তেন ত্রিংশদঙ্গুলপ্রমাণেনেত্যর্থঃ। অতএবোক্তং। সাধারণো নরাঙ্গুল্যা ত্রিংশদঙ্গুলকো গজঃ। ইতি গজপুটং। ২। অরত্নিমাত্রকে কুণ্ডে পুটং বারাহমুচ্যতে। ৩। বিতস্তিমাত্রকে খাতে কথিতং কৌক্কুটং পুটং॥৪॥ অরত্নিস্তু নিষ্কনিষ্ঠেন মুষ্টিনা ইত্যমরঃ॥ নিসৃতকনিষ্ঠয়া মুস্ট্যোপলক্ষিতো হস্তোঽরত্নিরিত্যর্থঃ। ষোড়শাঙ্গুলকে খাতে কস্যচিৎ কৌক্কুটং পুটং। যৎ পুটং দীয়তে খাতে হ্রস্বসংখ্যৈর্বনোপলৈঃ॥ কপোতপুটমেতত্তু কথিতং পুটপণ্ডিতৈঃ॥ ৫॥ গোষ্ঠান্তর্গোখুরক্ষুণ্ণং শুষ্কচূর্ণিতগোময়ং। গোবরং তৎ সমাখ্যাতং বরিষ্ঠং রসসাধনে॥ বৃহদ্ভাণ্ডস্থিতৈর্যন্ত্রৈর্গোবরৈর্দীয়তে পুটঃ। তদ্গোবরপুটং প্রোক্তং ভিষগ্‌ভিঃ সূতভস্মকৃৎ॥ ৬॥ বৃহদ্ভাণ্ডে তুষৈঃ পূর্ণে মধ্যে মূষাং বিধারয়েৎ। ক্ষিপ্ত্বাগ্নিং মুদ্রয়েদ্ভাণ্ডং তদ্ভাণ্ডপুটমুচ্যতে॥ ৭॥ ইতি ভাবপ্রকাশঃ॥

পুটঃ (পুং ক্লী) অশ্বখুরঃ। ইতি শব্দরত্নাবলী॥

পুটঃ (ত্রি) আচ্ছাদনং। পত্রাদিরচিতঃ পুষ্পাদ্যাধারঃ। যথা। দুগ্ধ্বা পয়ঃ পত্রপুটে মদীয়ং। ইতি রঘুঃ॥ মিথঃসংশ্লেষঃ। ইতি মুকুটঃ॥ ইত্যমরটীকায়াং ভরতঃ॥

পুটকং (ক্লী) পদ্মং। ইতি শব্দরত্নাবলী॥ স্বার্থে কপ্রত্যয়ে পুটশব্দার্থোঽপ্যত্র॥

পুটকন্দঃ (পুং) কোলকন্দঃ। ইতি রাজনির্ঘণ্টঃ॥

পুটকিনী (স্ত্রী) পদ্মিনী। পদ্মযুক্তদেশঃ পদ্মসমূহঃ পদ্মলতা চ। ইতি হেমচন্দ্রঃ॥

পুটগ্রীবঃ (পুং) গর্গরী । তাম্রকুম্ভঃ । ইতি মেদিনী ॥

পুটপাকঃ (পুং) পুটাভ্যন্তরিতৌষধপচনং । অথ পুটপাকবিধিঃ । পুটপকস্য কল্কস্য স্বরসো গৃহ্যতে যতঃ। অতস্তু পুটপাকানাং যুক্তিরত্রোচ্যতে ময়া ॥ পুটপাকস্য পাকোঽয়ং লেপস্যাঙ্গারবর্ণতা। লেপঞ্চ দ্ব্যঙ্গুলং স্থূলে কুর্য্যাদ্বাঙ্গুলিমাত্রকং ॥ কাশ্মরীবটজম্ব্বাদিপত্রৈর্বেষ্টনমুত্তমং । পলমাত্রো রসো গ্রাহ্যঃ কর্ষমাত্রং মধু ক্ষিপেৎ ॥ কল্কচূর্ণদ্রবাদ্যাস্তু দেয়াঃ কোলমিতা বুধৈঃ ॥ * ॥ অপি চ । দ্বে বিল্বে স্নিগ্ধমাংসস্য পরং দ্রব্যং পলং মতং । দ্রবস্য কুড়বোম্মানং সর্ব্বমেকত্র পেষয়েৎ ॥ তদেকত্র সমালোড্য পত্রৈঃ সুপরিবেষ্টিতং । পুটপাকবিধানেন তৎ পক্ত্বা তদ্রসং বুধঃ । তর্পণোক্তেন বিধিনা যথাবদবচারয়েৎ ॥ দৃষ্টিমধ্যে নিষেচ্যঃ স্যান্নিত্যমুত্তানশায়িনঃ । স্নেহনো লেখনশ্চৈব রোপণশ্চেতি স ত্রিধা ॥ হিতঃ স্নিগ্ধো বিরূক্ষস্য স্নিগ্ধস্য স তু লেখনঃ । দৃষ্টের্ব্বলার্থমিতরঃ পিত্তাসৃগব্রণবাতনুৎ ॥ ইতরো রোপণঃ । স্নেহমাংসবসামজ্জমেদঃস্বাদ্বৌষধৈঃ কৃতঃ । স্নেহনঃ পুটপাকঃ স্যাদ্ধার্য্যো দ্বে বাক্শতে তু সঃ ॥ বাক্শতং ছোটিকাশতং । জাঙ্গলানাং যকৃন্মাংসৈর্লেখনদ্রব্যসংযুতৈঃ। কৃষ্ণলোহরজস্তাম্রশঙ্খবিদ্রুমসিন্ধুজৈঃ ॥ সমুদ্রফেনকাসীসস্রোতোজদধিমস্তুভিঃ । লেখনো বাক্শতং তস্য পরং ধারণমিষ্যতে ॥ স্তন্যজাঙ্গলমধ্বাজ্যতিক্তকদ্রব্যভাবিতঃ । লেখনাত্ত্রিগুণো ধার্য্যঃ পুটপাকস্তু রোপণঃ॥ তিক্তকদ্রব্যাণ্যাহ। নিম্বামৃতাবৃষপটোলনিদিগ্ধিকাভিঃ স্যাৎ পঞ্চতিক্তক ইতি প্রথিতো গণোঽয়ং ॥ আচরেত্তর্পণোক্তাস্তু ক্রিয়াং ব্যাপত্তিদর্শনে । ব্যাপত্তিদর্শনে মিথ্যাকৃতপুটপাকজনিতব্যাধিদর্শনে । তেজাংস্যনিলমাকাশমাদর্শং ভাস্বরাণি চ । নৈক্ষেত তর্পিতে নেত্রে যশ্চ বা পুটপাকবান্ ॥ ইতি ভাবপ্রকাশঃ ॥

পুটভেদঃ (পুং) নদীবক্রং । পত্তনং । আতোদ্যং । ইতি মেদিনী ॥

পুটভেদনং (ক্লী) নগরং । ইত্যমরঃ ॥

পুটালুঃ (পুং) কোলকন্দঃ । ইতি রাজনির্ঘণ্টঃ ॥

পুটিকা (স্ত্রী) এলা । ইতি হারাবলী ॥

পুটিতং (ক্লী) হস্তপুটং । পাটিতং । স্যূতে ত্রি । ইতি মেদিনী ॥ আদ্যন্তপ্রণবাদিযুক্তমন্ত্রাদৌ পুটপ্রাপ্তে চ ত্রি ॥

পুটী (স্ত্রী) কৌপীনং । ইতি জটাধরঃ ॥ আচ্ছাদনং । পত্রাদিরচিতঃ পুষ্পাদ্যাধারঃ । ইত্যমরভরতৌ ॥

পুটোটজং (ক্লী) শ্বেতচ্ছত্রং । ইতি ত্রিকাণ্ডশেষঃ ॥

পুটোদকঃ (পুং) নারিকেলঃ । ইতি হারাবলী ॥

ক তৌচ্ছ্যে । ইতি কবিকল্পদ্রুমঃ ॥ পঞ্চমস্বরী । টদ্বয়ান্তঃ । একটকার ইতি রামঃ । ক পুট্টয়তি । তৌচ্ছমল্পীভাবঃ । ইতি দুর্গাদাসঃ ॥

পুড় ই মর্দ্দে। ইতি কবিকল্পদ্রুমঃ॥ পঞ্চম-স্বরী। ই পুণ্ড্যতে। মর্দ্দশ্চূর্ণীকরণং। ইতি দুর্গাদাসঃ॥

পুণ শ ধর্ম্মে। ইতি কবিকল্পদ্রুমঃ॥ শুভ-ক্রিয়ায়ামিত্যন্যে। শ পুণতি শুভং লোকঃ। পোণিতা। ইতি দুর্গাদাসঃ॥

পুণ্ডঃ (পুং) তিলকঃ। ইতি জটাধরঃ॥

পুণ্ডরী [ন্] (পুং) হস্তিনাং মনুষ্যাণাঞ্চ চক্ষুষ্যঃ ক্ষুদ্রবিটপঃ। শালপর্ণীপত্রতুল্য-পত্রঃ। পুণ্ডরিয়া ইতি খ্যাতঃ। তৎ-পর্য্যায়ঃ। পৌণ্ডরীকং ২ পুণ্ডরীকং ৩ পুণ্ডরীয়কং ৪ প্রপৌণ্ডরীকং ৫ চক্ষুষ্যং ৬ পৌণ্ডর্য্যং ৭ তালপুষ্পকং ৮ সালপুষ্পং ৯ দৃষ্টিকৃতং ১০ স্থলপদ্মং ১১ মালকং ১২। কেচিত্তু পূর্ব্বদশকং পদ্মকাষ্ঠে প্রচক্ষতে। ইতি শব্দরত্নাবলী॥

পুণ্ডরীকং (ক্লী) শুক্লপদ্মং। তৎপর্য্যায়ঃ। সিতাম্ভোজং ২। ইত্যমরঃ॥ শতপত্রং ৩ মহাপদ্মং ৪ সিতাম্বুজং ৫। ইতি রত্ন-মালা॥ অস্য পর্য্যায়ান্তরং গুণাশ্চ শ্বেত-পদ্মশব্দে দ্রষ্টব্যাঃ। পদ্মমাত্রং। ইতি ভরতধৃতব্যাড়িঃ॥ শ্বেতচ্ছত্রং। ভেষজ-ভেদঃ। ইতি মেদিনী॥

পুণ্ডরীকঃ (পুং) অগ্নিকোণস্থদিগ্‌গজঃ। ব্যাঘ্রঃ। ইত্যমরঃ॥ কোষকারভেদঃ। ইতি মেদিনী॥ সহকারঃ। গণধরঃ। রাজিল-সর্পঃ। গজজ্বরঃ। ইতি হেমচন্দ্রঃ॥ দম-নকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ কমণ্ডলুঃ। শ্বেতবর্ণঃ। ইত্যনেকার্থকোষঃ॥ কুষ্ঠভেদঃ। তস্য লক্ষণং। সশ্বেতং রক্তপর্য্যন্তং পুণ্ডরীকদলোপমং। সোৎসেধঞ্চ সরাগঞ্চ পুণ্ডরীকং প্রচক্ষতে॥ ইতি মাধবকরঃ॥

পুণ্ডরীকাক্ষং (ক্লী) পুণ্ডর্য্যং। ইতি শব্দ-চন্দ্রিকা॥

পুণ্ডরীকাক্ষঃ (পুং) বিষ্ণুঃ। ইত্যমরঃ॥ তস্য স্মরণে বাহ্যাভ্যন্তরশুচিত্বং যথা। অ-পবিত্রঃ পবিত্রো বা সর্ব্বাবস্থাং গতোঽপি বা। যঃ স্মরেৎ পুণ্ডরীকাক্ষং স বাহ্যাভ্যন্তরঃ শুচিঃ॥ ইতি বামনে ৩৩ অধ্যায়ঃ॥

পুণ্ডরীয়কং (ক্লী) স্থলপদ্মং। ইতি শব্দ-মালা॥ প্রপৌণ্ডরীকং। ইতি রাজ-নির্ঘণ্টঃ॥

পুণ্ডর্য্যং (ক্লী) প্রপৌণ্ডরীকং। ইত্যমরঃ॥ দ্বে হস্তিনাং মনুষ্যাণাঞ্চ চক্ষুষ্যে ক্ষুদ্র-বিটপে শালপর্ণীপত্রতুল্যপত্রে। পুণ্ড-রিয়া ইতি খ্যাতে। প্রকৃষ্টং পুণ্ডরীকমিব দাহহরণাৎ প্রপৌণ্ডরীকং ষ্ণঃ স্বপঞ্চালা-দিত্বাদন্তপদস্যাদৌ বৃদ্ধিঃ। পুণ্ডয়তি খণ্ড-য়তি দোষান্ পুণ্ডর্য্যং পুড়ি মর্দ্দে নাম্নীতি অর্য্যঃ পৌণ্ডর্য্যমিতিপাঠে স্বার্থে ষ্ণঃ বৃদ্ধিঃ পুণ্ডরীকাদিরপ্যত্র। স্থলপদ্মং সাধু-পুষ্পং দৃষ্টিকৃৎ পুণ্ডরীয়কং। ইতি রভসঃ। ইত্যমরটীকায়াং ভরতঃ॥

পুণ্ড্রঃ (পুং) ইক্ষুভেদঃ। পুঁড়িআক্ ইতি ভাষা। ইত্যমরঃ॥ দৈত্যবিশেষঃ। অতি-মুক্তকঃ। চিত্রং। ক্রিমিঃ। পুণ্ডরীকঞ্চ। দেশবিশেষে পুং ভূম্নি। ইতি মেদিনী॥ তিলকবৃক্ষঃ। ইতি হেমচন্দ্রঃ॥ হ্রস্বপ্লক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

পুণ্ড্রকঃ (পুং) মাধবীলতা। ইত্যমরঃ॥ তিলকবৃক্ষঃ। ইক্ষুভেদঃ। পুঁড়ি আক্ ইতি ভাষা। তৎপর্য্যায়ঃ। রসালঃ২ ইক্ষুবাটী ৩ যোনিঃ ৪ ইক্ষুযোনিঃ৫ রসালী৬ রসদালিকা ৭ করঙ্কশালিঃ ৮। অস্য গুণাঃ। মধুরত্বং। শীতলত্বং। রুচিকারিত্বং। মৃদুত্বং। পিত্তদাহহরত্বং। বৃষ্যত্বং। তেজোবলবিবর্দ্ধনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

পুণ্ড্রকেলিঃ (পুং) হস্তী। ইতি শব্দমালা॥

পুণ্যং (ক্লী) শুভাদৃষ্টং। তৎপর্য্যায়ঃ। ধর্ম্মং২ শ্রেয়ঃ৩ সুকৃতং৪ বৃষঃ৫। ইত্যমরঃ॥ *॥ পুণ্যভারবোঢ়ুমশক্তস্য পণ্ডিতস্য নিন্দা যথা। পণ্ডিতেনাপি কিন্তেন সমর্থেন চ দেহিনাং। যৎ পুণ্যং ভারমুদ্বোঢ়ুমশক্তঃ পারলৌকিকং॥ ইত্যগ্নিপুরাণং॥ *॥ আত্মকৃতপুণ্যকথননিষেধো যথা। ইষ্টং দত্তমধীতং বা বিনশ্যত্যনুকীর্ত্তনাৎ। শ্লাঘানুশোচনাভ্যাঞ্চ ভগ্নতেজো বিভিদ্যতে॥ তস্মাদাত্মকৃতং পুণ্যং বৃথা ন পরিকীর্ত্তয়েৎ॥ ইতি শুদ্ধিতত্ত্বে দেবলঃ॥*॥ অদত্তপুণ্যভাগিত্বং পাপশব্দে দ্রষ্টব্যং॥*॥ শোভনকর্ম্ম। পাবনং। সুন্দরে ত্রি। ইতি হেমচন্দ্রঃ॥ সুগন্ধি। ইতি জটাধরঃ॥

পুণ্যকং (ক্লী) ব্রতং। তচ্চ উপবাসাদি। শাস্ত্রে পুণ্যত্বেন পবিত্রতাজনকত্বেন যদ্‌বোধিতমুপবাসাদি তদেব ব্রতং ন তু যঃ কোঽপি নিয়মঃ। আদিনা নক্তং ভোজনাক্ষারলবণাদিপরিগ্রহঃ। ইত্যমরভরতৌ॥

পুণ্যকব্রতং (ক্লী) পতিসৌভাগ্যস্য শ্রীকৃষ্ণতুল্যপুত্রস্য চ জনকঃ স্ত্রীকর্ত্তব্যনিয়মবিশেষঃ। তস্য বিধির্যথা। মহাদেব উবাচ। হরেরারাধনং কৃত্বা ব্রতং কুরু বরাননে। ব্রতঞ্চ পুণ্যকং নাম বর্ষমেকং করিষ্যসি॥ দেবি শুদ্ধে চ কালেঽত্র পরং নিয়মপূর্ব্বকং। মাঘশুক্লত্রয়োদশ্যাং ব্রতারম্ভঃ শুভঃ প্রিয়ে॥ গাত্রং সুনির্ম্মলং কৃত্বা শিরঃসংস্কারপূর্ব্বকং। উপোষ্য পূর্ব্বদিবসে বস্ত্রং প্রক্ষাল্য যত্নতঃ॥ ধৌতে চ বাসসী ধৃত্বা উপবিশ্যাসনে শুচৌ। আচম্য তিলকং কৃত্বা নির্বাপ্য আহ্নিকং পুরঃ॥ ঘটস্যারোপণং কৃত্বা স্বস্তিবাচনপূর্ব্বকং। পুরোহিতস্য বরণং পুরঃ কৃত্বা প্রযত্নতঃ॥ সঙ্কল্প্য বেদবিহিতং ব্রতমেতৎ সমাচরেৎ। ব্রতে দ্রব্যাণি নিত্যানি চোপহারাণি ষোড়শ॥ দেয়ানি নিত্যং দেবেশি কৃষ্ণায় পরমাত্মনে। আসনং স্বাগতং পাদ্যমর্ঘ্যমাচমনীয়কং॥ মধুপর্কশ্চ স্নানীয়ং বস্ত্রাণ্যাভরণানি চ। সুগন্ধি পুষ্পং ধূপশ্চ দীপনৈবেদ্যবন্দনং॥ যজ্ঞসূত্রঞ্চ তাম্বূলং কর্পূরাদিসুবাসিতং। দ্রব্যাণ্যেতানি পূজায়াশ্চাঙ্গরূপাণি সুন্দরি॥ দেবি কিঞ্চিদ্বিহীনেনৈবাঙ্গহানিঃ প্রজায়তে। অঙ্গহীনঞ্চ যৎ কর্ম্ম চাঙ্গহীনো যথা নরঃ। অঙ্গহীনে চ কার্য্যে চ ফলহানিঃ প্রজায়তে॥ অষ্টোত্তরশতং পুষ্পং পারিজাতস্য বিষ্ণবে। দেয়ং প্রতিদিনং দুর্গে স্বাত্মনো রূপহেতবে॥ শ্বেতচম্পকপুষ্পাণাং লক্ষমক্ষতমীপ্সিতং। প্রদেয়ং হরয়ে ভক্ত্যা বহুসৌন্দর্য্যহেতবে॥ নীলোৎপলানাং লক্ষঞ্চ দেয়ং কৃষ্ণায় ভক্তিতঃ।

১ ব্রতাঙ্গভূতং দেবেশি চক্ষুষো রূপহেতবে॥ হিমালয়োদ্ভবং লক্ষং রুচিরং শ্বেতচামরং। প্রদদ্যৈ কেশবায়ৈব কেশসৌন্দর্য্যহেতবে॥ অমূল্যরত্নরচিতং দর্পণানাং সহস্রকং। দেয়ং নারায়ণায়ৈব নাভিসৌন্দর্য্যহেতবে॥ অমূল্যরত্নরচিতং পুটকানাং সহস্রকং। প্রদেয়ং গোপিকেশায় নাসিকারূপহেতবে॥ বন্ধূকপুষ্পলক্ষঞ্চ দেয়ং রাধেশ্বরায় চ। স্বস্যৌষ্ঠাধরয়োশ্চৈব বহুসৌন্দর্য্যহেতবে॥ মুক্তাফলানাং লক্ষঞ্চ দন্তসৌন্দর্য্যহেতবে। দেয়ং গোলোকনাথায় শৈলজে ভক্তিপূর্ব্বকং॥ রত্নগেণ্ডুকলক্ষঞ্চ গণ্ডসৌন্দর্য্যহেতবে। মদীশ্বরায় দাতব্যং ব্রতে শৈলেন্দ্রকন্যকে॥ রত্নপাষকলক্ষঞ্চ দেয়ং ব্রহ্মেশ্বরায় চ। ওষ্ঠাধঃস্থলরূপায় প্রাণেশি ভক্তিতো ব্রতে॥ কর্ণভূষণলক্ষঞ্চ রত্নসারবিনির্ম্মিতং। দেয়ং সর্ব্বেশ্বরায়ৈব কর্ণসৌন্দর্য্যহেতবে॥ মাধ্বীককলসানাঞ্চ লক্ষং রত্নবিনির্ম্মিতং। দেয়ং বিশ্বেশ্বরায়ৈব স্বরসৌন্দর্য্যহেতবে॥ সুধাপূর্ণঞ্চ কুম্ভানাং সহস্রং রত্ননির্ম্মিতং। দেয়ং কৃষ্ণায় দেবেশি বাক্যসৌন্দর্য্যহেতবে॥ রত্নপ্রদীপলক্ষঞ্চ গোপবেশবিধায়িনে। দেয়ং কিশোরবেশায় দৃষ্টিসৌন্দর্য্যহেতবে॥ ধুস্তূরকুসুমাকারং রত্নপাত্রসহস্রকং। দেয়ং গোরক্ষকায়ৈব গলসৌন্দর্য্যহেতবে॥ সদ্রত্নসাররচিতং পদ্মনালসহস্রকং। দেয়ং তস্তুকপালায় বাহুসৌন্দর্য্যহেতবে॥ লক্ষঞ্চ রক্তপদ্মানাং কক্ষসৌন্দর্য্যহেতবে। দেয়ং গোপাঙ্গনেশায় নারায়ণি হরিব্রতে॥ অঙ্গুরীয়কলক্ষঞ্চ রত্নসারবিনির্ম্মিতং। অঙ্গুলীনাঞ্চ রূপার্থং দেয়ং দেবেশ্বরায় চ॥ মণীন্দ্রসারলক্ষঞ্চ শ্বেতবর্ণং মনোহরং। দেয়ং মুনীন্দ্রনাথায় নখসৌন্দর্য্যহেতবে॥ সদ্রত্নসারহারাণাং লক্ষঞ্চাতিমনোহরং। দেয়ং মদনমোহায় বক্ষঃসৌন্দর্য্যহেতবে॥ সুপক্বশ্রীফলানাঞ্চ লক্ষঞ্চ সুমনোহরং। দেয়ং সিদ্ধেন্দ্রনাথায় স্তনসৌন্দর্য্যহেতবে॥ সদ্রত্নবর্ত্তুলাকারং লক্ষপাত্রং মনোহরং। দেয়ং পদ্মালয়েশায় দেহস্য রূপহেতবে॥ সদ্রত্নসাররচিতনাভীনালসহস্রকং। প্রদেয়ং পদ্মনাভায় নাভিসৌন্দর্য্যহেতবে॥ সদ্রত্নসাররচিতরথচক্রসহস্রকং। নিতম্বসৌন্দর্য্যার্থঞ্চ প্রদেয়ঞ্চক্রপাণয়ে॥ সুবর্ণরত্নকুম্ভানাং লক্ষঞ্চ সুমনোহরং। প্রদেয়ং শ্রীনিবাসায় শ্রোণিসৌন্দর্য্যহেতবে॥ শতপত্রস্থলাজানাং লক্ষমম্লানমক্ষতং। প্রদেয়ং পদ্মনেত্রায় পাদসৌন্দর্য্যহেতবে॥ সুবর্ণরচিতানাঞ্চ খঞ্জনানাং সহস্রকং। গতিসৌন্দর্য্যহেত্বর্থং দেয়ং লক্ষ্মীশ্বরায় চ। রাজহংসসহস্রঞ্চ গজেন্দ্রাণাং সহস্রকং॥ সুবর্ণচ্ছত্রলক্ষঞ্চ দেয়ং নারায়ণায় চ। বিচিত্রং রত্নসারেণ মূর্দ্ধ্নঃ সৌন্দর্য্যহেতবে॥ মালতীনাঞ্চ কুসুমমক্ষতং লক্ষমীশ্বরি। দেয়ং বৃন্দাবনেশায় হাস্যসৌন্দর্য্যহেতবে॥ অমূল্যরত্নলক্ষঞ্চ দেয়ং নারায়ণায় বৈ। সুব্রতে ব্রতপূর্ণার্থং শীলসৌন্দর্য্যহেতবে॥ শুদ্ধস্ফটিকসঙ্কাশং মণীন্দ্রসারলক্ষকং। দেয়ং মুনীন্দ্রনাথায়

মনঃসৌন্দর্য্যহেতবে ॥ প্রবালসারসঙ্কাশং মণিসারসহস্রকং। দেয়ং কৃষ্ণায় ভক্ত্যা চ প্রিয়ানুরাগবৃদ্ধয়ে ॥ মাণিক্যসারলক্ষঞ্চ দেয়ং কৃষ্ণায় যত্নতঃ। জন্মনঃ কোটি-পর্য্যন্তং স্বামিসৌভাগ্যহেতবে ॥ কুষ্মাণ্ডং নারিকেলঞ্চ জম্বীরং শ্রীফলং তথা। ফলান্যেতানি দেয়ানি হরয়ে পুত্রহেতবে॥ রত্নেন্দ্রসারলক্ষঞ্চ দেয়ং কৃষ্ণায় যত্নতঃ। অসংখ্যজন্মপর্য্যন্তং স্বাত্মনো ধনবৃদ্ধয়ে ॥ বাদ্যং নানাপ্রকারঞ্চ কাংস্যতালাদিকং পরং। ব্রতে সম্পত্তিবৃদ্ধ্যর্থং শ্রীহরিং শ্রাবয়েদ্‌ব্রতী ॥ পায়সং পিষ্টকং সর্পিঃ-শর্করাক্তং মনোহরং। প্রদেয়ং হরয়ে ভক্ত্যা স্বাত্মনো ভোগবৃদ্ধয়ে॥ সুগন্ধি-পুষ্পমাল্যানাং লক্ষমক্ষতমীপ্সিতং। প্র-দেয়ং হরয়ে ভক্ত্যা হরিভক্তিবিবৃদ্ধয়ে ॥ নৈবেদ্যানি প্রদেয়ানি স্বাদূনি মধুরাণি চ। শ্রীকৃষ্ণপ্রীতিপ্রাপ্ত্যর্থং দুর্গে নানাবিধানি চ॥ নানাবিধানি পুষ্পাণি তুলসীসংযুতানি চ। শ্রীকৃষ্ণপ্রীতয়ে ভক্ত্যা ব্রতে দেয়ানি সুব্রতে ॥ ব্রাহ্মণানাং সহস্রঞ্চ প্রত্যহং ভোজয়েদ্‌ব্রতী। স্বাত্মনঃ শস্যবৃদ্ধ্যর্থং ব্রতে জন্মনি জন্মনি ॥ পুষ্পাঞ্জলিশতং দেয়ং নিত্যং পূর্ণঞ্চ পূজনে। প্রণাম-শতকং দেবি কর্ত্তব্যং ভক্তিবৃদ্ধয়ে ॥ মণ্যাসাংশ্চ হবিষ্যান্নং মাসান্ পঞ্চ ফলা-দিকং। হবিঃ পক্ষং জলং পক্ষং ব্রতে পক্ষে চ সুব্রতে॥ রত্নপ্রদীপশতকং বহ্নিং দদ্যাদ্দিবানিশং। রাত্রৌ হুতাশনং কৃত্বা নিত্যং জাগরণং ব্রতে ॥ স্মরণং কীর্ত্তনং কেলিপ্রেরণং গুহ্যভাষণং। সঙ্কল্পোঽধ্যব-সায়শ্চ ক্রিয়ানিষ্পত্তিরেব চ ॥ মৈথুনং বিবিধং ত্যাজ্যং ব্রতে ক্রীড়াবিবৃদ্ধয়ে। জ্ঞানবৃদ্ধির্জাগরণে সুবুদ্ধির্মিতভোজনে ॥ লোভমোহকামক্রোধভয়শোকবিবাদকং। কলহঞ্চ পরিত্যাজ্যং ব্রতে বন্ধুবিবৃদ্ধয়ে॥ সংপূর্ণে চ ব্রতে দেবি প্রতিষ্ঠা তদন-ন্তরং ॥ ত্রিশতঞ্চ ষষ্ট্যধিকং ডল্লকং বস্ত্র-সংযুতং। সভোজ্যং সোপবীতঞ্চ সোপ-হারং মনোহরং ॥ ত্রিশতঞ্চ ষষ্ট্যধিকং সহস্রং বিপ্রভোজনং। ত্রিশতঞ্চ ষষ্ট্য-ধিকং সহস্রং তিলহোমকং ॥ ত্রিশতঞ্চ ষষ্ট্যধিকং সহস্রং স্বর্ণমেব চ। দেয়া ব্রতসমাপ্তৌ চ দক্ষিণা বিবিধেরিতা। অন্যাং সমাপ্তিদিবসে কথয়িষ্যামি দক্ষিণাং॥ এতদ্‌ব্রতফলং দেবি দৃঢ়া ভক্তির্হরৌ ভবেৎ। হরিতুল্যো ভবেৎ পুত্রো বিখ্যাতো ভুবন-ত্রয়ে ॥ সৌন্দর্য্যং স্বামিসৌভাগ্যমৈশ্বর্য্যং বিপুলং ধনং। সর্ব্ববাঞ্ছিতসিদ্ধীনাং বীজং জন্মনি জন্মনি ॥ ইত্যেবং কথিতং দেবি ব্রতং কুরু মহেশ্বরি। পুত্রস্তে ভবিতা সাধ্বীত্যুক্ত্বা চ বিররাম হ॥ ইতি ব্রহ্মবৈবর্ত্তে গণপতিখণ্ডে ৩।৪ অধ্যায়ঃ ॥

পুণ্যকৃৎ (ত্রি) পুণ্যকর্ত্তা। ধার্ম্মিকঃ। যথা। পুণ্যকৃচ্চাটুকারস্তে কিঙ্করঃ সুরতেষু কঃ। ইতি ভট্টিঃ ॥

পুণ্যগন্ধঃ (পুং) চম্পকঃ। ইতি ত্রিকাণ্ড-শেষঃ ॥

পুণ্যজনঃ (পুং) রাক্ষসঃ। ইত্যমরঃ ॥ যক্ষঃ। সজ্জনঃ। ইতি মেদিনী ॥

পুণ্যজনেশ্বরঃ (পুং) কুবেরঃ। ইত্যমরঃ॥

পুণ্যতৃণং (ক্লী) শ্বেতকুশং। ইতি রাজনির্ঘণ্টঃ॥

পুণ্যদর্শনঃ (পুং) চাষপক্ষী। ইতি রাজনির্ঘণ্টঃ॥

পুণ্যফলঃ (পুং) বনভেদঃ। তৎপর্য্যায়ঃ। লক্ষ্ম্যারামঃ ২। ইতি শব্দমালা॥ ধর্ম্মজন্যফলে ক্লী॥

পুণ্যভাক্ [জ্] (ত্রি) পুণ্যবিশিষ্টঃ। যথা। ক্রীড়াবন্তো বিনীতা লঘুসুরতরতাঃ পুণ্যভাজঃ শশাঃ স্যুঃ। ইতি শশুশায়কঃ॥

পুণ্যভূঃ (স্ত্রী) আর্য্যাবর্ত্তদেশঃ। যথা। আর্য্যাবর্ত্তো জন্মভূমির্জিনচক্র্যর্দ্ধচক্রিণাং। পুণ্যভূরাচারবেদী মধ্যং বিন্ধ্যহিমালয়োঃ॥ ইতি হেমচন্দ্রঃ॥

পুণ্যভূমিঃ (স্ত্রী) আর্য্যাবর্ত্তদেশঃ। ইত্যমরঃ॥ স তু বিন্ধ্যহিমালয়াবধিমধ্যদেশঃ। যথা। আসমুদ্রাত্তু পূর্ব্বস্মাদাসমুদ্রাত্তু পশ্চিমাৎ। তয়োরেবান্তরং গির্য্যোরার্য্যাবর্ত্তং বিদুর্বুধাঃ॥ ইতি ভরতধৃতমধুঃ॥ পুত্রসূঃ। ইতি শব্দরত্নাবলী॥

পুণ্যবান্ [ৎ] (ত্রি) পুণ্যযুক্তঃ। তৎপর্য্যায়ঃ। সুকৃতী ২ ধন্যঃ ৩। ইত্যমরঃ॥ সুকৃৎ ৪ পুণ্যকৃৎ ৫। ইতি জটাধরঃ॥ ধর্ম্মবান্ ৬ শ্রেয়স্বান্ ৭ বৃষবান্ ৮। এতে পুণ্যপর্য্যায়কশব্দোত্তরবতুপ্রত্যয়েন নিষ্পন্নাঃ॥

পুণ্যশ্লোকঃ (পুং) বিষ্ণুঃ। ইতি শ্রীভাগবতং॥ যুধিষ্ঠিরঃ। ইতি মহাভারতং॥ নলরাজঃ। ইতি ত্রিকাণ্ডশেষঃ॥ পুণ্যরিত্রে ত্রি॥

পুণ্যশ্লোকা (স্ত্রী) দ্রৌপদী। ইতি শব্দমালা॥ সীতা। যথা। পুণ্যশ্লোকো নলো রাজা পুণ্যশ্লোকো যুধিষ্ঠিরঃ। পুণ্যশ্লোকা চ বৈদেহী পুণ্যশ্লোকো জনার্দ্দনঃ॥ ইতি পুরাণং॥

পুণ্যা (স্ত্রী) তুলসী। ইতি শব্দমালা॥ পুণ্যজনিকা চ॥

পুণ্যাত্মা (ত্রি) পুণ্যস্বভাবঃ। তস্য গত্যাদি যথা। সুপ্রজ্ঞোবাচ। শৃণু বিপ্র প্রবক্ষ্যামি যত্ত্বয়া শ্রোতুমিষ্যতে। পুণ্যাত্মনাং পাপিনাঞ্চ পন্থানং সুখদুঃখদং॥ আদৌ ব্রবীমি পন্থানং নৃণাং পুণ্যবতামহং। শৃণুষ্ব দ্বিজশার্দূল শৃণ্বতাং প্রীতিবর্দ্ধনং॥ প্রস্তরৈরিষ্টকৈর্বদ্ধো দিব্যবস্ত্রৈঃ সমাবৃতঃ। ভাতি পুণ্যাত্মনাং পন্থাঃ সর্ব্বোপদ্রববর্জ্জিতঃ॥ ক্বচিদ্গান্ধর্ব্বকন্যাভির্গীয়তে গানমুত্তমং। ক্বচিন্মঞ্জুশরীরাভিরপ্সরোভিশ্চ নৃত্যতে॥ ক্বচিচ্চ বীণাক্বণনং নানাবাদ্যং মনোহরং। ক্বচিৎ কুসুমবৃষ্টিশ্চ ক্বচিদ্বায়ুঃ সুশীতলঃ॥ ক্বচিৎ পুষ্পাঃ শীততোয়াঃ কুত্রচিৎ ভক্তশালিকাঃ। ক্বচিদ্দেবাশ্চ গন্ধর্ব্বাঃ পঠন্তস্তবমুত্তমং॥ ক্বচিৎ ক্বচিদ্দীর্ঘিকাশ্চ ফুল্লপদ্মসুশোভিতাঃ। সুচ্ছায়াঃ পাদপাঃ ক্বাপি পুষ্পিতা বঞ্জুলাদয়ঃ॥ সমস্তসুখসম্পন্নে পথি গচ্ছন্তি মানবাঃ। পুণ্যাত্মানো দ্বিজশ্রেষ্ঠ সুখমৃত্যুমবাপ্য চ॥ কেচিত্তুরঙ্গমারূঢ়া নানালঙ্কারভূষিতাঃ। উদ্দণ্ডধবলচ্ছত্রৈর্গচ্ছন্ত্যাবৃতমস্তকাঃ॥ কেচিদ্যান্তি গজারূঢ়া রথারূঢ়াশ্চ কেচন। যানারূঢ়া জনাঃ কেচিৎ

সুখেন যমমন্দিরং ॥ কেচিদ্দেবাঙ্গনাহস্ত-ন্যস্তচামরবায়ুভিঃ। গচ্ছন্তি বীজিতা মর্ত্যাঃ স্তূয়মানাঃ সুরর্ষিভিঃ ॥ কেচিদ্দিব্যাঙ্কনধরাঃ সুচন্দনবিভূষিতাঃ। ভুঞ্জন্তো যান্তি তাম্বূলং পুণ্যাত্মানো যমালয়ং ॥ নিজগাত্রত্বিষা কেচিজ্জ্বালয়ন্তো দিশো দশ। ব্রজন্তি শমনাগারং চলদ্গৃহনিবাসিনঃ ॥ কেচিচ্চ পায়সং দিব্যং ভুঞ্জন্তো যান্তি সত্তমাঃ। সুধাপানং প্রকুর্ব্বন্তঃ পথি গচ্ছন্তি কেচন॥ কেচিদ্দুগ্ধং পিবন্তশ্চ কেচিদিক্ষুরসং তথা। কেচিত্তক্রং পিবন্তশ্চ গচ্ছন্তি যমমন্দিরং ॥ কেচিদ্দধীনি খাদন্তঃ কেচি-ন্নানাফলানি চ। কেচিন্মধু পিবন্তশ্চ পুণ্যবন্তো ব্রজন্তি বৈ ॥ তানাগতাংস্ততো দৃষ্ট্বা নরান্ ধর্ম্মপরায়ণান্। ভাস্করিঃ প্রীতিমাসাদ্য স্বয়ং নারায়ণো ভবেৎ॥ চতুর্ব্বাহুঃ শ্যামবর্ণঃ প্রফুল্লকমলেক্ষণঃ। শঙ্খচক্রগদাপদ্মধারী গরুড়বাহনঃ ॥ স্বর্ণ-যজ্ঞোপবীতী চ স্মেরচারুতরাননঃ। কিরীটী কুণ্ডলী চৈব বনমালাবিভূষিতঃ॥ চিত্রগুপ্তো মহাপ্রাজ্ঞশ্চণ্ডাদ্যা যম-কিঙ্করাঃ। সর্ব্বে নারায়ণাকারা বভূবুর্মধু-রোক্তয়ঃ ॥ ততঃ স্বয়ং ধর্ম্মরাজস্তান্ সর্ব্বা-ন্মনুজোত্তমান্। পরমাং প্রীতিমাসাদ্য মিত্রবৎ পূজয়েদ্দ্বিজ ॥ দিব্যৈর্ব্বস্ত্রৈঃ ফলৈ-শ্চৈব তেষাং পুণ্যবতাং নৃণাং। ভোজনং কারয়িত্বা তু তানুবাচাথ ভাস্করিঃ ॥ যম উবাচ। যূয়ং সর্ব্বে মহাত্মানো নরক-ক্লেশভীরবঃ। নিজপুণ্যপ্রভাবেন গম্যতাং পরমং পদং ॥ সংসারে জন্ম সংপ্রাপ্য পুণ্যং যঃ কুরুতে নরঃ। স মে পিতা স মে ভ্রাতা স মে বন্ধুঃ স মে সুহৃৎ॥ ইত্যুক্তা ধর্ম্মরাজেন তে সর্ব্বে দ্বিজ-সত্তম। দিব্যং রথং সমারুহ্য নারায়ণপুরং যযুঃ॥ ইতি পাদ্মোত্তরে ক্রিয়াযোগসারে ২২ অধ্যায়ঃ ॥

পুণ্যাহং (ক্লী) পুণ্যদিনং। ইত্যমরঃ ॥

পুণ্যাহবাচনং (ক্লী) দৈবাদিকর্ম্মাদৌ মঙ্গলার্থং পুণ্যাহমিতিশব্দস্য বারত্রয়কথনং। যথা। পুণ্যাহবাচনং দৈবে ব্রাহ্মণস্য বিধীয়তে। এতদেব নিরোঙ্কারং কুর্য্যাৎ ক্ষত্রিয়-বৈশ্যয়োঃ ॥ সোঙ্কারং ব্রাহ্মণে ক্রয়াৎ নিরোঙ্কারং মহীপতৌ। । উপাংশু চ তথা বৈশ্যে শূদ্রে স্বস্তি প্রযোজয়েৎ ॥ ইত্যুদ্বাহতত্ত্বে যমঃ ॥

পুত্ত গতৌ। তদ্বয়ান্তঃ। পুত্তিকা। সৌত্র-ধাতুরয়ং। ইতি দুর্গাদাসঃ ॥

পুত্তলকঃ (পুং) পত্রাদিনির্ম্মিতপ্রতিমূর্ত্তিঃ। পুতুল ইতি ভাষা। যথা। আচারাৎ যোগ্যত্বাচ্চ শরপত্রৈঃ পুত্তলকং কৃত্বা শিরঃপ্রভৃতিষু পলাশপত্রাণি দেয়ানি। ইতি শুদ্ধিতত্ত্বং ॥

পুত্তলিকা (স্ত্রী) তৃণকাষ্ঠমৃদশ্মধাতুরত্নাদি-নির্ম্মিতপ্রতিমূর্ত্তিঃ। পুত্তলী এবেতি স্বার্থে কনি ঈকারস্য হ্রস্বে আপি নিষ্পন্না ॥

পুত্তলী (স্ত্রী) মৃদাদিনির্ম্মিতপ্রতিমূর্ত্তিঃ। যথা। অমাবাস্যাং সমাসাদ্য মধ্যরাত্রৌ বিচ-ক্ষণঃ। মৃণ্ময়ীং পুত্তলীং কৃত্বা দীপা-দিভিরলঙ্কৃতাং ॥ ইতি উত্তরকামাখ্যা-তন্ত্রং ॥

পুত্রিকা (স্ত্রী) মধুমক্ষিকাবিশেষঃ। তৎপর্য্যায়ঃ। পতঙ্গিকা ২। ইত্যমরঃ॥

পুত্রঃ (পুং) লগ্নাৎ পঞ্চমস্থানং। যথা। পুত্রস্থেঽর্কে নরোঽসৌ প্রথমসুতহতঃ সিংহরাশৌ সুপুত্র ইত্যাদি জ্যোতিস্তত্ত্বং॥ পুংসন্তানঃ। পুন্নামনরকত্রাতা। পুত ইতি বেটা ইতি চ ভাষা। তৎপর্য্যায়ঃ। আত্মজঃ ২ তনয়ঃ ৩ সূনুঃ ৪ সুতঃ ৫। ইত্যমরঃ॥ তনূজঃ ৬ অপত্যং ৭ দায়াদঃ ৮ কুলাধারকঃ ৯ নন্দনঃ ১০ আত্মজন্মা ১১ দ্বিতীয়ঃ ১২ প্রসূতিঃ ১৩ স্বজঃ ১৪। ইতি শব্দরত্নাবলী॥ অস্য ব্যুৎপত্তির্যথা। পুন্নাম্নো নরকাদ্যস্মাৎ পিতরং ত্রায়তে সুতঃ। তস্মাৎ পুত্র ইতি প্রোক্তঃ স্বয়মেব স্বয়ম্ভুবা॥ ইতি পাদ্মে স্বর্গখণ্ডে ৩ অধ্যায়ঃ॥ *॥ স চ দ্বাদশবিধঃ। যথা। ঔরসঃ ক্ষেত্রজশ্চৈব দত্তঃ কৃত্রিম এব চ। গূঢ়োৎপন্নোঽপবিদ্ধশ্চ দায়াদা বান্ধবাশ্চ ষট্॥ কানীনশ্চ সহোঢ়শ্চ ক্রীতঃ পৌনর্ভবস্তথা। স্বয়ন্দত্তশ্চ শৌদ্রশ্চ ষড়দায়াদবান্ধবাঃ॥ *॥ তেষাং লক্ষণানি যথা। স্বে ক্ষেত্রে সংস্কৃতায়ান্তু স্বয়মুৎপাদয়েদ্ধি যং। তমৌরসং বিজানীয়াৎ পুত্রম্প্রথমকল্পিতং॥ ১॥ যস্তল্পজঃ প্রমীতস্য ক্লীবস্য ব্যাধিতস্য বা। স্বধর্ম্মেণ নিযুক্তায়াং স পুত্রঃ ক্ষেত্রজঃ স্মৃতঃ॥ ২॥ মাতা পিতা বা দদ্যাতাং যমদ্ভিঃ পুত্রমাপদি। সদৃশম্প্রীতিসংযুক্তং স জ্ঞেয়ো দত্রিমঃ সুতঃ॥ ৩॥ সদৃশন্তু প্রকুর্য্যাদ্যং গুণদোষবিচক্ষণং। পুত্রং পুত্রগুণৈর্যুক্তং স বিজ্ঞেয়শ্চ কৃত্রিমঃ॥ ৪॥ উৎপদ্যতে গৃহে যস্য ন চ জ্ঞায়েত কস্য সঃ। স গৃহে গূঢ় উৎপন্নস্তস্য স্যাদ্যস্য তল্পজঃ॥ ৫॥ মাতাপিতৃভ্যামুৎসৃষ্টন্তয়োরন্যতরেণ বা। যং পুত্রং পরিগৃহ্লীয়াদপবিদ্ধঃ স উচ্যতে॥ ৬॥ পিতৃবেশ্মনি কন্যা তু যং পুত্রঞ্জনয়েদ্রহঃ। তং কানীনং বদেন্নাম্না বোঢ়ুঃ কন্যাসমুদ্ভবং॥ ৭॥ যা গর্ব্বিণী সংস্ক্রিয়তে জ্ঞাতাজ্ঞাতাপি বাসতী। বোঢ়ুঃ স গর্ব্ভো ভবতি সহোঢ় ইতি চোচ্যতে॥ ৮॥ ক্রীণীয়াদ্যস্ত্বপত্যার্থং মাতাপিত্রোর্যমন্তিকাৎ। স ক্রীতকঃ সুতস্তস্য সদৃশোঽসদৃশোঽপি বা॥ ৯॥ যা পত্যা বা পরিত্যক্তা বিধবা বা স্বয়েচ্ছয়া। উৎপাদয়েৎ পুনর্ভূত্বা স পৌনর্ভব উচ্যতে॥ ১০॥ মাতাপিতৃবিহীনো যস্ত্যক্তো বা স্যাদকারণাৎ। আত্মানং স্পর্শয়েদ্যস্মৈ স্বয়ং দত্তস্তু স স্মৃতঃ॥ ১১॥ যং ব্রাহ্মণস্তু শূদ্রায়াং কামাদুৎপাদয়েৎ সুতং। স পারয়ন্নেব শবস্তস্মাৎ পারশবঃ স্মৃতঃ॥ ১২॥ ক্ষেত্রজাদীন্ সুতানেতানেকাদশ যথোদিতান্। পুত্রপ্রতিনিধীনাহুঃ ক্রিয়ালোপান্মনীষিণঃ॥ ইতি মানবে ৯ অধ্যায়ঃ॥ *॥ চতুর্ব্বিধপুত্রা যথা। সুমনোবাচ। ঋণসম্বন্ধিনঃ কেচিৎ কেচিন্ন্যাসাপহারকাঃ। রিপবশ্চ প্রিয়াশ্চেতি স্বকর্ম্মবশবর্ত্তিনঃ॥ ভেদৈশ্চতুর্ভির্জায়ন্তে পুত্রা মিত্রাঃ স্ত্রিয়স্তথা। ভার্য্যা পিতা চ মাতা চ ভৃত্যাঃ স্বজনবান্ধবাঃ॥ স্বেন স্বেন হি জায়ন্তে সম্বন্ধেন মহীতলে। ন্যাসাপহারভাবেন যস্তু

যস্য কৃতং ভুবি॥ ন্যাসস্বামী ভবেৎ পুত্রো গুণবান্ রূপবান্ ভুবি। যেন চাপহৃতং ন্যাসং তস্য গেহে ন সংশয়ঃ॥ ন্যাসাপহরণাদ্দুঃখং স দত্ত্বা দারুণং গতঃ। ন্যাসস্বামী সপুত্রোঽভূন্ন্যাসাপহারকস্য চ॥ গুণবান্ রূপবাংশ্চৈব সর্ব্বলক্ষণসংযুতঃ। ভক্তিঞ্চ দর্শয়েত্তস্য পুত্রো ভূত্বা দিনে দিনে॥ প্রিয়বাক্যধরো বাপি বহুস্নেহং প্রদর্শয়েৎ। স্বীয়ং দ্রব্যং সমুদ্রাঢ্যং প্রীতিমুৎপাদ্য চাতুলাং॥ ভুক্ত্বা তু পোষণাত্তেন তদাদায় পুনর্ব্রজেৎ। যথা তেন প্রদত্তং তন্ন্যাসাপহরণাৎ পুরা॥ দুঃখমেবং মহৎ কৃত্বা দারুণং প্রাণনাশনং। তাদৃশং তস্য দদ্যাৎ স পুত্রো ভূত্বা মহাগুণৈঃ॥ অল্পায়ুষস্তথা ভূত্বা মরণং যান্তি তে তথা। দুঃখং দত্ত্বা প্রয়ান্ত্যেবং প্রকৃত্যৈবং পুনঃ পুনঃ॥ যদাহ পুত্র পুত্রেতি প্রলাপং হি করোতি সঃ। তদা হাস্যং করোত্যেষ কঃ স পুত্রো হি কস্য চ॥ অনেনাপি কৃতং ন্যাসং মদীয়ং পরিচারিণা। দ্রব্যাপহারোঽপি পিতা পূর্ব্বমদ্যৈব তস্য চ॥ পিশাচত্বং ময়া দত্তমদ্যৈব হি দুরাত্মনঃ। দ্রব্যাপহরণেনাপি মম প্রাণা গতাঃ কিল॥ দুঃখেন মহতা চৈব যথাহং পাড়িতঃ পুরা। তথা দুঃখং প্রদত্ত্বাহং দ্রব্যং মুদ্রাঢ্যমুত্তমং॥ ভোগেন সর্ব্বমাদায় চিরাদ্বিশ্বাস্য সৌম্যবৎ। গতোঽস্মি স্বগৃহঞ্চাদ্য কস্যাহং সুত ঈদৃশঃ॥ ন চৈষোঽপি পিতা পূর্ব্বমদ্যৈব ন চ কস্যচিৎ। পিশাচত্বং ময়া দত্তমদ্যৈব চ দুরাত্মনঃ॥ এবমুক্ত্বা প্রয়াত্যেব তং প্রহস্য পুনঃ পুনঃ। প্রয়াত্যনেন মার্গেণ দুঃখং দত্ত্বা সুদারুণং॥ এবং ন্যাসস্য সম্বন্ধাৎ পুত্রাঃ কিন্তে ভবন্তি বৈ। সংসারে দুঃখবহুলা দৃশ্যন্তে যত্র তত্র হি॥ ১॥ *॥ ঋণসম্বন্ধিনঃ পুত্রান্ প্রবক্ষ্যামি তবাগ্রতঃ। ঋণং যস্য গৃহীত্বা যঃ প্রয়াতি মরণং কিল॥ অন্নদাতা সুতো ভূত্বা ভ্রাতা বাথ পিতা প্রিয়ঃ। মিত্ররূপেণ বর্ত্তেত অন্তর্দ্দুষ্টঃ সদৈব সঃ॥ গুণং নৈব প্রপশ্যেত স ক্রূরো নিষ্ঠুরাকৃতিঃ। জল্পতে নিষ্ঠুরং বাক্যং সদৈব স্বজনেষু চ॥ নিত্যং মিষ্টং সমশ্নাতি ভোগান্ ভুঞ্জীত নিত্যশঃ। দ্যূতকর্ম্মরতো নিত্যং চৌরকর্ম্মণি নিত্যশঃ॥ গৃহাদ্দ্রব্যং বলাদ্ধর্ত্তা বার্য্যমাণঃ প্রকুপ্যতি। পিতরং মাতরঞ্চৈব কুৎসতে চ দিনে দিনে॥ দ্রাবকস্ত্রাসকশ্চৈব বহুনিষ্ঠুরজল্পকঃ। বঞ্চয়িত্বৈব মুদ্রাঞ্চ হৃত্বা সুখেন তিষ্ঠতি॥ জাতকর্ম্মাদিভির্ব্বাল্যে-দ্রব্যং গৃহ্লাতি দারুণঃ। পুনর্ব্বিবাহসংযোগান্নানাভেদৈরনেকধা॥ এবং সংক্ষীয়তে দ্রব্যং নৈবমেতদ্দদাত্যপি। গৃহক্ষেত্রাদিকং সর্ব্বং মমৈব হি ন সংশয়ঃ॥ পিতরং মাতরঞ্চৈব বদত্যেবং দিনে দিনে। মুদগৈর্মুষলৈশ্চৈব কষাঘাতৈস্তু দারুণৈঃ॥ মৃতে তু তস্মিন্ পিতরি তথা মাতরি নিষ্ঠুরঃ। নিঃস্নেহো নির্ঘৃণশ্চৈব জায়তে নাত্র সংশয়ঃ॥ শ্রাদ্ধকার্য্যাণি দানানি ন করোতি কদাচন। এবম্বিধাস্ত্রয়ঃ পুত্রা ভবন্তি চ মহীতলে॥ ২॥ *॥ রিপুপুত্রং

প্রবক্ষ্যামি তবাগ্রে দ্বিজপুঙ্গব। বাল্যে বয়সি সংপ্রাপ্তে রিপুবদ্বর্ত্ততে সদা॥ পিতরং মাতরঞ্চৈব ক্রীড়মানো হি তাড়য়েৎ। তাড়য়িত্বা প্রয়াত্যেবং প্রহস্যৈব পুনঃ পুনঃ॥ পুনরায়াতি তং তত্র পিতরং মাতরং পুনঃ। সক্রোধো বর্ত্ততে নিত্যং বৈরকর্ম্মণি সর্ব্বদা॥ পিতরং মারয়িত্বা তু মাতরঞ্চ পুনঃ পুনঃ। প্রয়াত্যেবং স দুষ্টাত্মা পূর্ব্ববৈরানুভাবতঃ॥ ৩॥ *॥ অথাতঃ সংপ্রবক্ষ্যামি যস্মাল্লভ্যো ভবেৎ প্রিয়ঃ। জাতমাত্রঃ প্রিয়ং কুর্য্যাদ্বাল্যে নটনক্রীড়নৈঃ॥ বয়ঃ প্রাপ্য প্রিয়ং কুর্য্যান্মাতাপিত্রোরনন্তরং। ভক্ত্যা সংতোষয়েন্নিত্যং তাবুভৌ পরিপালয়েৎ॥ স্নেহেন বচসা চৈব প্রিয়সম্ভাষণেন চ। মৃতৌ গুরূ সমাজ্ঞায় স্নেহেন রুদতে পুনঃ॥ শ্রাদ্ধকর্ম্মাণি সর্ব্বাণি পিণ্ডদানাদিকাং ক্রিয়াং। করোত্যেবং সুদুঃখার্ত্তস্তেভ্যো যাত্রাং প্রযচ্ছতি॥ ঋণত্রয়ান্বিতঃ স্নেহান্নির্যাপয়তি নিশ্চিতঃ। যস্মাল্লভ্যং ভবেৎ কাস্ত প্রযচ্ছতি ন সংশয়ঃ। পুত্রো ভূত্বা মহাপ্রাজ্ঞ অনেন বিধিনা কিল॥ ৪॥ *॥ উদাসীনং প্রবক্ষ্যামি তবাগ্রে প্রিয় সাম্প্রতং॥ উদাসীনেন ভাবেন সদৈব পরিবর্ত্ততে। দদাতি নৈব গৃহ্লাতি ন ক্রুধ্যতি ন তুষ্যতি॥ নৈবোপযাতি সংত্যজ্য উদাসীনো দ্বিজোত্তম। তবাগ্রে কথিতং সর্ব্বং পুত্রাণাং গতিরীদৃশী॥ যথা পুত্রাস্তথা ভার্য্যা পিতা মাতাথ বান্ধবাঃ। ভৃত্যাশ্চান্যে সমাখ্যাতাঃ পশবস্তুরগাস্তথা। গজা মহিষ্যো দাস্যশ্চ ঋণসম্বন্ধিনস্ত্বমী॥ *॥ সুপুত্রলক্ষণং যথা। বশিষ্ঠ উবাচ। পুত্রস্য লক্ষণং পুণ্যং তবাগ্রে প্রবদাম্যহং। পুণ্যপ্রসক্তো যস্যাত্মা সত্যধর্ম্মরতঃ সদা। বুদ্ধিমান্ জ্ঞানসম্পন্নস্তপস্বী বাগ্মিদাম্বরঃ॥ সর্ব্বকর্ম্মসু সন্ ধীরো বেদাধ্যয়নতৎপরঃ। সর্ব্বশাস্ত্রপ্রবক্তা চ দেবব্রাহ্মণপূজকঃ॥ যাজকঃ সর্ব্বযজ্ঞানাং দাতা ত্যাগী প্রিয়ম্বদঃ। বিষ্ণুধ্যানপরো নিত্যং শান্তো দান্তঃ সুহৃৎ সদা॥ পিতৃমাতৃপরো নিত্যং সর্ব্বস্বজনবৎসলঃ। কুলস্য তারকো বিদ্বান্ কুলস্য পরিপোষকঃ। এবংগুণৈঃ সুসংযুক্তঃ সুপুত্রঃ সুখদায়কঃ॥*॥ পুত্রস্য জঙ্গমতীর্থত্বং যথা। সর্ব্বতীর্থাদ্বরং তীর্থং পুত্রতীর্থমুদাহৃতং। যদ্বেণো বৈষ্ণবদ্বেষী সর্ব্বধর্ম্মবহিষ্কৃতঃ। পৃথুনা পুত্রতীর্থেন পবিত্রোঽগাৎ পরং পদং॥ সৎপুত্রং পরমং তীর্থং প্রাপ্য মুচ্যন্তি পূর্ব্বজাঃ। পিতাপি ঋণমুক্তঃ স্যাজ্জাতে পুত্রে মহাত্মনি॥ *॥ বৈষ্ণবপুত্রস্য পূর্ব্বপুরুষত্রাতৃত্বং যথা। বৈষ্ণবো যদি পুত্রঃ স্যাৎ স তারয়তি পূর্ব্বজান্। পিতৃনধস্তনাবংশাস্তারয়ন্ত্যতিপাবনাঃ॥ *॥ কুপুত্রজননে পিতৃণাং নরকগমনং যথা। তথা যদি কুপুত্রঃ স্যাত্তেন মজ্জন্তি পূর্ব্বজাঃ। সুঘোরে নরকে দীনাঃ শপন্তি চ মুহুর্ম্মুহুঃ॥ যথা জলং কুপ্লবেন তরন্মজ্জতি মূঢ়ধীঃ। তথা পিতা কুপুত্রেণ তমস্যন্ধে নিমজ্জতি॥ জাতমাত্রে কুলে জন্তৌ সংশেরতে

পিতামহাঃ। কিমেষোঽধো নয়েদস্মা-ন্নূর্দ্ধং বা বৈষ্ণবো ভবন্॥ ইতি পাদ্মে ভূমিখণ্ডে ১১।১২।১৮।১২০ অধ্যায়ঃ॥*॥ সপ্তবিধপুত্রা যথা। বরজো বীর্য্যজশ্চৈব ক্ষেত্রজঃ পালকস্তথা। বিদ্যামন্ত্রসুতানাঞ্চ গ্রহীতা সপ্তমঃ সুতঃ॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ৫৬ অধ্যায়ঃ॥*॥ পুত্রমুখ-দর্শনে পুণ্যং যথা। পার্ব্বত্যুবাচ। গৃহ-মাগত্য প্রাণেশ তপসাং ফলদায়কং। কল্পে কল্পে ধ্যাসতে যং তং পশ্যাগত্য মন্দিরং॥ শীঘ্রং পুত্রমুখং পশ্য পুণ্যবীজং মহোৎসবং। পুন্নামনরকত্রাণকারণং ভব-তারণং॥ স্নাতঞ্চ সর্ব্বতীর্থেষু সর্ব্বযজ্ঞেষু দক্ষিণা। পুত্রস্য দর্শনস্যাস্য কলাং নার্হন্তি ষোড়শীং॥ সর্ব্বদানেন যৎ পুণ্যং যৎ পৃথিব্যাঃ প্রদক্ষিণং। পুত্রদর্শনপুণ্যস্য কলাং নার্হন্তি ষোড়শীং॥ সর্ব্বৈস্তপোভি-র্যৎ পুণ্যং যদেবানশনৈর্ব্রতৈঃ। সৎপুত্রো-দ্ভবপুণ্যস্য কলাং নার্হন্তি ষোড়শীং॥ যদ্-বিপ্রভোজনৈঃ পুণ্যং যদেব সুরসেবনৈঃ। সৎপুত্রপ্রাপ্তিপুণ্যস্য কলাং নার্হন্তি ষোড়শীং॥ ইতি ব্রহ্মবৈবর্ত্তে গণপতি-খণ্ডে ৯ অধ্যায়ঃ॥*॥ পুত্রোৎসববিধি-র্যথা। পরং পুত্রোৎসবং নন্দশ্চকার পরমাদরাৎ। দদৌ যশোদা গোপীভ্যো ব্রাহ্মণেভ্যো দদৌ মুদা। ধনানি নানা-বস্তূনি তৈলসিন্দূরমেব চ॥ অপি চ। নন্দঃ সচেলঃ স্নাত্বা চ ধৃত্বা ধৌতে চ বাসসী। পারম্পর্য্যবিধং তত্র চকার হৃষ্টমানসঃ॥ ব্রাহ্মণান্ ভোজয়ামাস কারয়ামাস মঙ্গলং। বাদ্যানি বাদয়ামাস বন্দিভ্যশ্চ দদৌ ধনং॥ ততো নন্দশ্চ সানন্দং ব্রাহ্মণেভ্যো দদৌ ধনং। সদ্রত্নানি প্রবালানি হীরকাণি চ সাদরং॥ তিলানাং পর্ব্বতান্ সপ্ত সুবর্ণং কাঞ্চনং মুনে। রৌপ্যং ধান্যাচলং বস্ত্রং গোসহস্রং মনোহরং॥ দধি দুগ্ধং শর্করাঞ্চ নবনীতং ঘৃতং মধু। মিষ্টান্নং লড্ডু-কৌঘঞ্চ স্বাদূনি মোদকানি চ॥ ভূমিঞ্চ সর্ব্বশস্যাঢ্যাং বায়ুবেগাংস্তুরঙ্গমান্। তাম্বূ-লানি চ তৈলানি দত্ত্বা হৃষ্টো বভূব হ॥*॥ পুত্রপ্রশংসা যথা। ধনং ধান্যঞ্চ রত্নং বা তৎ সর্ব্বং পুত্রহেতুকং। ন ভক্ষিতং যৎ পুত্রেণ তদ্দ্রব্যং নিষ্ফলং ভুবি॥ শতকূপা-ধিকা বাপী শতবাপীসমং সরঃ। সরঃ-শতাধিকো যজ্ঞঃ পুত্রো যজ্ঞশতাদ্বরঃ॥ তপোদানোদ্ভবং পুণ্যং জন্মান্তরসুখপ্রদং। সুখপ্রদোঽপি সৎপুত্রঃ প্রাণেভ্যোঽপি সুনিশ্চিতং। পুত্রাদপি পরো বন্ধুর্ন ভূতো ন ভবিষ্যতি॥*॥ পুত্রাৎ পরাজয়ে আনন্দযুক্তত্বং যথা। নন্দঃ সপুলকো হৃষ্টঃ সভায়াং সাশ্রুলোচনঃ। আনন্দযুক্তা মনুজা যদি পুত্রৈঃ পরাজিতাঃ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ৯।১৪।২১ অধ্যায়ঃ॥*॥ বহবঃ পুত্রাঃ কাম্যাঃ। যথা। এষ্টব্যা বহবঃ পুত্রা যদ্যেকোঽপি গয়াং ব্রজেৎ। যজেদ্বা চাশ্বমেধেন নীলং বা বৃষমুৎ-সৃজেৎ॥*॥ মাতাপিত্রোরাজ্ঞাকারি-কনিষ্ঠপুত্রস্যাপি রাজ্যভাগিত্বং যথা। যযাতিরুবাচ। পুত্রো যস্ত্বানুবর্ত্তেত স রাজা পৃথিবীপতিঃ। ভবন্তঃ প্রতিজানন্তু পুরু

রাজ্যেঽভিষিচ্যতাং ॥ প্রকৃতয় ঊচুঃ। যঃ পুত্রো গুণসম্পন্নো মাতাপিত্রোর্হিতঃ সদা। সর্ব্বং সোঽর্হতি কল্যাণং কনীয়ানপি স প্রভুঃ ॥ ইতি মাৎস্যে ২২।৩৪ অধ্যায়ঃ ॥*॥ সৎপুত্রোৎপত্তিমাত্রেণ পুন্নামনরকত্রাণং স্বর্গগমনঞ্চ যথা। সৎপুত্রেণ মুনিশ্রেষ্ঠাঃ সমুৎপন্নেন দুর্ম্মতিঃ। উত্ততারাম্বিয়াৎ স্বর্গং পুন্নামনরকাদ্দ্রুতং ॥ ইত্যগ্নিপুরাণং ॥ অপি চ। সৎপুত্রেণ চ জাতে চ বেণোঽপি ত্রিদিবং যযৌ। পুন্নামনরকাত্রাতঃ স তেন সুমহাত্মনা ॥ ইতি বিষ্ণুপুরাণং ॥*॥ বিদ্যাদিরহিতস্য পুত্রস্য নিন্দা যথা। তয়া গবা কিং ক্রিয়তে যা ন দোগ্ধ্রী ন গর্ব্বিণী। কোঽর্থঃ পুত্রেণ জাতেন যো ন বিদ্বান্ন ধার্ম্মিকঃ ॥ একেনাপি সুপুত্রেণ বিদ্যাযুক্তেন ধীমতা। কুলং পুরুষসিংহেন চন্দ্রেণ গগনং যথা ॥ একেনাপি সুবৃক্ষেণ পুষ্পিতেন সুগন্ধিনা। বনং সুবাসিতং সর্ব্বং সুপুত্রেণ কুলং যথা ॥ একো হি গুণবান্ পুত্রো নির্গুণেন শতেন কিং। চন্দ্রো হন্তি তমাংস্যেকো ন চ জ্যোতিঃসহস্রশঃ ॥ * ॥ লালয়েৎ পঞ্চ বর্ষাণি দশ বর্ষাণি তাড়য়েৎ। প্রাপ্তে তু ষোড়শে বর্ষে পুত্রং মিত্রবদাচরেৎ ॥ * ॥ জায়মানো হরেদ্দারান্ বর্দ্ধমানো হরেদ্ধনং। ম্রিয়মাণো হরেৎ প্রাণান্ নাস্তি পুত্রসমো রিপুঃ ॥ * ॥ শৌর্য্যে তপসি দানে বা যস্য ন প্রথিতং যশঃ। বিদ্যায়ামর্থলাভে বা মাতুরুচ্চার এব সঃ ॥ ইতি গারুড়ে ১১৪।১১৫ অধ্যায়ঃ ॥ * ॥ স চ মধ্যমোত্তমাধমভেদেন ত্রিবিধঃ। যথা। যদুপাত্তং যশঃ পিত্রা ধনং বীর্য্যমথাপি বা। তন্ন হাপয়তে যস্তু স নরো মধ্যমঃ স্মৃতঃ ॥ তদ্বীর্য্যাভ্যধিকং যস্তু পুনরন্যৎ স্বশক্তিতঃ। নিষ্পাদয়তি তং প্রাজ্ঞা বদন্তি নরমুত্তমং ॥ যঃ পিত্রা সমুপাত্তানি ধনবীর্য্যযশাংসি চ। ন্যূনতাং নয়তি প্রাজ্ঞাস্তমাহুঃ পুরুষাধমং ॥ ইতি মার্কণ্ডেয়পুরাণং ॥ * ॥ অপি চ। উত্তমশ্চিন্তিতং কুর্য্যাৎ প্রোক্তকারী চ মধ্যমঃ। অধমোঽশ্রদ্ধয়া কুর্য্যাদকর্ত্তোচ্চরিতং পিতুঃ ॥ ইতি মহাভারতং ॥

পুত্রকঃ (পুং) পুত্রঃ। শরভঃ। ধূর্ত্তঃ। শৈলবিশেষঃ। বৃক্ষভেদঃ। ইতি মেদিনী ॥ পতঙ্গকঃ। অনুকম্পান্বিতজনঃ। ইতি শব্দরত্নাবলী ॥

পুত্রকন্দা (স্ত্রী) লক্ষ্মণাকন্দঃ। ইতি রাজনির্ঘণ্টঃ ॥

পুত্রকা (স্ত্রী) পুত্রিকা। ইতি শব্দরত্নাবলী ॥

পুত্রজীবঃ (পুং) বৃক্ষবিশেষঃ। জিয়াপুতা ইতি ভাষা। তৎপর্য্যায়ঃ। শ্লীপদাপহঃ ২। ইতি ত্রিকাণ্ডশেষঃ ॥ কুমারজীবঃ ৩ পুত্রঞ্জীবকঃ ৪। ইতি রত্নমালা ॥ পবিত্রঃ ৫ গর্ভদঃ ৬ সুতজীবকঃ ৭। অস্য গুণাঃ। হিমত্বং। বৃষ্যত্বং। শ্লেষ্মগর্ব্ভজীবদাতৃত্বং। চক্ষুষ্যত্বং। পিত্তশমনত্বং। দাহতৃষ্ণানিবারণত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ গুরুত্বং। বাতকারিত্বং। সৃষ্টমূত্রমলত্বং। স্বাদুত্বঞ্চ। পটুত্বং। কটুত্বং। ইতি ভাবপ্রকাশঃ ॥

পুত্রঞ্জীবকঃ (পুং) পুত্রঞ্জীবকবৃক্ষঃ। ইতি রত্নমালা ॥ পুত্রস্য জীবকে ত্রি ॥

পুত্রদা (স্ত্রী) বন্ধ্যাকর্কোটকী। লক্ষ্মণাকন্দঃ। গর্ব্ভদাত্রীক্ষুপঃ। ইতি রাজনির্ঘণ্টঃ॥

পুত্রদাত্রী (স্ত্রী) মালবে প্রসিদ্ধো লতাবিশেষঃ। তৎপর্য্যায়ঃ। বাতারিঃ ২ ভ্রমরী ৩ শ্বেতপুষ্পিকা ৪ বৃতপত্রা ৫ অতিগন্ধালুঃ ৬ বেশীজাতা ৭ সুবল্লরী ৮। অস্যা গুণাঃ। বাতকটূষ্ণকফনাশিত্বং। সুরভিত্বং। সর্ব্বদা পথ্যত্বং। বন্ধ্যাদোষনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

পুত্রপ্রদা (স্ত্রী) ক্ষবিকা। ইতি রাজনির্ঘণ্টঃ॥

পুত্রভদ্রা (স্ত্রী) বৃহজ্জীবন্তী। ইতি রাজনির্ঘণ্টঃ॥

পুত্রশৃঙ্গী (স্ত্রী) অজশৃঙ্গী। ইতি রাজনির্ঘণ্টঃ॥

পুত্রশ্রেণী (স্ত্রী) মূষিকপর্ণী। ইতি রত্নমালা॥

পুত্রসূঃ (স্ত্রী) পুত্রজনিকা। যথা। পুত্রসূঃ পুণ্যভূমিঃ স্যাদ্ধনসূঃ পুত্রিকাপ্রসূঃ। ইতি শব্দরত্নাবলী॥

পুত্রান্নাদঃ (ত্রি) পুত্রান্নভোজী। তৎপর্য্যায়ঃ। কুটীচকঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥

পুত্রিকা (স্ত্রী) কন্যা। তৎপর্য্যায়ঃ। আত্মজা ২ দুহিতা ৩ পুত্রী ৪ তনুজা ৫ সুতা ৬ অপত্যং ৭ পুত্রকা ৮ স্বজা ৯ তনয়া ১০ নন্দিনী ১১। ইতি শব্দরত্নাবলী॥ পুত্তলিকা। যাবতূলকঃ। ইতি মেদিনী॥

পুত্রিকাপুত্রঃ (পুং) পুত্রিকায়াঃ সুতঃ। স চ ঔরসসমঃ। যথাহ বশিষ্ঠঃ। অভ্রাতৃকাং প্রদাস্যামি তুভ্যং কন্যামলঙ্কৃতাং। অস্যাং যো জায়তে পুত্রঃ স মে পুত্রো ভবেদিতীতি॥ অথবা পুত্রিকৈব সুতঃ পুত্রিকাসুতঃ সোঽপ্যৌরসসম এব পিত্রবয়বানামল্পত্বান্মাত্রবয়বানাং বাহুল্যাচ্চ। যথাহ বশিষ্ঠঃ। দ্বিতীয়ঃ পুত্রিকৈবেতি। দ্বিতীয়ঃ পুত্রঃ কন্যৈবেত্যর্থঃ। ইতি মিতাক্ষরা॥

পুত্রিকাপ্রসূঃ (স্ত্রী) পুত্রিকাজননী। তৎপর্য্যায়ঃ। ধনসূঃ ২। ইতি শব্দরত্নাবলী॥

পুত্রিকাসুতঃ (পুং) পুত্রিকায়াঃ পুত্রঃ। পুত্রিকৈব পুত্রঃ। অস্য প্রমাণং পুত্রিকাপুত্রশব্দে দ্রষ্টব্যং॥

পুত্রিণী (স্ত্রী) পুত্রবতী। সর্ব্বাসামেকপত্নীনামেকা চেৎ পুত্রিণী ভবেৎ। সর্ব্বাস্তাস্তেন পুত্রেণ প্রাহ পুত্রবতীর্মনুঃ॥ ইতি দায়ভাগধৃতমনুবচনং॥

পুত্রী [ন্] (পুং) পুত্রযুক্তঃ। পুত্রশব্দাদস্ত্যর্থে ইন্প্রত্যয়নিষ্পন্নঃ। যথা। জ্যেষ্ঠেন জাতমাত্রেণ পুত্রী ভবতি মানবঃ। পিতৃণামনৃণশ্চৈব স তস্মাল্লব্ধুমর্হতি॥ ইতি মনুঃ॥

পুত্রী (স্ত্রী) সুতা। ইতি হলায়ুধঃ॥ অস্যাঃ পর্য্যায়াঃ পুত্রিকাশব্দে দ্রষ্টব্যাঃ। বৃক্ষবিশেষঃ। ইতি শব্দচন্দ্রিকা॥

পুত্রীয়ং (ত্রি) পুত্র্যং। পুত্রসম্বন্ধি। পুত্রস্যেদমিত্যর্থে ঈয়প্রত্যয়নিষ্পন্নং। ইতি ব্যাকরণং॥

পুত্রেষ্টিঃ } (স্ত্রী) পুত্রনিমিত্তকযাগবিশেষঃ।
পুত্রেষ্টিকা } ইতি জটাধরঃ॥ যথা। গৃহাত্ব। পঞ্চবর্ষীয়ং পুত্রেষ্টিং প্রথমঞ্চরেৎ। ইতি স্মৃতিঃ॥

পুত্রৌ (পুং) পুত্রদুহিতরৌ। দ্বিবচনান্তোঽয়ং। ইত্যমরঃ॥

পুত্র্যং (ত্রি) পুত্রীয়ং। পুত্রনিমিত্তসংযোগঃ পুত্রনিমিত্তোৎপাতো বা। ইতি পাণিনিঃ॥

পুথ ই কুস্থে। ইতি কবিকল্পদ্রুমঃ॥ পঞ্চমস্বরী। ই পুন্থ্যতে। অন্তঃস্থপ্রথমাদিরয়মিত্যন্যে। পুম্থতি। ইতি দুর্গাদাসঃ॥

পুথ ক ত্বিষি। ইতি কবিকল্পদ্রুমঃ॥ ক পোথয়তি। ত্বিষি দীপ্তৌ। ইতি দুর্গাদাসঃ॥

পুথ য হিংসে। ইতি কবিকল্পদ্রুমঃ॥ য পুথ্যতি পুপোথ। ইতি দুর্গাদাসঃ॥

পুদ্গলঃ (পুং) আত্মা। দেহঃ। ইতি শব্দরত্নাবলী॥ যথা। স্থূলা মধ্যাস্তথা সূক্ষ্মাঃ সূক্ষ্মাৎ সূক্ষ্মতরাশ্চ যে। দেহভেদা ভবান্ সর্ব্বে যে কেচিৎ পুদ্গলাশ্রয়াঃ॥ ইতি বিষ্ণুপুরাণে ৫ অংশে ২০ অধ্যায়ঃ॥ পূর্য্যন্তে গলন্তি চেতি পুদ্গলাঃ। বুদ্ধ্যাপক্ষয়ভাজো যেঽবয়বাস্তদাশ্রয়া দেহভেদাঃ। যথাহুঃ। পূরণাদ্গলনাদ্দেহে পুদ্গলাঃ পরমাণব ইতি। ইতি তট্টীকায়াং শ্রীধরস্বামী॥

পুদ্গলঃ (ত্রি) সুন্দরাকারঃ। ইতি শব্দরত্নাবলী॥ রূপাদিমদদ্রব্যং। ইতি হেমচন্দ্রঃ॥

পুনঃ [র্] ব্য অপ্রথমঃ। ভেদঃ। অবধারণং। ইত্যমরঃ॥ অধিকারঃ। পক্ষান্তরং। ইতি মেদিনী॥

পুনঃপুনঃ [র্] ব্য বারংবারং। তৎপর্য্যায়ঃ। মুহুঃ ২ শশ্বৎ ৩ অভীক্ষ্ণং ৪ অসকৃৎ ৫। ইত্যমরঃ॥ বারংবারেণ ৬ পৌনঃপুন্যং ৭ প্রতিক্ষণং ৮। ইতি শব্দরত্নাবলী॥

পুনঃপুনা (স্ত্রী) নদীবিশেষঃ। পুন্পুনা ইতি ভাষা। যথা। কীকটেষু গয়া পুণ্যা পুণ্যং রাজগৃহে বনং। চ্যবনস্যাশ্রমঃ পুণ্যো নদী পুণ্যা পুনঃপুনা॥ ইতি বায়ুপুরাণে গয়ামাহাত্ম্যং॥

পুনঃসংস্কারঃ (পুং) দ্বিতীয়বারোপনয়নাদিসংস্কারঃ। যথা। পুনর্ব্বসৌ কৃতো বিপ্রঃ পুনঃসংস্কারমর্হতি। ইতি জ্যোতিস্তত্ত্বং॥

পুনরাগমনং (ক্লী) দ্বিতীয়বারাগমনং। ফিরে আসা ইতি ভাষা। যথা। সম্বৎসরব্যতীতে তু পুনরাগমনায় চ। ইতি দুর্গোৎসবপদ্ধতিঃ॥

পুনরুক্তং (ক্লী) পুনর্ব্বারকথনং। যথা। আপাততো যদর্থস্য পৌনরুক্ত্যেব ভাসনং। পুনরুক্তবদাভাসঃ স ভিন্নাকারশব্দগঃ॥ ইতি সাহিত্যদর্পণঃ॥

পুনরুক্তজন্মা [ন্] (পুং) ব্রাহ্মণঃ। ইতি ত্রিকাণ্ডশেষঃ॥

পুনর্জন্ম [ন্] (ক্লী) পুনর্ব্বারোৎপত্তিঃ। যথা। আব্রহ্মভুবনাল্লোকাঃ পুনরাবর্ত্তিনোঽর্জ্জুন। মামুপেত্য তু কৌন্তেয় পুনর্জন্ম ন বিদ্যতে॥ ইতি শ্রীভগবদ্গীতায়াং ৮ অধ্যায়ে ১৬ শ্লোকঃ॥

পুনর্নবঃ (পুং) নখঃ। ইতি হেমচন্দ্রঃ॥

পুনর্নবা (স্ত্রী) শাকবিশেষঃ। তৎপর্য্যায়ঃ। শোথঘ্নী ২ বর্ষাভূঃ ৩ প্রাবৃষায়ণী ৪ কঠিল্লকঃ ৫। এতা অরুণাঃ॥ শ্বেতায়াঃ পর্য্যায়ঃ। বৃশ্চীরাঃ ২ চিরাটিকা ৩। ইতি রত্নমালা॥ বিশাখঃ ৪ কঠিল্লঃ ৫ শশিবাটিকা ৬ পৃথ্বী ৭ সিতবর্ষাভূঃ ৮ ঘনপত্রঃ ৯ কঠিল্লকঃ ১০। অস্যা গুণাঃ। উষ্ণত্বং।

তিক্তত্বং। কফকাসহৃদ্রোগশূলাস্রপাণ্ডু-শোফানিলনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ ভেদকত্বং। রসায়নত্বং। আমদুর্নামব্রধ্নো-দরনাশিত্বঞ্চ। ইতি রাজবল্লভঃ॥ *॥ পুনর্নবা শ্বেতমূলা শোথঘ্নী দীর্ঘপত্রিকা। কটুঃ কষায়ারুচ্যর্শঃপাণ্ডুহৃদ্দীপনী পরা॥ শোফানিলগরশ্লেষ্মহরী ব্রধ্নোদরপ্রণুৎ॥*॥ পুনর্নবা পরা রক্তা রক্তপুষ্পানিলাটিকা। শোথঘ্নী ক্ষুদ্রবর্ষাভূর্বর্ষকেতুঃ কঠিল্লকঃ॥ পুনর্নবারুণা তিক্তা কটুপাকা হিমা লঘুঃ। বাতলা গ্রাহিণী শ্লেষ্মপিত্তরক্তবিনাশিনী॥ ইতি ভাবপ্রকাশঃ॥

পুনর্ভবঃ (পুং) নখঃ। ইত্যমরঃ॥ রক্তপুন-র্নবা। ইতি রাজনির্ঘণ্টঃ॥ পুনর্ব্বার-জাতে ত্রি॥

পুনর্ভবী [ন্] (পুং) আত্মা। ইতি হেম-চন্দ্রঃ॥

পুনর্ভূঃ (স্ত্রী) দ্বিরূঢ়া। তৎপর্য্যায়ঃ। দিধিষূঃ ২। ইত্যমরঃ॥ অক্ষতযোনিত্বাদ্বিধবা পুন-রুহ্যতে। ইত্যসাবন্যস্য ভূত্বা অন্যস্য পুন-র্ভবতীতি ক্বিপি পুনর্ভূঃ। ধিষ্যতে নিন্দিত-তয়া শব্দ্যতে দ্বিধিষূঃ ধিষশব্দে নাম্নীতি কূঃ নিপাতনাদ্দ্বিত্বং। ইতি তট্টীকায়াং ভরতঃ॥ সা ত্রিবিধা। যথা। পরপূর্ব্বা-স্ত্রিয়স্ত্বন্যাঃ সপ্ত প্রোক্তা যথাক্রমং। পুন-র্ভূস্ত্রিবিধা তাসাং স্বৈরিণী তু চতুর্ব্বিধা॥ কন্যৈবাক্ষতযোনির্যা পাণিগ্রহণদূষিতা। পুনর্ভূঃ প্রথমা প্রোক্তা পুনঃসংস্কার-কর্ম্মণা॥ দেশধর্ম্মানবেক্ষ্য স্ত্রী গুরুভির্যা প্রদীয়তে। উৎপন্নসাহসান্যস্মৈ সা দ্বিতীয়া প্রকীর্ত্তিতা॥ উৎপন্নসাহসা উৎ-পন্নব্যভিচারা। অসৎসু দেবরেষু স্ত্রী বান্ধবৈ-র্যা প্রদীয়তে। সবর্ণায় সপিণ্ডায় সা তৃতীয়া প্রকীর্ত্তিতা॥ ইতি মিতাক্ষরা॥*॥ পুনর্ব্বারজাতে ত্রি॥

পুনর্যাত্রা (স্ত্রী) নিবর্ত্তযাত্রা। সা তু আষাঢ়-শুক্লপক্ষীয়রথদ্বিতীয়ানন্তরং তন্নবমদিবস-বিহিতা শ্রীজগন্নাথদেবস্য দক্ষিণমুখযাত্রা। ফিরে রথ ইতি উল্‌টা রথ ইতি চ ভাষা। অস্যা ইতিকর্ত্তব্যতা যাত্রাশব্দে দ্রষ্টব্যা॥

পুনর্ব্বসুঃ (পুং) বিষ্ণুঃ। শিবঃ। কাত্যায়ন-মুনিঃ। লোকভেদঃ। ধনারম্ভঃ। ইতি শব্দ-রত্নাবলী॥ নক্ষত্রবিশেষঃ। স চ ধনু-রাকৃতিপঞ্চতারাত্মকঃ। যথা। মধ্যবর্ত্মনি শরাসনাকৃতাবম্বরস্য সুরমাতৃভে গতাঃ। লিপ্তিকাঃ সুমুখি পঞ্চতারকে পঞ্চপাবক-মিতা ধটোদয়াৎ॥ ইতি কালিদাসকৃত-রাত্রিলগ্ননিরূপণং॥ তস্যাধিষ্ঠাত্রী দেবতা অদিতিঃ। ইতি জাতকঃ॥ তত্র জাতফলং যথা। প্রভূতমিত্রঃ কৃতশাস্ত্রযত্নঃ সদ্রত্ন-কামী বরভূষণাঢ্যঃ। দাতা প্রতাপী বসুধা-ধিপশ্রীঃ পুনর্ব্বসৌ যস্য ভবেৎ প্রসূতিঃ॥ ইতি কোষ্ঠীপ্রদীপঃ॥

পুনর্ব্বসূঃ (পুং) অশ্বিন্যাদিসপ্তবিংশতিনক্ষ-ত্রান্তর্গতসপ্তমনক্ষত্রং। তৎপর্য্যায়ঃ। যামকৌ ২ আদিত্যৌ ৩। ইতি হেম-চন্দ্রঃ॥ দ্বিবচনান্তোঽয়ং॥

পুন্নাগঃ (পুং) স্বনামখ্যাতবৃহৎপুষ্পবৃক্ষ-বিশেষঃ। তৎপর্য্যায়ঃ। পুরুষঃ ২ তুঙ্গঃ ৩ কেশরঃ ৪ দেববল্লভঃ ৫। ইত্যমরঃ॥

৫ ৬ রক্তকেশরঃ ৭। ইতি রত্নমালা॥ পুন্নামা ৮ পাটলক্রুমঃ ৯ রক্তপুষ্পঃ ১০ রক্তরেণুঃ ১১ অরুণঃ ১২। অস্য পুষ্পগুণাঃ। মধুরত্বং। শীতত্বং। সুগন্ধিত্বং। পিত্তনাশিত্বং। ভূরিতো দ্রাবণত্বং। দেবতাপ্রসাদনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ কষায়ত্বং। কফরক্তনাশিত্বঞ্চ। ইতি রাজবল্লভঃ॥ * ॥ সিতোৎপলঃ। জাতীফলঃ। নরশ্রেষ্ঠঃ। পাণ্ডুনাগঃ। ইতি মেদিনী॥

পুন্নাটঃ, পুন্নাড়ঃ (পুং) চক্রমর্দ্দঃ। ইতি রাজনির্ঘণ্টঃ॥

পুন্নামনরকঃ (পুং) পুৎ ইতিনামকনরকবিশেষঃ। তত্র ষোড়শবিধপাপৈঃ পততি। যথা। ব্রহ্মোবাচ। পরদারাভিগমনং পাপানাঞ্চোপসেবনং। পারুষ্যং সর্ব্বভূতানাং প্রথমং নরকং স্মৃতং॥ ফলস্তেয়ং মহাপাপং ফলার্হস্য চ পাটনং। পাটনং বৃক্ষজাতীনাং দ্বিতীয়ং পরিকীর্ত্তিতং॥ বর্জ্যাদানং তথা দ্বিষ্টমবধ্যবধবন্ধনং। বিবাদিত্বমহেতুত্থং তৃতীয়ং নরকং স্মৃতং॥ ভয়দং সর্ব্বসত্ত্বানাং নরভূতিবিনাশনং। ভ্রংশনং নিজধর্ম্মাণাং চতুর্থং নরকং স্মৃতং॥ মারণং মিত্রকৌটিল্যং মিথ্যাভিশপনঞ্চ যৎ। মিষ্টৈকাশনমিত্যুক্তং পঞ্চমঞ্চ বিপাচনং॥ প্ররোহণং যন্ত্রকরং যমনং যোগনাশনং। যানমুখ্যস্য হরণং ষষ্ঠমুক্তং নৃপাচনং॥ রাজভাগস্য হরণং রাজজায়ানিষেবণং। রাজ্যে ত্বহিতকারিত্বং সপ্তমং নরকং স্মৃতং॥ স্তব্ধত্বং লোলুপত্বঞ্চ লব্ধধর্ম্মার্থনাশনং। নানাকর্ম্মকরং প্রোক্তমষ্টমং নরকং স্মৃতং॥ ব্রহ্মস্বহরণঞ্চৈব ব্রাহ্মণানাং বিনিন্দনং। বিরোধো ব্রাহ্মণৈশ্চোক্তো নবমো নরকস্ত্বয়ং॥ শিষ্টাচারবিনাশঞ্চ মিত্রদ্বেষং শিশোর্ব্বধং। শাস্ত্রস্তেয়ং ধর্ম্মশূন্যো দশমং পরিকীর্ত্তিতং॥ ষড়ঙ্গনিধনং ঘোরং ষাড়্গুণ্যপ্রতিষেধনং। একাদশমমেবোক্তং নরকং সদ্ভিরুত্তম॥ সদ্ভিরুক্তং সদা চৈব মনাচারমসৎক্রিয়া। সংস্কারপরিহীণত্বমিদং দ্বাদশমং স্মৃতং॥ হানির্ধর্ম্মার্থকামানামপবর্গস্য হারণং। স্বর্ণহর্ত্তুশ্চ মতিদং ত্রয়োদশমমুচ্যতে॥ সমলং ধর্ম্মহীনঞ্চ যদ্বর্জ্যং যচ্চ দোষজং। চতুর্দ্দশকমেবোক্তং নরকং সদ্বিগর্হিতং॥ অজ্ঞানঞ্চাপ্যনিষ্ঠত্বমশৌচমশুভাবহং। গর্হ্যং তৎ পঞ্চদশকমসত্যবচনানি চ॥ আলস্যং বৈ ষোড়শকমাক্রোশঞ্চ বিশেষতঃ। সর্ব্বস্য চাততায়িত্বমগারেম্বগ্নিদাপনং॥ ইচ্ছা চ পরদারেষু নরকায় নিগদ্যতে। ঈর্ষ্যাভাবশ্চ সভ্যেষু ঔদ্ধত্যন্তু বিগর্হিতং॥ এতৈস্তু পাপৈঃ পুরুষঃ পুন্নামনরকে পতেৎ। পুন্নামনরকং ঘোরং বিনাশং প্রাহ সর্ব্বতঃ॥ এতস্মাৎ কারণাৎ সাধ্যস্ততঃ পুত্রো নিগদ্যতে॥ ইতি বামনে ৫৮ অধ্যায়ঃ॥

পুপ্ফুলঃ (পুং) উদরস্থবায়ুঃ। ইতি ভূরিপ্রয়োগঃ॥

পুপ্ফুসঃ (পুং) পদ্মবীজাধারঃ। তৎপর্য্যায়ঃ। বীজকোষঃ ২ বরাটকঃ ৩। বামপার্শ্বস্থ-

মলাশয়ঃ। ফোঁফড়া ইতি ফুলঘরা ইতি চ ভাষা। তৎপর্য্যায়ঃ। কোষ্ঠঃ ২। ইতি শব্দচন্দ্রিকা ॥ রক্তফেনজঃ ৩। ইতি হেমচন্দ্রঃ ॥ তিলকং ৪ ক্লোম ৫। ইত্যমরঃ ॥ ক্লোমং ৬। ইতি ভরতঃ ॥ ফুপ্ফুসোঽপি পাঠঃ ॥

পুমান্ [স্] (পুং) মনুষ্যজাতিপুরুষঃ। তৎপর্য্যায়ঃ। পঞ্চজনঃ ২ পুরুষঃ ৩ পূরুষঃ ৪ না ৫। ইত্যমরঃ ॥ মনুষ্যজাতিঃ। ইতি কেচিদিতি ভরতঃ ॥ পুংলিঙ্গমাত্রঞ্চ ॥

পুর শ অগ্রগত্যাং। ইতি কবিকল্পদ্রুমঃ ॥ শ পুরতি জ্যেষ্ঠঃ কনিষ্ঠস্য অগ্রে গচ্ছতীত্যর্থঃ। পোরিতা। ইতি দুর্গাদাসঃ ॥

পুরং (ক্লী) গেহং। দেহঃ। পাটলিপুত্রঃ। পুষ্পাদীনাং দলাবৃত্তিঃ। ইতি মেদিনী ॥ নাগরমুস্তা। ইতি রত্নমালা ॥ চর্ম্ম ইতি শব্দরত্নাবলী ॥ গৃহোপরিগৃহং। ইতি বিশ্বঃ ॥

পুরং (ক্লী স্ত্রী) হট্টাদিবিশিষ্টস্থানং। ইতি শ্রীধরস্বামী ॥ বহুগ্রামীয়ব্যবহারস্থানং। ইত্যমরটীকায়াং ভরতঃ ॥ তৎপর্য্যায়ঃ। পূঃ ২ পুরী ৩ নগরং ৪ পত্তনং ৫ স্থানীয়ং ৬ কটকং ৭ পট্টং ৮ নিগমঃ ৯ পুটভেদনং ১০। ইতি শব্দরত্নাবলী ॥*॥ তস্য লক্ষণাদি যথা। মৎস্য উবাচ। রাজা সহায়সংযুক্তঃ প্রভূতযবসেন্ধনং। রম্যমাণস্তু সামন্তং মধ্যমন্দেশমাবসেৎ ॥ বৈশ্যশূদ্রজনপ্রায়মনাহার্য্যন্তথা পরৈঃ। কিঞ্চিদ্ব্রাহ্মণসংযুক্তং বহুকর্ম্মকরন্তথা ॥ অদৈবমাতৃকং রম্যমনুরক্তজনান্বিতং। করৈরপীড়িতং বাপি বহুপুষ্পফলন্তথা ॥ অগম্যং পরচক্রাণাং তদ্বাসগৃহমাপদি। সমদুঃখসুখং রাজ্ঞঃ সততং প্রিয়মাস্থিতং ॥ সরীসৃপবিহীনঞ্চ ব্যাড়তস্করবর্জ্জিতং। এবম্বিধং যথালাভং রাজা বিষয়মাবসেৎ ॥*॥ এতদ্দুর্গং নৃপঃ কুর্য্যাৎ ষণ্ণামেকতমং বুধঃ। বনদুর্গং মহীদুর্গং নরদুর্গন্তথৈব চ ॥ বার্ক্ষঞ্চৈবাম্বুদুর্গঞ্চ গিরিদুর্গঞ্চ পার্থিব। সর্ব্বেষামেব দুর্গাণাং গিরিদুর্গং প্রশস্যতে ॥ দুর্গঞ্চ পরিঘোপেতং চয়াট্টালকসংযুতং। শতঘ্নীযন্ত্রমুখ্যৈশ্চ শতশশ্চ সমাবৃতং ॥ গোপুরং সকবাটঞ্চ তত্র স্যাৎ সুমনোহরং। সপতাকং গজারূঢ়ো যেন রাজা বিশেৎ পুরং ॥ * ॥ চতস্রশ্চ তথা কার্য্যা বীথয়ঃ সর্ব্বতোমুখাঃ। একস্মিংস্তত্র বীথ্যগ্রে দেববেশ্ম ভবেদ্দৃঢ়ং ॥ দ্বিতীয়ে বাপি বীথ্যগ্রে রাজবেশ্ম বিধীয়তে। ধর্ম্মাধিকরণং কার্য্যং বীথ্যগ্রে চ তৃতীয়কে ॥ চতুর্থে চৈব বীথ্যগ্রে গোপুরস্তু বিধীয়তে ॥*॥ আয়তং চতুরস্রং বা বৃত্তং বা কারয়েৎ পুরং। মুক্তিহীনং ত্রিকোণঞ্চ যবমধ্যন্তথৈব চ ॥ অর্দ্ধচন্দ্রপ্রকারঞ্চ বজ্রাকারঞ্চ কারয়েৎ ॥ অর্দ্ধচন্দ্রং প্রশংসন্তি নদীতীরেষু তদ্বসেৎ। অন্যত্র তন্ন কর্ত্তব্যং প্রযত্নেন বিজানতা ॥*॥ রাজ্ঞা কারাগৃহং কার্য্যং দক্ষিণে রাজবেশ্মনঃ। তস্যাপি দক্ষিণে ভাগে গজস্থানং বিধীয়তে ॥ গজানাং প্রাঙ্মুখা শালা কর্ত্তব্যা বাপ্যুদঙ্মুখা। আগ্নেয়ে চ তথা ভাগে আয়ুধাগারমিষ্যতে ॥ মহানসঞ্চ ধর্ম্মজ্ঞ কর্ম্মশালাস্তথাপরাঃ।

গৃহং পুরোধসঃ কার্য্যং বামতো রাজবেশ্মনঃ ॥ মন্ত্রিবেদবিদাঞ্চৈব চিকিৎসাকর্ত্তুরেব চ ॥ তত্রৈব চ তথা ভাগে কোষ্ঠাগারং বিধীয়তে ॥ গবাং স্থানং তথৈবাত্র তুরগাণাস্তথৈব চ। উত্তরাভিমুখা শ্রেণী তুরগাণাং বিধীয়তে ॥ দক্ষিণাভিমুখা বাথ পরিশিষ্টাস্তু গর্হিতাঃ। *। তুরগাস্তু তথা ধার্য্যাঃ প্রদীপৈঃ সার্ব্বরাত্রিকৈঃ ॥ কুক্কুটান্ বানরাংশ্চৈব মর্কটাংশ্চ নরাধিপ। ধারয়েদশ্বশালায়াং সবৎসাং ধেনুমেব চ ॥ অজাশ্চ ধার্য্যা যত্নেন তুরগাণাং হিতৈষিণা। গোগজাশ্বাদিশালাসু তৎপুরীষস্য নির্গমং। অস্তং গতে ন কর্ত্তব্যং দেবদেবে দিবাকরে॥ *॥ ততস্তত্র যথাস্থানং রাজা বিজ্ঞায় সারথিং। দদ্যাদাবসথস্থানং সর্ব্বেষামনুপূর্ব্বশঃ॥ যোধানাং শিল্পিনাঞ্চৈব সর্ব্বেষামবিশেষতঃ। দদ্যাদাবসথান্ দুর্গে মন্ত্রকালবিদাং শুভান্॥ গোবৈদ্যানশ্ববৈদ্যাংশ্চ গজবৈদ্যাংস্তথৈব চ। আহরেত ভৃশং রাজা দুর্গে পরবলারুজঃ॥ কুশীলবানাং বিপ্রাণাং দুর্গে স্থানং বিধীয়তে। ন বহুনামতো দুর্গং বিনা কার্য্যং তথা ভবেৎ॥ সর্ব্বং নিরর্থকং কার্য্যং বিনা দুর্গং মহীপতে। দুর্গে যন্ত্রাঃ প্রকর্ত্তব্যা নানাপ্রহরণান্বিতাঃ। সহস্রঘাতিনো রাজংস্তৈস্তু রক্ষা বিধীয়তে ॥ *॥ দুর্গদ্বারাণি গুপ্তানি কার্য্যাণ্যপি চ ভূভুজা। সঞ্চয়শ্চাত্র সর্ব্বেষামায়ুধানাং বিধীয়তে॥ ধনুষাং ক্ষেপণীয়ানাং তোমরাণাঞ্চ ভার্গব। শরাণামথ খড়্গানাং কবচানাস্তথৈব চ॥ লগুড়ানাঞ্চ কুন্তানাং পরিঘৈঃ সহ পার্থিব। অশ্মনাঞ্চ প্রভূতানাং মুদ্গরাণাস্তথৈব চ॥ ত্রিশূলানাং পট্টিশানাং কুণপানাঞ্চ পার্থিব। প্রাসানাঞ্চ সশূলানাং শক্তীনাঞ্চ নরোত্তম॥ পরশ্বধানাং চক্রাণাং বর্ম্মণাঞ্চর্ম্মভিঃ সহ। কুদ্দালরজ্জুবেত্রাণাং পিটকানাস্তথৈব চ॥ হেমুকানাঞ্চ দাত্রাণামঙ্গারস্য চ সঞ্চয়ঃ। সর্ব্বেষাং শিল্পভাণ্ডানাং সঞ্চয়শ্চাত্র ইষ্যতে॥*॥ বাদিত্রাণাঞ্চ সর্ব্বেষামৌষধীনাস্তথৈব চ। যবসানাং প্রভূতানামিন্ধনস্য চ সঞ্চয়ঃ॥ গুড়ানাং সর্ব্বতৈলানাং গোরসানাস্তথৈব চ। বসানামথ মজ্জানাং স্নায়ূনামস্থিভিঃ সহ॥ গোচর্ম্মপটহানাঞ্চ ধান্যানাং সর্ব্বতস্তথা। তথৈব পর্পটানাঞ্চ যবগোধূময়োরপি॥ রত্নানাং সর্ব্ববস্ত্রাণাং লোহানাঞ্চাপ্যশেষতঃ। কলায়মুদ্গমাষাণাং চণকানাং তিলৈঃ সহ॥ তথা চ সর্ব্বশস্যানাং পাংশুগোময়য়োরপি। শণসর্জ্জরসং ভূর্জজতুলাক্ষাশ্চ টঙ্কণং॥ রাজা সঞ্চিনুয়াদ্দুর্গে যচ্চান্যদপি কিঞ্চন ॥*॥ কুম্ভাশ্চাশীবিষাঃ কার্য্যা ব্যালসিংহাদয়স্তথা। মৃগাশ্চ পক্ষিণশ্চৈব বিরুদ্ধা যে পরস্পরং॥ স্থানানি চ বিরুদ্ধানাং সুগুপ্তানি পৃথক্ পৃথক্। কর্ত্তব্যানি মহাভাগ যত্নেন পৃথিবীক্ষিতা॥ উক্তানি চাপ্যনুক্তানি রাজদ্রব্যাণ্যশেষতঃ। সুগুপ্তানি পুরে কুর্য্যাজ্জনানাং হিতকাম্যয়া ॥*॥ জীবকর্ষভকাকোলী আমলক্যঃ পরূষকং। শালপর্ণী পৃশ্নিপর্ণী মুদ্গপর্ণী তথৈব চ॥ মাষপর্ণী চ মেদে দ্বে

শারিবে দ্বে বলাত্রয়ং। বীরা শ্বসন্তী বৃষ্টীয়া বৃহতী কণ্টকারিকা॥ ভৃঙ্গী শৃঙ্গাটকী দ্রোণী বর্ষাভূর্দর্ভরেণুকা। মধুপর্ণী বিদার্য্যৌ দ্বে মহাক্ষুদ্রা মহাতপা॥ ধন্বনা সহ দেবাহ্বা কটুকৈরগুকং বিষং। পর্ণাশনাকমৃদ্বীকা ফল্গুখর্জ্জুরযষ্টিকা॥ শুক্রাতিশুক্রকাশ্মর্য্যচ্ছত্রাতিচ্ছত্রবীরণাঃ॥ *॥ ইক্ষুরিক্ষুবিকারাশ্চ ফাণিতাদ্যাশ্চ সত্তম। সিংহী চ সহদেবী চ বিশ্বেদেবাটরূষকং॥ মধুকং পুষ্পকং সাক্ষা শতপুষ্পা মধুলিকা। শতাবরীমধূকে চ পিয়ালন্তালমেব চ॥ আত্মগুপ্তা কট্‌ফলাখ্যা দারদা রাজশীর্ষিকা। রাজসর্ষপধন্যাকমৃষ্যপ্রোক্তা তথোৎকটা॥ কালশাকং পদ্মবীজং গোবল্লী মধুবল্লিকা। শীতপাকী কুলিঙ্গাক্ষী কাকজিহ্বোরুপত্রিকা॥ ইর্ব্বারুত্রপুষৌ চোভৌ গুঞ্জারকপুনর্নবে। কশেরুকা তু কাশ্মীরী বিশ্বশালূককেশরং॥ *॥ শূকধান্যানি সর্ব্বাণি শমীধান্যানি যানি চ। ক্ষীরং ক্ষৌদ্রং তথা শুক্রং মজ্জা তৈলং বসা ঘৃতং॥ নিকোচাভিষুকাস্ফোটং বাতাসামারুমালকং। এবমাদীনি চান্যানি বিজ্ঞেয়ো মধুরো গণঃ॥ রাজা সঞ্চিনুয়াৎ সর্ব্বং পুরে নিরবশেষতঃ।*। দাড়িমাম্রাতকাম্রাশ্চ তিন্তিড়ীকাম্লবেতসং॥ ভব্যং কর্কন্ধু লকুচং করমর্দ্দকরূষকং। বীজপূরককাণ্ডীরং মালতী রাজবন্ধুকং॥ কৌটকদ্বয়পর্ণানি দ্বয়োরম্লিকয়োরপি। পারেবতং নাগরকং প্রাচীনারুকমেব চ॥ কপিত্থামলকী চুক্রং ফলং দন্তশঠস্য চ। জম্বীরং নবনীতঞ্চ সৌবীরকতুষোদকে॥ সুরারসঞ্চ মদ্যানি মণ্ডতক্রদধীনি চ। শুক্তানি চৈব সর্ব্বাণি জ্ঞেয়ান্যম্লগণং দ্বিজাঃ॥ এবমাদীনি সর্ব্বাণি রাজা সঞ্চিনুয়াৎ পুরে॥ *॥ সৈন্ধবোদ্ভিদপাটেয়পাক্যসামুদ্ররোমকং। কুপ্যসৌবর্চ্চলবিটং বালকেয়ং যবাহ্বয়ং॥ ঔষক্ষারং কালভস্ম বিজ্ঞেয়ো লবণো গণঃ। এবমাদীনি সর্ব্বাণি রাজা সঞ্চিনুয়াৎ পুরে॥ *॥ পিপ্পলী পিপ্পলীমূলং চব্যচিত্রকনাগরং। কুঠেরকং সমরিচং শিগ্রুভল্লাতসর্ষপাঃ॥ কুষ্ঠাজমোদা কিণিহী হিঙ্গুমূলকধান্যকং। কারবী কুঞ্চিকাজাজ্যঃ সুমুখঃ কালমালিকা॥ ফণিজ্ঝকোঽথ লশুনং ভূস্তৃণং সুরসস্তথা। কায়স্থা চ বয়ঃস্থা চ হরিতালং মনঃশিলা॥ অমৃতা চ রুদন্তী চ রোহিষং কুঙ্কুমং তথা। বচা এরণ্ডকাণ্ডীরং শল্লকী হপুষা তথা॥ সর্ব্বপিত্তানি মূত্রাণি প্রায়ো হরিতকানি চ। সঙ্গরাণি চ মূলানি ষষ্টিখারিবিষাণি চ॥ ফলানি চৈব চ তথা সূক্ষ্মৈলা হিঙ্গুপত্রিকা। এবমাদীনি চান্যানি গণঃ কটুকসংজ্ঞকঃ। রাজা সঞ্চিনুয়াদ্দুর্গে প্রযত্নেন নৃপোত্তম॥ *॥ মুস্তচন্দনহ্রীবেরকৃতমালকদারবঃ। হরিদ্রামলকোশীরং রক্তমালকবস্তুকং॥ দূর্ব্বাপটোলকটুকাদন্তিত্বকপত্রকচ্ছুরাঃ। কিরাততিক্তকং নিম্বং বিষা চাতিবিষা তথা॥ তালীশপত্রং তগরং সপ্তপর্ণবিকঙ্কতাঃ। কাকোড়ু ম্বরকোদীচ্যসুষব্যঃ কিণিহী তথা॥ ষড়্‌গ্রন্থা রোহিণী মাংসী পর্পটং মদয়ন্তিকা। রসাঞ্জনং

ভৃঙ্গরাজং পতঙ্গী পরিপেলবং ॥ দুস্পর্শা গুরুণী কামা শ্যামাকং গন্ধনাকুলী। চতুস্পর্শী ব্যাঘ্রনখমম্বকা চতুরঙ্গুলা ॥ রম্ভা চৈব কুথাপুষ্পী তারাস্ফোতা হরেণুকা। বেত্রাগ্রো বেতসস্তুম্বী বিষাণী লোহমঞ্জনং ॥ মালতী করতিক্তাখ্যা বিষাঙ্গী জিহ্বিকা তথা। পর্য্যটঞ্চ গুড়ূচী চ গণস্তিক্তকসংজ্ঞকঃ॥ এবমাদীনি চান্যানি রাজা সঞ্চিনুয়াৎ পুরে। *। অভয়ামলকে চোভে তথৈব চ বিভীতকং॥ প্রিয়ঙ্গু ধাতকীপুষ্পং মোচলোধ্রার্জ্জুনাসনাঃ। অনন্তাস্ত্রী মুরানঙ্গা শ্যোনাকং কড্যলং তথা ॥ ভূর্জপত্রং শিলোদ্ভেদং পাটলাপত্রলোমকং। সমঙ্গা ত্রিবৃতামূলং কার্পাসা গৈরিকাঞ্জনং ॥ বিদ্রুমং সমধূচ্ছিষ্টং কুম্ভীকাকুমুদোৎপলং। ন্যগ্রোধোডুম্বরাশ্বত্থকিংশুকা শিংশপা শমী॥ পিয়ালপিলুকা শালশিরীষং পদ্মকস্তথা। বিল্বোঽগ্নিমন্থঃ প্লক্ষশ্চ শ্যামাকযবকোদ্রবং॥ রাজাদনং করীরঞ্চ ধান্যকপ্রিয়কৌ তথা। শাকোটাশোকবদরাঃ কদম্বখদিরদ্বয়ং॥ এষাং পত্রাণি সারাণি মূলানি কুসুমানি চ। এবমাদীনি চান্যানি কষায়াখ্যো গণো মতঃ॥ প্রযত্নেন নৃপশ্রেষ্ঠ রাজা সঞ্চিনুয়াৎ পুরে। *। কীটাশ্চ মারণে যোগ্যা ব্যঙ্গতায়াস্তথৈব চ॥ বাতধূমাম্বুমার্গাণাং দূষণানি তথৈব চ। ধার্য্যাণি পার্থিবৈর্দুর্গে তানি বক্ষ্যামি ভারত॥ বিষাণাদ্ধারণং কার্য্যং প্রযত্নেন মহীভুজা। বিচিত্রাশ্চ গদা ধার্য্যা বিষপ্রশমনাস্তথা॥ রক্ষোভূতপিশাচঘ্নাঃ পাপঘ্নাঃ পুষ্টিবর্দ্ধনাঃ। কলাবিদশ্চ পুরুষাঃ পুরে ধার্য্যাঃ প্রযত্নতঃ ॥*॥ ভীতান্ প্রমত্তান্ কুপিতান্ তথৈব চ বিমানিতান্। কুভৃত্যান্ পাপশীলাংশ্চ ন রাজা বাসয়েৎ পুরে॥ যন্ত্রায়ুধাট্টালচয়োপপন্নং সমপ্রধানৌষধিসংপ্রযুক্তং। বণিগ্জনৈশ্চান্বিতমাবসেত দুর্গং সুগুপ্তং নৃপতিঃ সদৈব॥ ইতি মাৎস্যে রাজধর্ম্মে দুর্গসম্পত্তির্নাম ১৯১ অধ্যায়ঃ॥ * ॥ পুরে বর্ণনীয়ানি যথা। পুরে হট্টপ্রতোলী চ পরিখাতোরণধ্বজাঃ। প্রাসাদাধ্বপ্রপারামবাপীবেশ্যাঃ সতী ত্বরী ॥ ইতি কবিকল্পলতা ॥*॥ অবশিষ্টং নগরশব্দে দ্রষ্টব্যং ॥

পুরঃ (পুং) গুগ্‌গুলুঃ। ইত্যমরঃ ॥ পীতঝিণ্টী। ইতি শব্দচন্দ্রিকা ॥

পুরঃ [স্] ব্য অগ্রতঃ। ইত্যমরঃ॥ প্রাচ্যাং দিশি। প্রথমে কালে। পুরার্থে। অতীতে। ইতি তট্টীকায়াং ভরতঃ॥

পুরঃসরঃ (ত্রি) অগ্রগামী। ইত্যমরঃ॥ অস্য পর্য্যায়াঃ অগ্রেসরশব্দে দ্রষ্টব্যাঃ॥

পুরঞ্জনঃ (পুং) জীবঃ। যথা। পুরুষং পুরঞ্জনং বিদ্যাৎ যদ্ব্যনক্ত্যাত্মনঃ পুরং। একদ্বিত্রিচতুষ্পাদং বহুপাদমপাদকং॥ ইতি শ্রীভাগবতে ৪ স্কন্ধে ২৯ অধ্যায়ঃ॥

পুরঞ্জনী (স্ত্রী) বুদ্ধিঃ। যথা। ন বিদাম বয়ং সম্যক্ কর্ত্তারং পুরুষর্ষভ। আত্মনশ্চ পরস্যাপি গোত্রং নাম চ যৎ কৃতং। রাজন্ মদীয়াঃ সর্ব্বে তে মামাহুশ্চ পুরঞ্জনীং॥ * ॥ বুদ্ধিস্তু প্রমদাং বিদ্যান্মমাহমিতি যৎ কৃতং। যামধিষ্ঠায় দেহেঽস্মিন্

পুমান্ ভুঙ্‌ক্তেঽক্ষিভির্গুণান্ ॥ ইতি শ্রীভাগবতে ৪ স্কন্ধে ২৫।২৯ অধ্যায়ঃ ॥
পুরঞ্জয়ঃ (পুং) সূর্য্যবংশীয়রাজবিশেষঃ। তৎপর্য্যায়ঃ। কাকুৎস্থঃ ২। ইতি ত্রিকাণ্ডশেষঃ ॥ পুরজয়কর্ত্তরি ত্রি ॥
পুরটং (ক্লী) সুবর্ণং। যথা। হরিঃ পুরটসুন্দরদ্যুতিকদম্বসন্দীপিতঃ সদা হৃদয়কন্দরে স্ফুরতু বঃ শচীনন্দনঃ। ইতি বিদগ্ধমাধবঃ ॥
পুরণঃ (পুং) সমুদ্রঃ। ইত্যুণাদিকোষঃ ॥
পুরতঃ [স্] ব্য অগ্রতঃ। ইত্যমরঃ ॥
পুরতটী (স্ত্রী) হট্টী। ক্ষুদ্রহট্টঃ। ইতি হারাবলী ॥
পুরদ্বারং (ক্লী) নগরদ্বারং। তৎপর্য্যায়ঃ। গোপুরং ২। ইত্যমরঃ ॥
পুরদ্বিট্ [ষ্] (পুং) শিবঃ। ইতি জটাধরঃ ॥
পুরন্দরং (ক্লী) চবিকং। ইতি শব্দচন্দ্রিকা ॥
পুরন্দরঃ (পুং) ইন্দ্রঃ। ইত্যমরঃ ॥ চৌরঃ। যথা। সমাংসমীনা যদি পাকশালা সমাংসমীনা দশ ধেনবঃ স্যুঃ। পুরন্দরস্যাবিষয়ং যদি স্যাৎ পুরন্দরস্যাপি পুরং ন যাচে ॥ ইত্যুদ্ভটঃ ॥
পুরন্দরা (স্ত্রী) গঙ্গা। ইতি হারাবলী ॥
পুরন্ধ্রিঃ, পুরন্ধ্রী (স্ত্রী) পতিপুত্ত্রদুহিত্রাদিমতী। ইতি ভরতঃ ॥ তৎপর্য্যায়ঃ। কুটুম্বিনী ২। ইত্যমরঃ ॥ স্ত্রীমাত্রং। ইতি রাজনির্ঘণ্টঃ ॥
পুরশ্চরণং (ক্লী) পুরস্ক্রিয়া। সা তু স্বেষ্টদেবতামন্ত্রসিদ্ধ্যর্থং তদ্দেবতাপূজাপূর্ব্বকং তন্মন্ত্রজপহোমতর্পণাভিষেকব্রাহ্মণভোজনরূপপঞ্চাঙ্গকসাধনা। যথা। যোগিনীহৃদয়ে। গুরোরাজ্ঞাং সমাদায় শুদ্ধান্তঃকরণো নরঃ। ততঃ পুরস্ক্রিয়াং কুর্য্যান্মন্ত্রসংসিদ্ধিকাম্যয়া ॥ জীবহীনো যথা দেহী সর্ব্বকর্ম্মসু ন ক্ষমঃ। পুরশ্চরণহীনোঽপি তথা মন্ত্রঃ প্রকীর্ত্তিতঃ ॥ তস্মাদাদৌ স্বয়ং কুর্য্যাৎ গুরুং বা কারয়েদ্‌বুধঃ। গুরোরভাবে বিপ্রং বা সর্ব্বপ্রাণিহিতে রতং ॥ স্নিগ্ধং শাস্ত্রবিদং মিত্রং নানাগুণসমন্বিতং। স্ত্রিয়ং বা সদ্‌গুণোপেতাং সপুত্ত্রাং বিনিযোজয়েৎ ॥ * ॥ আদৌ পুরস্ক্রিয়াং কর্ত্তুং স্থাননির্ণয় উচ্যতে। যোগিনীহৃদয়ে। পুণ্যক্ষেত্রং নদীতীরং গুহাপর্ব্বতমস্তকং। তীর্থপ্রদেশাঃ সিন্ধূনাং সঙ্গমঃ পাবনং বনং ॥ উদ্যানানি বিবিক্তানি বিল্বমূলং তটং গিরেঃ। তুলসীকাননং গোষ্ঠং বৃষশূন্যং শিবালয়ং ॥ অশ্বত্থামলকীমূলং গোশালাজলমধ্যতঃ। দেবতায়তনং কূলং সমুদ্রস্য নিজং গৃহং ॥ সাধনেষু প্রশস্তানি স্থানান্যেতানি মন্ত্রিণাং। অথবা নিবসেত্তত্র যত্র চিত্তং প্রসীদতি ॥*॥ তথা। গৃহে শতগুণং বিদ্যাদ্গোষ্ঠে লক্ষগুণং ভবেৎ। কোটির্দেবালয়ে পুণ্যমনন্তং শিবসন্নিধৌ ॥ ম্লেচ্ছদুষ্টমৃগব্যালশঙ্কাতঙ্কবিবর্জ্জিতে। একান্তপাবনে নিন্দারহিতে ভক্তিসংযুতে ॥ সুদেশে ধার্ম্মিকে দেশে সুভিক্ষে নিরুপদ্রবে। রম্যে ভক্তজনস্থানে নিবসেৎ তাপসঃ প্রিয়ে ॥ গুরূণাং সন্নিধানে চ চিত্তৈকাগ্রস্থলে তথা। এষামন্যতমস্থান-

মাশ্রিত্য জপমাচরেৎ ॥ * ॥ যত্র গ্রামে জপেন্মন্ত্রী তত্র কূর্ম্মং বিচিন্তয়েৎ । গৌতমীয়ে । পুর্ব্বতে সিন্ধুতীরে বা পুণ্যারণ্যে নদীতটে। যদি কুর্য্যাৎ পুরশ্চর্য্যাং তত্র কূর্ম্মং ন চিন্তয়েৎ ॥ বিল্বমূলাদাবপি কূর্ম্মচিন্তা নাস্তি তদুক্তং বৈশম্পায়নসংহিতায়াং। পুণ্যক্ষেত্রং গৃহী তীর্থং দেবতায়তনং শুভং। নদীতীরং তথা সিন্ধুসঙ্গমোঽতিমনোহরঃ ॥ পর্ব্বতস্য গুহাশ্চৈব তথা পর্ব্বতমস্তকং । বিল্বমূলং সমুদ্রশ্চ বনমুদ্যানমেব চ ॥ এষু স্থানেষু বিপ্রেন্দ্র কূর্ম্মচক্রং ন চিন্তয়েৎ। গ্রামে বা যদি বা বাস্তৌ গৃহে তঞ্চ বিচিন্তয়েৎ ॥ * ॥ অথ পুরশ্চরণে ভক্ষ্যাদিনিয়মঃ। গৌতমীয়ে। পুরশ্চরণকৃন্মন্ত্রী ভক্ষ্যাভক্ষ্যং বিচারয়েৎ। অন্যথা ভোজনাদ্দোষাৎ সিদ্ধিহানিঃ প্রজায়তে॥ শস্তান্নঞ্চ সমশ্নীয়াৎ মন্ত্রসিদ্ধিসমীহয়া। তস্মান্নিত্যং প্রযত্নেন শস্তান্নাশী ভবেন্নরঃ॥ অগস্ত্যসংহিতায়াং । দধি ক্ষীরং ঘৃতং গব্যং ঐক্ষবং গুড়বর্জ্জিতং। তিলাশ্চৈব সিতা মুদ্গাঃ কন্দঃ কেমুকবর্জ্জিতঃ॥ নারিকেলফলঞ্চৈব কদলী লবলী তথা। আম্রমামলকঞ্চৈব পনসঞ্চ হরীতকী॥ ব্রতান্তরে প্রশস্তঞ্চ হবিষ্যং মন্যতে বুধৈঃ। ব্রতান্তর ইতি। হৈমন্তিকং সিতাস্বিন্নং ধান্যং মুদ্গাস্তিলা যবাঃ। কলায়কঙ্গুনীবারা বাস্তুকং হিলমোচিকা॥ ষষ্টিকা কালশাকঞ্চ মূলকং কেমুকেতরৎ। লবণে সৈন্ধবসামুদ্রে গব্যে চ দধিসর্পিষী॥ পয়োঽনুদ্ধৃতসারঞ্চ পনসাম্রহরীতকী। পিপ্পলী জীরকঞ্চৈব নাগরঙ্গঞ্চ তিন্তিড়ী॥ কদলীলবলীধাত্রীফলান্যগুড়মৈক্ষবং। অতৈলপক্কং মুনয়ো হবিষ্যান্নং প্রচক্ষতে ॥ ভুঞ্জানো বা হবিষ্যান্নং শাকং যাবকমেব বা। পয়ো মূলং ফলং বাপি যত্র যত্রোপলভ্যতে॥ রম্ভাফলং তিন্তিড়ীকং কমলা নাগরঙ্গকং। ফলান্যেতানি ভোজ্যানি এভ্যোঽন্যানি বিবর্জ্জয়েৎ॥ যত্তু যোগিনীতন্ত্রে। চিঞ্চাঞ্চ নালিকাশাকং কলায়ং লকুচং তথা। কদম্বং নারিকেলঞ্চ ব্রতে কুষ্মাণ্ডকং ত্যজেৎ॥ তত্তু ব্রতান্তরে বোধ্যং। চিঞ্চা তিন্তিড়ী ॥ * ॥ অথ বর্জ্যানি। বিবর্জ্জয়েন্মধু ক্ষারলবণং তৈলমেব চ। তাম্বূলং কাংস্যপাত্রঞ্চ দিবাভোজনমেব চ॥ তথা। ক্ষারঞ্চ লবণং মাংসং গৃঞ্জনং কাংস্যভোজনং। মাষাঢ়কীমসূরাংশ্চ কোদ্রবাংশ্চণকানপি॥ অন্নং পর্য্যুষিতঞ্চৈব নিঃস্নেহং কীটদূষিতং। রামার্চ্চনচন্দ্রিকায়াং। মৈথুনং তৎকথালাপং তদ্গোষ্ঠীঃ পরিবর্জ্জয়েৎ। ঋতুকালং বিনা মন্ত্রী স্বস্ত্রিয়ং নৈব গচ্ছতি॥ লবণঞ্চ পলঞ্চৈব ক্ষারং ক্ষৌদ্রং রসান্তরং। কৌটিল্যং ক্ষৌরমভ্যঙ্গমনিবেদিতভোজনং ॥ অসঙ্কল্পিতকৃত্যঞ্চ বর্জ্জয়েন্মর্দ্দনাদিকং । * । স্নায়াচ্চ পঞ্চগব্যেন কেবলামলকেন বা ॥ মন্ত্রজপ্তান্নপানীয়ৈঃ স্নানাচমনভোজনং। কুর্য্যাদ্যথোক্তবিধিনা ত্রিসন্ধ্যং দেবতার্চ্চনং॥ অপবিত্রকরো নগ্নঃ শিরসি প্রাবৃতোঽপি বা। প্রলপন্ প্রজপেদ্যাবত্তাবৎ

নিষ্ফলমুচ্যতে॥*॥ নারদীয়ে। মৃদু সোষ্ণং সুপক্কঞ্চ কুর্য্যাদ্বৈ লঘু ভোজনং। নেন্দ্রিয়াণাং যথা বৃদ্ধিস্তথা ভুঞ্জীত সাধকঃ ॥*॥ কুলার্ণবেঽপি। যস্যান্নপানপুটাঙ্গঃ কুরুতে ধর্ম্মসঞ্চয়ং। অন্নদাতুঃ ফলস্যার্দ্ধং কর্ত্তুশ্চার্দ্ধং ন সংশয়ঃ॥ তস্মাৎ সর্ব্বপ্রযত্নেন পরান্নং বর্জ্জয়েৎ সুধীঃ। পুরশ্চরণকালেষু সর্ব্বকর্ম্মসু শাম্ভবি॥ জিহ্বা দগ্ধা পরান্নেন করৌ দগ্ধৌ প্রতিগ্রহাৎ। পরস্ত্রীভির্ম্মনো দগ্ধং কথং সিদ্ধির্ব্বরাননে॥ * ॥ পরান্নং ভিক্ষিতেতরবিষয়ং। ভিক্ষায়াং তস্য স্বত্বোৎপাদাৎ। তথা চ। বৈদিকাচারযুক্তানাং শুচীনাং শ্রীমতাং সতাং। সৎকুলস্থানজাতানাং ভিক্ষাশী চাগ্রজন্মনাং॥ বিহায় বহ্নিং নহি বস্তু কিঞ্চিৎ গ্রাহ্যং পরেভ্যঃ সতি সম্ভবে চ। অসম্ভবে তীর্থবহির্ব্বিশুদ্ধাৎ পর্ব্বাতিরিক্তে প্রতিগৃহ্য জপ্যাৎ॥ তত্রাসমর্থোঽনুদিনং বিশুদ্ধাৎ যাচেত যাবদ্দিনমাত্রভৈক্ষ্যং। গৃহ্লাতি রাগাদধিকং ন সিদ্ধিঃ প্রজায়তে কল্পশতৈরমুষ্য ॥ * ॥ সকৃদুচ্চরিতে শব্দে প্রণবং সমুদীরয়েৎ। প্রোক্তে পারশবে শব্দে প্রাণায়ামং সকৃচ্চরেৎ॥ বহুপ্রলাপী আচম্য ন্যস্যাঙ্গানি ততো জপেৎ। ক্ষুতেঽপ্যেবং তথাস্পৃশ্যস্থানানাং স্পর্শনেন চ॥ এবমাদীংশ্চ নিয়মান্ পুরশ্চরণকৃচ্চরেৎ॥ বিণ্মূত্রোৎসর্গশঙ্কাদিযুক্তঃ কর্ম্ম করোতি যৎ। জপার্চ্চনাদিকং সর্ব্বমপবিত্রং ভবেৎ প্রিয়ে॥ মলিনাম্বরকেশাদিমুখদৌর্গন্ধ্যসংযুতঃ। যো জপেত্তং দহত্যাশু দেবতা গুপ্তিসংস্থিতা॥ আলস্যং জৃম্ভণং নিদ্রাং ক্ষুতং নিষ্ঠীবনং ভয়ং। নীচাঙ্গস্পর্শনং কোপং জপকালে বিবর্জ্জয়েৎ ॥ * ॥ এবমুক্তবিধানেন বিলম্বং ত্বরিতং বিনা। উক্তসংখ্যং জপং কুর্য্যাৎ পুরশ্চরণসিদ্ধয়ে ॥ দেবতাগুরুমন্ত্রাণামৈক্যং সম্ভাবয়ন্ ধিয়া। জপেদেকমনাঃ প্রাতঃকালং মধ্যন্দিনাবধি॥ যৎসংখ্যয়া সমারব্ধং তৎ কর্ত্তব্যং দিনে দিনে। যদি ন্যূনাধিকং কুর্য্যাৎ ব্রতভ্রষ্টো ভবেন্নরঃ॥ মুণ্ডমালায়াং। যৎসংখ্যয়া সমারব্ধং তৎ জপ্তব্যং দিনে দিনে। ন্যূনাধিকং ন কর্ত্তব্যমাসমাপ্তং সদা জপেৎ॥ প্রজপেদুক্তসংখ্যায়াশ্চতুর্গুণজপং কলৌ। অন্যত্রাপি। কৃতে জপস্তু কল্পোক্তস্ত্রেতায়াং দ্বিগুণো মতঃ। দ্বাপরে ত্রিগুণঃ প্রোক্তশ্চতুর্গুণজপঃ কলৌ॥ কুলার্ণবেঽপি। ন্যূনাতিরিক্তকর্ম্মাণি ন ফলন্তি কদাচন। যথাবিধিকৃতান্যেব সৎকর্ম্মাণি ফলন্তি হি ॥ * ॥ ভূশয্যা ব্রহ্মচারিত্বং মৌনমাচার্য্যসেবিতা। নিত্যপূজা নিত্যদানং দেবতাস্তুতিকীর্ত্তনং॥ নিত্যং ত্রিসবনং স্নানং ক্ষুদ্রকর্ম্মবিবর্জ্জনং। নৈমিত্তিকার্চ্চনঞ্চৈব বিশ্বাসো গুরুদেবয়োঃ। জপনিষ্ঠা দ্বাদশৈতে ধর্ম্মাঃ স্যুর্ম্মন্ত্রসিদ্ধিদাঃ ॥ * ॥ স্ত্রীশূদ্রপতিতব্রাত্যনাস্তিকোচ্ছিষ্টভাষণং। অসত্যভাষণং জিহ্মভাষণং পরিবর্জ্জয়েৎ॥ সত্যেনাপি ন ভাষেত জপহোমার্চ্চনাদিষু। অন্যথানুষ্ঠিতং সর্ব্বং ভবত্যেব নিরর্থকং॥ পুরশ্চরণকালে তু যদি স্যান্মৃত-

সূতকং। তথা চ কৃতসঙ্কল্পো ব্রতং নৈব পরিত্যজেৎ ॥ ❋ ॥ যোগিনীহৃদয়ে। শয়ীত কুশশয্যায়াং শুচিবস্ত্রধরঃ সদা। প্রত্যহং ক্ষালয়েৎ শয্যামেকাকী নির্ভয়ঃ স্বপেৎ ॥ অসত্যভাষণং বাচং কুটিলাং পরিবর্জ্জয়েৎ। বর্জয়েদ্গীতবাদ্যাদিশ্রবণং নৃত্যদর্শনং ॥ অভ্যঙ্গং গন্ধলেপঞ্চ পুষ্পধারণমেব চ। ত্যজেদুষ্ণোদকস্নানমন্যদেবপ্রপূজনং ॥ তত্রৈব। নৈকবাসা জপেন্মন্ত্রং বহুবাসাকুলোঽপি বা ॥ ❋ ॥ বৈশম্পায়নসংহিতায়াং। বিপর্য্যাসং ন কুর্য্যাচ্চ কদাচিদপি মোহতঃ। উপর্য্যধো বহির্ব্বস্ত্রে পুরশ্চরণকৃন্নরঃ ॥ ❋ ॥ পতিতানামন্ত্যজানাং দর্শনে ভাষণে শ্রুতে। ক্ষুতেঽধোবায়ুগমনে জৃম্ভণে জপমুৎসৃজেৎ ॥ তথা তস্য চ তৎপ্রাপ্তৌ প্রাণায়ামং ষড়ঙ্গকং। কৃত্বা সম্যক্ জপেৎ শেষং যদ্বা সূর্য্যাদিদর্শনং ॥ আদিশব্দাদ্বহ্নিং ব্রাহ্মণঞ্চ ॥ ❋ ॥ তন্ত্রান্তরে। মনঃসংহরণং শৌচং মৌনং মন্ত্রার্থচিন্তনং। অব্যগ্রত্বমনির্ব্বেদো জপসম্পত্তিহেতবঃ ॥ ❋ ॥ উষ্ণীশী কঞ্চুকী নগ্নো মুক্তকেশো গণাবৃতঃ। অপবিত্রকরোঽশুদ্ধঃ প্রলপন্ন জপেৎ ক্বচিৎ ॥ অনাসনঃ শয়ানো বা গচ্ছন্ ভুঞ্জান এব বা। অপ্রাবৃতৌ করৌ কৃত্বা শিরসা প্রাবৃতোঽপি বা ॥ চিন্তাব্যাকুলচিত্তো বা ক্ষুব্ধো ভ্রান্তঃ ক্ষুধান্বিতঃ। রথ্যায়ামশিবস্থানে ন জপেত্তিমিরালয়ে ॥ উপানদ্গূঢ়পাদো বা যানশয্যাগতোঽপি বা। প্রসার্য্য ন জপেৎ পাদাবুৎকটাসন এব চ। ন যজ্ঞকাষ্ঠে পাষাণে ন ভূমৌ নাসনে স্থিতঃ ॥ ❋ ॥ তথা। মার্জ্জারং কুক্কুটং ক্রৌঞ্চং শ্বানং শূদ্রং কপিং খরং। দৃষ্ট্বাচম্য জপেৎ শেষং স্পৃষ্ট্বা স্নানং বিধীয়তে ॥ সর্ব্বত্র জপে ত্বয়ং নিয়মঃ ॥ ❋ ॥ মানসে তু নিয়মো নাস্ত্যেব। তথা চ। অশুচির্ব্বা শুচির্ব্বাপি গচ্ছংস্তিষ্ঠন্ স্বপন্নপি। মন্ত্রৈকশরণো বিদ্বান্ মনসৈব সদাভ্যসেৎ। ন দোষো মানসে জাপ্যে সর্ব্বদেশেঽপি সর্ব্বদা ॥ শ্যামাদিজপে তু তত্তন্মন্ত্রে বিশেষো বক্তব্যঃ ॥ ❋ ॥ জপফলমাহ শিবধর্ম্মে। জপনিষ্ঠো দ্বিজশ্রেষ্ঠোঽখিলযজ্ঞফলং লভেৎ। সর্ব্বেষামেব যজ্ঞানাং জায়তেঽসৌ মহাফলঃ ॥ জপেন দেবতা নিত্যং স্তূয়মানা প্রসীদতি। প্রসন্না বিপুলান্ কামান্ দদ্যান্মুক্তিঞ্চ শাশ্বতীং ॥ পাদ্মে। যক্ষরক্ষঃপিশাচাশ্চ গ্রহাঃ সর্পাশ্চ ভীষণাঃ। জাপিনং নোপসর্পন্তি ভয়ভীতাঃ সমন্ততঃ ॥ ❋ ॥ পাদ্মনারদীয়য়োঃ। যাবন্তঃ কর্ম্মযজ্ঞাঃ স্যুঃ প্রদিষ্টানি তপাংসি চ। সর্ব্বে তে জপযজ্ঞস্য কলাং নার্হন্তি ষোড়শীং ॥ মাহাত্ম্যং বাচিকস্যৈতজ্জপযজ্ঞস্য কীর্ত্তিতং। তস্মাচ্ছতগুণোপাংশুঃ সহস্রো মানসঃ স্মৃতঃ ॥ ❋ ॥ তথা তন্ত্রে। মানসঃ সিদ্ধিকামানাং পুষ্টিকামৈরুপাংশুকঃ। বাচিকো মারণে চৈব প্রশস্তো জপ ঈরিতঃ ॥❋॥ গৌতমীয়ে। শক্ত্যা ত্রিসবনং স্নানমন্যথা দ্বিঃ সকৃচ্চ বা। ত্রিসন্ধ্যং প্রজপেন্মন্ত্রং পূজনং তৎসমং ভবেৎ ॥ সন্ধ্যাত্রয়ে পূজাঙ্গত্বাজ্জপমষ্টোত্তরশতং

ইত্যর্থঃ ॥ * ॥ একদা বা ভবেৎ পূজা ন জপেৎ পূজনং বিনা। জপান্তে বা ভবেৎ পূজা পূজান্তে বা জপেন্মনুং ॥ প্রাতঃকালং সমারভ্য জপেন্মধ্যন্দিনাবধি। মধ্যন্দিনাবধীতি ন নিয়মপরং কিন্ত্বধিককালব্যবচ্ছেদপরং। অন্যথা তৎসময়জপনিয়মে কদাচিৎ জিহ্বায়া জাড্যাজাড্যেন বা প্রতিনিয়তদিবসীয়জপসঙ্খ্যায়াপূর্ণত্বে অধিকত্বে বা নিয়মভঙ্গঃ স্যাৎ ॥ * ॥ মনঃ সংহৃত্য বিষয়ান্মন্ত্রার্থগতমানসঃ। ন দ্রুতং ন বিলম্বঞ্চ জপেন্মৌক্তিকপংক্তিবৎ ॥ * ॥ জপঃ স্যাদক্ষরাবৃত্তির্মানসোপাংশুবাচিকৈঃ। ধিয়া যদক্ষরশ্রেণীং বর্ণস্বরপদাত্মিকাং ॥ উচ্চরেদর্থমুদ্দিশ্য মানসঃ স জপঃ স্মৃতঃ। মন্ত্রনির্ণয়ে। মানসং মন্ত্রবর্ণস্য চিন্তনং মানসঃ স্মৃতঃ। জিহ্বোষ্ঠৌ চালয়েৎ কিঞ্চিদ্দেবতাগতমানসঃ ॥ কিঞ্চিৎ শ্রবণযোগ্যঃ স্যাৎ উপাংশুঃ স জপঃ স্মৃতঃ। মন্ত্রমুচ্চারয়েদ্বাচা বাচিকঃ স জপঃ স্মৃতঃ ॥ উচ্চৈর্জ্জপাদ্বিশিষ্টঃ স্যাদুপাংশুর্দ্দশভির্গুণৈঃ। জিহ্বাজপঃ শতগুণঃ সহস্রো মানসঃ স্মৃতঃ ॥ প্রকারান্তরং। নিজকর্ণাগোচরো যো মানসঃ স জপঃ স্মৃতঃ। উপাংশুর্নিজকর্ণস্য গোচরঃ সঃ প্রকীর্ত্তিতঃ॥ নিগদস্তু জনৈর্বেদ্যস্ত্রিবিধোঽয়ং জপঃ স্মৃতঃ। *। তন্ত্রান্তরে। উচ্চৈর্জপোঽধমঃ প্রোক্ত উপাংশুর্ম্মধ্যমঃ স্মৃতঃ। উত্তমো মানসো দেবি ত্রিবিধঃ কথিতো জপঃ ॥ * ॥ জিহ্বাজপস্তু। জিহ্বাজপঃ স বিজ্ঞেয়ঃ কেবলং জিহ্বয়া বুধৈরিতি।*।

অতিবিলম্বাতিশীঘ্রজপে দোষমাহ। অতিহ্রস্বো ব্যাধিহেতুরতিদীর্ঘো বসুক্ষয়ঃ। অক্ষরাক্ষরসংযুক্তং জপেন্মৌক্তিকহারবৎ ॥ * ॥ মনসা যঃ স্মরেৎ স্তোত্রং বচসা বা মনুং জপেৎ। উভয়ং নিষ্ফলং যাতি ভিন্নভাণ্ডোদকং যথা ॥ * ॥ গৌতমীয়ে। পশুভাবে স্থিতা মন্ত্রাঃ কেবলা বর্ণরূপিণঃ। সৌষুম্নধ্বন্যুচ্চরিতাঃ প্রভুত্বং প্রাপ্নুবন্তি তে ॥ * ॥ পাদ্মনারদীয়য়োঃ। মন্ত্রাক্ষরাণি চিচ্ছক্তৌ প্রোতানি পরিভাবয়েৎ। তামেব পরমব্যোম্নি পরমামৃতবৃংহিতে ॥ দর্শয়ত্যাত্মসদ্ভাবং পূজাহোমাদিভির্ব্বিনেতি। গৌতমীয়ে দশাক্ষরপটলে। মূলমন্ত্রং প্রাণবুদ্ধ্যা সুষুম্নামূলদেশকে। মন্ত্রার্থং তস্য চৈতন্যং জীবং ধ্যাত্বা পুনঃ পুনঃ ॥ * ॥ কুলার্ণবেঽপি। মনোঽন্যত্র শিবোঽন্যত্র শক্তিরন্যত্র মারুতঃ। ন সিদ্ধ্যতি বরারোহে কল্পকোটিশতৈরপি ॥ * ॥ জাতসূতকমাদৌ স্যাদন্তে চ মৃতসূতকং। সূতকদ্বয়সংযুক্তো যো মন্ত্রঃ স ন সিদ্ধ্যতি ॥ গুরোস্তদ্রহিতং কৃত্বা মন্ত্রং যাবজ্জপেদ্ধিয়া। সূতকদ্বয়নির্ম্মুক্তঃ স মন্ত্রঃ সর্ব্বসিদ্ধিদঃ॥ জাতসূতকমাদৌ স্যান্মৃতসূতকমন্ততঃ। সূতকদ্বয়নির্ম্মুক্তো মন্ত্রঃ সিদ্ধ্যতি নান্যথা ॥ তত্রৈব। তস্মাদ্দেবি প্রযত্নেন ধ্রুবেণ পুটিতং মনুং। অষ্টোত্তরশতং বাপি সপ্তবারং জপাদিতঃ। জপান্তে চ তথা জপ্যাৎ চতুর্ব্বর্গফলাপ্তয়ে ॥ তত্রৈব। ব্রহ্মবীজং মনোর্দ্দত্বা চাদ্যন্তে পরমেশ্বরি।

সপ্তবারং জপেন্মন্ত্রং সূতকদ্বয়মুক্তয়ে ॥*॥ মন্ত্রার্থং মন্ত্রচৈতন্যং যোনিমুদ্রাং ন বেত্তি যঃ। শতকোটিজপেনাপি তস্য সিদ্ধির্ন জায়তে ॥ লুপ্তবীজাশ্চ যে মন্ত্রা ন দাস্যন্তি ফলং প্রিয়ে। মন্ত্রাশ্চৈতন্যসহিতাঃ সর্ব্বসিদ্ধিকরাঃ স্মৃতাঃ ॥ চৈতন্যরহিতা মন্ত্রাঃ প্রোক্তা বর্ণাস্তু কেবলং। ফলং নৈব প্রযচ্ছন্তি লক্ষকোটিজপৈরপি ॥ মন্ত্রোচ্চারে কৃতে যাদৃক্ স্বরূপং প্রথমং ভবেৎ। শতে সহস্রে লক্ষে বা কোটিজাপে ন তৎফলং ॥ হৃদয়ে গ্রন্থিভেদশ্চ সর্ব্বাবয়ববর্দ্ধনং। আনন্দাশ্রূণি পুলকো দেহাবেশঃ কুলেশ্বরি ॥ গদ্গদোক্তিশ্চ সহসা জায়তে নাত্র সংশয়ঃ। সকৃদুচ্চরিতেঽপ্যেবং মন্ত্রে চৈতন্যসংযুতে ॥ দৃশ্যন্তে প্রত্যয়া যত্র পারম্পর্য্যং তদুচ্যতে ॥ * ॥ মাসমাত্রং জপেন্মন্ত্রং ভূতলিপ্যা তু সংপুটং। ক্রমোৎক্রমাৎ সহস্রঞ্চ তস্য সিদ্ধো ভবেন্মনুঃ ॥ তত্র ভূতলিপিঃ। পঞ্চ হ্রস্বাঃ সন্ধিবর্ণা ব্যোমারাগ্নিজলন্ধরাঃ। অন্ত্যমাদ্যং দ্বিতীয়ঞ্চ চতুর্থং মধ্যমং ক্রমাৎ ॥ পঞ্চবর্গাক্ষরাণি স্যুর্ব্বান্তশ্বেতেন্দুভিঃ সহ। এষা ভূতলিপিঃ প্রোক্তা দ্বিচত্বারিংশদক্ষরৈঃ ॥ মন্ত্রস্তু। অ ই উ ঋ ৯ এ ঐ ও ঔ হ য র ব ল ঙ ক খ ঘ গ ঞ চ ছ ঝ জ ণ ট ঠ ঢ ড ন ত থ ধ দ ম প ফ ভ ব শ ষ সাঃ। অতঃ পরং মন্ত্রমুচ্চার্য্য পুনঃ ক্রমেণোল্লেখ্যং ॥ * ॥ গৌতমীয়ে। এবং জপং পুরা কৃত্বা তেজোরূপং সমর্পয়েৎ। দেবস্য দক্ষিণে হস্তে কুশপুষ্পার্ঘ্যবারিভিঃ ॥ সফলং তদ্বিভাব্যৈবং প্রাণায়ামং সমাচরেৎ। জপস্যাদৌ জপান্তে চ ত্রিতয়ং ত্রিতয়ং চরেৎ ॥ * ॥ শক্তিবিষয়ে দেব্যা বামহস্তে। তথা চ। এবং জপং পুরা কৃত্বা গন্ধাক্ষতকুশোদকৈঃ। জপং সমর্পয়েদ্দেব্যা বামহস্তে বিচক্ষণঃ ॥ * ॥ জপান্তে প্রত্যহং মন্ত্রী হোময়েত্তদ্দশাংশতঃ। তর্পণঞ্চাভিষেকঞ্চ তত্তদ্দশাংশতো মুনে ॥ প্রত্যহং ভোজয়েদ্বিপ্রান্ ন্যূনাধিকপ্রশান্তয়ে। অথবা সর্ব্বপূর্ত্তৌ চ হোমাদিকমথাচরেৎ ॥ সম্পূর্ণায়াং প্রতিজ্ঞায়াং তর্পণাদিকমাচরেৎ ॥ মুণ্ডমালায়াং। যস্য যাবান্ জপঃ প্রোক্তস্তদ্দশাংশমনুক্রমাৎ। তত্তদ্দ্রব্যৈর্জপস্যান্তে হোমং কুর্য্যাদ্দিনে দিনে ॥ * ॥ জপসঙ্খ্যায়াং বিশেষমাহ মুণ্ডমালায়াং। নাক্ষৈর্হস্তপর্ব্বৈর্বা ন ধান্যৈর্ন চ পুষ্পকৈঃ। ন চন্দনৈর্মৃত্তিকয়া জপসঙ্খ্যান্তু কারয়েৎ ॥ লাক্ষাকুশীদসিন্দূরং গোময়ঞ্চ করীষকং। বিলোড্য গুটিকাং কৃত্বা জপসঙ্খ্যান্তু কারয়েৎ ॥ * ॥ পুরশ্চরণচন্দ্রিকায়াঞ্চ। ততো জপদশাংশেন হোমং কুর্য্যাদ্দিনে দিনে। অথবা লক্ষসঙ্খ্যায়াং পূর্ণায়াং হোমমাচরেৎ ॥*॥ তথা। হোমাদ্যশক্তৌ চ সনৎকুমারীয়ে। যদ্যদঙ্গং ভবেদ্ভগ্নং তৎসঙ্খ্যাদ্বিগুণো জপঃ। হোমাভাবে জপঃ কার্য্যো হোমসংখ্যাচতুর্গুণঃ ॥ বিপ্রাণাং ক্ষত্রিয়াণাঞ্চ রসসঙ্খ্যাগুণঃ স্মৃতঃ। বৈশ্যানাং বসুসঙ্খ্যাকমেষাং স্ত্রীণাময়ং বিধিঃ ॥ যং বর্ণমাশ্রিতঃ শূদ্রঃ স চ তস্য

বিধিশ্চরেৎ। অনাশ্রিতস্য শূদ্রস্য দিক্‌সঙ্খ্যাকঃ সমীরিতঃ। শূদ্রস্য বিপ্রভৃত্যস্য তৎপত্ন্যাঃ সদৃশো জপঃ ॥ * ॥ অত্রাপ্যশক্তশ্চেৎ যোগিনীহৃদয়ে। হোমকর্ম্মণ্যশক্তানাং বিপ্রাণাং দ্বিগুণো জপঃ। ইতরেষান্তু বর্ণানাং ত্রিগুণাদিঃ সমীরিতঃ॥ ত্রিগুণাদিঃ হোমসঙ্খ্যাত্রিগুণজপঃ ক্ষত্রিয়েণ কার্য্যঃ। বৈশ্যেন চতুর্গুণঃ। শূদ্রেণ পঞ্চগুণঃ। তদুক্তং কুলার্ণবে। যদ্যদঙ্গং বিহীনং স্যাৎ তৎসঙ্খ্যাদ্বিগুণো জপঃ। কুর্ব্বীত ত্রিচতুঃপঞ্চ যথাসঙ্খ্যং দ্বিজাদয়ঃ॥ এতেন স্ত্রীশূদ্রাণাং হোমাধিকারঃ। তথা চ। বণিজামর্দ্ধশশাঙ্ককোণং ত্র্যস্রং ভবতি শূদ্রাণাং। ইতি নাগভট্টনিবন্ধে। শূদ্রাণাং ত্র্যস্রমিতি কুণ্ডপ্রকরণে সারদায়াং ॥*॥ স্ত্রীণাং হোমাধিকারশ্চ তত্র। লাজৈস্ত্রিমধুরোপেতৈর্হোমঃ কন্যাং প্রযচ্ছতি। অনেন বিধিনা কন্যা বরমাপ্নোতি বাঞ্ছিতং ॥ অতঃ স্ত্রীণাং হোমাধিকারঃ। তচ্চ ব্রাহ্মণদ্বারা। তথা চ তন্ত্রে। ওঙ্কারোচ্চারণাদ্ধোমাৎ শালগ্রামশিলার্চ্চনাৎ। ব্রাহ্মণীগমনাচ্চৈব শূদ্রশ্চাণ্ডালতাং ব্রজেৎ॥ ইতি সাক্ষান্নিষেধাৎ। তথা স্ত্রীণামপি সর্ব্ববৈদিককর্ম্মসু শূদ্রতুল্যত্বপ্রতিপাদনাৎ। স্ত্রীশূদ্রকরসংস্পর্শো বজ্রপাতসমো মম। ইতি ভগবদ্বচনাচ্চ। তথা চ নারায়ণকল্পে। অষ্টাক্ষরো মহামন্ত্রঃ সপ্তার্ণঃ শূদ্রযোষিতোঃ। প্রণবাদিশ্চ যো মন্ত্রো ন স্ত্রীশূদ্রে প্রশস্যতে॥ ইতি সর্ব্বত্র স্ত্রীণাং শূদ্রবদ্ব্যবহারঃ ॥ * ॥ শূদ্রস্যাপি স্বকর্ত্তৃকহোমঃ। তথা চ বারাহীতন্ত্রে। যদি কামী ভবত্যেব শূদ্রোঽপি হোমকর্ম্মণি। বহ্নিজায়াং পরিত্যজ্য হৃদয়ান্তে ন হোময়েৎ ॥ * ॥ সর্ব্বেষাং বা দ্বিগুণো জপঃ। তথা চ বাশিষ্ঠে। যদ্যদঙ্গং বিহীয়েত তৎসঙ্খ্যাদ্বিগুণো জপঃ। কর্ত্তব্যশ্চাঙ্গসিদ্ধ্যর্থং তদশক্তেন ভক্তিতঃ॥ ন চেদঙ্গং বিহীয়েত তদ্বিশিষ্টমবাপ্নুয়াৎ বিপ্রভোজনমাত্রেণ ব্যঙ্গং সাঙ্গং ভবেৎ ধ্রুবং॥ যত্র ভুঙ্‌ক্তে দ্বিজস্তস্মাত্তত্র ভুঙ্‌ক্তে হরিঃ স্বয়ং। তথা অগস্ত্যসংহিতায়াং। যদি হোমেঽপ্যশক্তঃ স্যাৎ পূজায়াং তর্পণেঽপি বা। তাবৎসঙ্খ্যজপেনৈব ব্রাহ্মণারাধনেন চ॥ ভবেদঙ্গদ্বয়েনৈব পুরশ্চরণমার্য্য বৈ। *। বীরতন্ত্রে। নিয়মঃ পুরুষে জ্ঞেয়ো ন যোষিৎসু কথঞ্চন। ন ন্যাসো যোষিতামত্র ন ধ্যানং ন চ পূজনং ॥ কেবলং জপমাত্রেণ মন্ত্রাঃ সিদ্ধ্যন্তি যোষিতাং। ততশ্চ। গুরবে দক্ষিণাং দদ্যাৎ ভোজনাচ্ছাদনাদিভিঃ। গুরুসন্তোষমাত্রেণ মন্ত্রসিদ্ধির্ভবেৎ ধ্রুবং ॥*॥ তথা চ যোগিনীহৃদয়ে। গুরোরভাবে পুত্রায় তৎপত্ন্যৈ বা নিবেদয়েৎ। তয়োরভাবে দেবেশি ব্রাহ্মণেভ্যো নিবেদয়েৎ॥ সম্যক্‌সিদ্ধৈকমন্ত্রস্য পঞ্চাঙ্গোপাসনেন চ। সর্ব্বে মন্ত্রাশ্চ সিদ্ধ্যন্তি ত্বৎপ্রসাদাৎ কুলেশ্বরি ॥ গুরুমূলমিদং সর্ব্বমিত্যাহুস্তন্ত্রবেদিনঃ। একগ্রামে স্থিতো নিত্যং গত্বা বন্দেত বৈ গুরুং ॥ গুরুরেব পরং ব্রহ্ম তস্মাদাদৌ তমর্চ্চয়েৎ। তদন্তে "মহতীং

পূজাং কুর্য্যাৎ সাধকসত্তমঃ ॥ সুভাষিণীং কুমারীঞ্চ ভূষণৈরপি ভূষয়েৎ। মিষ্টান্নং বহুশঃ কার্য্যং ভুঞ্জীত বন্ধুভিঃ সহ ॥ এবং সিদ্ধমনুর্ম্মন্ত্রী সাধয়েৎ সকলেপ্সিতান্ ।*।

অথ গ্রহণপুরশ্চরণং ॥

তন্ত্রে। অথবান্যপ্রকারেণ পুরশ্চরণমুচ্যতে। গ্রহণেঽর্কস্য চেন্দোর্ব্বা শুচিঃ পূর্ব্বমুপোষিতঃ॥ নদ্যাং সমুদ্রগামিন্যাং নাভিমাত্রোদকে স্থিতঃ। স্পর্শাদ্বিমুক্তিপর্য্যন্তং জপেন্মন্ত্রমনন্যধীঃ ॥ * ॥ যদি নক্রাদিদূষিতা নদী ভবতি তদা যৎ কর্ত্তব্যং তদাহ রুদ্রযামলে। অপি শুদ্ধোদকৈঃ স্নাত্বা শুচৌ দেশে সমাহিতঃ। গ্রাসাদ্বিমুক্তিপর্য্যন্তং জপেন্মন্ত্রমনন্যধীঃ॥ ইতি কৃত্বা ন সন্দেহো জপস্য ফলভাগ্‌ভবেৎ। নদ্যভাবে। যদ্বা পুণ্যোদকৈঃ স্নাত্বা শুচিঃ পূর্ব্বমুপোষিতঃ। গ্রহণাদিবিমোক্ষান্তং জপেন্মন্ত্রমনন্যধীঃ॥*॥ উপবাসাসমর্থে তু তত্রৈব। অথবান্যপ্রকারেণ পৌরশ্চারণিকো বিধিঃ। চন্দ্রসূর্য্যোপরাগে চ স্নাত্বা প্রযতমানসঃ ॥ স্পর্শনাদিবিমোক্ষান্তং জপেন্মন্ত্রং সমাহিতঃ। জপাদ্দশাংশতো হোমং তথা হোমাত্তু তর্পণং। এবং কৃত্বা তু মন্ত্রস্য জায়তে সিদ্ধিরুত্তমা ॥ * ॥ গোপালমন্ত্রতর্পণে তু হোমসমসঙ্খ্যত্বং যথা। ইহ গোপালমন্ত্রস্য তর্পণং হোমসঙ্খ্যয়া। বর্ণানামিহ সর্ব্বেষামিত্যাগমবিদো বিদুঃ॥ দৃষ্ট্বা স্নাত্বা সুসঙ্কল্প্য বিমোক্ষান্তং জপঞ্চরেৎ। তাবদ্‌যজ্ঞাদিকং কুর্য্যাৎ গ্রহণান্তে শুচিঃ পুমান্॥ এবং জপান্মন্ত্রসিদ্ধির্ভবত্যেব ন সংশয়ঃ। * । গ্রহণে জপস্য আবশ্যকত্বং। শ্রাদ্ধাদেরনুরোধেন যদি জপ্যং ত্যজেন্নরঃ। স ভবেদ্দেবতাদ্রোহী পিতৄন্ সপ্ত নয়ত্যধঃ ॥ ইতি সনৎকুমারীয়বচনাৎ। বস্তুতস্তু আরব্ধপুরশ্চরণবিষয়মিদং। তথাহি। আরব্ধে পুরশ্চরণে যদি চ গ্রহণং ভবেৎ তদা শ্রাদ্ধাদ্যনুরোধেন জপং ন ত্যজেৎ। এবং রাত্রাবপি পুরশ্চরণবিশেষে বোদ্ধব্যং। ইতি সর্ব্বসমঞ্জসং ॥ * ॥ যোগিনীহৃদয়ে। কল্পোক্তবিধিনা মন্ত্রী কুর্য্যাদ্ধোমাদিকন্ততঃ। অথবা তদ্দশাংশেন হোমাদীংশ্চ সমাচরেৎ ॥ তথা। অনন্তরং দশাংশেন ক্রমাদ্ধোমাদিকঞ্চরেৎ। তদন্তে মহতীং পূজাং কুর্য্যাদ্‌ব্রাহ্মণভোজনং ॥ ততো মন্ত্রস্য সিদ্ধ্যর্থং গুরুং সম্পূজ্য তোষয়েৎ। এবঞ্চ মন্ত্রসিদ্ধিঃ স্যাৎ দেবতা চ প্রসীদতি ॥ * ॥ অত্র ব্রাহ্মণভোজনমাবশ্যকমেব। সর্ব্বথা ভোজয়েদ্বিপ্রান্ কৃতসাঙ্গত্বসিদ্ধয়ে। বিপ্রারাধনমাত্রেণ ব্যঙ্গং সাঙ্গং ভবেদ্‌ধ্রুবং ॥ ক্রিয়াসারে। দীক্ষাহীনান্ পশূন্ যস্তু ভোজয়েদ্বা স্বমন্দিরে। স যাতি পরমেশানি নরকানেকবিংশতিং॥ এবং যঃ কুরুতে দেবি পুরশ্চরণকং প্রিয়ে। সর্ব্বপাপবিনির্ম্মুক্তো দেবীসাযুজ্যমাপ্নুয়াৎ ॥*॥ যদ্যপি পুরশ্চরণপদং পঞ্চাঙ্গপরং। তথা চ। জপহোমৌ তর্পণঞ্চাভিষেকো বিপ্রভোজনং। পঞ্চাঙ্গোপাসনং লোকে পুরশ্চরণমুচ্যতে ॥ তথাপি গ্রহণাদৌ পুরশ্চরণপদং গৌণং জপমাত্রপরং। সূর্য্যোদয়ং সমারভ্য যাবৎ সূর্য্যোদয়ান্তরং।

ইত্যাদৌ তথাদর্শনাৎ তত্র হোমাদেরভাবাৎ। তর্হি কথং গ্রহণপুরশ্চরণে হোমাদি ইতি চেৎ বচনাদেব। ন চ পুরশ্চরণস্য পঞ্চাঙ্গত্বাৎ সর্ব্বত্র তদেব স্যাদিতি বাচ্যং। গ্রহণে পুনস্তদ্বিধানমনর্থকং স্যাৎ। কিঞ্চ গ্রহণে হোমাদিনিয়মাৎ নান্যত্র হোমাদিঃ। গ্রহণপুরশ্চরণে হোমাদিবিধানন্তু প্রকৃতীভূতপঞ্চাঙ্গপুরশ্চরণতুল্যতাবোধনায়। অতএব গ্রহণে পঞ্চাঙ্গস্বরূপপুরশ্চরণে কৃতে মুখ্যপ্রয়োগেঽপ্যধিকার ইতি প্রকটীকৃতং। তদকরণে পুনঃ কেবলজপমাত্রপুরশ্চরণে কৃতে নাধিকার ইতি সর্ব্বসম্মতমিতি ॥ * ॥ পুরশ্চরণকালস্তু বারাহীয়ে। চন্দ্রতারানুকূলে চ শুক্লে পক্ষে শুভেঽহনি। আরভেত পুরশ্চর্য্যাং হরৌ সুপ্তে ন চাচরেৎ ॥ * ॥ প্রতিপ্রসবঃ। রুদ্রযামলে। কার্ত্তিকাশ্বিনবৈশাখমাঘেঽথ মার্গশীর্ষকে। ফাল্গুনে শ্রাবণে দীক্ষা পুরশ্চর্য্যা প্রশস্যতে॥*॥ গ্রস্তাস্তে গ্রস্তোদয়ে চ দীক্ষাপুরশ্চরণয়োর্নিষেধমাহ তন্ত্রান্তরে। গ্রস্তাস্তে হ্যুদিতে নৈব কুর্য্যাদ্দীক্ষাং জপং প্রিয়ে। কৃতে নাশো ভবেদাশু আয়ুঃশ্রীসুতসম্পদাং ॥ * ॥

অথ পুরশ্চরণপ্রয়োগঃ।

তত্র তাবৎ ভূমেঃ পরিগ্রহং কৃত্বা পুরশ্চরণপ্রাক্ তৃতীয়দিবসে ক্ষৌরাদিকং বিধায় বেদিকায়াশ্চতুর্দ্দিক্ষু ক্রোশং ক্রোশদ্বয়ং বা ক্ষেত্রং চতুরস্রং আহারাদিবিহারার্থং পরিকল্প্য তত্র কূর্ম্মচক্রানুরূপং মণ্ডলং বিধায় একভক্তং কুর্য্যাৎ। ততঃ পরদিনে স্নানাদিকং বিধায় শুদ্ধঃ সন্ বেদিকায়াশ্চতুর্দ্দিক্ষু অশ্বত্থোড়ুম্বরপ্লক্ষাণামন্যতমস্য বিতস্তিমাত্রান্ দশ কীলকান্। ওম্ নমঃ সুদর্শনায় অস্ত্রায় ফড়িতিমন্ত্রেণাষ্টোত্তরশতাভিমন্ত্রিতান্ বেদিকায়া দশদিক্ষু। ওম্ যে চাত্র বিঘ্নকর্ত্তারো ভুবি দিব্যন্তরীক্ষগাঃ। বিঘ্নভূতাশ্চ যে চান্যে মম মন্ত্রস্য সিদ্ধিষু॥ ময়ৈতৎ কীলিতং ক্ষেত্রং পরিত্যজ্য বিদূরতঃ। অপসর্পন্তু তে সর্ব্বে নির্ব্বিঘ্নং সিদ্ধিরস্তু মে ॥ ইত্যনেন নিখন্য তেষু ওম্ নমঃ সুদর্শনায় অস্ত্রায় ফড়িতিমন্ত্রেণাস্ত্রং সংপূজ্য পূর্ব্বাদিক্রমেণ ইন্দ্রাদিলোকপালান্ পূজয়েৎ। তদ্যথা। ওম্ ভূর্ভুবঃস্বরিন্দ্রলোকপাল ইহাগচ্ছ ইত্যাবাহ্য পঞ্চোপচারৈরন্যাংশ্চ পূজয়েৎ। তথা চ মুণ্ডমালায়াং। পুণ্যক্ষেত্রাদিকং গত্বা কুর্য্যাদ্ভূমেঃ পরিগ্রহং। তথা হ্যমুকমন্ত্রস্য পুরশ্চরণসিদ্ধয়ে। ময়েয়ং গৃহ্যতে ভূমির্ম্মন্ত্রোঽয়ং সিধ্যতামিতি ॥ * ॥ তথা। গ্রামে ক্রোশমিতং স্থানং নদ্যাদৌ স্বেচ্ছয়া মতং। নগরাদাবপি ক্রোশং ক্রোশযুগ্মমথাপি বা ॥ ক্ষেত্রং বা যাবদিষ্টন্তু বিহারার্থং প্রকল্পয়েৎ। আহারাদিবিহারার্থং তাবতীং ভূমিমাক্রমেৎ ॥ ক্ষীরিবৃক্ষোদ্ভবান্ কীলান্ অস্ত্রমন্ত্রাভিমন্ত্রিতান্। নিখনেদ্দশদিগ্ভাগে তেষ্বস্ত্রঞ্চ প্রপূজয়েৎ॥ লোকপালান্ পুনস্তেষু গন্ধাদ্যৈঃ পূজয়েৎ সুধীঃ। ততো মধ্যস্থানে ক্ষেত্রপালং বাস্তীশঞ্চ

সম্পূজ্য । সর্ব্ববিঘ্নবিনাশার্থং গণপতিং পূজয়েৎ । ওম্ অদ্যেত্যাদি অমুকগোত্রশ্রীঅমুকদেবশর্ম্মা মৎকর্ত্তব্যামুকমন্ত্রপুরশ্চরণকর্ম্মণি সর্ব্ববিঘ্নবিনাশার্থং গণেশপূজামহং করিষ্যে। ইতি সঙ্কল্প্য বেদিকামধ্যে পঞ্চোপচারৈর্গণেশং পূজয়েৎ। তদুক্তং। ক্ষেত্রপালাদিকং তত্র পূজয়েৎ বিধিবত্ততঃ। ক্ষেত্রেশং বাস্তনামানং বিঘ্নরাজং সমর্চ্চয়েৎ॥ দিক্‌পালেভ্যো বলিং দদ্যাৎ ততঃ ক্ষেত্রং সমাবিশেৎ। ততো মাষভক্তাদিনা পূজিতদেবতাভ্যো বলিং দদ্যাৎ। ততঃ। ওম্ যে রৌদ্রা রৌদ্রকর্ম্মাণো রৌদ্রস্থাননিবাসিনঃ। মাতরোঽপ্যুগ্ররূপাশ্চ গণাধিপতয়শ্চ যে॥ বিঘ্নভূতাশ্চ যে চান্যে দিগ্বিদিক্ষু সমাশ্রিতাঃ। সর্ব্বে তে প্রীতমনসঃ প্রতিগৃহ্নন্ত্বিমং বলিং॥ ইত্যনেন দশদিক্ষু ভূতেভ্যো বলিং দদ্যাৎ। ততো গায়ত্রীং জপেৎ। তথা চ। প্রাতঃ স্নাত্বা তু গায়ত্র্যাঃ সহস্রং প্রযতো জপেৎ। জ্ঞাতাজ্ঞাতস্য পাপস্য ক্ষয়ার্থং প্রথমং ততঃ॥ ইতি বিদ্যাধরাচার্য্যঃ॥ *॥ যত্ত প্রাতঃ স্নাত্বা তু গায়ত্র্যা অযুতং প্রযতো জপেৎ ইতি। তৎ পুনরত্যন্তপাপশঙ্কয়া। ওম্ অদ্যেত্যাদি অমুকগোত্রশ্রীঅমুকদেবশর্ম্মা জ্ঞাতাজ্ঞাতপাপক্ষয়কামো অষ্টোত্তরসহস্রগায়ত্রীজপমযুতগায়ত্রীজপং বা অহং করিষ্যে। ইতি সঙ্কল্প্য জপেৎ। তত উপবাসং হবিষ্যং বা কুর্য্যাৎ॥ *॥ তৎপরদিনে উষসি স্নানাদিকং কৃত্বা স্বস্তিবাচনপূর্ব্বকং সঙ্কল্পং কুর্য্যাৎ। যথা বিষ্ণুঃ ওম্ অদ্যেত্যাদি অমুকগোত্রশ্রীঅমুকদেবশর্ম্মা অমুকদেবতায়া অমুকমন্ত্রসিদ্ধিপ্রতিবন্ধকতাশেষদুরিতক্ষয়পূর্ব্বকতন্মন্ত্রসিদ্ধিকামোঽদ্যারভ্য যাবতা কালেন সেৎস্যতি তাবৎকালমমুকদেবতায়া অমুকমন্ত্রস্য ইয়ৎসংখ্যজপতদ্দশাংশহোমতদ্দশাংশতর্পণতদ্দশাংশাভিষেকতদ্দশাংশব্রাহ্মণভোজনরূপপুরশ্চরণমহং করিষ্যে। ইতি সঙ্কল্প্য ভূতশুদ্ধিপ্রাণায়ামাদিকং কৃত্বা স্বস্বমুদ্রাং বদ্ধা স্বস্বপূজাপদ্ধত্যুক্তক্রমেণ দেবতাং সংপূজ্য দীপে প্রজ্বলিতে দেবতাং হৃদয়ে কৃত্বা প্রাতঃকালং সমারভ্য মধ্যং দিনং যাবৎ জপং কুর্য্যাৎ। ততস্তদ্দশাংশহোমতদ্দশাংশতর্পণতদ্দশাংশাভিষেকতদ্দশাংশব্রাহ্মণভোজনঙ্কুর্য্যাৎ। তথা চ। সনৎকুমারতন্ত্রে। প্রণবং তৎসদদ্যেতি মাসপক্ষতিথাবপি। অমুকামুকগোত্রোঽহং মূলমুচ্চার্য্য তৎপরং॥ সিদ্ধিকামোঽস্য মন্ত্রস্য ইয়ৎসঙ্খ্যং জপস্ততঃ। দশাংশং হবনং হোমাদ্দশাংশং তর্পণং ততঃ॥ দশাংশং মার্জ্জনং তস্মাদ্দশাংশং বিপ্রভোজনং। পুরশ্চরণমেবং হি করিষ্যে প্রাগুদঙ্মুখঃ॥ তথা। দীপস্য জ্বলিতস্যাথ জপকর্ম্ম প্রশস্যতে। তদ্দীপস্থানমাশ্রিত্য বাতাতপসহাং কুটিং॥ নির্ম্মায় বিধিবৎ কুর্য্যাৎ জপং তত্র শুভে দিনে। ততো হোমস্ততস্তর্পণং॥ *

তন্ত্রান্তরে। তর্পণন্তু ততঃ কুর্য্যাত্তীর্থোদৈশ্চন্দ্রমিশ্রিতৈঃ। জলে দেবং সমাবাহ্য

পাদ্যাদ্যৈরুদকাত্মকৈঃ ॥ সম্পূজ্য বিধিবদ্ভক্ত্যা পরিবারসমন্বিতং । একৈকমঞ্জলিং তোয়ং পরিবারান্ প্রতর্পয়েৎ ॥ ততো হোমদশাংশেন তর্পয়েৎ পরদৈবতং । সংপূর্ণায়ান্তু সঙ্খ্যায়াং পুনরেকৈকমঞ্জলিং । অঙ্গাদিপরিবারেভ্যো দত্ত্বা দেবং বিসর্জ্জয়েৎ ॥*॥ তর্পণবাক্যন্তু মূলমুচ্চার্য্য শ্রীঅমুকং তর্পয়ামি নমঃ । ইতি বিষ্ণুবিষয়ং । তথা চ গৌতমীয়ে । আদৌ মন্ত্রং সমুচ্চার্য্য শ্রীপূর্ব্বং কৃষ্ণমিত্যপি । তর্পয়ামি পদঞ্চোক্ত্বা নমোঽন্তং তর্পয়েন্নরঃ ॥ অন্যত্র মূলমুচ্চার্য্য অমুকদেবতাং তর্পয়ামীতি । তথা চ । তর্পয়ামি পদঞ্চোক্ত্বা মন্ত্রান্তে স্বেষু নামসু । দ্বিতীয়ান্তেষু চেত্যেবং তর্পণস্য মনুর্ম্মতঃ ॥ শক্তিবিষয়ে পুনর্ম্মূলমুচ্চার্য্য অমুকীং তর্পয়ামি স্বাহা । হোমতর্পণয়োঃ স্বাহেতি তত্তত্তন্ত্রবচনাৎ । নীলতন্ত্রে । মন্ত্রান্তে নাম চোচ্চার্য্য তর্পয়ামি ততঃ পরং । কুর্য্যাচ্চৈব বরারোহে স্বাহান্তং তর্পণে মতমিত্যাদি ॥ বিশুদ্ধেশ্বরতন্ত্রে । বিদ্যাং পূর্ব্বং সমুচ্চার্য্য তদন্তে দেবতাভিধাং । তর্পয়ামীতি সম্প্রোক্ত্বা স্বাহান্তস্তর্পণো মতঃ ॥ * ॥ অভিষেকবাক্যন্তু । নমোঽন্তং মূলমুচ্চার্য্য অমুকদেবতামহমভিষিঞ্চামি ইতি কলসমুদ্রয়া স্বমূর্দ্ধ্নি অভিষিঞ্চেৎ । তথা চ । গৌতমীয়ে । নমোঽন্তং মূলমুচ্চার্য্য তদন্তে দেবতাভিধাং । দ্বিতীয়ান্তামহং পশ্চাদভিষিঞ্চাম্যনেন তু ॥ অভিষিঞ্চেৎ স্বমূর্দ্ধানং তোয়ৈঃ কুম্ভাখ্যমুদ্রয়া ॥*॥শক্তিবিষয়ে নীলতন্ত্রে । মন্ত্রান্তে নাম চোচ্চার্য্য সিঞ্চামীতি নমঃ পদমিতি । ততো ব্রাহ্মণান্ ভোজয়িত্বা পূজাং কুর্য্যাৎ ॥ * ॥ ততো দক্ষিণা । অদ্যেত্যাদি কৃতৈতদমুকমন্ত্রপুরশ্চরণকর্ম্মণঃ সাঙ্গতার্থং দক্ষিণামিদং কাঞ্চনং বহ্নিদৈবতং অমুকগোত্রায় গুরবে তুভ্যমহং সম্প্রদদে । ততোঽচ্ছিদ্রাবধারণং কুর্য্যাৎ ॥ * ॥

অথ গ্রহণপুরশ্চরণসঙ্কল্পঃ ।

তদ্যথা । ওম্ অদ্যেত্যাদি রাহুগ্রস্তে নিশাকরে দিবাকরে বা অমুকগোত্রশ্রীঅমুকদেবশর্ম্মা অমুকদেবতায়া অমুকমন্ত্রসিদ্ধিকামো গ্রাসাদ্বিমুক্তিপর্য্যন্তং অমুকদেবতায়া অমুকমন্ত্রজপরূপপুরশ্চরণমহং করিষ্যে । ইতি সঙ্কল্প্য জপেৎ । ততস্তদ্দিনে তৎপরদিনে বা স্নানাদিকং বিধায় ওম্ অদ্যেত্যাদি অমুকদেবতায়া অমুকমন্ত্রস্য কৃতৈতৎগ্রহণকালীন ইয়ৎসঙ্খ্যজপতদ্দশাংশহোমতদ্দশাংশতর্পণতদ্দশাংশাভিষেকতদ্দশাংশব্রাহ্মণভোজনকর্ম্মাণ্যহং করিষ্যে । ইতি সঙ্কল্প্য হোমাদিকং কুর্য্যাৎ । দক্ষিণাদিকন্তু পূর্ব্ববৎ । ইতি কৃষ্ণানন্দকৃততন্ত্রসারঃ ॥ * ॥ অত্র আগমকল্পদ্রুমোক্তকূর্ম্মচক্রং তচ্ছব্দে দ্রষ্টব্যং । হরিভক্তিবিলাসীয়পুরশ্চরণন্তু তদ্গ্রন্থে সপ্তদশবিলাসে দর্শনীয়ং ॥

পুরশ্ছদঃ (পুং) তৃণবিশেষঃ । উলু ইতি ভাষা । তৎপর্য্যায়ঃ । দর্ভঃ ২ শপ্তঃ ৩ সোমপত্রঃ ৪ পরাৎপ্রিয়ঃ ৫ । ইতি শব্দচন্দ্রিকা ॥ উলুপঃ ৬ । ইতি মেদিনী ॥

পুরস্কারঃ (পুং) পুরস্ক্রিয়া। অভিশাপঃ। অরিগ্রহণং। অগ্রকরণং। পূজনং। স্বীকারঃ। সেকঃ। ইতি পুরস্কৃতশব্দার্থদর্শনাৎ॥

পুরস্কৃতঃ (ত্রি) অভিশস্তঃ। অরিগ্রস্তঃ। অগ্রকৃতঃ। পূজিতঃ। ইতি মেদিনী॥ স্বীকৃতঃ। সিক্তঃ। ইতি হেমচন্দ্রঃ॥

পুরস্তাৎ ব্য প্রাচ্যাং দিশি। যথা। পুরস্তাৎ সূর্য্য উদেতি। প্রথমে কালে। যথা পুরস্তাদ্ভুঙ্‌ক্তে। পুরার্থে। অতীতে। যথা পুরস্তাদ্রামোঽভূৎ। অগ্রতঃ অগ্রে দেশে। যথা পুরস্তাদায়াতি। ইত্যমরভরতৌ॥

পুরা ব্য প্রবন্ধঃ। বাক্যরচনা পুরাণাদিঃ। যথা পুরাবিদঃ। চিরং। চিরন্তনং। পুরাণমিত্যর্থান্তরং। অতীতং। ভূতং। চিরাতীতমিত্যেকং। যথা ইতিহাসঃ পুরাবৃত্তমিতি কেচিৎ॥ নিকটঃ। সন্নিহিতঃ। আগামিকং। অনাগতং। নিকটাগামিকঃ। ভবিষ্যদাসত্তিঃ। ইতি কেচিৎ॥ ইত্যমরভরতৌ॥ ভীরুঃ। ইতি শব্দরত্নাবলী॥

পুরা (স্ত্রী) পূর্ব্বদিক্। সুগন্ধিদ্রব্যবিশেষঃ। তৎপর্য্যায়ঃ। গন্ধবতী ২ দিব্যা ৩ গন্ধাঢ্যা ৪ গন্ধমাদিনী ৫ সুরভিঃ ৬ ভূরিগন্ধা ৭ কুটী ৮ গন্ধকুটী ৯। অস্যা তিক্তত্বং। কটুত্বং। শীতত্বং। কষায়ত্বং। কফপিত্তশ্বাসাস্রবিষদাহার্ত্তিভ্রমমূর্চ্ছাতৃষানাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

পুরাকৃতং (ত্রি) প্রারব্ধকর্ম্ম। পূর্ব্বকালকৃতপুণ্যাদি। যথা। অকালে দর্শনং বিষ্ণোর্হন্তি পুণ্যং পুরাকৃতং। ইতি স্মৃতিঃ॥

পুরাণং (ক্লী) ব্যাসাদিমুনিপ্রণীতবেদার্থবর্ণিতপঞ্চলক্ষণান্বিতশাস্ত্রং। তৎপর্য্যায়ঃ। পঞ্চলক্ষণং ২। ইত্যমরঃ॥ পঞ্চ লক্ষণানি যথা। সর্গঃ ১ প্রতিসর্গঃ ২ বংশঃ ৩ মন্বন্তরং ৪ বংশানুচরিতং ৫॥ মহাপুরাণস্য দশ লক্ষণানি যথা। সর্গঃ ১ বিসর্গঃ ২ বৃত্তিঃ ৩ রক্ষা ৪ অন্তরং ৫ বংশঃ ৬ বংশ্যানুচরিতং ৭ সংস্থা ৮ হেতুঃ ৯ অপাশ্রয়ঃ ১০॥ অথাষ্টাদশ মহাপুরাণানি তেষাং শ্লোকসংখ্যানি চ যথা। ব্রাহ্মং দশসহস্রং ১ পাদ্মং পঞ্চপঞ্চাশৎসহস্রং ২ বৈষ্ণবং ত্রয়োবিংশতিসহস্রং ৩ শৈবং চতুর্বিংশতিসহস্রং ৪ ভাগবতং অষ্টাদশসহস্রং ৫ নারদীয়ং পঞ্চবিংশতিসহস্রং ৬ মার্কণ্ডেয়ং নবসহস্রং ৭ আগ্নেয়ং চতুঃশতাধিকপঞ্চদশসহস্রং ৮ ভবিষ্যং পঞ্চশতাধিকচতুর্দ্দশসহস্রং ৯ ব্রহ্মবৈবর্ত্তং অষ্টাদশসহস্রং ১০ লৈঙ্গং একাদশসহস্রং ১১ বারাহং চতুর্বিংশতিসহস্রং ১২ স্কান্দং শতাধিকৈকাশীতিসহস্রং ১৩ বামনং দশসহস্রং ১৪ কৌর্ম্মং সপ্তদশসহস্রং ১৫ মাৎস্যং চতুর্দ্দশসহস্রং ১৬ গারুড়ং ঊনবিংশতিসহস্রং ১৭ ব্রহ্মাণ্ডং দ্বাদশসহস্রং ১৮। সমুদায়েন চতুর্লক্ষশ্লোকাঃ। ইতি শ্রীভাগবতীয়দ্বাদশস্কন্ধঃ॥ *॥ অপি চ। সূত উবাচ। বিস্তরাণি পুরাণানি চেতিহাসশ্চ শৌনক। সংহিতাং পঞ্চরাত্রাণি কথয়ামি যথাগমং॥ *॥ সর্গশ্চ প্রতিসর্গশ্চ বংশো মন্বন্তরাণি চ। বংশানুচরিতং বিপ্র পুরাণং পঞ্চলক্ষণং॥ এতদুপপুরাণানাং লক্ষণঞ্চ

বিদুর্বুধাঃ। মহতাঞ্চ পুরাণানাং লক্ষণং কথয়ামি তে॥ *॥ সৃষ্টিশ্চাপি বিসৃষ্টিশ্চ স্থিতিস্তেষাঞ্চ পালনং। কর্ম্মণাং বাসনা বার্ত্তা মনূনাঞ্চ ক্রমেণ চ॥ বর্ণনং প্রলয়ানাঞ্চ মোক্ষস্য চ নিরূপণং। উৎকীর্ত্তনং হরেরেব দেবানাঞ্চ পৃথক্ পৃথক্॥ দশাধিকং লক্ষণঞ্চ মহতাং পরিকীর্ত্তিতং। সংখ্যানঞ্চ পুরাণানাং নিবোধ কথয়ামি তে॥ *॥ পরং ব্রহ্মপুরাণঞ্চ সহস্রাণাং দশৈব চ। পঞ্চোনষষ্টিসাহস্রং পাদ্মমেব প্রকীর্ত্তিতং॥ ত্রয়োবিংশতিসাহস্রং বৈষ্ণবঞ্চ বিদুর্বুধাঃ। চতুর্বিংশতিসাহস্রং শৈবমেব নিরূপিতং॥ গ্রন্থোঽষ্টাদশসাহস্রং শ্রীমদ্ভাগবতং বিদুঃ। পঞ্চবিংশতিসাহস্রং নারদীয়ং প্রকীর্ত্তিতং॥ মার্কণ্ডং নবসাহস্রং পুরাণং পণ্ডিতা বিদুঃ। চতুঃশতাধিকং পঞ্চদশসাহস্রমেব চ॥ পরমগ্নিপুরাণঞ্চ রুচিরং পরিকীর্ত্তিতং। চতুর্দ্দশসহস্রাণি পরং পঞ্চশতাধিকং॥ পুরাণপ্রবরঞ্চৈব ভবিষ্যং পরিকীর্ত্তিতং। অষ্টাদশসহস্রঞ্চ ব্রহ্মবৈবর্ত্তমীপ্সিতং॥ সর্ব্বেষাঞ্চ পুরাণানাং সারমেব বিদুর্বুধাঃ। একাদশসহস্রঞ্চ পরং লিঙ্গপুরাণকং॥ চতুর্বিংশতিসাহস্রং বারাহং পরিকীর্ত্তিতং। একাশীতিসহস্রঞ্চ পরমেব শতাধিকং॥ বরং স্কন্দপুরাণঞ্চ সদ্ভিরেবং নিরূপিতং। বামনং দশসাহস্রং কৌর্ম্মং সপ্তদশৈব তু॥ মাৎস্যং চতুর্দ্দশং প্রোক্তং পুরাণং পণ্ডিতৈস্তথা। ঊনবিংশতিসাহস্রং গারুড়ং পরিকীর্ত্তিতং॥ পরং দ্বাদশসাহস্রং ব্রহ্মাণ্ডং পরিকীর্ত্তিতং। এবং পুরাণসংখ্যানং চতুর্লক্ষমুদাহৃতং॥ অষ্টাদশপুরাণানামেবমেব বিদুর্বুধাঃ। এবঞ্চোপপুরাণানামষ্টাদশ প্রকীর্ত্তিতাঃ॥ *॥ ইতিহাসো ভারতঞ্চ বাল্মীকং কাব্যমেব চ। পঞ্চকং পঞ্চরাত্রাণাং কৃষ্ণমাহাত্ম্যপূর্ব্বকং॥ বাশিষ্ঠং নারদীয়ঞ্চ কাপিলং গৌতমীয়কং। পরং সনৎকুমারীয়ং পঞ্চরাত্রঞ্চ পঞ্চকং॥ পঞ্চম্যঃ সংহিতানাঞ্চ কৃষ্ণভক্তিসমন্বিতাঃ। ব্রহ্মণশ্চ শিবস্যাপি প্রহ্লাদস্য তথৈব চ॥ গৌতমস্য কুমারস্য সংহিতাঃ পরিকীর্ত্তিতাঃ। ইতি তে কথিতং সর্ব্বং ক্রমেণ চ পৃথক্ পৃথক্॥ অস্ত্যেবং বিপুলং শাস্ত্রং মমাপি চ যথাগমং। ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ১৩২ অধ্যায়ঃ॥ *॥ পদ্মপুরাণমতে তু। নিস্তারায় তু লোকানাং স্বয়ং নারায়ণঃ প্রভুঃ। ব্যাসরূপেণ কৃতবান্ পুরাণানি মহীতলে॥ পঠনাচ্ছ্রবণাদ্যেষাং নৃণাং পাপক্ষয়ো ভবেৎ। ধর্ম্মাধর্ম্মপরিজ্ঞানং সদাচারপ্রবর্ত্তনং॥ গতিশ্চ পরমা তদ্বদ্ভক্তির্ভগবতি প্রভৌ। তানি তে কথয়িষ্যামি সপ্রমাণানি ভূতলে॥ *॥ পুরাণসংখ্যানন্তরমাহ। পুরাণানি চতুর্লক্ষাণ্যেতানি ধরণীতলে। তথা মহাভারতঞ্চ লক্ষসংখ্যং প্রকীর্ত্তিতং॥ পঞ্চলক্ষমিদং রাজন্ কথিতং ব্রহ্ম কেবলং। বেদঃ পঞ্চমনামৈষ লোকনিস্তারকঃ পরঃ॥ তত্র পদ্মপুরাণঞ্চ প্রথমং স প্রণীতবান্! ততোঽন্যানি পুরাণানি কৃত্বা ষোড়শ তু ক্রমাৎ॥ অষ্টাদশং ভাগবতং সারমাকৃষ্য সর্ব্বতঃ।

কৃতবান্ ভগবান্ ব্যাসঃ শুকঞ্চাধ্যাপয়ৎ সুতং ॥ ইতি পাতালখণ্ডে ৭১ অধ্যায়ঃ ॥*॥ আখ্যানাদিভিঃ সহ ব্যাসঃ পুরাণং চক্রে। যথা। আখ্যানৈশ্চাপ্যুপাখ্যানৈর্গাথাভিঃ কল্পশুদ্ধিভিঃ। পুরাণসংহিতাং চক্রে পুরাণার্থবিশারদঃ ॥ প্রখ্যাতো ব্যাসশিষ্যোঽভূৎ সূতো বৈ লোমহর্ষণঃ। পুরাণসংহিতাং তস্মৈ দদৌ ব্যাসো মহামুনিঃ ॥ অস্য টীকা যথা। আখ্যানাদিভিঃ সহ পুরাণং চক্রে ব্যাস ইত্যন্বয়ঃ। তত্র চ। স্বয়ং দৃষ্টার্থকথনং প্রাহুরাখ্যানকং বুধাঃ। শ্রুতস্যার্থস্য কথনমুপাখ্যানং প্রচক্ষতে ॥ গাথাস্তু পিতৃপৃথ্বীপ্রভৃতিগীতয়ঃ। কল্পশুদ্ধিঃ শ্রাদ্ধকল্পাদিনির্ণয়ঃ ॥ * ॥ সুমতিশ্চাগ্নিবর্চ্চাশ্বমিত্রায়ুঃ শাংশপায়নঃ। অকৃতব্রণোঽথ সাবর্ণিঃ ষট্ শিষ্যাস্তস্য চাভবন্ ॥ টীকা। সুমত্যাদয়স্তু রোমহর্ষণস্য ষট্ শিষ্যাস্তৎকৃতাঃ ষট্ সংহিতা জগৃহুঃ ॥*॥ কাশ্যপঃ সংহিতাকর্ত্তা সাবর্ণিঃ শাংশপায়নঃ। লৌমহর্ষণিকা চান্যা তিসৃণাং মূলসংহিতা ॥ টীকা। অকৃতব্রণ এব কাশ্যপঃ কাশ্যপো হ্যকৃতব্রণ ইতি বায়ূক্তেঃ। রৌমহর্ষণিকা চান্যা রোমহর্ষণেন পুনঃ সংক্ষেপেণ প্রোক্তা ॥ * ॥ চতুষ্টয়েনাপ্যেতেন সংহিতানামিদং মুনে। টীকা। এতাসাং কাশ্যপাদিকৃতানাং সংহিতানামর্থচতুষ্টয়েনাপি মূলভূতেন তৎসারোদ্ধারাত্মকং ইদং শ্রীবিষ্ণুপুরাণং মুনে মৈত্রেয় ময়া কৃতমিতি শেষঃ ॥ *॥ আদ্যং সর্ব্বপুরাণানাং পুরাণং ব্রাহ্মমুচ্যতে। অষ্টাদশপুরাণানি পুরাণজ্ঞাঃ প্রচক্ষতে ॥ ইতি বিষ্ণুপুরাণে ৩ অংশে ৬ অধ্যায়ঃ ॥*॥ তেষাং নামোচ্চারণাদিমাহাত্ম্যং যথা। অষ্টাদশপুরাণানাং নামধেয়ানি যঃ পঠেৎ। ত্রিসন্ধ্যং জপতে নিত্যং সোঽশ্বমেধফলং লভেৎ ॥ ইতি মার্কণ্ডেয়পুরাণং ॥ * ॥ তামসপুরাণানি যথা। মাৎস্যং কৌর্ম্মং তথা লৈঙ্গং শৈবং স্কান্দং তথৈব চ। আগ্নেয়ঞ্চ ষড়েতানি তামসানি নিবোধত ॥ * ॥ সাত্ত্বিকপুরাণানি যথা। বৈষ্ণবং নারদীয়ঞ্চ তথা ভাগবতং শুভং। গারুড়ঞ্চ তথা পাদ্মং বারাহং শুভদর্শনে। সাত্ত্বিকানি পুরাণানি বিজ্ঞেয়ানি শুভানি বৈ ॥ * ॥ রাজসপুরাণানি যথা। ব্রহ্মাণ্ডং ব্রহ্মবৈবর্ত্তং মার্কণ্ডেয়ং তথৈব চ। ভবিষ্যং বামনং ব্রাহ্মং রাজসানি নিবোধত ॥ * ॥ সাত্ত্বিকা মোক্ষদাঃ প্রোক্তা রাজসাঃ স্বর্গদাঃ শুভাঃ। তথৈব তামসা দেবি নিরয়প্রাপ্তিহেতবঃ ॥ ইতি পাদ্মোত্তরখণ্ডে ৪৩ অধ্যায়ঃ ॥ * ॥ অষ্টাদশোপপুরাণানি যথা। আদ্যং সনৎকুমারোক্তং নারসিংহমথাপরং। তৃতীয়ং স্কান্দমুদ্দিষ্টং কুমারেণ তু ভাষিতং ॥ চতুর্থং শিবধর্ম্মাখ্যং সাক্ষান্নন্দীশভাষিতং। দুর্ব্বাসসোক্তমাশ্চর্য্যং নারদোক্তমতঃ পরং ॥ কাপিলং বামনঞ্চৈব তথৈবোসনসেরিতং। ব্রহ্মাণ্ডং বারুণঞ্চাথ কালিকাহ্বয়মেব চ ॥ মাহেশ্বরং তথা শাম্বং সৌরং সর্ব্বার্থসঞ্চয়ং। পরাশরোক্তমপরং মারীচং ভার্গবাহ্বয়ং ॥ ইতি গারুড়ে ২২৭ অধ্যায়ঃ ॥ * ॥

কৌর্ম্মোক্তান্যেতানি উপপুরাণশব্দে দ্রষ্টব্যানি ॥ * ॥ পুরাণপাঠক্রমস্তু পারায়ণশব্দে পাঠশব্দে চ দ্রষ্টব্যঃ ॥ অথাষ্টাদশমহাপুরাণানামনুক্রমণিকা অর্থাৎ তেষাং শ্লোকপর্ব্বখণ্ডভাগোপাখ্যানশ্রবণদাননফলানি লিখ্যন্তে। সূত উবাচ। এতচ্ছুত্বা নারদস্তু কুমারস্য বচো মুদা। পুনরপ্যাহ সুপ্রীতো জিজ্ঞাসুঃ শ্রেয় উত্তমং ॥ * ॥ নারদ উবাচ। সাধু সাধু মহাভাগ সর্ব্বলোকোপকারকং। মহাতন্ত্রং ত্বয়া প্রোক্তং সর্ব্বতন্ত্রোত্তমোত্তমং ॥ অধুনা শ্রোতুমিচ্ছামি পুরাণাখ্যানমুত্তমং। যস্মিন্ যস্মিন্ পুরাণে তু যদ্যদাখ্যানকং মুনে। তত্তৎ সর্ব্বং সমাচক্ষ সর্ব্বজ্ঞস্তং যতো মতঃ ॥ তচ্ছুত্বা বচনং বিপ্রা নারদস্য শুভাবহং পুরাণাখ্যানসংপ্রশ্নং কুমারঃ প্রত্যুবাচ হ ॥ * ॥ সনৎকুমার উবাচ। পুরাণাখ্যানকং বিপ্র নানাকল্পসমুদ্ভবং। নানাকথাসমাযুক্তমদ্ভুতং বহুবিস্তরং ॥ ঋষিঃ সনাতনশ্চায়ং যথা বেদ তথাপরঃ। ন বেদ তস্মাৎ পৃচ্ছ ত্বং বহুকল্পবিদাম্বরং ॥ শ্রুত্বেত্থং নারদো বাক্যং কুমারস্য মহাত্মনঃ। প্রণম্য বিনয়োপেতঃ সনাতনমথাব্রবীৎ ॥ * ॥ ব্রহ্মন্ পুরাণবিচ্ছ্রেষ্ঠ জ্ঞানবিজ্ঞানতৎপর। পুরাণানাং বিভাগং মে সাকল্যেনানুকীর্ত্তয় ॥ যস্মিন্ শ্রুতে শ্রুতং সর্ব্বং জ্ঞাতে জ্ঞাতং কৃতে কৃতং। বর্ণাশ্রমাচারধর্ম্মং সাক্ষাৎকারত্বমেষ্যতি ॥ কিয়ন্তি চ পুরাণানি কিয়ৎ সখ্যানি মানতঃ। কিং কিমাখ্যানযুক্তানি তদ্বদস্ব মম প্রভো ॥ চাতুর্বর্ণ্যাশ্রয়া নানা ব্রতাদীনাং কথাস্তথা। সৃষ্টিক্রমেণ বংশানাং কথাঃ সম্যক্ প্রকাশয় ॥ ত্বত্তোঽধিকো ন চান্যোঽস্তি পুরাণাখ্যানবিৎ প্রভো। তস্মাদাখ্যাহি মহ্যং ত্বং সর্ব্বসন্দেহভঞ্জনং ॥ ততঃ সনাতনো বিপ্রাঃ শ্রুত্বা নারদভাষিতং। নারায়ণং ক্ষণং ধ্যাত্বা প্রোবাচাথ বিদাম্বরঃ ॥*॥ সনাতন উবাচ। সাধু সাধু মুনিশ্রেষ্ঠ সর্ব্বলোকোপকারক। পুরাণাখ্যানবিজ্ঞানে যজ্জাতা নৈষ্ঠিকী মতিঃ ॥ তুভ্যং সমভিধাস্যামি যৎ প্রোক্তং ব্রহ্মণা পুরা। মরীচ্যাদিঋষিভ্যস্তু পুত্রস্নেহাবৃতাত্মনা ॥ একদা ব্রহ্মণঃ পুত্রো মরীচির্নাম বিশ্রুতঃ। স্বাধ্যায়শ্রুতসম্পন্নো বেদবেদাঙ্গপারগঃ ॥ উপসৃত্য স্বপিতরং ব্রহ্মাণং লোকভাবনং। প্রণম্য ভক্ত্যা পপ্রচ্ছ ইদমেব মুনীশ্বর। পুরাণাখ্যানমমলং যত্ত্বং পৃচ্ছসি মানদ ॥ * ॥ মরীচিরুবাচ। ভগবান দেবদেবেশ লোকানাং প্রভবাপ্যয়। সর্ব্বজ্ঞ সর্ব্বকল্যাণ সর্ব্বাধ্যক্ষ নমোঽস্তু তে ॥ পুরাণবীজমাখ্যাহি মহ্যং শুশ্রূষতে পিতঃ। লক্ষণঞ্চ প্রমাণঞ্চ বক্তারং পৃচ্ছকং তথা ॥ * ॥ ব্রহ্মোবাচ। শৃণু বৎস প্রবক্ষ্যামি পুরাণানাং সমুচ্চয়ে। যস্মিন্ জ্ঞাতে ভবেজ্জ্ঞাতং বাঙ্ময়ং সচরাচরং ॥ পুরাণমেকমেবাসীৎ সর্ব্বকল্পেষু মানদ। চতুর্ব্বর্গস্য বীজঞ্চ শতকোটিপ্রবিস্তরং ॥ প্রবৃত্তিঃ সর্ব্বশাস্ত্রাণাং পুরাণাদভবত্ততঃ ॥ কালেনাগ্রহণং দৃষ্ট্বা পুরাণস্য মহামতিঃ। হরির্ব্যাসস্বরূপেণ জায়তে চ যুগে যুগে ॥

চতুর্লক্ষপ্রমাণেন দ্বাপরে দ্বাপরে সদা। তদষ্টাদশধা কৃত্বা ভূর্লোকে নির্দ্দিশত্যপি॥ অদ্যাপি দেবলোকে তু শতকোটিপ্রবিস্তরং। অস্ত্যেব তস্য সারস্তু চতুর্লক্ষেণ বর্ণ্যতে॥*॥ ব্রাহ্মং ১ পাদ্মং ২ বৈষ্ণবঞ্চ ৩ বায়বীয়ং ৪ তথৈব চ। ভাগবতং ৫ নারদীয়ং ৬ মার্কণ্ডেয়ঞ্চ ৭ কীর্ত্তিতং॥ আগ্নেয়ঞ্চ ৮ ভবিষ্যঞ্চ ৯ ব্রহ্মবৈবর্ত্ত ১০ লিঙ্গকে১১। বারাহঞ্চ ১২ তথা স্কান্দং১৩ বামনং ১৪ কূর্ম্ম ১৫ সংজ্ঞিকং। মাৎস্যঞ্চ ১৬ গারুড়ং ১৭ তদ্বদ্‌ব্রহ্মাণ্ডাখ্য১৮মিতি ত্রিষট্‌॥ একং কথানকং সূত্রং বক্তুঃ শ্রোতুঃ সমাহ্বয়ং। প্রবক্ষ্যামি সমাসেন নিশাময় সমাহিতঃ॥ *॥

তত্র প্রথমং ব্রহ্মপুরাণং। ব্রাহ্মং পুরাণং তত্রাদৌ সর্ব্বলোকহিতায় বৈ। ব্যাসেন বেদবিদুষা সমাখ্যাতং মহাত্মনা॥ তদ্বৈ সর্ব্বপুরাণাগ্র্যং ধর্ম্মকামার্থমোক্ষদং। নানাখ্যানেতিহাসাঢ্যং দশসাহস্রমুচ্যতে॥*॥ তৎপূর্ব্বভাগে। দেবানামসুরাণাঞ্চ যত্রোৎপত্তিঃ প্রকীর্ত্তিতা। প্রজাপতীনাঞ্চ তথা দক্ষাদীনাং মুনীশ্বর॥ ততো লোকেশ্বরস্যাত্র সূর্য্যস্য পরমাত্মনঃ। বংশানুকীর্ত্তনং পুণ্যং মহাপাতকনাশনং॥ যত্রাবতারঃ কথিতঃ পরমানন্দরূপিণঃ। শ্রীমতো রামচন্দ্রস্য চতুর্ব্যূহাবতারিণঃ॥ ততশ্চ সোমবংশস্য কীর্ত্তনং যত্র বর্ণিতং। কৃষ্ণস্য জগদীশস্য চরিতং কল্মষাপহং॥ দ্বীপানাঞ্চৈব সিন্ধূনাং বর্ষাণাং চাপ্যশেষতঃ। বর্ণনং যত্র পাতালস্বর্গাণাঞ্চ প্রদৃশ্যতে॥ নরকাণাং সমাখ্যানং সূর্য্যস্তুতিকথানকং। পার্ব্বত্যাশ্চ তথা জন্ম বিবাহশ্চ নিগদ্যতে॥ দক্ষাখ্যানং ততঃ প্রোক্তমেকাম্রক্ষেত্রবর্ণনং। পূর্ব্বভাগোঽয়মুদিতঃ পুরাণস্যাস্য মানদ॥*॥ তদুত্তরভাগে। অস্যোত্তরে বিভাগে তু পুরুষোত্তমবর্ণনং। বিস্তরেণ সমাখ্যাতং তীর্থযাত্রাবিধানতঃ॥অত্রৈব কৃষ্ণচরিতং বিস্তরাৎ সমুদীরিতং। বর্ণনং যমলোকস্য পিতৃশ্রাদ্ধবিধিস্তথা॥ বর্ণাশ্রমাণাং ধর্ম্মাশ্চ কীর্ত্তিতা যত্র বিস্তরাৎ। বিষ্ণুধর্ম্মযুগাখ্যানং প্রলয়স্য চ বর্ণনং॥ যোগানাঞ্চ সমাখ্যানং সাঙ্খ্যানাঞ্চাপি বর্ণনং। ব্রহ্মবাদসমুদ্দেশঃ পুরাণস্য চ শংসনং॥ এতদ্‌ব্রহ্মপুরাণন্তু ভাগদ্বয়সমাচিতং। বর্ণিতং সর্ব্বপাপঘ্নং সর্ব্বসৌখ্যপ্রদায়কং॥ *॥ তৎফলশ্রুতিঃ। সূতশৌনকসংবাদং ভুক্তিমুক্তিপ্রদায়কং। লিখিত্বৈতৎ পুরাণং যো বৈশাখ্যাং হেমসংযুতং॥ জলধেনুযুতঞ্চাপি ভক্ত্যা দদ্যাদ্দ্বিজাতয়ে। পৌরাণিকায় সম্পূজ্য বস্ত্রভোজ্যবিভূষণৈঃ। স বসেদ্‌ব্রহ্মণো লোকে যাবচ্চন্দ্রার্কতারকং॥ যঃ পঠেচ্ছৃণুয়াদ্বাপি ব্রাহ্মানুক্রমণীং দ্বিজ। সোঽপি সর্ব্বপুরাণস্য শ্রোতুর্ব্বক্তুঃ ফলং লভেৎ॥ শৃণোতি যঃ পুরাণন্তু ব্রাহ্মং সর্ব্বং জিতেন্দ্রিয়ঃ। হবিষ্যাশী চ নিয়মাৎ স লভেদ্‌ব্রহ্মণঃ পদং কিমত্র বহুনোক্তেন যদ্যদিচ্ছতি মানব তৎ সর্ব্বং লভতে বৎস পুরাণস্যাস্য কীর্ত্তনাৎ॥ ইতি শ্রীনারদীয়পুরাণে পূর্ব্বভাগে বৃহদুপাখ্যানে চতুর্থপাদে ৯২অধ্যায়ঃ॥১॥

দ্বিতীয়ং পদ্মপুরাণং। শ্রীব্রহ্মোবাচ। শৃণু পুত্র প্রবক্ষ্যামি পুরাণং পদ্মসংজ্ঞিকং। মহৎপুণ্যপ্রদং নৃণাং শৃণ্বতাং পঠতাং মুদা॥ যথা পঞ্চেন্দ্রিয়ঃ সর্ব্বঃ শরীরীতি নিগদ্যতে। তথেদং পঞ্চভিঃ খণ্ডৈরুদিতং পাপনাশনং॥*॥ তত্র প্রথমে সৃষ্টিখণ্ডে। পুলস্ত্যেন তু ভীষ্মায় সৃষ্ট্যাদিক্রমতো দ্বিজ। নানাখ্যানেতিহাসাদ্যৈর্যত্রোক্তো ধর্ম্মবিস্তরঃ॥ পুষ্করস্য চ মাহাত্ম্যং বিস্তরেণ প্রকীর্ত্তিতং। ব্রহ্মযজ্ঞবিধানঞ্চ বেদপাঠাদিলক্ষণং॥ দানানাং কীর্ত্তনং যত্র ব্রতানাঞ্চ পৃথক্ পৃথক্। বিবাহঃ শৈলজায়াশ্চ তারকাখ্যানকং মহৎ॥ মাহাত্ম্যঞ্চ গবাদীনাং কীর্ত্তিদং সর্ব্বপুণ্যদং। কালকেয়াদিদৈত্যানাং বধো যত্র পৃথক্ পৃথক্॥ গ্রহাণামর্চ্চনং দানং যত্র প্রোক্তং দ্বিজোত্তম। তৎসৃষ্টিখণ্ডমুদ্দিষ্টং ব্যাসেন সুমহাত্মনা॥*॥ দ্বিতীয়ে ভূমিখণ্ডে। পিতৃমাত্রাদিপূজ্যত্বে শিবশর্ম্মকথা পুরা। সুব্রতস্য কথা পশ্চাৎ বৃত্রস্য চ বধস্তথা॥ পৃথোর্বৈণস্য চাখ্যানং ধর্ম্মাখ্যানং ততঃ পরং। পিতৃশুশ্রূষণাখ্যানং নহুষস্য কথা ততঃ॥ যযাতিচরিতঞ্চৈব গুরুতীর্থনিরূপণং। রাজ্ঞা জৈমিনিসংবাদো বহ্বাশ্চর্য্যকথাযুতঃ॥ কথা হ্যশোকসুন্দর্য্যা হুণ্ডদৈত্যবধাচিতা। কামোদাখ্যানকং তত্র বিহুণ্ডবধসংযুতং॥ কুঞ্জলস্য চ সংবাদশ্চ্যবনেন মহাত্মনা। সিদ্ধাখ্যানং ততঃ প্রোক্তং খণ্ডস্যাস্য ফলোহনং॥ সূতশৌনকসংবাদং ভূমিখণ্ডমিদং স্মৃতং।*।

তৃতীয়ে স্বর্গখণ্ডে। ব্রহ্মাণ্ডোৎপত্তিরুদিতা যত্রর্ষিভিশ্চ সৌতিনা॥ সভূমিলোকসংস্থানং তীর্থাখ্যানং ততঃ পরং। নর্ম্মদোৎপত্তিকথনং তত্তীর্থানাং কথা পৃথক্॥ কুরুক্ষেত্রাদিতীর্থানাং কথাঃ পুণ্যাঃ প্রকীর্ত্তিতাঃ। কালিন্দীপুণ্যকথনং কাশীমাহাত্ম্যবর্ণনং॥ গয়ায়াশ্চৈব মাহাত্ম্যং প্রয়াগস্য চ পুণ্যকং। বর্ণাশ্রমানুরোধেন কর্ম্মযোগনিরূপণং॥ ব্যাসজৈমিনিসংবাদঃ পুণ্যকর্ম্মকথাচিতঃ। সমুদ্রমথনাখ্যানং ব্রতাখ্যানং ততঃ পরং॥ ঊর্জ্জপঞ্চাহমাহাত্ম্যং স্তোত্রং সর্ব্বাপরাধনুৎ। এতৎস্বর্গাভিধং বিপ্র সর্ব্বপাতকনাশনং॥*॥ চতুর্থে পাতালখণ্ডে। রামাশ্বমেধে প্রথমং রামরাজ্যাভিষেচনং। অগস্ত্যাদ্যাগমশ্চৈব পৌলস্ত্যাচয়কীর্ত্তনং॥ অশ্বমেধোপদেশশ্চ হয়চর্য্যা ততঃ পরং। নানারাজকথাঃ পুণ্যা জগন্নাথানুবর্ণনং॥ বৃন্দাবনস্য মাহাত্ম্যং সর্ব্বপাপপ্রণাশনং। নিত্যলীলানুকথনং যত্র কৃষ্ণাবতারিণঃ॥ মাধবস্নানমাহাত্ম্যে স্নানদানার্চ্চনে ফলং। ধরাবরাহসংবাদো যমব্রাহ্মণয়োঃ কথা॥ সংবাদো রাজদূতানাং কৃষ্ণস্তোত্রনিরূপণং। শিবসম্ভুসমাযোগো দধীচ্যাখ্যানকস্ততঃ॥ ভস্মমাহাত্ম্যমতুলং শিবমাহাত্ম্যমুত্তমং। দেবরাতসুতাখ্যানং পুরাণজ্ঞপ্রশংসনং॥ গৌতমাখ্যানকঞ্চৈব শিবগীতা ততঃ স্মৃতা। কল্পান্তরী রামকথা ভারদ্বাজাশ্রমাশ্রিতৌ॥ পাতালখণ্ডমেতদ্ধি শৃণ্বতাং জ্ঞানিনাং সদা। সর্ব্বপাপ-

প্রশমনং সর্ব্বাভীষ্টফলপ্রদং ॥ * ॥ পঞ্চমে উত্তরখণ্ডে । পর্ব্বতাখ্যানকং পূর্ব্বং গৌর্য্যৈ প্রোক্তং শিবেন বৈ। জালন্ধর-কথা পশ্চাচ্ছ্রীশৈলাদ্যনুকীর্ত্তনং ॥ সগরস্য কথা পুণ্যা ততঃ পরমুদীরিতং। গঙ্গা-প্রয়াগকাশীনাং গয়ায়াশ্চাধিপুণ্যকং ॥ আম্রাদিদানমাহাত্ম্যং তন্মহাদ্বাদশীব্রতং। চতুর্ব্বিংশৈকাদশীনাং মাহাত্ম্যং পৃথগীরিতং ॥ বিষ্ণুধর্ম্মসমাখ্যানং বিষ্ণুনাম-সহস্রকং। কার্ত্তিকব্রতমাহাত্ম্যং মাঘস্নান-ফলন্ততঃ ॥ জম্বুদ্বীপস্য তীর্থানাং মাহাত্ম্যং পাপনাশনং। সাভ্রমত্যাশ্চ মাহাত্ম্যং নৃসিংহোৎপত্তিবর্ণনং ॥ দেবশর্ম্মাদিকা-খ্যানং গীতামাহাত্ম্যবর্ণনে । ভক্ত্যা-খ্যানঞ্চ মাহাত্ম্যে শ্রীমদ্ভাগবতস্য হ ॥ ইন্দ্রপ্রস্থস্য মাহাত্ম্যং বহুতীর্থকথাচিতং। মন্ত্ররত্নাভিধানঞ্চ ত্রিপাদ্ভূত্যনুবর্ণনং ॥ অবতারকথা পুণ্যা মৎস্যাদীনামতঃ পরং। রামনামশতং দিব্যং তন্মাহাত্ম্যঞ্চ বাড়ব ॥ পরীক্ষণঞ্চ ভৃগুণা শ্রীবিষ্ণোর্ব্বৈভবস্য চ। ইত্যেতদুত্তরং খণ্ডং পঞ্চমং সর্ব্ব-পুণ্যদং ॥ * ॥ তৎফলশ্রুতিঃ। পঞ্চখণ্ড-যুক্তং পাদ্মং যঃ শৃণোতি নরোত্তমঃ। স লভেদ্বৈষ্ণবং ধাম ভুক্ত্বা ভোগানিহে-প্সিতান্ ॥ এতদ্বৈ পঞ্চপঞ্চাশৎসহস্রং পদ্ম-সংজ্ঞকং। পুরাণং লেখয়িত্বা বৈ জ্যৈষ্ঠ্যাং স্বর্ণাজ্যসংযুতং ॥ যঃ প্রদদ্যাৎ সুসৎকৃত্য পুরাণজ্ঞায় মানদ। স যাতি বৈষ্ণবং ধাম সর্ব্বদেবনমস্কৃতঃ ॥ পদ্মানুক্রমণীমেতাং যঃ পঠেৎ শৃণুয়াৎ তথা। সোঽপি পদ্ম-পুরাণস্য লভেৎ শ্রবণজং ফলং ॥ * ॥ ইতি শ্রীনারদীয়পুরাণে পূর্ব্বভাগে বৃহদুপাখ্যানে চতুর্থপাদে ৯৩ অধ্যায়ঃ ॥ ২ ॥

তৃতীয়ং বিষ্ণুপুরাণং। শ্রীব্রহ্মোবাচ। শৃণু বৎস প্রবক্ষ্যামি পুরাণং বৈষ্ণবং মহৎ। ত্রয়োবিংশতিসাহস্রং সর্ব্বপাতক-নাশনং ॥ যত্রাদিভাগে নির্দ্দিষ্টাঃ ষড়ংশাঃ শক্তৃজেন হ। মৈত্রেয়ায়াদিমে তত্র পুরাণস্যাবতারিকাঃ ॥ * ॥ তত্র প্রথম-ভাগস্য প্রথমাংশে। আদিকারণসর্গশ্চ দেবাদীনাঞ্চ সম্ভবঃ। সমুদ্রমথনাখ্যানং দক্ষাদীনাং ততোচয়াঃ ॥ ধ্রুবস্য চরিতং চৈব পৃথোশ্চরিতমেব চ। প্রাচেতসং তথাখ্যানং প্রহ্লাদস্য কথানকং ॥ পৃথগ্-রাজ্যাধিকারাখ্যা প্রথমোঽংশ ইতী-রিতঃ। *। প্রথমভাগস্য দ্বিতীয়াংশে। প্রিয়ব্রতাচয়াখ্যানং দ্বীপবর্ষনিরূপণং ॥ পাতালনরকাখ্যানং সপ্তসর্গনিরূপণং। সূর্য্যাদিচারকথনং পৃথগ্‌লক্ষণসংযুতং ॥ চরিতং ভরতস্যাথ মুক্তিমার্গনিদর্শনং। নিদাঘঋভুসংবাদো দ্বিতীয়োঽংশ উদা-হৃতঃ ॥ * ॥ প্রথমভাগস্য তৃতীয়াংশে। মন্বন্তরসমাখ্যানং বেদব্যাসাবতারকং। নরকোদ্ধারকং কর্ম্ম গদিতঞ্চ ততঃ পরং ॥ সগরস্যৌর্বসংবাদে সর্ব্বধর্ম্মনিরূপণং। শ্রাদ্ধকল্পং তথোদ্দিষ্টং বর্ণাশ্রমনিবন্ধনে ॥ সদাচারশ্চ কথিতো মায়ামোহকথা ততঃ। তৃতীয়োঽংশোঽয়মুদিতঃ সর্ব্বপাপপ্রণা-শনঃ ॥ * ॥ প্রথমভাগস্য চতুর্থাংশে। সূর্য্যবংশকথা পুণ্যা সোমবংশানুকীর্ত্তনং।

চতুর্থেহংশে মুনিশ্রেষ্ঠ নানারাজকথা-চিতং ॥ * ॥ প্রথমভাগস্য পঞ্চমাংশে। কৃষ্ণাবতারসংপ্রশ্নো গোকুলীয়া কথা ততঃ। পূতনাদিবধো বাল্যে কৌমারেহঘাদি-হিংসনং ॥ কৈশোরে কংসহননং মাথুরং চরিতং তথা। ততস্তু যৌবনে প্রোক্তা লীলা দ্বারবতীভবা ॥ সর্ব্বদৈত্যবধো যত্র বিবাহাশ্চ পৃথগ্‌বিধাঃ। যত্র স্থিত্বা জগন্নাথঃ কৃষ্ণো যোগেশ্বরেশ্বরঃ ॥ ভূভারহরণং চক্রে পরস্বহননাদিভিঃ। অষ্টাবক্রীয়-মাখ্যানং পঞ্চমোহংশ ইতীরিতঃ ॥ * ॥ প্রথমভাগস্য ষষ্ঠাংশে। কলিজং চরিতং প্রোক্তং চাতুর্ব্বিধ্যং লয়স্য চ। ব্রহ্মজ্ঞান-সমুদ্দেশঃ খাণ্ডিক্যস্য নিরূপিতঃ ॥ কেশি-ধ্বজেন চেত্যেষঃ ষষ্ঠোহংশঃ পরি-কীর্ত্তিতঃ। * । তস্য দ্বিতীয়ভাগে। অতঃ পরন্তু সূতেন শৌনকাদিভিরাদরাৎ ॥ পৃষ্টেন চোদিতাঃ শশ্বদ্বিষ্ণুধর্ম্মোত্তরাহ্বয়াঃ। নানাধর্ম্মকথাঃ পুণ্যা ব্রতানি নিয়মা যমাঃ ॥ ধর্ম্মশাস্ত্রং চার্থশাস্ত্রং বেদান্তং জ্যোতিষং তথা। বংশাখ্যানং প্রকরণাৎ স্তোত্রাণি মনবস্তথা ॥ নানাবিদ্যাশ্রয়াঃ প্রোক্তাঃ সর্ব্বলোকোপকারকাঃ। এতদ্বিষ্ণুপুরাণং বৈ সর্ব্বশাস্ত্রার্থসংগ্রহং ॥ * ॥ তৎফল-শ্রুতিঃ। বারাহকল্পবৃত্তান্তং ব্যাসেন কথিতং ত্বিহ। যো নরঃ পঠতে ভক্ত্যা যঃ শৃণোতি চ সাদরং। তাবুভৌ বিষ্ণু-লোকং হি ব্রজেতাং ভুক্তভোগকৌ ॥ তল্লিখিত্বা চ যো দদ্যাদাষাঢ্যাং ঘৃতধেনুনা। সহিতং বিষ্ণুভক্তায় পুরাণার্থবিদে দ্বিজ। স যাতি বৈষ্ণবং ধাম বিমানেনার্কবর্চ্চসা ॥ যশ্চ বিষ্ণুপুরাণস্য সমনুক্রমণীং দ্বিজ। কথয়েচ্ছৃণুয়াদ্বাপি স পুরাণফলং লভেৎ ॥ ইতি শ্রীনারদীয়পুরাণে পূর্ব্বভাগে বৃহদুপা-খ্যানে চতুর্থপাদে ৯৪ অধ্যায়ঃ ॥ ৩ ॥

চতুর্থং বায়ুপুরাণং। ব্রহ্মোবাচ। শৃণু বিপ্র প্রবক্ষ্যামি পুরাণং বায়বীয়কং। যস্মিন্ শ্রুতে লভেদ্ধাম রুদ্রস্য পরমাত্মনঃ ॥ চতুর্ব্বিংশতিসাহস্রং তৎপুরাণং প্রকী-র্ত্তিতং। শ্বেতকল্পপ্রসঙ্গেন ধর্ম্মাণ্যত্রাহ মারুতঃ ॥ তদ্বায়বীয়মুদিতং ভাগদ্বয়সমা-চিতং। * । তস্য পূর্ব্বভাগে। স্বর্গাদি-লক্ষণং যত্র প্রোক্তং বিপ্র সবিস্তরং ॥ মন্বন্তরেষু বংশাশ্চ রাজ্ঞাং যে যত্র কীর্ত্তিতাঃ। গয়াসুরস্য হননং বিস্তরাদ্‌-যত্র কীর্ত্তিতং ॥ মাসানাঞ্চৈব মাহাত্ম্যং মাঘস্যোক্তং ফলাধিকং। দানধর্ম্মা রাজ-ধর্ম্মা বিস্তরেণোদিতাস্তথা ॥ ভূপাতাল-ককুব্ব্যোমচারিণাং যত্র নির্ণয়ঃ। ব্রতা-দীনাঞ্চ পূর্ব্বোহয়ং বিভাগঃ সমুদাহৃতঃ ॥ * ॥ তদুত্তরভাগে। উত্তরে তস্য ভাগে তু নর্ম্মদাতীর্থবর্ণনং। শিবস্য সংহিতাখ্যা বৈ বিস্তরেণ মুনীশ্বর ॥ যো দেবঃ সর্ব্বদেবানাং দুর্ব্বিজ্ঞেয়ঃ সনাতনঃ। স তু সর্ব্বাত্মনা যস্যাস্তীরে তিষ্ঠতি সন্ততং ॥ ইদং ব্রহ্মা হরিরিদং সাক্ষাচ্চেদং পরো হরঃ। ইদং ব্রহ্ম নিরাকারং কৈবল্যং নর্ম্মদাজলং ॥ ধ্রুবং লোকহিতার্থায় শিবেন স্বশরীরতঃ। শক্তিঃ কাপি সরিদ্রূপা রেবেয়মবতারিতা ॥ যে বসন্ত্যুত্তরে কূলে রুদ্রস্যানুচরা হি তে।

বসন্তি যাম্যতীরে যে লোকং তে যান্তি বৈষ্ণবং॥ ওঁকারেশ্বরমারভ্য যাবৎ পশ্চিমসাগরং। সঙ্গমাঃ পঞ্চ চ ত্রিংশন্নদীনাং পাপনাশনাঃ॥ দশৈকমুত্তরে তীরে ত্রয়োবিংশতি দক্ষিণে। পঞ্চত্রিংশত্তমঃ প্রোক্তো রেবাসাগরসঙ্গমঃ॥ সঙ্গমৈঃ সহিতান্যেবং রেবাতীরদ্বয়েঽপি চ। চতুঃশতানি তীর্থানি প্রসিদ্ধানি চ সন্তি হি॥ ষষ্টিতীর্থসহস্রাণি ষষ্টিকোট্যো মুনীশ্বর। সন্তি চান্যানি রেবায়াস্তীরযুগ্মে পদে পদে॥ সংহিতেয়ং মহাপুণ্যা শিবস্য পরমাত্মনঃ। নর্ম্মদাচরিতং যত্র বায়ুনা পরিকীর্ত্তিতং

তৎফলশ্রুতিঃ। লিখিত্বেদং পুরাণন্তু গুড়ধেনুসমাচিতং। শ্রাবণ্যাং যো দদেদ্ভক্ত্যা ব্রাহ্মণায় কুটুম্বিনে। রুদ্রলোকে বসেৎ সোঽপি যাবদিন্দ্রাশ্চতুর্দ্দশ॥ যঃ শ্রাবয়েদ্বা শৃণুয়াদ্বায়বীয়মিদং নরঃ। নিয়মেন হবিষ্যাশী স রুদ্রো নাত্র সংশয়ঃ॥ যশ্চানুক্রমণীমেতাং শৃণোতি শ্রাবয়েত বা। সোঽপি সর্ব্বপুরাণস্য ফলং শ্রবণজং লভেৎ॥ ইতি শ্রীনারদীয়পুরাণে পূর্ব্বভাগে বৃহদুপাখ্যানে চতুর্থপাদে ৯৫ অধ্যায়ঃ॥ ৪॥

পঞ্চমং শ্রীভাগবতপুরাণং। শ্রীব্রহ্মোবাচ। মরীচে শৃণু বক্ষ্যামি বেদব্যাসেন যৎ কৃতং। শ্রীমদ্ভাগবতং নাম পুরাণং ব্রহ্মসম্মিতং॥ তদষ্টাদশসাহস্রঙ্কীর্ত্তিতং পাপনাশনং। সুরপাদপরূপোঽয়ং স্কন্ধৈর্দ্বাদশভির্যুতঃ॥ ভগবানেব বিপ্রেন্দ্র বিশ্বরূপী ক্ষমীরিতঃ। *। তস্য প্রথমস্কন্ধে। তত্র তু প্রথমে স্কন্ধে সূতর্ষীণাং সমাগমঃ॥ ব্যাসস্য চরিতং পুণ্যং পাণ্ডবানাং তথৈব চ। পারীক্ষিতমুপাখ্যানমিতীদং সমুদাহৃতং॥ *॥ দ্বিতীয়স্কন্ধে। পরীক্ষিচ্ছুকসংবাদে সৃতিদ্বয়নিরূপণং। ব্রহ্মনারদসংবাদেঽবতারচরিতামৃতং॥ পুরাণলক্ষণঞ্চৈব সৃষ্টিকারণসম্ভবঃ। দ্বিতীয়োঽয়ং সমুদিতঃ স্কন্ধো ব্যাসেন ধীমতা॥*॥ তৃতীয়স্কন্ধে। চরিতং বিদুরস্যাথ মৈত্রেয়েণাস্য সঙ্গমঃ। সৃষ্টিপ্রকরণং পশ্চাদ্‌ব্রহ্মণঃ পরমাত্মনঃ॥ কাপিলং সাঙ্খ্যমপ্যত্র তৃতীয়োঽয়মুদাহৃতঃ। *। চতুর্থস্কন্ধে। সত্যাশ্চরিতমাদৌ তু ধ্রুবস্য চরিতং ততঃ॥ পৃথোঃ পুণ্যসমাখ্যানং ততঃ প্রাচীনবর্হিষঃ। ইত্যেষ তুর্য্যো গদিতো বিসর্গে স্কন্ধ উত্তমঃ॥ *॥ পঞ্চমস্কন্ধে। প্রিয়ব্রতস্য চরিতং তদ্বংশ্যানাঞ্চ পুণ্যদং। ব্রহ্মাণ্ডান্তর্গতানাঞ্চ লোকানাং বর্ণনন্ততঃ॥ নরকস্থিতিরিত্যেষ সংস্থানে পঞ্চমো মতঃ।*। ষষ্ঠস্কন্ধে। অজামিলস্য চরিতং দক্ষসৃষ্টিনিরূপণং॥ বৃত্রাখ্যানং ততঃ পশ্চান্মরুতাং জন্ম পুণ্যদং। ষষ্ঠোঽয়মুদিতঃ স্কন্ধো ব্যাসেন পরিপোষণে॥ *॥ সপ্তমস্কন্ধে। প্রহ্লাদচরিতং পুণ্যং বর্ণাশ্রমনিরূপণং। সপ্তমো গদিতো বৎস বাসনাকর্ম্মকীর্ত্তনে॥ *॥ অষ্টমস্কন্ধে। গজেন্দ্রমোক্ষণাখ্যানং মন্বন্তরনিরূপণং। সমুদ্রমথনঞ্চৈব বলিবৈভববন্ধনং॥ মৎস্যাবতারচরিতমষ্টমোঽয়ং প্রকীর্ত্তিতঃ॥*॥ নবমস্কন্ধে। সূর্য্যবংশসমা-

থ্যানং সোমবংশনিরূপণং ॥ বংশ্যানুচরিতে প্রোক্তো নবমোঽয়ং মহামতে । * । দশমস্কন্ধে । কৃষ্ণস্য বালচরিতং কৌমারঞ্চ ব্রজস্থিতিঃ ॥ কৈশোরং মথুরাস্থানং যৌবনং দ্বারকাস্থিতিঃ । ভূভারহরণঞ্চাত্র নিরোধে দশমঃ স্মৃতঃ ॥ * ॥ একাদশস্কন্ধে । নারদেন তু সংবাদো বসুদেবস্য কীর্ত্তিতঃ । যদোশ্চ দত্তাত্রেয়েণ শ্রীকৃষ্ণেনোদ্ধবস্য চ ॥ যাদবানাং মিথোঽন্তশ্চ মুক্তাবেকাদশঃ স্মৃতঃ । * । দ্বাদশস্কন্ধে । ভবিষ্যকলিনির্দেশো মোক্ষো রাজ্ঞঃ পরীক্ষিতঃ ॥ বেদশাখাপ্রণয়নং মার্কণ্ডেয়তপঃ স্মৃতঃ । সৌরী বিভূতিরুদিতা সাত্বতী চ ততঃ পরং ॥ পুরাণসঙ্খ্যাকথনমাশ্রয়ে দ্বাদশো হ্যয়ং । ইত্যেবং কথিতং বৎস শ্রীমদ্ভাগবতং তব ॥ * ॥ তৎফলশ্রুতিঃ । বক্তুঃ শ্রোতুশ্চোপদেষ্টুরনুমোদিতুরেব চ । সাহায্যকর্ত্তুর্গদিতং ভক্তিভুক্তিবিমুক্তিদং ॥ প্রৌষ্ঠপদ্যাং পূর্ণিমায়াং হেমসিংহসমাচিতং । দেয়ং ভাগবতায়েদং দ্বিজায় প্রীতিপূর্ব্বকং ॥ সংপূজ্য বস্ত্রহেমাদ্যৈর্ভগবদ্ভক্তিমিচ্ছতা । যোঽপ্যনুক্রমণীমেতাং শ্রাবয়েচ্ছৃণুয়াত্তথা । স পুরাণশ্রবণজং প্রাপ্নোতি ফলমুত্তমং ॥ * ॥ ইতি শ্রীনারদীয়পুরাণে পূর্ব্বভাগে বৃহদুপাখ্যানে চতুর্থপাদে ৯৬ অধ্যায়ঃ ॥ ৫ ॥

ষষ্ঠং নারদীয়পুরাণং । শ্রীব্রহ্মোবাচ । শৃণু বিপ্র প্রবক্ষ্যামি পুরাণং নারদীয়কং। পঞ্চবিংশতিসাহস্রং বৃহচ্চিত্রকথাশ্রয়ং ॥ * ॥ তত্র পূর্ব্বভাগে প্রথমপাদে । সূতশৌনকসংবাদঃ সৃষ্টিসংক্ষেপবর্ণনং । নানাধর্ম্মকথাঃ পুণ্যাঃ প্রবৃত্তে সমুদাহৃতাঃ॥ প্রাগ্‌ভাগে প্রথমে পাদে সনকেন মহাত্মনা । * । পূর্ব্বভাগে দ্বিতীয়পাদে । দ্বিতীয়ে মোক্ষধর্ম্মাখ্যে মোক্ষোপায়নিরূপণং ॥ বেদাঙ্গানাঞ্চ কথনং শুকোৎপত্তিশ্চ বিস্তরাৎ । সনন্দনেন গদিতো নারদায় মহাত্মনে ॥ * ॥ পূর্ব্বভাগে তৃতীয়পাদে । মহাতন্ত্রে সমুদ্দিষ্টং পশুপাশবিমোক্ষণং । মন্ত্রাণাং শোধনং দীক্ষা মন্ত্রোদ্ধারশ্চ পূজনং ॥ প্রয়োগাঃ কবচং নামসহস্রং স্তোত্রমেব চ । গণেশসূর্য্যবিষ্ণূনাং শিবশক্ত্যোরনুক্রমাৎ ॥ সনৎকুমারমুনিনা নারদায় তৃতীয়কে । * । পূর্ব্বভাগে চতুর্থপাদে । পুরাণলক্ষণঞ্চৈব প্রমাণং দানমেব চ ॥ পৃথক্ পৃথক্ সমুদ্দিষ্টং দানকালপুরঃসরং । চৈত্রাদিসর্ব্বমাসেষু তিথীনাঞ্চ পৃথক্ পৃথক্ ॥ প্রোক্তং প্রতিপদাদীনাং ব্রতং সর্ব্বাঘনাশনং । সনাতনেন মুনিনা নারদায় চতুর্থকে ॥ পূর্ব্বভাগোঽয়মুদিতো বৃহদাখ্যানসংজ্ঞিতঃ । * । তদুত্তরভাগে । অস্যোত্তরে বিভাগে তু প্রশ্ন একাদশীব্রতে ॥ বশিষ্ঠেনাথ সংবাদো মান্ধাতুঃ পরিকীর্ত্তিতঃ । রুক্মাঙ্গদকথা পুণ্যা মোহিন্যুৎপত্তিকর্ম্ম চ ॥ বসুশাপশ্চ মোহিন্যৈ পশ্চাদুদ্ধরণক্রিয়া । গঙ্গাকথা পুণ্যতমা গয়াযাত্রানুকীর্ত্তনং ॥ কাশ্যা মাহাত্ম্যমতুলং পুরুষোত্তমবর্ণনং । যাত্রাবিধানং ক্ষেত্রস্য বহ্বাখ্যানসমন্বিতং॥ প্রয়াগস্যাথ মাহাত্ম্যং কুরুক্ষেত্রস্য

তৎপরং। হরিদ্বারস্য চাখ্যানং কামোদাখ্যানকং তথা ॥ বদরীতীর্থমাহাত্ম্যং কামাখ্যায়াস্তথৈব চ। প্রভাসস্য চ মাহাত্ম্যং পুরাণাখ্যানকং ততঃ ॥ গৌতমাখ্যানকং পশ্চাদ্বেদপাদস্তবস্ততঃ। গোকর্ণক্ষেত্রমাহাত্ম্যং লক্ষ্মণাখ্যানকং তথা ॥ সেতুমাহাত্ম্যকথনং নর্ম্মদাতীর্থবর্ণনং। অবন্ত্যাশ্চৈব মাহাত্ম্যং মথুরায়াস্ততঃ পরং ॥ বৃন্দাবনস্য মহিমা বসোর্ব্রহ্মান্তিকে গতিঃ। মোহিনীচরিতং পশ্চাদেবং বৈ নারদীয়কং ॥ * ॥ তৎফলশ্রুতিঃ। যঃ শৃণোতি নরো ভক্ত্যা শ্রাবয়েদ্বা সমাহিতঃ। স যাতি ব্রহ্মণো ধাম নাত্র কার্য্যা বিচারণা ॥ যস্ত্বেতদিষপূর্ণায়াং ধেনূনাং সপ্তকাচিতং। প্রদদ্যাদ্দ্বিজবর্য্যায় স লভেন্মোক্ষমেব চ ॥ যশ্চানুক্রমণীমেতাং নারদীয়স্য বর্ণয়েৎ। শৃণুয়াদ্বৈকচিত্তেন সোঽপি স্বর্গগতিং লভেৎ ॥ * ॥ ইতি শ্রীনারদীয়পুরাণে পূর্ব্বভাগে বৃহদুপাখ্যানে চতুর্থপাদে ৯৭ অধ্যায়ঃ ॥ ৬ ॥

সপ্তমং মার্কণ্ডেয়পুরাণং। শ্রীব্রহ্মোবাচ। অথ তে সংপ্রবক্ষ্যামি মার্কণ্ডেয়াভিধং মুনে। পুরাণং সুমহৎ পুণ্যং পঠতাং শৃণ্বতাং সদা ॥ যত্রাধিকৃত্য শকুনীন্ সর্ব্বধর্ম্মনিরূপণং। মার্কণ্ডেয়েন মুনিনা জৈমিনেঃ প্রাক্ সমীরিতং ॥ পক্ষিণাং ধর্ম্মসংজ্ঞানাং ততো জন্মনিরূপণং। পূর্ব্বজন্মকথা চৈষাং বিক্রিয়া চ দিবস্পতেঃ ॥ তীর্থযাত্রা বলস্যাতো দ্রৌপদেয়কথানকং। হরিশ্চন্দ্রকথা পুণ্যা যুদ্ধমাড়ীবকাভিধং ॥ পিতাপুত্রসমাখ্যানং দত্তাত্রেয়কথা ততঃ। হৈহয়স্যাথ চরিতং মহাখ্যানসমাচিতং ॥ মদালসাকথাত্রোক্তা হ্যলর্কচরিতাঞ্চিতা। সৃষ্টিসংকীর্ত্তনং পুণ্যং নবধা পরিকীর্ত্তিতং ॥ কল্পান্তকালনির্দ্দেশো যক্ষসৃষ্টিনিরূপণং। রুদ্রাদিসৃষ্টিরপ্যুক্তা দ্বীপবর্ষানুকীর্ত্তনং ॥ মনূনাঞ্চ কথা নানা কীর্ত্তিতাঃ পাপহারিকাঃ। তাসু দুর্গাকথাত্যন্তং পুণ্যদা চাষ্টমেঽন্তরে ॥ তৎপশ্চাৎ প্রণবোৎপত্তিস্ত্রয়ীতেজঃসমুদ্ভবঃ। মার্ত্তণ্ডস্য চ জন্মাখ্যা তন্মাহাত্ম্যসমাচিতা ॥ বৈবস্বতাচয়শ্চাপি বৎসপ্রশ্চরিতং ততঃ। বৎসপ্রীস্থানে বৎসশ্রী চ পাঠঃ। খনিত্রস্য ততঃ প্রোক্তা কথা পুণ্যা মহাত্মনঃ ॥ অবিক্ষিচ্চরিতং চৈব কিমিচ্ছব্রতকীর্ত্তনং। নরিষ্যন্তস্য চরিতং ইক্ষ্বাকুচরিতং ততঃ ॥ তুলস্যাশ্চরিতং পশ্চাদ্রামচন্দ্রস্য সৎকথা। কুশবংশসমাখ্যানং সোমবংশানুকীর্ত্তনং ॥ পুরূরবঃকথা পুণ্যা নহুষস্য কথাদ্ভুতা। যযাতিচরিতং পুণ্যং যদুবংশানুকীর্ত্তনং ॥ শ্রীকৃষ্ণবালচরিতং মাথুরং চরিতং ততঃ। দ্বারকাচরিতঞ্চাথ কথা সর্ব্বাবতারজা ॥ ততঃ সাঙ্খ্যসমুদ্দেশঃ প্রপঞ্চাসত্ত্বকীর্ত্তনং। মার্কণ্ডেয়স্য চরিতং পুরাণশ্রবণে ফলং ॥ * ॥ তৎফলশ্রুতিঃ। যঃ শৃণোতি নরো ভক্ত্যা পুরাণমিদমাদরাৎ। মার্কণ্ডেয়াভিধং বৎস স লভেৎ পরমাং গতিং ॥ যস্তু ব্যাকুরুতে চৈতচ্ছৈবং স লভতে পদং ॥ তৎ প্রযচ্ছেল্লিখিত্বা যঃ সৌবর্ণকরিসংযুতং। কার্ত্তিক্যাং দ্বিজবর্য্যায় স লভেদ্ব্রহ্মণঃ

পদং ॥ শৃণোতি শ্রাবয়েদ্বাপি যশ্চানু-ক্রমণীমিমাং। মার্কণ্ডেয়পুরাণস্য স লভে-দ্বাঞ্ছিতং ফলং ॥ * ॥ ইতি শ্রীনারদীয়-পুরাণে পূর্ব্বভাগে বৃহদুপাখ্যানে চতুর্থ-পাদে ৯৮ অধ্যায়ঃ ॥ ৭ ॥

অষ্টমং অগ্নিপুরাণং। শ্রীব্রহ্মোবাচ। অথাতঃ সংপ্রবক্ষ্যামি তবাগ্নেয়পুরাণকং। ঈশানকল্পবৃত্তান্তং বশিষ্ঠায়ানলোঽব্রবীৎ॥ তৎ পঞ্চদশসাহস্রং নাম্নাং চরিতমদ্ভুতং। পঠতাং শৃণ্বতাঞ্চৈব সর্ব্বপাপহরং নৃণাং ॥ প্রশ্নপূর্ব্বং পুরাণস্য কথা সর্ব্বাবতারজা। সৃষ্টিপ্রকরণং চাথ বিষ্ণুপূজাদিকং ততঃ ॥ অগ্নিকার্য্যং ততঃ পশ্চান্মন্ত্রমুদ্রাদিলক্ষণং। সর্ব্বদীক্ষাবিধানঞ্চ অভিষেকনিরূপণং ॥ লক্ষণং মণ্ডলাদীনাং কুশায়া মার্জ্জনং ততঃ। পবিত্রারোপণবিধির্দেবালয়বিধি-স্ততঃ ॥ শালগ্রামাদিপূজা চ মূর্ত্তিলক্ষ্ম পৃথক্ পৃথক্। ন্যাসাদীনাং বিধানঞ্চ প্রতিষ্ঠা পূর্ত্তকা ততঃ॥ বিনায়কাদি-দীক্ষাণাং বিধির্জ্ঞেয়স্ততঃ পরং। প্রতিষ্ঠা সর্ব্বদেবানাং ব্রহ্মাণ্ডস্য নিরূপণং ॥ গঙ্গাদিতীর্থমাহাত্ম্যং জম্ব্বাদিদ্বীপবর্ণনং। ঊর্দ্ধাধোলোকরচনা জ্যোতিশ্চক্রনিরূ-পণং ॥ জ্যোতিষঞ্চ ততঃ প্রোক্তং শাস্ত্রং যুদ্ধজয়ার্ণবং। ষট্‌কর্ম্ম চ ততঃ প্রোক্তং মন্ত্রযন্ত্রৌষধীগণঃ॥ কুব্জিকাদিসমর্চ্চা চ ষোঢ়ান্যাসবিধিস্তথা। কোটিহোমবিধানঞ্চ তদন্তরনিরূপণং ॥ ব্রহ্মচর্য্যাদিধর্ম্মাশ্চ শ্রাদ্ধকল্পবিধিস্ততঃ। গ্রহযজ্ঞস্ততঃ প্রোক্তো বৈদিকস্মার্ত্তকর্ম্ম চ ॥ প্রায়শ্চিত্তানুকথনং তিথীনাঞ্চ ব্রতাদিকং। বারব্রতানুকথনং নক্ষত্রব্রতকীর্ত্তনং ॥ মাসিকব্রতনির্দ্দেশো দীপদানবিধিস্তথা। নবব্যূহার্চ্চনং প্রোক্তং নরকাণাং নিরূপণং ॥ ব্রতানাঞ্চাপি দানানাং নিরূপণমিহোদিতং। নাড়ীচক্র-সমুদ্দেশঃ সন্ধ্যাবিধিরনুত্তমঃ ॥ গায়ত্র্যর্থস্য নির্দ্দেশো লিঙ্গস্তোত্রং ততঃ পরং। রাজা-ভিষেকমন্ত্রোক্তির্ধর্ম্মকৃত্যঞ্চ ভূভুজাং ॥ স্বপ্নাধ্যায়স্ততঃ প্রোক্তঃ শকুনাদিনিরূপণং। মণ্ডলাদিকনির্দ্দেশো রণদীক্ষাবিধিস্ততঃ ॥ রামোক্তনীতিনির্দ্দেশো রত্নানাং লক্ষণং ততঃ। ধনুর্বিদ্যা ততঃ প্রোক্তা ব্যবহার-প্রদর্শনং ॥ দেবাসুরবিমর্দ্দাখ্যা হ্যায়ুর্ব্বেদ-নিরূপণং। গজাদীনাং চিকিৎসা চ তেষাং শান্তিস্ততঃ পরং ॥ গোনসাদিচিকিৎসা চ নানাপূজাস্ততঃ পরং। শান্তয়শ্চাপি বিবিধা ছন্দঃশাস্ত্রমতঃ পরং ॥ সাহিত্যঞ্চ ততঃ পশ্চাদেকার্ণাদিসমাহ্বয়াঃ। সিদ্ধ-শিষ্টানুশিষ্টিশ্চ কোষঃ স্বর্গাদিবর্গকে ॥ প্রলয়ানাং লক্ষণঞ্চ শারীরকনিরূপণং। বর্ণনং নরকাণাঞ্চ যোগশাস্ত্রমতঃ পরং ॥ ব্রহ্মজ্ঞানং ততঃ পশ্চাৎ পুরাণশ্রবণে ফলং। এতদাগ্নেয়কং বিপ্র পুরাণং পরি-কীর্ত্তিতং ॥ * ॥ তৎফলশ্রুতিঃ। তল্লিখিত্বা তু যো দদ্যাৎ সুবর্ণকমলাচিতং। তিল-ধেনুযুতং বাপি মার্গশীর্ষ্যাং বিধানতঃ। পুরাণার্থবিদে সোঽথ স্বর্গলোকে মহী-য়তে ॥ এষানুক্রমণী প্রোক্তা তবাগ্নেয়স্য ভক্তিদা। শৃণ্বতাং পঠতাঞ্চৈব নৃণাঞ্চেহ পরত্র চ ॥ * ॥ ইতি শ্রীনারদীয়পুরাণে

পূর্ব্বভাগে বৃহদুপাখ্যানে চতুর্থপাদে ৯৯ অধ্যায়ঃ ॥ ৮ ॥

নবমং ভবিষ্যপুরাণং। শ্রীব্রহ্মোবাচ। অথ তে সংপ্রবক্ষ্যামি পুরাণং সর্ব্বসিদ্ধিদং। ভবিষ্যং ভবতঃ সর্ব্বলোকাভীষ্টপ্রদায়কং॥ যত্রাহং সর্ব্বদেবানামাদিকর্ত্তা সমুদ্যতঃ। সৃষ্ট্যর্থং তত্র সঞ্জাতো মনুঃ স্বায়ম্ভুবঃ পুরা ॥ স মাং প্রণম্য পপ্রচ্ছ ধর্ম্মং সর্ব্বার্থসাধকং। অহং তস্মৈ তদা প্রীতঃ প্রাবোচং ধর্ম্মসংহিতাং॥ পুরাণানাং যদা ব্যাসো ব্যাসশ্চক্রে মহামতিঃ। তদা তাং সংহিতাং সর্ব্বাং পঞ্চধা ব্যভজন্মুনিঃ॥ অঘোরকল্পবৃত্তান্তনানাশ্চর্য্যকথাচিতাং।*। তত্র প্রথমপর্ব্বণি। তত্রাদিমং স্মৃতং পর্ব্ব ব্রাহ্ম্যং যত্রাস্ত্যুপক্রমঃ॥ সূতশৌনক-সংবাদে পুরাণপ্রশ্নসংক্রমঃ। আদিত্য-চরিতঃ প্রায়ঃ সর্ব্বাখ্যানসমাচিতঃ ॥ সৃষ্ট্যাদিলক্ষণোপেতঃ শাস্ত্রসর্ব্বস্বরূপকঃ। পুস্তলেখকলেখানাং লক্ষণঞ্চ ততঃ পরং॥ সংস্কারাণাঞ্চ সর্ব্বেষাং লক্ষণঞ্চাত্র কীর্ত্তিতং। পক্ষত্যাদিতিথীনাঞ্চ কল্পাঃ সপ্ত চ কীর্ত্তিতাঃ॥ অষ্টম্যাদ্যাঃ শেষকল্পা বৈষ্ণবে পর্ব্বণি স্মৃতাঃ। শৈবে চ কামতো ভিন্নাঃ সৌরে চান্ত্যকথাচয়ঃ॥ প্রতিসর্গা-হ্বয়ং পশ্চান্নানাখ্যানসমাচিতং। পুরাণ-স্যোপসংহারসহিতং পর্ব্ব পঞ্চমং॥ এষু পঞ্চসু পূর্ব্বস্মিন্ ব্রহ্মণো মহিমাধিকঃ।*। দ্বিতীয়তৃতীয়চতুর্থপঞ্চমপর্ব্বসু । ধর্ম্মে কামে চ মোক্ষে তু বিষ্ণোশ্চাপি শিবস্য চ॥ দ্বিতীয়ে চ তৃতীয়ে চ সৌরো বর্গ-চতুষ্টয়ে। প্রতিসর্গাহ্বয়ং ত্বন্ত্যং প্রোক্তং সর্ব্বকথাচিতং॥ সভবিষ্যং বিনির্দিষ্টং পর্ব্ব ব্যাসেন ধীমতা। চতুর্দ্দশসহস্রন্তু পুরাণং পরিকীর্ত্তিতং॥ ভবিষ্যং সর্ব্ব-দেবানাং সাম্যং যত্র প্রকীর্ত্তিতং। গুণানাং তারতম্যেন সমং ব্রহ্মেতি হি শ্রুতিঃ॥*॥ তৎফলশ্রুতিঃ। তল্লিখিত্বা তু যো দদ্যাৎ পৌষ্যাং বিদ্বান্ বিমৎসরঃ। গুড়ধেনু-যুতং হেম বস্ত্রমাল্যবিভূষণৈঃ॥ বাচকং পুস্তকঞ্চাপি পূজয়িত্বা বিধানতঃ। গন্ধাদ্যৈ-র্ভোজ্যভক্ষ্যৈশ্চ কৃত্বা নীরাজনাদিকং। যো বৈ জিতেন্দ্রিয়ো ভূত্বা সোপবাসঃ সমাহিতঃ॥ অথ বৈ যো নরো ভক্ত্যা কীর্ত্তয়েচ্ছৃণুয়াদপি। স মুক্তঃ পাতকৈ-র্ঘোরৈঃ প্রয়াতি ব্রহ্মণঃ পদং॥ যোহপ্যনু-ক্রমণীমেতাং ভবিষ্যস্য নিরূপিতাং। পঠেদ্বা শৃণুয়াচ্চৈতৌ ভুক্তিং মুক্তিঞ্চ বিন্দতঃ ॥*॥ ইতি শ্রীনারদীয়পুরাণে পূর্ব্বভাগে বৃহদুপাখ্যানে চতুর্থপাদে ১০০ অধ্যায়ঃ॥ ৯ ॥

দশমং ব্রহ্মবৈবর্ত্তপুরাণং। শ্রীব্রহ্মোবাচ। শৃণু বৎস প্রবক্ষ্যামি পুরাণং দশমং তব। ব্রহ্মবৈবর্ত্তকং নাম বেদমার্গানুদর্শকং॥ সাবর্ণির্যত্র ভগবান্ সাক্ষাদ্দেবর্ষয়েঽর্থিতঃ। নারদায় পুরাণার্থং প্রাহ সর্ব্বমলৌকিকং॥ ধর্ম্মার্থকামমোক্ষাণাং সারঃ প্রীতির্হরৌ হরে। তয়োরভেদসিদ্ধ্যর্থং ব্রহ্মবৈবর্ত্ত-মুত্তমং॥ রথন্তরস্য কল্পস্য বৃত্তান্তং যন্ময়ো-দিতং। শতকোটিপুরাণে তৎ সংক্ষিপ্য প্রাহ বেদবিৎ॥ ব্যাসশ্চতুর্দ্ধা সংব্যস্য

ব্রহ্মবৈবর্ত্তসংজ্ঞিতং। অষ্টাদশসহস্রন্তৎ পুরাণং পরিকীর্ত্তিতং ॥ ব্রহ্মপ্রকৃতিবিঘ্নেশকৃষ্ণখণ্ডসমাচিতং। তত্র সূতর্ষিসংবাদে পুরাণোপক্রমো মতঃ ॥ * ॥ তত্র প্রথমে ব্রহ্মখণ্ডে। সৃষ্টিপ্রকরণং ত্বাদ্যং ততো নারদবেধসোঃ। বিবাদঃ সুমহান্ যত্র দ্বয়োরাসীৎ পরাভবঃ ॥ শিবলোকগতিঃ পশ্চাজ্জ্ঞানলাভঃ শিবান্মুনেঃ। শিববাক্যেন তৎপশ্চাৎ মরীচে নারদস্য তু মননঞ্চৈব সাবর্ণের্জ্ঞানার্থং সিদ্ধসেবিতে। আশ্রমে সুমহৎপুণ্যে ত্রৈলোক্যাশ্চর্য্যকারিণি ॥ এতদ্ধি ব্রহ্মখণ্ডং হি শ্রুতং পাপবিনাশনং। * । দ্বিতীয়ে প্রকৃতিখণ্ডে। ততঃ সাবর্ণিসংবাদো নারদস্য সমীরিতঃ ॥ কৃষ্ণমাহাত্ম্যসংযুক্তো নানাখ্যানকথোত্তরঃ। প্রকৃতেরংশভূতানাং কলানাঞ্চাপি বর্ণিতং ॥ মাহাত্ম্যং পূজনাদ্যঞ্চ বিস্তরেণ যথাস্থিতং। এতৎ প্রকৃতিখণ্ডং হি শ্রুতং ভূতিবিধায়কং॥*॥ তৃতীয়ে গণেশখণ্ডে। গণেশজন্মসংপ্রশ্নঃ সপুণ্যকমহাব্রতং। পার্ব্বত্যাঃ কার্ত্তিকেয়েন সহ বিঘ্নেশসম্ভবঃ॥ চরিতং কার্ত্তবীর্য্যস্য জামদগ্ন্যস্য চাদ্ভুতং। বিবাদঃ সুমহান্ পশ্চাজ্জামদগ্ন্যগণেশয়োঃ ॥ এতদ্বিঘ্নেশখণ্ডং হি সর্ব্ববিঘ্নবিনাশনং। *। চতুর্থে শ্রীকৃষ্ণজন্মখণ্ডে। শ্রীকৃষ্ণজন্মসংপ্রশ্নো জন্মাখ্যানং ততোঽদ্ভুতং ॥ গোকুলে গমনং পশ্চাৎ পূতনাদিবধোঽদ্ভুতঃ। বাল্যকৌমারজা লীলা বিবিধাস্তত্র বর্ণিতাঃ ॥ রাসক্রীড়া চ গোপীভিঃ শারদী সমুদাহৃতা। রহস্যে রাধয়া ক্রীড়া বর্ণিতা বহুবিস্তরা ॥ সহাক্রূরেণ তৎপশ্চান্মথুরাগমনং হরেঃ। কংসাদীনাং বধে বৃত্তে সাদ্যস্য দ্বিজসংস্কৃতিঃ ॥ কাশ্যসান্দীপনেঃ পশ্চাদ্বিদ্যোপাদানমদ্ভুতং। যবনস্য বধঃ পশ্চাদ্দ্বারকাগমনং হরেঃ ॥ নরকাদিবধস্তত্র কৃষ্ণেন বিহিতোঽদ্ভুতঃ। কৃষ্ণখণ্ডমিদং বিপ্র নৃণাং সংসারখণ্ডনং ॥ *। তৎফলশ্রুতিঃ। পঠিতঞ্চ শ্রুতং ধ্যাতং পূজিতং চাভিবর্ণিতং। ইত্যেতদ্ব্রহ্মবৈবর্ত্তং পুরাণং চাত্যলৌকিকং ॥ ব্যাসোক্তং চাদিসম্ভূতং পঠন্ শৃণ্বন্ বিমুচ্যতে। বিজ্ঞানজ্ঞানশমনাৎ ঘোরাৎ সংসারসাগরাৎ ॥ লিখিত্বৈদঞ্চ যো দদ্যান্মাঘ্যাং ধেনুসমাচিতং। ব্রহ্মলোকমবাপ্নোতি স মুক্তোঽজ্ঞানবন্ধনাৎ ॥ যশ্চানুক্রমণীং বাপি পঠেদ্বা শৃণুয়াদপি। সোঽপি কৃষ্ণপ্রসাদেন লভতে বাঞ্ছিতং ফলং ॥ * ॥ ইতি শ্রীনারদীয়পুরাণে পূর্ব্বভাগে বৃহদুপাখ্যানে চতুর্থপাদে ১০১ অধ্যায়ঃ ॥ ১০ ॥

একাদশং লিঙ্গপুরাণং। শ্রীব্রহ্মোবাচ। শৃণু পুত্র প্রবক্ষ্যামি পুরাণং লিঙ্গসংজ্ঞিকং। পঠতাং শৃণ্বতাঞ্চৈব ভক্তিমুক্তিপ্রদায়কং॥ যচ্চ লিঙ্গাভিধং তিষ্ঠন্ বহ্নিলিঙ্গে হরোঽভ্যধাৎ। মহ্যং ধর্ম্মাদিসিদ্ধ্যর্থং অগ্নিকল্পকথাশ্রয়ং ॥ তদেব ব্যাসদেবেন ভাগদ্বয়সমাচিতং। পুরাণং লিঙ্গমুদিতং বহ্বাখ্যানবিচিত্রিতং ॥ তদেকাদশসাহস্রং হরমাহাত্ম্যসূচকং। পরং

সর্ব্বপুরাণানাং সারভূতং জগত্রয়ে ॥ পুরাণোপক্রমে প্রশ্নঃ সৃষ্টিসঙ্ক্ষেপতঃ পুরা । * । তত্র পূর্ব্বভাগে । যোগাখ্যানং ততঃ প্রোক্তং কল্পাখ্যানং ততঃ পরং ॥ লিঙ্গোদ্ভবস্তদর্চ্চা চ কীর্ত্তিতা হি ততঃ পরং । সনৎকুমারশৈলাদিসংবাদশ্চাথ পাবনঃ ॥ ততো দধীচিচরিতং যুগধর্ম্মনিরূপণং । ততো ভুবনকোষাখ্যা সূর্য্যসোমান্বয়স্ততঃ ॥ ততশ্চ বিস্তরাৎ সর্গস্ত্রিপুরাখ্যানকং তথা । লিঙ্গপ্রতিষ্ঠা চ ততঃ পশুপাশবিমোক্ষণং ॥ শিবব্রতানি চ তথা সদাচারনিরূপণং । প্রায়শ্চিত্তান্যরিষ্টানি কাশীশ্রীশৈলবর্ণনং ॥ অন্ধকাখ্যানকং পশ্চাদ্বারাহচরিতং পুনঃ । নৃসিংহচরিতং পশ্চাজ্জলন্ধরবধস্ততঃ ॥ শৈবং সহস্রনামাথ দক্ষযজ্ঞবিনাশনং । কামস্য দহনং পশ্চাৎ গিরিজায়াঃ করগ্রহঃ ॥ ততো বিনায়কাখ্যানং নৃত্যাখ্যানং শিবস্য চ । উপমন্যুকথা চাপি পূর্ব্বভাগ ইতীরিতঃ ॥ * ॥ তদুত্তরভাগে । বিষ্ণুমাহাত্ম্যকথনং অম্বরীষকথা ততঃ । সনৎকুমারনন্দীশসংবাদশ্চ পুনর্মুনে ॥ শিবমাহাত্ম্যসংযুক্তস্নানযাগাদিকং ততঃ । সূর্য্যপূজাবিধিশ্চৈব শিবপূজা চ মুক্তিদা ॥ দানানি বহুধোক্তানি শ্রাদ্ধপ্রকরণস্ততঃ । প্রতিষ্ঠা তত্র গদিতা ততোঽঘোরস্য কীর্ত্তনং ॥ ব্রজেশ্বরী মহাবিদ্যা গায়ত্রীমহিমা ততঃ । ত্র্যম্বকস্য চ মাহাত্ম্যং পুরাণশ্রবণস্য চ ॥ এতস্যোপরিভাগস্তে লৈঙ্গস্য কথিতো ময়া । ব্যাসেন হি নিবদ্ধস্য রুদ্রমাহাত্ম্যসূচিনঃ ॥ * ॥ তৎফলশ্রুতিঃ । লিখিত্বৈতৎ পুরাণন্তু তিলধেনুসমাচিতং । ফাল্গুন্যাং পূর্ণিমায়াং যো দদ্যাদ্ভক্ত্যা দ্বিজাতয়ে । স লভেচ্ছিবসাযুজ্যং জরামরণবর্জ্জিতঃ ॥ যঃ পঠেচ্ছৃণুয়াদ্বাপি লৈঙ্গং পাপাপহং নরঃ । স ভুক্তভোগো লোকেঽস্মিন্নন্তে শিবপুরং ব্রজেৎ ॥ লিঙ্গানুক্রমণীমেতাং পঠেদ্যঃ শৃণুয়াৎ তথা । তাবুভৌ শিবভক্তৌ তু লোকদ্বিতয়ভোগিনৌ । জায়েতাং গিরিজভর্ত্তুঃ প্রসাদান্নাত্র সংশয়ঃ ॥ * ॥ ইতি শ্রীনারদীয়পুরাণে পূর্ব্বভাগে বৃহদুপাখ্যানে চতুর্থপাদে ১০২ অধ্যায়ঃ ॥ ১১ ॥

দ্বাদশং বরাহপুরাণং । শ্রীব্রহ্মোবাচ । শৃণু বৎস প্রবক্ষ্যামি বারাহং বৈ পুরাণকং । ভাগদ্বয়যুতং শশ্বদ্বিষ্ণুমাহাত্ম্যসূচকং ॥ মানবস্য তু কল্পস্য প্রসঙ্গং মৎকৃতং পুরা । নিববন্ধ পুরাণেঽস্মিংশ্চতুর্ব্বিংশসহস্রকে ॥ ব্যাসো হি বিদুষাং শ্রেষ্ঠঃ সাক্ষান্নারায়ণো ভুবি । তত্রাদৌ শুভসংবাদঃ স্মৃতো ভূমিবরাহয়োঃ ॥ * ॥ তত্র পূর্ব্বভাগে । অথাদিকৃতবৃত্তান্তে রভ্যস্য চরিতং ততঃ । দুর্জ্জয়ায় চ তৎপশ্চাচ্ছ্রাদ্ধকল্প উদীরিতঃ ॥ মহাতপস আখ্যানং গৌর্য্যুৎপত্তিস্ততঃ পরং । বিনায়কস্য নাগানাং সেনান্যাদিত্যয়োরপি ॥ গণানাঞ্চ তথা দেব্যা ধনদস্য বৃষস্য চ । আখ্যানং সত্যতপসো ব্রতাখ্যানসমন্বিতং ॥ অগস্ত্যগীতা তৎপশ্চাদ্রুদ্রগীতা প্রকীর্ত্তিতা । মহিষাসুরবিধ্বংসে মাহাত্ম্যঞ্চ ত্রিশক্তিজং ॥ পর্ব্বাধ্যায়স্ততঃ

শ্বেতোপাখ্যানং গোপ্রদানিকং। ইত্যাদিকৃতবৃত্তান্তং প্রথমোদ্দেশনামকং॥ ভগবদ্ধর্ম্মকে পশ্চাদ্‌ব্রততীর্থকথানকং। দ্বাত্রিংশদপরাধানাং প্রায়শ্চিত্তং শরীরকং॥ তীর্থানাঞ্চাপি সর্ব্বেষাং মাহাত্ম্যং পৃথগীরিতং। মথুরায়া বিশেষেণ শ্রাদ্ধাদীনাং বিধিস্ততঃ॥ বর্ণনং যমলোকস্য ঋষিপুত্রপ্রসঙ্গতঃ। বিপাকঃ কর্ম্মণাঞ্চৈব বিষ্ণুব্রতনিরূপণং॥ গোকর্ণস্য চ মাহাত্ম্যং কীর্ত্তিতং পাপনাশনং। ইত্যেষ পূর্ব্বভাগোঽস্য পুরাণস্য নিরূপিতঃ॥ *॥ উত্তরভাগে। উত্তরে প্রবিভাগে তু পুলস্ত্যকুরুরাজয়োঃ। সংবাদে সর্ব্বতীর্থানাং মাহাত্ম্যং বিস্তরাৎ পৃথক্॥ অশেষধর্ম্মাশ্চাখ্যাতাঃ পৌষ্করং পুণ্যপর্ব্ব চ। ইত্যেবং তব বারাহং প্রোক্তং পাপবিনাশনং॥ *॥ তৎফলশ্রুতিঃ। পঠতাং শৃণ্বতাঞ্চৈব ভগবদ্ভক্তিবর্দ্ধনং। কাঞ্চনং গরুড়ং কৃত্বা তিলধেনুসমাচিতং॥ লিখিত্বৈতচ্চ যো দদ্যাচ্চৈত্র্যাং বিপ্রায় ভক্তিতঃ। স লভেদ্বৈষ্ণবং ধাম দেবর্ষিগণবন্দিতঃ॥ যো বানুক্রমণীমেতাং শৃণোত্যপি পঠত্যপি। সোঽপি ভক্তিং লভেদ্বিষ্ণৌ সংসারোচ্ছেদকারিণীং॥ *॥ ইতি শ্রীনারদীয়পুরাণে পূর্ব্বভাগে বৃহদুপাখ্যানে চতুর্থপাদে ১০৩ অধ্যায়ঃ॥ ১২॥

ত্রয়োদশং স্কন্দপুরাণং। শ্রীব্রহ্মোবাচ। শৃণু বক্ষ্যে মরীচে চ পুরাণং স্কন্দসংজ্ঞিকং। যস্মিন্ প্রতিপদং সাক্ষান্মহাদেবো ব্যবস্থিতঃ॥ পুরাণে শতকোটৌ তু যচ্ছৈবং বর্ণিতং ময়া। লক্ষিতস্যার্থজাতস্য সারো ব্যাসেন কীর্ত্তিতঃ॥ স্কন্দাহ্বয়স্তত্র খণ্ডাঃ সপ্তৈব পরিকল্পিতাঃ। একাশীতিসহস্রস্তু স্কান্দং সর্ব্বাঘকৃন্তনং॥ যঃ শৃণোতি পঠেদ্বাপি স তু সাক্ষাচ্ছিবঃ স্থিতঃ। যত্র মাহেশ্বরা ধর্ম্মাঃ ষণ্মুখেন প্রকাশিতাঃ॥ কল্পে তৎপুরুষে বৃত্তাঃ সর্ব্বসিদ্ধিবিধায়কাঃ। *। তত্র প্রথমে মাহেশ্বরখণ্ডে। তস্য মাহেশ্বরশ্চাদ্যঃ খণ্ডঃ পাপপ্রণাশনঃ॥ কিঞ্চিন্ন্যূনার্কসাহস্রো বহুপুণ্যো বৃহৎকথঃ। সুচরিত্রশতৈর্যুক্তঃ স্কন্দমাহাত্ম্যসূচকঃ॥ যত্র কেদারমাহাত্ম্যে পুরাণোপক্রমঃ পুরা। দক্ষযজ্ঞকথা পশ্চাচ্ছিবলিঙ্গার্চ্চনে ফলং॥ সমুদ্রমথনাখ্যানং দেবেন্দ্রচরিতং ততঃ। পার্ব্বত্যাঃ সমুপাখ্যানং বিবাহস্তদনন্তরং॥ কুমারোৎপত্তিকথনং ততস্তারকসঙ্গরঃ। ততঃ পশুপতাখ্যানং চণ্ডাখ্যানসমাচিতং॥ দ্যূতপ্রবর্ত্তনাখ্যানং নারদেন সমাগমঃ। ততঃ কুমারমাহাত্ম্যে পঞ্চতীর্থকথানকং॥ ধর্ম্মবর্ম্মনৃপাখ্যানং নদীসাগরকীর্ত্তনং। ইন্দ্রদ্যুম্নকথা পশ্চান্নাড়ীজঙ্ঘকথাচিতা॥ প্রাদুর্ভাবস্ততো মহ্যাঃ কথা দমনকস্য চ। মহীসাগরসংযোগঃ কুমারেশকথা ততঃ॥ ততস্তারকযুদ্ধঞ্চ নানাখ্যানসমাচিতং। বধশ্চ তারকস্যাথ পঞ্চলিঙ্গনিবেশনং॥ দ্বীপাখ্যানং ততঃ পুণ্যং ঊর্দ্ধলোকব্যবস্থিতঃ। ব্রহ্মাণ্ডস্থিতিমানঞ্চ বর্করেশকথানকং॥ মহাকালসমুদ্ভূতিঃ কথা চাস্য মহাদ্ভুতা। বাসুদেবস্য মাহাত্ম্যং কোটিতীর্থং ততঃ পরং॥ নানাতীর্থসমাখ্যানং গুপ্তক্ষেত্রে

প্রকীর্ত্তিতং। পাণ্ডবানাং কথা পুণ্যা মহাবিদ্যাপ্রসাধনং॥ তীর্থযাত্রাসমাপ্তিশ্চ কৌমারমিদমদ্ভুতং। অরুণাচলমাহাত্ম্যে সনকব্রহ্মসংকথা॥ গৌরীতপঃসমাখ্যানং তত্তত্তীর্থনিরূপণং। মহিষাসুরজাখ্যানং বধশ্চাস্য মহাদ্ভুতঃ॥ শোণাচলে শিবা-স্থানং নিত্যদা পরিকীর্ত্তিতং। ইত্যেষ কথিতঃ স্কান্দে খণ্ডো মাহেশ্বরোঽদ্ভুতঃ॥*॥ দ্বিতীয়ে বৈষ্ণবখণ্ডে। দ্বিতীয়ো বৈষ্ণবঃ খণ্ড-স্তস্যাখ্যানানি মে শৃণু। প্রথমং ভূমিবারাহং সমাখ্যানং প্রকীর্ত্তিতং॥ যত্র বোচক-কুধ্রস্য মাহাত্ম্যং পাপনাশনং। কমলায়াঃ কথা পুণ্যা শ্রীনিবাসস্থিতিস্ততঃ॥ কুলা-লাখ্যানকং চাত্র সুবর্ণমুখরীকথা। নানা-খ্যানসমাযুক্তা ভারদ্বাজকথাদ্ভুতা॥ মতঙ্গা-ঞ্জনসংবাদঃ কীর্ত্তিতঃ পাপনাশনঃ। পুরুষো-ত্তমমাহাত্ম্যং কীর্ত্তিতং চোৎকলে ততঃ॥ মার্কণ্ডেয়সমাখ্যানং অম্বরীষস্য ভূপতেঃ। ইন্দ্রদ্যুম্নস্য চাখ্যানং বিদ্যাপতিকথা শুভা॥ জৈমিনেঃ সমুপাখ্যানং নারদস্যাপি বাড়ব। নীলকণ্ঠসমাখ্যানং নারসিংহোপবর্ণনং॥ অশ্বমেধকথা রাজ্ঞো ব্রহ্মলোকগতিস্তথা। রথযাত্রাবিধিঃ পশ্চাজ্জন্মস্নানবিধিস্তথা॥ দক্ষিণামূর্ত্ত্যুপাখ্যানং গুণ্ডিচাখ্যানকং ততঃ। রথরক্ষাবিধানঞ্চ শয়নোৎসব-কীর্ত্তনং॥ শ্বেতোপাখ্যানমত্রোক্তং বহ্ন্যুৎ-সবনিরূপণং। দোলোৎসবো ভগবতো ব্রতং সাংবৎসরাভিধং॥ পূজা চ কামিভি-র্বিষ্ণোরুদ্দালকনিয়োগকঃ। মোক্ষসাধন-মত্রোক্তং নানাযোগনিরূপণং॥ দশাবতার

কথনং স্নানাদিপরিকীর্ত্তনং। ততো বদরিকায়াশ্চ মাহাত্ম্যং পাপনাশনং॥ অগ্ন্যাদিতীর্থমাহাত্ম্যং বৈনতেয়শিলাভবং। কারণং ভগবদ্বাসে তীর্থং কাপালমোচনং॥ পঞ্চধারাভিধং তীর্থং মেরুসংস্থাপনং তথা। ততঃ কার্ত্তিকমাহাত্ম্যে মাহাত্ম্যং মদনালসং॥ ধূম্রকোশসমাখ্যানং দিন-কৃত্যানি কার্ত্তিকে। পঞ্চভীষ্মব্রতাখ্যানং কীর্ত্তিদং ভুক্তিমুক্তিদং॥ তদ্‌ব্রতস্য চ মাহাত্ম্যে বিধানং স্নানজং তথা। পুণ্ড্রাদিকীর্ত্তনং চাত্র মালাধারণপুণ্যকং॥ পঞ্চামৃতস্নানপুণ্যং ঘণ্টানাদাদিজং ফলং। নানাপুষ্পার্চ্চনফলং তুলসীদলজং ফলং॥ নৈবেদ্যস্য চ মাহাত্ম্যং হরিবাসরকীর্ত্তনং। অখণ্ডৈকাদশীপুণ্যং তথা জাগরণস্য চ॥ মৎস্যোৎসববিধানঞ্চ নামমাহাত্ম্যকীর্ত্তনং। ধ্যানাদিপুণ্যকথনং মাহাত্ম্যং মথুরাভবং॥ মথুরাতীর্থমাহাত্ম্যং পৃথগুক্তং ততঃ পরং। বনানাং দ্বাদশানাঞ্চ মাহাত্ম্যং কীর্ত্তিতং ততঃ॥ শ্রীমদ্ভাগবতস্যাত্র মাহাত্ম্যং কীর্ত্তিতং পরং। বজ্রশাণ্ডিল্যসংবাদং অন্তর্লীলাপ্রকাশকং॥ ততো মাঘস্য মাহাত্ম্যং স্নানদানজপোদ্ভবং। নানাখ্যান-সমাযুক্তং দশাধ্যায়ে নিরূপিতং॥ ততো বৈশাখমাহাত্ম্যে শয্যাদানাদিজং ফলং। জলদানাদিবিধয়ঃ কামাখ্যানমতঃ পরং॥ শ্রুতদেবস্য চরিতং ব্যাধোপাখ্যানমদ্ভুতং। তথাক্ষয়তৃতীয়াদের্বিশেষাৎ পুণ্যকীর্ত্তনং॥ ততস্ত্বযোধ্যামাহাত্ম্যে চক্রব্রহ্মাহ্বতীর্থকে। ঋণপাপবিমোক্ষাখ্যে তথাধারসহস্রকং॥

স্বর্গদ্বারং চন্দ্রহরিধর্ম্মহর্য্যুপবর্ণনং। স্বর্ণবৃষ্টেরুপাখ্যানং তিলোদা সরযূযুতিঃ॥ সীতাকুণ্ডং গুপ্তহরিঃ সরযূর্ঘর্ঘরাচয়ঃ। গোপ্রচারঞ্চ দুগ্ধোদং গুরুকুণ্ডাদিপঞ্চকং॥ ঘোষার্কাদীনি তীর্থানি ত্রয়োদশ ততঃ পরং। গয়াকূপস্য মাহাত্ম্যং সর্ব্বাঘবিনিবর্ত্তকং॥ মাণ্ডব্যাশ্রমপূর্ব্বাণি তীর্থানি তদনন্তরং। অজিতাদিমানসাদিতীর্থানি গদিতানি চ॥ ইত্যেষ বৈষ্ণবঃ খণ্ডো দ্বিতীয়ঃ পরিকীর্ত্তিতঃ॥*॥ তৃতীয়ে ব্রহ্মখণ্ডে। অতঃ পরং ব্রহ্মখণ্ডং মরীচে শৃণু পুণ্যদং। যত্র বৈ সেতুমাহাত্ম্যে ফলং স্নানেক্ষণোদ্ভবং॥ গালবস্য তপশ্চর্য্যা রাক্ষসাখ্যানকং ততঃ। চক্রতীর্থাদিমাহাত্ম্যং দেবীপতনসংযুতং॥ বেতালতীর্থমহিমা পাপনাশাদিকীর্ত্তনং। মঙ্গলাদিকমাহাত্ম্যং ব্রহ্মকুণ্ডাদিবর্ণনং। হনূমৎকুণ্ডমহিমাগস্ত্যতীর্থভবং ফলং॥ রামতীর্থাদিকথনং লক্ষ্মীতীর্থনিরূপণং। শঙ্খাদিতীর্থমহিমা তথা সাধ্যামৃতাদিজঃ॥ ধনুষ্কোট্যাদিমাহাত্ম্যং ক্ষীরকুণ্ডাদিজং তথা। গায়ত্র্যাদিকতীর্থানাং মাহাত্ম্যং চাত্র কীর্ত্তিতং॥ রামনাথস্য মহিমা তত্ত্বজ্ঞানোপদেশনং। যাত্রাবিধানকথনং সেতৌ মুক্তিপ্রদং নৃণাং॥ ধর্ম্মারণ্যস্য মাহাত্ম্যং ততঃ পরমুদীরিতং। স্থাণুঃ স্কন্দায় ভগবান্ যত্র তত্ত্বমুপাদিশৎ॥ ধর্ম্মারণ্যসুসংভূতিস্তৎপুণ্যপরিকীর্ত্তনং। কর্ম্মসিদ্ধেঃ সমাখ্যানং ঋষিবংশনিরূপণং॥ অপ্সরাতীর্থমুখ্যানাং মাহাত্ম্যং যত্র কীর্ত্তিতং। বর্ণানামাশ্রমাণাঞ্চ ধর্ম্মতত্ত্বনিরূপণং॥ দেবস্থানবিভাগশ্চ বকুলার্ককথা শুভা। ছত্রা নন্দা তথা শান্তা শ্রীমাতা চ মতঙ্গিনী॥ পুণ্যদাত্র্যঃ সমাখ্যাতা যত্র দেব্যঃ সমাস্থিতাঃ। ইন্দ্রেশ্বরাদিমাহাত্ম্যং দ্বারকাদিনিরূপণং॥ লোহাসুরসমাখ্যানং গঙ্গাকূপনিরূপণং। শ্রীরামচরিতঞ্চৈব সত্যমন্দিরবর্ণনং॥ জীর্ণোদ্ধারস্য কথনং শাসনপ্রতিপাদনং। জাতিভেদপ্রকথনং স্মৃতিধর্ম্মনিরূপণং॥ ততস্তু বৈষ্ণবা ধর্ম্মা নানাখ্যানৈরুদীরিতাঃ। চাতুর্ম্মাস্যে ততঃ পুণ্যে সর্ব্বধর্ম্মনিরূপণং॥ দানপ্রশংসা তৎপশ্চাদ্‌ব্রতস্য মহিমা ততঃ। তপসশ্চৈব পূজায়াঃ সচ্ছিদ্রকথনং ততঃ॥ প্রকৃতীনাং ভিদাখ্যানং শালগ্রামনিরূপণং। তারকস্য বধোপায়ো ত্র্যক্ষার্চ্চা মহিমা তথা॥ বিষ্ণোঃ শাপশ্চ বৃক্ষত্বং পার্ব্বত্যনুনয়স্ততঃ। হরস্য তাণ্ডবং নৃত্যং রামনামনিরূপণং॥ হরস্য লিঙ্গপতনং কথায়ৈ জবনস্য চ। পার্ব্বতীজন্মচরিতং তারকস্য বধোঽদ্ভুতঃ॥ প্রণবৈশ্বর্য্যকথনং তারকাচরিতং পুনঃ। দক্ষযজ্ঞসমাপ্তিশ্চ দ্বাদশাক্ষররূপণং॥ জ্ঞানযোগসমাখ্যানং মহিমা দ্বাদশার্ণজঃ। শ্রবণাদিকপুণ্যঞ্চ কীর্ত্তিতং শর্ম্মদং নৃণাং॥*॥ তৃতীয়ে ব্রহ্মখণ্ডস্যোত্তরভাগে। ততো ব্রহ্মোত্তরে ভাগে শিবস্য মহিমাদ্ভুতঃ। পঞ্চাক্ষরস্য মহিমা গোকর্ণমহিমা ততঃ॥ শিবরাত্রেশ্চ মহিমা প্রদোষব্রতকীর্ত্তনং। সোমবারব্রতঞ্চাপি সীমন্তিন্যাঃ কথানকং॥ ভদ্রায়ুৎপত্তিকথনং সদাচারনিরূপণং।

শিববর্ম্মসমুদ্দেশো ভদ্রায়ুদ্বাহবর্ণনং ॥ ভদ্রায়ুমহিমা চাপি ভস্মমাহাত্ম্যকীর্ত্তনং। শবরাখ্যানকঞ্চৈব উমামাহেশ্বরব্রতং ॥ রুদ্রাক্ষস্য চ মাহাত্ম্যং রুদ্রাধ্যায়স্য পুণ্যকং। শ্রবণাদিকপুণ্যঞ্চ ব্রহ্মখণ্ডো-হয়মীরিতঃ ॥ * ॥ চতুর্থে কাশীখণ্ডে। অতঃ পরং চতুর্থন্তু কাশীখণ্ডমনুত্তমং। বিন্ধ্য-নারদয়োর্যত্র সংবাদঃ পরিকীর্ত্তিতঃ॥ সত্য-লোকপ্রভাবশ্চাগস্ত্যাবাসে সুরাগমঃ। পতিব্রতাচরিত্রঞ্চ তীর্থচর্য্যাপ্রশংসনং ॥ ততশ্চ সপ্তপুর্য্যাখ্যা সংযমিন্যা নিরূপণং। ব্রধ্নস্য চ তথেন্দ্রাগ্ন্যোর্লোকাপ্তিঃ শিব-শর্ম্মণঃ ॥ অগ্নেঃ সমুদ্ভবশ্চৈব ক্রব্যাদ্বরুণ-সম্ভবঃ। গন্ধবত্যলকাপুর্য্যোরীশর্য্যাশ্চ সমুদ্ভবঃ ॥ চন্দ্রোড়ুবুধলোকানাং কুজে-জ্যার্কভুবাং ক্রমাৎ। সপ্তর্ষীণাং ধ্রুবস্যাপি তপোলোকস্য বর্ণনং ॥ ধ্রুবলোককথা পুণ্যা সত্যলোকনিরীক্ষণং। স্কন্দাগস্ত্য-সমালাপো মণিকর্ণীসমুদ্ভবঃ ॥ প্রভাব-শ্চাপি গঙ্গায়া গঙ্গানামসহস্রকং। বারা-ণসীপ্রশংসা চ ভৈরবাবির্ভবস্ততঃ ॥ দণ্ড-পাণিজ্ঞানবাপ্যোরুদ্ভবঃ সমনন্তরং। ততঃ কলাবত্যাখ্যানং সদাচারনিরূপণং ॥ ব্রহ্ম-চারিসমাখ্যানং ততঃ স্ত্রীলক্ষণানি চ। কৃত্যাকৃত্যবিনির্দ্দেশো হৃবিমুক্তেশবর্ণনং॥ গৃহস্থযোগিনোর্ধর্ম্মাঃ কালজ্ঞানং ততঃ পরং। দিবোদাসকথা পুণ্যা কাশীবর্ণন-মেব চ॥ যোগিচর্চ্চা চ লোলার্কোত্তর-শাম্বার্কজা কথা। দ্রুপদার্কস্য তার্ক্ষ্যাখ্যা-রুণার্কস্যোদয়স্ততঃ॥ দশাশ্বমেধতীর্থ্যাখ্যা

মন্দরাচ্চ গণাগমঃ। পিশাচমোচনাখ্যানং গণেশপ্রেষণস্ততঃ ॥ মায়া গণপতেশ্চাথ ভুবি প্রাদুর্ভবস্ততঃ। বিষ্ণুমায়াপ্রপঞ্চোহথ দিবোদাসবিমোক্ষণং ॥ ততঃ পঞ্চনদোৎ-পত্তির্বিন্দুমাধবসম্ভবঃ। ততো বৈষ্ণব-তীর্থাখ্যা শূলিনঃ কাশিকাগমঃ ॥ জৈগী-ষব্যেণ সংবাদো জ্যেষ্ঠেশাখ্যা মহেশিতুঃ। ক্ষেত্রাখ্যানং কন্দুকেশব্যাঘ্রেশ্বরসমুদ্ভবঃ॥ শৈলেশরত্নেশ্বরয়োঃ কৃত্তিবাসস্য চোদ্ভবঃ। দেবতানামধিষ্ঠানং দুর্গাসুরপরাক্রমঃ ॥ দুর্গায়া বিজয়শ্চাথ ওঙ্কারেশস্য বর্ণনং। পুনরোংকারমাহাত্ম্যং ত্রিলোচনসমুদ্ভবঃ॥ কেদারাখ্যা চ ধর্ম্মেশকথা বিশ্বভুজোদ্ভবা। বীরেশ্বরসমাখ্যানং গঙ্গামাহাত্ম্যকীর্ত্তনং ॥ বিশ্বকর্ম্মেশমহিমা দক্ষযজ্ঞোদ্ভবস্তথা। সতীশস্যামৃতেশাদের্ভুজস্তম্ভঃ পরাশরেঃ॥ ক্ষেত্রতীর্থকদম্বশ্চ মুক্তিমণ্ডপসংকথা। বিশ্বেশবিভবশ্চাথ ততো যাত্রাপরি-ক্রমঃ ॥ * ॥ পঞ্চমে অবন্তীখণ্ডে। অতঃ পরং ত্ববন্ত্যাখ্যং শৃণু খণ্ডঞ্চ পঞ্চমং। মহাকালবনাখ্যানং ব্রহ্মশীর্ষচ্ছিদা ততঃ ॥ প্রায়শ্চিত্তবিধিশ্চাগ্নেরুৎপত্তিশ্চ সুরা-গমঃ। দেবদীক্ষা শিবস্তোত্রং নানাপাতক-নাশনং ॥ কপালমোচনাখ্যানং মহাকাল-বনস্থিতিঃ। তীর্থং কলকলেশস্য সর্ব্ব-পাপপ্রণাশনং ॥ কুণ্ডমপ্সরসংজ্ঞঞ্চ সর্গে রুদ্রস্য পুণ্যদং। কুটুম্বেশঞ্চ বিদ্যাঞ্চ মর্কটেশ্বরতীর্থকং ॥ স্বর্গদ্বারং চতুঃসিন্ধু-তীর্থং শঙ্করবাপিকা। সকরার্কগন্ধবতী-তীর্থম্পাপপ্রণাশনং ॥ দশাশ্বমেধৈকানংশা-

তীর্থে চ হরিসিদ্ধিদং। পিশাচকাদি-যাত্রা চ হনূমৎকযমেশ্বরৌ ॥ মহাকালেশ-যাত্রা চ হনূমৎকযমেশ্বরৌ। মহাকালেশ-যাত্রা চ বল্মীকেশ্বরতীর্থকং ॥ শুক্রেশ-ভেশোপাখ্যানং কুশস্থল্যাঃ প্রদক্ষিণং। অক্রুরমন্দাকিন্যঙ্কপাদচন্দ্রার্কবৈভবং ॥ করভেশকুক্কুটেশলড্ডুকেশাদিতীর্থকং। মার্কণ্ডেশং যজ্ঞবাপী সোমেশং নরকা-স্তকং ॥ কেদারেশ্বররামেশসৌভাগ্যেশ-নরার্ককং। কেশার্কং শক্তিভেদঞ্চ স্বর্ণক্ষর-মুখানি চ ॥ ওঙ্কারেশাদিতীর্থানি অন্ধক-স্তুতিকীর্ত্তনং। কালারণ্যে লিঙ্গসঙ্খ্যা স্বর্ণশৃঙ্গাভিধানকং ॥ কুশস্থল্যা অবন্ত্যা-শ্চোজ্জয়িন্যা অভিধানকং। পদ্মাবতী কুমুদ্বত্যমরাবতীতিনামকং ॥ বিশালা-প্রতিকল্পাভিধানে চ জ্বরশান্তিকং। শিপ্রা-স্নানাদিকফলং নাগোক্তা শিবস্তুতিঃ ॥ হিরণ্যাক্ষবধাখ্যানং তীর্থং সুন্দর-কুণ্ডকং। নীলগঙ্গা পুষ্করাখ্যং বিন্ধ্যবাসন-তীর্থকং ॥ পুরুষোত্তমাধিমাসং তত্তীর্থ-ঞ্চাঘনাশনং। গোমতীবামনে কুণ্ডে বিষ্ণোর্নামসহস্রকং ॥ বীরেশ্বরসরঃ কাল-ভৈরবস্য চ তীর্থকে। মহিমা নাগ-পঞ্চম্যাং নৃসিংহস্য জয়ন্তিকা ॥ কুঠুবে-শ্বরযাত্রা চ দেবসাধককীর্ত্তনং। কর্করা-জাখ্যতীর্থঞ্চ বিঘ্নেশাদিসুরোহনং ॥ রুদ্র-কুণ্ডপ্রভৃতিষু বহুতীর্থনিরূপণং। যাত্রাষ্ট-তীর্থজা পুণ্যা রেবামাহাত্ম্যমুচ্যতে ॥ ধর্ম্ম-পুত্রস্য বৈরাগ্যে মার্কণ্ডেয়েন সঙ্গমঃ। প্রাগ্লয়ানুভবাখ্যানং অমৃতাপরিকীর্ত্তনং ॥

কল্পে কল্পে পৃথক্ নাম নর্ম্মদায়াঃ প্রকী-র্ত্তিতং। স্তবমার্ষং নার্ম্মদঞ্চ কালরাত্রিকথা ততঃ ॥ মহাদেবস্তুতিঃ পশ্চাৎ পৃথকল্প-কথাদ্ভুতা। বিশল্যাখ্যানকং পশ্চাজ্জালে-শ্বরকথা তথা ॥ গৌরীব্রতসমাখ্যানং ত্রিপুরজ্বালনস্ততঃ। দেহপাতবিধানঞ্চ কাবেরীসঙ্গমস্ততঃ ॥ দারুতীর্থং ব্রহ্মবর্জ্জং যত্রেশ্বরকথানকং। অগ্নিতীর্থং রবিতীর্থং মেঘনাদং দিদারুকং ॥ দেবতীর্থং নর্ম্ম-দেশং কপিলাখ্যং করঞ্জকং। কুণ্ডলেশং পিপ্পলাদং বিমলেশঞ্চ শূলভিৎ ॥ শচী-হরণমাখ্যাতমন্ধকস্য বধস্ততঃ। শূলভেদো-দ্ভবো যত্র দানধর্ম্মাঃ পৃথগ্বিধাঃ ॥ আখ্যানং দীর্ঘতপস ঋষ্যশৃঙ্গকথা ততঃ। চিত্রসেন-কথা পুণ্যা কাশিরাজস্য মোক্ষণং ॥ ততো দেবশিলাখ্যানং শবরীচরিতাচিতং। ব্যাধা-খ্যানং ততঃ পুণ্যং পুষ্করিণ্যর্কতীর্থকং ॥ আপিত্যেশ্বরতীর্থঞ্চ শক্রতীর্থং করো-টিকং। কুমারেশমগস্ত্যেশং চ্যবনেশঞ্চ মাতৃজং ॥ লোকেশং ধনদেশঞ্চ মঙ্গলেশঞ্চ কামজং। নাগেশঞ্চাপি গোপারং গৌতমং শঙ্খচূড়জং ॥ নারদেশং নন্দিকেশং বরুণে-শ্বরতীর্থকং। দধিস্কন্দাদিতীর্থানি হনূ-মন্তেশ্বরস্ততঃ ॥ রামেশ্বরাদিতীর্থানি সোমেশং পিঙ্গলেশ্বরং। ঋণমোক্ষং কপি-লেশং পূতিকেশং জলেশয়ং ॥ চণ্ডার্ক-যমতীর্থঞ্চ কহ্লোড়ীশঞ্চ নান্দিকং। নারা-য়ণঞ্চ কোটীশং ব্যাসতীর্থং প্রভাসিকং ॥ নাগেশং সঙ্কর্ষণকং মন্মথেশ্বরতীর্থকং। এরণ্ডীসঙ্গমং পুণ্যং সুবর্ণাশিলতীর্থকং ॥

কুরঙ্গং কামহং তীর্থং ভাণ্ডীরং রোহিণী-ভবং। চক্রতীর্থং ধৌতপাপং স্কান্দমাঙ্গি-রসাহ্বয়ং ॥ কোটিতীর্থমযোন্যাখ্যমঙ্গা-রাখ্যং ত্রিলোচনং। ইন্দ্রেশং কম্বুকেশঞ্চ সোমেশং কোহনেশকং ॥ নার্ম্মদং চার্ক-মাগ্নেয়ং ভার্গবেশ্বরসত্তমং। ব্রাহ্মং দৈবঞ্চ ভাগেশং আদিবারাহণং কবে ॥ রামেশমথ সিদ্ধেশং আহল্যং কঙ্কটেশ্বরং। শাক্রং সৌম্যঞ্চ নান্দেশং তাপেশং রুক্মিণী-ভবং ॥ যোজনেশং বরাহেশং দ্বাদশীশিব-তীর্থকে। সিদ্ধেশং মঙ্গলেশঞ্চ লিঙ্গ-বারাহতীর্থকং ॥ কুণ্ডেশং শ্বেতবারাহং ভার্গবেশং রবীশ্বরং। শুক্লাদীনি চ তীর্থানি হুঁকারস্বামিতীর্থকং ॥ সঙ্গমেশং নার-কেশং মোক্ষং সার্পঞ্চ গোপকং। নাগং শাম্বঞ্চ সিদ্ধেশং মার্কণ্ডাক্রূরতীর্থকে ॥ কামোদশূলারোপাখ্যে মাণ্ডব্যং গোপকে-শ্বরং। কপিলেশং পিঙ্গলেশং ভূতেশং গাঙ্গগৌতমে ॥ আশ্বমেধং ভৃগুকচ্ছং কেদারেশঞ্চ পাপহ্নুৎ। খনখলেশং জ্বালেশং শালগ্রামং বরাহকং ॥ চন্দ্র-প্রভাসমাদিত্যং শ্রীপত্যাখ্যঞ্চ হংসকং। মূলস্থানঞ্চ শূলেশমাগ্নায়াচিত্রদৈবকং ॥ শিখীশং কোটিতীর্থঞ্চ দশকন্যং সুবর্ণকং। ঋণমোক্ষং ভারভূতিরত্রাস্তে পুংখমুণ্ডিমং ॥ আমলেশং কপালেশং শৃঙ্গেরণ্ডীভবস্ততঃ। কোটিতীর্থং লোটনেশং ফলস্তুতিরতঃ পরং ॥ দৃমিজঙ্গলমাহাত্ম্যে রোহিতাশ্ব-কথা ততঃ। ধুন্ধুমারসমাখ্যানং বধোপায়-স্ততোহস্য চ ॥ বধো ধুন্ধোস্ততঃ পশ্চাৎ ততশ্চিত্রবহোদ্ভবঃ। মহিমাস্য ততশ্চণ্ডী-শপ্রভাবো রতীশ্বরঃ ॥ কেদারেশো লক্ষ-তীর্থং ততো বিষ্ণুপদীভবং। মুখারং চ্যবনান্ধাখ্যং ব্রহ্মণশ্চ সরস্ততঃ ॥ চক্রাখ্যং ললিতাখ্যানং তীর্থঞ্চ বহুগোমথং। রুদ্রা-বর্ত্তঞ্চ মার্কণ্ডং তীর্থং পাপপ্রণাশনং ॥ রাবণেশং শুদ্ধপটং দেবান্ধুপ্রেততীর্থকং। জিহ্বোদতীর্থসম্ভূতিঃ শিবোদ্ভেদং ফল-স্তুতিঃ ॥ এষ খণ্ডো হ্যবন্ত্যাখ্যঃ শৃণু তাং পাপনাশনঃ। *। ষষ্ঠে নাগরখণ্ডে। অতঃ পরং নাগরাখ্যঃ খণ্ডঃ ষষ্ঠোহভিধীয়তে ॥ লিঙ্গোৎপত্তিসমাখ্যানং হরিশ্চন্দ্রকথা শুভা। বিশ্বামিত্রস্য মাহাত্ম্যং ত্রিশঙ্কু-স্বর্গতিস্তথা ॥ হাটকেশ্বরমাহাত্ম্যে বৃত্রা-সুরবধস্তথা। নাগবিলং শঙ্খতীর্থং অচলে-শ্বরবর্ণনং ॥ চমৎকারপুরাখ্যানং চমৎ-কারকরং পরং। গয়শীর্ষং বালশাখ্যং বালমণ্ডং মৃগাহ্বয়ং ॥ বিষ্ণুপাদঞ্চ গোকর্ণং যুগরূপং সমাশ্রয়ঃ। সিদ্ধেশ্বরং নাগসরঃ সপ্তার্ষেয়ং হ্যগস্ত্যকং ॥ ভ্রূণগর্ত্তং নলে-শঞ্চ ভৈষ্মং দূর্ব্বেরমর্ককং। সাম্মিষ্ঠং শোভনাথঞ্চ দৌর্গমানর্জকেশ্বরং ॥ জম-দগ্নিবধাখ্যানং নৈঃক্ষত্রিয়কথানকং। রাম-হ্রদং নাগপুরং জড়লিঙ্গঞ্চ যজ্ঞভূঃ ॥ মুণ্ডী-রাদিত্রিকার্কঞ্চ সতীপরিণয়স্তথা। বাল-খিল্যঞ্চ যাগেশং বালখিল্যঞ্চ গারুড়ং ॥ লক্ষ্মীশাপঃ সাপ্তবিংশঃ সোমপ্রাসাদমেব চ। অম্বাবৃদ্ধং পাদুকাখ্যং আগ্নেয়ং ব্রহ্ম-কুণ্ডকং ॥ গোমুখং লোহযষ্ট্যাখ্যং অজা-পালেশ্বরী তথা। শানৈশ্চরং রাজবাপী

রামেশো লক্ষ্মণেশ্বরঃ ॥ কুশেশাখ্যং লবেশাখ্যং লিঙ্গং সর্ব্বোত্তমোত্তমং। অষ্টষষ্টিসমাখ্যানং দময়ন্ত্যাস্ত্রিজাতকং ॥ ততোঽম্বা রেবতী চাত্র ভট্টিকাতীর্থসম্ভবং। ক্ষেমঙ্করী চ কেদারং শুক্লতীর্থং মুখারকং ॥ সত্যসন্ধেশ্বরাখ্যানং তথা কর্ণোৎপলাকথা। অটেশ্বরং যাজ্ঞবল্ক্যং গৌর্য্যং গাণেশমেব চ। ততো বাস্তুপদাখ্যানং অজাগহকথানকং ॥ সৌভাগ্যান্ধুকশূলেশং ধর্ম্মরাজকথানকং। মিষ্টান্নদেশ্বরাখ্যানং গাণপত্যত্রয়ং ততঃ ॥ জাবালিচরিতঞ্চৈব মকরেশকথা ততঃ। কালেশ্বর্য্যন্ধকাখ্যানং কুণ্ডমাপ্সরসন্তথা ॥ পুষ্যাদিত্যং রৌহিতাশ্বং নাগরোৎপত্তিকীর্ত্তনং। ভার্গবং চরিতং চৈব বৈশ্বামিত্রং ততঃ পরং ॥ সারস্বতং পৈপ্পলাদং কংসারীশঞ্চ পৈণ্ডকং। ব্রহ্মণো যজ্ঞচরিতং সাবিত্র্যাখ্যানসংযুতং ॥ রৈবতং ভর্ত্তৃযজ্ঞাখ্যং মুখ্যতীর্থনিরীক্ষণং। কৌরবং হাটকেশাখ্যং প্রভাসং ক্ষেত্রকত্রয়ং ॥ পৌষ্করং নৈমিষং ধার্ম্মমরণ্যত্রিতয়ং স্মৃতং। বারাণসী দ্বারকাখ্যাবন্ত্যাখ্যেতি পুরীত্রয়ং ॥ বৃন্দাবনং খাণ্ডবাখ্যমদ্বৈকাখ্যং বনত্রয়ং। কল্পঃ শালস্তথা নন্দো গ্রামত্রয়মনুত্তমং ॥ অসিশুক্লপিতৃসংজ্ঞং তীর্থত্রয়মুদাহৃতং। শ্র্যর্ব্বুদৌ রৈবতশ্চৈব পর্ব্বতত্রয়মুত্তমং ॥ নদীনাং ত্রিতয়ং গঙ্গা নর্ম্মদা চ সরস্বতী। সার্দ্ধকোটিত্রয়ফলমেকৈকঞ্চৈষু কীর্ত্তিতং ॥ কূপিকা শঙ্খতীর্থঞ্চামরকং বালমণ্ডনং। হাটকেশক্ষেত্রফলপ্রদং প্রোক্তং চতুষ্টয়ং ॥ শাম্বাদিত্যং শ্রাদ্ধকল্পং যৌধিষ্ঠিরমথান্ধকং। জলশায়ি চতুর্ম্মাস্যং অশূন্যশয়নব্রতং ॥ মঙ্কণেশং শিবরাত্রিস্তুলাপুরুষদানকং। পৃথ্বীদানং বার্ণকেশং কপালমোচনেশ্বরং ॥ পাপপিণ্ডং সাপ্তলৈঙ্গং যুগমানাদিকীর্ত্তনং। নিম্বেশশাকম্ভর্য্যাখ্যা রুদ্রৈকাদশকীর্ত্তনং ॥ দানমাহাত্ম্যকথনং দ্বাদশাদিত্যকীর্ত্তনং। ইত্যেষ নাগরঃ খণ্ডঃ প্রভাসাখ্যোঽধুনোচ্যতে ॥ * ॥ সপ্তমে প্রভাসখণ্ডে। সোমেশো যত্র বিশ্বেশোঽর্কস্থলং পুণ্যদং মহৎ। সিদ্ধেশ্বরাদিকাখ্যানং পৃথগত্র প্রকীর্ত্তিতং ॥ অগ্নিতীর্থং কপর্দ্দীশং কেদারেশং গতিপ্রদং। ভীমভৈরবচণ্ডীশভাস্করাঙ্গারকেশ্বরাঃ ॥ বুধেজ্যভৃগুসৌরেন্দুশিখীশা হরবিগ্রহাঃ। সিদ্ধেশ্বরাদ্যাঃ পঞ্চান্যে রুদ্রাস্তত্র ব্যবস্থিতাঃ ॥ বরারোহা হ্যজাপালা মঙ্গলা ললিতেশ্বরী। লক্ষ্মীশো বাড়বেশশ্চার্ঘীশঃ কামেশ্বরস্তথা ॥ গৌরীশবরুণেশাখ্যং উষীশঞ্চ গণেশ্বরং। কুমারেশঞ্চ শাকল্যং শঙ্কুলোতঙ্কগৌতমং॥ দৈত্যঘ্নেশং চক্রতীর্থং সন্নিহত্যাহ্বয়ং তথা। ভূতেশাদীনি লিঙ্গানি আদিনারায়ণাহ্বয়ং ॥ ততশ্চক্রধরাখ্যানং শাম্বাদিত্যকথানকং। কথা কণ্টকশোধিন্যা মহিষঘ্ন্যাস্ততঃ পরং ॥ কপালীশ্বরকোটীশবালব্রহ্মাহ্বসৎকথা। নরকেশসম্বর্ত্তেশনিধীশ্বরকথা ততঃ॥ বলভদ্রেশ্বরস্যাথ গঙ্গায়া গণপস্য চ। জাম্ববত্যাখ্যসরিতঃ পাণ্ডুকূপস্য সৎকথা ॥ শতমেধ-

লক্ষমেধকোটিমেধকথা তথা। দুর্ব্বাসার্ক-যচুস্থানহিরণ্যাসঙ্গমোৎকথা ॥ নগরার্কস্য কৃষ্ণস্য সঙ্কর্ষণসমুদ্রয়োঃ। কুমার্য্যাঃ ক্ষেত্রপালস্য ব্রহ্মেশস্য কথা পৃথক্ ॥ পিঙ্গলাসঙ্গমেশস্য শঙ্করার্কঘটেশয়োঃ। ঋষিতীর্থস্য নন্দার্কত্রিতকূপস্য কীর্ত্তনং ॥ শশোপানস্য পর্ণার্কন্যঙ্কুমত্যোঃ কথাদ্ভুতা। বারাহস্বামিবৃত্তান্তং ছায়ালিঙ্গাখ্যগুল্ফয়োঃ ॥ কথা কনকনন্দায়াঃ কুন্তীগঙ্গেশয়োস্তথা। চমসোদ্ভেদবিদুরত্রিলোকেশকথা ততঃ ॥ মঙ্কণেশত্রৈপুরেশষণ্ডতীর্থকথাস্তথা। সূর্য্যপ্রাচীত্রীক্ষণয়োরুমানাথকথা তথা ॥ ভূদ্ধারশূলস্থলয়োশ্চ্যবনার্কেশয়োস্তথা। অজাপালেশবালার্ককুবেরস্থলজা কথা ॥ ঋষিতোয়াকথা পুণ্যা সঙ্গালেশ্বরকীর্ত্তনং। নারদাদিত্যকথনং নারায়ণনিরূপণং ॥ তপ্তকুণ্ডস্য মাহাত্ম্যং মূলচণ্ডীশবর্ণনং। চতুর্ব্বক্ত্রগণাধ্যক্ষকলম্বেশ্বরয়োঃ কথা ॥ গোপালস্বামিবকুলস্বামিনোর্ম্মরুতীকথা। ক্ষেমার্কোন্নতবিঘ্নেশজলস্বামিকথা ততঃ ॥ কালমেঘস্য রুক্মিণ্যা উর্ব্বশীশ্বরভদ্রয়োঃ। শঙ্খাবর্ত্তমোক্ষতীর্থগোষ্পদাচ্যুতসদ্মনাং॥ জালেশ্বরস্য হুঁকারকূপচণ্ডীশয়োঃ কথা। আশাপুরস্থবিঘ্নেশকলাকুণ্ডকথাদ্ভুতা ॥ কপিলেশস্য চ কথা জরদ্গবশিবস্য চ। নলকর্কোটেশ্বরয়োর্হাটকেশ্বরজা কথা ॥ নারদেশমন্ত্রভূষা দুর্গকূটগণেশজা। সুপর্ণেলাখ্যভৈরব্যোর্ভল্লতীর্থভবা কথা ॥ কীর্ত্তনং কর্দ্দমালস্য গুপ্তসোমেশ্বরস্য চ। বহুস্বর্ণেশশৃঙ্গেশকোটীশ্বরকথা ততঃ ॥ মার্কণ্ডেশ্বরকোটীশদামোদরগৃহোৎকথা। স্বর্ণরেখা ব্রহ্মকুণ্ডং কুন্তীভীমেশ্বরৌ তথা ॥ মৃগীকুণ্ডঞ্চ সর্ব্বস্বং ক্ষেত্রে বস্ত্রাপথে স্মৃতং। দুর্গাবিল্বেশগঙ্গেশরৈবতানাং কথাদ্ভুতা॥ ততোঽর্ব্বুদেশ্বভ্রকথা অচলেশ্বরকীর্ত্তনং। নাগতীর্থস্য চ কথা বশিষ্ঠাশ্রমবর্ণনং ॥ ভদ্রংকর্ণস্য মাহাত্ম্যং ত্রিনেত্রস্য ততঃ পরং। কেদারস্য চ মাহাত্ম্যং তীর্থাগমনকীর্ত্তনং ॥ কোটীশ্বররূপতীর্থহৃষীকেশকথাস্ততঃ। সিদ্ধেশশুক্রেশ্বরয়োর্ম্মণিকর্ণীশকীর্ত্তনং ॥ পঙ্গুতীর্থযমতীর্থবারাহতীর্থবর্ণনং। চন্দ্রপ্রভাসপিণ্ডোদশ্রীমাতাশুক্লতীর্থজং ॥ কাত্যায়ন্যাশ্চ মাহাত্ম্যং ততঃ পিণ্ডারকস্য চ। ততঃ কনখলস্যাথ চক্রমানুষতীর্থয়োঃ ॥ কপিলাগ্নিতীর্থকথা তথা রক্তানুবন্ধজা। গণেশপার্থেশ্বরয়োর্যাত্রায়ামুদ্গলস্য চ ॥ চণ্ডীস্থানং নাগভবশিরঃকুণ্ডমহেশজা। কামেশ্বরস্য মার্কণ্ডেয়োৎপত্তেশ্চ কথা ততঃ ॥ উদ্দালকেশসিদ্ধেশগততীর্থকথাঃ পৃথক্। শ্রীদেবমাতোৎপত্তিশ্চ ব্যাসগৌতমতীর্থয়োঃ ॥ কুলসন্তারমাহাত্ম্যং রামকোট্যাহ্বতীর্থয়োঃ। চন্দ্রোদ্ভেদেশানশৃঙ্গব্রহ্মস্থানোদ্ভবোহনং ॥ ত্রিপুষ্করুদ্রহ্রদগুহেশ্বরকথা শুভা। অবিমুক্তস্য মাহাত্ম্যমুমামাহেশ্বরস্য চ ॥ মহৌজসঃ প্রভাবশ্চ জম্বুতীর্থস্য বর্ণনং। গঙ্গাধরমিশ্রকয়োঃ কথাশ্চাথ ফলস্তুতিঃ ॥ দ্বারকায়াশ্চ মাহাত্ম্যে চন্দ্রশর্ম্মকথানকং। জাগরাদ্যাখ্যব্রতঞ্চ ব্রতমেকাদশীভবং ॥

মহাদ্বাদশিকাখ্যানং প্রহ্লাদর্ষিসমাগমঃ। দুর্ব্বাসস উপাখ্যানং যাত্রোপক্রমকীর্ত্তনং॥ গোমত্যুৎপত্তিকথনং তস্যাং স্নানাদিজং ফলং। চক্রতীর্থস্য মাহাত্ম্যং গোমত্যুদধিসঙ্গমঃ॥ সনকাদিহ্রদাখ্যানং নৃগতীর্থকথা ততঃ। গোপ্রচারকথা পুণ্যা গোপীনাং দ্বারকাগমঃ॥ গোপীসরঃসমাখ্যানং ব্রহ্মতীর্থাদিকীর্ত্তনং। পঞ্চনদ্যাগমাখ্যানং নানাখ্যানসমাচিতং॥ শিবলিঙ্গমহাতীর্থকৃষ্ণপূজাদিকীর্ত্তনং। ত্রিবিক্রমস্য মূর্ত্ত্যাখ্যা দুর্ব্বাসঃকৃষ্ণসংকথা॥ কুশদৈত্যবধোঽর্চ্চাখ্যা বিশেষার্চ্চনজং ফলং। গোমত্যাং দ্বারকায়াঞ্চ তীর্থাগমনকীর্ত্তনং॥ কৃষ্ণমন্দিরসংপ্রেক্ষা দ্বারবত্যভিষেচনং। তত্র তীর্থাবাসকথা দ্বারকাপুণ্যকীর্ত্তনং॥ ইত্যেষ সপ্তমঃ প্রোক্তঃ খণ্ডঃ প্রাভাসিকো দ্বিজ। স্কান্দে সর্ব্বোত্তরকথা শিবমাহাত্ম্যবর্ণনে॥ *॥ তৎফলশ্রুতিঃ। লিখিত্বৈতত্তু যো দদ্যাদ্ধেমশূলসমাচিতং। মাঘ্যাং সৎকৃত্য বিপ্রায় স শৈবে মোদতে পদে॥ *॥ ইতি শ্রীনারদীয়পুরাণে পূর্ব্বভাগে বৃহদুপাখ্যানে চতুর্থপাদে ১০৪ অধ্যায়ঃ॥ ১৩॥

চতুর্দ্দশং বামনপুরাণং। শ্রীব্রহ্মোবাচ। শৃণু বৎস প্রবক্ষ্যামি পুরাণং বামনাভিধং। ত্রিবিক্রমচরিত্রাঢ্যং দশসাহস্রসঙ্খ্যকং॥ কূর্ম্মকল্পসমাখ্যানং বর্গত্রয়কথানকং। ভাগদ্বয়সমাযুক্তং বক্তৃশ্রোতৃশুভাবহং॥ *॥ তত্র পূর্ব্বভাগে। পুরাণপ্রশ্নঃ প্রথমং ব্রহ্মচ্ছিদা ততঃ। কপালমোচনাখ্যানং দক্ষযজ্ঞবিহিংসনং॥ হরস্য কালরূপাখ্যা কামস্য দহনং ততঃ। প্রহ্লাদনারায়ণয়োর্যুদ্ধং দেবাসুরাহ্বয়ঃ॥ সুকেশ্যর্কসমাখ্যানং ততো ভুবনকোষকং। ততঃ কাম্যব্রতাখ্যানং শ্রীদুর্গাচরিতং ততঃ॥ তপতীচরিতং পশ্চাৎ কুরুক্ষেত্রস্য বর্ণনং। সরোমাহাত্ম্যমতুলং পার্ব্বতীজন্মকীর্ত্তনং॥ তপস্তস্যা বিবাহশ্চ গৌর্য্যুপাখ্যানকং ততঃ। ততঃ কৌশিক্যুপাখ্যানং কুমারচরিতং ততঃ॥ ততোঽন্ধকবধাখ্যানং সাধ্যোপাখ্যানকং ততঃ। জাবালিচরিতং পশ্চাদরজায়াঃ কথাদ্ভুতা॥ অন্ধকেশ্বরয়োর্যুদ্ধং গণত্বং চান্ধকস্য চ। মরুতাং জন্মকথনং বলেশ্চ চরিতং ততঃ॥ ততস্তু লক্ষ্ম্যাশ্চরিতং ত্রৈবিক্রমমতঃ পরং। প্রহ্লাদতীর্থযাত্রায়াং প্রোচ্যন্তে তৎকথাঃ শুভাঃ॥ ততশ্চ ধুন্ধুচরিতং প্রেতোপাখ্যানকং ততঃ। নক্ষত্রপুরুষাখ্যানং শ্রীদামচরিতং ততঃ॥ ত্রিবিক্রমচরিত্রান্তে ব্রহ্মপ্রোক্তঃ স্তবোত্তমঃ। প্রহ্লাদবলিসংবাদে সুতলে হরিশংসনং॥ ইত্যেষ পূর্ব্বভাগোঽস্য পুরাণস্য তবোদিতঃ। *। তদুত্তরে ভাগে বৃহদ্বামনাখ্যে। শৃণু তস্যোত্তরং ভাগং বৃহদ্বামনসংজ্ঞকং॥ মাহেশ্বরী ভাগবতী সৌরী গাণেশ্বরী তথা। চতস্রঃ সংহিতাশ্চাত্র পৃথক্ সাহস্রসঙ্খ্যয়া॥ মাহেশ্বর্য্যাস্তু কৃষ্ণস্য তদ্ভক্তানাঞ্চ কীর্ত্তনং। ভাগবত্যাং জগন্মাতুরবতারকথাদ্ভুতা॥ সৌর্য্যাং সূর্য্যস্য মহিমা গদিতঃ পাপনাশনঃ। গাণেশ্বর্য্যাং গণেশস্য

চরিতঞ্চ মহেশিতুঃ ॥ ইত্যেতদ্বামনং নাম পুরাণং সুবিচিত্রকং। পুলস্ত্যেন সমাখ্যাতং নারদায় মহাত্মনে॥ ততো নারদতঃ প্রাপ্তং ব্যাসেন সুমহাত্মনা। ব্যাসাত্তু লব্ধবান্ বৎস তচ্ছিষ্যো রোমহর্ষণঃ ॥ স চাখ্যাস্যতি বিপ্রেভ্যো নৈমিষীয়েভ্য এব চ। এবং পরম্পরাপ্রাপ্তং পুরাণং বামনং শুভং ॥ *॥ তৎফলশ্রুতিঃ। যে পঠন্তি চ শৃণ্বন্তি তেঽপি যান্তি পরাং গতিং। লিখিত্বৈতৎ পুরাণন্তু যঃ শরদ্বিষুবেঽর্পয়েৎ ॥ বিপ্রায় বেদবিদুষে ঘৃতধেনুসমাচিতং। স সমুদ্ধৃত্য নরকান্নয়েৎ স্বর্গং পিতৄন্ স্বকান্। দেহান্তে ভুক্তভোগোঽসৌ যাতি বিষ্ণোঃ পরং পদং ॥ *॥ ইতি শ্রীনারদীয়পুরাণে পূর্ব্বভাগে বৃহদুপাখ্যানে চতুর্থপাদে ১০৫ অধ্যায়ঃ ॥ ১৪ ॥

পঞ্চদশং কূর্ম্মপুরাণং। শ্রীব্রহ্মোবাচ। শৃণু বৎস মরীচেঽদ্য পুরাণং কূর্ম্মসংজ্ঞিতং। লক্ষ্মীকল্পানুচরিতং যত্র কূর্ম্মবপুর্হরিঃ ॥ ধর্ম্মার্থকামমোক্ষাণাং মাহাত্ম্যঞ্চ পৃথক্ পৃথক্। ইন্দ্রদ্যুম্নপ্রসঙ্গেন প্রাহর্ষিভ্যো দয়ান্তিকং ॥ তৎসপ্তদশসাহস্রং সুচতুঃসংহিতং শুভং। যত্র ব্রাহ্ম্যাং পুরা প্রোক্তা ধর্ম্মা নানাবিধা মুনে॥ নানাকথাপ্রসঙ্গেন নৃণাং সদ্গতিদায়কাঃ। *। তৎপূর্ব্বভাগে। তত্র বিভাগে তু পুরাণোপক্রমঃ পুরা ॥ লক্ষ্মীপ্রদ্যুম্নসংবাদঃ কূর্ম্মর্ষিগণসঙ্কথা। বর্ণাশ্রমাচারকথা জগদুৎপত্তিকীর্ত্তনং ॥ কালসংখ্যা সমাসেন লয়ান্তে স্তবনং বিভোঃ। ততঃ সঙ্ক্ষেপতঃ সর্গঃ শাঙ্করং চরিতং তথা ॥ সহস্রনাম পার্ব্বত্যা যোগস্য চ নিরূপণং। ভৃগুবংশসমাখ্যানং ততঃ স্বায়ম্ভুবস্য চ ॥ দেবাদীনাং সমুৎপত্তির্দক্ষযজ্ঞাহতিস্ততঃ। দক্ষসৃষ্টিকথা পশ্চাৎ কশ্যপান্বয়কীর্ত্তনং ॥ আত্রেয়বংশকথনং কৃষ্ণস্য চরিতং শুভং। মার্কণ্ডকৃষ্ণসংবাদো ব্যাসপাণ্ডবসংকথা ॥ যুগধর্ম্মানুকথনং ব্যাসজৈমিনিকী কথা। বারাণস্যাশ্চ মাহাত্ম্যং প্রয়াগস্য ততঃ পরং ॥ ত্রৈলোক্যবর্ণনঞ্চৈব বেদশাখানিরূপণং। *। তদুত্তরভাগে। উত্তরেঽস্য বিভাগে তু পুরা গীতৈশ্বরী ততঃ ॥ ব্যাসগীতা ততঃ প্রোক্তা নানাধর্ম্মপ্রবোধনী। নানাবিধানাং তীর্থানাং মাহাত্ম্যঞ্চ পৃথক্ ততঃ ॥ নানাধর্ম্মপ্রকথনং ব্রাহ্মীয়ং সংহিতা স্মৃতা। অতঃ পরং ভগবতী সংহিতার্থনিরূপণে ॥ কথিতা যত্র বর্ণানাং পৃথগ্বৃত্তিরুদাহৃতা। *। তদুত্তরভাগীয়ভগবত্যাখ্যদ্বিতীয়সংহিতায়াঃ পঞ্চপাদেষু। পাদেঽস্যাঃ প্রথমে প্রোক্তা ব্রাহ্মণানাং ব্যবস্থিতিঃ ॥ সদাচারাত্মিকা বৎস ভোগসৌখ্যবিবর্দ্ধনী। *। দ্বিতীয়ে ক্ষত্রিয়াণাস্তু বৃত্তিঃ সম্যক্ প্রকীর্ত্তিতা ॥ যয়া ত্বাশ্রিতয়া পাপং বিধূয়েহ ব্রজেদ্দিবং। *। তৃতীয়ে বৈশ্যজাতীনাং বৃত্তিরুক্তা চতুর্ব্বিধা॥ যয়া চরিতয়া সম্যক্ লভতে গতিমুত্তমাং। *। চতুর্থেঽস্যাস্তথা পাদে শূদ্রবৃত্তিরুদাহৃতা ॥ যয়া সন্তুষ্যতি শ্রীশো নৃণাং শ্রেয়োবিবর্দ্ধনঃ। *। পঞ্চমেঽস্যাস্ততঃ পাদে বৃত্তিঃ সঙ্করজোদিতা ॥ যয়া চরিতয়াপ্নোতি

ভাবিনীমুত্তমাং জনিং । ইত্যেষা পঞ্চপদ্যুক্তা দ্বিতীয়া সংহিতা মুনে ॥ তৃতীয়াত্রোদিতা সৌরী নৃণাং কামবিধায়িনী । যোঢ়া ষট্কর্ম্মসিদ্ধিং সা বোধয়ন্তী চ কামিনাং ॥ চতুর্থী বৈষ্ণবী নাম মোক্ষদা পরিকীর্ত্তিতা । চতুষ্পদী দ্বিজাদীনাং সাক্ষাৎ ব্রহ্মস্বরূপিণী ॥ তাঃ ক্রমাৎ ষট্চতুর্দ্দ্বীষু সাহস্রাঃ পরিকীর্ত্তিতাঃ ।*। তৎফলশ্রুতিঃ। এতৎকূর্ম্মপুরাণন্তু চতুর্ব্বর্গফলপ্রদং ॥ পঠতাং শৃণ্বতাং নৃণাং সর্ব্বোৎকৃষ্টগতিপ্রদং। লিখিত্বৈতত্তু যো ভক্ত্যা হেমকূর্ম্মসমন্বিতং। ব্রাহ্মণায়ায়নে দদ্যাৎ স যাতি পরমাং গতিং ॥ * ॥ ইতি শ্রীনারদীয়পুরাণে পূর্ব্বভাগে বৃহদুপাখ্যানে চতুর্থপাদে ১০৬ অধ্যায়ঃ ॥ ১৫ ॥

ষোড়শং মৎস্যপুরাণং। শ্রীব্রহ্মোবাচ। অথ মাৎস্যং পুরাণং তে প্রবক্ষ্যে দ্বিজসত্তম। যত্রোক্তং সত্যকল্পানাং বৃত্তং সঙ্ক্ষিপ্য ভূতলে ॥ ব্যাসেন বেদবিদুষা নরসিংহোপবর্ণনং। উপক্রম্য তদুদ্দিষ্টং চতুর্দ্দশসহস্রকং ॥ মনুমৎস্যসুসংবাদো ব্রহ্মাণ্ডবর্ণনন্ততঃ। ব্রহ্মদেবাসুরোৎপত্তির্ম্মারুতোৎপত্তিরেব চ ॥ মদনদ্বাদশী তদ্বৎ লোকপালাভিপূজনং। মন্বন্তরসমুদ্দেশো বৈশ্যারাজ্যাভিবর্ণনং ॥ সূর্য্যবৈবস্বতোৎপত্তির্ব্বধসঙ্গমনং তথা। পিতৃবংশানুকথনং শ্রাদ্ধকালস্তথৈব চ ॥ পিতৃতীর্থপ্রচারশ্চ সোমোৎপত্তিস্তথৈব চ। কীর্ত্তনং সোমবংশস্য যযাতিচরিতং তথা॥ কার্ত্তবীর্য্যস্য চরিতং সৃষ্টং বংশানুকীর্ত্তনং। ভৃগুশাপস্তথা বিষ্ণোর্দশধা জন্ম চ ক্ষিতৌ ॥ কীর্ত্তনং পুরুবংশস্য বংশো হৌতাশনঃ পরঃ। ক্রিয়াযোগস্ততঃ পশ্চাৎ পুরাণং পরিকীর্ত্তিতং ॥ ব্রতং নক্ষত্রপুরুষং মার্ত্তণ্ডশয়নং তথা। কৃষ্ণাষ্টমীব্রতং তদ্বদ্রোহিণীচন্দ্রসংজ্ঞিতং ॥ তড়াগবিধিমাহাত্ম্যং পাদপোৎসর্গ এব চ। সৌভাগ্যশয়নং তদ্বদগস্ত্যব্রতমেব চ ॥ তথানন্ততৃতীয়ায়া রসকল্যাণিনীব্রতং। তথৈবানন্দকর্য্যাশ্চ ব্রতং সারস্বতং পুনঃ ॥ উপরাগাভিষেকশ্চ সপ্তমীশয়নং তথা। ভীমাখ্যা দ্বাদশী তদ্বদনঙ্গশয়নং তথা ॥ অশূন্যশয়নং তদ্বৎ তথৈবাঙ্গারকব্রতং। সপ্তমীসপ্তকং তদ্বদ্বিশোকদ্বাদশীব্রতং ॥ মেরুপ্রদানং দশধা গ্রহশান্তিস্তথৈব চ। গ্রহস্বরূপকথনং তথা শিবচতুর্দ্দশী ॥ তথা সর্ব্বফলত্যাগঃ সূর্য্যবারব্রতং তথা। সংক্রান্তিস্নপনং তদ্বদ্বিভূতিদ্বাদশীব্রতং ॥ ষষ্টিব্রতানাং মাহাত্ম্যং তথা স্নানবিধিক্রমঃ। প্রয়াগস্য তু মাহাত্ম্যং দ্বীপলোকানুবর্ণনং ॥ তথান্তরীক্ষচারশ্চ ধ্রুবমাহাত্ম্যমেব চ। ভবনানি সুরেন্দ্রাণাং ত্রিপুরোদ্যোতনং তথা ॥ পিতৃপ্রবরমাহাত্ম্যং মন্বন্তরবিনির্ণয়ঃ। চতুর্যুগস্য সম্ভূতির্যুগধর্ম্মনিরূপণং ॥ বজ্রাঙ্গস্য তু সম্ভূতিস্তারকোৎপত্তিরেব চ। তারকাসুরমাহাত্ম্যং ব্রহ্মদেবানুকীর্ত্তনং ॥ পার্ব্বতীসম্ভবস্তদ্বত্তথা শিবতপোবনং। অনঙ্গদেহদাহশ্চ রতিশোকস্তথৈব চ ॥ গৌরীতপোবনং তদ্বচ্ছিবেনাথ প্রসাদনং। পার্ব্বতী-

ঋষিসংবাদস্তথৈবোদ্বাহমঙ্গলং ॥ কুমার-সম্ভবস্তদ্বৎ কুমারবিজয়স্তথা। তারকস্য বধো ঘোরো নরসিংহোপবর্ণনং ॥ পদ্মোদ্ভবিসর্গস্তু তথৈবান্ধকঘাতনং। বারাণস্যাস্তু মাহাত্ম্যং নর্ম্মদায়াস্তথৈব চ ॥ প্রবরানুক্রমস্তদ্বৎ পিতৃগাথানুকীর্ত্তনং। তথোভয়মুখীদানং দানং কৃষ্ণাজিনস্য চ ॥ ততঃ সাবিত্র্যুপাখ্যানং রাজধর্ম্মাস্তথৈব চ। বিবিধোৎপাতকথনং গ্রহশান্তিস্তথৈব চ ॥ যাত্রানিমিত্তকথনং স্বপ্নমঙ্গলকীর্ত্তনং। বামনস্য তু মাহাত্ম্যং বারাহস্য ততঃ পরং ॥ সমুদ্রমথনং তদ্বৎ কালকূটাভিশান্তনং। দেবাসুরবিমর্দশ্চ বাস্তুবিদ্যা তথৈব চ ॥ প্রতিমালক্ষণং তদ্বদ্দেবতাস্থাপনং তথা। প্রাসাদলক্ষণং তদ্বন্মণ্ডপানাঞ্চ লক্ষণং ॥ ভবিষ্যরাজ্ঞামুদ্দেশো মহাদানানুকীর্ত্তনং। কল্পানুকীর্ত্তনং তদ্বৎ পুরাণেঽস্মিন্ প্রকীর্ত্তিতং ॥ * ॥ তৎফলশ্রুতিঃ। পবিত্রমেতৎ কল্যাণমায়ুঃকীর্ত্তিবিবর্দ্ধনং। যঃ পঠেচ্ছৃণুয়াদ্বাপি স যাতি ভবনং হরেঃ ॥ লিখিত্বৈতত্তু যো দদ্যাদ্ধেমমৎস্যগবাচিতং। বিপ্রায়াভ্যর্চ্চ্য বিষুবে স যাতি পরমং পদং ॥ * ॥ ইতি শ্রীনারদীয়পুরাণে পূর্ব্বভাগে বৃহদুপাখ্যানে চতুর্থপাদে ১০৭ অধ্যায়ঃ ॥ ১৬ ॥

সপ্তদশং গরুড়পুরাণং। শ্রীব্রহ্মোবাচ। মরীচে শৃণু বচ্ম্যদ্য পুরাণং গারুড়ং শুভং। গরুড়ায়াব্রবীৎ পৃষ্টো ভগবান্ গরুড়াসনঃ ॥ একোনবিংশসাহস্রং তার্ক্ষ্যকল্পকথাচিতং। * । তত্র পূর্ব্বখণ্ডে। পুরাণোপক্রমো যত্র সর্গসঙ্ক্ষেপতস্ততঃ ॥ সূর্য্যাদিপূজনবিধির্দীক্ষাবিধিরতঃ পরং। শ্রাদ্ধাদিপূজা ততঃ পশ্চান্নবব্যূহার্চ্চনং দ্বিজ ॥ পূজাবিধানঞ্চ তথা বৈষ্ণবং পঞ্জরং ততঃ। যোগাধ্যায়স্ততো বিষ্ণোর্নামসাহস্রকীর্ত্তনং ॥ ধ্যানং বিষ্ণোস্ততঃ সূর্য্যপূজা মৃত্যুঞ্জয়ার্চ্চনং। মালামন্ত্রাঃ শিবার্চ্চাথ গণপূজা ততঃ পরং ॥ গোপালপূজা ত্রৈলোক্যমোহনশ্রীধরার্চ্চনং। বিষ্ণ্বর্চ্চা পঞ্চতত্ত্বার্চ্চা চক্রার্চ্চা দেবপূজনং ॥ ন্যাসাদিসন্ধ্যোপাস্তিশ্চ দুর্গার্চ্চাথ সুরার্চ্চনং। পূজা মাহেশ্বরী চাতঃ পবিত্রারোহণার্চ্চনং ॥ মূর্ত্তিধ্যানং বাস্তুমানং প্রাসাদানাঞ্চ লক্ষণং। প্রতিষ্ঠা সর্ব্বদেবানাং পৃথক্‌পূজাবিধানতঃ ॥ যোগোঽষ্টাঙ্গো দানধর্ম্মঃ প্রায়শ্চিত্তং নিধিক্রিয়া। দ্বীপেশনরকাখ্যানং সূর্য্যব্যূহশ্চ জ্যোতিষং ॥ সামুদ্রিকং স্বরজ্ঞানং নবরত্নপরীক্ষণং। মাহাত্ম্যমথ তীর্থানাং গয়ামাহাত্ম্যমুত্তমং ॥ ততো মন্বন্তরাখ্যানং পৃথক্ পৃথক্ বিভাগশঃ। পিত্রাখ্যানং বর্ণধর্ম্মা দ্রব্যশুদ্ধিঃ সমর্পণং ॥ শ্রাদ্ধং বিনায়কস্যার্চ্চা গ্রহযজ্ঞস্তথাশ্রমাঃ। মলহাখ্যা প্রেতাশৌচং নীতিসারো ব্রতোক্তয়ঃ ॥ সূর্য্যবংশঃ সোমবংশোঽবতারকথনং হরেঃ। রামায়ণং হরিবংশো ভারতাখ্যানকস্ততঃ ॥ আয়ুর্ব্বেদে নিদানং প্রাক্ চিকিৎসা-দ্রব্যজা গুণাঃ। রোগঘ্নং কবচং বিষ্ণোর্গারুড়ং ত্রৈপুরো মনুঃ ॥ প্রশ্নচূড়ামণিশ্চান্তে হয়ায়ুর্ব্বেদকীর্ত্তনং। ঔষধীনামকথনং ততো ব্যাকরণোহনং ॥ ছন্দঃশাস্ত্রং

সদাচারস্ততঃ স্নানবিধিঃ স্মৃতঃ। তর্পণং বৈশ্বদেবঞ্চ সন্ধ্যা পার্ব্বণকর্ম্ম চ ॥ নিত্য-শ্রাদ্ধং সপিণ্ডাখ্যং ধর্ম্মসারোঽঘনিষ্কৃতিঃ। প্রতিসংক্রম উক্তোঽস্মাদ্‌যুগধর্ম্মাঃ কৃতেঃ ফলম্‌ ॥ যোগশাস্ত্রং বিষ্ণুভক্তির্নমস্কৃতি-ফলং হরেঃ। মাহাত্ম্যং বৈষ্ণবঞ্চাথ নার-সিংহস্তবোত্তমং ॥ জ্ঞানামৃতং গুহ্যাষ্টকং স্তোত্রং বিষ্ণুর্চ্চমাহ্বয়ং। বেদান্তসাখ্য-সিদ্ধান্তং ব্রহ্মজ্ঞানং তথাত্মকং ॥ গীতা-সারফলোৎকীর্ত্তিঃ পূর্ব্বখণ্ডোঽয়মীরিতঃ।*। উত্তরখণ্ডে প্রেতকল্পে। অথাস্যৈবোত্তরে খণ্ডে প্রেতকল্পঃ পুরোদিতঃ ॥ যত্র তার্ক্ষেণ সংপৃষ্টো ভগবানাহ বাড়ব। ধর্ম্মপ্রকটনং পূর্ব্বযোনীনাং গতিকারণং ॥ দানাধিকং ফলঞ্চাপি প্রোক্তমত্রৌর্দ্ধদেহিকং। যম-লোকস্য মার্গস্য বর্ণনঞ্চ ততঃ পরং ॥ ষোড়শশ্রাদ্ধফলকং বৃত্তানাঞ্চাত্র বর্ণিতং। নিষ্কৃতির্যমমার্গস্য ধর্ম্মরাজস্য বৈভবং ॥ প্রেতপীড়াবিনির্দ্দেশঃ প্রেতচিহ্ননিরূপণং। প্রেতানাং চরিতাখ্যানং কারণং প্রেততাং প্রতি ॥ প্রেতকৃত্যবিচারশ্চ সপিণ্ডীকরণো-ক্তয়ঃ। প্রেতত্বমোক্ষণাখ্যানং দানানি চ বিমুক্তয়ে ॥ আবশ্যকোত্তমং দানং প্রেতসৌখ্যকরং হিতং। শারীরকবিনি-র্দ্দেশো যমলোকস্য বর্ণনং ॥ প্রেতত্বোদ্ধার-কথনং কর্ম্মকর্ত্তৃবিনির্ণয়ঃ। মৃত্যোঃ পূর্ব্ব-ক্রিয়াখ্যানং পশ্চাৎ কর্ম্মনিরূপণং ॥ মধ্যং ষোড়শকং শ্রাদ্ধং স্বর্গপ্রাপ্তিক্রিয়োহনং। সূতকস্যাথ সঙ্খ্যানং নারায়ণবলিক্রিয়া ॥ বৃষোৎসর্গস্য মাহাত্ম্যং নিষিদ্ধপরিবর্জ্জনং। অপমৃত্যুক্রিয়োক্তিশ্চ বিপাকঃ কর্ম্মণাং নৃণাং ॥ কৃত্যাকৃত্যবিচারশ্চ বিষ্ণুধ্যানং বিমুক্তয়ে। স্বর্গতৌ বিহিতাখ্যানং স্বর্গ-সৌখ্যনিরূপণং ॥ ভূর্লোকবর্ণনঞ্চৈব সপ্তধা লোকবর্ণনং। পঞ্চোর্দ্ধলোককথনং ব্রহ্মাণ্ড-স্থিতিকীর্ত্তনং ॥ ব্রহ্মাণ্ডানেকচরিত্রং ব্রহ্ম-জীবনিরূপণং। আত্যন্তিকলয়াখ্যানং ফল-স্তুতিনিরূপণং ॥ ইত্যেতদ্গারুড়ং নাম পুরাণং ভুক্তিমুক্তিদং।*। তৎফলশ্রুতিঃ। কীর্ত্তিতং পাপশমনং পঠতাং শৃণ্বতাং নৃণাং ॥ লিখিত্বৈতৎ পুরাণন্তু বিষুবে যঃ প্রযচ্ছতি। সৌবর্ণং হংসযুগ্মাঢ্যং বিপ্রায় স দিবং ব্রজেৎ ॥ * ॥ ইতি শ্রীনারদীয়-পুরাণে পূর্ব্বভাগে বৃহদুপাখ্যানে চতুর্থ-পাদে ১০৮ অধ্যায়ঃ ॥ ১৭ ॥

অষ্টাদশং ব্রহ্মাণ্ডপুরাণং। শ্রীব্রহ্মোবাচ। শৃণু বৎস প্রবক্ষ্যামি ব্রহ্মাণ্ডাখ্যং পুরাতনং। যচ্চ দ্বাদশসাহস্রং ভাবিকল্পকথাযুতং ॥ প্রক্রিয়াখ্যোঽনুষঙ্গাখ্য উপোদ্ঘাতস্তৃতী-য়কঃ। চতুর্থ উপসংহারঃ পাদাশ্চত্বার এব হি ॥ পূর্ব্বপাদদ্বয়ং পূর্ব্বো ভাগোঽত্র সমুদাহৃতঃ। তৃতীয়ো মধ্যমো ভাগ-শ্চতুর্থস্তূত্তরো মতঃ ॥ * ॥ তত্র পূর্ব্বভাগে প্রক্রিয়াপাদে। আদৌ কৃত্যসমুদ্দেশো নৈমিষাখ্যানকং ততঃ। হিরণ্যগর্ব্ভোৎ-পত্তিশ্চ লোককল্পনমেব চ ॥ এষ বৈ প্রথমঃ পাদো দ্বিতীয়ং শৃণু মানদ। *। পূর্ব্বভাগে অনুষঙ্গপাদে। কল্পমন্বন্তরা-খ্যানং লোকজ্ঞানং ততঃ পরং ॥ মানসী-সৃষ্টিকথনং রুদ্রপ্রসববর্ণনং। মহাদেব-

বিভূতিশ্চ ঋষিসর্গস্ততঃ পরং ॥ অগ্নীনাং বিচয়শ্চাথ কালসম্ভাববর্ণনং। প্রিয়ব্রতাচয়োদ্দেশঃ পৃথিব্যায়ামবিস্তরঃ ॥ বর্ণনং ভারতস্যাস্য ততোঽন্যেষাং নিরূপণং। জম্ব্বাদিসপ্তদ্বীপাখ্যা ততোঽধোলোকবর্ণনং ॥ ঊর্দ্ধলোকানুকথনং গ্রহচারস্ততঃ পরং। আদিত্যব্যূহকথনং দেবগ্রহানুকীর্ত্তনং ॥ নীলকণ্ঠাহ্বয়াখ্যানং মহাদেবস্য বৈভবং। অমাবাস্যানুকথনং যুগতত্ত্বনিরূপণং ॥ যজ্ঞপ্রবর্ত্তনং চাথ যুগয়োরন্ত্যয়োঃ কৃতিঃ। যুগপ্রজালক্ষণঞ্চ ঋষিপ্রবরবর্ণনং ॥ বেদানাং ব্যসনাখ্যানং স্বায়ম্ভুবনিরূপণং। শেষমন্বন্তরাখ্যানং পৃথিবীদোহনন্ততঃ ॥ চাক্ষুষেঽদ্যতনে সর্গৌ দ্বিতীয়োঽঙ্ঘ্রিঃ পুরোদলে। *। মধ্যমভাগে উপোদ্ঘাতপাদে। অথোপোদ্ঘাতপাদে তু সপ্তর্ষিপরিকীর্ত্তনং ॥ প্রাজাপত্যচয়স্তস্মাদ্দেবাদীনাং সমুদ্ভবঃ। ততো জয়াভিব্যাহারৌ মরুদুৎপত্তিকীর্ত্তনং ॥ কাশ্যপেয়ানুকথনং ঋষিবংশনিরূপণং। পিতৃকল্পানুকথনং শ্রাদ্ধকল্পস্ততঃ পরং ॥ বৈবস্বতসমুৎপত্তিঃ সৃষ্টিস্তস্য ততঃ পরং। মনুপুত্ত্রাচয়শ্চাতো গান্ধর্ব্বস্য নিরূপণং ॥ ইক্ষ্বাকুবংশকথনং বংশোঽত্রেঃ সুমহাত্মনঃ। অমাবসোরাচয়শ্চ রজেশ্চরিতমদ্ভুতং ॥ যযাতিচরিতঞ্চাথ যদুবংশনিরূপণং। কার্ত্তবীর্য্যস্য চরিতং জামদগ্ন্যং ততঃ পরং ॥ বৃষ্ণিবংশানুকথনং সগরস্যাথ সম্ভবঃ। ভার্গবস্যানুচরিতং তথা কার্য্যবধাশ্রয়ং ॥ সমরস্যাথ চরিতং ভার্গবস্য কথা পুনঃ। দেবাসুরাহবকথা কৃষ্ণাবির্ভাববর্ণনে ॥ ইনস্য চ স্তবঃ পুণ্যঃ শুক্রেণ পরিকীর্ত্তিতঃ। বিষ্ণুমাহাত্ম্যকথনং বলিবংশনিরূপণং ॥ ভবিষ্যরাজচরিতং সংপ্রাপ্তেঽথ কলৌ যুগে। এবমুদ্ঘাতপাদোঽয়ং তৃতীয়ো মধ্যমে দলে ॥ * ॥ উত্তরভাগে উপসংহারপাদে। চতুর্থমুপসংহারং বক্ষ্যে খণ্ডে তথোত্তরে। বৈবস্বতান্তরাখ্যানং বিস্তরেণ যথাতথং ॥ পূর্ব্বমেব সমুদ্দিষ্টং সঙ্ক্ষেপাদিহ কথ্যতে। ভবিষ্যাণাং মনূনাঞ্চ চরিতং হি ততঃ পরং ॥ কল্পপ্রলয়নির্দ্দেশঃ কালমানং ততঃ পরং। লোকাশ্চতুর্দ্দশ ততঃ কথিতা মানলক্ষণৈঃ ॥ বর্ণনং নরকাণাঞ্চ বিকর্ম্মাচরণৈস্ততঃ মনোময়পুরাখ্যানং লয়ঃ প্রাকৃতিকস্ততঃ ॥ শৈবস্যাথ পুরস্যাপি বর্ণনঞ্চ ততঃ পরং। ত্রিবিধাদ্‌গুণসম্বন্ধাজ্জন্তূনাং কীর্ত্তিতা গতিঃ ॥ অনির্দ্দেশ্যাপ্রতর্ক্যস্য ব্রহ্মণঃ পরমাত্মনঃ। অন্বয়ব্যতিরেকাভ্যাং বর্ণনং হি ততঃ পরং ॥ ইত্যেষ উপসংহারঃ পাদো বৃত্তঃ স চোত্তরঃ। চতুষ্পাদং পুরাণং তে ব্রহ্মাণ্ডং সমুদাহৃতং ॥ * ॥ অষ্টাদশমনৌপম্যং সারাৎসারতরং দ্বিজ। ব্রহ্মাণ্ডঞ্চ চতুর্লক্ষং পুরাণত্বেন পঠ্যতে ॥ তদেব ব্যস্য গদিতমত্রাষ্টাদশধা পৃথক্। পারাশর্য্যেণ মুনিনা সর্ব্বেষামপি মানদ ॥ বস্তুদ্রষ্ট্রাথ তেনৈব মুনীনাং ভাবিতাত্মনাং। মত্তঃ শ্রুত্বা পুরাণানি লোকেভ্যঃ প্রচকাশিরে ॥ মুনয়ো ধর্ম্মশীলাস্তে দীনানুগ্রহ-

কারিণঃ। ময়া চেদং পুরাণন্তু বশিষ্ঠায় পুরোদিতং ॥ তেন শক্তিসুতায়োক্তং জাতূকর্ণায় তেন চ। ব্যাসো লব্ধা ততশ্চৈতৎ প্রভঞ্জনমুখোদ্গতং। প্রমাণীকৃত্য লোকেঽস্মিন্ প্রাবর্ত্তয়দনুত্তমং ॥ * ॥ তৎফলশ্রুতিঃ। য ইদং কীর্ত্তয়েদ্বৎস শৃণোতি চ সমাহিতঃ। স বিধূয়েহ পাপানি যাতি লোকমনাময়ং ॥ লিখিত্বৈতৎ পুরাণন্তু স্বর্ণসিংহাসনস্থিতং। পত্রেণাচ্ছাদিতং যস্তু ব্রাহ্মণায় প্রযচ্ছতি। স যাতি ব্রহ্মণো লোকং নাত্র কার্য্যা বিচারণা ॥ * ॥ মরীচেঽষ্টাদশৈতানি ময়া প্রোক্তানি যানি তে। পুরাণানি তু সঙ্ক্ষেপাচ্ছ্রোতব্যানি চ বিস্তরাৎ ॥ অষ্টাদশপুরাণানি যঃ শৃণোতি নরোত্তমঃ। কথয়েদ্বা বিধানেন নেহ ভূয়ঃ স জায়তে ॥ সূত্রমেতৎ পুরাণানাং যন্ময়োক্তং তবাধুনা। তন্নিত্যং শীলনীয়ং হি পুরাণফলমিচ্ছতা ॥ ন দাম্ভিকায় পাপায় দেবগুর্ব্বনুসূয়বে। দেয়ং কদাপি সাধূনাং দ্বেষিণে ন শঠায় চ ॥ শান্তায় রামচিত্তায় শুশ্রূষাভিরতায় চ। নির্ম্মৎসরায় শুচয়ে দেয়ং সদ্বৈষ্ণবায় চ ॥ ইতি শ্রীনারদীয়পুরাণে পূর্ব্বভাগে বৃহদুপাখ্যানে চতুর্থপাদে ১০৯ অধ্যায়ঃ ॥ ১৮ ॥ * ॥ ইত্যষ্টাদশমহাপুরাণানুক্রমণিকা সমাপ্তা ॥

পুরাণঃ (পুং) পণঃ। পুরাতনে ত্রি। কার্ষাপণে পুং ক্লী। ইতি শব্দরত্নাবলী ॥

পুরাণগঃ (পুং) ব্রহ্মা। ইতি হেমচন্দ্রঃ ॥ পুরাণগায়কে ত্রি ॥

পুরাণপুরুষঃ (পুং) বিষ্ণুঃ। ইতি হেমচন্দ্রঃ ॥

পুরাতনঃ (পুং) পুরাণঃ। তদ্বৈদিকপর্য্যায়াঃ। প্রত্নং ১ প্রদিবঃ ২ প্রবয়াঃ ৩ সনেমি ৪ পূর্ব্বং ৫ অহ্নায় ৬। ইতি ষট্ পুরাণনামানি। ইতি বেদনিঘণ্টৌ ৩ অধ্যায়ঃ ॥

পুরাতনঃ (ত্রি) পূর্ব্বকালভবঃ। পুরাণ ইতি ভাষা। তৎপর্য্যায়ঃ। পুরাণঃ ২ প্রতনঃ ৩ প্রত্নঃ ৪ চিরন্তনঃ ৫। ইত্যমরঃ ॥ চিরত্নঃ ৬। ইতি জটাধরঃ ॥

পুরাধ্যক্ষঃ (ত্রি) নগরাধিকৃতঃ। অন্তঃপুরাধ্যক্ষলক্ষণং। যথা। বৃদ্ধঃ কুলোদ্ধতঃ শক্তঃ পিতৃপৈতামহঃ শুচিঃ। রাজ্ঞামন্তঃপুরাধ্যক্ষো বিনীতশ্চ তথেষ্যতে ॥ ইতি যুক্তিকল্পতরুঃ ॥

পুরারিঃ (পুং) শিবঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

পুরার্দ্ধবিস্তরঃ (পুং) খেটঃ। ইতি হেমচন্দ্রঃ ॥

পুরাবসুঃ (পুং) ভীষ্মঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

পুরাবৃত্তং (ক্লী) পূর্ব্ববৃত্তান্তনিবন্ধনং। তৎপর্য্যায়ঃ। ইতিহাসঃ ২। ইত্যমরঃ ॥ পূর্ব্বচরিতং ৩। ইতি স্বামী ॥

পুরাসিনী (স্ত্রী) সহদেবীলতা। ইতি রাজনির্ঘণ্টঃ ॥

পুরাসুহৃৎ [দ্] (পুং) শিবঃ। ইতি হেমচন্দ্রঃ ॥

পুরিঃ (স্ত্রী) পুরী। ইত্যমরটীকায়াং ভরতঃ ॥ নদী। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥

পুরিঃ (পুং) রাজা। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥

পুরী (স্ত্রী) নগরী। ইত্যমরঃ ॥ অস্যা লক্ষণাদি পুরশব্দে নগরশব্দে চ লিখিতং ॥

তদ্বর্ণনং যথা। পুরী সমস্তাদ্বিহিতা সপতাকা সতোরণা। সচক্রা সহুড়া চৈব সযন্ত্রখনকা তথা ॥ ৫ ॥ সোপশল্যপ্রতোলীকা সাট্টাট্টালকগোপুরা। সচক্রগ্রহণী চৈব সোল্কালাতাবপোথিকা ॥ ৬ ॥ সোষ্ট্রিকা ভরতশ্রেষ্ঠ সভেরীপণবানকা। সতোরণাঙ্কুশা রাজন্ সশতঘ্নীকলাঙ্গলা ॥ ৭ ॥ সভুশুণ্ড্যশ্মগুড়কা সায়ুধা সপরস্বধা। লোহচর্ম্মবতী চাপি সাগ্নিঃ সগুড়শৃঙ্গিকা ॥ ৮ ॥ ইতি মহাভারতে আরণ্যকে পর্ব্বণি সৌভবধে ১৫ অধ্যায়ঃ ॥ * ॥ পতাকা ধ্বজাঞ্চলঃ। তোরণানি বহির্দ্বারাণি। চক্রাণি যোধগণাঃ। হুড়াস্তদাশ্রয়স্থানানি ভাষায়াং বুরুজসংজ্ঞানি। অন্যে তু বিণ্মূত্রোৎসর্জ্জনশৃঙ্গাণি হুড়া ইত্যাহুঃ উদাহরন্তি চ। কল্পন্তে হুড়শৃঙ্গাণি রথস্যোপরি সূরিভিঃ। বিণ্মূত্রস্পর্শশুদ্ধ্যর্থং করাদিস্পর্শ উদ্যতঃ ॥ ইতি। যন্ত্রাণি আগ্নেয়ৌষধবলেন দৃষৎপিণ্ডোৎক্ষেপণানি মহান্তি কামানসংজ্ঞানি। ক্ষুদ্রাণি সীসগুলিকোৎক্ষেপণানি বন্দুকসংজ্ঞানি। খনকাঃ সুরঙ্গদ্বারা গুপ্তমার্গকর্ত্তারঃ ॥ ৫ ॥ উপশল্যাঃ লোহমুখাঃ কীলাঃ তদ্যুক্তাঃ প্রতোল্যো রথ্যা মার্গা যস্যাং সা। অট্টালকাঃ উপরিগৃহাঃ। গোপুরাণি পুরদ্বারাণি। সাট্টানি অট্টেন অন্নেন সহিতানি অট্টালকাদীনি যস্যাং সা। সাট্টেতি বিশেষণং উপশল্যস্য গ্রামান্তস্য রথ্যায়াশ্চাবৃত্ত্যা সম্বধ্যতে। চক্রগ্রহণী সৈন্যনিগ্রাহিকা মোর্চ্চা ইতি ম্লেচ্ছপ্রসিদ্ধা। সোল্কালাতাবপোথিকা জ্বালাসহিতমুল্মুকং রিপুপাতনায় যস্যামিতি প্রাঞ্চঃ। উল্কেবোল্কা প্রাণহরত্বাৎ যন্ত্রোৎক্ষিপ্তো গোলঃ। অলাতং সকাষ্ঠদণ্ডলোহময়মাগ্নেয়ং প্রহরণং বাণ ইতি ভাষায়াং প্রসিদ্ধং। তয়োরপ্রত্যাখ্যেয়গত্যোরপি পোথিকা পাতয়িত্র্যঃ মন্ত্রময্যঃ কর্ণায়েন্দ্রদত্তশক্তিসদৃশাঃ তদ্যুক্তা সোল্কাজ্বালাবপোথিকা ॥ ৬ ॥ উষ্ট্রিকা মৃচ্চর্ম্মময়ানি ভাণ্ডানি। সার্ষ্টিকেতি পাঠে ঋষ্টয় আয়ুধবিশেষাঃ ॥ ৭ ॥ অশ্মগুড়কাঃ বর্ত্তুলীকৃতাঃ পাষাণাঃ। লোহময়ানি চর্ম্মাণি কমঠপৃষ্ঠাকারাণি প্রহারবারকাণি। সাগ্নিঃ আগ্নেয়ৌষধসহিতা। গুড়াঃ গোলকাঃ। শৃঙ্গিকা তদুৎক্ষেপকযন্ত্রাণি। শত্রূণামুপরি পাতনায় তপ্তো গুড়ো দ্রবীভূতো যত্র শিখরে স্থাপ্যতে তৎসহিতেত্যন্যে ॥ ৮ ॥ ইতি নীলকণ্ঠকৃতভারতভাবদীপনামটীকা ॥ দশনামা সন্ন্যাসিনাং উপাধিবিশেষঃ। যথা। জ্ঞানরত্নেন সম্পূর্ণঃ পূর্ণতত্ত্বপথস্থিতিঃ। পরব্রহ্মরতো নিত্যং পুরীনামা স উচ্যতে ॥ ইতি বৃহচ্ছঙ্করদিগ্বিজয়ঃ ॥

পুরীতৎ (পুং ক্লী) অন্ত্রং। আঁত ইতি খ্যাতং। অন্তুতি বধ্নাতি কালখণ্ডাদি অন্ত্রং অতিবন্ধে নাম্নীতি রঃ। পুরিঃ শরীরং তনোতি পুরীতৎ ক্বিপ্ বনতনাদ্যনিমামিতি নলোপে স্বস্য তনিতি তন্ নিপাতনাদিকারস্য দীর্ঘঃ। অন্ত্রসাহচর্য্যাৎ ক্লীবত্বং। পুরীতদস্ত্রিয়ামিতি বাচস্পতিঃ। ইত্যমরভরতৌ ॥

পুরীমোহঃ (পুং) ধুস্তূরঃ। ইতি শব্দমালা

পুরীষং (ক্লী) বিষ্ঠা। ইত্যমরঃ॥ তদুৎসর্গ-বিধির্যথা। মুহূর্ত্তে ব্রাহ্ম উত্থায় রাত্রিবাসং পরিত্যজেৎ। পরিধায়াপরং বস্ত্রং শয়নস্থানতোঽন্বহং॥ মুখাঙ্ঘ্রিহস্তান্ প্রক্ষাল্য দ্বিরাচম্য ততো দ্বিজঃ। কৃষ্ণ কৃষ্ণ স্মৃতিং কৃত্বা খনিত্বা নৈর্ঋতীং দিশং॥ খনিত্রখননেনৈব দ্বাদশাঙ্গুল্যধোমৃদং। গৃহীত্বোদকপাত্রঞ্চ মিতং গচ্ছেদ্ধনুঃশতং॥ গ্রামাদ্বা শরবিক্ষেপমাত্রামনুদিতে রবৌ। মৈত্রমাবশ্যকং কর্ত্তুং নগরাচ্চ চতুর্গুণাং॥ তস্ত্রিমুষ্ট্যায়তং গর্ত্তং তথা কৃত্বা গভীরকং। কৃত্বা ত্বস্তিঃ খনিত্রেণ কুশৈরাচ্ছাদ্য তত্তৃণং॥ শুষ্কৈঃ কাষ্ঠৈরযজ্ঞীয়ৈর্ভূগর্ত্তমবগুণ্ঠিতঃ। সম্বীতাঙ্গো বেণুদলৈঃ পত্রৈর্ম্মৃণ্ময়ভাজনৈঃ॥ ছত্রং খনিত্রং সংস্থাপ্য বারিপাত্রমুপানহৌ। ততো দ্বিজস্তূপবিশেদ্বস্ত্রেণাচ্ছাদ্য মস্তকং॥ যজ্ঞোপবীতং কর্ণেঽথ ধৃত্বা মৌনী চ দক্ষিণে। আগতো দ্বিজমগ্নিং নো পশ্যন্ সন্তঞ্চ ভাস্করং॥ গুরুং সমীরণং সর্ব্বদেবতামূর্ত্তিমেব চ। মাতরং পিতরং চন্দ্রং সর্ব্বং গুরুজনং স্ত্রিয়ং॥*॥ উদঙ্মুখস্ত্রিসন্ধ্যাসু দিবসে চ যদা নিশি। দক্ষিণামুখ উৎসর্গং কুর্য্যান্মূত্রপুরীষয়োঃ॥ পূর্ব্বাহ্লে তু দ্বিজঃ কুর্য্যাৎ পশ্চিমাভিমুখোঽথবা। অপরাহ্লে পূর্ব্বমুখো মূত্রগূথবিসর্জনং॥ মধ্যাহ্নে প্রযতঃ কুর্য্যাদ্যতবাগুত্তরামুখঃ। দক্ষিণাভিমুখো রাত্রৌ দ্বিজো মৈত্রং প্রযত্নতঃ॥ নিশায়ামন্ধকারে তু ছায়ায়াং দিবসে তথা। যথেচ্ছমুখো ভূত্বা মৈত্রং কুর্য্যাৎ দ্বিজো ভয়াৎ॥ দিগ্‌ভ্রমাচ্চ মনোদুঃখাদ্বিণ্মূত্রস্য বিসর্জ্জনং মোহাদ্বাধোমুখঃ কুর্য্যাদযতবাক্ প্রযতো দ্বিজঃ॥ সন্ন্যাসী ব্রহ্মচারী চ বানপ্রস্থো গৃহী দ্বিজঃ। শাখাধ্যায়ী চ বেদানাং"সর্ব্বযজ্ঞেষু দীক্ষিতঃ॥ মুনিশ্চ সর্ব্বধর্ম্মজ্ঞো দান্তঃ শান্ত উদারধীঃ। সদোত্তরমুখঃ কুর্য্যাদ্বৈষ্ণবো নান্য এব চ॥ প্রাতশ্চ মৈত্রং সায়াহ্নে দক্ষিণাভিমুখো নিশি। যোগিনাস্তু যথা স্ত্রীণাং শূদ্রাদীনাময়ং ক্রমঃ॥*॥ ন দেবায়তনে বৃক্ষমূলে চ ন জলে নদে। ন নদীকূপমার্গেষু ন বাপীগোষ্ঠভস্মসু॥ ন চিতাগ্নিশ্মশানেষু নোষরে ন দ্বিজালয়ে। নান্তঃসমীপে ন পুণ্ড্রে নাকাশে ন চ শাদ্বলে॥ ন সমুদ্রে ন কাম্যে চ ন তীর্থে ন দ্বিজালয়ে। ন যজ্ঞবৃক্ষমূলেষু নোপদ্বারে চতুষ্পথে॥ ন শস্যক্ষেত্রে ন খলে পুষ্পোদ্যানে ন চত্বরে। সোপানংকো ন নগ্নশ্চ ন রথ্যাসেব্যভূতলে॥ ন বৈষ্ণবালয়ে গোত্রে ন সূর্য্যাভিমুখস্তথা। ন ফালকৃষ্টকেদারে ন তিষ্ঠংশ্চ কদাচন॥ ন গচ্ছন্ন চ বল্মীকে ন চ পর্ব্বতমস্তকে। ন জলং ন দিশো ভাগান্নাকাশমবলোকয়ন্॥ ন গোব্রজে নদীতীরে নিত্যস্থানে ন গোময়ে। ন যজ্ঞভূমৌ ন গৃহে ন পবিত্রীকৃতস্থলে॥ দ্বিজো ন দেহচ্ছায়ায়াং শকৃন্মূত্রবিসর্জনং। কুর্য্যাদযজ্ঞেষ্টকাকূটে ন চ সপ্রাণিগর্ত্তকে॥ উদ্ধৃতাস্তোমৃত্তিকাভ্যামিত্থং নারদ যত্নতঃ। কৃত্বোৎসর্গং ততঃ কুর্য্যাৎ শৌচং মূত্রপুরীষয়োঃ॥*॥ শুষ্ককাষ্ঠেন লোষ্ট্রেণাযজ্ঞীয়েন তৃণেন বা।

প্রমার্জ্য গুহ্যমুত্তিষ্ঠেৎ শিশ্নঞ্চৈব বিশেষতঃ॥ বিধৃত্য বামহস্তেন শিশ্নস্তূপবিশেন্নিশি। চেদ্দক্ষিণামুখঃ সন্ধ্যাং দিবোত্তরমুখস্তদা॥ পূতিগন্ধিজলং দুষ্টং সফেনঞ্চ সবুদ্বুদং। তীর্থোদকং সলবণং পাথো বর্ণান্তরন্তথা॥ সমুদ্রগানদীবারঃ সামুদ্রঞ্চ সকর্দ্দমং। যবনান্ত্যজখাতান্তঃ সমুদ্রগনগোদকং॥ ধান্যক্ষেত্রস্য সলিলং সকীটঞ্চ পরিত্যজেৎ। মানবো দেবখাতান্তঃ সকলে শৌচকর্ম্মণি॥*॥ মৃদঃ সকীটাস্তীর্থানাং দেবায়তনগোষ্ঠয়োঃ। নদোদধিনদীদেবখাততীরস্থ মৃত্তিকাঃ॥ মহীতলোদ্ভবাঃ ক্ষেত্রকূড্যয়োঃ সিকতাশ্চ যাঃ। অন্তর্জলা ধূলিমৃদো বল্মীকস্থ চ কর্দ্দমাঃ॥ ঊষরাশ্চ হলোৎখাতা মৃত্তিকা ভবনস্থ চ। অশ্বত্থতুলসীধাত্রীমূলাদীনাঞ্চ যা মৃদঃ॥ শ্মশানভূমেঃ শৈলস্থ তথা পূতস্থলস্থ চ। শৌচাবশিষ্টমার্গস্য আখূৎখাতাশ্চ মৃত্তিকাঃ॥ যজ্ঞস্থানস্থ বিপ্রাণাং সাধূনামালয়স্য চ। মৃত্তিকা বর্জয়েদেতা দেবর্ষে শৌচকর্ম্মণি॥ পবিত্রস্থানতো গ্রাহ্যা দ্বাদশাঙ্গুল্যধোমৃদঃ। দ্বিজৈঃ সকলশৌচার্থং শর্করাদিবিবর্জিতাঃ॥*॥ প্রথমেঽদ্ভির্নরঃ শৌচং কুর্য্যাম্মৃদ্ভিরতঃ পরং। পুনর্জলৈঃ পুরীষস্য যথা গন্ধক্ষয়ো ভবেৎ॥ মৃত্তিকা প্রথমা শৌচে ত্বর্দ্ধপ্রসৃতিসম্মিতা। পূর্ণপ্রসৃতিমাত্রা তু দ্বিতীয়া সজলা তথা॥ তৃতীয়া প্রমিতা শৌচে সার্দ্ধপ্রসৃতিমৃত্তিকা। চতুর্থ্যাদ্যা ক্রমাদেবমর্দ্ধপ্রসৃতিবর্দ্ধিতা॥ যয়া মৃত্তিকয়া পূর্য্যং ত্রিপর্ব্ব শৌচকারিণঃ। অর্দ্ধপ্রসৃতিমাত্রা সা মুনিভিঃ পরিকীর্ত্তিতা॥*॥ গুদে দদ্যাম্মৃদস্তিস্রঃ পঞ্চ বা সপ্ত বা তথা। মৃদমেকাং তথা শিশ্নে তিস্রো বা মৃত্তিকা দ্বয়ং॥ সপ্ত বামকরে দদ্যাম্মৃদস্ত্রিংশচ্চতুর্দ্দশ। তিস্রো বা হস্তয়োঃ সপ্ত চতুর্দ্দশ চ ষোড়শ॥ পাণ্যোরেকাং মৃদং পৃষ্ঠে ষড়্বা তিস্রশ্চ মৃত্তিকাঃ। হস্তদ্বয়নখেষ্বেকাং তিস্রশ্চ ষড়্মৃদস্তথা॥*॥ মৈথুনে রেতঃস্খলনে মূত্রোৎসর্গে চ মৃদ্দ্বয়ং। দদ্যাত্তিস্রশ্চ শিশ্নৈকাং তিস্রো বামকরে মৃদঃ॥ হস্তে চ মৃদ্দ্বয়ং ত্রক্ষেত্তিস্রো বা শুদ্ধিতৎপরঃ। পদৈকৈকে দ্বিজস্তিস্রো গৃহীত্বং শৌচমাচরেৎ॥*॥ গৃহিণো দ্বিগুণং শৌচং যত্নতো ব্রহ্মচারিণাং। গৃহস্থবানপ্রস্থানাং প্রোক্তং ত্রিগুণমেব চ॥ সন্ন্যাসিনাং বৈষ্ণবানাং শৌচং সেব্যং চতুর্গুণং।*। হস্তপাদ্বারিপাত্রস্তু মৃদ্ভিরদ্ভিশ্চ গোময়ৈঃ॥ দিবা যদ্বিহিতং শৌচং নিশায়ামর্দ্ধকং ভবেৎ। এতদর্দ্ধমশৌচে তু জাতকে মৃতকেঽপি চ॥ চৌরাদিবাধিতে মার্গে শৌচমস্যার্দ্ধমাচরেৎ। যোষিতামেতদর্দ্ধন্তু শূদ্রাদীনাঞ্চ নারদ॥ ব্যাধিভিশ্চাতুরো মর্ত্ত্য আর্ত্তো যদি যথাবলং। শৌচং কুর্য্যাৎ কৃতং যত্র তৎ স্থানং শোধয়েজ্জলৈঃ॥*॥ বেদস্মৃতিপুরাণানি ধর্ম্মশাস্ত্রাণি নৈত্যিকং। মৈত্রাদিকর্ম্ম যঃ কুর্য্যাদ্বিহায় মন্দধীর্দ্বিজঃ॥ প্রতিপ্রজ্ঞানমায়ুশ্চ প্রজ্ঞাং হন্তি যশঃ শ্রিয়ং। বলমাচারহীনস্য সদা তস্যাপবিত্রতা॥*॥

সাত্বতাশ্চেদ্দ্বিজা ভূপা বৈশ্যশূদ্রাস্ত্যজাঃ স্ত্রিয়ঃ। কুর্ব্বন্তি শৌচং যত্নেন যাবচ্চেতঃ-পবিত্রতা ॥ যেষাং কৃষ্ণস্য মননং তথা নামপ্রজল্পনং। সদৈব স্মরণং ভাগ-বতানাং সাধুসেবনং ॥ ভক্তিপ্রধৌত-মনসাং গোবিন্দার্পিতকর্ম্মণাং। বাহ্যান্তঃ-কৃষ্ণচিত্তানাং শুচিতা তদহর্নিশং ॥ * ॥ মৃদ্গোময়জলৈঃ শৌচমনেকৈঃ কুরুতে যদি। মনোঽপবিত্রতা যস্য কদাচিদ্বৈ ন শুধ্যতি ॥ গোবিন্দদাসতা নাস্তি যস্য লোকস্য জন্মনি। সোঽপি দেহাশুচিঃ কৃত্বা শৌচং মৈত্রাদিকর্ম্মসু ॥ শতধা যদি দেবর্ষে শৌচং কুর্য্যাৎ সহস্রধা। মৃদ্বারিগোময়ৈর্লোকো ভাবদুষ্টো ন শুধ্যতি ॥ সদা চিত্তাপবিত্রত্বমকার্ষ্যো ভুবি যো নরঃ। তস্য তু স্যান্ন মৈত্রাদি-শৌচেনৈব স শুধ্যতি ॥ পর্ব্বতাকার-কূটৈশ্চ গোবিট্সর্ব্বনদীজলৈঃ। শৌচং কৃত্বা ন শুধ্যেত দুষ্টচিত্তো ভবেদ্যদি ॥ ইতি পাদ্মোত্তরখণ্ডে ১০৯ অধ্যায়ঃ ॥

পুরীষণঃ (পুং) পুরীষং। ইতি ত্রিকাণ্ড-শেষঃ ॥

পুরীষমঃ (পুং) মাষঃ। ইতি ত্রিকাণ্ড-শেষঃ ॥

পুরুঃ (পুং) দেবলোকঃ। নৃপভেদঃ। স চ যযাতেঃ কনিষ্ঠপুত্রঃ। পরাগঃ। ইতি মেদিনী ॥ দৈত্যঃ। ইত্যুণাদিকোষঃ ॥ নদীভেদে ত্রি। ইতি শব্দরত্নাবলী ॥ প্রচুরে ত্রি। ইত্যমরঃ ॥

পুরুকুৎসবঃ (পুং) ইন্দ্ররিপুবিশেষঃ। যথা। ইন্দ্রো বিপশ্চিদ্দেবানাং তদ্রিপুঃ পুরুকুৎসবঃ। জঘান হস্তিরূপেণ ভগবান্মধুসূদনঃ ॥ ইতি গারুড়ে ৮৭ অধ্যায়ঃ ॥

পুরুদংশকঃ (পুং) হংসঃ। ইতি ত্রিকাণ্ড-শেষঃ ॥

পুরুদংশাঃ [স্] (পুং) ইন্দ্রঃ। ইতি জটা-ধরঃ ॥

পুরুষঃ (পুং) পুমান্। পিপর্ত্তি পূরয়তি বলং যঃ। পুর্ষু শেতে য ইতি বা। তৎপর্য্যায়ঃ। পূরুষঃ ২ না ৩ নরঃ ৪ পঞ্চজনঃ ৫ পুমান্ ৬ অর্থাশ্রয়ঃ ৭ অধিকারী ৮ কর্ম্মার্হঃ ৯ জনঃ ১০ অর্থবান্ ১১। ইতি রাজনির্ঘণ্টঃ ॥ মনুষ্যঃ ১২ মানবঃ ১৩ মর্ত্ত্যঃ ১৪ মানুষঃ ১৫ মনুঃ ১৬। ইতি শব্দরত্নাবলী ॥ রসিকরাজঃ ১৭ ঘনকাম-ধামা ১৮ মদনশায়কাঙ্কঃ ১৯ মন্মথশায়ক-লক্ষ্যঃ ২০। ইতি কবিকল্পলতা ॥ স চতু-র্বিধঃ। যথা। শশো মৃগো বৃষশ্চাশ্বো নৃণাং জাতিচতুষ্টয়ং। শশাদীনাং লক্ষণং যথা। মৃদুবচনসুশীলঃ কোমলাঙ্গঃ সুকেশঃ সকল-গুণনিধানঃ সত্যবাদী শশোঽয়ং ॥ ১। বদতি মধুরবাণীং দীর্ঘনেত্রোঽতিভীরু-শ্চপলমতিসুদেহঃ শীঘ্রবেগো মৃগো-ঽয়ং ॥ ২ ॥ বহুগুণবহুবন্ধুঃ শীঘ্রকামো নতাঙ্গঃ সকলরুচিরদেহঃ সত্যবাদী বৃষো-ঽয়ং ।৩। উদরকটিকৃশঃ স্থাদুগ্রকণ্ঠা-ধরৌষ্ঠো দশনবদননাসাশ্রোত্রদীর্ঘো হি বাজী ॥ ৪ ॥ ইতি রতিমঞ্জরী ॥ * ॥ তস্য পঞ্চলক্ষণত্বং যথা। পাত্রে ত্যাগী গুণে রাগী ভোগী পরিজনৈঃ সহ। শাস্ত্রে বোদ্ধা

রণে যোদ্ধা পুরুষঃ পঞ্চলক্ষণঃ॥ ইতি প্রাচীনাঃ॥ জিতেন্দ্রিয়স্য পুরুষত্বং যথা। সা শ্রীর্যা ন মদং কুর্য্যাৎ স সুখী তৃষ্ণয়োজ্ঝিতঃ। তন্মিত্রং যত্র বিশ্বাসঃ পুরুষঃ স জিতেন্দ্রিয়ঃ॥ ইতি গারুড়ে ১৬ অধ্যায়ঃ॥*॥ কৃষ্ণভক্তপুরুষস্য গোবিন্দপদাশ্রয়ত্বং যথা। স্ত্রিয়ো বা পুরুষো বাপি হ্যাততায়ী নপুংসকঃ। ভক্তত্বে গণনীয়শ্চেদ্‌গোবিন্দপদমাশ্রয়েৎ॥ ইতি পাদ্মোত্তরখণ্ডে ৯৯ অধ্যায়ঃ॥*॥ পুরুষাণাং মধ্যে গুরবো যথা। গুরূণামপি সর্ব্বেষাং পূজ্যাঃ পঞ্চ বিশেষতঃ। তেষামাদ্যাস্ত্রয়ঃ শ্রেষ্ঠাস্তেষাং মাতা সুপূজিতা॥ যো ভাবয়তি যা সূতে যেন বিদ্যোপদিশ্যতে। জ্যেষ্ঠভ্রাতা চ ভর্ত্তা চ পঞ্চৈতে গুরবঃ স্মৃতাঃ॥ ইতি কৌর্ম্মে উপবিভাগে ১১ অধ্যায়ঃ॥*॥ আত্মা। ইত্যমরঃ॥ সাঙ্খ্যতত্ত্বজ্ঞঃ। পুন্নাগপাদপঃ। ইতি মেদিনী॥ বিষ্ণুঃ। ইতি শব্দরত্নাবলী॥ দুর্গা। যথা। মহানিতি চ যোগেষু প্রধানশ্চৈব কথ্যতে। ত্রিগুণা ব্যতিরিক্তা সা পুরুষশ্চেতি চোচ্যতে॥ ইতি দেবীপুরাণে ৪৫ অধ্যায়ঃ॥*॥ তস্য পঞ্চবিংশতিতত্ত্বাত্মকত্বং জড়ত্বঞ্চ যথা। এভিঃ সম্পাদিতং ভুঙ্‌ক্তে পুরুষঃ পঞ্চবিংশকঃ। ঈশ্বরেচ্ছাবশঃ সোঽপি জড়াত্মা কথ্যতে বুধৈঃ॥ ইতি মাৎস্যে তত্ত্বকথনাবসরে ৩ অধ্যায়ঃ॥*॥ মেষমিথুনসিংহতুলাধনুঃকুম্ভরাশয়ঃ। যথা। ক্রূরোঽথ সৌম্যঃ পুরুষোঽঙ্গনা চ ওজোঽথ যুগ্মং বিষমঃ সমশ্চ। চরস্থিরদ্ব্যাত্মকনামধেয়া মেষাদয়োঽমী ক্রমশঃ প্রদিষ্টাঃ॥*॥ পুরুষগ্রহা যথা। ভৌমার্কজীবাঃ পুরুষাঃ ক্লীবৌ সোমজভানুজৌ। স্ত্র্যাখ্যৌ ভার্গবচন্দ্রৌ দ্বৌ তৎপতিত্বাত্তথোচ্যতে॥*॥ পুরুষনক্ষত্রাণি যথা। হস্তো মূলশ্রবণপুনর্ব্বসুমৃগশিরস্তথা পুষ্যঃ। গর্ভাধানাদিকার্য্যেষু পুন্নামায়ং গণঃ শুভদঃ॥ ইতি জ্যোতিস্তত্ত্বং॥ তদ্বৈদিকপর্য্যায়াঃ। মনুষ্যাঃ ১ নরঃ ২ ধবাঃ ৩ জন্তবঃ ৪ বিশঃ ৫ ক্ষিতয়ঃ ৬ কৃষ্টয়ঃ ৭ চর্ষণয়ঃ ৮ নহুষঃ ৯ হরয়ঃ ১০ মর্য্যাঃ ১১ মর্ত্ত্যাঃ ১২ মর্ত্তাঃ ১৩ ব্রাতাঃ ১৪ তুর্ব্বশাঃ ১৫ দ্রুহ্যবঃ ১৬ আয়বঃ ১৭ যদবঃ ১৮ অনবঃ ১৯ পূরবঃ২০ জগতঃ২১ তস্থুষঃ ২২ পঞ্চজনাঃ ২৩ বিবস্বন্তঃ ২৪ পৃতনাঃ ২৫। ইতি পঞ্চবিংশতির্নামানি। ইতি বেদনিঘণ্টৌ ২ অধ্যায়ঃ॥

পুরুষকং (ক্লী) ঘোটকানামূর্দ্ধস্থিতিঃ। শীখপাঁও ইতি হিন্দীভাষা। ইতি ত্রিকাণ্ডশেষঃ॥

পুরুষকারঃ (পুং) পুরুষস্য কৃতিঃ। পৌরুষং। চেষ্টা। যথা। মনুরুবাচ। দৈবে পুরুষকারে চ কিং জ্যায়স্তং ব্রবীহি মে। অত্র মে সংশয়ো দেব ছেত্তুমর্হস্যশেষতঃ॥ মৎস্য উবাচ। স্বমেব কর্ম্ম দৈবাখ্যং বিদ্ধি দেহান্তরার্জ্জিতং। তস্মাৎ পৌরুষমেবেহ শ্রেষ্ঠমাহুর্মনীষিণঃ॥ প্রতিকূলন্তথা দৈবং পৌরুষেণ বিহন্যতে। মঙ্গলাচারযুক্তানাং নিত্যমুত্থানশীলিনাং॥ যেষাং পূর্ব্বকৃতং কর্ম্ম সাত্ত্বিকং মনুজোত্তম। পৌরুষেণ বিনা

তেষাং কেষাঞ্চিদ্দৃশ্যতে ফলং ॥ কর্ম্মণা প্রাপ্যতে লোকে রাজসস্ত তথা ফলং। কৃচ্ছ্রেণ কর্ম্মণা বিদ্ধি তামসস্য তথা ফলং ॥ পৌরুষেণাপ্যতে রাজন্ মার্গিতব্যং ফলং নরৈঃ। দৈবমেব বিজানন্তি নরাঃ পৌরুষবর্জ্জিতাঃ ॥ তস্মাত্রিকালসংযুক্তং দৈবং ন সফলং ভবেৎ। পৌরুষং দৈবসম্পত্ত্যা কালে ফলতি পার্থিব ॥ দৈবং পুরুষকারশ্চ কালশ্চ মনুজোত্তম। ত্রয়মেতন্মনুষ্যস্য পিণ্ডিতং স্যাৎ ফলাবহং ॥ কৃষের্বৃষ্টিসমাযোগাদ্দৃশ্যন্তে ফলসিদ্ধয়ঃ। তাস্ত কালে প্রদৃশ্যন্তে নৈবাকালে কথঞ্চন ॥ তস্মাৎ সদৈব কর্ত্তব্যং সধর্ম্মং পৌরুষং নৃভিঃ। এবন্তে প্রাপ্নুবন্তীহ পরলোকফলং ধ্রুবং ॥ লালসাঃ প্রাপ্নুবন্ত্যর্থান্ন চ দৈবপরায়ণাঃ। তস্মাৎ সর্ব্বপ্রযত্নেন পৌরুষে যত্নমাচরেৎ ॥ ত্যক্ত্বালসান্ দৈবপরান্ মনুষ্যানুত্থানযুক্তান্ পুরুষান্ হি লক্ষ্মীঃ। অন্বিষ্য যত্নাদ্বৃণুতে নৃপেন্দ্র তস্মাৎ সদোত্থানবতা হি ভাব্যং ॥ ইতি মাৎস্যে দৈবপুরুষকারকো নাম ১৯৫ অধ্যায়ঃ ॥

পুরুষত্রা ব্য পুরুষং। পুরুষৌ। পুরুষান্। পুরুষে। পুরুষয়োঃ। পুরুষেষু ॥ দেবাদের্দ্বীপ্যোস্ত্রাজিতিসূত্রেণ ত্রাচ্‌প্রত্যয়নিষ্পন্নং। দেবাদিস্তু দেবমনুষ্যপুরুষমর্ত্ত্যবহু ইত্যাদি। ইতি মুগ্ধবোধটীকায়াং দুর্গাদাসঃ ॥

পুরুষত্বং (ক্লী) পুরুষস্য ভাবঃ। পুরুষবৃত্তিরসাধারণধর্ম্মঃ। পুরুষশব্দাৎ ভাবার্থে ত্বপ্রত্যয়নিষ্পন্নং ॥ পুংস্ত্বঞ্চ ॥

পুরুষদঘ্নঃ (ত্রি) পুরুষপরিমাণঃ। পুরুষশব্দাৎ পরিমাণার্থে দঘ্নট্‌প্রত্যয়নিষ্পন্নঃ। ইতি ব্যাকরণং ॥

পুরুষদন্তিকা (স্ত্রী) মেদা। ইতি রাজনির্ঘণ্টঃ ॥

পুরুষদ্বয়সঃ (ত্রি) পুরুষপরিমাণঃ। পুরুষশব্দাৎ পরিমাণার্থে দ্বয়সট্ প্রত্যয়নিষ্পন্নঃ। ইতি ব্যাকরণং ॥

পুরুষদ্বেষী [ন্] (ত্রি) পুরুষদ্বেষশীলঃ। পুরুষশব্দোপপদাদ্দ্বিষধাতোর্ণিন্‌প্রত্যয়নিষ্পন্নঃ। ইতি ব্যাকরণং ॥

পুরুষপুণ্ডরীকঃ (পুং) পুরুষব্যাঘ্রঃ। নরশ্রেষ্ঠঃ। ইত্যমরঃ ॥ জিনরাজবিশেষঃ। ইতি হেমচন্দ্রঃ ॥

পুরুষমাত্রং (ত্রি) পুরুষপরিমাণং। পুরুষশব্দাৎ পরিমাণার্থে মাত্রট্‌প্রত্যয়নিষ্পন্নং। ইতি ব্যাকরণং

পুরুষনাগঃ, পুরুষপুঙ্গবঃ, পুরুষর্ষভঃ, পুরুষব্যাঘ্রঃ, পুরুষশার্দূলঃ } (পুং) পুরুষশ্রেষ্ঠঃ। যথা। স্যুরুত্তরপদে ব্যাঘ্রপুঙ্গবর্ষভকুঞ্জরাঃ। সিংহশার্দূলনাগাদ্যাঃ পুংসি শ্রেষ্ঠার্থবাচকাঃ ॥ ইত্যমরঃ ॥

পুরুষসিংহঃ (পুং) পুরুষশ্রেষ্ঠঃ। ইত্যমরঃ ॥ জিনরাজবিশেষঃ। তৎপর্য্যায়ঃ। শৈবিঃ২। ইতি হেমচন্দ্রঃ ॥

পুরুষাদ্যঃ (পুং) আদিনাথনামা জিনবিশেষঃ। ইতি ধনঞ্জয়ঃ ॥ বিষ্ণুশ্চ ॥

পুরুষাধমঃ (পুং) নিকৃষ্টনরঃ। যথা। নাথে শ্রীপুরুষোত্তমে ত্রিজগতামেকাধিপে চেতসা সেব্যে স্বস্য পদস্য দাতরি সুরে নারায়ণে তিষ্ঠতি। যং কঞ্চিৎ পুরুষাধমং

কতিপয়গ্রামেশমল্লার্থদং সেবায়ৈ মৃগয়ামহে নরমহো মূঢ়া বরাকা বয়ং ॥ ইতি শান্তিশতকং ॥

পুরুষার্থঃ (পুং) পুরুষস্য প্রয়োজনং। স চ চতুর্ব্বিধঃ যথা । ধর্ম্মার্থকামমোক্ষাশ্চ পুরুষার্থা উদাহৃতাঃ। ইত্যগ্নিপুরাণং ॥ গোস্বামিমতে ভক্তিঃ পঞ্চমপুরুষার্থঃ ॥

পুরুষাস্থিমালী [ন্] (পুং) শিবঃ। ইতি হেমচন্দ্রঃ ॥

পুরুষোত্তমঃ (পুং) বিষ্ণুঃ । ইত্যমরঃ ॥ বৃত্তার্হদ্বিশেষঃ। তৎপর্য্যায়ঃ। সোমভূঃ২। ইতি হেমচন্দ্রঃ ॥ পুরুষাণাং মধ্যে উত্তমঃ। যথা। বিশেষসমভাবস্য পুরুষস্যানঘস্য চ । অরিমিত্রেঽপ্যুদাসীনে মনো যস্য সমং ব্রজেৎ॥ সমো ধর্ম্মঃ সমঃ স্বর্গঃ সমো হি পরমং তপঃ । যস্যৈবং মানসং নিত্যং স নরঃ পুরুষোত্তমঃ ॥ ইতি ধর্ম্মপুরাণং ॥

পুরুহং (ত্রি) প্রচুরং। ইত্যমরঃ ॥

পুরুহু (ত্রি) প্রচুরং। ইত্যমরটীকায়াং স্বামী ॥

পুরুহূতঃ (পুং) ইন্দ্রঃ। ইত্যমরঃ ॥

পুরূরবাঃ [স্] (পুং) বুধস্য পুত্ত্রঃ। স তু চন্দ্রবংশীয়াদিরাজঃ । তৎপর্য্যায়ঃ । বৌধঃ ২ ঐলঃ ৩ উর্ব্বশীরমণঃ ৪। ইতি হেমচন্দ্রঃ ॥ যথা । ততো বুধাশ্রমং প্রায়াদিড়া রূপাশ্রিতা সতী। বুধেনান্তরমাসাদ্য মৈথুনায়োপমন্ত্রিতা ॥ সোমপুত্ত্রাদ্‌বুধাদ্রাজন্ তস্যা জজ্ঞে পুরূরবাঃ। জনয়িত্বা ততঃ সা তং পুনঃ সুদ্যুম্নতাং গতা ॥ ইত্যগ্নিপুরাণং ॥ অপি চ । ইলোদরে চ ধর্ম্মিষ্ঠং বুধঃ পুত্ত্রমজীজনৎ। অশ্বমেধশতং সাগ্রমকরোদ্‌যঃ স্বতেজসা ॥ পুরূরবা ইতি খ্যাতঃ সর্ব্বলোকনমস্কৃতঃ। হিমবচ্ছিখরে রম্যে আরাধ্য স জনার্দ্দনং। লোকৈশ্বর্য্যমগাদ্রাজা সপ্তদ্বীপপতিস্তদা ॥ কেশিপ্রভৃতয়ো দৈত্যাস্তস্য ভৃত্যত্বমাগতাঃ। উর্ব্বশী যস্য পত্নীত্বমগাৎ সদ্রূপমোহিতা ॥ সপ্তদ্বীপা বসুমতী সশৈলবনকাননা। ধর্ম্মেণ পালিতা তেন সর্ব্বলোকহিতৈষিণা ॥ চামরগ্রাহিণী কীর্ত্তিঃ সম্পন্নৈকাঙ্গবাহিকা । বিষ্ণুপ্রসাদাদ্‌দেবেন্দ্রো দদাবর্দ্ধাসনন্তদা ॥ ধর্ম্মার্থকামান্ধর্ম্মেণ সমমেবাভ্যপালয়ৎ। ধর্ম্মার্থকামাস্তং দ্রষ্টুমাজগ্মুঃ কৌতুকাৎ পুরা ॥ ইতি মাৎস্যে ২৪ অধ্যায়ঃ ॥ * ॥ বিশ্বদেবঃ। ইতি জটাধরঃ ॥ পার্ব্বণশ্রাদ্ধদেবঃ । যথা। পুরূরবা মাদ্রবাশ্চ পার্ব্বণে সমুদাহৃতৌ। ইতি শ্রাদ্ধতত্ত্বে বৃহস্পতিঃ ॥

পুরোগঃ (ত্রি) অগ্রগামী । ইত্যমরঃ ॥ প্রধানঃ। ইতি হেমচন্দ্রঃ ॥

পুরোগতিঃ (পুং) কুক্কুরঃ। ইতি ধরণিঃ ॥ অগ্রগে ত্রি ॥

পুরোগমঃ (ত্রি) অগ্রগামী। ইত্যমরঃ ॥

পুরোগামী [ন্] (ত্রি) অগ্রগামী। তৎপর্য্যায়ঃ। পুরোগঃ ২ অগ্রেসরঃ ৩ প্রষ্ঠঃ ৪ অগ্রতঃসরঃ ৫ পুরঃসরঃ ৬ পুরোগমঃ ৭। ইত্যমরঃ ॥ নাসীরঃ ৮ প্রগ্রসরঃ ৯। ইতি শব্দরত্নাবলী ॥

পুরোটিঃ (পুং) পত্রঝঙ্কারঃ। রায়ভাটি ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ ॥

পুরোডাঃ [স্] (পুং) হবিঃ। ইতি মুগ্ধবোধব্যাকরণং॥

পুরোডাশঃ (পুং) হবির্ভেদঃ। স তু যবচূর্ণনির্ম্মিতরোটিকাবিশেষঃ। পিষ্টকচমসী। হুতশেষঃ। ইতি মেদিনী॥ সোমরসঃ। ইতি হেমচন্দ্রঃ॥

পুরোডাশ্যং (ত্রি) পুরোডাশীয়ং। হবির্যোগ্যং। পুরোডাশায় হিতং। যথা। আমিক্ষীয়ং দধি ক্ষীরং পুরোডাশ্যং তথৌষধং। হবির্হৈয়ঙ্গবীনঞ্চ নাপ্যুপঘ্নন্তি রাক্ষসাঃ॥ ইতি ভট্টিঃ॥

পুরোদ্ভবা (স্ত্রী) মহামেদা। ইতি রত্নমালা॥

পুরোধাঃ [স্] (পুং) পুরোহিতঃ। ইত্যমরঃ॥

পুরোভাগী [ন্] (ত্রি) দোষমাত্রদর্শী। ইত্যমরঃ॥ অগ্রাংশী চ॥

পুরোহিতঃ (পুং) পুরো দৃষ্টাদৃষ্টফলেষু কর্ম্মসু ধীয়তে আরোপ্যতে যঃ। তৎপর্য্যায়ঃ। পুরোধাঃ ২। ইত্যমরঃ॥ ধর্ম্মকর্ম্মাদিকারকঃ ৩। ইতি শব্দরত্নাবলী॥ তস্য লক্ষণং যথা। বেদবেদাঙ্গতত্ত্বজ্ঞো জপহোমপরায়ণঃ। আশীর্ব্বাদবচোযুক্ত এষ রাজপুরোহিতঃ॥ ইতি চাণক্যং॥ * ॥ তস্য বর্জনীয়লক্ষণং যথা। কাণং ব্যঙ্গমপুত্রং বানভিজ্ঞমজিতেন্দ্রিয়ং। ন হ্রস্বং ব্যাধিতং বাপি নৃপঃ কুর্য্যাৎ পুরোহিতং॥ ইতি কালিকাপুরাণং॥ * ॥ পুরোহিতে বর্ণনীয়ানি যথা। পুরোহিতো হিতো বেদস্মৃতিজ্ঞঃ সত্যবাক্ শুচিঃ। ব্রহ্মণ্যো বিমলাচারঃ প্রতিকর্ত্তাপদামৃজুঃ॥ ইতি কবিকল্পলতা॥

পুর্ব্ব পূর্ত্তৌ। পূর্ণীকরণে। ইতি কবিকল্পদ্রুমঃ॥ পঞ্চমস্বরী। পূঃ পুরৌ পুরঃ। পুর্ব্বতি পয়সা কুম্ভং চেটী। ইতি দুর্গাদাসঃ॥

পুল ক উচ্ছ্রিতৌ। ইতি কবিকল্পদ্রুমঃ॥ উচ্ছ্রিতিরুচ্চীভাবঃ। ক পোলয়তি পর্ব্বতঃ। ইতি দুর্গাদাসঃ॥

পুল জ মহত্ত্বে। ইতি কবিকল্পদ্রুমঃ॥ জ পোলঃ পুলঃ। পোলতি। ইতি দুর্গাদাসঃ॥

পুল শ মহত্ত্বে। ইতি কবিকল্পদ্রুমঃ॥ শ পুলতি পুলিনং শরদি মহৎ স্যাদিত্যর্থঃ। পোলিতা। ইতি দুর্গাদাসঃ॥

পুলঃ (পুং) পুলকঃ। বিপুলে ত্রি। ইতি মেদিনী॥

পুলকং (ক্লী) কঙ্কুষ্টং। তচ্চ পর্ব্বতীয়মৃত্তিকাবিশেষঃ। ইতি রাজনির্ঘণ্টঃ॥

পুলকঃ (পুং) রোমাঞ্চঃ। তৎপর্য্যায়ঃ। রোমোদ্ভেদঃ ২ ত্বক্পুষ্পং ৩ ত্বগঙ্কুরঃ ৪। ইতি ত্রিকাণ্ডশেষঃ॥ শরীরান্তর্ব্বহির্ভব-কীটঃ। ইতি হেমচন্দ্রঃ॥ প্রস্তরবিশেষঃ। তস্য পরীক্ষা যথা। পুণ্যেষু পর্ব্বতবরেষু চ নিম্নগাসু স্থানান্তরেষু চ তথোত্তরদেশগত্বাৎ। সংস্থাপিতাশ্চ নখরা ভুজগৈঃ প্রকাশং সংপূজ্য দানবপতিং প্রথিতে প্রদেশে॥ দাশার্ণবাগদবমেকলকালগাদৌ গুঞ্জাঞ্জনক্ষৌদ্রমৃণালবর্ণাঃ। গন্ধর্ব্ববহ্নিকদলীসদৃশাবভাসা এতে প্রশস্তাঃ পুলকাঃ

প্রসূতাঃ॥ পদ্মাব্জভৃঙ্গার্কবিচিত্রভঙ্গা শূদ্রৈ-রুপেতাঃ পরমাঃ পবিত্রাঃ। মঙ্গল্য-যুক্তা বহুভক্তিচিত্রা বৃদ্ধিপ্রদাস্তে পুলকা ভবন্তি॥ কাকস্বরাসভশৃগালবৃকোগ্ররূপৈ-র্গৃধ্রৈঃ সমাংসরুধিরার্দ্রমুখৈরুপেতাঃ। মৃত্যুপ্রদাস্তু বিদুষা পরিবর্জনীয়া মূল্যং পলস্য কথিতঞ্চ শতানি পঞ্চ॥ ইতি গারুড়ে ৭৭ অধ্যায়ঃ॥ * ॥ মণিদোষ-বিশেষঃ। হরিতালং। গজান্নপিণ্ডং। গন্ধর্ব্ববিশেষঃ। ইতি মেদিনী॥ অসু-রাজী। গল্বর্কঃ। ইতি হেমচন্দ্রঃ॥

পুলকী [ন্] (পুং) ধারাকদম্বঃ। ইতি রাজনির্ঘণ্টঃ॥

পুলস্তিঃ (পুং) পুলস্ত্যমুনিঃ। ইত্যুণাদি-কোষঃ॥

পুলস্ত্যঃ (পুং) সপ্তর্ষীণাং মধ্যে ঋষিবিশেষঃ। ইতি শব্দরত্নাবলী॥ স ব্রহ্মণঃ কর্ণাভ্যাং জাতঃ। তস্য ভার্য্যা হবির্ভূঃ কর্দ্দমকন্যা। তস্য পুত্রঃ অগস্ত্যঃ বিশ্রবাশ্চ। ইতি শ্রীভাগবতং॥

পুলহঃ (পুং) সপ্তর্ষীণাং মধ্যে ঋষিবিশেষঃ। ইতি শব্দরত্নাবলী॥ স চ ব্রহ্মণো নাভিতো জাতঃ তস্য ভার্য্যা কর্দ্দমমুনি-কন্যা গতিঃ। তস্য পুত্রাঃ কর্ম্মশ্রেষ্ঠঃ যবীয়ান্ সহিষ্ণুশ্চ। ইতি শ্রীভাগবতং॥

পুলাকঃ (পুং) তুচ্ছধান্যং। আগড়া ইতি খ্যাতং। সংক্ষেপঃ। অল্পত্বং। ভক্ত-সিক্থকং। ভক্তগুলিকা। ইত্যমর-ভরতৌ॥ ক্ষিপ্রং। যথা পুলাককারী। ইতি স্বামী॥

পুলাকী [ন্] (পুং) বৃক্ষঃ। ইতি হেম-চন্দ্রঃ॥

পুলায়িতং (ক্লী) অশ্বগতিঃ। তৎপর্য্যায়ঃ। বিক্রান্তিঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥

পুলিনং (ক্লী) তোয়োত্থিততটং। চর ইতি চড়া ইতি চ ভাষা। ইত্যমরঃ॥ জলা-দচিরোত্থিতং তটং। ইতি ভরতঃ॥ তৎ-ক্ষণতোয়যুক্তদ্বীপং। ইতি সুভূতিঃ॥ ক্রমেণোত্থিতং তটং। ইতি স্বামী॥ জলমধ্যস্থমুত্থিতং তটং। ইতি পঞ্জিকা॥ দ্বীপং। ইতি ত্রিকাণ্ডশেষঃ॥

পুলিন্দঃ (পুং) চণ্ডালভেদঃ। স চ ম্লেচ্ছশব্দ-বাচ্যঃ। ইত্যমরভরতৌ॥ তস্যোৎপত্তি-র্যথা। পুলস্ত্য উবাচ। এবং গতেষু ত্রৈলোক্যং দানবেষু পুরন্দরঃ। জগাম ব্রহ্ম-সদনং সহ দেবৈঃ শচীপতিঃ॥ তত্রাপশ্যৎ স দেবেশং ব্রহ্মাণং কমলোদ্ভবং। ঋষিভিঃ সার্দ্ধমাসীনং পিতরং স্বঞ্চ কশ্যপং॥ ততো ননাম শিরসা শক্রঃ সুরগণৈঃ সহ। ব্রহ্মাণং কশ্যপঞ্চৈব তাংশ্চ সর্ব্বাংস্তপোধনান্॥ প্রোবাচেন্দ্রঃ সুরৈঃ সার্দ্ধং দেবনাথং পিতামহং। পিতামহহৃতং রাজ্যং বলিনা বলিনা মম॥ ব্রহ্মা প্রোবাচ শক্রৈতৎ ভুজ্যতে স্বকৃতং ফলং। শক্রঃ পপ্রচ্ছ ভো ব্রূহি কিং ময়া দুষ্কৃতং কৃতং॥ কশ্যপো-ঽপ্যাহ দেবেশ ভ্রূণহত্যা কৃতা ত্বয়া। দিত্যুদরাত্ত্বয়া গর্ব্ভঃ কৃতো বৈ বহুধা বলাৎ॥ পিতরং প্রাহ দেবেন্দ্রো মাতুর্দূষণতো বিভো। কর্ত্তনং প্রাপ্তবান্ গর্ব্ভো যদশৌচা হি সাভবৎ॥ ততোঽব্রবীৎ কশ্যপস্তু

মাতুর্দোষে সদাসতাং। গতস্ততো বিনিহতো দোষোঽপি কুলিশেন ভোঃ॥ তচ্ছ্রুত্বা কশ্যপবচঃ প্রাহ শক্রঃ পিতামহং। বিনাশং পাপ্মনো ব্রূহি প্রায়শ্চিত্তং বিভো মম॥ ব্রহ্মা প্রোবাচ দেবেশং বশিষ্ঠঃ কশ্যপস্তথা। হিতং সর্ব্বস্য জগতঃ শক্রস্যাপি বিশেষতঃ॥ শঙ্খচক্রগদাপাণির্মাধবঃ পুরুষোত্তমঃ॥ তং প্রপদ্যস্ব শরণং স তে শ্রেয়ো বিধাস্যতি॥ সহস্রাক্ষোঽপি বচনং গুরূণাং স নিশম্য বৈ। প্রোবাচ স্বল্পকালেন কস্মিন্ প্রাপ্যো বহূদয়ঃ॥ তা ঊচুর্দেবতা মর্ত্ত্যে স্বল্পকালে বহূদয়ঃ॥ ইত্যেবমুক্তঃ সুররাড়্ঙ্গিরিস্বিনা মরীচিপুত্রেণ চ কশ্যপেন। তথৈব মিত্রাবরুণাত্মজেন বেগান্মহীপৃষ্ঠমবাপ্য তস্থৌ॥ কালঞ্জরস্যোত্তরতঃ সুপুণ্যস্তথা হিমাদ্রেরপি দক্ষিণস্যাং। কুশস্থলাৎ পূর্ব্বত এব বিশ্রুতো বসোঃ পুরাৎ পশ্চিমতোঽবতস্থৌ॥ যত্রাথ চক্রে ভগবান্ মুরারির্বাস্তব্যমব্যক্ততনুস্বমূর্ত্তিঃ। খ্যাতিং জগামাথ গদাধরেতি মহাঘবৃন্দস্য শিতঃ কুঠারঃ॥ যস্মিন্ দ্বিজেন্দ্রাঃ শ্রুতিশাস্ত্রসংযুতাঃ সমানতাং যান্তি পিতামহেন। মরুৎপিতৃন্ যত্র চ সংপ্রপূজ্য ভক্ত্যা ত্বনন্যে নহি চেতসৈব। ফলম্মহামেধমখস্য মানবা লভন্ত্যনন্ত্যং ভগবৎপ্রসাদাৎ॥ মহানদী যত্র সুরর্ষিকন্যা বালাপদেশাদ্ধিমশৈলমেত্য। চক্রে জগৎ পাপবিনষ্টমগ্র্যং সন্দর্শনপ্রাশনমজ্জনেন॥ তত্র শক্রঃ সমভ্যেত্য মহানদ্যাস্তটেঽদ্ভুতে। আরাধনায় দেবস্য কৃত্বাশ্রমমবস্থিতঃ॥ প্রাতঃস্নায়ী ত্বধঃশায়ী একভক্তির্হ্যযাচিতা। তপস্তেপে সহস্রাক্ষঃ স্তুবন্ দেবং গদাধরং॥ তস্যৈবং তপ্যতঃ সম্যক্ জিতসর্ব্বেন্দ্রিয়স্য চ। কামক্রোধবিহীনস্য সাগ্রঃ সম্বৎসরো গতঃ॥ ততো গদাধরঃ প্রীতো বাসবং প্রাহ নারদ। গচ্ছ প্রীতোঽস্মি ভবতো মুক্তপাপোঽসি সাম্প্রতং॥ নিজং রাজ্যঞ্চ দেবেশ প্রাপ্স্যসি ত্বচিরাদ্দিবঃ। যতিষ্যামি যথা শক্র ভাবিশ্রেয়ো যথা তব॥ ইত্যেবমুক্তোঽথ গদাধরেণ বিসর্জ্জিতঃ স্নাপ্য মনোহরায়াং। স্নাতস্য দেবস্য ততঃ পুরস্তাৎ সংপ্রোচুরস্মাননুশাসয়স্ব॥ প্রোবাচ তান্ ভীষণকর্ম্মকারান্ নাম্না পুলিন্দা মম পাপসম্ভবাঃ। বসধ্বমেবান্তরমদ্রিমুখ্যয়োর্হিমাদ্রিকালাঞ্জরয়োঃ পুলিন্দাঃ॥ ইত্যেবমুক্ত্বা সুররাট্ পুলিন্দান্ বিমুক্তপাপঃ সুরসিদ্ধযক্ষৈঃ। সংপূজ্যমানোঽনুজগাম চাশ্রমং মাতুস্তদা ধর্ম্মনিবাসমাদ্যং॥ ইতি বামনে ৭৩ অধ্যায়ঃ॥

পুলোমজা (স্ত্রী) শচী। ইত্যমরঃ॥

পুলোমজিৎ (পুং) ইন্দ্রঃ। ইতি কেচিৎ॥

পুলোমদ্বিট্ [ষ্] (পুং) ইন্দ্রঃ। ইতি হেমচন্দ্রঃ॥

পুলোমভিৎ [দ্] (পুং) ইন্দ্রঃ। ইতি ভূরিপ্রয়োগঃ॥

পুলোমা [ন্] (পুং) অসুরবিশেষঃ। স ইন্দ্রস্য শ্বশুরঃ। ইতি পুলোমজাশব্দটীকায়াং ভরতঃ॥

পুলোমারিঃ (পুং) ইন্দ্রঃ। ইতি ত্রিকাণ্ডশেষঃ॥

পুঁষ পুষ্টৌ। ইতি কবিকল্পদ্রুমঃ॥ পোষতি তাতঃ পুত্রং। ইতি দুর্গাদাসঃ॥

পুষ ৯ য ঔ পুষ্টৌ। পোষণে। ইতি কবিকল্পদ্রুমঃ॥ ৯ অপুষৎ। য পুষ্যতি। ঔ পোষ্টা। ইতি দুর্গাদাসঃ॥

পুস ক ধৃতৌ। ইতি কবিকল্পদ্রুমঃ॥ ক পোষয়তি। ইতি দুর্গাদাসঃ॥

পুষ গ পুষ্টৌ। ইতি কবিকল্পদ্রুমঃ॥ গ পুষ্ণাতি পুপোষ। ইতি দুর্গাদাসঃ॥

পুষা (স্ত্রী) লাঙ্গলিকীবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

পুষিতং (ত্রি) পুষ্টং। কৃতপোষণপক্ষিমৃগাদি। ইত্যমরঃ

পুষ্করং (ক্লী) হস্তিশুণ্ডাগ্রং। বাদ্যভাণ্ডমুখং। জলং। ব্যোম। খড়্গফলং। পদ্মং। তীর্থভেদঃ। কুষ্ঠৌষধং। ইত্যমরঃ॥ খড়্গকোষঃ। ইতি তট্টীকায়াং মথুরেশঃ॥ কাণ্ডং। দ্বীপভেদঃ। ইতি মেদিনী॥ যুদ্ধং। ইতি নানার্থরত্নমালা॥ *॥ পুষ্করতীর্থন্তু সত্যযুগে ব্রহ্মণা কৃতং অধুনা আজমেরাখ্যদেশে স্থিতং। তস্য নামান্তরং। রূপতীর্থং ২ মুখদর্শনং ৩। তত্র জ্যেষ্ঠপুষ্করমধ্যমপুষ্করকনিষ্ঠপুষ্করনাম্না ত্রয়ো হ্রদাঃ। তস্য পরিমাণং। শতযোজনমণ্ডলং। ইতি পদ্মপুরাণং॥ যোগবিশেষে গঙ্গাদীনাং পুষ্করত্বং যথা। মকরস্থো যদা ভানুস্তদা দেবগুরুর্যদি। পূর্ণিমায়াং ভানুবারে গঙ্গা পুষ্কর ঈরিতঃ॥ গঙ্গোত্তর্য্যাং প্রয়াগে চ কোটিসূর্য্যগ্রহৈঃ সমঃ। সিংহসংস্থে দিনকরে তথা জীবেন সংযুতে॥ পূর্ণিমায়াং গুরোর্ব্বারে গোদাবর্য্যাস্তু পুষ্করঃ। তত্র স্নানঞ্চ দানঞ্চ সর্ব্বং কোটিগুণং ভবেৎ॥ মেষসংস্থে দিবানাথে দেবানাঞ্চ পুরোহিতে। সোমবারে সিতাষ্টম্যাং কাবেরী পুষ্করো মতঃ॥ কর্কটস্থে দিবানাথে তথা জীবেন্দুবাসরে। অমায়াং পূর্ণিমায়াং বা কৃষ্ণা পুষ্কর উচ্যতে॥ ইতি স্কন্দপুরাণে পুষ্করখণ্ডে শ্রীশৈলমাহাত্ম্যং॥

পুষ্করঃ (পুং) রোগবিশেষঃ। নাগবিশেষঃ। সারসপক্ষী। নৃপভেদঃ। স তু নলরাজভ্রাতা। বরুণপুত্রঃ। ইতি মেদিনী॥ সপ্তদ্বীপানাং মধ্যে দ্বীপবিশেষঃ। পর্ব্বতবিশেষঃ। ইতি শব্দরত্নাবলী॥ *॥ পুষ্করদ্বীপবর্ণনং যথা। সূত উবাচ। শাকদ্বীপস্য বিস্তারাদ্দ্বিগুণেন সমন্ততঃ। ক্ষীরার্ণবং সমাবৃত্য দ্বীপঃ পুষ্করসংজ্ঞিতঃ॥ এক এবাত্র বিপ্রেন্দ্রাঃ পর্ব্বতো মানসোত্তরঃ। যোজনানাং সহস্রাণি চোর্দ্ধং পঞ্চাশদুচ্ছ্রিতঃ॥ তাবদেব চ বিস্তীর্ণঃ সর্ব্বত্র পরিমণ্ডলঃ। স এব দ্বীপো যশ্চার্দ্ধমানসোত্তরসংজ্ঞিতঃ॥ এক এব মহাসানুঃ সন্নিবেশাদ্দ্বিধাকৃতঃ। তস্মিন্দ্বীপে স্মৃতৌ তু দ্বৌ পুণ্যৌ জনপদৌ শুভৌ॥ অপরৌ মানবস্যাথ পর্ব্বতস্যানুমণ্ডলৌ। মহাবীতং স্মৃতং বর্ষং ধাতকীষণ্ডমেব চ॥ স্বাদূদকেনোদধিনা পুষ্করঃ পরিভাবিতঃ। তস্মিন্দ্বীপে মহাবৃক্ষো ন্যগ্রোধোঽমরপূজিতঃ॥ তস্মিন্নিবসতি ব্রহ্মা বিশ্বাত্মা বিশ্বভাবনঃ। তত্রৈব মুনিশার্দূলাঃ শিবনারায়ণালয়ং॥ বসন্ত্যত্র মহাদেবো হরার্দ্ধো হরিরব্যয়ঃ। সংপূজ্যমানো

ব্রহ্মাদ্যৈঃ কুমারাদ্যৈশ্চ যোগিভিঃ ॥ গন্ধর্ব্বৈঃ কিন্নরৈর্যক্ষৈরীশ্বরঃ কৃষ্ণপিঙ্গলৈঃ। সুস্থাস্তত্র প্রজাঃ সর্ব্বা ব্রাহ্মণাঃ সদৃশত্বিষঃ ॥ নিরাময়া বিশোকাশ্চ রাগদ্বেষবিবর্জিতাঃ। সত্যানৃতে ন তত্রাস্তাং নোত্তমাধমমধ্যমাঃ ॥ ন বর্ণাশ্রমধর্ম্মাশ্চ ন নদ্যো ন চ পর্ব্বতাঃ। পরেণ পুষ্করস্যাথ সমাবৃত্য স্থিতো মহান্ ॥ স্বাদূদকঃ সমুদ্রস্তু সমন্তাদ্দ্বিজসত্তমাঃ। পরেণ তস্য মহতী দৃশ্যতে লোকসংস্থিতিঃ ॥ ইতি কৌর্ম্মে ৪৭ অধ্যায়ঃ ॥ * ॥ পুষ্করদ্বীপস্থরাজা। তস্য রথঃ। যথা। লোকেশ্বরঃ সোঽপি নৃভির্মুনীন্দ্রৈর্দেবৈঃ সহেন্দ্রৈরথ ব্রহ্মচারী। দ্বীপে শুভে পুণ্যজনৈরুপেতে উবাস রাজা স তু পুষ্করস্থঃ ॥ তেনৈব নাম্না স তু পুষ্করোঽপি সদোচ্যতে দেবগণৈঃ সসিদ্ধৈঃ। তেনৈব যানেন তথাম্বুজেন বভূব নাম্না তমথাহ্বয়ন্তি ॥ ইত্যগ্নিপুরাণং ॥ * ॥ ব্রহ্মকৃততীর্থবিশেষঃ। তস্য নামান্তরং। রূপতীর্থং ২ মুখদর্শনং ৩। তত্র জ্যেষ্ঠপুষ্করমধ্যমপুষ্করকনিষ্ঠপুষ্কর নামকাস্ত্রয়ো হ্রদাঃ। তস্য পরিমাণং শতযোজনমণ্ডলং। ইতি পদ্মপুরাণং ॥ * ॥ মেঘনায়কবিশেষঃ। তৎপরিজ্ঞানং যথা। ত্রিযুতে শাকবর্ষে তু চতুর্ভিঃ শেষিতে ক্রমাৎ। আবর্ত্তং বিদ্ধি সম্বর্ত্তং পুষ্করং দ্রোণমম্বুদং ॥ ইতি জ্যোতিস্তত্ত্বং ॥ তস্য ফলং। পুষ্করে দুষ্করং বারি শস্যহীনা বসুন্ধরা। বিগ্রহোপহতা লোকাঃ পুষ্করে জলদাধিপে ॥ ইতি জ্যোতিষং ॥ * ॥

ক্রূরবারভদ্রাতিথিভগ্নপাদনক্ষত্রঘটিতাশুভজনকযোগবিশেষঃ। যথা। পুনর্ব্বসূত্তরাষাঢ়া কৃত্তিকোত্তরফল্গুনী। পূর্ব্বভাদ্রং বিশাখা চ রবিভৌমশনৈশ্চরাঃ ॥ দ্বিতীয়া সপ্তমী চৈব দ্বাদশী তিথিরেব চ। এতৈসামেকদা যোগে ভবতীতি ত্রিপুষ্করঃ ॥ * ॥ জাতে তু জারজো যোগো মৃতে ভবতি পুষ্করঃ। ত্রিগুণং ফলদো বৃদ্ধৌ নষ্টে হৃতে মৃতে তথা ॥ প্রথমে মাসি বর্ষে বা কুটুম্বমপি পীড়য়েৎ। দেবোঽপি যদি বা রক্ষেৎ তস্য পুত্রো ন জীবতি ॥ * ॥ অতস্তদ্দোষশান্ত্যর্থং হোময়েদযুতং বুধঃ। অশক্তশ্চ সুবর্ণাদিদানং কুর্য্যাদ্যথাবিধি ॥ সমর্থশ্চেদ্বরাহসংহিতোক্তমযুতহোমাদিকং কুর্য্যাৎ। বাক্যং যথা। শ্রীবিষ্ণুঃ ওঁ তৎ সদদ্যামুকে মাস্যমুকপক্ষেঽমুকতিথৌ অমুকগোত্রঃ শ্রীঅমুকদেবশর্ম্মা অমুক গোত্রস্য প্রেতস্যামুকদেবশর্ম্মণস্ত্রিপুষ্কর যোগকালীনমরণজন্যদোষশমনকামঃ ইদং কাঞ্চনং শ্রীবিষ্ণুদৈবতং যথাসম্ভবগোত্র নাম্নে ব্রাহ্মণায়াহং দদে। ততো দক্ষিণাং দদ্যাৎ। অন্যত্র পূজাহোমকর্ম্মণী করিষ্যে। ইতি বিশেষঃ। এতৎ সর্ব্বমশৌচেঽপি কর্ত্তব্যং। যথা দক্ষঃ। সুস্থকালে ত্বিদং সর্ব্বং সূতকং পরিকীর্ত্তিতং। আপদ্গতস্য সর্ব্বস্য সূতকেঽপি ন সূতকং ॥ ইতি শুদ্ধিকারিকা ॥ * ॥ অপি চ। পুনর্ব্বসূত্তরাষাঢ়া কৃত্তিকোত্তরফল্গুনী। পূর্ব্বভাদ্রং বিশাখা চ ষড়েতে বৈ ত্রিপুষ্করাঃ ॥ দ্বিতীয়া সপ্তমী চৈব দ্বাদশী তিথিরেব চ।

শনির্ভৌমো রবিশ্চৈব বারাশ্চৈতে ত্রি-পুষ্করাঃ ॥ এতে ত্রিপুষ্করা জ্ঞেয়াস্তথা দ্বাদশমাসিকে। দ্বিমাসে চ তথা প্রাপ্তে ষণ্মাসে চ চতুর্থকে ॥ ষোড়শে মাসি সংপূর্ণে কুটুম্বং পীড়য়েদ্ধ্রুবং। অন্তে-ঽপ্যুপান্তে মধ্যে চ পুষ্করো হন্তি নান্যথা ॥ তদ্দোষপ্রশমার্থস্তু হোময়েদযুতং বুধঃ। তিলব্রীহিযবাংশ্চৈব কৃত্বাজ্যেন সমন্ততথা॥ ক্ষীরেণৈব তথাচার্য্যো জুহুয়াচ্ছক্তি-ভাবতঃ। চরুঞ্চ শ্রপয়েত্তত্র প্রান্তে কুর্য্যা-দ্বলিন্তথা ॥ বৈকঙ্কোড়ুম্বরাশ্বত্থৈঃ প্রত্যে-কাষ্টোত্তরং শতং। একৈকং ত্রিত্রি-সংযুক্তং দর্ভেণ পরিবেষ্টিতং ॥ যমায় বৈকঙ্কতেন ধর্ম্মায়োড়ুম্বরেণ চ। অশ্বত্থৈ-শ্চিত্রগুপ্তায় জুহুয়াৎ ক্রমশস্তথা ॥ তদ্বৎ ঘৃততিলাংশ্চৈব তথা সমিধমেব চ। একীকৃত্য সমং সর্ব্বং চরুমাশ্রিত্য হোম-য়েৎ ॥ যবব্রীহিতিলৈর্যুক্তং তণ্ডুলং শ্রপয়েচ্চরুং। দধিমধ্বাজ্যসংযুক্তং হোমঃ সহস্রসংখ্যয়া ॥ বৈকঙ্কোড়ুম্বরাশ্বত্থৈ-র্হোময়েদ্বিধিপূর্ব্বকং। যমং ধর্ম্মং চিত্র-গুপ্তং পুষ্করং পুরুষং তথা ॥ তিথিং বারং তথা ঋক্ষং পূজয়িত্বা তু হোময়েৎ। পঞ্চবর্ণেন চূর্ণেন কুর্য্যাদ্ধি পদ্মমণ্ডলং ॥ যমং ধর্ম্মং চিত্রগুপ্তং স্থাপয়েৎ ক্রমশ-স্ততঃ। তিলপ্রপূরিতে পাত্রে লৌহে চ কৃষ্ণবাসসা ॥ বেষ্টয়িত্বা যমং তত্র স্থাপয়েল্লৌহনির্ম্মিতং। ঘৃতপ্রপূরিতে পাত্রে কাংস্যপাত্রে নিরঞ্জনং ॥ রৌপ্যা-কৃতিং শুক্লবস্ত্রবেষ্টিতং তত্র পূজয়েৎ। গুড়প্রপূরিতে পাত্রে তাম্রপাত্রে চ মন্ত্রিণং ॥ স্বর্ণাকৃতিং রক্তবস্ত্রবেষ্টিতং তত্র পূজয়েৎ। ক্ষীরপ্রপূরিতে পাত্রে প্রস্তরপাত্রে চ পুষ্করং ॥ কৃষ্ণাকৃতিং কৃষ্ণ-বস্ত্রবেষ্টিতং তত্র পূজয়েৎ। সুবর্ণতুল্য মর্দ্ধং বা অথবা শক্তিভাবতঃ ॥ প্রতিমা-শ্চ সমাঃ সর্ব্বাঃ ক্রমাত্তত্র নিযো-জিতাঃ। ব্রীহৌ যবে তথা ধান্যে ক্রমাৎ পাত্রত্রয়ন্ততঃ ॥ নূতনে চ ক্রমাৎ পীঠে স্থাপয়েদ্বিধিপূর্ব্বকং। মণ্ডলস্য চতুর্দ্দিক্ষু চতুঃকুম্ভাংশ্চ স্থাপয়েৎ ॥ দধিগুড়ক্ষীর-পূর্ণান্ প্রকল্প্য সংযুতেঽন্ততঃ। অথবা তন্মূলদেশে সচূতপল্লবাংস্তথা ॥ পীত বস্ত্রেণ সংযুক্তং কুর্য্যাদ্ঘটচতুষ্টয়ং। চন্দ্রাতপং তদুপরি বিচিত্রং পরি কল্পিতং ॥ কুম্ভানাঞ্চ চতুঃপার্শ্বে যবতিলৈ-র্যুক্ততণ্ডুলান্। স্থাপয়েয়ুঃ ক্রমাত্তত্র পূজা-কালে দ্বিজোত্তমাঃ ॥ মণ্ডলস্য তথা পূর্ব্বে বারুণং ঘটমর্পয়েৎ। নানাদেবান্ গণেশা-দীন্ গ্রহাদীংশ্চ সমর্চয়েৎ ॥ হুত্বা যথাক্রমং তত্র বলিং দদ্যাদ্বিচক্ষণঃ। পয়োঘৃতেন ক্ষীরেণ স্নাপয়িত্বা যথাক্রমং। স্বেন স্বেনৈব মন্ত্রেণ পূজয়িত্বা চ হোময়েৎ ॥ এবংবিধিপ্রকারেণ যঃ প্রেতং ন তু হোম-য়েৎ। পুষ্করারিষ্টদোষস্তু চতুষ্পাত্তস্য সম্ভবেৎ ॥ সম্বৎসরে তথা পূর্ণে ষোড়শে মাসি বৈ তথা। ষণ্মাসাভ্যন্তরে তস্য সুতহানিং বিনির্দ্দিশেৎ ॥ অথবা স্বামিনং হন্তি দ্বিতীয়ং ভ্রাতরন্তথা। তৃতীয়ং সর্ব্বহানিঃ স্যাৎ সুতবিত্তবিনাশনং ॥

প্রেতারিষ্টবিনাশায় যমাদীন্ যো ন হোময়েৎ। সর্ব্বাণি তস্য নশ্যন্তি গোমহিষাদীনি সর্ব্বতঃ॥ এবংবিধিকৃতং হোমং যঃ কর্ত্তুমক্ষমো ভবেৎ। হোমং কৃত্বা যথাশক্ত্যা ধেনুমেকাং প্রদাপয়েৎ॥ অস্মিন্ কৃতে ন সন্দেহঃ প্রেতারিষ্টং ন পীড়য়েৎ। ন বিঘ্নো যজমানস্য ন চারিষ্টং প্রজায়তে॥ এতদ্ধোমং বিনির্দ্দিষ্টং যত্নতো ন করোতি যঃ। ন রক্ষতি যমস্তস্য এভির্মাসৈশ্চ বংশজং॥ সুতো ভ্রাতা তথা জায়া পতিঃ শ্বশুর এব চ। মাতা পিতা স্বসা বাপি পিতৃব্যো ভগিনীপতিঃ॥ জ্যেষ্ঠভ্রাতা পতিশ্চাপি স্বামী চাপত্যমেব চ। একৈকং বর্ষসংপূর্ণে কুটুম্বং পীড়য়েদ্ধ্রুবং॥ ষোড়শে মাসি সংপূর্ণে বান্ধবান্ পরিপীড়য়েৎ। বান্ধবানামভাবে চ বাস্তুবৃক্ষো ন জীবতি॥ ত্রিপুষ্করে তথা দোষে যঃ প্রেতং ন তু হোময়েৎ। দেবতা যদি বা রক্ষেৎ তস্য পুত্রো ন জীবতি॥ যৎকিঞ্চিদ্দানমুৎস্বজ্য শুদ্ধো ভবতি মানবঃ। ন রক্ষতি যমস্তস্য যদি হোমং ন কারয়েৎ॥ তস্মাৎ বিধিপ্রকারেণ পুষ্করারিষ্টশান্তয়ে। যমং ধর্ম্মং চিত্রগুপ্তং পূজয়িত্বা চ হোময়েৎ॥ মণ্ডলে ঘটমারোপ্য পূজয়িত্বা যথাক্রমং। বিধিপূর্ব্বং তথা হুত্বা প্রান্তে দদ্যাদ্বলিং বুধঃ॥ প্রভাতে চ তথা রাত্রৌ অশৌচান্তদিনে তথা। আচার্য্যশ্চ প্রকুর্ব্বীত শ্রপয়েচ্চ চরুং ততঃ॥ বিপ্রক্ষত্রিয়য়োর্দর্ভৈঃ পিষ্টৈর্বৈশ্যস্য নির্ম্মিতং। শূদ্রস্য গোময়েনাপি প্রতিমাং দাপয়েত্ততঃ॥ দত্ত্বা মধুঘৃতাক্তঞ্চ চরুং পশ্চাচ্চ দাপয়েৎ। ততোঽরিষ্টঃ প্রশান্তঃ স্যাত্ততো হোমং সমাপয়েৎ॥ সংকল্প্য বিধিনা পূর্ব্বং বস্ত্রযুগ্মেন যত্নতঃ। আচার্য্যং বৃণুয়াত্তত্র পশ্চাদৃত্বিজমেব চ॥ ইতি বরাহসংহিতোক্তপুষ্করশান্তিপ্রমাণং॥

পুষ্করকর্ণিকা, পুষ্করনাড়ী (স্ত্রী) স্থলপদ্মিনী। ইতি রাজনির্ঘণ্টঃ॥

পুষ্করমূলং (ক্লী) পুষ্করদেশপ্রসিদ্ধৌষধিবিশেষঃ। অস্য স্থানে কুষ্ঠং যোজয়ন্তি। তস্য পর্য্যায়ঃ। মূলং ২ পুষ্করং ৩ পদ্মপত্রকং ৪ পুষ্করিণী ৫ বীরং ৬ পৌষ্করং ৭ পুষ্করাহ্বয়ং ৮ কাশ্মীরং ৯ ব্রহ্মতীর্থং ১০ শ্বাসারিঃ ১১ মূলপুষ্করং ১২ পুষ্করজটা ১৩ পুষ্করশিফা ১৪। অস্য গুণাঃ। কটুত্বং। তিক্তত্বং। উষ্ণত্বং। কফবাতজ্বরশ্বাসারোচককাশশোফপাণ্ডুনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ বিশেষাৎ পার্শ্বশূলঘ্নং। ইতি ভাবপ্রকাশঃ॥

পুষ্করমূলকং (ক্লী) কুষ্ঠবৃক্ষস্য মূলং। ইতি ত্রিকাণ্ডশেষঃ॥

পুষ্করশিফা (স্ত্রী) পুষ্করমূলং। ইতি রাজনির্ঘণ্টঃ॥

পুষ্করস্রজৌ (পুং) অশ্বিনীকুমারৌ। দ্বিবচনান্তোঽয়ং। ইতি শব্দরত্নাবলী॥

পুষ্করাহ্বঃ (পুং) সারসপক্ষী। ইত্যমরঃ॥

পুষ্করাহ্বয়ং (ক্লী) পুষ্করমূলং। ইতি রাজনির্ঘণ্টঃ॥

পুষ্করাক্ষঃ (পুং) বিষ্ণুঃ। যথা। পুষ্করাক্ষ-

নিমগ্নোঽহং মায়াবিজ্ঞানসাগরে। ত্রাহি মাং দেবদেবেশ ত্বত্তো নান্যোঽস্তি রক্ষিতা ॥” ইতি তিথ্যাদিতত্ত্বং ॥

পুষ্করিণী (স্ত্রী) স্থলপদ্মিনী। পুষ্করমূলং। ইতি রাজনির্ঘণ্টঃ ॥ হস্তিনী। সরোজিনী। জলাশয়ঃ। ইতি মেদিনী ॥ শতধনুঃ-পরিমিতসমচতুরস্রজলাধারঃ। পুকুর ইতি পুখরি ইতি চ ভাষা। তৎপর্য্যায়ঃ। খাতং ২। ইত্যমরঃ ॥ জলকূপী ৩। ইতি জটাধরঃ ॥ পৌষ্করিণী ৪। ইতি শব্দরত্নাবলী ॥ * ॥ সা তু দক্ষিণোত্তরায়তা কার্য্যা। যথা। কূপবাপীপুষ্করিণ্যো দীর্ঘিকা দ্রোণ এব চ। তড়াগঃ সরসী চৈব সাগরশ্চাষ্টমো মতঃ ॥ সদ্ভির্জলাশয়ঃ কার্য্যো যত্নাদযাম্যোত্তরায়তঃ। ইতি কল্পতরৌ বায়ুপুরাণং ॥ * ॥ তস্যা লক্ষণং যথা। পুষ্করিণীতড়াগাবাহ বশিষ্ঠসংহিতা। চতুর্বিংশাঙ্গুলো হস্তো ধনুস্তচ্চতুরুত্তরঃ। শতধন্বন্তরঞ্চৈব তাবৎ পুষ্করিণী মতা। এতৎপঞ্চগুণঃ প্রোক্তস্তড়াগ ইতি নিশ্চয়ঃ ॥ তেন চতুর্দ্দিক্ষু বিংশতিহস্তান্যূনতায়াং চতুঃশতহস্তান্যূনাভ্যন্তরত্বেন পুষ্করিণী। এতজ্জলাশয়াধারপরং ন তু উপরিতটং। শতেন ধনুর্ভিঃ পুষ্করিণী। ইতি নব্যবর্দ্ধমানধৃতো বশিষ্ঠঃ ॥ * ॥ তৎকরণে বাস্তুযাগঃ কর্ত্তব্যঃ। মহাকপিলপঞ্চরাত্রং। জলাধারগৃহার্থঞ্চ যজেদ্বাস্তুং বিশেষতঃ। ব্রহ্মাদ্যদিতিপর্য্যন্তাঃ পঞ্চাশত্রয়সংযুতাঃ। সর্ব্বেষাং কিল বাস্তূনাং নায়কাঃ পরিকীর্ত্তিতাঃ ॥ অসংপূজ্য হি তান্ সর্ব্বান্ প্রাসাদাদীন্ন কারয়েৎ। অনিষ্পত্তির্বিনাশঃ স্যাদুভয়োর্ধর্ম্মধর্ম্মিণোঃ ॥ ব্রহ্মাদ্যদিতিপর্য্যন্তা ইতি কল্পান্তরং। দেবীপুরাণোক্ত ঈশাদিকল্প এব ব্যবহ্রিয়তে। ধর্ম্মধর্ম্মিণোস্তড়াগাদিতৎকর্ত্রোঃ। আরম্ভদিনে তদকরণে উৎসর্গদিনেঽপ্যাদৌ তৎকরণং। যথা। প্রাসাদভবনোদ্যানপ্রারম্ভে পরিবর্ত্তনে। পুরবেশ্মপ্রবেশেষু সর্ব্বদোষাপনুত্তয়ে ॥ বাস্তূপশমনং কৃত্বা ততঃ সূত্রেণ বেষ্টয়েৎ। বাস্তুপূজামকুর্ব্বাণস্তবাহারো ভবিষ্যতি ॥ ইতি মৎস্যপুরাণে পুরবেশ্মপ্রবেশে বাস্তুযাগপ্রাপ্তেঃ পূর্ব্বোক্তবচনে প্রাসাদধর্ম্মাতিদেশাদত্র বাপ্যাদিপ্রতিষ্ঠাদিনেঽপি বাস্তুযাগকরণং ॥ * ॥ তদারম্ভে নক্ষত্রাদি দীপিকায়াং। পুষ্যামিত্রকরোত্তরস্ববরুণব্রহ্মাম্বুপিত্র্যেন্দুভিঃ শস্তেঽর্কে শুভযোগবারতিথিষু ক্রূরেম্ববীর্য্যেষু চ। পুষ্টেন্দৌ জলরাশিগে দশমগে শুক্রে শুভাংশোদয়ে প্রারম্ভঃ সলিলাশয়স্য শুভদো জীবেন্দুপুত্রোদয়ে ॥ পুষ্যানুরাধাহস্তোত্তরাত্রয়ধনিষ্ঠাশতভিষারোহিণীপূর্ব্বাষাঢ়ামঘামৃগশিরোভির্ভৈঃ ॥ মাৎস্যে। চন্দ্রাদিত্যবলং লব্ধ্বা লগ্নং শুভনিরীক্ষিতং। স্তম্ভোচ্ছ্রায়াদি কর্ত্তব্যমন্যত্র পরিবর্জয়েৎ ॥ অশ্বিনী রোহিণী মূলমুত্তরাত্রয়মৈন্দবং। স্বাতী হস্তানুরাধা চ গৃহারম্ভে প্রশস্যতে ॥ বজ্রব্যাঘাতশূলে চ ব্যতীপাতাতিগণ্ডয়োঃ। বিষ্কম্ভগণ্ডপরিঘবর্জ্জং যোগেষু কারয়েৎ ॥ আদিত্যভৌমবর্জ্জন্তু সর্ব্বে বারাঃ শুভাবহাঃ। প্রাসাদেঽপ্যেবমেব

স্থাৎ কূপবাপীষু চৈব হি ॥ জ্যোতিষে। গুরোর্ভৃগোরস্তবাল্যে ইত্যভিধায় প্রতিষ্ঠারম্ভণে দেবকূপাদের্বর্জয়ন্তি হি ॥ ✻ ॥ উৎসর্গফলমাহ। কপিলপঞ্চরাত্রে। সংক্ষেপাত্তু প্রবক্ষ্যামি জলদানফলং শৃণু। পুষ্করিণ্যাদিদানেন বিষ্ণুঃ প্রীণাতি বিশ্বধৃক্ ॥✻॥ জলাশয়করণার্থভূমিদানফলমাহ চিত্রগুপ্তঃ। জলাশয়ার্থং যো দদ্যাৎ বারুণং লোকমাপ্নুয়াৎ। ভূমিমিতি শেষঃ ॥ ✻ ॥ তৎপ্রতিষ্ঠাকালমাহ। মৎস্যপুরাণং। শৃণু রাজন্ মহাবাহো তড়াগাদিষু যো বিধিঃ। চৈত্রে বা ফাল্গুনে বাপি জ্যৈষ্ঠে বা মাধবে তথা ॥ মাঘে বা সর্ব্বদেবানাং প্রতিষ্ঠা শুভদা ভবেৎ। প্রাপ্য পক্ষং শুভং শুক্রমতীতে চোত্তরায়ণে॥ পুণ্যেঽহ্নি বিপ্র কথিতে কৃত্বা ব্রাহ্মণবাচনং ॥ অতীতে প্রবৃত্তে। তথা চ প্রতিষ্ঠাসমুচ্চয়ে। মাঘেঽথ ফাল্গুনে বাপি চৈত্রবৈশাখয়োরপি। জ্যৈষ্ঠাষাঢ়কয়োর্বাপি প্রবৃত্তে চোত্তরায়ণে ॥ ব্রাহ্মণবাচনং পুণ্যাহস্বস্তিঋদ্ধিবাচনং ॥ ✻ ॥ পঞ্চমী চ দ্বিতীয়া চ তৃতীয়া সপ্তমী তথা। দশমী পৌর্ণমাসী চ তথা শ্রেষ্ঠা ত্রয়োদশী। আসু প্রতিষ্ঠা বিধিবৎ কৃতা বহুফলা ভবেৎ ॥ আষাঢ়ে দ্বে তথা মূলমুত্তরাত্রয়মেব চ। জ্যৈষ্ঠাশ্রবণরোহিণ্যঃ পূর্ব্বভাদ্রপদা তথা ॥ হস্তাশ্বিনী রেবতী চ পুষ্যো মৃগশিরস্তথা। অনুরাধা তথা স্বাতী প্রতিষ্ঠাদিষু শস্যতে ॥ ✻ ॥ বুধো বৃহস্পতিঃ শুক্রস্ত্রয় এতে শুভাবহাঃ। এতন্নিরীক্ষ্য তং লগ্নং নক্ষত্রঞ্চ প্রশস্যতে॥ গ্রহতারাবলং লব্ধ্বা গ্রহপূজাং বিধায় চ। নিমিত্তং সকলং জ্ঞাত্বা বর্জয়িত্বাদ্ভুতাদিকং ॥ শুভযোগে শুভগৃহে ক্রূরগ্রহবিবর্জিতে। লগ্নে ঋক্ষে চ কুর্ব্বীত প্রতিষ্ঠাদিকমুত্তমং ॥ ✻ ॥ অয়নে বিষুবে তদ্বৎ ষড়শীতিমুখে তথা। এতেষু স্থাপনং কার্য্যং বিধিদৃষ্টেন কর্ম্মণা ॥ ভবিষ্যে। প্রতিপচ্চ দ্বিতীয়া চ তৃতীয়া পঞ্চমী তথা। দশমী ত্রয়োদশী চৈব পৌর্ণমাসী চ কীর্ত্তিতা ॥ সোমো বৃহস্পতিশ্চৈব শুক্রশ্চৈব তথা বুধঃ। এতে সৌম্যগ্রহাঃ প্রোক্তাঃ প্রতিষ্ঠাযাগকর্ম্মণি ॥✻॥ প্রতিষ্ঠাধিকারে ব্যবহারসমুচ্চয়ঃ। কৃষ্ণপক্ষে চ পঞ্চম্যামষ্টম্যাঞ্চৈব শস্যতে। দীপিকায়াং। পুষ্যাশ্বিশক্রভগদৈবতবাসবেষু সৌম্যানিলেশমঘরোহিণিমূলহস্তে। পৌষ্ণানুরাধহরিভেষু পুনর্ব্বসৌ চ কার্য্যাভিষেকতরুভূতপতিপ্রতিষ্ঠা ॥ বাসবং ধনিষ্ঠা। ঈশ আর্দ্রা। আর্দ্রায়াঞ্চৈব সৌভাগ্যমিতি প্রতিষ্ঠাসারসমুচ্চয়াৎ ॥✻॥ বাপীত্যাদীনাং পূর্ত্তত্বাভিধানাৎ শূদ্রস্যাধিকারমাহ জাতূকর্ণঃ। বাপীকূপতড়াগাদি দেবতায়তনাদি চ। অন্নপ্রদানমারামাঃ পূর্ত্তমিত্যভিধীয়তে॥ অগ্নিহোত্রং তপঃ সত্যং বেদানামনুপালনং। আতিথ্যং বৈশ্বদেবশ্চ ইষ্টমিত্যভিধীয়তে ॥ গ্রহোপরাগে যদ্দানং পূর্ত্তমিত্যভিধীয়তে। ইষ্টাপূর্ত্তং দ্বিজাতীনাং ধর্ম্মঃ সামান্য উচ্যতে ॥ অধিকারী ভবেৎ শূদ্রঃ পূর্ত্তে ধর্ম্মে ন বৈদিকে ॥ বৈদিকে বেদাধ্যয়নসাধ্যে অগ্নিহোত্রাদাবিতি রত্নাকরঃ ॥ এবং স্ত্রীণামপি

পূর্ত্তাধিকারঃ। যথা। নারীত্যনুবৃত্তৌ বৃহস্পতিঃ'। পিতৃব্যগুরুদৌহিত্রান্ ভর্ত্তুঃস্বস্ত্রীয়মাতুলান্। পূজয়েৎ কব্যপূর্ত্তাভ্যাং বৃদ্ধানাথাতিথীন্ স্ত্রিয়ঃ॥ * ॥ অস্য পূর্ত্তত্বাৎ বৃদ্ধিশ্রাদ্ধমপ্যাদৌ কর্ত্তব্যং। যথা গোভিলঃ। বৃদ্ধিঃ পূর্ত্তেষু যুগ্মা নাশয়েৎ প্রদক্ষিণমুপচারঃ। যবৈস্তিলার্থ ইতি॥ * ॥ হয়শীর্ষপঞ্চরাত্রে। বাপীকূপতড়াগানাং পশ্চিমে যাগমণ্ডপং। কুর্য্যাদ্যথাক্রমেণৈব কন্যসং মধ্যমুত্তমং॥ কন্যসং দশহস্তন্তু কূপে শস্তং তথানঘ। দ্বিষট্‌কং কারয়েদ্বাপ্যাং পুষ্করিণ্যাং চতুর্দ্দশ। দ্বিরষ্টহস্তং কুর্ব্বীত তড়াগে মণ্ডপং শুভং॥ কন্যসং কনীয়াংসং॥ * ॥ সঙ্কল্পবিধিমাহ ভবিষ্যে। গৃহিত্বৌড়ুম্বরং পাত্রং বারিপূর্ণং গুণান্বিতং। দর্ভত্রয়ং সাগ্রমূলং ফলপুষ্পসমন্বিতং॥ জলাশয়ারামকূপে সঙ্কল্পে পূর্ব্বাদিঙ্মুখঃ। সাধারণে চোত্তরাস্য ঐশান্যাং নিঃক্ষিপেৎ পয়ঃ॥ মৎস্যপুরাণে। প্রাগুদক্‌প্রবণে দেশে তড়াগস্য সমীপতঃ। চতুর্হস্তাং শুভাং বেদীং চতুরস্রাং চতুর্মুখীং॥ কারয়েদিত্যর্থঃ। তথা। সর্ব্বতঃ সমবর্ণাঃ স্যুঃ পতাকা ধ্বজসংযুতাঃ। সমবর্ণা বক্ষ্যমাণলোকপালবর্ণাঃ। অশ্বত্থোড়ুম্বরপ্লক্ষবটশাখাযুতানি চ। মণ্ডপস্য প্রতিদিশং দ্বারাণ্যেতানি কারয়েৎ॥ তথা। কুলশীলসমাপন্নঃ স্থাপকঃ স্যাদ্দ্বিজোত্তমঃ। স্থাপক আচার্য্য ইতি রত্নাকরঃ॥ * ॥ সৌবর্ণৌ কূর্ম্মমকরৌ রাজতৌ মৎস্যডুণ্ডুভৌ। তাম্রৌ কুলীরমণ্ডূকাবায়সঃ শিশুমারকঃ॥ এবমাসাদ্য তান্ সর্ব্বানাদৌ চৈব বিশাম্পতে। শুক্লমাল্যাম্বরধরঃ শুক্লগন্ধবিলেপনঃ॥ সর্ব্বৌষধ্যুদকস্নানস্নাপিতো বেদপুঙ্গবঃ। যজমানঃ সপত্নীকঃ পুত্রপৌত্রসমন্বিতঃ। পশ্চিমং দ্বারমাশ্রিত্য প্রবিশেদ্যাগমণ্ডপং॥ ততো মঙ্গলশব্দেন ভেরীণাং নিঃস্বনেন চ। রজসা মণ্ডলং কুর্য্যাৎ পঞ্চবর্ণেন তত্ত্ববিৎ॥ ষোড়শারং ততশ্চক্রং পদ্মগর্ভং চতুর্মুখং। চতুরস্রঞ্চ পরিতো বৃত্তং মধ্যে সুশোভনং॥ বেদ্যাশ্চোপরি তৎ কৃত্বা গ্রহাঁল্লোকপতীংস্তথা। বিন্যসেন্মন্ত্রতঃ সর্ব্বান্ প্রতিদিক্ষু বিচক্ষণঃ। ঝসাদীন্ স্থাপয়েন্মধ্যে বারুণং মন্ত্রমাশ্রিতঃ॥ ঝসাদীন্ কূর্ম্মাদীন্। ব্রহ্মাণঞ্চ শিবং বিষ্ণুং তত্রৈব স্থাপয়েদ্‌বুধঃ। বিনায়কন্তু বিন্যস্য কমলামম্বিকান্তথা॥ পূজয়েদিতি শেষঃ। তথা। নবগ্রহমখং কৃত্বা ততঃ কর্ম্ম সমারভেৎ। অন্যথা ফলদং পুংসাং ন কাম্যং জায়তে ক্বচিৎ॥ * ॥ গ্রহপূজামণ্ডলং শান্তিদীপিকায়াং। বর্ত্তুলো ভাস্করঃ কার্য্যো হ্যর্দ্ধচন্দ্রো নিশাকরঃ। অঙ্গারকস্ত্রিকোণস্তু বুধশ্চাপাকৃতিস্তথা॥ পদ্মাকৃতির্গুরুঃ কার্য্যশ্চতুষ্কোণস্তু ভার্গবঃ। খড়্গাকৃতিঃ শনিঃ কার্য্যো রাহুস্তু মকরাকৃতিঃ। সর্পাকৃতিস্তথা কেতুঃ কার্য্যো মণ্ডলপূজনে॥ মৎস্যপুরাণে। দেবতানাং ততঃ স্থাপ্যা বিংশতির্দ্বাদশাধিকা। সূর্য্যঃ সোমস্তথা ভৌমো বুধজীবসিতার্কজাঃ॥ রাহুঃ কেতুরিতি

প্রোক্তা গ্রহা লোকহিতে রতাঃ। মধ্যে তু ভাস্করং বিদ্যাল্লোহিতং দক্ষিণেন তু॥ উত্তরেণ গুরুং বিদ্যাদ্বুধং পূর্ব্বোত্তরেণ তু। পূর্ব্বেণ ভার্গবং বিদ্যাৎ সোমং দক্ষিণপূর্ব্বকে॥ পশ্চিমেন শনিং বিদ্যাদ্রাহুং পশ্চিমদক্ষিণে। পশ্চিমোত্তরতঃ কেতুং স্থাপয়েৎ শুক্লতণ্ডুলৈঃ॥ * ॥ ভাস্করস্যেশ্বরং বিদ্যাদুমাঞ্চ শশিনস্তথা। স্কন্দমঙ্গারকস্যাপি বুধস্যাপি তথা হরিং॥ ব্রহ্মাণঞ্চ গুরোর্ব্বিদ্যাৎ শুক্রস্যাপি প্রজাপতিং। শনৈশ্চরস্য তু যমং রাহোঃ কালন্তথৈব চ। কেতুনাঞ্চিত্রগুপ্তঞ্চ সর্ব্বেষামধিদেবতাঃ॥ * ॥ অগ্নিরাপঃ ক্ষিতির্বিষ্ণুরিন্দ্র ঐন্দ্রী চ দেবতাঃ। প্রজাপতিশ্চ সর্পশ্চ ব্রহ্মা প্রত্যধিদেবতাঃ॥ * ॥ বিনায়কং তথা দুর্গাং বায়ুমাকাশমেব চ। আবাহয়েদ্ব্যাহৃতিভিস্তথৈবাশ্বিকুমারকৌ॥ সংস্মরেদ্রক্তমাদিত্যমঙ্গারকসমন্বিতং। সোমশুক্রৌ তথা শ্বেতৌ বুধজীবৌ চ পিঙ্গলৌ॥ মন্দরাহূ তথা কৃষ্ণৌ ধূম্রং কেতুগণং বিদুঃ। গ্রহবর্ণানি দেয়ানি বাসাংসি কুসুমানি চ॥ * ॥ ধূপামোদোঽত্র সুরভিরুপরিষ্টাদ্বিতানকং। শোভনং স্থাপয়েৎ প্রাজ্ঞঃ ফলপুষ্পসমন্বিতং॥ * ॥ গুড়ৌদনং রবেঃ কুর্য্যাৎ সোমায় ঘৃতপায়সং। সংযাবকং কুজে দদ্যাৎ ক্ষীরান্নং সোমসূনবে॥ দধ্যোদনন্তু জীবায় শুক্রায় চ ঘৃতোদনং। শনৈশ্চরায় কৃষরমাজমাংসঞ্চ রাহবে। চিত্রোদনন্তু কেতুভ্যঃ সর্ব্বভক্ষৈঃ সমর্চ্চয়েৎ॥*॥ স্কন্দপুরাণং। জন্মভূর্গোত্রমেতেষাং বর্ণস্থানমুখানি চ। যোঽজ্ঞাত্বা কুরুতে শান্তিং গ্রহাস্তে নাবমানিতাঃ॥ * ॥ উৎপন্নোঽর্কঃ কলিঙ্গেষু যমুনায়াঞ্চ চন্দ্রমাঃ। অঙ্গারকস্ত্ববন্ত্যাস্তু মগধে তু হিমাংশুজঃ॥ সৈন্ধবেষু গুরুর্জাতঃ শুক্রো ভোজকটে তথা। শনৈশ্চরস্তু সৌরাষ্ট্রে রাহুর্বৈরাটিকাপুরে। অন্তর্বেদ্যাং তথা কেতুরিত্যেতা গ্রহভূময়ঃ॥ * ॥ আদিত্যঃ কাশ্যপো গোত্র আত্রেয়শ্চন্দ্রমা ভবেৎ। ভারদ্বাজো ভবেদ্ভৌমস্তথাত্রেয়শ্চ সোমজঃ॥ সুরপূজ্যোঽঙ্গিরোগোত্রঃ শুক্রো বৈ ভার্গবস্তথা। শনিঃ কাশ্যপ এবায়ং রাহুঃ পৈঠীনসিস্তথা। কেতবো জৈমিনেয়াশ্চ গ্রহা লোকহিতে রতাঃ॥ কাত্যায়নঃ। তদ্গোত্রজাতী অজ্ঞাত্বা হোমং যঃ কুরুতে নরঃ। ন তস্য ফলমাপ্নোতি ন সন্তুষ্যন্তি দেবতাঃ॥ ন হুতং ন চ সংস্কারো ন চ যজ্ঞফলং লভেৎ। * । ব্রাহ্মণৌ ভার্গবাচার্য্যৌ ক্ষত্রিয়াবর্কলোহিতৌ। বৈশ্যৌ সোমবুধৌ চৈব শেষান্ শূদ্রান্ বিনির্দ্দিশেৎ॥*॥ শান্তিদীপিকায়াং। শুক্রার্কৌ প্রাঙ্মুখৌ স্থাপ্যৌ শশাঙ্কার্কী চ দক্ষিণে। উত্তরাস্যৌ গুরুবুধৌ পশ্চিমাস্যাস্তথাপরে॥ * ॥ অগ্নিপ্রণয়নানন্তরং গ্রহাবাহনমাহ বৈশম্পায়নঃ। অগ্নিপ্রণয়নং কৃত্বা পশ্চাদাবাহয়েৎ সুরান্। মধ্যে তু ভাস্করং বিদ্যাল্লোহিতং দক্ষিণেন তু॥ যদ্যপি গ্রহাদীনাং বহবঃ শব্দা বাচকাঃ সন্তি শব্দোপহিতশ্চার্থোঽর্থোপহিতঃ শব্দো বা দেবতা উভয়থাপি শব্দানিয়মাৎ

অবিনিগমকঃ স্যাৎ তথাপি বহুষু দৃষ্টত্বাৎ সূর্য্যাদিশব্দেন গ্রহাণাং দেবতাত্বং। তেন সূর্য্যসোমকুজবুধবৃহস্পতিশুক্রশনৈশ্চররাহুকেতুপদৈর্দ্দেবতাত্বং। অধিদেবতানাস্তু ত্র্যম্বকোমাস্কন্দবিষ্ণুব্রহ্মেন্দ্রযমকালচিত্রগুপ্তানামেভিরেব পদৈঃ। তথা প্রত্যধিদেবতানাঞ্চ অগ্ন্যপ্পৃথিবীবিষ্ণিন্দ্রশচীপ্রজাপতিব্রহ্মণামেভিরেব পদৈঃ। তথা বিনায়কদুর্গাবায্বাকাশাশ্বিনামেভিরেব। ইতি কৃত্যপ্রদীপঃ ॥ * ॥ শান্তিদীপিকোক্তধ্যানানি প্রয়োগে বক্ষ্যন্তে। লোকপালমন্ত্রানাহ ভবিষ্যে। ন্যাসমন্ত্রানহং বক্ষ্যে লোকপালাত্মকানিহ। ইন্দ্রস্তু মহসা দীপ্তঃ সর্ব্বদেবাধিপো মহান্। বজ্রহস্তো মহাসত্ত্বস্তস্মৈ নিত্যং নমো নমঃ ॥ আগ্নেয়ঃ পুরুষো রক্তঃ সর্ব্বদেবময়োঽব্যয়ঃ। ধূমকেতুরনাধৃষ্যস্তস্মৈ নিত্যং নমো নমঃ ॥ যমশ্চোৎপলবর্ণাভঃ কিরীটী দণ্ডধৃক্ সদা। ধর্ম্মসাক্ষী বিশুদ্ধাত্মা তস্মৈ নিত্যং নমো নমঃ ॥ নির্ঋতিস্তু পুমান্ কৃষ্ণঃ সর্ব্বরক্ষোঽধিপো মহান্। খড়্গহস্তো মহাসত্ত্বস্তস্মৈ নিত্যং নমো নমঃ ॥ বরুণো ধবলো জিষ্ণুঃ পুরুষো নিম্নগাধিপঃ। পাশহস্তো মহাবাহুস্তস্মৈ নিত্যং নমো নমঃ ॥ বায়ুশ্চ সর্ব্ববর্ণোঽয়ং সর্ব্বগন্ধবহঃ শুভঃ। পুরুষো ধ্বজহস্তশ্চ তস্মৈ নিত্যং নমো নমঃ ॥ গৌরো যস্তু পুমান্ সৌম্যঃ সর্ব্বৌষধিসমন্বিতঃ। নক্ষত্রাধিপতিঃ সোমস্তস্মৈ নিত্যং নমো নমঃ ॥ ঈশানঃ পুরুষঃ শুক্লঃ সর্ব্ববিদ্যাধিপো মহান্। শূলহস্তো বিরূপাক্ষস্তস্মৈ নিত্যং নমো নমঃ ॥ পদ্মযোনিশ্চতুর্ম্মূর্ত্তির্হেমবাসাঃ পিতামহঃ। যজ্ঞাধ্যক্ষশ্চতুর্বক্ত্রস্তস্মৈ নিত্যং নমো নমঃ ॥ যোঽসাবনন্তরূপেণ ব্রহ্মাণ্ডং সচরাচরং। পুষ্পবদ্ধারয়েন্মূর্দ্ধ্নি তস্মৈ নিত্যং নমো নমঃ ॥ ওঁকারপূর্ব্বকা হ্যেতে ন্যাসে বলিনিবেদনে। মন্ত্রাঃ স্যুঃ সর্ব্বকার্য্যাণাং বৃদ্ধিপুষ্টিফলপ্রদাঃ ॥ * ॥ হয়শীর্ষপঞ্চরাত্রে। অথবা কামতঃ কুর্য্যাৎ সূক্ষ্মরত্নাদিনির্ম্মিতং। দ্বিভুজং হংসপৃষ্ঠস্থং দক্ষিণেনাভয়প্রদং ॥ বামেন নাগপাশন্তু ধারয়ন্তং সুভোগিনং। মৌলিনং বা মহাভাগং কারয়েদযাদসাং পতিং ॥ বামে তু কারয়েদ্বৃদ্ধিং দক্ষিণে পুষ্করং শুভং। নাগৈর্নদীভির্যাদোভিঃ সমুদ্রৈঃ পরিবারিতং। কৃত্বৈবং বরুণং দেবং প্রতিষ্ঠাবিধিমাচরেৎ ॥ পুষ্করং তৎপুত্রং। তথা প্রসন্নবদনমিতি ধ্যানং বক্ষ্যতে। বরুণমন্ত্রোদ্ধারস্তু তত্রৈব। অষ্টাবিংশান্তবীজেন চতুর্দ্দশযুতেন চ। অর্দ্ধেন্দুবিন্দুযুক্তেন প্রণবোদ্দীপিতেন চ ॥ তেন ওঁ বৌঁ ইতি মন্ত্রঃ। প্রতিমায়াং স্থিতিং কৃত্বা প্রণবেন নিরোধয়েৎ। পূজয়েৎ গন্ধপুষ্পাদ্যৈঃ সান্নিধ্যং পাশমুদ্রয়া ॥ স্থিতিং প্রাণপ্রতিষ্ঠাং। নিরোধয়েৎ অন্তর্গতাঙ্গুষ্ঠমুষ্টিভ্যাং নিরোধমুদ্রাং দর্শয়েৎ। দানকল্পতরুরত্নাকরয়োর্ব্বহ্বৃচগৃহ্যপরিশিষ্টং ॥ * ॥ অথাতো বরুণবিধিং বাপীকূপতড়াগবজ্জং ব্যাখ্যাস্যামঃ। পুণ্যে তিথিকরণে শুভে নক্ষত্রে প্রতীচীং দিশমাস্থায় প্রাক্‌প্রবণে

উদক্প্রবণে বা উদক্সমীপে অগ্নিমুপ-সমাধায় বারুণং চরুং শ্রপয়িত্বা আজ্য-ভাগান্তং হুত্বা চতস্র আজ্যাহুতীর্জ্জুহুয়াৎ। সমুদ্রজ্যেষ্ঠা ইতি প্রত্যৃচং ততো হবিষা অষ্টভির্জুহুয়াৎ। তদ্বায়ামি ব্রাহ্মণা বন্দমানঃ ইতি পঞ্চ। ত্বন্নোহগ্নে বরুণস্য বিদ্বানিতি দ্বে ইমং মে বরুণং ত্রখা হবেতি চ স্বিষ্টিকৃতঞ্চ নবমং নব বৈ প্রাণাঃ প্রাণ ইব আপস্তস্মাদাপো নবভির্জুহোতি। *। মার্জনান্তে ধেনুমবতারয়েৎ। অবতার্য্য-মাণান্তামনুমন্ত্রয়েৎ। ইদং সলিলং পবিত্রং কুরুষ্ব শুদ্ধঃ পূতো মৃতঃ সন্তু নিত্যং তারয়ন্তী সর্ব্বতীর্থাভিষিক্তং লোকালোকং তরতে তীর্য্যতে চ। ইত্যনেন পুচ্ছাগ্রে যজমানঃ স্বয়ং লগ্ন আচার্য্যেণান্বারব্ধ উত্তীর্য্য আপোহস্মান্মাতরঃ শুন্ধয়ন্ত্বিতি ঐশান্যাং দিশি উত্থাপয়েৎ। সুযবসা ভগবতীহ ভূয়া ইতি হিং কৃতঞ্চেৎ তদা হিং কৃণ্বতী বসুমতী বসূনামিতি জপেৎ। তাং সচেলকণ্ঠাং কনকশৃঙ্গীং বৃষপ্রজাং রূপ্যখুরাং কাংস্যোপদোহাং বিপ্রায় সামগায় দদ্যাৎ ইতরাং বা। যথাশক্তি দক্ষিণা চ দেয়া ইতি। তত উৎসর্গং কুর্য্যাৎ। দেবপিতৃমনুষ্যাঃ প্রীয়ন্তাং ইত্যাহ শৌনকঃ। যজমানো ব্রাহ্মণান্ ভোজয়িত্বা স্বস্তি বাচয়ীতেতি। অস্যার্থঃ। তিথ্যাদীনাং শুভত্বং পূর্ব্ববচনেভ্যো জ্ঞেয়ং। এষ এব বিধির্গোভিলপারস্কর-গৃহ্যোক্তকর্ম্মানুষ্ঠাতৃভ্যামনুষ্ঠীয়তে। যন্নাম্না তং স্বশাখায়াং পরোক্তমবিরোধি চ। বিদ্বদ্ভিস্তদনুষ্ঠেয়মগ্নিহোত্রাদি কর্ম্মবৎ॥ ইতি ছন্দোগপরিশিষ্টাৎ। ততশ্চ অগ্নি-মুপসমাধায়েতি স্বস্বগৃহ্যোক্তবিধিনাগ্নিং সংস্থাপ্য বারুণং বরুণদেবতাকং চরুং নিষ্পাদ্য আজ্যভাগান্তং হুত্বা ইতি ছন্দোগেতরপরং। স তু বিরূপাক্ষজপান্তাং কুশণ্ডিকাং সমাপ্য মহাব্যাহৃতীর্হুত্বা প্রকৃতং কর্ম্ম কুর্য্যাৎ। তত্র প্রথমতঃ পিঙ্গভ্রূশ্মশ্রু ইত্যাদি পুরাণীয়ং ধ্যাত্বা অগ্নে ত্বং বরুণনামাসীতি নাম কুর্য্যাৎ। প্রতিষ্ঠায়াং রোহিতশ্চ বাস্তুযাগে প্রজাপতিঃ। জলাশয়প্রতিষ্ঠায়াং বরুণঃ সমুদাহৃতঃ॥ ইতি স্মৃতেঃ। তত আবাহ্য পূজয়িত্বা সমিৎপ্রক্ষেপানন্তরং মহাব্যাহৃতিহোমং কৃত্বা সমুদ্রা জ্যেষ্ঠা ইত্যাদি চতুর্ভির্মন্ত্রৈশ্চতস্র আহুতীর্জুহুয়াৎ। ওঁ তদ্বায়ামীতি ওঁ তদিদন্নক্তমিতি ওঁ শুনঃশেফোহীতি ওঁ অবতে হেলো বরুণ ইতি ওঁ উদুত্তমমিতি পঞ্চভিঃ ওঁ ত্বন্নোহগ্নে ইতি দ্বাভ্যাং ওঁ ইমাং বরুণ ইত্যেকেন এবং স্থানত্রয়োক্তৈর্ব্বহ্বৃচোক্তৈঃ প্রত্যেকমষ্টভির্ম ন্ত্রৈশ্চরুং চতুরাবর্ত্তং ভৃগুগোত্রো ভার্গব প্রবরশ্চ পঞ্চাবর্ত্তং স্রুচা জুহুয়াৎ। অগ্নয়ে স্বিষ্টিকৃতে চ। ততঃ কুশণ্ডিকোক্তবিধিনা শেষং সমাপয়েৎ। নব বৈ প্রাণা ইতি নবাহুতিস্তুতিঃ। মার্জনান্ত ইতি যজমানাভিষেকঃ। তদ্বিধানন্তু মৎস্যপুরাণে। গজাশ্বরথ্যাবল্মীকসঙ্গমাৎ হ্রদগোকুলাৎ। মৃদমাদায় কুম্ভেষু প্রক্ষিপেচ্চত্বরাত্তথা॥ গোরোচনাঞ্চ সিদ্ধার্থান্

গন্ধান্ গুগ্গুলুমেব চ। স্নপনং তস্য কর্ত্তব্যং পঞ্চভঙ্গসমন্বিতং। পূর্ব্বকর্ত্তুর্মহামন্ত্রৈরেবং কৃত্বা বিধানতঃ॥ পঞ্চভঙ্গাশ্চ শান্তিকপৌষ্টিককল্পতরূক্তাঃ। অশ্বত্থোড়ুম্বরপ্লক্ষবটচূতস্য পল্লবাঃ। মহামন্ত্রৈঃ। সুরাস্ত্বামভিষিঞ্চন্ত্বিত্যাদিভিঃ। এতৎপর্য্যন্তং কূপেঽপি। কাপিলে। ঐশান্যাং স্থাপয়েদ্‌যূপং খাতাৎ পঞ্চকরান্তরং। যূপবৃক্ষেতিমন্ত্রেণ সর্পাকারং সুশোভনং। পূজয়িত্বা তু বস্ত্রাদ্যৈস্ততো যষ্টিং প্রচালয়েৎ॥ মাৎস্যে। ত্র্যরত্নিমাত্রো যূপঃ স্যাৎ ক্ষীরিবৃক্ষবিনির্ম্মিতঃ। যজমানপ্রমাণো বা সংস্থাপ্যো ভূতিমিচ্ছতা॥ ক্ষীরিবৃক্ষোঽশ্বত্থাদিঃ। ততো ধেনুং সচেলকণ্ঠাং কাংস্যাদ্যুক্তবিশেষণযুক্তাং জলাশয়েঽবতারয়েৎ। তথা হয়শীর্ষপঞ্চরাত্রে। গাং সবৎসাং সমানীয় সুশীলাঞ্চ পয়স্বিনীং। কাংস্যোপদোহাং ঘণ্টাদিবস্ত্রপুষ্পোপশোভিতাং। স্বর্ণশৃঙ্গীং রৌপ্যখুরাং তাম্রপৃষ্ঠাং সুশোভনাং॥ লাঙ্গূলন্যস্তহস্তোঽসৌ যজমানঃ সবান্ধবঃ। শনৈঃ সন্তারয়িত্বা তামাচার্য্যায় নিবেদয়েৎ॥ কাংস্যোপদোহাং কাংস্যক্রোড়ামিতি যাবৎ। কাপিলে। অজলে জলমুৎপাদ্য যজমানঃ সভার্য্যকঃ। তরেদ্বৈ প্রাঙ্মুখো ভূত্বা কৃতগোলাঙ্গূলাঙ্গুলিঃ॥ ইদং সলিলং পবিত্রং ইতিমন্ত্রেণাবতার্য্যমাণামনুমন্ত্রয়েৎ। ততঃ প্রাঙ্মুখঃ সন্নবতারয়েৎ। সা চ গৌঃ পশ্চিমতোঽবতার্য্যা। ততঃ কূলসমীপং গত্বা তর্পয়েৎ। যথা কাপিলং। পুনঃ পুচ্ছোদকেনাথ সতিলেন কুশেন তু। ভূয়ৈনৈবাপসব্যেন পিতৃতীর্থেন তর্পয়েৎ॥ গতাশ্চাত্রাগমিষ্যন্তি যে কুলে মম বান্ধবাঃ। তে সর্ব্বে তৃপ্তিমায়ান্তু ময়া দত্তজলেন বৈ। ততো মুঞ্চামিমন্ত্রেণ মুঞ্চেদ্গাং বৎসসংযুতাং॥ আচার্য্যেণাম্বারব্ধ উত্তীর্য্য আপো হস্মান্মাতরঃ শুন্ধয়ন্ত্বিতিমন্ত্রেণ ঐশান্যামুত্থাপয়েৎ। সুযবসা ভগবতীহ ভূয়া ইতি ব্রূয়াৎ। সা যদি হিংকারং করোতি তদা হিং কৃণ্বতীত্যাদি জপেৎ। তত উক্তবিশেষণযুক্তাং ধেনুমাচার্য্যায় সামগায় দদ্যাৎ। ততো যথাশক্তি দক্ষিণাঞ্চ দদ্যাৎ। এতৎপর্য্যন্তং ন কূপে ব্যবহ্রিয়তেঽসম্ভবাৎ।*। তত উৎসর্গং কুর্য্যাৎ। অত্র বিশেষমাহ রত্নাকরধৃতমৎস্যপুরাণং। ফলান্যাচিন্ত্য মনসা বিবিধানি শুভানি চ। প্রদদ্যাৎ সর্ব্বভূতেভ্যো জলপূর্ণং জলাশয়ং॥ কাপিলঞ্চ। ততস্তৎপশ্চিমং তীরং গত্বা পূর্ব্বাননস্থিতঃ। জলোৎসর্গং প্রকুর্ব্বীত সর্ব্বসত্ত্বার্থকং ধ্রুবং॥ সর্ব্বসত্ত্বার্থকং সর্ব্বভূতপ্রয়োজনকং। সর্ব্বভূতেভ্য উৎসৃজেদিত্যর্থঃ। দেবপিতৃমনুষ্যাঃ প্রীয়ন্তামিতি পঠেদিতি শেষঃ। উৎসৃজ্য যজমানো ব্রাহ্মণান্ স্বস্তি বাচয়ীতেতি দক্ষিণাদিভিরিতি শেষঃ। এতৎপর্য্যন্তং কূপেঽপি।*। জলাশয়োৎসর্গস্য সর্ব্বভূতোদ্দেশ্যকত্বেন অপকৃষ্টচেতনোদ্দেশ্যকত্বেঽপি ত্যাগত্বমপি। ততশ্চ কীটাদের্মমেদমিতি স্বীকারাযোগ্যত্বেন বেদমেয়োদ্দেশ্যগতস্বত্বাজনকত্যাগরূপত্বাৎ অস্য

যাগত্বং। অতএব জলাশয়োৎসর্গমুপক্রম্য মৎস্যপুরাণেঽপি । প্রাপ্নোতি তদ্যাগবলেন ভূয় ইতি যাগত্বেনাভিহিতং। ততশ্চ তজ্জলং স্বস্বত্বদূরীকরণেন নদ্যাদিবৎ সাধারণীকৃতং। অতএব সামান্যং সর্ব্বভূতেভ্যো ময়া দত্তমিদং জলং । রমন্তু সর্ব্বভূতানি স্নানপানাবগাহনৈঃ॥ ইতি মন্ত্রলিঙ্গেন উপাদানং বিনা কস্যাপি ন স্বত্বমিতি। ততশ্চাস্য যাগবদুত্তরাপ্রতিপত্তেরশ্রুতত্বাৎ সাধারণজনস্য পরিগ্রহমাত্রেণ গোতমোক্তেন স্বামিত্বশ্রুতের্যজমানস্যাপি তথাত্বেন স্বামিত্বাৎ তত্র স্নানাদাবদোষ ইতি তত্ত্বং। যথা গোতমঃ। স্বামী রিক্থক্রয়সম্বিভাগপরিগ্রহাধিগমেষু ব্রাহ্মণস্যাধিকং লব্ধং ক্ষত্রিয়স্য বিজিতং নির্দ্দিষ্টং বৈশ্যশূদ্রয়োরিতি। পরিগ্রহোঽনন্যপূর্ব্বস্য জলতৃণকাষ্ঠাদেঃ স্বীকার ইতি মিতাক্ষরা॥ ঋক্থাধিকারে ব্যক্তমাহাপস্তম্বঃ। দায়াদ্যং শিলোঞ্ছৌ চান্যচ্চাপরিগৃহীতমিতি। অপরিগৃহীতমন্যাস্বীকৃতমস্বামিকমিতি যাবৎ। নির্ব্বিষ্টং বেতনলব্ধং নির্বেশো ভৃতিভোগয়োরিত্যমরকোষত্রিকাণ্ডশেষয়োঃ॥ *॥ হয়শীর্ষে। আপোহিষ্ঠেতি তিসৃভিঃ পঞ্চগব্যং বিনিঃক্ষিপেৎ। তীর্থতোয়ং তথা পুণ্যং শান্তিতোয়ং দ্বিজৈঃ কৃতং॥ গোকুলং পায়য়েৎ পশ্চাৎ দ্বিজান্ বেদবিদস্তথা। ততোঽন্নং ভোজয়েদ্বিপ্রান্ দদ্যাত্তেভ্যশ্চ দক্ষিণাং॥ এতৎপর্য্যন্তং কূপেঽপি। *। কাপিলে। নাগানামষ্ট নামানি লিখিতানি পৃথক্ পৃথক্। ততঃ কুম্ভে চ নিঃক্ষিপ্য গায়ত্র্যা চ বিলোড্য বৈ॥ উদ্ধরেৎ পত্রিকামেকাং তত্রৈব নাগমীক্ষয়েৎ। যস্য নামোদ্ধরেদ্বংশ স বৈ জলাধিপঃ স্মৃতঃ। তঞ্চ সংপূজ্য গন্ধাদ্যৈর্দদ্যাৎ ক্ষীরঞ্চ পায়সং॥ পত্রাণ্যাম্রস্য যোগীশ্বরধৃতবচনাদ্যথা। অষ্টৌ নামান্যাম্রপত্রে কৃত্বা চৈব প্রযত্নতঃ। তানি চ গারুড়ে। অনন্তো বাসুকিঃ পদ্মো মহাপদ্মোঽথ তক্ষকঃ। কুলীরঃ কর্কটঃ শঙ্খো হ্যষ্টৌ নাগাঃ প্রকীর্ত্তিতাঃ॥ এতানি নামানি আম্রপত্রে লিখিত্বা কলসমধ্যে নিঃক্ষিপ্য গায়ত্র্যা ছন্দসা মথ্নামি ইতি রঘুনাথধৃতমন্ত্রেণালোড্য যস্য নামোত্তিষ্ঠতি তং নষ্ট্যাং সমাবাহ্যানেন নাগেনাস্য জলস্য রক্ষা কর্ত্তব্যা ইতি ব্রাহ্মণান্ শ্রাবয়েৎ। হয়শীর্ষে। বৈণুকং বারুণঞ্চৈব পুন্নাগং নাগকেশরং। বকুলং চম্পকঞ্চৈব নিম্বঞ্চৈবাথ খাদিরং॥ এতেষামেব দারূণাং নাগযষ্টিঃ প্রকীর্ত্তিতা। সবক্রকোটরং ত্যক্ত্বা তস্মাৎ কুর্য্যাদযথেপ্সিতং॥ তথা চ বৃহস্পতিঃ। শূলচক্রাঙ্কিতাং কৃত্বা স্থাপয়িত্বা জলাশয়ে। *। দ্বাদশাঙ্গুলমানন্তু বাপীচক্রং প্রকল্পয়েৎ॥ ষোড়শং পুষ্করিণ্যান্তু বিংশতিঞ্চ সরোবরে। সাগরে হস্তমাত্রন্তু লৌহং তাম্রন্তু পৈত্তলং॥ চক্রঞ্চ বিবিধং প্রোক্তং কুর্য্যাত্তেষাং যথেপ্সিতং। *। শতহস্তা ভবেদ্বাপী দ্বিগুণা পুষ্করিণ্যপি॥ ত্রিগুণন্তু সরোমানমত ঊর্দ্ধন্তু সাগরঃ। ততো দ্বাদশ-

ঃ ষোড়শবিংশত্যেকবিংশত্যন্যতমকনিষ্ঠাঙ্গু-
ল্যবচ্ছিন্নহস্তপ্রমাণাং যষ্টিং বক্ষ্যমাণ-
মন্ত্রেণ স্থাপয়েৎ। ওঁ গন্ধদ্বারেতি গন্ধ-
বারিণা ওঁ ভদ্রংকর্ণেভিরিতি তৈলহরি-
দ্রয়া ওঁ কাণ্ডাৎ কাণ্ডাদিতি দূর্ব্বাভিঃ
ওঁ দ্রুপদাদিব ইত্যাদিনা সপ্তমৃত্তিকা-
দিভিঃ ওঁ মধুবাতেতি পঞ্চামৃতেন ওঁ যাঃ
ফলিনীরিতি ফলোদকেন ওঁ যুবাসুবাসা
ইতি ক্ষুদ্রঘণ্টিকাযুতাং পতাকাং যষ্ট্যাং
বধ্নীয়াং। ওঁ যষ্ট্যৈ নমঃ ইতিমন্ত্রেণ
পূজয়েৎ। পুষ্পাদ্যলঙ্কৃতাং যষ্টিং কন্দর-
সমীপং নয়েৎ। গুরুস্তু শঙ্খাদিনিঃস্বনৈ
রাজতবরুণপ্রতিমাং উত্তিষ্ঠেতি সমুত্থায়
প্রদক্ষিণত্রয়ং কৃত্বা আপোহিষ্টা ইত্যাদিনা
মন্ত্রেণ বরুণস্যোত্তম্ভনমসি ইতিমন্ত্রেণ
চ জলে ক্ষিপেৎ। ততস্তত্রৈব খাতে
শাদ্বলগোময়দধিমধুকুশমহানদীজলপঞ্চর-
ত্নানি ওঁ যেতেবাপী রোচনে দিব ইতি-
মন্ত্রেণ ক্ষিপেৎ। ওঁ ধ্রুবং ধ্রুবেণ মনসা
ইতিমন্ত্রেণ যষ্টিমভিমন্ত্র্য ওঁ বৃপবৃক্ষেতি-
মন্ত্রেণ জলমধ্যে আরোপয়েৎ। ততো
জলমাতৃঃ পূজয়েৎ। যথা হ্রীং পূর্ব্বস্যাং।
শ্রিয়ং আগ্নেয্যাং। শচীং দক্ষিণস্যাং।
মেধাং নৈঋর্ত্যাং। শ্রদ্ধাং পশ্চিমায়াং।
বিদ্যাং বায়ব্যাং। লক্ষ্মীং উত্তরস্যাং।
সরস্বতীং ঐশান্যাং। অধো বিদ্যাং।
ঊর্দ্ধে লক্ষ্মীং। পাদ্যাদিভিঃ সংপূজ্য
অগ্নিং প্রদক্ষিণীকৃত্য সূর্য্যাদিদ্বাত্রিংশ-
দ্দেবতাঃ পূজয়েৎ। ক্ষমস্বেতি বরুণং
ক্ষাময়েৎ। কাপিলং। শঙ্খতূর্য্যাদিনিনদৈ-
স্তথা বৈ ক্ষীরধারয়া। জলাশয়ং প্রবে-
ষ্টয়েদিতি শেষঃ। *। প্রতিষ্ঠানন্তরং
মাৎস্যে। ততঃ সহস্রং বিপ্রাণামথবাষ্ট-
শতন্তথা। ভোজয়েচ্চ যথাশক্ত্যা পঞ্চাশ-
দ্বাথ বিংশতিং॥ ইতি জলাশয়োৎসর্গ-
তত্ত্বং॥

পুষ্করী [ন্] (পুং) হস্তী। ইতি ত্রিকাণ্ড-
শেষঃ॥

পুষ্কলং (ক্লী) গ্রাসচতুষ্টয়াত্মকভিক্ষা। যথা।
ভিক্ষামাহুর্গ্রাসমাত্রমন্নং তস্মাচ্চতুর্গুণং।
পুষ্কলং হন্তকারন্তু তচ্চতুর্গুণমুচ্যতে॥
ইতি কৌর্ম্মে উপবিভাগে ১৭ অধ্যায়ঃ॥
অষ্টকুঞ্চিপরিমাণং। যথা। অষ্টমুষ্টির্ভবেৎ
কুঞ্চিঃ কুঞ্চয়োঽষ্টৌ চ পুষ্কলং। পুষ্ক-
লানি চ চত্বারি আঢ়কঃ পরিকীর্ত্তিতঃ
ইতি প্রায়শ্চিত্ততত্ত্বং॥

পুষ্কলঃ (ত্রি) শ্রেষ্ঠঃ। ইত্যমরঃ॥ বহুঃ। ইতি
হেমচন্দ্রঃ॥ উপস্থিতঃ। ইতি জটাধরঃ॥

পুষ্টং (ত্রি) কৃতপোষণং। তৎপর্য্যায়ঃ।
পুষিতং ২। ইত্যমরঃ॥ পতং ৩। ইতি
জটাধরঃ॥

পুষ্টিঃ (স্ত্রী) পোষণং। বৃদ্ধিঃ। ইতি
মেদিনী॥ অশ্বগন্ধা। ইতি রাজনির্ঘণ্টঃ॥
ষোড়শমাতৃকান্তর্গতদেবতাবিশেষঃ। ইতি
শ্রাদ্ধতত্ত্বং॥

পুষ্টিকা (স্ত্রী) জলশুক্তিঃ। ইতি রাজ-
নির্ঘণ্টঃ॥

কান্তঃ (পুং) গণেশঃ। ইতি শব্দরত্নাবলী॥

পুষ্টিদা (স্ত্রী) অশ্বগন্ধা। বৃদ্ধিঃ। ইতি রাজ-
নির্ঘণ্টঃ॥ পুষ্টিদাত্রী চ॥

পুষ্প য ফুল্লনে। ইতি কবিকল্পদ্রুমঃ ॥ পঞ্চমস্বরী। মূর্দ্ধন্যোপধঃ। ফুল্লনং বিকসনং। য পুষ্প্যতি কুন্দকোরকং। ইতি দুর্গাদাসঃ ॥

পুষ্পং (ক্লী) পুষ্প্যতি বিকসতি যঃ। ফুল ইতি ভাষা। তৎপর্য্যায়ঃ। প্রসূনং ২ কুসুমং ৩ সুমনসঃ ৪। ইত্যমরঃ ॥ সূনং ৫ প্রসবঃ ৬ সুমনঃ ৭। ইতি শব্দরত্নাবলী ॥ * ॥ স্বহস্তপুষ্পচয়নফলং যথা। উপহার্য্যাণি পুষ্পাণি মম কর্ম্মপরায়ণঃ। যো মামুপানয়েদ্ভূমে মম কর্ম্মপথে স্থিতঃ॥ পুষ্পাণি তত্র যাবন্তি মম মূর্দ্ধনি ধারয়েৎ। স কৃত্বা পুষ্কলং কর্ম্ম মম লোকায় গচ্ছতি ॥ * ॥ অকর্ম্মণ্যপুষ্পদানে দোষো যথা। বরাহ উবাচ। অকর্ম্মণ্যেন পুষ্পেণ যো মামর্চ্চয়তে ভুবি। পাতনং তস্য বক্ষ্যামি তচ্ছৃণু ত্বং বসুন্ধরে ॥ নাহং তৎ প্রতিগৃহ্লামি ন চ তে বৈ মম প্রিয়াঃ। মূর্খৈর্ভাগবতৈর্দ্দত্তং মম বিপ্রিয়কারিণঃ॥ পতন্তি নরকে ঘোরে রৌরবে তদনন্তরং। অজ্ঞাতস্য চ দোষেণ দুঃখান্যনুভবন্তি চ ॥ বানরো দশ বর্ষাণি মার্জারশ্চ ত্রয়োদশ। মূষকঃ পঞ্চ বর্ষাণি বলীবর্দ্দশ্চ দ্বাদশ॥ ছাগশ্চৈবাষ্ট বর্ষাণি মাসং বৈ গ্রামকুক্কুটঃ। ত্রীণি বর্ষাণি মহিষো ভবত্যেব ন সংশয়ঃ॥ এতত্তে কথিতং ভদ্রে পুষ্পং যস্মে ন রোচতে। অকর্ম্মণ্যং বিশালাক্ষি পুষ্পং যে ন দদন্তি বৈ ॥ ইতি বরাহপুরাণং ॥*॥ দেবীপ্রিয়পুষ্পাণি যথা। পুষ্পাণি দেব্যা বৈষ্ণব্যাঃ প্রিয়াণি শৃণু সংপ্রতি। বকুলৈশ্চৈব মন্দারৈঃ কুন্দপুষ্পকুরুণ্টকৈঃ॥ করবীরার্কপুষ্পৈশ্চ শাল্মলৈশ্চাপরাজিতৈঃ। দমনৈঃ সিন্ধুবারৈশ্চ সুরভীমরুবকৈস্তথা ॥ লতাভির্ব্রহ্মবৃক্ষৈশ্চ দূর্ব্বাঙ্কুরৈশ্চ কোমলৈঃ। মঞ্জরীভিঃ কুশানাঞ্চ বিল্বপত্রৈঃ সুশোভনৈঃ ॥ পূজয়েদ্বৈষ্ণবীং দেবীং কামাখ্যাং ত্রিপুরাং তথা। *। অন্যাশ্চ যাঃ শিবাপ্রীত্যৈ জায়ন্তে পুষ্পজাতয়ঃ ॥ তা ইমাঃ শৃণু কীর্ত্ত্যন্তে ময়া বেতালভৈরব। মালতী মল্লিকা জাতী যূথিকা মাধবীলতা ॥ পাটলা করবীরশ্চ জবা তর্কারিকা তথা। কুব্জকং তগরশ্চৈব কর্ণিকারোঽথ রোচনঃ ॥ চম্পকাম্রাতকৌ বাণো বর্ব্বরা মল্লিকা তথা। অশোকো লোধ্রতিলকৌ অটরূষশিরীষকৌ ॥ শমীপুষ্পঞ্চ দ্রোণঞ্চ পদ্মোৎপলবকারুণাঃ। শ্বেতারুণে ত্রিসন্ধ্যে চ পলাশঃ খদিরস্তথা ॥ বনমালাথ সেবন্তী কুমুদোঽথ কদম্বকঃ। চক্রং কোকনদঞ্চৈব ভণ্ডিলো গিরিকর্ণিকা ॥ নাগকেশরপুন্নাগৌ কেতক্যঙ্গুলিকা তথা। দোহদা বীজপূরশ্চ নমেরুঃ শালমেব চ ॥ ত্রপুষী চণ্ডবিন্ধশ্চ ঝিণ্টী পঞ্চবিধা তথা। এবমাদ্যুক্তকুসুমৈঃ পূজয়েৎ বরদাং শিবাং ॥ * ॥ বর্জ্জনীয়পুষ্পং যথা। পুষ্পঞ্চ কৃমিসম্ভিন্নং বিশীর্ণং ভগ্নমুদ্গতং। সকেশং মূষিকাধুতং যত্নেন পরিবর্জ্জয়েৎ ॥ যাচিতঃ পরকীয়ঞ্চ তথা পর্য্যুষিতঞ্চ যৎ। অন্ত্যস্পৃষ্টং পদা স্পৃষ্টং যত্নেন পরিবর্জ্জয়েৎ ॥ ইতি কালিকাপুরাণে ৬৮।৫৪ অধ্যায়ঃ ॥*॥

কেশবপূজনে প্রশস্তপুষ্পাণি যথা। মালতী মল্লিকা চৈব যুথিকা চাতিমুক্তকঃ। পাটলা করবীরঞ্চ জয়া সেবন্তিরেব চ ॥ কুব্জকস্তুগুরুশ্চৈব কর্ণিকারঃ কুরুণ্টকঃ। চম্পকস্তগরঃ কুন্দো বাণা বর্ব্বরমল্লিকা ॥ অশোকস্তিলকশ্চম্পস্তথা চৈবাটরূষকঃ। অমী পুষ্পপ্রকারাস্তু শস্তাঃ কেশবপূজনে ॥ কেতকীপত্রপুষ্পঞ্চ পুষ্পং ভৃঙ্গারকস্য চ। তুলস্যামলকী চৈব সদ্যস্তুষ্টিকরং হরেঃ ॥ পদ্মান্যম্বুসমুত্থানি রক্তনীলে তথোৎপলে। সিতোৎপলঞ্চ কৃষ্ণস্য দয়িতানি সদা নৃপ। তানি পুষ্পাণি দেয়ানি বিষ্ণবে প্রভবিষ্ণবে ॥ ইত্যগ্নিপুরাণং ॥ * ॥ অপি চ। জাতী শতাহ্বা সুমনা কুন্দং বহুপুটং তথা। বাণঞ্চ পঙ্কজাশোকং করবীরঞ্চ যূথিকা ॥ পারিভদ্রং পাটলা চ বকুলং গিরিশালিনী। তিলকং বনজঞ্চৈব পীতকং তগরন্ত্বপি ॥ এতানি হি প্রশস্তানি কুসুমান্যচ্যুতার্চ্চনে। সুরভীণি তথান্যানি বর্জ্জয়িত্বা তু কেতকীং ॥ যেষামপি হি পুষ্পাণি প্রশস্তান্যচ্যুতার্চ্চনে। পল্লবান্যপি তেষাং স্যুঃ প্রশস্তানি মহাসুর ॥ বীরুধানাং প্রধানেন বর্হিষাঞ্চার্চ্চয়েত্তথা। নানারূপৈশ্চাম্বুভবৈঃ কমলেন্দীবরাদিভিঃ ॥ প্রবালৈঃ শুচিভিঃ শুদ্ধৈর্জলপ্রক্ষালিতৈর্বলে। বনস্পতীনামর্চ্চেত তথা দূর্ব্বাগ্রপল্লবৈঃ ॥ ইতি বামনে ৯১ অধ্যায়ঃ ॥ * ॥ বিষ্ণৌ পুষ্পবিশেষদানস্য ফলং যথা। আরামপ্রভবৈঃ পুষ্পৈরচ্ছিদ্রৈঃ কীটবর্জ্জিতৈঃ। তথাপর্য্যুষিতৈস্তদ্বৎ কার্ত্তিকে বিষ্ণুমর্চ্চয়েৎ॥ * ॥ বর্ণানাং হি যথা বিপ্রস্তীর্থানাং জাহ্নবী যথা। দেবানাঞ্চ যথা বিষ্ণুঃ পুষ্পাণাং মালতী তথা ॥ মালতীমালয়া দেবং যোঽর্চ্চয়েদ্গরুড়ধ্বজং। জন্মদুঃখজরারোগৈঃ কর্ম্মভির্মুক্তিমাপ্নুয়াৎ ॥ মালতীমালয়া যেন পূজিতঃ কার্ত্তিকে হরিঃ। পাপলক্ষাযুতং তস্য বৎস শৌরিঃ প্রমার্জ্জতি ॥ মালতীপুষ্পমালাভিঃ কার্ত্তিকে পুষ্পমণ্ডপং। বিষ্ণোর্গৃহে কৃতং যৈস্তু তে যান্তি পরমাং গতিং ॥*॥ জাতিপুষ্পৈর্বিরচিতাং মালাং যঃ সংপ্রযচ্ছতি। বিষ্ণবে বিধিবদ্ভক্ত্যা তস্য পুণ্যফলং শৃণু ॥ কল্পকোটিসহস্রাণি কল্পকোটিশতানি চ। বসেদ্বিষ্ণুপুরে শ্রীমান্ বিষ্ণুতুল্যপরাক্রমঃ ॥ * ॥ যঃ স্বর্ণকেতকীপুষ্পৈঃ পূজয়েদ্গরুড়ধ্বজং। অব্দকোটিশতং যাবত্তুষ্টঃ স্যাত্তস্য বৈ হরিঃ ॥ * ॥ দামোদরং পূজয়েদ্যঃ কুসুমৈঃ কেতকোদ্ভবৈঃ। স বসেদ্বিষ্ণুনিলয়ে দেবেন সহ মোদতে ॥*॥ মল্লিকাকুসুমৈর্দ্দেবং যোঽর্চ্চয়েত্রিদশেশ্বরং। কার্ত্তিকে পরয়া ভক্ত্যা দহেৎ পাপং ত্রিধার্জ্জিতং ॥ সুগন্ধৈর্মল্লিকাপুষ্পৈরচ্যুতং যোঽর্চ্চয়েন্মুনে। স সর্ব্বপাপনির্ম্মুক্তো বিষ্ণুলোকে মহীয়তে॥ বেদধর্ম্মেণ কেনাত্র সংপ্রাপ্তে মধুমাধবে। যোঽর্চ্চয়েৎ স মুনিশ্রেষ্ঠ লভতে বৈষ্ণবং পদং ॥*॥ যঃ পুনঃ পাটলাপুষ্পৈরর্চ্চয়েদ্গরুড়ধ্বজং। সুপুণ্যাত্মা পরং স্থানং স প্রয়াতি হরের্মুনে॥ * ॥ অগস্ত্যপুষ্পৈর্দেবেশং যেঽর্চ্চয়ন্তি জনার্দ্দনং। দেবর্ষে দর্শনাত্তেষাং নরকাগ্নিঃ প্রণশ্যতি ॥ ন তৎ করোতি বিপ্রেন্দ্র তপসা তোষিতো

হরিঃ। যৎ করোতি হৃষীকেশো মুনি-পুষ্পৈরলঙ্কৃতঃ ॥ বিহায় সর্ব্বপুষ্পাণি মুনি-পুষ্পেণ কেশবং। কার্ত্তিকে যেঽর্চ্চয়ে-দ্ভক্ত্যা বাজিমেধফলং লভেৎ ॥ মুনিপুষ্প-কৃতাং মালাং যে যচ্ছন্তি জনার্দ্দনে। শক্রোঽপি তৈঃ সমং বৎস কুরুতে হৃভি-ভাষণং ॥ দদাত্যভীপ্সিতান্ কামান্ বৃক্ষ চিন্তামণির্যথা। কার্ত্তিকে মুনিপুষ্পেণ পূজিতো গরুড়ধ্বজঃ ॥ গবাময়ুতদানেন যৎ ফলং কার্ত্তিকে মুনে। মুনিপুষ্পেণ চৈকেন কার্ত্তিক্যাং তৎ ফলং স্মৃতং ॥ * ॥ যেঽর্চ্চয়ন্তি সুরাধ্যক্ষং করবীরৈঃ সিতা-সিতৈঃ। তেষাং বর্ষশতং যাবৎ প্রভু-র্ভবতি কেশবঃ ॥ * ॥ বকুলাশোককুসুমৈ-র্যেঽর্চ্চয়ন্তি জগৎপতিং। নিঃশঙ্কাস্তে ভবন্তীহ যাবচ্চন্দ্রদিবাকরৌ ॥ * ॥ অশোক-কুসুমৈ রম্যৈর্জন্মশোকভয়াপহং। পূজ য়িত্বা হরিং যাতি পদং বিষ্ণোরনাময়ং ॥*॥ শুভগন্ধৈঃ সিতৈর্বৎস কুসুমৈঃ পঙ্কজো-দ্ভবৈঃ। অধোক্ষজং সমভ্যর্চ্চ্য নরো যাতি হরেঃ পদং ॥ * ॥ অভ্যর্চ্চ্য কৌসুমৈঃ পুষ্পৈঃ কেশবং ক্লেশনাশনং। প্রয়াতি ভবনং বিষ্ণোর্ব্বন্দিতং ত্রিদশৈরপি ॥ * ॥ অটরূষকপুষ্পৈশ্চ পূজয়েদ্যো জগৎপতিং। স পুণ্যবান্নরো যাতি তদ্বিষ্ণোঃ পরমং পদং ॥ * ॥ কার্ত্তিকে যোঽর্চ্চয়েদ্বিষ্ণুং তুলসীবিল্বপঙ্কজৈঃ। ত্রিদশৈরপি পূজ্যঃ স ন শক্যো যমকিঙ্করৈঃ ॥ মাধবে যোঽর্চ্চয়েদ্বিষ্ণুং তুলসীবিল্বপঙ্কজৈঃ। ত্রিদশৈরপি পূজ্যঃ স বক্তুং শক্যো ন কিঙ্করৈঃ ॥ * ॥ মাধবে যোঽর্চ্চয়েদ্বিষ্ণুং সুপুষ্পৈস্তিলকোদ্ভবৈঃ। ধূতপাপো নিরা-তঙ্কঃ স বিষ্ণোর্যাতি তৎ পদং ॥ * ॥ সমিৎপুষ্পকুশাদীনি শ্রোত্রিয়ঃ স্বয়মাহ-রেৎ। শূদ্রোপনীতৈশ্চ হরেঃ পূজাং কুর্ব্বন্ ব্রজত্যধঃ ॥ তস্মাদ্বিপ্রো মুনিশ্রেষ্ঠ শিষ্যেণ স্বয়মেব বা। পুষ্পাদীনি সমাহৃত্য পূজয়েৎ পরমেশ্বরং ॥ * ॥ বিপ্রো দূর্ব্বা-ময়ৈঃ পুষ্পৈস্তথা কাশকুশোদ্ভবৈঃ। তুলসী-বিল্বপত্রৈশ্চ পূজয়েদ্দেবতাঃ পিতৄন্ ॥ * ॥ নার্চ্চয়েত্তগরৈঃ সূর্য্যং ধূর্ত্তপুষ্পেণ কেশবং। দেবীং লকুচপুষ্পৈশ্চ শঙ্করং নাগ-কেশরৈঃ ॥ * ॥ কালবিশেষে তস্য পর্য্যু-ষিতত্বং যথা। প্রহরং তিষ্ঠতে জাতী প্রহরার্দ্ধন্তু মল্লিকা। ত্রিযামং মুনিপুষ্পঞ্চ করবীরমহর্নিশং ॥ * ॥ আম্রমঞ্জরীবিল্ব-পত্রদানফলং যথা। মঞ্জরীং সহকারস্য যে প্রযচ্ছন্তি বৈষ্ণবাঃ। কার্ত্তিকে সফলা-স্তে স্যুর্গোকোটিফলভাগিনঃ ॥ কার্ত্তিকে যোঽর্চ্চয়েদ্ভক্ত্যা বিল্বপত্রেণ কেশবং। দদ্যাদযজ্ঞাযুতফলং কেশবস্তস্য বৈ মুনে ॥ বিল্বপত্রেণ যে কৃষ্ণং কার্ত্তিকে কলি-মর্দ্দনং। পূজয়ন্তি মহাভক্ত্যা মুক্তিস্তেষাং করে স্থিতা ॥ * ॥ নাগকেশরপুষ্পৈর্যঃ পূজয়েদ্গারুড়ধ্বজং। স যাতি বৈষ্ণবং স্থানং যত্র গত্বা ন শোচতে ॥ * ॥ কদম্ব-কুসুমৈর্যো বৈ পূজয়েন্মধুসূদনং। জন্মা-যুতার্জ্জিতং পাপং স্ফোটিতং তেন নারদ ॥ ন তথা কেতকীপুষ্পৈর্মালতীকুসুমৈস্তথা। তোষমায়াতি দেবেশঃ কদম্বকুসুমৈর্যথা ॥

দৃষ্ট্বা কদম্বপুষ্পাণি তোষমায়াতি মাধবঃ। কিং পুনঃ পূজিতো দেবঃ সর্ব্বকামপ্রদো হরিঃ ॥*॥ হরিং কিংশুকপুষ্পৈর্যঃ পূজয়েত্ত্রিদশাধিপং। বৈকুণ্ঠে রমতে শশ্বৎ বিষ্ণুনা সহ বৈষ্ণবঃ ॥ * ॥ বর্ষাকালে চ দেবেশং কুমুদৈশ্চন্দনাচিতৈঃ। যোঽর্চ্চয়েৎ পরমং বিষ্ণুং সংসারে ন পুনর্ব্বিশেৎ ॥ * ॥ কুন্দপুষ্পৈশ্চ বিপ্রর্ষে যোঽর্চ্চয়েদ্গরুড়ধ্বজং। কোটিজন্মার্জ্জিতং পাপং তৎক্ষণাদেব নশ্যতি ॥ * ॥ শমীপুষ্পৈশ্চ দেবেশং পূজয়েদসুরদ্বিষং। যমং ন পশ্যেদ্বিপ্রর্ষে ন যাতি দুর্গতিং নরঃ ॥ ইতি পাদ্মোত্তরখণ্ডে ১৩১ অধ্যায়ঃ ॥ * ॥ লক্ষ্মীতুল্যপ্রিয়পুষ্পাণি নারদীয়সপ্তমসহস্রে। মালতীবকুলাশোকশেফালিনবমালিকাঃ। অম্লানতগরাঙ্কোঠমল্লিকামধুপিণ্ডিকাঃ॥ যূথিমষ্টাপদং কুন্দং কদম্বং মধুপিপ্পলং। পাটলা চম্পকং কৃষ্ণং লবঙ্গমতিমুক্তকং ॥ কেতকং কুরুবকং বিল্বং কহ্লারকরকং দ্বিজং। পঞ্চবিংশতিপুষ্পাণি লক্ষ্মীতুল্যপ্রিয়াণি মে ॥ * ॥ কেশবার্চ্চনে নিষিদ্ধপুষ্পাণি বিষ্ণুধর্ম্মোত্তরে। উগ্রগন্ধীন্যগন্ধীনি কুসুমানি ন দাপয়েৎ। অন্যায়তনজাতানি কণ্টকীনি তথৈব চ॥ রক্তানি যানি ধর্ম্মজ্ঞ চৈত্যবৃক্ষোদ্ভবানি চ। শ্মশানজাতান্যন্যানি যানি চাকালজানি চ॥ তথা। কুটজং শাল্মলীপুষ্পং শিরীষঞ্চ জনার্দ্দনে। নিবেদিতং ভয়ং রোগং নিঃস্বত্বঞ্চ প্রযচ্ছতি ॥ বন্ধুজীবকপুষ্পাণি রক্তান্যপি চ দাপয়েৎ। অনুক্তরক্তকুসুমদানাৎ দৌর্ভাগ্যমাপ্নুয়াৎ॥ * ॥ পরারোপিতবৃক্ষস্য পুষ্পগ্রহণে দোষঃ। অগস্ত্যঃ। পরারোপিতবৃক্ষেভ্যঃ পুষ্পাণ্যানীয় যোঽর্চ্চয়েৎ। অবিজ্ঞাপ্য চ তস্যৈব নিষ্ফলং তস্য পূজিতং ॥ এতদ্দ্বিজেতরপরং। দ্বিজস্তৃণৈধঃপুষ্পাণি সর্ব্বতঃ স্ববদাহরেৎ। ইতি যাজ্ঞবল্ক্যাৎ। দেবাদ্যর্থন্তু কুসুমমস্তেয়ং মনুরব্রবীৎ। ইতি বচনাৎ। গোঽগ্ন্যর্থে তৃণমেধাংসি বীরুদ্বনস্পতীনাং। পুষ্পাণি স্ববদাদদীত ফলানি চাপরিবৃংহিতানি ॥ ইতি গোতমবচনাচ্চ ॥ * ॥ দ্বিজেতরস্য দণ্ডোঽপি। তৃণং বা যদি বা কাষ্ঠং পুষ্পং বা যদি বা ফলং। অপ্রযচ্ছন্নিগৃহ্লানো হস্তচ্ছেদনমর্হতি ॥ ইতি স্মৃতেঃ ॥ * ॥ দেবোপরি ধৃতং মস্তকোপরি ধৃতং অধোবস্ত্রধৃতং অন্তর্জলক্ষালিতঞ্চ পুষ্পং দুষ্টমিতি হরিভক্তিনামকে গ্রন্থে॥ অভিবাদ্যাভিবাদককরস্থপুষ্পং প্রোক্ষণাৎ কর্ম্মণ্যং। ইতি কেচিৎ ॥*॥ যাচিতাদিপুষ্পদানস্য নিষ্ফলত্বং। যাচিতং নিষ্ফলং পুষ্পং ক্রয়ক্রীতঞ্চ নিষ্ফলমিতি বদন্তি। *। বামহস্তচিতাদিপুষ্পস্যাদেয়ত্বং যথা। ন পুষ্পচ্ছেদনং কার্য্যং দেবার্থং বামহস্ততঃ। ন দদ্যাত্তানি দেবেভ্যঃ সংস্থাপ্য বামহস্ততঃ ॥ * ॥ সমিৎপুষ্পাদীনাং স্বয়মাহরণীয়ত্বং হারীতশাতাতপৌ। সমিৎপুষ্পকুশাদীনি ব্রাহ্মণঃ স্বয়মাহরেৎ। শূদ্রানীতৈঃ ক্রয়ক্রীতৈঃ কর্ম্ম কুর্ব্বন্ পতত্যধঃ ॥ * ॥ ক্রয়ে প্রতিপ্রসবমাহ ব্রহ্মপুরাণং।

পুষ্পৈর্ধূপৈশ্চ নৈবেদ্যৈর্বীরক্রয়ক্রিয়া- *হৃতৈঃ। বীরক্রয়ো বীরবৎ যাল্ক্রা-* শূন্যেন বিক্রেতুরুপন্যস্তমূল্যেন ক্রয়ঃ ॥*॥ পুষ্পদানপ্রকারো জ্ঞানমালায়াং। পুষ্পং বা যদি বা পত্রং ফলং নেষ্টমধোমুখং। পুষ্পাঞ্জলিবিধিং হিত্বা যথোৎপন্নং তথা- র্পণং ॥ * ॥ মধ্যাহ্নস্নানানন্তরং পুষ্পচয় নস্য দোষো যথা। স্নানং কৃত্বা তু যে কেচিৎ পুষ্পং গৃহ্লন্তি বৈ দ্বিজাঃ। দেবতা- স্তম্ন গৃহ্লন্তি ভস্মীভবতি দারুবৎ ॥ এতত্তু দ্বিতীয়স্নানাভিপ্রায়ং। ইতি রত্নাকরঃ ॥ ব্যক্তং মৎস্যসূক্তে। স্নাত্বা মধ্যাহ্নসময়ে ন ছিন্দ্যাৎ কুসুমং নরঃ। তৎপুষ্প- স্যার্চ্চনে দেবি রৌরবে পরিপচ্যতে ॥ * ॥ পুষ্পাভাবে দেয়ানি যথা। বিষ্ণুধর্ম্মো- ত্তরে। পুষ্পাভাবেঽপি দেয়ানি পত্রাণি চ জনার্দ্দনে। পত্রাভাবে জলং দদ্যাত্তেন পুণ্যমবাপ্যতে ॥ * ॥ পুষ্পদানমাহাত্ম্যং যথা। ন রত্নৈর্ন সুবর্ণেন ন বিত্তেন চ ভূরিণা। তথা প্রসাদমায়াতি যথা পুষ্পৈর্জনার্দ্দনঃ ॥ * ॥ দেবতাবিশেষে বর্জ্জনীয়পুষ্পং যথা। শাতাতপঃ। শিবে বিবর্জ্জয়েৎ কুন্দমুন্মত্তঞ্চ হরে- স্তথা। দেবীনামর্কমন্দারৌ সূর্য্যস্য তগর- স্তথা ॥ *॥ পুষ্পবিশেষাণাং কালিকপর্য্যু- ষিতত্বং। ভবিষ্যে। পদ্মানি সিতরক্তানি কুমুদান্যুৎপলানি চ। এষাং পর্য্যু- ষিতাশঙ্কা কার্য্যা পঞ্চদিনোত্তরং ॥ * ॥ পুষ্পবিশেষস্যাপর্য্যুষিতত্বং যথা। তুল- স্যগস্ত্যবিল্বানাং ন চ পর্য্যুষিতাত্মতা।

যোগিনীতন্ত্রে। বিল্বপত্রঞ্চ মাঘ্যঞ্চ তমালা- *মলকীদলং। কহ্লারং তুলসীঞ্চৈব পদ্মঞ্চ* মুনিপুষ্পকং। এতৎ পর্য্যুষিতং ন স্যাৎ যচ্চান্যৎ কলিকাত্মকং ॥ কলিকাত্মকং প্রস্ফুটনযোগ্যং। ইত্যেকাদশীতত্ত্বং ॥ * ॥ রাঘবভট্টমতে পুষ্পবিশেষাণাং কালিক- পর্য্যুষিতত্বং যথা। বিল্বাপামার্গজাতী- তুলসিশমিশতাকেতকীভৃঙ্গদূর্ব্বা মন্দা- ম্ভোজাহিদর্ভা মুনিতিলতগরব্রহ্মকহ্লার- মল্লী। চম্পাশ্বারাতিকুন্তীদমনমরুবকা বিল্বতোঽহানি শস্তাস্ত্রিংশৎত্র্যেকার্য্যরীশো- নিধি-নিধি-বসু-ভূ-ভূ-যমা ভূয় এবং ॥ অস্যার্থঃ। শতা শতাবরী। মন্দঃ মন্দারঃ। অহির্নাগকেশরঃ। মুনিরগস্ত্যঃ। অশ্বা- রাতিঃ করবীরঃ। কুন্তী পাটলা। বিল্ব- মারভ্য অহিপর্য্যন্তং গণয়িত্বা দর্ভমারভ্য পুনস্ত্রিংশদাদি গণয়েৎ। এতদ্দিনোত্তরং পর্য্যুষিতানীত্যর্থঃ। ইতি পদার্থাদর্শঃ ॥ * ॥ পুষ্পক্রীড়ায়াং বর্ণনীয়ানি যথা। পুষ্প- চয়নং ১ পুষ্পার্পণে দয়িতার্থিতা ২ মালা ৩ গোত্রস্খলনের্ষ্যা ৪ বক্রোক্তিঃ ৫ সম্ভ্রমা- শ্লেষঃ ৬। ইতি কবিকল্পলতা ॥ স্ত্রীরজঃ। বিকাশঃ। ইতি মেদিনী ॥ ধনদস্য বিমানং। নেত্ররোগবিশেষঃ। ফুলী ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥ অস্যৌষধং যথা। হরীতকী বচা কুষ্ঠং পিপ্পলী মরিচানি চ। বিভীতকস্য মজ্জা চ শঙ্খ- নাভির্ম্মনঃশিলা। সর্ব্বমেতৎ সমং কৃত্বা ছাগীক্ষীরেণ পেষয়েৎ ॥ নাশয়েত্তিমিরং কণ্ডুং পটলান্যর্ব্বুদানি চ। অধিকানি চ

মাংসানি যশ্চ রাত্রৌ ন পশ্যতি ॥ অপি দ্বিবার্ষিকং পুষ্পং মাসেনৈকেন সাধয়েৎ । বর্ত্তিশ্চন্দ্রোদয়া নাম নৃণাং দৃষ্টিপ্রসাদনী ॥ ইতি চক্রপাণিদত্তঃ ॥

পুষ্পকং (ক্লী) রীতিপুষ্পং । ধনদস্য বিমানং । নেত্ররোগঃ । রত্নকঙ্কণং । রসাঞ্জনং । লোহকাংস্যং । মৃদাঙ্গারশকটী । ইতি মেদিনী ॥ কাসীসং । ইতি হেমচন্দ্রঃ ॥

পুষ্পকরণ্ডকং (ক্লী) উজ্জয়ন্যাং শিবস্য উদ্যানং । যথা । মহাকালস্যোজ্জয়নী বিশালাবন্তিকা তথা । তস্য উদ্যানকং জ্ঞেয়ং নাম্না পুষ্পকরণ্ডকং ॥ ইতি শব্দমালা ॥

পুষ্পকরণ্ডিনী (স্ত্রী) উজ্জয়িনী । যথা । উজ্জয়িনী স্যাদ্বিশালাবন্তী পুষ্পকরণ্ডিনী । ইতি হেমচন্দ্রঃ ॥

পুষ্পকাসীসং (ক্লী) পীতবর্ণকাসীসং । যথা । অথ কাসীসং ভস্মবন্মৃত্তিকাম্লং । কাসীসং ধাতুকাসীসং পাংশুকাসীসমিত্যপি । তদেব কিঞ্চিৎ পীতন্তু পুষ্পকাসীসমুচ্যতে ॥ কাসীসমম্লমুষ্ণঞ্চ তিক্তঞ্চ তুবরং তথা । বাতশ্লেষ্মহরং কেশ্যং নেত্র্যং কণ্ডুবিষপ্রণুৎ । মূত্রকৃচ্ছ্রাশ্মরীশ্বিত্রনাশনং পরিকীর্ত্তিতং ॥ ইতি ভাবপ্রকাশঃ ॥ তৎপর্য্যায়ঃ । কংসকং ২ নেত্রৌষধং ৩ । ইতি হেমচন্দ্রঃ ॥ বৎসকং ৪ মলীমসং ৫ হ্রস্বং ৬ বিষদং ৭ নীলমৃত্তিকা ৮ । অস্য গুণাঃ । তিক্তত্বং । শীতত্বং । নেত্রামযাপহত্বং । লেপেন পামাকুষ্ঠাদিনানাত্বগ্দোষনাশিত্বঞ্চ । ইতি রাজনির্ঘণ্টঃ ॥

পুষ্পকীটঃ (পুং) ভ্রমরঃ । ইতি ত্রিকাণ্ডশেষঃ ॥ ॥

পুষ্পকেতনঃ (পুং) কামদেবঃ । ইতি হেমচন্দ্রঃ

পুষ্পকেতুঃ (পুং) কুসুমাঞ্জনং । ইত্যমরঃ ॥

পুষ্পঘাতকঃ (পুং) বংশঃ । ইতি শব্দমালা ॥

পুষ্পচাপঃ (পুং) কামদেবঃ । ইতি হেমচন্দ্রঃ ॥

পুষ্পচামরঃ (পুং) দমনবৃক্ষঃ । ইতি ত্রিকাণ্ডশেষঃ ॥ কেতকবৃক্ষঃ । ইতি শব্দমালা ॥

পুষ্পদঃ (পুং) বৃক্ষঃ । ইতি হেমচন্দ্রঃ ॥ পুষ্পদাতরি ত্রি ॥

পুষ্পদন্তঃ (পুং) বায়ুকোণস্থদিগ্গজঃ । ইত্যমরঃ ॥ বিদ্যাধরবিশেষঃ । ইতি মেদিনী ॥ জিনভেদঃ । ইতি হেমচন্দ্রঃ ॥ নাগভেদঃ । ইতি ধরণিঃ ॥

পুষ্পদন্তকঃ (পুং) গন্ধর্ব্ববিশেষঃ । স চ মহিম্নঃ স্তবকর্ত্তা । ইতি শব্দরত্নাবলী ॥

পুষ্পদ্রবঃ (পুং) পুষ্পরসঃ । তৎপর্য্যায়ঃ । পুষ্পসারঃ ২ পুষ্পস্বেদঃ ৩ পুষ্পজঃ ৪ পুষ্পনির্য্যাসকঃ ৫ পুষ্পাম্বুজঃ ৬ । অস্য গুণাঃ । সুরভিত্বং । শীতত্বং । কষায়ত্বং । গৌল্যত্বং । দাহভ্রমার্ত্তিবমিমোহমুখাময়তৃষ্ণার্ত্তিপিত্তকফদোষচিরারোচকনাশিত্বং । সরত্বং । সন্তর্পণত্বঞ্চ । ইতি রাজনির্ঘণ্টঃ ॥

পুষ্পধন্বা [ন্] (পুং) কামদেবঃ । ইত্যমরঃ ॥

পুষ্পনিক্ষঃ (পুং) ভ্রমরঃ । ইতি শব্দচন্দ্রিকা ॥

পুষ্পন্ধয়ঃ (পুং) ভ্রমরঃ । ইতি রাজনির্ঘণ্টঃ ॥ পুষ্পরসপানকর্ত্তরি ত্রি । পুষ্পশব্দাদ্ধেট-

ধাতোঃ কর্ত্তরি খশ্‌প্রত্যয়নিষ্পন্নত্বাৎ। ইতি মুগ্ধবোধব্যাকরণং ॥

পুষ্পপথঃ (পুং) যোনিঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

পুষ্পপুরং (ক্লী) পাটলিপুত্ত্রনগরং। ইতি ভূরিপ্রয়োগঃ ॥

পুষ্পফলঃ (পুং) কপিত্থঃ। ইত্যমরঃ ॥ কুষ্মাণ্ডঃ। ইতি শব্দমালা ॥

পুষ্পমাসঃ (পুং) বসন্তঃ। ইতি রাজনির্ঘণ্টঃ ॥

পুষ্পরক্তঃ (পুং) সূর্য্যমণিবৃক্ষঃ। ইতি শব্দচন্দ্রিকা ॥

পুষ্পরসঃ (পুং) মকরন্দঃ। ইত্যমরঃ ॥

পুষ্পরসাহ্বয়ং (ক্লী) মধু। ইতি রাজনির্ঘণ্টঃ ॥

পুষ্পরাগঃ (পুং) মণিবিশেষঃ। পুখরাজ ইতি ভাষা। তৎপর্য্যায়ঃ। মঞ্জুমণিঃ ২ বাচস্পতিবল্লভঃ ৩। ইতি ভাবপ্রকাশঃ ॥ পীতঃ ৪ পীতস্ফটিকঃ ৫ পীতরক্তঃ ৬ পীতাশ্ম ৭ গুরুরত্নং ৮ পীতমণিঃ ৯ পুষ্পরাজঃ ১০। অস্য গুণাঃ। অম্লত্বং। শীতত্বং। বাতনাশিত্বং। দীপনত্বঞ্চ ॥*॥ তস্য ধারণগুণঃ। আয়ুঃশ্রীপ্রজ্ঞাকারিত্বং ॥ * ॥ তস্য লক্ষণং যথা। সুচ্ছায়পীতগুরুগাত্রসুরঙ্গশুদ্ধং স্নিগ্ধঞ্চ নির্ম্মলমতীব সুবৃত্তশীতং। যঃ পুষ্পরাগসকলং কলয়েদমুষ্য পুষ্ণাতি কীর্ত্তিমতিশৌর্য্যসুখায়ুরর্থান্ ॥ * ॥ তস্য কুলক্ষণং যথা। কৃষ্ণবিন্দ্বঙ্কিতং রূক্ষং ধবলং মলিনং লঘু। বিচ্ছায়ং শর্করাগারং পুষ্পরাগং সদোষকং ॥ * ॥ তস্য পরীক্ষালক্ষণে যথা। ঘৃষ্টৌ বিকাশয়েৎ পুষ্পরাগমধিকমাত্মীয়ং। ন খলু পুষ্পরাগো জাত্যতয়া পরীক্ষকৈরুক্তঃ ॥ ইতি রাজনির্ঘণ্টঃ ॥ * ॥ তস্যোৎপত্ত্যাদি যথা। সূত উবাচ। পতিতা যা হিমাদ্রৌ হি ত্বচস্তস্য সুরদ্বিষঃ। প্রাদুর্ভবন্তি তাভ্যস্তু পুষ্পরাগা মহাগুণাঃ ॥ আপীতপাণ্ডুরুচিরঃ পাষাণঃ পুষ্পরাগসংজ্ঞস্তু। কৌরুণ্টকনামা স্যাৎ স এব যদি লোহিতাপীতঃ ॥ আলোহিতস্তু পীতঃ স্বচ্ছঃ কাষায়কঃ স এবোক্তঃ। আনীলশুক্লবর্ণঃ স্নিগ্ধঃ সোমালকঃ স্বগুণৈঃ ॥ অত্যন্তলোহিতো যঃ স এব খলু পদ্মরাগসংজ্ঞঃ স্যাৎ। অপি চেন্দ্রনীলসংজ্ঞঃ স এব কথিতঃ সুনীলঃ সন্ ॥ মূল্যং বৈদূর্য্যমণেরিব গদিতং হ্যস্য রত্নশাস্ত্রবিদা। ধারণফলঞ্চ তদ্বৎ কিন্তু স্ত্রীণাং সুতপ্রদো ভবতি ॥ ইতি গারুড়ে ৭৫ অধ্যায়ঃ ॥ * ॥ প্রকারান্তরং। শণপুষ্পসমঃ কান্ত্যা স্বচ্ছভাবস্তু চিক্কণঃ। পুত্ত্রদো ধনদঃ পুণ্যঃ পুষ্পরাগমণির্ধৃতঃ ॥ দৈত্যধাতুসমুদ্ভূতঃ পুষ্পরাগমণির্দ্বিধা। পদ্মরাগাকরে কশ্চিৎ কশ্চিত্তার্ক্ষ্যোপলাকরে ॥ ঈষৎপীতচ্ছবিচ্ছায়াস্বচ্ছং কান্ত্যা মনোহরং। পুষ্পরাগমিতি প্রোক্তং রঙ্গসোমমহীভুজা ॥ ব্রহ্মাদিজাতিভেদেন তদ্বিজ্ঞেয়ং চতুর্ব্বিধং। ছায়া চতুর্ব্বিধা তস্য সিতা পীতা সিতাসিতা ॥ ইতি যুক্তিকল্পতরুঃ ॥

পুষ্পরেণুঃ (পুং) পরাগঃ। ইতি শব্দরত্নাবলী ॥

পুষ্পরোচনঃ (পুং) নাগকেশরঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

পুষ্পলাবঃ (পুং) মালাকারঃ। ইতি জটাধরঃ॥

পুষ্পলাবী (পুং) মালাকারঃ। ইতি হেমচন্দ্রঃ॥

পুষ্পলিট্ [হ] (পুং) ভ্রমরঃ। ইত্যমরঃ॥

পুষ্পবতী (স্ত্রী) রজস্বলা। ইত্যমরঃ॥ পুষ্পবিশিষ্টে ত্রি॥

পুষ্পবন্তৌ (পুং) একয়োক্ত্যা চন্দ্রসূর্য্যৌ। ইত্যমরঃ॥ একয়া উক্ত্যা অপৃথগ্বচনেন চন্দ্রার্কৌ পুষ্পবচ্ছব্দবাচ্যৌ ন তু পুষ্পবানিন্দুঃ সূর্য্যো বেত্যভিধীয়তে। সাঞ্জে। একয়োক্ত্যেতি ভিন্নপ্রয়োগেনৈবেত্যর্থঃ। অতএব দ্ব্যর্থকত্বাৎ সদা দ্বিবচনমিত্যর্থঃ। পুষ্পং বিকাশস্তদ্যোগাদ্বন্তুঃ। পুষ্পবন্তশব্দোঽদন্তো রূঢ়োঽপি রবিশশিনৌ পুষ্পবন্তাখ্যাবিতি নামমালা। ইতি তট্টীকায়াং ভরতঃ॥

পুষ্পবাটী (স্ত্রী) পুষ্পোদ্যানং। ফুলবাগান ইতি ভাষা। যথা। বাটী পুষ্পাদ্বৃক্ষাচ্চাসৌ ক্ষুদ্রারামঃ প্রসেবিকা। ইতি হেমচন্দ্রঃ॥

পুষ্পবাহনঃ (পুং) পুষ্কররাজঃ। যথা। রাজা যথোক্তঞ্চ পুনরকরোৎ পুষ্পবাহনঃ। বিভূতিদ্বাদশীং কৃত্বা স গতঃ পরমাং গতিং॥ ইত্যগ্নিপুরাণং॥

পুষ্পশকটী (স্ত্রী) আকাশবাণী। যথা। চিত্রোক্তিঃ পুষ্পশকটী দৈবপ্রশ্ন উপশ্রুতিঃ। ইতি ত্রিকাণ্ডশেষঃ॥

পুষ্পশরঃ (পুং) কন্দর্পঃ। কুসুমেষুদর্শনাৎ॥

পুষ্পশরাসনঃ (পুং) কন্দর্পঃ। পুষ্পধন্বদর্শনাৎ॥

পুষ্পশূন্যঃ (পুং) উদুম্বরঃ। ইতি রাজনির্ঘণ্টঃ॥ কুসুমরহিতে ত্রি॥

পুষ্পসময়ঃ (পুং) বসন্তঃ। ইত্যমরঃ॥

পুষ্পসারঃ (পুং) পুষ্পদ্রবঃ। ইতি রাজনির্ঘণ্টঃ॥

পুষ্পসৌরভা (স্ত্রী) কলিকারীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

পুষ্পস্বেদঃ (পুং) পুষ্পদ্রবঃ। ইতি রাজনির্ঘণ্টঃ॥

পুষ্পহাসা (স্ত্রী) রজস্বলা। ইতি শব্দরত্নাবলী॥

পুষ্পহীনা (স্ত্রী) উডুম্বরবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥ নিষ্কলা। রজঃশূন্যা। ইতি হেমচন্দ্রঃ॥

পুষ্পা (স্ত্রী) কর্ণপুরী। ভাগলপুর ইতি ভাষা। তৎপর্য্যায়ঃ। চম্পা ২ মালিনী ৩। ইতি ত্রিকাণ্ডশেষঃ॥

পুষ্পাজীবঃ (পুং) মালাকারঃ। ইতি হেমচন্দ্রঃ॥

পুষ্পাজীবী [ন্] (পুং) মালাকারঃ। ইতি জটাধরঃ॥

পুষ্পাঞ্জনং (ক্লী) অঞ্জনভেদঃ। তৎপর্য্যায়ঃ। পুষ্পকেতু ২ কৌসুম্ভং ৩ কুসুমাঞ্জনং ৪ রীতিকং ৫ রীতিপুষ্পং ৬ পৌষ্পকং ৭। তস্য গুণাঃ। হিমত্বং। পিত্তহিক্কাস্রদাহবিষকাসার্ত্তিসর্ব্বনেত্রামযনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

পুষ্পাঞ্জলিঃ (পুং) কুসুমাঞ্জলিঃ। প্রসূনাঞ্জলিঃ। যথা। পঞ্চ পুষ্পাঞ্জলীন্দত্ত্বা পরিবারার্চ্চনঞ্চরেৎ। ইতি তন্ত্রসারধৃতভট্টঃ॥

পুষ্পাবচায়ী [ন্] (পুং) মালাকারঃ। ইতি হেমচন্দ্রঃ॥

পুষ্পাসবং (ক্লী) মধু। ইতি রাজনির্ঘণ্টঃ ॥
পুষ্পাস্ত্রঃ (পুং) কন্দর্পঃ। ইতি শব্দরত্নাবলী ॥
পুষ্পাহ্বা (স্ত্রী) শতপুষ্পা। ইতি রাজনির্ঘণ্টঃ ॥
পুষ্পিকা (স্ত্রী) দন্তমলং। ইতি হারাবলী ॥ লিঙ্গমলং। ইতি হেমচন্দ্রঃ ॥ অধ্যায়ান্তে তৎপ্রতিপাদিতোক্তিঃ ॥
পুষ্পিতঃ (ত্রি) জাতপুষ্পঃ। পুষ্পবিশিষ্টঃ। কুসুমিতঃ। যথা। একেনাপি সুবৃক্ষেণ পুষ্পিতেন সুগন্ধিনা। বাসিতং তদ্বনং সর্ব্বং সুপুত্রেণ কুলং যথা॥ ইতি চাণক্যঃ ॥
পুষ্পিতাগ্রা (স্ত্রী) ছন্দোবিশেষঃ। তস্য লক্ষণং। অযুজি নযুগরেফতো যকারো যুজি চ নজৌ জরগাশ্চ পুষ্পিতাগ্রা॥ উদাহরণং। করকিসলয়শোভয়া বিভান্তী কুচফলভারবিনম্রদেহযষ্টিঃ। স্মিতরুচিরবিলাসপুষ্পিতাগ্রা ব্রজযুবতিব্রততী হরের্মুদেঽভূৎ ॥ ইতি ছন্দোমঞ্জরী ॥
পুষ্পেষুঃ (পুং) কামদেবঃ। ইতি হেমচন্দ্রঃ ॥
পুষ্যঃ (পুং) অশ্বিন্যাদিসপ্তবিংশতিনক্ষত্রান্তর্গতাষ্টমনক্ষত্রং। তত্ত্ব বাণাকারৈকতারাত্মকং। ইতি জ্যোতিষং ॥ তৎপর্য্যায়ঃ। সিধ্যঃ ২ তিষ্যঃ ৩। ইত্যমরঃ॥ পুষ্যা ৪। ইতি ভরতঃ ॥ তস্য স্বরূপং যথা। বালপীঠকঠিনীরজঃপ্রভে মধ্যমাশ্রিতবিহায়সে গুরৌ। তৌলিকাৎ পৃষতশাবলোচনে লোচনাদ্রিকুমিতাগতাঃ কলাঃ॥ ২।৫২। ইতি কালিদাসকৃতরাত্রিলগ্ননিরূপণং ॥*॥ তত্র জাতস্য ফলং। প্রসন্নগাত্রঃ পিতৃমাতৃভক্তঃ স্বধর্ম্মযুক্তোঽভিনয়াভিযুক্তঃ। ভবেন্মনুষ্যঃ খলু পুষ্যজন্মা সম্মানচামীকরবাহনাঢ্যঃ ॥ ইতি কোষ্ঠীপ্রদীপঃ ॥ তন্নক্ষত্রে গঙ্গাস্নানফলং যথা। সংক্রান্তিষু ব্যতীপাতে গ্রহণে চন্দ্রসূর্য্যয়োঃ। পুষ্যে স্নাত্বা তু জাহ্নব্যাং কুলকোটীঃ সমুদ্ধরেৎ॥ ইতি ব্রহ্মাণ্ডপুরাণং ॥*॥ পৌষমাসঃ। কলিযুগঃ। ইতি মেদিনী ॥
পুষ্যরথঃ (পুং) যৎ চক্রযানং যুদ্ধার্থং ন ভবতি কিন্তু যাত্রোৎসবাদৌ সঃ। তৎপর্য্যায়ঃ। চক্রযানং ২। ইত্যমরঃ ॥
পুষ্যলকঃ (পুং) গন্ধমৃগঃ। ক্ষপণকঃ। কীলঃ। ইতি মেদিনী ॥
পুষ্যস্নানং (ক্লী) পুষ্যাভিষেকঃ। তস্য বিধির্যথা। ঔর্ব্ব উবাচ। শৃণু রাজন্ প্রবক্ষ্যামি পুষ্যস্নানবিধিক্রমং। যেন বিজ্ঞাতমাত্রেণ বিঘ্না নশ্যন্তি সন্ততং ॥ পৌষে পুষ্যর্ক্ষগে চন্দ্রে পুষ্যস্নানং নৃপশ্চরেৎ। সৌভাগ্যকল্যাণকরং দুর্ভিক্ষমরকাপহং॥ বিষ্ট্যাদিদুষ্টকরণে ব্যতীপাতে চ বৈধৃতৌ। বজ্রে শূলে হর্ষণাদৌ যোগে যদি ন লভ্যতে॥ তৃতীয়াযুক্তপুষ্যর্ক্ষং রবিসৌরিকুজেঽহনি। তদা সমস্তদোষাণাং তৎস্নানং হানিকারকং ॥ গ্রহদোষাশ্চ জায়ন্তে যদি রাজ্যেষু চেতয়ঃ। তদা পুষ্যর্ক্ষমাত্রে তু কুর্য্যান্মাসান্তরেঽপি তৎ॥ ইয়ন্তু ব্রহ্মণা শান্তিরুদ্দিষ্টা গুরবে পুরা। শক্রার্থং সর্ব্বদেবানাং শান্ত্যর্থঞ্চ জগৎপতে ॥*॥ তুষকেশাস্থিবল্মীককীটদেশাদিবর্জ্জিতে। শর্করাকৃমিভস্মাদিদোষেণ পরিবর্জ্জিতে ॥

কাকোলূককঙ্কৈশ্চ কাকোলৈর্গৃধ্রশ্যেনকৈঃ। বর্জিতে কণ্টকিবনবিভীতকবিবর্জিতে॥ শ্লিগুশ্লেষ্মাতকাভ্যাঞ্চ জলৌকাদ্যৈর্বিবর্জিতে। 'সুস্থানে চম্পকাশোকবকুলাদিবিভূষিতে॥ হংসকারণ্ডবাকীর্ণে সরস্তীরেঽথবা শুচৌ। পুষ্যস্নানায় নৃপতির্গৃহ্লীয়াৎ স্থানমুত্তমং॥ *॥ ততঃ পুরোহিতো রাজা নানাবাদিত্রনিঃস্বনৈঃ। প্রদোষসময়ে গচ্ছেত্তৎ স্থানং পূর্ব্ববাসরে॥ তস্য স্থানস্য কৌবের্য্যাং দিশি স্থিত্বা পুরোহিতঃ। সুগন্ধচন্দনৈঃ পানৈঃ কর্পূরাদ্যধিবাসিতৈঃ॥ গোরোচনাভিঃ সিদ্ধার্থৈরক্ষতৈশ্চ ফলাদিভিঃ। গন্ধদ্বারেত্যাদিভিস্তু মন্ত্রৈঃ সর্ব্বাধিবাসিকৈঃ। অধিবাস্য তু তৎ স্থানং পূজয়েত্তত্র দেবতাঃ॥ গণেশং কেশবং শক্রং ব্রহ্মাণঞ্চাপি শঙ্করং। উময়া সহিতং দেবং সর্ব্বাশ্চ গণদেবতাঃ। মাতৃশ্চ পূজয়েত্তত্র নৃপতিঃ সপুরোহিতঃ॥ মঙ্গলান্ সকলান্ কৃত্বা নানানৈবেদ্যসঞ্চয়ং। প্রদদ্যাৎ পায়সং স্বাদু ফলং মোদকযাবকৌ॥ অধিবাস্য তু তৎ স্থানং দূর্ব্বাসিদ্ধার্থকাক্ষতৈঃ। তস্মাৎ স্থানাত্তু ভূতান্নিঃসারয়েন্মন্ত্রমীরয়ন্॥ অপসর্পন্তু তে ভূতা যে ভূতা ভূমিপালকাঃ। ভূতানামবিরোধেন স্নানমেতৎ করোম্যহং॥ ততঃ করৌ পুটীকৃত্য মন্ত্রেণানেন পার্থিবঃ। আবাহয়েদিমান্দেবান্ পূজ্যান্ পুষ্যাভিষেকতঃ॥ আগচ্ছন্তু সুরাঃ সর্ব্বে যেঽত্র পূজাভিলাষিণঃ। দিশোঽভিপালকাঃ সর্ব্বে যে চান্যেঽপ্যংশভাগিনঃ। ততঃ পুষ্পাঞ্জলিং দত্ত্বা পুনর্মন্ত্রং পঠেদিমং॥ অদ্য তিষ্ঠন্তু বিবুধাঃ স্থানমাসাদ্য মামকং। শ্বঃ পূজাং প্রাপ্য যাতারো দত্ত্বা শান্তিং মহীভুজে॥ তত্র তাং নৃপতী রাত্রিং নয়েত্তু সপুরোহিতঃ। স্বপ্নে শুভাশুভং বিদ্যান্নৃপস্তু সপুরোহিতঃ॥ *॥ কৃত্বা পূজাস্তু দেবানাং রাত্রৌ স্থানে নৃপঃ স্বপেৎ। শুভাশুভফলং স্বপ্নে জ্ঞেয়ং দোষজ্ঞসম্মতে॥ দুঃস্বপ্নদর্শনং চেৎ স্যাত্তদা পুষ্যাভিষেচনে। হোমং চতুঃশতং কুর্য্যাদ্দদ্যাদ্বাপি গবাং শতং॥ গোবাজিকুঞ্জরাণাঞ্চ প্রাসাদস্য গিরেস্তরোঃ। আরোহণং শুভকরং রাজ্যশ্রীবৃদ্ধিকারকং॥ দধিদেবসুবর্ণানাং ভূজগস্য চ দর্শনং। বীণাদূর্ব্বাক্ষতফলপুষ্পাচ্ছদবিলেপনং॥ শিতাংশুচ্ছত্রশঙ্খানাং পদ্মস্য সুহৃদাং তথা। লাভঃ ক্ষয়করঃ শত্রোরলঙ্কারস্য ভূভৃতঃ॥ দর্শনঞ্চোপরাগস্য নিগড়েনাস্য বন্ধনং। মাংসস্য ভোজনঞ্চৈব পর্ব্বতস্য বিবর্ত্তনং॥ নাভিমধ্যে তরূৎপত্তির্মৃতং প্রত্যনুরোদনং। অগম্যাগমনং কূপপঙ্কগর্ত্তাবতীর্ণতা॥ পর্ব্বতস্য তথা নদ্যাঃ প্রোত্তারঃ শত্রুকর্ত্তনং। স্বপুত্রমরণঞ্চৈব পানং রুধিরমদ্যয়োঃ॥ ভোজনং পায়সস্যাপি মনুষ্যারোহণং তথা। কল্যাণসুখসৌভাগ্যরাজ্যশত্রুক্ষয়াংস্তথা। এতে স্বপ্নাশ্চ কুর্ব্বন্তি নৃপস্য নৃপসত্তম॥ খরোষ্ট্রমহিষাণাস্তু আরোহো রাজ্যনাশকঃ। নৃত্যং গীতং তথা হাস্যং পাঠশ্চাপ্যশুভপ্রদঃ॥ রক্তবস্ত্রপরীধানং রক্তমাল্যানু-

রঞ্জনং। রক্তাং কৃষ্ণাং স্ত্রিয়ঞ্চৈব কাময়ন্ মৃত্যুমাপ্নুয়াৎ ॥ কূপান্তরে প্রবেশশ্চ দক্ষিণাশাগতিস্তথা। পঙ্কে নিমজ্জনং স্নানং ভার্য্যাপুত্রবিনাশনং ॥ নাভৌ যস্য ভবেৎ স্বপ্নে তরুৎপত্তির্নৃপস্য চ। আদায় গর্ত্তনাড়ীস্তু শকুনো যাতি খং দ্রুতং। স তু রাজ্যান্তরং প্রাপ্য মহাকল্যাণমাপ্নুয়াৎ ॥ * ॥ দীর্ঘং বিংশতিহস্তন্তু হস্তষোড়শবিস্তৃতং। কুর্য্যাত্তু লক্ষণোপেতং যজ্ঞমণ্ডলমুত্তমং ॥ ততোঽপরে ঽহ্নি পূর্ব্বাহ্নে মাতৃণাং পূজনঞ্চরেৎ। কুড্যলগ্নাং বসোর্ধারাং বৃদ্ধিশ্রাদ্ধং তথৈব চ ॥ চন্দনাগুরুকস্তূরীধূপকর্পূরচূর্ণকৈঃ। সম্পূজ্য মণ্ডলস্থানং তস্মিন্ হৌং শম্ভবে নমঃ ॥ অস্ত্রায় হুং ফড়িত্যেবং লিখেন্মন্ত্রদ্বয়ং বুধঃ। মন্ত্রবিন্মণ্ডলজ্ঞশ্চ সূত্রৈঃ কম্বলসম্ভবৈঃ ॥ কৌষেয়ৈর্ব্বা স্বস্তিকাখ্যং প্রথমং মণ্ডলং লিখেৎ। চতুর্হস্তপ্রমাণন্তু মণ্ডলং বিলিখেত্ততঃ ॥ হস্তপ্রমাণং পদ্মন্তু মণ্ডলস্য প্রকীর্ত্তিতং। দ্বারাণি সার্দ্ধহস্তানি কর্ণিকাকেশরোজ্জ্বলং ॥ সিতং রক্তঞ্চ পীতঞ্চ কৃষ্ণং হরিতমেব চ। শালিচূর্ণৈস্তু কৌসুম্ভৈর্হারিদ্রৈর্হরিদুদ্ভবৈঃ ॥ কুর্য্যাত্তথাঞ্জনৈশ্চূর্ণৈ রাজা মণ্ডলবৃদ্ধয়ে। পদ্মাত্ততঃ সমারভ্য নালাং পশ্চিমগামিনীং ॥ পশ্চিমদ্বারমধ্যেন শতহস্তাং বিনির্দ্দিশেৎ। প্রত্যেকদ্বারমধ্যে তু পদ্মঞ্চৈবাষ্টপত্রকং ॥ কুর্য্যান্মণ্ডলভাগে তু চূর্ণৈরেব পৃথক্ পৃথক্। চূর্ণৈস্তু মণ্ডলং কৃত্বা সূত্রাণ্যুৎসারয়েত্ততঃ ॥ উৎসার্য্য সূত্রং প্রথমং মণ্ডলং পূজয়েত্ততঃ। ভবনায় নম ইতি ততো হস্তং বিযোজয়েৎ ॥ সব্যাবলম্বহস্তস্তু রজঃপাত্রং সমারভেৎ। মধ্যমানামিকাঙ্গুষ্ঠৈরুপরিষ্টাদযথেচ্ছয়া ॥ অধোমুখাঙ্গুলিং কৃত্বা পাতয়েৎ সুবিচক্ষণঃ। সমরেখা তু কর্ত্তব্যা বিচ্ছিন্না পুঞ্জবর্জ্জিতা। অঙ্গুষ্ঠপর্ব্বনৈপুণ্যাৎ সমা কার্য্যা বিজানতা ॥*॥ সংসক্তং বিষমং স্থূলং বিচ্ছিন্নং কৃশরাবৃতং। পর্য্যন্তমর্পিতং হ্রস্বমালিখেন্ন কদাচন ॥ সংসক্তে কলহং বিদ্যাদূর্দ্ধরেখে তু বিগ্রহং। অতিস্থূলে ভবেদ্ব্যাধির্নিত্যপীড়া বিমিশ্রিতে ॥ বিন্দুভির্ভয়মাপ্নোতি শত্রুপক্ষান্ন সংশয়ঃ। কৃশায়াংচার্থহানিঃ স্যাচ্ছিন্নায়াং মরণং ধ্রুবং। বিয়োগো বা ভবেত্তস্য ইষ্টদ্রব্যসুতস্য বা ॥ অবিদিত্বা লিখেদ্যস্তু মণ্ডলন্তু যথেচ্ছয়া। সর্ব্বদোষানবাপ্নোতি যে দোষাঃ পূর্ব্বভাষিতাঃ ॥ * ॥ সিতসর্ষপদূর্ব্বাঢ্যা রেখাঃ কার্য্যাঃ প্রমাণতঃ। বিমলং বিজয়ং ভদ্রং বিমানং শুভদং শিবং ॥ বর্দ্ধমানঞ্চ দেবঞ্চ রতাখ্যং কামদায়কং। রুচকং স্বস্তিকাখ্যঞ্চ দ্বাদশৈতে তু মণ্ডলাঃ। যথাস্থানং যথাযজ্ঞং যোজনীয়া বিচক্ষণৈঃ ॥ * ॥ সাগরে মথ্যমানে তু পীযূষার্থং সুরাসুরৈঃ। পীযূষধারণার্থায় নির্ম্মিতা বিশ্বকর্ম্মণা ॥ কলাং কলান্তু দেবানামসিস্থা তে পৃথক্ পৃথক্। যতঃ কৃতাস্তু কলসাস্ততস্তে পরিকীর্ত্তিতাঃ ॥ * ॥ নবৈব কলসাঃ প্রোক্তা নামতস্তান্নিবোধত। গোহ্যোপগোহ্যো মরুতো ময়ূখশ্চ তথা-

পরঃ ॥ মনোহা ত্বসিভদ্রশ্চ বিরূজস্তনু-শোষকঃ। ইন্দ্রিয়ঘ্নোঽথ বিজয়ো নবমঃ পরিকীর্ত্তিতঃ॥ তেষামেব ক্রমান্নৃপ নব নামানি যানি তু। *। শৃণু তান্যপরাণ্যেব শান্তিদানি সদৈব হি॥ ক্ষিতীন্দ্রঃ প্রথমঃ প্রোক্তো দ্বিতীয়ো জলসম্ভবঃ। পবনাগ্নী ততো দ্বৌ তু যজমানস্ততঃ পরঃ॥ কোষসম্ভবনামা তু ষষ্ঠঃ স পরিকীর্ত্তিতঃ। সোমস্তু সপ্তমঃ প্রোক্তশ্চাদিত্যস্তু তথাষ্টমঃ॥ বিজয়ো নাম কলসো যোঽসৌ নবম উচ্যতে। স তু পঞ্চমুখঃ প্রোক্তো মহাদেবস্বরূপধৃক্॥ ঘটস্য পঞ্চবক্ত্রেষু পঞ্চবক্ত্রঃ স্বয়ন্তথা। যথাকাষ্ঠাস্থিতঃ সম্যক্ বামদেবাদিনামতঃ। মণ্ডলস্য চ পদ্মান্তঃ পঞ্চবক্ত্রং ঘটং ন্যসেৎ॥ ক্ষিতীন্দ্রং পূর্ব্বতো ন্যস্য পশ্চিমে জলসম্ভবং। বায়ব্যে বায়বং ন্যস্য আগ্নেয়ে হুগ্নিসম্ভবং॥ নৈঋ৴ত্যাং যজমানন্তু ঐশান্যাং কোষসম্ভবং। সোমমুত্তরতো ন্যস্য সৌরং দক্ষিণতো ন্যসেৎ॥ *॥ ন্যস্যৈবং কলসাংশ্চৈব তেষু চৈতান্ বিচিন্তয়েৎ। কলসানাং মুখে ব্রহ্মা গ্রীবায়াং শঙ্করঃ স্থিতঃ॥ মূলে তু সংস্থিতো বিষ্ণুর্মধ্যে মাতৃগণাঃ স্থিতাঃ। দিক্‌পালা দেবতাঃ সর্ব্বা বেষ্টয়ন্তি দিশো দশ॥ কুক্ষৌ তু সাগরাঃ সপ্ত সপ্তদ্বীপাশ্চ সংস্থিতাঃ। নক্ষত্রাণি গ্রহাঃ সর্ব্বে তথৈব কুলপর্ব্বতাঃ॥ গঙ্গাদ্যাঃ সরিতঃ সর্ব্বা বেদাশ্চত্বার এব চ। কলসেষু স্থিতাঃ সর্ব্বে তেষু তানপি চিন্তয়েৎ॥ *॥ রত্নানি সর্ব্ব-

বীজানি পুষ্পাণি চ ফলানি চ। বজ্রমৌক্তিকবৈদূর্য্যমহাপদ্মেন্দ্রস্ফাটিকৈঃ ॥ সর্ব্বধামময়ং বিল্বং নাগরোড়ুম্বরং তথা। বীজপূরকজম্বীরকাশ্মীরাম্রাতদাড়িমান্ ॥ যবং শালিঞ্চ নীবারং গোধূমং সিতসর্ষপং। কুঙ্কুমাগুরুকস্তূরীমদনং রোচনং তথা॥ চন্দনঞ্চ তথা মাংসীমেলাং কুষ্ঠং তথৈব চ। কর্পূরং পত্রচণ্ডঞ্চ জলং নির্যাসকাম্বুদং॥ শৈলেয়ং বদরং জাতীপত্রপুষ্পে তথৈব চ। কালশাকং তথা পৃক্কাদেবী পূর্ণকমেব চ॥ বচাং ধাত্রীং সমঞ্জিষ্ঠাং তুরুষ্কং মঙ্গলাষ্টকং। দূর্ব্বাং মোহনিকাং ভদ্রাং শতমূলীং শতাবরীং॥ পর্ণানাং সবলাং ক্ষুদ্রাং সহদেবাং গজাহ্বয়াং। পূর্ণকোষাং সিতাং পাঠাং গুঞ্জাং শিরসিকানলৌ॥ ব্যামকং গজদন্তঞ্চ শতপুষ্পাং পুনর্নবাং। ব্রাহ্মীং দেবীং শিবাং রুদ্রাং সর্ব্বসন্ধানিকাং তথা। সমাহৃত্য শুভানেতান্ কলসেষু নিধাপয়েৎ॥*॥ কলসস্য যথাদেশং বিধিং শম্ভুং গদাধরং। যথাক্রমং পূজয়িত্বা শম্ভুং মুখ্যতয়া যজেৎ॥ প্রাসাদেন তু মন্ত্রেণ শম্ভুতন্ত্রেণ শঙ্করং। প্রথমং পূজয়েন্মধ্যে নানানৈবেদ্যবেদনৈঃ। দিক্‌পালানাং ঘটেষ্বেব দিকপালানপি পূজয়েৎ॥ পূর্ব্বং বহিঃস্থাপিতেষু গ্রহাণাং কলসেষু চ। নবগ্রহান্ পূজয়েত্তু মাতৃর্মাতৃঘটেষু চ॥ সর্ব্বে দেবা ঘটে পূজ্যা ঘটস্তেষাং পৃথক্ পৃথক্। নবৈব তত্র পূর্ব্বোক্তাঃ সদা মুখ্যতমা নৃপ ॥ *॥ ভক্ষ্যৈর্ভোজ্যৈশ্চ পেয়ৈশ্চ পুষ্পৈর্নানা-

বিধৈঃ ফলৈঃ। যাবকৈঃ পায়সৈশ্চাপি যথাসম্ভবযোজিতৈঃ। পুষ্যস্নানায় নৃপতিঃ পূজয়েৎ সকলান্ সুরান্॥ *॥ দক্ষিণে মণ্ডলস্যাথ কুণ্ডং নির্ম্মায় পায়সৈঃ। সমিদ্ভিঃ শালিসিদ্ধার্থৈর্ঘৃতৈদূর্ব্বাক্ষতৈস্তথা। কেবলৈশ্চ তথৈবাজ্যৈঃ পূজয়েৎ সকলান্ সুরান্॥ হোমান্তে তোষয়েদ্বৃদ্ধৈর্নৃপঃ সার্দ্ধং পুরোহিতং॥ হোমান্তে মণ্ডলোদীচ্যাং বেদিকায়াং সপট্টকং। রোচনাখ্যমলঙ্কারান্ তথা সর্ব্বান্নিযোজয়েৎ॥ বৃদ্ধ্যা হ্যঙ্গুলমঙ্গুষ্ঠং দ্বির্দশাঙ্গুলয়াবধি। বৃত্তং বা চতুরস্রং বা পদ্মকত্রিকসংহিতং। রত্নেশান্ পদ্মমধ্যে তু গোস্বস্তিকবিনায়কৈঃ॥ শ্রীঃ শ্রীবৃক্ষো বরারোহা স্বামী দেবী শুভান্বিতা। রত্নৈঃ সর্ব্বৈরলঙ্কারৈঃ পট্টং কার্য্যং দ্বিহস্তকং। হস্তবিস্তারমুচ্ছ্রায়ং কর্ত্তব্যন্তু দশাঙ্গুলং॥ স্নানার্থং সার্দ্ধহস্তস্তু পট্টং বৃত্তাসনান্বিতং। শয্যা চতুর্গুণা দীর্ঘা ধনুর্ম্মানস্তু পীঠকং॥ গজসিংহকৃতাটোপং হেমরত্নবিভূষিতং। সিংহাখ্যং সার্দ্ধবিস্তারাদ্দণ্ডাসনমথাপি বা॥ ব্যাঘ্রচিত্রকপট্টৈর্ব্বা উপধানানি কারয়েৎ। অন্যৈর্ব্বা নির্ম্মিতৈশ্চর্ম্মমৃদুতূলকপূরিতান্॥ শয্যা দৈর্ঘ্যার্দ্ধবিস্তীর্ণা চতুর্হস্তা সুলক্ষণা। বিতস্ত্যধিকমিচ্ছন্তি নৃপস্য গুরুবিদ্যয়া॥ অর্দ্ধচন্দ্রসমং কুর্য্যাদাসনং চতুরস্রকং। উপধানানি শয্যায়াঃ কর্ণাদিমূলদেশতঃ॥ ষোড়শৈবাত্র কার্য্যাণি বর্ণচিত্রযুতানি চ। যানং সিংহাসনং পট্টং শয্যোপকরণাদিকং॥ রাজ্ঞো নূতনযোগ্যং তদ্বেদ্যা উত্তরতো ন্যসেৎ। তেষান্তু পশ্চিমে স্বর্ণরত্নৌঘনিচিতে বরে॥ পর্য্যঙ্কে যজ্ঞদার্ব্বৌঘনির্ম্মিতে মহদাস্তরে। ঊর্দ্ধাচ্ছাদনসংযুক্তে চর্ম্মাবৃত্ত্যা চতুষ্টয়ং॥ বৃষভস্য তথোর্ণায়াঃ সিংহশার্দূলয়োরপি। পাদপীঠে রত্নযুতে পাদাবারোপ্য পার্থিবঃ॥ তস্মিন্ পর্য্যঙ্কপৃষ্ঠস্থে চর্ম্মখণ্ডচতুষ্টয়ে। নানালঙ্কারভূষাঢ্যং নৃপতিং রত্নমালিনং॥ স্নাপয়েদ্ব্রাহ্মণৈঃ সার্দ্ধং রাজানং সুখসঙ্গতং। সম্বীতকম্বলং কৃষ্ণং রত্নবস্ত্রাবশোভিতং॥ কলসৈর্ব্বলিপুষ্পাদ্যৈঃ শালিচূর্ণৈশ্চ স্নাপয়েৎ॥ অষ্টৌ ষোড়শ বিংশাষ্টশতমষ্টাধিকঞ্চ বা। কলসানাং সমাখ্যাতা অধিকস্যোত্তরোত্তরং॥ জয়কল্যাণদৈর্ম্মন্ত্রৈর্মঙ্গলোথৈশ্চ শাম্ভবৈঃ। বৈষ্ণবৈরথ দিক্পালৈগ্রর্হমন্ত্রৈশ্চ মাতৃকৈঃ॥ আজ্যং তেজঃ সমুদ্দিষ্টমাজ্যং পাপহরং পরং। আজ্যং সুরাণামাহারমাজ্যে লোকাঃ প্রতিষ্ঠিতাঃ॥ ভৌমান্তরীক্ষং দিব্যং বা যত্তে কল্মষমাগতং; সর্ব্বং তদাজ্যসংস্পর্শাৎ প্রণাশমুপগচ্ছতু॥ ততোঽপনীয় গাত্রাত্তু কম্বলং বস্ত্রমেব চ। কলসৈঃ স্নাপয়েদ্ভূপং পুষ্যস্নানার্থপূরিতৈঃ। এভির্ম্মন্ত্রৈর্নরশ্রেষ্ঠ তত্ত্বতত্ত্বার্থসাধকৈঃ॥ * ॥ সুরাস্ত্বামভিষিঞ্চন্তু যে চ সিদ্ধাঃ পুরাতনাঃ। ব্রহ্মা বিষ্ণুশ্চ রুদ্রশ্চ সাধ্যাশ্চ সমরুদ্গণাঃ॥ আদিত্যা বসবো রুদ্রা আশ্বিনেয়ৌ ভিষগ্বরৌ। অদিতির্দেবমাতা চ স্বাহা লক্ষ্মীঃ সরস্বতী॥ কীর্ত্তির্লক্ষ্মীর্ধৃতিঃ শ্রীশ্চ সিনীবালী কুহূস্তথা। দিতিশ্চ সুরসা চৈব

বিনতা কদ্রুরেব চ ॥ দেবপত্ন্যশ্চ যাঃ প্রোক্তা দেবমাতর এব চ। সর্ব্বাস্ত্বামভিষিঞ্চন্তু সর্ব্বে চাপ্সরসাং গণাঃ ॥ নক্ষত্রাণি মুহূর্ত্তাশ্চ পক্ষাহোরাত্রসন্ধয়ঃ। সম্বৎসরো দিবা রাত্রিঃ কলাঃ কাষ্ঠাঃ ক্ষণা লবাঃ। সর্ব্বে ত্বামভিষিঞ্চন্তু কালস্যাবয়বাশ্চ যে ॥ বৈমানিকাঃ সুরগণাঃ মনবঃ সাগরৈঃ সহ। সরিতশ্চ মহানাগা যক্ষাঃ কিংপুরুষাস্তথা ॥ বৈখানসা মহাভাগা দ্বিজা বৈহায়সাস্তথা। সপ্তর্ষয়ঃ সদারাশ্চ ধ্রুবস্থানানি যানি তু ॥ মরীচিরত্রিঃ পুলহঃ পুলস্ত্যো ভৃগুরঙ্গিরাঃ। ক্রতুঃ সনৎকুমারশ্চ সনকোঽথ সনন্দকঃ॥ সনাতনশ্চ দক্ষশ্চ জৈগীষব্যোঽথ নন্দনঃ। একতশ্চ দ্বিতশ্চৈব ত্রিতো জাবালিকাশ্যপৌ ॥ দুর্ব্বাসা দুর্বিনীতশ্চ কণ্বঃ কাত্যায়নস্তথা। মার্কণ্ডেয়ো দীর্ঘতপাঃ শুনঃশেফো বিদূরথঃ ॥ ঔর্ব্বঃ সম্বর্ত্তকশ্চৈব চ্যবনোঽত্রিঃ পরাশরঃ। দ্বৈপায়নো যবক্রীতো দেবরাতঃ সহানুজঃ ॥ এতে চান্যে চ বহবো দেবব্রতপরায়ণাঃ। সশিষ্যাস্তেঽভিষিঞ্চন্তু সদারাশ্চ তপোধনাঃ ॥ পর্ব্বতাস্তরবো নদ্যঃ পুণ্যান্যায়তনানি চ। প্রজাপতিঃ ক্ষিতিশ্চৈব গাবো বিশ্বস্য মাতরঃ ॥ বাহনানি চ দিব্যানি সর্ব্বে লোকাশ্চরাচরাঃ। অগ্নয়ঃ পিতরস্তারা জীমূতাঃ খং দিশো জলং ॥ এতে চান্যে চ বহবঃ পুণ্যসংকীর্ত্তনাঃ শুভাঃ। তোয়ৈস্ত্বামভিষিঞ্চন্তু সর্ব্বোৎপাতনিবর্হণাঃ ॥ ইত্যেবং শুভদৈবত্যৈর্মন্ত্রৈর্দিব্যৈস্তথাপরৈঃ। শৈবৈর্নারায়ণৈ রৌদ্রৈর্ব্রহ্মশক্রসমুদ্ভবৈঃ ॥ আপোহিষ্ঠা হিরণ্যেতি সম্ভবেতি সুরেতি চ। মানস্তোকেতিমন্ত্রেণ গন্ধদ্বারেত্যনেন চ ॥ সর্ব্বমঙ্গলমঙ্গল্যৈঃ শ্রীশ্চ তে গ্রহযোগিভিঃ। ইত্যেবং স্নানমাসাদ্য গাত্রমাবৃত্য কম্বলৈঃ ॥ সর্ব্বমঙ্গলমন্ত্রেণ বস্ত্রং কার্পাসকং ধ্রিয়াৎ। আচম্য চ ততো দেবান্ গুরুং বিপ্রাংশ্চ পূজয়েৎ ॥ ধ্বজং ছত্রং চামরঞ্চ ঘণ্টামশ্বান্ গজাংস্তথা। মন্ত্রং জপ্ত্বা ধারয়েত্তু ততো গচ্ছেদ্ধুতাশনং ॥ তত্র গত্বা বহ্নিমধ্যে বহ্নিশ্রীর্বীক্ষ্য পার্থিবঃ। অনিমিত্তনিমিত্তানি লক্ষয়েত্তত্র বিন্দুভিঃ ॥ দৈবজ্ঞকঞ্চুকামাত্যবন্দিপৌরজনৈর্বৃতঃ। বাদিত্রঘোষৈস্তুমুলৈস্তথা তৌর্য্যত্রিকৈঃ শুভৈঃ ॥ কৃত্বা শেষে পুনঃ শান্তিমাশীর্ব্বাচ্য চ বৈ দ্বিজান্। পূর্ণাং বিধায় বিধিবদ্দক্ষিণাং কনকান্যুত ॥ ধান্যানি চাথ বাসাংসি দত্ত্বা কুর্য্যাদ্বিসর্জ্জনং। ততঃ শেষজলৈঃ সর্ব্বানমাত্যাদীন্ পুরোহিতঃ। সেচয়েচ্চতুরঙ্গঞ্চ বলঞ্চাপি সরাষ্ট্রকং ॥ এবং কৃত্বা নৃপঃ পশ্চাত্রিরাত্রং সংযতো ভবেৎ। মাংসমৈথুনহীনশ্চ কুর্য্যান্মঙ্গল্যসেবনং ॥ পুষ্যনক্ষত্রযুক্তা তু তৃতীয়া যদি লভ্যতে। তস্যাং পূজ্যা সদা দেবী চণ্ডিকা শঙ্করেণ হ ॥ পঞ্চালিকাবিবাহাদ্যৈঃ শিশূনাং কৌতুকৈস্তথা। বৈবাহিকেন বিধিনা মোদয়েচ্চণ্ডিকাং শিবাং ॥ চতুষ্পথেষু সর্ব্বেষু দেবদেবীগৃহেষু চ। পতাকাভিরলঙ্কুর্য্যাদেবং কুর্ব্বন্ন সীদতি ॥ এবং কৃত্বা শান্তি-

যাগং তথা পুষ্যাভিষেচনং। চতুরঙ্গৈঃ সমং রাজা ভার্য্যাভিস্তনয়ৈঃ সহ। রাজ্যমণ্ডলসংযুক্তঃ পরত্রেহ ন সীদতি॥ নাতঃ পরতরো যজ্ঞো নাতঃ পরতরোৎসবঃ। নাতঃ পরতরা শান্তির্নাতঃ পরতরং শিবং॥ * ॥ অনেনৈব বিধানেন নৃপতেরভিষেচনং। যুবরাজ্যাভিষেকঞ্চ কুর্য্যাদ্রাজপুরোহিতঃ॥ নৃপাভিষেককরণমাদৌ যদি সমাচরেৎ। অনেনৈব বিধানেন স্থিরঃ স্যান্নৃপতিস্তদা॥ অয়ং যজ্ঞঃ সমুদ্দিষ্টঃ শক্রার্থং ব্রহ্মণা পুরা। এবং যজ্ঞং নৃপো দৃষ্ট্বা পরত্রেহ ন সীদতি॥ ইতি কালিকাপুরাণে পুষ্যাভিষেকঃ ৮৬ অধ্যায়ঃ॥

পুষ্যা (স্ত্রী) পুষ্যনক্ষত্রং। ইতি শব্দরত্নাবলী॥

পুস্ত ক বন্ধে। ইতি কবিকল্পদ্রুমঃ॥ পঞ্চমস্বরী। দন্ত্যোপধঃ। ক পুস্তয়তি। ইতি দুর্গাদাসঃ॥

পুস্তং (ক্লী) লেপ্যাদিশিল্পকর্ম্ম। আদিনা কাষ্ঠপুত্তলিকাখনিত্রখননাদি কর্ম্ম গৃহ্যতে। ইতি স্বভূত্যাদয়ঃ॥ মৃদা বা দারুণা বাথ বস্ত্রেণাপ্যথ চর্ম্মণা। লোহরত্নৈঃ কৃতং বাপি পুস্তমিত্যভিধীয়তে॥ ইত্যমরটীকায়াং ভরতঃ॥ পুস্তকং। ইতি মেদিনী॥ স্ত্রিয়াং পুস্তী। ইত্যপি ভবতি॥

পুস্তকং (ক্লী স্ত্রী) পুস্তং। পুতি ইতি ভাষা। তস্য পরিমাণং যথা। মানং বক্ষ্যে পুস্তকস্য শৃণু দেবি সমাসতঃ। মানেনাপি ফলং বিদ্যাদমানে শ্রীর্হতা ভবেৎ॥ হস্তমাত্রং মাত্রমাবাহুদ্বাদশাঙ্গুলং। দশাঙ্গুলং তথাষ্টৌ চ ততো হীনং ন কারয়েৎ॥ * ॥ তস্য বেধো যথা। বেধদ্বয়ং মুষ্টিহস্তং বাহুমাত্রে চিরস্তকং। সমভাগে মহেশানি হস্তাদৌ রূপরন্ধ্রকং॥ অষ্টাঙ্গুলং পরিত্যজ্য মধ্যে বেধং ন কারয়েৎ। প্রাদেশাদৌ ভবেদ্রন্ধ্রো দ্ব্যঙ্গুলে বা সমাচরেৎ॥ পুস্তকস্য চ আদ্যন্তে যন্ত্রবেধং বিকল্পয়েৎ। ভার্য্যাহানির্ভবেদাশু ধনানাং বা ক্ষয়ো ভবেৎ॥ দগ্ধরন্ধ্রে ভবেৎ পীড়া বর্ত্তুলং শুভদং ভবেৎ। চতুষ্কোণে বিপ্লবস্তু ত্রিকোণে মরণং ভবেৎ॥*॥ পুস্তককরণপত্রং যথা। ভূর্জ্জে বা তেজপত্রে বা তালে বা তাড়িপত্রকে। অগুরুণাপি দেবেশি পুস্তকং কারয়েৎ প্রিয়ে॥ সম্ভবে স্বর্ণপত্রে চ তাম্রপত্রে চ শঙ্করি। অন্যবৃক্ষত্বচি দেবি তথা কেতকিপত্রকে॥ মার্ত্তণ্ডপত্রে রৌপ্যে বা বটপত্রে বরাননে। অন্যপত্রে বসুদলে লিখিত্বা যঃ সমভ্যসেৎ। স দুর্গতিমবাপ্নোতি ধনহানির্ভবেদ্ধ্রুবং॥ * ॥ পুস্তকে বেদলিখননিষেধো যথা। বেদস্য লিখনং কৃত্বা যঃ পঠেদ্ব্রহ্মহা ভবেৎ। পুস্তকং বা গৃহে স্থাপ্যং বজ্রপাতো ভবেদ্ধ্রুবং॥*॥ যুগভেদে পুস্তকাক্ষরস্থদেবা যথা। সত্যেঽক্ষরে স্থিতঃ শম্ভুঃ শূলপাণিস্ত্রিলোচনঃ। প্রজাপতির্দ্বাপরে চ ত্রেতায়াং সূর্য্য এব চ। কৃতে যুগে পিনাকী চ কলৌ লিপ্যক্ষরে হরিঃ॥*॥ তল্লেখকপূজাফলং যথা। আরম্ভে চ সমাপ্তৌ চ লেখকং প্রপূজয়েৎ। হরিঞ্চ গন্ধপুষ্পাদ্যৈর্বস্ত্রৈশ্চ মনোহরৈঃ॥ যাবদক্ষরসংখ্যানং প্রতিপত্রে চ

সুন্দরি। তাবদ্‌যুগসহস্রাণি ব্রহ্মলোকে বসেচ্চিরং ॥ * ॥ বেতনগ্রহণে লেখকস্য দোষো যথা। বেতনং যস্তু গৃহ্লীয়াৎ লিখিত্বা পুস্তকং স তু। যাবদক্ষরসংখ্যানং তাবচ্চ নরকে বসেৎ ॥ * ॥ ভূমৌ পুস্তকলেখনস্থাপননিষেধো যথা। ন ভূমৌ বিলিখেদ্বর্ণং মন্ত্রং ন পুস্তকং লিখেৎ। ন মুক্তা পুস্তকং স্থাপ্যং ন মুক্তমাহরেত্তু তৎ ॥ ভূকম্পগ্রহণে চৈব অক্ষরং বাথ পুস্তকং। ভূমৌ তিষ্ঠতি দেবেশি জন্মজন্মসু মূর্খতা। তদা ভবতি দেবেশি তস্মাত্তৎ পরিবর্জ্জয়েৎ ॥ ইতি যোগিনীতন্ত্রে তৃতীয়ভাগে সপ্তমপটলঃ ॥ * ॥ তস্য দানফলং যথা। বিপ্রায় পুস্তকং দত্ত্বা ধর্ম্মশাস্ত্রস্য চ দ্বিজ। পুরাণস্য চ যো দদ্যাৎ স দেবত্বমবাপ্নুয়াৎ ॥ শাস্ত্রদৃষ্ট্যা জগৎ সর্ব্বং সুশ্রুতঞ্চ শুভাশুভং। তস্মাৎ শাস্ত্রং প্রযত্নেন দদ্যাদ্বিপ্রায় কার্ত্তিকে ॥ বেদবিদ্যাঞ্চ যো দদ্যাৎ স্বর্গে কল্পত্রয়ং বসেৎ। আত্মবিদ্যাঞ্চ যো দদ্যাত্তস্য সংখ্যা ন বিদ্যতে॥ ত্রীণি তুল্যপ্রদানানি ত্রীণি তুল্যফলানি চ। শাস্ত্রং কামদুঘা ধেনুঃ পৃথিবী চৈব শাশ্বতী॥ ইতি পাদ্মোত্তরখণ্ডে১১৭ অধ্যায়ঃ॥ * ॥ বেদশাস্ত্রাদিদানফলং যথা। বেদার্থযজ্ঞশাস্ত্রাণি ধর্ম্মশাস্ত্রাণি চৈব হি। মূল্যেন লেখয়িত্বা যো দদ্যাদ্যাতি স বৈদিকং ॥ ইতিহাসপুরাণানি লিখিত্বা যঃ প্রযচ্ছতি। ব্রহ্মদানসমং পুণ্যং প্রাপ্নোতি দ্বিগুণীকৃতং ॥ ইতি গারুড়ে ২১৫ অধ্যায়ঃ

ভাগবতদানবিধানং তু পারায়ণশব্দে দ্রষ্টব্যং ॥

পুস্তকর্ম্মা (ত্রি) লেপ্যাদিশিল্পকর্ম্মকর্ত্তা। ইতি হলায়ুধঃ ॥

পূ ঙ শোধে। ইতি কবিকল্পদ্রুমঃ। শোধ ইহ শুদ্ধীকরণং। ঙ পবতে পাপিনং গঙ্গা। ইতি দুর্গাদাসঃ ॥

পূ ঙ য শোধে। ইতি কবিকল্পদ্রুমঃ ॥ অয়ং কৈশ্চিন্ন মন্যতে। ঙ য পূয়তে। ইতি দুর্গাদাসঃ ॥

পূ ঞ গি শোধে। ইতি কবিকল্পদ্রুমঃ ॥ ঞ গি জাহ্নবী নঃ পুনাতু। পুনীতে। ক্বচিৎ শ্নাপ্রত্যয়স্যাপি প্বাদিত্বাৎ হ্রস্ব ইতি বররুচিঃ। তেন স্মরণাৎ পুনতে পাপং ধারণাৎ পূর্ব্বসঞ্চিতং। দর্শনাল্লভতে মোক্ষমেতদেযাগস্য লক্ষণং ॥ ইতি দুর্গাদাসঃ ॥

পূগং (ক্লী) গুবাকফলং। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

পূগঃ (পুং) গুবাকঃ। সমূহঃ। ইত্যমরঃ ॥ ছন্দঃ। ভাবঃ। কণ্টকিবৃক্ষঃ। ইতি শব্দরত্নাবলী ॥

পূগপাত্রং (ক্লী) পূগপীঠং। পিকদানী। ইতি ভাষা। তৎপর্য্যায়ঃ। ফরুবকং ২। ইতি হারাবলী ॥

পূগপীঠং (ক্লী) পূগপাত্রং। তৎপর্য্যায়ঃ। কটকোলঃ২ পতদ্‌গ্রহঃ ৩। ইতি ত্রিকাণ্ড শেষঃ ॥

পূগপুষ্পিকা (স্ত্রী) বিবাহসম্বন্ধিপুষ্পতাম্বূলং। তৎপর্য্যায়ঃ। কুহলিঃ ২। ইতি ত্রিকাণ্ডশেষঃ ॥

পূগফলং (ক্লী) গুবাকফলং। তৎপর্য্যায়ঃ। পূগং ২ চিক্কণী ৩ চিক্কা ৪ চিক্কণং ৫ সোঞ্চকং ৬ উদ্বেগং ৭ ক্রমুকফলং ৮। ইতি রাজনির্ঘণ্টঃ॥

পূগরোটঃ (পুং) হিন্তালবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ॥

পূজ ক পূজে। ইতি কবিকল্পদ্রুমঃ॥ সর্ঠস্বরী। ক পূজয়তি গুরুং লোকঃ। ইতি দুর্গাদাসঃ॥

পূজকঃ (ত্রি) পূজাকর্ত্তা। যথা। যত্রৈব ভানুস্তু বিয়ত্যুদেতি প্রাচীতি তাং বেদবিদো বদন্তি। তথা পুরঃ পূজকপূজ্যয়োশ্চ তদাগমজ্ঞাঃ প্রবদন্তি তান্ত॥ ইতি তিথ্যাদিতত্ত্বং॥

পূজনং (ক্লী) পূজা। অর্চ্চনং। যথা। ক্রুদ্ধেন ন চ কর্ত্তব্যং লোভেন ত্বরয়া ন চ। মৎপূজনং বিধানেন যদীচ্ছেৎ পরমাং গতিং॥ ইতি বরাহপুরাণং॥

পূজনী (স্ত্রী) চটকা। ইতি ভরতঃ॥

পূজা (স্ত্রী) পূজনং। তৎপর্য্যায়ঃ। নমস্যা ২ অপচিতিঃ ৩ সপর্য্যা ৪ অর্চ্চা ৫ অর্হণা ৬। ইত্যমরঃ॥ নুতিঃ ৭। ইতি শব্দরত্নাবলী॥ তস্যাঃ সামান্যানুষ্ঠানং যথা। আদাবৃস্যাদিকন্যাসঃ করশুদ্ধিস্ততঃ পরং। অঙ্গুলিব্যাপকন্যাসৌ হৃদাদিন্যাস এব চ॥ তালত্রয়ঞ্চ দিগ্বন্ধঃ প্রাণায়ামস্ততঃ পরং। ধ্যানং পূজা জপশ্চৈব সর্ব্বতন্ত্রেষ্বয়ং বিধিঃ॥ ইতি তন্ত্রসারে যামলঃ॥*॥ শক্তিবিষয়ে চতুঃষষ্টিরুপচারা যথা। আসনারোপণং ১ সুগন্ধিতৈলাভ্যঙ্গঃ ২ মজ্জনশালাপ্রবেশনং ৩ মজ্জনমণিপীঠোপবেশনং ৪ দিব্যস্নানীয়ং ৫ উদ্বর্ত্তনং ৬ উষ্ণোদকস্নানং ৭ কনককলসস্থিতসকলতীর্থাভিষেকঃ ৮ ধৌতবস্ত্রপরিমার্জ্জনং ৯ অরুণদুকূলপরিধানং ১০ অরুণদুকূলোত্তরীয়ং ১১ আলেপমণ্ডপপ্রবেশনং ১২ আলেপমণিপীঠোপবেশনং ১৩ চন্দনাগুরুকুঙ্কুমকর্পূরকস্তূরীরোচনাদিব্যগন্ধসর্বাঙ্গানুলেপনং ১৪ কেশভারস্য কালাগুরুধূপমল্লিকামালতীজাতীচম্পকাশোকশতপত্রপূগকুহরীপুন্নাগকহ্লারযূথীসর্ব্বর্ত্তুকুসুমমালাভূষণং ১৫ ভূষণমণ্ডপপ্রবেশনং ১৬ ভূষণমণিপীঠোপবেশনং ১৭ নবমণিমুকুটং ১৮ চন্দ্রশকলং ১৯ সীমন্তসিন্দুরং ২০ তিলকরত্নং ২১ কালাঞ্জনং ২২ কর্ণপালীযুগলং ২৩ নাসাভরণং ২৪ অধরযাবকঃ ২৫ গ্রথনভূষণং ২৬ কনকচিত্রপদকং ২৭ মহাপদকং ২৮ মুক্তাবলিঃ ২৯ একাবলিঃ ৩০ দেবচ্ছন্দকঃ ৩১ কেয়ূরযুগলচতুষ্টয়ং ৩২ বলয়াবলিঃ ৩৩ ঊর্ম্মিকাবলিঃ ৩৪ কাঞ্চীদাম ৩৫ কটিসূত্রং ৩৬ শোভাখ্যাভরণং ৩৭ পাদকটকং ৩৮ রত্ননূপুরং ৩৯ পাদাঙ্গুরীয়কং ৪০ এককরে পাশঃ ৪১ অন্যকরেঽঙ্কুশং ৪২ ইতরকরে পুণ্ড্রেক্ষুচাপঃ ৪৩ অপরকরে পুষ্পবাণাঃ ৪৪ শ্রীমন্মাণিক্যপাদুকা ৪৫ স্বসমানবেশাস্ত্রাবরণদেবতাভিঃ সহ সিংহাসনারোহণং ৪৬ কামেশ্বরপর্য্যঙ্কোপবেশনং ৪৭ অমৃতাশনচষকং ৪৮ আচমনীয়ং ৪৯ কর্পূরবটিকা ৫০ আনন্দোল্লাস-

বিলাসস্থাসং ৫১ মঙ্গলারাত্রিকং ৫২ শ্বেতচ্ছত্রং ৫৩ চামরযুগলং ৫৪ দর্পণঃ ৫৫ তালবৃন্তং ৫৬ গন্ধঃ ৫৭ পুষ্পং ৫৮ ধূপঃ ৫৯ দীপঃ ৬০ নৈবেদ্যং ৬১ পুনরাচমনীয়ং ৬২ তাম্বূলং ৬৩ বন্দনঞ্চ ৬৪। ইতি তন্ত্রসারে সিদ্ধযামলঃ ॥ * ॥ ষট্‌ত্রিংশদুপচারা যথা। আসনাভ্যঞ্জনে তদ্বদুদ্বর্ত্তননিরূক্ষণে। সম্মার্জ্জনং সর্পিরাদিস্নপনাবাহনে তথা ॥ পাদ্যার্ঘ্যাচমনীয়ঞ্চ স্নানীয়মধুপর্ককৌ। পুনরাচমনীয়ঞ্চ বস্ত্রযজ্ঞোপবীতকে অলঙ্কারো গন্ধপুষ্পধূপদীপাস্তথৈব চ। তাম্বূলাদিকনৈবেদ্যং পুষ্পমালা তথৈব চ ॥ অনুলেপনঞ্চ শয্যা চ চামরব্যজনন্তথা। আদর্শদর্শনঞ্চৈব নমস্কারোঽথ নর্ত্তনং ॥ গীতবাদ্যে চ গানানি স্তুতিহোমপ্রদক্ষিণং। দন্তকাষ্ঠপ্রদানঞ্চ ততো দেববিসর্জনং। উপচারা ইমে জ্ঞেয়াঃ ষট্‌ত্রিংশৎ সুরপূজনে ॥ ইত্যেকাদশীতত্ত্বং ॥ * ॥ অষ্টাদশোপচারা যথা। আসনং স্বাগতং পাদ্যমর্ঘ্যমাচমনীয়কং। স্নানং বস্ত্রোপবীতঞ্চ ভূষণানি চ সর্ব্বশঃ ॥ গন্ধং পুষ্পং তথা ধূপং দীপমন্নঞ্চ দর্পণং। মাল্যানুলেপনঞ্চৈব নমস্কারবিসর্জনে ॥ অষ্টাদশোপচারৈস্তু মন্ত্রী পূজাং সমাচরেৎ ॥ * ॥ অথ ষোড়শোপচারাঃ। পাদ্যমর্ঘ্যং তথাচামং স্নানং বসনভূষণে। গন্ধপুষ্পধূপদীপনৈবেদ্যাচমনন্ততঃ ॥ তাম্বূলমর্চ্চনা স্তোত্রং তর্পণঞ্চ নমস্ক্রিয়া। প্রপূজয়েৎ প্রপূজায়াং উপচারাংস্তু ষোড়শ ॥ * ॥ অথ দশোপচারাঃ। পাদ্যমর্ঘ্যং তথাচামং মধুপর্কাচমনন্তথা। গন্ধাদয়ো নৈবেদ্যান্তা উপচারা দশ ক্রমাৎ ॥ * ॥ অথ পঞ্চোপচারাঃ। গন্ধাদয়ো নৈবেদ্যান্তাঃ পূজাঃ পঞ্চোপচারিকাঃ ॥ ইতি তন্ত্রসারঃ ॥ * ॥

অশুচ্যাদেঃ পূজানিষেধমাহ। অশুচির্ন মহামায়াং পূজয়েত্তু কদাচন। অবশ্যন্তু স্মরেন্মন্ত্রং সোঽতিভক্তিযুতো নরঃ ॥ দন্তরক্তে সমুৎপন্নে স্মরণঞ্চ ন বিদ্যতে। সর্ব্বেষামেব মন্ত্রাণাং স্মরণান্নরকং ব্রজেৎ ॥ জানূর্দ্ধে ক্ষতজে জাতে নিত্যকর্ম্ম ন চাচরেৎ। নৈমিত্তিকঞ্চ তদধঃস্রবদ্রক্তো ন চাচরেৎ ॥ লোতকে চ সমুৎপন্নে ক্ষুরকর্ম্মণি মৈথুনে। ধূমোদ্গারে তথা বান্তৌ নিত্যকর্ম্মাণি সংত্যজেৎ ॥ দ্রব্যে ভুক্তে ত্বজীর্ণে চ নৈব ভুক্ত্বা চ কিঞ্চন। কর্ম্ম কুর্য্যান্নরো নিত্যং সূতকে মৃতকে তথা ॥ পত্রং পুষ্পঞ্চ তাম্বূলং ভেষজত্বেন কল্পিতং। কণাদিপিপ্পল্যন্তঞ্চ ফলং ভুক্ত্বা ন চাচরেৎ ॥ জলস্যাপি নরশ্রেষ্ঠ ভোজনাদ্‌ভেষজাদৃতে। নিত্যক্রিয়া নিবর্ত্তেত সহ নৈমিত্তিকৈঃ সদা ॥ জলৌকাং গূঢ়পাদঞ্চ কৃমিগণ্ডুপদাদিকং। কামাদ্দন্তেন সংস্পৃশ্য নিত্যকর্ম্মাণি সংত্যজেৎ ॥ বিশেষতঃ শিবাপূজাং প্রমীতপিতৃকো নরঃ যাবদ্বৎসরপর্য্যন্তং মনসাপি ন চাচরেৎ ॥ মহাগুরুনিপাতে তু কাম্যং কিঞ্চিন্ন চাচরেৎ। আর্ত্বিজ্যং ব্রহ্মযজ্ঞঞ্চ শ্রাদ্ধং দৈবযুতঞ্চ যৎ ॥ গুরুমাক্ষিপ্য বিপ্রঞ্চ প্রকৃত্যৈব চ পাণিনা। ন কুর্য্যান্নিত্যকর্ম্মাণি রেতঃপাতে চ ভৈরব ॥ আসনঞ্চার্ঘ্যপাত্রঞ্চ

ভগ্নমাসাদয়েন্ন যৎ। ঊষরে কৃমিসংযুক্তে স্থানে বৃষ্টেঽপি নার্চ্চয়েৎ॥ নীচৈরাসাদ্য তৎস্থানং শুচিঃ প্রযতমানসঃ। অর্চ্চয়েচ্চণ্ডিকাং দেবীং দেবমন্যঞ্চ ভৈরব॥ * ॥ দিগ্বিভাগে তু কৌবেরী দিক্ শিবাপ্রীতিকারিণী। তস্মাত্তন্মুখমাসীনঃ পূজয়েচ্চণ্ডিকাং সদা॥ * ॥ পূজাস্থানানি যথা। লিঙ্গস্থাং পূজয়েদ্দেবীং পুস্তকস্থাং তথৈব চ। স্থণ্ডিলস্থাং মহামায়াং পাদুকে প্রতিমাসু চ॥ চিত্রে চ ত্রিশিখে খড়্গে জলস্থাং বাপি পূজয়েৎ। পঞ্চাশদঙ্গুলং খড়্গং ত্রিশিখঞ্চ ত্রিশূলকং॥ শিলায়াং পর্ব্বতস্যাগ্রে গঙ্গায়ামপি তৎসমা। আর্য্যাবর্ত্তে মধ্যদেশে তথা পর্ব্বতগহ্বরে॥ দেবীং সংপূজয়েন্নিত্যং ভক্তিশ্রদ্ধাসমন্বিতঃ। বারাণস্যাং সদা পূজা সম্পূর্ণফলদায়িনী॥ ততস্তু দ্বিগুণা প্রোক্তা পুরুষোত্তমসন্নিধৌ। ততোঽপি দ্বিগুণা প্রোক্তা দ্বারবত্যাং বিশেষতঃ॥ সর্ব্বক্ষেত্রেষু তীর্থেষু পূজা দ্বারবতীসমা। বিন্ধ্যে শতগুণা প্রোক্তা গঙ্গায়ামপি তৎসমা॥ আর্য্যাবর্ত্তে মধ্যদেশে ব্রহ্মাবর্ত্তে তথৈব চ। বিন্ধ্যবৎফলদা পূজা প্রয়াগে পুষ্করে তথা॥ ততশ্চতুর্গুণং প্রোক্তং করতোয়ানদীজলে। তস্মাচ্চতুর্গুণফলা নন্দিকুণ্ডে চ ভৈরব॥ ততশ্চতুর্গুণা প্রোক্তা জল্পীশেশ্বরসন্নিধৌ। তত্র সিদ্ধেশ্বরীযোনৌ ততোঽপি দ্বিগুণা স্মৃতা॥ ততশ্চতুর্গুণা প্রোক্তা লৌহিত্যনদপাথসি। তৎসমা কামরূপে তু সর্ব্বত্রৈব জলে স্থলে॥ সর্ব্বশ্রেষ্ঠো যথা বিষ্ণুর্লক্ষ্মীঃ সর্ব্বোত্তমা যথা। দেবীপূজা তথা শস্তা কামরূপে সুরালয়ে॥ দেবীক্ষেত্রং কামরূপং বিদ্যতেঽন্যন্ন তৎসমং। অন্যত্র বিরলা দেবী কামরূপে গৃহে গৃহে॥ ততঃ শতগুণং প্রোক্তং নীলকূটস্য মস্তকে। ততোঽপি দ্বিগুণং প্রোক্তং হেরুকে শিবলিঙ্গকে॥ ততোঽপি দ্বিগুণা প্রোক্তা শৈলপুত্র্যাদিযোনিষু। ততঃ শতগুণং প্রোক্তং কামাখ্যাযোনিমণ্ডলে॥ ইতি কালিকাপুরাণে ৫৪। ৫৭ অধ্যায়ঃ॥ * ॥ পূজাসনানি তৎফলানি চ যথা। উপবিশ্যাসনে রম্যে কৃষ্ণাজিনকুশোত্তরে। রাঙ্কবে কম্বলে বাপি কাশাদৌ ব্যাঘ্রচর্ম্মণি॥ ন কুর্য্যাদর্চ্চনং বিষ্ণোঃ শিবে কাষ্ঠাসনাদিষু। কাষ্ঠাসনে বৃথা পূজা পাষাণে রোগসম্ভবঃ॥ ভূম্যাসনে গতির্নাস্তি বস্ত্রাসনে দরিদ্রতা। কুশাসনে জ্ঞানবৃদ্ধিঃ কম্বলে সিদ্ধিরুত্তমা॥ কৃষ্ণাজিনে ধনী পুত্রী মোক্ষঃ স্যাদ্ব্যাঘ্রচর্ম্মণি। মন্ত্রযোগং প্রকুর্ব্বীত ভোগার্থং সুখমাসনে। ইতি পাদ্মোত্তরখণ্ডে ৭৪ অধ্যায়ঃ॥ * ॥ পূজাধিকারিতা প্রযোজকদেবষট্কপূজা যথা। গণেশঞ্চ দিনেশঞ্চ বহ্নিং বিষ্ণুং শিবং শিবাং। সংপূজ্য দেবষট্কঞ্চ সোঽধিকারী চ পূজনে॥ * ॥ গণেশং বিঘ্ননাশায় নিষ্পাপায় দিবাকরং। বহ্নিং শুদ্ধায় বিষ্ণুঞ্চ মুক্তয়ে পূজয়েন্নরঃ॥ শিবং জ্ঞানায় জ্ঞানেশং শিবাঞ্চ বুদ্ধিবৃদ্ধয়ে। সংপূজ্য তান্ লভেৎ প্রাজ্ঞো বিপরীতমতোঽন্যথা॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতি-

খণ্ডে ৮ অধ্যায়ঃ ॥ * ॥ দ্বাদশমাসে বিষ্ণুপূজাবিধির্যথা। প্রত্যহং কার্ত্তিকে মাসি জাতীপুষ্পৈঃ সমর্চ্চয়েৎ। দদ্যাদখণ্ডদীপঞ্চ নিয়তাত্মা দৃঢ়ব্রতঃ। ব্রাহ্মণান্ ভোজয়িত্বাথ সহসাযুজ্যমাপ্নুয়াৎ ॥ মার্গশীর্ষে নবান্নেন বকপুষ্পৈশ্চ কেশবং। সমর্চ্চ্য ভোজয়েদ্‌বিপ্রান্ বৈকুণ্ঠপদমাপ্নুয়াৎ ॥ ধনুষ্যুষসি দেবেশং মাসমেকং নিরন্তরং। অর্চ্চয়েদুপবাসৈশ্চ করবীরৈঃ সিতাসিতৈঃ॥ ধূপৈর্দীপৈশ্চ নৈবেদ্যৈর্যথাশক্ত্যা নিবেদয়েৎ। সমাপ্তৌ ভোজয়েদ্বিপ্রান্ মহাভাগবতোত্তমান্। অশ্বমেধসহস্রস্য ফলমাপ্নোত্যসংশয়ঃ ॥ তপোমাস্যুদিতে ভানৌ স্নাত্বা নদ্যাং বিশেষতঃ। অর্চ্চয়েন্মাধবীপুষ্পৈরুৎপলৈশ্চ শুভাননে ॥ পায়সং বিবিধং দিব্যং ভক্ত্যা তত্র নিবেদয়েৎ। মাসান্তে বৈষ্ণবান্ বিপ্রান্ ভোজয়েৎ শক্তিতো দ্বিজঃ॥ তপস্যে চ তথা দেবি মাধবৈঃ কুসুমৈঃ শুভৈঃ। স্নাত্বা সংপূজয়েদ্বিষ্ণুং মাসমেকং নিরন্তরং॥ শর্করাম্বু ঘৃতং নিত্যমপূপাংশ্চ নিবেদয়েৎ। বৈষ্ণবান্ ভোজয়েচ্ছক্ত্যা মাসান্তে শুভদর্শনে ॥ মধুমাসি তথা নিত্যং বকুলৈশ্চম্পকৈরপি। পূজয়েজ্জগতামীশং গুড়ান্নঞ্চ নিবেদয়েৎ ॥ মাসান্তে বৈষ্ণবান্ বিপ্রান্ ভোজয়েৎ সুসমাহিতঃ। সহস্রবার্ষিকং পূজাফলং নিত্যমবাপ্নুয়াৎ ॥ মাধবে পূজয়েদ্বিষ্ণুং শতপত্রৈর্মহোৎপলৈঃ। পূজয়িত্বা বিধানেন দধ্যন্নফলসংযুতং ॥ গুড়োদকঞ্চ ভক্ত্যা বৈ তস্মিন্ দেবি নিবেদয়েৎ। লক্ষ্ম্যা যুক্তো জগন্নাথঃ প্রীতো ভবতি পার্ব্বতি ॥ জ্যৈষ্ঠে তু শুক্লকমলৈঃ পাটলৈঃ কুমুদোৎপলৈঃ। অর্চ্চয়িত্বা হৃষীকেশমন্নং চূতফলৈর্যুতং ॥ নিবেদয়িত্বা ভক্ত্যা বৈ গবাং কোটিপ্রদো ভবেৎ। বৈষ্ণবান্ ভোজয়েন্নিত্যং মাসান্তে ভক্তসত্তমঃ। ব্রাহ্মণাংশ্চ শিবে সর্ব্বং ফলমানন্ত্যমশ্নুতে ॥ আষাঢ়ে দেবতাধীশং লক্ষ্মীভর্ত্তারমচ্যুতং। শ্রীপুষ্পৈরর্চ্চয়েন্নিত্যং পায়সান্নং নিবেদয়েৎ ॥ মাসান্তে ভোজয়েদ্বিপ্রান্ মহাভাগবতোত্তমান্। ষষ্টিবর্ষসহস্রস্য পূজাং প্রাপ্নোত্যসংশয়ঃ ॥ নভোমাস্যর্চ্চয়েদ্বিষ্ণুং পুন্নাগৈঃ কেতকীদলৈঃ। অর্চ্চয়িত্বাচ্যুতং ভক্ত্যা ন ভূয়ো জন্মভাগ্‌ভবেৎ ॥ দদ্যাদ্বৈ পিষ্টকান্ ভক্ত্যা শর্করাঘৃতমিশ্রিতান্। ব্রাহ্মণান্ ভোজয়িত্বা তু সর্ব্বমানন্ত্যমশ্নুতে ॥ নভস্যেপ্যর্চ্চয়েদীশং কুন্দৈঃ কুরুবকৈরপি। ক্ষীরান্নং গুড়মিশ্রন্তু ভক্ত্যা তত্র নিবেদয়েৎ। গবাং কোটিপ্রদানস্য প্রত্যহং সমবাপ্নুয়াৎ ॥ ইষে নীলোৎপলৈর্মাসি পূজয়েন্মধুসূদনং। ভক্ত্যা নিবেদয়েত্তস্মিন্ ক্ষীরমাজ্যবিমিশ্রিতং ॥ কন্যাকোটিসহস্রাণি কন্যাকোটিশতানি চ। বৈষ্ণবং লোকমাপ্নোতি মুদিতঃ স্বজনৈর্যুতঃ॥ ঊর্জ্জমাসে স্বয়ং দেবি কোমলৈস্তুলসীদলৈঃ। পূজয়িত্বাচ্যুতং ভক্ত্যা তৎসাযুজ্যমবাপ্নুয়াৎ ॥ ইতি পাদ্মোত্তরখণ্ডে ৭৫ অধ্যায়ঃ॥ দ্বাদশমাসাদৌ দুর্গাপূজাদি দেবীপুরাণে দ্রষ্টব্যং ॥ * ॥ অথ দেবপূজাবিধিঃ। স্নাতঃ

স্নানাসামর্থ্যে আর্দ্রবাসসা কৃতগাত্রমার্জ্জনাদির্গৃহসমীপং গত্বা প্রাঙ্মুখ উদঙ্মুখো বা প্রক্ষালিতপাদঃ শুচির্দ্বিবাসাঃ কুশহস্তঃ স্বাচান্তঃ সর্ব্বত্র বীরাসনোপবিষ্টঃ প্রাঙ্মুখঃ রাত্রাবুদঙ্মুখ এব মৌনী ধ্যানপরায়ণঃ কামরাগভয়দ্বন্দ্বক্রোধমাৎসর্য্যত্বরারহিতস্তন্মনাঃ সুমনা বা শুচৌ সমুপবিষ্টোঽনিষ্টশব্দগন্ধরহিতে দেশে দক্ষিণপার্শ্বে নৈবেদ্যাদ্যুপকরণানি চ। বামপার্শ্বে জলং পুরতো ধূপদীপৌ তাম্রাদিপাত্রঞ্চ যথাসন্নিবেশং পাদ্যার্ঘ্যাচমনীয়পাত্রং জলাদিপূর্ণমগ্রতঃ স্থাপয়িত্বা যথালাভং যজ্ঞোপবীতবস্ত্রালঙ্করণাদি সংস্থাপ্য ওঁ অপসর্পন্তু তে ভূতা যে ভূতা ভূমিপালকাঃ। ভূতানামবিরোধেন পূজাকর্ম্ম করোম্যহং॥ ইত্যুচ্চার্য্য অস্ত্রায় ফড়িতি তর্জ্জন্যঙ্গুষ্ঠযোগধ্বনিচ্ছোটিকয়া দশদিগ্বন্ধনং কুর্য্যাৎ॥ *॥ নাদেবো দেবমর্চ্চয়েদিত্যনুরোধাৎ সর্ব্বদেবার্চ্চনেষু ভূতশুদ্ধিমাহুরাগমিকাঃ। সা যথা। সোঽহমিতি মন্ত্রেণ জীবাত্মানং নাভিতো হৃদিস্থপরমাত্মনি সংযোজ্য ততঃ পৃথিবীং জলে জলং তেজসি তেজো বায়ৌ ততো বায়ুমাকাশে প্রবেশ্য দক্ষিণাঙ্গুষ্ঠেন দক্ষিণনাসাপুটং ধৃত্বা যমিতি বায়ুবীজেন ষোড়শবারজপ্তেন বায়্বাকর্ষণরূপপূরকসংজ্ঞয়া বায়ুচিন্তনরূপয়া বায়ব্যাধারণয়া দেহং শোষয়িত্বা ততো নাসাপুটাবঙ্গুষ্ঠানামিকাভ্যাং ধৃত্বা রমিতি বহ্নিবীজেন চতুঃষষ্টিবারজপ্তেন স্তম্ভনরূপকুম্ভকসংজ্ঞয়া অগ্নিচিন্তনরূপয়া আগ্নেয্যাধারণয়া দেহং দাহয়িত্বা লমিতীন্দ্রবীজেন দ্বাত্রিংশদ্বারজপ্তেন দক্ষিণনাসাপুটেন বায়ুনিঃসারণরূপয়া রেচকসংজ্ঞয়া ঐন্দ্রধ্যানরূপয়া ঐন্দ্র্যাধারণয়া স্থিরীকৃত্য বমিতি বরুণবীজেন চতুঃষষ্টিবারজপ্তেন জলাধিপধ্যানরূপয়া জলাধিপধারণয়া চন্দ্রমণ্ডলাদমৃতং স্রাবয়িত্বা তেনাপ্লাব্য প্রণবেন সর্ব্বাঙ্গং সংঘটিতং পুনর্নবীভূতং চিন্তয়িত্বা বায়্বাদিভূতানি ব্যোমাদিভ্যো ব্যুৎক্রমেণ বহিঃ কৃত্বা হংস ইতিমন্ত্রেণপরমাত্মতো জীবং নাভিপদ্মে ন্যসেৎ॥ *॥ তত ঋষ্যাদিন্যাসঃ। গোপালমন্ত্রে তু নারদায় ঋষয়ে নমঃ শিরসি। গায়ত্রীচ্ছন্দসে নমো মুখে। শ্রীকৃষ্ণায় দেবায় নমো হৃদি। এবমন্যত্রোহনীয়ং॥ *॥ ততঃ প্রাণায়ামঃ। তত্তন্মূলমন্ত্রেণ ষোড়শবারজপ্তেন অঙ্গুষ্ঠেন দক্ষিণনাসাপুটং ধৃত্বা বামনাসয়া বায়ুং পূরয়েৎ। অঙ্গুষ্ঠানামিকাভ্যাং নাসাপুটৌ ধৃত্বা চতুঃষষ্টিবারজপ্তেন বায়ুং কুম্ভয়েৎ। বামনাসামনামিকয়া ধৃত্বা দক্ষিণনাসয়া দ্বাত্রিংশদ্বারজপ্তেন বায়ুং ত্যজেৎ। পুনর্দক্ষিণনাসয়া পূরয়েৎ। উভাভ্যাং কুম্ভয়েৎ। বামনাসয়া রেচয়েৎ। পুনর্বাময়া পূরয়েৎ। উভাভ্যাং কুম্ভয়েৎ। দক্ষিণয়া রেচয়েদিতি॥ *॥ ততো বাহ্যমাতৃকান্যাসঃ। ন্যাসশব্দে দ্রষ্টব্যঃ॥ অনেকদেবপূজনে তু ভূতশুদ্ধিমাতৃকান্যাসয়োরবিশেষাৎ সকৃদেবানুষ্ঠানং॥ *॥ ততঃ করন্যাসঃ। যথা গোপালে। ওঁ ক্লাং অঙ্গুষ্ঠাভ্যাং নমঃ

অঙ্গুষ্ঠয়োঃ। ওঁ ক্লীং তর্জনীভ্যাং স্বাহা তর্জ্জন্যোঃ। ওঁ ক্লূং মধ্যমাভ্যাং বষট্ মধ্যময়োঃ। ওঁ ক্লৈং অনামিকাভ্যাং হুং অনামিকয়োঃ। ওঁ ক্লৌং কনিষ্ঠাভ্যাং বৌষট্ কনিষ্ঠয়োঃ। ওঁ ক্লঃ করতলপৃষ্ঠাভ্যাং ফট্ করতলপৃষ্ঠয়োঃ। এবমন্যত্রাপ্যূহ্যং ॥ * ॥ ততোঽঙ্গন্যাসঃ। ওঁ ক্লাং হৃদয়ায় নমঃ হৃদয়ে হস্ততলেন। ওঁ ক্লীং শিরসে স্বাহা অঙ্গুষ্ঠাঙ্গুলিভিঃ শিরসি। ওঁ ক্লূং শিখায়ৈ বষট্ অধোমুখাঙ্গুলিমুষ্টিনা শিখায়াং। ওঁ ক্লৈং কবচায় হুং ব্যস্তকরতলাভ্যাং আশিরঃপাদপর্য্যন্তরূপসর্ব্বাঙ্গে। ওঁ ক্লৌং নেত্রাভ্যাং বৌষট্ তর্জনীমধ্যমাভ্যাং নেত্রয়োঃ। ওঁ ক্লঃ অস্ত্রায় ফট্ ঊর্দ্ধাধস্তালত্রয়ং ছোটিকাভির্দশদিগ্বন্ধনঞ্চ কুর্য্যাৎ। এবমন্যত্রাপ্যূহনীয়ং। আগমোক্তাদিপূজনে তু ভূতশুদ্ধ্যাদিনিয়মঃ অন্যত্র ত্বনিয়মঃ॥ * ॥ ততোঽর্ঘ্যস্থাপনং। বামতোঽর্ঘ্যপাদ্যাদ্যাচমনীয়পাত্রাণি সংস্থাপ্য অর্ঘ্যপাত্রং জলগন্ধপুষ্পৈঃ সংপূজ্য তত্তদ্দেবতামূলমন্ত্রং সর্ব্বদেবতাসাধারণে তু প্রণবং বা অষ্টধা জপিত্বা ধেনুমুদ্রয়া অমৃতীকৃত্য তদুদকং পাত্রান্তরে কিঞ্চিৎ কৃত্বা তেনোদকেনাত্মানং পূজোপকরণঞ্চাভ্যুক্ষয়েৎ। প্রণবাদিতত্তদ্দেবতাচতুর্থ্যন্তনাম্না নমোঽন্তেন মূলমন্ত্রেণ বা আত্মানং গন্ধাদিভিরভ্যর্চ্য তদ্রূপং ধ্যাত্বা ততস্তাম্রপাত্রে চন্দনাদিরচিতাষ্টদলপদ্মে সম্বোধনান্তদেবতানাম্না ইহাগচ্ছেত্যাবাহ্য স্থাপয়িত্বা মূলেন চতুর্থ্যন্তনাম্না আসনং দত্ত্বা সম্বোধনান্তনাম্না স্বাগতং তে ইতি পৃচ্ছেৎ। দীক্ষিতস্তু মূলমন্ত্রমুচ্চার্য্য প্রণবাদিচতুর্থ্যন্তনাম্না নমোঽন্তেন দদ্যাদিতি বিশেষঃ। এবং পাদ্যার্ঘ্যাচমনীয়াদীনি দদ্যাৎ। পাদ্যার্ঘ্যয়োঃ পৌর্ব্বাপর্য্যে ত্বনিয়মঃ। ততো ঘৃতমধুদধি মেলকপলমিতং কাংস্যপাত্রস্থং পিহিতঞ্চ মধুপর্কং পুনরাচমনীয়ঞ্চ দদ্যাৎ। ততো লৌকিকষষ্ট্যধিকশতত্রয়তোলকান্যূনবৈদিকাষ্টোত্তরশতপলান্যূনজলেন তদভাবে ষষ্টিরক্তিকমাসদ্বয়াধিকত্রয়োদশতোলকরূপবৈদিকপলচতুষ্টয়ান্যূনজলেন ইদং স্নানীয়ং এবং দুগ্ধাদিনাপি। ঘৃতাদিস্নানে তু গন্ধদ্রব্যচূর্ণকবিরূক্ষণমুষ্ণোদকেন ক্ষালনং চাঙ্গং ততঃ পুনরাচমনীয়ং বাসসী পুনরাচমনীয়ং দদ্যাৎ। প্রত্যেকমলঙ্কারং যজ্ঞোপবীতং গন্ধং পুষ্পং ধূপং দীপং নৈবেদ্যং পুনরাচমনীয়ং তাম্বূলং দত্ত্বা মূলমন্ত্রং যথাশক্তি জপ্ত্বা সমর্প্য ত্রিঃ প্রদক্ষিণীকৃত্য অষ্টাঙ্গপ্রণিপাতেন পঞ্চাঙ্গপ্রণিপাতেন বা শিরসি করদ্বয়সংযোগেন চ প্রণম্য স্তুত্বা প্রণবাদিসম্বোধনান্তনাম্না ক্ষমস্বেতি বিসর্জ্জয়েৎ। যত্র যদুপচারদ্রব্যাসম্ভবস্তদর্থং জলং দেয়ং। প্রতিষ্ঠিতস্থিরতরপ্রতিমায়াং তত্তদাবাহনবিসর্জ্জনে ন স্তঃ। এবং শালগ্রামে জলে বা সর্ব্বদেবপূজনেঽপি যথালাভং পাদ্যাদিদশোপচারৈঃ। গন্ধপুষ্পধূপদীপনৈবেদ্যৈঃ পঞ্চোপচারৈঃ। গন্ধপুষ্পাভ্যাং বা। কেবলেন পুষ্পেণ। কেবলেনাক্ষতেন।

কেবলেন জলেন। মানসিকেন বা পূজয়েৎ। তত্র সামান্যদেবতাধূপঃ শারদায়াং। সগুগ্‌গুল্বগুরুশীরশর্করামধুচন্দনৈঃ। ধূপয়েদাজ্যসংমিশ্রৈর্নীচৈর্দেবায় দেশিকঃ॥ এতৈর্মিলিতৈর্যথালাভং বা। ইতি সর্ব্বদেবতাসাধারণো বিধিঃ॥*॥ ততঃ প্রথমং সূর্য্যপূজা। ওঁ সূর্য্যায় নমঃ ইতি পূজয়েৎ। তত্র গন্ধাঃ। চন্দনাগুরুকর্পূরবীরণমূলপদ্মকাষ্ঠরক্তচন্দনানি। পুষ্পাণি। মল্লিকামালতীকরবীরচম্পকপাটলাবকুলতগরপীতঝিণ্টীকুন্দনবমল্লিকাশোকপদ্মাগস্ত্যজবাপুষ্পাণি বিহিতানি। তুলসীকৃষ্ণতুলসীদূর্ব্বাবিল্বপত্রাণি রাজিতাকাঞ্চ্যেকদলতগরমুদ্গলানি নিষিদ্ধানি। ধূপাশ্চ। গুগ্‌গুল্বগুরুদেবদারুবিল্বানি। দীপস্তু ঘৃতেন তৈলেন বা। নৈবেদ্যানি বিবিধভক্ষ্যাণি॥*॥ অথ গণেশপূজা তদাবাহনে। ওঁ ভূর্ভুবস্বর্গণেশ ইহাগচ্ছ ইতি দূর্ব্বাপুষ্পাক্ষতৈরাবাহ্য ওঁ গণেশায় নম ইত্যনেন পূজয়েৎ। তত্র তুলসী নিষিদ্ধা। রক্তচন্দনরক্তপুষ্পাদিকং বিহিতং। দেবতান্তরপ্রসিদ্ধং অন্যৎ মুকুলাদিকং ন দেয়ং॥ * ॥ অথ দুর্গাপূজা। ওঁ ভূর্ভুবঃ স্বর্দুর্গে ইহাগচ্ছ ইতি পুষ্পাক্ষতৈরাবাহ্য ওঁ দুর্গায়ৈ নম ইত্যনেন পূজয়েৎ। তত্র গন্ধাঃ চন্দনাগুরুকর্পূরকুঙ্কুমানি। পুষ্পাণি মল্লিকোৎপলপুন্নাগশমীচম্পকাশোককর্ণিকারকরবীরতুলসীবিল্বপত্রাদীনি বিহিতানি। মুকুলার্কমন্দারপুষ্পাণি নিষিদ্ধানি। ধূপাঃ কৃষ্ণাগুরুসহিতঘৃতমহিষাক্ষগুগ্‌গুলুবিল্বান্যতমানি বীরণমূলচন্দনেঽপি। দীপস্তু ঘৃতেন তৈলেন বা। নৈবেদ্যানি আম্রনারিকেলখর্জ্জুরকদলীবীজপূরাদীনি কথিতং বিদ্ধং ফলং নিষিদ্ধং। যত্নপক্ককদলীফলমপি বিহিতং॥ * ॥ অথ শিবপূজা। উদঙ্মুখঃ ওঁ নমঃ শিবায় নমঃ ইতি মন্ত্রেণ পূজয়েৎ। তত্র গন্ধঃ অগুরুচন্দনে। পুষ্পাণি চ অর্ককরবীরজাতীবকুলপাটলাশ্বেতমন্দারনাগকেশরচম্পকধুস্তূরবিল্বামলকতুলসীপত্রাণি বিহিতানি। কেতকীমাধবীপুষ্পাকুন্দযূথীমদন্তিকাশিরীষসর্জবন্ধূকমুকুলমাত্রাণি নিষিদ্ধানি। ধূপস্তু ঘৃতগুগ্‌গুলুবিল্বফলানি উশীরাগুরুচন্দনানি চ। দীপস্তু ঘৃতেন তৈলেন সর্ষপাদিনা বা। নৈবেদ্যানি গুড়খণ্ডঘৃতপক্কমাতুলুঙ্গফলাদীনি॥ * ॥ অথ পার্থিবশিবলিঙ্গপূজাবিধিঃ। ওঁ হরায় নম ইতি মৃদাহরণং। ওঁ মহেশ্বরায় নম ইতি ঘটনং। ওঁ শূলপাণে ইহ সুপ্রতিষ্ঠিতো ভব ইতি প্রতিষ্ঠা। আচারাৎ ধ্যায়েন্নিত্যমিত্যাদিনা শারদোক্তং ধ্যায়েৎ। পিনাকধৃক্ ইহাগচ্ছ ইত্যাবাহনং। ওঁ পশুপতয়ে নম ইতি স্নপনং। এতৎ পাদ্যং ওঁ নমঃ শিবায় নম ইতি পাদ্যাদিভিঃ সংপূজ্য বামাবর্ত্তেন বেদ্যাং প্রাচ্যাদিষু ওঁ সর্ব্বায় ক্ষিতিমূর্ত্তয়ে নমঃ ওঁ ভবায় জলমূর্ত্তয়ে নমঃ ওঁ রুদ্রায় অগ্নিমূর্ত্তয়ে নমঃ ওঁ উগ্রায় বায়ুমূর্ত্তয়ে নমঃ ওঁ ভীমায় আকাশমূর্ত্তয়ে নমঃ ওঁ পশুপতয়ে যজমানমূর্ত্তয়ে নমঃ ওঁ মহাদেবায় সোমমূর্ত্তয়ে নমঃ ওঁ

ঈশানায় সূর্য্যমূর্ত্তয়ে নমঃ। ইত্যষ্টমূর্ত্তীঃ পুষ্পৈঃ পূজয়েৎ। ততো মুখবাদ্যং কৃত্বা ক্ষমস্বেতি সংহারমুদ্রয়া বিসর্জ্জয়েৎ। স্ত্রী শূদ্রস্তু নমঃ শিবায়েতি মন্ত্রেণ পূজয়েৎ ॥*॥ অথ বিষ্ণুপূজা। শঙ্খাদ্যর্ঘ্যপাত্রং পুরতো নিধায় ত্রিভাগজলেনাপূর্য্য বমিতি ধেনুমুদ্রয়া অমৃতীকৃত্য ওঁ বিষ্ণবে নম ইত্যষ্টধা জপিত্বা তেনোদকেনাত্মানং পূজোপকরণঞ্চাভ্যুক্ষেৎ। দীক্ষিতস্তু তন্মন্ত্রমুচ্চার্য্য তন্নাম্না পূজয়েৎ অঙ্গাদ্যাবরণঞ্চ পূজয়েৎ শালগ্রামে মণৌ প্রতিমাষ্টদলপদ্মজলাদিষু। তত্র শালগ্রামে আবাহনবিসর্জ্জনে ন স্তঃ। ধ্যেয়ঃ সদেত্যাদিনা ধ্যাত্বা ওঁ ভগবন্ বিষ্ণো ইহাগচ্ছেত্যাদ্যক্ষতপুষ্পৈরাবাহ্য ইদমাসনং ওঁ শ্রীবিষ্ণবে নমঃ ওঁ বিষ্ণো স্বাগতমিতি পৃচ্ছেৎ এতৎ পাদ্যং ওঁ বিষ্ণবে নমঃ সামগস্তু ইদমর্ঘ্যং ওঁ বিষ্ণবে নমঃ ইতি বদেৎ। তদিতরস্তু এষোঽর্ঘ ইতি বিশেষঃ। তত্র দ্রব্যাণি কুশপুষ্পাক্ষতসিদ্ধার্থচন্দনতোয়ানি যথালাভং বা অর্ঘ্যপাদ্যয়োস্তু পৌর্ব্বাপর্য্যেণ নিয়মঃ। আচমনীয়ে সুগন্ধিদ্রব্যযুক্তজলং কেবলং বা প্রশস্তজলং। ঘৃতমধুদধ্যাত্মকো মধুপর্কঃ তদভাবে কেবলং বা মধু। পূর্ব্ববদিদমাচমনীয়ং ইদং স্নানীয়ং তত্র লৌকিকষষ্ট্যধিকশতত্রয়তোলকান্যূনং জলং। পুনরাচমনীয়ং ইদং বস্ত্রং পুনরাচমনীয়ং ইদমাভরণং পুনরাচমনীয়ং গন্ধস্তু অঙ্গুষ্ঠযুক্তকনিষ্ঠয়া গন্ধমুদ্রয়া তত্র চন্দনাগুরুকর্পূরকুঙ্কুমবীরণমূলপদ্মকাষ্ঠসিহ্লকরক্তচন্দনকস্তূরিকাজাতীফলানি ঘৃষ্টানি এতচ্চূর্ণানি বা এতদ্দাহাকৃষ্টরসো বা পুষ্পাণি চ তর্জ্জন্যঙ্গুষ্ঠযোগরূপপুষ্পমুদ্রয়া তত্র মল্লিকামালতীজাতীকেতক্যশোকচম্পকনাগকেশরবকুলপদ্মোৎপলতুলসীবিল্বকরবীরপারিভদ্রপাটলাশ্বেতাপরাজিতাবহুদলতগরশ্বেতজবারক্তাশোকশণপুষ্পভূমিচম্পকশেফালীনবমালিকাযূথিকাকদম্বকুন্দলবঙ্গমাধবীপুষ্পবকবন্ধূককুরুবকবিল্বপুষ্পবহুবারককহ্লারদ্রোণপলাশপুষ্পাণি বিহিতানি। নরসিংহেতরাবতারে কেতকী নিষিদ্ধা। পর্য্যুষিতমচ্ছিদ্রাপ্রোক্ষিতস্বয়ংপতিতোপহতমধ্যাহ্নস্নানোত্তরক্রটিতপদ্মচম্পকেতরকলিকাতুলসীতরশুষ্কপত্রপরিহিতপুষ্পবিহিতেতররক্তপুষ্পচৈত্যবৃক্ষোদ্ভবশ্মশানজাতকুটজশাল্মলীশিরীষপুষ্পাণি নিষিদ্ধানি। ব্রাহ্মণেতরস্য বনোদ্ভবানি চ। বিহিতপত্রাণি তুলসীবিল্বশমীভৃঙ্গরাজতমালামলককেতকীপত্রাণি। পদ্মকুন্দোৎপলানি পঞ্চদিনাৎ পরতঃ পর্য্যুষিতানি। তুলস্যগস্ত্যবিল্বানি কদাপি ন পর্য্যুষিতানি। ধূপস্থানঞ্চ দেবস্য বামে পুরতো বা তর্জ্জন্যঙ্গুষ্ঠযোগরূপধূপমুদ্রয়া বামহস্তেন ঘণ্টাং বাদয়ন্ স চ ভূমৌ ন দেয়ঃ। ধূপশ্চ জটামাংসীমহিষাক্ষগুগ্‌গুলুকর্পূরাগুরুসিহ্লকদেবদারুজাতীফলশারদোক্তমিশ্রিতগুগ্‌গুল্বাদয়ঃ। দীপস্থানং দেবস্য দক্ষিণতঃ পুরতো বা মধ্যমাঙ্গুষ্ঠযোগরূপদীপমুদ্রয়া এষ দীপঃ ঘৃতেন তৈলেন বা ভূমৌ ন দেয়ঃ। নৈবেদ্যস্থানঞ্চ

দেবপৃষ্ঠেতরদেশঃ। অনামিকাঙ্গুষ্ঠযোগরূপনৈবেদ্যমুদ্রয়া এতন্নৈবেদ্যং তত্র কদলীপনসজম্বূলবনীকরমর্দকহবিঃসংস্কৃততিলমাষমুদ্গযবগোধূমব্রীহিশাল্যন্নং বিহিতং। নিষিদ্ধস্তু অজামহিষীক্ষীরদধিঘৃতং পঞ্চনখবরাহমৎস্যমৃগচ্ছাগেতরমাংসহিরণ্যোদকস্পর্শেতরশ্বচাণ্ডালদৃষ্টবিড়ালাদ্যুচ্ছিষ্টস্নেহাক্তপর্য্যুষিতেতরভক্ষ্যং। খণ্ডাদীনি যবগোধূমক্ষীরবিকারাশ্চ ন পর্য্যুষিতাঃ। ততঃ পুনরাচমনীয়ং তাম্বূলঞ্চ দত্ত্বা অষ্টোত্তরসহস্রং শতং দশ বা উত্তরীয়বস্ত্রেণ ছাদিতহৃদ্দেশে স্থিততির্য্যগ্‌ভূতদক্ষিণকরঃ যথাশক্তি মূলমন্ত্রং জপিত্বা ওঁ গুহ্যাতিগুহ্যগোপ্তা ত্বং গৃহাণাস্মৎকৃতং জপং। সিদ্ধির্ভবতু মে দেব ত্বৎপ্রসাদাৎ ত্বয়ি স্থিতে ইত্যর্ঘোদকেন দেবহস্তে জলং দদ্যাৎ। ততোঽর্ঘ্যশঙ্খং গৃহীত্বা ত্রিঃ প্রদক্ষিণীকৃত্য ধ্যেয়ং সদা পরিভবঘ্নমভীষ্টদোহং তীর্থাস্পদং শিববিরিঞ্চিনুতং শরণ্যং। ভৃত্যার্ত্তিহং প্রণতপালভবাব্ধিপোতং বন্দে মহাপুরুষ তে চরণারবিন্দং॥ ত্যক্ত্বা সুদুস্ত্যজসুরেপ্সিতরাজ্যলক্ষ্মীং ধর্ম্মিষ্ঠ আর্য্যবচসা যদগাদরণ্যং। মায়ামৃগং দয়িতয়েপ্সিতমন্বধাবদ্বন্দে মহাপুরুষ তে চরণারবিন্দং॥ ইতি স্তুত্বা ওঁ প্রসীদ ভগবন্নিতি দণ্ডবৎ প্রণমেৎ। ওঁ যৎ কিঞ্চিৎ ক্রিয়তে দেব ময়া সুকৃতদুষ্কৃতং। তৎ সর্ব্বং ত্বয়ি সংন্যস্তং ত্বৎপ্রযুক্তঃ করোম্যহং॥ ইত্যনেন সর্ব্বং সমর্পয়েৎ। মন্ত্রহীনং ক্রিয়াহীনং ভক্তিহীনং জনার্দ্দন। যৎ পূজিতং ময়া দেব পরিপূর্ণং তদস্তু মে॥ ইতি প্রার্থয়েৎ। ততঃ সংহারমুদ্রয়া নির্ম্মাল্যপুষ্পমাদায় ভূমৌ ত্যজেৎ বিসর্জ্জনমন্ত্রে ওঁ ভগবন্ বিষ্ণো ক্ষমস্বেতি বিসর্জ্জয়েৎ তদমন্ত্রে নির্ম্মাল্যপুষ্পমাদায় ওঁ তিষ্ঠ দেব পরে স্থানে স্বস্থানে পরমেশ্বর। যত্র ব্রহ্মাদয়ঃ সর্ব্বে সুরাস্তিষ্ঠন্তি মে হৃদি॥ ইতি মন্ত্রেণ দেবং হৃদি স্থাপয়েৎ। তত ওঁ বিষ্বক্সেনায় নম ইতি গন্ধপুষ্পনৈবেদ্যাগ্রং দদ্যাৎ। ততো বৈষ্ণবায় তন্নির্ম্মাল্যং অনুলেপনং নৈবেদ্যঞ্চ কিঞ্চিদত্ত্বা শিরসি নির্ম্মাল্যং ধার্য্যং সর্ব্বাঙ্গেষ্বনুলেপনং কৃত্বা যথাকালং পাদোদকং নৈবেদ্যঞ্চোপভুঞ্জীত। তত্র পাদোদকগ্রহণে মন্ত্রঃ ওঁ কৃষ্ণ কৃষ্ণ মহাবাহো ভক্তানামার্ত্তিনাশন। সর্ব্বপাপপ্রশমনং পাদোদকং প্রযচ্ছ মে॥ ততস্তৎপানাদৌ পরোদিতেষ্টদেবতানাম শ্রুত্বা স্বয়ং ত্রিরুচ্চার্য্য পাদোদকং পীত্বা তচ্ছেষং অকালমৃত্যুশমনং সর্ব্বব্যাধিবিনাশনং। বিষ্ণোঃ পাদোদকং পুণ্যং শিরসা ধারয়াম্যহং॥ ইতি শিরসি ধারয়েৎ। নৈবেদ্যভক্ষণে মন্ত্রঃ ওঁ উচ্ছিষ্টভোজিনস্তস্য বয়মুচ্ছিষ্টকাঙ্ক্ষিণঃ। যেন লীলাবরাহেণ হিরণ্যাখ্যো নিপাতিতঃ॥ ইত্যুচ্চার্য্য ভক্ষয়েৎ॥*॥ যথালাভং দশোপচারেণ বা পূজয়েৎ। তত্র দশোপচারাঃ। অর্ঘ্যপাদ্যাচমনীয়মধুপর্কাচমনগন্ধপুষ্পধূপদীপনৈবেদ্যানি। পঞ্চোপচারাঃ। গন্ধপুষ্পধূপদীপনৈবেদ্যানি। গন্ধপুষ্পাভ্যাং

বা কেবলপুষ্পেণ কেবলজলেন বা পূজয়েৎ ততোঽগ্নিব্রহ্মসরস্বতীলক্ষ্মীণাং পূজনং। ইত্যাহ্নিকপ্রয়োগতত্ত্বং ॥ * ॥ তন্ত্রোক্ত-সামান্যপূজা কলাবতীশব্দে দ্রষ্টব্যা॥

পূজার্হঃ (ত্রি) পূজাযোগ্যঃ। মান্যঃ। ইতি শব্দরত্নাবলী ॥

পূজিতঃ (ত্রি) প্রাপ্তপূজঃ। অর্চ্চিতঃ। তৎপর্য্যায়ঃ। অঞ্চিতঃ ২। ইত্যমরঃ ॥

পূজিতব্যঃ (ত্রি) পূজনীয়ঃ। পূজধাতোঃ কর্ম্মণি তব্যপ্রত্যয়নিষ্পন্নঃ ॥

পূজিলঃ (পুং) দেবতা। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥ পূজ্যে ত্রি। ইত্যুণাদিকোষঃ॥

পূজ্যঃ (পুং) শ্বশুরঃ। পূজনীয়ে ত্রি। তৎপর্য্যায়ঃ। প্রতীক্ষ্যঃ ২। ইত্যমরঃ॥ অহং হি পূর্ব্বো বয়সা ভবদ্ভ্যস্তেনাভিবাদং ভবতাং ন যুক্তং। যো বিদ্যয়া তপসা জন্মনা বা বৃদ্ধঃ স পূজ্যো ভবতি দ্বিজানাং॥ অষ্টক উবাচ। অবাদীশ্চেদ্‌বয়সাস্মি প্রবৃদ্ধ ইতি বৈরাজাভ্যধিকঃ কথঞ্চিৎ। যো বৈ বিদ্বাংস্তপসা স বৃদ্ধঃ স এব পূজ্যো ভবতি দ্বিজানাং॥ ইতি মাৎস্যে ৩৯ অধ্যায়ঃ॥

পূণ ক সংঘাতে। রাশীকরণে। ইতি কবিকল্পদ্রুমঃ॥ ষষ্ঠস্বরী। ক পূণয়তি ধান্যং লোকঃ। রাশীকরোতীত্যর্থঃ। ইতি দুর্গাদাসঃ॥

পূতং (ক্লী) অপনীতবুষধান্যং। বওলানধান ইতি ভাষা। তৎপর্য্যায়ঃ। বহুলীকৃতং ২। ইত্যমরঃ॥

পূতঃ (ত্রি) ব্রতাদিনা শুদ্ধঃ। তৎপর্য্যায়ঃ। পবিত্রঃ ২ প্রযতঃ ৩। শুদ্ধঃ। যথা। দধিগোময়াদি সামান্যং পবিত্রং স্বভাবপবিত্রং বা। ইতি ভরতঃ॥ তৎপর্য্যায়ঃ। পবিত্রং ২ মেধ্যং ৩। ইত্যমরঃ॥ চক্ষুঃপূতং ন্যসেৎ পাদং বস্ত্রপূতং জলং পিবেৎ। সত্যপূতং বদেদ্বাক্যং বুদ্ধিপূতং বিচিন্তয়েৎ॥ ইতি মার্কণ্ডেয়পুরাণং॥ সত্যং। ইতি জটাধরঃ॥

পূতঃ (পুং) শঙ্খঃ। শ্বেতকুশঃ। বিকঙ্কতবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

পূতক্রতায়ী (স্ত্রী) ইন্দ্রপত্নী। শচী। ইতি জটাধরঃ॥

পূতক্রতুঃ (পুং) ইন্দ্রঃ। ইতি জটাধরঃ॥

পূতগন্ধঃ (পুং) বর্ব্বরঃ। ইতি রাজনির্ঘণ্টঃ॥

পূততৃণঃ (পুং) শ্বেতকুশঃ। ইতি রাজনির্ঘণ্টঃ॥

পূতদ্রুঃ (পুং) পলাশবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

পূতধান্যং (ক্লী) তিলঃ। ইতি রাজনির্ঘণ্টঃ॥

পূতনা (স্ত্রী) হরীতকী। ইত্যমরঃ॥ সিন্ধুদেশজা স্বল্পত্বক্ বৃহদস্থিহরীতকী লেপনে প্রশস্তা। ইতি রাজবল্লভঃ॥ গন্ধমাংসী। ইতি রাজনির্ঘণ্টঃ॥ দানবীভেদঃ। সা বকাসুরভগিনী জিঘাংসয়া স্তনকালকূটদানাৎ শ্রীকৃষ্ণেন হতা। রোগভেদঃ। ইতি মেদিনী॥ স চ অহিপূতনানামবালরোগঃ। তস্য নিদানং যথা। পদ্মবর্ণো মহাপদ্মো বালে দোষত্রয়োদ্ভবঃ। শঙ্খাভ্যাং হৃদয়ং যো বা হৃদয়াদ্বা গুদং ব্রজেৎ॥ ক্ষুদ্ররোগে চ কথিতে অজগল্ল্যহিপূতনে।

ক্ষুদ্ররোগোক্তং যথা। শকৃন্মূত্রসমাযুক্তেঽশৌচেঽপানে শিশোর্ভবেৎ। স্বিন্নে বা স্নাপ্যমানে বা কণ্ডূরক্তকফোদ্ভবা ॥ কণ্ডূয়নাত্ততঃ ক্ষিপ্রং স্ফোটঃ স্রাবশ্চ জায়তে। একীভূতং ব্রণং ঘোরং তং বিদ্যাদহিপূতনং ॥ ইতি মাধবকরঃ ॥ * ॥ বালমাতৃকাবিশেষঃ। যথা। তৃতীয়ে দিবসে মাসে বর্ষে বা গৃহ্লাতি পূতনা নাম মাতৃকা। তয়া গৃহীতমাত্রেণ প্রথমং ভবতি জ্বরঃ ॥ গাত্রমুদ্বেজয়তি স্তন্যং ন গৃহ্লাতি দৃষ্টিং বধ্নাতি ক্রন্দতি ঊর্দ্ধং নিরীক্ষতে। বলিস্তস্য প্রবক্ষ্যামি যেন সম্পদ্যতে শুভং। নদ্যুভয়তটমৃত্তিকাং গৃহীত্বা গন্ধং তাম্বূলং রক্তপুষ্পং রক্তচন্দনং রক্তসপ্তধ্বজাঃ সপ্তপ্রদীপাঃ সপ্তস্বস্তিকাঃ মৎস্যমাংসসুরাঃ অগ্রভক্তঞ্চ দক্ষিণস্যাং দিশি মধ্যাহ্নে চতুষ্পথে বলির্দাতব্যঃ শিবনির্ম্মাল্যগুগ্‌গুলুসর্ষপনিম্বপত্রমেষশৃঙ্গৈর্দিনত্রয়ং ধূপয়েৎ। ওঁ নারায়ণায় নমঃ হন হন মুঞ্চ মুঞ্চ হুং ফট্ ত্রায়স্ব স্বাহা। চতুর্থে দিবসে ব্রাহ্মণং ভোজয়েৎ ততঃ সম্পদ্যতে শুভং। ইতি চক্রপাণিদত্তঃ ॥

পূতনারিঃ (পুং) শ্রীকৃষ্ণঃ। ইতি শব্দরত্নাবলী ॥

পূতনাসূদনঃ (পুং) শ্রীকৃষ্ণঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

পূতনাহা [ন্] (পুং) শ্রীকৃষ্ণঃ। ইতি হেমচন্দ্রঃ ॥

পূতফলঃ (পুং) পনসঃ। ইতি রাজনির্ঘণ্টঃ ॥

পূতা (স্ত্রী) দূর্ব্বা। ইতি রাজনির্ঘণ্টঃ ॥

পূতাত্মা [ন্] (পুং) পবিত্রস্বভাবঃ। শুদ্ধদেহঃ। যথা। শাম্বোঽপি স্তবরাজেন স্তুত্বা সপ্তাশ্ববাহনং। পূতাত্মা নীরুজঃ শ্রীমাংস্তস্মাদ্রোগাদ্বিমুক্তবান্ ॥ ইতি শাম্বপুরাণে সূর্য্যস্তবঃ ॥

পূতি (ক্লী) রোহিষতৃণং। ইতি রাজনির্ঘণ্টঃ ॥

পূতিঃ (স্ত্রী) পবিত্রতা। দুর্গন্ধঃ। ইত্যমরটীকায়াং রায়মুকুটঃ ॥ খট্টাশমুষ্কঃ। খাটাশী ইতি ভাষা। তস্যানুলেপনগুণঃ। পরমালক্ষ্মীরক্ষোজ্বরনাশিত্বং। ইতি রাজবল্লভঃ ॥

পূতিকং (ক্লী) বিষ্ঠা। ইতি রাজনির্ঘণ্টঃ ॥

পূতিকঃ (পুং) পূতিকরঞ্জবৃক্ষঃ। ইত্যমরঃ ॥

পূতিকরজঃ (পুং) করঞ্জভেদঃ। ইত্যমরঃ ॥ যথা। অথ কটুকরঞ্জঘোরাকরঞ্জনামগুণাঃ। করঞ্জো নক্তমালশ্চ করজশ্চিরবিল্বকঃ। ঘৃতপূর্ণকরঞ্জোঽন্যঃ প্রকীর্য্যঃ পূতিকোঽপি চ ॥ স চোক্তঃ পূতিকরজঃ সোমবল্কশ্চ স স্মৃতঃ। করঞ্জঃ কটুকস্তীক্ষ্ণো বীর্য্যোষ্ণো যোনিদোষহৃৎ ॥ কুষ্ঠোদাবর্ত্তগুল্মার্শোব্রণকৃমিকফাপহঃ। তৎপত্রং কফবাতার্শঃকৃমিশোথহরং পরং ॥ ভেদনং কটুকং পাকে বীর্য্যোষ্ণং পিত্তলং লঘু। তৎফলং কফবাতঘ্নং মেহার্শঃকৃমিকুষ্ঠজিৎ ॥ ঘৃতপূর্ণকরঞ্জোঽপি করঞ্জসদৃশো গুণৈঃ। ইতি ভাবপ্রকাশঃ ॥

পূতিকরঞ্জঃ (পুং) করঞ্জবিশেষঃ। নাটাকরঞ্জ ইতি ভাষা। কঠকরেজ ইতি হিন্দী ভাষা। তৎপর্য্যায়ঃ। প্রকীর্য্যঃ ২ পূতিকরজঃ ৩

পূতীকরজঃ ৪ পূতিকঃ ৫ পূতীকঃ ৬ কলিকারকঃ ৭ কলিমালকঃ ৮ কলহনাশনঃ ৯। ইত্যমরভরতৌ ॥ প্রকীর্ণঃ ১০ রজনীপুষ্পঃ ১১ সুমনাঃ ১২ পূতিকর্ণিকঃ ১৩ কৈড়র্য্যঃ ১৪ কলিমাল্যঃ ১৫। অস্য গুণাঃ। কটুত্বং। তিক্তত্বং। উষ্ণত্বং। বিষবাতার্ত্তিকণ্ডূবিচর্চ্চিকাকুষ্ঠস্পর্শত্বগ্দোষনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

পূতিকর্ণঃ (পুং) কর্ণরোগবিশেষঃ। তল্লক্ষণং যথা। পূতিকর্ণমাহ। কর্ণবিদ্রধিপাকাদ্বা স কর্ণো বারিপূরণাৎ। পূযং স্রবতি যৎ পূতি স জ্ঞেয়ঃ পূতিকর্ণকঃ॥ কর্ণস্রাবাদ্দৌর্গন্ধ্যমাহ। পূতন্তি নিয়মেন পূতি যথা স্যাদেবং স্রবতি ॥ * ॥ তচ্চিকিৎসা যথা। কর্ণস্রবে পূতিকর্ণে তথৈব কৃমিকর্ণকে। সামান্যং কর্ম্ম কুর্ব্বীত যোগান্ বৈশেষিকানপি ॥ সর্জ্জিকাচূর্ণসংযুক্তবীজপূররসং ক্ষিপেৎ। কর্ণস্রাবরুজাদাহাস্তেন নশ্যন্ত্যসংশয়ং ॥১॥ আম্রজম্বুপ্রবালানাং মধুকস্য বটস্য চ। এভিস্তু সাধিতং তৈলং পূতিকর্ণগদং হরেৎ ॥২॥ জাতীপত্ররসে তৈলং বিপক্বং পূতিকর্ণজিৎ। ৩। সৃষ্টং রসাঞ্জনং নার্য্যাঃ ক্ষীরেণ ক্ষৌদ্রসংযুতং ॥ প্রশস্যতে চিরোত্থে তৎ সাস্রাবে পূতিকর্ণকে। ৪। কুষ্ঠহিঙ্গুবচাদারুশতাহ্বাবিশ্বসৈন্ধবৈঃ ॥ পূতিকর্ণাপহং তৈলং বস্তমূত্রেণ সাধিতং। কুষ্ঠাদিতৈলং। ৫। শম্বুকস্য তু মাংসেন কটুতৈলং বিপাচয়েৎ ॥ তস্য পূরণমাত্রেণ কর্ণনাড়ী প্রশাম্যতি। ৬। চূর্ণেন গন্ধকশিলারজনীভবেন মুষ্ট্যংশকেন কটুতৈলপলাষ্টকে তু। ধত্তূরপত্ররসতুল্যমিদং বিপক্বং নাড়ীং জয়েচ্চিরভবামপি কর্ণজাতাং ॥ মুষ্টিঃ পলং ॥ ৭ ॥ কৃমিকর্ণবিনাশায় কৃমিঘ্নীং কারয়েৎ ক্রিয়াং। বার্ত্তাকুধূমশ্চ হিতঃ সার্ষপস্নেহ এব চ ॥ পূরণং হরিতালেন গব্যমূত্রযুতেন চ। ধূপনে কর্ণদৌর্গন্ধ্যে গুগ্‌গুলুঃ শ্রেষ্ঠ উচ্যতে ॥ ইতি ভাবপ্রকাশঃ ॥

পূতিকর্ণকঃ (পুং) কর্ণরোগভেদঃ। তস্য লক্ষণং। কর্ণবিদ্রধিপাকাদ্বা জায়তে চাম্বুপূরণাৎ। পূযং স্রবতি বা পূতি স জ্ঞেয়ঃ পূতিকর্ণকঃ ॥ ইতি মাধবকরঃ ॥ ঔষধং যথা। নির্গুণ্ডী স্বরসস্তৈলং সিন্ধুধূমরজোগুড়ঃ। পূরণাৎ পূতিকর্ণস্য শমনো মধুসংযুতঃ ॥ অথবা। বরুণার্দ্রকপিত্থাম্রজম্বুপল্লবসাধিতং। পূতিকর্ণাপহং তৈলং জাতীপত্ররসেন বা ॥ ইতি চক্রপাণিদত্তঃ ॥

পূতিকা (স্ত্রী) মার্জ্জারী। ইতি রাজনির্ঘণ্টঃ ॥ লতাশাকবিশেষঃ। পুঁই ইতি ভাষা। ইত্যমরটীকায়াং ভরতঃ ॥ অস্যাঃ পর্য্যায় গুণৌ উপোদকীশব্দে দ্রষ্টব্যৌ॥ দ্বাদশ্যাং তদ্ভক্ষণে দোষো যথা। পূতিকা ব্রহ্মঘাতিকা। যদপি। কুসুম্ভং নালিকাশাকং বৃন্তাকং পৌতিকীন্তথা। ভক্ষয়ন্ পতিতস্তু স্যাদপি বেদান্তগো দ্বিজঃ॥ ইত্যুশনসা সামান্যতোঽভিহিতং। অত্র নালিকা শ্বেতকলম্বীতি কল্পতরুঃ। পূতিকা চ দ্বাদশ্যামধিকদোষায় শূদ্রবিষয়িকা বা। ইতি তিথিতত্ত্বং ॥

পূতিকামুখঃ (পুং) শম্বুকঃ। ইতি শব্দমালা॥

পূতিকাষ্ঠং (ক্লী) দেবদারু । সরলবৃক্ষঃ। ইত্যমরঃ॥ পবিত্রদারু চ॥

পূতিকাষ্ঠকং (ক্লী) সরলবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

পূতিগন্ধং (ক্লী) রঙ্গং। ইতি রাজনির্ঘণ্টঃ॥

পূতিগন্ধঃ (পুং) গন্ধকঃ। ইঙ্গুদীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ দুর্গন্ধে ত্রি॥

পূতিগন্ধিঃ (ত্রি) দুর্গন্ধঃ। ইত্যমরঃ॥ পূতি বিট্ পূতিরিব গন্ধোঽস্য। ইতি রায়মুকুটঃ॥

পূতিগন্ধিকঃ (ত্রি) দুর্গন্ধঃ । ইতি হেমচন্দ্রঃ॥

পূতিগন্ধিকা (স্ত্রী) বাকুচী। ইতি রাজনির্ঘণ্টঃ॥

পূতিতৈলা (স্ত্রী) জ্যোতিষ্মতী। নয়াফট্‌কী ইতি ভাষা। ইতি রত্নমালা॥

পূতিনস্যঃ (পুং) নাসারোগভেদঃ। তস্য লক্ষণং। দোষৈর্বিদগ্ধৈর্গলতালুমূলে সংমূর্চ্ছিতো যস্য সমীরণস্তু। নিরেতি পূতির্মুখনাসিকাভ্যাং তং পূতিনস্যং প্রবদন্তি রোগং॥ ইতি মাধবকরঃ॥ ঔষধং যথা। ব্যাঘ্রীদন্তীবচাশিগ্রুস্বরসব্যোষসম্ভবৈঃ। পাচিতং লাবণং তৈলং পূতিনাসাগদং জয়েৎ॥ অথবা। ত্রিকটুবিড়ঙ্গকসৈন্ধববৃহতীফলশিগ্রুস্বরসদন্তীভিঃ। তৈলং গোজলসিদ্ধং নস্যং স্যাৎ পূতিনস্যস্য॥ ইতি চক্রপাণিদত্তঃ॥

পূতিপত্রঃ (পুং) শ্যোনাকপ্রভেদঃ। ইতি রাজনির্ঘণ্টঃ॥

পূতিপুষ্পিকা (স্ত্রী) মাতুলুঙ্গা। মখুরলেবু ইতি মৌটাবা ইতি চ ভাষা। ইতি রত্নমালা॥

পূতিফলা (স্ত্রী) সোমরাজী। ইতি রত্নমালা॥

পূতিফলী (স্ত্রী) সোমরাজী। ইত্যমরঃ॥

পূতিময়ূরিকা (স্ত্রী) অজগন্ধা। ইতি রাজনির্ঘণ্টঃ॥

পূতিমেদঃ (পুং) অরিমেদঃ। ইতি রাজনির্ঘণ্টঃ॥

পূতিবাতঃ (পুং) বিল্ববৃক্ষঃ। ইতি রত্নমালা॥ দুর্গন্ধবায়ুশ্চ॥

পূতিবৃক্ষঃ (পুং) শ্যোনাকঃ। ইতি রত্নমালা॥ পবিত্রদুর্গন্ধৌ তরূ চ॥

পূতিশারিজা (স্ত্রী) খট্টাশী। ইতি ত্রিকাণ্ডশেষঃ॥

পূতীকঃ (পুং) পূতিকরঞ্জঃ। ইত্যমরটীকায়াং ভরতঃ॥ গন্ধমার্জারঃ। ইতি রাজনির্ঘণ্টঃ॥

পূতীকরঞ্জঃ (পুং) পূতিকরঞ্জঃ। নাটা ইতি ভাষা। ইতি রত্নমালা॥

পূতীকা (স্ত্রী) পূতিকা। ইত্যমরটীকায়াং ভরতঃ॥

পূত্যণ্ডঃ (পুং) গন্ধকীটঃ। গঁদোপোকা ইতি ভাষা। জন্তুভেদঃ। যস্য নাভৌ মৃগনাভির্জায়তে। ইতি মেদিনী॥

পূনঃ (ত্রি) নষ্টঃ। ইতি মুগ্ধবোধব্যাকরণং॥

পূপঃ (পুং) পিষ্টকঃ। ইত্যমরঃ॥

পূপলা (স্ত্রী) পোলিকা। ইতি হেমচন্দ্রঃ॥

পূপালী (স্ত্রী) পোলী। ইতি ত্রিকাণ্ডশেষঃ॥

পূপাষ্টকা (স্ত্রী) অগ্রহায়ণীপূর্ণিমায়াঃ পরতঃ কৃষ্ণাষ্টমী। তদ্বিবরণং অষ্টকাশব্দে দ্রষ্টব্যং। তত্র নিত্যং শ্রাদ্ধং পূপাঙ্গকং

কর্ত্তব্যং। যথা গোভিলঃ। অষ্টকা যোর্দ্ধ-মাগ্রহায়ণ্যাস্তমিস্রাষ্টমী। ব্রহ্মপুরাণে। পিত্র্যদানায় মূলে স্যুরষ্টকাস্তিস্র এব চ। কৃষ্ণপক্ষে বরিষ্ঠা হি পূর্ব্বা চৈন্দ্রী বিভাব্যতে॥ প্রাজাপত্যা দ্বিতীয়া স্যাৎ তৃতীয়া বৈশ্বদেবকী। আদ্যা পূপৈঃ সদা কার্য্যা মাংসৈরন্যা ভবেত্তথা॥ শাকৈঃ কার্য্যা তৃতীয়া স্যাদেষ দ্রব্যগতো বিধিঃ। ইতি তিথিতত্ত্বং॥

পূপিকা (স্ত্রী) পূলিকা। ইতি হেমচন্দ্রঃ॥

পূয ঈ ঙ দুর্গন্ধে। শীর্ণ্যাং। ইতি কবিকল্পদ্রুমঃ॥ ষষ্ঠস্বরী। ঈ পূতঃ। ঙ পূয়তে মৎস্যঃ দুর্গন্ধঃ স্যাদিত্যর্থঃ। শীর্ণির্ভেদনং। ইতি দুর্গাদাসঃ॥

পূযং (ক্লী) পক্কব্রণাদিসম্ভবঘনীভূতশুক্লবর্ণবিকৃতরক্তং। পূঁয ইতি ভাষা। তৎপর্য্যায়ঃ। ক্ষতজং ২ মলজং ৩ পূযনং ৪। প্রসিতং। ইতি শব্দচন্দ্রিকা॥ পূযবর্দ্ধনদ্রব্যাণি যথা। নবধান্যমাষতিলকলায়কুলত্থনিষ্পাবহরিতকশাকাম্ললবণকটুকগুড়পিষ্টবিকৃতিবল্লুরশুষ্কশাকাজাবিকানূপৌদকমাংসবসাশীতোদককৃশরাপায়সদধিদুগ্ধতক্রপ্রভৃতীন্ পরিহরেৎ। তক্রান্তৈর্নবধান্যাদির্যোঽয়ং বর্গ উদাহৃতঃ। দোষসংজননো হ্যেষ বিজ্ঞেয়ঃ পূযবর্দ্ধনঃ॥ ইতি সুশ্রুতঃ॥

পূযনং (ক্লী) পূযং। ইতি শব্দচন্দ্রিকা॥

পূযরক্তঃ (পুং) নাসারোগভেদঃ। তস্য লক্ষণং। দোষৈর্বিদগ্ধৈরথবাপি জন্তোর্ললাটদেশেঽভিহতস্য তৈস্তৈঃ। নাসা স্রবেৎ পূযমসৃগ্বিমিশ্রং তং পূযরক্তং প্রবদন্তি রোগং॥ ইতি মাধবকরঃ॥

পূযারিঃ (পুং) নিম্ববৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

পূযালসঃ (পুং) সন্ধিগতরোগভেদঃ। তস্য লক্ষণং যথা। পক্কঃ শোফঃ সন্ধিজঃ সংস্রবেদযঃ সান্দ্রং পূযং পূতিপূযালসঃ সঃ। ইতি সুশ্রুতঃ॥

পূর ঈ য ঙ পূর্ত্তৌ। ইতি কবিকল্পদ্রুমঃ॥ দীর্ঘী। ঈ পূর্ণঃ। য ঙ পূর্য্যন্তে পিতরস্তস্কেতি হলায়ুধঃ। পূর্ত্তিরিহাপ্যায়নং। ইতি দুর্গাদাসঃ॥

পূর ক পূর্ত্তৌ। ইতি কবিকল্পদ্রুমঃ॥ দীর্ঘী। ক পিতৄন্ পূরয়তি শ্রাদ্ধে হব্যৈঃ কব্যৈশ্চ যঃ সদা। ইতি হলায়ুধঃ। ইতি দুর্গাদাসঃ

পূরং (ক্লী) দাহাগুরু। ইতি রাজনির্ঘণ্টঃ॥

পূরঃ (পুং) জলসমূহঃ। ব্রণসংশুদ্ধিঃ। খাদ্যবিশেষঃ। ইতি মেদিনী॥

পূরকঃ (পুং) বীজপূরঃ। ইতি রাজনির্ঘণ্টঃ॥ গুণকাঙ্কঃ। ইতি লীলাবতী॥ *॥ ধ্যাতৃনাসিকাগতোচ্ছ্বাসঃ। ব্রহ্মধ্যানপূর্ব্বকপ্রাণায়ামাঙ্গতত্তন্মন্ত্রং জপন্ বামনাসিকয়া বায়ুনা দেহপূরণং। যথা ব্যাসঃ। আদানং রোধমুৎসর্গং বায়োস্ত্রিস্ত্রিঃ সমভ্যসেৎ। ব্রহ্মাণং কেশবং শম্ভুং ধ্যায়েদ্দেবাননুক্রমাৎ॥ পূর্ব্ববচনে ত্রির্জ্জপমাত্রাভিধানাদত্র ত্রিস্ত্রিরিতি বীপ্সা সন্ধ্যাত্রয়াপেক্ষয়া। ব্রহ্মাণং কেশবং শম্ভুং ধ্যায়ন্ মুচ্যেত বন্ধনাৎ। যোগিযাজ্ঞবল্ক্যঃ। ভূর্ভুবঃ স্বর্ম্মহর্জ্জনস্তপঃ সত্যং তথৈব

চ। প্রত্যোঙ্কারসমাযুক্তং তথা তৎ সবিতুঃ পদং ॥ ওঁ আপো জ্যোতিরিত্যেতচ্ছিরঃ পশ্চাত্তু যোজয়েৎ। ত্রিরাবর্ত্তনযোগাত্তু প্রাণায়ামস্তু শব্দিতঃ ॥ পূরকঃ কুম্ভকো রেচ্যঃ প্রাণায়ামস্ত্রিলক্ষণঃ। নাসিকাকৃষ্ট উচ্ছ্বাসো ধ্মাতুঃ পূরক উচ্যতে ॥ কুম্ভকো নিশ্চলঃ শ্বাসো মুচ্যমানস্তু রেচকঃ। মোচনং বিশেষর্ত্তি বিষ্ণুপুরাণং। নাসম্বৃতমুখো জৃম্ভেদ্ধাসকাশৌ চ বর্জ্জয়েৎ। নোচ্চৈর্হসেৎ সশব্দঞ্চ ন মুঞ্চেৎ পবনং বুধঃ ॥ ইত্যাহ্নিকাচারতত্ত্বং ॥ ষোড়শচতুরন্যতরসংখ্যকপ্রণববীজান্যতরজপেনৈকনাসাপুটকরণকপ্রাণায়ামাঙ্গবায়ুপূরণং। যথা। মূলমন্ত্রস্য বীজস্য প্রণবস্য বা ষোড়শবারজপেন বামনাসাপুটে বায়ুপূরকং কুর্য্যাদিতি তন্ত্রসারঃ॥*॥ প্রেতদেহনিষ্পাদকাশৌচকালদেয়দশপিণ্ডং। যথা। পূরকেণ তু পিণ্ডেন দেহো নিষ্পাদ্যতে যতঃ। কৃতস্য করণাযোগাৎ পুনর্নাবর্ত্তয়েৎ ক্রিয়াং ॥ ইতি বায়ুপুরাণং ॥ ঋষ্যশৃঙ্গঃ। ন স্বধাঞ্চ প্রযুঞ্জীত প্রেতপিণ্ডে দশাহিকে। ভাষেতৈতচ্চ বৈ পিণ্ডং যজ্ঞদত্তস্য পূরকং ॥ অত্র ভাষণবিধৌ এতৎ পিণ্ডং যজ্ঞদত্তস্য পূরকমিত্যেতাবন্মাত্রশ্রুতেঃ শিরঃপূরকমিত্যাদিবিশেষোল্লেখে প্রমাণং নাস্তি। ইতি স্মার্ত্তভট্টাচার্য্যাঃ ॥ প্রেতপিণ্ডৈস্তথা দত্তৈর্দেহমাপ্নোতি ভার্গব ইতি বিষ্ণুধর্ম্মোত্তরে দেহশ্রুতের্দেহপূরকমিতি প্রয়োগাপত্তেশ্চ। তস্মাদনিরুদ্ধভট্টাদ্যুক্তঃ কেবলপূরকপ্রয়োগ এব যুক্ত ইতি। শাতাতপঃ। ভর্ত্তুঃ পিণ্ডপ্রদানে তু সাধ্বী স্ত্রী চেদ্রজস্বলা। বস্ত্রং ত্যক্ত্বা পুনঃ স্নাত্বা সৈব দদ্যাচ্চ পূরকং ॥ ইতি শুদ্ধিতত্ত্বং ॥ * ॥ পূরণকর্ত্তরি ত্রি। ইতি শব্দরত্নাবলী ॥

পূরণং (ক্লী) পিণ্ডপ্রভেদঃ। ইতি মেদিনী ॥ বৃষ্টিঃ। কুটন্নটং। ইতি শব্দমালা ॥ অঙ্কানাং গুণনং। ইতি শুভঙ্করঃ ॥ বাপ তন্তুঃ। ইতি হেমচন্দ্রঃ ॥

পূরণঃ (পুং) বিষ্ণুতৈলং। ইতি ধরণিঃ ॥ সেতুঃ। ইতি হারাবলী ॥ সমুদ্রঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ ॥ পূরকে ত্রি। ইতি মেদিনী ॥

পূরণী (স্ত্রী) শাল্মলিবৃক্ষঃ। ইত্যমরঃ ॥ পূর্য্যতেহনয়া পূরণী। যথা পঞ্চানাং পূরণী পঞ্চমী ॥

পূরাম্লং (ক্লী) বৃক্ষাম্লং। ইতি রাজনির্ঘণ্টঃ ॥

পূরিকা (স্ত্রী) পিষ্টকভেদঃ। পূরী ইতি কচুরী ইতি চ ভাষা। যথা। মাষাণাং পিষ্টিকাং যুঞ্জ্যাল্লবণার্দ্রকহিঙ্গুভিঃ। তয়া পিষ্টিকয়া পূর্ণা সমিতা কৃতপোলিকা। ততস্তৈলে বিপক্বা সা পূরিকা কথিতা বুধৈঃ ॥ অস্যা গুণাঃ। রুচ্যা স্বাদ্বী গুরুঃ স্নিগ্ধা বাতপিত্তাস্রদূষিকা। চক্ষুস্তেজোহরী চোষ্ণা পাকে বাতবিনাশিনী ॥ তথৈব ঘৃতপক্বাপি চক্ষুষ্যা রক্তপিত্তহৃৎ। ইতি ভাবপ্রকাশঃ ॥

পূরিতং (ত্রি) কৃতপূরণং। তৎপর্য্যায়ঃ। পূর্ণং ২। ইত্যমরঃ ॥ গুণিতঞ্চ ॥

পূরুষঃ (পুং) পুরুষঃ। পুমান্। ইত্যমরঃ ॥*॥ অথ পুরুষলক্ষণং। পঞ্চদীর্ঘং চতুর্হ্রস্বং পঞ্চসূক্ষ্মং ষড়ুন্নতং। সপ্তরক্তং ত্রিগম্ভীর

ত্রিবিশালং প্রশস্যতে ॥ বাহুনেত্রদ্বয়ং কুক্ষিদ্বৌ তু নাসা তথৈব চ। স্তনয়োরন্তরঞ্চৈব পঞ্চদীর্ঘং প্রশস্যতে ॥ গ্রীবাথ কর্ণৌ পৃষ্ঠঞ্চ হ্রস্বে জঙ্ঘে সুপূজিতে। চত্বারি যস্য হ্রস্বানি পূজাং প্রাপ্নোতি নিত্যশঃ ॥ সূক্ষ্মাণ্যঙ্গুলিপর্ব্বাণি দন্তকেশনখত্বচং। পঞ্চ সূক্ষ্মাণি যেষাং হি তে নরা দীর্ঘজীবিনঃ ॥ নাসা নেত্রঞ্চ দন্তাশ্চ ললাটঞ্চ শিরস্তথা। হৃদয়ঞ্চৈব বিজ্ঞেয়মুন্নতং ষট্ প্রশস্যতে ॥ পাণিপাদতলৌ রক্তৌ নেত্রান্তরনখানি চ। তালুকোঽধরজিহ্বা চ সপ্তরক্তং প্রশস্যতে ॥ স্বরো বুদ্ধিশ্চ নাভিশ্চ ত্রিগম্ভীরমুদাহৃতং। উরঃ শিরো ললাটঞ্চ ত্রিবিস্তীর্ণং প্রশস্যতে ॥ * ॥ কটির্ব্বিশালা বহুপুত্রভাগী বিশালহস্তো নরপুঙ্গবঃ স্যাৎ। উরো বিশালং ধনধান্যভাগী শিরো বিশালং নরপূজিতঃ স্যাৎ ॥ ন শ্রীস্ত্যজতি রক্তাক্ষং নার্থঃ কনকপিঙ্গলং। দীর্ঘবাহুং ন চৈশ্বর্য্যং ন মাংসোপচিতাংসকং ॥ কদাচিদ্দন্তুরো মূর্খঃ কদাচিল্লোমশঃ সুখী। কদাচিত্তুন্দিলো দুঃখী কদাচিচ্চঞ্চলা সতী ॥ নেত্রস্নেহেন সৌভাগ্যং দন্তস্নেহেন ভোজনং। হস্তস্নেহেন চৈশ্বর্য্যং পাদস্নেহেন বাহনং ॥ অকর্ম্মকঠিনৌ হস্তৌ পাদাবধ্বনি কোমলৌ। যস্য পাণিতলৌ রক্তৌ তস্য রাজ্যং বিনির্দ্দিশেৎ ॥ * ॥ দীর্ঘলিঙ্গেন দারিদ্র্যং স্থূললিঙ্গেন নির্ধনঃ। কৃশলিঙ্গেন সৌভাগ্যং হ্রস্বলিঙ্গেন ভূপতিঃ ॥ রেখাভির্ব্বহুভির্দুঃখং স্বল্পাভির্ধনহীনতা। রক্তাভিঃ শ্রিয়মাপ্নোতি কৃষ্ণাভির্লোকপূজিতঃ ॥*॥ অঙ্গুষ্ঠোদরমধ্যে তু যবো যস্য বিরাজিতঃ। উন্নতং ভোজনং তস্য শতং জীবতি মানবঃ ॥ অঙ্কুশং কুলিশং ছত্রং যস্য পাণিতলে ভবেৎ। ঐশ্বর্য্যঞ্চ বিনির্দ্দিষ্টমশীত্যায়ুর্ভবেদ্ধ্রুবং ॥ ধনুর্যস্য ভবেৎ পাণৌ পঙ্কজং বাথ তোরণং। তস্যৈশ্বর্য্যঞ্চ রাজ্যঞ্চ অশীত্যায়ুর্ভবেদ্ধ্রুবং ॥ কনিষ্ঠাতর্জ্জনীং যাবৎ রেখা ভবতি চাক্ষতা। বিংশত্যব্দাধিকশতং নরা জীবন্ত্যনাময়াঃ ॥ কনিষ্ঠামধ্যমাং যাবৎ রেখা ভবতি চাক্ষতা। শতাব্দং বাথ বাশীতির্নরো জীবেন্ন সংশয়ঃ ॥ কনিষ্ঠানামিকায়াঞ্চেৎ রেখা ভবতি চাক্ষতা। ষষ্টিং পঞ্চাশদব্দং বা নরা জীবন্ত্যসংশয়ঃ ॥ রেখয়া ভিদ্যতে রেখা স্বল্পায়ুশ্চ ভবেন্নরঃ। কনিষ্ঠায়াং স্থিতা রেখা সংখ্যা যাবতিকা স্মৃতা। তাবতী পুরুষাণাস্তু নারী ভবতি নিশ্চিতং ॥ করমধ্যগতা রেখা ধ্রুবা ঊর্দ্ধন্তুবেদযদি। নৃপো বা নৃপতুল্যো বা চিরং খ্যাতোঽর্থবান্ ভবেৎ ॥ মৎস্যপুচ্ছপ্রকীর্ণেন বিদ্যাবিত্তসমন্বিতঃ। পিতামহস্য বা কিঞ্চিৎ ধনঞ্চ লভতে ধ্রুবং ॥ মধ্যমায়াং যদি যবা দৃশ্যন্তেঽত্যন্তশোভনাঃ। তদান্যসঞ্চিতং বিত্তং প্রাপ্নোত্যঙ্গুষ্ঠকে যবে ॥ যস্যাথ চক্রমঙ্গুষ্ঠে যবাদূর্দ্ধঞ্চ দৃশ্যতে। তদা বৈ পামরাদীনামর্জ্জিতং ধনমাপ্নুয়াৎ ॥ তর্জ্জন্যামথ চক্রঞ্চ মিত্রদ্বারা ধনন্তবেৎ। তেনৈব বিপরীতস্তু ব্যয়ো ভবতি নিশ্চিতং ॥ মধ্যমায়াং স্থিতে চক্রে দেবদ্বারা ধনং

লভেৎ। তেনৈব বিপরীতস্তু ব্যয়ো ভবতি নিশ্চিতং ॥ অনামায়াং ভবেৎ চক্রং সর্ব্বদ্বারা ভবেদ্ধনং। তেনৈব বিপরীতস্তু ব্যয়ো ভবতি নিশ্চিতং ॥ কনিষ্ঠায়াং ভবেচ্চক্রং বাণিজ্যেন ধনং ভবেৎ। তেনৈব বিপরীতস্তু ব্যয়ো ভবতি নিশ্চিতং ॥ * ॥ ললাটে দৃশ্যতে যস্য চক্ররেখাচতুষ্টয়ং। অশীত্যায়ুঃ সমাপ্নোতি পঞ্চরেখাঃ শতং সমাঃ ॥ যস্যোন্নতং ললাটঞ্চ তাম্রকর্ণঞ্চ দৃশ্যতে। রেখাহীনশ্চ কক্ষশ্চ স চোন্মত্তো মহীং ভ্রমেৎ ॥ * ॥ যস্য জিহ্বা ভবেদ্দীর্ঘা নাসাগ্রং লেঢ়ি সর্ব্বদা। ভোগী ভবতি নির্ব্বাণঃ পৃথ্বীং ভ্রমতি সর্ব্বদা ॥ দন্তাশ্চ বিরলা যস্য নীচবন্নীচকর্ম্মকৃৎ। প্রগল্ভো দন্তুরঃ সত্যং বেদান্তপারগো ভবেৎ ॥ * ॥ প্রকারান্তরং। দন্তাশ্চ বিরলা যস্য গণ্ডে কূপোঽপি জায়তে। পরস্ত্রীরমণো নিত্যং পরবিত্তেন বিত্তবান্ ॥ দীর্ঘলিঙ্গে চ সৌভাগ্যং সূক্ষ্মলিঙ্গে নৃপো ভবেৎ। বক্রাস্যকঠিনৈর্লিঙ্গৈঃ প্রমাণান্নির্গতঃ সদা ॥ রমতে চ সদা দাস্যাং নির্ধনো ভবতি ধ্রুবং ॥ কৃশলিঙ্গেন সূক্ষ্মেণ রক্তবর্ণেন ভূপতিঃ। বহুস্ত্রীরমণো নিত্যং নারীণাং বল্লভো ভবেৎ ॥ কৃশলিঙ্গেন রক্তেন লভতে চোত্তমাঙ্গনাং। রাজ্যং সুখঞ্চ দিব্যাঙ্গ্যাঃ কন্যকায়াঃ পতির্ভবেৎ ॥ যস্য পাদতলে পদ্মং চক্রং বাপ্যথ তোরণং। অঙ্কুশং কুলিশং বাপি স রাজা ভবতি ধ্রুবং ॥ কৃশনির্লোমশা যে স্যুঃ কেকরাক্ষাঃ কুচেলকাঃ। কাতরা ব্যালজিহ্বাশ্চ তে দরিদ্রা ন সংশয়ঃ ॥ কপিলা মলিনাঙ্গাশ্চ হ্রস্বাশ্চৈব বৃহন্নখাঃ। কৃশাতিদীর্ঘা মনুজাস্তে দরিদ্রা ন সংশয়ঃ ॥ চিবুকে শ্মশ্রুশূন্যা যে নির্লোমহৃদয়াশ্চ যে। তে ধূর্ত্তা নৈব সন্দেহঃ সমুদ্রবচনং যথা ॥ সূচীমুখা ভগ্নপৃষ্ঠাঃ কৃষ্ণদন্তাঃ, কুচেলকাঃ। বক্রনাসা বজ্রনাসাস্তে নরা দুষ্টমানসাঃ ॥ দয়ালবশ্চ দাতারো রূপবন্তো জিতেন্দ্রিয়াঃ। পরোপকারিণশ্চৈব তেঽপূর্ব্বা মানবাঃ স্মৃতাঃ ॥ ইতি সামুদ্রকে পুরুষলক্ষণং ॥ * ॥ দানবীরদয়াবীরযুদ্ধবীরসত্যবীরসংজ্ঞকপুরুষলক্ষণন্তু পুরুষপরীক্ষাগ্রন্থে দ্রষ্টব্যং ॥

পূর্ণঃ (ত্রি) পূরিতঃ। সকলঃ। ইত্যমরঃ ॥ শক্তঃ। ইতি মেদিনী ॥ স্বীয়সুখেচ্ছাবদন্যঃ। ইতি গদাধরভট্টাচার্য্যঃ ॥

পূর্ণকঃ (পুং) স্বর্ণচূড়পক্ষী। ইতি মেদিনী ॥

পূর্ণকুম্ভঃ (পুং) জলপূরিতঘটঃ। তৎপর্য্যায়ঃ। ভদ্রকুম্ভঃ ২। ইত্যমরঃ ॥ পূর্ণকলসাদিশ্চ। ইতি ভরতঃ ॥

পূর্ণকোষ্ঠা (স্ত্রী) নাগরমুস্তা। ইতি রাজনির্ঘণ্টঃ ॥

পূর্ণপাত্রং (ক্লী) বস্তুপূর্ণপাত্রং। বর্দ্ধাপকঃ। ইতি মেদিনী ॥ উৎসবকালে হর্ষাৎ গৃহীতবস্ত্রালঙ্কারাদি। তৎপর্য্যায়ঃ। পূর্ণালকং ২। যথা। হর্ষাদুৎসবকালে যদলঙ্কারাংশুকাদিকং। আকৃষ্য গৃহ্যতে পূর্ণপাত্রং পূর্ণালকঞ্চ তৎ ॥ ইতি জটাধরঃ ॥ * ॥ হোমকর্ম্মণি ব্রহ্মদক্ষিণা। যথা। গোভিলেনাপি দর্শাদিযাগমভিধায়

পূর্ণপাত্রো দক্ষিণা ব্রহ্মণে দদ্যাদিত্যুক্তং। ত্রান্তত্বেঽপি পুংস্ত্বং ছান্দসং। তস্য প্রমাণন্তু গৃহ্যসংগ্রহে যজ্ঞপার্শ্বপরিশিষ্টয়োঃ। অষ্টমুষ্টির্ভবেৎ কুঞ্চিঃ কুঞ্চয়োঽষ্টৌ চ পুষ্কলং। পুষ্কলানি চ চত্বারি পূর্ণপাত্রো বিধীয়তে॥ অত্র ষট্‌পঞ্চাশদধিকশতদ্বয়মুষ্টিমিতং পূর্ণপাত্রং। অসম্ভবে তু ছন্দোগপরিশিষ্টং। যাবতা বহুভোক্তুস্তু তুষ্টিঃ পূর্ণেন জায়তে। নাবরার্দ্ধমতঃ কুর্য্যাৎ পূর্ণপাত্রমিতি স্থিতিঃ॥ ইতি সংস্কারতত্ত্বং॥

পূর্ণমা (স্ত্রী) পূর্ণিমা। ইত্যমরটীকায়াং ভরতঃ॥

পূর্ণমাসঃ (পুং) পৌর্ণমাসযাগঃ। ইতি জটাধরঃ

পূর্ণমাসী (স্ত্রী) পূর্ণিমা। ইতি শব্দমালা॥

পূর্ণবীজঃ (পুং) বীজপূরঃ। ইতি রাজনির্ঘণ্টঃ॥

পূর্ণা (স্ত্রী) পঞ্চমী। দশমী। পূর্ণিমা। অমাবস্যা। যথা। নন্দা ভদ্রা জয়া রিক্তা পূর্ণা প্রতিপদঃ ক্রমাৎ॥ তত্র স্ত্রীসংসর্গ নিষেধো যথা। পূর্ণাসু যোষিৎ পরিবর্জ্জনীয়া। ইতি তিথিতত্ত্বং॥ গুরৌ পূর্ণা চ সংযুক্তা সিদ্ধিযোগাঃ প্রকীর্ত্তিতাঃ। ইতি জ্যোতিঃসারসংগ্রহঃ॥

পূর্ণানকং (ক্লী) বাদ্ধায়নাপ্তং। তৎপর্য্যায়ঃ। পূর্ণপাত্রং ২। ইতি ত্রিকাণ্ডশেষঃ॥ পূর্ণানকমপি পাঠঃ॥

পূর্ণাবতারঃ (পুং) নৃসিংহঃ। রামঃ। যথা। পূর্ণো নৃসিংহো রামশ্চ শ্বেতদ্বীপবিরাড়্‌বিভুঃ। পরিপূর্ণতমঃ কৃষ্ণো বৈকুণ্ঠে গোলকে স্বয়ং॥ বৈকুণ্ঠে কমলাকান্তো রূপভেদশ্চতুর্ভুজঃ। গোলোকে গোকুলে রাধাকান্তোঽয়ং দ্বিভুজঃ স্বয়ং॥ তস্যৈব তেজো নিত্যঞ্চ চিন্তাং কুর্ব্বন্তি যোগিনঃ। ভক্তাঃ পাদাম্বুজং তেজঃ কুতস্তেজস্বিনা বিনা॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ৯ অধ্যায়ঃ॥

পূর্ণিকা (স্ত্রী) নাসাচ্ছিন্নীনামকপক্ষী। ইতি ত্রিকাণ্ডশেষঃ॥

পূর্ণিমা (স্ত্রী) পঞ্চদশী তিথিঃ। পূরণং পূর্ণিঃ পূর্ণিং মিমীতে ড আপ্। তৎপর্য্যায়ঃ। পৌর্ণমাসী ২। নিশাকরে কলাহীনে সা অনুমতিঃ ৩ পূর্ণে নিশাকরে সা রাকা ৪। ইত্যমরঃ॥ পিত্র্যা ৫ চান্দ্রী ৬ পূর্ণমাসী ৭ অনন্তা ৮ চন্দ্রমাতা ৯ নিরঞ্জনা ১০। ইতি বাচস্পতিঃ॥ পূর্ণমা ১১। ইতি হড্ডচন্দ্রঃ॥ জ্যোৎস্নী ১২ ইন্দুমতী ১৩ সিতা ১৪। ইতি রাজনির্ঘণ্টঃ॥ সা দ্বিবিধা। যথা। রাকা চানুমতী চৈব দ্বিবিধা পূর্ণিমা মতা। পূর্ব্বোদিতকলাহীনে পৌর্ণমাস্যা নিশাকরে। পূর্ণিমানুমতী জ্ঞেয়া পশ্চাস্তমিতভাস্করে॥ যস্মাত্তামনুমন্যন্তে দেবতাঃ পিতৃভিঃ সহ। তস্মাদনুমতী নাম পূর্ণিমা প্রথমা স্মৃতা॥ যদা চাস্তমিতে সূর্য্যে পূর্ণচন্দ্রস্য চোদ্গমঃ। যুগপৎ সোত্তরা রাগাত্তদানুমতিপূর্ণিমা॥ রাকাস্ত্বামনুমন্যন্তে দেবতাঃ পিতৃভিঃ সহ। রঞ্জনাচ্চৈব চন্দ্রস্য রাকেতি কবয়োঽব্রুবন্॥ ইতি দেবীপুরাণং॥ *॥ সা চন্দ্রস্য

তিথিঃ। যথা। তস্য ব্রহ্মা দদৌ প্রীতঃ পৌর্ণমাসীং তিথিং প্রভুঃ। তস্যামুপোষয়েদ্রাজংস্তমর্থং প্রতিপাদয়েৎ ॥ স চান্নাহারশ্চ ভবেত্তস্য জ্ঞানং প্রযচ্ছতি। কান্তিং পুষ্টিঞ্চ রাজেন্দ্র ধনং ধান্যঞ্চ কেবলং ॥ ইতি বরাহপুরাণে সোমোৎপত্তিরহস্যং ॥ * ॥ তস্যাং জাতফলং। কন্দর্পতুল্যো যুবতীপ্রিয়শ্চ ন্যায়াপ্তবিত্তঃ সততং সহর্ষঃ। শূরো বলী শাস্ত্রবিচারদক্ষশ্চেৎ পূর্ণিমা জন্মনি যস্য জন্তোঃ॥ ইতি কোষ্ঠীপ্রদীপঃ ॥ * ॥ সা চতুর্দ্দশীযুক্তা গ্রাহ্যা যুগ্মাৎ। যমঃ। পক্ষান্তে স্রোতসি স্নায়াত্তেন নায়াতি মৎপুরং। বিষ্ণুঃ। দৃশ্যেতে সহিতৌ যস্যাং দিবি চন্দ্রবৃহস্পতী। পৌর্ণমাসী তু মহতী জ্ঞেয়া সম্বৎসরে তু সা॥ তস্যাং স্নানোপবাসাভ্যামক্ষয়ং পরিকীর্ত্তিতং। সহিতৌ মাসসংজ্ঞাবিশেষনিমিত্তকৃত্তিকাদিনক্ষত্রগতৌ। মহাকার্ত্তিক্যাদিদর্শনাৎ। তথা চ রাজমার্ত্তণ্ডে। মাসসংজ্ঞে যদা ঋক্ষে চন্দ্রঃ সংপূর্ণমণ্ডলঃ। গুরুণা যাতি সংযোগং সা তিথির্মহতী স্মৃতা॥ স্কান্দমাৎস্যয়োঃ। পৌর্ণমাসীষু চৈতাসু মাসর্ক্ষসহিতাসু চ। এতাসাং স্নানদানাভ্যাং ফলং দশগুণং স্মৃতং ॥ * ॥ বৈশাখীমধিকৃত্য যমঃ। গৌরান্ বা যদি বা কৃষ্ণাংস্তিলান্ ক্ষৌদ্রেণ সংযুতান্। প্রীয়তাং ধর্ম্মরাজেতি পিতৄন্দেবাংশ্চ তর্পয়েৎ॥ যাবজ্জীবকৃতং পাপং তৎক্ষণাদেব নশ্যতি। অব্দাযুতঞ্চ তিষ্ঠেচ্চ স্বর্গলোকে ন সংশয়ঃ ॥ * ॥ ব্রহ্মপুরাণে।

মহাজ্যৈষ্ঠ্যাস্তু যঃ পশ্যেৎ পুরুষঃ পুরুষোত্তমং। বিষ্ণুলোকমবাপ্নোতি মোক্ষং গঙ্গাম্বুমজ্জনাৎ ॥ * ॥ ঐন্দ্রে গুরুঃ শশী চৈব প্রাজাপত্যে রবিস্তথা। পূর্ণিমা গুরুবারেণ মহাজ্যৈষ্ঠী প্রকীর্ত্তিতা ॥ অনুরাধাস্থগুরাবপি। ঐন্দ্রে মৈত্রে যদা জীবস্তৎপঞ্চদশকে রবিঃ। পূর্ণিমা শক্রচন্দ্রেণ মহাজ্যৈষ্ঠী প্রকীর্ত্তিতা॥ অনুরাধাস্থচন্দ্রেঽপি। ব্যাঘ্রভূতিঃ। ঐন্দ্রর্ক্ষে ত্বথবা মৈত্রে গুরুচন্দ্রৌ যদা স্থিতৌ। পূর্ণিমা জ্যৈষ্ঠমাসস্য মহাজ্যৈষ্ঠী প্রকীর্ত্তিতা॥ রাজমার্ত্তণ্ডে। জ্যৈষ্ঠে সম্বৎসরে চৈব জ্যৈষ্ঠমাসস্য পূর্ণিমা। জ্যেষ্ঠাভেন সমাযুক্তা মহাজ্যৈষ্ঠী প্রকীর্ত্তিতা॥ জ্যৈষ্ঠসম্বৎসরশ্চ। জ্যেষ্ঠামূলোপগে জীবে বর্ষং স্যাচ্ছক্রদৈবতং। ইতি বিষ্ণুধর্ম্মোত্তরোক্তো গ্রাহ্যঃ। সম্বৎসরোঽত্র বৎসরো বোধ্যঃ। ন তু সংবৎসরাদিপঞ্চকান্তর্গতবর্ষবিশেষঃ। জ্যৈষ্ঠ ইতি বিশেষণস্য বৈয়র্থ্যাপত্তেঃ। সংবৎসরে যদি স্যাত্ত্বিতি পাঠঃ কাল্পনিকঃ। প্রপঞ্চস্তু মলমাসতত্ত্বেঽনুসন্ধেয়ঃ ॥ * ॥ বিষ্ণুধর্ম্মোত্তরব্রহ্মপুরাণয়োঃ। মাসি জ্যৈষ্ঠে তু সংপ্রাপ্তে নক্ষত্রে শক্রদৈবতে। পৌর্ণমাস্যাং তদা স্নানং সর্ব্বপাপং হরেদ্দ্বিজাঃ॥ তস্মিন্ কালে তু যে মর্ত্যাঃ পশ্যন্তি পুরুষোত্তমং। বল ভদ্রং সুভদ্রাঞ্চ তে যান্তি পদমব্যয়ং॥ স্কন্দপুরাণে। জ্যৈষ্ঠ্যামহঞ্চাবতীর্ণস্তৎপুণ্যং জন্মবাসরং। তস্যাং মে স্নপনং কুর্য্যান্মহাস্নানবিধানতঃ॥ জ্যৈষ্ঠ্যাং প্রাতঃস্নান-

কালে ব্রহ্মণা সহিতঞ্চ মাং। রামং স্বভদ্রাং সংস্নাপ্য মম লোকমবাপ্নুয়াৎ॥*॥ বিষ্ণুধর্ম্মোত্তরে। পৌর্ণমাসী তথা মাঘী শ্রাবণী চ নরোত্তমঃ। প্রোষ্ঠপদ্যামতীতায়াং তথা কৃষ্ণা ত্রয়োদশী। এতাংস্তু শ্রাদ্ধকালান্ বৈ নিত্যানাহ প্রজাপতিঃ॥ তত্র পূর্ব্বদিনে সঙ্গবলাভে রৌহিণলাভে বা পরদিনে সঙ্গবালাভে পূর্ব্বদিনে শ্রাদ্ধং। কৃষ্ণপক্ষস্য পূর্ব্বাহ্ণে শ্রাদ্ধং কুর্য্যাদ্বিচক্ষণঃ। কৃষ্ণপক্ষাপরাহ্ণে তু রৌহিণন্তু ন লঙ্ঘয়েৎ॥ ইতি বায়ুপুরাণবচনাৎ। উভয়দিনে সঙ্গবলাভে পরদিনে। শুক্লপক্ষে তিথির্গ্রাহ্যা যস্যামভ্যুদিতো রবিঃ। কৃষ্ণপক্ষে তিথির্গ্রাহ্যা যস্যামস্তমিতো রবিঃ॥ ইতি বিষ্ণুধর্ম্মোত্তরাৎ। এবমক্ষয়তৃতীয়াদাবপি ॥ * ॥ আষাঢ়কার্ত্তিকমাঘপৌর্ণমাসীষু দানমাবশ্যকং। তথা চাযোধ্যাকাণ্ডে ভরতশপথে। আষাঢ়ী কার্ত্তিকী মাঘী তিথয়ঃ পুণ্যসম্ভবাঃ। অপ্রদানবতো যান্তু যস্যার্য্যোঽনুমতো গতঃ॥ অপ্রদানবতো দানরহিতস্যৈতাস্তিথয়ো যান্তু আর্য্যঃ শ্রীরামচন্দ্রো গতো যস্যানুমত ইত্যন্বয়ঃ। উত্তরবাক্যে যচ্ছব্দান্ন তচ্ছব্দাপেক্ষা॥*॥ অথ কোজাগরকৃত্যং। কল্পতরৌ ব্রহ্মপুরাণং। আশ্বযুজ্যাং পৌর্ণমাস্যাং নিকুম্ভো বালুকার্ণবাৎ। আয়াতি সেনয়া সার্দ্ধং কৃত্বা যুদ্ধং সুদারুণং॥ তস্মাত্তত্র নরৈর্মার্গাঃ স্বগেহস্য সমীপতঃ। শোধিতব্যাঃ প্রযত্নেন ভূষিতব্যাশ্চ ভূষণৈঃ॥ পুষ্পার্ঘ্যফলমূলান্নসর্ষপপ্রকরৈস্তথা। বেশ্মানি ভূষিতব্যানি নানাবর্ণৈর্বিশেষতঃ॥ সুস্নাতৈরনুলিপ্তৈশ্চ নরৈর্ভাব্যং সবান্ধবৈঃ। দিবা তত্র ন ভোক্তব্যং মনুষ্যৈশ্চ বিবেকিভিঃ॥ স্ত্রীবালবৃদ্ধমূর্খৈশ্চ ভোক্তব্যং পূজিতৈঃ সুরৈঃ। পূজিতৈঃ সুরৈরিতি বিশেষণে তৃতীয়া। তেন পূজিতসুরৈরিত্যর্থঃ। পূজ্যাশ্চ সফলৈঃ পত্রৈস্তথা দ্বারোর্দ্ধভিত্তয়ঃ। দ্বারোপান্তে সুদীপ্তস্তু সংপূজ্যো হব্যবাহনঃ॥ যবাক্ষতঘৃতোপেতৈস্তণ্ডুলৈশ্চ সুতর্পিতঃ। সংপূজিতব্যঃ পূর্ণেন্দুঃ পয়সা পায়সেন চ॥ রুদ্রঃ সভার্য্যঃ স্কন্দশ্চ তদা নন্দীশ্বরো মুনিঃ। গোমদ্ভিঃ সুরভিঃ পূজ্যা ছাগবদ্ভির্হুতাশনঃ॥ উরভ্রবদ্ভির্বরুণো গজবদ্ভির্বিনায়কঃ। পূজ্যঃ সাশ্বৈশ্চ রেবন্তো যথাবিভববিস্তরৈঃ॥ ততঃ পূজ্যো নিকুম্ভোঽপি সমাষৈস্তিলতণ্ডুলৈঃ। সুগন্ধিভির্ঘৃতোপেতৈঃ কৃশরাদ্যৈশ্চ ভূরিভিঃ॥ ব্রাহ্মণান্ ভোজয়িত্বা তু ভোক্তব্যং মাংসবর্জিতং। বহ্নিপার্শ্বগতৈর্নেয়া দৃষ্ট্বা ক্রীড়াঃ পৃথগ্বিধাঃ॥ ততশ্চ দ্বারোর্দ্ধভিত্তিহব্যবাহনপূর্ণেন্দুসভার্য্যরুদ্রস্কন্দনন্দীশ্বরমুনয়ঃ সর্ব্বৈরেব পূজ্যাঃ। দ্বারোর্দ্ধভিত্তিশব্দোঽত্র বহুবচনান্তঃ। নন্দাশ্বরমুনিরেকঃ। গোমতা সুরভিঃ। ছাগবতা হুতাশনঃ। মেষবতা বরুণঃ। হস্তিমতা বিনায়কঃ। অশ্ববতা রেবন্তঃ। সর্ব্বৈরেব নিকুম্ভঃ পূজ্যঃ। মহার্ণবে লিঙ্গপুরাণং। আশ্বিনে পৌর্ণমাস্যাস্তু চরেজ্জাগরণং নিশি। কৌমুদী সা সমাখ্যাতা কার্য্যা

লোকবিভূতয়ে ॥ কৌমুদ্যাং পূজয়েল্লক্ষী-মিন্দ্রঞ্চৈরাবতস্থিতং। সুগন্ধির্নিশি সদ্বেশো অক্ষৈর্জাগরণঞ্চরেৎ॥ তথা নিশীথে বরদা লক্ষ্মীঃ কো জাগর্ত্তীতি ভাষিণী। তস্মৈ বিত্তং প্রযচ্ছামি অক্ষৈঃ ক্রীড়াং করোতি যঃ ॥ নারিকেলৈশ্চিপিটকৈঃ পিতৃন্ দেবান্ সমর্চ্চয়েৎ। বন্ধূংশ্চ প্রীণয়েত্তেন স্বয়ং তদশনো ভবেৎ॥ অত্র নিশীতি নিশীথ ইতি চাভিধানাদ্রাত্রিকৃত্যমিদং। ততঃ প্রদোষব্যাপিনী গ্রাহ্যা তিথির্নক্তব্রতে সদা। প্রদোষোঽস্তময়াদূর্দ্ধং ঘটিকাদ্বয়মিষ্যতে ॥ ইতি সম্বৎসরপ্রদীপধৃতবৎসবচনাৎ। যদ্দিনে প্রদোষনিশীথোভয়ব্যাপিনী পৌর্ণমাসী তদ্দিনে কোজাগরকৃত্যং। উভয়ব্যাপ্ত্যনুরোধাৎ। যদা তু পূর্ব্বদিনে নিশীথব্যাপ্তিঃ পরদিনে প্রদোষব্যাপ্তিস্তদা পরেদ্যুস্তৎকৃত্যং। প্রধানপূজাকালব্যাপ্ত্যনুরোধাৎ। যদা পূর্ব্বেদ্যুর্নিশীথব্যাপ্তিঃ পরেদ্যুর্ন প্রদোষব্যাপ্তিস্তদা সুতরাং পূর্ব্বেদ্যুস্তৎকৃত্যং। অহঃসু তিথয়ঃ পুণ্যাঃ কর্ম্মানুষ্ঠানতো দিবা। নক্তাদিব্রতযোগে তু রাত্রিযোগো বিশিষ্যতে॥ ইতি বচনাৎ। বর্জয়েদিত্যনুবৃত্তৌ মৎস্যসূক্তে। মহালক্ষ্ম্যাস্তু তুলসীং ঝিণ্টিকাং কাঞ্চনন্তথা। লক্ষ্মীধ্যানমাদিত্যপুরাণে। পাশাক্ষমালিকাম্ভোজস্বর্ণিভির্যাম্যসৌম্যয়োঃ। পদ্মাসনস্থাং ধ্যায়েচ্চ শ্রিয়ং ত্রৈলোক্যমাতরং॥ গৌরবর্ণাং সুরূপাঞ্চ সর্ব্বালঙ্কারভূষিতাং রৌক্মপদ্মব্যগ্রকরাং বরদাং দক্ষিণেন তু॥ পাশেতি দক্ষিণে পাশাক্ষমালাভ্যাং বামে পদ্মাঙ্কুশাভ্যাং ভূষিতাং বামকরে হেমপদ্মং দক্ষিণকরে বরং দধতীত্যর্থঃ। ততঃ পাদ্যাদিভিঃ সংপূজ্য ওঁ নমস্তে সর্ব্বদেবানাং বরদাসি হরিপ্রিয়ে। যা গতিস্ত্বৎপ্রপন্নানাং সা মে ভূয়াৎ ত্বদর্চ্চনাৎ॥ ইত্যনেন পুষ্পাঞ্জলিত্রয়ং দত্ত্বা প্রণমেৎ। ইন্দ্রধ্যানমাদিত্যপুরাণে। চতুর্দন্তগজারূঢ়ো বজ্রপাণিঃ পুরন্দরঃ। শচীপতিশ্চ ধ্যাতব্যো নানাভরণভূষিতঃ॥ পাদ্যাদিভিঃ সংপূজ্য। ওঁ বিচিত্রৈরাবতস্থায় শশ্বৎকুলিশপাণয়ে। পৌলোম্যালিঙ্গিতাঙ্গায় সহস্রাক্ষায় তে নমঃ॥ ইতি পুষ্পাঞ্জলিত্রয়ং দত্ত্বা প্রণমেৎ। ততঃ কুবেরঃ সংপূজ্যঃ। ইতি রুদ্রধরঃ॥ তং পাদ্যাদিভিঃ সংপূজ্য ওঁ ধনদায় নমস্তুভ্যং নিধিপদ্মাধিপায় চ। ভবন্তু ত্বৎপ্রসাদান্মে ধনধান্যাদিসম্পদঃ॥ ইতি প্রণমেৎ। অত্র প্রদোষে সর্ব্বেষাং পূজেতি রুদ্রধরপ্রভৃতয়ঃ॥ ন চ নিকুম্ভপর্য্যন্তানাং পূর্ব্বাহ্ণ এব পূজনং নিরপবাদমিতি বাচ্যং। দিবা তত্র ন ভোক্তব্যং ইত্যুপক্রম্য পূজ্যাশ্চ সফলৈঃ পত্রৈরিত্যাদিনা বিশিষ্য পূজামভিধায় ভোক্তব্যমিত্যভিধানাৎ রাত্রাবেব পূজাভোজনে অবগম্যেতে। অতএবাশক্তানামেব ভোক্তব্যং পূজিতৈঃ সুরৈরিত্যনেন বিশিষ্য দিবা পূজাভোজনে বিহিতে॥ *॥ যোগিনীতন্ত্রে। বিরিঞ্চেস্তু গৃহে ঢক্কাং ঘণ্টাং লক্ষ্মীগৃহে ত্যজেৎ। সর্ব্ববাদ্যময়ীং ঘণ্টাং বাদ্যাভাবে তু বাদয়েৎ ॥*॥ লক্ষ্মী-

ঋক্যং। প্রকীর্ণভাণ্ডামনবেক্ষ্য কারিণীং সদা চ ভর্তুঃ প্রতিকূলবাদিনীং। পরস্য বেশ্মাভিরতামলজ্জামেবংবিধাং স্ত্রীং পরিবর্জয়ামি ॥ মার্কণ্ডেয়ঃ। শিরঃ সপুষ্পং চরণৌ সুপূজিতৌ বরাঙ্গনাসেবনমল্পভোজনং। অনগ্নশায়িত্বমপর্ব্বমৈথুনং চিরপ্রনষ্টাং শ্রিয়মানয়ন্তি ষট্ ॥ মানুষাস্থি গৃহে যত্র অহোরাত্রঞ্চ তিষ্ঠতি। তত্রা লক্ষ্মি তবাবাসস্তথান্যেষাঞ্চ রক্ষসাং ॥ সূর্পদাত্রাদিকং যত্র পদাকর্ষেত্তথাসনং। হরিবংশে। যত্র হ্রীঃ শ্রীঃ স্থিতা তত্র যত্র শ্রীস্তত্র সন্মতিঃ। সন্মতির্হ্রীস্তথা শ্রীশ্চ নিত্যং কৃষ্ণে মহাত্মনি ॥ মৎস্যপুরাণে। স্থিরো হি যো হি পুরুষঃ স্থিরশ্রীরেব জায়তে। রক্ষিতুং নৈব শক্নোতি চপলশ্চপলাং শ্রিয়ং ॥ তথা অবশ্যমুদ্যোগবতাং শ্রীরপারা ভবেৎ সদা। ব্রহ্মপ্রোৎসাহিতা দেবা মমন্থুঃ পুনরম্বুধিং ॥ * ॥ কৃত্যকৌমুদ্যাং। নারিকেলোদকং পীত্বা অক্ষৈর্জাগরণং নিশি। তস্মৈ বিত্তং প্রযচ্ছামি কো জাগর্ত্তি মহীতলে ॥ * ॥ অক্ষক্রীড়ায়াং ব্যাসযুধিষ্ঠিরসংবাদঃ প্রচরতি। তৎক্রীড়া চতুরঙ্গশব্দে দ্রষ্টব্যাঃ বৈষ্ণবামৃতে স্কন্দপুরাণং। পৌষ্যান্তু সমতীতায়াং যাবদ্ভবতি পূর্ণিমা। মাঘমাসস্য দেবেন্দ্র পূজা বিষ্ণোর্বিধীয়তে ॥ ইতি পৌর্ণমাস্যন্তমাসমুপক্রম্য পিতৃণাং দেবতানাঞ্চ মূলকং নৈব দাপয়েৎ। দদন্নরকমাপ্নোতি ভুঞ্জীত ব্রাহ্মণো যদি ॥ ব্রাহ্মণো মূলকং ভুক্ত্বা চরেচ্চান্দ্রায়ণব্রতং। অন্যথা নরকং যাতি ক্ষত্রো বিট্ শূদ্র এব চ ॥ বরং ভক্ষ্যমভক্ষ্যঞ্চ পিবেদ্বা গর্হিতঞ্চ যৎ। বর্জ্জনীয়ং প্রযত্নেন মূলকং মদিরাসমং ॥ * ॥ ফাল্গুনে দোলযাত্রামাহ তার্থচিন্তামণৌ ব্রহ্মপুরাণং। নরো দোলাগতং দৃষ্ট্বা গোবিন্দং পুরুষোত্তমং। ফাল্গুন্যাং সংযতো ভূত্বা গোবিন্দস্য পুরং ব্রজেৎ ॥ স্কন্দপুরাণীয়পুরুষোত্তমমাহাত্ম্যে ঊনত্রিংশাধ্যায়ে। ফাল্গুন্যাং ক্রীড়নং কুর্য্যাৎ দোলায়াং মম ভূমিপ। ইতি তিথিতত্ত্বং ॥ * ॥ তস্যাঃ পর্ব্বত্বং পর্ব্বশব্দে দ্রষ্টব্যং

১৩৫ (ক্লী) পালনং। ইতি শব্দরত্নাবলী ॥ খাতাদিকর্ম্ম। ইত্যমরঃ ॥ আদিনা দেবকুল্যাদি। তদুক্তং। পুষ্করিণ্যঃ সভা বাপী দেবতায়তনানি চ। আরামশ্চ বিশেষেণ পূর্ত্তং কর্ম্ম বিনির্দ্দিশেৎ ॥ ইতি ভরতঃ ॥ তৎকরণফলং। ইষ্টাপূর্ত্তং দ্বিজাতীনাং প্রথমং ধর্ম্মসাধনং। ইষ্টেন লভতে স্বর্গং পূর্ত্তে মোক্ষঞ্চ বিন্দতি ॥ বাপীকূপতড়াগানি দেবতায়তনানি চ। পতিতান্যুদ্ধরেদ্যস্তু স পূর্ত্তফলমশ্নুতে ॥ ইতি বরাহপুরাণং ॥ * ॥ বাপীত্যাদীনাং পূর্ত্তত্বাভিধানাৎ শূদ্রস্যাধিকারমাহ জাতূকর্ণঃ। বাপীকূপতড়াগাদি দেবতায়তনানি চ। অন্নপ্রদানমারামাঃ পূর্ত্তমিত্যভিধীয়তে ॥ গ্রহোপরাগে যদ্দানং পূর্ত্তমিত্যভিধীয়তে। ইষ্টাপূর্ত্তং দ্বিজাতীনাং ধর্ম্মঃ সামান্য উচ্যতে। অধিকারী ভবেৎ শূদ্রঃ পূর্ত্তে ধর্ম্মে ন বৈদিকে ॥ বৈদিকে

বেদাধ্যয়নসাধ্যে অগ্নিহোত্রাদাবিতি রত্না করঃ ॥ এবং স্ত্রীণামপি পূর্ত্তাধিকারঃ। যথা নারীত্যনুবৃত্তৌ বৃহস্পতিঃ। পিতৃব্যগুরু-দৌহিত্রান্ ভর্ত্তুঃ স্বস্ত্রীয়মাতুলান্। পূজয়েৎ কব্যপূর্ত্তাভ্যাং বৃদ্ধানাথাতিথীন্ স্ত্রিয়ঃ ॥ ইতি জলাশয়তত্ত্বং ॥

পূর্ত্তঃ (ত্রি) পূরিতঃ। ছন্নঃ। ইতি বিশ্বঃ ॥

পূর্ত্তিঃ (স্ত্রী) পূরণং। পৄধাতোর্ভাবে ক্তিঃ। ইতি ব্যাকরণং ॥

পূর্ব্ব ক নিকেতনে। ইতি কবিকল্পদ্রুমঃ ॥ ষষ্ঠস্বরী। নিকেতনমিহ নিমন্ত্রণং নিবাসো বা। ক পূর্ব্বয়তি দ্বিজান্ ভোক্তুং গৃহী। পূর্ব্বয়তি তীর্থেষু সাধুঃ। ইতি দুর্গাদাসঃ ॥ বর্গ্যবান্তোঽয়ং ॥

পূর্ব্ব ক নিকেতনে। ইতি কবিকল্পদ্রুমঃ ॥ ষষ্ঠস্বরী। নিকেতনমিহ নিমন্ত্রণংনিবাসো বা। ক পূর্ব্বয়তি দ্বিজান্ ভোক্তুং গৃহী। পূর্ব্বয়তি তীর্থেষু সাধুঃ। ইতি দুর্গাদাসঃ ॥ অন্তস্থবান্তোঽয়ং ॥

পূর্ব্বঃ (ত্রি) প্রথমঃ। আদিঃ। প্রাগ্‌দিগ্দেশ-কালাঃ। ইত্যমরঃ ॥ সমগ্রং। ইতি তট্টীকায়াং স্বামী ॥ অগ্রঃ। ইতি হলায়ুধঃ ॥

পূর্ব্বগঙ্গা (স্ত্রী) নর্ম্মদানদী। ইতি হেমচন্দ্রঃ ॥

পূর্ব্বজঃ (পুং) জ্যেষ্ঠভ্রাতা। ইত্যমরঃ ॥

পূর্ব্বজাঃ (পুং) দিব্যপিতৃগণঃ। তৎপর্য্যায়ঃ। পিতরঃ ২ চন্দ্রগোলস্থাঃ ৩ ন্যস্তশস্ত্রাঃ ৪ স্বধাভুজঃ ৫ কব্যবালাদয়ঃ ৬। বহুবচ-নান্তোঽয়ং। ইতি ত্রিকাণ্ডশেষঃ ॥

পূর্ব্বজা (স্ত্রী) অগ্রজা। জ্যেষ্ঠা ভগিনী। পূর্ব্বজ ইত্যমরদর্শনাৎ ॥

পূর্ব্বজিনঃ (পুং) অতীতজিনবিশেষঃ। তৎ-পর্য্যায়ঃ। মঞ্জুশ্রীঃ ২ জ্ঞানদর্পণঃ ৩ মঞ্জু-ভদ্রঃ ৪ মঞ্জুঘোষঃ ৫ কুমারঃ ৬ অষ্টার-চক্রবান্ ৭ স্থিরচক্রঃ ৮ বজ্রধরঃ ৯ প্রজ্ঞা-কায়ঃ ১০ আদিরাট্ ১১ নীলোৎপলী ১২ মহারাজঃ ১৩ নীলঃ ১৪ শার্দ্দূলবাহনঃ ১৫ ধিয়াম্পতিঃ ১৬ খড়্গী ১৭ দণ্ডী ১৮ বিভূ-ষণঃ ১৯ বালব্রতঃ ২০ পঞ্চচীরঃ ২১ সিংহকেলিঃ ২২ শিখাধরঃ ২৩ বাগী-শ্বরঃ ২৪। ইতি ত্রিকাণ্ডশেষঃ ॥

পূর্ব্বদিক্ (স্ত্রী) প্রাচী দিক্। যস্যান্দিশি সূর্য্য উদেতি। তদধিপতিরিন্দ্রঃ। তস্যাঃ পর্য্যা-য়াদিঃ পূর্ব্বাশব্দে দ্রষ্টব্যঃ ॥

পূর্ব্বদিক্‌পতিঃ (পুং) ইন্দ্রঃ। ইতি হেমচন্দ্রঃ ॥

পূর্ব্বদেবঃ (পুং) অসুরঃ। ইত্যমরঃ ॥

পূর্ব্বদেশঃ (পুং) প্রাচীদিগবস্থিতজনপদঃ। তৎপর্য্যায়ঃ। বর্ত্তনিঃ ২। ইতি ত্রিকাণ্ড-শেষঃ ॥ যথা। প্রাচ্যাং মাগধশোণৌ চ বারেন্দ্রীগৌড়রাঢ়কাঃ। বর্দ্ধমানতমোলিপ্ত প্রাগ্জ্যোতিসোদয়াদ্রয়ঃ ॥ ইতি জ্যোতি-স্তত্ত্বং ॥

পূর্ব্বপদং (ক্লী) পরপদপ্রাগ্বর্ত্তিবিভক্ত্যন্ত-প্রকৃতিঃ। যথা পূর্ব্বপদাৎ সংজ্ঞায়ামগঃ। ইতি সুপদ্মব্যাকরণং ॥

পূর্ব্বপর্ব্বতঃ (পুং) উদয়াচলঃ। ইত্যমরঃ ॥

পূর্ব্বপক্ষঃ (পুং) শুক্লপক্ষঃ। ইত্যমরঃ ॥ শাস্ত্রীয়প্রশ্নঃ। সিদ্ধান্তবিরুদ্ধকোটিঃ। তৎ-পর্য্যায়ঃ। চোদ্যং ২। ইতি ত্রিকাণ্ডশেষঃ ॥ দেশ্যং ৩ ফক্কিকা ৪। ইতি শব্দরত্নাবলী ॥

পূর্ব্বপক্ষপাদঃ (পুং) চতুষ্পাদব্যবহারান্তর্গতঃ

প্রথমঃ পাদঃ। তস্য সংজ্ঞান্তরং। ভাষা ২ প্রতিজ্ঞা ৩ পক্ষঃ ৪। ইতি মিতাক্ষরা॥ তত্র বৃহস্পতিঃ। পূর্ব্বপক্ষঃ স্মৃতঃ পাদো দ্বিপাদশ্চোত্তরঃ স্মৃতঃ। ক্রিয়াপাদস্তথা চান্যশ্চতুর্থো নির্ণয়ঃ স্মৃতঃ॥ মিথ্যোক্তৌ চ চতুষ্পাৎ স্যাৎ প্রত্যবস্কন্দনে তথা। প্রাঙ্ন্যায়ে চ স বিজ্ঞেয়ো দ্বিপাৎ সংপ্রতিপত্তিষু॥ যদ্যপি সংপ্রতিপত্তাবপি নির্ণয়োঽস্তি তথাপ্যুত্তরবাদিনৈব ভাষার্থস্যাঙ্গীকৃতত্বেন ক্রিয়াসাধ্যো ন ভবতীতি দ্বিপাদতোক্তা॥*॥ অথ ভাষাপাদঃ। তত্র ভাষাস্বরূপমাহতুঃ কাত্যায়নবৃহস্পতী। প্রতিজ্ঞাদোষনির্ম্মুক্তং সাধ্যং সৎকারণান্বিতং। নিশ্চিতং লোকসিদ্ধঞ্চ পক্ষং পক্ষবিদো বিদুঃ॥ স্বল্পাক্ষরঃ প্রভূতার্থো নিঃসন্দিগ্ধো নিরাকুলঃ। বিরোধিকারণৈর্ম্মুক্তো বিরোধিপ্রতিরোধকঃ॥ যদা ত্বেবম্বিধঃ পক্ষঃ কল্পিতঃ পূর্ব্ববাদিনা। দদ্যাত্তৎপক্ষসম্বদ্ধং প্রতিবাদী তদোত্তরং॥ প্রতিজ্ঞা সাধ্যাভিধায়িকা বাক্। তস্যা দোষৈঃ পরস্পরবিরুদ্ধার্থপদাদিভিস্ত্যক্তং। সাধ্যং সাধনার্হাভিমতার্থং পক্ষং বিদুঃ। অন্যথা প্রতিজ্ঞাদোষেণ সাধ্যদোষঃ স্যাৎ। অতএবোক্তং। বচনস্য প্রতিজ্ঞাত্বং তদর্থস্য চ পক্ষতা। অসঙ্করেণ বক্তব্যে ব্যবহারেষু বাদিভিঃ॥ বক্তব্যে পক্ষপ্রতিজ্ঞে পূর্ব্বোক্তে। নারদেনাপি। সারস্তু ব্যবহারাণাং প্রতিজ্ঞা সমুদাহৃতা। তদ্ধানৌ হীয়তে বাদী তরংস্তামুত্তরো ভবেৎ॥ উত্তরো বিজয়ী যদ্যপ্যন্যত্র সাধ্যং জ্ঞাপ্যং তদ্বিশিষ্টধর্ম্মী পক্ষ ইতি ভেদঃ। তথাপ্যত্র বাক্প্রত্যায্যর্ণাদিধর্ম্মবিশেষবিশিষ্টস্য পক্ষতয়া ধর্ম্মিণোঽধমর্ণাদেরেব সাধ্যত্বাৎ সাধ্যপক্ষয়োরভেদাভিধানং। অতএব উপসংহারে চ এবংবিধঃ পক্ষ ইতি মিতাক্ষরায়ান্তু ভাষা প্রতিজ্ঞাপক্ষ ইতি নার্থান্তরমিত্যুক্তং। ভাষার্থমুক্ত্বা ভাষাস্বরূপপ্রপঞ্চমাহ স্বল্পাক্ষর ইতি। নিরাকুলঃ পৌর্ব্বাপর্য্যবিপর্য্যাসাদিশূন্যঃ। অত্র দ্যূতে চ ব্যবহারে চ প্রবৃত্তে যজ্ঞকর্ম্মণি। যানি পশ্যন্ত্যুদাসীনাঃ কর্ত্তা তানি ন পশ্যতি॥ ইতি গৃহ্যসংগ্রহবচনাদুদাসীনেভ্যো জ্ঞাত্বা শোধয়েৎ। তচ্ছোধনমাহ বৃহস্পতিঃ। ন্যূনাধিকং পূর্ব্বপক্ষং তাবদ্বাদী বিশোধয়েৎ। ন দদ্যাদুত্তরং যাবৎ প্রত্যর্থী সভ্যসন্নিধৌ॥ তল্লিখনপ্রকারমাহ ব্যাসঃ। পাণ্ডুলেখ্যেন ফলকে ভূমৌ বা প্রথমং লিখেৎ। ঊনাধিকন্তু সংশোধ্যং পশ্চাৎ পত্রে নিবেশয়েৎ॥ ফলকং কাষ্ঠাদিপট্টকং। কাত্যায়নঃ। পূর্ব্বপক্ষং স্বভাবোক্তং প্রাড্বিবাকোঽথ লেখয়েৎ। পাণ্ডুলেখ্যেন ফলকে ততঃ পত্রেঽভিলেখয়েৎ॥ শোধয়েৎ পূর্ব্বপক্ষন্তু যাবন্নোত্তরদর্শনং। উত্তরেণাবরুদ্ধস্য নিবৃত্তিঃ শোধনং ভবেৎ॥ অন্যদুক্তং লিখেদ্যোঽন্যদর্থিপ্রত্যর্থিনোর্ব্বচঃ। চৌরবচ্ছাসয়েত্তন্তু ধার্ম্মিকঃ পৃথিবীপতিঃ॥ স্বভাবোক্তমকৃত্রিমং। এতচ্চ স্বরবিশেষাদিনা সুজ্ঞেয়ং। অতএব যাজ্ঞবল্ক্যঃ। ছলং নিরস্য ভূতেন ব্যবহারান্নয়েন্নৃপঃ। ভূতমপ্যনুপন্যস্তং

হীয়তে ব্যবহারতঃ ॥ ভূতং তত্ত্বার্থসম্বদ্ধং। যদাহ নারদঃ। ভূতং তত্ত্বার্থং সম্বদ্ধং প্রমাদাভিহিতং ছলং। কিন্তু রাজ্ঞা বিশেষেণ স্বধর্ম্মমভিরক্ষতা ॥ মনুষ্যচিত্তবৈচিত্র্যাৎ পরীক্ষ্যা সাধ্বসাধুতা। সর্ব্বেষ্বর্থবিবাদেষু বাক্‌ছলেনাবসীদতি ॥ পশুস্ত্রীভূম্যৃণাদানে শাস্যোঽপ্যর্থান্ন হীয়তে। সর্ব্বেষু অর্থবিবাদেষু প্রমাদাভিধানেঽপি নাবসীদতি। অত্রোদাহরণং পশুস্ত্রীত্যাদি। অর্থবিবাদগ্রহণান্মন্যুকৃতবিবাদেষু প্রমাদাভিধানে প্রকৃতার্থাদ্ধীয়ত ইতি গম্যতে। যথাহমনেন শিরসি পাদেন তাড়িত ইত্যভিধায় কেবলং হস্তেন তাড়িত ইতি বদন্ ন কেবলং দণ্ড্যঃ পরাজীয়তে চ। তথা চ ত্বং শতং মহ্যং ঋণং ধারয়সি মত্ত ঋণত্বেন গৃহীততাবদ্ধনকত্বাদিত্যাদি ভাষাশরীরং এতচ্চ সংস্কৃতদেশভাষান্যতরেণ যথাবোধং বক্তব্যং লেখ্যং বা। মূর্খাণামপি বাদিপ্রতিবাদিত্বদর্শনাৎ। অতএবাধ্যাপনেঽপি তথোক্তং। বিষ্ণুধর্ম্মোত্তরে। সংস্কৃতৈঃ প্রাকৃতৈর্ব্বাক্যৈর্যঃ শিষ্যমনুরূপতঃ। দেশভাষাদ্যুপায়ৈশ্চ বোধয়েৎ স গুরুঃ স্মৃতঃ ॥ ইতি ব্যবহারতত্ত্বং ॥

পূর্ব্বফল্গুনী (স্ত্রী) অশ্বিন্যাদিসপ্তবিংশতিনক্ষত্রান্তর্গতৈকাদশনক্ষত্রং। তত্তু খট্বাকৃতিতারকাদ্বয়াত্মকং। তস্যাধিষ্ঠাত্রী দেবতা ভগঃ। ইতি মুহূর্ত্তচিন্তামণিঃ ॥ অপি চ। দক্ষিণোত্তরগতে দ্বিতারকে যোনিভে মিলতি মস্তকোপরি। কীটতঃ স্ফুটসরোরুহাননে নিঃসৃতা ২৬৮ গজরসাক্ষিলিপ্তিকাঃ ॥ দং ৪। ২৮। ইতি কালিদাসকৃতরাত্রিলগ্ননিরূপণং ॥ * ॥ তত্র জাতফলং। শূরস্ত্যাগী সাহসী ভূমিভর্ত্তা কোপাক্রান্তঃ স্যাচ্ছিরালোঽর্ত্তিদক্ষঃ। ধূর্ত্তঃ ক্রূরোঽত্যন্তবাতাধিকঃ প্রাক্‌ফল্গুন্যশ্চেজ্জন্মকালে চ যস্য ॥ ইতি কোষ্ঠীপ্রদীপঃ ॥

পূর্ব্বফল্গুনীভবঃ (পুং) বৃহস্পতিঃ। ইতি শব্দমালা ॥

পূর্ব্বভদ্রপদঃ (পুং)
পূর্ব্বভদ্রপদাঃ (স্ত্রী)
পূর্ব্বভাদ্রপদাঃ (স্ত্রী) } অশ্বিন্যাদিসপ্তবিংশতিনক্ষত্রান্তর্গত পঞ্চবিংশনক্ষত্রং। তৎপর্য্যায়ঃ। প্রোষ্ঠপদাঃ ২। ইত্যমরঃ ॥ দ্বে পূর্ব্বভাদ্রপদোত্তরভাদ্রপদাস্থ। প্রোষ্ঠো গৌঃ ভদ্রশ্চ গৌঃ তস্যেব পাদ আসাং তাস্তথা। গ্রহপতিরিব ভদ্রপাদানুগতো রাজেত্যাশ্চর্য্যমঞ্জরী শ্লেষাদ্ভদ্রপদাশব্দো হ্রস্বাদিঃ ভাদ্রপদাশব্দো দীর্ঘাদিরপীতি কেচিৎ। দীর্ঘাদিপাঠঃ প্রামাদিক ইতি মুকুটাদয়ঃ ॥ পূর্ব্বে প্রোষ্ঠপদে দ্বে উত্তরে তু ভদ্রপদে দ্বে সমুদায়শ্চাসাং চতুঃসংখ্য ইতি বহুবচনং। কদা পূর্ব্বে প্রোষ্ঠপদে কদা উত্তরে প্রোষ্ঠপদে ইতি তারকয়োর্দ্বিত্বাৎ দ্বিবচনং। ফল্গুনীপ্রোষ্ঠপদাশব্দো দ্বিত্বে বহুত্বে চ ভদ্রপদা দ্বেঽপীতি কেচিৎ ভদ্রপদেন 'যুক্তঃ কাল ইতিপ্রয়োগাৎ পুংলিঙ্গোঽপি ভদ্রপদ ইতি কেচিৎ। ইতি তট্টীকায়াং ভরতঃ ॥*॥ তাং তু দক্ষিণোত্তরবর্ত্তিখট্বাকৃতিতারকা-

দ্বয়াত্মিকাঃ। তারাকৃতিতারাদ্বয়রূপা বা। তদধিদেবতা অজপাদঃ আসাং জঘন্য-গুণঃ। ইতি জ্যোতিষং ॥ অপি চ। তার-মূর্ত্তিভৃতিকোপরিস্থিতে পূর্ব্বভাদ্রপদভে দ্বিতারকে। লিপ্তিকাঃ করিকরাক্ষি২২৮-সংমিতা নিঃসরন্তি বৃষভোদয়াৎ প্রিয়ে ॥ দং ৩। ৪৮। ইতি কালিদাসকৃতরাত্রিলগ্ন-নিরূপণং॥*॥ তত্র জাতফলং। জিতেন্দ্রিয়ঃ সর্ব্বকলাসু দক্ষো জিতারিপক্ষঃ খলু তস্য নিত্যং। ভবেন্মহীয়ান্ সুতরামপূর্ব্বা পূর্ব্বা যদা ভাদ্রপদা প্রসূতৌ ॥ ইতি কোষ্ঠী-প্রদীপঃ ॥

পূর্ব্বযক্ষঃ (পুং) জিনবিশেষঃ। তৎপর্য্যায়ঃ। মণিভদ্রঃ ২ জম্ভলঃ ৩ জলেন্দ্রঃ ৪। ইতি ত্রিকাণ্ডশেষঃ ॥

পূর্ব্বরঙ্গঃ (পুং) নাট্যোপক্রমঃ। ইতি হেম-চন্দ্রঃ ॥ তৎপর্য্যায়ঃ। প্রাক্সংগীতং ২ গুণনিকা ৩। ইতি জটাধরঃ ॥

পূর্ব্বরাগঃ (পুং) নায়কনায়িকয়োর্দশাবিশেষঃ। যথা। শ্রবণাদ্দর্শনাদ্বাপি মিথঃসংরূঢ়-রাগয়োঃ। দশাবিশেষো যোঽপ্রাপ্তৌ পূর্ব্বরাগঃ স উচ্যতে ॥ ইতি সাহিত্য-দর্পণং ॥

পূর্ব্বরাত্রঃ (পুং) রাত্রেঃ পূর্ব্বভাগঃ। ইতি মুগ্ধবোধব্যাকরণং ॥

পূর্ব্বরূপং (ক্লী) পূর্ব্বলক্ষণং। বৈদ্যকে ভাবি-ব্যাধিবোধকচিহ্নং। যথা। প্রাগ্রূপং যেন লক্ষ্যতে। উৎপিৎসুরাময়ো দোষবিশে-ষেণানধিষ্ঠিতঃ। লিঙ্গমব্যক্তমল্পত্বাদ্ব্যাধী-নাং তদযথাযথং ॥ দ্বিবিধং হি পূর্ব্বরূপং ভবতি। সামান্যং বিশিষ্টঞ্চ। সামান্যং যেন দোষদূষ্যসংমূর্চ্ছনাবস্থাজনিতেন ভাবি-জ্বরাদিব্যাধিমাত্রং প্রতীয়তে ন তু বাতাদি-জনিতত্বাদিবিশেষঃ। যথা। শ্রমো রতি-র্বিবর্ণত্বমিতি। তথা বালগুরুবাক্যপ্রদ্বে-ষাদি। সামান্যাভিপ্রায়েণৈব তন্ত্রান্তরং যথা। ব্যাধের্জাতির্বুভূষা চ পূর্ব্বরূপেণ লক্ষ্যতে। ভাবঃ কিমাত্মকত্বঞ্চ লক্ষ্যতে লক্ষণেন তু ইতি ॥ তথাহ পরাশরঃ। পূর্ব্বরূপং নাম যেন ভাবিব্যাধিবিশেষো লক্ষ্যতে ন তু দোষবিশেষ ইতি। বিশিষ্টং যথা। উরঃক্ষতাদৌ লিঙ্গান্যেব বাতাদি-জান্যব্যক্তানি। যদুক্তং তত্রৈব। অব্যক্তং লক্ষণং তেষাং পূর্ব্বরূপমিতি স্মৃতমিতি। তথাহ সুশ্রুতঃ। সামান্যতো বিশেষাত্তু জৃম্ভাত্যর্থং সমীরণাৎ। পিত্তান্নয়নয়ো-র্দ্দাহঃ কফান্নান্নাভিনন্দনমিতি ॥ হারীতে-ঽপ্যুক্তং ইতি পূর্ব্বরূপমষ্টানাং জ্বরাণাং সামান্যতো বিশেষাত্তু জৃম্ভাঙ্গমর্দ্দভূয়িষ্ঠং হৃদয়োদ্বেগি বাতজমিতি। প্রাগ্রূপং যেন লক্ষ্যতে ইত্যস্যার্থমাহ রক্ষিতঃ। যেন শ্রমাদিনা উৎপিৎসুঃ সামগ্রীসাকল্যাদুৎ-পাদেচ্ছুরাময়ো রোগঃ দোষবিশেষেণ বাতাদিজন্যাসাধারণবেপথ্বাদিনা অনধি-ষ্ঠিতোঽসম্বদ্ধো লক্ষ্যতে জ্ঞায়তে তৎ প্রাগ্রূপমিতি। লিঙ্গমব্যক্তমল্পত্বাদিত্য-স্যার্থমাহ স এব। প্রাগ্রূপমিত্যনেন পূর্ব্বোক্তেন সম্বন্ধঃ লিঙ্গং লক্ষণং অব্যক্তং নাত্যভিব্যক্তং তত্র হেতুরল্পত্বাৎ ন ত্বাব-রণাদিযোগাদব্যক্তত্বমিত্যর্থঃ যথাযথং যস্য

ব্যাধের্যদ্রূপং তদেবাব্যক্তং তস্য পূর্ব্বমিত্যর্থঃ। অন্যে তু পূর্ব্বরূপলক্ষণমাহুঃ। স্থানসংশ্রয়িণঃ ক্রুদ্ধা ভাবিব্যাধিপ্রবোধকং। দোষাঃ কুর্ব্বন্তি যল্লিঙ্গং পূর্ব্বরূপং তদুচ্যত ইতি॥ সংক্ষেপতস্তু লক্ষণং ভাবিব্যাধিবোধকমেব লিঙ্গং পূর্ব্বরূপং। ইতি মাধবকরবিজয়রক্ষিতৌ॥

পূর্ব্ববাদঃ (পুং) ব্যবহারে রাজাদিসমীপে প্রাগাবেদনং। যথা। পূর্ব্ববাদম্পরিত্যজ্য যোঽন্যমালম্বতে পুনঃ। পদসংক্রমণাজ্জ্ঞেয়ো হীনবাদী স বৈ নরঃ॥ ইতি মিতাক্ষরা॥

পূর্ব্ববাদী[ন্] (পুং) প্রাগভিযোক্তা। প্রথমবিবাদী। যথা। প্রাঙ্ন্যায়কারণোক্তৌ তু প্রত্যর্থী নির্দ্দিশেৎ ক্রিয়াং। মিথ্যোক্তৌ পূর্ব্ববাদী তু প্রতিপত্তৌ ন সা ভবেৎ॥ ইতি মিতাক্ষরা

পূর্ব্বশৈলঃ (পুং) উদয়পর্ব্বতঃ। ইতি জটাধরঃ॥

পূর্ব্বসরঃ (ত্রি) অগ্রগামী। যথা। দ্বিষন্ বনেচরাগ্র্যাণাং ত্বমাদায় চরো বনে। অগ্রেসরো জঘন্যানাং মাভূৎ পূর্ব্বসরো মম॥ ইতি ভট্টিঃ॥

পূর্ব্বসারঃ (ত্রি) পূর্ব্বসরঃ। পূর্ব্বং দেশং সরতীতি কর্ত্তরি ষণ্প্রত্যয়ঃ। ইতি ব্যাকরণং॥

পূর্ব্বা (স্ত্রী) পূর্ব্বদিক্। তৎপর্য্যায়ঃ। প্রাচী ২ পুরা ৩ মাঘোনী ৪ ঐন্দ্রী ৫ মাঘবতী ৬। তদ্দিগ্‌ভববায়ুগুণাঃ। পূর্ব্বস্তু মধুরো বাতঃ স্নিগ্ধঃ কটুরসান্বিতঃ। গুরুর্বিদাহশমনো বাতদঃ পিত্তনাশনঃ॥ ইতি রাজনির্ঘণ্টঃ॥ অপি চ। প্রাগ্বাতো মধুরঃ ক্ষারো বহ্নিমান্দ্যকরো গুরুঃ। বৈরস্যগৌরবৌজ্ঝ্যানি করোত্যপ্স্বোষধীষু চ॥ ভগ্নোৎপিষ্টক্ষতাদ্যেষু রাগশ্বযথুদাহকৃৎ। সন্নিপাত জ্বরশ্বাসত্বগ্দোষার্শোবিষক্রিমীন্॥ কোপয়েদামবাতঞ্চ ঘনসংঘাতকারণং। ইতি রাজবল্লভঃ॥ *॥ তদ্দিগধিপতয়ঃ। মেষসিংহধনূরাশয়ঃ। যথা। প্রাগাদিককুভাং নাথা যথাসংখ্যং প্রদক্ষিণং। মেষাদ্যা রাশয়ো জ্ঞেয়াস্ত্রিরাবৃত্তিপরিভ্রমাৎ॥ ইতি জ্যোতিস্তত্ত্বং॥

পূর্ব্বাঃ (পুং) পূর্ব্বজাঃ। পূর্ব্বপুরুষাঃ। বহুবচনান্তোঽয়ং। ইত্যমরঃ॥

পূর্ব্বাদ্রিঃ (পুং) উদয়াচলঃ। তৎপর্য্যায়ঃ। দিনমূর্দ্ধা ২। ইতি ত্রিকাণ্ডশেষঃ॥

পূর্ব্বাষাঢ়া (স্ত্রী) অশ্বিন্যাদিসপ্তবিংশতিনক্ষত্রান্তর্গতবিংশনক্ষত্রং। সা সূর্পাকৃতিচতুস্তারাত্মিকা। গজদন্তাকৃতিদ্বিতারাত্মিকা বা। অস্যা অধিষ্ঠাতৃদেবতা তোয়ং। ইতি জ্যোতিষং॥ অপি চ। সূর্পমূর্ত্তিনি শিরোগতে চতুস্তারকে করিকরোরুবারিভে। অন্ত্যভাদমৃতবাণি নির্গতাঃ খেচরাম্বরশশাঙ্কলিপ্তিকাঃ॥ দং ১। ৪৯। ইতি কালিদাসকৃতরাত্রিলগ্ননিরূপণং॥ *॥ তত্র জাতফলং। ভূয়ো ভূয়স্তূয়মানানুরক্তো ভক্তো দেবে বন্ধুমান্যোঽতিদক্ষঃ। পূর্ব্বাষাঢ়া জন্মকালে যদি স্যাদাষাঢ়ঃ স্যাদ্বৈরিবর্গে নিতান্তং॥ ইতি কোষ্ঠীপ্রদীপঃ॥

পূর্ব্বাহ্নঃ (পুং) ত্রিধাবিভক্তদিনপ্রথমভাগঃ। স চ ত্রিংশদ্দণ্ডদিনমানে সূর্য্যোদয়াবধি-

দশদণ্ডকালঃ । যথা । পূর্ব্বাহ্লো বৈ দেবানাং মধ্যন্দিনং মনুষ্যাণামপরাহ্লঃ পিতৃণাং। ইতি শ্রুতিঃ॥ অপি চ। ত্রিধাবিভক্তদিনভাগাভিপ্রায়েণ তু লোকোক্তিঃ। পূর্ব্বাহ্লে মধ্যমে বাপি যদি পর্ব্ব সমাপ্যতে। তদোপবাসঃ পূর্ব্বেদ্যুস্তদহর্যাগ ইষ্যতে॥ অপরাহ্লেহথবা রাত্রৌ যদি পর্ব্ব সমাপ্যতে। উপোষ্য তস্মিন্নহনি শ্বোভূতে যাগ ইষ্যতে॥ উপোষ্যেতি নাহোরাত্রাভোজনপরং কিন্তু কৃতে অগ্ন্যাধানে দেবা যজমানস্য সমীপমুপবসন্তীতি উপবাসশব্দেনাগ্ন্যাধানমুচ্যতে। সূর্য্যোদয়াবধিপ্রহরদ্বয়ং। দ্বিধাবিভক্তদিনপূর্ব্বভাগঃ। যথা। পূর্ব্বাহ্লাপরাহ্লরূপদ্বিধাবিভক্তদিনস্যাবধিত্বেনাবর্ত্তনমাহ স্কন্দপুরাণং। আবর্ত্তনাত্তু পূর্ব্বাহ্লো হ্যপরাহ্লস্ততঃ পরঃ। আবর্ত্তনাৎ বাসরস্য ছায়াপরিবর্ত্তনাৎ প্রাগিতিশেষঃ অতএবোক্তং। অশ্বত্থং বন্দয়েন্নিত্যং পূর্ব্বাহ্লে প্রহরদ্বয়ে। অত ঊর্দ্ধং ন বন্দেত অশ্বত্থস্তু কদাচন॥ ইতি মলমাসতত্ত্বং॥

পূর্ব্বাহ্লেতনঃ (ত্রি) পূর্ব্বাহ্লে ভবঃ। ইতি সিদ্ধান্তকৌমুদী॥

পূর্ব্বেদ্যুঃ [স্] ব্য পূর্ব্বদিনং। ইত্যমরঃ॥ প্রাতঃকালঃ। ধর্ম্মবাসরঃ। ইতি মেদিনী॥

পূল কি সংহতৌ। ইতি কবিকল্পদ্রুমঃ॥ ষষ্ঠস্বরী। কি পূলয়তি পূলতি। সংহতী রাশীকরণং। ইতি দুর্গাদাসঃ॥

পূষ বৃদ্ধৌ। ইতি কবিকল্পদ্রুমঃ॥ ষষ্ঠস্বরী। পূষতি। ইতি দুর্গাদাসঃ॥

পূষঃ (পুং) ব্রহ্মদারুবৃক্ষঃ। তুত ইতি ভাষা। ইত্যমরঃ॥

পূষকঃ (পুং) ব্রহ্মদারুবৃক্ষঃ। পলাশপিপল ইতি হিন্দী ভাষা। ইতি রাজনির্ঘণ্টঃ॥ অস্য পর্য্যায়গুণাঃ তূলশব্দে দ্রষ্টব্যাঃ॥

পূষভাষা (স্ত্রী) ইন্দ্রনগরী। তৎপর্য্যায়ঃ সুরপুরী ২। ইতি শব্দরত্নাবলী॥

পূষসুহৃৎ [দ্] (পুং) শিবঃ। ইতি হেমচন্দ্রঃ॥

পূষা [ন্] (পুং) সূর্য্যঃ। ইত্যমরঃ॥

পৃ ক পূর্ত্তৌ। ইতি কবিকল্পদ্রুমঃ॥ পূর্ত্তিঃ পূর্ণীকরণং। ক পারয়তি পয়সা কুম্ভং লোকঃ। ইতি দুর্গাদাসঃ॥

পৃ ন প্রীতৌ। ইতি কবিকল্পদ্রুমঃ॥ ন অতিথীন্ পৃণোতি। ইতি দুর্গাদাসঃ॥

পৃ লি পালনে। ইতি কবিকল্পদ্রুমঃ॥ লি পিপর্ত্তি। ইতি দুর্গাদাসঃ॥

পৃ শ ঙ ব্যায়ামকে। ইতি কবিকল্পদ্রুমঃ॥ ব্যায়ামকো ব্যাপারঃ। শ ঙ ধর্ম্মে ব্যাপ্রিয়তে সুধীঃ। ইতি দুর্গাদাসঃ॥

পৃক্কা (স্ত্রী) শাকবিশেষঃ। পিড়িং ইতি ভাষা। তৎপর্য্যায়ঃ। মরুন্মালা ২ পিশুনা ৩ দেবী ৪ লতা ৫ লঘুঃ ৬ সমুদ্রান্তা ৭ বধূঃ ৮ কোটিবর্ষা ৯ লঙ্কায়িকা ১০। ইত্যমরঃ॥ মরুৎ ১১ মালা ১২ স্পৃক্কা ১৩ কোটী ১৪ বর্ষা ১৫ লঙ্কাপিকা ১৬ বর্ষালঙ্কায়িকা ১৭। ইতি তট্টীকায়াং ভরতঃ॥ তস্করঃ ১৮ চোরকঃ ১৯ চণ্ডঃ ২০। ইতি রত্নমালা॥ অস্য গুণাঃ। পাকে মধুরত্বং। হৃদ্যত্বং। পিত্তকফনাশিত্বঞ্চ। ইতি রাজবল্লভঃ॥

পৃক্তং (ক্লী) ধনং। ইতি হেমচন্দ্রঃ॥ সম্পর্কযুক্তে ত্রি॥

পৃক্তিঃ (স্ত্রী) সম্পর্কঃ। স্পর্শঃ। তৎপর্য্যায়ঃ। স্পৃষ্টিঃ ২। ইত্যমরঃ॥

পৃচ ঈ ল ঙ সম্পর্কে। ইতি কবিকল্পদ্রুমঃ॥ ঈ পৃক্তঃ। ল ঙ পৃক্তে। পরীপৃচ্যতে। স চেহ সম্পৃক্তীভাবঃ। সম্পৃক্তে নাভিশস্তৈর্য ইতি হলায়ুধঃ। সম্পৃক্তে মধুনা চূর্ণং ভিষগিতি তু অন্তর্ভূতণ্যর্থত্বাদিতি চতুর্ভুজঃ। ইতি দুর্গাদাসঃ॥

পৃচ কি সংযমনে। সম্পর্কে। ইতি কবিকল্পদ্রুমঃ॥ সংযমনং বন্ধনং। কি পর্চ্চয়তি পর্চ্চতি দুষ্টং রাজা। ইতি দুর্গাদাসঃ॥

পৃচ ধ ঈ সম্পর্কে। ইতি কবিকল্পদ্রুমঃ॥ সম্পর্ক ইহ সংপৃক্তীকরণং সম্পৃক্তীভাবশ্চ। ধ পৃণক্তি ধনুষা বাণং। সং পৃণক্তি ন পাপিভির্য ইতি হলায়ুধঃ। ঈ পৃক্তঃ। পপর্চ্চ। ইতি দুর্গাদাসঃ॥

পৃচ্ছা (স্ত্রী) প্রশ্নঃ। ইত্যমরঃ॥

পৃজ ই ল ঙ সম্পর্কে। ইতি কবিকল্পদ্রুমঃ॥ সপ্তমস্বরী। ই পৃঞ্জ্যতে। ল ঙ পৃঙ্‌ক্তে। অয়ং কৈশ্চিন্ন মন্যতে। ইতি দুর্গাদাসঃ॥

পৃড শ মুদি। ইতি কবিকল্পদ্রুমঃ॥ মুদি হৃষ্টীকরণে। শ পৃড়তি দীনং দাতা। পর্ড়িতা। ইতি দুর্গাদাসঃ॥

পৃণ শ তৃপি। ইতি কবিকল্পদ্রুমঃ॥ তৃপি তৃপ্তাকরণে। শ অগ্নিং পৃণতি যো দ্বিজঃ। পর্ণিতা। ইতি দুর্গাদাসঃ॥

পৃতনা (স্ত্রী) সেনা। সেনাভেদঃ। ইতি মেদিনী॥ বাহিনীত্রয়ং। অত্র গজাস্ত্রিচত্বারিংশদধিকশতদ্বয়ং ২৪৩। রথাস্ত্রিচত্বারিংশদধিকশতদ্বয়ং ২৪৩। অশ্বা ঊনত্রিংশদধিকসপ্তশতং ৭২৯। পদাতিকাঃ পঞ্চদশাধিকশতদ্বয়াধিকসহস্রং ১২১৫। সমুদায়েন ত্রিংশদধিকচতুঃশতাধিকসহস্রদ্বয়ং ২৪৩০। ইত্যমরভরতৌ॥

পৃতনাষাট্ [সাহ] (পুং) ইন্দ্রঃ। ইতি ত্রিকাণ্ডশেষঃ॥

পৃথ ক প্রক্ষেপে। ইতি কবিকল্পদ্রুমঃ॥ ক পর্থয়তি গুড়মৌষধে জনঃ। ইতি দুর্গাদাসঃ॥

পৃথক্ ব্য ভিন্নং। তৎপর্য্যায়ঃ। বিনা ২ অন্তরেণ ৩ ঋতে ৪ হিরুক্ ৫ নানা ৬ বর্জ্জনং ৭। ইত্যমরঃ॥

পৃথক্ত্বং (ক্লী) চতুর্বিংশতিগুণান্তর্গতসপ্তম গুণঃ। তস্য লক্ষণং। পৃথক্‌প্রত্যয়াসাধারণকারণত্বং যথা। সংখ্যাবচ্চ পৃথক্ত্বং স্যাৎ পৃথক্‌প্রত্যয়কারণং। অন্যোন্যাভাবতো নাস্য চরিতার্থত্বমুচ্যতে॥ অস্মাৎ পৃথগিয়ং নেতি প্রতীতির্হি বিলক্ষণা। ইতি ভাষাপরিচ্ছেদঃ॥ পৃথক্ত্বং নিরূপয়তি সংখ্যাবদিতি পৃথক্‌প্রত্যয়াসাধারণকারণং পৃথক্ত্বং। তন্নিত্যতাদিকং সংখ্যাবৎ যথা হি নিত্যেষু একত্বং নিত্যং অনিত্যে অনিত্যং আশ্রয়দ্বিতীয়ক্ষণে চোৎপদ্যতে আশ্রয়নাশান্নশ্যতি তথা একপৃথক্ত্বমপি দ্বিত্বাদিবৎ দ্বিপৃথক্ত্বাদিকমপীত্যর্থঃ। ইতি সিদ্ধান্তমুক্তাবলী॥

পৃথক্ত্বচা (স্ত্রী) মূর্ব্বা। ইতি রত্নমালা॥

পৃথক্‌পর্ণী (স্ত্রী) ক্ষুদ্রবৃক্ষবিশেষঃ। চাকুল্যা

ইতি ভাষা। তৎপর্য্যায়ঃ। পৃশ্নিপর্ণী ২ চিত্রপর্ণী ৩ অঙ্ঘ্রিবল্লিকা ৪। ইত্যমরঃ॥

পৃথক্‌ক্ষেত্রাঃ (পুং) একস্মান্নানাবর্ণস্ত্রীজাতপুত্রাঃ। ইতি মিতাক্ষরা॥

পৃথগাত্মতা (স্ত্রী) বিবেকঃ। ইত্যমরঃ॥

পৃথগাত্মিকা (স্ত্রী) ব্যক্তিঃ। যথা। জাতির্জাতঞ্চ সামান্যং ব্যক্তিস্তু পৃথগাত্মিকা। ইতি জনুর্জননজন্মানীত্যাদিশ্লোকোত্তরং ক্বচিদমরকোষে পাঠঃ॥

পৃথগ্‌জনঃ (পুং) মূর্খঃ। নীচঃ। ইত্যমরঃ॥ পাপী। ইতি শব্দরত্নাবলী॥ ভিন্নলোকশ্চ॥

পৃথগ্বিধঃ (ত্রি) নানারূপঃ। ইত্যমরঃ॥

পৃথগ্বীজঃ (পুং) ভল্লাতকঃ। ইতি রাজনির্ঘণ্টঃ॥

পৃথবী (স্ত্রী) পৃথিবী। যথা। পৃথবী পৃথিবী পৃথ্বী ধরা সর্ব্বংসহা রসা। ইতি ভরতধৃতবাচস্পতিঃ॥

পৃথা (স্ত্রী) কুন্তী। ইতি জটাধরঃ॥

পৃথাজঃ (পুং) অর্জ্জুনবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ কুন্তীপুত্রশ্চ॥

পৃথাপতিঃ (পুং) পাণ্ডুরাজঃ। ইতি ত্রিকাণ্ডশেষঃ

পৃথিকা (স্ত্রী) শতপদী। ইতি শব্দমালা॥

পৃথিবিঃ (স্ত্রী) পৃথিবী। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥

পৃথিবী (স্ত্রী) প্রথতে বিস্তারং যাতি ইবট্ নিপাতনাজ্জিঃ। তৎপর্য্যায়ঃ। ভূঃ ২ ভূমিঃ ৩ অচলা ৪ অনন্তা ৫ রসা ৬ বিশ্বম্ভরা ৭ স্থিরা ৮ ধরা ৯ ধরিত্রী ১০ ধরণী ১১ ক্ষোণী ১২ জ্যা ১৩ কাশ্যপী ১৪ ক্ষিতিঃ ১৫ সর্ব্বংসহা ১৬ বসুমতী ১৭ বসুধা ১৮ উর্ব্বী ১৯ বসুন্ধরা ২০ গোত্রা ২১ কুঃ ২২ পৃথ্বী ২৩ ক্ষ্মা ২৪ অবনিঃ ২৫ মেদিনী ২৬ মহী ২৭। ইত্যমরঃ॥ ভূর্ ২৮ ভূমী ২৯ ধরণিঃ ৩০ ক্ষোণিঃ ৩১ ক্ষোণী ৩২ ক্ষৌণিঃ ৩৩ ক্ষমা ৩৪ অবনী ৩৫ মহিঃ ৩৬ রত্নগর্ভা ৩৭ সাগরাম্বরা ৩৮ অব্ধিমেখলা ৩৯ ভূতধাত্রী ৪০ রত্নাবতী ৪১ দেহিনী ৪২ পারা ৪৩ বিপুলা ৪৪ মধ্যমলোকবর্ত্মা ৪৫। ইতি ভরতঃ॥ ধরণীধরা ৪৬ ধারণী ৪৭ মহাকান্তা ৪৮ জগদ্বহা ৪৯ গন্ধবতী ৫০ খণ্ডনী ৫১ গিরিকর্ণিকা ৫২ ধারয়িত্রী ৫৩ ধাত্রী ৫৪ সাগরমেখলা ৫৫ সহা ৫৬ অচলকীলা ৫৭ গৌঃ ৫৮ অব্ধিদ্বীপা ৫৯ দ্বিরা ৬০ ইড়া ৬১ ইড়িকা ৬২ ইলা ৬৩ ইলিকা ৬৪। ইতি শব্দরত্নাবলী॥ উদধিবস্ত্রা ৬৫ ইরা ৬৬ আদিমা ৬৭ ঈলা ৬৮ বরা ৬৯ উর্ব্বরা ৭০ আদ্যা ৭১ জগতী ৭২ পৃথুঃ ৭৩ ভূতমাতা ৭৪ নিশ্চলা ৭৫ বীজপ্রসূঃ ৭৬ শ্যামা ৭৭ ক্রোড়কান্তা ৭৮। ইতি রাজনির্ঘণ্টঃ॥ খগবতী ৭৯ অদিতিঃ ৮০। ইতি জটাধরঃ॥ *॥ ন্যায়মতে অস্যা ধর্ম্মং। রূপদ্রবত্বপ্রত্যক্ষযোগিত্বং। ইয়ং গুর্ব্বী রসযুক্তা চ। অস্যা দ্রবত্বং নৈমিত্তিকং। অস্যা গুণাঃ। স্পর্শঃ ১ সংখ্যা ২ পরিমিতিঃ ৩ পৃথক্ত্বং ৪ সংযোগঃ ৫ বিভাগঃ ৬ পরত্বং ৭ অপরত্বং ৮ বেগঃ ৯ দ্রবত্বং ১০ গুরুত্বং ১১ রূপং ১২ রসঃ ১৩ গন্ধঃ ১৪। ইয়ং গন্ধকারণং নানারূপবতী ষড়্‌স

যুক্তা। গন্ধস্তু দ্বিবিধঃ সৌরভং অসৌরভং। তস্যাঃ স্পর্শঃ অনুষ্ণাশীতপাকজঃ। সা দ্বিবিধা নিত্যা অনিত্যা চ পরমাণুস্বরূপা নিত্যা সাবয়বা অনিত্যা। সা ত্রিবিধা দেহেন্দ্রিয়বিষয়রূপা। দেহরূপা যোনিজাদিঃ ইন্দ্রিয়াত্মিকা ঘ্রাণরূপা বিষয়াত্মিকা দ্ব্যণুকাদিব্রহ্মাণ্ডপর্য্যন্তা। যথা। রূপদ্রবত্বপ্রত্যক্ষযোগি স্যাৎ প্রথমত্রিকং। গুরুণী দ্বে রসবতী দ্বয়োর্নৈমিত্তিকো দ্রবঃ॥ স্পর্শাদয়োঽষ্টৌ বেগশ্চ দ্রবত্বঞ্চ গুরুত্বকং। রূপং রসস্তথা স্নেহো বারিণ্যেতে চতুর্দ্দশ॥ স্নেহহীনা গন্ধযুতা ক্ষিতাবেতে চতুর্দ্দশ। তত্র ক্ষিতির্গন্ধহেতুর্নানারূপবতী মতা॥ ষড়্‌বিধস্তু রসস্তত্র গন্ধোঽপি দ্বিবিধো মতঃ। স্পর্শস্তু তস্যা বিজ্ঞেয়ো হ্যনুষ্ণাশীতপাকজঃ॥ নিত্যানিত্যা চ সা দ্বেধা নিত্যা স্যাদণুলক্ষণা। অনিত্যা তু তদন্যা স্যাৎ সৈবাবয়বযোগিনী॥ সা চ ত্রিধা ভবেদ্দেহ ইন্দ্রিয়ং বিষয়স্তথা। যোনিজাদির্ভবেদ্দেহমিন্দ্রিয়ং ঘ্রাণলক্ষণং॥ বিষয়ো দ্ব্যণুকাদিস্তু ব্রহ্মাণ্ডান্ত উদাহৃতঃ। ইতি ভাষাপরিচ্ছেদঃ॥*॥ তস্যা অধ্যাত্মাদি যথা। পৃথিবী পঞ্চমং ভূতং ঘ্রাণশ্চাধ্যাত্মমুচ্যতে। অধিভূতং তথা গন্ধো বায়ুস্তত্রাধিদৈবতং॥ ইতি মহাভারতে আশ্বমেধিকপর্ব্ব॥ *॥ তস্যা উৎপত্তিকারণং যথা। শ্রূয়তাং বসুধাজন্ম সর্ব্বমঙ্গলকারণং। বিঘ্ননিঘ্নকরং পাপনাশনং পুণ্যবর্দ্ধনং॥ অহো কেচিদ্বদন্তীতি মধুকৈটভমেদসা। বভূব বসুধাজন্ম তদবিরুদ্ধমতং শৃণু॥ ঊচতুস্তৌ পুরা বিষ্ণুং তুষ্টৌ যুদ্ধেন তেজসা। 'আবাং 'বধ ন যত্রোর্ব্বী পাথসা সংবৃতেতি' চ'॥ তয়োর্জীবনকালেন প্রত্যক্ষা সাভবৎ স্ফুটং। ততো বভূব মেদশ্চ মরণস্যান্তরর্ন্তয়োঃ॥ মেদিনীতি চ বিখ্যাতেত্যুক্তা যৈস্তন্মতং শৃণু। জলধৌতা কৃশা পূর্ব্বং বর্দ্ধিতা মেদসা যতঃ॥ কথয়ামি চ তজ্জন্ম সার্থকং সর্ব্বসম্মতং। পুরা শ্রুতং যৎ শ্রুত্যুক্তং ধর্ম্মবক্ত্রাচ্চ পুষ্করে॥ মহাবিরাট্‌শরীরস্য জলস্থস্য চিরং স্ফুটং। মলো বভূব কালেন সর্ব্বাঙ্গব্যাপকো ধ্রুবং॥ স চ প্রবিষ্টঃ সর্ব্বেষাং তল্লোম্নাং বিবরেষু চ। কালেন মহতা তস্মাদ্বভূব বসুধা মুনে॥ প্রত্যেকং প্রতিলোম্নাঞ্চ কূপেষু সা স্থিরা স্থিতা। আবির্ভূতা তিরোভূতা সা জলে চ পুনঃ পুনঃ॥ আবির্ভূতা সৃষ্টিকালে তজ্জলোপর্য্যবস্থিতা। প্রলয়ে চ তিরোভূতা জলাভ্যন্তরবস্থিতা॥ প্রতিবিশ্বেষু বসুধা শৈলকাননসংযুতা। সপ্তসাগরসংযুক্তা সপ্তদ্বীপমিতা সতী॥ হিমাদ্রিমেরুসংযুক্তা গ্রহচন্দ্রার্কসংযুতা। 'ব্রহ্মবিষ্ণুশিবাদ্যৈশ্চ সুরৈর্লোকৈস্তদালয়ে॥ পুণ্যতীর্থসমাযুক্তা পুণ্যভারতসংযুতা। পাতালসপ্ততদধস্তদূর্দ্ধে ব্রহ্মলোককঃ॥ ব্রহ্মলোকশ্চ তত্রৈব সর্ব্ববিশ্বঞ্চ তত্র বৈ। এবং সর্ব্বাণি বিশ্বানি পৃথিব্যাং নির্ম্মিতানি চ॥ ঊর্দ্ধ্বৌ গোলোকবৈকুণ্ঠৌ নিত্যৌ বিশ্বপরৌ চ তৌ। নশ্বরাণি চ বিশ্বানি সর্ব্বাণি কৃত্রিমাণি চ॥ প্রলয়ে প্রাকৃতে

ব্রহ্মন্ ব্রহ্মণশ্চ নিপাতনে। মহাবিরাড়াদিস্বষ্টৌ সৃষ্টঃ কৃষ্ণেন চাত্মনা ॥ নিত্যৈঃ স্থিতা চ প্রলয়ে কাষ্ঠাকাশেশ্বরৈঃ সহ। ক্ষিত্যধিষ্ঠাতৃদেবী সা বারাহে পূজিতা সুরৈঃ॥ মুনিভির্মনুভির্বিপ্রৈর্গন্ধর্ব্বাদিভিরেব চ। বিষ্ণোর্ব্বরাহরূপস্য পত্নী সা শ্রুতিসম্মতা। তৎপুত্রো মঙ্গলো জ্ঞেয়ো ঘণ্টেশো-মঙ্গলাত্মজঃ ॥ * ॥ নারদ উবাচ। পূজিতা কেন রূপেণ বারাহে চ সুরৈর্ম্মহী। বরাহেণ চ বারাহী সর্ব্বৈঃ সর্ব্বাশ্রয়া সতী ॥ তস্যাঃ পূজাবিধানঞ্চাপ্যধশ্চোদ্ধরণক্রমং। মঙ্গলং মঙ্গলস্যাপি জন্ম ব্যাসং বদ প্রভো॥ শ্রীনারায়ণ উবাচ। বারাহে চ বরাহশ্চ ব্রহ্মণা সংস্তুতঃ পুরা। উদ্দধার মহীং হত্বা হিরণ্যাক্ষং রসাতলাৎ ॥ জলে তাং স্থাপয়ামাস পদ্মপত্রং যথা হ্রদে। তত্রৈব নির্ম্মমে ব্রহ্মা সর্ব্ববিশ্বং মনোহরং॥ দৃষ্ট্বা তদধিদেবীঞ্চ সকামাং কামুকো হরিঃ। বরাহরূপী ভগবান্ কোটিসূর্য্যসমপ্রভঃ॥ কৃত্বা রতিকরীং শয্যাং মূর্ত্তিঞ্চ সুমনোহরাং। ক্রীড়াঞ্চকার রহসি দিব্যং বর্ষমহর্নিশং॥ সুখসম্ভোগসংস্পর্শাম্মূর্চ্ছাং সংপ্রাপ সুন্দরী। বিদগ্ধায়া বিদগ্ধেন সঙ্গমোহতিসুখপ্রদঃ॥ বিষ্ণুস্তদঙ্গসংস্পর্শাৎ বুবুধে ন দিবানিশং। বর্ষান্তে চেতনাং প্রাপ্য কামী তত্যাজ কামুকীং ॥ পূর্ব্বরূপঞ্চ বারাহং দধার চাবলীলয়া। পূজাঞ্চকার ভক্ত্যা চ ধ্যাত্বা চ ধরণীং সতীং ॥ ধূপৈর্দীপৈশ্চ নৈবেদ্যৈঃ সিন্দুরৈরনুলেপনৈঃ। বস্ত্রৈঃ পুষ্পৈশ্চ বলিভিঃ সংপূজ্যোবাচ তাং হরিঃ ॥ শ্রীমহাবরাহ উবাচ। সর্ব্বাধারা ভব শুভে সর্ব্বৈঃ সংপূজিতা সুখং। মুনিভির্মনুভির্দেবৈঃ সিদ্ধৈশ্চ মানবাদিভিঃ॥ অম্বুবাচীত্যাগদিনে গৃহারম্ভপ্রবেশনে। বাপীতড়াগারম্ভে চ গৃহে চ কৃষিকর্ষণে॥ তব পূজাং করিষ্যন্তি মদ্বরেণ সুরাদয়ঃ। মূঢ়া যে ন করিষ্যন্তি যাস্যন্তি নরকঞ্চ তে ॥*॥ বসুধোবাচ। বহামি সর্ব্বং বারাহরূপেণাহং তবাজ্ঞয়া। লীলামাত্রেণ ভগবন্ বিশ্বঞ্চ সচরাচরং॥ মুক্তাং শুক্তিং হরের্চ্চাং শিবলিঙ্গং শিলাং তথা। শঙ্খং প্রদীপং মন্ত্রঞ্চ মাণিক্যং হীরকং মণিং॥ যজ্ঞসূত্রঞ্চ পুষ্পঞ্চ পুস্তকং তুলসীদলং। জপমালাং পুষ্পমালাং কর্পূরঞ্চ সুবর্ণকং॥ গোরোচনাং চন্দনঞ্চ শালগ্রামজলং বিনা। এতান্ বোঢ়ুমশক্তাহং ক্লিষ্টা চ ভগবন্ শৃণু॥ শ্রীভগবানুবাচ। দ্রব্যাণ্যেতানি মূঢ়া যে অর্পয়িষ্যন্তি সুন্দরি। তে যাস্যন্তি কালসূত্রং দিব্যং বর্ষশতং ত্বয়ি ॥ ইত্যেবমুক্ত্বা ভগবান্ বিররাম চ নারদ। *। বভূব তেন গর্ভেণ তেজস্বী মঙ্গলগ্রহঃ॥ পূজাং চক্রুঃ পৃথিব্যাশ্চ তে সর্ব্বে চাজ্ঞয়া হরেঃ। কাণ্বশাখোক্তধ্যানেন তুষ্টুবুঃ স্তবনেন চ॥ দদুর্ম্মূলেন মন্ত্রেণ নৈবেদ্যাদিকমেব চ। সংস্তুতা বিষ্ণুলোকেষু পূজিতা সা বভূব হ॥ * ॥ নারদ উবাচ। কিং ধ্যানং স্তবনন্তস্যা মূলমন্ত্রঞ্চ কিং বদ। গূঢ়ং সর্ব্বপুরাণেষু শ্রোতুং কৌতূহলং মম॥ শ্রীনারায়ণ

উবাচ। আদৌ চ পৃথিবী দেবী বরাহেণ চ পূজিতা। ততঃ সর্ব্বৈর্মুনীন্দ্রৈশ্চ মনুভির্ম্মানবাদিভিঃ। ধ্যানঞ্চ স্তবনং মন্ত্রং শৃণু বক্ষ্যামি নারদ॥ *॥ ওঁ শ্রীং হ্রীং ক্লীং বসুন্ধরায়ৈ স্বাহা। ইত্যনেনৈব মন্ত্রেণ পূজিতা বিষ্ণুনা পুরা॥ শ্বেতচম্পকবর্ণাভাং শতচন্দ্রসমপ্রভাং। চন্দনোক্ষিতসর্ব্বাঙ্গাং রত্নভূষণভূষিতাং॥ রত্নাধারাং রত্নগর্ভাং রত্নাকরসমন্বিতাং। বহ্নিশুদ্ধাংশুকাধানাং সস্মিতাং বন্দিতাং ভজে॥ ধ্যানেনানেন সা দেবী সর্ব্বৈশ্চ পূজিতা ভবেৎ। স্তবনং শৃণু বিপ্রেন্দ্র কাণ্বশাখোক্তমেব চ ॥ *॥ শ্রীবিষ্ণুরুবাচ। জয়ে জয়ে জয়াকারে জয়শীলে জয়প্রদে। যজ্ঞশূকরজায়ে চ জয়ং দেহি জয়াবহে ॥ মঙ্গলে মঙ্গলাধারে মঙ্গল্যে মঙ্গলপ্রিয়ে। মঙ্গলাঢ্যে মঙ্গলেশে মঙ্গলং দেহি মে ভবে॥ সর্ব্বাধারে সর্ব্ববীজে সর্ব্বশক্তিসমন্বিতে। সর্ব্বকামপ্রদে দেবি সর্ব্বেষ্টং দেহি মে ভবে॥ পুণ্যস্বরূপে পুণ্যানাং বীজরূপে সনাতনি। পুণ্যাশ্রয়ে পুণ্যবতামালয়ে পুণ্যদে ভবে॥ রত্নাধারে রত্নগর্ব্ভে রত্নাকরসমন্বিতে। স্ত্রীরত্নরূপে রত্নাঢ্যে রত্নসারপ্রদে ভবে ॥ সর্ব্বশস্যালয়ে সর্ব্বশস্যাঢ্যে সর্ব্বশস্যদে। সর্ব্বশস্যহরে কালে সর্ব্বশস্যাধিকে ভবে॥ ভূমে ভূমিপসর্ব্বস্বে ভূমিপানাং পরায়ণে। ভূপাহঙ্কাররূপেণ ভূমিং দেহি চ ভূমিপে॥ ইদং পুণ্যং মহাস্তোত্রং তাং সংপূজ্য চ যঃ পঠেৎ। কোটি কোটি জন্ম জন্ম স ভবেদ্ভূমিপেশ্বরঃ॥ ভূমিদানকৃতং পুণ্যং লভতে পাঠনাজ্জনঃ। ভূমিদানহরাৎ পাপান্মুচ্যতে নাত্র সংশয়ঃ॥ অম্বুবাচীভূখননে পাপাৎ স মুচ্যতে ধ্রুবং। অন্যকূপে কূপদজাৎ পাপাৎ স মুচ্যতে ধ্রুবং। পরভূশ্রাদ্ধজাৎ পাপান্মুচ্যতে নাত্র সংশয়ঃ॥ ভূমৌ বীর্য্যপরিত্যাগাৎ ভূমৌ দীপাদিস্থাপনাৎ। পাপেন মুচ্যতে প্রাজ্ঞঃ স্তোত্রস্য পঠনান্মুনে। অশ্বমেধশতং পুণ্যং লভতে নাত্র সংশয়ঃ॥ *॥ নারদ উবাচ। ভূমিদানকৃতং পুণ্যং পাপং তদ্ধরণে চ যৎ। পরভূমৌ শ্রাদ্ধপাপং কূপে কূপদজং তথা॥ অম্বুবাচীভূখননং বীর্য্যত্যাগজমেব চ। দীপাদিস্থাপনাৎ পাপং শ্রোতুমিচ্ছামি যত্নতঃ॥ অন্যং বা পৃথিবীজন্যং পাপং মৎপ্রশ্নতঃ পরং। যদস্তি তৎপ্রতীকারং বদ বেদবিদাম্বর॥ শ্রীনারায়ণ উবাচ। বিতস্তিমানাং ভূমিঞ্চ যো দদাতি চ ভারতে। সন্ধ্যাপূতায় বিপ্রায় স যাতি বিষ্ণুমন্দিরং॥ ভূমিঞ্চ সর্ব্বশস্যাঢ্যাং ব্রাহ্মণায় দদাতি যঃ। ভূমিরেণুপ্রমাণঞ্চ বর্ষং বিষ্ণুপদে স্থিতিঃ॥ গ্রামং ভূমিঞ্চ ধান্যঞ্চ যো দদাত্যাদদাতি চ। সর্ব্বপাপবিনির্ম্মুক্তৌ চোভৌ বৈকুণ্ঠবাসিনৌ॥ ভূমিং দাতুঞ্চ যৎকালে যঃ সাধুশ্চানুমোদতে। স চ যাতি চ বৈকুণ্ঠং মিত্রগোত্রসমন্বিতঃ॥ স্বদত্তাং পরদত্তাং বা ব্রহ্মবৃত্তিং হরেত্তু যঃ। স তিষ্ঠতি কালসূত্রে যাবচ্চন্দ্রদিবাকরৌ॥ তৎপুত্রপৌত্রপ্রভৃতির্ভূমিহীনঃ শ্রিয়া হতঃ। পুত্রহীনো দরিদ্রশ্চৈবান্তে যাতি চ রৌরবং॥

গবাং মার্গং বিনিষ্কৃষ্য যশ্চ শস্যং দদাতি চ। দিব্যং বর্ষশতঞ্চৈব কুম্ভীপাকেষু তিষ্ঠতি ॥ গোষ্ঠং তড়াগং নিষ্কৃষ্য মার্গং শস্যং দদাতি চ। স চ তিষ্ঠত্যসিপত্রে যাবদিন্দ্রাশ্চতুর্দ্দশ ॥ ন পঞ্চপিণ্ডমুদ্ধৃত্য পরকূপে চ স্নাতি যঃ। প্রাপ্নোতি নরকং নৈব স্নানজং ফলমেব চ ॥ কামী ভূমৌ চ রহসি বীর্য্যত্যাগং করোতি যঃ। স্নিগ্ধরেণুপ্রমাণঞ্চ বর্ষং তিষ্ঠতি রৌরবে ॥ অম্বুবাচ্যাং ভূখননং যঃ করোতি চ মানবঃ। স যাতি কৃমিদংশঞ্চ স্থিতিস্তত্র চতুর্যুগং ॥ পরকীয়লুপ্তকূপে কূপং মূঢ়ঃ প্রযচ্ছতি। পুষ্করিণ্যাঞ্চ লুপ্তায়াং পুষ্করিণীং যো দদাতি চ ॥ সর্ব্বং ফলং পরস্যৈব তপ্তমূর্ম্মিং ব্রজেত্তু সঃ। তত্র তিষ্ঠতি সন্তপ্তো যাবদিন্দ্রাশ্চতুর্দ্দশ ॥ পরকীয়তড়াগে চ পঙ্কমুৎসৃজ্য নোৎসৃজেৎ। রেণুপ্রমাণবর্ষঞ্চ ব্রহ্মলোকে বসেন্নরঃ ॥ পিণ্ডং পিত্রে ভূমিভর্ত্তুর্ন প্রদায় চ মানবঃ। শ্রাদ্ধং করোতি যো মূঢ়ো নরকং যাতি নিশ্চিতং ॥ * ॥ ভূমৌ দীপং যোঽর্পয়তি স চান্ধঃ সপ্তজন্মনি। ভূমৌ শঙ্খঞ্চ সংস্থাপ্য কুষ্ঠং জন্মান্তরে লভেৎ ॥ মুক্তামাণিক্যহীরঞ্চ সুবর্ণঞ্চ মণিস্তথা। যশ্চ সংস্থাপয়েদ্ভূমৌ স তিষ্ঠেন্নরকে যুগং ॥ জপমালাং পুষ্পমালাং কর্পূরং রোচনাস্তথা। যো মূঢ়শ্চার্পয়েদ্ভূমৌ স যাতি নরকং ধ্রুবং ॥ মুনে চন্দনকাষ্ঠঞ্চ রুদ্রাক্ষং কুশমূলকং। সংস্থাপ্য ভূমৌ নরকে বসেন্মন্বন্তরাবধি ॥ পুস্তকং যজ্ঞসূত্রঞ্চ ভূমৌ সংস্থাপয়েত্তু যঃ। ন ভবেদ্বিপ্রযোনৌ চ তস্য জন্মান্তরে জনিঃ ॥ ব্রহ্মহত্যাসমং পাপমমুত্র চ লভেদ্ধ্রুবং। গ্রন্থিযুক্তং যজ্ঞসূত্রং পূজ্যঞ্চ সর্ব্ববর্ণকৈঃ ॥ যজ্ঞং কৃত্বা চ যো ভূমিং ক্ষীরেণ নহি সিঞ্চতি। স যাতি তপ্তমূর্ম্মিঞ্চ সন্তপ্তঃ সপ্তজন্মসু ॥ ভূকম্পে গ্রহণে যো হি করোতি খননং ভুবঃ। জন্মান্তরে মহাপাপী সোঽঙ্গহীনো ভবেদ্ধ্রুবং ॥ * ॥ ভবনং যত্র সর্ব্বেষাং ভূর্ভূমিস্তেন কীর্ত্তিতা। বসুরত্নং যা দধাতি বসুধা সা বসুন্ধরা। হরেরূরৌ চ যা জাতা সা চোর্ব্বী পরিকীর্ত্তিতা ॥ ধরা ধরিত্রী ধরণী সর্ব্বেষাং ধারণাত্তু যা। ইজ্যা চ যাগাধারাচ্চ ক্ষৌণী ক্ষীণালয়ে চ যা। মহালয়ে ক্ষয়ং যাতি ক্ষিতিস্তেন প্রকীর্ত্তিতা ॥ কাশ্যপী কশ্যপস্যেয়মচলা স্থিররূপতঃ। বিশ্বম্ভরা তদ্ধরণাচ্চানন্তানন্তরূপতঃ ॥ পৃথিবী পৃথুকন্যাত্বাদ্বিস্তৃতত্বান্মহামুনে। ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে পৃথিব্যুপাখ্যানং ৭ অধ্যায়ঃ ॥ * ॥ তস্যা ভারা যথা। ক্ষিতিরুবাচ। কৃষ্ণভক্তিবিহীনা যে যে চ তদ্ভক্তনিন্দকাঃ। তেষাং মহাপাতকিনামশক্তা ভারবাহনে ॥ স্বধর্ম্মাচারহীনা যে নিত্যকৃত্যবিবর্জিতাঃ। শ্রদ্ধাহীনাশ্চ বেদেষু তেষাং ভারেণ পীড়িতা ॥ পিতৃমাতৃগুরুস্ত্রীণাং পোষণং পুত্ত্রপোষ্যয়োঃ। যে ন কুর্ব্বন্তি তেষাঞ্চ ন শক্তা ভারবাহনে ॥ যে মিথ্যাবাদিনস্তাত দয়াসত্যবিহীনকাঃ। নিন্দকা গুরুদারাণাং তেষাং ভারেণ পীড়িতা ॥ মিত্রদ্রোহী

কৃতঘ্নশ্চ মিথ্যাসাক্ষিপ্রদায়কঃ। বিশ্বাসঘ্নঃ স্থাপ্যহারী তেষাং ভারেণ পীড়িতা॥ কল্যাণযুক্তনামানি হরের্নামৈকমঙ্গলং। কুর্ব্বন্তি বিক্রয়ং যে বৈ তেষাং ভারেণ পীড়িতা॥ জীবঘাতী গুরুদ্রোহী গ্রামযাজী চ লুব্ধকঃ। শবদাহী শূদ্রভোজী তেষাং ভারেণ পীড়িতা॥ পূজাযজ্ঞোপবাসানি ব্রতানি নিয়মানি চ। যে যে মূঢ়া বিহন্তারস্তেষাং ভারেণ পীড়িতা॥ সদা দ্বিষন্তি যে পাপা গোবিপ্রসুরবৈষ্ণবান্। হরিং হরিকথাং ভক্তিং তেষাং ভারেণ পীড়িতা॥ শঙ্খাদীনাঞ্চ ভারেণ পীড়িতাহং যথা বিধে। ততোঽধিকেন দৈত্যানাং তেষাং ভারেণ পীড়িতা॥ ইত্যেবমুক্ত্বা বসুধা রুরোদ চ মুহুর্ম্মুহুঃ। ব্রহ্মা তদ্‌রোদনং দৃষ্ট্বা তামুবাচ কৃপানিধিঃ॥ ভারং তবাপনেষ্যামি দস্যূনামপ্যুপায়তঃ। উপায়তোঽপি কার্য্যাণি সিধ্যন্ত্যেব বসুন্ধরে॥*॥ মন্ত্রং মঙ্গলকুম্ভঞ্চ শিবলিঙ্গঞ্চ কুঙ্কুমং। মধুকাষ্ঠং চন্দনঞ্চ কস্তূরীং তীর্থমৃত্তিকাং॥ খড়্গং গণ্ডকখড়্গঞ্চ স্ফটিকং পদ্মরাগক। ইন্দ্রনীলং সূর্য্যমণিং রুদ্রাক্ষং কুশমূলকং॥ শালগ্রামশিলাশঙ্খতুলসীপ্রতিমাজলং। শঙ্খপ্রদীপমালাঞ্চ শিলার্চ্চাতুলসীং তথা॥ নির্ম্মাল্যঞ্চৈব নৈবেদ্যং হরির্দ্বর্ণমণিস্তথা। গ্রন্থিযুক্তং যজ্ঞসূত্রং দর্পণং শ্বেতচামরং॥ গোরোচনাঞ্চ মুক্তাঞ্চ শুক্তিং মাণিক্যমেব চ। পুরাণসংহিতাং বহ্নিং কর্পূরং পরশং তথা॥ রজতং কাঞ্চনঞ্চৈব প্রবালং রত্নমেব চ। কুশদ্বিজং তীর্থতোয়ং গব্যং গোমূত্রগোময়ং॥ ত্বয়ি যে স্থাপয়িষ্যন্তি মূঢ়াশ্চৈতানি সুন্দরি। পচ্যন্তে কালসূত্রে চ বর্ষাণামযুতং ধ্রুবং॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ৪ অধ্যায়ঃ ॥*॥ তস্যা রূপান্তরং যথা। ইতি তস্য বচঃ শ্রুত্বা জনকস্য তদা ক্ষিতিঃ। মুনীনাং সন্নিধৌ রূপং দর্শয়ামাস ভূভৃতে॥ নীলোৎপলদলশ্যামামক্ষমালাব্জধারিণীং। বাহুযুগ্মেন শুভ্রেণ মৃণালায়তশোভিনা। সুন্দরীং লোকধাত্রীং তাং দৃষ্ট্বা শশ্বন্নৃপোহলয়ৎ॥ ইতি কালিকাপুরাণে ৩৬ অধ্যায়ঃ॥*॥ পৃথিব্যাং গ্রামশস্যাদ্যুৎপত্তিকারণং যথা। প্রজা ঊচুঃ। অরাজকে নৃপশ্রেষ্ঠ ধরিত্র্যা সকলৌষধীঃ। গ্রস্তাস্ততঃ ক্ষয়ং যান্তি প্রজাঃ সর্ব্বাঃ প্রজেশ্বর॥ ত্বং নো বৃত্তিপ্রদো ধাত্রা প্রজাপালো নিরূপিতঃ। দেহি নঃ ক্ষুৎপরীতানাং প্রজানাং জীবনৌষধীঃ॥ শ্রীপরাশর উবাচ। ততোঽথ নৃপতির্দিব্যমাদায়াজগবন্ধনুঃ। শরাংশ্চ দিব্যান্ কুপিতঃ সোঽভ্যধাবদ্বসুন্ধরাং॥ ততো ননাশ ত্বরিতা গৌর্ভূত্বা তু বসুন্ধরা। সা লোকান্ ব্রহ্মলোকাদীংস্তত্ত্রাসাদগমন্মহী। যত্র যত্র যযৌ দেবী সা তদা ভূতধারিণী। তত্র তত্র তু সা বৈণ্যং দদর্শাভ্যুদ্যতায়ুধং॥ ততস্তং প্রাহ বসুধা পৃথুং পৃথুপরাক্রমং। প্রবেপমানা তদ্বাণপরিত্রাণপরায়ণা॥ পৃথিব্যুবাচ। স্ত্রীবধে ত্বং মহাপাপং কিং নরেন্দ্র ন পশ্যসি। যেন মাং হন্তুমত্যর্থং প্রকরোষি নৃপোদ্যমং॥ শ্রীপৃথুরুবাচ।

একস্মিন্ যত্র নিধনং প্রাপিতে দুষ্টকারিণি। বহূনাং ভবতি ক্ষেমস্তস্য পুণ্যপ্রদো বধঃ ॥ পৃথিব্যুবাচ। প্রজানামুপকারায় যদি মাং ত্বং হনিষ্যসি। আধারঃ কঃ প্রজানান্তে নৃপশ্রেষ্ঠ ভবিষ্যতি॥ পৃথুরুবাচ। ত্বাং হত্বা বসুধে বাণৈর্মচ্ছাসনপরাঙ্মুখীং। আত্ম-যোগবলেনেমা ধারয়িষ্যাম্যহং প্রজাঃ॥ শ্রীপরাশর উবাচ। ততঃ প্রণম্য বসুধা তং ভূয়ঃ প্রাহ পার্থিবং। প্রবেপিতাঙ্গী পরমং সাধ্বসং সমুপাগতা॥ উপায়তঃ সমারব্ধাঃ সর্ব্বে সিধ্যন্ত্যুপক্রমাঃ। তস্মাদ্বদাম্যুপায়ন্তে ত্বং কুরুষ্ব যদীচ্ছসি॥ সমস্তাস্তা ময়া জীর্ণা নরনাথ মহৌষধীঃ। যদীচ্ছসি প্রদাস্যামি তাঃ ক্ষীরপরিণামিনীঃ॥ তস্মাৎ প্রজা-হিতার্থায় মম ধর্ম্মভৃতাং বর। তন্তু বৎসং প্রযচ্ছস্ব ক্ষরেয়ং যেন বৎসলা॥ সমাঞ্চ কুরু সর্ব্বত্র যেন ক্ষীরং সমন্ততঃ। বরৌ-ষধীবীজভূতং বীর সর্ব্বত্র ভাবয়ে॥ শ্রীপরাশর উবাচ। তত উৎসারয়ামাস শৈলান্ শতসহস্রশঃ। ধনুষ্কোট্যা তদা বৈণ্যস্তেন শৈলা বিবর্দ্ধিতাঃ॥ *॥ নহি পূর্ব্ববিসর্গে বৈ বিষমে পৃথিবীতলে। প্রবি-ভাগঃ পুরাণাং বা গ্রামাণাং বা পুরা-ভবৎ॥ ন শস্যানি ন গোরক্ষ্যং ন কৃষির্ন বণিক্পথঃ। বৈণ্যাৎ প্রভৃতি মৈত্রেয় সর্ব্বস্যৈতস্য সম্ভবঃ॥ যত্র যত্র সমং ত্বস্যা ভূমেরাসীদ্দ্বিজোত্তম। তত্র তত্র প্রজানাং হি নিবাসং সমরোচয়ৎ॥ আহারঃ ফলমূলানি প্রজানামভবত্তদা। কৃচ্ছ্রেণ মহতা সোঽপি প্রনষ্টাস্বোষধীষু বৈ॥ স কল্পয়িত্বা বৎসন্তু মনুং স্বায়ম্ভুবং প্রভুং। স্বে পাণৌ পৃথিবীনাথো দুদোহ পৃথিবীং পৃথুঃ॥ শস্যজাতানি সর্ব্বাণি প্রজানাং হিতকাম্যয়া। তেনা-ন্নেন প্রজাস্তাত বর্ত্তন্তেঽদ্যাপি নিত্যশঃ॥ প্রাণপ্রদানাৎ স পৃথুর্যস্মাদ্ভূমেরভূৎ পিতা। ততস্তু পৃথিবীসংজ্ঞামবাপাখিলধারিণী॥ ততশ্চ দেবৈর্মুনিভির্দ্দৈত্যৈ রক্ষোভি-রদ্রিভিঃ। গন্ধর্ব্বৈরুরগৈর্যক্ষৈঃ পিতৃভি-স্তরুভিস্তথা॥ তত্তৎপাত্রমুপাদায় তত্র দুগ্ধা মুনে পয়ঃ। বৎস দোগ্ধৃবিশে-ষাচ্চ তেষাং তদ্যোনয়োঽভবন্॥ সৈষা ধাত্রী বিধাত্রী চ ধারণী পোষণী তথা। সর্ব্বস্য জগতঃ পৃথ্বী বিষ্ণুপাদতলোদ্ভবা॥ এবংপ্রভাবঃ স পৃথুঃ পুত্রো বেণস্য বীর্য্য-বান্। জজ্ঞে মহীপতিঃ পূর্ব্বো রাজা-ভূজ্জনরঞ্জনাৎ॥ ইতি শ্রীবিষ্ণুপুরাণে ১ অংশে পৃথুচরিতং ১৩ অধ্যায়ঃ॥ *॥ তস্যা নামগোরূপদোহনানাং কারণানি যথা। ঋষয় ঊচুঃ। বহুভির্ধরণী ভুক্তা ভূপালৈঃ শ্রূয়তে পুরা। পার্থিবাঃ পৃথিবী-যোগাৎ পৃথিবী কস্য যোগতঃ॥ কিমর্থঞ্চ কৃতা সংজ্ঞা ভূমিঃ কিং পারিভাষিকী। গৌরিতীয়ঞ্চ বিখ্যাতা সূত কস্মাদ্‌ব্রবীহি নঃ॥ সূত উবাচ। বংশে স্বায়ম্ভুবে হ্যাসী-দঙ্গো নাম প্রজাপতিঃ। মৃত্যোস্তু দুহিতা তেন পরিণীতাতিদুর্মুখী॥ সুতীর্থা নাম তস্যাস্তু বেণো নাম সুতঃ পুরা। অধর্ম্ম-নিরতঃ কামী বলবান্ বসুধাধিপঃ॥ লোকে-ঽপ্যধর্ম্মকৃজ্জাতঃ পরভার্য্যাপহারকঃ।

ধর্ম্মাচারপ্রসিদ্ধ্যর্থং জগতোঽস্য মহর্ষিভিঃ॥ অনুনীতোঽপি ন দদাবনুজ্ঞাং স যদা ততঃ। শাপেন মারয়িত্বৈনমরাজকভয়ার্দ্দিতাঃ। মমন্থুর্ব্রাহ্মণাস্তস্য বলাদ্দেহমকল্মষাঃ॥ তৎকায়ান্মথ্যমানাত্তু নিপ্পেতুর্ম্লেচ্ছজাতয়ঃ॥ শরীরে মাতুরংশেন কৃষ্ণাঞ্জনসমপ্রভাঃ। পিতুরঙ্গস্য চাংশেন ধার্ম্মিকো ধর্ম্মচারিণঃ॥ উৎপন্নো দক্ষিণাদ্ধস্তাৎ সধনুঃ সশরো গদী। দিব্যতেজোময়বপুঃ সরত্নকবচাঙ্গদঃ॥ পৃথুরেবাভবদ্যস্মাত্ততঃ পৃথুরজায়ত। স বিপ্রৈরভিষিক্তশ্চ তপঃ কৃত্বা সুদুশ্চরং॥ বিষ্ণোর্ব্বরেণ সর্ব্বস্য প্রভুত্বমগমৎ প্রভুঃ। নিঃস্বাধ্যায়বষট্কারং নির্ধনং বীক্ষ্য ভূতলং॥ দগ্ধুমেবোদ্যতঃ কোপাচ্ছরেণামিতবিক্রমঃ।*। ততো গোরূপমাস্থায় ভূঃ পলায়িতুমুৎসহেৎ॥ পৃষ্ঠতোঽনুগতস্তস্যাঃ পৃথুর্দীপ্তশরাসনঃ। ততঃ স্থিত্বৈকদেশে তু কিং করোমীতি সাব্রবীৎ॥ পৃথুরপ্যবদদ্বাক্যমীপ্সিতং দেহি সুব্রতে। সর্ব্বস্য জগতঃ শীঘ্রং স্থাবরস্য চরস্য চ॥*॥ তথৈব চাব্রবীদ্ভূমির্দুদোহ চ নরাধিপঃ। স্বে স্বে পাণৌ পৃথুর্ব্বৎসং কৃত্বা স্বায়ম্ভুবং মনুং॥ তদন্নমভবৎ শুদ্ধং প্রজা জীবন্তি তেন বৈ। ততস্তু ঋষিভির্দুগ্ধা বৎসঃ সোমস্তদাভবৎ॥ দোগ্ধা বৃহস্পতিরভূৎ পাত্রং বেদস্তপো রসঃ। দেবৈশ্চ বসুধা দুগ্ধা দোগ্ধা মিত্রস্তদাভবৎ॥ ইন্দ্রো বৎসঃ সমভবৎ ক্ষীরমূর্জ্জস্করং বলং। দেবানাং কাঞ্চনং পাত্রং পিতৃণাং রাজতস্তদা॥ অন্তকশ্চাভবদ্দোগ্ধা যমো বৎসঃ সুধারসঃ। অলাবুপাত্রং নাগানাং তক্ষকো বৎসকোঽভবৎ॥ বিষং ক্ষীরং ততো দোগ্ধা ধৃতরাষ্ট্রোঽভবৎ পুনঃ। অসুরৈরপি দুগ্ধেয়মায়সে শক্রপীড়নীং॥ পাত্রে মায়ামভূদ্বৎসঃ প্রহ্লাদিশ্চ বিরোচনঃ। দোগ্ধা দ্বিমূর্দ্ধা তত্রাসীন্মায়া যেন প্রবর্ত্তিতাঃ॥ যক্ষৈশ্চ বসুধা দুগ্ধা পুরান্তর্দ্ধানমীপ্সুভিঃ। কৃত্বা বৈশ্রবণং বৎসমামপাত্রে মহীপতে॥ প্রেতরক্ষোগণৈর্দুগ্ধা ধরা রুচিরমুল্বণং। রৌপ্যলাভোঽভবদ্দোগ্ধা সুমালী বৎস এব তু॥ গন্ধর্ব্বৈশ্চ পুনর্দুগ্ধা বসুধা চাপ্সরোগণৈঃ। বৎসং চৈত্ররথং কৃত্বা গন্ধান্ পদ্মদলে তথা॥ দোগ্ধা চ সুরুচির্নাম নাট্যবেদস্য পারগঃ। গিরিভির্ব্বসুধা দুগ্ধা রত্নানি বিবিধানি চ॥ ঔষধানি চ দিব্যানি দোগ্ধা মেরুর্মহাবলঃ। বৎসোঽভূদ্ধিমবাংস্তত্র পাত্রী শৈলময়ী পুনঃ॥ বৃক্ষৈশ্চ বসুধা দুগ্ধা ক্ষীরং ছিন্নপ্ররোহণং। পালাশপাত্রে দোগ্ধা তু সালঃ পুষ্পদলাকুলঃ॥ প্লক্ষোঽভবত্ততো বৎসঃ সর্ব্ব বৃক্ষগণাধিপঃ। এবমন্যৈশ্চ বসুধা তথা দুগ্ধা যথেপ্সিতং॥ ইতি মৎস্যপুরাণে ১০ অধ্যায়ঃ॥ *॥ অন্যদ্বিবরণং ভূগোলশব্দে দ্রষ্টব্যং॥ পৃথ্বী। তদ্বৈদিকপর্য্যায়াঃ। গৌঃ ১ গ্মা ২ জ্মা ৩ ক্ষ্মা ৪ ক্ষা ৫ ক্ষামা ৬ ক্ষোণী ৭ ক্ষিতিঃ ৮ অবনিঃ ৯ উর্ব্বী ১০ ১১ মহী ১২ রিপঃ ১৩ অদিতিঃ ১৪ ইলা ১৫ নির্ঋতিঃ ১৬ ভূঃ ১৭ ভূমিঃ ১৮ পূষা ১৯ গাতুঃ ২০ গোত্রা ২১। ইত্যেক-

বিংশতিপৃথিবীনামধেয়ানি। ইতি বেদনিঘণ্টৌ ১ অধ্যায়ঃ॥

পৃথিবীগীতা (স্ত্রী) পৃথিবীকথা। যথা। মৈত্রেয় পৃথিবীগীতাঃ শ্লোকাশ্চাত্র নিবোধ তান্। যানাহ ধর্ম্মধ্বনিনে জনকায়াসিতো মুনিঃ॥ শ্রীপৃথিব্যুবাচ। কথমেষ নরেন্দ্রাণাং মোহো বুদ্ধিমতামপি। যেন কেন সধর্ম্মাণোঽপ্যতিবিশ্বস্তচেতসঃ॥ পূর্ব্বমাত্মজয়ং কৃত্বা জেতুমিচ্ছন্তি মন্ত্রিণঃ। ততো ভৃত্যাংশ্চ পৌরাংশ্চ জিগীষন্তে তথা রিপূন্॥ ক্রমেণানেন জেষ্যামো বয়ং পৃথ্বীং সসাগরাং। ইত্যাসক্তধিয়ো মৃত্যুং ন পশ্যন্ত্যবিদূরগং॥ সমুদ্রাবরণং যাতি মন্মণ্ডলমথো বশং। কিয়দাত্মজয়াদেতন্মুক্তিরাত্মজয়ে ফলং॥ উৎসৃজ্য পূর্ব্বে যাং যাতা যাং নাদায় গতঃ পিতা। তাং মামতিবিমূঢ়ত্বাজ্জেতুমিচ্ছন্তি পার্থিবাঃ॥ মৎকৃতে পিতৃপুত্রাণাং ভ্রাতৃণাঞ্চাপি বিগ্রহাঃ। জায়ন্তেঽত্যন্তমোহেন মমত্বাদৃতচেতসাং॥ পৃথ্বী মমেয়ং সকলা মমেয়ং মমেতি চৈষা মম শাশ্বতেয়ং। যো যো মৃতেঽন্যত্র বভূব রাজা কুবুদ্ধিরাসীদিতি তস্য তস্য॥ দৃষ্ট্বা মমত্বাদৃতচিত্তমেকং বিহায় মাং মৃত্যুপথং ব্রজন্তং। তস্যান্বয়স্তত্র কথং মমত্বং হৃদ্যাস্পদং মৎপ্রভবং করোতি॥ পৃথ্বী মমৈষাশু পরিত্যজৈনাং বদন্তি যে দূতমুখৈঃ সশত্রূন্। নরাধিপাস্তেষু মমাতিহাসঃ পুনশ্চ মূঢ়েষু দয়াভ্যুপৈতি॥ শ্রীপরাশর উবাচ। ইত্যেতে ধরণীগীতাঃ শ্লোকা মৈত্রেয় যৈঃ শ্রুতাঃ। মমত্বং বিলয়ং যাতি তাপন্যস্তং যথা হিমং॥ ইতি বিষ্ণুপুরাণে ৪ অংশে ২৪ অধ্যায়ঃ॥

পৃথিবীপতিঃ (পুং) রাজা। ঋষভনামৌষধিঃ। ইতি মেদিনী॥ যমঃ। ইতি হেমচন্দ্রঃ॥

পৃথিবীপালঃ (পুং) রাজা। যথা। বুভুজে পৃথিবীপালঃ পৃথিবীমেব কেবলাং। ইতি রঘুঃ॥

পৃথিবীশক্রঃ (পুং) রাজা। ইতি হেমচন্দ্রঃ॥

পৃথুঃ (পুং) ত্রেতাযুগে সূর্য্যবংশীয়পঞ্চমনৃপঃ। বেণনৃপস্য দক্ষিণকরমথনাজ্জাতঃ। প্রজারঞ্জনাৎ আদ্যে রাজোপাধিং প্রাপ্তঃ। যথা। অথ তে ঋষয়ঃ সর্ব্বে প্রসন্নমনসস্ততঃ। গতকল্মষমেবং তং জাতং বেণং নৃপোত্তমং॥ মমন্থুর্দক্ষিণং পাণিং তস্যৈব চ মহাত্মনঃ। মথিতে তস্য পাণৌ চ সংজাতং স্বেদমেব হি॥ পুনর্মমন্থুস্তে বিপ্রা দক্ষিণং পাণিমেব চ। স্বকরাৎ পুরুষো জজ্ঞে দ্বাদশাদিত্যসন্নিভঃ॥ তপ্তকাঞ্চনবর্ণাঙ্গো দিব্যমাল্যাম্বরাবৃতঃ। দিব্যাভরণশোভাঙ্গো দিব্যগন্ধানুলেপনঃ॥ মুকুটেন সুবর্ণেন কুণ্ডলাভ্যাং বিরাজতে॥ মহাকায়ো মহাবাহূ রূপেণাপ্রতিমো ভুবি। খড়্গবাণধরো ধন্বী কবচী চ মহাপ্রভঃ॥ সর্ব্বলক্ষণসম্পন্নঃ সর্ব্বালঙ্কারভূষিতঃ। তেজসা রূপভাবেন সাক্ষাদগ্নিরিব জ্বলন্॥ আদ্যমাজগবং নাম ধনুর্গৃহ্য মহাবরং। ইন্দ্রো দিবি যথা ভাতি ভুবি বেণাত্মজস্তথা॥ তস্মিন্ জাতে মহাভাগে দেবাশ্চ ঋষয়োঽমলাঃ। উৎসবং চক্রিরে সর্ব্বে

বেণস্য তনয়ং প্রতি ॥ দীপ্যমানঃ স্ববপুষা বর্ণৈরেব মহামতিঃ। শরাংশ্চ দিব্যা-ন্রক্ষার্থং কবচঞ্চ মহাপ্রভং ॥ দদাবিন্দ্রঃ সহস্রাক্ষো মালাঞ্চাম্লানপুষ্পিকাং। জাতে তস্মিন্মহাভাগে পৃথৌ বীরে মহাত্মনি ॥ সংপ্রহৃষ্টানি ভূতানি সমস্তানি দ্বিজো-ত্তমাঃ। সর্ব্বতীর্থানি তোয়ানি পুণ্যানি বিবিধানি চ ॥ স্থাবরাণি চরাণ্যেব অভ্য-ষিঞ্চন্নরাধিপং। মহাবীরং প্রজাপালং পৃথুমেবং দ্বিজোত্তমাঃ ॥ পৃথুং বৈণ্যং বড্রাজ্যে অভিষিক্তং চরাচরৈঃ। দেবৈ-র্বিপ্রৈস্তথা সর্ব্বৈরভিষিক্তো মহামনাঃ ॥ রাজ্যাঞ্চৈবাধিকারে বৈ পৃথুর্বৈণ্যঃ প্রতাপ-বান্। তদা পিত্রা প্রজাঃ সর্ব্বাঃ কদা নৈবানুরঞ্জিতাঃ ॥ * ॥ তেনানুরঞ্জিতাঃ সর্ব্বাঃ সুখৈর্মুমুদিরে তদা। অনুরাগাত্তু বীরস্য নাম রাজেত্যভাষত ॥ প্রযাতস্য সুধীরস্য সমুদ্রস্য দ্বিজোত্তমাঃ। আপস্তস্ত-স্তিরে সর্ব্বা ভয়াত্তস্য মহাত্মনঃ ॥ প্রযা-তস্য রথস্যাপি তস্যৈব চ মহাত্মনঃ। দুর্গ-মার্গং বিলোক্যৈব স্বমার্গং পর্ব্বতা দদুঃ ॥ ধ্বজভঙ্গং ন চক্রুস্তে গিরয়ঃ সর্ব্ব এব তে। অকৃষ্টপচ্যা পৃথিবী সর্ব্বত্র কাম-ধেনবঃ ॥ পর্জন্যঃ কামবর্ষী চ বেদযজ্ঞান্ মহোৎসবান্। কুর্ব্বন্তি ব্রাহ্মণাঃ সর্ব্বে ক্ষত্রিয়াশ্চ তথাপরে ॥ সর্ব্বকামফলা বৃক্ষা-স্তস্মিন্ শাসতি রাজনি। ন দুর্ভিক্ষং ন চ ব্যাধির্নাকালমরণং নৃণাং ॥ সর্ব্বে সুখেন জীবন্তি লোকা ধর্ম্মপরায়ণাঃ। তস্মিন্ শাসতি দুর্দ্ধর্ষে রাজরাজে মহাত্মনি ॥ ইতি পাদ্মোত্তরখণ্ডে ২৯ অধ্যায়ঃ ॥ * ॥ তস্য মাহাত্ম্যং যথা। পৃথুনা প্রবিভক্তা চ শোভিতা চ বসুন্ধরা। শস্যরত্নবতী স্ফাতা পুরপত্তনশালিনী ॥ এবংপ্রভাবো বৈণ্যশ্চ রাজাসীদ্রাজসত্তমঃ। নমস্যশ্চৈব পূজ্যশ্চ ভূতিকামৈর্নরোত্তমৈঃ ॥ ব্রাহ্মণৈ-র্ব্বেদকামৈশ্চ পৃথুর্বৈণ্যঃ প্রতাপবান্। আদিকর্ত্তা রণানাঞ্চ যোধানাং প্রথমো নৃপঃ ॥ যো হি যোদ্ধা রণং যাতি কীর্ত্ত-য়িত্বা পৃথুং নৃপং। ঘোররূপান্ স সংগ্রা-মান্ ক্ষেমী তরতি কীর্ত্তিমান্ ॥ বৈশ্যৈ-রপি হি শূদ্রৈশ্চ স্বাঃ স্বা বৃত্তীরনুশ্রিতৈঃ। পৃথুরেব নমস্কার্য্যঃ সর্ব্বসিদ্ধিকরস্তু সঃ ॥ এবং পৃথুরভূৎ পূর্ব্বং প্রসাদাচ্চক্রপাণিনঃ। সার্ব্বভৌমো মহাতেজা দুর্ব্বিসহ্যঃ সুরা-সুরৈঃ ॥ * ॥ তস্য পুত্রৌ যথা। পৃথোঃ পুত্রৌ তু ধর্ম্মজ্ঞৌ জজ্ঞাতেঽন্তর্দ্ধিপাণিনৌ। শিখণ্ডী চ হবির্দ্ধানমন্তর্দ্ধানাদ্ব্যজায়ত ॥ * ॥ অরেণাভূরাজ্ঞঃ পুত্রঃ। যথা। অযোধ-স্তস্য পুত্রোঽভূৎ ককুৎস্থো নাম বীর্য্য-বান্। ককুৎস্থস্য অরেণাভূস্তস্য পুত্রঃ পৃথুঃ স্মৃতঃ ॥ ইত্যগ্নিপুরাণং ॥ * ॥ অগ্নিঃ। ইতি মেদিনী ॥

পৃথুঃ (স্ত্রী) কৃষ্ণজীরকঃ। ইত্যমরঃ ॥ ত্বক্-পর্ণী। হিঙ্গুপত্রী। ইতি মেদিনী ॥ অহি-ফেনঃ। ইতি শব্দরত্নাবলী ॥

পৃথুঃ (ত্রি) মহৎ। ইত্যমরঃ ॥ নিপুণঃ। ইতি শব্দরত্নাবলী ॥

পৃথুকঃ (পুং) চিপিটকঃ। ইত্যমরঃ ॥ ক্লীব-লিঙ্গোঽপ্যয়ং। যথা। দ্বিঃস্বিন্নমন্নং পৃথুকং

শুদ্ধং দেশবিশেষকে। নাত্যন্তশস্তং বিপ্রাণাং ভক্ষণে চ নিবেদনে॥ অভক্ষ্যঞ্চ যতীনাঞ্চ বিধবাব্রহ্মচারিণাং। ইতি ব্রহ্মবৈবর্ত্তে ব্রহ্মখণ্ডে ২৭ অধ্যায়ঃ॥

পৃথুকঃ (ত্রি) বালকঃ। ইতি মেদিনী॥

পৃথুকা (স্ত্রী) হিঙ্গুপত্রী। ইতি শব্দচন্দ্রিকা॥ বালিকা চ॥

পৃথুকোলঃ (পুং) রাজবদরঃ। ইতি রাজনির্ঘণ্টঃ॥

পৃথুচ্ছদঃ (পুং) হরিদর্ভঃ। ইতি রাজনির্ঘণ্টঃ॥ বৃহৎপত্রে ত্রি॥

পৃথুপত্রঃ (পুং) রক্তলশুনঃ। ইতি রাজনির্ঘণ্টঃ॥

পৃথুপলাশিকা (স্ত্রী) শটী। ইতি রাজনির্ঘণ্টঃ॥

পৃথুরোমা [ন্] (পুং) মৎস্যঃ। ইত্যমরঃ॥ বৃহল্লোমযুক্তে ত্রি॥

পৃথুলং (ত্রি) মহৎ। ইত্যমরঃ॥

পৃথুলা (স্ত্রী) হিঙ্গুপত্রী। ইতি জটাধরঃ॥

পৃথুশেখরঃ (পুং) পর্ব্বতঃ। ইতি ত্রিকাণ্ডশেষঃ॥

পৃথুশিম্বঃ (পুং) শ্যোনাকপ্রভেদঃ। ইতি রাজনির্ঘণ্টঃ॥

পৃথুস্কন্ধঃ (পুং) শূকরঃ। ইতি রাজনির্ঘণ্টঃ॥

পৃথূদকং (ক্লী) তীর্থভেদঃ। যথা। তে শ্রুত্বা ঋষয়ঃ সর্ব্বে তীর্থমাহাত্ম্যমুত্তমং। কপালমোচনমিতি নাম চক্রুঃ সমাগতাঃ॥ তত্রাপি সুমহত্তীর্থং বিশ্বামিত্রস্য বিশ্রুতং। ব্রাহ্মণ্যং লব্ধবান্ যত্র বিশ্বামিত্রো মহামুনিঃ॥ তস্মিংস্তীর্থবরে স্নাত্বা ব্রাহ্মণ্যং লভতে ধ্রুবং। ব্রাহ্মণস্তু বিশুদ্ধাত্মা পরং পদমবাপ্নুয়াৎ॥ ততঃ পৃথূদকং গচ্ছেন্নিয়তো নিয়তাশনঃ। তত্র সিদ্ধস্তু ব্রহ্মর্ষী রুষদ্গুর্নাম নামতঃ॥ জাতিস্মরো রুষদ্গুস্তু গঙ্গাদ্বারে তদা স্থিতঃ। অন্তকালং ততো দৃষ্ট্বা পুত্রান্ বচনমব্রবীৎ॥ ইহ শ্রেয়ো ন পশ্যামি নয়ধ্বং মাং পৃথূদকং। বিজ্ঞায় তস্য তদ্ভাবং রুষদ্গোস্তে তপোধনাঃ॥ তং বৈ তীর্থমুপানিন্যুঃ সরস্বত্যাস্তপোধনং। স তৈঃ পুত্রৈঃ সমানীতঃ সরস্বত্যাং সমাপ্লুতঃ॥ স্মৃত্বা তীর্থগুণান্ সর্ব্বান্ প্রাহেদমৃষিসত্তমঃ। সরস্বত্যাস্তু তীরে যঃ সংত্যজেদাত্মনস্তনুং॥ পৃথূদকে জপ্যপরো নৈনং শ্বো মরণং লভেৎ। তত্রৈব ব্রহ্মযোন্যস্তি ব্রহ্মণা যত্র নির্ম্মিতা পৃথূদকং সমাশ্রিত্য সরস্বত্যাস্তটে স্থিতঃ। চতুর্ব্বর্ণস্য সৃষ্ট্যর্থং আত্মজ্ঞানপরোঽভবৎ॥ তস্যাভিধ্যায়তঃ সৃষ্টিং ব্রহ্মণোঽব্যক্তজন্মনঃ। মুখতো ব্রাহ্মণা জাতা বাহুভ্যাং ক্ষত্রিয়াস্তথা॥ ঊরুভ্যাং বৈশ্যজাতীয়াঃ পদ্ভ্যাং শূদ্রাস্ততোঽভবন্। চাতুর্ব্বর্ণ্যং ততো দৃষ্ট্বা আশ্রমস্থান্ সুতাংস্ততঃ॥ এবং প্রতিষ্ঠিতং তীর্থং ব্রহ্মযোনীতিসংজ্ঞিতং। তত্র স্নাত্বা মুক্তিকামঃ পুনর্যোনিং ন পশ্যতি॥ ইতি বামনপুরাণে ৩৮ অধ্যায়ঃ॥

পৃথূদরঃ (পুং) মেষঃ। ইতি হারাবলী॥ বৃহৎকুক্ষৌ ত্রি॥

পৃথ্বী (স্ত্রী) পৃথিবী। পৃথোর্দুহিতৃত্বস্বীকারাদেতন্নাম। যথা। দুহিতৃত্বমনুপ্রাপ্তা দেবী পৃথ্বী তথোচ্যতে। ইত্যগ্নিপুরাণং॥

হিঙ্গুপত্রী। কৃষ্ণজীরকঃ। ইত্যমরঃ॥ বৃত্তার্হম্মাতা। ইতি হেমচন্দ্রঃ॥ পুনর্নবা। স্থূলৈলা। ইতি রাজনির্ঘণ্টঃ॥

পৃথ্বীকা (স্ত্রী) বৃহদেলা। ইত্যমরঃ॥ সূক্ষ্মৈলা। কৃষ্ণজীরকঃ। ইতি রত্নমালা॥ হিঙ্গুপত্রী। ইতি রাজনির্ঘণ্টঃ॥

পৃথ্বীকুরবকঃ (পুং) শ্বেতমন্দারকঃ। ইতি রাজনির্ঘণ্টঃ॥

পৃথ্বীজং (ক্লী) গড়লবণং। ইতি রাজনির্ঘণ্টঃ॥

পৃদাকুঃ (পুং) সর্পঃ। ইত্যমরঃ॥ বৃশ্চিকঃ। ব্যাঘ্রঃ। চিত্রকঃ। ইতি মেদিনী॥ কুঞ্জরঃ। বৃক্ষঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥

পৃশ্নিঃ (ত্রি) অল্পতনুঃ। ইত্যমরঃ॥ স তু খর্ব্বদুর্ব্বলাল্পাস্থিঃ। ইতি ভরতঃ॥

পৃশ্নিঃ (স্ত্রী) রশ্মিঃ। ইতি শব্দরত্নাবলী॥ সুতপোরাজপত্নী। সৈব জন্মান্তরে দেবকী ভূতা। ইতি শ্রীভাগবতে ১০ স্কন্ধঃ॥

পৃশ্নিকা (স্ত্রী) কুম্ভিকা। ইতি শব্দমালা॥

পৃশ্নিগর্ভঃ (পুং) শ্রীকৃষ্ণঃ। ইতি হারাবলী॥

পৃশ্নিপর্ণী (স্ত্রী) লতাবিশেষঃ। চাকুলিয়া ইতি ভাষা। চকরৌৎ ইতি হিন্দী ভাষা। তৎপর্য্যায়ঃ। পৃথক্‌পর্ণী ২ চিত্রপর্ণী ৩ অঙ্ঘ্রিবল্লিকা ৪ ক্রোষ্টুবিন্না ৫ সিংহপুচ্ছী ৬ কলশিঃ ৭ ধাবনিঃ ৮ গুহা ৯। ইত্যমরঃ॥ কেচিত্তু। পৃশ্নিপর্ণ্যাদিচতুষ্কং চাকুলিয়া ইতি খ্যাতায়াং। ক্রোষ্টুবিন্নাদিপঞ্চকং বিরালছাঁই ইতি খ্যাতায়ামিত্যাহুঃ। এতত্তু বৈদ্যা ন শ্রদ্দধতে তে হি কলশ্যাদিশব্দেন পৃশ্নিপর্ণীমেব গৃহ্ণন্তি। পৃশ্নিপর্ণী সিংহপুচ্ছী চিত্রপর্ণী কটুসিংহপুচ্ছী অনয়োরল্পভেদান্নবৈবৈকার্থা ইতি কেচিৎ। ইতি ভরতঃ॥ অপি চ। পিষ্টপর্ণী ১০ লাঙ্গলী ১১ ক্রোষ্টুপুচ্ছিকা ১২ পূর্ণপর্ণী ১৩ কলশী ১৪ ক্রোষ্টুকমেখলা ১৫ দীর্ঘা ১৬ শৃগালবৃন্তা ১৭ ত্রিপর্ণী ১৮ সিংহপুচ্ছিকা ১৯ দীর্ঘপত্রা ২০ অতিগুহা ২১ ঘৃষ্ঠিলা ২২ চিত্রপর্ণিকা ২৩। ইতি সাঙ্গে রত্নমালা॥ মহাগুহা ২৪ শৃগালবিন্না ২৫ ধমনী ২৬ মেখলা ২৭ লাঙ্গূলিকা ২৮ পৃষ্টিপর্ণী ২৯ দীর্ঘপর্ণী ৩০। ইতি রাজনির্ঘণ্টঃ॥ অঙ্ঘ্রিপর্ণী ৩১ ধাবনী ৩২। ইতি ভাবপ্রকাশঃ॥ অস্যা গুণাঃ। কটুত্বং। অতীসারকাসবাতরোগজ্বরোন্মাদব্রণদাহনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ ত্রিদোষঘ্নত্বং। বৃষ্যত্বং। মধুরত্বং। সরত্বং। শ্বাসরক্তাতীসারতৃড়্বমিনাশিত্বঞ্চ। ইতি ভাবপ্রকাশঃ॥ গ্রাহিত্বং। ইতি রাজবল্লভঃ॥

পৃশ্নিভদ্রঃ (পুং) শ্রীকৃষ্ণঃ। ইতি শব্দমালা॥

পৃশ্নিশৃঙ্গঃ (পুং) বিষ্ণুঃ। ইতি শব্দমালা॥ গণেশঃ। ইতি ত্রিকাণ্ডশেষঃ॥

পৃশ্নী (স্ত্রী) বারিপর্ণী। ইতি শব্দরত্নাবলী॥ কুম্ভিকা। ইতি ভূরিপ্রয়োগঃ॥

পৃষ উ সেকে। ইতি কবিকল্পদ্রুমঃ॥ উ পর্ষিত্বা পৃষ্ট্বা। ইতি দুর্গাদাসঃ॥

পৃষৎ (ক্লী) জলবিন্দুঃ। ইত্যমরঃ॥ যথা। পৃষদপরুষবিষাণাগ্রেণ লুঠতি। ইতি শ্রীভাগবতে ৫ স্কন্ধে ৮ অধ্যায়ঃ॥ পৃষৎ জলবিন্দুস্তদ্বৎ অপরুষেণ মৃদুনা বিষাণাগ্রেণ লুঠতি সঙ্ঘট্টয়তি। ইতি তট্টীকায়াং

শ্রীধরস্বামী ॥ ইদং দ্বিবচনবহুবচনান্তমপি ভবতি ॥

পৃষতঃ (পুং) বিন্দুঃ। ইত্যমরঃ ॥ শ্বেতবিন্দুযুক্তমৃগঃ। ইতি মেদিনী ॥ তৎপর্য্যায়ঃ। রঙ্কুঃ ২ শবলপৃষ্ঠকঃ ৩। ইতি রাজনির্ঘণ্টঃ॥

পৃষতাম্পতিঃ (পুং) বায়ুঃ। ইতি জটাধরঃ ॥

পৃষতাশ্বঃ (পুং) বায়ুঃ। ইত্যমরটীকায়াং ভরতঃ

পৃষতী (স্ত্রী) শ্বেতবিন্দুযুক্তা মৃগী। ইতি মেদিনী ॥

পৃষৎকঃ (পুং) বাণঃ। ইত্যমরঃ ॥

পৃষদশ্বঃ (পুং) বায়ুঃ। ইত্যমরঃ ॥

পৃষদাজ্যং (ক্লী) সদধ্যাজ্যং। দধিমিশ্রিতঘৃতং। ইত্যমরঃ ॥

পৃষদ্বলঃ (পুং) বায়ুশ্বঃ। যথা। ধুবিত্রমরুদান্দোলঃ কুচৈবশ্চামরানিলঃ। পৃষদ্বলস্তু বায়ুশ্বঃ কুবেরে তু প্রমোদিতঃ ॥ ইতি শব্দমালা ॥

পৃষন্তিঃ (পুং) বিন্দুঃ। যথা। পয়ঃপৃষন্তিভিঃ স্পৃষ্টা বান্তি বাতাঃ শনৈঃ শনৈঃ। ইতি ভরতধৃতজাম্ববতীবিজয়কাব্যং ॥

পৃষভাষা (স্ত্রী) অমরাবতী। ইতি শব্দরত্নাবলী ॥

পৃষাকরা (স্ত্রী) ক্ষুদ্রশিলা। বাট্‌খারা ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥

পৃষাতকং (ক্লী) দধিযুক্তঘৃতং। ইতি হেমচন্দ্রঃ ॥

পৃষোদরঃ (ত্রি) পৃষদুদরং যস্য। মনীষাদিত্বাৎ তলোপঃ। ইতি দুর্গাদাসঃ ॥ ভবেদ্‌বর্ণাগমাদ্ধংসঃ সিংহো বর্ণবিপর্য্যয়াৎ। বর্ণাদেশাচ্চ গূঢ়াত্মা বর্ণলোপাৎ পৃষোদরঃ ॥ ইতি গোয়ীচন্দ্রধৃতকারিকা ॥

পৃষোদ্যানং (ক্লী) ক্ষুদ্রোপবনং। মনীষাদিত্বাৎ পৃষতস্তকারলোপঃ। ইতি মুগ্ধবোধটীকায়াং দুর্গাদাসঃ ॥

পৃষ্ঠং (ক্লী) শরীরপশ্চাদ্ভাগঃ। পীঠ ইতি ভাষা। ইত্যমরঃ ॥ চরমমাত্রং। ইতি মেদিনী ॥

পৃষ্ঠগ্রন্থিঃ (পুং) গড়ুঃ। কুঁজ। ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥

পৃষ্ঠতঃ [স্] ব্য পশ্চাৎ। পৃষ্ঠদেশে। যথা। তং পৃষ্ঠতঃ প্রষ্ঠমিয়ায় নম্রো হিংস্রেষু দীপ্রাস্ত্রধরঃ কুমারঃ। ইতি ভট্টিঃ ॥

পৃষ্ঠদৃষ্টিঃ (পুং) ভল্লুকঃ। ইতি রাজনির্ঘণ্টঃ ॥

পৃষ্ঠমাংসাদঃ (ত্রি) বাক্যাভিধায়ী। চোগোলখোর ইতি পারস্যভাষা। ইতি ত্রিকাণ্ডশেষঃ ॥

পৃষ্ঠমাংসাদনং (ক্লী) পরোক্ষে দোষকীর্ত্তনং। ইতি হেমচন্দ্রঃ ॥ তদ্বতি ত্রি ॥

পৃষ্ঠবংশঃ (পুং) পৃষ্ঠাস্থি। পিঠের দাঁড়া ইতি ভাষা। তৎপর্য্যায়ঃ। রীঢ়কঃ ২। ইতি হেমচন্দ্রঃ ॥ স তু মাসমাত্রেণ ভবতি। ইতি সুখবোধঃ ॥

পৃষ্ঠবাট্ / পৃষ্ঠবাড়্ [হ] (পুং) যুগপার্শ্বগবৃষঃ। পাঁটে বাঁধা গরু ইতি ভাষা। ইত্যমরঃ ॥

পৃষ্ঠবাহ্যঃ (পুং) ভারবাহকবৃষঃ। তৎপর্য্যায়ঃ। স্থৌরী ২ পৃষ্ঠ্যঃ ৩। ইতি হেমচন্দ্রঃ ॥

পৃষ্ঠশৃঙ্গঃ (পুং) বনচ্ছাগঃ। ইতি হেমচন্দ্রঃ ॥

পৃষ্ঠশৃঙ্গী [ন্] (পুং) ভীমসেনঃ। নপুংসকং। মহিষঃ। ইতি মেদিনীশব্দরত্নাবল্যৌ ॥

পৃষ্ঠোদয়ঃ (পুং) মেষবৃষকর্কটধনুর্ম্মকরমীন-লগ্নাঃ। যথা। অজো গোপতিযুগ্মঞ্চ কর্কিধন্বিমৃগাস্তথা। নিশাসংজ্ঞাঃ স্মৃতাশ্চৈতে শেষাশ্চান্যে দিনাত্মকাঃ॥ নিশাসংজ্ঞা বিমিথুনাঃ স্মৃতাঃ পৃষ্ঠোদয়াস্তথা। শেষাঃ শীর্ষোদয়া হ্যেতে মীনশ্চোভয়সংজ্ঞকঃ॥ ইতি জ্যোতিস্তত্ত্বং॥

পৃষ্ঠ্যং (ক্লী) পৃষ্ঠানাং সমূহঃ। ইত্যমরঃ॥

পৃষ্ঠ্যঃ (পুং) পৃষ্ঠেন ভারবাহকাশ্বঃ। তৎপর্য্যায়ঃ। স্থৌরী ২। ইত্যমরঃ॥

পৃষ্ণিঃ (ত্রি) প্রশ্নিঃ। ইত্যমরটীকায়াং ভরতঃ॥ পাষ্ণিঃ। তত্র স্ত্রীলিঙ্গঃ। ইত্যুণাদিকোষঃ॥

পৃ ক পূর্ত্তৌ। ইতি কবিকল্পদ্রুমঃ॥ ক পারয়তি। ইতি দুর্গাদাসঃ॥

পৃ ঞি গি লি পালনে। পূর্ত্তৌ। ইতি কবিকল্পদ্রুমঃ॥ ঞি পূর্ত্তোঽস্তি। সূল্বাদ্যোদিদিত্যত্র পৃবর্জ্জনান্ন নিষ্ঠাতস্য নঃ। গি পৃণাতি। ক্তৌ তু পূর্ত্তিরিত্যেব মনীষাদিত্বান্ন নিঃ। লি পিপর্ত্তি। ইতি দুর্গাদাসঃ॥

পেচকঃ (পুং) পক্ষিবিশেষঃ। পেঁচা ইতি ভাষা। তৎপর্য্যায়ঃ। উলূকঃ ২ বায়সারাতিঃ ৩। ইত্যমরঃ॥ শক্রাখ্যঃ ৪ দিবান্ধঃ ৫ বক্রনাসিকঃ ৬ হরিনেত্রঃ ৭ দিবাভীতঃ৮ নখাশী ৯ পীযুঃ ১০ ঘর্ঘরঃ ১১ কাকভীরুঃ ১২ নক্তচারী ১৩। ইতি ত্রিকাণ্ডশেষঃ॥ নিশাচরঃ১৪ কৌশিকঃ১৫ রূপনাশনঃ ১৬ পেচঃ ১৭ রক্তনাসিকঃ ১৮ ভীরুকঃ ১৯। ইতি শব্দরত্নাবলী॥ করিপুচ্ছমূলোপান্তঃ। গুদাচ্ছাদকমাংসপিণ্ডবিশেষঃ। ইত্যমরঃ॥ পর্য্যঙ্কঃ। যূকঃ। ইতি বিশ্বঃ॥ মেঘঃ। ইতি শব্দরত্নাবলী॥

পেচকী [ন্] (পুং) হস্তী। ইতি শব্দরত্নাবলী॥

পেচিলঃ (পুং) হস্তী। ইতি ত্রিকাণ্ডশেষঃ॥

পেচু (ক্লী) পেচুলী। ইতি ত্রিকাণ্ডশেষঃ॥

পেচুলী (স্ত্রী) শাকভেদঃ। কচু ইতি খ্যাতঃ। যথা। কেচুকং পেচুলী পেচু নাড়ীচো বিশ্বরোচনঃ। ইতি ত্রিকাণ্ডশেষঃ॥

পেটঃ (পুং) প্রহস্তঃ। ইতি রাজনির্ঘণ্টঃ॥ পেটকে ত্রি। ইত্যমরঃ॥

পেটকং (ক্লী) পুস্তকাদীনাং মঞ্জুষা। পেটরা ইতি ভাষা। কদম্বকং। সমূহঃ। ইতি মেদিনী॥

পেটকঃ (পুং) বংশবেত্রাদিময়সমুদ্গকপ্রায়ঃ। পেটারী ইতি পেটী ইতি পেড়া ইতি চ খ্যাতঃ। তৎপর্য্যায়ঃ। পিটকঃ ২ পেড়া ৩ মঞ্জূষা ৪। ইত্যমরঃ॥ আদ্যৌ স্বল্পপেটিকায়াং। পরৌ মহাপেটিকায়ামিতি স্বামী॥

পেটাকঃ (পুং) পেটকঃ। ইতি ভরতদ্বিরূপকোষঃ॥

পেটিকা (স্ত্রী) বৃক্ষবিশেষঃ। পেটারি ইতি ভাষা। তৎপর্য্যায়ঃ। কুবেরাক্ষী ২ কুলিঙ্গাক্ষী ৩ কৃষ্ণবৃন্তিকা ৪। ইতি রত্নমালা॥

পেটী (ত্রি) পেটকঃ। ইত্যমরঃ॥

পেড়া (স্ত্রী) মঞ্জূষা। মহাপেটিকা। ইত্যমরভরতৌ॥

পেণ ঋ পেষে। গতৌ। শ্লেষে। ইতি

কবিকল্পদ্রুমঃ ॥ ঋ অপিপেণৎ পিপেণতুঃ। ইতি দুর্গাদাসঃ ॥

পেত্বং (ক্লী) অমৃতং। ঘৃতং। ইত্যুণাদিকোষঃ

পেয়ং (ক্লী) জলং। ইতি মেদিনী ॥ দুগ্ধং। ইতি শব্দচন্দ্রিকা ॥ অষ্টবিধান্নান্তর্গতান্নবিশেষঃ। যথা। ভোজ্যং পেয়ং তথা চূষ্যং লেহ্যং খাদ্যঞ্চ চর্বণং। নিষ্পেয়ঞ্চৈব ভক্ষ্যং স্যাদন্নমষ্টবিধং স্মৃতং ॥ ইতি রাজনির্ঘণ্টঃ ॥ পাতব্যে ত্রি। ইতি মেদিনী ॥

পেয়া (স্ত্রী) সিক্থসমন্বিতপেয়দ্রব্যং। অস্যা গুণাঃ। পেয়া স্বেদাগ্নিজননী বাতবর্চোঽনুলোমনী। ক্ষুত্তৃষ্ণাগ্লানিদৌর্ব্বল্যকুক্ষিরোগবিনাশিনী ॥ ইতি রাজবল্লভঃ ॥ মিশ্রেয়া। ইতি শব্দচন্দ্রিকা ॥ শ্রাণা। অচ্ছমণ্ডং। ইতি মেদিনী ॥

পেয়ূষঃ (পুং ক্লী) অভিনবং পয়ঃ। ইত্যমরঃ ॥ নবপ্রসূতায়া গোঃ সপ্তদিনাভ্যন্তরীণদুগ্ধং। যথা। আসপ্তরাত্রপ্রভবং ক্ষীরং পেয়ূষ উচ্যতে। ইতি হারাবলী ॥ পীয়তে পেয়ূষঃ পীঙ্ পানে নাম্নীতি যূষঃ মূর্দ্ধন্যান্তঃ ক্লীবঞ্চ। পীয়ূষঞ্চ অথ পীয়ূষপেয়ূষে নবং সপ্তদিনাবধীতি শব্দার্ণবঃ ॥ ইতি তট্টীকায়াং ভরতঃ ॥ অমৃতং। অভিনবসর্পিঃ। ইত্যুণাদিকোষঃ ॥

পেরুঃ (পুং) বহ্নিঃ। সূর্য্যঃ। ইত্যুণাদিকোষঃ। সমুদ্রঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

পেরোজং (ক্লী) উপরত্নবিশেষঃ। পীরোজা ইতি যবনভাষা। তৎপর্য্যায়ঃ। হরিতাশ্মং ২ পেরজং ৩। তদ্দ্বিবিধং। ভস্মাঙ্গং হরিতঞ্চ। তস্য গুণাঃ। পেরজং সুকষায়ং স্যান্মধুরং দীপনং পরং। স্থাবরং জঙ্গমঞ্চৈব সংযোগাচ্চ যথা বিষং ॥ তৎ সর্ব্বং নাশয়েৎ শীঘ্রং শূলং ভূতাদিদোষজং। পাঠান্তরং যথা। পিরজং সুকষায়ং স্যান্মধুরং দীপনং দ্বয়োঃ। স্থাবরাদিবিষঘ্নং স্যাদ্ধরিতঞ্চাপরং শৃণু ॥ শীতাঙ্গং নাশয়েচ্ছীঘ্রং শূলং তিমিরভূতজং। ইতি রাজনির্ঘণ্টঃ ॥

পেল ঋ চালে। গতৌ। ইতি কবিকল্পদ্রুমঃ ॥ ঋ অপিপেলৎ পিপেলতুঃ। চালঃ কম্পঃ। ইতি দুর্গাদাসঃ ॥

পেলং (ক্লী) অণ্ডকোষঃ। ইতি হেমচন্দ্রঃ ॥

পেলবং (ত্রি) বিরলং। অত্র সাবকাশত্বং প্রকারঃ। ইত্যমরভরতৌ ॥ কৃশঃ। ইতি হেমচন্দ্রঃ ॥ কোমলং। ইতি ত্রিকাণ্ডশেষঃ ॥

পেব ঋ ঙ সেবনে। ইতি কবিকল্পদ্রুমঃ ॥ ঋ অপিপেবৎ। ঙ পেবতে। ইতি দুর্গাদাসঃ ॥

পেশলঃ (ত্রি) চারুঃ। সুন্দরঃ। দক্ষঃ। চতুরঃ। কোমলঃ। ইত্যমরভরতৌ ॥ ধূর্ত্তঃ। ইতি শব্দরত্নাবলী ॥

পেশস্কৃৎ (পুং) কীটবিশেষঃ। কুমিরকে ইতি ভাষা। যথা। কীটঃ পেশস্কৃতং ধ্যায়ন্ কুড্যাং তেন প্রবেশিতঃ। যাতি তৎসাত্মতাং রাজন্ পূর্ব্বরূপমসংত্যজন্ ॥ ইতি শ্রীভাগবতে ১১ স্কন্ধে ৯ অধ্যায়ঃ ॥

পেশিঃ (পুং) শতকোটিঃ। ইত্যুণাদিকোষঃ ॥ অণ্ডে মাষবিদলে চ স্ত্রী। ইতি সংক্ষিপ্তসারে কৃদন্তপাদঃ ॥

পেশী (স্ত্রী) অণ্ডং। ইত্যমরঃ॥ সুপক্ককলিকা। মাংসী। খড়্গপিধানকং। মাংসপিণ্ডী। ইতি মেদিনী॥ নদীভেদঃ। পিশাচীবিশেষঃ। রাক্ষসীবিশেষঃ। ইতি শব্দরত্নাবলী॥

পেষণং (ক্লী) চূর্ণনং। পিষধাতোর্ভাবে হনট্প্রত্যয়নিষ্পন্নং। খলং। শতগুপ্তা। তেকাঁটাসিজ ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥

পেষণিঃ } (স্ত্রী) পেষণশিলা। শিল ইতি
পেষণী } ভাষা। তৎপর্য্যায়ঃ। পেষণী ২ পট্টঃ ৩ গৃহাশ্মা ৪ গৃহকচ্ছপঃ ৫। ইতি শব্দরত্নাবলী॥

পেষলঃ (ত্রি) পেশলঃ। ইত্যমরটীকায়াং ভরতরমানাথৌ॥

পেষাকঃ (পুং) পেষণিঃ। ইত্যুণাদিকোষঃ॥

পেস ঋ গত্যাং। ইতি কবিকল্পদ্রুমঃ॥ ঋ অপিপেসৎ পিপেসতুঃ। ইতি দুর্গাদাসঃ॥

পেসলঃ (ত্রি) পেশলঃ। ইত্যমরটীকায়াং ভরতঃ॥

পৈ শোষে। ইতি কবিকল্পদ্রুমঃ॥ পায়তি ধান্যমাতপেন। ইতি দুর্গাদাসঃ॥

পৈষঃ (পুং) কর্ণঃ। ইতি হেমচন্দ্রঃ॥

পৈঠরং (ত্রি) স্থালীপক্কমাংসাদি। ইত্যমরঃ॥

পৈঠীনসিঃ (পুং) মুনিবিশেষঃ। স চ স্মৃতিগোত্রয়োঃ কারকঃ। ইতি পুরাণং॥

পৈণ্ডিন্যং (ক্লী) ভৈক্ষজীবিকা। ইতি ত্রিকাণ্ডশেষঃ॥

পৈতামহং (ত্রি) পিতামহসম্বন্ধিধনাদি। যথা কাত্যায়নঃ। পৈতামহঞ্চ পিত্র্যঞ্চ যচ্চান্যৎ স্বয়মর্জ্জিতং। দায়াদানাং বিভাগেষু সর্ব্বমেতদ্বিভজ্যতে॥ বৃহস্পতিঃ। পৈতামহং হৃতং পিত্রা স্বশক্ত্যা যদুপার্জ্জিতং বিদ্যাশৌর্য্যাদিনা প্রাপ্তং তত্র স্বাম্যং পিতুঃ স্মৃতং॥ ইতি দায়ভাগঃ॥

পৈতৃকং (ত্রি) পিতৃসম্বন্ধি। ইতি শব্দমালা॥ যথা মনুঃ। ঊর্দ্ধং পিতুশ্চ মাতুশ্চ সমেত্য ভ্রাতরঃ সমং। ভজেরন্ পৈতৃকং রিক্থ মনীষাস্তে হি জীবতোঃ॥ মনুর্বিষ্ণু। পৈতৃকন্তু যদা দ্রব্যমনবাপ্তমবাপ্নুয়াৎ। ন তৎ পুত্রৈর্ভজেৎ সার্দ্ধমকামঃ স্বয়মর্জ্জিতং॥ পৈঠীনসিঃ। পৈতৃকে বিভজ্যমানে দায়াদ্যে সমো বিভাগঃ। নারদঃ। শৌর্য্যভার্য্যাধনে হিত্বা যচ্চ বিদ্যাধনং ভবেৎ। ত্রীণ্যেতান্যবিভাজ্যানি প্রসাদো যশ্চ পৈতৃকঃ॥ ইতি দায়ভাগঃ॥

পৈতৃকভূমিঃ (স্ত্রী) পিতৃসম্বন্ধিস্থানং। তস্যা মাহাত্ম্যং যথা। শ্রীভগবানুবাচ। ভবাংশ্চ যাদবৈঃ সার্দ্ধং প্রবিশ দ্বারকাপুরীং। মৎপিত্রা মাতৃভিঃ সার্দ্ধং মাহেন্দ্রে চ ক্ষণে নৃপ॥ উগ্রসেন উবাচ। বাসুদেব ন যাস্যামি ভূমিং তাং পৈতৃকীং পুনঃ। সর্ব্বতীর্থপরাং শুদ্ধাং দৈবে কর্ম্মণি পৈতৃকে॥ পারক্যে ভূমিদেশে চ পিতৃণাং নির্ব্বপেত্তু যঃ। তদ্ভূমিস্বামিপিতৃভিঃ শ্রাদ্ধকর্ম্ম নিহন্যতে॥ পিতৃণাং নিষ্ফলং শ্রাদ্ধং দেবানামপি পূজনং। কিঞ্চিৎফলপ্রদঞ্চৈব সম্পূর্ণং পৈতৃকে স্থলে॥ পুত্রপৌত্রকলত্রেভ্যঃ প্রাণেভ্যঃ প্রেয়সী সদা। দুর্লভা পৈতৃকী ভূমিঃ পিতুর্মাতুর্গরীয়সী॥ তৎ-

শস্তঞ্চ পবিত্রঞ্চ দৈবে কর্ম্মণি পৈতৃকে। ক্রীতঞ্চ তদ্গৃহে দানং পরদত্তমশুদ্ধকং ॥ ম্রিয়তে পৈতৃকীভূম্যাং তীর্থতুল্যফলং লভেৎ। গঙ্গাজলসমং পূতং পিতৃখাতোদকং হরে ॥ তত্র স্নাত্বা জলে পূতে গঙ্গাস্নানফলং লভেৎ। পিতৃণাং তর্পণং তত্র পবিত্রং দেবপূজনং ॥ পৈতৃকী জন্মভূমিশ্চেৎ ফলং তদ্দ্বিগুণং লভেৎ পৈতৃকীভূমিতুল্যা চ দানভূমিঃ সতামপি ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ১০৩ অধ্যায়ঃ ॥

পৈতৃষ্বসেয়ঃ } (পুং স্ত্রী) পিতৃস্বসুরপত্যং
পৈতৃষ্বস্রীয়ঃ } পিতৃভগিনীপুত্রঃ। পিস্তুত ভাই ইতি ভাষা। ইত্যমরঃ ॥

পৈত্তঃ } (ত্রি) পিত্তজব্যাধিঃ। ইতি রাজ-
পৈত্তিকঃ } নির্ঘণ্টঃ ॥

পৈত্রং (ক্লী) পিতৃতীর্থং। অঙ্গুষ্ঠতর্জ্জন্যোর্মধ্যং। ইত্যমরঃ ॥ পিতৃসম্বন্ধিনি ত্রি ॥

পৈত্রাহোরাত্রঃ (পুং) পিতৃলোকস্য দিবারাত্রিঃ। স তু মনুষ্যমানে মাসৈকেন ভবতি। যথা মাসেন স্যাদহোরাত্রঃ পৈত্রো বর্ষেণ দৈবতঃ। ইত্যমরঃ ॥

পৈলঃ (পুং) মুনিবিশেষঃ। স চ ঋগ্বেদী যথা। তত্রর্গ্বেদধরঃ পৈলঃ সামগো জৈমিনিঃ কবিঃ। বৈশম্পায়ন এবৈকো নিষ্ণাতো যজুষামুত ॥ অথর্ব্বাঙ্গিরসামাসীৎ সুমন্তুর্দারুণো মুনিঃ। ইতিহাসপুরাণানাং পিতা মে রোমহর্ষণঃ ॥ ইতি শ্রীভাগবতে ১ স্কন্ধে ৪ অধ্যায়ঃ ॥

পৈশাচঃ (পুং) অষ্টপ্রকারবিবাহান্তর্গতাষ্টমবিবাহঃ। যথা যাজ্ঞবল্ক্যঃ। পৈশাচঃ কন্যকা ছলাৎ। ছলমাহ মনুঃ। সুপ্তাং মত্তাং প্রমত্তাং বা রহো যত্রোপগচ্ছতি। স পাপিষ্ঠো বিবাহানাং পৈশাচঃ কথিতোঽষ্টমঃ ॥ ইত্যুদ্বাহতত্ত্বং ॥ পিশাচসম্বন্ধিনি ত্রি ॥

পৈশুন্যং (ক্লী) পিশুনতা। খলতা। তচ্চ দশবিধপাপান্তর্গতবাঙ্ময়পাপবিশেষঃ। ইতি তিথিতত্ত্বং ॥ অস্য বিবরণং পাতকশব্দে দ্রষ্টব্যং ॥

পৈষ্টঃ (ত্রি) পিষ্টসম্বন্ধী। যথা। যদ্যপ্যদন্তকঃ পূষা পৈষ্টমত্তি সদা চরুং। অগ্নীন্দ্রেশ্বরসামান্যাত্তণ্ডুলোঽত্র বিধীয়তে ॥ ইতি তিথ্যাদিতত্ত্বং ॥

পৈষ্টিকং (ক্লী) পিষ্টানাং সমূহঃ। ইতি আপূপিকশব্দটীকায়াং ভরতঃ ॥ মদ্যবিশেষঃ। যথা। রূক্ষমাধ্বীকাদিজনিতে মদাত্যয়ে স্নিগ্ধপৈষ্টিকাদি মৃদু মদ্যং হেতু বিপরীতমেব ॥ ইতি বিজয়রক্ষিতঃ ॥

পৈষ্টী (স্ত্রী) বিবিধধান্যবিকারজা মদিরা তস্যা গুণাঃ। পৈষ্টী কটূষ্ণতীক্ষ্ণা স্যাদীষদ্গৌড়ীসমাপরা। বাতহৃৎ কফকৃত্ত্বীষৎপিত্তকৃন্মোহনী চ সা ॥ ইতি রাজনির্ঘণ্টঃ ॥

পোগণ্ডঃ (পুং) দশবর্ষীয়বালকঃ। যথা। রোগী বৃদ্ধস্তু পোগণ্ডঃ কুর্ব্বন্ত্যন্যৈস্ত্র তং সদা। ইতি প্রায়শ্চিত্ততত্ত্বে ব্রহ্মপুরাণং ॥

পোগণ্ডঃ (ত্রি) অপোগণ্ডঃ। স্বভাবতো ন্যূনাধিকাঙ্গঃ। ঊনবিংশত্যঙ্গুলীকৈকবিংশত্যঙ্গুলীকাদিজনঃ। যথা। পোগণ্ডো বিকলাঙ্গে স্যাদিতি হলায়ুধঃ। পোগণ্ডো

বিকলাঙ্গকঃ। ইতি রত্নকোষঃ। ইত্যমরটীকায়াং ভরতঃ ॥

পোটঃ (পুং) বেশ্মভূমিঃ। ইতি জটাধরঃ॥ সংশ্লেষঃ। ইতি পোটগলশব্দটীকায়াং ভরতঃ ॥

পোটগলঃ (পুং) নলঃ। কাশঃ। ইত্যমরঃ॥ মৎস্যঃ। ইতি মেদিনী ॥

পোটলিকা (স্ত্রী) সংশ্লিষ্টবস্ত্রাদি। পুঁটুলি ইতি ভাষা। ইতি কেচিৎ ॥

পোটা (স্ত্রী) স্ত্রীপুংসলক্ষণা। ইত্যমরঃ॥ স্ত্রীপুংসয়োর্লক্ষণং চিহ্নং স্তনশ্মশ্রাদিরূপং যস্যাং সা। ইতি ভরতঃ ॥

পোটিকঃ (পুং) বিস্ফোটকঃ। ইতি কেচিৎ॥

পোট্টলী (স্ত্রী) পোট্টলিকা। বস্ত্রবদ্ধদ্রব্যং। পুঁটুলি ইতি ভাষা। যথা। শুদ্ধ্যর্থং ত্রিফলাক্বাথে গুড়ূচ্যাঃ ক্বাথ এব বা। দোলাযন্ত্রে পুরঃ পাচ্যঃ পোট্টল্যা বস্ত্রবদ্ধয়া॥ ইতি বৈদ্যকং ॥

পোড়ুঃ (পুং) কপালাস্থিতলং। ইতি রাজনির্ঘণ্টঃ ॥

পোতঃ (পুং স্ত্রী) শিশুঃ। ইত্যমরঃ॥

পোতঃ (পুং) বহিত্রং। গৃহস্থানং। পোতা ইতি ভাষা। বস্ত্রং। ইতি মেদিনী॥ দশবর্ষীয়হস্তী। ইতি হেমচন্দ্রঃ॥ সমুদ্রযানং। জাহাজ ইতি ভাষা। যথা। সমুদ্রযানে রত্নানি মহামৌল্যানি সাধুভিঃ। রত্নপারীক্ষকৈঃ সার্দ্ধমানয়িষ্যে বহূনি চ॥ শুকেন সহ সংপ্রাপ্তো মহান্তং লবণার্ণবং। পোতারূঢ়াস্ততঃ সর্ব্বে পোতবাহৈরুপাসিতাঃ। অপারে দুস্তরেঽগাধে যান্তি বেগেন নিত্যশঃ॥ ইতি বারাহে গোকর্ণমাহাত্ম্যাধ্যায়ঃ॥

পোতকী (স্ত্রী) পূতিকা। ইতি শব্দমালা॥ শ্যামাপক্ষী। ইতি রাজনির্ঘণ্টঃ॥

পোতজঃ (পুং) কুঞ্জরাদিঃ। ইতি হেমচন্দ্রঃ

পোতবণিক্ (পুং) বহিত্রেণ বাণিজ্যকর্ত্তা। নৌবাণিজ্যকরঃ। তৎপর্য্যায়ঃ। সাংযাত্রিকঃ২। ইত্যমরঃ॥ সমুদ্রযানচারী ৩। ইতি জটাধরঃ॥ নৌবাণিজ্যকরঃ ৪। ইতি শব্দরত্নাবলী॥

পোতরক্ষঃ (পুং) কেনিপাতকঃ। হালি ইতি ভাষা। ইতি শব্দমালা॥

পোতলকপ্রিয়ঃ (পুং) বুদ্ধবিশেষঃ। ইতি ত্রিকাণ্ডশেষঃ॥

পোতবাহঃ (পুং) বহিত্রবাহকঃ। দাঁড়ি ইতি ভাষা। তৎপর্য্যায়ঃ। নিয়ামকঃ ২। ইত্যমরঃ॥

পোতা [ঋ] (পুং) বিষ্ণুঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥ ঋত্বিক্। ইতি ভূরিপ্রয়োগঃ॥

পোতাচ্ছাদনং (ক্লী) বস্ত্রকুট্টিমং। ইতি হারাবলী॥

পোতাধানং (ক্লী) ক্ষুদ্রাণুমৎস্যসংঘাত। পোনা ইতি ভাষা। ইত্যমরঃ॥ অস্য গুণাঃ। সুস্নিগ্ধত্বং। লঘুত্বং। রোচনত্বঞ্চ। ইতি রাজবল্লভঃ॥

পোতিকা (স্ত্রী) পূতিকা। ইত্যমরটীকায়াং ভরতঃ॥ শতপুষ্পা। মূলপোতী। ইতি রাজনির্ঘণ্টঃ॥

পোতাসঃ (পুং) কর্পূরবিশেষঃ। ইতি রাজনির্ঘণ্টঃ॥

পোত্রং (ক্লী) বজ্রং। শূকরমুখাগ্রং। লাঙ্গলমুখাগ্রং। ইতি মেদিনী॥ বহিত্রং। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥

পোত্রায়ুধঃ (পুং) শূকরঃ। ইতি রাজনির্ঘণ্টঃ॥

পোত্রিরথা (স্ত্রী) জিনশক্তিবিশেষঃ। ইতি ত্রিকাণ্ডশেষঃ॥

পোত্রী [ন্] (পুং) শূকরঃ। ইত্যমরঃ॥ পোত্রবিশিষ্টে ত্রি॥

পোলিন্দঃ (পুং) নৌকাবয়বভেদঃ। তৎপর্য্যায়ঃ। পাদারকঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥

পোলিকা (স্ত্রী) পিষ্টকবিশেষঃ। পাৎলা রোটী ইতি হিন্দী ভাষা। যথা। কুর্য্যাৎ সমিতয়াতীব তন্বী পর্পটিকা ততঃ। স্বেদয়েত্তপ্তকে তান্তু পোলিকাং তাং জগুর্ব্বুধাঃ॥ তাং খাদেল্লপ্সিকাযুক্তাং তস্যাং মণ্ডকবদ্‌গুণাঃ। তপ্তকং তাবা ইতি লোকে। ইতি ভাবপ্রকাশঃ॥ তৎপর্য্যায়ঃ। পূলিকা ২ পৌলিঃ ৩ পূপিকা ৪ পূপলা ৫। ইতি হেমচন্দ্রঃ॥

পোলী (স্ত্রী) পিষ্টকবিশেষঃ। তৎপর্য্যায়ঃ। পূপালী ২ চর্পটী ৩। ইতি ত্রিকাণ্ডশেষঃ॥

পোষঃ (পুং) পোষণং। পুষধাতোর্ভাবে ঘঞ্‌প্রত্যয়নিষ্পন্নঃ। যথা। যঃ সর্ব্বদাস্মানপুষৎ স্বপোষং। ইতি ভট্টিঃ॥

পোষণং (ক্লী) পুষ্টিঃ। ধৃতিঃ। পুষধাতোর্ভাবেঽনট্‌প্রত্যয়নিষ্পন্নঃ॥

পোষয়িত্নুঃ (পুং) কোকিলঃ। ভর্ত্তা। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥ পোষণকর্ত্তরি ত্রি॥

পোস্টা (পুং) পূতীকঃ। কাঁটাকরঞ্জ ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥ পোষণকর্ত্তরি ত্রি॥

পোস্টৃবরঃ (ত্রি) পোষকশ্রেষ্ঠঃ। পোস্টৃষু বর ইতি সপ্তমীসমাসঃ॥

পোষ্যঃ (ত্রি) পোষণীয়ঃ। পোষিতব্যঃ। পুষধাতোঃ কর্ম্মণি যপ্রত্যয়নিষ্পন্নঃ॥

পোষ্যপুত্রঃ (পুং) পালনাদিনা সুতত্বপ্রাপ্তঃ। যথা। অধুনা কৃত্তিকানাঞ্চ ষণ্ণাং তৎপোষ্যপুত্রকঃ। তন্নাম চক্রুস্তাঃ প্রেম্না কার্ত্তিকশ্চেতি কৌতুকাৎ॥ ইতি ব্রহ্মবৈবর্ত্তে গণপতিখণ্ডে ১৪ অধ্যায়ঃ॥ *॥ অথ তস্য ব্যবস্থা। তত্রাহ মনুঃ। অপুত্রেণ সুতঃ কার্য্যো যাদৃক্ তাদৃক্ প্রযত্নতঃ। পিণ্ডোদকক্রিয়াহেতোর্নামসংকীর্ত্তনায় চ॥ অত্রিশ্চ। অপুত্রেণৈব কর্ত্তব্যঃ পুত্রপ্রতিনিধিঃ সদা। পিণ্ডোদকক্রিয়াহেতোর্যস্মাত্তস্মাৎ প্রযত্নতঃ॥ শৌনকঃ। অপুত্রো মৃতপুত্রো বা পুত্রার্থং সমুপোষ্য চেতি তেন পুত্রোৎপত্ত্যা জ্যেষ্ঠেন জাতমাত্রেণ পুত্রী ভবতি মানবঃ। পিতৃণামনৃণশ্চৈব স তস্মাল্লব্ধুমর্হতীতিমনুবচনাবগত ঋণপরিহারেঽপি তৎপুত্রমরণে পিণ্ডোদকাদ্যর্থং পুনঃ পুত্রকরণমাবশ্যকং। অত্র পুত্রপদং পৌত্রপ্রপৌত্রয়োরপ্যুপলক্ষণং। তয়োরপি পিণ্ডদাতৃত্ববংশকরত্বাবিশেষাৎ। অন্যথা সত্যপি পৌত্রে মৃতপুত্রস্য নিনিমিত্তপুত্রপরিগ্রহাপত্তিরতঃ পুত্রপৌত্র

প্রপৌত্ররহিতস্যৈব পুত্রীকরণমবগম্যতে॥*॥ স্ত্রিয়া ভর্ত্তুরনুজ্ঞয়া তদধিকারঃ। যথাহ বশিষ্ঠঃ ন স্ত্রী পুত্রং দদ্যাৎ প্রতিগৃহ্লীয়াদ্বা অন্যত্রানুজ্ঞানাদ্ভর্ত্তুরিতি ॥*॥ প্রতিনিধিরিতি স চ ক্ষেত্রজাদিরেকাদশবিধঃ। যথাহ মনুঃ। ক্ষেত্রজাদীন্ সুতানেতানেকাদশ যথোদিতান্। পুত্রপ্রতিনিধীনাহুঃ ক্রিয়ালোপান্মনীষিণঃ॥ বৃহস্পতিঃ। পুত্রাস্ত্রয়োদশ প্রোক্তা মনুনা যেঽনুপূর্ব্বশঃ। সন্তানকারণং তেষামৌরসঃ পুত্রিকা তথা। আজ্যং বিনা যথা তৈলং সদ্ভিঃ প্রতিনিধীকৃতং। তথৈকাদশ পুত্রাস্তু পুত্রিকৌরসয়োর্ব্বিনা॥ তত্রাপি কলৌ ন সর্ব্বেষামভ্যনুজ্ঞানং। অনেকধা কৃতাঃ পুত্রা ঋষিভির্যৈঃ পুরাতনৈঃ। ন শক্যাস্তেঽধুনা কর্ত্তুং শক্তিহীনতয়া নরৈরিতিবচনাৎ॥ দত্তৌরসেতরেষাস্তু পুত্রত্বেন পরিগ্রহ ইত্যাদ্যভিধায় ইমান্ ধর্ম্মান্ কলিযুগে বর্জ্জ্যানাহুর্ম্মনীষিণ ইতি দত্তকেতরপ্রতিনিধিনিষেধাৎ॥*॥ অতো দত্তকবিধির্ব্বিবিচ্যতে। তত্র শৌনকঃ। ব্রাহ্মণানাং সপিণ্ডেষু কর্ত্তব্যঃ পুত্রসংগ্রহঃ। তদভাবেঽসপিণ্ডে বা অন্যত্র তু ন কারয়েৎ॥ সপিণ্ডেষ্বিতি সামান্যশ্রবণাৎ সমানাসমানগোত্রেষ্বিত্যর্থঃ। তথা চ সপিণ্ডাভাবেঽসপিণ্ডস্তদভাবে ভিন্নগোত্রোঽপি গ্রাহ্য ইত্যাহ শাকলঃ। সপিণ্ডাপত্যকঞ্চৈব সগোত্রজমথাপি বা। অপুত্রকো দ্বিজো যস্মাৎ পুত্রত্বে পরিকল্পয়েৎ॥ সমানগোত্রজাভাবে পালয়েদন্যগোত্রজং। দৌহিত্রং ভাগিনেয়ঞ্চ মাতৃস্বস্রুসুতং বিনেতি॥ অন্যত্র তু ন কারয়েদিতি ব্রাহ্মণাতিরিক্তক্ষত্রিয়াদিরসমানজাতীয়ো দত্তকো ব্যাবর্ত্ত্যতে যদাহ মনুঃ। মাতা পিতা বা দদ্যাতাং যমদ্ভিঃ পুত্রমাপদি। সদৃশং প্রীতিসংযুক্তং স জ্ঞেয়ো দত্রিমঃ সুতঃ॥ আপদি পুত্রপ্রতিগ্রহীতুরপুত্রত্বে সদৃশং সজাতীয়ং ব্যক্তমাহ বৃদ্ধযাজ্ঞবল্ক্যঃ। সজাতীয়ঃ সুতো গ্রাহ্যঃ পিণ্ডদাতা স ঋক্‌থভাক্। তদভাবে বিজাতীয়ো বংশমাত্রকরঃ স্মৃতঃ॥ গ্রাসাচ্ছাদনমাত্রন্তু স লভেত তদৃক্‌থিন ইতি দৌহিত্রং ভাগিনেয়ঞ্চেতি দৌহিত্রভাগিনেয়নিষেধঃ শূদ্রাতিরিক্তবিষয়ঃ। তথা চ শৌনকঃ। ক্ষত্রিয়াণাং স্বজাতৌ চ গুরুগোত্রসমেঽপি বা। বৈশ্যানাং বৈশ্যজাতেষু শূদ্রাণাং শূদ্রজাতিষু॥ সর্ব্বেষামেব বর্ণানাং জাতিষ্বেব ন চান্যতঃ। দৌহিত্রো ভাগিনেয়শ্চ শূদ্রৈস্তু ক্রিয়তে সুতঃ॥ ব্রাহ্মণাদিত্রয়ে নাস্তি ভাগিনেয়ঃ সুতঃ ক্বচিৎ। জাতিষ্বেব ন চান্যত ইতি নিয়মঃ সজাতীয়সম্ভবে বিজাতীয়নিষেধার্থঃ। অন্যথা প্রাগুক্তকাত্যায়নবিরোধঃ স্যাৎ ॥*॥ তত্রাপি সন্নিহিতসপিণ্ডেষু সতি ভ্রাতৃপুত্রে স এব পুত্রীকার্য্য ইত্যাহ মনুঃ। সর্ব্বেষামেকজাতানামেকশ্চেৎ পুত্রবান্ ভবেৎ। সর্ব্বে তে তেন পুত্রেণ পুত্রিণো মনুরব্রবীৎ॥ বৃহস্পতিঃ। যদ্যেকজাতা বহবো ভ্রাতরশ্চ সহোদরাঃ। একস্যাপি সুতে জাতে সর্ব্বে তে পুত্রিণঃ স্মৃতাঃ॥ ইতি।

অত্র বচনদ্বয়েঽপি ভ্রাতৃসুতে চ পুত্রপ্রতিনিধিতয়া কথঞ্চিৎ সম্ভবত্যন্যো ন প্রতিনিধিঃ কার্য্য ইত্যবগম্যতে ॥ * ॥ ভর্তৃবংশমন্তরেণ চাস্যা বংশান্তরাসম্ভবেন তস্যৈব স্ববংশকরত্বঞ্চেৎ যতঃ সমস্তস্যাপি পুত্রপ্রয়োজনস্য সম্ভবেন সতি সপত্নীপুত্রে ন দত্তকাদ্যুপাদানং ॥ * ॥ কেন পুত্রো দেয় ইত্যাহ শৌনকঃ। নৈকপুত্রেণ কর্ত্তব্যং পুত্রদানং কদাচন। বহুপুত্রেণ কর্ত্তব্যং পুত্রদানং প্রযত্নত ইতি ॥ দ্বিপুত্রস্যাপি পুত্রদানে অপরপুত্রনাশে বংশবিচ্ছেদমাশঙ্ক্যাহ বহুপুত্রেণেতি ॥ স্ত্রিয়াস্তু জীবতি ভর্ত্তরি তদনুমতে প্রোষিতে মৃতে বা তদনুজ্ঞাং বিনাপি। যথা বশিষ্ঠঃ। ন স্ত্রী পুত্রং দদ্যাৎ প্রতিগৃহ্লীয়াদ্বা অন্যত্রানুজ্ঞানাদ্ভর্ত্তুরিতি। অনুমতিশ্চাপ্রতিষেধেঽপি ভবতি। অপ্রতিষিদ্ধং পরমনুমতং ভবতীতিন্যায়াৎ ॥ * ॥ নিরপেক্ষ্য দানমাহ যাজ্ঞবল্ক্যঃ। দদ্যান্মাতা পিতা বা যং স পুত্রো দত্তকো ভবেৎ। তথা মাতাপিতৃভ্যামুৎসৃষ্টস্তয়োরন্যতরেণ বেতি ॥ * ॥ অথ পুত্রপরিগ্রহবিধিমাহ শৌনকঃ। শৌনকোঽহং প্রবক্ষ্যামি পুত্রসংগ্রহমুত্তমং। অপুত্রো মৃতপুত্রো বা পুত্রার্থং সমুপোষ্য চ ॥ উপোষ্য গ্রহণাৎ পূর্ব্বদিনে কৃতোপবাসঃ। বৃদ্ধগোতমঃ। বাসসী কুণ্ডলে দত্ত্বা উষ্ণীষং চাঙ্গুলীয়কং। আচার্য্যং ধর্ম্মসংযুক্তং বৈষ্ণবং বেদপারগং ॥ মধুপর্কেণ সংপূজ্য রাজানঞ্চ দ্বিজান্ শুচীন্। রাজ্ঞো বিপ্রকৃষ্টত্বে গ্রামস্বামিনং। বন্ধূনাহূয় সর্ব্বাংস্তু গ্রামস্বামিনমেব চেতিস্মরণাৎ। দ্বিজানিতি বহুত্বং ত্রিত্বপর্য্যবসিতং কপিঞ্জলন্যায়াৎ। বর্হিঃ কুশময়ঞ্চৈব পালাশঞ্চেধ্মমেব চ। এতানাহৃত্য বন্ধূংশ্চ জ্ঞাতীনাহূয় যত্নতঃ ॥ বন্ধূনন্নেন সম্ভোজ্য ব্রাহ্মণাংশ্চ বিশেষতঃ। অগ্ন্যাধানাদিকং তত্র কৃত্বাজ্যোৎপবনান্তকং ॥ দাতুঃ সমক্ষং গত্বা চ পুত্রং দেহীতি যাচয়েৎ। দানে সমর্থো দাতাস্মৈ যো যজ্ঞেনেতি পঞ্চভিঃ ॥ দদ্যাদিতি শেষঃ। বন্ধূন্ আত্মমাতৃপিতৃবন্ধূন্। জ্ঞাতীন্ সপিণ্ডান্। তথা দেবস্যত্বেতিমন্ত্রেণ হস্তাভ্যাং পরিগৃহ্য চ। অঙ্গাদঙ্গেত্যৃচং জপ্ত্বা আঘ্রায় শিশুমূর্দ্ধনি। বস্ত্রাদিভিরলংকৃত্য পুত্রচ্ছায়াবহং সুতং ॥ পুত্রচ্ছায়া পুত্রসাদৃশ্যং নিয়োগাদিনা স্বয়মুৎপাদনযোগ্যত্বমিতি যাবৎ। তথা। নৃত্যগীতৈশ্চ বাদ্যৈশ্চ স্বস্তিশব্দৈশ্চ সংযুতং। গৃহমধ্যে তমাধায় চরুং কৃত্বা বিধানতঃ ॥ যস্ত্বাহৃতেত্যৃচা চৈব তুভ্যমগ্রে ত্যৃচৈকয়া। সোমো দদদিত্যেতাভিঃ প্রত্যৃচং পঞ্চভিস্তথেতি। বৃদ্ধগৌতমঃ। পায়সং তত্র সাজ্যঞ্চ শতসংখ্যঞ্চ হোময়েৎ। প্রজাপতে ন ত্বদেতানিত্যুদ্দিশ্য প্রজাপতিমিতি ॥ * ॥ বশিষ্ঠঃ। পুত্রং প্রতিগ্রহীষ্যন্ বন্ধূনাহূয় রাজনি নিবেদ্য নিবেশনস্য মধ্যে ব্যাহৃতিভির্হুত্বা অদূরবান্ধবং বন্ধুসন্নিকৃষ্টমেব গৃহ্লীয়াৎ। সন্দেহে চোৎপন্নে দূরবান্ধবং শূদ্রমিব স্থাপয়েৎ। বিজ্ঞায়তে হ্যেকেন বহূংস্ত্রায়ত ইতি। নিবেশনং গৃহং। সন্দেহ

ইতি দূরাবস্থিতবান্ধবস্যাত্যন্তদেশভাষা-
বিপ্রকর্ষাদিনা কুলশীলাদিসন্দেহো ভব
ত্যেব তথাত্বে নির্ণয়পর্য্যন্তং ন ব্যবহরেৎ
তত্র হেতুরেকেনেতি। বন্ধূন্ পিত্রাদীন্।
এতদন্যতরবিধিরাবশ্যকঃ ॥ * ॥ ততশ্চ
শৌনকঃ। দক্ষিণাং গুরবে দদ্যাদ্যথাশক্তি
দ্বিজোত্তমঃ। নৃপো রাজ্যার্দ্ধমেবাথ বৈশ্যো
বিত্তশতত্রয়ং। শূদ্রঃ সর্ব্বস্বমেবাপি অ-
শক্তশ্চেদ্যথাবলং ॥ রাজ্যার্দ্ধমর্দ্ধরাজ্যোৎ-
পন্নমেকবর্ষীয়দ্রব্যং। প্রদদ্যাদর্দ্ধরাজ্যোত্থ-
মেকবর্ষাহৃতং ধনমিতি বৃদ্ধগৌতমস্মর-
ণাৎ। উত্তমমধ্যমাধমভেদেন বিত্তানাং
সুবর্ণরজততাম্রাণামিতি জ্ঞেয়ং। শতত্রয়ং
নাণকানাং সৌবর্ণমথ রাজতং। প্রদদ্যা-
ত্তাম্রমথবা উত্তমাদিব্যবস্থয়া ॥ ইতি বৃদ্ধ-
গৌতমস্মরণাৎ। সর্ব্বস্বমেকবর্ষভূতিলব্ধ-
মিতি যাবৎ ॥ * ॥ তৈত্তিরীয়াণাস্তু বিধি-
বিশেষমাহ বৌধায়নঃ। অথ পুত্রপরিগ্রহ-
বিধিং ব্যাখ্যাস্যামঃ। প্রতিগ্রহীষ্যন্নুপ-
কল্পয়তে দ্বে বাসসী দ্বে কুণ্ডলে অঙ্গুলী-
য়কং আচার্য্যঞ্চ বেদপারগং কুশময়ং
বর্হিঃপর্ণময়মিধ্মমিত্যথ বন্ধূনাহূয় নিবে-
শনস্য মধ্যে রাজনি নিবেদ্য পরিষদি
বাগারমধ্যে ব্রাহ্মণং বাগালম্ভেন উপবেশ্য
পুণ্যাহস্বস্তিঋদ্ধিমিতি বাচয়িত্বা যদ্দেব-
যজনোল্লেখপ্রভৃতি আপ্রণীতাভ্যঃ কৃত্বা দাতুঃ
সমক্ষং গত্বা মে পুত্রং দেহীতি ভিক্ষেৎ
দদানীতীতর আহ তং পরিগৃহ্লীত ধর্ম্মায়
ত্বা পরিগৃহ্লামি সন্তত্যৈ ত্বা পরিগৃহ্লামী-
ত্যথৈনং বস্ত্রকুণ্ডলাদিভিরলঙ্কৃত্য পরিধান-
প্রভৃত্যগ্নিমুখং কৃত্বা পক্কা জুহোতি যস্ত্বা
হৃদা কীরিণা মন্যমান ইতি পুরোঽনুবাক্য-
মনুদ্য যস্মৈবং সুকৃতে জাতবেদ ইতি
যাজ্যয়া জুহোতি অথ ব্যাহৃতিভির্হুত্বা স্বিষ্টি-
কৃৎপ্রভৃতি সিদ্ধমাধেনুবরপ্রদানাৎ দক্ষিণাং
দদাত্যেতে চ বাসসী এতে কুণ্ডলে
এতচ্চাঙ্গুরীয়কং এবং ত্বৌরস উৎপদ্যতে
তুরীয়ভাগে সম্ভবতীতি আহস্ম বৌধায়ন
ইতি ॥*॥ এবমুক্তবিধ্যভাবে পরিগৃহীতস্য
তু বিবাহোচিতধনমাত্রভাগিত্বং ন ত্বংশ
ভাগিত্বমিত্যগ্রে বক্ষ্যতে। তথা চ মনুঃ।
গোত্ররিক্থে জনয়িতুর্ন হরেদ্দত্রিমঃ সুতঃ।
গোত্ররিক্থানুগঃ পিণ্ডো ব্যপৈতি দদতঃ
স্বধেতি ॥ এতেন দাতৃধনে দানাদেব পুত্রত্ব-
নিবৃত্তিদ্বারা দত্রিমস্য স্বত্বনিবৃত্তির্দ্দাতৃগোত্র-
নিবৃত্তিশ্চ ভবতীত্যুচ্যতে। তথা চ
গোত্রাদিনিবৃত্তেরেব দর্শনাৎ সংস্কুর্য্যাৎ
স্বসুতান্ পিতেতিস্মরণাৎ গ্রহণানন্তর
সম্ভাব্যমানা এব দত্তকস্য সংস্কারাঃ প্রতি-
গ্রহীত্রা কার্য্যা ন পুনর্জ্জনকেন কৃতপূর্ব্বা
অপি নিবর্ত্তনীয়াঃ ॥ * ॥ যদি চ তৎপূর্ব্ব-
ভাবিনোঽপি সংস্কারা জনকেন ন কৃতা
স্তদা বীজগর্ব্ভদোষনাশাবশ্যকত্বেন ক্রমানু-
রোধেন চ প্রতিগ্রহীত্রৈব তে সমা-
ধেয়াঃ ॥ * ॥ এবমুপনয়নমাত্রকরণেঽপি
প্রতিগ্রহীতুর্দত্তকপুত্রসিদ্ধিঃ। অন্যশাখো-
দ্ভবো দত্তঃ পুত্রশ্চৈবোপনায়িতঃ। স্ব-
গোত্রেণ স্বশাখোক্তবিধিনা স স্বশাখ-
ভাক্ ॥ ইতি বশিষ্ঠস্মরণাৎ। এতচ্চা-
ষ্টমাব্দরূপতন্মুখ্যকালাভ্যন্তরবর্ত্তিপরিগ্রহে

বোধ্যং। অন্যথা মুখ্যকালে অধিকার-যোগ্যত্বাভাবে গৌণকালে অনধিকারান্ন তৎসিদ্ধিরিতি ॥ * ॥ অত্র চ জনক-প্রতিগ্রহীত্রোরুভয়োরপি পুত্ত্রাভিসন্ধানে সতি দত্তকস্য দ্ব্যামুষ্যায়ণত্বেনোভয়গোত্র-ভাগিত্বং বিশেষতো বক্ষ্যতে। চূড়াদ্যা যদি সংস্কারা নিজগোত্রেণ বৈ কৃতাঃ। দত্তাদ্যাস্তনয়াস্তে স্যুরন্যথা দাস উচ্যতে॥ এবঞ্চ চূড়াদ্যা ইত্যতদ্গুণসম্বিজ্ঞানবহু-ব্রীহিণা দ্বিজাতীনামুপনয়নলাভঃ শূদ্রস্য বিবাহলাভঃ ॥ * ॥ তথা পৈঠীনসিঃ। অথ দত্তক্রীতকৃত্রিমপুত্ত্রিকাপুত্ত্রাঃ পরপরি-গ্রহেণার্ষেণ যেঽত্র জাতাস্তেঽসঙ্গতকুলীনা দ্ব্যামুষ্যায়ণা ভবন্তীতি। আর্ষেণ ঋষ্যুক্তেন পরিগ্রহেণ। জনকগ্রহীত্রোঃ স্বীকারেণ দ্ব্যামুষ্যায়ণা ভবন্তীত্যর্থঃ ॥ * ॥ অথ তৎ-কর্তৃকশ্রাদ্ধনির্ণয়ঃ। তত্র পিতুঃ সপিণ্ডী-করণান্তষোড়শশ্রাদ্ধে দত্তকস্য পূর্ব্বগৃহীত-ত্বেঽপি সত্যৌরসে নাধিকারঃ। ঔরসে পুনরুৎপন্নে তেষু জ্যৈষ্ঠং ন বিদ্যতে। ইতি দেবলেন জ্যেষ্ঠত্বপ্রতিষেধাৎ। পিণ্ড-দোঽংশহরশ্চৈষাং পূর্ব্বাভাবে পরঃ পরঃ। ইতি যাজ্ঞবল্ক্যবচনাচ্চ। অন্যত্র সর্ব্বত্রৌ-রসবৎ। ক্ষয়াহে তু বিশেষো যথা জাতূ-কর্ণঃ। ঔরসক্ষেত্রজৌ পুত্ত্রৌ বিধিনা পার্ব্ব-ণেন তু। প্রত্যব্দমিতরে কুর্য্যুরেকোদ্দিষ্টং সুতা দশ ॥ ইতরে দত্তকাদয়ঃ ॥ * ॥ অথ দত্তকাশৌচাদিনির্ণয়ঃ। তত্র শুদ্ধদত্তকস্য তু জনককুলে পরস্পরমাশৌচং নাস্ত্যেব গোত্রনিবৃত্ত্যাশৌচনিবৃত্তেরর্থসিদ্ধত্বাৎ। দ্ব্যামুষ্যায়ণস্য তু উভয়ত্রৈবাশৌচমিতি। ব্রহ্মপুরাণে। দত্তকশ্চ স্বয়ংদত্তঃ কৃত্রিমঃ ক্রীত এব চ। অপবিদ্ধাশ্চ যে পুত্ত্রা ভর-ণীয়াঃ সদৈব তে॥ ভিন্নগোত্রাঃ পৃথক্-পিণ্ডাঃ পৃথগ্বংশকরাঃ স্মৃতাঃ। জননে মরণে চৈব ত্র্যহাশৌচস্য ভাগিনঃ॥ পরাশরঃ। ভিন্নগোত্রঃ সগোত্রো বা নীতঃ সংস্কৃত্য চেচ্ছয়া। জননে মরণে তস্য ত্র্যহাশৌচং বিধীয়তে॥ তথা। ঔরসং বর্জয়িত্বা চ সর্ব্ব বর্ণেষু সর্ব্বদা। ক্ষেত্রজাদিষু পুত্ত্রেষু জাতেষু চ মৃতেষু চ। অশৌচন্তু ত্রিরাত্রং স্যাৎ সমানমিতি নিশ্চয়ঃ ॥ * ॥ অথ দত্তকবিভাগঃ। মনুঃ। পুত্ত্রান্ দ্বাদশ যানাহ নৃণাং স্বায়ম্ভুবো মনুঃ। তেষাং ষড়্বন্ধু-দায়াদাঃ ষড়দায়াদবান্ধবাঃ ॥ ঔরসঃ ক্ষেত্রজশ্চৈব দত্তঃ কৃত্রিম এব চ। গূঢ়োৎ-পন্নোঽপবিদ্ধশ্চ দায়াদা বান্ধবাস্তু ষট্॥ কানীনশ্চ সহোঢ়শ্চ ক্রীতঃ পৌনর্ভবস্তথা। স্বয়ংদত্তশ্চ শৌদ্রশ্চ ষড়দায়াদবান্ধবাঃ॥ বৌধায়নঃ। ঔরসং পুত্ত্রিকাপুত্ত্রং ক্ষেত্রজং দত্তকৃত্রিমৌ। গূঢ়ঞ্চৈবাপবিদ্ধঞ্চ রিক্থ-ভাজঃ প্রচক্ষতে॥ কানীনঞ্চ সহোঢ়ঞ্চ ক্রীতং পৌনর্ভবন্তথা। স্বয়ংদত্তং নিষাদঞ্চ গোত্রভাজঃ প্রচক্ষতে॥ ঔরসপুত্ত্রিকাপুত্ত্র-ক্ষেত্রজকানীনগূঢ়োৎপন্নাপবিদ্ধসহোঢ়পৌ-নর্ভবদত্তকস্বয়মুপাগতকৃতকক্রীতানভিধায় দেবলঃ। এতে দ্বাদশ পুত্ত্রাস্তু সন্তত্যর্থ-মুদাহৃতাঃ। আত্মজাঃ পরজাশ্চৈব লব্ধা যাদৃচ্ছিকাস্তথা॥ তেষাং ষড়্বন্ধুদায়াদাঃ পূর্ব্বেঽন্যে পিতুরেব ষট্। বিশেষং বাপি

পুত্রাণামানুপূর্ব্বী বিশিষ্যতে ॥ সর্ব্বে হ্যনৌরসস্যৈতে পুত্রা দায়হরাঃ স্মৃতাঃ। ঔরসে পুনরুৎপন্নে তেষু জ্যৈষ্ঠং ন বিদ্যতে ॥ তেষাং সবর্ণা যে পুত্রাস্তে তৃতীয়াংশভাগিনঃ। হীনাস্তমুপজীবেয়ু-গ্রা´সাচ্ছাদনসম্ভৃতাঃ ॥ * ॥ বশিষ্ঠঃ। তস্মিংশ্চেৎ প্রতিগৃহীতে ঔরস উৎপদ্যতে স চতুর্থভাগভাগী যদি নাভ্যুদয়িকেষু প্রযুক্তং স্যাৎ। স প্রতিগৃহীতপুত্রঃ আভ্যুদয়িকেষু যজ্ঞাদিষু যদি ঔরসেন প্রযুক্তং ন স্যাৎ প্রভূতং ধনমিতি শেষঃ। অতশ্চ দত্তকগ্রহণানন্তরমৌরসোৎপত্তৌ তদৌরসচতুর্থাংশবিধির্বশিষ্ঠোক্তো দত্তক বিষয়ো জ্ঞেয়ঃ। তথা দেবলকাত্যায়ন-বচনে তৃতীয়াংশগ্রহণবিধিরিত্যুৎকৃষ্ট-গুণদত্তকবিষয়ো বাচ্যঃ। উপপন্নো গুণৈঃ সর্ব্বৈঃ পুত্রো যস্য হি দত্রিমঃ। স হরেতৈব তদৃক্থং সম্প্রাপ্তোঽপ্যন্যগোত্রত ইতি মনুবচনৈকবাক্যত্বাৎ। গুণৈর্জাতিবিদ্যা-চারৈঃ। তথা কেনাপি মুনিনা দত্তকস্য বন্ধুদায়াদত্বমন্যেন চাদায়াদত্বমুক্তং তৎ গুণবদগুণবদ্ভেদেন সমাধেয়ং এবং দত্ত-কস্য ধনগ্রহণাদৌ মুনিভেদেন পূর্ব্বা-পরোক্তিবৈষম্যং গুণাগুণবিবেকেনাপাস্তং এতেনৌরসস্য ভ্রাত্রাদিধনে যেনৈব ভ্রাতৃ-ত্বাদিনা সম্বন্ধেন অধিকারিত্বং তাদৃশেনৈব সম্বন্ধেন তাদৃশদত্তকস্যাপি যথাসম্ভব-মুচিতাংশভাগিত্বমবধেয়ং। এবং ধনিনঃ পুত্রান্তরসত্ত্বে মৃতপিতৃকদত্তকপৌত্রস্যাপি দত্তকোচিতাংশভাগিত্বং। তদসত্ত্বে সর্ব্ব-হরত্বমপীতি। ন চ পৌত্রস্য স্বপিতৃ-যোগ্যাংশভাগিত্বং নিয়মাৎ দত্তকগ্রহীতুঃ পিতামহৌরসসত্ত্বে তাদৃশপিতৃব্যতুল্য-স্যৈবাংশস্য তদ্যোগ্যত্বাৎ দত্তকপৌত্রঃ পিতৃব্যতুল্যমেবাংশং লভতামিতি বাচ্যং। পুত্রকস্য দত্তকত্বে চতুর্থাংশঃ পৌত্রস্য তু তথাত্বে সমানাংশ ইতি বৈষম্যাৎ। ততশ্চ স্বসমানরূপস্য পিতুর্যাদৃশাংশঃ শাস্ত্রসিদ্ধস্তস্যৈব স্বপিতৃযোগ্যাংশতেতি যথোক্তমেব সাধু। এবং রীতিঃ প্র-পৌত্রেঽপ্যনুসর্ত্তব্যেতি ॥ * ॥ ঔরসঃ ক্ষেত্রজশ্চৈব দত্তঃ কৃত্রিম এব চ। গূঢ়োৎ-পন্নোঽপবিদ্ধশ্চ ভাগার্হাস্তনয়া ইমে ॥ কানীনশ্চ সহোঢ়শ্চ ক্রীতঃ পৌনর্ভব-স্তথা। স্বয়ংদত্তশ্চ দাসশ্চ ষড়িমে পুত্র-পাংসনাঃ ॥ অভাবে পূর্ব্বপূর্ব্বেষাং পরান্ সমভিষেচয়েৎ। পৌনর্ভবং স্বয়ংদত্তং দাসং রাজ্যে ন যোজয়েৎ ॥ তথা ন ক্ষত্র-জাদীংস্তনয়ান্ রাজা রাজ্যেঽভিষেচয়েৎ। পিতৃণাং শোধয়েন্নিত্যমৌরসে তনয়ে সতীতি ॥ * ॥ এতাবতা প্রবন্ধেনাভি-হিতো যোঽয়ং ক্ষেত্রজদত্তকাদীনামৌর-সেন সহ বিভাগপ্রকারঃ স তু শূদ্রস্য ন সম্ভবতি তস্য তু। দাস্যাং বা দাসদাস্যাং বা যঃ শূদ্রস্য সুতো ভবেৎ। সোঽনু-জ্ঞাতো হরেদংশমিতি ধর্ম্মো ব্যবস্থিতঃ ॥ ইতি মনুবচনেন জাতোঽপি দাস্যাং শূদ্রেণ কামতোঽংশহরো ভবেৎ। মৃতে পিতরি কুর্য্যুস্তং ভ্রাতরস্ত্বর্দ্ধভাগিনং ॥ অভ্রাতৃকো হরেৎ সর্ব্বং দুহিতৃণাং

সুতাদৃতে। ইতি যাজ্ঞবল্ক্যেন চ দাসীপুত্র-স্যাপ্যৌরসেন সমাংশাভিধানেন পিতু-রনন্তরং ভ্রাতৃরহিতস্য তস্যৈব দৌহিত্রেণ সহ বিভাগদর্শনেন চ দণ্ডাপূপায়িতং সতি পিতরি ক্ষেত্রজদত্তকাদীনামৌরসেন সমাংশোহসতি তু তদর্দ্ধাংশঃ অন্যথা যত্র চ ক্ষেত্রজদত্তকাদীনামৌরসচতুর্থাংশিত্বং তত্র তদপেক্ষয়া অত্যন্তবিপ্রকৃষ্টাধিকার-স্য দাসীপুত্রস্যৌরসসমাংশিত্বমিতি মহদ্‌-বৈষম্যং স্যাৎ এবং সৎসু ক্ষেত্রজাদিষু সত্যোশ্চ পত্নীকন্যয়োর্দৌহিত্রাধিকারে কুপ্তাধিকারবিধিবাধাপত্তিস্তেন দৌহিত্র-পর্য্যন্তাধিকারিশৃঙ্খলায়াং তদেকতমে সত্যপি ন দাসীপুত্রস্য সর্ব্বহরত্বং কিন্তু তৎসমাংশঃ অতএব। দত্তপুত্রে যথা জাতে কদাচিত্ত্বৌরসো ভবেৎ। পিতু-র্বিত্তস্য সর্ব্বস্য ভবেতাং সমভাগিনা-বিত্যপি বচনং শূদ্রবিষয় এব যোজ-নীয়ং ॥ * ॥ অথান্ধপঙ্গুপ্রভৃতিপুত্রাণাং ধনানধিকারিতয়া তদৌরসক্ষেত্রজয়োরেব পিতামহধনভাগিত্বশ্রুতের্ন তদ্‌গৃহীত-দত্তকপুত্রাদেঃ পিতামহধনাধিকারঃ কিন্তু ভরণমাত্রং অন্ধাদিভার্য্যাণাং ভরণবিধা-নেন তদ্ভরণস্য দণ্ডাপূপায়িতত্বাৎ। তথা অন্ধপঙ্গ্বাদীননধিকারিপুত্রানভিধায়াহ। ঔরসক্ষেত্রজাস্ত্বেষাং নির্দ্দোষা ভাগ-হারিণঃ। অপুত্রযোষিতশ্চৈষাং ভর্ত্তব্যাঃ সাধুবৃত্তয়ঃ॥ সুতাশ্চৈষাং প্রভর্ত্তব্যা যাবন্ন ভর্ত্তৃসাৎ কৃতাঃ ॥ * ॥ এবং দত্তকগ্রহণা-নন্তরোৎপন্নৌরসেন সহ দত্তকস্য বিভাগ-দর্শনাৎ সত্যৌরসে গৃহীতস্য তু নাংশ-ভাগিত্বমিতি। তথা বিধানং বিনা পরি-গৃহীতস্যাপি নাংশভাগিত্বমিত্যাহ। তস্মিন্ জাতে সুতে দত্তে ন কৃতে চ বিধানকে। তৎসুতস্তস্য বিত্তস্য যঃ স্বামী পিতুরঞ্জসা॥ মনুঃ। অবিধায় বিধানং যঃ পরিগৃহ্লাতি পুত্রকং। বিবাহবিধিভাজং তং ন কুর্য্যা-দ্ধনভাজনমিতি॥ অন্যজাতীয়দত্তকস্যাপি নাংশভাগিত্বমিত্যাহ যদি স্যাদন্যজাতীয়ো গৃহীতোহপি সুতঃ ক্বচিৎ। অংশভাজং ন তং কুর্য্যাৎ শৌনকস্য মতং হি তৎ ॥ ইতি দত্তকচন্দ্রিকা ॥

পোষ্যবর্গঃ (পুং) প্রতিপালনীয়গণঃ। স তু মাত্রাদিঃ। যথা। মাতা পিতা গুরুঃ পত্নী ত্বপত্যানি সমাশ্রিতাঃ। অভ্যাগতোহতিথি-শ্চাগ্নিঃ পোষ্যবর্গা অমী নব॥ ইতি কাশী-খণ্ডং ॥ অপি চ। মাতা পিতা গুরু-র্ভ্রাতা প্রজা দীনঃ সমাশ্রিতাঃ। অভ্যা-গতোহতিথিশ্চাগ্নিঃ পোষ্যবর্গ উদাহৃতঃ ॥ ভরণং পোষ্যবর্গস্য প্রশস্তং স্বর্গসাধনং। নরকং পীড়নে চাস্য তস্মাদ্যত্নেন তং ভরেৎ ॥ ইতি গারুড়ে ২১৫ অধ্যায়ঃ ॥

পৌংসবনং (ক্লী) পুংসবনসংস্কারঃ। ইতি ভূরিপ্রয়োগঃ ॥

পৌংস্নং (ক্লী) পুংস্নং। ইতি শব্দমালা॥

পৌগণ্ডং (ক্লী) অবস্থাবিশেষঃ। যথা। কৌমারং পঞ্চমাব্দান্তং পৌগণ্ডং দশমা-বধি। কৈশোরমাপঞ্চদশাৎ যৌবনঞ্চ ততঃ পরং ॥ ইতি দশমস্কন্ধীয়দ্বাদশা-ধ্যায়টীকায়াং শ্রীধরস্বামিধৃতবচনং ॥

পৌণ্ডরীকং (ক্লী) প্রপৌণ্ডরীকং। ইতি রাজনির্ঘণ্টঃ॥

পৌণ্ডর্য্যং (ক্লী) পুণ্ডর্য্যং। ইত্যমরটীকায়াং ভরতঃ॥

পৌণ্ড্রঃ (পুং) দেশভেদঃ। চন্দেল ইতি খ্যাতঃ ইতি শব্দরত্নাবলী॥ ভীমসেনস্য শঙ্খঃ। যথা। পৌণ্ড্রং দধ্মৌ মহাশঙ্খং ভীমকর্ম্মা বৃকোদরঃ। ইতি শ্রীভগবদ্গীতায়াং ১ অধ্যায়ঃ॥ ইক্ষুভেদঃ। পুঁড়ি ইতি ভাষা। ইতি রত্নমালা॥

পৌণ্ড্রকঃ (পুং) ইক্ষুভেদঃ। পুঁড়ি আক্ ইতি ভাষা। অস্য গুণাঃ। শীতলত্বং। বৃষ্যত্বং। স্নিগ্ধত্বং। মধুরত্বং। বৃংহণত্বঞ্চ। ইতি রাজবল্লভঃ॥ জাতিবিশেষঃ। পুঁড়ো ইতি ভাষা। স চ শৌণ্ডিকায়াং বৈশ্যাজ্জাতঃ। ইতি ব্রহ্মবৈবর্ত্তপুরাণং॥

পৌণ্ড্রবর্দ্ধনঃ (পুং) দেশভেদঃ। বেহার ইতি খ্যাতঃ। ইতি শব্দরত্নাবলী॥

পৌণ্ড্রিকঃ (পুং) ইক্ষুভেদঃ। পুঁড় ইতি ভাষা। তৎপর্য্যায়ঃ। পুণ্ড্রেক্ষুঃ ২ পুণ্ড্রঃ ৩ সেব্যঃ ৪ অতিরসঃ ৫ মধুঃ ৬। ইতি শব্দমালা॥

পৌতবং (ক্লী) পরিমাণং। ইতি যৌতবশব্দটীকায়াং ভরতঃ॥

পৌত্তিকং (ক্লী) পিঙ্গলবর্ণপুত্তিকাখ্যবৃহন্মক্ষিকাহৃতঘৃতবর্ণমধু। ইতি জটাধররত্নমালে॥

পৌত্রঃ (পুং) পুত্রস্য পুত্রঃ। নাতি ইতি ভাষা। তৎপর্য্যায়ঃ। নপ্তা ২। ইতি হেমচন্দ্রঃ॥ পুত্রেণ লোকাঞ্জয়তি পৌত্রেণানন্ত্যমশ্নুতে। অথ পুত্রস্য পৌত্রেণ ব্রধ্নস্যাপ্নোতি পিষ্টপং॥ ইতি দায়ভাগধৃতমনুশঙ্খলিখিতবশিষ্ঠহারীতবচনং॥

পৌত্রী (স্ত্রী) পুত্রাত্মজা। তৎপর্য্যায়ঃ। নপ্ত্রী ২। ইত্যমরঃ॥

পৌনঃপুন্যং ব্য পুনর্ব্বারং। তৎপর্য্যায়ঃ। বারংবারং ২ মুহুঃ ৩ শশ্বৎ ৪ অসকৃৎ ৫ পুনঃপুনঃ ৬ বারংবারেণ ৭ অভীক্ষ্ণং ৮ প্রতিক্ষণং ৯। ইতি শব্দরত্নাবলী॥

পৌনঃপুনিকঃ (ত্রি) পুনঃপুনর্ভবঃ। ইতি মুগ্ধবোধব্যাকরণং॥

পৌনর্ভবঃ (পুং) দ্বাদশবিধপুত্রান্তর্গতপুত্রবিশেষঃ। ইতি জটাধরঃ॥ পুনর্ভূপুত্রঃ। স তু ভর্তৃপরিত্যক্তবিধবয়োরন্যেনোৎপাদিতঃ। তস্য লক্ষণং যথা। যা পত্যা বা পরিত্যক্তা বিধবা বা স্বয়েচ্ছয়া। উৎপাদয়েৎ পুনর্ভূত্বা স পৌনর্ভব উচ্যতে॥ ইতি মানবে ৯ অধ্যায়ে ১৭৫ শ্লোকঃ॥ যেতি যা ভর্ত্রা পরিত্যক্তা মৃতভর্তৃকা বা স্বেচ্ছয়া অন্যস্য পুনর্ভার্য্যা ভূত্বা যমুৎপাদয়েৎ স উৎপাদকস্য পৌনর্ভবঃ পুত্র উচ্যতে। ইতি তট্টীকায়াং কুল্লুকভট্টঃ॥*॥ অক্ষতযোন্যোর্ভর্তৃপরিত্যক্তবিধবয়োঃ পৌনর্ভবেন ভর্ত্রা সহ বিবাহবিধিঃ এবং কৌমারং পতিমুৎসৃজ্যান্যমাশ্রিত্য পুনরাগতায়াস্তেন কৌমারেণ ভর্ত্রা সহ বিবাহবিধির্যথা। সা চেদক্ষতযোনিঃ স্যাদ্গতপ্রত্যাগতাপি বা। পৌনর্ভবেন ভর্ত্রা সা পুনঃ সংস্কারমর্হতি॥ ইতি মানবে ৯ অধ্যায়ে ১৭৬ শ্লোকঃ॥ সা চেদিতি

সা স্ত্রী যদ্যক্ষতযোনিঃ সতী অন্যমাশ্রয়েত্তদা তেন পৌনর্ভবেন ভর্ত্রা পুনর্ব্বিবাহাখ্যং সংস্কারমর্হতি। যদ্বা কৌমারং পতিমুৎসৃজ্যান্যমাশ্রিত্য পুনস্তমেব প্রত্যাগতা ভবতি তদা তেন কৌমারেণ ভর্ত্রা পুনর্ব্বিবাহাখ্যং সংস্কারমর্হতি। ইতি তট্টীকায়াং কুল্লূকভট্টঃ ॥ *॥ সপ্তবিধপৌনর্ভবাঃ কন্যা বর্জ্জনীয়া যথা। সপ্ত পৌনর্ভবাঃ কন্যা বর্জ্জনীয়াঃ কুলাধমাঃ। বাচা দত্তা মনোদত্তা কৃতকৌতুকমঙ্গলা ॥ উদকস্পর্শিতা যা চ যা চ পাণিগৃহীতিকা। অগ্নিং পরিগতা যা চ পুনর্ভূপ্রভবা চ যা। ইত্যেতাঃ কাশ্যপেনোক্তা দহন্তি কুলমগ্নিবৎ ॥ কৃতকৌতুকমঙ্গলা বদ্ধকঙ্কণা। উদকস্পর্শিতা উদকপূর্ব্বং দত্তেতি রত্নাকরঃ। ইত্যুদ্বাহতত্ত্বং ॥

পৌরং (ক্লী) রোহিষতৃণং। রামকর্পূর ইতি খ্যাতং। ইত্যমরঃ॥ পুরোদ্ভূতে ত্রি। ইতি মেদিনী ॥

পৌরকঃ (পুং) গৃহবাহ্যোপবনং। যথা। নিষ্কুটস্তু গৃহারামো বাহ্যারামস্তু পৌরকঃ। ইতি হেমচন্দ্রঃ ॥

পৌরবঃ (পুং) পুরুবংশঃ। যথা। দ্রুহ্যোস্তু তনয়া ভোজা অনোস্তু ম্লেচ্ছজাতয়ঃ। পুরোস্তু পৌরবো বংশো যত্র জাতোঽসি পার্থিব ॥ ইতি মাৎস্যে ৩৪ অধ্যায়ঃ ॥

পৌরস্ত্যঃ (ত্রি) প্রথমঃ। ইত্যমরঃ ॥

পৌরাণিকঃ (পুং) পুরাণবেত্তা। আখ্যানাখ্যায়িকেতিহাসপুরাণেভ্যশ্চেতিসূত্রোদাহরণেষু পুরাণমধীতে বেদ বেত্তি বিগ্রহে অণ্। ইতি সিদ্ধান্তকৌমুদী ॥

পৌরুষং (ক্লী) পুরুষস্য ভাবঃ। পুরুষস্য কর্ম্ম। পুরুষস্য তেজঃ। ইতি মেদিনী ॥ ক্লীবা হি দৈবমেবৈকং প্রশংসন্তি ন পৌরুষং। দৈবং পুরুষকারেণ ঘ্নন্তি শূরাঃ সদোদ্যমাঃ ॥ ইত্যগ্নিপুরাণং ॥ উদ্যোগিনং পুরুষসিংহমুপৈতি লক্ষ্মীর্দৈবেন দেয়মিতি কাপুরুষা বদন্তি। দৈবং নিহত্য কুরু পৌরুষমাত্মশক্ত্যা যত্নে কৃতে যদি ন সিধ্যতি কোঽত্র দোষঃ ॥ ইতি হিতোপদেশঃ ॥

পৌরুষং (ত্রি) ঊর্দ্ধবিস্তৃতদোঃপাণিনৃমানং। পুরুষপরিমাণং। ইত্যমরঃ ॥

পৌরুষেয়ঃ (পুং) সমূহঃ। বধঃ। পুরুষস্য পদান্তরং। ইতি মেদিনী ॥

পৌরুষেয়ঃ (ত্রি) পুরুষকৃতঃ। পুরুষবিকারঃ। ইতি মেদিনী ॥

পৌরোগবঃ (পুং স্ত্রী) পাকশালাধ্যক্ষঃ। ইত্যমরঃ ॥

পৌরোডাশঃ (পুং) পুরোডাশসহচরিতমন্ত্রঃ। পৌরোডাশপুরোডাশাৎ ষ্ঠন্। পুরোডাশসহচরিতমন্ত্রঃ পুরোডাশঃ স এব পৌরোডাশঃ ততঃ ষ্ঠন্। ইতি সিদ্ধান্তc

পৌরোডাশিকঃ (পুং) পুরোডাশস্য পৌরোডাশস্য বা ব্যাখ্যাতঃ ইতি বিগ্রহে প্রজ্ঞাদিভ্যশ্চেতি স্বার্থে অণ্। ইতি সিদ্ধান্তকৌমুদী ॥

পৌর্ণমাসঃ (পুং) যাগবিশেষঃ। ইত্যমরঃ ॥

তথা হি। অমাবাস্যায়াং অমাবাস্যয়া যজেত পৌর্ণমাস্যাং পৌর্ণমাস্যা যজেত ইতি শ্রুতিবিহিতদর্শপৌর্ণমাসযাগয়োঃ কর্ম্মস্বরূপজ্ঞাপকয়োরুৎপত্তিশ্রুতীঃ সমামনন্তি। যথা । আগ্নেয়াষ্টাকপালোঽমাবাস্যায়াং পৌর্ণমাস্যাঞ্চাচ্যুতো ভবতি। উপাংশুযাজমন্তরা যজতি তাভ্যামেবাগ্নীসোমীয়মেকাদশকপালং পৌর্ণমাস্যামেব প্রাবচ্ছৎ ঐন্দ্রং দধি ভবত্যমাবাস্যায়াং ঐন্দ্রংপয়ো ভবত্যমাবাস্যায়ামিতি। তাভ্যামাগ্নেয়াষ্টাকপালোপাংশুযাজাভ্যাং। তেন আগ্নেয়াষ্টাকপালোপাংশুযাজাগ্নীসোমীয়ৈকাশকপালাস্ত্রয়ঃ পৌর্ণমাস্যাং। আগ্নেয়াষ্টাকপালৈন্দ্রদধিযাগৈন্দ্রপয়োবাগাস্ত্রয়োঽমাবাস্যায়ামিত্যর্থঃ। আসু শ্রুতিষু অমাবাস্যাপৌর্ণমাসীপদানি প্রতিপৎসহিততদুভয়পরাণি। তত্র পূর্ব্বয়োর্যাগারম্ভঃ প্রতিপদোর্যাগঃ। তথা চ দ্বে হ বৈ পৌর্ণমাস্যৌ দ্বে অমাবাস্যে তস্মাৎ প্রতিপদ্যুপবসন্ যজেতাপরেদ্যুরিতি শ্রুতিঃ। অস্যার্থঃ। যাবজ্জীবিকয়োর্দর্শপৌর্ণমাসয়োঃ প্রকৃতিভূতয়োর্ব্বিকৃতিভূতৌ দর্শপৌর্ণমাসৌ কৌণ্ডপায়িনাময়নীয়ৌ পক্ষাদৌ কর্ত্তব্যৌ। ইতি মলমাসতত্ত্বং ॥

পৌর্ণমাসী (স্ত্রী) পূর্ণিমা। ইত্যমরঃ ॥

পৌর্ব্বাহ্লিকঃ (ত্রি) পূর্ব্বাহ্লে ভবঃ। পূর্ব্বাহ্লসম্বন্ধী। বিভাষা পূর্ব্বাহ্লাপরাহ্লাভ্যামিতি সূত্রোদাহরণেষু পূর্ব্বাহ্লে ভবতীতি বিগ্রহে অণ্। ইতি সিদ্ধান্তকৌমুদী ॥

পৌলস্ত্যঃ (পুং) কুবেরঃ। ইত্যমরঃ ॥ রাবণঃ। ইতি মেদিনী ॥ বিভীষণঃ। ইতি শব্দরত্নাবলী ॥

পৌলস্তী (স্ত্রী) সূর্পণখা। পুলস্ত্যস্য স্ত্র্যপত্যং। ইতি ব্যাকরণং ॥

পৌলিঃ (পুং) পাকাবস্থাগতকলায়াদিঃ। আরব্ধপাকযবসর্ষপাদিঃ। বহ্নিনা ঈষদ্দগ্ধ চুটচুটশব্দবান্। ইতি কেচিৎ। দরদগ্ধঃ। ইতি শ্রীধরঃ। ইতি ভরতঃ ॥ তৎপর্য্যায়ঃ। আপক্কং ২ অভ্যূষঃ ৩। ইত্যমরঃ ॥ অভ্যুষঃ ৪ অভ্যোষঃ ৫। ইতি ভরতঃ ॥

পৌলোমী (স্ত্রী) শচী। ইতি হেমচন্দ্রঃ ॥

পৌষঃ (পুং) বৈশাখাদিদ্বাদশমাসান্তর্গতনবমমাসঃ। পুষ্যনক্ষত্রযুক্তা পৌর্ণমাসী যত্র মাসে সঃ। তৎপর্য্যায়ঃ। তৈষঃ২ সহস্যঃ৩। ইত্যমরঃ ॥ পৌষিকঃ ৪ হৈমনঃ ৫। ইতি রাজনির্ঘণ্টঃ ॥ তিষ্যঃ ৬ তিষ্যকঃ ৭। ইতি শব্দরত্নাবলী ॥ অয়ং ধনুঃস্থরবিপ্রারব্ধশুক্লপ্রতিপদাদিদর্শান্তরূপো মুখ্যচান্দ্রঃ। কৃষ্ণপ্রতিপদাদিপৌর্ণমাস্যন্তরূপো গৌণচান্দ্রঃ। ধনূরাশিস্থরবিকঃ সৌরঃ। ইতি স্মৃতিঃ ॥*॥ তত্র জাতফলং। নিগূঢ়মন্ত্রঃ সুকৃশাঙ্গযষ্টিঃ পরোপকারী পিতৃবিত্তহীনঃ। কষ্টান্বিতার্থব্যয়কৃদ্বিধিজ্ঞঃ পৌষপ্রসূতঃ পুরুষঃ সুধীরঃ ॥ ইতি কোষ্ঠীপ্রদীপঃ ॥

পৌষী (স্ত্রী) পুষ্যযুক্তা পৌর্ণমাসী। ইত্যমরঃ ॥ পুষ্যেণ যুক্তা রাত্রিঃ। ইতি মুগ্ধবোধব্যাকরণং ॥

পৌষ্করং (ক্লী) পুষ্করমূলং। ইতি রাজনির্ঘণ্টঃ ॥

পৌষ্করমূলং (ক্লী) পুষ্করমূলং। যথা। মূলে পুষ্করকাশ্মীরপদ্মপত্রাণি পৌষ্করে। ইত্যমরঃ॥ ত্রীণি পুষ্করমূলে। পুষ্করং সুগন্ধিদ্রব্যং বণিকৃখ্যাতং তস্য ইদং পৌষ্করং ষঃ পৌষ্করে মূলে পুষ্করাদীত্যন্বয়ঃ। ইতি ভরতঃ

পৌষ্করিণী (স্ত্রী) পুষ্করিণী। ইতি শব্দরত্নাবলী॥

পৌষ্টিকং (ক্লী) ক্ষৌরসময়ে গাত্রাচ্ছাদনবস্ত্রবিশেষঃ। কাবাই ইতি ভাষা। অস্য গুণাঃ। ধনচিহ্নত্বং। আয়ুষ্যত্বং। শুচিত্বং। রূপবিরাজনত্বঞ্চ। ইতি রাজবল্লভঃ॥ ধন্যং ধনচিহ্নং। বল্যমিতি বা পাঠঃ। পুষ্টির্ধনজনাদীনাং বৃদ্ধিরিত্যভিধীয়তে। তদ্ধেতুভূতং কর্ম্ম। ইতি দুর্গভঞ্জঃ॥

পৌষ্পং (ত্রি) পুষ্পনির্ম্মিতং। পুষ্পসম্বন্ধি। যথা। আসনং প্রথমং দদ্যাৎ পৌষ্পং দারুজমেব বা। বাস্ত্রং বা চার্ম্মণং কৌশং মণ্ডলস্যোত্তরে স্বজেৎ॥ ইতি কালিকাপুরাণে ৬৭ অধ্যায়ঃ॥

পৌষ্পকং (ক্লী) কুসুমাঞ্জনং। ইত্যমরঃ॥

পৌষ্পী (স্ত্রী) দেশবিশেষঃ। যথা। অথ পুষ্পপুরং পৌষ্পী তথা পাটলিপুত্রক। ইতি শব্দরত্নাবলী॥

পৌষ্যঃ (পুং) পূষপুত্রঃ। স চ করবীরপুরস্য রাজা। তস্য পুত্রঃ শিবাংশজশ্চন্দ্রশেখরঃ। যথা। পূষ্ণঃ পুত্রোঽভবৎ পৌষ্যঃ সর্ব্বশাস্ত্রার্থপারগঃ। স পুত্রহীনো রাজাভূৎ পৌষ্যো নৃপতিসত্তমঃ॥ ততঃ পুত্রার্থিনং ভূপং প্রসন্নো বৃষভধ্বজঃ। ব্রহ্মদত্তফলং হস্তে কৃত্বেদং তমুবাচ হ॥ ইদং ফলং ব্রহ্মদত্তং বিভজ্য নৃপতে ত্রিধা। ভোজয়েস্তাঃ স্বজায়াস্ত্বং প্রহৃষ্টঃ শুদ্ধমানসঃ॥ ততঃ ফলে স্বয়ং দেবঃ প্রবিবেশ বৃষধ্বজঃ। তৎক্ষণাত্তৎ ফলং ভূতং ত্রিভাগং স্বয়মেব হি॥ ততঃ সমুচিতে কালে প্রাপ্তে তাভিস্তু ভক্ষিতং। তৎ ফলং নৃপশার্দ্দূল গর্ব্ভাশ্চাপ্যাহিতাঃ শুভাঃ॥ সম্পূর্ণে গর্ব্ভকালে তু গর্ব্ভেভ্যঃ সমজায়ত। খণ্ডত্রয়ং পৃথক্ রাজা যথা ভর্গেণ ভাষিতং॥ তচ্চ খণ্ডত্রয়ং পৌষ্যো যথাস্থানং নিযোজ্য চ। একং পিণ্ডং চকারাশু তত্র পুত্রো ব্যজায়ত॥ তস্য নামাকরোদ্রাজা ব্রাহ্মণৈঃ স্বৈঃ পুরোহিতৈঃ। চন্দ্রশেখর ইত্যেবং কান্ত্যা চন্দ্রমসঃ সমঃ॥ ব্রহ্মাবর্ত্তাহ্বয়ে রম্যে করবীরাহ্বয়ে পুরে। দৃশদ্বতীনদীতীরে রাজা ভূত্বা মুমোদ হ॥ ইতি কালিকাপুরাণে৪৬ অধ্যায়াৎ সংকলিতঃ॥

প্যাট্ ব্য হে। ভোঃ। ইত্যমরঃ॥

প্যায় ও ঈ ঙ বৃদ্ধৌ। ইতি কবিকল্পদ্রুমঃ॥ ও ঈ পীনং মুখং। উপসর্গাত্তু প্রপ্যানং। অস্বাঙ্গে তু প্যানঃ পীনঃ স্বেদঃ। ঙ প্যায়তে। ইতি দুর্গাদাসঃ॥

প্যুষ ক উৎসৃজি। ইতি কবিকল্পদ্রুমঃ॥ অন্তঃস্থাদ্যযুক্তঃ। উৎসৃজি উৎসর্গে। ক প্যোষয়তি ধনং দাতা। ইতি দুর্গাদাসঃ॥

প্যুষ য ইর্ ভাগে। দহি। ইতি কবিকল্পদ্রুমঃ॥ অন্তঃস্থাদ্যযুক্তঃ। য প্যুষ্যতি ধনং দায়াদঃ। ইর্ অপ্যুষৎ অপ্যোষীৎ। অস্মাৎ পুষাদিত্বান্নিত্যং ঙ ইত্যন্যে। ইতি দুর্গাদাসঃ॥

প্যুস য ইর্ বিভাগে। ইতি কবিকল্পদ্রুমঃ॥ অন্তঃস্থাদ্যযুক্তঃ। য প্যুস্যতি ধনং দায়াদঃ। ইর্ অপ্যুসৎ অপ্যোসীৎ। অস্মাৎ পুষাদিত্বাৎ নিত্যং ঙ ইত্যন্যে। ইতি দুর্গাদাসঃ॥

পৈ্য ঙ বৃদ্ধৌ। ইতি কবিকল্পদ্রুমঃ॥ অন্তঃস্থাদ্যযুক্তঃ। ঙ প্যায়তে। ইতি দুর্গাদাসঃ॥

প্র ব্য বিংশত্যুপসর্গান্তর্গতপ্রথমোপসর্গঃ। অস্যার্থাঃ। গতিঃ। আরম্ভঃ। উৎকর্ষঃ। সর্ব্বতোভাবঃ। প্রাথম্যং। খ্যাতিঃ। উৎপত্তিঃ। ব্যবহারঃ। ইতি দুর্গাদাসধৃতপুরুষোত্তমঃ॥

প্রকটং (ত্রি) স্পষ্টং। অস্য পর্য্যায়াঃ প্রকাশশব্দে দ্রষ্টব্যাঃ। প্রকটাপ্রকটা চেতি লীলা সেয়ং দ্বিধোচ্যতে। ইতি ভাগবতামৃতং॥

প্রকটিতং (ত্রি) প্রকাশিতং। ইতি হেমচন্দ্রঃ॥

প্রকম্পনঃ (পুং) বায়ুঃ। ইতি হেমচন্দ্রঃ॥ নরকবিশেষঃ। ইতি শব্দরত্নাবলী॥ কম্পাতিশয়ে ক্লী॥

প্রকরং (ক্লী) অগুরু। ইতি মেদিনী॥

প্রকরঃ (পুং) সমূহঃ। বিকীর্ণকুসুমাদিঃ। ইতি মেদিনী॥

প্রকরণং (ক্লী) প্রস্তাবঃ। অভিনেয়প্রকারঃ। রূপকভেদঃ। ইতি হেমচন্দ্রঃ॥ গ্রন্থসন্ধিঃ। ইতি ত্রিকাণ্ডশেষঃ॥ পাদঃ। স তু একার্থাবচ্ছিন্নসূত্রসমূহঃ। ইতি মুগ্ধবোধটীকায়াং দুর্গাদাসঃ॥

প্রকরী (স্ত্রী) নাট্যাঙ্গং। চত্বরভূমিঃ। ইতি শব্দরত্নাবলী॥

প্রকর্ষঃ (পুং) উৎকর্ষঃ। যথা। গুণপ্রকর্ষেণ জনোঽনুরজ্যতে জনানুরাগপ্রভবা হি সম্পদঃ। ইতি কাব্যপ্রকাশঃ॥

প্রকাণ্ডঃ (পুং ক্লী) মূলাদারভ্য শাখাবধিবৃক্ষভাগঃ। গুঁড়ী ইতি ভাষা। তৎপর্য্যায়ঃ। স্কন্ধঃ ২। ইত্যমরঃ॥ কাণ্ডং ৩। ইতি শব্দরত্নাবলী॥ দণ্ডঃ ৪। ইতি রাজনির্ঘণ্টঃ॥ বিটপঃ। শস্তঃ। ইতি মেদিনী॥

প্রকাণ্ডরঃ (পুং) বৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

প্রকামং (ত্রি) যথেপ্সিতং। ইত্যমরঃ॥

প্রকারঃ (পুং) ভেদঃ। সাদৃশ্যং। ইত্যমরঃ॥

প্রকাশং (ক্লী) কাংস্যং। ইতি হেমচন্দ্রঃ॥

প্রকাশঃ (পুং) রৌদ্রঃ। তৎপর্য্যায়ঃ। দ্যোতঃ ২ আতপঃ ৩। ইত্যমরঃ॥ রাজনির্ঘণ্টোক্তপর্য্যায়াঃ প্রভাশব্দে দ্রষ্টব্যাঃ। প্রদীপ্তঃ। তৎপর্য্যায়ঃ। স্ফুটং ২ স্পষ্টং ৩ প্রকটং ৪ উল্বণং ৫ ব্যক্তং ৬। ইতি হেমচন্দ্রঃ॥ প্রব্যক্তং ৭ উদ্রিক্তং ৮। ইতি জটাধরঃ॥ প্রহাসঃ। ইতি মেদিনী॥ অতিপ্রসিদ্ধঃ। ইতি শব্দরত্নাবলী॥

প্রকাশকঃ (ত্রি) প্রকাশকর্ত্তা। প্রকাশয়তীত্যর্থে ণকপ্রত্যয়ঃ॥

প্রকাশকজ্ঞাতা [ঋ] (পুং) কুক্কুটঃ। ইতি শব্দচন্দ্রিকা॥ প্রকাশকজ্ঞাতৃরি ত্রি॥

প্রকাশাত্মা [ন্] (পুং) সূর্য্যঃ। ইতি শব্দচন্দ্রিকা॥ ব্যক্তস্বভাবে ত্রি॥

প্রকাশিতং (ত্রি) প্রকাশবিশিষ্টং। তৎ-

পর্য্যায়ঃ। দর্শিতং ২ আবিষ্কৃতং ৩ প্রকটিতং ৪। ইতি হেমচন্দ্রঃ ॥

প্রকীর্ণং (ক্লী) গ্রন্থবিচ্ছেদঃ। ইতি জটাধরঃ ॥ চামরং। ইতি ত্রিকাণ্ডশেষঃ ॥

প্রকীর্ণঃ (পুং) পূতিকরঞ্জঃ। ইতি রাজনির্ঘণ্টঃ ॥

প্রকীর্ণঃ (ত্রি) বিক্ষিপ্তঃ। বিস্তৃতঃ। যথা। প্রকীর্ণভাণ্ডামনবেক্ষ্যকারিণীং সদৈব ভর্ত্তুঃ প্রতিকূলবাদিনীং। পরস্য বেশ্মাভিরতামলজ্জামেবংবিধাং স্ত্রীং পরিবর্জ্জয়ামি ॥ ইতি লক্ষ্মীচরিত্রং ॥ নানাপ্রকারমিশ্রিতঃ। যথা। প্রকীর্ণঃ পুষ্পাণাং হরিচরণয়োরঞ্জলিরয়ং ॥ ইতি বেণীসংহারঃ ॥

প্রকীর্ণকং (ক্লী) চামরং। ইত্যমরঃ ॥ বিস্তারঃ। ইতি মেদিনী ॥ গ্রন্থবিচ্ছেদঃ। ইতি হেমচন্দ্রঃ ॥ পাপবিশেষঃ। তথা বিষ্ণুঃ। যদনুক্তং তৎ প্রকীর্ণকং। প্রকীর্ণপাতকে জ্ঞাত্বা গুরুত্বমথ লাঘবং। প্রায়শ্চিত্তং বুধঃ কুর্য্যাৎ ব্রাহ্মণানুমতে সদা ॥ অনুক্তং অনুক্তনিষ্কৃতিকং পাপং। অতিপাতকাদ্যন্যতমত্বেন বিশেষতোঽনুক্তকং। ইতি প্রায়শ্চিত্তবিবেকঃ ॥

প্রকীর্ণকঃ (পুং) তুরঙ্গমঃ। ইতি মেদিনী ॥

প্রকীর্ত্তিতং (ত্রি) কথিতং। যথা। প্রভূতমল্পং কার্য্যং বা যো নরঃ কর্ত্তুমিচ্ছতি। সর্ব্বারম্ভেণ তৎ কুর্য্যাৎ সিংহাদেকং প্রকীর্ত্তিতং ॥ ইতি চাণক্যসংগ্রহঃ ॥

প্রকীর্য্যঃ (পুং) করঞ্জভেদঃ। নাটাকরঞ্জ ইতি ভাষা। ইত্যমরঃ ॥ ঘৃতকরঞ্জঃ। রীঠাকরঞ্জঃ। ইতি রাজনির্ঘণ্টঃ ॥

প্রকুলং (ক্লী) প্রশস্তবপুঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

প্রকৃতঃ (ত্রি) প্রকরণপ্রাপ্তঃ। যথা। প্রকৃতমনুসরামঃ। প্রকর্ষেণ কৃতঃ। অবিকৃতঃ। প্রপূর্ব্বককৃধাতোঃ কর্ম্মণি কর্ত্তরি চ ক্তপ্রত্যয়ঃ ॥

প্রকৃতিঃ (স্ত্রী) স্বভাবঃ। যোনিঃ। লিঙ্গং। স্বামী। অমাত্যঃ। সুহৃৎ। কোষঃ। রাষ্ট্রং। দুর্গং। বলং। পৌরাণাং শ্রেণয়ঃ। ইত্যমরঃ ॥ শিল্পী। ইতি হেমচন্দ্রঃ ॥ শক্তিঃ। যোষিৎ। ইতি শব্দরত্নাবলী ॥ পরমাত্মা। ইতি ধরণিঃ ॥ পঞ্চভূতানি। করণং। গুহ্যং। জন্তুঃ। একবিংশত্যক্ষরপাদচ্ছন্দোবিশেষঃ। মাতা। ইতি নানার্থরত্নমালা ॥ প্রত্যয়াৎ প্রথমঃ। স চ দ্বিধা ধাতুর্নাম চ। ইত্যজয়পালঃ ॥ ভগবতো মায়াখ্যা শক্তিঃ। সা চ পরাপরভেদেন দ্বিধা। যথা। ভূমিরাপো ঽনলো বায়ুঃ খং মনো বুদ্ধিরেব চ। অহঙ্কার ইতীয়ং মে ভিন্না প্রকৃতিরষ্টধা ॥৪॥ অপরেয়মিতস্ত্বন্যাং প্রকৃতিং বিদ্ধি মে পরাং। জীবভূতাং মহাবাহো যয়েদং ধার্য্যতে জগৎ ॥ ৫ ॥ ইতি শ্রীভগবদ্গীতায়াং ৭ অধ্যায়ঃ ॥ এবং শ্রোতারমভিমুখীকৃত্য ইদানীং প্রকৃতিদ্বারা সৃষ্ট্যাদিকর্ত্তৃত্বেন ঈশ্বরতত্ত্বং প্রতিজ্ঞাতং নিরূপয়িষ্যন্ পরাপরভেদেন প্রকৃতিদ্বয়মাহ ভূমিরিতি দ্বাভ্যাং। ভূম্যাদীনি পঞ্চভূতসূক্ষ্মাণি মনঃশব্দেন তৎকারণভূতোঽহঙ্কারঃ বুদ্ধিশব্দেন তৎকারণং মহত্তত্ত্বং

অহঙ্কারশব্দেন তৎকারণমবিদ্যা ইত্যেব-মষ্টধা ভিন্না। যদ্বা ভূম্যাদিশব্দৈঃ পঞ্চ মহাভূতানি সূক্ষ্মৈঃ সহ একীকৃত্য গৃহ্যন্তে। অহঙ্কারশব্দেনৈবাহঙ্কারং তেনৈব তৎ-কার্য্যাণি ইন্দ্রিয়াণ্যপি গৃহ্যন্তে বুদ্ধিরিতি মহত্তত্ত্বং। মনঃশব্দেন তু মনসৈবোন্নেয়ং অব্যক্তস্বরূপং প্রধানমিত্যনেন প্রকারেণ মে প্রকৃতির্মায়াখ্যা শক্তিরষ্টধা ভিন্না বিভাগং প্রাপ্তা। চতুর্বিংশতিভেদভিন্না প্যষ্টস্বেবান্তর্ভাববিবক্ষয়াষ্টধা ভিন্নে-ত্যুক্তং। তথা চ ক্ষেত্রাধ্যায়ে ইমামেব প্রকৃতিং চতুর্বিংশতিতত্ত্বাত্মনা প্রপঞ্চয়ি-ষ্যতি। মহাভূতান্যহঙ্কারো বুদ্ধিরব্যক্ত-মেব চ। ইন্দ্রিয়াণি দশৈকঞ্চ পঞ্চ চেন্দ্রিয়-গোচরা ইতি ॥৪॥ অপরামিমাং প্রকৃতি-মুপসংহরন্ পরাং প্রকৃতিমাহ অপরেয় মিতি। অষ্টধা প্রকৃতিরুক্তা ইয়মপরা নিকৃষ্টা জড়ত্বাৎ পরার্থত্বাচ্চ। ইতঃ সকাশাৎ পরাং প্রকৃষ্টামন্যাং জীবভূতাং জীবস্বরূপাং মে প্রকৃতিং জানীহি। পরত্বে হেতুঃ যয়া চেতনয়া ক্ষেত্রজ্ঞস্বরূপয়া স্বকর্ম্মদ্বারেণেদং জগদ্ধার্য্যতে ॥ ৫ ॥ ইতি তট্টীকায়াং শ্রীধরস্বামী ॥ সত্ত্বরজস্তমসাং সাম্যাবস্থা। যথা। সত্ত্বং রজস্তমশ্চৈব গুণত্রয়মুদাহৃতং। সাম্যাবস্থিতিরেতেষাং প্রকৃতিঃ পরিকীর্ত্তিতা ॥ কেচিৎ প্রধান-মিত্যাহুরব্যক্তমপরে জগুঃ। এতদেব প্রজাসৃষ্টিং করোতি বিকরোতি চ ॥ ইতি মাৎস্যে ৩ অধ্যায়ঃ ॥ তৎপর্য্যায়ঃ। প্রধানং ২। ইত্যমরঃ ॥ মায়া ৩ শক্তিঃ ৪ চৈতন্যং ৫। ইতি রাজনির্ঘণ্টঃ ॥ তস্যা নামান্তরাণি যথা। তমোঽব্যক্তং শিবো ধাম রজো যোনিঃ সনাতনঃ। প্রকৃতি-র্বিকারঃ প্রলয়ঃ প্রধানং প্রভবাপ্যয়ৌ ॥ অনুদ্রিক্তমনূনং বাপ্যকম্পমচলং ধ্রুবং। সদসচ্চৈব তৎসর্ব্বমব্যক্তং ত্রিগুণং স্মৃতং। জ্ঞেয়ানি নামধেয়ানি নরৈরধ্যাত্মচিন্তকৈঃ ॥ অব্যক্তনামানি গুণাংশ্চ তত্ত্বতো যো বেদ সর্ব্বাণি গতীশ্চ কেবলাঃ। বিমুক্তদেহঃ প্রবিভাগতত্ত্ববিৎ স মুচ্যতে সর্ব্বগুণৈ র্নিরাময়ঃ॥ ইতি মহাভারতে আশ্বমেধিক-পর্ব্ব ॥ * ॥ সা পঞ্চবিধা। গণেশজননী দুর্গা রাধা লক্ষ্মীঃ সরস্বতী। সাবিত্রী চ সৃষ্টিবিধৌ প্রকৃতিঃ পঞ্চমী স্মৃতা ॥ * ॥ তস্যা ব্যুৎপত্তির্যথা। প্রকৃষ্টবাচকঃ প্রশ্চ কৃতিশ্চ সৃষ্টিবাচকঃ। সৃষ্টৌ প্রকৃষ্টা যা দেবী প্রকৃতিঃ সা প্রকীর্ত্তিতা ॥ গুণে প্রকৃষ্টে সত্ত্বে চ প্রশব্দো বর্ত্ততে শ্রুতৌ। মধ্যমে রজসি কৃশ্চ তিশব্দস্তামসঃ স্মৃতঃ ॥ ত্রি-গুণাত্মস্বরূপা যা সর্ব্বশক্তিসমন্বিতা। প্রধানা সৃষ্টিকরণে প্রকৃতিস্তেন কথ্যতে ॥ প্রথমে বর্ত্ততে প্রশ্চ কৃতিশ্চ সৃষ্টিবাচকঃ। সৃষ্টে-রাদ্যা চ যা দেবী প্রকৃতিঃ সা প্রকী-র্ত্তিতা ॥ * ॥ তাসাং উৎপত্তিঃ স্বরূপশ্চ যথা। যোগেনাত্মা সৃষ্টিবিধৌ দ্বিধারূপো বভূব সঃ। পুংমাংশ্চ দক্ষিণার্দ্ধাঙ্গাৎ বামা-ঙ্গাৎ প্রকৃতিঃ স্মৃতা ॥ সা চ ব্রহ্মস্বরূপা চ যা যা নিত্যা সনাতনী। যথাত্মা চ যথা-শক্তির্যথাগ্নৌ দাহিকা স্মৃতা ॥ অতএব হি যোগীন্দ্রঃ স্ত্রীপুংভেদং ন মন্যতে। সর্ব্বং

ব্রহ্মময়ং ব্রহ্মন্ শশ্বৎ পশ্যতি নারদ ॥ স্বেচ্ছাময়ং স্বেচ্ছয়া চ শ্রীকৃষ্ণস্য সিসৃক্ষয়া। সাবির্ব্বভূব সহসা মূলপ্রকৃতিরীশ্বরী। তদাজ্ঞয়া পঞ্চবিধা সৃষ্টিকর্ম্মণি বেদতঃ ॥*॥ দুর্গাপ্রকৃতির্যথা। অথ ভক্তানুরোধাদ্বা ভক্তানুগ্রহবিগ্রহা। গণেশমাতা দুর্গা যা শিবরূপা শিবপ্রিয়া ॥ নারায়ণী বিষ্ণুমায়া পূর্ণব্রহ্মস্বরূপিণী। ব্রহ্মাদিদেবৈর্মুনিভির্মনুভিঃ পূজিতা স্তুতা ॥ সর্ব্বাধিষ্ঠাতৃদেবী সা সর্ব্বরূপা সনাতনী। ধর্ম্মসত্যপুণ্যকীর্ত্তিযশোমঙ্গলদায়িনী ॥ সুখমোক্ষহর্ষদাত্রী শোকার্ত্তিদুর্গনাশিনী। শরণাগতদীনার্ত্তপরিত্রাণপরায়ণা ॥ তেজঃস্বরূপা পরমা তদধিষ্ঠাতৃদেবতা। সর্ব্বশক্তিস্বরূপা চ শক্তিরীশস্য সন্ততং ॥ সিদ্ধেশ্বরী সিদ্ধরূপা সিদ্ধিদা সিদ্ধিদেশ্বরী। বুদ্ধির্নিদ্রা ক্ষুৎ পিপাসা ছায়া তন্দ্রা দয়া স্মৃতিঃ ॥ জাতিঃ শান্তিশ্চ ক্ষান্তিশ্চ কান্তির্ভ্রান্তিশ্চ চেতনা। তুষ্টিঃ পুষ্টিস্তথা লক্ষ্মীর্ব্বৃত্তির্মাতা তথৈব চ ॥ সর্ব্বশক্তিস্বরূপা সা কৃষ্ণস্য পরমাত্মনঃ। উক্তঃ শ্রুতৌ শ্রুতিগুণশ্চাতিস্বল্পং যথাগমং ॥ গুণোঽস্ত্যনন্তোঽনন্তায়া অপরাঞ্চ নিশাময় ॥১॥*॥ লক্ষ্মীপ্রকৃতির্যথা। শৃণু সত্ত্বস্বরূপা যা পদ্মা চ পরমাত্মনঃ। সর্ব্বসম্পৎস্বরূপা সা তদধিষ্ঠাতৃদেবতা ॥ কান্তা দান্তা চ শান্তা চ সুশীলা সর্ব্বমঙ্গলা। লোভমোহকামরোষাহঙ্কারপরিবর্জ্জিতা ॥ ভক্তানুরক্তা পত্যুশ্চ সর্ব্বাভ্যশ্চ পতিব্রতা। প্রাণতুল্যা ভগবতঃ প্রেমপাত্রী প্রিয়ম্বদা ॥ সর্ব্বশস্যাত্মিকা সর্ব্বজীবনোপায়রূপিণী। মহালক্ষ্মীশ্চ বৈকুণ্ঠে পাতালে বরদা সতী ॥ স্বর্গে চ স্বর্গলক্ষ্মীশ্চ মর্ত্যানাং গৃহিণাস্তথা। সর্ব্বপ্রাণিষু দ্রব্যেষু শোভারূপা মনোহরা ॥ প্রীতিরূপা পুণ্যবতাং প্রভারূপা নৃপেষু চ। বাণিজ্যরূপা বণিজাং পাপিনাং কলহাঙ্কুরা ॥ দয়াময়ী ভক্তিমতো ভক্তানুগ্রহকাতরা। চপলে চপলা ভক্তা সম্পদে চ ধনায় চ ॥ জগজ্জীবং মৃতং সর্ব্বং যয়া দেব্যা বিনা মুনে। শক্তির্দ্বিতীয়া কথিতা বেদোক্তা সর্ব্বসম্মতা ॥ সর্ব্বপূজ্যা সর্ব্ববন্দ্যা চান্যাং মত্তো নিশাময় ॥ ২ ॥ * ॥ সরস্বতীপ্রকৃতির্যথা। বাগ্‌বুদ্ধিবিদ্যাজ্ঞানাধিদেবতা পরমাত্মনঃ। সর্ব্ববিদ্যা সর্ব্বরূপা সা চ দেবী সরস্বতী ॥ স্ববুদ্ধিকবিতা মেধা প্রতিভা স্মৃতিদা সতাং। নানাপ্রকারসিদ্ধান্তভেদার্থকল্পনাপ্রদা ॥ ব্যাখ্যা বোধস্বরূপা চ সর্ব্বসন্দেহভঞ্জিনী। বিচারকারিণী গ্রন্থকারিণী শক্তিরূপিণী ॥ স্বরসঙ্গীতসন্ধানতালকারণরূপিণী। বিষয়জ্ঞানবাগ্রূপা প্রতিবিশ্বেষু জীবিনাং ॥ ব্যাখ্যা মুদ্রাকরা শান্তা বীণাপুস্তকধারিণী। শৃণু সত্ত্বস্বরূপা চ সুশীলা শ্রীহরিপ্রিয়া ॥ হিমচন্দনকুন্দেন্দুকুমুদাম্ভোজসন্নিভা। জপন্তী পরমাত্মানং শ্রীকৃষ্ণং রত্নমালয়া ॥ তপঃস্বরূপা তপসাং ফলদাত্রী তপস্বিনী। বুদ্ধিবিদ্যাস্বরূপা চ সর্ব্বসিদ্ধিপ্রদা সদা ॥ যয়া বিনা চ বিশ্বৌঘো মূকো মৃতসমঃ সদা। দেবী তৃতীয়া গদিতা শ্রুত্যুক্তা জগদম্বিকা। যথাগমং যথাকিঞ্চিদপরাং

সংনিবোধ মে ॥৩॥*॥ সাবিত্রীপ্রকৃতির্যথা। মাতা চতুর্ণাং বেদানাং বেদজ্ঞানাঞ্চ ছন্দসাং। সন্ধ্যাবন্দনমন্ত্রাণাং তন্ত্রাণাঞ্চ বিচক্ষণা ॥ দ্বিজাতিজাতিরূপা চ জপরূপা তপস্বিনী। ব্রহ্মণ্যতেজোরূপা চ সর্ব্বসংস্কারকারিণী ॥ পবিত্ররূপা সাবিত্রী গায়ত্রী ব্রহ্মণঃ প্রিয়া। তীর্থানি যস্যাঃ সংস্পর্শং দর্শং বাঞ্ছন্তি শুদ্ধয়ে ॥ শুদ্ধস্ফটিকসঙ্কাশা শুদ্ধসত্ত্বস্বরূপিণী। পরমানন্দরূপা চ পরমা চ সনাতনী॥ পরংব্রহ্মস্বরূপা চ নির্ব্বাণপদদায়িনী। ব্রহ্মতেজোময়ী শক্তিস্তদধিষ্ঠাতৃদেবতা ॥ যৎপাদরজসা পূতং জগৎ সর্ব্বঞ্চ নারদ। দেবী চতুর্থী কথিতা পঞ্চমীং বর্ণয়ামি তে ॥৪॥*॥ রাধাপ্রকৃতির্যথা। প্রেমপ্রাণাধিকা দেবী যা পঞ্চপ্রাণরূপিণী। প্রাণাধিকপ্রিয়তমা সর্ব্বাভ্যঃ সুন্দরী বরা ॥ সর্ব্বসৌভাগ্যযুক্তা চ মানিনী গৌরবান্বিতা। বামার্দ্ধাঙ্গস্বরূপা চ গুণেন তেজসা সমা ॥ পরা বরা সারভূতা পরমাদ্যা সনাতনী। পরমানন্দরূপা চ ধন্যা মান্যা চ পূজিতা ॥ রাসক্রীড়াধিদেবী চ কৃষ্ণস্য পরমাত্মনঃ। রাসমণ্ডলসংভূতা রাসমণ্ডলমণ্ডিতা॥ রাসেশ্বরী সুরসিকা রাসবাসনিবাসিনী। গোলোকবাসিনী দেবী গোপীবেশবিধায়িকা ॥ পরমাহ্লাদরূপা চ সন্তোষহর্ষরূপিণী। নির্গুণা চ গুণাকারা নির্লিপ্তাত্মস্বরূপিণী ॥ নিরীহা নিরহঙ্কারা ভক্তানুগ্রহবিগ্রহা। বেদানুসারধ্যানেন বিজ্ঞাতা সা বিচক্ষণৈঃ ॥ দৃষ্টিদৃষ্টা লসদ্বেশা সুরেন্দ্রৈর্মুনিপুঙ্গবৈঃ। বহ্নিশুদ্ধাংশুকাধানা রত্নালঙ্কারভূষিতা ॥ কোটিচন্দ্রপ্রভাজুষ্টপুষ্টশ্রীযুক্তবিগ্রহা। শ্রীকৃষ্ণভক্তিদা সৈব দাত্রী চ সর্ব্বসম্পদাং ॥ অবতারে চ বারাহে বৃষভানুসুতা চ যা। যৎপাদপদ্মসংস্পর্শপবিত্রা চ বসুন্ধরা ॥ ব্রহ্মাদিভিরদৃষ্টা যা সর্ব্বদৃষ্টা চ ভারতে। স্ত্রীরত্নসারসংভূতা কৃষ্ণবক্ষঃস্থলোজ্জ্বলা ॥ যথা ঘনে নবঘনে লোলা সৌদামিনী মুনে। ষষ্টিবর্ষসহস্রাণি প্রতপ্তং ব্রহ্মণা পুরা ॥ যৎপাদপদ্মনখরদৃষ্টয়ে চাত্মশুদ্ধয়ে। ন চ দৃষ্টাপি স্বপ্নেঽপি প্রত্যক্ষস্যাপি কা কথা ॥ তেনৈব তপসা দৃষ্টা ভুবি বৃন্দাবনে বনে। কথিতা পঞ্চমী দেবী সা রাধা পরিকীর্ত্তিতা ॥ অংশরূপা কলারূপা কলাংশাংশসমুদ্ভবা। প্রকৃতিঃ প্রতিবিশ্বেষু দেব্যশ্চ সর্ব্বযোষিতঃ ॥ পরিপূর্ণতমা পঞ্চবিধা দেবী প্রকীর্ত্তিতা। যা যাঃ প্রধানাংশরূপা বর্ণয়ামি নিশাময় ॥ ৫ ॥*॥ গঙ্গা যথা। প্রধানাংশস্বরূপা যা গঙ্গা ভুবনপাবনী। বিষ্ণুবিগ্রহসংভূতা দ্রবরূপা সনাতনী ॥ পাপিপাপেন্ধদাহায় জ্বলদিন্ধনরূপিণী। সুখস্পর্শস্নানপানে নির্ব্বাণপদদায়িনী ॥ গোলোকে স্থানপ্রস্থানসুখসোপানরূপিণী। পবিত্ররূপা তীর্থানাং সরিতাঞ্চ পরা বরা ॥ শম্ভুমৌলিজটামেরুমুক্তাপংক্তিস্বরূপিণী। তপঃসম্পাদিনী সদ্যো ভারতে চ তপস্বিনাং ॥ চন্দ্রপদ্মক্ষীরনিভা শৃণু সত্ত্বস্বরূপিণী। নির্ম্মলা নিরহঙ্কারা সাধ্বী নারায়ণপ্রিয়া ॥ ১ ॥*॥ তুলসী যথা।

প্রধানাংশস্বরূপা চ তুলসী বিষ্ণুকামিনী। বিষ্ণুভূষণরূপা চ বিষ্ণুপাদস্থিতা সতী॥ তপঃসঙ্কল্পপূজাদিসদ্যঃসম্পাদিনী মুনে। সারভূতা চ পুষ্পাণাং পবিত্রা পুণ্যদা সদা॥ দর্শনস্পর্শনাভ্যাঞ্চ সদ্যোনির্ব্বাণদায়িনী। কলৌ কলুষশুষ্কেধ্মদাহায়াগ্নিস্বরূপিণী॥ যৎপাদপদ্মসংস্পর্শসদ্যঃপূতা বসুন্ধরা। যৎস্পর্শদর্শং বাঞ্ছন্তি তীর্থানি চাত্মশুদ্ধয়ে॥ যয়া বিনা চ বিশ্বেষু সর্ব্বকর্ম্মাতিনিষ্ফলং। মোক্ষদা যা মুমুক্ষূণাং কামিনাং সর্ব্বকামদা॥ কল্পবৃক্ষস্বরূপা চ ভারতে ব্রহ্মরূপিণী। ত্রাণায় ভারতানাঞ্চ প্রজানাং পরদেবতা॥ ২॥ *॥ মনসা যথা। প্রধানাংশস্বরূপা যা মনসা কশ্যপাত্মজা। শঙ্করপ্রিয়শিষ্যা চ মহাজ্ঞানবিশারদা॥ নাগেশ্বরস্যানন্তস্য ভগিনী নাগপূজিতা। নাগেশ্বরী নাগমাতা সুন্দরী নাগবাহিনী॥ নাগেন্দ্রগণযুক্তা সা নাগভূষণভূষিতা। নাগেন্দ্রৈর্ব্বন্দিতা সিদ্ধযোগিনী নাগশায়িনী॥ বিষ্ণুরূপা বিষ্ণুভক্তা বিষ্ণুপূজাপরায়ণা। তপঃস্বরূপা তপসাং ফলদাত্রী তপস্বিনী॥ দিব্যং ত্রিলক্ষবর্ষঞ্চ তপস্তপ্তং যয়া হরেঃ। তপস্বিনীষু পূজ্যা চ তপস্বিনা চ ভারতে॥ সর্পমন্ত্রাধিদেবী চ জ্বলন্তী ব্রহ্মতেজসা। ব্রহ্মস্বরূপা পরমা ব্রহ্মভাবেন তৎপরা॥ জরৎকারুমুনেঃ পত্নী কৃষ্ণাংশস্য পতিব্রতা। আস্তিকস্য মুনের্ম্মাতা প্রবরস্য তপস্বিনাং॥ ৩॥ *॥ ষষ্ঠী যথা। প্রধানাংশস্বরূপা যা দেবসেনা চ নারদ।

মাতৃকাসু পূজ্যতমা সা চ ষষ্ঠী প্রকীর্ত্তিতা॥ শিশূনাং প্রতিবিশ্বেষু প্রতিপালনকারিণী। তপস্বিনী বিষ্ণুভক্তা কার্ত্তিকেয়স্য কামিনী। ষষ্ঠাংশরূপা প্রকৃতেস্তেন ষষ্ঠী প্রকীর্ত্তিতা॥ পুত্রপৌত্রপ্রদাত্রী চ ধাত্রীতি জগতাং সতী। সুন্দরী যুবতী রম্যা সন্ততং ভর্ত্তুরন্তিকে॥ স্থানে শিশূনাং পরমা বৃদ্ধরূপা চ যোগিনী। পূজা দ্বাদশমাসেষু যস্যা বিশ্বেষু সন্ততং॥ পূজা চ সূতিকাগারে পরা ষষ্ঠদিনে শিশোঃ। একবিংশতিমে চৈব পূজা কল্যাণহেতুকী॥ শশ্বন্নিয়মিতা চৈষা নিত্যা কাম্যা হৃতিঃ পরা। মাতৃরূপা দয়ারূপা শশ্বদ্রক্ষণরূপিণী॥ জলে স্থলে চান্তরীক্ষে শিশূনাং স্বপ্নগোচরে॥ ৪॥ *॥ মঙ্গলচণ্ডী যথা। প্রধানাংশস্বরূপা চ দেবী মঙ্গলচণ্ডিকা। প্রকৃতের্মুখ্যসংভূতা সর্ব্বমঙ্গলদা সদা॥ সৃষ্টৌ মঙ্গলরূপা চ সংহারে কোপরূপিণী। তেন মঙ্গলচণ্ডী সা পণ্ডিতৈঃ পরিকীর্ত্তিতা॥ প্রতিমঙ্গলবারেষু প্রতিবিশ্বেষু বন্দিতা। পঞ্চোপচারৈর্যোষিদ্ভির্ভক্ত্যা চ পরিপূজিতা॥ পুত্রপৌত্রধনৈশ্বর্য্যযশোমঙ্গলদায়িনী। লোকসন্তাপপাপার্ত্তিদুঃখদারিদ্রনাশিনী॥ পরিতুষ্টা সর্ব্ববাঞ্ছাপ্রদাত্রী সর্ব্বযোষিতাং। রুষ্টা ক্ষণেন সংহর্ত্তুং শক্তা বিশ্বং মহেশ্বরী॥ ৫॥ *॥ কালী যথা। প্রধানাংশস্বরূপা চ কালী কমললোচনা। দুর্গাললাটসংভূতা রণে শুম্ভনিশুম্ভয়োঃ॥ দুর্গার্দ্ধাংশস্বরূপা সা গুণেন তেজসা সমা। কোটিসূর্য্যপ্রভা-

জুস্টপুষ্টজাজ্বল্যবিগ্রহা॥ প্রধানা সর্ব্বশক্তীনাং বরা বলবতী পরা। সর্ব্বসিদ্ধিপ্রদা দেবী পরমা সিদ্ধযোগিনী॥ কৃষ্ণভক্তা কৃষ্ণতুল্যা তেজসা বিক্রমৈর্গুণৈঃ। কৃষ্ণভাবনয়া শশ্বৎ কৃষ্ণবর্ণা সনাতনী॥ সংহর্ত্তুং সর্ব্বব্রহ্মাণ্ডং শক্তা নিশ্বাসমাত্রতঃ। রণং দৈত্যৈঃ সমং তস্যাঃ ক্রীড়য়া লোকরক্ষয়া॥ ধর্ম্মার্থকামমোক্ষাংশ্চ দাতুং শক্তা চ পূজিতা। ব্রহ্মাদিভিঃ স্তূয়মানা মুনিভির্ম্মনুভির্নরৈঃ॥৬॥*॥ বসুন্ধরাপ্রকৃতির্যথা। প্রধানাংশস্বরূপা চ প্রকৃতেশ্চ বসুন্ধরা। আধাররূপা সর্ব্বেষাং সর্ব্বশস্যপ্রসূতিকা॥ রত্নাকরা রত্নগর্ভা সর্ব্বরত্নাকরালয়া। প্রজাভিশ্চ প্রজেশৈশ্চ পূজিতা বন্দিতা সদা॥ সর্ব্বোপজীব্যরূপা চ সর্ব্বসম্পদ্বিধায়িনী। যয়া বিনা জগৎ সর্ব্বং নিরাধারং চরাচরং॥ ৭ ॥*॥ প্রকৃতেশ্চ কলা যা যাস্তা নিবোধ মুনীশ্বর। যস্য যস্য চ যাঃ পত্ন্যস্তাঃ সর্ব্বা বর্ণয়ামি তে॥ স্বাহা দেবী বহ্নিপত্নী ত্রিষু লোকেষু পূজিতা। যয়া বিনা হবিদানং ন গ্রহীতুং সুরাঃ ক্ষমাঃ॥ ১॥ দক্ষিণা যজ্ঞপত্নী চ দীক্ষা সর্ব্বত্র পূজিতা। যয়া বিনা চ বিশ্বেষু সর্ব্বকর্ম্ম চ নিষ্ফলং॥ ২॥ স্বধা পিতৃণাং পত্নী চ মুনিভির্ম্মনুভির্নরৈঃ। পূজিতা পিতৃদানঞ্চ নিষ্ফলঞ্চ যয়া বিনা॥ ৩॥ স্বস্তিদেবী বায়ুপত্নী প্রতিবিশ্বেষু পূজিতা। আদানঞ্চ প্রদানঞ্চ নিষ্ফলঞ্চ যয়া বিনা॥৪॥ পুষ্টির্গণপতেঃ পত্নী প্রতিবিশ্বেষু পূজিতা। যয়া বিনা পরিক্ষীণাঃ পুমাংসো যোষিতো ভবেৎ॥ ৫॥ অনন্তপত্নী তুষ্টিশ্চ পূজিতা বন্দিতা ভবে। যয়া বিনা ন সন্তুষ্টাঃ সর্ব্বে লোকাশ্চ সন্ততং॥ ৬॥ ঈশানপত্নী সম্পত্তিঃ পূজিতা চ সুরৈর্নরৈঃ। সর্ব্বলোকা দরিদ্রাশ্চ বিশ্বেষু চ যয়া বিনা॥ ৭॥ ধৃতিঃ কপিলপত্নী চ সর্ব্বৈঃ সর্ব্বত্র পূজিতা। সর্ব্বলোকা অধৈর্য্যাঃ স্যুর্জগৎসু চ যয়া বিনা॥ ৮॥ যমপত্নী ক্ষমা সাধ্বী সুশীলা সর্ব্বপূজিতা। সমুন্মত্তাশ্চ রুষ্টাশ্চ সর্ব্ব লোকা যয়া বিনা॥ ৯॥ ক্রীড়াধিষ্ঠাতৃদেবী চ কামপত্নী রতিঃ সতী। কেলিকৌতুকহীনাশ্চ সর্ব্বলোকা যয়া বিনা॥ ১০॥ সত্যপত্নী সতী মুক্তিঃ পূজিতা জগতাং প্রিয়া। যয়া বিনা ভবে লোকা বন্ধুতারহিতাঃ সদা॥ ১১॥ মোহপত্নী দয়া সাধ্বী পূজিতা চ জগৎপ্রিয়া। সর্ব্বে লোকাশ্চ সর্ব্বত্র নিষ্ঠুরাশ্চ যয়া বিনা॥১২॥ পুণ্যপত্নী প্রতিষ্ঠা সা পুণ্যরূপাতিপূজিতা। যয়া বিনা জগৎ সর্ব্বং জীবন্মৃতপরং মুনে॥ ১৩॥ সুকর্ম্মপত্নী কীর্ত্তিশ্চ ধন্যা মান্যা চ পূজিতা। যয়া বিনা জগৎ সর্ব্বং যশোহীনং মৃতং যথা॥ ১৪॥ ক্রিয়া উদ্যোগপত্নী চ পূজিতা সর্ব্বসম্মতা। যয়া বিনা জগৎ সর্ব্বমুচ্ছন্নমিব নারদ॥ ১৫॥ অধর্ম্মপত্নী মিথ্যা সা সর্ব্বধূর্ত্তৈশ্চ পূজিতা। যয়া বিনা জগন্মুক্তমুচ্ছন্নং বিধিনির্ম্মিতং॥ সত্যে চাদর্শনা যা চ ত্রেতায়াং সূক্ষ্মরূপিণী। অর্দ্ধাবয়বরূপা চ দ্বাপরে সংবৃতা ভিয়া॥ কলৌ মহাপ্রমত্তা চ সর্ব্বত্র ব্যাপিকা বলাৎ। কপটেন সমং ভ্রাত্রা

ভ্রমত্যেব গৃহে গৃহে ॥ ১৬ ॥ শান্তি১৭-র্লজ্জা ১৮ চ ভার্য্যে দ্বে সুশীলস্য চ পূজিতা। যাভ্যাং বিনা জগৎ সর্ব্বমুন্মত্ত-মিব নারদ॥ জ্ঞানস্য ভার্য্যাস্তিস্রশ্চ বুদ্ধি১৯-র্মেধা ২০ স্মৃতি২১স্তথা। যাভির্বিনা জগৎ সর্ব্বং মূঢ়ং মৃতসমং তদা॥ মূর্ত্তিশ্চ ধর্ম্ম-পত্নী সা কান্তিরূপা মনোহরা। পরমা সা চ বিশ্বৌঘা নিরাধারা যয়া বিনা ॥ সর্ব্বত্র শোভারূপা সা লক্ষ্মীর্মূর্ত্তিমতী সতী। শ্রীরূপা মূর্ত্তিরূপা চ মান্যা ধন্যা চ পূজিতা॥ ২২ ॥ কালাগ্নিরুদ্রপত্নী চ নিদ্রা সা সিদ্ধযোগিনী। সর্ব্বলোকাঃ সমাচ্ছন্না মায়াযোগেন রাত্রিষু ॥ ২৩ ॥ কালস্য তিস্রো ভার্য্যাশ্চ সন্ধ্যা২৪রাত্রি২৫দিনানি চ ২৬। যাভির্বিনা বিধাত্রা চ সংখ্যাং কর্ত্তুং ন শক্যতে॥ ক্ষুৎ২৭পিপাসে ২৮ মনোভার্য্যে ধন্যে মান্যে সুপূজিতে। যাভ্যাং ব্যাপ্তং জগৎ সর্ব্বং যুক্তচিন্তিত-মেব চ॥ প্রভা চ ২৯ দাহিকা ৩০ চৈব দ্বে ভার্য্যে তেজসস্তথা। যাভ্যাং বিনা জগৎ স্রষ্টুং বিধাতাপি নহীশ্বরঃ॥ কাল-কন্যে মৃত্যু৩১জরে ৩২ প্রজ্বরস্য প্রিয়া প্রিয়ে। যাভ্যাং জগৎ সমুচ্ছন্নং বিধাত্রা নির্ম্মিতং বিধৌ॥ নিদ্রাকন্যা চ তন্দ্রা ৩৩ সা প্রীতি৩৪রন্যা সুখপ্রিয়ে। যাভ্যাং ব্যাপ্তং জগৎ সর্ব্বং বিধিপুত্রবিধের্বিধৌ॥ বৈরাগ্যস্য হি জায়ে চ শ্রদ্ধা৩৫ভক্তী ৩৬ চ পূজিতে। যাভ্যাং শশ্বজ্জগৎ সর্ব্বং জীবন্মুক্তমিদং মুনে॥ অদিতি৩৭র্দেবমাতা চ সুরভী ৩৮ চ গবাং প্রসূঃ। দিতিশ্চ ৩৯ দৈত্যজননী কদ্রুশ্চ ৪০ বিনতা ৪১ দনুঃ ৪২॥ উপযুক্তাঃ সৃষ্টিবিধৌ এতাশ্চ প্রকৃতেঃ কলাঃ॥ * ॥ কলাশ্চান্যাঃ সন্তি বহ্ব্যস্তাসু কাশ্চিন্নিবোধ মে॥ রোহিণী ৪৩ চন্দ্রপত্নী চ সংজ্ঞা ৪৪ সূর্য্যস্য কামিনী। শতরূপা ৪৫ মনোর্ভার্য্যা শচীন্দ্রস্য চ গেহিনী ৪৬॥ তারা ৪৭ বৃহস্পতের্ভার্য্যা বশিষ্ঠস্য ত্বরুন্ধতী ৪৮। অহল্যা ৪৯ গৌতম-স্ত্রী তু সানসূয়া৫০ত্রিকামিনী॥ পিতৃণাং মানসী কন্যা মেনকা ৫১ সাম্বিকাপ্রসূঃ। লোপামুদ্রা ৫২ তথা ভূতী ৫৩ কুবের-কামিনী তথা॥ বরুণানী ৫৪ যমস্ত্রী চ বলের্বিন্ধ্যাবলী ৫৫ তথা। কুন্তী চ ৫৬ দময়ন্তী চ ৫৭ যশোদা ৫৮ দৈবকী ৫৯ সতী॥ গান্ধারী ৬০ দ্রৌপদী ৬১ সব্যা ৬২ সাবিত্রী ৬৩ সত্যবৎপ্রিয়া। বৃষভানুপ্রিয়া সাধ্বী রাধামাতা কলাবতী ৬৪ ॥ মন্দো-দরী ৬৫ চ কৌশল্যা ৬৬ সুভদ্রা ৬৭ কৈটভী ৬৮ তথা। রেবতী ৬৯ সত্য-ভামা ৭০ চ কালিন্দী ৭১ লক্ষ্মণা ৭২ তথা ॥ জাম্ববতী ৭৩ নাগ্নজিতী ৭৪ মিত্রবিন্দা ৭৫ তথাপরা। লক্ষ্মণা ৭৬ রুক্মিণী ৭৭ সীতা ৭৮ স্বয়ং লক্ষ্মীঃ প্রকী-র্ত্তিতা॥ কলা যোজনগন্ধা চ ৭৯ ব্যাস-মাতা মহাসতী। বাণপুত্রী তথোষা ৮০ চ চিত্রলেখা চ ৮১ তৎসখী॥ প্রভাবতী ৮২ ভানুমতী ৮৩ তথা মায়াবতী ৮৪ সতী। রেণুকা ৮৫ চ ভৃগোর্মাতা হলিমাতা চ রোহিণী ৮৬ ॥ একানংশা ৮৭ চ দুর্গাংশা শ্রীকৃষ্ণভগিনী সতী। বহ্ব্যঃ সন্তি

কলাশ্চৈব প্রকৃতেরেব ভারতে ॥ যা যাশ্চ গ্রামদেবত্যস্তাঃ সর্ব্বাঃ প্রকৃতেঃ কলাঃ। কলাংশাংশসমুদ্ভূতাঃ প্রতিবিশ্বেষু যোষিতঃ ॥ * ॥ যোষিতামপমানেন প্রকৃতেশ্চ পরাভবঃ। ব্রাহ্মণী পূজিতা যেন পতিপুত্রবতী সতী॥ প্রকৃতিঃ পূজিতা তেন বস্ত্রালঙ্কারচন্দনৈঃ। কুমারী চাষ্ট-বর্ষীয়া বস্ত্রালঙ্কারচন্দনৈঃ। পূজিতা যেন বিপ্রস্য প্রকৃতিস্তেন পূজিতা ॥ * ॥ সর্ব্বাঃ প্রকৃতিসম্ভূতা উত্তমাধমমধ্যমাঃ। সত্বাংশা-শ্চোত্তমা জ্ঞেয়াঃ সুশীলাশ্চ পতিব্রতাঃ ॥ মধ্যমা রাজসাশ্চাংশাস্তাশ্চ ভোগ্যাঃ প্রকী-র্ত্তিতাঃ। সুখসম্ভোগবশ্যাশ্চ স্বকার্য্যে তৎ-পরাঃ সদা। অধমাস্তামসাশ্চাংশা অজাত-কুলসম্ভবাঃ॥ দুর্মুখাঃ কুলটা ধূর্ত্তাঃ স্বতন্ত্রাঃ কলহপ্রিয়াঃ। পৃথিব্যাং কুলটা যাশ্চ স্বর্গে চাপ্সরসাং গণাঃ॥ প্রকৃতেস্তামসাংশাংশাঃ পুংশ্চল্যঃ পরিকীর্ত্তিতাঃ। এবং নিগদিতং সর্ব্বং প্রকৃতেঃ পরিকীর্ত্তনং ॥ * ॥ তাশ্চ সর্ব্বাঃ পূজিতাশ্চ পুণ্যক্ষেত্রে চ ভারতে। পূজিতা সুরথেনাদৌ দুর্গা দুর্গতিনাশিনী॥ দ্বিতীয়ে রামচন্দ্রেণ রাবণস্য বধার্থিনা॥ তৎপশ্চাজ্জগতাং মাতা ত্রিষু লোকেষু পূজিতা। জাতাদৌ দক্ষপত্ন্যাঞ্চ নিহত্য দৈত্যদানবান্॥ ততো দেহং পরিত্যজ্য যজ্ঞে ভর্ত্তুশ্চ নিন্দয়া। জজ্ঞে হিমবতঃ পত্ন্যাং লেভে পশুপতিং পতিং॥ গণেশ-শ্চ স্বয়ং কৃষ্ণঃ স্কন্দো বিষ্ণুকলোদ্ভবঃ। বভূবতুস্তৌ তনয়ৌ পশ্চাত্তস্যাশ্চ শৌনক॥ লক্ষ্মীর্মঙ্গলভূপেন প্রথমে পরিপূজিতা।

ত্রিষু লোকেষু তৎপশ্চাদ্দেবতামুনি মানবৈঃ॥ সাবিত্রী চাশ্বপতিনা প্রথমে পরিপূজিতা। তৎপশ্চাত্ত্রিষু লোকেষু দেবতামুনিমানবৈঃ॥ আদৌ সরস্বতী দেবী ব্রহ্মণা পরিপূজিতা। তৎপশ্চাত্ত্রিষু লোকেষু দেবতামুনিমানবৈঃ ॥ প্রথমে পূজিতা রাধা গোলোকে রাসমণ্ডলে। পৌর্ণমাস্যাং কার্ত্তিকস্য কৃষ্ণেন পরমা-ত্মনা ॥ গোপিকাভিশ্চ গোপৈশ্চ বালি-কাভিশ্চ বালকৈঃ। গবাং গণৈঃ সুরভ্যা চ তৎপশ্চাম্মায়য়া হরেঃ॥ তদা ব্রহ্মাদিভি র্দেবৈর্মুনিভির্মনুভিস্তথা ॥ পুষ্পধূপাদিভি-র্ভক্ত্যা পূজিতা বন্দিতা সদা॥ পৃথিব্যাং প্রথমে দেবী সুযজ্ঞেনৈব পূজিতা। শঙ্ক-রেণোপদিষ্টেন পুণ্যক্ষেত্রে চ ভারতে ॥ ত্রিষু লোকেষু তৎপশ্চাদাজ্ঞয়া পরমা-ত্মনঃ। পুষ্পধূপাদিভির্ভক্ত্যা পূজিতা মুনিভিঃ সুরৈঃ ॥ কলয়া যাঃ সমুদ্ভূতাঃ পূজিতাস্তাশ্চ ভারতে। পূজিতা গ্রাম-দেবত্যো গ্রামে চ নগরে মুনে॥ এবং তে কথিতং সর্ব্বং প্রকৃতেশ্চরিতং শুভং। যথাগমং লক্ষণঞ্চ কিং ভূয়ঃ শ্রোতু-মিচ্ছসি॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে প্রকৃতিচরিতং নামানুক্রমঃ ১ অধ্যায়ঃ॥*॥ পুরুষনাম্নোঽগ্রে প্রকৃতের্নাম উচ্চার্য্যতা যথা। নারদ উবাচ। আদৌ রাধাং সমু-চ্চার্য্য পশ্চাৎ কৃষ্ণং বিদুর্ব্বুধাঃ। নিমিত্ত-মস্য মাং ভক্তং বদ ভক্তজনপ্রিয়॥ শ্রীনারায়ণ উবাচ। নিমিত্তমস্য ত্রিবিধং কথয়ামি নিশাময়। জগন্মাতা চ প্রকৃতিঃ

পুরুষশ্চ জগৎপিতা। গরীয়সীতি জগতাং মাতা শতগুণৈঃ পিতুঃ॥ রাধাকৃষ্ণেতি গৌরীশেত্যেবং শব্দঃ শ্রুতৌ শ্রুতঃ। কৃষ্ণরাধেশগৌরীতি লোকে ন চ কদা শ্রুতঃ॥ প্রসীদ রোহিণীচন্দ্র গৃহাণার্ঘ্যমিদং মম। গৃহাণার্ঘ্যং ময়া দত্তং সংজ্ঞয়া সহ ভাস্কর॥ প্রসীদ কমলাকান্ত গৃহাণ মম পূজনং। ইতি দৃষ্টং সামবেদে কৌথুমে মুনিসত্তম॥ রাশব্দোচ্চারণাদেব স্ফীতো ভবতি মাধবঃ। ধাশব্দোচ্চারতঃ পশ্চাদ্ধাবত্যেব সসম্ভ্রমঃ॥ আদৌ পুরুষমুচ্চার্য্য পশ্চাৎ প্রকৃতিমুচ্চরেৎ। স ভবেন্মাতৃগামী চ বেদাতিক্রমণে মুনে॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ৫০ অধ্যায়ঃ॥

প্রকৃষ্টং (ত্রি) প্রকর্ষযুক্তং। তৎপর্য্যায়ঃ। মুখ্যং ২ প্রমুখং ৩ প্রবর্হং ৪ বর্য্যং ৫ বরেণ্যং ৬ প্রবরং ৭ পুরোগং ৮ অনুত্তরং ৯ প্রাগ্রহরং ১০ প্রবেকং ১১ প্রধানং ১২ অগ্রেসরং ১৩ উত্তমং ১৪ অগ্রং ১৫ গ্রামণীঃ ১৬ অগ্রণীঃ ১৭ অগ্রিমং ১৮ জাত্যং ১৯ অগ্র্যং ২০ অনুত্তমং ২১ অনবরার্দ্ধ্যং ২২ শ্রেষ্ঠং ২৩ পরার্দ্ধ্যং ২৪ পরং ২৫। ইতি হেমচন্দ্রঃ॥

প্রকোষ্ঠঃ (পুং) কফোণেরধোমণিবন্ধপর্য্যন্তহস্তভাগঃ। ইত্যমরঃ॥ গৃহদ্বারপিণ্ডকং। বীথী ইতি বিহোন্দ ইতি চ খ্যাতং। ইতি প্রঘাণশব্দটীকায়াং ভরতমুকুটমথুরেশাঃ॥

প্রক্খরঃ (পুং) অশ্বকবচঃ। ইতি শব্দমালা॥ প্রখর ইতি প্রক্ষর ইতি চ পাঠঃ॥

প্রক্রন্তা (ত্রি) উপক্রমকর্ত্তা। আরম্ভকর্ত্তা। প্রপূর্ব্বক্রমধাতোস্তৃণ্প্রত্যয়নিষ্পন্নঃ। ইতি মুগ্ধবোধব্যাকরণং॥

প্রক্রমঃ (পুং) ক্রমঃ। অবসরঃ। ইতি মেদিনী॥ প্রথমারম্ভঃ। তৎপর্য্যায়ঃ। উপক্রমঃ ২। ইত্যমরঃ॥

প্রক্রান্তঃ (ত্রি) প্রকরণস্থঃ। আরব্ধঃ। যথা। আতিষ্ঠদ্গু জপন্ সন্ধ্যাং প্রক্রান্তামায়তীগবং। প্রাতস্তরাং পতত্রিভ্যঃ প্রবুদ্ধঃ প্রণমন্রবিং॥ ইতি ভট্টিচতুর্থসর্গঃ॥

প্রক্রিয়া (স্ত্রী) নৃপাদীনাং চামরধূননচ্ছত্রধারণাদিব্যাপারঃ। তৎপর্য্যায়ঃ। অধিকারঃ২। ইত্যমরঃ॥ অধীকারঃ ৩ নিয়তবিধিঃ ৪। ইতি শব্দরত্নাবলী॥ প্রকৃষ্টকার্য্যঞ্চ॥

প্রক্লিন্নঃ (ত্রি) তৃপ্তঃ। ইতি জটাধরঃ॥ প্রকর্ষেণ ক্লেদযুক্তশ্চ॥

প্রক্বণঃ (পুং) বীণায়াঃ ক্বণিতঃ। বীণাশব্দঃ। তৎপর্য্যায়ঃ। প্রক্বাণঃ ২। ইত্যমরঃ॥ সুক্বাণঃ ৩ সুক্বণঃ ৪ উপক্বাণঃ ৫ উপক্বণঃ ৬। ইতি ভরতঃ॥

প্রক্বাণঃ (পুং) প্রক্বণঃ। ইত্যমরঃ॥

প্রখরঃ (পুং) হয়সন্নাহঃ। কুক্কুরঃ। অশ্বতরঃ অত্যন্তখরে ত্রি। ইতি মেদিনী॥

প্রখ্যঃ (ত্রি) উত্তরপদে তুল্যার্থবাচকঃ। যথা। স্যুরুত্তরপদে প্রখ্যঃ প্রকারঃ প্রতিমো নিভঃ। ইতি হেমচন্দ্রঃ॥

প্রখ্যাতঃ (ত্রি) প্রকৃষ্টখ্যাতিযুক্তঃ। বিখ্যাতঃ। যথা। যস্য ব্যাকরণে বরেণ্যঘটনাস্ফীতাঃ প্রবন্ধা দশ প্রখ্যাতা নব বৈদ্যকেঽপি তিথিনির্দ্ধারার্থমেকোঽদ্ভুতঃ। ইতি মুগ্ধবোধশেষে তচ্ছিষ্যপদ্যং॥

প্রখ্যাতবপ্তৃকঃ (পুং) বিখ্যাতপিতৃকঃ। যথা। স্যাদামুষ্যায়ণোঽমুষ্য পুত্রঃ প্রখ্যাতবপ্তৃকঃ। ইতি হেমচন্দ্রঃ ॥

প্রখ্যাতিঃ (স্ত্রী) প্রকৃষ্টকীর্ত্তিঃ। বিখ্যাতিঃ। প্রপূর্ব্বখ্যাধাতোঃ ক্তিপ্রত্যয়নিষ্পন্না ॥

প্রগণ্ডঃ (পুং) কূর্পরোপরিকক্ষপর্য্যন্তভাগঃ। কনুই অবধি বগল পর্য্যন্ত ইতি ভাষা। ইত্যমরঃ ॥

প্রগণ্ডী (স্ত্রী) বহিঃপ্রাকারঃ। দুর্গপ্রাকারভিত্তৌ শূরাণাং উপবেশনস্থানানি। ইতি মহাভারতে রাজধর্ম্মঃ ॥

প্রগতজানুঃ (ত্রি) প্রগতজানুকঃ। ইত্যমরটীকায়াং রমানাথঃ ॥

প্রগতজানুকঃ (ত্রি) যস্য জানুনোর্মধ্যে নিত্যং কাদাচিৎকং বা মহদন্তরালং সঃ পাকারাকৃ ব্যক্তি ইতি ভাষা। তৎপর্য্যায়ঃ। প্রজ্ঞুঃ ২। ইত্যমরঃ ॥ প্রজ্ঞঃ ৩ প্রগতজানুঃ ৪। ইতি ভরতঃ ॥

প্রগন্ধঃ (পুং) পর্পটঃ। ইতি রাজনির্ঘণ্টঃ ॥

প্রগল্ভঃ (ত্রি) প্রত্যুৎপন্নমতিঃ। তৎপর্য্যায়ঃ। প্রতিভান্বিতঃ ২। ইত্যমরঃ ॥

প্রগল্ভতা (স্ত্রী) প্রগল্‌ভস্য ভাবঃ। প্রাগল্‌ভ্যং। তৎপর্য্যায়ঃ। উৎসাহঃ ২ অভিযোগঃ ৩ উদ্যমঃ ৪ প্রৌঢ়িঃ ৫ উদ্যোগঃ ৬ কিয়দেতিকা ৭ অধ্যবসায়ঃ ৮ ঊর্জ্জঃ ৯। ইতি হেমচন্দ্রঃ ॥ তস্য লক্ষণং। নিঃশঙ্কত্বং প্রয়োগেষু বুধৈরুক্তা প্রগল্‌ভতা। ইত্যুজ্জ্বলনীলমণিঃ ॥

প্রগল্ভা (স্ত্রী) নায়িকাভেদঃ। অস্যা লক্ষণং। পতিমাত্রবিষয়কেলিকলাপকোবিদা। অস্যাশ্চেষ্টা রতিপ্রীতিঃ। আনন্দাদাত্মসংমোহঃ। রতিপ্রীতির্যথা। সংস্পৃশ্য স্তনমাকলয্য বদনং সংশ্লিষ্য কণ্ঠস্থলং নিষ্পায়াধরবিম্বমম্বরমপাকৃষ্য বুদ্যস্যালকং। দেবস্যাম্বুজিনীপতেঃ সমুদয়ং জিজ্ঞাসমানে প্রিয়ে বামাক্ষী বসনাঞ্চলৈঃ শ্রবণয়োর্নীলোৎপলং নিহ্নুতে ॥ আনন্দাদাত্মসংমোহো যথা। নখাঙ্কিতমুরঃস্থলেঽধরতলে রদস্য ক্ষতং চ্যুতা বকুলমালিকা বিগলিতা চ মুক্তাবলী। রতান্তসময়ে ময়া সকলমেতদালোচিতং স্মৃতিঃ ক্ব চ পতিঃ ক্ব চ ক্ব চ তবালিশিক্ষাবিধিঃ ॥ সা মানাবস্থায়াং ত্রিবিধা। ধীরা অধীরা ধীরাধীরা চ। ব্যঙ্গ্যকোপপ্রকাশা ধীরা। অব্যঙ্গ্যকোপপ্রকাশা অধীরা। ব্যঙ্গ্যাব্যঙ্গ্যকোপপ্রকাশা ধীরাধীরা। প্রৌঢ়াধীরায়াস্তু রতাবৌদাস্যং। অধীরায়াস্তর্জনতাড়নাদি। ধীরাধীরায়া রতাবৌদাস্যং তর্জনাদি চ কোপস্য প্রকাশকং। প্রৌঢ়াধীরা যথা। নো তল্পং ভজসে ন জল্পসি সুধাধারানুকারা গিরো দৃক্‌পাতং কুরুষে ন বা পরিজনে কোপপ্রকাশচ্ছলাৎ। ইত্থং কেতকগর্ব্বগৌরি দয়িতে কোপস্য সংগোপনং কিং স্যাদেব নচেৎ পুনঃ সহচরী কুর্ব্বীত সাচি স্মিতং ॥ প্রগল্‌ভা অধীরা যথা। প্রতিফলমবলোক্য স্বীয়মিন্দোঃ কলায়াং হরশিরসি পরস্যা বাসমাশঙ্কমানা। গিরিশমচলকন্যা তর্জয়ামাস কম্পং প্রচলবলয়বেল্লৎকান্তিভাজা করেণ ॥ প্রগল্‌ভা ধীরাধীরা যথা। তল্পোপান্তমুপেযুষি প্রিয়তমে

সাচীকৃতগ্রীবয়া কাকুব্যাকুলবাচি সাচিস্মিতস্ফুর্জৎকপোলশ্রিয়া। হস্তন্যস্তকরে পুনর্মৃগদৃশা লাক্ষারসক্ষালিতপ্রো ময়ূখমাংসলরুচো বিস্ফারিতা দৃষ্টয়ঃ॥ ইতি রসমঞ্জরী॥

প্রগাঢ়ং (ত্রি) ভূশং। কৃচ্ছ্রং। ইত্যমরঃ॥ দৃঢ়ং। ইতি ভরতঃ॥

প্রগাতা (ত্রি) উত্তমগায়কঃ। ইতি শব্দরত্নাবলী

প্রগুণঃ (ত্রি) ঋজুঃ। ইত্যমরঃ

প্রগৃহ্যং (ত্রি) সন্ধিরহিতং পদং। ইতি মুগ্ধবোধব্যাকরণং॥ পদপক্ষপরতন্ত্রবহির্ভূতেষু গৃহ্যপদং নিপাত্যতে। যথা প্রগৃহ্যং পদং যৎ স্বরেণ ন সমুন্নীয়তে। ইতি দুর্গাদাসঃ॥ আপ্রগৃহ্যঃ স্মৃতৌ বাক্যে। ইত্যমরঃ॥ প্রগৃহ্যঃ পাণিন্যাদিকৃতপ্রগৃহ্যসংজ্ঞো ঙানুবন্ধরহিতঃ আশব্দঃ যোঽচা ন সন্ধীয়তে স ইত্যর্থঃ। স্মৃতৌ স্মরণে যথা। আজ্ঞাতং স জটায়ুরেষঃ। বাক্যে যথা। আ এবং মন্যসে। ইতি ভরতঃ॥

প্রগে ব্য প্রাতঃ। ইত্যমরঃ॥

প্রগেতনঃ (ত্রি) প্রগে ভবঃ। প্রাতর্ভবঃ। তৎপর্য্যায়ঃ। শ্বস্তনঃ ২। ইতি রাজনির্ঘণ্টঃ॥

প্রগ্রহঃ (পুং) তুলাসূত্রং। অশ্বাদিরশ্মিঃ। বন্দী। ইত্যমরঃ॥ নিয়মনং। ভুজঃ। রশ্মিঃ। সুবর্ণালুমহীরুহঃ। ইতি মেদিনী॥ কর্ণিকারবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

প্রগ্রাহঃ (পুং) প্রগ্রহঃ। ইত্যমরঃ॥

প্রগ্রীবঃ (পুং ক্লী) গৃহাদৌ প্রান্তে ধারণং দারুপঙ্ক্তিঃ। বাতায়নং। ইতি সুভূতিঃ। সুখশালা। ইত্যেকে। অশ্বশালা। ইতি কেচিৎ। দ্রুমশীর্ষকং। ইতি গোবর্দ্ধনঃ। ইত্যমরটীকায়াং ভরতঃ॥

প্রঘটাবিৎ [দ্] (ত্রি) শাস্ত্রগণ্ডঃ। ইতি ত্রিকাণ্ডশেষঃ॥

প্রঘণঃ (পুং) বহির্দ্বারপ্রকোষ্ঠকং তৎপর্য্যায়ঃ। প্রঘাণঃ ২ অলিন্দঃ ৩। ইত্যমরঃ॥ আলিন্দঃ ৪। ইতি ভরতঃ॥ তাম্রকুণ্ডং। লৌহমুদ্গরঃ। ইতি মেদিনী॥

প্রঘনঃ (পুং) প্রঘণঃ। ইতি মুকুটঃ॥

প্রঘসঃ (পুং) অসুরঃ। দৈত্যঃ। ইতি ত্রিকাণ্ডশেষঃ॥

প্রঘাণঃ (পুং) প্রঘণঃ। ইত্যমরঃ॥

প্রঘাতঃ (পুং) যুদ্ধং। ইতি হেমচন্দ্রটীকা॥

প্রঘানঃ (পুং) প্রঘণঃ। ইতি মুকুটঃ॥

প্রঘূর্ণঃ (পুং) অতিথিঃ। ইতি হেমচন্দ্রঃ॥ প্রকৃষ্টঘূর্ণযুক্তে ত্রি

প্রঘোষকঃ (পুং) ধ্বনিঃ। ইতি জটাধরঃ॥

প্রচক্রং (ক্লী) চলিতসৈন্যং। প্রস্থিতসেনা। ইত্যমরঃ॥

প্রচণ্ডঃ (পুং) শ্বেতকরবীরঃ। ইতি মেদিনী॥

প্রচণ্ডঃ (ত্রি) দুর্ব্বহঃ। দুর্দ্ধর্ষঃ। প্রগল্ভঃ। প্রতাপী। ইতি মেদিনী নানার্থরত্নমালা চ॥

প্রচণ্ডমূর্ত্তিঃ (স্ত্রী) বরুণবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥ প্রতাপযুক্তশরীরশ্চ॥

প্রচণ্ডা (স্ত্রী) দুর্গায়া অষ্টনায়িকান্তর্গতনায়িকাভেদঃ। ইতি কালীপুরাণং॥ শ্বেতদূর্ব্বা। ইতি রাজনির্ঘণ্ট

প্রচয়ঃ (পুং) সমূহঃ। ইতি শব্দচন্দ্রিকা॥

শিথিলাখ্যসংযোগঃ। স চ পরিমাণজনকঃ। যথা। সংখ্যাতঃ পরিমাণাচ্চ প্রচয়াদপি জায়তে। প্রচয়ঃ শিথিলাখ্যো যঃ সংযোগস্তেন জন্যতে ॥ পরিমাণন্তুলকাদৌ নাশস্ত্বাশ্রয়নাশতঃ। ইতি ভাষাপরিচ্ছেদঃ ॥

প্রচরঃ (পুং) পন্থাঃ। ইতি ধরণিঃ ॥ প্রকর্ষেণ গমনঞ্চ ॥

প্রচরদ্রূপঃ (ত্রি) ব্যক্তরূপঃ। প্রচারবিশিষ্টঃ। প্রচরৎ প্রকাশমানং রূপং স্বরূপং যস্য সঃ ॥

প্রচলাকঃ (পুং) শরাঘাতঃ। শিখণ্ডঃ। ভুজঙ্গমঃ। ইতি মেদিনী ॥

প্রচলাকী [ন্] (পুং) ময়ূরঃ। ইতি মেদিনী ॥

প্রচলায়িতং (ত্রি) নিদ্রাদিনা ঘূর্ণিতং। ইত্যমরঃ ॥

প্রচক্ষাঃ [স্] (পুং) বৃহস্পতিঃ। ইত্যুণাদিকোষঃ ॥

প্রচারঃ (পুং) প্রচরণং। ব্যক্তঃ। প্রকাশঃ। যথা। দমনকতরুশাখালম্বিচ্ছোলঙ্গযুগ্মং তুহিনকিরণবিম্বে খঞ্জরীটপ্রচারঃ। ইতি শঙ্করাচার্য্যঃ ॥

প্রচুরং (ত্রি) অনেকং। তৎপর্য্যায়ঃ। প্রভূতং ২ প্রাজ্যং ৩ অদভ্রং ৪ বহুলং ৫ বহু ৬ পুরুহং ৭ পুরু ৮ ভূয়িষ্ঠং ৯ স্ফিরং ১০ ভূয়ঃ ১১ ভূরি ১২। ইত্যমরঃ ॥

প্রচুরপুরুষঃ (পুং) চৌরঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ বহুনরশ্চ ॥

প্রচেতসী (স্ত্রী) কট্ফলঃ। ইতি রাজনির্ঘণ্টঃ ॥ প্রচেতসঃ কন্যা চ ॥

প্রচেতা [ঋ] (পুং) সারথিঃ। ইতি হেমচন্দ্রঃ ॥

প্রচেতাঃ [স্] (পুং) বরুণঃ। ইত্যমরঃ ॥ মুনিবিশেষঃ। প্রকৃষ্টহৃদি ত্রি০। ইতি মেদিনী ॥ প্রাচীনবর্হীরাজপুত্রঃ। যথা। প্রাচীনবর্হির্ভগবান্ সর্ব্বশস্ত্রভৃতাম্বরঃ। সমুদ্রতনয়ায়াং বৈ দশ পুত্রানজীজনৎ ॥ প্রচেতসস্তে বিখ্যাতা রাজানঃ প্রথিতৌজসঃ। ইতি কৌর্ম্মে ১২ অধ্যায়ঃ ॥ অপি চ। প্রাচীনবর্হিস্তৎপুত্রঃ পৃথিব্যামেকরাড়্ভৌ। উপযেমে সমুদ্রস্য লবণস্য স বৈ স্তাং ॥ তস্মাৎ সুসাব সামুদ্রী দশ প্রাচীনবর্হিষঃ। সর্ব্বে প্রচেতসো নাম ধনুর্ব্বেদস্য পারগাঃ ॥ অপৃথগ্ধর্ম্মচরণাস্তেঽতপ্যন্ত মহত্তপঃ। দশ বর্ষসহস্রাণি সমুদ্রসলিলে শয়াঃ ॥ প্রজাপতিত্বং সংপ্রাপ্য ভার্য্যা তেষাঞ্চ মারিষা। অভবদ্ভবশাপেন তস্যাং দক্ষোঽভবৎ ততঃ ॥ ইতি গারুড়ে ৬ অধ্যায়ঃ ॥

প্রচেলং (ক্লী) পীতকাষ্ঠং। ইতি শব্দচন্দ্রিকা ॥

প্রচেলকঃ (পুং) ঘোটকঃ। ইতি শব্দমালা ॥

প্রচোদনী (স্ত্রী) কণ্টকারী। ইত্যমরঃ ॥

প্রচোদিতঃ (ত্রি) প্রেরিতঃ। যথা। প্রচোদিতা যেন পুরা সরস্বতী। ইতি শ্রীভাগবতে ২ স্কন্ধে ৪ অধ্যায়ঃ ॥

প্রচ্ছ ও শ জ্ঞীপ্সে। ইতি কবিকল্পদ্রুমঃ ॥ জ্ঞীপ্সা জ্ঞাতুমিচ্ছা। জ্ঞপ ক্ম ইত্যস্যৈব জ্ঞানপক্ষে নিষ্পাদনাৎ। ও অপ্রাক্ষীৎ। শ পৃচ্ছতি বার্ত্তাং গুরুঃ শিষ্যঃ। ইতি দুর্গাদাসঃ ॥

প্রচ্ছদঃ (পুং) আচ্ছাদনং। ইতি শব্দরত্নাবলী ॥

প্রচ্ছদপটঃ (পুং) প্রকর্ষেণ ছাদ্যতেঽনেন স চাসৌ পটশ্চেতি। পাছুড়ি ইতি খ্যাতঃ। তৎপর্য্যায়ঃ। নিচোলঃ ২। ইত্যমরঃ ॥ নিচুলঃ ৩। ইতি ব্যাড়িঃ ॥ নিচোলং ৪। ইতি রভসঃ ॥ নিচোলী ৫। ইতি রাজদেবঃ ॥ ইত্যমরটীকায়াং ভরতঃ ॥

প্রচ্ছনা (স্ত্রী) আমন্ত্রণা। ইতি জটাধরঃ ॥

প্রচ্ছন্নং (ক্লী) অন্তর্দ্বারং। ইত্যমরঃ ॥ আচ্ছন্নে ত্রি ॥

প্রচ্ছর্দ্দিকা (স্ত্রী) বমিঃ। ইত্যমরঃ ॥

প্রচ্ছাদনং (ক্লী) উত্তরীয়বস্ত্রং। তৎপর্য্যায়ঃ। প্রাবরণং ২ সংব্যানং ৩ উত্তরীয়কং ৪। ইতি হেমচন্দ্রঃ ॥

প্রচ্ছাদিতং (ত্রি) আচ্ছাদিতং। ইতি হলায়ুধঃ ॥

প্রজঃ (পুং) পতিঃ। জায়ায়াং প্রবিশ্য পুনর্জায়তে ইতি ডে প্রজ পতিঃ। ইতি প্রজাবতীশব্দটীকায়াং ভরতঃ ॥

প্রজনঃ (পুং) উপসরঃ। ইত্যমরঃ ॥ দ্বে স্ত্রীগব্যাদিষু পুঙ্গবাদীনাং প্রথমগর্ভাধানায় মৈথুনাভিযোগঃ। প্রজনং ক্লীবমিতি কেচিৎ ॥ পশূনাং গর্ভগ্রহণকালঃ। ইতি স্বামী ॥ গবাং প্রথমগর্ভগ্রহণাভিযোগঃ। ইতি সুভূতিঃ ॥ স্ত্রীগবীষু পুঙ্গবানাং প্রথমগমনমিতি সর্ব্বস্বং ॥ কিন্তু বীনামুপসরং দৃষ্টেতি ভট্টিঃ। ইত্যমরটীকায়াং ভরতঃ ॥

প্রজননং (ক্লী) যোনিঃ। জন্ম। ইতি মেদিনী ॥ প্রগমঃ। ইতি বিশ্বঃ ॥

প্রজনিকা (স্ত্রী) মাতা। ইতি জটাধরঃ ॥

প্রজবঃ (পুং) প্রকৃষ্টবেগঃ। প্রপূর্ব্বজুধাতোর্ভাবেঽল্‌প্রত্যয়নিষ্পন্নঃ ॥

প্রজবী (ত্রি) প্রকৃষ্টবেগযুক্তঃ। ইত্যমরঃ ॥

প্রজল্পঃ (পুং) বাক্যবিশেষঃ। যথা। অসূয়েষ্যামদযুজা যোঽবধীরণমুদ্রয়া। প্রিয়স্য কৌশলোদ্গারঃ প্রজল্পঃ স তু কথ্যতে ॥ ইত্যুজ্জ্বলনীলমণিঃ ॥

প্রজা (স্ত্রী) সন্ততিঃ। জনঃ। ইত্যমরঃ ॥ পিতৃমাতৃগুণদোষেণ প্রজা বিভিন্না যথা। মাতৃণাং শীলদোষেণ পিতৃশীলগুণেন চ। বিভিন্নাস্তু প্রজাঃ সর্ব্বা ভবন্তি ভবশীলিনাং ॥ ইত্যগ্নিপুরাণং ॥

প্রজাগরঃ (পুং) প্রকর্ষেণ জাগরণং। ইতি হলায়ুধঃ ॥ যথা। দেবতানাং পিতৃণাঞ্চ ঘোরং কৃত্বা প্রজাগরং। ত্রেতাযুগে চতুর্থাংশে রাবণস্তপসঃ ক্ষয়াৎ। রামং দাশরথিং প্রাপ্য সগণঃ ক্ষয়মীয়িবান্ ॥ ইত্যগ্নিপুরাণং ॥

প্রজাতা (স্ত্রী) জাতাপত্যা। প্রসূতা। ইত্যমরঃ ॥

প্রজাদা (স্ত্রী) গর্ভদাত্রীক্ষুপঃ। ইতি রাজনির্ঘণ্টঃ ॥ প্রজাদাতরি ত্রি ॥

প্রজানন্তী (স্ত্রী) পণ্ডিতা। প্রাজ্ঞী। ইতি হেমচন্দ্রঃ ॥

প্রজাদানং (ক্লী) রজতং। ইতি শব্দচন্দ্রিকা ॥

প্রজাপঃ (পুং) রাজা। ইতি হেমচন্দ্রঃ ॥

প্রজাপতিঃ (পুং) ব্রহ্মা। ইত্যমরঃ ॥ দক্ষাদিঃ। মহীপালঃ। ইতি মেদিনী ॥ জামাতা। দিবাকরঃ। বহ্নিঃ। ত্বষ্টা। ইতি

হেমচন্দ্রঃ ॥ * ॥ দশ প্রজাপতয়ো যথা। মরীচিমত্র্যঙ্গিরসৌ পুলস্ত্যং পুলহং ক্রতুং। প্রচেতসং বশিষ্ঠঞ্চ ভৃগুং নারদমেব চ। দেবান্ সর্ব্বানৃষীন্ সর্ব্বাংস্তর্পয়েদক্ষতোদকৈঃ॥ ইত্যাহ্নিকতত্ত্বং॥*॥ একবিংশতিঃ প্রজাপতয়ো যথা। ব্রহ্মা স্থাণুর্মনুর্দক্ষো ভৃগুর্ধর্ম্মস্তথা যমঃ। মরীচিরঙ্গিরাত্রিশ্চ পুলস্ত্যঃ পুলহঃ ক্রতুঃ॥ বশিষ্ঠঃ পরমেষ্ঠী চ বিবস্বান্ সোম এব চ। কর্দ্দমশ্চাপি যঃ প্রোক্তঃ ক্রোধোঽর্ব্বাক্ ক্রীত এব চ॥ একবিংশতিরুৎপন্নাস্তে প্রজাপতয়ঃ স্মৃতাঃ। ইতি মহাভারতে মোক্ষধর্ম্মঃ॥*॥ পিতা। যথা। জনকো জন্মদানাচ্চ রক্ষণাচ্চ পিতা নৃণাং। ততো বিস্তীর্ণকরণাৎ কলয়া স প্রজাপতিঃ॥ ইতি ব্রহ্মবৈবর্ত্তে গণপতিখণ্ডে ৪৪ অধ্যায়ঃ॥*॥ স্বনামখ্যাতকীটবিশেষশ্চ॥

প্রজাবতী (স্ত্রী) ভ্রাতৃজায়া। ইত্যমরঃ॥ জ্যেষ্ঠভ্রাতৃপত্নী। ইতি কেচিৎ। ইতি ভরতঃ॥ সন্তানবিশিষ্টা চ॥

প্রজাহিতং (ক্লী) জলং। ইতি শব্দমালা॥ প্রজোপকারে ত্রি॥

প্রজিনঃ (পুং) বায়ুঃ। ইতি শব্দমালা॥

প্রজেশ্বরঃ (পুং) রাজা। ইতি ত্রিকাণ্ডশেষঃ॥

প্রজ্ঞঃ (ত্রি) পণ্ডিতঃ। ইতি প্রাজ্ঞশব্দটীকায়াং ভরতঃ॥ প্রগতজানুকঃ। ইতি প্রজ্ঞুশব্দটীকায়াং ভরতঃ ধরণিশ্চ॥

প্রজ্ঞপ্তিঃ (স্ত্রী) সঙ্কেতং। ইতি ত্রিকাণ্ডশেষঃ॥

প্রজ্ঞপ্তী (স্ত্রী) জিনবিদ্যাদেবীবিশেষঃ। ইতি হেমচন্দ্রঃ॥

প্রজ্ঞা (স্ত্রী) বুদ্ধিঃ। প্রাজ্ঞী। প্রকর্ষেণ জানাতি যা। ইত্যমরঃ॥ সরস্বতী। ইতি শব্দরত্নাবলী॥ তদ্বৈদিকপর্য্যায়াঃ। কেতুঃ ১ কেতঃ ২ চেতঃ ৩ চিত্তং ৪ ক্রতুঃ ৫ অসুঃ ৬ ধীঃ ৭ শচীঃ ৮ মায়া ৯ বয়ুনং ১০ অভিখ্যা ১১। ইত্যেকাদশ প্রজ্ঞানামানি ইতি বেদনিঘণ্টৌ ৩ অধ্যায়ঃ॥

প্রজ্ঞাকায়ঃ (পুং) মঞ্জুঘোষঃ। ইতি ত্রিকাণ্ডশেষঃ॥

প্রজ্ঞাচক্ষুঃ (পুং) ধৃতরাষ্ট্রঃ। ইতি শব্দরত্নাবলী॥

প্রজ্ঞানং (ক্লী) বুদ্ধিঃ। চিহ্নং। ইত্যমরঃ॥ পণ্ডিতে ত্রি। ইতি ভরতদ্বিরূপকোষঃ॥

প্রজ্ঞী [ন্] (ত্রি) পণ্ডিতঃ। ইতি ভরতদ্বিরূপকোষঃ॥

প্রজ্ঞুঃ (পুং) প্রগতজানুকঃ। ইত্যমরঃ॥ যস্য জানুনোর্মধ্যে নিত্যং কাদাচিৎকং বা মহদন্তরালং তস্মিন্ দ্বয়ং। ইতি ভরতঃ॥

প্রজ্বলিতঃ (ত্রি) প্রকৃষ্টজ্বলনবিশিষ্টঃ। যথা। অগ্নিং প্রজ্বলিতং বন্দে জাতবেদং হুতাশনং। সুবর্ণবর্ণমমলং সমিদ্ধং সর্ব্বতোমুখং॥ ইতি ভবদেবভট্টঃ॥

প্রডীনং (ক্লী) পক্ষিণাং গতিবিশেষঃ। ইত্যমরঃ॥ প্রথমডীনং প্রডীনং উড্ডয়নারম্ভঃ। তির্য্যগ্‌গমনং। ইত্যন্যে। ইতি ভরতঃ॥

প্রণঃ (পুং) পুরাণঃ। পুরাণার্থে বর্ত্তমানাৎ প্রশব্দাৎ নো বক্তব্যঃ। ইতি সিদ্ধান্তকৌমুদী॥

প্রণতঃ (ত্রি) প্রকর্ষেণ নতঃ। প্রণতিবিশিষ্টঃ।

যথা। ধ্যেয়ং সদা পরিভবঘ্নমভীষ্টদোহং তীর্থাস্পদং শিববিরিঞ্চিনুতং শরণ্যং । ভৃত্যার্ত্তিহং প্রণতপাল ভবাব্ধিপোতং বন্দে মহাপুরুষ"তে চরণারবিন্দং ॥ ইতি শ্রীভাগবতং ॥

প্রণতিঃ (স্ত্রী) প্রণামঃ। তৎপর্য্যায়ঃ। প্রণিপাতঃ ২ অনুনয়ঃ ৩। ইতি হেমচন্দ্রঃ ॥

প্রণয়ঃ (পুং) প্রীত্যা প্রার্থনং। তৎপর্য্যায়ঃ। প্রশ্রয়ঃ ২। ইত্যমরঃ ॥ প্রসরঃ ৩। ইতি ভরতঃ ॥ প্রসবঃ। প্রেম। যাজ্ঞা। বিশ্রম্ভঃ। নির্ব্বাণঃ। ইতি মেদিনী ॥

প্রণয়ী (পুং) স্বামী। ইতি হেমচন্দ্রঃ। প্রণয়যুক্তে ত্রি ॥

প্রণয়িনী (স্ত্রী) ভার্য্যা। ইতি হেমচন্দ্রঃ ॥

প্রণবঃ (পুং) ওঁকারঃ। ইত্যমরঃ ॥ তস্য পর্য্যায়ো যথা। ওঙ্কারঃ প্রণবস্তারো বেদাদির্বর্ত্তুলো ধ্রুবঃ। ত্রৈগুণ্যং ত্রিগুণো ব্রহ্ম সত্যো মন্ত্রাদিরব্যয়ঃ ॥ ব্রহ্মবীজং ত্রিতত্ত্বঞ্চ পঞ্চরশ্মিস্ত্রিদৈবতঃ। ইতি বীজবর্ণাভিধানং ॥ অপি চ। ওঙ্কারো বর্ত্তুলস্তারো বামশ্চ হংসকারণং। মন্ত্রাদ্যঃ প্রণবঃ সত্যং বিন্দুশক্তিস্ত্রিদৈবতং ॥ সর্ব্বজীবোৎপাদকশ্চ পঞ্চদেবো ধ্রুবস্ত্রিকঃ। সাবিত্রী ত্রিশিখো ব্রহ্ম ত্রিগুণো গুণজীবকঃ ॥ আদিবীজং বেদসারো বেদবীজমতঃ পরং। পঞ্চরশ্মিস্ত্রিকূটে চ ত্রিভবে ভবনাশনঃ ॥ গায়ত্রী বীজপঞ্চাংশো মন্ত্রবিদ্যাপ্রসূঃ প্রভুঃ। অক্ষরং মাতৃকাসূশ্চানাদিদৈবতমোক্ষদো ॥ ইতি তন্ত্রং ॥*॥ অস্যোদ্ধারক্রমো যথা। একমেবাদ্বয়ং ব্রহ্ম মায়য়া তু চতুষ্টয়ং। রোহিণীতনয়ো রামঃ অকারাক্ষরসম্ভবঃ ॥ তৈজসাত্মকপ্রদ্যুম্ন উকারাক্ষরসম্ভবঃ। প্রজ্ঞাত্মকো নিরুদ্ধো বৈ মকারাক্ষরসম্ভবঃ। অর্দ্ধমাত্রাত্মকঃ কৃষ্ণো যস্মিন্ বিশ্বং প্রতিষ্ঠিতং ॥ ইতি গোপালতাপনীয়োপনিষৎ ॥ * ॥ স চ মাঙ্গলিকঃ। যথা ওঙ্কারশ্চাথ শব্দশ্চ দ্বাবেতৌ ব্রহ্মণঃ পুরা। কণ্ঠং ভিত্ত্বা বিনির্জাতৌ তেন মাঙ্গলিকাবুভৌ ॥ ইতি মুগ্ধবোধটীকায়াং দুর্গাদাসঃ ॥ * ॥ অস্য মাহাত্ম্যং যথা। বিশ্বপাদশিরোগ্রীবং বিশ্বেশং বিশ্বভাবনং। যৎপ্রাপ্তয়ে মহাপুণ্যমোমিত্যেকাক্ষরং জপেৎ ॥ তদেবাধ্যয়নং তস্য স্বরূপং শৃণুতঃ পরং। অকারশ্চ তথোকারো মকারশ্চাক্ষরত্রয়ং ॥ এতাস্তিস্রঃ স্মৃতা মাত্রাঃ সাত্ত্বরাজস তামসাঃ। নির্গুণা যোগিগম্যান্যা অর্দ্ধমাত্রা তু সা স্মৃতা ॥ গান্ধারীতি চ বিজ্ঞেয়া গান্ধারস্বরসংশ্রয়া। পিপীলিকাগতিস্পর্শা প্রযুক্তা মূর্দ্ধ্নি লক্ষ্যতে ॥ যদা প্রযুক্ত ওঙ্কারঃ প্রতিনির্যাতি মূর্দ্ধনি। তদোঙ্কারময়ো যোগী অক্ষরে ত্বক্ষরো ভবেৎ ॥ প্রাণো ধনুঃ শরশ্চাত্মা ব্রহ্মবেধ্যমুদাহৃতং। অপ্রমত্তেন বেদ্ধব্যং শরবত্তন্ময়ো ভবেৎ ॥ ওমিত্যেতে ত্রয়ো দেবাস্ত্রয়ো লোকাস্ত্রয়োঽগ্নয়ঃ। বিষ্ণুক্রমাস্ত্রয়শ্চৈব ঋক্সামানি যজূংষি চ ॥ মাত্রাশ্চার্দ্ধঞ্চতস্রস্তু বিজ্ঞেয়াঃ পরমার্থতঃ। তত্র যুক্তশ্চ যো যোগী স তল্লয়মবাপ্নুয়াৎ ॥ অকারস্তত্র ভূর্লোক উকারশ্চোচ্যতে ভুবঃ। স ব্যঞ্জনো মকারশ্চ

স্বর্লোকঃ পরিকল্প্যতে ॥ ব্যক্তা তু প্রথমা মাত্রা দ্বিতীয়াব্যক্তসংজ্ঞিকা। মাত্রা তৃতীয়া চিচ্ছক্তিরর্দ্ধমাত্রা পরং পদং ॥ অনেনৈব ক্রমেণৈতা বিজ্ঞেয়া যোগভূময়ঃ। ওমিত্যুচ্চারণাৎ সর্ব্বং গৃহীতং সদসদ্ভবেৎ॥ হ্রস্বা তু প্রথমা মাত্রা দ্বিতীয়া দীর্ঘসংযুতা। তৃতীয়া তু প্লুতার্দ্ধাখ্যা বচসঃ সাত্ত্বগোচরে॥ ইত্যেতদক্ষরং ব্রহ্ম পরমোঙ্কারসংজ্ঞিতং। যস্তং বেদ নরঃ সম্যক্ তথা ধ্যায়তি বা পুনঃ ॥ সংসারচক্রমুৎসৃজ্য ত্যক্তত্রিবিধবন্ধনঃ। প্রাপ্নোতি ব্রহ্মনিলয়ং পরমং পরমাত্মনি॥ অক্ষীণকর্ম্মবন্ধস্তু জ্ঞাত্বা মৃত্যুমুপস্থিতং। উৎক্রান্তিকালে সংস্মৃত্য পুনর্যোগিত্বমৃচ্ছতি ॥ তস্মাদসিদ্ধযোগেন সিদ্ধযোগেন বা পুনঃ। জ্ঞেয়ান্যরিষ্টানি সদা যেনোৎক্রান্তৌ ন সীদতি॥ ইতি শ্রীমার্কণ্ডেয়পুরাণে ওঙ্কারমাহাত্ম্যং ॥ * ॥ যন্ন্যূনঞ্চাতিরিক্তঞ্চ যচ্ছিদ্রং যদযজ্ঞিয়ং। যদমেধ্যমশুদ্ধঞ্চ যাতযামঞ্চ যদ্ভবেৎ। তদোঙ্কারপ্রযুক্তেন সর্ব্বঞ্চাবিকলং ভবেৎ॥ ইতি তিথ্যাদিতত্ত্বং ॥ * ॥ ওমিত্যেকাক্ষরং ব্রহ্ম ব্যাহরন্মামনুস্মরন্। যঃ প্রয়াতি ত্যজন্ দেহং মদ্ভাবং সোঽধিগচ্ছতি ॥ ইতি শ্রীভগবদ্গীতায়াং ৮ অধ্যায়ঃ ॥

প্রণাদঃ (পুং) অনুরাগজশব্দঃ। ইত্যমরঃ॥ প্রীতিজনিতো মুখকণ্ঠাদিশব্দঃ। প্রীতিজং শীৎকৃতং। অনুরাগকৃতে শব্দে প্রণাদঃ শীৎকৃতং নৃণামিতি শব্দার্ণবঃ॥ গুণানুরক্তলোকপ্রভবঃ শব্দঃ। ইতি মধুমাধবঃ॥ অনুরাগজন্মা জনশব্দঃ। ইতি কলিঙ্গঃ। ইত্যমরটীকায়াং ভরতঃ॥ তারশব্দঃ। শ্রবণাময়ঃ। ইতি মেদিনী ॥ শেষস্য নামান্তরং কর্ণনাদঃ। যথা। কর্ণস্রোতঃস্থিতে বাতে শৃণোতি বিবিধান্ স্বরান্। ভেরীমৃদঙ্গশঙ্খানাং কর্ণনাদঃ স উচ্যতে॥ ইতি মাধবকরঃ॥

প্রণামঃ (পুং) প্রণতিঃ। প্রণিপাতঃ। ভক্তিশ্রদ্ধাতিশয়যুক্তনমস্কারঃ। স তু স্বাপকর্ষবোধকব্যাপারবিশেষঃ। ইতি মুগ্ধবোধটীকায়াং দুর্গাদাসঃ॥ স চতুর্ব্বিধঃ। অভিবাদনং ১ অষ্টাঙ্গঃ ২ পঞ্চাঙ্গঃ ৩ করশিরঃসংযোগশ্চ ৪। প্রথমস্য লক্ষণং তচ্ছব্দে দ্রষ্টব্যং॥ দ্বিতীয়ো যথা। পদ্ভ্যাং করাভ্যাং জানুভ্যাং উরসা শিরসা দৃশা। বচসা মনসা চৈব প্রণামোঽষ্টাঙ্গ ঈরিতঃ॥ তস্য ফলং। ভূমৌ নিপত্য যঃ কুর্য্যাৎ কৃষ্ণেঽষ্টাঙ্গনতিং সুধীঃ। সহস্রজন্মজং পাপং ত্যক্ত্বা বৈকুণ্ঠমাপ্নুয়াৎ॥ তৃতীয়ো যথা। বাহুভ্যাঞ্চৈব জানুভ্যাং শিরসা বচসা দৃশা। পঞ্চাঙ্গোঽয়ং প্রণামঃ স্যাৎ পূজাসু প্রবরাবিমৌ॥ * ॥ প্রকর্ষেণ নমনং। তদ্বিধির্যথা। কালিকাপুরাণে। শিরোমৎপাদয়োঃ কৃত্বা বাহুভ্যাঞ্চ পরস্পরং। প্রপন্নং পাহি মামীশ ভীতং মৃত্যুগ্রহার্ণবাৎ॥ কিঞ্চাগমে। দোর্ভ্যাং পদ্ভ্যাঞ্চ জানুভ্যামুরসা শিরসা দৃশা। মনসা বচসা চেতি প্রণামোঽষ্টাঙ্গ ঈরিতঃ॥ * ॥ জানুভ্যাঞ্চৈব বাহুভ্যাং শিরসা বচসা ধিয়া। পঞ্চাঙ্গকঃ প্রণামঃ স্যাৎ পূজাসু প্রবরাবিমাবিতি॥ * ॥ গরুড়ং

দাক্ষণ্যে কৃত্বা কুর্য্যাত্তৎপৃষ্ঠতো বুধঃ। অবশ্যঞ্চ প্রণামাংস্ত্রীন্ শক্তশ্চেদধিকাধিকান্॥ * ॥ তথা চ নারদপঞ্চরাত্রে। সন্ধিং বীক্ষ্য হরিং চাদ্যং গুরূন্ স্বগুরুমেব চ। দ্বিচতুর্বিবংশদথবা চতুর্বিবংশত্তদর্দ্ধকং॥ নমেত্তদর্দ্ধমথবা তদর্দ্ধং সর্ব্বদা নমেৎ। *। বিষ্ণুধর্ম্মোত্তরে। দেবার্চ্চাদর্শনাদেব প্রণমেম্মধুসূদনং। স্থানাপেক্ষা ন কর্ত্তব্যা দৃষ্ট্বার্চ্চাং দ্বিজসত্তমাঃ॥ দেবার্চ্চাদৃষ্টিপূতং হি শুচি সর্ব্বং প্রকীর্ত্তিতং। *। অথ নমস্কারমাহাত্ম্যং। নারসিংহে। নমস্কারঃ স্মৃতো যজ্ঞঃ সর্ব্বযজ্ঞেষু চোত্তমঃ। নমস্কারেণ চৈকেন নরঃ পূতো হরিং ব্রজেৎ॥ স্কান্দে। দণ্ডপ্রণামং কুরুতে বিষ্ণবে ভক্তিভাবতঃ। রেণুসঙ্খ্যাং বসেৎ স্বর্গে মন্বন্তরশতং নরঃ॥ তত্রৈব ব্রহ্মনারদসংবাদে। প্রণম্য দণ্ডবদ্ভূমৌ নমস্কারেণ যোঽর্চ্চয়েৎ। স যাং গতিমবাপ্নোতি ন তাং ক্রতুশতৈরপি॥ নমস্কারেণ চৈকেন নরঃ পূতো হরিং ব্রজেৎ। তত্রৈব শ্রীশিবোমাসংবাদে। ভূমিমাপীড্য জানুভ্যাং শির আরোপ্য বৈ ভুবি। প্রণমেদ্যো হি দেবেশং সোঽশ্বমেধফলং লভেৎ॥ তত্রৈবান্যত্র। তীর্থকোটিসহস্রাণি তীর্থকোটিশতানি চ। নারায়ণপ্রণামস্য কলাং নার্হন্তি ষোড়শীং॥ শাঠ্যেনাপি নমস্কারং কুর্ব্বতঃ শার্ঙ্গধন্বনে। শতজন্মার্জ্জিতং পাপং তৎক্ষণাদেব নশ্যতি॥ রেণুমণ্ডিতগাত্রস্য কণা দেহে ভবন্তি যে। তাবদ্বর্ষসহস্রাণি বিষ্ণুলোকে মহীয়তে॥ বিষ্ণুধর্ম্মোত্তরে। অভিবাদ্য জগন্নাথং কৃতার্থশ্চ তথা ভবেৎ। নমস্কারক্রিয়া তস্য সর্ব্বপাপপ্রণাশিনী॥ জানুভ্যাঞ্চৈব পাণিভ্যাং শিরসা চ বিচক্ষণঃ। কৃত্বা প্রণামং দেবস্য সর্ব্বান্ কামানবাপ্নুয়াৎ॥ বিষ্ণুপুরাণে। অনাদিনিধনং দেবং দৈত্যদানবদারণং। যে নমন্তি নরা নিত্যং ন হি পশ্যন্তি তে যমং॥ যে জনা জগতাং নাথং নিত্যং নারায়ণং দ্বিজাঃ। নমন্তি ন হি তে বিষ্ণোঃ স্থানাদন্যত্র গামিনঃ॥ নারদীয়ে। একোঽপি কৃষ্ণস্য কৃতঃ প্রণামো দশাশ্বমেধাবভৃথৈর্ন তুল্যঃ। দশাশ্বমেধী পুনরেতি জন্ম কৃষ্ণপ্রণামী ন পুনর্ভবায়॥ হরিভক্তিসুধোদয়ে। বিষ্ণোর্দ্দণ্ডপ্রণামার্থং ভক্তেন পততা ভুবি। পাতিতং পাতকং কৃৎস্নং নোত্তিষ্ঠতি পুনঃ সহ॥ স্কান্দে দেবহূতবিকুণ্ডলসংবাদে। তপস্তপ্ত্বা নরো ঘোরমরণ্যে নিয়তেন্দ্রিয়ঃ। যৎ ফলং স সমাপ্নোতি তন্নত্বা গরুড়ধ্বজং॥ কৃত্বাপি বহুশঃ পাপং নরো মোহসমন্বিতঃ। ন যাতি নরকং নত্বা সর্ব্বপাপহরং হরিং॥ তত্রৈব বেদনিধিস্তুতৌ। অপি পাপং দুরাচারং নরং ত্বৎপ্রণতং হরে। নেক্ষন্তে কিঙ্করা যাম্যা উলূকাস্তপনং যথা॥ বিষ্ণুপুরাণে শ্রীযমস্য নিজভটানুশাসনে। হরিমমরগণার্চ্চিতাঙ্ঘ্রিপদ্মং প্রণমতি যঃ পরমার্থতো হি মর্ত্ত্যঃ। তমপগতসমস্তপাপবন্ধং ব্রজ পরিহৃত্য যথাগ্নিমাজ্যসিক্তং॥ ব্রহ্মবৈবর্ত্তে। শরণাগতরক্ষণোদ্যতং হরিমীশং প্রণমন্তি যে নরাঃ। ন পতন্তি ভবাম্বুধৌ

স্ফুটং পতিতানুদ্ধরতিস্ম তানসৌ ॥ অষ্টমস্কন্ধে চ বলিবাক্যে। অহো প্রণামায় কৃতঃ সমুদ্যমঃ প্রপন্নভক্তার্থবিধৌ সমাহিতঃ। যল্লোকপালৈস্তদনুগ্রহোঽমরৈরলব্ধপূর্ব্বোঽপসদেঽসুরেঽর্পিতঃ ॥ অত এব নারায়ণব্যূহস্তবে। অহো ভাগ্যমহো ভাগ্যমহো ভাগ্যং নৃণামিদং। যেষাং হরিপদাব্জাগ্রে শিরো ন্যস্তং যথা তথা ॥ কিঞ্চ। নারসিংহে শ্রীযমোক্তৌ। তস্য বৈ নারসিংহস্য বিষ্ণোরমিততেজসঃ। প্রণামং যে প্রকুর্ব্বন্তি তেষামপি নমো নমঃ ॥ ভবিষ্যোত্তরে চ জলধেনুপ্রসঙ্গে। বিষ্ণোর্দ্দেবজগদ্ধাতুর্জনার্দ্দনজগৎপতেঃ। প্রণামং যে প্রকুর্ব্বন্তি তেষামপি নমো নমঃ ॥ ইত্যাদি ॥*॥ অথ প্রণামনিত্যতা। বৃহন্নারদীয়ে লুব্ধকোপাখ্যানারম্ভে। সকৃদ্বা ন নমেদ্যস্তু বিষ্ণবে শর্ম্মকারিণে। শবোপমং বিজানীয়াৎ কদাচিদপি নালপেৎ ॥ কিঞ্চ। পাদ্মে বৈশাখমাহাত্ম্যে যমব্রাহ্মণসংবাদে। পশ্যন্তো ভগবদ্দ্বারং নাম শস্ত্রপরিচ্ছদং। অকৃত্বা তৎপ্রণামাদি যান্তি তে নরকৌকসঃ ॥ * ॥ অথ নমস্কারে নিষিদ্ধানি। বিষ্ণুস্মৃতৌ। জন্মপ্রভৃতি যৎকিঞ্চিৎ পুমান্ বৈ ধর্ম্মমাচরেৎ। সর্ব্বং তন্নিষ্ফলং যাতি একহস্তাভিবাদনাৎ ॥ বারাহে। বস্ত্রপ্রাবৃতদেহস্তু যো নরঃ প্রণমেত মাং। শ্বিত্রী স জায়তে মূর্খঃ সপ্তজন্মনি ভামিনি ॥ কিঞ্চান্যত্র। অগ্রে পৃষ্ঠে বামভাগে সমীপে গর্ব্ভমন্দিরে। জপহোমনমস্কারান্ন কুর্য্যাৎ কেশবালয়ে ॥ অপি চ। সকৃদ্ভূমৌ নিপতিতো ন শক্তঃ প্রণমেন্মুহুঃ। উত্থায়োত্থায় কর্ত্তব্যং দণ্ডবৎ প্রণিপাতনং ॥ ইতি শ্রীহরিভক্তিবিলাসে ৮ বিলাসঃ ॥ নতিবিশেষস্তু যামলে। ত্রিকোণাকারা সর্ব্বত্র নতিঃ শক্তেঃ সমীরিতা। দক্ষিণাদ্বায়বীং গত্বা দিশং তস্যাশ্চ শাম্ভবীং ॥ ততশ্চ দক্ষিণাং গত্বা নমস্কারস্ত্রিকোণবৎ ॥ * ॥ একহস্তপ্রণামনিষেধো যথা। একহস্তপ্রণামশ্চ একং বাপি প্রদক্ষিণং। অকালে দর্শনং বিষ্ণোর্হন্তি পুণ্যং পুরাকৃতং ॥ ইতি তন্ত্রসারঃ॥ * ॥ কায়িকবাচিকমানসভেদেন প্রত্যেকং ত্রিবিধঃ। যথা। কায়িকো বাগ্‌ভবশ্চৈব মানসস্ত্রিবিধঃ স্মৃতঃ। নমস্কারস্তু তত্ত্বজ্ঞৈরুত্তমাধমমধ্যমঃ ॥ প্রসার্য্য পাদৌ হস্তৌ চ পতিত্বা দণ্ডবৎ ক্ষিতৌ। জানুভ্যামবনীং গত্বা শিরসা স্পৃশ্য মেদিনীং ॥ ক্রিয়তে যো নমস্কার উত্তমঃ কায়িকস্তু সঃ। জানুভ্যাং ক্ষিতিং সংস্পৃষ্ট্বা শিরসা স্পৃশ্য মেদিনীং ॥ ক্রিয়তে যো নমস্কারো মধ্যমঃ কায়িকস্তু সঃ। পুটীকৃত্য করৌ শীর্ষে দীয়তে যদ্যথা তথা ॥ অস্পৃষ্ট্বা জানুশীর্ষাভ্যাং ক্ষিতিং সোঽধম উচ্যতে ॥ * ॥ যঃ স্বয়ং গদ্যপদ্যাভ্যাং ঘটিতাভ্যাং নমস্কৃতিঃ। ক্রিয়তে ভক্তিযুক্তৈর্ব্বা বাচিকস্তূত্তমঃ স্মৃতঃ ॥ পৌরাণিকৈর্বৈদিকৈর্ব্বা মন্ত্রৈর্যা ক্রিয়তে নতিঃ। মধ্যমোঽসৌ নমস্কারো ভবেদ্বাচনিকঃ সদা। স বাচিকোঽধমো জ্ঞেয়ো নমস্কারেষু পুত্রকৌ ॥ * ॥ ইষ্টমধ্যানিষ্ট-

গতৈর্মনোভিস্ত্রিবিধং পুনঃ। মননং মানসং প্রোক্তমুত্তমাধমমধ্যমং ॥ ত্রিবিধে চ নমস্কারে কায়িকশ্চোত্তমঃ স্মৃতঃ। কায়িকৈস্তু নমস্কারৈর্দেবাস্তুষ্যন্তি নিত্যশঃ ॥ অয়মেব নমস্কারো দণ্ডাদিপ্রতিপত্তিভিঃ। প্রণাম ইতি বিজ্ঞেয়ঃ স পূর্ব্বং প্রতিপাদিতঃ ॥ ইতি কালিকাপুরাণে ৭০ অধ্যায়ঃ ॥ * ॥ শূদ্রপূজিতদেবতাপ্রণামনিষেধো যথা। যঃ শূদ্রেণার্চ্চিতং লিঙ্গং বিষ্ণুং বা প্রণমেদ্‌যদি। নিষ্কৃতিস্তস্য নাস্ত্যেব প্রায়শ্চিত্তাযুতৈরপি ॥ ইতি কর্ম্মলোচনং ॥

প্রণায্যঃ (ত্রি) অসম্মতঃ। অভিলাষবিবর্জিতঃ। ইতি মেদিনী ॥ সাধুঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ প্রিয়ঃ। ইতি মুগ্ধবোধব্যাকরণং ॥

প্রণালঃ (পুং), প্রণালী (স্ত্রী) জলনিঃসরণমার্গঃ। পয়নালা ইতি ভাষা। ইত্যমরঃ

প্রণিধানং (ক্লী) প্রযত্নঃ। সমাধিঃ। প্রবেশনং। ইতি মেদিনী

প্রণিধিঃ (পুং) চরঃ। প্রার্থনং। ইত্যমরঃ ॥ অবধানং। ইতি ভরতঃ ॥ অনুচরঃ। ইতি মেদিনী ॥

প্রণিপাতঃ (পুং) প্রণতিঃ। ইতি হেমচন্দ্রঃ

প্রণিহিতং (ত্রি) স্থাপিতং। প্রাপ্তং। সমাহিতং। ইতি মেদিনী ॥

প্রণীতং (ত্রি) উপসম্পন্নং। পাকেন রূপরসাদিসম্পন্নব্যঞ্জনাদি। ইত্যমরভরতৌ ॥ ক্ষিপ্তং। বিহিতং। প্রবেশিতং। ইতি মেদিনী ॥ কৃতং। ইতি হেমচন্দ্রঃ ॥

প্রণীতঃ (পুং) সংস্কৃতানলঃ। যজ্ঞে মন্ত্রাদিনা সংস্কৃতাগ্নিঃ। ইত্যমরঃ ॥

প্রণীতা (স্ত্রী) যজ্ঞপাত্রবিশেষঃ। ইতি মেদিনী ॥

প্রণুতং (ত্রি) স্তুতং। ইত্যমরঃ ॥

প্রণেয়ঃ (ত্রি) বশ্যঃ। ইত্যমরঃ ॥

প্রততিঃ (স্ত্রী) বিস্তৃতিঃ। বল্লী। ইতি মেদিনী ॥

প্রততী (স্ত্রী) ব্রততী। ইত্যমরটীকায়াং ভরতঃ ॥

প্রতনঃ (ত্রি) পুরাতনঃ। ইত্যমরঃ ॥

প্রতর্কণং (ক্লী) বিতর্কঃ। তৎপর্য্যায়ঃ। তর্কঃ ২ বিতর্কঃ ৩ ব্যূহঃ ৪ বহঃ ৫ উহঃ ৬ বিতর্কণং ৭ অধ্যাহারঃ ৮ অধ্যাহরণং ৯ উহনং ১০। ইতি শব্দরত্নাবলী ॥

প্রতলং (ক্লী) পাতালভেদঃ। ইতি মেদিনী ॥

প্রতলঃ (পুং) বিস্তৃতাঙ্গুলিপাণিঃ। চপেটঃ। ইত্যমরঃ ॥

প্রতানঃ (পুং) বিস্তৃতঃ। প্রপূর্ব্বতনধাতোর্ঘঞ্‌প্রত্যয়নিষ্পন্নঃ। বায়ুরোগবিশেষঃ। তস্য সংজ্ঞান্তরং অপতানকং। যথা। দৃষ্টিং সংস্তভ্য সংজ্ঞাঞ্চ হত্বা কণ্ঠেন কূজতি। হৃদি মুক্তে নরঃ স্বাস্থ্যং যাতি মোহং বৃতে পুনঃ। বায়ুনা দারুণং প্রাহুরেকে তদপতানকং ॥ ইতি মাধবকরঃ

প্রতানিনী (স্ত্রী) প্রতানবতী। বিস্তৃতলতাদিঃ। ইত্যমরভরতৌ ॥

প্রতাপঃ (পুং) কোষদণ্ডজতেজঃ। কোষো ধনং দণ্ডো দমঃ তদ্ধেতুত্বাৎ সৈন্যমপি দণ্ডঃ তাভ্যাং যত্তেজো জায়তে সঃ। ইতি ভরতঃ ॥ তৎপর্য্যায়ঃ। প্রভাবঃ ২।

ইত্যমরঃ॥ তাপঃ। তেজঃ। ইতি মেদিনী॥ অর্কবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

প্রতাপনং (ক্লী) পীড়নং। ইতি শব্দরত্নাবলী॥

প্রতাপনঃ (পুং) নরকবিশেষঃ। ইতি শব্দরত্নাবলী॥ স চ কুম্ভীপাকঃ। ইতি শ্রীভাগবত্‌॥

প্রতাপসঃ (পুং) শুক্লার্কবৃক্ষঃ। ইত্যমরঃ॥

প্রতারকঃ (ত্রি) বঞ্চকঃ। ধূর্ত্তঃ। যথা। যো যস্য প্রতারকঃ স তস্যাধ্যাপকঃ। প্রপূর্ব্বতৃধাতোর্ণকপ্রত্যয়নিষ্পন্নঃ॥

প্রতারণং (ক্লী) প্রতারণা। তৎপর্য্যায়ঃ। বঞ্চনং ২ ব্যলীকং ৩ অভিসন্ধানং ৪। ইতি হেমচন্দ্রঃ॥

প্রতারণা (স্ত্রী) বঞ্চনা। যথা। যদীচ্ছসি বশীকর্ত্তুং জগদেকেন কর্ম্মণা। উপাস্যতাং কলৌ কল্পলতা দেবী প্রতারণা॥ ইত্যুদ্ভটঃ॥

প্রতারিতঃ (ত্রি) কৃতপ্রতারণঃ। তৎপর্য্যায়ঃ ব্যংসিতঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥

প্রতি ব্য বিংশত্যুপসর্গান্তর্গতপঞ্চদশোপসর্গঃ। বোপদেবেনাস্য গিসংজ্ঞা কৃতা। অস্যার্থাঃ। প্রতিনিধিঃ। মুখ্যসদৃশঃ। যথা প্রদ্যুম্নঃ কেশবাৎ প্রতি॥ বীপ্সা। ব্যাপ্তুমিচ্ছা। যথা বৃক্ষং বৃক্ষং প্রতিসিঞ্চতি॥ লক্ষণং। চিহ্নং। যথা বৃক্ষং প্রতি বিদ্যোততে বিদ্যুৎ॥ ইত্থম্ভূতাখ্যানং। কথঞ্চিৎ প্রকারমাপন্নং ইত্থম্ভূতং তস্যাখ্যানং। যথা সাধু বিপ্রো মাতরং প্রতি॥ ভাগঃ। স্বীক্রিয়মাণোঽংশঃ। যথা হরং প্রতি হলাহলং॥ প্রতিদানং। গৃহীতস্য প্রতিদানং। যথা ভক্তেঃ প্রত্যমৃতং শম্ভোঃ। তিলেভ্যঃ প্রতি মাষান্ যচ্ছতি। তিলান্ গৃহীত্বা মাষান্ দদাতীত্যর্থঃ॥ স্তোকং। অল্পং। যথা। শাকপ্রতি সূপপ্রতি। ক্ষেপঃ। নিশ্চয়ঃ। ইত্যমরভরতমেদিনীকারাঃ॥ ব্যাবৃত্তিঃ। প্রশস্তিঃ। বিরোধঃ। সমাধিঃ। ইতি মুগ্ধবোধটীকায়াং দুর্গাদাসঃ॥ আভিমুখ্যং। স্বভাবঃ। ইতি শব্দরত্নাবলী॥

প্রতিকঃ (ত্রি) কার্ষাপণিকঃ। কার্ষাপণেন ক্রীতঃ। যথা। কার্ষাপণাট্টিঠন্ বক্তব্যঃ প্রতিরাদেশশ্চ বা। ইতি সিদ্ধান্তকৌমুদী॥

প্রতিকর্ম্ম [ন্] (ক্লী) প্রসাধনং। বেশঃ। ইত্যমরঃ॥

প্রতিকায়ঃ (পুং) শরব্যং। প্রতিরূপকং। ইতি জটাধরঃ॥

প্রতিকারঃ (পুং) প্রতীকারঃ। ইতি শব্দরত্নাবলী॥

প্রতিকাশঃ (ত্রি) প্রতীকাশঃ। ইত্যমরটীকায়াং ভানুদীক্ষিতঃ॥

প্রতিকাসঃ (ত্রি) প্রতীকাশঃ। ইত্যমরটীকায়াং রমানাথঃ॥

প্রতিকূপঃ (পুং) পরিখা। ইতি হারাবলী॥

প্রতিকূলং (ত্রি) অননুকূলং। বিপক্ষঃ। তৎপর্য্যায়ঃ। প্রসব্যং ২ অপসব্যং ৩ অপষ্ঠু ৪। প্রতীপং। ইত্যমরঃ॥

প্রতিকৃতিঃ (স্ত্রী) প্রতিমা। ইত্যমরঃ॥ প্রতিনিধিঃ। প্রতিকারঃ। ইতি মেদিনী॥

প্রতিকৃষ্টং (ত্রি) গর্হ্যং। দ্বিরাবৃত্ত্যাকর্ষিতং। ইতি মেদিনী॥

প্রতিগতং (ক্লী) পক্ষিগতিবিশেষঃ। যথা। গতাগতপ্রতিগতসম্পাতাদ্যাশ্চ পক্ষিণাং। গতিভেদাঃ পক্ষিগৃহং কুলায়ো নীড়মস্ত্রিয়াং ॥ ইতি জটাধরঃ ॥

প্রতিগ্রহঃ (পুং) স্বীকরণং। সৈন্যপৃষ্ঠং। পতদ্‌গ্রহঃ। দ্বিজেভ্যো বিধিবদ্দেয়ং। তদ্‌গ্রহঃ। গ্রহভেদঃ। ইতি মেদিনী ॥ * ॥ ব্রাহ্মণস্যার্থঃ প্রতিগ্রহার্জ্জিতঃ। যথা। প্রতিগ্রহার্জিতা বিপ্রে ক্ষত্রিয়ে শস্ত্রনির্জিতাঃ। বৈশ্যে ন্যায়ার্জিতাশ্চার্থাঃ শূদ্রে শুশ্রূষয়ার্জিতাঃ ॥ * ॥ অযাচিতপ্রতিগ্রহে দোষাভাবো যথা। অযাচিতোপপন্নে তু নাস্তি দোষঃ প্রতিগ্রহে। অমৃতং তং বিদুর্দ্দেবাস্তস্মাত্তন্নৈব নির্ণুদেৎ ॥ * ॥ গুরুভৃত্যাংশ্চোজ্জিহীর্ষুরর্চ্চিষ্যন্ দেবতাতিথীন্। সর্ব্বতঃ প্রতিগৃহ্লীয়াৎ ন তু তৃপ্যেৎ স্বয়ং ততঃ ॥ সাধুতঃ প্রতিগৃহ্লীয়াদথবা সাধুনা দ্বিজঃ। গুণবানল্পদোষশ্চ নির্গুণো হি নিমজ্জতি ॥ এবং তস্করবৃত্ত্যা বা কৃত্বা ভরণমাত্মনঃ। কুর্য্যাদ্বিশুদ্ধিং পরতঃ প্রায়শ্চিত্তং দ্বিজোত্তমঃ ॥ ইতি গারুড়ে ২১৫ অধ্যায়ঃ ॥ * ॥ তীর্থে প্রতিগ্রহনিষেধো যথা। সুবর্ণমথ যুক্তাত্মা তথৈবান্যৎ প্রতিগ্রহং। স্বকার্য্যে পিতৃকার্য্যে বা দেবতাভ্যর্চ্চনেঽপি বা ॥ নিষ্ফলং তস্য তত্তীর্থং যাবত্তদ্ধনমশ্নুতে। অতস্তীর্থে ন গৃহ্লীয়াৎ পুণ্যেষ্বায়তনেষু চ ॥ ইতি কৌর্ম্মে ৩৩ অধ্যায়ঃ ॥ * ॥ রাজাদিতঃ প্রতিগ্রহনিষেধো যথা। ন রাজ্ঞঃ প্রতিগৃহ্লীয়ান্ন শূদ্রপতিতাদপি। ন চান্যস্মাদশক্তশ্চ নিন্দিতান্ বর্জয়েদ্‌বুধঃ ॥ ইতি কৌর্ম্মে উপবিভাগে ১৫ অধ্যায়ঃ ॥ * ॥ বিদ্যারহিতস্য প্রতিগ্রহনিষেধো যথা। হেম ভূমিং তিলান্ গাশ্চ অবিদ্বানাদদাতি যঃ। ভস্মীভবতি সোঽহ্নায় দাতুঃ স্যান্নিষ্ফলঞ্চ তৎ ॥ তস্মাদবিদ্বান্নাদদ্যাদল্পশোঽপি প্রতিগ্রহং। বিষমন্ত্রাপরিজ্ঞানী বিষেণাল্পেন নশ্যতি ॥ * ॥ গর্হিতপ্রতিগ্রহাদি যথা। হস্তিকৃষ্ণাজিনাদ্যাস্তু গর্হিতা যে প্রতিগ্রহাঃ। সদ্বিপ্রাস্তান্ন গৃহ্লীয়ুর্গৃহ্লন্তস্তু পতন্তি তে॥ কৃষ্ণাজিনপ্রতিগ্রাহী হয়ানাং শুক্রবিক্রয়ী। নবশ্রাদ্ধস্য ভোক্তা চ ন ভূয়ঃ পুরুষো ভবেৎ ॥ * ॥ আপদি গর্হিতপ্রতিগ্রহকর্ত্তব্যতা যথা। প্রোক্তপ্রতিগ্রহাভাবে প্রোক্তায়াং বৃহদাপদি। বিপ্রোঽশ্নন্ প্রতিগৃহ্লন্ বা যতস্ততোঽপি নাঘভাক্॥ গুর্ব্বাদিপোষ্যবর্গার্থং দেবাদ্যর্থঞ্চ সর্ব্বশঃ। প্রত্যাদদ্যাদ্দ্বিজো যস্তু ভৃত্যর্থমাত্মনাপি চ ॥ দধিক্ষীরাজ্যমাংসানি গন্ধপুষ্পাম্বুমৎস্যকান্। শয্যাশনাসনং শাকং প্রত্যাখ্যেয়ং ন কর্হিচিৎ ॥ অপি দুষ্কৃতকর্ম্মভ্যঃ সমাদদ্যাদযাচিতং। পতিতেভ্যস্তথান্যেভ্যঃ প্রতিগ্রাহ্যমসংশয়ং ॥ * ॥ প্রতিগ্রহীতুং শক্তস্য তত্ত্যাগে স্বর্গো যথা। শক্তঃ প্রতিগ্রহীতুং যো বেদবৃত্তঃ সুসংযতঃ। লভ্যমানং ন গৃহ্লাতি স্বর্গস্তস্য সুনিশ্চিতং ॥*॥ প্রতিগ্রহমৃণং বাপি যাচিতং যো ন যচ্ছতি। তৎকোটিগুণিতগ্রস্তো মৃতো দাসত্বমৃচ্ছতি ॥ * ॥ দাতা চ ন স্মরেদ্দানং প্রতিগ্রাহী ন যাচতে। তাবুভৌ নরকং

যাতৌ দাতা চৈব প্রতিগ্রহী ॥ * ॥ বদন্তি কবয়ঃ কেচিদ্দানপ্রতিগ্রহৌ প্রতি । প্রত্যক্ষং লিঙ্গমেবেহ দাতৃযাচকয়োর্ব্বলং ॥ দাতৃহস্তো ভবেদূর্দ্ধমধস্তিষ্ঠেৎ প্রতিগ্রহী । যদ্দানং প্রতিগৃহ্লীয়াৎ প্রতিগ্রাহী ব্রজত্যধঃ ॥ * ॥ প্রতিগ্রহপ্রকারো যথা । ভূমেঃ প্রতিগ্রহং কুর্য্যাদ্ভূমিং কৃত্বা প্রদক্ষিণং । করে গৃহ্য তথা কন্যাং দাসদাস্যৌ তথা দ্বিজাঃ ॥ করং হি হৃদি বিন্যস্য ধর্ম্ম্যো জ্ঞেয়ঃ প্রতিগ্রহঃ । আরুহ্য চ গজস্যোক্তঃ কর্ণে চাশ্বস্য কীর্ত্তিতঃ ॥ তথা চৈকশফানাঞ্চ সর্ব্বেষামবিশেষতঃ । প্রতিগৃহ্লাত গাং শৃঙ্গে পুচ্ছে কৃষ্ণাজিনং তথা ॥ আরণ্যাঃ পশবঃ সর্ব্বে গ্রাহ্যাঃ পুচ্ছে বিচক্ষণৈঃ । প্রতিগ্রহমথোষ্ট্রস্য আরুহ্যৈব তু পাদুকে ॥ ঈশায়াস্তু রথো গ্রাহ্যশ্ছত্ত্রে দণ্ডস্তু ধারয়েৎ । দ্রুমাণামথ সর্ব্বেষাং মূলে ন্যস্তকরো ভবেৎ । আয়ুধানি সমাদায় তথা ভূষ্য বিভূষণং । ধর্ম্মধ্বজো তথা স্পৃষ্ট্বা প্রবিশ্য চ তথা গৃহং ॥ অবতীর্য্য তু সর্ব্বাণি জলস্থানানি চৈব হি । উপবিশ্য চ শয্যায়াং স্পর্শয়িত্বা করেণ বা ॥ দ্রব্যাণ্যন্যান্যথাদায় স্পৃষ্ট্বা বা ব্রাহ্মণং পঠেৎ । কন্যাদানে ন তু পঠেদ্দ্রব্যাণি চ পৃথক্ পৃথক্ । প্রতিগ্রহা দ্বিজশ্রেষ্ঠ তত্রৈবান্তর্ভবন্তি তে ॥ দ্রব্যাণামথ সর্ব্বেষাং দ্রব্যসংশ্রয়ণান্নরঃ । বাচয়েজ্জলমাদায় করেণ চ প্রতিগ্রহং ॥ প্রতিগ্রহস্য যো ধর্ম্মং ন জানাতি দ্বিজো বিধিং । স দ্রব্যস্তৈন্যসংযুক্তো নরকং প্রতিপদ্যতে । অথাপি হি প্রবক্ষ্যামি বিধিং সর্ব্বং বিশেষণাৎ ॥ * ॥ বাজিপ্রদানেন প্রতিগ্রহে বা দাতৃগ্রহীত্রোরপি যেন পুণ্যং । স্বর্গং প্রজায়েত শৃণুধ্বমেতৎ গৃহীতয়োশ্চ বিধিবদ্দ্বিজেন্দ্র ॥ কুর্য্যাদসৌ পঞ্চদিনানি পূর্ব্বং পঞ্চোপচারৈর্যুত বিষ্ণুপূজাং । কুষ্মাণ্ডমন্ত্রৈর্য্যতদুগ্ধহোমং যদ্গ্রাম ইত্যাদি মরুত্বতীয়ং ॥ সোঙ্কার পূর্ব্বাদিভিরন্বিতং তং প্রত্যেকমষ্টৌ জুহুয়াদ্দ্বিজেন্দ্রঃ । সূর্য্যেণ মন্ত্রেণ চ তদ্বদষ্টৌ ষষ্ট্যা প্রযুক্তং ত্রিশতং জুহোতি ॥ কুর্য্যাচ্চ গায়ত্রিজপং সহস্রং পশ্চাৎ প্রগৃহ্যং তুরগং দ্বিজাগ্র্যঃ । তদ্বত্তথাত্মানময়ং নয়েদ্ধি দাতাপি চৈতদ্ব্রতমাবিদধ্যাৎ ॥ দ্বিজাগ্র্যবং প্রাক্তনপাপশুদ্ধ্যৈ দ্বাবপ্যমূ সূর্য্যজন্মং লভেতাং । ইতি বৃহৎপারাশরে ৪।৮ অধ্যায়ঃ ॥ * ॥ অপি চ । বিষ্ণুধর্ম্মোত্তরে । বীজানাং মুষ্টিমাদায় রত্নান্যাদায় সর্ব্বতঃ । বস্ত্রং দশান্তমাদদ্যাৎ পরিধায় তথা পুনঃ ॥ আরুহ্যোপানহৌ চৈব যানমারুহ্য পাদুকে । প্রতিগ্রহীতা সাবিত্রীং সর্ব্বত্রৈব প্রকীর্ত্তয়েৎ ॥ ততস্তু সার্দ্ধং দ্রব্যেণ তস্য দ্রব্যস্য দৈবতং । সমাপয়েত্ততঃ পশ্চাৎ কামস্তত্যা প্রতিগ্রহং । বিধিং ধর্ম্ম্যমথো জ্ঞাত্বা যস্তু কুর্য্যাৎ প্রতিগ্রহং । দাত্রা সহ তরত্যেব নানাদুর্গাণ্যসৌ দ্বিজঃ ॥ ব্রহ্মপুরাণে । ব্রাহ্মণঃ প্রতি-

য়াৎ বৃত্ত্যর্থং সাধুতস্তথা । অব্যশ্বমপি মাতঙ্গতিললৌহাংশ্চ বর্জ্জয়েৎ ॥ কৃষ্ণাজিনতিলগ্রাহী ন ভূয়ঃ পুরুষো ভবেৎ ।

শয্যালঙ্কারবস্ত্রাদি প্রতিগৃহ্য মৃতস্য চ ॥ নবকান্ন নিবর্ত্তস্তে ধেনুং তিলময়ীংতথা। তথা। ব্রহ্মহত্যা সুরাপানমপি স্তেয়ং তরিষ্যতি। আতুরাদ্যদ্গৃহীতস্তু তৎ কথং বৈ তরিষ্যতি॥ এতদাদিদ্রব্যদানং প্রতিগ্রহীতুর্দোষজনকং ॥ * ॥ এতদনিচ্ছবে বিদ্যাদিরহিতত্বেনাসমর্থায় চ দাতুরপি দোষজনকমাহ দক্ষঃ। ন কেবলং হি তদ্যাতি শেষমস্য চ নশ্যতি। তদ্দত্তদ্রব্যং। অতএব যাজ্ঞবল্ক্যঃ। বিদ্যাতপোভ্যাং হীনেন ন তু গ্রাহ্যঃ প্রতিগ্রহঃ। গৃহ্নন্ প্রদাতারমধো নয়ত্যাত্মানমেব চ ॥ অধো নরকং ॥ * ॥ এতদ্দানপ্রতিগ্রহোত্তরং উক্ততপোজপাদিভিরাত্মতরণক্ষমায় স্বেচ্ছয়া প্রতিগৃহ্নতে দানং ন দোষায় ইত্যাহ বিষ্ণুঃ। এতানি প্রতিগৃহ্নাতি স্বেচ্ছয়াভ্যর্থিতো ন তু। তস্মৈ দানে ন দোষোঽস্তি যস্ত্বাত্মানন্তু তারয়েৎ ॥ তারণপ্রকারমাহ হারীতঃ। মণিবাসোগবাদীনাং প্রতিগ্রহে সাবিত্র্যষ্টসহস্রং জপেৎ ॥ * ॥ দেবলঃ। প্রতিগ্রহং সমর্থো হি কৃত্বা বিপ্রো যথাবিধি। নিস্তারয়তি দাতার মাত্মানঞ্চ স্বতেজসা॥ স্কান্দে। বেদাঙ্গপারগো বিপ্রো যদি কুর্য্যাৎ প্রতিগ্রহং। ন স পাপেন লিপ্যেত পদ্মপত্রমিবাম্ভসা ॥ * ॥ মহাভারতে। তীর্থে ন প্রতিগৃহ্নীয়াৎ পুণ্যেষ্বায়তনেষু চ। নিমিত্তেষু চ সর্ব্বেষু ন প্রমত্তো ভবেন্নরঃ ॥ * ॥ প্রতিগ্রহসমর্থস্য তদকরণে ফলাধিক্যং যথা। যাজ্ঞবল্ক্যঃ। প্রতিগ্রহসমর্থো হি নাদত্তে যঃ প্রতিগ্রহং। যে লোকা দানশীলানাং স তানাপ্নোতি পুষ্কলান্ ॥ * ॥ অপবাদমাহ স এব। কুশাঃ শাকং পয়ো মৎস্যা গন্ধাঃ পুষ্পং দধি ক্ষিতিঃ। মাংসং শয্যাসনং ধানাঃ প্রত্যাখ্যেয়ং ন বারি চ ॥ অন্যচ্চ। শয্যাং গৃহান্ কুশান্ গন্ধানপঃ পুষ্পং মণীন্দধি। মৎস্যান্ ধানাঃ পয়ো মাংসং শাকঞ্চৈব ন নির্ণুদেৎ ॥ মণীন্ বিষাদিনিবারকান্। এধোদকং ফলং মূলমন্নমভ্যুদ্ধৃতঞ্চ যৎ। অভ্যুদ্ধৃতং অভ্যর্থ্যদত্তং। সর্ব্বতঃ প্রতিগৃহ্নীয়াৎ মধ্বথোভয়দক্ষিণাং ॥ * ॥ কিমিতি ন প্রত্যাখ্যেয়মিত্যাহ মনুঃ। অযাচিতাহৃতং গ্রাহ্যমপি দুষ্কৃতকর্ম্মণঃ। অন্যত্র কুলটাষণ্ডপতিতেভ্যস্তথা দ্বিষঃ ॥ * ॥ প্রতিগ্রহমাত্রে প্রয়োগসারে। প্রতিগ্রহং ন গৃহ্নীয়াদাত্মভোগবিধিৎসয়া। দেবতাতিথিপূজার্থং যত্নাদ্ধনমুপার্জ্জয়েৎ ॥ অঙ্গিরাঃ। কুটুম্বার্থে দ্বিজঃ শূদ্রাৎ প্রতিগৃহ্নীত যাচিতং। ক্রত্বর্থমাত্মনে চৈব ন হি যাচেত কর্হিচিৎ ॥ * ॥ যজ্ঞার্থং যাচনে নিন্দামাহ যাজ্ঞবল্ক্যঃ। চাণ্ডালো জায়তে যজ্ঞকরণাচ্ছূদ্রভিক্ষিতাৎ। ইতি শুদ্ধিতত্ত্বং ॥

প্রতিগ্রাহঃ (পুং) পতদ্গ্রহঃ। ইত্যমরঃ॥ প্রতিগ্রহণঞ্চ ॥

প্রতিঘঃ (পুং) ক্রোধঃ। ইত্যমরঃ॥ প্রতিঘাতঃ। ইতি মেদিনী ॥ মূর্চ্ছা। ইতি শব্দরত্নাবলী ॥

প্রতিঘাতনং (ক্লী) মারণং। ইত্যমরঃ ॥

প্রতিঘ্নং (ক্লী) অঙ্গং। ইতি শব্দচন্দ্রিকা ॥

প্রতিচ্ছন্দঃ [স্] (ক্লী) প্রতিরূপং। ইতি ত্রিকাণ্ডশেষঃ॥

প্রতিচ্ছায়া (স্ত্রী) প্রতিকৃতিঃ। মূর্ত্তিসদৃশমৃচ্ছিলাদিনির্ম্মিতপ্রতিরূপং। ইত্যমরভরতৌ॥

প্রতিজঙ্ঘা (স্ত্রী) অগ্রজঙ্ঘা। ইতি হেমচন্দ্রঃ॥

প্রতিজল্পঃ (পুং) বাক্যবিশেষঃ। যথা। দুস্ত্যজদ্বন্দ্বভাবেঽস্মিন্ প্রাপ্তির্নার্হেত্যনুদ্ধতং। দূতসম্মাননেনোক্তং যত্র স প্রতিজল্পকঃ॥ ইত্যুজ্জ্বলনীলমণিঃ॥

প্রতিজাগরঃ (পুং) প্রত্যবেক্ষণং। তৎপর্য্যায়ঃ। অবেক্ষা ২। ইত্যমরঃ॥ জাগরপ্রতিনিধিঃ প্রতিজাগরঃ। দ্বে গৃহমবেক্ষস্ব ইত্যাদিনিয়োগস্য ইতি রায়মুকুটঃ॥

প্রতিজিহ্বা (স্ত্রী) তালুমূলস্থক্ষুদ্রজিহ্বা। আল্‌জিব ইতি ভাষা। তৎপর্য্যায়ঃ। প্রতিজিহ্বিকা ২ মাধ্বী ৩ রসনকাকুঃ ৪ অলিজিহ্বিকা ৫। ইতি শব্দরত্নাবলী॥

প্রতিজিহ্বিকা (স্ত্রী) প্রতিজিহ্বা। ইতি ত্রিকাণ্ডশেষঃ॥

প্রতিজ্ঞা (স্ত্রী) কর্ত্তব্যত্বপ্রকারকজ্ঞানানুকূলব্যাপারঃ। ইত্যনুমিতিগাদাধরী॥ সাধ্যনির্দ্দেশঃ। ইতি গোতমসূত্রং॥ সাধ্যাভিধায়িকা বাক্। ইতি ব্যবহারতত্ত্বং॥ তৎপর্য্যায়ঃ। আং ২ প্রতিজ্ঞানং ৩ অঙ্গীকারঃ ৪ প্রতিশ্রবঃ ৫ ওঁ ৬ সমাধিঃ ৭ সম্বিৎ ৮ আগূঃ ৯ আশ্রবঃ ১০ সংশ্রবঃ ১১ নিয়মঃ ১২ অভ্যুপগমঃ ১৩ বাঢ়ং ১৪ আস্থা ১৫। ইতি শব্দরত্নাবলী॥ সন্ধা ১৬ সঙ্গরঃ ১৭ সংশ্রাবঃ ১৮ উররীকারঃ ১৯ শ্রবঃ ২০। ইতি জটাধরঃ॥ * ॥ প্রতিজ্ঞারোধো ন কর্ত্তব্যঃ। যথা। ত্বয়াস্য দৈত্যাধিপতে বাচ্যং সাম যতো ফলং। প্রতিজ্ঞা নাবরোদ্ধব্যা স্বল্পকেঽপি চ বস্তুনি॥ ইত্যগ্নিপুরাণং॥

প্রতিজ্ঞাতং (ত্রি) অঙ্গীকৃতং। ইত্যমরঃ॥

প্রতিজ্ঞানং (ক্লী) প্রতিজ্ঞা। ইত্যমরঃ॥

প্রতিজ্ঞেয়ঃ (পুং) স্তুতিপাঠকঃ। ইতি ভূরিপ্রয়োগঃ॥ প্রতিজ্ঞাতব্যে ত্রি॥

প্রতিতালঃ (পুং) তালবিশেষঃ। যথা। কান্তারঃ সমরাখ্যশ্চ বৈকুণ্ঠো বাঙ্কিতস্তথা। কথিতাঃ শঙ্করেণৈব চত্বারঃ প্রতিতালকাঃ কান্তারো যথা। কান্তারঃ প্রতিতালস্তু চন্দ্রক্রীড়ে দ্রুতদ্বয়ং। দশাক্ষরপদেনায়ং শৃঙ্গারে বর্ত্ততে রসে॥ ১॥ সমরাখ্যো যথা। লঘুদ্রুতৌ লঘুশ্চান্তে নৃপতাল উদাহৃতঃ। রুদ্রসংখ্যাক্ষরপদঃ সমরে বীরকে রসে॥ ২॥ বৈকুণ্ঠো যথা। রুদ্রত্রয়স্তু বৈকুণ্ঠে প্রতিতালে সমীরিতঃ। অকসংখ্যাক্ষরৈঃ পাদো হাস্যে ত্রিপুটতালকে॥ ৩॥ বাঙ্কিতো যথা। বাঙ্কিতস্তৃতীয়ে তালে লঘুরেকো দ্রুতস্তথা। ত্রয়োদশাক্ষরৈর্যুক্তো রসেঽদ্ভুতে প্রকীর্ত্তিতঃ॥ ৪॥ ইতি সঙ্গীতদামোদরঃ॥

প্রতিতালী (স্ত্রী) তালকোদ্ঘাটনযন্ত্রং। চাবি ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

প্রতিদানং (ক্লী) বিনিময়ঃ। ন্যস্তার্পণং। ইত্যমরঃ॥

প্রতিদারণং (ক্লী) যুদ্ধং। ইতি শব্দমালা॥

প্রতিদিনং (ক্লী) প্রত্যহং। দিনং দিনং প্রতি। যথা। ততঃ প্রতিদিনং বেলা বৰ্দ্ধতে ত্রিপলাত্মিকা। ইতি সংকৃত্যমুক্তাবলী॥

প্রতিদিবা [ন্] (পুং) সূর্য্যঃ। ইতি ত্রিকাণ্ডশেষঃ॥ প্রতিদিনঞ্চ॥

প্রতিদীবা [ন্] (পুং) সূর্য্যঃ। ইতি শব্দরত্নাবলী॥

প্রতিদেয়ং (ত্রি) ক্রীতদ্রব্যস্য দুষ্ক্রীতবুদ্ধ্যা পরাবৃত্য দানং। যথা। ক্রীত্বা মূল্যেন যঃ পণ্যং দুষ্ক্রীতং মন্যতে ক্রয়ী। বিক্রেতুঃ প্রতিদেয়ন্তত্তস্মিন্নেবাহ্ন্যবিক্ষতং॥ ইতি মিতাক্ষরা॥

প্রতিধ্বনিঃ (পুং) প্রতিনাদঃ। গুম্‌রন্ ইতি ভাষা। তৎপর্য্যায়ঃ। প্রতিশব্দঃ ২ প্রতিশ্রুৎ ৩ প্রতিধ্বানং ৪। ইতি শব্দরত্নাবলী॥

প্রতিধ্বানং (ক্লী) প্রতিধ্বনিঃ। ইত্যমরঃ॥

প্রতিনপ্তা [ঋ] (পুং) প্রপৌত্রঃ। ইতি হেমচন্দ্রঃ॥

প্রতিনবং (ত্রি) নূতনং। ইতি জটাধরঃ॥

প্রতিনিধিঃ (পুং) প্রতিমা। ইত্যমরঃ॥ মুখ্যসদৃশঃ। তস্য বিবেচনং যথা। অত্যন্তাসামর্থ্যেষু স্কন্দপুরাণং। পুত্রং বা বিনয়োপেতং ভগিনীং ভ্রাতরং তথা। এষামভাব এবান্যং ব্রাহ্মণং বিনিযোজয়েৎ॥ গরুড়পুরাণে। ভাৰ্য্যা ভর্ত্তৃব্রতং কুর্য্যাৎ ভাৰ্য্যায়াশ্চ পতিস্তথা। অসামর্থ্যে তয়োস্তাভ্যাং ব্রতভঙ্গো ন জায়তে॥ বরাহপুরাণে। পিতৃমাতৃপতিভ্রাতৃশ্বশ্রূগুর্ব্বাদিভূভুজাং। অদৃষ্টার্থমুপোষিত্বা স্বয়ঞ্চ ফলভাগ্‌ভবেৎ॥ অত্রৈব বিষয়ে কাত্যায়নঃ। দক্ষিণা নাত্র কৰ্ত্তব্যা শুশ্রূষা বিহিতা চ যা। *। ননু প্রতিনিধৌ মমেহ শর্ম্মাদ্যঙ্গমন্ত্রস্থফলং কুত্রান্বেতি চেৎ প্রধান এব। তথা চ শারীরিকভাষ্যে শ্রুতিঃ। যাং বৈ কাঞ্চনযজ্ঞঋত্বিজ আশিষমাশাসতে যজমানায়ৈব তামা শাসতে ইতি হোবাচ ইতি। ব্রাহ্মণসৰ্ব্বস্বে তু যজমানায়েত্যাদৌ যজমানস্যৈব সেতি পাঠে বিশেষঃ। তথা চ সরলায়াং সূত্রং। যাং বৈ কাঞ্চনযজ্ঞঋত্বিগাশিষমাশাস্তে সা যজমানস্যৈবেতি। ঋত্বিগ্‌যজমানপদে প্রতিনিধিপ্রধানপরে আকাঙ্ক্ষিতত্বাদিতি। অতএব প্রতিনিধিপুত্রাদিনাপ্যায়াস্তু নঃ পিতর ইত্যাদিবদনূহ এব পঠ্যতে বাক্যস্য কাল্পনিকত্বাত্তত্র ন তথেতি॥ *॥ অত্র প্রতিনিধিপ্রসঙ্গেন স্মৃত্যনুসারাৎ কিঞ্চিল্লিখ্যতে। কালমাধবীয়ে। কাম্যে প্রতিনিধির্নাস্তি নিত্যনৈমিত্তিকে হি সঃ। কাম্যেষূপক্রমাদূর্দ্ধমন্যে প্রতিনিধিং বিদুঃ॥ অস্যার্থস্তু মাধবাচার্য্যেণাভিহিতঃ। যথা নিত্যনৈমিত্তিকং প্রতিনিধিনাপ্যুপক্রম্য কারয়েৎ। কাম্যস্তু স্বসামর্থ্যং পরীক্ষ্য স্বয়মেব উপক্রম্য কুর্য্যাৎ। অসামর্থ্যে তু উপক্রমাদূর্দ্ধং প্রতিনিধিনাপি তৎ কারয়েৎ। এতচ্চ কাম্যং শ্রৌতপরং। কাম্যস্মার্ত্তস্তু অন্যদ্বারাপ্যুপক্রম্য কুর্য্যাৎ। তথা চ পরাশরভাষ্যে শাতাতপঃ। শ্রৌতং কৰ্ম্ম স্বয়ং

কুর্য্যাদন্যোঽপি স্মার্ত্তমাচরেৎ। অশক্তৌ শ্রৌতমপ্যন্যঃ কুর্য্যাদাচারমন্ততঃ ॥ অন্ততঃ উপক্রমাৎ পরতঃ। অন্যথা নিত্য-নৈমিত্তিকমাত্রপরত্বে শ্রৌতস্মার্ত্তভেদে-নোপাদানং ব্যর্থং স্যাত্তয়োরবিশেষাদেব প্রতিনিধিলাভাৎ। অতএব ভারতপাঠাদৌ তথা সমাচারঃ ॥ * ॥ স্মৃত্যর্থসারে। নাভাবস্য প্রতিনিধিরভাবান্তরমিষ্যতে। সজাতীয়মপ্যভাবান্তরমভাবস্য প্রতিনিধি-র্নেষ্যতে। ভাবস্তু কদাচিৎ। যথোপ-বাসাদৌ ব্রাহ্মণভোজনাদি। নাপি প্রতি-নিধাতব্যং নিষিদ্ধং বস্তু কুত্রচিৎ। শ্রোত্রি-য়াণামভোজ্যঞ্চ যদ্‌দ্রব্যং তদশেষতঃ। গ্রাহ্যং প্রতিনিধিত্বেন হোমকার্য্যে ন কুত্র-চিৎ ॥ দ্রব্যং বৈকল্পিকং কিঞ্চিদ্যত্র সঙ্ক-ল্পিতং ভবেৎ। তদলাভে সদৃগ্‌গ্রাহ্যং ন তু বৈকল্পিকান্তরং॥ উপাত্তে তু প্রতি-নিধৌ মুখ্যার্থো লভ্যতে যদি। তত্র মুখ্য-মনাদৃত্য গৌণেনৈব সমাপয়েৎ॥ সংস্কা-রাণামযোগ্যোঽপি মুখ্য এব হি গৃহ্যতে। ন তু সংস্কারযোগ্যোঽন্যো গৃহ্যতে প্রতি-রূপকঃ॥ মুখ্যে কার্য্যাসমর্থে তু লব্ধে-ঽপ্যেতস্য নাদরঃ। প্রতিরূপমুপাদায় শক্ত-মেবোপযুজ্যতে॥ কাষ্ঠৈ রূপৈস্তথা পর্ণৈঃ ক্ষীরৈঃ পুষ্পৈঃ ফলৈস্তথা। গন্ধৈ রসৈঃ সদৃগ্‌-গ্রাহ্যং সর্ব্বালাভে পরং পরং॥ গ্রাম্যাণান্তু ভবেদ্‌গ্রাম্যমারণ্যানামরণ্যজং। যবাভাবে তু গোধূমাস্তথা বেণুযবাদয়ঃ॥ হবিষ্যে গোঘৃতং গ্রাহ্যং তদলাভে তু মাহিষং। আজং বা তদলাভে তু সাক্ষাত্তৈলং প্রযুজ্যতে॥ তৈলাভাবে গ্রহীতব্যং তৈলজং তিলসম্ভবং। তৈলজং তিলসম্ভবং তৈল-ভৃষ্টতিলপিষ্টং। তদভাবে তু সম্নেহং কৌসুম্ভং সর্ষপোদ্ভবং॥ বৃক্ষস্নেহোঽথ বা গ্রাহ্যঃ পূর্ব্বাভাবে পরঃ পরঃ। তদভাবে গবাদীনাং ক্রমাৎ ক্ষীরং বিধীয়তে॥ তদ-লাভে দধি গ্রাহ্যমলাভে তিল ইষ্যতে। যত্র মুখ্যং দধি ক্ষীরং তত্রাপি তদলাভতঃ॥ অজাদেঃ ক্ষীরদধ্যাদি তদলাভে তু গোঘৃতং। মুখ্যাসম্নোঽথবা গ্রাহ্যঃ কার্য্য-কারণসন্ততৌ॥ অতএব ঘৃতাভাবে পূর্ব্বং দধি ততঃ পয়ঃ। তথা। সর্ব্বত্র গৌণ-কালেষু কর্ম্মচোদিতমাচরেৎ। প্রায়শ্চিত্তং বাহ্যুতিভির্হুত্বা কর্ম্ম সমাচরেৎ॥ মাৎস্যে। ঘৃতং ন লভ্যতে যত্র শুষ্কক্ষীরেণ হোম-য়েৎ। ক্ষীরস্য চ দধি জ্ঞেয়ং মধুনশ্চ গুড়ো ভবেৎ॥ আয়ুর্ব্বেদেঽপি। মধু যত্র ন বিদ্যেত তত্র জীর্ণগুড়ো ভবেৎ॥ পৈঠী-নসিঃ। কাণ্ডমূলপর্ণপুষ্পফলপ্ররোহরসগন্ধা-দীনাং সাদৃশ্যেন প্রতিনিধিং কুর্য্যাৎ। সর্ব্বা-লাভে যবঃ প্রতিনিধির্ভবতি। কাণ্ডং নালং প্ররোহোঽঙ্কুরঃ। সর্ব্বালাভে যব ইতি কল্পতরুঃ॥ অবয়ব ইতি নারায়ণোপা-ধ্যায়াঃ॥ শান্তিদীপিকায়াং নারদীয়পঞ্চ-রাত্রং। অভাবে চৈব ধাতূনাং হরিতালং প্রশস্যতে। বীজানামপ্যলাভে তু যব একো বিধীয়তে॥ ওষধীনামলাভে তু সহদেবা প্রশস্যতে। রত্নানামপ্যলাভে তু মুক্তাফলমনুত্তমং॥ লৌহানামপ্যলাভে তু হেমপাত্রং প্রকল্পয়েৎ। লৌহানাং তৈজস-

ন্যাত্রাণাং। ন্যায়প্রাপ্তপ্রতিনিধিমধিকৃত্য জৈমিনিঃ। ন দেবতাগ্নিশব্দক্রিয়মিতি। অস্যার্থঃ। দৈবতায়া আহবনীয়াদের্মন্ত্রস্য প্রযাজাদ্যদৃষ্টার্থকর্ম্মণশ্চাদৃষ্টমাত্রার্থকত্বেন আরাদুপকারকত্বান্ন প্রতিনিধিঃ। ব্রীহ্যাদীন্যাস্তু সন্নিপত্যোপকারকাণাং পুরোডাশসাধনং দৃষ্টমেব প্রয়োজনমিতি তত্র প্রতিনিধিরুচিত ইত্যুক্তং। ইত্যেকাদশীতত্ত্বং ॥ * ॥ আরব্ধকার্ত্তিকাদিস্নানে তু ব্যাধ্যাদিনাসামর্থ্যে পুত্রাদিভিঃ প্রতিনিধিনা কারয়িতব্যং নানুকল্পবিধিনা নিত্যস্নান এব তদ্বিধানাদিতি। ইতি মলমাসতত্ত্বং ॥ * ॥ স্বয়ং করণাসামর্থ্যে অন্যদ্বারা। যথা দক্ষঃ। স্বয়ং হোমে ফলং যচ্চ তদন্যেন ন জায়তে। ঋত্বিক্ পুত্রো গুরুর্ভ্রাতা ভাগিনেয়োঽথ বিট্পতিঃ। এভিরেব হুতং যত্তু তদ্ধুতং স্বয়মেব হি ॥ বিট্পতির্জামাতা। এবঞ্চ ঋত্বিগাদীতরত্র ফলন্যূনতা ॥ * ॥ অত্রাশৌচাশঙ্কয়া বোধনদিনাৎ পূর্ব্বং শুচিতৎকালজীবিত্বরূপাধিকারাভাবেঽপি যদ্বরণাদিকং ক্রিয়তে তৎ কর্ম্মকালে তস্য নারদোক্তস্বয়ংপ্রবর্ত্তনবৎ প্রবর্ত্তনায় ন তু তদানীং প্রতিনিধীয়তে। অথবা। নিঃক্ষিপ্যাগ্নিং স্বদারেষু পরিকল্প্যর্ত্বিজন্তথা। প্রবসেৎ কার্য্যবান্ বিপ্রো বৃথৈব ন চিরং বসেদিতি ছন্দোগপরিশিষ্টবদন্যত্রাপি প্রতিনিধীয়তে। এবং বরণং বিনাপি কচিদ্যদি ঋত্বিক্ প্রবর্ত্ততে তথাপি তৎকর্ম্মসিদ্ধিঃ। দক্ষিণা চ তস্মৈ শুচিকালে দাতব্যেতি। তথা চ নারদঃ। ঋত্বিক্ চ ত্রিবিধো দৃষ্টঃ পূর্ব্বৈর্জুষ্টঃ স্বয়ংকৃতঃ। যদৃচ্ছয়া বা যঃ কুর্য্যাদার্ত্বিজ্যং প্রীতিপূর্ব্বকং ॥ যদৃচ্ছয়া স্বেচ্ছয়া। ইতি তিথ্যাদিতত্ত্বং ॥

প্রতিপঃ (পুং) সান্তনুরাজঃ। ইতি শব্দরত্নাবলী ॥

প্রতিপৎ [দ্] (স্ত্রী) দ্রগড়বাদ্যং। ইতি ত্রিকাণ্ডশেষঃ ॥ বুদ্ধিঃ। তিথিবিশেষঃ। তৎপর্য্যায়ঃ। পক্ষতিঃ ২। ইত্যমরঃ ॥ সা চ চন্দ্রস্য প্রথমকলাক্রিয়ারূপা। বৃদ্ধিরূপা চেৎ শুক্লা ১ একাঙ্কবোধিতা। হ্রাসরূপা চেৎ কৃষ্ণা ১৭ সপ্তদশাঙ্কবোধিতা ॥ * ॥ তস্যা ব্যবস্থা যথা। সা চ কৃষ্ণা দ্বিতীয়াযুক্তা গ্রাহ্যা। প্রতিপৎ সদ্বিতীয়া স্যাদিত্যাপস্তম্বীয়াৎ। শুক্লা অমাবাস্যাযুতা গ্রাহ্যা। প্রতিপদাপ্যমাবাস্যেতি বচনাৎ। ত্রিসন্ধ্যব্যাপিনীত্বে তু সর্ব্বত্র ন যুগ্মাদরঃ। তথা চ পরাশরঃ। ত্রিসন্ধ্যব্যাপিনী যা তু সৈব পূজ্যা সদা তিথিঃ। ন তত্র যুগ্মাদরণমন্যত্র হরিবাসরাৎ ॥ * ॥ কৃষ্ণাপি উপবাসে দ্বিতীয়াযুতা ন গ্রাহ্যা। তথা চ বৃদ্ধবশিষ্ঠঃ। দ্বিতীয়া পঞ্চমী বেধাদ্দশমী চ ত্রয়োদশী। চতুর্দ্দশী চোপবাসে হন্যুঃ পূর্ব্বোত্তরে তিথী ॥ দ্বিতীয়া বেধাৎ যোগাৎ প্রতিপত্তৃতীয়ে হন্তীত্যর্থঃ এবমন্যত্র। অত্রোপবাসপরেণ বিশেষবিধানাৎ আপস্তম্বীয়সামান্যবচনস্য সঙ্কোচঃ ॥ * ॥ কার্ত্তিকশুক্লপ্রতিপদমধিকৃত্য বলিং প্রতি ভগবদ্বাক্যং। বীরপ্রতিপদা নাম তব ভাবী মহোৎসবঃ। অত্র ত্বাং নরশার্দ্দূল হৃষ্টাঃ

পুষ্টাঃ স্বলঙ্কৃতাঃ। পুষ্পদীপপ্রদানেন পূজয়িষ্যন্তি মানবাঃ॥ তত্র মন্ত্রঃ। বলিরাজ নমস্তুভ্যং বিরোচনসুত প্রভো। ভবিষ্যেন্দ্র সুরারাতে পূজেয়ং প্রতিগৃহ্যতাং॥ প্রতিপদা প্রতিপত্তিথ্যা। অত্র প্রতিপদি। ব্রহ্মপুরাণে তু বলিরাজেতিমন্ত্রস্য পূর্ব্বং মন্ত্রেণানেন রাজেন্দ্র সমন্ত্রী সপুরোহিত ইত্যর্দ্ধং। পশ্চাদপি। এবং পূজাং নৃপঃ কৃত্বা রাত্রৌ জাগরণং তত ইত্যুক্তমিতি। পুনর্ব্রহ্মপুরাণে। শঙ্করশ্চ পুরা দ্যূতং সসর্জ সুমনোহরং। কার্ত্তিকে শুক্লপক্ষে চ প্রথমেঽহনি ভূপতে॥ জিতশ্চ শঙ্করস্তত্র জয়ং লেভে চ পার্ব্বতী। অতোঽর্থাচ্ছঙ্করো দুঃখী নিত্যং গৌরী সুখোষিতা॥ তস্মাৎ দ্যূতং প্রকর্ত্তব্যং প্রভাতে তত্র মানবৈঃ। তস্মিন্ দ্যূতে জয়ো যস্য তস্য সম্বৎসরঃ শুভঃ॥ পরাজয়ো বিরুদ্ধশ্চ লব্ধনাশকরো ভবেৎ। দ্যূতঞ্চাপ্রাণিভিঃ ক্রীড়নং। যথা মনুঃ। অপ্রাণিভির্যৎ ক্রিয়তে তল্লোকে দ্যূতমুচ্যতে॥*॥ তত্তিথিমধিকৃত্য ভবিষ্যোত্তরে। যো যো যাদৃশভাবেন তিষ্ঠত্যস্যাং যুধিষ্ঠির। হর্ষদৈন্যাদিনা তেন তস্য বর্ষং প্রয়াতি হি॥ তথা। মহাপুণ্যা তিথিরিয়ং বলিরাজ্যপ্রবর্দ্ধিনী। স্নানং দানং শতগুণং কার্ত্তিকেঽস্যাং তিথৌ ভবেৎ॥*॥ প্রতিপদ্রোহিণীযোগো যথা। ভবিষ্যে। রোহিণ্যা প্রতিপদ্যুক্তা মার্গে মাসি সিতেতরা। গঙ্গায়াং যদি লভ্যেত সূর্য্যগ্রহশতৈঃ সমা॥*॥ তস্যাঃ সংজ্ঞা নন্দা। তত্রাভ্যঙ্গনিষেধো যথা। নন্দাসু নাভ্যঙ্গমুপাচরেচ্চ ক্ষৌরঞ্চ রিক্তাসু জয়াসু মাংসং। পূর্ণাসু যোষিৎ পরিবর্জনীয়া ভদ্রাসু সর্ব্বাণি সমাচরেচ্চ॥*॥ নন্দাদিক্রমমাহ জ্যোতিষে। নন্দা ভদ্রা জয়া রিক্তা পূর্ণা প্রতিপদঃ ক্রমাৎ॥*॥ প্রতিপদাদিপঞ্চদশতিথিষু পঞ্চদশদ্রব্যভক্ষণনিষেধমাহ স্মৃতিঃ। কুষ্মাণ্ডে চার্থহানিঃ স্যাৎ বৃহত্যাং ন স্মরেদ্ধরিং। বহুশত্রুঃ পটোলে স্যাদ্ধনহানিশ্চ মূলকে॥ কলঙ্কী জায়তে বিল্বে তির্য্যগ্‌যোনিশ্চ নিম্বকে। তালে শরীরনাশঃ স্যান্নারিকেলে চ মূর্খতা॥ তুম্বী গোমাংসতুল্যা স্যাৎ কলম্বী গোবধাত্মিকা। শিম্বী পাপকরী প্রোক্তা পূতিকা ব্রহ্মঘাতিকা॥ বার্ত্তাকৌ সুতহানিঃ স্যাচ্চিররোগী চ মাষকে। মহাপাপকরং মাংসং প্রতিপদাদিষু বর্জ্জয়েৎ॥*॥ তত্র ক্ষৌরনিষেধো যথা। ক্ষৌরং বিশাখাপ্রতিপৎসু বর্জ্যং। ইতি তিথ্যাদিতত্ত্বং॥*॥ তত্র জাতফলং। মণিকনকবিভূষাসংযুতশ্চারুকান্তির্নিজকুলকমলোদ্ঘাটমার্ত্তণ্ডবিম্বঃ। প্রতিপদি শশিপূর্ণে লব্ধজন্মা প্রতাপী ভবতি বিমলবেশশ্চারুকেশঃ প্রজেশঃ॥ ইতি কোষ্ঠীপ্রদীপঃ॥*॥ সা অগ্নের্জন্মতিথিঃ। মহাতপা উবাচ। বিষ্ণোর্ব্বিভূতিমাহাত্ম্যং কথিতং তে প্রসঙ্গতঃ। তিথীনাং শৃণু মাহাত্ম্যং কথ্যমানং ময়া নৃপ॥ ইত্থম্ভূতো মহানগ্নির্ব্রহ্মক্রোধোদ্ভবো মহান্। উবাচ দেবং ব্রহ্মাণং তিথির্ম্মে দীয়তাং প্রভো। যস্যামহং সমস্তস্য জগতঃ

খ্যাতিমাপ্নুয়াৎ ॥ ব্রহ্মোবাচ। দেবানামথ যক্ষাণাং গন্ধর্ব্বাণাঞ্চ সত্তম। আদৌ প্রতিপদা যেন ত্বমুৎপন্নোঽসি পাবক॥ ত্বৎপদাৎ প্রাতিপদিকং সংভবিষ্যন্তি দেবতাঃ। অতস্তে প্রতিপন্নাম তিথিরেষা ভবিষ্যতি॥ তস্যাং তিথৌ হবিষ্যেণ প্রাজাপত্যেন মূর্ত্তিনা। হোষ্যন্তি তেষাং প্রীতাঃ স্যুঃ পিতরঃ সর্ব্বদেবতাঃ॥ চতুর্বিধানি ভূতানি মনুষ্যাঃ পশবোঽসুরাঃ। দেবাঃ সর্ব্বে সগন্ধর্ব্বাঃ প্রীতাঃ স্যুস্তর্পিতে ত্বয়ি॥ যশ্চোপবাসং কুর্ব্বীত ত্বদ্ভক্তঃ প্রতিপদ্দিনে। ক্ষীরাশনো বা বর্ত্তেত শৃণু তস্য ফলং মহৎ॥ চতুর্যুগানি ষট্‌ত্রিংশত্তল্লোকেশো মহীয়তে। তেজস্বী রূপসম্পন্নো দ্রব্যবান্ জায়তে নরঃ॥ ইহ জন্মন্যসৌ রাজা স্বর্গলোকে মহীয়তে। তূষ্ণীম্বভূব সোঽপ্যগ্নির্ব্রহ্মদত্তাশ্রয়ং যযৌ॥ য ইদং শৃণুয়ান্নিত্যং প্রাতরুত্থায় মানবঃ। অগ্নের্জন্ম স পাপেভ্যো মুচ্যতে নাত্র সংশয়ঃ॥ ইতি বরাহপুরাণে মহাতপোপাখ্যানে অগ্ন্যুৎপত্তিনামাধ্যায়ঃ ॥ * ॥ প্রতিপদি চন্দ্রদর্শনকারণং যথা। অমাবস্যাঘটীশোধ্যা ষষ্ট্যাহর্ম্মানসংযুতা। সূর্য্যরাহুঘটীভ্যশ্চেদধিকা দৃশ্যতে শশী॥ ইতি জ্যোতিষং॥

প্রতিপত্তিঃ (স্ত্রী) প্রবৃত্তিঃ। প্রাগল্‌ভ্যং। গৌরবং। সংপ্রাপ্তিঃ। প্রবোধঃ। পদপ্রাপ্তিঃ। ইতি মেদিনী॥ মীমাংসকমতে ফলশূন্যকর্ম্মাঙ্গং। যথা। দেবতোদ্দেশেন যাগাদৌ ত্যক্তহবিরাদেরগ্নৌ নিঃক্ষেপঃ। পূজিতপ্রতিমাদের্জলে বিসর্জনমিত্যাদি। শ্রাদ্ধাদৌ সর্ব্বশেষাঙ্গকর্ম্ম। যথা। প্রতিপত্তিরূপকর্ম্মাঙ্গ এব প্রতিপাদ্যাভাবে তন্নিবৃত্তিঃ। ইতি তিথ্যাদিতত্ত্বং ॥ * ॥ নির্ব্বাহিতাঙ্গকদ্রব্যকরণকাঙ্গত্বং প্রতিপত্তিরূপকর্ম্মাঙ্গত্বং। প্রতিপত্তিকর্ম্ম উত্তরা ক্রিয়া। যত্র একেন দ্রব্যেণ কর্ম্মদ্বয়ং নির্ব্বাহ্যতে তত্র উত্তরং কর্ম্ম প্রতিপত্তিকর্ম্ম। তন্নির্ব্বাহকঞ্চ প্রতিপাদ্যং। ইতি তট্টীকায়াং কাশীরামবাচস্পতিঃ ॥*॥ অথ প্রতিপত্ত্যধিকরণং। শকৃন্নিরস্যতি লোহিতং নিরস্যতি গুদেনোপযজতি সর্ব্বং জুহোতি। ইত্যগ্নীসোমীয়পশৌ শ্রূয়তে। শকৃন্নিরস্যতীতি দৃষ্টান্তার্থং। যথা পশোরুদরবর্ত্তিশকৃৎ ত্যজতি তথা লোহিতমপি ত্যজতি। অন্যত্র পশোঃ শীর্ষমাংসোপক্রমেণ হোমঃ। অত্র তু গুদমাংসোপক্রমেণেতি। তত্র চ যজ্ঞশেষমৃত্বিগ্‌ভ্যো দদাতীতি পরিভাষয়া মাংসস্যোত্তরা প্রতিপত্তিঃ প্রাপ্তা। অত্র সর্ব্বহবনেন প্রতিপত্ত্যভাবাৎ কর্ম্মবৈগুণ্যং স্যাদিতি। অত্র সিদ্ধান্তঃ। যদিকারাদুপপত্তিরিতি। যদি প্রতিপাদ্যং স্যাৎ তদা প্রতিপত্তিরঙ্গমিত্যর্থঃ। ইতি রামকৃষ্ণীয়াধিকরণকৌমুদী ॥ * ॥ অপি চ। উপাংশুযাজদ্রব্যেণ শেষকার্য্যং ভবেন্ন বা। ভবেদ্ধবির্ভ্যঃ সর্ব্বেভ্য ইত্যুক্ত্যা প্রাপিতত্বতঃ॥ উক্তাজ্যদ্রব্যশেষস্তু ভাব্যুপস্তরণাদিকৃৎ। অতো ন প্রতিপত্ত্যর্হঃ শেষকার্য্যং ততঃ কথং॥ ইতি

মাধবীয়াধিকরণমালায়াং ৫ পাদে প্রথমাধিকরণং ॥

প্রতিপত্তিপটহঃ (পুং) বাদ্যবিশেষঃ। নাগরা ইতি ভাষা। তৎপর্য্যায়ঃ। লম্পাপটহঃ২। ইতি হারাবলী ॥

প্রতিপত্তূর্য্যং (ক্লী) দ্রগড়বাদ্যং। ইতি ত্রিকাণ্ডশেষঃ ॥

প্রতিপত্রফলা (স্ত্রী) ক্ষুদ্রকারবেল্লী। ইতি রাজনির্ঘণ্টঃ ॥

প্রতিপন্নং (ত্রি) অবগতং। ইত্যমরঃ॥ অঙ্গীকৃতং। ইতি মেদিনী॥ বিক্রান্তঃ। ইতি হেমচন্দ্রঃ॥

প্রতিপর্ণশিফা (স্ত্রী) দ্রবন্তী। ইতি রাজনির্ঘণ্টঃ ॥

প্রতিপক্ষঃ (পুং) শত্রুঃ। ইতি হেমচন্দ্রঃ॥ সাদৃশ্যং। যথা। প্রতিবন্ধিপ্রতিনিধিপ্রতিপক্ষবিড়ম্বকাঃ। ইতি কাব্যচন্দ্রিকা॥ প্রতিবাদী চ ॥

প্রতিপাদকঃ (ত্রি) প্রতিপত্তিজনকঃ। বোধকঃ। যথা। প্রতিপাদ্যপ্রতিপাদকভাবশ্চ সম্বন্ধঃ। ইতি দিনকরী ॥

প্রতিপাদনং (ক্লী) দানং। প্রতিপত্তিঃ। বোধনং। ইতি মেদিনী ॥

প্রতিপালকঃ (ত্রি) পালনকর্ত্তা। প্রতিপালয়তীতি প্রতিপূর্ব্বণ্যন্তপাধাতোর্ণকপ্রত্যয়নিষ্পন্নঃ ॥

প্রতিপালনং (ক্লী) রক্ষণং। পোষণং। যথা। কুন্ত্যা প্রসূতস্য কর্ণস্য রাধাপ্রতিপালনাং রাধেয়ত্বং সঙ্গচ্ছতে। ইতি দুর্গাদাসঃ ॥

প্রতিপাল্যং (ত্রি) প্রতিপালনীয়ং। প্রতিপালিতব্যং। প্রতিপূর্ব্বণ্যন্তপাল রক্ষণ ইত্যস্মাৎ কর্ম্মণি যপ্রত্যয়েন নিষ্পন্নং ॥

প্রতিপ্রসবঃ (পুং) নিষিদ্ধস্য পুনর্বিধানং। যথা রবিশুক্রদিনে চৈব দ্বাদশ্যাং শ্রাদ্ধবাসরে। ইত্যাদিনা নিষিদ্ধস্য তিলতর্পণস্য তীর্থেতরত্র প্রতিপ্রসবমাহ স্মৃতিঃ। অয়নে বিষুবে চৈব সংক্রান্ত্যাং গ্রহণেষু চ ইত্যাদি প্রায়শ্চিত্ততত্ত্বং ॥

প্রতিপ্রসূতঃ (ত্রি) প্রতিপ্রসববিশিষ্টঃ। ইতি মলমাসতত্ত্বং ॥ পুনঃসম্ভাবিতঃ। যথা। উক্তানি প্রতিসিদ্ধানি পুনঃসম্ভাবিতানি চ। সাপেক্ষনিরপেক্ষাণি মীমাংস্যানীহ কোবিদৈঃ॥ ইতি সংস্কৃত্যমুক্তাবলী ॥

প্রতিফলং (ক্লী) প্রতিবিম্বং। যথা। প্রতিফলমবলোক্য স্বীয়মিন্দোঃ কলায়াং হরশিরসি পরস্যা বাসমাশঙ্কমানা। ইতি রসমঞ্জরী॥ তুল্যফলং। ফলং ফলঞ্চ ॥

প্রতিফলনং (ক্লী) প্রতিবিম্বং। যথা। ন বিম্বং ত্বদ্বিম্বপ্রতিফলনলাভাদরুণিতং তুলামধ্যারোঢ়ুং কথমপি ন লজ্জেত কলয়া। ইত্যানন্দলহরী ॥

প্রতিফলিতং (ত্রি) প্রতিবিম্বিতং। যথা। মোহাতীতো বিশুদ্ধো মুনিভিরভিহিতো মোহসংক্রান্তমূর্ত্তিঃ সাক্ষী স্বান্তে তদুত্থে প্রতিফলিতবপুরিত্যাদি মুক্তিবাদগাদাধরী ॥

প্রতিফুল্লকঃ (ত্রি) প্রফুল্লঃ। ইতি শব্দচন্দ্রিকা ॥

প্রতিবদ্ধঃ (ত্রি) প্রতিবন্ধবিশিষ্টঃ। প্রতিপূর্ব্ব-বন্ধধাতোঃ কর্ম্মণি ক্তপ্রত্যয়েন নিষ্পন্নঃ ॥

প্রতিবধ্যঃ (ত্রি) প্রতিবন্ধনীয়ঃ। প্রতিবন্ধার্হঃ। যথা। বস্তুতো হেতুমন্নিষ্ঠাভাবপ্রতিযোগিতাবচ্ছেদকত্বপ্রকারিতাশূন্যজ্ঞানবৃত্তিপ্রকারিতানবচ্ছেদ্যত্বেনৈব প্রতিবধ্যত্বং নিবেশ্যমিতি ব্যাপ্ত্যনুগমজাগদীশী ॥

প্রতিবন্ধঃ (পুং) কার্য্যপ্রতিঘাতঃ। তৎপর্য্যায়ঃ। প্রতিষ্টম্ভঃ ২। ইত্যমরঃ ॥

প্রতিবন্ধকঃ (পুং) বিটপঃ। ইতি শব্দচন্দ্রিকা ॥ প্রতিরোধকে ত্রি ॥

প্রতিবন্দিঃ (পুং) অনিষ্টান্তরপ্রসঞ্জকং বাক্যং। প্রতিবন্ধঃ। যথা। প্রতিবন্ধেরনুত্তরত্বাদাহেতি বিশেষব্যাপ্তিজাগদীশী ॥

প্রতিবলঃ (ত্রি) সমর্থঃ। শক্তঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ তুল্যবলশ্চ ॥

প্রতিভয়ং (ত্রি) ভয়ঙ্করং। ইত্যমরঃ ॥ ভয়ে ক্লী। ইতি মেদিনী ॥

প্রতিভা (স্ত্রী) বুদ্ধিঃ। ইতি হেমচন্দ্রঃ ॥ প্রত্যুৎপন্নমতিত্বং। ইতি প্রতিভান্বিতশব্দটীকায়াং ভরতঃ ॥ নবনবোন্মেষশালিনী প্রজ্ঞা। যথা। প্রজ্ঞা নবনবোন্মেষশালিনী প্রতিভা মতা। ইতি রুদ্রঃ ॥ দীপ্তিশ্চ ॥

প্রতিভান্বিতঃ (ত্রি) প্রগল্ভঃ। প্রত্যুৎপন্নমতিযুক্তঃ। ইত্যমরঃ ॥

প্রতিভামুখঃ (ত্রি) প্রগল্ভঃ। ইতি হেমচন্দ্রঃ ॥

প্রতিভাবান্ [ৎ] (ত্রি) প্রতিভান্বিতঃ। প্রাগল্ভ্যযুক্তঃ। প্রতিভাশব্দাদস্ত্যর্থে বতুপ্রত্যয়েন নিষ্পন্নঃ ॥

প্রতিভাহানিঃ (স্ত্রী) বুদ্ধিনাশঃ। ইতি শব্দমালা ॥

প্রতিভূঃ (পুং) লগ্নকঃ। জামিন্ ইতি পারস্যভাষা। ইত্যমরঃ ॥ তস্য কর্ত্তব্যত্বং যথা। সভাপতেঃ কর্ত্তব্যমাহ কাত্যায়নঃ। অথ চেৎ প্রতিভূর্নাস্তি বাদযোগ্যস্তু বাদিনোঃ। স রক্ষিতো দিনস্যান্তে দদ্যাদ্ভৃত্যায় বেতনং ॥ প্রতিভবতি তৎকার্য্যে তদ্বদ্ভবতীতি প্রতিভূর্লগ্নকঃ। বাদযোগ্যঃ বিবাদফলস্য সাধিতধনাদিদানস্য দণ্ডদানস্য চ ক্ষমঃ। বাদিনোঃ ভাষাবাদিনঃ উত্তরবাদিনশ্চ। তথা চ যাজ্ঞবল্ক্যঃ। উভয়োঃ প্রতিভূর্গ্রাহ্যঃ সমর্থঃ কার্য্যনির্ণয়ে। প্রতিভুবস্ত্বভাবে চ রাজ্ঞা সংজ্ঞপনং তয়োঃ ॥ রাজ্ঞা সংজ্ঞপনং দণ্ডতুল্যাধিকরণং। নির্ণয়স্য কার্য্যে ধনাদিদানে রাজদন্তাদিত্বাৎ কার্য্যশব্দস্য পূর্ব্বনিপাতঃ। ভৃত্যঃ তদ্রক্ষকো রাজনিযুক্তঃ। ইতি ব্যবহারতত্ত্বং ॥

প্রতিমঃ (ত্রি) উত্তরপদস্থে সদৃশবাচকঃ। যথা। স্যুরুত্তরপদে প্রখ্যঃ প্রকারঃ প্রতিমো নিভঃ। ইতি হেমচন্দ্রঃ ॥

প্রতিমা (স্ত্রী) গজদন্তস্য বন্ধঃ। অনুকৃতিঃ। ইতি মেদিনী ॥ মূর্ত্তিসদৃশমৃচ্ছিলাদিনির্ম্মিতপ্রতিরূপকং। তৎপর্য্যায়ঃ। প্রতিমানং ২ প্রতিবিম্বং ৩ প্রতিযাতনা ৪ প্রতিচ্ছায়া ৫ প্রতিকৃতিঃ ৬ অর্চ্চা ৭ প্রতিনিধিঃ ৮। ইত্যমরঃ ॥ প্রতিচ্ছন্দঃ ৯ প্রতিকায়ঃ ১০ প্রতিরূপং ১১। ইতি হেমচন্দ্রঃ ॥ * ॥ প্রতিমাঘটনপ্রমাণং

যথা। বিষ্ণোস্তাবৎ প্রবক্ষ্যামি যাদৃগ্রূপং প্রশস্যতে। শঙ্খচক্রধরং শান্তং পদ্মহস্তং গদাধরং ॥ ছত্রাকারং শিরস্তস্য কম্বুগ্রীবং শুভেক্ষণং। তুঙ্গনাসং শুক্তিকর্ণং প্রশান্তোরুভুজক্রমং ॥ ক্কচিদষ্টভুজং বিদ্যাচ্চতুর্ভুজমথাপি বা। দ্বিভুজং বাপি কর্ত্তব্যং ভবনেষু পুরোধসা ॥ * ॥ দেয়মষ্টভুজস্যাস্য যথাস্থানং নিবোধ মে। খড়্গো গদা শরঃ পদ্মং দেয়ং দক্ষিণতো হরেঃ। ধনুশ্চ খেটকঞ্চৈব শঙ্খচক্রে চ বামতঃ ॥ * ॥ চতুর্ভুজস্য বক্ষ্যামি যথৈবায়ুধসংস্থিতিঃ। দক্ষিণেন গদাং পদ্মং বাসুদেবস্য কারয়েৎ ॥ বামতঃ শঙ্খচক্রে চ কর্ত্তব্যে ভূতিমিচ্ছতা। কৃষ্ণাবতারে তু গদা বামহস্তে প্রশস্যতে॥ যথেচ্ছয়া শঙ্খচক্রমুপরিষ্টাৎ প্রকল্পয়েৎ। অধস্তাৎ পৃথিবী সত্যকর্ত্তব্যা পাদমধ্যতঃ। দক্ষিণে প্রণতং তদ্বৎ গরুত্মন্তং নিবেশয়েৎ ॥ বামতস্তু ভবেল্লক্ষ্মীঃ পদ্মহস্তা সুশোভনা। গরুত্মানগ্রতো বাপি সংস্থাপ্যো ভূতিমিচ্ছতা ॥ শ্রীশ্চ পুষ্টিশ্চ কর্ত্তব্যে পার্শ্বয়োঃ পদ্মসংযুতে। তোরণঞ্চোপরিষ্টাচ্চ বিদ্যাধরসমন্বিতং ॥ দেবদুন্দুভিসংযুক্তং গন্ধর্ব্বমিথুনান্বিতং॥ পত্রবল্লীসমোপেতং সিংহব্যালসমন্বিতং। তথা কল্পলতোপেতং স্তুবদ্ভিরমরেশ্বরৈঃ। এবম্বিধো ভবেদ্বিষ্ণুস্ত্রিভাগেনাস্য পীঠিকা॥ নবতালপ্রমাণাস্তু দেবদানবকিন্নরাঃ। অতঃ পরং প্রবক্ষ্যামি মানোন্মানং বিশেষতঃ॥*॥ জালান্তরপ্রবিষ্টানাং ভানুনাং যদ্রজঃ স্ফুটং। ত্রসরেণুঃ স বিজ্ঞেয়ো বালাগ্রন্তৈরথাষ্টভিঃ ॥ তদষ্টকেন লিখ্যা তু যুকা লিখ্যাষ্টকৈর্ম্মতা। যবো যুকাষ্টকং তদ্বদষ্টভিস্তৈস্তদঙ্গুলং ॥ স্বকীয়াঙ্গুলমানেন মুখং স্যাদ্দ্বাদশাঙ্গুলং। মুখমানেন কর্ত্তব্যা সর্ব্বাবয়বকল্পনা ॥ * ॥ সৌবর্ণী রাজতী বাপি তাম্রী রত্নময়ী শুভা। শৈলদারুময়ী বাপি লোহসীসময়ী তথা ॥ রীতিকা ধাতুযুক্তা বা তাম্রকাংস্যময়ী তথা। শুভদারুময়ী বাপি দেবতার্চ্চা প্রশস্যতে॥ * ॥ অঙ্গুষ্ঠপর্ব্বাদারভ্য বিতস্তির্যাবদেব তু। গৃহেষু প্রতিমা কার্য্যা নাধিকা শস্যতে বুধৈঃ॥ আষোড়শাত্তু প্রাসাদে কর্ত্তব্যা নাধিকা ততঃ। মধ্যমেন কনিষ্ঠা তু কার্য্যা বিত্তানুসারতঃ॥ দ্বারোচ্ছ্রায়স্য যন্মানমষ্টধা তস্ত কারয়েৎ। ভাগদ্বয়েন প্রতিমা ত্রিভাগীকৃত্য তৎ পুনঃ ॥ পীঠিকা ভাগতঃ কার্য্যা নাতিনীচা ন চোচ্ছ্রিতা। প্রতিমামুখমানেন নব ভাগান্ প্রকল্পয়েৎ ॥ চতুরঙ্গুলা ভবেদ্গ্রীবা ভাগেন হৃদয়ং পুনঃ। নাভিস্তস্মাদধঃ কার্য্যা ভাগেনৈকেন শোভিতা॥ নিম্নত্বে বিস্তরত্বে চ অঙ্গুলং পরিকীর্ত্তিতং॥ নাভেরধস্তথা মেঢ্রং ভাগেনৈকেন কল্পয়েৎ। ত্রিভাগমায়তাবূরূ জানুনী চতুরঙ্গুলে ॥ জঙ্ঘে দ্বিভাগে বিখ্যাতে পাদৌ তু চতুরঙ্গুলৌ। চতুর্দ্দশাঙ্গুলস্তদ্বন্মৌলিরস্য প্রকীর্ত্তিতঃ॥ ঊর্দ্ধমানমিদং প্রোক্তং পৃথুত্বঞ্চ নিবোধত। সর্ব্বাবয়বমানেষু বিস্তরং শৃণুত দ্বিজাঃ ॥ * ॥ চতুরঙ্গুলং ললাটং স্যাদূর্দ্ধং নাসা তথৈব

চ। দ্বিরঙ্গুলং হনু জ্ঞেয়মোষ্ঠশ্চাঙ্গুলসম্মিতঃ॥ অষ্টাঙ্গুলং ললাটন্তু তাবন্মাত্রে ভ্রুবৌ মতে। অর্দ্ধাঙ্গুলা ভ্রুবোর্লেখা মধ্যে ধনুরিবানতা॥ উন্নতাগ্রা ভবেৎ পার্শ্বে শ্লক্ষ্ণা তীক্ষ্ণা প্রশস্যতে। অক্ষিণী দ্ব্যঙ্গুলায়ামে তদর্দ্ধঞ্চৈব বিস্তরে॥ উন্নতোদরমধ্যে তু রক্তান্তে শুভলক্ষণে। তারকা চ ত্রিভাগেন দৃষ্টিঃ স্যাৎ পঞ্চভাগিকী॥ দ্বিরঙ্গুলং ভ্রুবোর্মধ্যং নাসামূলমথাঙ্গুলং। নাসাগ্রবিস্তরং তদ্বৎ পুটদ্বয়মথানতং॥ নাসাপুটবিলং তদ্‌বদর্দ্ধাঙ্গুলমুদাহৃতং। কপোলে দ্ব্যঙ্গুলে তদ্বৎ কর্ণমূলাদ্বিনির্গতে॥ হন্বগ্রমণ্ডলং তদ্বদ্বিস্তারো দ্ব্যঙ্গুলো ভবেৎ। অর্দ্ধাঙ্গুলা ভ্রুবো রাজী মৃণালসদৃশী সমা॥ অর্দ্ধাঙ্গুলঃ সমস্তদ্বদুত্তরোষ্ঠস্তু বিস্তরে। নিষ্পাবসদৃশং তদ্বন্নাসাপুটদলন্তবেৎ॥ সৃক্বণী জ্যোতিস্তুল্যে চ কর্ণমূলাৎ ষড়ঙ্গুলে। কর্ণৌ তু ভ্রূসমৌ জ্ঞেয়াবূর্দ্ধন্তু চতুরঙ্গুলৌ॥ দ্ব্যঙ্গুলৌ কর্ণপাশৌ তু মাত্রামেকান্তু বিস্তৃতৌ। কর্ণয়োরুপরিষ্টাচ্চ মস্তকং দ্বাদশাঙ্গুলং। ললাটং পৃষ্ঠতোঽর্দ্ধেন প্রোক্তমষ্টাদশাঙ্গুলং। ষট্‌ত্রিংশদঙ্গুলশ্চাস্য পরিণাহঃ শিরোগতঃ॥ সকেশনিচয়শ্চাস্য দ্বিচত্বারিংশদঙ্গুলঃ। কেশান্তাদ্ধনুকে তদ্বদঙ্গুলানি তু ষোড়শ॥ গ্রীবামধ্যপরীণাহশ্চতুর্বিংশতিরঙ্গুলঃ। অষ্টাঙ্গুলা ভবেদ্‌গ্রীবা পৃথুত্বেন বিশিষ্যতে॥ স্তনগ্রীবান্তরং প্রোক্তমেকতালং স্বয়ম্ভুবা। স্তনয়োরন্তরং তদ্বদ্‌দ্বাদশাঙ্গুলমিষ্যতে॥ স্তনয়োর্ম্মণ্ডলং তদ্বদ্‌দ্ব্যঙ্গুলং পরিকীর্ত্তিতং। চূচুকে মণ্ডলস্যান্তর্যবমাত্রে উভে স্মৃতে॥ দ্বিতালঞ্চাপি বিস্তারাদ্বক্ষঃস্থলমুদাহৃতং। কক্ষে ষড়ঙ্গুলে প্রোক্তে বাহুমূলস্তনান্তরে॥ চতুর্দ্দশাঙ্গুলৌ পাদাবঙ্গুষ্ঠস্তু ত্রিরঙ্গুলঃ॥ পঞ্চাঙ্গুলপরীণাহমঙ্গুষ্ঠাগ্রং তথোন্নতং॥ অঙ্গুষ্ঠকসমা তদ্বদায়ামে স্যাৎ প্রদেশিনী। তস্যাঃ ষোড়শভাগেন হীয়তে মধ্যমাঙ্গুলী॥ অনামিকাষ্টভাগেন কনিষ্ঠা চাপি হীয়তে। পর্ব্বত্রয়েণ চাঙ্গুল্যো গুল্‌ফৌ দ্ব্যঙ্গুষ্ঠকৌ মতৌ॥ পার্ষ্ণির্দ্ব্যঙ্গুলমাত্রা তু কলয়োচ্চা প্রকীর্ত্তিতা। দ্বিপর্ব্বাঙ্গুষ্ঠকঃ প্রোক্তঃ পরীণাহশ্চ দ্ব্যঙ্গুলঃ॥ প্রদেশিনীপরীণাহস্ত্র্যঙ্গুলঃ সমুদাহৃতঃ। অন্যাসামষ্টভাগেন হীয়তে ক্রমশো দ্বিজাঃ॥ অঙ্গুলেনোচ্ছ্রয়ঃ কার্য্যঃ অঙ্গুষ্ঠস্য বিশেষতঃ। তদর্দ্ধেন তু শেষাণামঙ্গুলীনান্তথোচ্ছ্রয়ঃ॥ জঙ্ঘাগ্রে পরিণাহস্তু অঙ্গুলানি চতুর্দ্দশ। জঙ্ঘামধ্যে পরীণাহস্তথৈবাষ্টাদশাঙ্গুলঃ॥ জানুমধ্যে পরীণাহ একবিংশতিরঙ্গুলঃ। জানুচ্ছায়োঽঙ্গুলঃ প্রোক্তো মণ্ডলং ত্র্যঙ্গুলং পুনঃ॥ ঊরুমধ্যে পরীণাহশ্চাষ্টাবিংশতিকাঙ্গুলঃ। একত্রিংশোপরিষ্টাচ্চ বৃষণৌ ত্র্যঙ্গুলৌ পুনঃ॥ ত্র্যঙ্গুলঞ্চ তথা মেঢ্রং পরীণাহে ষড়ঙ্গুলং। মণিবন্ধোদয়াং বিদ্যাৎ কেশরেখাং তথৈব চ॥ মণিকোষপরীণাহশ্চতুরঙ্গুল ইষ্যতে॥ বিস্তারেণ ভবেত্তদ্বৎ কটিরষ্টাদশাঙ্গুলা। দ্বাবিংশতিস্তথা স্ত্রীণাং স্তনৌ চ দ্বাদশাঙ্গুলৌ॥ নাভিমধ্যে পরীণাহো দ্বি-

চত্বারিংশদঙ্গুলঃ। পুরতঃ পঞ্চপঞ্চাশৎ কট্যাশ্চৈব তু বেষ্টনং ॥ কক্ষয়োরুপরিষ্টাত্তু স্কন্ধৌ প্রোক্তৌ ষড়ঙ্গুলৌ। অষ্টাঙ্গুলাশ্চ বিস্তারে গ্রীবাঞ্চৈব তু নির্দ্দিশেৎ॥ পরীণাহে তথা গ্রীবাং কলা দ্বাদশ নির্দ্দিশেৎ। আয়ামো ভুজয়োস্তদ্বদ্দ্বিচত্বারিংশদঙ্গুলঃ॥ কার্য্যস্তু বাহুশিখরং প্রমাণে ষোড়শাঙ্গুলং। ঊর্দ্ধং যদ্বাহুপর্ব্বান্তং বিদ্যাদষ্টাদশাঙ্গুলং॥ তথৈকাঙ্গুলহীনন্তু দ্বিতীয়ং পর্ব্বমুচ্যতে। বাহুমধ্যে পরীণাহো ভবেদষ্টাদশাঙ্গুলঃ॥ ষোড়শোক্তঃ প্রবাহুস্তু ষট্‌কলোগ্রকরো মতঃ। সপ্তাঙ্গুলং করতলং পঞ্চমধ্যাঙ্গুলী মতা॥ অনামিকা মধ্যমায়াঃ সপ্তভাগেন হীয়তে। তস্যাস্তু পঞ্চভাগেন কনিষ্ঠা পরিহীয়তে॥ মধ্যমায়াস্তু হীনা বৈ পঞ্চভাগেন তর্জনী। অঙ্গুষ্ঠতর্জনীমূলাদধঃ প্রোক্তস্তু তৎসমঃ॥ অঙ্গুষ্ঠপরিণাহস্তু বিজ্ঞেয়শ্চতুরঙ্গুলঃ। শেষাণামঙ্গুলীনাস্তু ভাগো ভাগেন হীয়তে॥ মধ্যামামধ্যপর্ব্বস্তু অঙ্গুলদ্বয়মায়তং। যবো যবস্তু সর্ব্বাসাং তস্যাং তস্যাং প্রহীয়তে॥ অঙ্গুষ্ঠপর্ব্বমধ্যস্তু তর্জন্যা সদৃশং ভবেৎ। যবদ্বয়াধিকং তদ্বদগ্রপর্ব্বমুদাহৃতং॥পর্ব্বার্দ্ধেন নখান্ বিদ্যাদঙ্গুলীষু সমন্ততঃ। স্নিগ্ধং শ্লক্ষ্ণং প্রকুর্ব্বীত ঈষদ্রক্তং তথাগ্রজং॥ নিম্নপৃষ্ঠং ভবেন্মধ্যে পার্শ্বতঃ কলয়োচ্ছ্রিতং। তথৈব কেশপর্য্যন্তঃ স্কন্ধোপরি দশাঙ্গুলঃ॥ স্ত্রিয়ঃ কার্য্যাস্তু তদ্বিজ্ঞেস্তনোরুজঘনাধিকাঃ। চতুর্দ্দশাঙ্গুলায়ামমুদরং তাসু নির্দ্দিশেৎ॥ নানাভরণসম্পন্নাঃ কিঞ্চিৎশ্লক্ষ্ণভুজাস্ততঃ। কিঞ্চিদ্দীর্ঘং ভবেদ্বক্ত্রমলকাবলিরুত্তমা॥ নাসা গ্রীবা ললাটঞ্চ নির্দ্দিষ্টাশ্চতুরঙ্গুলাঃ অর্দ্ধার্দ্ধাঙ্গুলিবিস্তারঃ শস্যতেঽধরপল্লবঃ॥ অধিকং নেত্রযুগ্মন্তু চতুর্ভাগেন নির্দ্দিশেৎ। গ্রীবাবলিশ্চ কর্ত্তব্যা কিঞ্চিদর্দ্ধাঙ্গুলোচ্ছ্রয়া॥ এবং নারীষু সর্ব্বাসু দেবানাং প্রতিমাসু চ। নবতালমিদং প্রোক্তং লক্ষণং পাপনাশনং॥ * ॥ অতঃ পরং প্রবক্ষ্যামি দেবাকারান্ বিশেষতঃ। দশতালঃ স্মৃতো রামো বলির্ব্বৈরোচনিস্তথা॥ বরাহো নরসিংহশ্চ সপ্ততালশ্চ বামনঃ। মৎস্যকূর্ম্মৌ তু নির্দ্দিষ্টৌ যথাশোভং স্বয়ম্ভুবা॥ * ॥ অতঃ পরং প্রবক্ষ্যামি রুদ্রাদ্যাকারমুত্তমং। আপীনোরুভুজস্কন্ধস্তপ্তকাঞ্চনসপ্রভঃ॥ শুক্লার্করশ্মিসংঘাতচন্দ্রাঙ্কিতজটো বিভুঃ। জটামুকুটধারী চ দ্বিরষ্টবৎসরাকৃতিঃ॥ বাহুবারণহস্তাভো বৃত্তজঙ্ঘোরুমণ্ডলঃ। ঊর্দ্ধকেশস্তু কর্ত্তব্যো দীর্ঘায়তবিলোচনঃ॥ ব্যাঘ্রচর্ম্মপরীধানঃ কটিসূত্রত্রয়ান্বিতঃ। হারকেয়ূরসম্পন্নো ভুজঙ্গাভরণস্তথা॥ বাহবশ্চাপি কর্ত্তব্যা নানাভরণভূষিতাঃ। পীনোরুগণ্ডফলকঃ কুণ্ডলাভ্যামলঙ্কৃতঃ॥ আজানুলম্ববাহুশ্চ সৌম্যমূর্ত্তিঃ সুশোভনঃ। খেটকং বামহস্তে তু খড়্গঞ্চৈব তু দক্ষিণে॥ শক্তিং দণ্ডং ত্রিশূলঞ্চ দক্ষিণে তু নিবেশয়েৎ। কপালং বামপার্শ্বে তু নাগং খট্টাঙ্গমেব চ॥ একশ্চ বরদো হস্তস্তথাক্ষবলয়োঽপরঃ। বৈশাখস্থানকং কৃত্বা নৃত্যাভিনয়সংস্থিতঃ॥ নৃত্যে

দশভুজঃ কার্য্যো গজাসুরবধে তথা। তথা ত্রিপুরদাহে চ বাহবঃ ষোড়শৈব তু॥ শঙ্খ-শ্চক্রং গদা শার্ঙ্গং ঘণ্টা তত্রাধিকা ভবেৎ। তথা ধনুঃ পিনাকঞ্চ শরো বিষ্ণুময়স্তথা॥ চতুর্ভুজোঽষ্টবাহুর্ব্বা জ্ঞানযোগেশ্বরো মতঃ। তীক্ষ্ণনাসাগ্রদশনঃ করালবদনো মহান্॥ ভৈরবঃ শস্যতে লোকে প্রত্যা-য়তনসংস্থিতঃ। ন মূলায়তনে কার্য্যো ভৈরবস্তু ভয়ঙ্করঃ॥ নারসিংহো বরাহো বা তথান্যেঽপি ভয়ঙ্করাঃ। ন হীনা নাধি-কাঙ্গা চ কর্ত্তব্যা দেবতা ক্বচিৎ॥ *॥ স্বামিনং ঘাতয়েন্ন্যূনং করালবদনা তথা। অধিকা শিল্পিনং হন্যাৎ কৃশা চৈবার্থ-নাশিনী॥ কৃশোদরী তু দুর্ভিক্ষং নির্ম্মাংসা ধননাশিনী। বক্রনাসা তু দুঃখায় সংক্ষি-প্তাঙ্গী ভয়ঙ্করী॥ চিপিটা দুঃখশোকায় অনেত্রা নেত্রনাশিনী। দুঃখদা হীনবক্ত্রা তু পাণিপাদকৃশা তথা॥ হীনাঙ্গা হীনজঙ্ঘা চ ভ্রমোন্মাদকরী নৃণাং। বক্রবক্ত্রা চ রাজানং কটিহীনা চ যা ভবেৎ॥ পাণিপাদবিহী-নায়াং জায়তে মরকো মহান্। জঙ্ঘাজানু-বিহীনা চ শত্রুকল্যাণকারিণী॥ পুত্রমিত্র-বিনাশায় হীনা বক্ষঃস্থলৈস্তু যা। সম্পূর্ণা-বয়বা যা তু আয়ুর্লক্ষ্মীপ্রদা সদা। এবং লক্ষণমাসাদ্য কর্ত্তব্যঃ পরমেশ্বরঃ॥ *॥ স্তূয়মানঃ সুরৈঃ সর্ব্বৈঃ সমন্তাদ্দর্শয়েদ্ভবং। শক্রেণ নন্দিনা চৈব মহাকালেন শঙ্করং॥ প্রণতা লোকপালাশ্চ পার্শ্বে তু গণ-নায়কাঃ। নৃত্যদ্ভৃঙ্গিরিটিশ্চৈব ভূতবেতাল-সংবৃতঃ। সর্ব্বে হৃষ্টাশ্চ কর্ত্তব্যাঃ স্তুবন্তঃ পরমেশ্বরং। গন্ধর্ব্ববিদ্যাধরকিন্নরাণামথা-প্সরোগুহ্যকনায়কানাং। গণৈরনেকৈঃ শতশো মহেন্দ্রমুনিপ্রবীরৈরভিনন্দ্যমানং॥ ঘৃতাক্ষসূত্রৈঃ শতশঃ প্রবালপুষ্পোপহার-প্রচয়ং দদদ্ভিঃ। সংস্তূয়মানং ভগবন্ত-মীড্যং নেত্রত্রয়েণামরমর্ত্যপূজ্যং॥ *॥ সূত উবাচ। অধুনা সংপ্রবক্ষ্যামি অর্দ্ধ-নারীশ্বরং পরং। অর্দ্ধেন দেবদেবস্য নারী-রূপং সুশোভনং॥ ঈশার্দ্ধে তু জটাভারো বালেন্দুকলয়া যুতঃ। উমার্দ্ধে তু প্রদা-তব্যৌ সীমন্ততিলকাবুভৌ॥ বাসুকিং দক্ষিণে কর্ণে বামে কুণ্ডলমাদিশেৎ। বালিকা চোপরিষ্টাত্তু কপালং দক্ষিণে করে॥ ত্রিশূলং বাপি কর্ত্তব্যং দেবদেবস্য শূলিনঃ। বামতো দর্পণং দদ্যাদুৎপলং বা বিশেষতঃ॥ বামবাহুশ্চ কর্ত্তব্যঃ কেয়ূর-বলয়ান্বিতঃ। উপবীতঞ্চ কর্ত্তব্যং মণি-মুক্তাময়ন্তথা॥ স্তনভারমথার্দ্ধে তু বামে পীনং প্রকল্পয়েৎ। হারার্দ্ধমুজ্জ্বলং কুর্য্যাৎ শ্রোণ্যর্দ্ধন্তু তথৈব চ॥ লিঙ্গার্দ্ধমূর্দ্ধং কর্ত্তব্যং ব্যাঘ্রাজিনকৃতাম্বরং। বামে লম্ব-পরীধানং কটিসূত্রত্রয়ান্বিতং॥ নানারত্ন-সমোপেতং দক্ষিণং ভুজগান্বিতং। দেবস্য দক্ষিণং পাদং পদ্মোপরিসমাস্থিতং॥ কিঞ্চিদূর্দ্ধন্তথা বামং ভূষিতং নূপুরেণ চ। রত্নৈর্ব্বিভূষিতান্ কুর্য্যাদঙ্গুলীষ্বঙ্গুলীয়কান্। সালক্তকং তথা পাদং পার্ব্বত্যা দর্শয়েৎ সদা। অর্দ্ধনারীশ্বরস্যেদং রূপমস্মিন্মুদা-হৃতং॥ *॥ উমামহেশ্বরস্যাপি লক্ষণং শৃণুত দ্বিজাঃ। সংস্থানন্তু তয়োর্ব্বক্ষ্যে

লীলাললিতবিভ্রমং ॥ চতুর্ভুজং দ্বিবাহুং বা জটাভারেন্দুভূষিতং। লোচনত্রয়সংযুক্তমুমৈকস্কন্ধপাণিনং ॥ দক্ষিণেনোল্বণং শূলং বামং কুচভরং করং। দ্বীপিচর্ম্মপরীধানং নানারত্নোপশোভিতং ॥ সুপ্রতিষ্ঠং সুবেশঞ্চ তথার্দ্ধেন্দুহুতাশনং। বামে তু সংস্থিতা দেবী তস্যোরৌ বাহুগূহিতা ॥ শিরোভূষণসংযুক্তৈরলকৈর্ললিতাননা। সবালিকা কর্ণবলী ললাটতিলকোজ্জ্বলা ॥ মণিকুণ্ডলসংযুক্তা কর্ণিকাভরণা ক্বচিৎ। হারকেয়ূরবহুলা হরবক্ত্রাবলোকিনী ॥ বামাংশং দেবদেবস্য স্পৃশন্তী লীলয়া ক্বচিৎ। দক্ষিণন্তু বহিঃ কৃত্বা বাহুং দক্ষিণতোঽথবা ॥ স্কন্ধে বা দক্ষিণে কুক্ষৌ স্পৃশত্যঙ্গুলিভিঃ ক্বচিৎ। বামে চ দর্পণং দদ্যাদুৎপলং বা সুশোভনং ॥ কটিসূত্রত্রয়ঞ্চৈব নিতম্বে স্যাৎ সলম্বকং। জয়া চ বিজয়া চৈব কার্ত্তিকেয়বিনায়কৌ ॥ পার্শ্বয়োর্দ্দর্শয়েত্তত্র সতোরণমণ্ডহ্যকং। মালাবিদ্যাধরাংস্তত্র বীণাবানপ্সরোগণঃ। এতদ্রূপমুমেশস্য কর্ত্তব্যং ভূতিমিচ্ছতা ॥*॥ শিবনারায়ণং বক্ষ্যে সর্ব্বপাপপ্রণাশনং। বামার্দ্ধে মাধবং কুর্য্যাদ্দক্ষিণে শূলপাণিনং ॥ বাহুদ্বয়ঞ্চ কৃষ্ণস্য মণিকেয়ূরভূষিতং। শঙ্খচক্রধরং শান্তমারক্তাঙ্গুলিবিভ্রমং ॥ চক্রস্থানে গদাঞ্চাপি পাণৌ দদ্যাদধস্তলে। শঙ্খঞ্চৈবেতরে দদ্যাদ্ভূত্যর্থং ভূষণোজ্জ্বলং ॥ পীতবস্ত্রপরীধানং চরণং মণিভূষিতং। দক্ষিণার্দ্ধে জটাভারমর্দ্ধেন্দুকৃতলক্ষণং ॥ ভুজঙ্গহারবলয়ং বরদং দক্ষিণং করং। দ্বিতীয়ঞ্চাপি কুর্ব্বীত ত্রিশূলবরধারিণং ॥ ব্যালোপবীতসংযুক্তং কট্যর্দ্ধং কৃত্তিবাসসং। মণিরত্নৈশ্চ সংযুক্তপাদং নাগবিভূষিতং। শিবনারায়ণস্যৈবং কল্পয়েদ্রূপমুত্তমং ॥*॥ মহাবরাহং বক্ষ্যামি পদ্মহস্তং গদাধরং। তীক্ষ্ণদংষ্ট্রাগ্রঘোরাস্যং মেদিনী বামকূর্পরে ॥ দংষ্ট্রাগ্রেণোদ্ধৃতাং দান্তাং ধরণীমুৎপলান্বিতাং। বিস্ময়োৎফুল্লনয়নামুপরিষ্টাৎ প্রকল্পয়েৎ ॥ দক্ষিণং কটিসংস্থন্তু করন্তস্য প্রকল্পয়েৎ। কূর্ম্মোপরি তথা পাদমেকং নাগেন্দ্রমূর্দ্ধনি। সংস্তূয়মানং লোকেশৈঃ সমন্তাৎ পরিকল্পয়েৎ ॥*॥ নারসিংহঞ্চ কর্ত্তব্যং ভুজাষ্টকসমন্বিতং। রৌদ্রসিংহাসনং তদ্বদ্বিদারিতমুখেক্ষণং ॥ স্তব্ধপীনশটাকীর্ণং দারয়ন্তং দিতেঃ সুতং। বিনির্গতান্ত্রজালঞ্চ দানবং পরিকল্পয়েৎ ॥ বমন্তং রুধিরোদ্গারং ভ্রুকুটীকুটিলেক্ষণং। যুধ্যমানঞ্চ কর্ত্তব্যং ক্বচিৎ করণবন্ধনৈঃ ॥ পরিশ্রান্তেন দৈত্যেন তর্জ্জ্যমানং মুহুর্মুহুঃ। দৈত্যং প্রদর্শয়েত্তত্র খড়্গখেটকধারিণং। স্তূয়মানং তথা বিষ্ণুং দর্শয়েদমরাধিপৈঃ ॥*॥ তথা ত্রিবিক্রমং বক্ষ্যে ব্রহ্মাণ্ডাক্রমণোল্বণং। বামপার্শ্বে তথা রাহুমুপরিষ্টাৎ প্রকল্পয়েৎ ॥ অধস্তাদ্বামনং তাবৎ কল্পয়েৎ সকমণ্ডলুং। দক্ষিণে ছত্রিকাং বিদ্যামুখং দীনং প্রদর্শয়েৎ। ভৃঙ্গারধারিণং তদ্বদ্বলিন্তস্যৈব পার্শ্বতঃ ॥ বন্ধনঞ্চাপি কুর্ব্বন্তং গরুড়ন্তস্য দর্শয়েৎ। মৎস্যরূপং তথা মাৎস্যং কৌর্ম্মং কূর্ম্মাকৃতিং ন্যসেৎ ॥

এবংরূপস্তু ভগবান্ কার্য্যো নারায়ণো হরিঃ ॥ * ॥ ব্রহ্মা কমণ্ডলুধরঃ কর্ত্তব্যঃ স চতুর্মুখঃ ॥ হংসারূঢ়ঃ ক্বচিৎ কার্য্যঃ ক্বচিচ্চ কমলাসনঃ। বর্ণেন পদ্মগর্ত্তাভশ্চতুর্ব্বাহুঃ শুভেক্ষণঃ ॥ কমণ্ডলুং বামকরে স্রুবং হস্তে চ দক্ষিণে। বামে দণ্ডধরং তদ্বৎ স্রুচঞ্চাপি প্রদর্শয়েৎ ॥ মুনিভির্দ্দেবগন্ধর্ব্বৈঃ স্তূয়মানং সমন্ততঃ। কুর্ব্বাণমিব লোকাংস্ত্রীন্ শুক্লাম্বরধরং বিভুং ॥ মৃগচর্ম্মধরঞ্চাপি দিব্যযজ্ঞোপবীতিনং। আজ্যস্থালীং ন্যসেৎ পার্শ্বে বেদাংশ্চ চতুরঃ পুনঃ ॥ বামপার্শ্বে তু সাবিত্রী দক্ষিণে চ সরস্বতী। অগ্রে চ ঋষয়স্তদ্বৎ কার্য্যাঃ পৈতামহে পদে ॥ * ॥ কার্ত্তিকেয়ং প্রবক্ষ্যামি তরুণাদিত্যসন্নিভং। কমলোদরবর্ণাভং সুকুমারং কুমারকং ॥ গেণ্ডুকৈশ্চীরকৈর্যুক্তং ময়ূরবরবাহনং। স্থানীয়খেটনগরে ভুজান্ দ্বাদশ কল্পয়েৎ ॥ চতুর্ভুজঃ কর্ব্বটে স্যাদ্বনে গ্রামে দ্বিবাহুকঃ ॥ শক্তিঃ পাশস্তথা খড়্গঃ শরঃ শূলন্তথৈব চ। বরদশ্চৈব হস্তঃ স্যাদথবাভয়দো ভবেৎ ॥ এতে দক্ষিণতো জ্ঞেয়াঃ কেয়ূরকটকোজ্জ্বলাঃ। ধনুঃ পতাকা মুষ্টিশ্চ তর্জনী চ প্রসারিতা ॥ খেটকং তাম্রচূড়শ্চ বামহস্তে প্রশস্যতে। দ্বিভুজস্য করে শক্তির্ব্বামে স্যাৎ কুক্কুটোঽপরে ॥ চতুর্ভুজে শক্তিপাশৌ বামতো দক্ষিণে ত্বসিঃ। বরদোঽভয়দো বাপি দক্ষিণঃ স্যাৎ তুরীয়কঃ ॥ * ॥ বিনায়কং প্রবক্ষ্যামি গজবক্ত্রং ত্রিলোচনং। লম্বোদরং চতুর্ব্বাহুং ব্যালযজ্ঞোপবীতিনং ॥ স্বস্তিকর্ণং বৃহচ্ছুণ্ডমেকদংষ্ট্রং পৃথূদরং। স্বং দন্তং দক্ষিণকরে উৎপলঞ্চ তথাপরে ॥ লড্ডুকং পরশুঞ্চৈব বামতঃ পরিকল্পয়েৎ। বৃহৎসংক্ষিপ্তগমনং পীনস্কন্ধাঙ্ঘ্রিপাণিনং। যুক্তং বুদ্ধিকুবুদ্ধিভ্যামধস্তান্মূষিকান্বিতং॥*॥ কাত্যায়ন্যাঃ প্রবক্ষ্যামি রূপং দশভুজন্তথা। ত্রয়াণামপি দেবানামনুকারানুকারিণীং ॥ জটাজূটসমাযুক্তামর্দ্ধেন্দুকৃতশেখরাং। লোচনত্রয়সংযুক্তাং পূর্ণেন্দুসদৃশাননাং ॥ অতসীপুষ্পবর্ণাভাং সুপ্রতিষ্ঠাং সুলোচনাং। নবযৌবনসম্পন্নাং সর্ব্বাভরণভূষিতাং ॥ সুচারুদশনাং তদ্বৎ পীনোন্নতপয়োধরাং। ত্রিভঙ্গস্থানসংস্থানাং মহিষাসুরমর্দ্দিনীং ॥ ত্রিশূলং দক্ষিণে দদ্যাৎ খড়্গঞ্চক্রন্তথৈব চ। তীক্ষ্ণবাণং তথা শক্তিং দক্ষিণে সন্নিবেশয়েৎ ॥ খেটকং পূর্ণচাপঞ্চ পাশমঙ্কুশমেব চ। ঘণ্টাং বা পরশুং বাপি বামতঃ সন্নিবেশয়েৎ ॥ অধস্তান্মহিষং তদ্বদ্বিশিরস্কং প্রদর্শয়েৎ। শিরশ্ছেদোদ্ভবং তদ্বদ্দানবং খড়্গপাণিনং ॥ হৃদি শূলেন নির্ভিন্নং নির্যদন্ত্রবিভূষিতং। রক্তরক্তীকৃতাঙ্গঞ্চ রক্তবিস্ফুরিতেক্ষণং ॥ বেষ্টিতং নাগপাশেন ভ্রূকুটীভীষণাননং। সপাশবামহস্তেন ধৃতকেশঞ্চ দুর্গয়া ॥ বমদ্রুধিরবক্ত্রঞ্চ দেব্যাঃ সিংহং প্রদর্শয়েৎ। দেব্যাস্তু দক্ষিণং পাদং সমং সিংহোপরিস্থিতং ॥ কিঞ্চিদূর্দ্ধং তথা বামমঙ্গুষ্ঠং মহিষোপরি। স্তূয়মানঞ্চ তদ্রূপমমরৈঃ সন্নিবেশয়েৎ ॥*॥ ইদানীং সুররাজস্য রূপং বক্ষ্যে

বিশেষতঃ। সহস্রনয়নং দেবং মত্তবারণ-সংস্থিতং ॥ পৃথূরুবক্ষোবদনং সিংহস্কন্ধং মহাভুজং। কিরীটকুণ্ডলধরং পীবরোরু-ভুজেক্ষণং ॥ বজ্রোপলধরং তদ্বন্নানাভরণ-ভূষিতং। পূজিতং দেবগন্ধর্ব্বৈরপ্সরো-গণসংস্তুতং ॥ ছত্রচামরধারিণ্যৌ স্ত্রিয়ৌ পার্শ্বে তু কারয়েৎ। সিংহাসনগতং বাপি গন্ধর্ব্বগণসংযুতং। ইন্দ্রাণীং বামতস্তস্য কুর্য্যাদুৎপলধারিণীং ॥ * ॥ সূত উবাচ। প্রভাকরস্য প্রতিমামিদানীং শৃণুত দ্বিজাঃ। রথস্থং কারয়েদ্দেবং পদ্মহস্তং সুলো-চনং ॥ সপ্তাশ্বৈকৈকচক্রঞ্চ রথন্তস্য প্রকল্প-য়েৎ। মুকুটেন বিচিত্রেণ পদ্মগর্ভসম-প্রভং ॥ নানাভরণভূষাঢ্যং ভুজাভ্যাং ধৃতপুষ্করং। স্কন্ধস্থে পুষ্করে তে তু লীল-য়ৈব ধৃতে সদা॥ চোলকচ্ছন্নবপুষং ক্বচি-চ্চিত্রেষু দর্শয়েৎ। বস্ত্রযুগ্মসমোপেতং চরণৌ তেজসাবৃতৌ ॥ প্রতীহারৌ চ কর্ত্তব্যৌ পার্শ্বয়োর্দণ্ডপিঙ্গলৌ। কর্ত্তব্যৌ খড়্গহস্তৌ চ পার্শ্বয়োঃ পুরুষাবুভৌ ॥ লেখনীকৃতহস্তঞ্চ পার্শ্বে ধাতারমব্যয়ং। নানাদেবগণৈর্যুক্তমেবং কুর্য্যাদ্দিবাকরং ॥ অরুণঃ সারথিস্তস্য পদ্মিনীপত্রসন্নিভঃ। অশ্বৌ চ বলিসুগ্রীবাবন্তস্থৌ তস্য পার্শ্বয়োঃ॥ ভুজঙ্গরশ্মিভির্ব্বদ্ধাঃ সপ্তাশ্বা রশ্মিসংযুতাঃ। পদ্মস্থং বা হয়স্থং বা পদ্মহস্তং প্রকল্পয়েৎ॥ * ॥ অগ্নেস্তু লক্ষণং বক্ষ্যে সর্ব্বকামফলপ্রদং। দীপ্তং সুবর্ণ-বপুষমর্দ্ধচন্দ্রাসনস্থিতং ॥ বালার্কসদৃশ-স্তস্য বসনঞ্চাপি দর্শয়েৎ। যজ্ঞোপ-বীতিনং দেবং লম্বকূর্চ্চধরন্তথা॥ কমণ্ডলুং বামকরে দক্ষিণে ত্বক্ষসূত্রকং। জ্বালা-বিতানসংযুক্তমজবাহনমুজ্জ্বলং। কুণ্ডস্থ-ঞ্চাপি কুর্ব্বীত মূর্দ্ধ্নি সপ্তশিখান্বিতং ॥ * ॥ তথা যমং প্রবক্ষ্যামি দণ্ডপাশধরং বিভুং। মহামহিষমারূঢ়ং কৃষ্ণাঞ্জনচয়োপমং ॥ সিংহাসনগতঞ্চাপি দীপ্তাগ্নিসমলোচন। মহিষং চিত্রগুপ্তঞ্চ করালান্ কিঙ্করাং-স্তথা ॥ সমন্তাদ্দর্শয়েত্তস্য সৌম্যাসৌম্যাং স্তথা সুরান্॥ * ॥ রাক্ষসেন্দ্রং তথা বক্ষ্যে লোকপালঞ্চ নৈর্ঋতং। নরারূঢ়ং মহা-কায়ং রক্ষোভির্ব্বহুভির্বৃতং ॥ খড়্গহস্তং মহানীলং কজ্জলাচলসন্নিভং। নরযুক্ত-বিমানস্থং পীতাম্বরবিভূষিতং ॥ * ॥ বরুণঞ্চ প্রবক্ষ্যামি পাশহস্তং মহাবলং। শঙ্খস্ফটিকবর্ণাভং হারকেয়ূরসংবৃতং ॥ মৃগাধিরূঢ়ং বরদং পতাকাধ্বজসংযুতং। ভূষণাবগতং শান্তং কিরীটবরধারিণং॥*॥ বায়ুরূপং প্রবক্ষ্যামি ধূম্রঞ্চ মৃগবাহনং। চিত্রাম্বরধরং শান্তং যুবানং কুঞ্চিতভ্রুবং। মৃগাধিরূঢ়ং বরদং পতাকাধ্বজসংযুতং॥*॥ কুবেরঞ্চ প্রবক্ষ্যামি কুণ্ডলাভ্যামলঙ্কৃতং। হারকেয়ূররচিতং সিতাম্বরধরং সদা॥ গদাধরঞ্চ কর্ত্তব্যং বরদং মুকুটান্বিতং। নরযুক্তবিমানস্থং মেষস্থং বাপি কার-য়েৎ॥ বর্ণেন পীতবর্ণেন গুহ্যকৈঃ পরি-বারিতং। মহোদরং মহাকায়ং ঋদ্ধ্য-ষ্টকসমন্বিতং। গুহ্যকৈর্ব্বহুভির্যুক্তং ধন-ব্যগ্রকরৈস্তথা ॥ * ॥ তথৈবেশং প্রব-ক্ষ্যামি ধবলং ধবলেক্ষণং। ত্রিশূলপাণিনং

দেবং ত্র্যক্ষং বৃষগতং বিভুং ॥ * ॥

মাতৃণাং লক্ষণং বক্ষ্যে যথাবদনুপূর্ব্বশঃ। ব্রহ্মাণী ব্রহ্মসদৃশী চতুর্ব্বক্ত্রা চতুর্ভুজা। হংসাধিরূঢ়া কর্ত্তব্যা সাক্ষসূত্রকমণ্ডলুঃ ॥*॥ মহেশ্বরস্য রূপেণ তথা মাহেশ্বরী মতা। জটামুকুটসংযুক্তা বৃষস্থা চন্দ্রশেখরা। কপালশূলখট্বাঙ্গবরদাথ চতুর্ভুজা ॥ * ॥ কুমাররূপা কৌমারী ময়ূরবরবাহনা। রক্তবস্ত্রধরা তদ্বচ্ছূলশক্তিধরা তথা ॥ হারকেয়ূরসম্পন্না কৃকবাকুধরা তথা ॥ * ॥ বৈষ্ণবী বিষ্ণুসদৃশী গরুত্মতি সমাস্থিতা। চতুর্ব্বাহুশ্চ বরদা শঙ্খচক্রগদাধরা। সিংহাসনগতা বাপি বালকেন সমন্বিতা॥*॥ বারাহীঞ্চ প্রবক্ষ্যামি মহিষোপরিসংস্থিতাং। বরাহসদৃশীং দেবীং ঘণ্টাচামরধারিণীং। গদাচক্রধরান্তদ্বদ্দানবেন্দ্রবিনাশিনীং ॥ * ॥ ইন্দ্রাণীমিন্দ্রসদৃশীং বজ্রশূলগদাধরাং। গজাসনগতান্দেবীং লোচনৈর্ব্বহুভির্ব্বৃতাং। তপ্তকাঞ্চনবর্ণাভাং সর্ব্বাভরণভূষিতাং ॥ * ॥ তীক্ষ্ণখড়্গধরান্তদ্বদ্বক্ষ্যে যোগীশ্বরীমিমাং। দীর্ঘজিহ্বামূর্দ্ধকেশীমস্থিখণ্ডৈশ্চ মণ্ডিতাং। দংষ্ট্রাকরালবদনাং কুর্য্যাচ্চৈব কৃশোদরীং ॥ * ॥ কপালমালিনীং দেবীং মুণ্ডমালাবিভূষিতাং। কপালং বামহস্তে তু মাংসশোণিতপূরিতং ॥ সকেশন্তু শিরো ন্যস্য শস্ত্রিকা দক্ষিণে তথা। গৃধ্রস্থা বায়সস্থা বা নির্ম্মাংসা বিগতোদরী। করালবদনা তদ্বৎ কর্ত্তব্যা সা ত্রিলোচনা॥*॥ চামুণ্ডা বদ্ধঘণ্টা চ দ্বীপিচর্ম্মধরা শিবা। দিগ্বাসা কালিকা তদ্বদ্রাসভস্থা কপালিনী ॥ সুরক্তপুষ্পাভরণা বর্দ্ধনী ধ্বজসংযুতা। বিনায়কঞ্চ কুর্ব্বীত মাতৃণামন্তিকে সদা ॥ বীরেশ্বরশ্চ ভগবান্ বৃষারূঢ়ো জটাধরঃ। বীণাহস্তস্ত্রিশূলী চ মাতৃণামগ্রতো ভবেৎ ॥ * ॥ শ্রিয়ন্দেবীং প্রবক্ষ্যামি নবে বয়সি সংস্থিতাং। সুযৌবনাং পীনগণ্ডাং রক্তোষ্ঠীং কুঞ্চিতভ্রুবং ॥ পীনোন্নতস্তনতটাং মণিকুণ্ডলধারিণীং। সুমণ্ডলং মুখং তস্যাঃ শিরঃ সীমন্তভূষিতং ॥ পদ্মস্বস্তিকশঙ্খৈর্ব্বা ভূষিতাং কুন্তলালকৈঃ। কঞ্চুকাবদ্ধগাত্রৌ চ হারভূষৌ পয়োধরৌ ॥ নাগহস্তোপমৌ বাহূ কেয়ূরকটকোজ্জ্বলৌ। পদ্মং হস্তে চ দাতব্যং শ্রীফলং দক্ষিণে করে ॥ মেখলাভরণান্তদ্বত্তপ্তকাঞ্চনসুপ্রভাং। নানাভরণসম্পন্নাং শোভনাম্বরধারিণীং। পার্শ্বে তস্যাঃ স্ত্রিয়ঃ কার্য্যাশ্চামরব্যগ্রপাণয়ঃ। পদ্মাসনোপবিষ্টাস্তু পদ্মসিংহাসনস্থিতাং ॥ করিভ্যাং স্নাপ্যমানা সা ভৃঙ্গারাভ্যামনেকশঃ। প্রতিপালয়ন্তৌ করিণৌ ভৃঙ্গারাভ্যাং তথাপরৌ ॥ স্তূয়মানা চ লোকেশৈস্তথা গন্ধর্ব্বগুহ্যকৈঃ ॥ * ॥ তথৈব যক্ষিণী কার্য্যা সিদ্ধাসুরনিষেবিতা। পার্শ্বয়োঃ কলসৌ তস্যাস্তোরণে দেবদানবাঃ ॥ নাগাশ্চৈব তু কর্ত্তব্যাঃ খড়্গখেটকধারিণঃ। অধস্তাৎ প্রকৃতিস্তেষাং নাভেরূর্দ্ধঞ্চ পৌরুষী ॥ ফণাশ্চ মূর্দ্ধ্নি কর্ত্তব্যা দ্বিজিহ্বা বহবঃ সমাঃ। পিশাচা রাক্ষসাশ্চৈব ভূতবেতালজাতয়ঃ ॥ নির্ম্মাংসাশ্চৈব তে সর্ব্বে রৌদ্রা বিকৃত-

রূপিণঃ। ক্ষেত্রপালশ্চ কর্ত্তব্যো জটিলো বিকৃতাননঃ ॥ দিগ্বাসা জটিলস্তদ্বৎ শ্ব-গোমায়ুনিষেবিতঃ। কপালং বামহস্তে তু শিরঃ কেশসমাবৃতং। দক্ষিণে শস্ত্রিকাং দদ্যাদসুরক্ষয়কারিণীং ॥ * ॥ অথাতঃ সংপ্রবক্ষ্যামি দ্বিভুজং কুসুমায়ুধং। পার্শ্বে চাশ্বমুখং তস্য মকরধ্বজসংযুতং॥ দক্ষিণে পুষ্পবাণঞ্চ বামে পুষ্পময়ং ধনুঃ। প্রীতিঃ স্যাদ্দক্ষিণে তস্য ভোজনোপস্করান্বিতা॥ রতিস্তু বামপার্শ্বে চ শয়নোপস্করান্বিতা। পটশ্চ পটহশ্চৈব খরঃ কামাতুরস্তথা॥ পার্শ্বতো জলবাপী চ বনং নন্দনমেব চ। সুশোভনশ্চ কর্ত্তব্যো ভগবান্ কুসুমায়ুধঃ॥ সংস্থানমীষদ্রক্তং স্যাদ্বিস্ময়ং বিশ্বনেত্রকং। এতদুদ্দেশতঃ প্রোক্তং প্রতিমালক্ষণং ময়া॥ বিস্তরেণ ন শক্নোতি বৃহস্পতিরপি দ্বিজাঃ। ইতি মৎস্যপুরাণে দেবার্চ্চানুকীর্ত্তনে প্রতিমালক্ষণং নাম ২৩২। ২৩৩। ২৩৪। ২৩৫ অধ্যায়ঃ॥ * ॥ সা দ্বিবিধা। স্থাপনরূপা স্বয়ংব্যক্তরূপা চ। যথা। শ্রীসদাশিব উবাচ। শৃণু দেবি প্রবক্ষ্যামি তদংশাবসথং হরেঃ। স্থাপনঞ্চ স্বয়ংব্যক্তং দ্বিবিধং তৎ প্রকীর্ত্তিতং॥ শিলামৃদ্দারুলৌহাদ্যৈঃ কৃত্বা প্রতিকৃতিং হরেঃ। শ্রৌতস্মার্ত্তাগমৈঃ প্রোক্তা ক্রিয়াসংস্থাপনা হি তৎ॥ তৎস্থাপনমিতি প্রোক্তং স্বয়ংব্যক্তং হি মে শৃণু। *। যস্মিংস্তু নিহিতো বিষ্ণুঃ স্বয়মেব নৃণাং ভুবি॥ পাষাণদার্ব্বোরাত্মাংশঃ স্বয়ংব্যক্তং হি তৎ স্মৃতং। স্বয়ংব্যক্তে স্থাপনে বা পূজয়েন্মধুসূদনং॥ দেবতানাং মহর্ষীণামর্চ্চনার্থং সনাতনঃ। স্বয়মেব জগন্নাথঃ সান্নিধ্যং যাতি কেশবঃ॥ যস্য যদ্বিগ্রহে ভাগ্যং তদেবাবিরভূদ্ভুবি। তদেব পূজয়েন্নিত্যন্তস্মিন্নেব রমেৎ সদা॥ শ্রিয়োঽঙ্কশায়ী দেবেশো বিধেরর্চ্চ্যঃ শুভাননে। স এবেক্ষ্বাকুনাথানাং তপসাবিরভূদ্ভুবি॥ ময়াপি কাশ্যাং সংপূজ্যো মাধবঃ কলুষাপহঃ। দক্ষিণোদধিতীরে তু নীলাদ্রৌ পুরুষোত্তমে॥ দারুরূপী জগন্নাথো ব্রহ্মণা স্থাপিতঃ স্বয়ং। স এব পূজ্যঃ সর্ব্বেষাং লোকানাং খলু পার্ব্বতি॥ নরনারায়ণঃ সাক্ষাৎ পূজ্যো বদরিকাশ্রমে। গদাধরো গয়ায়ান্তু প্রয়াগে মাধবস্তথা॥ মাধবো বিধিবৎ পূজ্যো গঙ্গাসাগরসঙ্গমে। কপালমোচনে তীর্থে কলিঙ্গেঽর্চ্চ্যো হরিস্তথা॥ বিষ্ণুশ্চ বহিরঙ্গে তু ভীমমূর্ত্তিঃ শিবে যতঃ। দ্বারকায়াং বাসুদেবঃ কুরুক্ষেত্রে রণেশ্বরঃ॥ নারায়ণো ব্যঙ্কটাদ্রৌ পূজ্যো নিত্যং সনাতনঃ। স্বয়ং শ্রীভগবান্ কৃষ্ণো ধাম্নি বৃন্দাবনে শুভে॥ গোবিন্দঃ কেশবো নন্দযশোদানন্দনো বিভুঃ। পূজ্যো মদনগোপালগোবর্দ্ধনধরাদিকঃ॥ চতুরশীতিকে ক্রোশে ব্রহ্মাণ্ডাতীতকে শিবে। কলিন্দনন্দিনীতীরে মহাপ্রলয়বর্জ্জিতে॥ সদৈব কার্ষ্ণৈরভ্যর্চ্চ্যঃ শ্রীগোপীজনবল্লভঃ। যত্র যত্র হরেরর্চ্চা স্বয়ংব্যক্তা শুভাননে॥ স্থানং তীর্থং তথা ক্ষেত্রং যজ্ঞদানমহোৎসবং। সংকীর্ত্তনং সর্ব্বভক্তিস্তথা কাষ্ণাদিকং জনং॥ কায়েন মনসা বাচা ভক্ত্যা দেবি পুনঃ পুনঃ। তত্র তত্র সমাগম্য

বমেঽহঞ্চ সংব্যবস্থিতঃ॥ নাষ্টাঙ্গযোগজং জ্ঞানমর্চ্চায়াং বিন্দতে নৃণাং। চক্ষুষো-র্বিষয়ং প্রাপ্য দদাতি ফলমীপ্সিতং॥ সর্ব্বাবস্থাসু সৌরভ্যমর্চ্চায়াং লভতে নরঃ। অঙ্গানামপি সান্নিধ্যং সর্ব্বদা পৃথিবীতলে॥ জম্বুদ্বীপে মহাপুণ্যে বর্ষে বৈ ভারতে শুভে। অর্চ্চায়াং সন্নিধিবিষ্ণোর্নেতরেষু কদাচন॥ তস্মাদ্বৈ ভারতং বর্ষং মুনিভি-স্ত্রিদশৈরপি। সেবিতং সততং সুভ্রু তপোযজ্ঞক্রিয়াদিভিঃ॥ ভারতেঽস্মিন্ মহাবর্ষে নিত্যং সন্নিহিতো হরিঃ। ইন্দ্র-দ্যুম্নে তথা কৌর্ম্মে সিংহাদ্রৌ বদরীবনে॥ কাশ্যাং প্রয়াগে সোমে চ শালগ্রামাচলে তথা। নারায়ণাচলে সোমে বরাহে বামনা-শ্রমে। এবমাদ্যাঃ স্বয়ংব্যক্তাঃ সর্ব্বকাম-ফলপ্রদাঃ॥ স্বয়মেব হি সান্নিধ্যং যস্মিন্ যাতি জনার্দ্দনঃ। তস্মিন্নেব স্বয়ং ব্যক্তং বসন্তি মুনয়ঃ শুভাঃ॥ মহাভাগবতশ্রেষ্ঠো বিধিনা স্থাপ্য কেশবং। মন্ত্রেণ কুর্য্যাৎ সান্নিধ্যং স্থাপনং তদ্বিশিষ্যতে॥ ন তু শাক্তাদিভিঃ কার্য্যং মুকুন্দস্থাপনাদিকং। শ্রীহরেরর্চ্চনং কর্ম্ম যাত্রোৎসবমথাধ্বরং॥ যৎকিঞ্চিদ্বৈষ্ণবৈঃ কার্য্যমপরং মন্দিরা-দিকং। ধ্রুবং বিষ্ণুর্ন গৃহ্লাতি কৃত-মেতদ্বহির্মুখৈঃ॥ ইতি পাদ্মোত্তরখণ্ডে ৭৩ অধ্যায়ঃ॥ *॥ ভগবত্যাঃ প্রতিমা-রাধনবিধির্যথা। ব্রহ্মোবাচ। শৃণু তস্যাঃ সুরাধ্যক্ষ আরাধনবিধিং পরং। যথা সা তোষিতা পূর্ব্বং শঙ্করাদ্যৈঃ ফলেপ্সুভিঃ॥ কর্ম্মনজ্ঞেন দেবেশ তথা ত্বমপি পূজয়॥

শম্ভুঃ পূজয়তে দেবীং মন্ত্রশক্তিময়ীং শুভাং। অক্ষমালাকরো নিত্যং তেনাসৌ বিভুরীশ্বরঃ॥ অহং শৈলময়ীং দেবীং যজামি সুরসত্তম। তেন ব্রহ্মত্বমেবেদং ময়া প্রাপ্তং সুদুর্লভং॥ ইন্দ্রনীলময়ীং দেবীং বিষ্ণুরর্চ্চয়তে সদা। বিষ্ণুত্বং প্রাপ্তবাংস্তেন অদ্ভুতৈকং সনাতনং॥ দেবীং হেমময়ীং কান্তাং ধনদোঽর্চ্চয়তে সদা। তেনাসৌ ধনদো দেবো ধনেশত্ব-মবাপ্তবান্॥ বিশ্বেদেবা মহাত্মানো রৌপ্যাং দেবীং মনোহরাং। যজন্তি বিধিবদ্ভক্ত্যা তেন বিশ্বত্বমাপ্নুয়ুঃ॥ বায়ুঃ পূজয়তে ভক্ত্যা দেবীং পিত্তলসম্ভবাং। বায়ুত্বং তেন তৎ প্রাপ্তমনৌপম্যং গুণাবহং॥ বসবঃ কাংসিকাং দেবীং পূজয়ন্তে বিধানতঃ। প্রাপ্নুবন্তো মহাত্মানো বসুত্বং সুমহো-দয়ং॥ অশ্বিনৌ পার্থিবীং দেবীং পূজয়ন্তৌ বিধানতঃ। তেন তাবশ্বিনৌ দেবৌ দিব্য-দেহং গতাবুভৌ॥ স্ফাটিকাং শোভনাং দেবীং বরুণোঽর্চ্চয়তে সদা। বরুণত্বং হি সংপ্রাপ্তং তেন ঋদ্ধ্যা সমন্বিতং॥ দেবীমন্নময়ীং পুণ্যামগ্নির্যজতি ভাবিতঃ। অগ্নিত্বং প্রাপ্তবাংস্তেন তেজোরূপসম-ন্বিতং। তাম্রাং দেবীং সদাকালং ভক্ত্যা দেবো দিবাকরঃ। অর্চ্চতে তত্র সম্প্রাপ্তং তেন সূর্য্যত্বমুত্তমং॥ মুক্তাশৈলময়ীং দেবীং সোমঃ পূজয়তে সদা। তেন সোমোঽপি সংপ্রাপ্তঃ সোমত্বং সততো-জ্জ্বলং॥ প্রবালকময়ীং দেবীং যজন্তে পন্নগোত্তমাঃ। তেন নাগাস্তু ভোগাঢ্যাঃ

প্রয়াস্ত্যেতে পরং পদং ॥ কৃষ্ণায়সময়ীং দেবীং পূজয়ন্ত্যসুরোত্তমাঃ। রাক্ষসাশ্চ মহাত্মানস্তেন তেঽমিতবিক্রমাঃ ॥ ত্রপুসীসময়ীং দেবীং পিশাচাঃ পূজয়ন্তি তাং। তেন ঋদ্ধিবলোপেতাঃ প্রয়ান্তি পরমং পদং ॥ ত্রৈলোহিকাং সদা দেবীং যজন্তে গুহ্যকাদয়ঃ। তেন ভোগবলোপেতাঃ প্রয়ান্তীশ্বরমন্দিরং ॥ বজ্রলোহময়ীং দেবীং যজন্তে মাতরঃ সদা। মাতৃত্বং প্রাপ্য তাঃ সর্ব্বাঃ প্রয়ান্তি পরমং পদং ॥ এবং দেবাঃ সগন্ধর্ব্বাঃ পিশাচোরগরাক্ষসাঃ। পূজয়ন্তে সদাকালং চর্চ্চিকাং সুরনায়িকাং ॥ তথা ত্বমপি দেবেন্দ্র যদীচ্ছসি পরাং গতিং। শিবাং মণিময়ীং পূজ্য লভসে মনসেপ্সিতান্ ॥ কামান্ সুরবরাধ্যক্ষ কামিকৈঃ পূজিতা সদা। দদাতি সর্ব্বলোকানাং চিন্তামণির্যথা শিবা ॥ * ॥ অপি চ। হেমতাম্রা চ মৃদ্বার্ক্ষী শৈলা চিত্রায়সাপি বা। শক্তিশূলে স্থিতা দেবী সর্ব্বকামফলপ্রদা ॥ যো যস্য আয়ুধঃ প্রোক্তস্তস্মিংস্তাং প্রতিপূজয়েৎ। দেবী শক্ত্যর্চ্চিতা পুংসাং কামায়ুঃসুতসৌখ্যদা ॥ শূলে সংপূজিতা বৎস সর্ব্বং ভবতি পূজিতং। বার্ক্ষাং বা শৈলজাং বাপি রত্নধাতুময়ীমপি ॥ বিধিনা শাস্ত্রদৃষ্টেন দশবাহুস্ত্রিলোচনাং। কারয়েদ্ভক্তিমান্ যস্তু দেবীং শাস্ত্রবিশারদঃ ॥ * ॥ স্থাপনবিধির্যথা। সর্ব্বশৈলেষ্টকাষ্ঠোত্থং গৃহং বাস্তুবিভাজিতং। বলভীমণ্ডপং বৎস তাসাস্তু স্থাপনে শুভং ॥ গন্ধনৈবেদ্যধূপেন বলিমাল্যবিভূষণৈঃ। অধিবাসনপূর্ব্বাস্তু স্থাপ্যনীয়াস্তু তদ্বিদৈঃ ॥ বেদধ্বনিমহাঘোষৈঃ স্ত্রীসঙ্গীতোপশোভিতং। কর্ত্তব্যং স্থাপনং তাসাং বহুবাদিত্রনাদিতং ॥ রাত্রৌ জাগরণং তত্র দেব্যাঃ পূজার্থবৃদ্ধয়ে। সর্ব্বলক্ষণসম্পূর্ণং সর্ব্বোপকরণান্বিতং ॥ বাপীকূপতড়াগাদিবাটিকাবনশোভিতং। বেশ্যাতূর্য্যোপসম্পন্নং ধ্বজচ্ছত্রবিভূষিতং ॥ ঘণ্টাদর্পণদীপাদি দেয়ং দ্রব্যং নিরূপিতং। ঘণ্টিকা তত্র ষষ্ট্যাদি দিনসংখ্যার্থসিদ্ধয়ে ॥ কর্ত্তব্যা একমেকং বা যথাকালপরিচ্ছিদে। অনেন বিধিনা যস্তু মাতরঃ স্থাপয়েন্নরঃ। ইহাত্র পূজনীয়স্তু মৃতো যাতি পরাং গতিং ॥ ইতি দেবীপুরাণে মাতৃপ্রতিষ্ঠামহাভাগ্যং ॥ * ॥ অল্পবুদ্ধীনাং প্রতিমাসু দেবত্বং যথা। অগ্নৌ ক্রিয়াবতাং দেবো হৃদি দেবো মনীষিণাং। প্রতিমা স্বল্পবুদ্ধীনাং জ্ঞানিনাং সর্ব্বতো হরিঃ ॥ অপি চ। অগ্নৌ ক্রিয়াবতামস্মি হৃদি চাহং মনীষিণাং। প্রতিমা স্বল্পবুদ্ধীনাং জ্ঞানিনামস্মি সর্ব্বতঃ ॥ * ॥ প্রতিমাং লক্ষণবতীং যঃ কুর্য্যাচ্চৈব মানবঃ। কেশবস্য পরং লোকমক্ষয়ং প্রতিপদ্যতে ॥ ষষ্টিবর্ষসহস্রাণাং সহস্রাণি মহামুনে। ক্রীড়তে দেববত্তত্র অপ্সরোভিঃ সকিন্নরৈঃ ॥ যঃ স্থাপয়েদ্ধরেরর্চ্চাং সুপ্রশস্তে নিবেশনে। পুরুষঃ কৃতকৃত্যত্বান্নৈনঙ্ক মরণং নয়েৎ ॥*॥ সংস্থাপ্য প্রতিমাং বিষ্ণোর্হৈমরূপ্যসুশৈলজাং। রত্নজাং রৈতিকীং বাপি বহিস্তীর্থে গৃহেঽপি বা ॥ মহাস্নানেন গোবিন্দং

…সম্যক্ সংস্থাপ্য মানবঃ। যং যং কাময়তে কামং তং তং প্রাপ্নোত্যসংশয়ং॥ ইত্যগ্নিপুরাণং॥

প্রতিমানং (ক্লী) প্রতিবিম্বং। বাহিত্থস্যাধোভাগঃ। ইত্যমরঃ॥ অস্য বাহিত্থস্যাধোভাগো দন্তয়োর্মধ্যং প্রতিমানমুচ্যতে প্রতিমীয়তে অনেন প্রতিমানং ডু মিঞ ন ক্ষেপে অনট্মিম্যোরিতি ঙা। প্রতিমানং প্রতিচ্ছায়া গজদন্তান্তরালয়োরিতি রুদ্রঃ। ইতি ভরতঃ॥

প্রতিমার্গকঃ (পুং) পুরবিশেষঃ। যথা। ব্যোমচারিপুরং শৌভমুদ্রঙ্কঃ প্রতিমার্গকঃ। ইতি জটাধরঃ॥ হরিশ্চন্দ্রপুরং শৌভমুদ্রঙ্কঃ প্রতিমার্গকঃ। ইতি ত্রিকাণ্ডশেষশ্চ॥

প্রতিমুক্তঃ (ত্রি) পরিহিতবস্ত্রাদিঃ। ইত্যমরঃ

প্রতিযত্নঃ (পুং) লিপ্সা। বাঞ্ছা। উপগ্রহঃ। বন্দী। ইত্যমরঃ॥ নিগ্রহাদিঃ। সতো গুণান্তরাধানং। ইতি ভরতঃ॥ সংস্কারঃ। ইতি স্বামী॥ গ্রহণাদিঃ। ইতি রামাশ্রমঃ॥ প্রতিগ্রহঃ। ইতি মুকুটঃ॥ প্রতিযত্নস্তু সংস্কারে লিপ্সোপগ্রহণেষু চ। ইতি মেদিনী॥ প্রযত্নবতি ত্রি। ইতি ত্রিকাণ্ডশেষঃ॥ রচনা। ইতি জটাধরঃ॥

প্রতিযাতনা (স্ত্রী) প্রতিমা। ইত্যমরঃ॥ তুল্যযাতনা চ॥

প্রতিযোগঃ (পুং) বিরোধঃ। প্রতিযুজ্যত ইতিব্যুৎপত্ত্যা ভাবঘঞ্প্রত্যয়নিষ্পন্নঃ॥

প্রতিযোগী [ন্] (ত্রি) বিরোধী। যথা। সাধ্যবৎপ্রতিযোগিকান্যোন্যাভাবাসামানাধিকরণ্যং। ইতি চিন্তামণিঃ॥ সৎপ্রতিপক্ষঃ। যথা। প্রতিযোগিনং দৃষ্ট্বা প্রতিযোগী নিবর্ত্ততে। ইতি প্রাচীনকারিকা॥

প্রতিরম্ভঃ (পুং) প্রতিলম্ভঃ। ইতি দ্বিরূপকোষঃ॥

প্রতিরূপং (ক্লী) প্রতিমা। ইতি ত্রিকাণ্ডশেষঃ॥

প্রতিরূপকং (ক্লী) প্রতিবিম্বং। ইতি জটাধরঃ॥

প্রতিরোধঃ (পুং) তিরস্কারঃ। ইতি ব্যুত্থানশব্দটীকায়াং ভরতঃ॥ সৎপ্রতিপক্ষঃ। যথা। পক্ষসাধ্যসাধনাপ্রসিদ্ধিস্বরূপা সিদ্ধিবাধপ্রতিরোধানাং নিরাসঃ। ইতি সব্যভিচারশিরোমণিঃ॥ চৌর্য্যং। প্রতিরোধিশব্দদর্শনাৎ॥

প্রতিরোধকঃ (পুং) চৌরঃ। ইতি হেমচন্দ্রঃ॥

প্রতিরোধী [ন্] (পুং) চৌরঃ। ইত্যমরঃ॥

প্রতিলম্ভঃ (পুং) লাভঃ। তৎপর্য্যায়ঃ। লম্ভনং ২। ইতি হেমচন্দ্রঃ॥ যথা। নৈব নঃ প্রিয়তমোভয়থাসৌ যদ্যমুং ন বৃণুতে বৃণুতে বা। একতো হি ধিগমূমগুণজ্ঞামন্যতঃ কথমদঃপ্রতিলম্ভঃ॥ ইতি

প্রতিলোমঃ (ত্রি) বামঃ। ইতি হেমচন্দ্রঃ॥ বিলোমঃ। যথা। তাবুভাবপ্যসংস্কার্য্যাবিতি ধর্ম্মো ব্যবস্থিতঃ। বৈগুণ্যাজ্জন্মনঃ পূর্ব্ব উত্তরঃ প্রতিলোমতঃ॥ ইতি মানবে ৯ অধ্যায়ে ৬৮ শ্লোকঃ॥

প্রতিলোমজঃ (ত্রি) প্রতিলোমজাতঃ। উত্তম-

বর্ণায়াং অধমবর্ণাজ্জাতঃ। যথা। সংকীর্ণযোনয়ো যে তু প্রতিলোমানুলোমজাঃ। অন্যোন্যব্যতিষক্তাশ্চ তান্ প্রবক্ষ্যাম্যশেষতঃ॥ ইতি মানবে ১০ অধ্যায়ঃ॥

প্রতিবচঃ [স্] (ক্লী) প্রত্যুত্তরং। ইতি হেমচন্দ্রঃ॥

প্রতিবচনং (ক্লী) প্রতিবাক্যং। উত্তরং। ইতি ত্রিকাণ্ডশেষঃ॥

প্রতিবসথঃ (পুং) গ্রামঃ। ইতি হেমচন্দ্রঃ॥

প্রতিবাক্ [চ্] (স্ত্রী) উত্তরং। ইতি শব্দরত্নাবলী॥

প্রতিবাক্যং (ক্লী) উত্তরং। ইত্যমরঃ॥

প্রতিবাণিঃ (স্ত্রী) প্রত্যুক্তিঃ। প্রত্যুত্তরং। ইতি ভূরিপ্রয়োগঃ॥

প্রতিবাদী [ন্] (ত্রি) প্রতিপক্ষঃ। যথা। যদা ত্বেবম্বিধঃ পক্ষঃ কল্পিতঃ পূর্ব্ববাদিনা। দদ্যাত্তৎপক্ষসম্বন্ধং প্রতিবাদী তদোত্তরং॥ ইতি ব্যবহারতত্ত্বে বৃহস্পতিবচনং॥

প্রতিবাসরঃ (পুং) প্রতিদিনং। ইতি হারাবলী॥

প্রতিবাসী [ন্] (ত্রি) আসন্নগৃহী। নিকটস্থায়ী। পড়সি ইতি ভাষা। প্রতিবসতীতি গ্রহাদিত্বাণ্ণিন্প্রত্যয়নিষ্পন্নঃ॥

প্রতিবিম্বং (ক্লী) প্রতিমা। প্রতিচ্ছায়া। ইত্যমরঃ॥

প্রতিবিষা (স্ত্রী) অতিবিষা। আতইস ইতি ভাষা। ইত্যমরঃ॥

প্রতিবিষ্ণু (ক্লী) বিষ্ণুং বিষ্ণুং প্রতি। ইতি মুগ্ধবোধব্যাকরণং॥

প্রতিবিষ্ণুকঃ (পুং) মুচুকুন্দবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

প্রতিবেশঃ (পুং) প্রতিবাসিগৃহং। আসন্নগৃহিণাং গৃহং। ইতি শব্দরত্নাবলী॥

প্রতিবেশবাসী [ন্] (ত্রি) প্রতিবাসী। যথা নো জানে প্রতিবেশবাসিনি গুরোঃ কিং ভাবি সম্ভাবিতং। ইত্যলঙ্কারকৌস্তুভং॥

প্রতিবেশী [ন্] (ত্রি) প্রতিবাসী। ইতি শব্দরত্নাবলী॥

প্রতিশাসনং (ক্লী) আহূয় ভৃত্যাদীনাং কার্য্যে প্রেরণং। ইত্যমরঃ॥

প্রতিশিষ্টং (ত্রি) প্রত্যাখ্যাতং। প্রেষিতং। ইতি ত্রিকাণ্ডশেষঃ॥

প্রতিশ্যা (স্ত্রী) প্রতিশ্যায়ঃ। ইতি শব্দরত্নাবলী॥

প্রতিশ্যায়ঃ (পুং) পীনসরোগঃ। ইত্যমরঃ

প্রতিশ্রয়ঃ (পুং) যজ্ঞশালা। ইতি জটাধরঃ সভা। আশ্রয়ঃ। ইতি মেদিনী॥ ওকঃ ইতি হেমচন্দ্রঃ॥

প্রতিশ্রবঃ (পুং) অঙ্গীকারঃ। ইত্যমরঃ॥

প্রতিশ্রুৎ (স্ত্রী) প্রতিধ্বনিঃ। ইত্যমরঃ॥

প্রতিশ্রুতঃ (ত্রি) অঙ্গীকৃতঃ। ইত্যমরঃ॥

প্রতিষিদ্ধঃ (ত্রি) প্রতিষেধবিষয়ঃ। নিষিদ্ধ। যথা। অপ্রতিষিদ্ধমনুমতং ভবতীতি দত্তকচন্দ্রিকা॥

প্রতিষেদ্ধা [ঋ] (ত্রি) প্রতিষেধকর্ত্তা। তৎপর্য্যায়ঃ। মাশব্দিকঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥

প্রতিষেধঃ (পুং) নিষেধঃ। যথা। প্রাধান্যন্তু বিধের্যত্র প্রতিষেধেঽপ্রধানতা। পর্য্যুদাসঃ

ন বিজ্ঞেয়ো যত্রোত্তরপদেন নঞ্॥ ইতি মলমাসতত্ত্বং ॥

প্রতিষেধকঃ (ত্রি) প্রতিষেধকর্ত্তা। যথা। ষষ্টিবর্ষসহস্রাণাং সহস্রাণি বসেদ্দিবি। যোঽনুমন্তাপি ভবতি নিরয়ে প্রতিষেধকঃ ॥ ইত্যগ্নিপুরাণং ॥

প্রতিষ্কঃ (পুং) দূতঃ। ইতি শব্দরত্নাবলী ॥

প্রতিষ্কশঃ (পুং) সহায়ঃ। বার্ত্তাহরঃ। পুরোগঃ। ইতি মেদিনী ॥

প্রতিষ্কষঃ (পুং) চর্ম্মরজ্জুঃ। ইতি জটাধরঃ ॥

প্রতিষ্কসঃ (পুং) চরঃ। ইতি শব্দরত্নাবলী ॥

প্রতিষ্টম্ভঃ (পুং) প্রতিবন্ধঃ। ইত্যমরঃ ॥

প্রতিষ্ঠঃ (পুং) সুপার্শ্বনামকবৃত্তার্হৎপিতা। ইতি হেমচন্দ্রঃ ॥ প্রতিষ্ঠাযুক্তে ত্রি ॥

প্রতিষ্ঠা (স্ত্রী) গৌরবং। ক্ষিতিঃ। স্থানং। যাগনিষ্পত্তিঃ। চতুরক্ষরপদ্যং। ইতি মেদিনী ॥ * ॥ সংস্কারবিশেষঃ। তদ্দিনাদি যথা। মৎস্যপুরাণে। চৈত্রে বা ফাল্গুনে বাপি জ্যৈষ্ঠে বা মাধবে তথা। সময়ঃ সর্ব্বদেবানাং প্রতিষ্ঠা শুভদা ভবেৎ ॥ প্রাপ্য পক্ষং শুভং শুক্লমতীতে চোত্তরায়ণে। পঞ্চমী চ দ্বিতীয়া চ তৃতীয়া সপ্তমী তথা ॥ দশমী পৌর্ণমাসী চ তথা শ্রেষ্ঠা ত্রয়োদশী। আসু প্রতিষ্ঠা বিধিবৎ কৃতা বহুফলা ভবেৎ ॥ * ॥ প্রতিষ্ঠা সর্ব্বদেবানাং কেশবস্য বিশেষতঃ। উত্তরায়ণমাপন্নে শুক্লপক্ষে শুভে দিনে ॥ কৃষ্ণপক্ষে চ পঞ্চম্যামষ্টম্যাঞ্চৈব শস্যতে ॥*॥ ভুজবলভীমে। যুগাদাবয়নে পুণ্যে কর্ত্তব্যা বিষুবদ্বয়ে ॥ চন্দ্রসূর্য্যগ্রহে বাপি দিনে পুণ্যেঽথ পর্ব্বসু। যা তিথির্যস্য দেবস্য তস্যাং বা তস্য কীর্ত্তিতা ॥ গৃহ্যাগমবিশেষেণ প্রতিষ্ঠা মুক্তিদায়িনী ॥ * ॥ পদ্মপুরাণে। প্রতিপদ্ধনদস্যোক্তা পবিত্রারোপণে তিথিঃ। শ্রিয়া দেব্যা দ্বিতীয়া তু তিথীনামুত্তমা স্মৃতা ॥ তৃতীয়া তু ভবান্যাশ্চ চতুর্থী তৎসুতস্য চ। পঞ্চমী সোমরাজস্য ষষ্ঠী প্রোক্তা গুহস্য চ ॥ সপ্তমী ভাস্করস্যোক্তা দুর্গায়াশ্চাষ্টমী তথা। মাতৃণাং নবমী প্রোক্তা দশমী বাসুকেস্তথা ॥ একাদশী ঋষীণাঞ্চ দ্বাদশী চক্রপাণিনঃ। ত্রয়োদশী ত্বনঙ্গস্য শিবস্যোক্তা চতুর্দ্দশী। মম চৈব মুনিশ্রেষ্ঠ পৌর্ণমাসী তিথিঃ স্মৃতা ॥*॥ কল্পতরৌ দেবীপুরাণং। মহিষাসুরহন্ত্র্যাশ্চ প্রতিষ্ঠা দক্ষিণায়নে। যস্য দেবস্য যঃ কালঃ প্রতিষ্ঠাধ্বজরোপণে ॥ গর্ত্তাপূরশিলান্যাসে শুভদস্তস্য পূজিতঃ। যস্য দেবস্য প্রতিষ্ঠাধ্বজরোপণে যঃ কালঃ শুভদস্তস্য গর্ত্তাপূরশিলান্যাসে গৃহারম্ভে স কালঃ পূজিত ইত্যর্থঃ ॥*॥ প্রতিষ্ঠাসমুচ্চয়ে। মাঘে বা ফাল্গুনে বাপি চৈত্রবৈশাখয়োরপি। জ্যৈষ্ঠাষাঢ়কয়োর্বাপি প্রতিষ্ঠা শুভদা ভবেৎ ॥*॥ ভবিষ্যে। সোমো বৃহস্পতিশ্চৈব শুক্রশ্চৈব বুধস্তথা। এতে সৌম্যগ্রহাঃ প্রোক্তাঃ প্রতিষ্ঠা যজ্ঞকর্ম্মণি ॥ * ॥ মৎস্যপুরাণং। আষাঢ়ে দ্বে তথা মূলমুত্তরাত্রয়মেব চ। জ্যেষ্ঠাশ্রবণরোহিণ্যঃ পূর্ব্বভাদ্রপদে তথা ॥ হস্তাশ্বিনী রেবতী চ পুষ্যা মৃগশিরস্তথা।

অনুরাধা তথা স্বাতী প্রতিষ্ঠাদৌ প্রশস্যতে ॥ দীপিকায়াং । প্রাজেশবাসবকরাদিতিভাশ্বিনীষু পৌষ্ণামরেজ্যশশিভেষু তথোত্তরেষু। কর্ত্তুঃ শুভে শশিনি কেন্দ্রগতে চ জীবে কার্য্যা হরেঃ শুভতিথৌ বিধিবৎ প্রতিষ্ঠা॥ প্রাজেশাদয়ঃ। রোহিণীজ্যেষ্ঠাহস্তাপুনর্ব্বস্বশ্বিনীরেবতীপুষ্যামৃগশিরউত্তরফল্গুন্যুত্তরাষাঢ়োত্তরভাদ্রপদনক্ষত্রাণি ॥ * ॥ সর্ব্বমঙ্গলাদৃষ্টান্তে দেবীপুরাণং। যথা দ্বাদশমে জীবে অষ্টমে বাথ ভাস্করে। প্রতিষ্ঠা কারিতা বিষ্ণোর্মহাভয়করী মতা ॥ কল্পতরৌ দেবীপুরাণং। চতুর্ব্বর্ণৈস্তথা বিষ্ণুঃ প্রতিষ্ঠাপ্যঃ সুখার্থিভিঃ। প্রতিষ্ঠা ব্রাহ্মণদ্বারৈব কর্ত্তব্যা। হয়শীর্ষপঞ্চরাত্রে ভগবদ্বাক্যং। কর্ত্তুমিচ্ছতি যঃ পুণ্যং মম মূর্ত্তিপ্রতিষ্ঠয়া। অন্বেষণীয়স্ত্বাচার্য্যস্তেন লক্ষণসংযুতঃ॥ ব্রাহ্মণঃ সর্ব্ববর্ণানাং পঞ্চরাত্রবিশারদঃ। ব্রাহ্মণানামলাভে তু ক্ষত্রিয়ো বৈশ্যশূদ্রয়োঃ॥ ক্ষত্রিয়াণামলাভে তু বৈশ্যঃ শূদ্রস্য কল্পিতঃ। কদাচিদপি শূদ্রস্তু ন চ কার্য্যার্থমর্হতি॥ *॥ বৃহন্নারদীয়ে। প্রণমেচ্ছূদ্রসংস্পৃষ্টং লিঙ্গং বা হরিমেব বা। স সর্ব্বযাতনাভোগী যাবদাহূতসংপ্লবং ॥ তথা। স্ত্রীণামনুপনীতানাং শূদ্রাণাঞ্চ জনেশ্বর। স্পর্শনে নাধিকারোঽস্তি বিষ্ণৌ বা শঙ্করেঽপি বা॥ *॥ প্রতিষ্ঠাপ্রকারস্তু মৎস্যপুরাণাদাবুক্তঃ। তদসম্ভবে বিদ্যাকরবাজপেয়িপ্রভৃতিসম্মতো ভবিষ্যাদ্যুক্তঃ। যথা ভবিষ্যপুরাণং। স্নপনাদি যথাশক্তি কৃত্বা তন্মূলমন্ত্রকং। বিন্যসেদ্ধৃদয়াম্ভোজে প্রতিমাসু কৃতা ভবেৎ ॥ আদিপদাৎ পূজোৎসবহোমাদি মহাকপিলপঞ্চরাত্রোক্তকর্ম্ম চ কর্ত্তব্যং। তদ্যথা। সপুষ্পং সকুশং পাণিং ন্যসেদ্দেবস্য মস্তকে। পঞ্চবারং জপেন্মূলমষ্টোত্তরশতোত্তরং ॥ ততো মূলেন মূর্দ্ধাদিপীঠান্তং সংস্পৃশেদিতি। তত্ত্বন্যাসং লিপিন্যাসং মন্ত্রন্যাসঞ্চ বিন্যসেৎ॥ পূজাঞ্চ মহতীং কুর্য্যাৎ স্বমন্ত্রোক্তাং যথাবিধি। প্রাণপ্রতিষ্ঠামন্ত্রেণ প্রাণস্থাপনমাচরেৎ ॥ লিপিন্যাসস্তু মাতৃকান্যাসঃ। উক্তঞ্চ। জপাদৌ সর্ব্বমন্ত্রাণাং বিন্যসেন্ন লিপিং বিনা। কৃতং তন্নিষ্ফলং বিদ্যাত্তস্মাৎ পূর্ব্বং লিপিং ন্যসেৎ॥ কাদিমতেঽপি। মাতৃকায়াঃ ষড়ঙ্গঞ্চ মাতৃকান্যাসমেব চ। সর্ব্বাসাং প্রথমং কৃত্বা পশ্চাত্তন্ত্রোদিতং ন্যসেৎ ॥ এতদ্বচনাচ্চ মাতৃকান্যাসঃ পূর্ব্বং পশ্চাত্তত্ত্বন্যাসঃ। ক্রমদীপিকায়ামপ্যেবং ক্রমঃ। মন্ত্রন্যাসশ্চ তত্তন্মন্ত্রবিশেষোক্তপদবর্ণন্যাসঃ। তদভাবে মূলমন্ত্রেণ শিরসি হস্তন্যাসঃ। তত্ত্বন্যাসস্তু বিষ্ণুবিষয়ক এব। ন্যাসপ্রমাণানি সারদাক্রমদীপিকোক্তান্যনুসন্ধেয়ানি ॥*॥ প্রাণপ্রতিষ্ঠামন্ত্রস্তু সারদাত্রয়োবিংশতিপটলোক্তঃ। যথা। পাশাঙ্কুশপুটাশক্তির্ব্বাণীবিন্দুবিভূষিতঃ। যাদ্যাঃ সপ্ত সকারান্তা ব্যোমসত্যেন্দুসংযুতং ॥ সমন্তে হংসমন্ত্রঃ স্যাত্ততোঽমুষ্যপদং ভবেৎ। প্রাণা ইতি বদেৎ পশ্চাৎ ইহ প্রাণাস্ততঃ পরং ॥ অমুষ্য জীব চ ইহ স্থিতো-

হমুষ্যপদং ভবেৎ। সর্ব্বেন্দ্রিয়াণ্যমুষ্যান্তে বাঙ্মনশ্চক্ষুরন্ততঃ॥ শ্রোত্রঘ্রাণপদে প্রাণা ইহাগত্য সুখং চিরং। তিষ্ঠন্ত্বগ্নিবধূরন্তে প্রাণমন্ত্রোহয়মীরিতঃ॥ প্রত্যমুষ্যপদাৎ পূর্ব্বং পাশাদ্যানি প্রযোজয়েৎ। প্রয়োগেষু সমাখ্যাতঃ প্রাণমন্ত্রো মনীষিভিঃ॥ পাশাঙ্কুশপুটাশক্তিরিত্যনেন প্রথমং পাশবীজং আং ততঃ শক্তিবীজং হ্রীং ততোহঙ্কুশবীজং ক্রোং বাণী যকারঃ বিন্দুবিভূষিতো য়ং। যাদ্যাঃ সপ্ত সকারান্তাঃ উদ্ধৃতযকারানুবাদেন সপ্ত তদ্ভিন্নং বীজং পূর্ব্বং পৃথগুদ্ধারস্তু সপ্তানামপি সবিন্দুতাখ্যাপনায়। অঙ্কুশবায়ুনলাবনিবরুণবীজানীত্যুক্তং। অত্র বায়ুবীজস্যৈকত্বং বীজত্বেন সর্ব্বেষাং সবিন্দুত্বং ব্যক্তং। রাঘবভট্টোহপ্যেবং। অন্যস্তু বাণীবিন্দুবিভূষিতা ইতি পঠিত্বা নাদবিন্দুবিভূষিতা ইতি ব্যাখ্যাতং যাদ্যা ইত্যস্য বিশেষণং বদতি। ব্যোম হকারঃ সত্য ওকারঃ ইন্দুর্বিন্দুঃ তেন হোং। অতএব পাশাঙ্কুশান্তরিতশক্তিমনোঃ পরস্তাদুচ্চার্য্য যাদিবসুবর্ণগুণং সহংসমিতি প্রপঞ্চসারপ্রতিপাদ্যগুণমিত্যনেন হোমিতি পদ্মপাদাচার্য্যের্ব্যাখ্যাতং। অগ্নিবধূঃ স্বাহা। তেনায়ং মন্ত্রঃ। আং হ্রীং ক্রোং যং রং লং বং শং ষং সং হোং হং সঃ অমুষ্য প্রাণা ইহ প্রাণাঃ আমিত্যাদি অমুষ্য জীব ইহ স্থিতঃ আমিত্যাদি অমুষ্য সর্ব্বেন্দ্রিয়াণি আমিত্যাদি অমুষ্য বাঙ্মনশ্চক্ষুশ্রোত্রঘ্রাণপ্রাণা ইহাগত্য সুখং চিরং তিষ্ঠন্তু স্বাহা।

অমুষ্য ইতি ষষ্ঠ্যন্তদেবতানামোপলক্ষণং। অদঃপদং হি যদ্রূপং যত্র মন্ত্রে হি দৃশ্যতে। অমুষ্যাভিধানং তদ্রূপং তত্র স্থানে নিযোজয়েৎ॥ ইতি নারদীয়াৎ। বশিষ্ঠসংহিতায়াং। হৃদি হস্তং সন্নিধায় প্রাণস্থাপনমাচরেৎ॥*॥ প্রাগুক্তভবিষ্যপুরাণবচনেন তন্মূলমন্ত্রকং তত্তদ্দেবতামন্ত্রকং স চ বৈদিকস্তান্ত্রিকশ্চ। ওঙ্কারাদিসমাযুক্তং নমস্কারান্তকীর্ত্তিতং। স্বনাম সর্ব্বসত্ত্বানাং মন্ত্র ইত্যভিধীয়তে॥ ব্রহ্মপুরাণে। ওঙ্কারাদিনমোহন্তেন চতুর্থ্যন্ততত্তদ্দেবতানামরূপো বা। কালিকাপুরাণে। প্রতিমায়াঃ কপোলৌ দ্বৌ স্পৃষ্ট্বা দক্ষিণপাণিনা। তথৈব হৃদয়েহঙ্গুষ্ঠং দত্ত্বা শশ্বচ্চ মন্ত্রবিৎ॥ এভির্মন্ত্রৈঃ প্রতিষ্ঠাস্তু হৃদয়েহপি সমাচরেৎ। অস্যৈ প্রাণাঃ প্রতিষ্ঠন্তু অস্যৈ প্রাণাঃ ক্ষরন্তু চ। অস্যৈ দেবত্বসংখ্যায়ৈ স্বাহেতি যজুরীরয়ন্॥ অঙ্গমন্ত্রৈরঙ্গিমন্ত্রৈর্বৈদিকৈরিত্যনেন চ। প্রাণপ্রতিষ্ঠাং সর্ব্বত্র প্রতিমাসু সমাচরেৎ॥ অঙ্গমন্ত্রৈঃ অঙ্গন্যাসমন্ত্রৈঃ। অঙ্গিমন্ত্রৈঃ মূলমন্ত্রৈঃ বৈদিকৈর্মনোজ্যোতিরিত্যাদিভিঃ॥*॥ স্নপনাৎ পূর্ব্বং বল্মীকমৃত্তিকাদিভিস্তিসৃভিঃ ক্ষালনমাহ হয়শীর্ষপঞ্চরাত্রং। বল্মীকমৃত্তিকাভিস্তু গোময়েন স্বভস্মনা। ক্ষালয়েচ্ছিল্পিসংস্পর্শদোষাণামুপশান্তয়ে॥ স্নাপয়েদ্গন্ধতোয়েন শুদ্ধবত্যা তু দেশিকঃ॥ নমস্তেহস্তু সুরেশানি প্রণীতে বিশ্বকর্ম্মণা। প্রভাবিতাশেষজগদ্ধাত্রি তুভ্যং নমো নমঃ॥

ত্বয়ি সংপূজয়ামীশে নারায়ণমনাময়ং। রহিতা শিল্পিদোষৈস্তমৃদ্ধিযুক্তা সদা ভব ॥ * ॥ তেন যথাশক্তি স্নপনাদিপূর্ব্বক-প্রতিমাহৃদয়ে তন্মূলমন্ত্রবিন্যাসেন দেবতায়া বিশেষসন্নিধিঃ প্রতিষ্ঠেতি। রাঘবভট্টধৃতমহাকাপিলপঞ্চরাত্রেঽপি। প্রতিষ্ঠা-শব্দসংসিদ্ধিঃ প্রতিপূর্ব্বাচ্চ তিষ্ঠতেঃ। বহ্বর্থত্বান্নিপাতানাং সংস্কারাদৌ প্রতেঃ স্থিতিঃ॥ অর্থস্তদয়মেতস্য গীয়তে শাব্দিকৈর্জনৈঃ। বিশেষসন্নিধির্যা তু ক্রিয়তে ব্যাপকস্য তু ॥ সন্মূর্ত্তৌ ভাবনামন্ত্রৈঃ প্রতিষ্ঠা সাভিধীয়তে ॥ * ॥ স্বভস্মনা গোময়ভস্মনা। অষ্টোত্তরং পলশতং স্নানে দেয়ঞ্চ সর্ব্বদা ॥ পলমাহ মনুঃ। পঞ্চকৃষ্ণলকো মাষস্তে সুবর্ণস্তু ষোড়শ। পলং সুবর্ণাশ্চত্বারঃ। তেনাষ্টরক্তি-কাধিকলৌকিকমাষদ্বয়াধিকতোলকত্রয়েণ পলং ভবতি এবম্বিধাষ্টোত্তরপলশতেন লৌকিকষষ্ট্যধিকশতত্রয়তোলকা ইতি। এবং বল্মীকমৃদাদিক্ষালনে গায়ত্র্যা বল্মীক-মৃদা স্নাপয়েৎ। তত্রাপি অষ্টোত্তরশতপলং শূলপাণিলিখিতন্যায়াৎ। গায়ত্র্যা মূল-মন্ত্রেণ বা গন্ধোদকস্নানে শুদ্ধবত্যা এতো-ন্বিন্দ্রমিত্যাদি ঋক্‌ত্রয়াত্মিকয়া দেশিকো গুরুর্যজমানো বা বিজ্ঞঃ নমোঽস্তু ইত্যাদিমন্ত্রৌ দেবতান্তরে চ তত্তদ্দেবতা-নামোহঃ। শিবলিঙ্গস্থাপ্যর্চ্চাত্বাৎ স্ত্রীলিঙ্গ-মবিরুদ্ধং ॥ * ॥ যমঃ। কৃত্বা দেবকুলং সর্ব্বং প্রতিষ্ঠাপ্য চ দেবতাং। বিধায় বিবিধং চিত্রং তল্লোকং বিন্দতে ধ্রুবং ॥

নারসিংহে। প্রতিমাং লক্ষণোপেতাং নরসিংহস্য কারয়েৎ। সর্ব্বপাপানি সন্ত্যজ্য স তু বিষ্ণুপুরং ব্রজেৎ॥ প্রতিষ্ঠা নরসিংহস্য যঃ করোতি যথাবিধি। নিষ্কামো নরশার্দ্দূল দেহবন্ধাৎ প্রমুচ্যতে। সকামো নরসিংহস্য পুরং প্রাপ্য প্রমোদতে ॥ বিধিবৎ স্থাপয়েদ্যস্তু কারয়িত্বা জনার্দ্দনং। ন জাতু নির্গমস্তস্য বিষ্ণুলোকাৎ কথঞ্চন ॥ মাধবমানসোল্লাসে। দেবস্য প্রমিতায়াস্তু যাবন্তঃ পরমাণবঃ। তাবদ্বর্ষসহস্রাণি স্বর্গলোকে মহীয়তে ॥ * ॥ রাজমার্ত্তণ্ডে। পুত্রোৎপত্তৌ সদা শ্রাদ্ধমন্নপ্রাশনিকে তথা। চূড়াকার্য্যে ব্রতে চৈব নাম্নি পুংসবনেঽপি চ॥ পাণিগ্রহে প্রতিষ্ঠায়াং প্রবেশে নববেশ্মনঃ। এতদ্‌বৃদ্ধিকরং নাম গৃহস্থস্য বিধীয়তে ॥ * ॥ সূত উবাচ। কলৌ চৈকাহসাধ্যেন প্রতিষ্ঠাং মন্ত্রবিত্তবান্। মধ্যমেনাধমেনাপি প্রকুর্য্যাত্তান্ত্রিকৈর্মতৈঃ ॥ তথা। নিত্যং নির্ব্বর্ত্ত্য মতিমান্ কুর্য্যাদভ্যুদয়ং ততঃ। বিপ্রান্ সংপূজয়িত্বাথ ততো যাগপুরং ব্রজেৎ ॥ গণেশগ্রহদিক্‌পালান্ প্রতিকুম্ভেষু পূজয়েৎ। স্থণ্ডিলে বিধিবদ্বিষ্ণুং পরিবারগণং যজেৎ ॥ * ॥ স্নাপয়েৎ প্রথমং দেবং তোয়ৈঃ পঞ্চবিধৈরপি। পঞ্চামৃতৈঃ পঞ্চগব্যৈঃ পঞ্চমৃৎপিণ্ডকৈরপি ॥ তিলতৈলৈশ্চ স্নেহৈশ্চ কষায়ৈরপি সত্তমাঃ। পঞ্চপুষ্পোদকৈর্বাথ ত্রিপত্রৈরপি সত্তমাঃ ॥ * ॥ তুলসীকুন্দ-মালূরপত্রাণ্যাহুস্ত্রিপত্রকং। চম্পকাম্র-শমীপদ্মকরবীরঞ্চ পঞ্চমং ॥ * ॥ মৃত্তিকা

করিদন্তস্য পর্ব্বতাশ্বখুরস্য চ। কুশবল্মীকসম্ভূতং মৃদাং পঞ্চকমীরিতং ॥*॥ গোমূত্রং গোময়ং ক্ষীরং দধি সর্পিঃ কুশোদকং। কুর্য্যাৎ প্রাণপ্রতিষ্ঠাঞ্চ হোমং কুর্য্যাদযথাবিধি। দক্ষিণাং বিধিবদ্দদ্যাৎ পূর্ণার্থং তদনন্তরং॥ ইতি ভবিষ্যপুরাণে তৃতীয়ভাগে ৯ অধ্যায়ঃ॥ *॥ চতুরঙ্গুলবিস্তারা দীর্ঘা হস্তদ্বয়াবধি। পতাকা লোকপালানাং দশানাং পরিকীর্ত্তিতাঃ। পঞ্চহস্তাশ্চ বৈ দণ্ডাঃ পতাকানাং প্রকীর্ত্তিতাঃ ॥ *॥ জ্যোতিষে। দুগ্ধং সশর্করঞ্চৈব ঘৃতং দধি তথা মধু। পঞ্চামৃতমিদং প্রোক্তং বিধেয়ং সর্ব্বকর্ম্মসু॥ *॥ প্রতিষ্ঠানন্তরং মাৎস্যে। ততঃ সহস্রং বিপ্রাণামষ্টোত্তরশতন্তথা। ভোজয়েচ্চ যথাশক্ত্যা পঞ্চাশদ্বাথ বিংশতিং ॥*॥ ষোড়শোপচারাঃ। আসনমিত্যাদি। দশোপচারাঃ পাদ্যাদি। পঞ্চোপচারা গন্ধাদি। সর্ব্বোপচারবস্তূনামলাভে ভাবনৈব হি। নির্ম্মলেনোদকেনানুপূর্ণতেত্যাহ নারদঃ॥ *॥ নারসিংহে। স্নানে বস্ত্রে চ নৈবেদ্যে দদ্যাদাচমনীয়কং॥ *॥ কালিকাপুরাণং। যদ্দীয়তে চ দেবেভ্যো গন্ধপুষ্পাদিকং তথা। অর্ঘ্যপাত্রস্থিতৈস্তোয়ৈরভিষিচ্য তমুৎসৃজেৎ॥*॥ দেবীপুরাণং। হোমো গ্রহাদিপূজায়াং শতমষ্টোত্তরং ভবেৎ। অষ্টাবিংশতিরষ্টৌ বা যথাশক্তি বিধীয়তে॥*॥ কাত্যায়নঃ। আজ্যং দ্রব্যমনাদেশে জুহোতিষু বিধীয়তে। *। অত্র নীরাজনমাহ পূজারম্ভাকরে দেবীপুরাণং। শঙ্খভের্য্যাদিনিনদৈর্জয়শব্দৈশ্চ পুষ্কলৈঃ। যাবতো দিবসান্ বীর দেব্যা নীরাজনং কৃতং। তাবৎকল্পসহস্রাণি স্বর্গলোকে মহীয়তে॥ ভক্ত্যা পিষ্টপ্রদীপাদ্যৈশ্চূতাশ্বত্থাদিপল্লবৈঃ। ওষধীভিশ্চ মেধ্যাভিঃ সর্ব্ববীজৈর্যবাদিভিঃ॥ নবম্যাং পর্ব্বকালেষু যাত্রাকালে বিশেষতঃ। যঃ কুর্য্যাচ্ছ্রদ্ধয়া বীর দেব্যা নীরাজনং নরঃ। যস্তু কুর্য্যাৎ প্রদীপেন সূর্য্যলোকং স গচ্ছতি॥ পর্ব্বকাল উৎসবকালঃ। দেব্যা ইতি স্ত্রীত্বমবিবক্ষিতং বহুশো নিবন্ধকারৈর্ব্যাখ্যাতত্বাৎ আচারাচ্চ॥ *॥ অথ প্রতিষ্ঠিতমূর্ত্তৌ কদাচিৎ পূজাভাবেন মহাকপিলপঞ্চরাত্রং। একাহপূজাবিহতৌ কুর্য্যাদ্দ্বিগুণমর্চ্চনং। ত্রিরাত্রে চ মহাপূজা সংপ্রোক্ষণমতঃ পরং॥ মাসাদূর্দ্ধমনেকাহপূজা যদি বিহন্যতে। প্রতিষ্ঠেবেষ্যতে কৈশ্চিৎ কৈশ্চিৎ সংপ্রোক্ষণক্রমঃ॥ সংপ্রোক্ষণং ওঁ দেবস্য ত্বেত্যাদিনা। গবাং রসৈশ্চ সংস্নাপ্য দর্ভতোয়ৈর্বিশোধ্য চ। প্রোক্ষয়েৎ প্রোক্ষণীতোয়ৈর্মূলেনাষ্টোত্তরং শতং॥ সপুষ্পং সকুশং পাণিং ন্যসেদ্দেবস্য মস্তকে। পঞ্চবারং জপেন্মূলমষ্টোত্তরশতোত্তরং॥ ততো মূলেন মূর্দ্ধাদিপীঠান্তং সংস্পৃশেদিতি। তত্ত্বন্যাসং লিপিন্যাসং মন্ত্রন্যাসঞ্চ বিন্যসেৎ॥ প্রাণপ্রতিষ্ঠামন্ত্রেণ প্রাণস্থাপনমাচরেৎ। পূজাঞ্চ মহতীং কুর্য্যাৎ স্বতন্ত্রোক্তাং যথাবিধি। যাগহোমাদিষু প্রায়ঃ সংক্ষেপোঽয়ং বিধিঃ স্মৃতঃ॥ *॥ অস্পৃশ্যস্পর্শনে তু বৌধায়নঃ। তাসাং দ্রব্যবৎ

কৃতশৌচানাং দেবার্চ্চানাং ভূয়ঃ প্রতিষ্ঠাপয়েৎ। তাসামস্পৃশ্যস্পর্শানাং। প্রকৃতিদ্রব্যস্য তাম্রাদের্যথেষ্টশৌচং কৃত্বা পুনঃ প্রতিষ্ঠাং কারয়েদিতি রত্নাকরঃ। তদা পূজ্যত্বমিত্যাহু রত্নাকরাদয়ঃ ॥ * ॥ আদিত্যপুরাণে। খণ্ডিতে স্ফুটিতে দগ্ধে ভ্রাজমানবিবর্জিতে। যোগহীনে পশুস্পৃষ্টে পতিতে দুষ্টভূমিষু॥ অন্যমন্ত্রার্চ্চিতে চৈব পতিতস্পর্শদূষিতে। দশস্বেতেষু নো চক্রুঃ সন্নিধানং দিবৌকসঃ॥ ইতি সর্ব্বগতো বিষ্ণুঃ পরিভাষাঞ্চকার হ॥ * ॥ উপচারদ্রব্যাণি সারদাতিলকে। পাদ্যং শ্যামাকদূর্ব্বাব্জবিষ্ণুক্রান্তাভিরিষ্যতে। তদ্যুক্তজলমিতি শেষঃ। গন্ধপুষ্পাক্ষতযবকুশাগ্রতিলসর্ষপৈঃ। সদূর্ব্বৈঃ সর্ব্বদেবানামর্ঘ্যমেতদুদীরিতং॥ জাতীলবঙ্গকক্কোলৈর্জলমাচমনীয়কং। আজ্যং দধিমধূন্মিশ্রং মধুপর্কং নিবেদয়েৎ॥ মধুপর্কং দধিমধুঘৃতসর্ষপসহিতং কাংস্যে কাংস্যেন। গন্ধশ্চন্দনকর্পূরকালাগুরুভিরীরিতঃ। পুষ্পাণি দেবদেয়ানি। গুগ্গুল্বগুরুশীরশর্করামধুচন্দনৈঃ। ধূপয়েদাজ্যসংমিশ্রৈর্নীচৈর্দেবস্য দেশিকঃ। তত্র তত্র জলং দদ্যাদুপচারান্তরান্তরে॥*॥ অত্র বৃদ্ধিহোমৌ ত্বনাবশ্যকৌ যথাশক্তি ইত্যভিধানাৎ॥*॥ তথা চাল্পধনানাং যজ্ঞমণ্ডপেন বিনাপি পূজামাহ বিষ্ণুধর্ম্মোত্তরপ্রথমকাণ্ডং। পূজা কার্য্যা বহির্বেদ্যাং শ্রদ্ধয়া ভৃগুনন্দন। ন ত্বল্পদক্ষিণৈর্যজ্ঞৈর্যজেদিহ কদাচন॥ বিষ্ণুং দেবনিকায়স্থং যথাশ্রদ্ধমরিন্দম। তপসা পূজয়েন্নিত্যং তস্মাদল্পধনো নরঃ॥ * ॥ যদ্যেকাহে দেবপ্রতিষ্ঠাবাস্তুযাগগৃহোৎসর্গাস্তদা তন্ত্রেণ বৃদ্ধিশ্রাদ্ধং কুর্য্যাৎ। গণশঃ ক্রিয়মাণে ত্বিতিবচনাৎ॥*॥ তথা একস্মিন্নপি অগ্নৌ হোমদ্বয়ং বিধেয়ং। একাগ্নাবনেকহোমকরণপক্ষে তন্ত্রেণ পরিসমূহনাদিকমাহ গোভিলঃ। গণেষ্বেকং পরিসমূহনমিধ্মো বর্হিঃপর্য্যুক্ষণমাজ্যভাগাবিতি॥ * ॥ পূজাদিকন্তু প্রত্যেকমেব। ব্রহ্মপুরাণে। দেবানাং প্রতিমা যত্র ঘৃতাভ্যঙ্গক্ষমা ভবেৎ। পলানি তস্যৈ দেয়ানি শ্রদ্ধয়া পঞ্চবিংশতিঃ॥ অষ্টোত্তরশতপলং স্নানে দেয়ঞ্চ সর্ব্বদা। নারসিংহে। যবগোধূমজৈশ্চূর্ণৈরুদ্বর্ত্ত্যোষ্ণেন বারিণা। প্রক্ষাল্য দেবদেবেশং বারুণং লোকমাপ্নুয়াৎ॥ পাদপীঠন্তু যো দদ্যাৎ বিল্বপত্রনিঘর্ষণং। উষ্ণাম্বুনা চ প্রক্ষাল্য সর্ব্বপাপৈঃ প্রমুচ্যতে॥ ইতি প্রতিষ্ঠাতত্ত্বং ॥ * ॥ প্রকারান্তরং গারুড়ে ৪৮ অধ্যায়ে মৎস্যপুরাণে চ দ্রষ্টব্যং॥

প্রতিষ্ঠানং (ক্লী) নগরবিশেষঃ। বিঠোর ইতি খ্যাতঃ। তত্র পুরূরবা রাজচক্রবর্ত্তী আসীৎ। ইতি মহাভারতং॥

প্রতিষ্ঠিতঃ (ত্রি) প্রতিষ্ঠাযুক্তঃ। গৌরবান্বিতঃ। নিষ্পন্নযাগঃ। সংস্কৃতঃ। ইতি প্রতিষ্ঠাশব্দার্থদর্শনাৎ। প্রতিষ্ঠিতানাঞ্চাকীর্ত্তির্মরণাদতিরিচ্যতে। ইতি ব্রহ্মবৈবর্ত্তে গণেশখণ্ডে ৩৪ অধ্যায়ঃ॥

প্রতিসরঃ (পুং) মন্ত্রভেদঃ। মাল্যং। কঙ্কণং।

ব্রণশুদ্ধিঃ। চমূপৃষ্ঠং। ইতি মেদিনী॥ প্রাতঃকালঃ। ইতি শব্দমালা॥

প্রতিসরঃ (পুং ক্লী) মণ্ডলং। আরক্ষং। কর-সূত্রং। নিযোজ্যে ত্রি। ইতি মেদিনী॥

প্রতিসর্গঃ (পুং) ব্রহ্মণঃ সৃষ্ট্যনন্তরং দক্ষাদীনাং সৃষ্টিঃ। স চ পুরাণপঞ্চলক্ষণান্তর্গতলক্ষণবিশেষঃ। যথা। ঋষয় ঊচুঃ। আদিসর্গস্ত্বয়া সূত কথিতো বিস্তরেণ চ। প্রতিসর্গশ্চ যে যেষামধিপাস্তান্ বদস্ব নঃ॥ সূত উবাচ। যদাভিষিক্তঃ সকলাধিরাজ্যে পৃথুর্দ্ধরিত্র্যামধিপো বভূব। তদৌষধীনামধিপঞ্চকার যজ্ঞব্রতানাং তপসাঞ্চ সোমং॥ নক্ষত্রতারাদ্বিজবৃক্ষগুল্মলতাবিতানস্য চ রুক্মগর্ভঃ। অপামধীশং বরুণং ধনানাং রাজ্ঞাং প্রভুং বৈশ্রবণঞ্চ তদ্বৎ॥ বিষ্ণুং রবীণামধিপং বসূনামগ্নিঞ্চ লোকাধিপতিঞ্চকার। প্রজাপতীনামধিপঞ্চ দক্ষং চকার শক্রং মরুতামধীশং॥ দৈত্যাধিপানামথ দানবানাং প্রহ্লাদমীশঞ্চ যমং পিতৃণাং। পিশাচরক্ষঃপশুভূতযক্ষবেতালরাজন্ত্বথ শূলপাণিং॥ প্রালেয়শৈলঞ্চ পতিং গিরীণামীশং সমুদ্রং সসরিন্নদানাং। গন্ধর্ব্ববিদ্যাধরকিন্নরাণামীশং পুনশ্চিত্ররথঞ্চকার॥ নাগাধিপং বাসুকিমুগ্রবীর্য্যং সর্পাধিপং তক্ষকমাদিদেশ। দিগ্বারণানামধিপঞ্চকার গজেন্দ্রমৈরাবণনামধেয়ং॥ সুপর্ণমীশং পততামথাশ্বরাজানমুচ্চৈঃশ্রবসঞ্চকার। সিংহং মৃগাণাং বৃষভং গবাঞ্চ প্লক্ষং পুনঃ সর্ব্ববনস্পতীনাং॥ পিতামহঃ পূর্ব্বমথাভ্যষিঞ্চদেতান্ পুনঃ পূর্ব্বদিগাধিনাথান্। পূর্ব্বেণ দিক্পালমথাভ্যষিঞ্চন্নাম্না সুধর্ম্মাণমরাতিকেতুং॥ ততোঽধিপন্দক্ষিণতশ্চকার সর্ব্বেশ্বরং শঙ্খপদাভিধানং। সকেতুমন্তং দিগধীশমীশঞ্চকার পশ্চাদ্ভুবনাণ্ডগর্ভঃ॥ হিরণ্যরোমাণমুদগ্দিগীশং প্রজাপতিং মেরুসুতঞ্চকার। অদ্যাপি কুর্ব্বন্তি দিশামধীশাঃ শব্দং বহন্তস্তু ভুবোঽভিরক্ষাং॥ চতুর্ভিরেভিঃ পৃথুনামধেয়ো নৃপোঽভিষিক্তঃ প্রথমং পৃথিব্যাং। মন্বন্তরে চাপি গতে ত এব বৈবস্বতঞ্চক্রুরিমং পৃথিব্যাং॥ গতেঽন্তরে চাক্ষুষনামধেয়ে বৈবস্বতাখ্যে চ পুনঃ প্রবৃত্তে। প্রজাপতিঃ সোঽস্য চরাচরস্য বভূব সূর্য্যান্বয়বংশচিহ্নঃ॥ ইতি মাৎস্যে আধিপত্যসেচনং মন্বন্তরাধিপত্যং নাম ৮ অধ্যায়ঃ॥ *॥ অপি চ। মার্কণ্ডেয় উবাচ। বারাহোঽয়ং শ্রুতঃ সর্গো বরাহাধিষ্ঠিতো যতঃ। প্রতিসর্গঃ স্মৃতঃ সো বৈ দক্ষাদ্যৈর্যঃ কৃতঃ পৃথক্॥ রুদ্রো বিরাড়্মনুর্দক্ষো মরীচ্যাদ্যাস্তু মানসাঃ। যং যং সর্গং পৃথক্ চক্রুঃ প্রতিসর্গঃ স স স্মৃতঃ॥ বিরাট্সুতোঽসৃজদ্বংশ্যান্ মনূন্ যৈর্ব্বিততং জগৎ। মনুঃ সপ্ত মনূন্ সৃষ্ট্বা চকার বহুশঃ প্রজাঃ॥ প্রজাঃ সিসৃক্ষুঃ স মনুর্যোঽসৌ স্বায়ম্ভুবাহ্বয়ঃ। অসৃজৎ প্রথমং ষড়্ মনূন্ ষড়পরান্ সুতান্॥ স্বারোচিষশ্চোত্তমিশ্চ তামসো রৈবতস্তথা। চাক্ষুষশ্চ মহাতেজা বিবস্বান্ পরতস্তথা॥ যক্ষরক্ষঃপিশাচাংশ্চ নাগগন্ধর্ব্বকিন্নরান্। বিদ্যাধরানপ্সরসঃ সিদ্ধান্

ভূতগণান্ বহূন্ ॥ মেঘান্ সবিদ্যুতো বৃক্ষান্ লতাগুল্মতৃণাদিকান্ । মৎস্যান্ পশূংশ্চ কীটাংশ্চ জলজান্ স্থলজাংস্তথা॥ এতাদৃশানি সর্ব্বাণি মনুঃ স্বায়ম্ভুবঃ সুতৈঃ। সহিতঃ সসৃজে সোঽস্য প্রতিসর্গঃ প্রকীর্ত্তিতঃ ॥ অন্যে ষণ্মনবো যে বৈ তেঽপি স্বে স্বেঽন্তরেঽন্তরে । প্রতিসর্গং স্বয়ং কৃত্বা প্রাপ্নুবন্তি চরাচরং॥ যজ্ঞস্য সংভৃতং যজ্ঞান্ যূপং প্রাগ্বংশমেব চ। ধর্ম্মাধর্ম্মৌ গুণান্ সর্ব্বান্ বরাহঃ সৃষ্টবান্ পুরা ॥ সুতান্ বহূন্ সমুৎপাদ্য দক্ষো দেবর্ষিসত্তমান্ । মহর্ষীন্ সোমপাদীংশ্চ বহূন্ পিতৃগণাংস্তথা ॥ সৃষ্টিং প্রবর্ত্তয়ামাস প্রতিসর্গোঽস্য স স্মৃতঃ। অজায়ন্ত মুখাদ্ বিপ্রাঃ ক্ষত্রিয়া বাহুযুগ্মতঃ॥ ঊর্ব্বোর্ব্বৈশ্যাঃ পদঃ শূদ্রাশ্চতুর্ব্বেদাশ্চতুর্ম্মুখাৎ। ব্রহ্মণঃ প্রতিসর্গোঽয়ং ব্রাহ্মঃ সর্গস্ততঃ স্মৃতঃ ॥ মরীচেঃ কশ্যপো জাতঃ কশ্যপাৎ সকলং জগৎ। দেবা দৈত্যা দানবাশ্চ তস্য সর্গঃ প্রকীর্ত্তিতঃ ॥ অত্রের্নেত্রাদভূচ্চন্দ্রশ্চন্দ্রবংশস্ততোঽভবৎ। তেন সর্ব্বং জগদ্ব্যাপ্তং সোমসর্গঃ প্রকীর্ত্তিতঃ ॥ অথর্ব্বাঙ্গিরসী কৃত্বা পুত্রাশ্চ বহুশোঽপরে । মন্ত্রযন্ত্রাদয়ো যে বৈ তে সর্ব্বেঽঙ্গিরসঃ স্মৃতাঃ ॥ আজ্যপাখ্যাঃ পুলস্ত্যস্য পুত্রাশ্চান্যে চ রাক্ষসাঃ । প্রতিসর্গাঃ পুলস্ত্যস্য বলবীর্য্যসমন্বিতাঃ ॥ কাদ্রবেয়া গজা অশ্বাঃ প্রজা বহুতরাস্তথা। সসৃজে পুলহেনৈষ সর্গস্তস্য প্রকীর্ত্তিতঃ ॥ ক্রতোঃ পুত্রা বালিখিল্লাঃ সর্ব্বজ্ঞা ভূরিতেজসঃ। অষ্টাশীতিসহস্রাণি জ্বলদ্ভাস্করসন্নিভাঃ॥ প্রচেতসঃ সুতাঃ সর্ব্বে যে বৈ প্রাচেতসাঃ স্মৃতাঃ। ষড়শীতিসহস্রাণি পাবকোপমতেজসঃ ॥ সুকালিনো বশিষ্ঠস্য পুত্রাশ্চান্যেঽথ যোগিনঃ। আরুন্ধতেয়াঃ পঞ্চাশদ্বাশিষ্ঠঃ সর্গ উচ্যতে ॥ ভৃগোশ্চ ভার্গবা জাতা যে বৈ দৈত্যপুরোধসঃ। কবয়স্তে মহাপ্রাজ্ঞাস্তৈর্ব্যাপ্তমখিলং জগৎ॥ নারদাত্তারকা জাতা বিমানানি তথৈব চ। প্রশ্নোত্তরাস্তথৈবান্যে নৃত্যং গীতঞ্চ কৌতুকং ॥ এতে দক্ষমরীচ্যাদ্যাঃ কৃতদারান্ বহূন্ সুতান্ । উৎপাদ্যোৎপাদ্য পৃথিবীং দিবঞ্চ সমপূরয়ন্ ॥ তেষাং সুতেভ্যশ্চ সুতাস্তৎসুতেভ্যঃ পরে সুতাঃ। সমুৎপন্নাঃ প্রবর্ত্তন্তে যেঽদ্যাপি ভুবনেষু বৈ॥ বিষ্ণোস্তু চক্ষুষঃ সূর্য্যো মনসশ্চন্দ্রমাঃ স্মৃতঃ। শ্রোত্রাদ্বায়ুঃ সমুদ্ভূতো মুখাদগ্নিরজায়ত ॥ প্রতিসর্গো হ্যয়ং বিষ্ণোস্তথা চাপি দিশো দশ। সৃষ্ট্যর্থশ্চন্দ্রমাঃ পশ্চাদত্রিনেত্রাদবাতরৎ ॥ ভাস্করঃ কশ্যপাজ্জাতো ভার্য্যয়াস্য সমর্চ্চিতঃ। রুদ্রাশ্চ বহবো জাতা ভূতগ্রামাশ্চতুর্ব্বিধাঃ॥ শ্ববরাহোষ্ট্ররূপাশ্চ প্লবগোমায়ুগোমুখাঃ । ঋক্ষমার্জারবদনাঃ সিংহব্যাঘ্রমুখাঃ পরে ॥ নানাশস্ত্রধরাঃ সর্ব্বে নানারূপা মহাবলাঃ। এষ বঃ প্রতিসর্গোঽপি কথিতো দ্বিজসত্তমাঃ ॥ ইতি কালিকাপুরাণে ২৬ অধ্যায়ঃ ॥

প্রতিসব্যং (ত্রি) প্রতিকূলং । ইতি জটাধরঃ ॥

প্রতিসান্ধানিকঃ (পুং) মাগধঃ। স্তুতিপাঠকঃ। ইতি শব্দরত্নাবলী ॥

প্রতিসীরা (স্ত্রী) যবনিকা। ব্যবধায়কপটঃ। ইত্যমরঃ ॥

প্রতিসূর্য্যঃ (পুং) কৃকলাসঃ। ইতি ত্রিকাণ্ড-শেষঃ

প্রতিসূর্য্যকঃ (পুং) কৃকলাসঃ। উপসূর্য্যক-মণ্ডলং। ইতি বিশ্বঃ ॥

প্রতিসৃষ্টঃ (ত্রি) প্রেষিতঃ। প্রত্যাখ্যাতঃ। ইতি মেদিনী ॥ দত্তঃ। ইতি ধরণিঃ ॥

প্রতিসোমা (স্ত্রী) মহিষবল্লী। ইতি রাজ-নির্ঘণ্টঃ ॥

প্রতিস্পর্দ্ধা (স্ত্রী) প্রতিকক্ষা। স্পর্দ্ধা। ইতি শব্দরত্নাবলী ॥

প্রতিহতঃ (ত্রি) দ্বিষ্টঃ। প্রতিস্খলিতঃ। রুদ্ধঃ। ইতি মেদিনী ॥ নিরাশঃ। যথা। মনোহতঃ প্রতিহতঃ প্রতিবদ্ধো হতশ্চ সঃ। ইতি মুদ্রাঙ্কিতামরকোষে পাঠঃ ॥

প্রতিহস্তকঃ (পুং) প্রতিনিধিঃ। যথা। আশ্রিতানাং ভৃতৌ স্বামিসেবায়াং ধর্ম্মসেবনে। পুত্রস্যোৎপাদনে চৈব ন সন্তি প্রতিহস্তকাঃ ॥ ইতি হিতোপদেশে নীতিশাস্ত্রে সুহৃদ্ভেদো নাম দ্বিতীয়কথাসংগ্রহঃ পরিচ্ছেদঃ ॥

প্রতিহারঃ (পুং) দ্বারঃ। দ্বারপালঃ। ইতি শব্দরত্নাবলী ॥ মায়াকারঃ। ইত্যমর-টীকায়াং ভরতঃ ॥

প্রতিহারকঃ (পুং) মায়াকারঃ। ইত্যমর-টীকায়াং ভরতঃ ॥

প্রতিহাসঃ (পুং) করবীরঃ। ইত্যমরঃ ॥ হাসক-স্প্রতি হাস্যঞ্চ ॥

প্রতিক্ষণং ব্য পৌনঃপুন্যং। ইতি শব্দরত্না-বলী ॥

প্রতিক্ষয়ঃ (পুং) রক্ষকঃ। ইতি শব্দরত্না-বলী ॥

প্রতিক্ষিপ্তঃ (ত্রি) বারিতঃ। প্রেষিতঃ। ইতি মেদিনী ॥ অধিক্ষিপ্তঃ। ইত্যমরঃ ॥ দ্বে কৃতাধিক্ষেপে। স্পর্দ্ধয়া পরগুণং প্রতি দুর্ব্বচনমধিক্ষেপঃ অধিক্ষিপ্যতেস্ম অধি-ক্ষিপ্তঃ ক্তঃ এবং প্রতিক্ষিপ্তঃ। কস্যচিৎ শৌর্য্যাদিকং প্রতি স্পর্দ্ধমানেন দুর্ব্বচন-মধিক্ষেপঃ স যস্য কৃতঃ সোঽধিক্ষিপ্তঃ ইতি মুকুটোঽপি। কেচিত্তু। দ্বে প্রেষিতে আহূয় প্রেষিতো যস্তু প্রতিক্ষিপ্তঃ স উচ্যতে। ইতি কৃষ্ণদাসঃ। ইত্যাহুঃ। ইতি ভরতঃ ॥

প্রতীকঃ (পুং) একদেশঃ। অঙ্গং। প্রতি-কূলে ত্রি। ইত্যমরঃ ॥ বিলোমঃ। ইতি মেদিনী ॥ * ॥ স্বাঙ্গবাদ্যনিষেধো যথা। ন স্বাঙ্গনখবাদ্যং বৈ কুর্য্যান্নাঞ্জলিনা পিবেৎ। ইতি কৌর্ম্মে ১৫ অধ্যায়ঃ ॥ অপি চ। স্বাঙ্গে পীঠে চ বাদ্যং হরতি ধনপতেঃ কেশবস্যাপি লক্ষ্মীং। ইতি লক্ষ্মীচরিত্রং ॥

প্রতীকারঃ (পুং) কৃতাপকারস্য প্রত্যপকারঃ। তৎপর্য্যায়ঃ। বৈরশুদ্ধিঃ ২ বৈরনির্যা-তনং ৩। ইত্যমরঃ ॥ চিকিৎসা। ইতি শব্দমালা ॥

প্রতীকাশঃ (পুং) উপমা। ইত্যমরঃ ॥

প্রতীচী (স্ত্রী) পশ্চিমদিক্ । ইত্যমরঃ ॥

প্রতীচীনং (ত্রি) প্রত্যক্ । প্রতীচ্যাং ভবঃ । ইতি হেমচন্দ্রঃ ॥

প্রতীচ্যঃ (ত্রি) প্রতীচ্যাং ভবঃ । পশ্চিমদিগ্জাতঃ । প্রতীচীশব্দাদ্ভবার্থেঞ্যপ্রত্যয়নিষ্পন্নঃ ॥

প্রতীতঃ (ত্রি) খ্যাতঃ । ইত্যমরঃ ॥ সাদরঃ । জ্ঞাতঃ । হৃষ্টঃ । ইতি মেদিনী ॥

প্রতীতিঃ (স্ত্রী) জ্ঞানং । ইতি জটাধরঃ ॥ খ্যাতিঃ । আদরঃ । হর্ষঃ । ইতি প্রতীতশব্দার্থদর্শনাৎ ॥

প্রতীপং (ত্রি) প্রতিকূলং । ইতি হেমচন্দ্রঃ ॥

প্রতীপঃ (পুং) চন্দ্রবংশীয় ঋক্ষরাজপুত্রঃ । সান্তনুরাজপিতা চ । ইতি পুরাণং শব্দরত্নাবলী চ ॥

প্রতীপদর্শিনী (স্ত্রী) স্ত্রীমাত্রং । ইত্যমরঃ ॥

প্রতীরং (ক্লী) তটং । ইত্যমরঃ ॥

প্রতীবাপঃ (পুং) গলিতস্য স্বর্ণাদের্দ্রব্যান্তরেণাবচূর্ণনং । ইতি স্বামী ॥ ন্যসনং । নিঃক্ষেপণমিতি যাবৎ । ইতি সুভূতিঃ ॥ উপদ্রবঃ । ইতি মুকুটঃ ॥ আবাপস্তু প্রতীবাপো মারীরীতিরুপদ্রবঃ । ইতি রাজনির্ঘণ্টঃ ॥ ইত্যাতঞ্চনশব্দটীকায়াং ভরতঃ ॥ পানীয়ৌষধবিশেষঃ । যথা । উষকাদি প্রতীবাপং পিবেৎ সংশমনায় বৈ ॥ ইতি বিদ্রধিচিকিৎসায়াং চক্রপাণিদত্তঃ ॥

প্রতীবেশঃ (পুং) প্রতিবেশঃ । ইতি শব্দরত্নাবলী ॥

প্রতীবেশী [ন্] (স্ত্রী) প্রতিবেশী । ইতি শব্দরত্নাবলী

প্রতীহারঃ (পুং) দ্বারঃ । দ্বারপালঃ । ইত্যমরঃ ॥ তস্য লক্ষণং । ইঙ্গিতাকারতত্ত্বজ্ঞো বলবান্ প্রিয়দর্শনঃ । অপ্রমাদী সদা দক্ষঃ প্রতীহারঃ স উচ্যতে ॥ ইতি চাণক্যসংগ্রহঃ ॥ অপি চ । প্রাংশুঃ সুরূপো দক্ষশ্চ প্রিয়বাদী ন চোদ্ধতঃ । চিত্তগ্রাহশ্চ সর্ব্বেষাং প্রতীহারো বিধীয়তে ॥ ইতি মাৎস্যে ১৮৯ অধ্যায়ঃ ॥ * ॥ সন্ধিবিশেষঃ । যথা । ময়াস্যোপকৃতং পূর্ব্বময়ঞ্চোপকরিষ্যতি । ইতি যঃ ক্রিয়তে সন্ধিঃ প্রতীহারঃ স উচ্যতে ॥ ইতি হারাবলী ॥

প্রতীহারী [ন্] (ত্রি) দ্বারী । দ্বারার্থকপ্রতীহারশব্দাদস্ত্যর্থে ইন্প্রত্যয়েন নিষ্পন্নঃ ॥

প্রতীহারী (স্ত্রী) দ্বাঃস্থিতা । ইতি মেদিনী ॥

প্রতীহাসঃ (পুং) করবীরঃ । ইত্যমরঃ ॥

প্রতীক্ষা (স্ত্রী) প্রতীক্ষণং । অপেক্ষা । প্রতিপূর্ব্বেক্ষধাতোর্ভাবে অপ্রত্যয়েন নিষ্পন্নঃ ॥

প্রতীক্ষ্যঃ (ত্রি) পূজ্যঃ । ইত্যমরঃ ॥ প্রতীক্ষণীয়শ্চ ॥

প্রতুদঃ (পুং) গৃধ্রাদিঃ । আদিনা শ্যেনঃ । কঙ্কঃ । কাকঃ । দ্রোণকাকঃ । উলূকঃ । ময়ূরঃ । ইতি রাজনির্ঘণ্টঃ ॥ অস্য মাংসগুণাঃ । লাবাদ্যা বিষ্কিরো বর্গঃ প্রতুদা জাঙ্গলা মৃগাঃ । লঘবঃ শীতমধুরাঃ কষায়াশ্চ হিতা নৃণাং ॥ ইতি রাজবল্লভঃ ॥

প্রতোদঃ (পুং) অশ্বাদিতাড়নদণ্ডঃ । চাবুক্ ইতি ভাষা । তৎপর্য্যায়ঃ । প্রাজনং ২ প্রবয়ণং ৩ তোত্রং ৪ তোদনং ৫ । ইতি জটাধরঃ ॥

প্রতোলী (স্ত্রী) রথ্যা। ইত্যমরঃ॥ অভ্যন্তর-মার্গঃ। নাছ ইতি খ্যাতে। কুলী ইতি চ খ্যাতে। হট্টাদিমধ্যনির্ম্মিতে পথীতি সাঙ্গঃ। দুর্গনগরদ্বারে ইতি কেচিৎ। হট্ট-প্রায়ে জনাশ্রয়ে ইতি কেচিৎ। ইতি তট্টীকায়াং ভরতঃ॥

প্রত্তং (ত্রি) দত্তং। প্রপূর্ব্বদাধাতোঃ কর্ম্ম-ক্তপ্রত্যয়নিষ্পন্নং। ইতি মুগ্ধবোধব্যা-করণ৲

প্রত্নঃ (ত্রি) পুরাতনঃ। ইত্যমরঃ॥

প্রত্যক্ [চ্] (ত্রি) ব্য পশ্চিমদিক্। পশ্চিম-দেশঃ। পশ্চিমকালঃ। ইতি মেদিনী॥

প্রত্যক্পর্ণী (স্ত্রী) অপামার্গঃ। ইত্যমরঃ॥ দ্রবন্তী। ইতি রাজনির্ঘণ্টঃ॥

প্রত্যক্পুষ্পী (স্ত্রী) অপামার্গঃ। ইত্যমরঃ॥

প্রত্যক্শ্রেণী (স্ত্রী) দন্তীবৃক্ষঃ। মূষিকপর্ণী। ইত্যমরঃ॥

প্রত্যগাশাপতিঃ (পুং) বরুণঃ। ইতি হলা-য়ুধঃ॥

প্রত্যগ্রঃ (ত্রি) নূতনঃ। ইত্যমরঃ॥ শোধিতঃ। ইতি জটাধরঃ॥

প্রত্যগ্রথঃ (পুং) অহিচ্ছত্রদেশঃ। ইতি হেম-চন্দ্রঃ॥

প্রত্যঙ্ [ঞ্চ্] (ত্রি) পশ্চিমদিক্। পশ্চিম-দেশঃ। পশ্চিমকালঃ। প্রতিপূর্ব্বাঞ্চ-ধাতোঃ কর্ত্তরি বিচ্প্রত্যয়েন নিষ্পন্নঃ। ইতি ব্যাকরণং॥

প্রত্যঙ্গং (ক্লী) অবয়ববিশেষঃ। যথা। প্রত্যঙ্গং কর্ণনাসাক্ষিলিঙ্গাঙ্গানি করাদিকং। ইতি শব্দচন্দ্রিকা॥

প্রত্যঙ্গিরা (স্ত্রী) দেবীবিশেষঃ। তস্যা ধ্যানং। শবোপরিসমাসীনাং রক্তাম্বর-তনুচ্ছদাং। সর্ব্বাভরণসংযুক্তাং গুঞ্জা-হারবিভূষিতাং॥ ষোড়শাব্দাঞ্চ যুবতীং পীনোন্নতপয়োধরাং। কপালকর্ত্তৃকাহস্তাং পরমানন্দরূপিণীং। বামদক্ষিণযোগেন ধ্যায়েন্মন্ত্রবিদুত্তমাং॥ ইতি প্রত্যঙ্গিরা-স্তোত্রান্তর্গতং॥

প্রত্যনীকঃ (পুং) শত্রুঃ। ইতি হেমচন্দ্রঃ॥

প্রত্যন্তঃ (পুং) ম্লেচ্ছদেশঃ। ইত্যমরঃ॥ সন্নি কৃষ্টে ত্রি॥

প্রত্যন্তপর্ব্বতঃ (পুং) মহাপর্ব্বতসমীপবর্ত্তি-ক্ষুদ্রপর্ব্বতঃ। ইত্যমরঃ॥

প্রত্যভিযোগঃ (পুং) প্রত্যপরাধঃ। যথা। অভিযোগমনিস্তীর্য্য নৈনং প্রত্যভিযোজ-য়েৎ। অভিযুক্তঞ্চ নান্যেন নোক্তং বিপ্র-কৃতিং নয়েৎ॥ অভিযুজ্যত ইতি অভি-যোগোঽপরাধস্তমভিযোগমনিস্তীর্য্যাপহ্ন-ত্যৈনমভিযোক্তারং ন প্রত্যভিযোজয়েদপ-রাধেন ন সংযোজয়েৎ। যদ্যপি প্রত্যভি-স্কন্দনং প্রত্যভিযোগরূপন্তথাপি স্বাপ-রাধপরিহারাত্মকত্বান্নাস্য প্রতিষেধস্য বিষয়ঃ। অতঃ স্বাভিযোগানুপমর্দ্দনরূপস্য প্রত্যভিযোগস্যায়ং নিষেধঃ। ইতি মিতা-ক্ষরা॥

প্রত্যভিবাদঃ (পুং) } অভিবাদ্যস্য গুরোরাশী-
প্রত্যভিবাদনং (ক্লী) } র্ব্বচনং। ইতি গোয়ী-চন্দ্রঃ॥

প্রত্যয়ঃ (পুং) অধীনঃ। শপথঃ। জ্ঞানং। বিশ্বাসঃ। হেতুঃ। রন্ধ্রং। শব্দঃ।

ইত্যমরঃ ॥ প্রথিতত্বং। আচারঃ। ইতি মেদিনী ॥ নিশ্চয়ঃ। স্বাদুঃ। ইতি হেমচন্দ্রঃ ॥ প্রকৃত্যুত্তরজায়মানঃ। বোপদেবেনাস্য ত্যসংজ্ঞা কৃতা। প্রত্যায়য়ন্তীতি সুপ্তিঙ্কৃত্তদ্ধিতাঃ প্রত্যয়াঃ। ইতি সংক্ষিপ্তসারব্যাকরণং ॥ সহকারী। ইতি ত্রিকাণ্ডশেষঃ ॥

প্রত্যয়কারিণী (স্ত্রী) মুদ্রা। মোহর ইতি পারস্যভাষা। ইতি ত্রিকাণ্ডশেষঃ ॥

প্রত্যয়িতঃ (ত্রি) আপ্তঃ। বিশ্বস্তঃ। ইত্যমরঃ ॥

প্রত্যর্থী [ন্] (ত্রি) শত্রুঃ। ইত্যমরঃ। প্রতিবাদী। ইতি শব্দরত্নাবলী ॥ অর্থিপ্রতিপক্ষঃ। যথা। প্রত্যর্থিনোঽগ্রগতো লেখ্যং যথা বেদিতমর্থিনা। সমামাসতদর্দ্ধাহর্নামজাত্যাদিচিহ্নিতং ॥ অর্থ্যত ইত্যর্থঃ সাধ্যঃ। সোঽস্যাস্তীত্যর্থী। তৎপ্রতিপক্ষঃ প্রত্যর্থী। ইতি মিতাক্ষরা ॥

প্রত্যর্পিতং (ত্রি) প্রতিদত্তং। যথা। অর্থব্যবহারোঽপি একস্মিন্ বৎসরে যৎসংখ্যাকং যদ্দ্রব্যং যতো যেন গৃহীতং প্রত্যর্পিতঞ্চেতি। পুনরন্যস্মিন্ বৎসরে তদ্দ্রব্যং তৎসংখ্যাকং ততস্তেন গৃহীতং যাচ্যমানোঽপি যদি ব্রূয়াৎ সত্যং গৃহীতং প্রত্যর্পিতঞ্চেতি বৎসরান্তরে গৃহীতং প্রত্যর্পিতঞ্চ নাস্মিন্ বৎসর ইত্যুপযুজ্যতে। ইতি মিতাক্ষরা ॥

প্রত্যবসানং (ক্লী) ভোজনং। ইতি হেমচন্দ্রঃ

প্রত্যবসিতং (ত্রি) ভক্ষিতং। ইত্যমরঃ ॥

প্রত্যবস্কন্দঃ (পুং) } প্রত্যবস্কন্দনং (ক্লী) } চতুর্ব্বিধোত্তরান্তর্গতোত্তরবিশেষঃ। যথা। প্রত্যবস্কন্দনং নাম সত্যং গৃহীতং প্রতিদত্তং প্রতিগ্রহলব্ধমিতি বা। যথাহ নারদঃ। অর্থিনা লেখিতো যোঽর্থঃ প্রত্যর্থী যদি তত্তথা। প্রপদ্য কারণং ব্রূয়াৎ প্রত্যবস্কন্দনং স্মৃতং ॥ ইতি মিতাক্ষরা ॥ অপি চ। অর্থিনাভিহিতো যোঽর্থঃ প্রত্যর্থী যদি তত্তথা। প্রপদ্য কারণং ব্রূয়াৎ প্রত্যবস্কন্দনং হি তৎ ॥ ইতি ব্যবহারতত্ত্বে বৃহস্পতিবচনং ॥

প্রত্যবস্থাতা [ঋ] (ত্রি) শত্রুঃ। ইতি হেমচন্দ্রঃ ॥

প্রত্যবায়ঃ (পুং) পাপং। দুরদৃষ্টং। যথা। ক্ষয়ং কেচিদুপাত্তস্য দুরিতস্য প্রচক্ষতে। অনুৎপত্তিং তথা চান্যে প্রত্যবায়স্য মন্বতে ॥ ইত্যেকাদশীতত্ত্বে জাবালবচনং ॥

প্রত্যশ্ম [ন্] (ক্লী) গৈরিকং। ইতি ত্রিকাণ্ডশেষঃ ॥

প্রত্যহং ব্য প্রতিদিনং। যথা। গিরিশমুপচচার প্রত্যহং সা সুকেশী ॥ ইতি কুমারসম্ভবং ॥

প্রত্যক্ষং (ত্রি) ইন্দ্রিয়গ্রাহ্যং। তৎপর্য্যায়ঃ। ঐন্দ্রিয়কং ২। ইত্যমরঃ ॥ অনুভববিশেষঃ। তৎ ষড়্বিধং। ঘ্রাণজং ১ রাসনং ২ শ্রাবণং ৩ চাক্ষুষং ৪ স্পার্শনং ৫ মানসং ৬। নির্ব্বিকল্পকসবিকল্পকভেদেন প্রত্যেকং দ্বিবিধং। নির্ব্বিকল্পকন্তু অতীন্দ্রিয়ং। সবিকল্পকং মনোগ্রাহ্যং। ষড়্বিধপ্রত্যক্ষে আশ্রয়স্য মহত্ত্বং

কারণং। ইন্দ্রিয়ং করণং। বিষয়েণ সহ ইন্দ্রিয়সন্নিকর্ষঃ অস্য ব্যাপারঃ। যথা। ঘ্রাণজাদিপ্রভেদেন প্রত্যক্ষং ষড়্‌বিধং মতং। ঘ্রাণস্য গোচরো গন্ধো গন্ধত্বাদিরপি স্মৃতঃ। তথা রসো রসজ্ঞায়াস্তথা শব্দোঽপি চ শ্রুতেঃ॥ উদ্ভূতরূপং নয়নস্য গোচরো দ্রব্যাণি তদ্বন্তি পৃথক্ত্বসংখ্যাং। বিভাগসংযোগপরাপরত্বস্নেহদ্রবত্বং পরিমাণযুক্তং॥ ক্রিয়াং জাতিং যোগ্যবৃত্তিং সমবায়ঞ্চ তাদৃশং। গৃহ্ণাতি চক্ষুঃসম্বন্ধাদালোকোদ্ভূতরূপয়োঃ॥ উদ্ভূতস্পর্শবদ্দ্রব্যং গোচরঃ সোঽপি চ ত্বচঃ। রূপান্যচ্চক্ষুষো যোগ্যং রূপমত্রাপি কারণং॥ দ্রব্যাধ্যক্ষে ত্বচো যোগো মনসা জ্ঞানকারণং। মনোগ্রাহ্যং সুখং দুঃখমিচ্ছা দ্বেষো মতিঃ কৃতিঃ॥ জ্ঞানং যন্নির্ব্বিকল্পাখ্যং তদতীন্দ্রিয়মিষ্যতে। মহত্ত্বং ষড়্‌বিধে হেতুরিন্দ্রিয়ং করণং মতং॥ বিষয়েন্দ্রিয়সম্বন্ধো ব্যাপারঃ সোঽপি ষড়্‌বিধঃ। ইতি ভাষাপরিচ্ছেদঃ॥

প্রত্যক্ষদর্শনং (ত্রি) সাক্ষী। ইতি শব্দমালা॥

প্রত্যক্ষী [ন্] (ত্রি) ব্যক্তদৃষ্টার্থঃ। ইতি ত্রিকাণ্ডশেষঃ॥

প্রত্যক্ষবাদী [ন্] (পুং) বৌদ্ধঃ। নাপ্রত্যক্ষং প্রমাণমিতি তন্মতং। প্রত্যক্ষং বদতি যঃ। কর্ত্তরি ইন্‌প্রত্যয়েন নিষ্পন্নঃ॥

প্রত্যাকারঃ (পুং) খড়্গকোষঃ। খাপ ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

প্রত্যাখ্যাতঃ (ত্রি) দূরীকৃতঃ। তৎপর্য্যায়ঃ। প্রত্যাদিষ্টঃ ২ নিরস্তঃ ৩ নিরাকৃতঃ ৪ নিকৃতঃ ৫ বিপ্রকৃতঃ ৬। ইত্যমরঃ॥ ক্বচিৎ পুস্তকে তু প্রত্যাদিষ্টেত্যাদিশ্লোকমেকমধিকং দৃশ্যতে তত্রাদ্যচতুষ্কং প্রত্যাদিষ্টে। পরচতুষ্কং তিরস্কৃতে। ইতি তট্টীকাসারসুন্দরী॥

প্রত্যাখ্যানং (ক্লী) নিরাকরণং। তৎপর্য্যায়ঃ নিরসনং ২ প্রত্যাদেশঃ ৩ নিরাকৃতিঃ ৪ ইত্যমরঃ॥

প্রত্যাগমঃ (পুং) প্রত্যাগমনং। ফিরে আসা ইতি ভাষা। যথা। তীর্থযাত্রাসমারম্ভে তীর্থপ্রত্যাগমেষু চ। ইতি প্রায়শ্চিত্ততত্ত্বং

প্রত্যাদিষ্টঃ (ত্রি) প্রত্যাদেশবিশিষ্টঃ। তৎপর্য্যায়ঃ। নিরস্তঃ ২ প্রত্যাখ্যাতঃ ৩ নিরাকৃতঃ ৪ নিকৃতঃ ৫ বিপ্রকৃতঃ ৬। ইত্যমরঃ॥

প্রত্যাদেশঃ (পুং) নিরাকরণং। প্রত্যাখ্যানং। ইত্যমরঃ॥ ভক্তং প্রতি দেবানামাদেশশ্চ॥

প্রত্যাধ্মানঃ (পুং) বাতব্যাধিবিশেষঃ। তস্য লক্ষণমাহ। বিমুক্তপার্শ্বহৃদয়ং তদেবামাশয়োত্থিতং। প্রত্যাধ্মানং বিজানীয়াৎ কফব্যাকুলিতানিলং॥ বিমুক্তপার্শ্বহৃদয়ং পার্শ্বে হৃদয়ে বিহায় জাতং তদেবাধ্মানং। কফব্যাকুলিতানিলং কফেনাবরুদ্ধবাতং ॥*॥ অথ তস্য চিকিৎসা। প্রত্যাধ্মানে সমুৎপন্নে কুর্য্যাৎ বমনলঙ্ঘনে। দীপনাদি নিযুঞ্জীত পূর্ব্ববদ্বস্তিকর্ম্ম চ॥ ইতি ভাবপ্রকাশঃ॥

প্রত্যালীঢ়ং (ক্লী) ধন্বিনাং পাদসংস্থানবিশেষঃ।

তত্রোর্দ্ধস্য বামপাদপ্রসারে দক্ষিণপাদসঙ্কোচঃ। ইত্যমরটীকায়াং ভরতঃ ॥ ধন্বিনামবস্থানবিশেষঃ। যথা। স্যাৎ প্রত্যালীঢ়মালীঢ়ং সমং পাদং তথাপরং। বৈশাখং মণ্ডলঞ্চেতি ধন্বিনাং স্থানপঞ্চকং ॥ স্যাদ্দক্ষপাদসঙ্কোচাৎ বামপাদপ্রসারণাৎ। প্রত্যালীঢ়মিতি প্রোক্তমালীঢ়ং তদ্বিপর্য্যয়াৎ ॥ তুল্যং পাদযুগং যত্র সমপাদমুদাহৃতং। বিতস্ত্যন্তরিতং পাদযুগং বৈশাখমুচ্যতে ॥ মণ্ডলাকারপাদাভ্যাং মণ্ডলং স্থানমীরিতং। ইতি শব্দরত্নাবলী ॥ অশিতে ত্রি। ইতি মেদিনী ॥

প্রত্যাশা (স্ত্রী) আকাঙ্ক্ষা। যথা। মূঢ়োঽন্যত্র মরীচিকাসু পশুবৎ প্রত্যাশয়া ধাবতি। ইতি শান্তিশতকং ॥

প্রত্যাসন্নঃ (ত্রি) নিকটবর্ত্তী। ইতি জটাধরঃ ॥

প্রত্যাসরঃ (পুং) সৈন্যপৃষ্ঠঃ। ইতি শব্দরত্নাবলী ॥

প্রত্যাসারঃ (পুং) ব্যূহস্য পশ্চাদ্ভাগঃ। ব্যূহস্য পশ্চাদ্ব্যূহান্তরং। তৎপর্য্যায়ঃ। ব্যূহপার্ষ্ণিঃ ২। ইত্যমরভরতৌ ॥

প্রত্যাহরণং (ক্লী) প্রত্যাহারঃ। ইতি শব্দরত্নাবলী ॥

প্রত্যাহারঃ (পুং) স্বস্ববিষয়েভ্য ইন্দ্রিয়াকর্ষণং। তৎপর্য্যায়ঃ। উপাদানং ২। ইত্যমরঃ ॥ প্রত্যাহরণং ৩। ইতি শব্দরত্নাবলী ॥ স চ যোগাঙ্গবিশেষঃ। যথা। প্রত্যাহারশ্চ তর্কশ্চ প্রাণায়ামস্তৃতীয়কঃ। সমাধির্ধারণং ধ্যানং ষড়ঙ্গো যোগসংগ্রহঃ ॥ ইতি তট্টীকায়াং ভরতঃ ॥ প্রত্যাহারমাহ। শব্দাদিষ্বনুরক্তানি নিগৃহ্যাক্ষাণি যোগবিৎ। কুর্য্যাচ্চিত্তানুকারীণি প্রত্যাহারপরায়ণঃ ॥ ইতি বিষ্ণুপুরাণে ৬ অংশে ৭ অধ্যায়ঃ ॥ অপি চ। ইন্দ্রিয়াণীন্দ্রিয়ার্থেভ্যঃ সমাহৃত্য স্থিতো হি সঃ। মনসা সহ বুদ্ধ্যা চ প্রত্যাহারেষু সংস্থিতঃ ॥ ইতি গারুড়ে ২৪০ অধ্যায়ঃ ॥ অল্পেন বহূনাং গ্রহণং। যথা। অচ্ ইতি দ্ব্যক্ষরেণ সর্ব্বস্বরাণাং গ্রহণং। ইতি ভরতঃ ॥

প্রত্যুক্তিঃ (স্ত্রী) প্রত্যুত্তরং। ইতি শব্দরত্নাবলী ॥

প্রত্যুত ব্য বৈপরীত্যং। যথা। বুধাদিবাক্যং তু ন নিয়ামকং প্রমাণাভাবাৎ প্রত্যুত ফলশ্রুতের্গুণফলবোধকমিতি। ইতি তিথ্যাদিতত্ত্বে জন্মাষ্টমীপ্রকরণং ॥

প্রত্যুৎক্রমঃ (পুং) প্রধানপ্রয়োজনানুকূলপ্রয়োজনানুষ্ঠানং। তৎপর্য্যায়ঃ। প্রয়োগার্থঃ ২। ইত্যমরঃ ॥ প্রকৃষ্টযোগঃ। ইতি কেচিৎ। প্রকৃষ্টযুদ্ধার্থমুপক্রমঃ প্রয়োগঃ ...চ্যঃ। ইতি কেচিৎ। প্রয়োগো যুদ্ধং তদভিধেয় ইতি কেচিৎ। প্রত্যুৎক্রমো যুদ্ধার্থ ইতি ভাগুরিঃ। যুদ্ধার্থং প্রথমাক্রান্তিঃ। ইত্যপরে। কর্ম্মারম্ভে প্রথমযুক্তিঃ প্রয়োগঃ। ইত্যপরে ॥ ইতি ভরতঃ ॥

প্রত্যুৎক্রান্তিঃ (স্ত্রী) প্রত্যুৎক্রমঃ। ইত্যমরটীকায়াং ক্ষীরস্বামী ॥

প্রত্যুত্তরং (ক্লী) উত্তরং প্রতি উত্তরং। যথা। মমেয়ং ভূমিঃ ক্রমাগতত্বাৎ ইতি বাদ্যুক্তে মমেয়ং ভূমির্দশবর্ষোপভুজ্যমানত্বাৎ ইতি প্রত্যুত্তরং। ইতি ব্যবহারতত্ত্বং ॥

প্রত্যুত্থানং (ক্লী) অভ্যুত্থানং। গাত্রোত্থানং। যথা। দীব্যন্তমক্ষৈস্তত্রাপি প্রিয়য়া চোদ্ধবেন চ। পূজিতঃ পরয়া ভক্ত্যা প্রত্যুত্থানাসনাদিভিঃ॥ ইতি শ্রীভাগবতে ১০ স্কন্ধে ৬৯ অধ্যায়ঃ॥

প্রত্যুৎপন্নঃ (ত্রি) উৎপত্তিবিশিষ্টঃ। প্রত্যুৎপূর্ব্বপদধাতোঃ কর্ত্তরি ক্তপ্রত্যয়েন নিষ্পন্নঃ॥

প্রত্যুৎপন্নমতিঃ (ত্রি) সূক্ষ্মবুদ্ধিযুক্তঃ। তৎপর্য্যায়ঃ। কুশাগ্রীয়মতিঃ ২ সূক্ষ্মদর্শী ৩ তৎকালধীঃ ৪। ইতি হেমচন্দ্রঃ॥ প্রতিভান্বিতঃ। ইতি জটাধরঃ॥

প্রত্যুদ্গমনীয়ং (ক্লী) ধৌতাংশুকদ্বয়ং। ইতি মেদিনী॥ সমুপস্থানযোগ্যে পূজনীয়ে চ ত্রি। ইতি শব্দরত্নাবলী॥

প্রত্যুদ্গমঃ (পুং)
প্রত্যুদ্গমনং (ক্লী) } প্রত্যুত্থানং। যথা। একত্রাসনসংস্থিতিঃ পরিকৃতা প্রত্যুদ্গমাদ্দূরতঃ। ইত্যাদি সাহিত্যদর্পণে রসপরিচ্ছেদঃ॥

প্রত্যুষঃ (পুং) প্রত্যূষঃ। প্রাতঃ। ইত্যমরটীকায়াং মথুরেশঃ॥

প্রত্যুষঃ [স্] (ক্লী) প্রত্যুষঃ। ইত্যমরঃ॥ যথা। যাতি ব্যক্তিং পুরস্তাদরুণকিসলয়ে প্রত্যুষঃ পারিজাতঃ। ইতি ভরতধৃতসূর্য্যশতকং॥

প্রত্যূষঃ (পুং) প্রভাতং। ইত্যমরঃ॥ সূর্য্যঃ। ইতি শব্দরত্নাবলী॥ বসুভেদঃ। ইতি জটাধরঃ॥

প্রত্যূষঃ [স্] (ক্লী) প্রভাতং। ইত্যমরটীকায়াং ভরতঃ॥

প্রত্যূহঃ (পুং) বিঘ্নঃ। ইত্যমরঃ॥

প্রত্যেকং (ক্লী) একং একং প্রতি। যথা। প্রত্যেকং বা দ্বয়ং বা ত্রয়মপি চ পরং বীজমত্যন্তগুহ্যং। ইত্যাদি কর্পূরাখ্যস্তোত্রং॥

প্রথ ক প্রক্ষেপে। খ্যাতৌ। ইতি কবিকল্পদ্রুমঃ॥ রেফযুক্তঃ। ক প্রাথয়তি। ইতি দুর্গাদাসঃ॥

প্রথ ম ষ ঙ খ্যাতৌ। ইতি কবিকল্পদ্রুমঃ॥ রেফযুক্তঃ। ম প্রথয়তি। ষ প্রথা। ঙ প্রথতে গুণী প্রসিদ্ধঃ স্যাদিত্যর্থঃ। ইতি দুর্গাদাসঃ॥

প্রথমঃ (ত্রি) প্রধানং। তৎপর্য্যায়ঃ। আদিঃ ২ পূর্ব্বঃ ৩ পৌরস্ত্যঃ ৪ আদ্যঃ ৫। ইত্যমরঃ॥ অগ্রিমঃ ৬ আদিমঃ ৭। ইতি জটাধরঃ॥ প্রাক্ ৮। ইত্যব্যয়বর্গে অমরঃ॥

প্রথা (স্ত্রী) খ্যাতিঃ। ইত্যমরঃ॥

প্রথিতঃ (ত্রি) খ্যাতঃ। ইত্যমরঃ॥

প্রথিতিঃ (স্ত্রী) খ্যাতিঃ। প্রথধাতোর্ভাবে ক্তিপ্রত্যয়েন নিষ্পন্না। ইতি ব্যাকরণং॥

প্রথিমা [ন্] (ত্রি) অতিশয়েন পৃথুঃ। পৃথুশব্দাদতিশয়ার্থে ইমন্প্রত্যয়েন নিষ্পন্নঃ। ইতি ব্যাকরণং॥ যথা। প্রথিমানন্দধানেন ঘনেন জঘনেন সা। ইতি ভট্টিঃ॥

প্রথিমা (স্ত্রী) পৃথোর্ভাবঃ। পৃথুত্বং। ইতি সিদ্ধান্তকৌমুদী॥

প্রথিমী [ন্] (ত্রি) প্রথিমাযুক্তঃ। স্থূলঃ। ইতি সিদ্ধান্তকৌমুদী॥

প্রথিষ্ঠঃ (ত্রি) অতিশয়েন পৃথুঃ। অতিবৃহৎ ইতি মুগ্ধবোধব্যাকরণং ॥

প্রথুকঃ (পুং) পৃথুকঃ। ইত্যমরটীকায়াং রায়-মুকুটঃ ॥

প্রদঃ (ত্রি) প্রকর্ষেণ দদাতি যঃ। প্রদাতা। ইতি সিদ্ধান্তকৌমুদী ॥

প্রদত্তং (ত্রি) প্রকর্ষেণ দত্তং। ইতি মুগ্ধ-বোধব্যাকরণং ॥

প্রদরঃ (পুং) ভঙ্গঃ। বাণঃ। ইত্যমরঃ ॥ বিদারঃ। নারীরুগ্‌ভেদঃ। ইতি মেদিনী॥*॥ অস্য নামান্তরং অসৃগ্দরং। তত্তু ফলিত-যোন্যা রক্তাদিধাতুক্ষরণং অস্য নিদানং। যথা। বিরুদ্ধমদ্যাধ্যশনাদজীর্ণাদ্গর্ভপ্রপা-তাদতিমৈথুনাচ্চ। যানাধ্বশোকাদতিকর্ষ-ণাচ্চ ভারাভিঘাতাচ্ছয়নাদ্দিবা চ ॥ অসৃগ্-দরং ভবেৎ সর্ব্বং সাঙ্গমর্দ্দং সবেদনং ॥ তস্যাতিবৃদ্ধৌ দৌর্ব্বল্যং শ্রমো মূর্চ্ছা মদ-স্তৃষা। দাহঃ প্রলাপঃ পাণ্ডুত্বং তন্দ্রা রোগাশ্চ বাতজাঃ ॥ * ॥ স চ চতুর্ব্বিধো যথা। তং শ্লেষ্মপিত্তানিলসন্নিপাতৈশ্চতুঃ-প্রকারং প্রদরং বদন্তি। *। শ্লৈষ্মিকস্য তস্য লক্ষণং। আমং সপিচ্ছাপ্রতিমং স-পাণ্ডুপুলাকতোয়প্রতিমং কফাত্তু॥ * ॥ পৈত্তিকস্য তস্য লক্ষণং। সপীতনীলা-সিতরক্তমুষ্ণং পিত্তার্ত্তিযুক্তং ভৃশবেগি পিত্তাৎ ॥ * ॥ বাতিকস্য তস্য লক্ষণং। রুক্ষারুণং ফেনিলমল্পমল্পং বাতার্ত্তিবাতাৎ পিশিতোদকাভং ॥ * ॥ তস্য ত্রৈদোষি-কস্য লক্ষণং। সক্ষৌদ্রসর্পির্হরিতালবর্ণং মজ্জপ্রকাশং কুণপং ত্রিদোষাৎ। তচ্চা-প্যসাধ্যং প্রবদন্তি তজ্জ্ঞা ন তত্র কুর্ব্বীত ভিষক্ চিকিৎসাং ॥ ইতি মাধবকরঃ॥*॥ অস্যৌষধং যথা। ঘৃততুল্যা রুদ্রলাক্ষা পীতা ক্ষীরেণ বৈ সহা। প্রদরং হরতে রোগং নাত্র কার্য্যা বিচারণা ॥ ইতি গারুড়ে ১৯৬ অধ্যায়ঃ ॥ * ॥ অপি চ। দধ্না সৌবর্চ্চলাজাজীমধুকং নীলমুৎপলং। পিবেৎ ক্ষৌদ্রযুতং নারী বাতাসৃগ্দর-শান্তয়ে ॥ এষাং প্রত্যেকং মাষদ্বয়ং। সর্ব্বমেকীকৃত্য দধ্না কর্ষচতুষ্টয়েন পিষ্ট্বা তত্র মাষাষ্টকং মধু নিঃক্ষিপ্য পেয়ং ॥ *॥ মধুকং কর্ষমেকন্তু চতুষ্কর্ষাং সিতান্তথা। তণ্ডুলোদকসংপিষ্টাং লোহিতে প্রদরে পিবেৎ ॥ বলা কঙ্কতিলাখ্যা যা তস্যা মূলন্তু চূর্ণিতং। লোহিতে প্রদরে খাদে-চ্ছর্করামধুসংযুতং ॥*॥ শুচিস্থানে ব্যাঘ্র-নখ্যা মূলমুত্তরদিগ্‌ভবং। নীতমুত্তর-ফল্গুন্যাং কটিবদ্ধং হরেদসৃক্ ॥ * ॥ রসা-ঞ্জনং তণ্ডুলকস্য মূলং ক্ষৌদ্রান্বিতং তণ্ডুল-তোয়পীতং। অসৃগ্দরং সর্ব্বভবং নিহন্তি যাসঞ্চ ভার্গী সহ নাগরেণ ॥*॥ অশোক-বল্কলক্কাথশৃতং দুগ্ধং সুশীতলং। যথা-বলং পিবেৎ প্রাতস্তীব্রাসৃগ্দরনাশনং ॥ অশোকবল্কলপলং দ্বাত্রিংশৎপলসংমি-তেন জলেন নিষ্ক্বাথ্য শেষেণ পলাষ্টক-ক্কাথেন সহ ক্ষীরং পলাষ্টকমিতং বি-পচেৎ তত্তু দুগ্ধাবশেষং কর্ত্তব্যং তন্মধ্যে পলচতুষ্টয়মিতং দুগ্ধং পেয়ং বহ্নিবলা-পেক্ষয়া বা ॥ *॥ কুশমূলং সমুদ্ধৃত্য পেষ-য়েত্তণ্ডুলাম্বুনা। এতৎ পীত্বা ত্র্যহং নারী

প্রদরাৎ পরিমুচ্যতে ॥ ইতি ভাবপ্রকাশঃ ॥

প্রদর্শিতঃ (ত্রি) আলোকিতঃ। যথা। ক্রিয়াবাচিত্বমাখ্যাতুং প্রসিদ্ধোঽর্থঃ প্রদর্শিতঃ। প্রয়োগতোঽন্যে মন্তব্যা অনেকার্থা হি ধাতবঃ ॥ ইতি মুগ্ধবোধটীকায়াং দুর্গাদাসঃ ॥

প্রদলঃ (পুং) বাণঃ। ইতি জটাধরঃ ॥

প্রদক্ষিণং (ক্লী) } দক্ষিণাবর্ত্তেন দেবমুদ্দিশ্য প্রদক্ষিণঃ (পুং) } ভ্রমণং। যথা। একং দেব্যাং রবৌ সপ্ত ত্রীণি কুর্য্যাদ্বিনায়কে। চত্বারি কেশবে কুর্য্যাৎ শিবে চার্দ্ধপ্রদক্ষিণং ॥ ইতি কর্ম্মলোচনং ॥ * ॥ সর্ব্বদেবতুষ্টিদপ্রদক্ষিণং যথা। প্রসার্য্য দক্ষিণং হস্তং স্বয়ং নম্রশিরাঃ পুনঃ। দক্ষিণং দর্শয়ন্ পার্শ্বং মনসাপি চ দক্ষিণঃ ॥ সকৃত্ত্রির্ব্বা বেষ্টয়েত্বা দেব্যাঃ প্রীতিঃ প্রজায়তে। স চ প্রদক্ষিণো জ্ঞেয়ঃ সর্ব্বদেবৌঘতুষ্টিদঃ ॥ অষ্টোত্তরশতং যস্তু দেব্যাঃ কুর্য্যাৎ প্রদক্ষিণং। সর্ব্বান্ কামান্ সমাসাদ্য পশ্চান্মোক্ষমবাপ্নুয়াৎ ॥ মনসাপি চ যো দদ্যাদ্দেব্যৈ ভক্ত্যা প্রদক্ষিণং। প্রদক্ষিণাদ্‌যমগৃহে নরকাণি ন পশ্যতি ॥ ইতি কালিকাপুরাণে ৭০ অধ্যায়ঃ ॥ * ॥ অপি চ। দক্ষিণাদ্বায়বীং গত্বা দিশং তস্মাশ্চ শাম্ভবীং। ততশ্চ দক্ষিণাং গত্বা নমস্কারস্ত্রিকোণবৎ ॥ অর্দ্ধচন্দ্রং মহেশস্য পৃষ্ঠতশ্চ সমীরিতং। শিবপ্রদক্ষিণে মন্ত্রী অর্দ্ধচন্দ্রক্রমেণ তু। সব্যাসব্যক্রমেণৈব সোমসূত্রং ন লঙ্ঘয়েৎ ॥ সোমসূত্রং জলনিঃসরণস্থানং। প্রসার্য্য দক্ষিণং হস্তং স্বয়ং নম্রশিরাঃ পুনঃ। দর্শয়েদ্দক্ষিণং পার্শ্বং মনসাপি চ দক্ষিণঃ ॥ ত্রিধা চ বেষ্টয়েৎ সম্যক্ দেবতায়াঃ প্রদক্ষিণং ॥ একহস্তপ্রণামশ্চ একং বাপি প্রদক্ষিণং। অকালে দর্শনং বিষ্ণোর্হন্তি পুণ্যং পুরাকৃতং ॥ ইতি তন্ত্রসারঃ ॥

প্রদক্ষিণা (স্ত্রী) প্রদক্ষিণং। যথা। অথ প্রদক্ষিণা। ততঃ প্রদক্ষিণাং কুর্য্যাদ্ভক্ত্যা ভগবতো হরেঃ। নামানি কীর্ত্তয়ন্ শক্তৌ তাঞ্চ সাষ্টাঙ্গবন্দনাং ॥*॥ প্রদক্ষিণাসঙ্খ্যা চোক্তা নারসিংহে। একাং চণ্ড্যাং রবেঃ সপ্ত তিস্রো দদ্যাদ্বিনায়কে। চতস্রঃ কেশবে দদ্যাৎ শিবে ত্বর্দ্ধপ্রদক্ষিণাং ॥*॥ প্রদক্ষিণামাহাত্ম্যং বারাহে। প্রদক্ষিণাং যে কুর্ব্বন্তি ভক্তিযুক্তেন চেতসা। ন তে যমপুরং যান্তি যান্তি পুণ্যকৃতাং গতিং ॥ যস্ত্রিঃ প্রদক্ষিণং কুর্য্যাৎ সাষ্টাঙ্গকপ্রণামকং। দশাশ্বমেধস্য ফলং প্রাপ্নুয়ান্নাত্র সংশয়ঃ ॥ স্কান্দে ব্রহ্মনারদসংবাদে। বিষ্ণোর্ব্বিমানং যঃ কুর্য্যাৎ সকৃদ্ভক্ত্যা প্রদক্ষিণং। অশ্বমেধসহস্রস্য ফলমাপ্নোতি মানবঃ ॥ তত্রৈব চাতুর্ম্মাস্যমাহাত্ম্যে। চতুর্ব্বারং ভ্রমীভিস্তু জগৎ সর্ব্বং চরাচরং। ক্রান্তং ভবতি বিপ্রাগ্র্য তত্তীর্থগমনাধিকং ॥ তত্রৈবান্যত্র। প্রদক্ষিণং তু যঃ কুর্য্যাদ্ধরিং ভক্ত্যা সমন্বিতঃ। হংসযুক্তবিমানেন বিষ্ণুলোকং স গচ্ছতি॥ নারসিংহে। প্রদক্ষিণেন চৈকেন দেবদেবস্য মন্দিরে। কৃতেন যৎ ফলং নৃণাং

তচ্ছৃণুষ্ব নৃপাত্মজ। পৃথ্বীপ্রদক্ষিণফলং যত্তৎ প্রাপ্য হরিং ব্রজেৎ ॥ অন্যত্র চ। এবং কৃত্বা তু কৃষ্ণস্য যঃ কুর্য্যাদ্দ্বিপ্রদক্ষিণং। সপ্তদ্বীপবতীপুণ্যং লভতে তু পদে পদে ॥ পঠন্নামসহস্রস্ত নামান্যেবাথ কেবলং। ভক্তিস্বধোদয়ে। বিষ্ণুং প্রদক্ষিণীকুর্ব্বন্ যস্তত্রাবর্ত্ততে পুনঃ। তদেবাবর্ত্তনং তস্য পুনর্নাবর্ত্ততে ভবে ॥ বৃহন্নারদীয়ে যম-ভগীরথসংবাদে। প্রদক্ষিণত্রয়ং কুর্য্যাৎ যো বিষ্ণোর্ম্মনুজেশ্বর। সর্ব্বপাপবিনির্ম্মুক্তো দেবেন্দ্রত্বং সমশ্নুতে ॥ তত্রৈব প্রদক্ষিণ মাহাত্ম্যে স্বধর্ম্মোপাখ্যানারম্ভে। ভক্ত্যা কুর্ব্বন্তি যে বিষ্ণোঃ প্রদক্ষিণচতুষ্টয়ং। তেঽপি যান্তি পরং স্থানং সর্ব্বলোকোত্তমোত্তমমিতি ॥ তৎ খ্যাতং যৎ স্বধর্ম্মস্য পূর্ব্বস্মিন্ গৃধ্রজন্মনি। কৃষ্ণপ্রদক্ষিণাভাবান্মহাসিদ্ধিরভূদিতি ॥ * ॥ অথ প্রদক্ষিণায়াং নিষিদ্ধং বিষ্ণুস্মৃতৌ। একহস্তপ্রণামশ্চ একা চৈব প্রদক্ষিণা। অকালে দর্শনং বিষ্ণোর্হন্তি পুণ্যং পুরাকৃতং ॥ অকালে ভোজনাদিসময়ে। কিঞ্চ। কৃষ্ণস্য পুরতো নৈব সূর্য্যস্যৈব প্রদক্ষিণাং। কুর্য্যাদ্ভ্রমরিকারূপাং বৈমুখ্যাপাদনীং প্রভো ॥ তথা চোক্তং। প্রদক্ষিণং ন কর্ত্তব্যং বিমুখত্বাচ্চ কারণাৎ। ইতি শ্রীহরিভক্তিবিলাসে ৮ বিলাসঃ ॥

প্রদানং (ক্লী) দানং। ইতি শব্দরত্নাবলী ॥ প্রকৃষ্টদানঞ্চ ॥

প্রদিগ্ধং (ক্লী) মাংসব্যঞ্জনভেদঃ। যথা। মাংসং বহুঘৃতৈর্ভৃষ্টং সিক্ত্বা চোষ্ণাম্বুনা মুহুঃ। জীরকাদ্যৈঃ সমাযুক্তং পরিশুষ্কং তদুচ্যতে ॥ তদেব ঘৃততক্রাঢ্যং প্রদিগ্ধং সত্রিজাতকং। ইতি শব্দচন্দ্রিকা ॥ প্রলিপ্তে ত্রি ॥

প্রদিক্ (স্ত্রী) বিদিক্। ইতি জটাধরঃ ॥

প্রদীপঃ (পুং) দীপঃ। ইত্যমরঃ ॥ তৎপর্য্যায়ঃ। স্নেহাদীপকঃ ২ কজ্জলধ্বজঃ ৩ শিখাতরুঃ ৪ গৃহমণিঃ ৫ জ্যোৎস্নাবৃক্ষঃ ৬ দশেন্ধনঃ ৭ দোষাতিলকঃ ৮ দোষাস্যঃ ৯ নয়নোৎসবঃ ১০। ইতি শব্দরত্নাবলী ॥ দীপমাহাত্ম্যং যথা। দীপেন লোকান্ জয়তি দীপস্তেজোময়ঃ স্মৃতঃ। চতুর্ব্বর্গপ্রদো দীপস্তস্মাদ্দীপং যজেৎ শ্রিয়ে ॥ * ॥ সপ্তপ্রকারা দীপা যথা। ঘৃতপ্রদীপঃ প্রথমস্তিলতৈলোদ্ভবস্ততঃ। সার্ষপঃ ফলনির্য্যাসজাতো বা রাজিকোদ্ভবঃ। দধিজশ্চান্নজশ্চৈব প্রদীপাঃ সপ্ত কীর্ত্তিতাঃ ॥ * ॥ তস্য পঞ্চপ্রকারা বর্ত্তিকা যথা। পদ্মসূত্রভবা দর্ভগর্ভসূত্রভবাথবা। সালজা বাদরী বাপি ফলকোষোদ্ভবাথবা। বর্ত্তিকা দীপকৃত্যেষু সদা পঞ্চবিধাঃ স্মৃতাঃ ॥ * ॥ দীপপাত্রাণি যথা। তৈজসং দারবং লৌহং মার্ত্তিক্যং নারিকেলজং। তৃণধ্বজোদ্ভবং বাপি দীপপাত্রং প্রশস্যতে ॥ * ॥ দীপবৃক্ষে দীপস্থাপনং ভূমৌ তন্নিষেধো যথা। দীপবৃক্ষাশ্চ কর্ত্তব্যাস্তৈজসাদ্যৈশ্চ ভৈরব। বৃক্ষে চ দীপো দাতব্যো ন তু ভূমৌ কদাচন ॥ সর্ব্বংসহা বসুমতী সহতে ন ত্বিদং দ্বয়ং। অকার্য্যপাদঘাতঞ্চ দীপতাপস্তথৈব চ ॥ তস্মাদ্যথা তু পৃথিবী তাপং নাপ্নোতি বৈ তথা। দীপং দদ্যান্মহাদেব্যৈ

অন্যেভ্যোঽপি চ ভৈরব ॥ কুর্ব্বন্তং পৃথিবীতাপং যো দীপমুৎসৃজেন্নরঃ। স তাম্রতাপং নরকমাপ্নোত্যেব শতং সমাঃ ॥ * ॥ সুবৃত্তবর্ত্তিঃ সস্নেহঃ পাত্রেঽভগ্নে সুদর্শনে। সূচ্ছায়ে বৃক্ষকোটৌ তু দীপং দদ্যাৎ প্রযত্নতঃ ॥ লভ্যতে যস্য তাপস্তু দীপস্য চতুরঙ্গুলাৎ। ন স দীপ ইতি খ্যাতো হোঘবহ্নিস্তু স শ্রুতঃ ॥ নেত্রাহ্লাদকরঃ সর্ব্বভূমিতাপবিবর্জ্জিতঃ। সুশিখঃ শব্দরহিতো নির্ধূমো নাতিহ্রস্বকঃ ॥ দক্ষিণাবর্ত্তবর্ত্তিস্তু প্রদীপঃ শ্রীবিবৃদ্ধয়ে। দীপবৃক্ষস্থিতে শুদ্ধস্নেহেনৈব প্রপূরিতে॥ দক্ষিণাবর্ত্তবর্ত্ত্যা তু চারুদীপঃ প্রদীপকঃ। উত্তমঃ প্রোচ্যতে পুত্র সর্ব্বতুষ্টিপ্রদায়কঃ॥ বৃক্ষেণ বর্জ্জিতো দীপো মধ্যমঃ পরিকীর্ত্তিতঃ। বিহীনঃ পাত্রতৈলাভ্যামধমঃ পরিকীর্ত্তিতঃ॥ ইতি কালিকাপুরাণে ৬৮ অধ্যায়ঃ ॥ * ॥ কার্ত্তিকে তদ্দানফলং যথা। কার্ত্তিকে মাসি যো দদ্যাৎ প্রদীপং সর্পিরাদিনা। আকাশে মণ্ডলে বাপি স চাক্ষয়ফলং লভেৎ ॥ ইতি কর্ম্মলোচনং ॥ * ॥ অপি চ। সমভ্যর্চ্চ্য হরিং ভক্ত্যা দীপং দত্ত্বা দিবানিশং। তত্র পাপবিশুদ্ধাত্মা নরো যাতি দিবং নৃপ ॥ কৃষ্ণপক্ষে বিশেষেণ তত্র পঞ্চ দিনানি তু। পুণ্যানি তেষু যদ্দত্তমক্ষয়ং সর্ব্বকামিকং ॥ একাদশ্যাং হরিমুদ্দিশ্য দীপং প্রজ্বাল্য মূষিকা। মানুষ্যং দুর্লভং প্রাপ্য পরাং গতিমবাপ সা ॥ দ্বাদশ্যাং তস্করো রাত্রিদীপমুদ্‌বোধ্য চৌর্য্যতঃ। কারণাৎ পরমং প্রাপ্তো লোকং বিষ্ণোঃ সনাতনং ॥ শ্বপচোঽপি ত্রয়োদশ্যাং দীপান্ দত্ত্বাপরৈঃ কৃতান্। বেশ্যা লীলাবতী ভূত্বা জগাম স্বর্গমক্ষয়ং ॥ লুব্ধকোঽপি চতুর্দ্দশ্যাং পূজয়িত্বা জনার্দ্দনং। নির্ভক্তিঃ পরসংগত্যা বিষ্ণুলোকং জগাম সঃ ॥ গোপঃ কশ্চিদমাবাস্যাং পূজাং দৃষ্ট্বাথ শার্ঙ্গিণঃ। সুদুর্জ্জয়স্তু জাপালো রাজরাজেশ্বরোঽভবৎ ॥ তস্মাদ্দীপাঃ প্রদাতব্যা রাত্রাবস্তমিতে রবৌ। গৃহেষু সর্ব্বগোষ্ঠেষু চৈত্যেষ্বায়তনেষু চ ॥ দেবানাঞ্চৈব রথ্যাসু শ্মশানেষু সরঃসু চ। ইত্যগ্নিপুরাণং ॥

প্রদীপনঃ (পুং) স্থাবরবিষভেদঃ। ইত্যমরঃ ॥ তস্য লক্ষণং যথা। বর্ণতো লোহিতো যঃ স্যাৎ দীপ্তিমান্ দহনপ্রভঃ। মহাদাহকরঃ পূর্ব্বৈঃ কথিতঃ স প্রদীপনঃ ॥ ইতি রাজনির্ঘণ্টঃ ॥ প্রকাশকে ত্রি ॥

প্রদেশঃ (পুং) দেশমাত্রং। তৎপর্য্যায়ঃ। আস্থানং ২ আস্থা ৩ ভূঃ ৪ অবকাশঃ ৫ স্থিতিঃ ৬ পদং ৭। ইতি রাজনির্ঘণ্টঃ ॥ তর্জ্জন্যঙ্গুষ্ঠসম্মিতঃ। ভিত্তিঃ। ইতি মেদিনী ॥

প্রদেশনং (ক্লী) নৃপাদেরুপঢৌকনং। ভেটী ইতি খ্যাতং। তৎপর্য্যায়ঃ। প্রাভৃতং ২ উপায়নং ৩ উপগ্রাহ্যং ৪ উপহারঃ ৫ উপদা ৬। ইত্যমরঃ॥ কেচিত্তু দেবতাভ্যো ভক্ত্যা মিত্রাদিভ্যশ্চ প্রীত্যা যৎ প্রশস্তং লড্ডুকাদি দীয়তে তৎ ইত্যাহুঃ। কেচিচ্চ প্রাভৃতাদি দ্বয়ং শ্রদ্ধয়া দেবতাব্রাহ্মণরাজাদিভ্যো যদ্দীয়তে তত্র। উপায়নাদি চতুষ্কং তুভ্যমিদং দীয়তে ত্বয়ৈতৎ

মম কার্য্যং সাধনীয়মিতি যদ্দীয়তে ধৃতী ইতি খ্যাতে ইত্যাহুঃ। কিন্তু ষট্‌কমেকার্থমেবেতি বহবঃ। উপায়নমুপগ্রাহ্যং প্রাভৃতঞ্চোপদা স্ত্রিয়ামিত্যমরমালা। ইতি ভরতঃ॥

প্রদেশনী, প্রদেশিনী (স্ত্রী) তর্জ্জনী। ইত্যমরভরতৌ॥

প্রদেহঃ (পুং) প্রলেপঃ। ইতি বৈদ্যকং॥

প্রদোষঃ (পুং) রজনীমুখং। ইত্যমরঃ॥ তত্তু রাত্রেঃ প্রথমদণ্ডচতুষ্টয়ং। যথা। প্রদোষোঽস্তময়াদূর্দ্ধং ঘটিকাদ্বয়মিষ্যতে। ইতি তিথ্যাদিতত্ত্বং॥ দোষঃ। ইতি হেমচন্দ্রঃ॥

প্রদ্যু (ক্লী) প্রকৃষ্টা দ্যৌঃ স্বর্গো যস্মাৎ তৎ পুণ্যং। ইতি মুগ্ধবোধটীকায়াং দুর্গাদাসঃ॥

প্রদ্যুম্নঃ (পুং) কন্দর্পঃ। ইত্যমরঃ॥ স বাসুদেবস্য চতুর্থাংশঃ। যথা। একদেবং চতুষ্পাদং চতুর্দ্ধা পুনরচ্যুতঃ। বিভেদ বাসুদেবোঽসৌ প্রদ্যুম্নো হরিরব্যয়ঃ॥ কৃষ্ণদ্বৈপায়নো ব্যাসো বিষ্ণুর্নারায়ণঃ স্বয়ং। অপাং তরতমাঃ পূর্ব্বং স্বেচ্ছয়া হ্যভবদ্ধরিঃ॥ ইতি কৌর্ম্মে ৪৮ অধ্যায়ঃ॥ অপি চ। অনিরুদ্ধঃ স্বয়ং ব্রহ্মা প্রদ্যুম্নঃ কাম এব চ। বলদেবঃ স্বয়ং শেষঃ কৃষ্ণশ্চ প্রকৃতেঃ পরঃ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ১১৬ অধ্যায়ঃ॥

প্রদ্যোতঃ (পুং) রশ্মিঃ। ইতি হলায়ুধঃ॥

প্রদ্যোতনঃ (পুং) সূর্য্যঃ। ইতি হলায়ুধঃ॥ দ্যুতৌ ক্লী॥

প্রদ্রবঃ (পুং) পলায়নং। ইত্যমরঃ॥

প্রধনং (ক্লী) যুদ্ধং। ইত্যমরঃ॥ দারণং। ইতি মেদিনী॥

প্রধানং (ক্লী) প্রকৃতিঃ। মহামাত্রঃ। পরমাত্মা। বুদ্ধিঃ। প্রশস্তং। তৎপর্য্যায়ঃ। প্রমুখং ২ প্রবেকং ৩ অনুত্তমং ৪ উত্তমং ৫ মুখ্যং ৬ বর্য্যং ৭ বরেণ্যং ৮ প্রবর্হং ৯ অনবরার্দ্ধ্যং ১০ পরার্দ্ধ্যং ১১ অগ্রং ১২ প্রাগ্রহরং ১৩ প্রাগ্র্যং ১৪ অগ্র্যং ১৫ অগ্রীয়ং ১৬ অগ্রিমং ১৭। ইত্যমরঃ॥

প্রধানঃ (পুং) মহামাত্রঃ। সেনাপত্যাদিঃ। মহামাত্রঃ প্রধানঃ স্যাদিতি পুংস্কাণ্ডে বোপালিতঃ। ইত্যমরটীকায়াং ভরতঃ॥

প্রধিঃ (পুং) নেমিঃ। ইত্যমরঃ॥

প্রধীঃ (ত্রি) প্রকৃষ্টবুদ্ধিযুক্তঃ। প্রকৃষ্টবুদ্ধৌ স্ত্রী। ইতি মুগ্ধবোধব্যাকরণং॥

প্রধূপিতা (স্ত্রী) ক্লেশিতা। সূর্য্যগন্তব্যদিক্। ইতি মেদিনী॥ প্রকর্ষেণ তপ্তে দীপ্তে চ ত্রি॥

প্রনষ্টঃ (ত্রি) প্রকর্ষেণ নাশযুক্তঃ। কশ্চিদজ্ঞানসম্ভূতঃ প্রনষ্টস্তে ধনঞ্জয়। ইতি শ্রীভগবদ্গীতায়াং ১৮ অধ্যায়ঃ॥

প্রনিঘাতনং (ক্লী) প্রণিঘাতনং। বধঃ। ইতি হেমচন্দ্রঃ॥

প্রপঞ্চঃ (পুং) বিপর্য্যাসঃ। বিস্তরঃ। ইত্যমরঃ॥ বিপর্য্যাসো বৈপরীত্যং ভ্রমো বা মায়েতি স্বামী। ইতি ভরতঃ॥ সঞ্চয়ঃ। প্রতারণং। ইতি মেদিনী॥ সংসারঃ। যথা। পাদুকাপঞ্চকস্তোত্রং পঞ্চবক্ত্রাদ্বিনির্গতং। ষড়াম্নায়ফলোপেতং প্রপঞ্চে চাতিদুর্লভং॥ ইতি গুরুপাদুকাস্তোত্রং॥

প্রপঞ্চিতং (ত্রি) বিস্তৃতং। ভ্রমযুক্তং। যথা। আত্মানমেবাত্মতয়া বিজানতাং তেনৈব জাতং নিখিলং প্রপঞ্চিতং । জ্ঞানেন ভূয়োঽপি চ তৎ প্রলীয়তে রজ্জ্বামহের্ভোগ-ভবাভবৌ যথা ॥ ইতি শ্রীভাগবতে ১০ স্কন্ধে ১৪ অধ্যায়ঃ ॥

প্রপথঃ (ত্রি) শিথিলঃ। ইতি ভূরিপ্রয়োগঃ॥

প্রপথ্যা (স্ত্রী) হরীতকী । ইতি রাজ-নির্ঘণ্টঃ ॥

প্রপদং (ক্লী) পাদাগ্রং। ইত্যমরঃ॥

প্রপন্নঃ (ত্রি) শরণাগতঃ। যথা। গোবিন্দং পুণ্ডরীকাক্ষমনন্তমজমব্যয়ং । কেশবঞ্চ প্রপন্নোঽস্মি কিন্নো মৃত্যুঃ করিষ্যতি॥ ইতি মার্কণ্ডেয়পুরাণে মৃত্যুঞ্জয়ো নাম ৭ অধ্যায়ঃ ॥

প্রপন্নাড়ঃ (পুং) প্রপুন্নাড়ঃ। চক্রমর্দ্দকঃ। ইতি রত্নমালা ॥

প্রপা (স্ত্রী) পানীয়শালিকা। ইত্যমরঃ॥

প্রপাণিঃ (পুং) করস্যাধোদেশঃ। পাণিতলং। ইতি রাজনির্ঘণ্টঃ ॥

প্রপাতঃ (পুং) নিরবলম্বনপর্ব্বতাদিপার্শ্বং। আয়ড়ি ইতি খ্যাতং। যস্মাৎ পতনে অবস্থানক্রিয়াবিশেষো নাস্তি । তৎ-পর্য্যায়ঃ। অতটঃ ২ ভৃগুঃ ৩। ইত্যমরঃ॥ নির্ঝরঃ। ইতি মেদিনী ॥ অভ্যবস্কন্দঃ। কূলং। ইতি হেমচন্দ্রঃ॥

প্রপায়ী [ন্] (ত্রি) পানকর্ত্তা। রক্ষণকর্ত্তা। ইতি মুগ্ধবোধব্যাকরণং॥

প্রপাবনং (ক্লী) বনভেদঃ। কামারণ্যং। ইতি শব্দমালা

প্রপিতামহঃ (পুং) ব্রহ্মা । ইতি ত্রিকাণ্ড-শেষঃ ॥ পিতামহপিতা। ইত্যমরঃ॥

প্রপিতামহী (স্ত্রী) প্রপিতামহপত্নী । যথা। স্বেন ভর্ত্রা সহ শ্রাদ্ধং মাতা ভুঙ্ক্তে স্বধাময়ং। পিতামহী চ স্বেনৈব স্বেনৈব প্রপিতামহী॥ ইতি দায়ভাগঃ॥

প্রপুনাড়ঃ } (পুং) প্রপুন্নাড়ঃ। ইত্যমর-
প্রপুন্নড়ঃ } টীকায়াং ভরতঃ ॥

প্রপুন্নাটঃ (পুং) চক্রমর্দ্দঃ। ইতি রাজ-নির্ঘণ্টঃ॥

প্রপুন্নাড়ঃ (পুং) চক্রমর্দ্দকঃ। চাকুন্দিয়া ইতি ভাষা। ইত্যমরঃ॥

প্রপুন্নালঃ (পুং) প্রপুন্নাড়ঃ। ইতি ভরত-দ্বিরূপকোষঃ॥

প্রপূরিকা (স্ত্রী) কণ্টকারী । ইতি শব্দ-চন্দ্রিকা ॥

প্রপৌণ্ডরীকং (ক্লী হস্তিনাং মনুষ্যাণাঞ্চ চক্ষুষ্যঃ ক্ষুদ্রবিটপঃ। শালপর্ণীপত্রতুল্য-পত্রঃ। পুণ্ডরিয়া খ্যাতঃ। ইত্যমরভরতৌ॥ তৎপর্য্যায়ঃ। চক্ষুষ্যং ২ শীতং ৩ শ্রী-পুষ্পং ৪ পুণ্ডরী ৫। ইতি রত্নমালা॥ পুণ্ডর্য্যং ৬ পুণ্ডরীয়কং ৭ পৌণ্ডরীয়ং ৮ সুপুষ্পং ৯ সানুজং ১০ অনুজং ১১ । অস্য গুণাঃ। চক্ষুর্হিতত্বং। মধুরত্বং। তিক্তত্বং। শীতলত্বং। পিত্তরক্তব্রণজ্বর-দাহতৃষানাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অপি চ। পৌণ্ডর্য্যং মধুরং তিক্তং কষায়ং শুক্রলং হিমং। চক্ষুষ্যং মধুরং পাকে বর্ণ্যং পিত্তকফাস্রনুৎ॥ ইতি ভাব-প্রকাশঃ॥

প্রপৌত্রঃ (পুং) পৌত্রস্য পুত্রঃ। তৎপর্য্যায়ঃ। প্রতিনপ্তা ২। ইতি হেমচন্দ্রঃ॥

প্রপৌত্রী (স্ত্রী) পৌত্রস্য কন্যা। ইতি স্মৃতিঃ॥

প্রফুল্লঃ (ত্রি) বিকাশযুক্তঃ। তৎপর্য্যায়ঃ। উৎফুল্লঃ ২ সংফুল্লঃ ৩ ব্যাকোষঃ ৪ বিকচঃ ৫ স্ফুটঃ ৬ ফুল্লঃ ৭ বিকসিতঃ ৮। ইত্যমরঃ॥ প্রবুদ্ধঃ ৯ জৃম্ভঃ ১০ স্মিতঃ ১১ উন্মিষিতঃ ১২ দলিতঃ ১৩ স্ফুটিতঃ ১৪ উচ্ছ্বসিতঃ ১৫ বিজৃম্ভিতঃ ১৬ স্মেরঃ ১৭ বিনিদ্রঃ ১৮ উন্নিদ্রঃ ১৯ বিমুদ্রঃ ২০ হসিতঃ ২১। ইতি হেমচন্দ্রঃ॥

প্রবন্ধঃ (পুং) সন্দর্ভঃ। ইতি ত্রিকাণ্ডশেষঃ॥ কাব্যাদিগ্রথনং। যথা। প্রবন্ধোঽয়ং বন্ধোরখিলজগতাস্তস্য সরসামিতি হংসদূতঃ॥

প্রবন্ধকল্পনা (স্ত্রী) প্রবন্ধস্য কল্পনা রচনা বহ্বনৃতা স্তোকসত্যা কথা। প্রবন্ধকল্পনাং স্তোকসত্যাং প্রাজ্ঞাঃ কথাং বিদুঃ। পরস্পরাশ্রয়া যা স্যাৎ সা মতাখ্যায়িকা ক্বচিৎ॥ ইতি কোলাহলাচার্য্যঃ। ইত্যমরটীকায়াং ভরতঃ॥

প্রবলঃ (পুং) পল্লবঃ। ইতি শব্দমালা॥ প্রকৃষ্টবলযুক্তে ত্রি। যথা। আক্রান্তঃ স মহাভাগস্তৈস্তদা প্রবলারিভিঃ। ইতি মার্কণ্ডেয়পুরাণং॥ প্রকৃষ্টবলে ক্লীবঞ্চ॥

প্রবলা (স্ত্রী) প্রসারিণী। ইতি রাজনির্ঘণ্টঃ॥ প্রকৃষ্টবলবতী চ॥

প্রবালঃ (পুং ক্লী) রক্তবর্ণবর্তুলাকাররত্নবিশেষঃ। পলা ইতি মুঙ্গা ইতি চ ভাষা। তস্যাধিষ্ঠাত্রী দেবতা মঙ্গলঃ। ইতি জ্যোতিষং॥ তৎপর্য্যায়ঃ। বিদ্রুমঃ ২। ইত্যমরঃ॥ অঙ্গারকমণিঃ ৩ অম্ভোধিবল্লভঃ ৪ ভৌমরত্নং ৫ রক্তাঙ্গঃ ৬ রক্তাকারঃ ৭ লতামণিঃ ৮। অস্য গুণাঃ। মধুরত্বং। অম্লত্বং। কফপিত্তাদিদোষনাশিত্বং। স্ত্রীণাং বীর্য্যকান্তিকরত্বং। ধৃতে মঙ্গলদায়িত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ *॥ অপি চ। সারকত্বং। শীতত্বং। কষায়ত্বং। স্বাদুত্বং। বান্তিকারিত্বং। চক্ষুর্হিতত্বং। ধারণে পাপালক্ষ্মীনাশিত্বঞ্চ। ইতি রাজবল্লভঃ॥ *॥ তস্য শুভলক্ষণং যথা। শুদ্ধং দৃঢ়ং ঘনং বৃত্তং স্নিগ্ধং গাত্রসুরঙ্গকং। সমং গুরু সিরাহীনং প্রবালং ধারয়েৎ শুভং॥ *॥ তস্যাশুভলক্ষণং যথা। গৌরং রঙ্গজলাক্রান্তং বক্রসূক্ষ্মং সকোটরং। রূক্ষকৃষ্ণং লঘু শ্বেতং প্রবালমশুভং ত্যজেৎ॥ ইতি রাজনির্ঘণ্টঃ॥*॥ তস্যোৎপত্ত্যাদি যথা। সূত উবাচ। আদায় শেষস্তস্যান্ত্রং যমস্যাকম্বলাদিষু। চিক্ষেপ তত্র জায়ন্তে বিদ্রুমাঃ সুমহাগুণাঃ॥ তত্র প্রধানং শশলোহিতাভং গুঞ্জাজবাপুষ্পনিভং প্রদিষ্টং। সনীসকং দেবকরোমকঞ্চ স্থানানি তেষু প্রভবং সুরাগং॥ অন্যত্র জাতঞ্চ ন তৎ প্রধানং মূল্যং ভবেচ্ছিল্পিবিশেষযোগাৎ॥ প্রসন্নং কোমলং স্নিগ্ধং সুরাগং বিদ্রুমং হি তৎ। ধনধান্যকরং লোকে বিষার্ত্তিভয়নাশনং॥ পরীক্ষা পুলকস্যোক্তা রুধিরাখ্যস্য বৈ মণেঃ। স্ফটিকস্য বিদ্রুমস্য রত্নজ্ঞানায় শৌনক॥ ইতি গারুড়ে ৮০ অধ্যায়ঃ॥*॥

অথ বিদ্রুমপরীক্ষা। শ্বেতসাগরমধ্যে তু জায়তে বল্লরী তু যা। বিদ্রুমা নাম রত্নাখ্যা দুর্ল্লভা বজ্ররূপিণী॥ পাষাণং প্রভজত্যেষা প্রযত্নাৎ কথিতা সতী। বিদ্রুমং নাম যদ্রত্নমামনন্তি মনীষিণঃ ॥ * ॥ ব্রহ্মাদি-জাতিভেদেন তচ্চতুর্ব্বিধমুচ্যতে। অরুণং শশরক্তাখ্যং কোমলং স্নিগ্ধমেব চ। প্রবালং বিপ্রজাতিঃ স্যাৎ সুখবেধ্যং মনোরমং॥ জবাবন্ধূকসিন্দূরদাড়িমীকুসুম-প্রভং। কঠিনং দুর্ব্বেধ্যমস্নিগ্ধং ক্ষত্র-জাতিং তদুচ্যতে ॥ পলাশকুসুমাভাসং তথা পাটলসন্নিভং। বৈশ্যজাতির্ভবেৎ স্নিগ্ধং বর্ণাঢ্যং মন্দকান্তিভং ॥ রক্তোৎ-পলদলাকারং কঠিনং ন চিরদ্যুতি। বিদ্রুমং শূদ্রজাতিঃ স্যাদ্বায়ুবেধ্যং তথৈব চ ॥ * ॥ রক্ততা স্নিগ্ধতা দার্য্যং চিরদ্যুতি সুবর্ণতা। প্রবালানাং গুণাঃ প্রোক্তা ধন-ধান্যকরাঃ পরাঃ॥ হিমাদ্রৌ যত্তু সংজাতং তদ্রক্তমতিনিষ্ঠুরং। তত্র লিপ্তো ভবে-ন্নিম্বকল্কোঽতিমধুরঃ স্থিতঃ। তস্য ধারণ-মাত্রেণ বিষবেগঃ প্রশাম্যতি ॥ * ॥ বিব-র্ণতা তু খরতা প্রবালে দূষণদ্বয়ং। রেখা-কাকপদৌ বিন্দুর্যথা বজ্রেষু দোষকৃৎ। তথা প্রবালে সর্ব্বত্র বর্জনীয়ং বিচক্ষণৈঃ॥ রেখা হন্যাদ্যশো লক্ষ্মীমাবর্ত্তঃ কুল-নাশনঃ। পটলো রোগকৃৎ খ্যাতো বিন্দু-র্দ্ধনবিনাশকৃৎ॥ ত্রাসঃ সংজনয়েত্ত্রাসং নীলিকা মৃত্যুকারিণী। মূল্যং শুদ্ধপ্রবা-লস্য রূপ্যদ্বিগুণমুচ্যতে॥ ধারণেঽস্যাপি নিয়মো জাতিভেদেন পূর্ব্ববৎ । * । তথাহি। বিরূপজাতিং বিষমং বিবর্ণং খরপ্রবালং প্রবহন্তি যে যে। তে মৃত্যু-মেবাত্মনি বৈ বহন্তি সত্যং বদত্যেষকতো মুনীন্দ্রঃ॥ ইতি যুক্তিকল্পতরৌ প্রবাল-পরীক্ষা ॥ * ॥ কিশলয়ঃ। বীণাদণ্ডঃ। ইতি মেদিনী ॥

প্রবালিকঃ (পুং) জীবশাকঃ। ইতি রাজ-নির্ঘণ্টঃ॥

প্রবালফলং (ক্লী) রক্তচন্দনং। ইতি ভাব-প্রকাশঃ॥

প্রবুদ্ধঃ (ত্রি) পণ্ডিতঃ। প্রফুল্লঃ। ইতি হেম-চন্দ্রঃ॥ জাগৃতঃ। যথা। প্রাতস্তরাং পত-ত্রিভ্যঃ প্রবুদ্ধঃ প্রণমন্নবিং। ইতি ভট্টিঃ॥

প্রবোধঃ (পুং) বিনিদ্রত্বং। ইতি হেমচন্দ্রঃ॥ প্রকৃষ্টজ্ঞানঞ্চ। যথা। তাবৎ সত্যং জগ-দ্ভাতি প্রবোধে সত্যসম্ভবেৎ। ইত্যাত্ম-বোধগ্রন্থঃ॥

প্রবোধনং (ক্লী) ন্যূনপূর্ব্বগন্ধস্য চন্দনাদেঃ প্রযত্নবিশেষেণ পুনঃ পূর্ব্বসৌগন্ধ্যোৎ-পাদনং। তৎপর্য্যায়ঃ। অনুবোধঃ ২। ইত্যমরভরতৌ॥ বোধজননঞ্চ॥

প্রবোধনী (স্ত্রী) দুরালভা। ইতি রাজনির্ঘণ্টঃ। শ্রীহরেরুত্থানৈকাদশ্যাদিঃ। অথ প্রবো-ধনীকৃত্যং। শয়ন্যামিব কৃত্বাস্যাং ক্ষীরা-ম্ভোধিমহোৎসবং। প্রবোধ্য কৃষ্ণং সংপূজ্য বিধিনারোহয়েদ্রথং ॥ * ॥ অথ প্রবোধনী-কৃত্যনিত্যতা। স্কান্দে তত্রৈব। জন্ম-প্রভৃতি যৎ পুণ্যং নরেণোপার্জ্জিতং ভুবি। বৃথা ভবতি তৎ সর্ব্বং ন কৃত্বা বোধ-বাসরং ॥ * ॥ অথ প্রবোধনীমাহাত্ম্যং

তত্রৈব। প্রবোধন্যাশ্চ মাহাত্ম্যং পাপঘ্নং পুণ্যবর্দ্ধনং। মুক্তিদং কৃতবুদ্ধীনাং শৃণু ত্বং মুনিসত্তম॥ তাবদ্গর্জ্জতি বিপ্রেন্দ্র গঙ্গা ভাগীরথী ক্ষিতৌ। যাবন্নায়াতি পাপঘ্নী কার্ত্তিকে হরিবোধনী॥ তাবদ্গর্জ্জন্তি তীর্থানি আসমুদ্রসরাংসি চ। যাবৎ প্রবোধনী বিষ্ণোস্তিথির্নায়াতি কার্ত্তিকে॥ বাজপেয়সহস্রাণি অশ্বমেধশতানি চ। একেনৈবোপবাসেন প্রবোধন্যাং লভেন্নরঃ॥ দুর্ল্লভঞ্চৈব দুষ্প্রাপং ত্রৈলোক্যে সচরাচরে। তদপি প্রার্থিতং বিপ্র দদাতি হরিবোধনী॥ ঐশ্বর্য্যং সন্ততিং প্রজ্ঞাং রাজ্যঞ্চ সুখসম্পদঃ। দদাত্যুপোষিতা বিপ্র হেলয়া হরিবোধনী॥ মেরুমন্দরতুল্যানি পাপান্যত্যুর্জ্জিতান্যপি। একেনৈবোপবাসেন দহতে হরিবোধনী॥ পৃথিব্যাং যানি দানানি দত্ত্বা যৎ ফলমাপ্নুতে। একেনৈবোপবাসেন দদাতি হরিবোধনী॥ কিঞ্চ। জাতঃ স এব সুকৃতী কুলং তেনৈব পাবিতং। কার্ত্তিকে মুনিশার্দ্দূল কৃতা যেন প্রবোধনী॥ যানি কানি চ তীর্থানি ত্রৈলোক্যে সম্ভবন্তি চ। তানি তস্য গৃহে সম্যক্ যঃ করোতি প্রবোধনীং॥ সর্ব্বং কৃত্যং পরিত্যজ্য তুষ্ট্যর্থং চক্রপাণিনঃ। উপোষ্যৈকাদশী সম্যক্ কার্ত্তিকে হরিবোধনী॥ কিং তস্য বহুভিঃ কৃত্যৈঃ পরলোকপ্রদৈর্ম্মুনে। সকৃচ্চোপোষিতা যেন কার্ত্তিকে হরিবোধনী॥ স জ্ঞানী স হি যোগী চ স তপস্বী জিতেন্দ্রিয়ঃ। স্বর্গমোক্ষৌ চ তস্যাস্তামুপাস্তে হরিবোধনীং॥ বিষ্ণোঃ প্রিয়তমা হ্যেষা ধর্ম্মসারস্য দায়িনী। ইমাং সকৃদুপোষ্যৈব মুক্তিভাগী ভবেন্নরঃ॥ প্রবোধনীমুপোষ্যৈব ন গর্ভ্তং বিশতে নরঃ। সর্ব্বধর্ম্মান্ পরিত্যজ্য তস্মাৎ কুর্ব্বীত নারদ॥ স্নানং দানং তপো হোমঃ সমুদ্দিশ্য জনার্দ্দনং। নরৈর্যৎ ক্রিয়তে বিপ্র প্রবোধন্যাং তদক্ষয়ং॥ মহাব্রতমিদং পুত্র মহাপাপৌঘনাশনং। প্রবোধবাসরং বিষ্ণোর্ব্বিধিবৎ সমুপোষয়েৎ॥ ব্রতেনানেন দেবেশং পরিতোষ্য জনার্দ্দনং। বিরাজয়ন্ দিশো দীপ্ত্যা প্রয়াতি ভুবনং হরেঃ॥ পাদ্মে চ তত্রৈব। দুগ্ধাব্ধিভোগিশয়নে ভগবাননন্তো যস্মিন্দিনে স্বপিতি চাথ বিবুধ্যতে চ। তস্মিন্ননন্যমনসামুপবাসভাজাং পুংসাং দদাত্যভিমতং গরুড়াঙ্কশায়ী॥ বারাহে চ। উপবাসাসমর্থানাং সদৈব পৃথুলোচনে। একা সা দ্বাদশী পুণ্যা সমুপোষ্যা প্রবোধনী॥ তস্যামারাধ্য বিশ্বেশং জগতামীশ্বরেশ্বরং। প্রাপ্নোতি সকলং তদ্ধি দ্বাদশদ্বাদশীব্রতং॥ উত্তরাঙ্গারকযুতা যদি সা ভবতি প্রিয়ে। তদা সা মহতী পুণ্যা কোটিকোটিগুণোত্তরা॥ শয়নে বোধনে চৈব কটিদানে চ সুন্দরি। উপোষ্যৈব বিধানেন যান্তি মল্লয়তাং নরাঃ॥ একাদশী সোমযুতা কার্ত্তিকে মাসি ভাবিনি। উত্তরাভাদ্রসংযোগে অনন্তা সা প্রকীর্ত্তিতা॥ তস্যাং যৎ ক্রিয়তে ভদ্রে সর্ব্বমানন্ত্যমশ্নুতে। অনন্তপুণ্যফলদা তেনানন্তা স্মৃতা ফলে॥ তত্রৈব শ্রীযমনারদ-

সংবাদে। অন্যচ্চ তে প্রবক্ষ্যামি গুহ্যাদ্‌গুহ্যতরং মুনে। কার্ত্তিকেঽমলপক্ষে তু সাক্ষাদেকাদশী স্মৃতা॥ ভক্তিপ্রদা হরেঃ সা তু নাম্না খ্যাতা প্রবোধনী। যা সা বিষ্ণোঃ পরা মূর্ত্তিরব্যক্তানেকরূপিণী॥ সা ক্ষিপ্তা মানুষে লোকে দ্বাদশী মুনিপুঙ্গব। শ্রীমথুরায়াঞ্চ বিশেষতঃ পাদ্মে তত্রৈব। তাবদ্গর্জ্জন্তি তীর্থানি বাজিমেধাদয়ো মখাঃ। মথুরায়াং প্রিয়া বিষ্ণোর্যাবন্নায়াতি বোধনী॥ সংসারদাবতপ্তানাং কামসৌখ্যপিপাসিনাং। শ্রীকৃষ্ণপাদপদ্মস্য সান্নিধ্যং শীতলং গৃহং॥ ভবপান্থজনানাং বৈ প্রাপিকেয়ং প্রবোধনী। কথং ন সেব্যতে মূঢ়ৈর্মথুরায়াং কিমন্যতঃ॥ *॥ অথ বিশেষতঃ প্রবোধন্যাং শ্রীভগবৎপূজাদিমাহাত্ম্যং। স্কান্দে তত্রৈব প্রবোধনীমাহাত্ম্যে। যেঽর্চ্চয়ন্তি নরাস্তস্যাং ভক্ত্যা দেবন্তু মাধবং। সমুপোষ্য প্রমুচ্যন্তে পাপৈস্তে সমুপার্জ্জিতৈঃ॥ বাল্যে যচ্চার্জ্জিতং বৎস যৌবনে বার্দ্ধকে চ যৎ। সপ্তজন্মকৃতং পাপং স্বল্পং বা যদি বা বহু॥ শুষ্কার্দ্রং মুনিশার্দ্দূল সুগুহ্যমপি নারদ। তৎ ক্ষালয়তি গোবিন্দস্তিথৌ তস্যাং প্রপূজিত কিঞ্চ। প্রবোধবাসরে বিষ্ণোঃ কুরুতে চ হরেঃ কথাং। সপ্তদ্বীপাবনীদানে যৎ ফলং তল্লভেন্মুনে॥ বারাহে চ। কৌমুদস্য তু মাসস্য যা সিতা দ্বাদশী ভবেৎ। অর্চ্চয়েদ্যস্তু মাং তত্র তস্য পুণ্যফলং শৃণু॥ যাবল্লোকা হি বর্ত্তন্তে যাবত্ত্বঞ্চৈব মাধবি। মদ্ভক্তো জায়তে তাবদন্যভক্তো ন জায়তে॥ *॥ তস্যা অনুষ্ঠানং যথা। ব্রহ্মোবাচ। শৃণু মে ভক্তিতঃ পুত্র বোধন্যেকাদশী হরেঃ। উপোষ্যা যেন বিধিনা তং বিপ্র প্রবদামি তে॥ কার্ত্তিকে শুক্লপক্ষে তু দশম্যাং নিয়তঃ শুচিঃ। স্নাত্বা দেবার্চ্চনং কৃত্বা বহ্নিকার্য্যং যথাবিধি॥ আচান্তঃ সুপ্রসন্নাত্মা হবিষ্যান্নং সুসংস্কৃতং। ভুক্ত্বাচম্য স্বপেৎ সম্যক্ কৃত্বা শৌচঞ্চ পাদয়োঃ॥ রাত্রেশ্চ পশ্চিমে যামে সমুত্থায় যথাবিধি। কৃত্বা মূত্রপুরীষে তু শৌচং কুর্য্যাদতন্দ্রিতঃ॥ কৃত্বাষ্টাঙ্গুলমাত্রন্তু ক্ষীরবৃক্ষসমুদ্ভবং। ভক্ষয়েদ্দন্তকাষ্ঠঞ্চ স্নাত্বাচামেৎ প্রযত্নতঃ॥ মৃষ্ট্বাঙ্গানি তথাদ্ভিশ্চ চিরং ধ্যায়েজ্জনার্দ্দনং। অতসীপুষ্পসঙ্কাশং কমলাক্ষং চতুর্ভুজং॥ শঙ্খচক্রগদাশার্ঙ্গপীতবস্ত্রং কিরীটিনং। প্রসন্নবদনং দেবং সর্ব্বলক্ষণলক্ষিতং॥ ততো অনুদয়ে বারিহস্তেন পরিগৃহ্য চ। কুশান্বিতং প্রগৃহ্ণীয়াৎ নিয়মং বিষ্ণুতুষ্টয়ে॥ ধ্যাত্বা জলং গৃহীত্বা তু ভানুরূপং জনার্দ্দনং। দৃষ্ট্বার্ঘ্যং দাপয়েৎ পশ্চাৎ করতোয়েন মানবং॥ এবমুচ্চারয়েদ্বাচং তস্মিন্ কালে মহামুনে। একাদশ্যাং নিরাহারঃ স্থিত্বা চৈবাপরেঽহনি। ভোক্ষ্যেঽহং পুণ্ডরীকাক্ষ শরণং মে ভবাচ্যুত॥ এবমুক্ত্বা ততঃ সম্যক্ নিত্যকর্ম্ম সুকর্ম্মধীঃ। সমর্পয়েদ্বিধানেন বিষ্ণুং সংপূজয়েন্মুনে॥ সহস্রসংখ্যয়া সুস্থঃ সাবিত্রীং সংজপেদ্দ্বিজঃ। সর্ব্বপাপক্ষয়করীং ব্রতস্য পরিপূর্ত্তয়ে॥ ইতি পাদ্মোত্তরখণ্ডে

১২৬ অধ্যায়ঃ ॥ * ॥ অথ প্রবোধকাল-নির্ণয়ঃ। ভবিষ্যে। আ-ভা-কা-সিতপক্ষেষু মৈত্রশ্রবণরেবতী। আদিমধ্যাবসানেষু প্রস্বাপাবর্ত্তনাদিকং ॥ পাদ্মে। পৌষ্ণ-শেষো যদা নাহ্নি মৈত্রাদ্যমপি নো নিশি। দ্বাদশ্যামপি তৎ কুর্য্যাদুত্থানং শয়নং হরেঃ॥ নিশি স্বাপো দিবোত্থানং সন্ধ্যায়াং পরিবর্ত্তনং। অন্যত্র পাদযোগেঽপি দ্বাদশ্যামেব কারয়েৎ॥ বারাহে চ। অপাদ-নিয়মস্তত্র স্বাপে বা পরিবর্ত্তনে। পাদ-যোগো যদা ন স্যাদৃক্ষেণাপি তদা ভবেৎ॥ কিঞ্চ স্কান্দে। রেবত্যন্তো যদা রাত্রৌ দ্বাদশ্যা চ সমন্বিতঃ। তদা বিবুধ্যতে বিষ্ণু-র্দিনান্তে প্রাপ্য রেবতীং॥ রেবত্যাদি-রথান্তো বা দ্বাদশ্যা চ বিনা ভবেৎ। উভয়োরপ্যভাবে তু সন্ধ্যায়াঞ্চ মহোৎ-সবঃ॥ বারাহে চ। দ্বাদশ্যাং সন্ধিসময়ে নক্ষত্রাণামসম্ভবে। আ-ভা-কা-সিতপক্ষেষু শয়নাবর্ত্তনাদিকং॥ অতএব পুষ্করপুরাণে। যস্য যস্য তু দেবস্য যন্নক্ষত্রং তিথিশ্চ যা। তস্য দেবস্য তস্মিংশ্চ শয়নাবর্ত্তনা-দিকং॥ * ॥ অথ ভগবৎপ্রবোধনবিধিঃ। শয়ন্যামিব নিষ্পাদ্য মহাপূজাং জলাশয়ে। কৃষ্ণং নীত্বাথ সঙ্কল্পং কৃত্বা তঞ্চ প্রবো-ধয়েৎ॥ তত্র মন্ত্রঃ। ব্রহ্মেন্দ্ররুদ্রাগ্নি-কুবেরসূর্য্যসোমাদিভির্ব্বন্দিতপাদপদ্মঃ। বুধ্যস্ব দেবেশ জগন্নিবাস মন্ত্রপ্রভাবেণ সুখেন দেব॥ ইয়ন্তু দ্বাদশী দেব প্রবো-ধার্থং বিনির্ম্মিতা। ত্বয়ৈব সর্ব্বলোকানাং হিতার্থং শেষশায়িনা॥ উত্তিষ্ঠোত্তিষ্ঠ গোবিন্দ ত্যজ নিদ্রাং জগৎপতে। ত্বয়ি সুপ্তে জগৎ সুপ্তমুত্থিতে চোত্থিতং ভবেৎ॥ গতা মেঘা বিয়চ্চৈব নির্ম্মলং নির্ম্মলা দিশঃ। শারদানি চ পুষ্পাণি গৃহাণ মম কেশবেতি॥ উত্তিষ্ঠোত্তিষ্ঠেত্যত্র ক্বচি-চ্চৈবং। ত্বয়ি সুপ্তে জগন্নাথে জগৎ সুপ্তং ভবেদিদং। উত্থিতে চেষ্টতে সর্ব্বমুত্তিষ্ঠো-ত্তিষ্ঠ মাধবেতি॥ বারাহে চ। ব্রহ্মেন্দ্র রুদ্রৈরবিতর্ক্যভাবো ভবানৃষির্ব্বন্দিতবন্দ-নীয়ঃ। প্রাপ্তা তব দ্বাদশী কৌমুদাখ্যা জাগৃষ্ব জাগৃষ্ব চ লোকনাথ॥ মেঘা গতা নির্ম্মলপূর্ণচন্দ্রঃ শারদ্যপুষ্পাণি চ লোক-নাথ। অহং দদানীতি চ ভক্তিহেতো-র্জ্জাগৃষ্ব জাগৃষ্ব চ লোকনাথ॥ শ্রুতিশ্চ। ইদং বিষ্ণুর্ব্বিচক্রমে ত্রেধা নিদধে পদং সমূঢ়মস্য পাংশুলে ইত্যাদি। ততস্তল্লাৎ সমুত্থাপ্য কৃষ্ণং ঘণ্টাদিনিস্বনৈঃ। তীরে সুখং নিবেশ্যাথ প্রার্থয়েত্তদনুগ্রহং॥ তথা হি তৃতীয়স্কন্ধে শ্রীব্রহ্মস্তবৌ। সোঽসা বদভ্রকরুণো ভগবান্ বিবৃদ্ধপ্রেমস্মিতেন নয়নাম্বুরুহং বিজৃম্ভন্। উত্থায় বিশ্ববিজ-য়ায় চ নো বিষাদং মাধ্ব্যা গিরাপনয়তাৎ পুরুষঃ পুরাণঃ॥ ইতি। ততঃ পুষ্পা-ঞ্জলিং দত্ত্বা সংস্থাপ্য বিধিবৎ প্রভুং। নীরাজ্য ন্যাসপূর্ব্বঞ্চ বস্ত্রাদীনি সমর্পয়েৎ॥ তথা চ ব্রাহ্মে। একাদশ্যান্তু শুক্লায়াং কার্ত্তিকে মাসি কেশবং। প্রসুপ্তং বোধ-য়েদ্রাত্রৌ ভক্তিশ্রদ্ধাসমন্বিতঃ॥ নৃত্যৈ-র্গীতৈস্তথা বাদ্যৈর্ঋগ্‌যজুঃসামমঙ্গলৈঃ। বিনা পণবশব্দৈশ্চ পুরাণশ্রবণেন চ॥

বাসুদেবকথাভিশ্চ স্তোত্রৈরন্যৈশ্চ বৈষ্ণবৈঃ। সুভাষিতৈরিন্দ্রজালৈর্ভূমিশোভাভিরেব চ॥ পুষ্পৈর্ধূপৈশ্চ নৈবেদ্যৈর্দীপবৃক্ষৈঃ সুশোভনৈঃ। হোমৈর্ভক্ষৈরপূপৈশ্চ ফলৈঃ শাকৈশ্চ পায়সৈঃ ॥ ইক্ষোর্ব্বিকারৈর্ম্মধুনা দ্রাক্ষাক্ষৌদ্রৈঃ সদাড়িমৈঃ। কুঠেরকস্য মঞ্জর্য্যা মালত্যা নবনেন চ ॥ নবনং পুষ্পবিশেষঃ। হৃদ্যাভাং শ্বেতরক্তাভ্যাং চন্দনাভ্যাঞ্চ সর্ব্বদা। কুঙ্কুমালক্তকাভ্যাঞ্চ রক্তসূত্রৈঃ সকুঙ্কুমৈঃ ॥ তথা নানাবিধৈঃ পুষ্পৈর্দ্রব্যৈর্বীরক্রয়াহৃতৈঃ। এবমেব প্রায়ঃ পাদ্মে চ তথা স্কান্দে চ। বহুপুষ্পৈর্ব্বহুফলৈঃ কর্পূরাগুরুকুঙ্কুমৈঃ। হরেঃ পূজা বিধাতব্যা কার্ত্তিকে বোধবাসরে ইতি ॥ ইত্থং কৃত্বা মহাপূজাং মহানীরাজনং তথা। স্বব্রতান্যর্পয়েৎ কৃষ্ণে সপুষ্পাক্ষতবারিণা ॥ বেদস্তুত্যাদিনা স্তুত্বা স্বস্ত্যস্ত্বিত্যাদিনা প্রভুং। সংপ্রার্থ্য গীতবাদ্যাদিঘোষৈরারোহয়েদ্রথং ॥ তথা চ ভবিষ্যোত্তরে শ্রীকৃষ্ণযুধিষ্ঠিরসংবাদে। মহাতূর্য্যরবৈ রাত্রৌ ভ্রাময়েৎ স্যন্দনে স্থিতং। উত্থিতং দেবদেবেশং নগরে পার্থিবঃ স্বয়ং। দীপোদ্যোতকরে মার্গে নৃত্যগীতসমাকুলে ॥ * ॥ অথ রথযাত্রামাহাত্ম্যং ভবিষ্যোত্তরে তত্রৈব। যং যং দামোদরঃ পশ্যেদুত্থিতো ধরণীধরঃ। তং তং প্রদেশং রাজেন্দ্র সর্ব্বং স্বর্গায় কল্পয়েৎ ॥ কিঞ্চ। যাবৎ পদানি কৃষ্ণস্য রথস্যাকর্ষণং নরঃ। করোতি ক্রতুভিস্তানি তুল্যানি নরনায়ক ॥ রথস্থং যে নিরীক্ষন্তে কৌতুকেনাপি কেশবং। দেবতানাং গণাঃ সর্ব্বে ভবন্তি শ্বপচাদয়ঃ॥ স্ত্রিয়োঽপি মুক্তিমায়ান্তি রথযাত্রাপরায়ণাঃ। পিতৃমাতৃভর্ত্তৃকুলং নয়ন্তি হরিমন্দিরং ॥ কুর্ব্বন্তি নর্ত্তকীরূপং রথাগ্রে কৌতুকান্বিতং। অপ্সরোভিঃ সহ ক্রীড়াং কুর্ব্বন্তীন্দ্রাশ্চতুর্দ্দশ॥ যে রথাগ্রে প্রকুর্ব্বন্তি গীতবাদ্যাদি মানবাঃ। দেবলোকাৎ পরিভ্রষ্টা জায়ন্তে মণ্ডলেশ্বরাঃ॥ মৌল্যেন স্যন্দনস্যাগ্রে গায়মানাশ্চ গায়কাঃ। বাদকৈঃ সহ রাজেন্দ্র প্রয়ান্তি হরিমন্দিরং ॥ রথোৎসবে মুকুন্দস্য যেষাং হর্ষোঽপি জায়তে। তেষাং ন নারকী পীড়া যাবদিন্দ্রাশ্চতুর্দ্দশ ॥ রথোৎসবস্য মাহাত্ম্যং কলৌ বিতনুতে হি যঃ। পুণ্যবুদ্ধ্যা বিশেষেণ লোভেনাপ্যথবা নরঃ॥ সপ্তদ্বীপসমুদ্রান্তা রত্নধান্যসমন্বিতা। সশৈলবনপুষ্পাঢ্যা তেন দত্তা মহী ভবেৎ ॥ অন্যত্র চ। বোধনী জগদাধারা কার্ত্তিকে শুক্লপক্ষতঃ। রথস্থো যত্র ভগবাংস্তুষ্টো যচ্ছতি বাঞ্ছিতং ॥ ভজন্তে যে রথারূঢ়ং দেবং সর্ব্বেশ্বরেশ্বরং। তেষাং যাত্রা কৃতা নৃণাং কামানিষ্টান্ প্রযচ্ছতি॥ শ্রীকৃষ্ণরথশোভাং যে প্রকুর্ব্বন্তি প্রহর্ষিতাঃ। তেষাং মনোরথাবাপ্তিং যচ্ছতে পুরুষোত্তমঃ ॥ কৃষ্ণস্য রথশোভাং যে প্রকুর্ব্বন্তি স্বশক্তিতঃ। বাঞ্ছিতং তেভ্যো যচ্ছন্তি নিত্যং সূর্য্যাদয়ো গ্রহাঃ॥ কৃষ্ণস্য রথশোভাং যে প্রকুর্ব্বন্তি সুহর্ষিতাঃ। পদে পদে তথা পুত্র পুণ্যং তেষাং প্রয়াগজং ॥ রথযাত্রাস্থিতে কৃষ্ণে জয়েতি প্রবদন্তি যে।

জয়েতি চ পুনর্যে বৈ শৃণু পুণ্যং বদাম্যহং ॥ গঙ্গাদ্বারে প্রয়াগে চ গঙ্গাসাগরসঙ্গমে। বারাণস্যাদিতীর্থেষু দেবানাঞ্চৈব দর্শনে॥ যৎ পুণ্যং কবিভিঃ প্রোক্তং কার্ৎস্নেন চ নরেশ্বর। জয়শব্দে কৃতে বিষ্ণৌ রথস্থে তৎ ফলং স্মৃতং ॥ রথস্থিতো নরৈর্যস্তু পূজিতো ধরণীধরঃ। যথালাভোপপন্নৈশ্চ পুষ্পৈর্ভক্ত্যা সমর্চ্চিতঃ॥ দদাতি বাঞ্ছিতান্ কামানন্তে চ পরমং পদং। মঙ্গলং যে প্রকুর্ব্বন্তি ধূপদীপাংস্তথা স্তবং॥ নৈবেদ্যং বস্ত্রপূজাঞ্চ ভক্ত্যা নীরাজনং হরেঃ। রথারূঢ়স্য কৃষ্ণস্য সংপ্রাপ্তে হরিবাসরে॥ ফলং ন তন্ময়া জ্ঞাতং জানাতি যদি কেশবঃ। ব্রহ্মস্বহারী গোঘ্নশ্চ ভ্রূণহা ব্রহ্মনিন্দকঃ॥ মহাপাতকযুক্তোঽপি ব্রহ্মহা গুরুতল্পগঃ। মদ্যপঃ সর্ব্বপাপোঽপি কলিকালেন মোহিতঃ॥ রথাগ্রতঃ পদৈকেন মুচ্যতে সর্ব্বপাতকৈঃ। কিঞ্চান্যত্র। রথারূঢ়ে মহাবিষ্ণৌ যে কুর্ব্বন্তি জয়স্বনং। পূজাঞ্চাখিলপাপেভ্যো মুক্তা যান্তি হরেঃ পদং॥ কিঞ্চ। রথস্যাকর্ষণং পূর্ব্বং কুরুতে দৈত্যনায়কঃ। ততঃ সুরাঃ সিদ্ধসঙ্ঘা যক্ষা গন্ধর্ব্বমানবাঃ॥ ইত্থঞ্চ রথযাত্রায়া বিধির্ব্যক্তঃ স্বতোঽভবৎ। অথাপি কশ্চিত্তত্রান্যো বিশেষোঽপি বিতন্যতে ॥ * ॥ অথ রথযাত্রাবিধিঃ। শ্রীকৃষ্ণে তু রথারূঢ়ে কৃত্বা জয়জয়ধ্বনিং। নিষ্পাদ্য চ মহাপূজামাশীর্ব্বাক্যানি কীর্ত্তয়েৎ॥ তথা চ বিষ্ণুধর্ম্মে। বক্ত্রং নীলোৎপলরুচি লসৎকুণ্ডলাভ্যাং সুমৃষ্টং চন্দ্রাকারং রচিততিলকং চন্দনেনাক্ষতৈশ্চ। গত্যা লীলাং জনসুখকরীং প্রেক্ষণেনামৃতৌঘং পদ্মাবাসাং সততমুরসা ধারয়ন্ পাতু বিষ্ণুঃ॥ যুক্তঃ শৈব্যাদিবাহৈর্ম্মধুরতররণৎকিঙ্কিণীজালমালৈ রত্নৌঘৈর্ম্মৌক্তিকানামবিরতমণিভিঃ সংভৃতৈশ্চৈব হারৈঃ। হেমৈঃ কুম্ভৈঃ পতাকাশিবতররুচিভির্ভূষিতঃ কেতুমুখ্যৈশ্ছত্রৈব্রহ্মেশবন্দ্যো দুরিতহরহরেঃ পাতু জৈত্রো রথো বঃ॥ মোদন্তাং সুজনা হ্যনির্জ্জিতধিয়ঃ স্রস্তাখিলোপদ্রবাঃ স্বস্থাঃ সুস্থিরবুদ্ধয়ঃ প্রতিহতামিত্রা রমন্তাং সুখং। রে দৈত্যা গিরিগহ্বরাণি গহনান্যাশু ব্রজধ্বং ভয়াদ্দৈত্যারির্ভগবানয়ং যদুপতির্যানং সমারোহতি॥ পলায়ধ্বং পলায়ধ্বং রে রে দিতিজদানবাঃ। সংরক্ষণায় লোকানাং রথারূঢ়ো নৃকেশরীতি॥ ততো বিচিত্রগদ্যানি পঠিত্বাথ মহাপ্রভোঃ। মহাপ্রসাদমালাঞ্চ স্বীকুর্য্যাৎ পরয়া মুদা॥ * ॥ তন্মাহাত্ম্যঞ্চোক্তং। ভক্ত্যা গৃহ্ণাতি যো মালাং বৈষ্ণবীং মঙ্গলাশ্রয়াং। ন তেষাং দুর্লভং কিঞ্চিদিহ লোকে পরত্র চ॥ তস্মাৎ সর্ব্বপ্রযত্নেন সর্ব্বকামসমৃদ্ধয়ে। মালামেতাং প্রগৃহ্ণীয়াৎ সৌখ্যমোক্ষপ্রদায়িনীং॥ ইতি। সংচিন্ত্যাকৃষ্যমাণঞ্চ শ্রীপ্রহ্লাদাদিভী রথং। আকৃষ্য প্রেরয়ন্ পূর্য্যাং ভ্রাময়েদ্বৈষ্ণবৈঃ সহ॥ তথা চ ভবিষ্যোত্তরে তত্রৈব। নৃত্যমানৈর্ভাগবতৈর্গীতবাদিত্রনিস্বনৈঃ। ভ্রাময়েৎ স্যন্দনং বিষ্ণোঃ পুরমধ্যে সমন্ততঃ॥ কিঞ্চ। প্রবোধবাসরে

প্রাপ্তে কার্ত্তিকে পাণ্ডুনন্দন। দেবালয়েষু সর্ব্বেষু পুরমধ্যে সমন্ততঃ ॥ ভ্রাময়েত্তূর্য্যনির্ঘোষৈ রথস্থং ধরণীধরং। কিঞ্চ। রথাগমে মুকুন্দস্য পুরশোভাস্তু কারয়েৎ। সর্ব্বতো রমণীয়ন্তু পতাকৈরুপশোভিতং॥ তোরণৈর্ব্বহুভির্যুক্তৈ রম্ভাস্তম্ভৈশ্চ শোভিতং। স্থানে স্থানে মহীপাল কর্ত্তব্যং পুণ্যসংযুতং॥ বিচিত্ররথশোভা চ কর্ত্তব্যা ভাবিতৈর্ন রৈরিতি। রথেন গচ্ছন্ ভগবাননুগম্যোঽখিলৈর্জনৈঃ। স্বস্বগেহাগতশ্চার্চ্চ্যোঽন্যথা দোষো মহান্ ভবেৎ ॥ * ॥ অথ রথানুগমননিত্যতা। তত্রৈব। রথেন সহ গচ্ছন্তি পার্শ্বতঃ পৃষ্ঠতোঽগ্রতঃ। বিষ্ণুনৈব সমাঃ সর্ব্বে ভবন্তি শ্বপচাদয়ঃ॥ রথস্থং যে ন গচ্ছন্তি ভ্রমমাণং জনার্দ্দনং। বিপ্রাধ্যয়নসম্পন্না ভবন্তি শ্বপচাধমাঃ॥ কিঞ্চ। যেষাং গৃহাগতো যাতি রথস্থো মধুসূদনঃ। পূজা তৈস্তৈঃ প্রকর্ত্তব্যা বিত্তশাঠ্যবিবর্জ্জিতৈঃ॥ অনর্চ্চিতো যদা যাতি গৃহাদ্যস্য মহীধরঃ। পিতরস্তস্য বিমুখা বর্ষাণাং দশ পঞ্চ চ॥ যঃ পুনঃ কুরুতে পূজাং গৃহায়াতে তু মাধবে। বসতে শ্বেতদ্বীপে তু যাবদিন্দ্রাশ্চতুর্দ্দশ ॥ অন্যত্র। নানুব্রজতি যো মোহাদ্‌ব্রজন্তং জগদীশ্বরং। জ্ঞানাগ্নিদগ্ধকর্ম্মাপি স ভবেদ্‌ব্রহ্মরাক্ষসঃ॥ ইতি। অথ স্বমন্দিরং নীত্বা পূর্ব্ববৎ পূজয়েৎ প্রভুং। রাত্রৌ জাগরণং কুর্য্যাদ্বিধিবদ্‌ বৈষ্ণবৈঃ সমং ॥*॥ অথ প্রবোধনীজাগরণমাহাত্ম্যং। স্কান্দে তত্রৈব। পূর্ব্বজন্মসহস্রেষু পাপং যৎ সমুপার্জ্জিতং। জাগরেণ প্রবোধন্যাং দহ্যতে তূলরাশিবৎ॥ কৃত্বাপি পাতকং ঘোরং ব্রহ্মহত্যাদিকং নরঃ। কৃত্বা জাগরণং বিষ্ণোর্ধূতপাপো ভবেন্মুনে॥ কর্ম্মণা মনসা বাচা পাপং যৎ সমুপার্জ্জিতং। ক্ষালয়েত্তচ্চ গোবিন্দঃ প্রবোধন্যাস্তু জাগরে ॥ দুষ্প্রাপ্যং যৎ ফলং বিপ্রৈরশ্বমেধাদিভির্ম্মখৈঃ। প্রাপ্যতে তৎ সুখেনৈব প্রবোধন্যাস্তু জাগরে॥ আপ্লুত্য সর্ব্বতীর্থানি দত্ত্বা গাং কাঞ্চনীং মহীং। ন তৎফলমবাপ্নোতি যৎ কৃত্বা জাগরং হরেঃ॥ চন্দ্রসূর্য্যোপরাগে তু যৎ ফলং পরিকীর্ত্তিতং। তৎসহস্রগুণং পুণ্যং প্রবোধন্যাস্তু জাগরে ॥ স্নানং দানং তপো হোমঃ স্বাধ্যায়শ্চার্চ্চনং হরেঃ। তৎ সর্ব্বং কোটিগুণিতং প্রবোধন্যাস্তু জাগরে ॥ সমতীতং ভবিষ্যঞ্চ বর্ত্তমানং কুলাযুতং। বিষ্ণুলোকং নয়ত্যাশু জাগরেণ প্রবোধনী॥ চলন্তি পিতরো হৃষ্টা বিষ্ণুলোকমলঙ্কৃতাঃ। বিমুক্তা নারকৈর্দুঃখৈঃ কর্ত্তুঃ কৃষ্ণপ্রজাগরং ॥ ভার্য্যাপক্ষে তু যে জাতা মাতৃতঃ পিতৃতস্তথা। তারয়েন্নাত্র সন্দেহঃ প্রবোধন্যাং তু জাগরে॥ কিঞ্চ। ফলৈর্নানাবিধৈর্দ্রব্যৈঃ প্রবোধন্যাস্তু জাগরে। শঙ্খে তোয়ং সমাদায় অর্ঘ্যং দদ্যাজ্জনার্দ্দনে ॥ যৎ ফলং সর্ব্বদানেষু সর্ব্বতীর্থেষু যৎ ফলং। তৎ সর্ব্বং কোটিগুণিতং দত্ত্বার্ঘ্যং বোধবাসরে॥ পাদ্মে চ তত্রৈব। অন্যত্রাপি প্রিয়া বিষ্ণোর্জাগরে স্যাৎ প্রবোধনী। কিং পুনর্ম্মথুরায়াং সা ততো বৈ জন্মসদ্মনি॥ একৈবৈকাদশী

কৃষ্ণজন্মগেহে কৃতা নরৈঃ। ততোঽধিকং ন কর্ত্তব্যং লোকে কিঞ্চন বিদ্যতে॥ রাত্রৌ জাগরণং তত্র প্রীত্যা কুর্ব্বন্তি যে নরাঃ। সংসারে মোহস্বপ্নান্তে সদা জাগ্রতি জাগ্রতি॥ কিঞ্চ। তত্রৈব শ্রীরাধিকোপাখ্যানান্তে। সুবোধনীজাগরপুণ্যবৈভবাৎ প্রসন্ন ঈশো বিধিবাক্যসত্যকৃৎ। চকার রাসোৎসবনর্ত্তনং সহ বৃন্দাবনেঽন্যাভিরপীহ রাধয়া॥ সা নৃত্যমানাদ্ভুতগোপরূপিণা কৃষ্ণেন জন্মান্তরবাঞ্ছিতেন। রাধা মহাপ্রেমজবাকুলেন্দ্রিয়া নিন্যেঽন্যলোকং কথয়া কৃতার্থতাং॥ তস্মাৎ সুবোধনীং কৃত্বা রাত্রৌ কৃত্বা চ জাগরং। সুপ্তোত্থিতং হরিং দৃষ্ট্বা কা ভীঃ সংসারজা দ্বিজাঃ॥ মথুরায়ান্তু কিং বাচ্যং জাগরে হরিসন্নিধৌ। কার্ত্তিকে বোধনীং প্রাপ্য ততঃ শ্রেয়ঃ পরং ন হি॥ মথুরায়াং প্রবোধন্যাং কৃতজাগরণস্য হি। ক্ষণার্দ্ধদানতো বৈশ্যোঽমোচয়দ্‌ব্রহ্মরাক্ষসং॥ জাগরস্য চ মাহাত্ম্যং গীতবাদিত্রনর্ত্তনং। হরেঃ প্রীতিকরং রাত্রৌ বক্তুং মে নৈব শক্যতে॥ যস্তু গায়তি কৃষ্ণাগ্রে কৌমুদীং দ্বাদশীং ক্ষণং। সর্ব্বলোকান্ পরিত্যজ্য বিষ্ণুলোকং স গচ্ছতি॥ অতএবোক্তং তত্রৈব। রাজ্যমন্যত্র সংত্যজ্য স্ফীতং নিহতকণ্টকং। কার্ত্তিকে মথুরায়াং বৈ কৌমুদ্যাং জাগরং চরেৎ॥*॥ অথ পারণাদিনকৃত্যং। প্রাতর্নিত্যক্রিয়াং কৃত্বা শক্ত্যা সংভোজ্য ভূসুরান্। গৃহ্নন্ কৃতব্রতাচ্ছিদ্রং প্রদদ্যাদ্দক্ষিণাদিকং॥ দানং যথাব্রতং তেভ্যো দত্ত্বা পারণমাচরেৎ। প্রবর্ত্তয়েচ্চ সংত্যক্তং চাতুর্ম্মাস্যব্রতেষু যৎ॥ তথা চ ভবিষ্যোত্তরে তত্রৈব। প্রভাতে বিমলে স্নাত্বা ভোজয়েদন্নবিস্তরৈঃ॥ ঘৃতক্ষীরদধিক্ষৌদ্রকাসারগুড়মোদকৈঃ। অর্চ্চয়েচ্চন্দনৈশ্চূর্ণৈঃ পুষ্পৈর্গন্ধৈর্দ্বিজোত্তমান্॥ আচান্তেভ্যস্তিতো দদ্যাত্ত্যক্তং যৎকিঞ্চিদেব হি। সুবাচা সুমনোঽভীষ্টপত্রপুষ্পফলাদিকং॥ চতুরো বার্ষিকাম্মাসান্ নিয়মং সর্ব্ব্য যৎ কৃতং। কথয়িত্বা দ্বিজেভ্যস্তদ্দদ্যাদ্‌ভক্ত্যা সুদক্ষিণাং॥ এবমেব পাদ্মে। তত্রৈব কিঞ্চাধিকং। চাতুর্ম্মাস্যব্রতে বিপ্রাঃ পশ্চাদচ্ছিদ্রবাচনমিতি॥*॥ ইতি শ্রীহরিভক্তিবিলাসে ১৬ বিলাসঃ॥

প্রবোধিনী (স্ত্রী) প্রবোধনী। উত্থানৈকাদশী। যথা। বরাহ উবাচ। উপবাসাসমর্থানাং সদৈব পৃথুলোচনে। একা সা দ্বাদশী পুণ্যা উপোষ্যা যা প্রবোধিনী॥ তস্যামারাধ্য বিশ্বেশং জগতামীশ্বরেশ্বরং। প্রাপ্নোতি সকলং তদ্ধি দ্বাদশদ্বাদশীফলং॥ পূর্ব্বভাদ্রপদা যোগে সৈব বা দ্বাদশী ভবেৎ। অতীব মহতী তস্যাং সর্ব্বকৃত্যমথাক্ষয়ং॥ উত্তরাঙ্গারসহিতা যদি চৈকাদশী ভবেৎ। তদা কোটিগুণং পুণ্যং কেশবাল্লভতে ফলং॥ সকৃদেবার্চ্চিতে তস্যাং সর্ব্বং কৃতমিহাক্ষয়ং। যথা প্রবোধিনী পুণ্যা তথা যস্যাং স্বপেদ্ধরিঃ॥ উপোষ্যা হি মহাভাগে অনন্তফলদা হি সা। শয়নে বোধনে চৈব হরেস্তু পরিবর্ত্তনে॥ উপোষ্যৈব

বিধানেন নরো নির্ম্মলতাং ব্রজেৎ। তস্মাৎ সর্ব্বপ্রযত্নেন দ্বাদশীং সমুপোষয়েৎ ॥ যদীচ্ছেত বিশালাক্ষি শাশ্বতীং গতিমাত্মনঃ। একাদশী সোমযুক্তা কার্ত্তিকে মাসি ভামিনি॥ উত্তরাভদ্রসংযোগে অনন্তা সা প্রকীর্ত্তিতা। তস্যাং যৎ ক্রিয়তে ভদ্রে সর্ব্বমানন্ত্যমশ্নুতে ॥ অনন্তপুণ্যফলদা তেনানন্তা স্মৃতা প্রিয়ে। একাদশী ভৌমযুতা যদা স্যাদ্ভুতধারিণি ॥ স্নাত্বা দেবং সমভ্যর্চ্চ্য প্রাপ্নোতি পরমং ফলং। প্রাপ্নোতি সকলং তদ্ধি দ্বাদশদ্বাদশীং নরঃ॥ * ॥ জলপূর্ণং তদা কুম্ভং স্থাপয়িত্বা বিচক্ষণঃ। পঞ্চরত্নসমোপেতং ঘৃতপাত্রযুতং তথা ॥ তস্যাং স্কন্ধে তু ধরিতং মৎস্যরূপং জনার্দ্দনং। মাষকেণ সুবর্ণেন সুতপ্তেন বরাননে ॥ স্নাপয়িত্বা বিধানেন কুঙ্কুমেন বিলেপিতং। পীতবস্ত্রযুগচ্ছন্নং ছত্রোপানদ্‌যুগান্বিতং ॥ পূজয়েৎ কমলৈর্দ্দেবি মদ্ভক্তঃ সংজিতেন্দ্রিয়ঃ। মৎস্যং কূর্ম্মং বরাহঞ্চ নারসিংহঞ্চ বামনং ॥ রামং রামঞ্চ কৃষ্ণঞ্চ বুদ্ধঞ্চৈব তু কল্কিনং। এবং দশাবতারাংশ্চ পূজয়েদ্‌ভক্তিসংযুতঃ ॥ পুষ্পৈর্ধূপৈস্তথা দীপৈর্নৈবেদ্যৈর্ব্বিবিধৈরপি। সংপূজ্যৈবমলঙ্কারৈর্ব্বিবিধৈঃ পূজনঞ্চরেৎ ॥ ততস্তস্যাগ্রতো দেয়ং নৈবেদ্যং পাচিতং চিতং। এবং সংপূজ্য গোবিন্দং দিবাপি কমলেক্ষণং ॥ রাত্রৌ চোত্থাপনং কার্য্যং দেবদেবস্য সুব্রতে। প্রভাতে বিমলে স্নাত্বা ভক্ত্যা সংপূজ্য কেশবং ॥ পুষ্পধূপাদিনৈবেদ্যৈঃ ফলৈর্নানাবিধৈঃ শুভৈঃ। ততস্তু পূজয়েদ্বিদ্বানাচার্য্যং ভক্তিসংযুতঃ॥ অলঙ্কারোপহারৈশ্চ বস্ত্রাদ্যৈশ্চ স্বশক্তিতঃ। পূজয়িত্বা বিধানেন তং দেবং প্রতিপাদয়েৎ ॥ জগদাদি জগদ্রূপমনাদি জগদাদিকৃৎ। জলশায়িন্ জগদ্যোনে প্রীয়তাং মে জনার্দ্দন ॥ অনেনৈব বিধানেন কুর্য্যাদেকাদশীংনরঃ। তস্য পুণ্যং ভবেদযত্তু তচ্ছৃণুষ্ব বসুন্ধরে॥ যদি বক্ত্রসহস্রাণাং সহস্রাণি ভবন্তি হি। সংখ্যাতুং নৈব শক্যন্তে প্রবোধিন্যাস্তথা গুণাঃ ॥ তথাপ্যুদ্দেশমাত্রেণ শক্ত্যা বক্ষ্যামি তচ্ছৃণু। চন্দ্রতারার্কসঙ্কাশমধিষ্ঠায়ানুজীবিভিঃ ॥ সহৈব যানমাগচ্ছেন্মম লোকং বসুন্ধরে। ততঃ কল্পসহস্রান্তে সপ্তদ্বীপেশ্বরো ভবেৎ॥ আয়ুরারোগ্যসম্পন্নো জন্মাতীতো ভবেত্ততঃ। ব্রহ্মঘ্নশ্চ সুরাপশ্চ স্তেয়ী চ গুরুতল্পগঃ॥ পাপান্যেতানি সর্ব্বাণি শ্রবণেনৈব নাশয়েৎ। পশ্যেচ্চ ধীমানধনোঽপি ভক্ত্যা স্পৃশেন্মনুষ্য ইহ ধীয়মানঃ। শৃণোতি ভক্তস্য মতিং দদাতি বিকল্মষঃ সোঽপি দিবং প্রয়াতি ॥ দুঃস্বপ্নং প্রশমমুপৈতি পঠ্যমানে মাহাত্ম্যে ভবভয়হারকে নরস্য। যঃ কুর্য্যাদ্‌ব্রতবরমেতদব্যয়ায়া বোধিন্যাঃ কিমুত ফলস্তু তস্য বাচ্যং ॥ তে ধন্যাস্তে কৃতার্থাশ্চ তৈরেব সুকৃতং কৃতং। তৈরাত্মজন্ম সফলং কৃতং যে ব্রতকারকাঃ॥ ইতি বরাহপুরাণে প্রবোধিনীমাহাত্ম্যং ॥

প্রভঞ্জনঃ (পুং) বায়ুঃ। ইত্যমরঃ ॥ ভঞ্জনকর্ত্তরি ত্রি ॥

প্রভদ্রঃ (পুং) নিম্বঃ। ইতি রাজনির্ঘণ্টঃ ॥
প্রভদ্রা (স্ত্রী) প্রসারিণী। ইতি রাজনির্ঘণ্টঃ ॥
প্রভবঃ (পুং) জন্মহেতুঃ। পিত্রাদিঃ। আদ্যোপলব্ধিস্থানং। আদ্যোপলব্ধয়ে প্রথমজ্ঞানার্থং যৎ স্থানং দেশঃ সঃ। যথা। বাল্মীকিঃ শ্লোকপ্রভবঃ। হিমবান্ গঙ্গাপ্রভবঃ। ইত্যমরভরতৌ ॥ অপাং মূলং। মুনিভেদঃ। ইতি হেমচন্দ্রঃ ॥ পরাক্রমঃ। ইতি মেদিনী॥ জন্ম। ইতি শব্দরত্নাবলী॥
প্রভবিষ্ণুঃ (পুং) বটুকভৈরবস্যাষ্টোত্তরশতনামান্তর্গতনামবিশেষঃ। যথা। প্রভবিষ্ণুঃ প্রভাববান্। ইত্যাদি বিশ্বসারতন্ত্রে আপদুদ্ধারকল্পঃ ॥ প্রভুঃ। যথা। ন ভর্ত্তা নৈব চ সুতো ন পিতা ভ্রাতরো ন চ। আদানে বা বিসর্গে বা স্ত্রীধনে প্রভবিষ্ণবঃ॥ ইতি দায়ভাগঃ ॥ প্রকর্ষেণ ভবনশীলে ত্রি ॥
প্রভবিষ্ণুতা (স্ত্রী) প্রভুতা। প্রভবিষ্ণুশব্দাৎ ভাবার্থে তপ্রত্যয়েন পদং নিষ্পন্নং ॥
প্রভা (স্ত্রী) কুবেরপুরী। ইতি হেমচন্দ্রঃ ॥ দীপ্তিঃ। তৎপর্য্যায়ঃ। রোচিঃ২ দ্যুতিঃ৩ শোচিঃ ৪ ত্বিষা ৫ ওজঃ ৬ ভাঃ ৭ রুচিঃ৮ বিভা ৯ আলোকঃ ১০ প্রকাশঃ ১১ তেজঃ ১২ রুক্ ১৩। ইতি রাজনির্ঘণ্টঃ॥*॥ গোপীবিশেষঃ। যথা। দৃষ্টস্ত্বং প্রভয়া গোপ্যা যুক্তো বৃন্দাবনে বনে। প্রভা দেহং পরিত্যজ্য জগাম সূর্য্যমণ্ডলং ॥ ততস্তস্যাঃ শরীরঞ্চ তীব্রং তেজো বভূব হ। সংবিভজ্য ত্বয়া দত্তং প্রেম্নাশ্রু রুদতা পুনঃ ॥ বিসৃজ্য চক্ষুষোর্লোহং লজ্জয়া মদ্ভয়ে চ। হুতাশনায় কিঞ্চিচ্চ নৃপেভ্যশ্চাপি কিঞ্চন ॥ কিঞ্চিৎ পুরুষসিংহেভ্যো দেবেভ্যশ্চাপি কিঞ্চন। কিঞ্চিদ্দস্যুজনেভ্যশ্চ নাগেভ্যশ্চাপি কিঞ্চন ॥ ব্রাহ্মণেভ্যো মুনিভ্যশ্চ তপস্বিভ্যশ্চ কিঞ্চন। স্ত্রীভ্যঃ সৌভাগ্যযুক্তাভ্যো যশস্বিভ্যশ্চ কিঞ্চন ॥ তচ্চ দত্ত্বা তু সর্ব্বেভ্যঃ পূর্ব্বং রোদিতুমুদ্যতঃ। ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ৯ অধ্যায়ঃ ॥ * ॥ দুর্গা। যথা। যমস্য ভগিনী জাতা যমুনা তেন সা মতা। প্রভা প্রসাদশীলত্বাৎ জ্যোৎস্না চন্দ্রার্কমালিনী ॥ ইতি দেবীপুরাণে ৪৫ অধ্যায়ঃ॥ * ॥ সূর্য্যপত্নী। যথা। সূত উবাচ। বিবস্বান্ কশ্যপাৎ পূর্ব্বমদিত্যামভবৎ পুরা। তস্য পত্নীত্রয়স্তদ্বৎ সংজ্ঞা রাজ্ঞী প্রভা তথা ॥ রেবতস্য সুতা রাজ্ঞী রেবন্তং সুসুবে সুতং। প্রভা প্রভাবং সুসুবে ত্বাষ্ট্রী সংজ্ঞা তথা মনুং ॥ ইতি মাৎস্যে ১১ অধ্যায়ঃ ॥
প্রভাকরঃ (পুং) সূর্য্যঃ। অগ্নিঃ। চন্দ্রঃ। সমুদ্রঃ। ইতি শব্দরত্নাবলী ॥ অর্কবৃক্ষঃ। ইত্যমরঃ ॥
প্রভাকীটঃ (পুং) খদ্যোতঃ। ইতি রাজনির্ঘণ্টঃ ॥
প্রভাঞ্জনঃ (পুং) শোভাঞ্জনঃ। ইতি হেমচন্দ্রঃ
প্রভাতং (ক্লী) প্রাতঃকালঃ। তৎপর্য্যায়ঃ। প্রত্যূষঃ ২ অহর্মুখং ৩ কল্যং ৪ উষঃ ৫ প্রত্যুষঃ ৬। ইত্যমরঃ ॥ দিনাদিঃ ৭ নিশান্তং ৮ ব্যুষ্টং ৯ প্রগে ১০ প্রাহ্ণং ১১। ইতি রাজনির্ঘণ্টঃ॥ গোসঃ১২ গোসঙ্গঃ১৩

ঃ ১৪ উষকং ১৫ উষা ১৬ ঊষা ১৭ বিভাতং ১৮। ইতি শব্দরত্নাবলী ॥ * ॥ তত্র দর্শনীয়া যথা। বৈদ্যঃ পুরোহিতো মন্ত্রী দৈবজ্ঞোঽথ চতুর্থকঃ। প্রভাতকালে দ্রষ্টব্যো নিত্যং স্বশ্রিয়মিচ্ছতা ॥ ইতি রাজবল্লভঃ ॥

প্রভাবঃ (পুং) কোষদণ্ডজতেজঃ। তৎপর্য্যায়ঃ। প্রতাপঃ ২। ইত্যমরঃ॥ কোষো ধনং দণ্ডো দমঃ তদ্ধেতুত্বাৎ সৈন্যমপি দণ্ডঃ তাভ্যাং যত্তেজো জায়তে স প্রতাপঃ প্রভাবশ্চ কথ্যতে। ইতি ভরতঃ॥ শক্তিঃ। তেজঃ। ইতি হেমচন্দ্রঃ ॥ শান্তিঃ। ইতি মেদিনী ॥

প্রভাবজঃ (পুং) শক্তিবিশেষঃ। প্রভাবো বীর্য্যাধিক্যং তজ্জাতঃ। ইত্যমরটীকাসারসুন্দরী ॥ প্রভুত্বসাধকত্বাৎ দণ্ডকোষৌ প্রভুশক্তিঃ। ইতি ভরতঃ ॥

প্রভাবান্ [ৎ] (ত্রি) প্রভাযুক্তঃ। প্রভাশব্দাদস্ত্যর্থে বতুপ্রত্যয়েন পদং নিষ্পন্নং ॥

প্রভাবতী (স্ত্রী) মালিনামকোনবিংশবৃত্তার্হন্মাতা। গণানাং বীণা। ইতি হেমচন্দ্রঃ॥ ত্রয়োদশাক্ষরচ্ছন্দঃ। যথা। যস্যাং প্রিয়ে প্রথমকমক্ষরদ্বয়ং ভুর্য্যন্তথা গুরু নবমং দশান্তিমং। সান্ত্যং ভবেদ্যতিরপি চেদ্‌যুগগ্রহৈঃ সা লক্ষ্যতামমৃতরুতে প্রভাবতী॥ ইতি শ্রুতবোধঃ ॥

প্রভাষঃ (পুং) বসুভেদঃ। ইতি জটাধরঃ ॥ অগ্নি চ। প্রত্যূষশ্চ প্রভাবশ্চ বসবো নামভিঃ স্মৃতাঃ। ইতি গারুড়ে ৬ অধ্যায়ঃ॥ প্রকৃষ্টকথনঞ্চ

প্রভাসঃ (পুং) সোমতীর্থং। ইতি ত্রিকাণ্ডশেষঃ ॥ জৈনগণাধিপবিশেষঃ। ইতি হেমচন্দ্রঃ ॥

প্রভিন্নঃ (পুং) ক্ষরন্মদহস্তী। তৎপর্য্যায়ঃ। গর্জ্জিতঃ ২ মত্তঃ ৩। ইত্যমরঃ॥ ভ্রান্তঃ ৪ মদকলঃ ৫। ইতি রাজনির্ঘণ্টঃ॥ প্রকৃষ্টভেদবিশিষ্টে ত্রি ॥

প্রভুঃ (পুং) বিষ্ণুঃ। ইতি শব্দরত্নাবলী॥ পারদঃ। ইতি রাজনির্ঘণ্টঃ॥ শব্দঃ। ইতি ধরণিঃ ॥

প্রভুঃ (ত্রি) অধিপতিঃ। তৎপর্য্যায়ঃ। স্বামী২ ঈশ্বরঃ ৩ পতিঃ ৪ ঈশিতা ৫ অধিভূঃ ৬ নায়কঃ ৭ নেতা ৮ পরিবৃঢ়ঃ ৯ অধিপঃ ১০। ইত্যমরঃ॥ পালকঃ ১১। ইতি শব্দরত্নাবলী॥ নিত্যঃ। ইতি ধরণিঃ॥ শক্তঃ। ইতি নানার্থরত্নমালা॥

প্রভুতা (স্ত্রী) প্রভুত্বং। ঐশ্বর্য্যং। ইতি হলায়ুধঃ ॥

প্রভুভক্তঃ (পুং) উত্তমঘোটকঃ। যথা। প্রভুভক্তা ভক্তিলাশ্চ কুলীনেষু কুলোৎকটাঃ। ইতি শব্দচন্দ্রিকা॥ স্বাম্যনুরক্তে ত্রি। যথা। বহ্বাশী স্বল্পসন্তুষ্টঃ সুনিদ্রঃ শীঘ্রচেতনঃ। প্রভুভক্তশ্চ শূরশ্চ জ্ঞাতব্যাঃ ষট্ শুনো গুণাঃ॥ ইতি চাণক্যসংগ্রহঃ ॥

প্রভূতং (ত্রি) প্রচুরং। ইত্যমরঃ॥ উদ্গতং। ইতি মেদিনী॥ ভূতং। উন্নতং। ইতি শব্দরত্নাবলী ॥

প্রভূষ্ণুঃ (ত্রি) ক্ষমঃ। শক্তঃ। ইতি হেমচন্দ্রঃ ॥

প্রভৃতি ব্য তদাদিঃ। যথা। ততঃ প্রভৃতি

পিতরঃ পিণ্ডসংজ্ঞাস্তু লেভিরে। ইতি তিথ্যাদিতত্ত্বং ॥

প্রভেদঃ (পুং) ভেদঃ। তৎপর্য্যায়ঃ। প্রকারঃ২ বিশেষঃ ৩ ভিদা ৪ অন্তরং ৫। ইতি জটাধরঃ ॥

প্রভ্রষ্টকং (ক্লী) শিখালম্বিমাল্যং। চূড়াতো লম্বমানমাল্যং। ইত্যমরভরতৌ ॥

প্রমত্তঃ (ত্রি) প্রমাদী। অনবধানতাযুক্তঃ। যথা। মত্তং প্রমত্তমুন্মত্তং সুপ্তং বালং স্ত্রিয়ং জড়ং। প্রপন্নং বিরথং ভীতং ন রিপুং হন্তি ধর্ম্মবিৎ ॥ ইতি শ্রীভাগবতে ১ স্কন্ধে ৭ অধ্যায়ঃ ॥ মত্তং মদ্যাদিনা। প্রমত্তমনবহিতং। উন্মত্তং গ্রহবাতাদিনা। জড়ং অনুদ্যমং। প্রপন্নং শরণাগতং। বিরথং ভগ্নরথং। ইতি শ্রীধরস্বামী ॥ অপরপ্রমত্তো যথা। সন্ধ্যাপূজাবিহীনশ্চ প্রমত্তঃ পতিতঃ স্মৃতঃ। ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ২৭ অধ্যায়ঃ ॥ স চ রাজ্ঞা নাহ্বানয়িতব্যঃ। যথা। মত্তোন্মত্তপ্রমত্তার্ত্তভৃত্যান্নাহ্বানয়েন্নৃপঃ। ইতি মিতাক্ষরা ॥

প্রমথঃ (পুং) ঘোটকঃ। শিবপারিষদঃ। ইতি শব্দরত্নাবলী ॥ স চ ষট্‌ত্রিংশৎকোটিসংখ্যকঃ। যথা। ষট্‌ত্রিংশত্তু সহস্রাণি প্রমথা দ্বিজসত্তমাঃ। তত্রৈকত্র সহস্রাণি ভাগে ষোড়শ সংস্থিতাঃ ॥ নানারূপধরা যে বৈ জটাচন্দ্রার্দ্ধমণ্ডিতাঃ। তে সর্ব্বে সকলৈশ্বর্য্যযুক্তা ধ্যানপরায়ণাঃ ॥ যোগিনো মদমাৎসর্য্যদম্ভাহঙ্কারবর্জ্জিতাঃ। ক্ষীণপাপা মহাভাগাঃ শম্ভোঃ প্রীতিকরাঃ পরাঃ ॥ ন তে পরিগ্রহং রাগং কাঙ্ক্ষন্তিস্ম কদাচন। সংসারবিমুখাঃ সর্ব্বে যতয়ো যোগতৎপরাঃ ॥ ধ্যানাবস্থং মহাদেবং পরিবার্য্য ধৃতব্রতাঃ। কৃত্বা পরিষদং রুচ্যা তিষ্ঠন্তি বিগতক্লমাঃ ॥ যদেব পরমং জ্যোতিশ্চিন্তয়ত্যম্বিকাপতিঃ। তদেব তে পারিষদাঃ সর্ব্বে সংবেষ্টয়ন্তি তং ॥ তে ষোড়শ সমাখ্যাতাঃ কোটয়ো যে ধৃতব্রতাঃ। সিংহব্যাঘ্রাদিসারূপ্যা অনিমাদিসমাযুতাঃ ॥ * ॥ অপরে কামিনঃ শম্ভোঃ সুনর্ম্মসচিবাঃ স্মৃতাঃ। বিচিত্ররূপাভরণা জটাচন্দ্রার্দ্ধমণ্ডিতাঃ ॥ হরস্য তুল্যা রূপেণ বিশদা বৃষভধ্বজাঃ। উমাসদৃশরূপাভিঃ প্রমদাভিঃ সমাগতাঃ ॥ বিচিত্রমাল্যাভরণা দিব্যস্রগ্‌গন্ধভূষণাঃ। উমাসহায়ং ক্রীড়ন্তমনুগচ্ছন্তি ভূষিতাঃ। শৃঙ্গারবেশাভরণা অষ্টৌ তে কোটয়ো গণাঃ ॥ * ॥ অর্দ্ধনারীশ্বরাশ্চান্যে হ্যর্দ্ধনারীশ্বরং হরং। অনুযান্তি মহাভাগাস্তুল্যরূপা হরস্য যে ॥ উমাসহায়ো হি যদা রমতেস্ম সুখং হরঃ। অর্দ্ধনারীশরীরাস্তু দ্বারপালা ভবন্তি তে ॥ আকাশমার্গে গচ্ছন্তমনুগচ্ছন্তি নিত্যশঃ। ধ্যানস্থং পরিচর্য্যন্তি সলিলাদিভিরীশ্বরং ॥ নানাশস্ত্রধরাঃ শম্ভোর্গণাস্তু প্রমথাঃ স্মৃতাঃ। প্রমথ্নন্তি চ যুদ্ধেষু যুধ্যমানান্মহাবলান্। তে বৈ মহাবলাঃ শূরাঃ সংখ্যয়া নবকোটয়ঃ ॥ * ॥ অপরে গায়নাস্তালমৃদঙ্গপণবাদিভিঃ। নৃত্যন্তি বাদ্যং কুর্ব্বন্তো গায়ন্তি মধুরস্বরং ॥ নানারূপধরাস্তে বৈ

সংখ্যয়া কোটয়স্ত্রয়ঃ। সততং চানুগচ্ছন্তি বিচরন্তং মহেশ্বরং ॥ সর্ব্বে মায়াবিনঃ শূরাঃ সর্ব্বে শাস্ত্রার্থপারগাঃ। সর্ব্বে সর্ব্বত্র সর্ব্বজ্ঞাঃ সর্ব্বে সর্ব্বত্রগাঃ সদা ॥ মুহূর্ত্তাৎ সর্ব্বভুবনং গত্বা যান্তি পুনঃ পুনঃ। অনিমাদ্যষ্টকৈশ্বর্য্যযুক্তাস্তে বৈ মহাবলাঃ॥ * ॥ অপরে রুদ্রনামানো জটাচন্দ্রার্দ্ধমণ্ডিতাঃ। দেবেন্দ্রস্য নিয়োগেন বর্ত্তন্তে ত্রিদিবে সদা ॥ তেষাং সংখ্যা চৈককোটিস্তে সর্ব্বে বলবত্তরাঃ। কুর্ব্বন্তি হি সদা সেবাং হরস্য সততং গণাঃ ॥ বিস্ময়ন্তি চ পাপিষ্ঠান্ ধর্ম্মিষ্ঠান্ পালয়ন্তি চ। অনুগৃহ্লন্তি সততং ধৃতপাশুপতব্রতান্ ॥ বিঘ্নাংশ্চ সততং হন্তি যোগিনাং প্রযতাত্মনাং। ষট্‌ত্রিংশৎকোটয়শ্চৈতে হরস্য সকলা গণাঃ ॥ * ॥ বরাহগণনাশার্থং হিতায় জগতাং তথা। শঙ্করস্য চ সেবায়ৈ সমুৎপন্না ইমে গণাঃ॥ বরাহস্য গণান্ দৃষ্ট্বা নরসিংহং তথা হরিং। স্বয়ং সরভরূপঃ সন্ ধ্যায়ন্ নাদং যতোঽকরোৎ ॥ তচ্ছীকরাম্বুতো জাতাস্তত্তেষাং বহুরূপতা। ক্রূরদৃষ্ট্যা ক্রূরযুদ্ধৈঃ ক্রূরকৃত্যৈরিমান্ গণান্ ॥ বরাহস্য হতেত্যেবং যতঃ প্রোক্তং কপর্দ্দিনা। ততস্তে ক্রূরকর্ম্মাণঃ প্রজাতাশ্চ ভয়ঙ্করাঃ॥ ন সদা ক্রূরকর্ম্মাণি তে কুর্ব্বন্তি মহৌজসঃ। দৃষ্টিমাত্রস্য তে ক্রূরাঃ ক্রূরক্রূরাশ্চ কার্য্যতঃ ॥ ফলং জলং তথা পুষ্পং পত্রং মূলং তথৈব চ। নিবেদিতানি ভুঞ্জন্তি বনপর্ব্বতসানুষু॥ আহৃত্যাপি চ ভুঞ্জন্তি পত্রং পুষ্পাদিকঞ্চ যৎ। ভবেদ্ভর্গস্য যদ্ভোগ্যং তদ্ভোগাস্তে মহৌজসঃ॥ আমিষং নাপি চাশ্নন্তি হিত্বা চৈত্রচতুর্দ্দশীং। তত্রামিষং হরো ভুঙ্‌ক্তে চতুর্দ্দশ্যাং মধৌ সদা। ততঃ সর্ব্বে গণাস্তত্র ভুঞ্জন্তে পললান্যপি ॥ হতে বরাহস্য গণে ভর্গমাসাদ্য তে গণাঃ। চতুর্ভাগাঃ স্বয়ং ভূত্বা ভূতং কর্ম্মেতি বৈ জগুঃ ॥ ভূতত্বমভবত্তেষাং চতুর্ভাগবতাং তদা। বচনাৎ পদ্মজাতস্য ভূতগ্রামাস্ততো মতাঃ॥ যো লোকবিদিতঃ পূর্ব্বং ভূতগ্রামশ্চতুর্ব্বিধঃ। যতস্তেভ্যোঽধিকা যত্রৈস্তদ্দৃঢ়গ্রাম উচ্যতে ॥ ইতি বঃ সর্ব্বমাখ্যাতং ভূতাঃ শম্ভুগণা যথা। যদাহারা যদাকারা যৎকৃত্যাস্তে মহৌজসঃ ॥ য ইদং শৃণুয়ান্নিত্যমাখ্যানং যোগমুত্তমং। স দীর্ঘায়ুঃ সদোৎসাহী যোগযুক্তশ্চ জায়তে ॥ ইতি কালিকাপুরাণে পারিষদোৎপত্তির্নাম ২৯ অধ্যায়ঃ ॥

প্রমথনং (ক্লী) বধঃ। ইত্যমরঃ॥ ক্লেশনং। বিলোড়নং। ইতি মথধাত্বর্থদর্শনাৎ ॥

প্রমথা (স্ত্রী) হরীতকী। ইতি মেদিনী ॥

প্রমথাধিপঃ (পুং) শিবঃ। ইত্যমরঃ ॥

প্রমথিতং (ক্লী) নির্জ্জলতক্রং। ইতি রাজনির্ঘণ্টঃ ॥

প্রমদঃ (পুং) হর্ষঃ। ইত্যমরঃ॥ ধুস্তূরফলং। ইতি শব্দচন্দ্রিকা॥ মত্তে ত্রি। ইতি মেদিনী॥

প্রমদকাননং (ক্লী) প্রমদাবনং। ইত্যমরটীকায়াং ভরতঃ ॥

প্রমদবনং (ক্লী) রাজ্ঞোঽন্তঃপুরোচিতবনং। ইত্যমরঃ ॥

প্রমদা (স্ত্রী) উত্তমযোষিৎ। ইতি মেদিনী ॥

প্রমদাকাননং (ক্লী) প্রমদবনং। ইত্যমরটীকায়াং ভরতঃ ॥

প্রমদাবনং (ক্লী) প্রমদবনং। ইতি শব্দরত্নাবলী ॥

প্রমনাঃ [স্] (ত্রি) হর্ষযুক্তঃ। ইত্যমরঃ ॥

প্রময়ঃ (পুং) বধঃ। ইতি হেমচন্দ্রঃ ॥

প্রমা (স্ত্রী) যথার্থজ্ঞানং। তৎপর্য্যায়ঃ। প্রমিতিঃ ২। ইত্যমরঃ ॥ প্রমাণং ৩। ইতি শব্দরত্নাবলী ॥ ন্যায়মতে তদ্বতি তৎপ্রকারকজ্ঞানং। ভ্রমভিন্নজ্ঞানং। অস্যাঃ কারণং গুণঃ। স চ প্রত্যক্ষে বিশেষ্যে বিশেষণস্য সম্বন্ধঃ। অনুমিতৌ সাধ্যবিশিষ্টপক্ষে পরামর্শঃ। শাব্দবোধে যোগ্যতায়াঃ তাৎপর্য্যস্য বা যথার্থজ্ঞানং। উপমিতৌ শক্যে সাদৃশ্যবুদ্ধিঃ। যথা। দোষোঽপ্রমায়া জনকঃ প্রমায়াস্তু গুণো ভবেৎ। প্রত্যক্ষে তু বিশেষ্যেণ বিশেষণবতা সমং ॥ সন্নিকর্ষো গুণস্তু স্যাদথ ত্বনুমিতৌ পুনঃ। পক্ষে সাধ্যবিশিষ্টে চ পরামর্শো গুণো ভবেৎ ॥ শক্যে সাদৃশ্যবুদ্ধিস্তু ভবেদুপমিতৌ গুণঃ। শাব্দবোধে যোগ্যতায়াস্তাৎপর্য্যস্যাথ বা প্রমা ॥ গুণঃ স্যাদ্‌ভ্রমভিন্নস্তু জ্ঞানমত্রোচ্যতে প্রমা। অথবা তৎপ্রকারং যৎ জ্ঞানং তদ্বদ্বিশেষ্যকং ॥ ইতি ভাষাপরিচ্ছেদঃ ॥

প্রমাণং (ক্লী) বিষ্ণুঃ। যথা। প্রমাণং প্রাণনিলয়ঃ প্রাণভৃৎ প্রাণজীবনঃ। ইতি মহাভারতে শান্তিপর্ব্বণি দানধর্ম্মঃ ॥ নিত্যং। মর্য্যাদা। শাস্ত্রং। সত্যবাদী। ইয়ত্তা। হেতুঃ। প্রমাতা। ইতি মেদিনী ॥ প্রমা। ইতি শব্দরত্নাবলী ॥ নিত্যক্লীবৈকত্ববানয়ং শব্দঃ। যথা বেদাঃ প্রমাণং স্মৃতয়ঃ প্রমাণমিত্যাদি ॥ ন্যায়ে তু প্রত্যক্ষানুমানোপমানশব্দাঃ প্রমাণানি। ইত্যত্র বহুবচনান্তোঽপি ॥

প্রমাণবাধিতার্থকঃ (পুং) তর্কবিশেষঃ। তস্য লক্ষণং। আত্মাশ্রয়াদিচতুষ্কান্যপ্রসঙ্গত্বং। স দ্বিবিধঃ। ব্যাপ্তিগ্রাহকঃ বিষয়পরিশোধকশ্চ। তত্রাদ্যো যথা। ধূমো যদি বহ্নিব্যভিচারী স্যাত্তদা বহ্নিজন্যো ন স্যাৎ। দ্বিতীয়স্তু পর্ব্বতো যদি নির্ব্বহ্নিঃ স্যাৎ নির্ধূমঃ স্যাৎ। ইতি তর্কজাগদীশী ॥

প্রমাতামহঃ (পুং) মাতামহপিতা। যথা। পিতামহঃ পিতৃপিতা তৎপিতা প্রপিতামহঃ। মাতুর্মাতামহাদ্যেবং সপিণ্ডাস্তু সনাভয়ঃ ॥ ইত্যমরঃ ॥

প্রমাতামহী (স্ত্রী) প্রমাতামহপত্নী। ইতি স্মৃতিঃ ॥

প্রমাথঃ (পুং) প্রমথনং। বলাৎ হরণং। ইতি পুরাণং ॥

প্রমাথী [ন্] (ত্রি) পীড়নকর্ত্তা। মারণকর্ত্তা। প্রপূর্ব্বমথধাতোঃ কর্ত্তরি ণিন্। প্রমথনশীলঃ। দেহেন্দ্রিয়ক্ষোভক ইত্যর্থঃ। ইতি শ্রীধরস্বামী ॥ যথা। চঞ্চলং হি মনঃ কৃষ্ণ প্রমাথি বলবদ্দৃঢ়ং ॥ অপি চ। ইন্দ্রিয়াণি প্রমাথীনি হরন্তি প্রসভং মনঃ। ইতি শ্রীভগবদ্গীতা ॥

প্রমাদঃ (পুং) অনবধানতা। ইত্যমরঃ ॥ লোভপ্রমাদবিশ্বাসৈঃ পুরুষো নশ্যতে ত্রিভিঃ।

তস্মাল্লোভো ন কর্ত্তব্যঃ প্রমাদো ন ন বিশ্বসেৎ ॥ ইতি গারুড়ে নীতিসারে ১১৫ অধ্যায়ঃ ॥

প্রমাদবান্ [ৎ] (ত্রি) প্রমাদযুক্তঃ। তৎপর্য্যায়ঃ। জাল্মঃ ২ অসমীক্ষ্যকারী ৩ খট্বারূঢ়ঃ ৪। ইতি জটাধরঃ ॥

প্রমাদিকা (স্ত্রী) দূষিতা কন্যা। তৎপর্য্যায়ঃ। সম্বেদা ২ দূষিতা ৩ ধর্ষকারিণী ৪। ইতি শব্দরত্নাবলী ॥

প্রমাদী [ন্] (ত্রি) প্রমাদবিশিষ্টঃ। অনবধানতাযুক্তঃ। যথা। কুরঙ্গমাতঙ্গপতঙ্গভৃঙ্গমীনা হতাঃ পঞ্চভিরেব পঞ্চ। একঃ প্রমাদী স কথং ন হন্যতে যঃ সেবতে পঞ্চভিরেব পঞ্চ ॥ ইত্যুদ্ভটঃ ॥

প্রমাপণং (ক্লী) মারণং। ইত্যমরঃ ॥

প্রমিতঃ (ত্রি) জ্ঞাতঃ। ইতি জটাধরঃ ॥

প্রমিতিঃ (স্ত্রী) প্রমা। ইত্যমরঃ ॥

প্রমীঢ়ঃ (ত্রি) ঘনঃ। মূত্রিতঃ। ইতি মেদিনী ॥

প্রমীতঃ (ত্রি) মৃতঃ। যজ্ঞার্থহতপশুঃ। ইত্যমরঃ ॥

প্রমীলা (স্ত্রী) তন্দ্রী। ইত্যমরঃ ॥

প্রমুখং (ক্লী) তদাত্বং। তৎকালঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

প্রমুখঃ (পুং) পুন্নাগবৃক্ষঃ। ইতি শব্দচন্দ্রিকা ॥

প্রমুখঃ (ত্রি) প্রধানং। শ্রেষ্ঠঃ। ইত্যমরঃ ॥ প্রথমঃ। ইতি মেদিনী ॥ সমূহঃ। মান্যঃ। ইতি শব্দরত্নাবলী ॥

প্রমুৎ } প্রমুদিতঃ } [দ্] (ত্রি) হৃষ্টঃ। ইত্যমরঃ ॥

প্রমেহঃ (পুং) রোগবিশেষঃ। তৎপর্য্যায়ঃ। মেহঃ ২ মূত্রদোষঃ ৩। ইতি রাজনির্ঘণ্টঃ ॥ বহুমূত্রতা ৪। ইতি হেমচন্দ্রঃ ॥ অস্য নিদানং। আস্যাসুখং স্বপ্নসুখং দধীনি গ্রাম্যৌদকানূপরসাঃ পয়াংসি। নবান্নপানং গুড়বৈকৃতঞ্চ প্রমেহহেতুঃ কফকৃচ্চ সর্ব্বং ॥ * ॥ অস্য সম্প্রাপ্তির্যথা। মেদশ্চ মাংসঞ্চ শরীরজঞ্চ ক্লেদং কফো বস্তিগতঃ প্রদূষ্য। করোতি মেহান্ সমুদীর্ণমুষ্ণৈস্তানেব পিত্তং পরিদূষ্য চাপি ॥ * ॥ বাতিকস্য তস্য লক্ষণং। ক্ষীণেষু দোষেম্ববকৃষ্য ধাতূন্ সন্দূষ্য মেহান্ কুরুতেঽনিলশ্চ। * । তস্য কফজাদিভেদেন সাধ্যাদিলক্ষণং যথা। সাধ্যাঃ কফোত্থা দশ পিত্তজাঃ ষট্ যাপ্যা ন সাধ্যঃ পবনাচ্চতুষ্কঃ। সমক্রিয়ত্বাদ্বিষমক্রিয়ত্বান্মহাত্যয়ত্বাচ্চ যথাক্রমন্তে ॥ কফঃ সপিত্তঃ পবনশ্চ দোষা মেদোঽস্রশুক্রাম্বুবসালসীকাঃ। মজ্জা রসৌজঃ পিশিতঞ্চ দূষ্যাঃ প্রমেহিণাং বিংশতিরেব মেহাঃ ॥ * ॥ তস্য পূর্ব্বরূপং। দন্তাদীনাং মলাঢ্যত্বং প্রাগ্‌রূপং পাণিপাদয়োঃ। দাহশ্চিক্কণতা দেহে তৃট্ স্বাদ্বাস্যঞ্চ জায়তে ॥ * ॥ সামান্যং লক্ষণং তেষাং প্রভূতাবিলমূত্রতা। দোষদূষ্যা বিশেষেঽপি তৎসংযোগবিশেষতঃ। মূত্রবর্ণাদিভেদেন ভেদো মেহেষু কল্প্যতে ॥ * ॥ ক্রমেণ কফজানাং দশানাং লক্ষণানি। অচ্ছং বহুসিতং শীতং নির্গন্ধমুদকোপমং। মেহত্যুদকমেহেন কিঞ্চিদাবিলপিচ্ছিলং ॥ ইক্ষো রসমিবাত্যর্থং মধুরং চেক্ষুমেহতঃ। সান্দ্রী ভবেৎ

পর্য্যুষিতং সান্দ্রমেহেন মেহতি॥ সুরামেহী সুরাতুল্যমুপর্য্যচ্ছমধোঘনং। সংহৃষ্টলোমা পিষ্টেন পিষ্টবদ্বহুলং সিতং॥ শুক্রাভং শুক্রমিশ্রং বা শুক্রমেহী প্রমেহতি। মূর্ত্তাণূন্ সিকতামেহী সিকতারূপিণো মলান্॥ শীতমেহী সুবহুশো মধুরং ভৃশশীতলং। শনৈঃ শনৈঃ শনৈর্মেহী মন্দং মন্দং প্রমেহতি॥ লালাতন্তুযুতং মূত্রং লালামেহেন পিচ্ছিলং।*। ক্রমেণ পিত্তজানাং ষণ্ণাং লক্ষণানি। গন্ধবর্ণরসস্পর্শৈঃ ক্ষারেণ ক্ষারতোয়বৎ॥ নীলমেহেন নীলাভং কালমেহী মসীনিভং। হারিদ্রমেহী কটুকং হরিদ্রাসন্নিভং দহৎ॥ বিস্রং মাঞ্জিষ্ঠমেহেন মঞ্জিষ্ঠাসলিলোপমং। বিস্রমুষ্ণং সলবণং রক্তাভং রক্তমেহতঃ॥*॥ ক্রমেণ বাতজানাং চতুর্ণাং লক্ষণানি। বসামেহী বসামিশ্রং বসাভং মূত্রয়েন্মুহুঃ। মজ্জাভং মজ্জমিশ্রং বা মজ্জমেহী মুহুর্মুহুঃ॥ কষায়ং মধুরং রূক্ষং ক্ষৌদ্রমেহং বদেদ্বুধঃ। হস্তী মত্ত ইবাজস্রং মূত্রং বেগবিবর্জ্জিতং। সলসীকং বিবদ্ধঞ্চ হস্তিমেহী প্রমেহতি॥*॥ কফজাদিভেদেন তেষামুপদ্রবাঃ। অবিপাকোঽরুচিচ্ছর্দ্দির্নিদ্রানাশঃ সপীনসঃ। উপদ্রবাঃ প্রজায়ন্তে মেহানাং কফজন্মনাং॥ বস্তিমেহনয়োস্তোদো মুষ্কাবদরণং জ্বরঃ। দাহস্তৃষ্ণাম্লিকা মূর্চ্ছা বিড়্ভেদাঃ পিত্তজন্মনাং॥ বাতজানামুদাবর্ত্তঃ কম্পহৃদ্গ্রহলোলতাঃ। শূলমুন্নিদ্রতা শোষঃ কাসঃ শ্বাসশ্চ জায়তে॥*॥ অরিষ্টলক্ষণং। যথোক্তোপদ্রবারিষ্টমতিপ্রস্রুতমেব চ। পিড়কাপীড়িতং গাঢ়ং প্রমেহো হন্তি মানবং॥*॥ জাতঃ প্রমেহী মধুমেহিনো বা ন সাধ্যরোগঃ স হি বীজদোষাৎ। যে চাপি কেচিৎ কুলজা বিকারা ভবন্তি তাংশ্চ প্রবদন্ত্যসাধ্যান্॥*॥ সর্ব্ব এব প্রমেহাস্তু কালেনাপ্রতিকারিণঃ। মধুমেহত্বমায়ান্তি তদাসাধ্যা ভবন্তি হি॥ মধুমেহে মধুসমং জায়তে স কিল দ্বিধা। ক্রুদ্ধে ধাতুক্ষয়াদ্বায়ৌ দোষাবৃতপথেঽথবা॥ আবৃতো দোষলিঙ্গানি সোঽনিমিত্তং প্রদর্শয়ন্। ক্ষীণঃ ক্ষণাৎ ক্ষণাৎ পূর্ণো ভজতে কৃচ্ছ্রসাধ্যতাং॥ মধুরং যচ্চ মেহেষু প্রায়ো মধ্বিব মেহতি। সর্ব্বেঽপি মধুমেহাখ্যা মাধুর্য্যাচ্চ তনোরতঃ॥*॥ প্রমেহিণো যদা মূত্রমনাবিলমপিচ্ছলং। বিশদং তিক্তকটুকং তদারোগ্যং প্রচক্ষতে॥ ইতি মাধবকরঃ॥ অস্য দশবিধপিড়কাঃ পিড়কাশব্দে দ্রষ্টব্যাঃ॥*॥ অথ প্রমেহস্য চিকিৎসা। শ্যামাককোদ্রবোদ্দালা গোধূমচণকাবটী। কুলত্থাঃ কথিতা ভোজ্যে পুরাণা মেহিনাং হিতাঃ॥ যবান্নবিকৃতির্মুদ্গাঃ শালয়ঃ ষষ্ঠিকাস্তথা। তথা তিক্তানি শাকানি জাঙ্গলাঃ পক্ষিণো মৃগাঃ॥ উদ্দালো বনকোদ্রবঃ॥*॥ প্রমেহী গুড়দুগ্ধাজ্যতৈলতক্রসুরাঃ সদা। অম্লেক্ষুরসপিষ্টান্নানূপমাংসানি বর্জ্জয়েৎ॥*॥ মুস্তাহরীতকীলোধ্রৈঃ কট্ফলেন কৃতং সৃতং। পীতং মধুযুতং হন্তি প্রমেহং কফ-

হেতুকং ॥ * ॥ পটোলনিম্বামলকামৃতানাং পিবেৎ কষায়ং মধুনা সমেতং। উশীর-লোধ্রার্জ্জুনচন্দনানাং তথা পিবেৎ পিত্তনিমিত্তমেহী ॥ * ॥ পাঠাশিরীষদুঃস্পর্শা-জাতিতিন্দুককিংশুকৈঃ। কপিত্থস্য ভিষক্ ক্বাথং হস্তিমেহে প্রযোজয়েৎ ॥*॥ পাঠাদিভিঃ সহিতস্য কপিত্থস্য ক্বাথং। গুড়ূচ্যাঃ স্বরসঃ পেয়ো মধুনা সর্ব্বমেহজিৎ। হরিদ্রাচূর্ণযুক্তো বা রসো ধাত্র্যাঃ সমাক্ষিকঃ ॥ মধুনা ত্রৈফলং চূর্ণমথবাশ্মজতূদ্ভবং। লোহজং বাভয়োত্থং বা লিহ্যান্মেহনিবৃত্তয়ে ॥ * ॥ চন্দ্রপ্রভাবচামুস্তা-ভূনিম্বসুরদারবঃ। হরিদ্রাতিবিষা দার্ব্বী পিপ্পলীমূলচিত্রকং ॥ ত্রিবিদন্তী পত্রকঞ্চ ত্বগেলা বংশলোচনা। প্রত্যেকং কর্ষমাত্রাণি কুর্য্যাদেতানি বুদ্ধিমান্ ॥ ধান্যকং ত্রিফলা চব্যং বিড়ঙ্গং গজপিপ্পলী। স্বর্ণমাক্ষিকং ব্যোষং দ্বৌ ক্ষারৌ লবণত্রয়ং ॥ এতানি টঙ্কমাত্রাণি সংগৃহ্লীয়াৎ পৃথক্ পৃথক্। দ্বিকর্ষহতলোহং স্যাচ্চতুষ্কর্ষা সিতা ভবেৎ ॥ শিলাজত্বষ্টকর্ষং স্যাদষ্টৌ কর্ষাশ্চ গুগ্গুলোঃ। বিধিনা যোজিতৈরেতৈঃ কর্ত্তব্যা গুটিকা শুভা ॥ চন্দ্রপ্রভাতিবিখ্যাতা সর্ব্বরোগপ্রণাশিনী। নিহন্তি বিংশতিং মেহান্ কৃচ্ছ্রমষ্টবিধং তথা ॥ চতস্রশ্চাশ্মরীস্তদ্বন্মূত্রাঘাতাংস্ত্রয়োদশ। অণ্ডবৃদ্ধিং পাণ্ডুরোগং কামলাঞ্চ হলীমকং ॥ কাসং শ্বাসং তথা কুষ্ঠমগ্নিমান্দ্যমরোচকং। বাতপিত্তকফব্যাধীন্ বল্যা বৃষ্যা রসায়নী ॥ সমারাধ্য শিবং তস্মাৎ প্রযত্নাদ্-গুটিকামিমাং। প্রাপ্তবাংশ্চন্দ্রমা যস্মাৎ তস্মাচ্চন্দ্রপ্রভা স্মৃতা ॥ চন্দ্রপ্রভাকচূর ইতি লোকে। ব্যোষং ত্রিকটু। দ্বৌ ক্ষারৌ সর্জিকাযবক্ষারৌ। লবণত্রয়ং। সৈন্ধবং রুচকঞ্চাপি বিড়ঞ্চ লবণত্রয়মিতি। চন্দ্রপ্রভাদির্ব্বটিকা ॥ * ॥ প্রমেহপিড়কানাং প্রাক্ কার্য্যং রক্তবিমোচনং। পাটনঞ্চ বিপক্কানাং ততো ব্রণবিধিঃ স্মৃতঃ ॥ ইতি ভাবপ্রকাশঃ ॥

প্রমোচনী (স্ত্রী) গবাক্ষী। গোড়ুম্বা। ইতি জটাধরঃ ॥ প্রকৃষ্টমোচনকর্ত্তরি ত্রি ॥

প্রমোদঃ (পুং) হর্ষঃ। ইত্যমরঃ ॥

প্রমোদিতঃ (পুং) কুবেরঃ। ইতি শব্দমালা ॥ প্রমোদযুক্তে ত্রি ॥

প্রমোদিনী (স্ত্রী) জিঙ্গিনীবৃক্ষঃ। ইতি ভাবপ্রকাশঃ ॥ প্রকৃষ্টহর্ষযুক্তা চ ॥

প্রম্লোচা (স্ত্রী) অপ্সরোবিশেষঃ। যথা। তত্র তস্মান্নদীমধ্যাৎ সমুত্তস্থৌ মনোরমা। প্রম্লোচা নাম তন্বঙ্গী তৎসমীপে বরাপ্সরাঃ ॥ ইতি গারুড়ে ৯০ অধ্যায়ঃ ॥

প্রযতঃ (ত্রি) পবিত্রঃ। ইত্যমরঃ ॥

প্রযত্নঃ (পুং) প্রকৃষ্টযত্নঃ। ন্যায়মতে স চ ত্রিবিধঃ। যথা। প্রবৃত্তিশ্চ নিবৃত্তিশ্চ তথা জীবনকারণং। এবং প্রযত্নত্রৈবিধ্যং তান্ত্রিকৈঃ পরিদর্শিতং ॥ চিকীর্ষা কৃতিসাধ্যেহষ্টসাধনত্বমতিস্তথা। উপাদানস্য চাধ্যক্ষং প্রবৃত্তৌ জনকং ভবেৎ ॥ নিবৃত্তিস্তু ভবেদ্দ্বেষা দ্বিষ্টসাধনতাধিয়ঃ। যত্নো জীবনযোনিস্তু সর্ব্বদাতীন্দ্রিয়ো ভবেৎ ॥

শরীরে প্রাণসঞ্চারে কারণং তৎ প্রকীর্ত্তিতং। ইতি ভাষাপরিচ্ছেদঃ ॥

প্রযত্নবান্ [ৎ] (ত্রি) প্রকৃষ্টযত্নবিশিষ্টঃ। তৎপর্য্যায়ঃ। প্রতিযত্নঃ ২। ইতি ত্রিকাণ্ডশেষঃ ॥

প্রযস্তং (ত্রি) ঘৃতচতুর্জাতাদিনা দ্রব্যেণ প্রযত্নসুসংস্কৃতব্যঞ্জনাদি। ইত্যমরঃ ॥

প্রয়াগঃ (পুং) তীর্থভেদঃ। যজ্ঞঃ। ইন্দ্রঃ। অশ্বঃ। ইতি মেদিনী ॥ * ॥ অথ প্রয়াগমাহাত্ম্যং। ততো গচ্ছেত ধর্ম্মজ্ঞ প্রয়াগমৃষিসম্মতং। যত্র ব্রহ্মাদয়ো দেবা দিশশ্চ সদিগীশ্বরাঃ ॥ লোকপালাশ্চ সিদ্ধাশ্চ নিরতাঃ পিতরস্তথা। সনৎকুমারপ্রমুখাস্তথৈব চ মহর্ষয়ঃ ॥ তথা নাগাঃ সুপর্ণাশ্চ সিদ্ধাশ্চ ক্রতবস্তথা। গন্ধর্ব্বাপ্সরসশ্চৈব সরিতঃ সাগরাস্তথা ॥ হরিশ্চ ভগবানাস্তে প্রজাপতিভিরাবৃতঃ। তত্র ত্রীণ্যগ্নিকুণ্ডানি তয়োর্মধ্যে তু জাহ্নবী ॥ প্রয়াগাৎ সমতিক্রান্তা সর্ব্বতীর্থপুরস্কৃতা। তপনস্য সুতা তত্র ত্রিষু লোকেষু বিশ্রুতা॥ যমুনা গঙ্গয়া সার্দ্ধং সঙ্গতা লোকভাবিনী। গঙ্গাযমুনয়োর্ম্মধ্যে পৃথিব্যা জঘনং স্মৃতং ॥ প্রয়াগং জঘনস্যান্তমুপস্থমৃষয়ো বিদুঃ। প্রয়াগং স প্রতিষ্ঠানং কম্বলাশ্বতরাবুভৌ॥ তীর্থং ভোগবতী চৈব বেদী প্রোক্তা প্রজাপতেঃ। তত্র বেদাশ্চ যজ্ঞাশ্চ মূর্ত্তিমন্তো মহামতে ॥ প্রজাপতিমুপাসন্তে ঋষয়শ্চ মহাব্রতাঃ। যজন্তে ক্রতুভির্দ্দেবাস্তথা চক্রধরাঃ সদা ॥ ততঃ পুণ্যতমং নাস্তি ত্রিষু লোকেষু সূতজ। প্রয়াগং সর্ব্বতীর্থেভ্যঃ প্রবদন্ত্যধিকং দ্বিজাঃ ॥ শ্রবণাৎ তস্য তীর্থস্য নামসঙ্কীর্ত্তনাদপি। মৃত্তিকালভনাদ্বাপি সর্ব্বপাপৈঃ প্রমুচ্যতে তত্রাভিষেকং যঃ কুর্য্যাৎ সঙ্গমে সংশিত ব্রতঃ। পুণ্যং স মহদাপ্নোতি রাজসূয়াশ্বমেধয়োঃ ॥ এষা যজনভূমির্হি দেবানামপি সৎকৃতা। দত্তং তত্র স্বল্পমপি মহদ্ভবতি সূতজ ॥ ন বেদবচনাত্তাত ন লোকবচনাদপি। মতিরুৎক্রমণং যাতি প্রয়াগমরণং প্রতি ॥ দশতীর্থসহস্রাণি ষষ্টিকোট্যস্তথাপরাঃ। তেষাং সান্নিধ্যমত্রৈব কীর্ত্তিতং সূতনন্দন ॥ যৎ পুণ্যং ত্রিষু লোকেষু বেদবিদ্যাসু যৎ ফলং। স্নাতমাত্রস্য তৎ পুণ্যং গঙ্গাযমুনসঙ্গমে ॥ ইতি পাদ্মে ভূমিখণ্ডে ১২৭ অধ্যায়ঃ ॥ * ॥ অপি চ। পুত্রকামঃ প্রয়াগে হি স্নাত্বা পুণ্যে সিতাসিতে। ধনকামঃ পুরা শক্র স্নাতো হ্যত্র দ্বিজোত্তম ॥ ধনদস্য নিধীন্ সর্ব্বান্ তস্মাজ্জহার মায়য়া। নারায়ণো নরেণৈব বর্ষাণামযুতং পুরা ॥ অনাহারঃ প্রয়াগেঽস্মিন্ কৃতবান্ পুণ্যমুত্তমং। সিদ্ধিঞ্চ সাধকা যান্তি প্রয়াগেঽস্মিন্ দ্বিজোত্তম ॥ ইতি পাদ্মোত্তরখণ্ডে ২৩ অধ্যায়ঃ ॥ * ॥ অপি চ। যুধিষ্ঠির উবাচ। ভগবন্ শ্রোতুমিচ্ছামি প্রয়াগগমনং ফলং। মৃতানাং কা গতিস্তত্র স্নাতানামপি কিং ফলং ॥ যে বসন্তি প্রয়াগে তু ব্রূহি তেষান্তু কিংফলং। ভবতা বিদিতং হ্যেতৎ তন্মে ব্রূহি নমোঽস্তুতে ॥ মার্কণ্ডেয় উবাচ। কথয়িষ্যামি তে বৎস যা চেষ্টা যচ্চ

তৎফলং। পৃষ্ট্বা মহর্ষিভিঃ সম্যক্ কথ্যমানং ময়া শ্রুতং॥ যত্র স্নাত্বা দিবং যান্তি যে মৃতাস্তেঽপুনর্ভবাঃ। যত্র ব্রহ্মাদয়ো দেবা রক্ষাং কুর্ব্বন্তি সঙ্গতাঃ॥ বহূন্যন্যানি তীর্থানি সর্ব্বপাপহরাণি চ। কথিতুং নেহ শক্নোমি বহুবর্ষশতৈরপি॥ সংক্ষেপেণ প্রবক্ষ্যামি প্রয়াগস্যেহ কীর্ত্তনং। যষ্টির্ধন্বিসহস্রাণি যক্ষা রক্ষন্তি জাহ্নবীং॥ যমুনাং রক্ষতি সদা সবিতা সপ্তিবাহনঃ। প্রয়াগন্তু বিশেষেণ স্বয়ং রক্ষতি বাসবঃ॥ মণ্ডলং রক্ষতি হরিঃ সর্ব্বদেবৈশ্চ সম্মিতং। ন্যগ্রোধং রক্ষতে নিত্যং শূলপাণির্মহেশ্বরঃ॥ স্থানং রক্ষন্তি বৈ দেবাঃ সর্ব্বে পাপহরং শুভং। স্বকর্ম্মণাবৃতা লোকা নৈব গচ্ছন্তি তৎপদং॥ স্বল্পমল্পতরং পাপং যদা তস্য নরাধিপ। প্রয়াগং স্মরমাণস্য সর্ব্বমায়াতি সংক্ষয়ং॥ দর্শনাত্তস্য তীর্থস্য নামসংকীর্ত্তনাদপি। মৃত্তিকালভনাদ্বাপি নরঃ পাপাৎ প্রমুচ্যতে॥ পঞ্চকুণ্ডানি রাজেন্দ্র যেষাং মধ্যে তু জাহ্নবী। প্রয়াগং বিশতঃ পুংসঃ পাপং নশ্যতি তৎক্ষণাৎ॥ যোজনানাং সহস্রেষু গঙ্গাং যঃ স্মরতে নরঃ। অপি দুষ্কৃতকর্ম্মাসৌ লভতে পরমাং গতিং॥ কীর্ত্তনান্মুচ্যতে পাপাৎ দৃষ্ট্বা ভদ্রাণি পশ্যতি॥ ব্যাধিতো যদি বা হীনঃ ক্রুদ্ধো বাপি ভবেন্নরঃ। গঙ্গাযমুনমাসাদ্য ত্যজেৎ প্রাণান্ প্রযত্নতঃ॥ দীপ্তকাঞ্চনবর্ণাভৈর্বিমানৈর্ভানুবর্ণিভিঃ। ঈপ্সিতান্ লভতে কামান্ বদন্তি মুনিপুঙ্গবাঃ॥ সর্ব্বরত্নময়ৈর্দ্দিব্যৈর্নানাধ্বজসমাকুলৈঃ। বরাঙ্গনাসমাকীর্ণৈর্মোদন্তে শুভলক্ষণৈঃ॥ গীতবাদিত্রনির্ঘোষৈঃ প্রসুপ্তঃ প্রতিবুধ্যতে। যাবন্ন স্মরতে জন্ম তাবৎ স্বর্গে মহীয়তে॥ তস্মাৎ স্বর্গাৎ পরিভ্রষ্টঃ ক্ষীণকর্ম্মা নরোত্তমঃ। হিরণ্যরত্নসংপূর্ণে সমৃদ্ধে জায়তে কুলে॥ তদেব স্মরতে তীর্থং স্মরণাত্তত্র গচ্ছতি॥ দেশস্থো যদি বারণ্যে বিদেশে যদি বা গৃহে। প্রয়াগং স্মরমাণস্তু যস্তু প্রাণান্ পরিত্যজেৎ। ব্রহ্মলোকমবাপ্নোতি বদন্তি মুনিপুঙ্গবাঃ॥ সর্ব্বকামফলা বৃক্ষা মহী যত্র হিরণ্ময়ী। ঋষয়ো মুনয়ঃ সিদ্ধাস্তত্র লোকে স গচ্ছতি॥ স্ত্রীসহস্রাকুলে রম্যে মন্দাকিন্যাস্তটে শুভে। মোদতে মুনিভিঃ সার্দ্ধং স্বকৃতেনেহ কর্ম্মণা॥ সিদ্ধচারণগন্ধর্ব্বৈঃ পূজ্যতে দিবি দৈবতৈঃ। অথ স্বর্গাৎ পরিভ্রষ্টো জম্বুদ্বীপপতির্ভবেৎ॥ অতঃ শুভানি কর্ম্মাণি চিন্ত্যমানঃ পুনঃ পুনঃ। গুণবান্ বিত্তসম্পন্নো ভবতীহ ন সংশয়ঃ। কর্ম্মণা মনসা বাচা সত্যধর্ম্মপ্রতিষ্ঠিতঃ॥ গঙ্গাযমুনয়োর্মধ্যে যস্তু গ্রামং প্রযচ্ছতি। সুবর্ণমণিমুক্তাং বা তথৈবান্যৎ প্রতিগ্রহং॥ স্বকার্য্যে পিতৃকার্য্যে বা দেবতাভ্যর্চ্চনেঽপি বা। নিষ্ফলং তস্য তত্তীর্থং যাবৎ তদ্ধনমশ্নুতে॥ অতস্তীর্থে ন গৃহ্লীয়াৎ পুণ্যেষ্বায়তনেষু চ॥ কপিলাং পাটলাভান্তু যস্তু ধেনুং প্রযচ্ছতি। যাবদ্রোমাণি তস্যা বৈ সন্তি গাত্রেষু সত্তম। তাবদ্বর্ষসহস্রাণি রুদ্রলোকে

মহীয়তে ॥ ইতি কৌর্ম্মে প্রয়াগমাহাত্ম্যে ৩৩ অধ্যায়ঃ ॥ ॥ তত্র মুণ্ডনবিধির্যথা। গঙ্গায়াং ভাস্করক্ষেত্রে মাতাপিত্রোর্গুরৌ মৃতে। আধানে সোমপানে চ বপনং সপ্তসু স্মৃতং ॥ ইতি স্মৃতিসমুচ্চয়লিখিত-বচনং প্রয়াগাবচ্ছিন্নগঙ্গায়াং বিধায়কং। ভাস্করক্ষেত্রং প্রয়াগঃ। অপি চ। প্রয়াগমধিকৃত্য। কেশানাং যাবতী সংখ্যা ছিন্নানাং জাহ্নবীজলে। তাবদ্বর্ষসহস্রাণি স্বর্গলোকে মহীয়তে ॥ প্রয়াগে স্ত্রীণামপি মুণ্ডনং ন তু কেশানাং দ্ব্যঙ্গুলচ্ছেদনমাত্রং। যথা। কেশমূলমুপাশ্রিত্য সর্ব্বপাপানি দেহিনাং। তিষ্ঠন্তি তীর্থস্নানেন তস্মাত্তান্যত্র বাপয়েৎ ॥ প্রয়াগে মুণ্ডনাকরণে দোষোঽপি। গঙ্গায়াং ভাস্করক্ষেত্রে মুণ্ডনং যো ন কারয়েৎ। স কোটিকুলসংযুক্ত আকল্পং রৌরবে বসেৎ ॥ ইতি প্রায়শ্চিত্ততত্ত্বং ॥

প্রয়াগভয়ঃ (পুং) ইন্দ্রঃ। ইতি শব্দমালা ॥

প্রয়াণং (ক্লী) গমনং। ইতি হলায়ুধঃ ॥ যথা। উদ্ঘাটিতনবদ্বারে পঞ্জরে বিহগোঽনিলঃ। যত্তিষ্ঠতি তদাশ্চর্য্যং প্রয়াণে বিস্ময়ঃ কুতঃ ॥ ইত্যুদ্ভটঃ ॥ তৎপর্য্যায়ঃ। প্রস্থানং ২ গমনং ৩ ব্রজ্যা ৪ অভিনির্যাণং ৫ প্রয়াণকং ৬। ইতি হেমচন্দ্রঃ ॥ অত্র বর্ণনীয়ানি যথা। ভেরীনিস্বনঃ ১ ভূকম্পঃ ২ বলধূলিঃ ৩ করভঃ ৪ বৃষঃ ৫ ধ্বজঃ ৬ ছত্রং ৭ বণিক্ ৮ শকটং ৯ রথঃ ১০। ইতি কবিকল্পলতা ॥

প্রয়াতঃ (পুং) সৌপ্তিকঃ। ভৃগুঃ। ইতি হেমচন্দ্রঃ ॥ গতে ত্রি ॥

প্রয়ামঃ (পুং) নীবাকঃ। ইত্যমরঃ ॥ মহার্ঘ্যহেতোর্ধান্যাদিষু . জনানামাদরাতিশয়ে তুলাধরণাধিক্যং। ইতি কেচিৎ। ক্রয়াদরঃ। ইতি কেচিৎ। মূল্যাধিক্যহেতোনিশ্চয়েন পরিচ্ছেদনং। ইতি কেচিৎ। ইতি ভরতঃ ॥

প্রয়াসঃ (পুং) প্রযত্নঃ। তৎপর্য্যায়ঃ। শ্রমঃ ২ ক্লমঃ ৩ ক্লেশঃ ৪ পরিশ্রমঃ ৫ আয়াসঃ ৬ ব্যায়ামঃ ৭। ইতি হেমচন্দ্রঃ ॥

প্রযুক্তং (ত্রি) প্রকর্ষেণ যুক্তং। যথা। গুণপ্রযুক্তাঃ পরমর্ম্মভেদিনঃ শরা ইবাবংশভবা ভবন্তি হি। তথাবিধা যে তু বিশুদ্ধবংশজা ব্রজন্তি চাপা ইব তেঽতিনম্রতাং ॥ ইত্যুদ্ভটঃ ॥ প্রকৃষ্টসমাধিযুক্তং। প্রকৃষ্টসংযোগবিশিষ্টং। প্রকৃষ্টনিন্দাযুক্তং। প্রকৃষ্টসংযমবিশিষ্টং। প্রপূর্ব্বযুগধাত্বর্থদর্শনাৎ। হেতৌ ক্লী। যথা। ন চ সমবায়িনিমিত্তাভাবপ্রযুক্তো নিয়মেন কার্য্যাভাবঃ কিন্ত্বসমবায়িকারণাভাবপ্রযুক্তোঽপি। ইতি রক্ষিতঃ ॥

প্রযুক্তিঃ (স্ত্রী) প্রয়োজনং। প্রপূর্ব্বযুজধাতোর্ভাবে ক্তিঃ। যথা। তরুণ্যো বৃষলী ভার্য্যা প্রবীরং পুত্রকাম্যতি। ঋদ্ধস্য রাজমাতঙ্গা ইতি ন স্যুঃ প্রযুক্তয়ঃ ॥ ইতি প্রাঞ্চঃ ॥

প্রযুতং (ক্লী) নিযুতং। ইতি হেমচন্দ্রঃ ॥

প্রযুদ্ধার্থঃ (পুং) প্রত্যুৎক্রমঃ। ইতি প্রয়োগার্থশব্দটীকায়াং রমানাথঃ ॥

প্রয়োক্তা [ঋ] (ত্রি) প্রয়োগকর্ত্তা । যথা । উত্তমর্ণাধমর্ণৌ দ্বৌ প্রযোক্তৃগ্রাহকৌ ক্রমাৎ । ইত্যমরঃ ॥

প্রয়োগঃ (পুং) কার্ম্মণং । বশীকরণং । প্রযুক্তিঃ । নিদর্শনং । ইতি মেদিনী ॥ ঘোটকঃ । ইতি শব্দমালা ॥

প্রয়োগার্থঃ (পুং) প্রধানপ্রয়োগানুকূলং প্রয়োজনানুষ্ঠানং । তৎপর্য্যায়ঃ। প্রত্যুৎক্রমঃ ২ । ইত্যমরঃ ॥

প্রয়োগী [ন্] (ত্রি) প্রয়োগযুক্তঃ । প্রপূর্ব্বযুজধাতোর্ণিন্ ॥

প্রযোজকঃ (ত্রি) প্রয়োগকর্ত্তা । নিয়োগকর্ত্তা । স্বতন্ত্রতৎপ্রযোজকৌ কর্ত্তা । ইতি সুপদ্মব্যাকরণং ॥

প্রয়োজনং (ক্লী) কার্য্যং । হেতুঃ । ইতি মেদিনী ॥ সর্ব্বস্যৈব হি শাস্ত্রস্য কর্ম্মণো বাপি কস্যচিৎ । যাবৎ প্রয়োজনং নোক্তং তাবৎ কেন প্রগৃহ্য তে ॥ সিদ্ধার্থং সিদ্ধসম্বন্ধং শ্রোতুং শ্রোতা প্রবর্ত্ততে । গ্রন্থাদৌ তেন বক্তব্যঃ সম্বন্ধঃ সপ্রয়োজনঃ ॥ ইতি প্রাঞ্চঃ ॥

প্রযোজ্যঃ (ত্রি) প্রযোক্তুং শক্যঃ । ভৃত্যঃ। ইতি মুগ্ধবোধব্যাকরণং ॥ মূলধনে ক্লী ॥

প্ররূঢ়ঃ (পুং) জঠরং । ইতি মেদিনী ॥

প্ররূঢ়ঃ (ত্রি) বদ্ধমূলঃ । ইতি মেদিনী ॥ জাতঃ। প্রবৃদ্ধঃ। ইতি শব্দরত্নাবলী ॥

প্ররোহঃ (পুং) অঙ্কুরঃ । ইতি হেমচন্দ্রঃ ॥

প্রলপিতঃ (ত্রি) কথিতঃ । প্রপূর্ব্বলপধাতোঃ কর্ম্মণি ক্তঃ । যথা । জনস্থানে ভ্রান্তং কনকমৃগতৃষ্ণান্ধিতধিয়া বচো বৈদেহীতি প্রতিপদমুদশ্রু প্রলপিতং । ইতি কাব্যপ্রকাশঃ ॥

প্রলম্বঃ (পুং) দৈত্যভেদঃ । স চ দনুপুত্রঃ মনুষ্যবধ্যঃ । যথা । একাক্ষ ঋষভো রিষ্টঃ প্রলম্বনরকৌ তথা । ইন্দ্রবাধনকেশী চ পুরঃ শঙ্খোঽথ ধেনুকঃ ॥ গবেষ্টিকো গবাক্ষশ্চ তালকেতুশ্চ বীর্য্যবান্। এতে মনুষ্যবধ্যাস্তু দনোঃ পুত্রান্বয়াঃ স্মৃতাঃ ॥ ইত্যগ্নিপুরাণং । ত্রপুষঃ। পয়োধরঃ । লতাঙ্কুরঃ। শাখা। হারভেদঃ। প্রলম্বনং । ইতি মেদিনী ॥

প্রলম্বঘ্নঃ (পুং) বলরামঃ । ইত্যমরঃ ॥

প্রলম্বভিৎ (পুং) বলরামঃ । ইতি হেমচন্দ্রঃ ॥

প্রলম্বাণ্ডঃ (পুং) দীর্ঘাণ্ডকোষবিশিষ্টঃ। তৎপর্য্যায়ঃ । পুষ্করঃ ২ । ইতি হেমচন্দ্রঃ ॥

প্রলম্বিতঃ (ত্রি) প্রকর্ষেণ লম্বিতমাল্যাদিঃ । প্রপূর্ব্বলম্বধাতোঃ কর্ত্তরি ক্তঃ ॥

প্রলয়ঃ (পুং) প্রলীয়তে ক্ষীয়তে জগদস্মিন্ সঃ । তৎপর্য্যায়ঃ । সম্বর্ত্তঃ ২ কল্পঃ ৩ ক্ষয়ঃ ৪ কল্পান্তঃ ৫ । ইত্যমরঃ ॥ লয়ঃ ৬ সংক্ষয়ঃ ৭ বিলয়ঃ ৮। ইতি শব্দরত্নাবলী ॥ প্রতিসর্গঃ ৯ প্রতিসঞ্চরঃ ১০। স চ নিত্যনৈমিত্তিকপ্রাকৃতাত্যন্তিকভেদেন চতুর্দ্ধা । যথা । কূর্ম্ম উবাচ । নিত্যং নৈমিত্তিকঞ্চৈব প্রাকৃতাত্যন্তিকৌ তথা। চতুর্ধায়ং পুরাণেঽস্মিন্ প্রোচ্যতে প্রতিসঞ্চরঃ ॥ * ॥ নিত্যো যথা । যোঽয়ং সংদৃশ্যতে নূনং নিত্যং লোকে ক্ষয়স্ত্বিহ । নিত্যং সংকীর্ত্ত্যতে নাম্না মুনিভিঃ প্রতিসঞ্চরঃ ॥ * ॥ নৈমিত্তিকো যথা । ব্রাহ্মো

নৈমিত্তিকো নাম কল্পান্তে যো ভবিষ্যতি। ত্রৈলোক্যস্যাস্য কথিতঃ প্রতিসর্গো মনীষিভিঃ ॥ * ॥ প্রাকৃতো যথা। মহদাদ্যং বিশেষান্তং যদা সংযাতি সংক্ষয়ং। প্রাকৃতঃ প্রতিসর্গোঽয়ং প্রোচ্যতে কালচিন্তকৈঃ ॥ * ॥ আত্যন্তিকো যথা। জ্ঞানাদাত্যন্তিকঃ প্রোক্তো যোগিনঃ পরমাত্মনি। প্রলয়ঃ প্রতিসর্গোঽয়ং কালচিন্তাপরৈর্দ্বিজৈঃ ॥ আত্যন্তিকশ্চ কথিতঃ প্রলয়ো লয়সাধনঃ। *। নৈমিত্তিকপ্রলয়বিস্তারো যথা। নৈমিত্তিকমিদানীং বঃ কীর্ত্তয়িষ্যে সমাসতঃ॥ চতুর্যুগসহস্রান্তে সংপ্রাপ্তে প্রতিসঞ্চরে। আত্মসংস্থাঃ প্রজাঃ কর্ত্তুং প্রতিপেদে প্রজাপতিঃ॥ ততো ভবত্যনাবৃষ্টিস্তীব্রা সা শতবার্ষিকী। ভূতক্ষয়করী ঘোরা সর্ব্বভূতভয়ঙ্করী ॥ ততো যান্যল্পসারাণি শস্যানি পৃথিবীতলে। তানি চাগ্রে প্রলীয়ন্তে ভূমিত্বমুপযান্তি চ॥ সপ্তরশ্মিরথো ভূত্বা সমুত্তিষ্ঠন্দিবাকরঃ। অসহ্যরশ্মির্ভবতি পিবন্নম্ভো গভস্তিভিঃ॥ ততস্তে রশ্ময়ঃ সপ্ত পিবন্ত্যম্বু মহার্ণবে। তেনাহারেণ তে সূর্য্যা দীপ্তাঃ সপ্ত ভবন্তি হি॥ তস্য তে রশ্ময়ঃ সপ্ত সূর্য্যা ভূত্বা চতুর্দ্দিশং। চতুর্লোকমিদং কৃৎস্নং দহন্তি শিখিনো যথা॥ ব্যাপ্নুবন্তশ্চ তে বিপ্রাস্তূর্দ্ধঞ্চাধশ্চ রশ্মিভিঃ। দীপ্যন্তে ভাস্করাঃ সপ্ত দহন্তোঽগ্নিপ্রতাপিনঃ॥ তে সূর্য্যা বারিণা দীপ্তা বহুসাহস্ররশ্ময়ঃ। খং সমাবৃত্য তিষ্ঠন্তি নির্দ্দহন্তো বসুন্ধরাং ॥ ততস্তেষাং প্রতাপেন দহ্যমানা বসুন্ধরা। সাদ্রিনদ্যর্ণবদ্বীপা নিঃস্নেহা সমপদ্যত॥ দীপ্তাভিঃ সন্ততাভিশ্চ জ্বালাভিশ্চ সমাবৃতঃ। অধশ্চোর্দ্ধঞ্চ তির্য্যক্ চ সমাবৃত্য সহস্রশঃ॥ সূর্য্যাগ্নিনা প্রস্পৃষ্টানাং সংহৃষ্টানাং পরস্পরং। একত্বমুপজাতানামেকজ্বালো ভবেৎ প্রভুঃ॥ সর্ব্বলোকপ্রণাশশ্চ সোঽগ্নির্ভূত্বাত্মকুণ্ডলী। চতুর্লোকমিদং কৃৎস্নং নির্দ্দহত্যাত্মতেজসা॥ ততঃ প্রলীনে সর্ব্বস্মিন জঙ্গমে স্থাবরে তথা। নির্ব্বৃক্ষা নিস্তৃণা ভূমিঃ কূর্ম্মপৃষ্ঠে প্রকাশতে ॥ অম্বরীশমিবাভাতি সর্ব্বমাপূরিতং জগৎ। সর্ব্বমেব তদার্চ্চির্ভিঃ পূর্ণং জাজ্বল্যতে নভঃ ॥ পাতালে যানি তীর্থানি মহোদধিগতানি তু। তত্র তানি প্রলীয়ন্তে ভূমিত্বমুপযান্তি বৈ॥ দ্বীপাংশ্চ পর্ব্বতাংশ্চৈব বর্ষাণ্যথ মহোদধীন্। তান্ সর্ব্বান্ ভস্মসাৎ কৃত্বা সপ্তাত্মা পাবকঃ প্রভুঃ॥ সমুদ্রেভ্যো নদীভ্যশ্চ পাতালেভ্যশ্চ সর্ব্বশঃ। পিবন্নপঃ সমিদ্ধোঽগ্নিঃ পৃথিবীমাশ্রিতোঽজ্বলৎ॥ ততঃ সম্বর্ত্তকঃ শৈলানতিক্রম্য মহাংস্তথা। লোকান্দহতি দীপ্তাত্মা রুদ্রতেজোবিজৃম্ভিতঃ॥ স দগ্ধ্বা পৃথিবীন্দেবো রসাতলমশোষয়ৎ। অধস্তাৎ পৃথিবীং দগ্ধ্বা দিবমূর্দ্ধং দহিষ্যতি॥ যোজনানাং শতানীহ সহস্রাণ্যযুতানি চ। উত্তিষ্ঠন্তি শিখাস্তস্য বায়ুঃ সম্বর্ত্তস্য চ॥ গন্ধর্ব্বাংশ্চ পিশাচাংশ্চ সযক্ষোরগরাক্ষসান্। তদা দহত্যসৌ দীপ্তঃ কালরুদ্রপ্রচোদিতঃ ॥ ভূর্লোকঞ্চ ভুবর্লোকং

স্বর্লোকঞ্চ তথা মহঃ। দহেদশেষং কালাগ্নিঃ কালো রিশ্বতনুঃ স্বয়ং ॥ ব্যুষ্টেষু তেষু লোকেষু তির্য্যগূর্দ্ধমথাগ্নিনা। তত্তেজঃ সমনুপ্রাপ্য কৃৎস্নং জগদিদং শনৈঃ ॥ অয়োগৃহনিভং সর্ব্বং তদেবৈকং প্রকাশতে। ততো গজকুলোন্নাদাঃ স্তনিতৈঃ সমলঙ্কৃতাঃ ॥ উত্তিষ্ঠন্তি তদা ব্যোম্নি ঘোরাঃ সম্বর্ত্তকা ঘনাঃ। কেচিন্নীলোৎপলশ্যামাঃ কেচিৎ কুমুদসন্নিভাঃ ॥ ধূম্রবর্ণাস্তথা কেচিত্তথা পীতাঃ পয়োধরাঃ। কেচিদ্রক্তাভ্রবর্ণাশ্চ স্থূলাঃ ক্ষারনিভা স্তথা ॥ শঙ্খকুন্দনিভাশ্চান্যে জাত্যঞ্জননিভাঃপরে। মনঃশিলানিভাস্ত্বন্যে কপোতসদৃশাঃ পরে ॥ কেচিদ্রুদ্রাক্ষবর্ণাভাস্তথান্যে ক্ষীরসন্নিভাঃ। তথা কর্ব্বূরবর্ণাভা ভিন্নাঞ্জননিভাস্তথা ॥ ইন্দ্রগোপনিভাঃ কেচিদ্ধরিতালনিভাস্তথা। কাকাণ্ডকনিভাঃ কেচিদুত্তিষ্ঠন্তি ঘনা দিবি ॥ কেচিৎ পর্ব্বতসঙ্কাশাঃ কেচিদ্গজকুলোপমাঃ। কূটাগারনিভাশ্চান্যে কেচিন্মীনকুলোদ্বহাঃ॥ বহুরূপা ঘোররূপা ঘোরস্বরনিনাদিনঃ। তদা জলধরাঃ সর্ব্বে পূরয়ন্তি নভস্তলং ॥ ততস্তে জলদা ঘোরা বারিণা ভাস্করাত্মজাঃ। সপ্তধা সংবৃতাত্মানস্তমগ্নিং শময়ন্ত্যুত ॥ ততস্তে জলদা বর্ষং বর্ষন্তীহ হিমৌঘবৎ। সুঘোরমশিবং সর্ব্বং নাশয়ন্তি চ পাবকং ॥ প্রবৃত্তেন তদাত্যর্থমম্ভসা পূর্য্যতে কিল। অভিস্তেজোঽভিভূতত্বাত্তদাগ্নিঃ প্রবিশত্যপঃ ॥ নষ্টে চাগ্নৌ বর্ষশতৈঃ পয়োদা জলসম্ভবাঃ। প্লাবয়ন্তোঽথ ভুবনং মহাজলপরিস্রবৈঃ ॥ ধারাভিঃ পূরয়ন্তীদং চোদ্যমানাঃ স্বয়ম্ভুবা। উদ্যন্তঃ সলিলৌঘৈশ্চ বেলা ইব মহোদধেঃ ॥ সাদ্রিদ্বীপা তথা পৃথ্বী জলৈঃ সংছাদ্যতে শনৈঃ॥ আদিত্যরশ্মিভিঃ পীতং জলমভ্রেষু তিষ্ঠতি। পুনঃ পততি তদ্ভূমৌ পূর্য্যন্তে তেন চার্ণবাঃ ॥ ততঃ সমুদ্রাঃ স্বাং বেলামতিক্রান্তাস্তু কৃৎস্নশঃ। পর্ব্বতাশ্চ বিলীয়ন্তে মহী চাপ্সু নিমজ্জতি ॥ তস্মিন্নেকার্ণবে ঘোরে নষ্টে স্থাবরজঙ্গমে। যোগনিদ্রাং সমাস্থায় শেতে দেবঃ প্রজাপতিঃ॥ চতুর্যুগসহস্রান্তং কল্পমাহুর্মহর্ষয়ঃ। বরাহো বর্ত্ততে কল্পো যস্য বিস্তার ঈরিতঃ॥ অসংখ্যাতাস্তথা কল্পা ব্রহ্মবিষ্ণুশিবাত্মকাঃ। কথিতা হি পুরাণেষু মুনিভিঃ কালচিন্তকৈঃ॥ সাত্ত্বিকেষ্বথ কল্পেষু মাহাত্ম্যমখিলং হরেঃ। তামসেষু শিবস্যোক্তং রাজসেষু প্রজাপতেঃ। সোঽয়ং প্রবর্ত্ততে কল্পো বারাহঃ সাত্ত্বিকো মতঃ ॥ অন্যে চ সাত্ত্বিকাঃ কল্পা মম তেষু পরিগ্রহঃ। ধ্যানন্তপস্তথা জ্ঞানং লব্ধ্বা তেষ্বেব যোগিনঃ ॥ আরাধ্য গিরিশং মত্তাৎ যাতি তৎ পরমং পদং। সোঽহং সত্বং সমাধায় মায়ী মায়াময়ং স্বয়ং ॥ একার্ণবে জগত্যস্মিন্ যোগনিদ্রাং ব্রজামি তু। মাং পশ্যন্তি মহাত্মানঃ সুপ্তং কালে মহর্ষয়ঃ ॥ জনলোকে বর্ত্তমানাস্তপসা যোগচক্ষুষা। অহং পুরাণপুরুষো ভূর্ভুবঃপ্রভবো বিভুঃ ॥ সহস্রচরণঃ শ্রীমান্ সহস্রাক্ষঃ সহস্রপাৎ। মন্ত্রোঽগ্নির্ব্রাহ্মণা গাবঃ কুশাশ্চ সমিধো হ্যহং ॥ প্রোক্ষণী

চ ধ্রুবশ্চৈব সোমো ঘৃতময়োঽস্ম্যহং। সম্বর্ত্তকো মহানাত্মা পবিত্রং পরমং যশঃ॥ বেদবেদ্যঃ প্রভুর্গোপ্তা গোপতির্ব্রহ্মণো মুখং। অনন্তস্তারকো যোগী গতির্মতিমতাম্বরঃ॥ হংসঃ প্রাণোঽথ কপিলো বিশ্বমূর্ত্তিঃ সনাতনঃ। ক্ষেত্রজ্ঞঃ প্রকৃতিঃ কালো জগদ্বীজমথামৃতং॥ মাতা পিতা মহাদেবো মত্তো হ্যন্যন্ন বিদ্যতে॥ আদিত্যবর্ণো ভুবনস্য গোপ্তা নারায়ণঃ পুরুষো যোগমূর্ত্তিঃ। মাং পশ্যন্তি যতয়ো যোগনিষ্ঠা জ্ঞাত্বাত্মানমমৃতত্বং ব্রজন্তি॥*॥ প্রাকৃতপ্রলয়বিস্তারো যথা। কূর্ম্ম উবাচ। অতঃ পরং প্রবক্ষ্যামি প্রতিসর্গমনুত্তমং। প্রাকৃতং প্রসমাসেন শৃণুধ্বং গদতো মম॥ গতে পরার্দ্ধদ্বিতয়ে কালে লোকপ্রকালকঃ। কালাগ্নির্ভস্মসাৎ কর্ত্তুং করোতি নিখিলং মতিং॥ আত্মন্যাত্মানমাবেশ্য ভূত্বা দেবো মহেশ্বরঃ। দহেদশেষং ব্রহ্মাণ্ডং সদেবাসুরমানুষং॥ তমাবিশ্য মহাদেবো ভগবান্নীললোহিতঃ। করোতি লোকসংহারং ভীষণং লোকমাশ্রিতঃ॥ প্রবিশ্য মণ্ডলং সৌরং কৃত্বাসৌ বহুধা পুনঃ। নির্দ্দহত্যখিলং লোকং সপ্তসপ্তিস্বরূপধৃক্॥ স দগ্ধ্বা সকলং সত্ত্বং মন্ত্রং ব্রহ্মশিরো মহৎ। দেবতানাং শরীরেষু ক্ষিপত্যখিলদাহকঃ॥ দগ্ধেষ্বশেষদেহেষু দেবী গিরিবরাত্মজা। একা সা সাক্ষিণঃ শম্ভোস্তিষ্ঠতে বৈদিকী শ্রুতিঃ॥ শিরঃকপালৈর্দেবানাং কৃতস্রগ্বরভূষণঃ। আদিত্যচন্দ্রাদিগণৈঃ পূরয়ন্ ব্যোমমণ্ডলং॥ সহস্রনয়নো দেবঃ সহস্রাকৃতিরীশ্বরঃ। সহস্রহস্তচরণঃ সহস্রার্চ্চির্মহাভুজঃ॥ দংষ্ট্রাকরালবদনঃ প্রদীপ্তানললোচনঃ। ত্রিশূলী কৃত্তিবসনো যোগমৈশ্বরমাস্থিতঃ॥ পীত্বা তৎ পরমানন্দং প্রভূতমমৃতং স্বকং। করোতি তাণ্ডবং দেবীমালোক্য পরমেশ্বরঃ॥ পীত্বা নৃত্যামৃতং দেবী ভর্ত্তুঃ পরমমঙ্গলা। যোগমাস্থায় দেবস্য দেহমায়াতি শূলিনঃ॥ স ত্যক্ত্বা তাণ্ডবরসং স্বেচ্ছয়ৈব পিনাকধৃক্। যাতি স্বভাবং ভগবান্ দগ্ধ্বা ব্রহ্মাণ্ডমণ্ডলং॥ সংস্থিতেষ্বথ দেবেষু ব্রহ্মবিষ্ণুপিনাকিষু। গুণৈরনেকৈঃ পৃথিবী বিলয়ং যাতি বারিষু। স বারিতত্ত্বং সগুণং গ্রসতে হব্যবাহনঃ॥ তৈজসং গুণসংযুক্তং বায়ৌ সংযাতি সংক্ষয়ং। আকাশে সগুণো বায়ুঃ প্রলয়ং যাতি সত্তমাঃ॥ ভূতাদৌ চ তথাকাশং লীয়তে গুণসংযুতং। ইন্দ্রিয়াণি চ সর্ব্বাণি তৈজসে যান্তি সংক্ষয়ং॥ বৈকারিকে দেবগণাঃ প্রলয়ং যান্তি সত্তমাঃ। বৈকারিকস্তৈজসশ্চ ভূতাদিশ্চেতি সত্তমাঃ॥ ত্রিবিধোঽয়মহঙ্কারো মহতি প্রলয়ং ব্রজেৎ। মহান্তমেভিঃ সহিতং ব্রহ্মাণমমৃতৌজসং॥ অব্যক্তং জগতো যোনিঃ সংহরেদেকমব্যয়ং। এবং সংহৃত্য ভূতানি তত্ত্বানি চ মহেশ্বরঃ॥ নিযোজয়ত্যথান্যোন্যং প্রধানং পুরুষং পরং। প্রধানপুংসোরজয়োরেষ সংহার ঈরিতঃ॥ মহেশ্বরেচ্ছাজনিতো ন স্বয়ং বিদ্যতে

লয়ঃ। গুণসাম্যং তদব্যক্তং প্রকৃতিঃ পরিগীয়তে ॥ প্রধানং জগতো যোনির্মায়াতত্ত্বমচেতনং । কূটস্থশ্চিন্ময়ো হ্যাত্মা কেবলঃ পঞ্চবিংশকঃ ॥ গীয়তে মুনিভিঃ সাক্ষী মহানেকঃ পিতামহঃ। এবংসংহারকরণী শক্তির্মাহেশ্বরী ধ্রুবা ॥ প্রধানাদ্যং বিশেষান্তং দহেদ্রুদ্র ইতি শ্রুতিঃ। যোগিনামথ সর্ব্বেষাং জ্ঞানবিন্যস্তচেতসাং । আত্যন্তিকঞ্চৈব লয়ং বিদধাতীহ শঙ্করঃ ॥ ইতি কৌর্ম্মে ৪২।৪৩ অধ্যায়ঃ ॥ * ॥ আত্যন্তিকপ্রলয়বিস্তারো যথা। শ্রীপরাশর উবাচ । আধ্যাত্মিকাদি মৈত্রেয় জ্ঞাত্বা তাপত্রয়ং বুধঃ । উৎপন্নজ্ঞানবৈরাগ্যঃ প্রাপ্নোত্যাত্যন্তিকং লয়ং ॥ আধ্যাত্মিকো বৈ দ্বিবিধঃ শারীরো মানসস্তথা। শারীরো বহুভির্ভেদৈর্ভিদ্যতে শ্রূয়তাঞ্চ সঃ ॥ শিরোরোগপ্রতিশ্যায়জ্বরশূলভগন্দরৈঃ । গুল্মার্শঃশ্বযথুশ্বাসচ্ছর্দ্যাদিভিরনেকধা ॥ তথাক্ষিরোগাতীসারকুষ্ঠাঙ্গাময়সংজ্ঞকৈঃ।ভিদ্যতে দেহজস্তাপো মানসং শ্রোতুমর্হসি ॥ কামক্রোধভয়দ্বেষলোভমোহবিষাদজঃ। শোকাসূয়াবমানের্ষ্যামাৎসর্য্যাদিভবস্তথা ॥ মানসোঽপি দ্বিজশ্রেষ্ঠ তাপো ভবতি নৈকধা। ইত্যেবমাদিভির্ভেদৈস্তাপো হ্যাধ্যাত্মিকঃ স্মৃতঃ ॥ মৃগপক্ষিমনুষ্যাদ্যৈঃ পিশাচোরগরাক্ষসৈঃ । সরীসৃপাদ্যৈশ্চ নৃণাং জন্যতে চাধিভৌতিকঃ॥ শীতোষ্ণবাতবর্ষাম্বুবৈদ্যুতাদিসমুদ্ভবঃ। তাপো দ্বিজবরশ্রেষ্ঠ কথ্যতে চাধিদৈবিকঃ॥ তদস্য ত্রিবিধস্যাপি দুঃখজাতস্য পণ্ডিতৈঃ। গর্ব্ভজন্মজরাদ্যেষু স্থানেষু প্রভবিষ্যতঃ॥ নিরস্তাতিশয়াহ্লাদসুখভাবৈকলক্ষণা । ভেষজং ভগবৎপ্রাপ্তিরেকান্তাত্যন্তিকী মতা ॥ তস্মাত্তৎপ্রাপ্তয়ে যত্নঃ কর্ত্তব্যঃ পণ্ডিতৈর্নরৈঃ। তৎপ্রাপ্তিহেতুজ্ঞানঞ্চ কর্ম্ম চোক্তং মহামুনে ॥ আগমোত্থং বিবেকাচ্চ দ্বিধা জ্ঞানং তথোচ্যতে । শব্দব্রহ্মাগমময়ং পরং ব্রহ্ম বিবেকজং ॥ অন্ধন্তম ইবাজ্ঞানং দীপবচ্চেন্দ্রিয়োদ্ভবং। যথা সূর্য্যস্তথা জ্ঞানং যদ্বিপ্রর্ষে বিবেকজং ॥ মনুরপ্যাহ বেদার্থং স্মৃত্বা যন্মুনিসত্তম । তদেতচ্ছ্রূয়তামত্র সম্বন্ধে গদতো মম॥ দ্বে ব্রহ্মণী বেদিতব্যে শব্দব্রহ্ম পরঞ্চ যৎ। শব্দব্রহ্মণি নিষ্ণাতঃ পরং ব্রহ্মাধিগচ্ছতি॥ দ্বে বিদ্যে বেদিতব্যে বৈ ইতি বাথর্ব্বণী শ্রুতিঃ। পরয়া ত্বক্ষরপ্রাপ্তিঋর্গ্বেদাদি ময়া পরা ॥ যত্তদব্যক্তমজরমচিন্ত্যমজমব্যয়ং। অনির্দ্দেশ্যমরূপঞ্চ পাণিপাদাদ্যসংযুতং ॥ বিভুং সর্ব্বগতং নিত্যং ভূতযোনিমকারণং। ব্যাপ্যব্যাপ্যং যতঃ সর্ব্বং তৎ বৈ পশ্যন্তি সূরয়ঃ॥ তদ্‌ব্রহ্ম তৎ পরং ধাম তদ্ধ্যেয়ং মোক্ষকাঙ্ক্ষিণাং। শ্রুতিবাক্যোদিতং সূক্ষ্মং তদ্বিষ্ণোঃ পরমং পদং ॥ তদেব ভগবদ্বাচ্যং স্বরূপং পরমাত্মনঃ। বাচকো ভগবচ্ছব্দস্তস্যাদ্যস্যাক্ষরাত্মনঃ ॥ এবং নিগদিতার্থস্য সতত্ত্বং তস্য তত্ত্বতঃ। জ্ঞায়তে যেন তজ্‌জ্ঞানং পরমন্যত্ত্রয়ীময়ং ॥ অশব্দগোচরস্যাপি তস্যৈব ব্রহ্মণো দ্বিজ । পূজায়াং ভগবচ্ছব্দঃ ক্রিয়তে

হ্যৌপচারিকঃ ॥ শুদ্ধে মহাবিভূত্যাখ্যে পরে ব্রহ্মণি বর্ত্ততে। মৈত্রেয় ভগবচ্ছব্দঃ সর্ব্বকারণকারণে॥ সর্ব্বাণি তত্র ভূতানি বসন্তি পরমাত্মনি। ভূতেষু চ স সর্ব্বাত্মা বাসুদেবস্ততঃ স্মৃতঃ ॥ খাণ্ডিক্যজনকায়াহ পৃষ্টঃ কেশিধ্বজঃ পুরা। নামব্যাখ্যায়নন্তস্য বাসুদেবস্য তত্ত্বতঃ ॥ ভূতেষু বসতে সোঽন্তর্ব্বসন্ত্যত্র চ তানি যৎ। ধাতা বিধাতা জগতাং বাসুদেবস্ততঃ প্রভুঃ ॥ স সর্ব্বভূতপ্রকৃতির্ব্বিকারগুণাংশ্চ দোষাংশ্চ মুনে ব্যতীতঃ। অতীতসর্ব্বাবরণাখিলাত্মা তেনাস্তৃতং যদ্ভুবনান্তরাণি ॥ সমস্তকল্যাণগুণাত্মকো হি স্বশক্তিলেশাবৃতভূতসর্গঃ। ইচ্ছাগৃহীতাভিমতোরুদেহঃ সংসাধিতাশেষজগদ্ধিতোঽসৌ ॥ তেজোবলৈশ্বর্য্যমহান্বিতশ্চ স্ববীর্য্যশক্ত্যাদিগুণৈকরাশিঃ। পরঃ পরাণাং সকলা ন যত্র ক্লেশাদয়ঃ সন্তি পরাবরেশে ॥ স ঈশ্বরো ব্যষ্টিসমষ্টিরূপোঽব্যক্তস্বরূপঃ প্রকটস্বরূপঃ। সর্ব্বেশ্বরঃ সর্ব্বদৃক্ সর্ব্ববেত্তা সমস্তশক্তিঃ পরমেশ্বরাখ্যঃ॥ স জ্ঞায়তে যেন তদস্তদোষং শুদ্ধং পরং নির্ম্মলমেকরূপং। সংদৃশ্যতে চাপ্যবগম্যতে বা তজ্জ্ঞানমজ্ঞানমতোঽন্যদুক্তং ॥ ইতি বিষ্ণুপুরাণে ৬ অংশে আত্যন্তিকপ্রতিসঞ্চারো নাম ৫অধ্যায়ঃ॥*॥ অপি চ। নারদ উবাচ। কৃতং ত্রেতা দ্বাপরঞ্চ কলিশ্চেতি চতুর্যুগং। দিব্যমেকযুগং জ্ঞেয়ং তস্য যা বৈকসপ্ততিঃ ॥ মন্বন্তরন্তু তজ্জ্ঞেয়ং তে তু যত্র চতুর্দ্দশ। স কল্পো নাম বৈ কালস্তদন্তে প্রলয়স্তু যঃ ॥ সা ব্রহ্মরাত্রী রাজেন্দ্র যত্র শেতেঽম্বুজাসনঃ। ত্রয়ো লোকাস্তদা রাজন্ লীয়ন্তে তন্নিমিত্ততঃ ॥ নৈমিত্তিকো লয়ো নাম দৈনন্দিন ইতীর্য্যতে ॥ এবং দিনপ্রমাণেন ব্রহ্মণঃ শতবার্ষিকং। আয়ুঃ পূর্ব্বপরার্দ্ধে তু পরার্দ্ধে দ্বে প্রকীর্ত্তিতে॥ দ্বিপরার্দ্ধে ব্যতীতে তু ব্রহ্মণো জগদাত্মনঃ। তদা প্রকৃতয়ঃ সপ্ত প্রলয়ং যান্তি ভূমিপ ॥ লয়ঃ প্রাকৃতিকো হ্যেষ লীনে ব্রহ্মণি ভূপতে। অণ্ডকোষেঽপি সকলঃ প্রলয়ং যাতি সর্ব্বশঃ॥ পূর্ব্বরূপন্তু বক্ষ্যামি প্রলয়স্যাস্য ভূপতে। শতবর্ষাণি ভূমৌ হি পর্জ্জন্যো নৈব বর্ষতি ॥ দুর্ভিক্ষে নির্জনে লোকে প্রজাঃ সর্ব্বাঃ ক্ষুধার্দ্দিতাঃ। পরস্পরং ভক্ষ্যমাণাঃ ক্ষয়ং যাস্যন্তি ভূমিপ ॥ সমুদ্রে চ ধরণ্যাঞ্চ বৃক্ষেষু চ লতাসু চ। দেহে চ যো রসস্তং হি রবির্হরতি রশ্মিভিঃ ॥ ততঃ সম্বর্ত্তকো নাম জ্বালামালী হুতাশনঃ। সঙ্কর্ষণমুখোৎপন্নো দহত্যনিলসারথিঃ॥ সর্ব্বং ব্রহ্মাণ্ডভাণ্ডং বৈ তৎকালক্ষোভগর্জিতঃ। এবং দগ্ধং মহারাজ বহ্ন্যর্কাভ্যাং সমন্ততঃ ॥ দগ্ধা গোময়পিণ্ডাভং ব্রহ্মাণ্ডং সারবর্জ্জিতং। প্রচণ্ডপবনো রাজংস্তত্রে বর্ষশতং পুনঃ ॥ সম্বর্ত্তকো নাম মহান্ ব্রহ্মাণ্ডং চালয়িষ্যতি। ততো মেঘা মহাঘোরা নানাবর্ণা অনেকশঃ॥ শতং বর্ষাণি বর্ষন্তি গর্জ্জন্তি চ মহাস্বনাঃ। একোদকং ততো বিশ্বং নিৰ্ব্বাণং নির্ব্বিকারকং ॥ ভূমের্গন্ধগুণং রাজন্ গ্রসন্ত্যাপঃ সমন্ততঃ।

গুণনাশাৎ স্বয়ং পৃথ্বী প্রলয়ং প্রাপ্স্যতে তদা ॥ তেজস্ত্বপাং রসগুণং সগন্ধং পিবতে বলাৎ। ততঃ প্রলয়মায়ান্তি রাজন্নাপোঽপি তৎক্ষণাৎ ॥ তেজসস্তু ততো রূপং রসগন্ধসমন্বিতং । বায়ুর্হরতি চণ্ডাত্মা তেজঃপ্রলয়মৃচ্ছতি ॥ আকাশস্তু ততো বায়োঃ স্পর্শং পরগুণৈঃ সহ। সমাদত্তে মহারাজ অম্বরেঽথ প্রলীয়তে॥ আকাশস্য গুণং শব্দং গুণৈরন্যৈঃ সমন্বিতং। অহঙ্কারঃ সমাদত্তে নভস্তস্মিন্ প্রলীয়তে ॥ তৈজসেম্বিন্দ্রিয়াণ্যঙ্গদেবা বৈকারিকে তথা। অহঙ্কারে প্রলীয়ন্তে জগদেতচ্চরাচরং ॥ অহঙ্কারং ভক্ষয়ন্তি ততঃ সত্ত্বাদয়ো গুণাঃ। গ্রসতে তান্ মহারাজ আদ্যা প্রকৃতিরুচ্যতে॥ ন তস্যাঃ কালদোষেণ পরিণামো নরর্ষভ। আদ্যন্তরহিতা সা হি নিত্যং কারণমব্যয়ং ॥ শক্তির্ভগবতঃ সা হি তদেকপরমা চ সা। ইত্যুক্তঃ প্রলয়ো রাজন্ বিশ্বস্যাস্য মহামতে॥ যথোৎপত্তিক্রমেণাস্য ব্যুৎক্রমেণ লয়স্তথা । ইতি পাদ্মে স্বর্গখণ্ডে ৩৯ অধ্যায়ঃ ॥

প্রলাপঃ (পুং) প্রলপনং। অনর্থকবাক্যং। নিষ্প্রয়োজনমুন্মত্তাদিবচনং । ইত্যমরভরতৌ॥ রোগাণামুপসর্গোঽয়ং ॥

প্রলাপহা [ন্] (পুং) কুলত্থাঞ্জনং। ইতি রাজনির্ঘণ্টঃ ॥

প্রলীনতা (স্ত্রী) প্রলয়ঃ । তৎপর্য্যায়ঃ । ইন্দ্রিয়স্বাপঃ ২ চেষ্টানাশঃ ৩। ইতি রাজনির্ঘণ্টঃ ॥

প্রলেহঃ (পুং) ব্যঞ্জনবিশেষঃ। দম্পোখ্ত কোরমা ইত্যাদি পারস্যভাষা। ইতি পাকরাজেশ্বরঃ ॥

প্রবক্তা [ঋ] (ত্রি) প্রকর্ষেণ বক্তি যঃ। বেদাদিবাচকঃ। যথা। জাতিমাত্রোপজীবী বা কামং স্যাদ্‌ব্রাহ্মণব্রুবঃ। ধর্ম্মপ্রবক্তা নৃপতের্ন তু শূদ্রঃ কদাচন ॥ ইতি মানবে ৭ অধ্যায়ঃ ॥

প্রবচনং (ক্লী) বেদঃ। প্রকৃষ্টবাক্যং। ইতি মেদিনী ॥

প্রবচনীয়ঃ (ত্রি) প্রবক্তা। প্রবাচ্যঃ। ইতি মেদিনী ॥

প্রবণঃ (পুং) চতুষ্পথঃ। ইত্যমরঃ ॥

প্রবণঃ (ত্রি) ক্রমনিম্নভূমিঃ। উদরং। প্রহ্বঃ। ইতি মেদিনী॥ আয়তঃ। প্রগুণঃ। ক্ষণঃ। ইতি বিশ্বঃ ॥ প্লুতঃ। স্নিগ্ধঃ। ইতি শব্দরত্নাবলী॥ আশক্তঃ। ইতি হেমচন্দ্রঃ॥ ক্ষীণঃ। ইতি ধরণিঃ॥

প্রবৎস্যৎপতিকা (স্ত্রী) নায়িকাভেদঃ। অস্যা লক্ষণং। যস্যাঃ পতিরগ্রিমক্ষণে দেশান্তরং যাস্যত্যেব সা। অস্যাশ্চেষ্টা কাকুবচনকাতরপ্রেক্ষণগমনবিঘ্নোপদর্শননির্ব্বেদসন্তাপসম্মোহনিশ্বাসবাষ্পাদয়ঃ ॥ মুগ্ধা প্রবৎস্যৎপতিকা যথা। প্রাণেশ্বরে কিমপি জল্পতি নির্গমায় ক্ষামোদরী বদনমানময়াঞ্চকার। আলী পুনর্নিভৃতমেত্য লতানিকুঞ্জমুন্মত্তকোকিলকলধ্বনিমাততান॥ ১॥ মধ্যা প্রবৎস্যৎপতিকা যথা। গন্তুং প্রিয়ে বদতি নিঃশ্বসিতং ন দীর্ঘমাসীন্ন বা নয়নয়োর্জলমাবিরাসীৎ। আয়ুর্লিপিং পঠিতু-

মেণদৃশঃ পরন্তু ভালস্থলীং কিমু করঃ সমুপাজগাম ॥ ২ ॥ প্রৌঢ়া প্রবৎস্যৎপতিকা যথা। নায়ং মুঞ্চতি সুভ্রুবামপি তনুত্যাগে বিয়োগজ্বরস্তেনাহং বিহিতাঞ্জলির্যদুপতে পৃচ্ছামি সত্যং বদ। তাম্বূলং কুসুমং পটীরমুদকং যদ্বন্ধুভির্দীয়তে তৎ স্যাদত্র পরত্র বা কিমু বিষজ্বালাবলীদুঃসহং ॥৩॥ পরকীয়া প্রবৎস্যৎপতিকা যথা। ন্যস্তং পন্নগমূর্দ্ধ্নি পাদযুগলং ভক্তির্বিমুক্তা গুরৌ ত্যক্তা নীতিরকারি কিং ন ভবতো হেতোর্ময়া দুষ্কৃতং। অঙ্গানাং শতযাতনা নয়নয়োঃ কোপক্রমো রৌরবঃ কুম্ভীপাকপরাভবশ্চ মনসো যুক্তং ত্বয়ি প্রস্থিতে ॥৪॥ সামান্যপ্রবৎস্যৎপতিকা যথা। মুদ্রাং প্রদেহি বলয়ায় ভবদ্বিযোগমাসাদ্য যাস্যতি বহিঃ সহসা যদেতৎ। ইত্থং নিগদ্য বিগলন্নয়নাম্বুধারা বারাঙ্গনা প্রিয়তমং করয়োর্ব্বভার ॥ ৫ ॥ ইতি রসমঞ্জরী ॥

প্রবয়ণং (ক্লী) প্রতোদঃ। ইতি হেমচন্দ্রঃ ॥

প্রবয়াঃ [স্] (পুং) বৃদ্ধঃ। ইত্যমরঃ ॥

প্রবরং (ক্লী) অগুরু। ইতি ভাবপ্রকাশঃ ॥ গোত্রং। শ্রেষ্ঠে ত্রি। ইতি মেদিনী ॥

প্রবরঃ (পুং) সন্ততিঃ। ইতি মেদিনী ॥ গোত্রপ্রবর্ত্তকমুনিব্যাবর্ত্তকো মুনিগণঃ। তথা চ যমদগ্নিগোত্রস্য প্রবরাঃ যমদগ্ন্যৌর্ব্ববশিষ্ঠাঃ। ভরদ্বাজগোত্রস্য ভরদ্বাজাঙ্গিরসবার্হস্পত্যাঃ। বিশ্বামিত্রগোত্রস্য বিশ্বামিত্রমরীচিকৌষিকাঃ। অত্রিগোত্রস্য অত্র্যাত্রেয়শাতাতপাঃ। গোতমগোত্রস্য গোতমবশিষ্ঠবার্হস্পত্যাঃ। বশিষ্ঠগোত্রস্য বশিষ্ঠঃ। কেষাঞ্চিৎ বশিষ্ঠাত্রিসাঙ্কৃতয়ঃ। কাশ্যপগোত্রস্য কাশ্যপাপ্সারনৈধ্রুবাঃ। অগস্ত্যগোত্রস্য অগস্তিদধীচিজৈমিনয়ঃ। সৌকালিনগোত্রস্য সৌকালিনাঙ্গিরসবার্হস্পত্যাপ্সারনৈধ্রুবাঃ। মৌদ্গল্যগোত্রস্য ঔর্ব্বচ্যবনভার্গবজামদগ্ন্যাপ্লুবতঃ। পরাশরগোত্রস্য পরাশরশক্তিবশিষ্ঠাঃ। বৃহস্পতিগোত্রস্য বৃহস্পতিকপিলপার্ব্বণাঃ। কাঞ্চনগোত্রস্য অশ্বত্থদেবলদেবরাজাঃ। বিষ্ণুগোত্রস্য বিষ্ণুবৃদ্ধিকৌরবাঃ। কৌশিকগোত্রস্য কৌশিকাত্রিজমদগ্নয়ঃ। কাত্যায়নগোত্রস্য অত্রিভৃগুবশিষ্ঠাঃ। আত্রেয়গোত্রস্য আত্রেয়শাতাতপসাংখ্যাঃ। কান্নগোত্রস্য কান্নাশ্বত্থদেবলাঃ। কৃষ্ণাত্রেয়গোত্রস্য কৃষ্ণাত্রেয়াত্রেয়াবাসাঃ। সাঙ্কৃতিগোত্রস্য অব্যাহারাত্রিসাঙ্কৃতয়ঃ। কৌণ্ডিল্যগোত্রস্য কৌণ্ডিল্যস্তিমিককৌৎসাঃ। গর্গগোত্রস্য গার্গ্যকৌস্তুভমাণ্ডব্যাঃ। আঙ্গিরসগোত্রস্য আঙ্গিরসবশিষ্ঠবার্হস্পত্যাঃ। অনাবৃকাক্ষগোত্রস্য গার্গ্যগৌতমবশিষ্ঠাঃ। অব্যগোত্রস্য অথ্যবলিসারস্বতাঃ। জৈমিনিগোত্রস্য জৈমিন্যুতথ্যসাঙ্কৃতয়ঃ। বৃদ্ধিগোত্রস্য কুরুবৃদ্ধাঙ্গিরোবার্হস্পত্যাঃ। শাণ্ডিল্যগোত্রস্য শাণ্ডিল্যাসিতদেবলাঃ। বাৎস্যগোত্রসাবর্ণগোত্রয়োঃ ঔর্ব্বচ্যবনভার্গবজামদগ্ন্যাপ্লুবতঃ॥ আলম্ব্যায়নগোত্রস্য আলম্ব্যায়নশালঙ্কায়নশাকটায়নাঃ। বৈয়াঘ্রপদ্যগোত্রস্য সাঙ্কৃতিঃ। ঘৃতকৌশিকগোত্রস্য কুশিককৌশিকঘৃতকৌশিকাঃ। কেষাঞ্চিৎ কুশিককৌশিক-

বন্ধুলাঃ। শক্তিগোত্রস্য শক্তিপরাশরবশিষ্ঠাঃ। কাম্বায়নগোত্রস্য কাম্বায়নাঙ্গিরসবার্হস্পত্যভরদ্বাজাজমীঢ়াঃ। বাসুকিগোত্রস্য অক্ষোভ্যানন্তবাসুকয়ঃ। গৌতমগোত্রস্য গৌতমাপ্সারাঙ্গিরসবার্হস্পত্যনৈধ্রুবাঃ। কেষাঞ্চিৎ গৌতমাঙ্গিরসাযাসাঃ। শুনকগোত্রস্য শুনকশৌনকগৃৎসমদাঃ। সৌপায়নগোত্রস্য প্রবরাঃ ঔর্ব্বচ্যবনভার্গবজামদগ্ন্যাপ্নুবতঃ। ইতি ধনঞ্জয়কৃতধর্ম্মপ্রদীপে গোত্রপ্রবরবিবেকঃ॥

প্রবর্গঃ (পুং) হোমাগ্নিঃ। ইতি হেমচন্দ্রঃ॥

প্রবর্ত্তকঃ (ত্রি) প্রবর্ত্তনকারী। প্রবৃত্তিজনকঃ। যথা। প্রবর্ত্তকং বাক্যমুবাচ চোদনাং নিবর্ত্তকং নৈবমুবাচ ভাষ্যকৃৎ। ততশ্চ বিদ্মো নহি চোদনাস্তি সা প্রবর্ত্তিকা যা ন ভবেদিতি স্থিতিঃ॥ ইতি সংক্ষেপশারীরকং॥

প্রবর্ত্তনং (ক্লী) প্রবৃত্তিঃ। যথা। তেহন্যৈর্বান্তং সমশ্নন্তি পরোৎসর্গঞ্চ ভুঞ্জতে। ইতরার্থগ্রহে যেষাং কবীনাং স্যাৎ প্রবর্ত্তনং॥ ইতি কাব্যপ্রকাশঃ॥ আরম্ভঃ। যথা। মৃতে তু স্বামিনি পুনস্তদ্বংশ্যে বাপি মানবে। রাজানমামন্ত্র্য ততঃ কুর্য্যাৎ সেতুপ্রবর্ত্তনং॥ ইতি মিতাক্ষরা॥

প্রবর্ত্তনা (স্ত্রী) প্রবৃত্তিপ্রেরণং। যথা। অথবা ভবতঃ প্রবর্ত্তনা ন কথং পিষ্টমিয়ং পিনষ্টি ন। স্বত এব সতাং পরার্থতা গ্রহণানাং হি যথা যথার্থতা॥ ইতি নৈষধং॥

প্রবর্ত্তিতঃ (ত্রি) জাতঃ। যথা। রূপং তদোজস্বি তদেব বীর্য্যং তথৈব নৈসর্গিকমুন্নতত্বং। ন কারণাৎ স্বাৎ বিভিদে কুমারঃ প্রবর্ত্তিতো দীপ ইব প্রদীপাৎ॥ ইতি রঘুবংশে ৫ সর্গঃ॥

প্রবর্দ্ধনং (ক্লী) বিবর্দ্ধনং। প্রপূর্ব্ববৃধধাতোর্ভাবে অনট্। কর্ত্তরি অনপ্রত্যয়ে ত্রি॥

প্রবলাকী (পুং) ভুজঙ্গঃ। চিত্রমেখলকঃ। ইতি বিশ্বঃ॥

প্রবর্হঃ (ত্রি) প্রধানং। শ্রেষ্ঠঃ। ইত্যমরঃ॥

প্রবহঃ (পুং) গৃহনগরাদের্ব্বহির্গমনং। ইত্যমরঃ॥ বায়ুঃ। ইতি হেমচন্দ্রঃ॥ সপ্তবায়ন্তর্গতদ্বিতীয়বায়ুঃ। স তু আবহবায়োরূর্দ্ধস্থিতঃ। ইতি সিদ্ধান্তশিরোমণিঃ॥ যস্মাজ্জ্যোতীংষি বহতি প্রবহস্তেন স স্মৃতঃ। অস্য টীকা। যস্মাজ্জ্যোতীংষি প্রকর্ষেণ বহতি তেন স বায়ুঃ প্রবহঃ স্মৃতঃ প্রবহস্যৈব ভেদাঃ সর্ব্বে বায়ুস্কন্ধাঃ। ইতি বিষ্ণুপুরাণে ২ অংশে ১২ অধ্যায়ঃ॥

প্রবহণং (ক্লী) কর্ণীরথঃ। স্ত্রীরত্নবহনার্থমুপরি বস্ত্রাচ্ছাদিতমনুষ্যবাহ্যযানবিশেষঃ। ইত্যমরভরতৌ॥

প্রবহ্লিঃ (স্ত্রী) প্রবহ্লিকা। ইত্যমরটীকায়াং ভরতঃ॥

প্রবহ্লিকা (স্ত্রী) প্রহেলিকা। ইত্যমরঃ॥

প্রবহ্লী (স্ত্রী) প্রবহ্লিকা। ইতি ভরতঃ॥

প্রবাক্ [চ্] (ত্রি) বাচো যুক্তিপটুঃ। যথা। বাচো যুক্তিপটুর্ব্বাগ্মী বচোজ্ঞঃ প্রবচ্যঃ প্রবাক্। ইতি জটাধরঃ॥ প্রকৃষ্টবাক্যঞ্চ॥

প্রবাচকঃ (ত্রি) প্রকৃষ্টবক্তা। প্রপূর্ব্ববচধাতোঃ কর্ত্তরি তৃণ্প্রত্যয়ঃ॥

প্রবাণিঃ } (স্ত্রী) তন্ত্রশলাকা। মাকু ইতি
প্রবাণী } ভাষা। ইতি নিষ্প্রবাণিশব্দটীকায়াং ভরতঃ॥

প্রবাদঃ (পুং) পরস্পরবাক্যং। যথা। ইত্থং প্রবাদং যুধি সংপ্রহারং প্রচক্রতু রামনিশাবিহারৌ। তৃণায় মত্বা রঘুনন্দনোঽথ বাণেন রক্ষঃ প্রধনান্নিরাস্থৎ॥ ইতি ভট্টিঃ॥ জনরবঃ। যথা। প্রেয়াংস্তেঽহং ত্বমপি চ মম প্রেয়সীতি প্রবাদস্ত্বং মে প্রাণা অহমপি তবাস্মীতি হন্ত প্রলাপঃ। ত্বং মে তেঽস্যামহমপি চ যত্তচ্চ নো সাধু রাধে ব্যাহারে নৌ নহি সমুচিতো যুষ্মদস্মৎপ্রয়োগঃ॥ ইত্যলঙ্কারকৌস্তুভঃ॥

প্রবারঃ (পুং) প্রবরঃ। বস্ত্রং। প্রপূর্ব্ববৃধাতোর্ঘণ্। ইতি সংক্ষিপ্তসারব্যাকরণং॥

প্রবারণং (ক্লী) কাম্যদানং। ইত্যমরঃ॥ কাম্যস্য কমনীয়স্য বস্তুনো বরস্ত্রীরত্নাদিনো দানং। কাম্যেন কামনয়া বা দানং প্রবারণমুচ্যতে। কাম্যশব্দোঽত্র তন্ত্রেণোভয়ার্থঃ। প্রকর্ষেণ বার্য্যতে সংগৃহ্যতে প্রবারণং তচ্চ মহাদানং। প্রবারণং মহাদানমিতি ত্রিকাণ্ডশেষঃ। ইতি তট্টীকায়াং ভরতঃ॥ নিষেধঃ। ইতি মেদিনী॥

প্রবাসঃ (পুং) বিদেশস্থিতিঃ। যথা। কর্ণেজপৈরাহিতরাজ্যলোভা স্ত্রৈণেন নীতা বিকৃতিং লঘিম্না। রামপ্রবাসে ব্যমৃষন্নদোষং জনাপবাদং সনরেন্দ্রমৃত্যুং॥ ইতি ভট্টিঃ॥ *॥ দ্বাদশবর্ষাশ্রুতবার্ত্তাকপ্রোষিতস্য তৎপ্রবাসাদ্যদিনে শ্রাদ্ধং কর্ত্তব্যং। যথা। প্রবাসবাসরে জ্ঞেয়ং তন্মাসেন্দুক্ষয়েঽথবা। ইতি মিতাক্ষরা॥*॥ প্রবাসাগতেন গুর্ব্বাদ্যভিবাদনং কর্ত্তব্যং। যথা। বিপ্রোষ্য পাদগ্রহণমন্বহঞ্চাভিবাদনং। গুরুদারেষু কুর্ব্বীত সতাং ধর্ম্মমনুস্মরন্॥ মাতৃস্বসা মাতুলানী শ্বশ্রূশ্চাথ পিতুঃ স্বসা। প্রপূজ্যা গুরুপত্নীব সমাস্তা গুরুভার্য্যয়া॥ ভ্রাতৃভার্য্যোপসংগ্রাহ্যা সবর্ণাহন্যহন্যপি। বিপ্রোষ্য ভূপ সংগ্রাহ্যা জ্ঞাতিসম্বন্ধিযোষিতঃ॥ পিতুর্ভগিন্যাং মাতুশ্চ জ্যায়স্যাঞ্চ স্বসর্য্যপি। মাতৃবদ্বৃত্তিমাতিষ্ঠেন্মাতা তাভ্যো গরীয়সী॥ ইতি কৌর্ম্মে উপবিভাগে ১৩ অধ্যায়ঃ॥

প্রবাসনং (ক্লী) বধঃ। ইত্যমরঃ॥ প্রবাসনা। যথা। সীতাপ্রবাসনপটোঃ করুণা কুতস্তে। ইত্যুত্তরবীরচরিত্রং॥

প্রবাসী (ত্রি) প্রবাসবিশিষ্টঃ। প্রোষিতঃ। বিদেশস্থঃ। যথা। অধ্বনীনোঽধ্বগোঽধ্বন্যঃ পান্থঃ পথিকদেশিকৌ। প্রবাসী তদ্গণো হারিঃ পাথেয়ং সম্বলং সমে॥ ইতি হেমচন্দ্রঃ॥

প্রবাহঃ (পুং) প্রবৃত্তিঃ। জলস্রোতঃ। ইতি মেদিনী॥ ব্যবহারঃ। ইতি বিশ্বঃ॥ প্রকৃষ্টাশ্বঃ। ইতি নানার্থরত্নমালা॥

প্রবাহকঃ (পুং) রাক্ষসঃ। ইতি শব্দমালা॥ প্রকৃষ্টবহনকর্ত্তরি ত্রি॥

প্রবাহিকা (স্ত্রী) গ্রহণীরুক্। ইত্যমরঃ॥ অস্যা নিদানং গ্রহণীশব্দে দ্রষ্টব্যং। অস্যাঃ স্বরূপমাহ চরকঃ। অগ্ন্যধিষ্ঠানমন্নস্য গ্রহণাদ্গ্রহণী মতা। অপক্কং ধারয়েৎ

তত্র পক্কং ত্যজতি বাপ্যধঃ॥ সুশ্রুতোঽপি। ষষ্ঠী পিত্তধরা নাম যা কলা পরিকীর্ত্তিতা। আমপক্বাশয়ান্তঃস্থা গ্রহণী সাভিধীয়তে॥ গ্রহণ্যা বলমগ্নির্হি স চাপি গ্রহণীশ্রিতঃ। তস্মাদগ্নৌ প্রদুষ্টে তু গ্রহণ্যপি বিদুষ্যতি॥ তস্মাৎ কার্য্যঃ পরীহারো হ্যতীসারে বিরিক্তবৎ॥ * ॥ অতীসারে দ্রবধাতুপ্রবৃত্তিঃ গ্রহণ্যাস্তু বদ্ধস্যাপি মলস্য প্রবৃত্তিরিতি তয়োর্ভেদঃ॥ * ॥ গ্রহণীরোগস্য ভেদং সংগ্রহগ্রহণীরোগমাহ। দ্রবং ঘনং সিতং স্নিগ্ধং সকটীবেদনং শকৃৎ। আমং বহুসপৈচ্ছিল্যং সশব্দং মন্দবেদনং॥ পক্ষান্মাসাদ্দশাহাদ্বা নিত্যঞ্চাপি বিমুঞ্চতি। অন্ত্রকূজনমালস্যং দৌর্ব্বল্যং সদনং ভবেৎ॥ দিবা প্রকোপো ভবতি রাত্রৌ শান্তিঞ্চ গচ্ছতি। দুর্ব্বিজ্ঞেয়া দুর্নিবারা চিরকালানুবন্ধিনী॥ সা ভবেদামবাতেন সংগ্রহসংগ্রহণী মতা॥*॥ অথ ঘটীযন্ত্রাখ্যং গ্রহণীরোগভেদমাহ। প্রসুপ্তিঃ পার্শ্বয়োঃ শূলং তথা জলঘটীধ্বনিঃ। তং বদন্তি ঘটীযন্ত্রমসাধ্যং গ্রহণীগদং॥ * ॥ অথ গ্রহণীরোগস্যারিষ্টমাহ। যৈর্লক্ষণৈঃ সিধ্যতি নাতিসারস্তৈঃ স্যান্ন সাধ্যো গ্রহণীগদোঽপি। বৃদ্ধস্য জায়েত যদা গদোঽয়ং দেহং তদা তস্য বিনাশয়েচ্ছেৎ॥ * ॥ অথ সামান্যগ্রহণীরোগস্য চিকিৎসামাহ। গ্রহণীমাশ্রিতং রোগমজীর্ণবদুপাচরেৎ। লঙ্ঘনৈর্দ্দীপনীয়ৈশ্চ মন্দাতীসারভেষজৈঃ॥ দোষং সামং নিরামঞ্চ বিদ্যাদত্রাতিসারবৎ। অতীসারোক্তবিধিনা তস্যামঞ্চ বিপাচয়েৎ॥ পেয়াদি পটু লঘ্বন্নং পঞ্চকোলাদিভির্যুতং। দীপনানি চ তক্রঞ্চ গ্রহণ্যাং যোজয়েদ্ভিষক্॥ কপিত্থবিল্বচাঙ্গেরীতক্রদাড়িমসাধিতা। যবাগূঃ পাচয়ত্যামং শকৃৎ সম্বর্ত্তয়ত্যপি॥ সম্বর্ত্তয়তি ঘনীকরোতি॥ * ॥ অথ খড়্যূষঃ। মুদ্গযূষং রসং তক্রং ধান্যজীরকসংযুতং। সৈন্ধবেনান্বিতং দদ্যাৎ খড়্যূষমিতি কীর্ত্তিতং॥ রসং লঘুগ্রাহিকমাংসভবং॥ * ॥ কর্ষং গন্ধকমর্দ্ধপারদমুভে কুর্য্যাচ্ছুভাং কজ্জলীং ত্র্যক্ষং ত্র্যূষণতশ্চ পঞ্চলবণং সার্দ্ধঞ্চ কর্ষং পৃথক্। ভৃষ্টং হিঙ্গু চ জীরকদ্বয়যুতং সর্ব্বার্দ্ধভাগান্বিতং খাদেট্টঙ্কমিতং প্রবৃত্তিগদবাংস্তক্রস্য বিল্বেন চ॥ লঘুনায়িকাচূর্ণমিত্যর্থঃ॥ * ॥ ইতি লঘুলাঈচূর্ণং॥ * ॥ ত্রিকটু ত্রিফলা চৈব বিড়ঙ্গং জীরকদ্বয়ং। ভল্লাতকং যবানী চ হিঙ্গুলবণপঞ্চকং॥ গৃহধূমো বচা কুষ্ঠং রসো গন্ধকমভ্রকং। ক্ষারত্রয়াজমোদে চ চিত্রকং গজপিপ্পলী॥ মুস্তা মোচরসং পাঠা লবঙ্গং জাতিপত্রকং। সমভাগকৃতঞ্চৈষাং চূর্ণং শ্লক্ষ্ণং বিনির্ম্মিতং॥ শক্রাশনস্য চূর্ণস্তু চূর্ণতুল্যং প্রদাপয়েৎ। মন্দাগ্নিকাসদুর্নামপ্লীহপাণ্ডুরুচিজ্বরান্॥ বিষ্টম্ভং সংগ্রহং শূলং হন্যান্নানাতিসারজিৎ। আমবাতাপহং বল্যং সূতিকাদোষনাশনং॥ বর্জ্জয়েন্মাষমন্নঞ্চ স্নানং পিশিতভোজনং। পথ্যং কাঞ্জিকমত্রাপি দধি তক্রমথাপি বা॥ বৃহল্লাঈচূর্ণমিদং লাঈভাষিতমুত্তমং।

ইতি বৃহল্লাঙ্গচূর্ণং। বৃহন্নায়িকাচূর্ণমিতি প্রসিদ্ধং ॥ * ॥ জাতীফললবঙ্গৈলাপত্র-ত্বঙ্নাগকেশরৈঃ। কর্পূরচন্দনতিলত্বক্‌ক্ষীরী-তগরামলৈঃ ॥ তালীশপিপ্পলীপথ্যাস্থূল জীরকচিত্রকৈঃ। শুণ্ঠীবিড়ঙ্গমরিচৈঃ সম ভাগবিচূর্ণিতৈঃ ॥ যাবন্ত্যেতানি সর্ব্বাণি দদ্যাদ্ভঙ্গাঞ্চ তাবতীং। সর্ব্বচূর্ণসমানাংশা প্রদেয়া শুভ্রশর্করা ॥ কর্ষমাত্রমিদং খাদে-ন্মধুনা প্লাবিতং জনঃ। নাশয়েদ্‌গ্রহণীং কাসং ক্ষয়ং শ্বাসমরোচকং ॥ জাতী-ফলাদিচূর্ণং ॥ * ॥ চিত্রকং পিপ্পলীমূলং ক্ষারৌ লবণপঞ্চকং। ব্যোষং হিঙ্গ্বজমোদা-ঞ্চ চব্যঞ্চৈকত্র চূর্ণয়েৎ ॥ বটিকা মাতু-লুঙ্গস্য রসৈর্ব্বা দাড়িমস্য বা। কৃতা বিপা চয়ত্যামং প্রদীপয়তি চানলং ॥ ক্ষারৌ সর্জিকা যবক্ষারশ্চ। লবণপঞ্চকমিতি। সৈন্ধবং রুচকঞ্চৈব বিড়ং সামুদ্রকং গড়-মিতি। ব্যোষং শুণ্ঠীপিপ্পলীমরিচানি। অজমোদাত্র যবানিকা। মাতুলুঙ্গং বীজ-পূরকং। চিত্রকাদিবটিকা ॥ * ॥ শ্রীফল-শলাটুকল্কো নাগরচূর্ণেন মিশ্রিতঃ স-গুড়ঃ। গ্রহণীগদমত্যুগ্রং তক্রভুজাশীলিতো জয়তি ॥ শ্রীফলশলাটুঃ বিল্বস্যামং ফলং। গুড়স্যাত্র ভাগদ্বয়ং। বিল্বকল্কঃ ॥ * ॥ চতুষ্পলং সুধাকাণ্ডং ত্রিপলং লবণত্রয়ং। বার্ত্তাকোঃ কুড়বঞ্চার্কমূলাদ্দ্বিল্বে তথা-নলাৎ ॥ দগ্ধা দ্রবেণ বার্ত্তাকোর্গুটিকা ভোজনোত্তরং। ভুক্তা ভুক্তং পচত্যাশু নাশয়েদ্‌গ্রহণীগদং ॥ কাসং শ্বাসং তথা-র্শাংসি বিসূচীঞ্চ হৃদাময়ং। বার্ত্তাকু-গুটিকা ॥ * ॥ মুস্তকাতিবিষাবিল্বকৌটজং সূক্ষ্মচূর্ণিতং। মধুনা চ সমালীঢ়ং গ্রহণীং সর্ব্বজাং ত্যজেৎ ॥ কৌটজং ইন্দ্রযবঃ। মুস্তকাদিচূর্ণং ॥ * ॥ শ্বেতো বা যদি বা রক্তঃ সুপক্কো গ্রহণীগদঃ। গুড়েনাধিক-সর্জেন ভক্ষিতেনাশু নশ্যতি ॥ সর্জ্জঃ রালঃ। সর্জরসচূর্ণং ॥ * ॥ বিল্বাব্দশক্র-যববালকমোচসিদ্ধমাজং পয়ঃ পিবতি যো দিবসত্রয়েণ। সোঽতিপ্রবৃদ্ধচিরজ গ্রহণীবিকারং সামং সশোণিতমসাধ্য-মপি ক্ষিণোতি ॥ মোচো মোচরসঃ। ক্ষিণোতি হন্তি ॥ * ॥ প্রস্থত্রয়ে ত্বামলকী-রসস্য শুদ্ধস্য দত্ত্বার্দ্ধতুলাং গুড়স্য। চূর্ণী কৃতৈর্গ্রন্থিকজীরচব্যব্যোষেভকৃষ্ণাহবুষা জমোদৈঃ ॥ বিড়ঙ্গসিন্ধুত্রিফলাযবানী-পাঠাগ্নিধান্যৈশ্চ পলপ্রমাণৈঃ। দত্ত্বা ত্রিবৃ-চ্চূর্ণপলানি চাষ্টাবষ্টৌ চ তৈলস্য পচেদ্‌-যথাবৎ ॥ তং ভক্ষয়েদক্ষফলপ্রমাণং যথেষ্টচেষ্টস্ত্রিসুগন্ধিযুক্তং। অনেন সর্ব্বে গ্রহণীবিকারাঃ সশ্বাসকাসস্বরভেদশোথাঃ ॥ শাম্যন্তি চায়ং চিরমন্তরগ্নের্হতস্য পুংস্ত্বস্য চ বৃদ্ধিহেতুঃ। স্ত্রীণান্তু বন্ধ্যাময়নাশনঃ স্যাৎ কল্যাণকো নাম গুড়ঃ প্রসিদ্ধঃ ॥ তৈলে মনাক্‌ ত্রিবৃদ্‌ভৃষ্টা ত্রিসুগন্ধি পলং পলং। সিদ্ধে নিধেয়মত্রৈব গুড়ে কল্যাণ-পূর্ব্বকে ॥ কল্যাণকগুড়ঃ ॥ * ॥ পিপ্পলী পিপ্পলীমূলং চিত্রকং গজপিপ্পলী। ধান্য-কঞ্চ বিড়ঙ্গানি যবানী মরিচানি চ ॥ ত্রিফলা চাজমোদা চ নলিনী জীরকস্তথা। সৈন্ধবং রৌমকঞ্চাপি সামুদ্রং রুচকং

বিড়ং ॥ আরগ্বধশ্চ ত্বক্‌পত্রং সূক্ষ্মৈলা চোপকুঞ্চিকা। শুণ্ঠীশক্রযবাশ্চৈব প্রত্যেকং কর্ষসম্মিতাঃ ॥ মৃদ্বীকায়াঃ পলান্যত্র চত্বারি কথিতানি হি। ত্রিবৃতায়াঃ পলান্যষ্টৌ গুড়স্যার্দ্ধতুলা তথা ॥ তিলতৈলপলান্যষ্টা বামলক্যা রসস্য তু। প্রস্থত্রয়মিদং সর্ব্বং শনৈর্মৃদ্বগ্নিনা পচেৎ ॥ ঔডুম্বরং চামলকং বাদরং বা যথা ফলং। তাবন্মাত্রমিদং খাদেদ্ভক্ষয়েদ্বা যথানলং ॥ নিখিলান্ গ্রহণীরোগান্ প্রমেহাংশ্চৈব বিংশতিং। উরোঘাতং প্রতিশ্যায়ং দৌর্ব্বল্যং বহ্নিসংক্ষয়ং ॥ জ্বরানপি হরেৎ সর্ব্বান্ কুর্য্যাৎ কান্তিং মতিং স্বরং। পিচুপাঠান্বয়াদ্ধন্তি রক্তপিত্তঞ্চ বিড্‌গ্রহং ॥ ধাতুক্ষীণো বয়ঃক্ষীণঃ স্ত্রীষু ক্ষীণঃ ক্ষয়ী চ যঃ। তেভ্যো হিতশ্চ বন্ধ্যায়ৈ মহাকল্যাণকো গুড়ঃ ॥ মহাকল্যাণকগুড়ঃ ॥*॥ কুষ্মাণ্ডানাং সুপক্বানাং স্বিন্নানাং নিষ্কুলত্বচাং। সর্পিঃপ্রস্থে পলশতং তাম্রপাত্রে শনৈঃ পচেৎ॥ পিপ্পলী পিপ্পলীমূলং চিত্রকং গজপিপ্পলী। ধান্যকানি বিড়ঙ্গানি নাগরং মরিচানি চ ॥ ত্রিফলা চাজমোদা চ কলিঙ্গাজাজিসৈন্ধবং ॥ একৈকস্য পলশ্চৈকং ত্রিবৃতোঽষ্টৌ পলানি চ। তৈলস্য চ পলান্যষ্টৌ গুড়াৎ পঞ্চাশদেব তু॥ আমলক্যা রসস্যাত্র প্রস্থত্রয়মুদীরিতং। তাবৎ পাকং প্রকুর্ব্বীত মৃদুনা বহ্নিনা ভিষক্ ॥ যাবদ্দর্ব্বীপ্রলেপঃ স্যাত্তদৈনমবতারয়েৎ। ঔডুম্বরঞ্চামলকং বাদরং বা যথা ফলং ॥ তাবন্মাত্রমিদং খাদেদ্ভক্ষয়েদ্বা যথানলং। অনেনৈব বিধানেন প্রযুক্তশ্চ দিনে দিনে ॥ নিহন্তি গ্রহণীরোগান্ কুষ্ঠান্যর্শোভগন্দরান্। জ্বরমানাহহৃদ্রোগগুল্মোদরবিসূচিকাঃ ॥ কামলাং পাণ্ডুরোগঞ্চ প্রমেহাংশ্চৈব বিংশতিং। বাতশোণিতবীসর্পদদ্রুযক্ষ্মহলীমকান্ ॥ বাতপিত্তকফান্ সর্ব্বান্ দুষ্টান্ শুদ্ধান্ সমাচরেৎ। ব্যাধিক্ষীণা বয়ঃক্ষীণাঃ স্ত্রীষু ক্ষীণাশ্চ যে নরাঃ॥ তেভ্যো হিতো গুড়োঽয়ং স্যাদ্বন্ধ্যানামপি পুত্রদঃ। বৃষ্যো বল্যো বৃংহণশ্চ বয়সঃ স্থাপনঃ পরঃ॥ কুষ্মাণ্ডকল্যাণকগুড়ঃ ॥ * ॥ অতীসারাধিকারলিখিতং বিল্বতৈলঞ্চাত্র হিতং। ইতি ভাবপ্রকাশে গ্রহণীরোগাধিকারঃ॥

প্রবাহী (স্ত্রী) বালুকা। ইতি রাজনির্ঘণ্টঃ॥

প্রবাহুঃ (পুং) কুর্পস্যাধোভাগঃ। যথা। মুখং বাহুপ্রবাহূ চ মনঃ সর্ব্বেন্দ্রিয়াণি চ। রক্ষত্বব্যাহতৈশ্বর্য্যস্তব নারায়ণোঽব্যয়ঃ॥ ইতি বিষ্ণুপুরাণে ৫ অংশে ৫ অধ্যায়ঃ॥

প্রবাহুকম্ ব্য সমানকালে। ঊর্দ্ধার্থে। প্রবাহিকেতি পাঠান্তরং। ইতি কৌমুদীটীকা তত্ত্ববোধিনী॥

প্রবিখ্যাতিঃ (স্ত্রী) অতিপ্রসিদ্ধিঃ। তৎপর্য্যায়ঃ। বিশ্রাবঃ ২। ইত্যমরঃ॥

প্রবিদারণং (ক্লী) যুদ্ধং। ইত্যমরঃ॥ অবদারণং। ইতি মেদিনী॥ আকীর্ণং। ইতি শব্দরত্নাবলী॥

প্রবিরঃ (পুং) পীতকাষ্ঠং। ইতি শব্দচন্দ্রিকা॥

প্রবিশ্লেষঃ (পুং) প্রকৃষ্টবিশ্লেষঃ। তৎপর্য্যায়ঃ। বিধুরং২। ইত্যমরঃ॥ বিকলং।

যথা। বৈক্লব্যেঽপি চ বিশ্লেষে বিধুরং বিকলে ত্রিম্বিতি ভরতধৃতত্রিকাণ্ডশেষঃ ॥

প্রবিষা (স্ত্রী) অতিবিষা। ইত্যমরঃ ॥

প্রবিষ্টঃ (ত্রি) প্রবেশবিশিষ্টঃ। যথা। স তং প্রবিষ্টং বৃতমাততায়িভির্ভটৈরনেকৈরবলোক্য মাধবঃ। ইতি শ্রীভাগবতে বাণযুদ্ধে ৬২ অধ্যায়ঃ ॥

প্রবীণঃ (ত্রি) প্রকৃষ্টং বেত্তি যঃ। তৎপর্য্যায়ঃ। নিপুণঃ ২ অভিজ্ঞঃ ৩ বিজ্ঞঃ ৪ নিষ্ণাতঃ ৫ শিক্ষিতঃ ৬ বৈজ্ঞানিকঃ ৭ কৃতমুখঃ ৮ কৃতী ৯ কুশলঃ ১০। ইত্যমরঃ ॥

প্রবীরঃ (পুং) সুভটঃ। উত্তমে ত্রি। ইতি ধরণিঃ ॥

প্রবৃত্তঃ (ত্রি) প্রবৃত্তিবিশিষ্টঃ। যথা। প্রবৃত্ত এব স্বয়মুজ্ঝিতশ্রমঃ ক্রমেণ পেষ্টুং ভুবনদ্বিষামপি। তথাপি বাচালতয়া যুনক্তি মাং মিথস্তুদা ভাষণলোলুপং মনঃ ॥ ইতি মাঘপ্রথমসর্গঃ ॥ আরব্ধঃ। যথা। প্রবৃত্তমন্যথা কুর্য্যাৎ যদি মোহাৎ কথঞ্চন। যতস্তদন্যথা ভূতং তত এব সমাপয়েৎ ॥ ইতি ছন্দোগপরিশিষ্টং ॥ প্রকৃষ্টবর্ত্তনবিশিষ্টশ্চ ॥

প্রবৃত্তিঃ (স্ত্রী) প্রবাহঃ। উদন্তঃ। প্রবর্ত্তনং। অবন্ত্যাদিদেশঃ। ইতি মেদিনী ॥ হস্তিমদঃ। ইতি হেমচন্দ্রঃ ॥ ন্যায়মতে যত্নবিশেষঃ। অস্যাঃ কারণং। চিকীর্ষা। কৃতিসাধ্যতাজ্ঞানং। ইষ্টসাধনতাজ্ঞানং। উপাদানপ্রত্যক্ষং। যথা। প্রবৃত্তিশ্চ নিবৃত্তিশ্চ তথা জীবনকারণং। এবং প্রযত্নত্রৈবিধ্যং তান্ত্রিকৈঃ পরিদর্শিতং ॥ চিকীর্ষা কৃতিসাধ্যেষ্টসাধনত্বমতিস্তথা। উপাদানস্য চাধ্যক্ষং প্রবৃত্তৌ জনকং ভবেৎ ॥ ইতি ভাষাপরিচ্ছেদঃ ॥

প্রবৃত্তিজ্ঞঃ (পুং) চারভেদঃ। তৎপর্য্যায়ঃ। বার্ত্তিকঃ ২ বার্ত্তায়নঃ ৩। ইতি ত্রিকাণ্ডশেষঃ ॥

প্রবৃদ্ধঃ (ত্রি) বৃদ্ধিযুক্তঃ। তৎপর্য্যায়ঃ। প্রৌঢ়ঃ২ এধিতঃ ৩। প্রসারিতঃ। তৎপর্য্যায়ঃ। প্রসৃতঃ ২। ইত্যমরঃ ॥

প্রবেকঃ (ত্রি) উত্তমঃ। প্রধানং। ইত্যমরঃ ॥

প্রবেটঃ (পুং) যবঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

প্রবেণিঃ (স্ত্রী) কুথঃ। বেণী। ইতি মেদিনী ॥

প্রবেণী (স্ত্রী) বেণী। গজপৃষ্ঠস্থচিত্রকম্বলং। ইত্যমরঃ ॥

প্রবেলঃ (পুং) পীতমুদ্গাঃ। ইতি হেমচন্দ্রঃ ॥

প্রবেশঃ (পুং) অন্তর্বিগাহনং। ইতি হেমচন্দ্রঃ ॥

প্রবেশনং (ক্লী) সিংহদ্বারং। ইতি হেমচন্দ্রঃ ॥ প্রবেশশ্চ ॥

প্রবেষ্টঃ (পুং) বাহুঃ। ইত্যমরঃ ॥ বাহুনীচভাগঃ। ইতি শব্দচন্দ্রিকা ॥ হস্তিদন্তমাংসং। ইতি হারাবলী ॥ গজপৃষ্ঠতল্পনং। ইতি ত্রিকাণ্ডশেষঃ ॥

প্রব্যক্তং (ত্রি) স্ফুটং। ইত্যমরঃ ॥

প্রব্রজিতঃ (পুং) বুদ্ধভিক্ষুশিষ্যঃ। তৎপর্য্যায়ঃ। চেলুকঃ ২ শ্রামণেরঃ ৩ মহাপাশকঃ ৪ গোমী ৫। ইতি ত্রিকাণ্ডশেষঃ ॥ প্রব্রজ্যাশ্রমবিশিষ্টঃ ॥

প্রব্রজিতা (স্ত্রী) মাংসী। মুণ্ডীরী। তাপসী। ইতি মেদিনী ॥

প্রব্রজ্যা (স্ত্রী) সন্ন্যাসঃ। প্রপূর্ব্বব্রজধাতোর্ভাবে ক্যপ্প্রত্যয়ঃ। অস্য প্রয়োগঃ বক্ষ্যমাণশব্দে দ্রষ্টব্যঃ॥

প্রব্রজ্যাবসিতঃ (পুং) সন্ন্যাসভ্রষ্টঃ। যথা। তবাহমিত্যুপগতঃ প্রব্রজ্যাবসিতঃ কৃতঃ। ইতি দায়ভাগবচনব্যাখ্যায়াং ক্রমসংগ্রহঃ॥

প্রশংসা (স্ত্রী) প্রশংসনং। তৎপর্য্যায়ঃ। বর্ণনা ২ ঈড়া ৩ স্তবঃ ৪ স্তোত্রং ৫ স্তুতিঃ ৬ নুতিঃ ৭ শ্লাঘা ৮ অর্থবাদঃ ৯। ইতি হেমচন্দ্রঃ॥ আত্মপ্রশংসানিষেধো যথা। ন চাত্মানং প্রশংসেদ্বা পরনিন্দাঞ্চ বর্জয়েৎ। বেদনিন্দাং দেবনিন্দাং প্রযত্নেন বিবর্জ্জয়েৎ॥ ইতি কৌর্ম্মে উপবিভাগে ১৫ অধ্যায়ঃ॥

প্রশমঃ (পুং) শমতা। উপশমঃ। যথা। এতানি দশ পাপানি প্রশমং যান্ত জাহ্নবি। ইতি তিথ্যাদিতত্ত্বং॥

প্রশমনং (ক্লী) মারণং। বধঃ। ইতি হেমচন্দ্রঃ॥ শমতা। প্রশান্তিঃ। যথা। সর্ব্বাবাধাপ্রশমনং ত্রৈলোক্যস্যাখিলেশ্বরি। এবমেব ত্বয়া কার্য্যমস্মদ্বৈরিবিনাশনং॥ ইতি মার্কণ্ডেয়পুরাণং॥

প্রশস্তং (ত্রি) ক্ষেমং। ইতি শব্দরত্নাবলী॥ প্রশংসনীয়ং। অতিশ্রেষ্ঠং। ইতি মতল্লিকাদিশব্দটীকায়াং ভরতঃ॥

প্রশস্যঃ (ত্রি) প্রশংসনীয়ঃ। প্রপূর্ব্বশন্সধাতোঃ কর্ম্মণি ক্যপ্প্রত্যয়েন নিষ্পন্নঃ॥

প্রশান্ [ম্] (ত্রি) প্রকর্ষেণ শাম্যতি যঃ। শান্তঃ। ইতি মুগ্ধবোধব্যাকরণং॥

প্রশান্তঃ (ত্রি) প্রকৃষ্টশমতাবিশিষ্টঃ। যথা। প্রশান্তশ্বাপদাকীর্ণং মুনিশিষ্যোপশোভিতং। ইতি মার্কণ্ডেয়পুরাণং॥

প্রশাস্তা [ঋ] (ত্রি) ঋত্বিক্। মিত্রং। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥ শাসনকর্ত্তা চ॥

প্রশ্নঃ (পুং) জিজ্ঞাসা। তৎপর্য্যায়ঃ। অনুযোগঃ ২ পৃচ্ছা ৩। ইত্যমরঃ॥

প্রশ্নদূতী (স্ত্রী) প্রহেলিকা। ইতি ত্রিকাণ্ডশেষঃ॥

প্রশ্নী (স্ত্রী) কুম্ভিকা। ইতি ত্রিকাণ্ডশেষঃ॥

প্রশ্রয়ঃ (পুং) প্রণয়ঃ। ইত্যমরঃ॥

প্রশ্রিতঃ (ত্রি) বিনীতঃ। ইত্যমরঃ॥

প্রশ্লথঃ (ত্রি) শিথিলঃ। ইতি ত্রিকাণ্ডশেষঃ॥

প্রষ্টা [ঋ] (ত্রি) প্রশ্নকর্ত্তা। তৎপর্য্যায়ঃ। কথংকথিকঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥

প্রষ্ঠঃ (ত্রি) অগ্রগামী। ইত্যমরঃ॥

প্রষ্ঠবাট্ (পুং) যুগপার্শ্বগঃ। ইত্যমরঃ॥ শিক্ষার্থং যুগবাহিপার্শ্বযোজিতঃ। ইতি ভরতঃ॥ যোজিতং যুগপার্শ্বে দমনার্থং যং হালিকা ভ্রাময়ন্তি সঃ। ইতি মধুঃ॥ যুবা গৌর্দমনায় যোজিতঃ। ইত্যন্যে॥

প্রষ্ঠী (স্ত্রী) প্রষ্ঠভার্য্যা। অগ্রগামিপত্নী। ইতি জটাধরঃ॥

প্রষ্ঠৌহী (স্ত্রী) বালগর্ব্ভিণী। প্রথমগর্ব্ভবতী গৌঃ। প্রষ্ঠং প্রথমগর্ব্ভং বহতি যা সা। বালা সতী গর্ব্ভিণী প্রথমগর্ব্ভেত্যর্থঃ। ইতি ভরতঃ॥

প্রস ম ষ ঙ প্রসবে। ততৌ। ইতি কবিকল্পদ্রুমঃ॥ রেফযুক্তাদ্যঃ। ম প্রসয়তি। ষ

প্রসা। ও প্রসতে কীর্ত্তিং বিদ্যা। প্রসূতে বিস্তারয়তি বেত্যর্থঃ। ইতি দুর্গাদাসঃ ॥

প্রসক্তং (ক্লী) নিত্যং। ইতি জটাধরঃ ॥ তদ্বতি ত্রি ॥

প্রসক্তিঃ (স্ত্রী) প্রসঙ্গঃ। অনুমিতিঃ। আপত্তিঃ। ইতি সব্যভিচারশিরোমণিঃ ॥

প্রসঙ্গঃ (পুং) সঙ্গতিবিশেষঃ। যথা। স প্রসঙ্গ উপোদ্ঘাতো হেতুতাবসরস্তথা। নির্ব্বাহকৈককার্য্যত্বে ষোঢ়াসঙ্গতিরিষ্যতে॥ তস্য লক্ষণং। স্মৃতস্যোপেক্ষানর্হত্বং। তদর্থস্তু স্মৃতিবিষয়তাপন্নত্বে সতি দ্বেষবিষয়তানাপন্নত্বং। ইত্যনুমিতিগ্রন্থে গদাধরভট্টাচার্য্যঃ ॥ * ॥ অন্যোদ্দেশেন প্রবৃত্তাবন্যস্যাপি সিদ্ধিঃ। যথা। দৃষ্টা তু হরতে পাপং স্পৃষ্টা তু ত্রিদিবং নয়েৎ। প্রসঙ্গেনাপি যা গঙ্গা মোক্ষদা হ্যবগাহিতা॥ ইতি প্রায়শ্চিত্ততত্ত্বং ॥ * ॥ প্রসক্তিঃ। যথা। আনীতা ভবতা যদা পতিরতা সাধ্বী ধরিত্রীসুতা স্ফূর্জদ্রাক্ষসমায়য়া ন চ কথং রামাঙ্গমঙ্গীকৃতং। কর্ত্তুং চেতসি পুণ্ডরীকনয়নং দূর্ব্বাদলশ্যামলং তুচ্ছং ব্রহ্মপদং ভবেৎ পরবধূসঙ্গপ্রসঙ্গঃ কুতঃ ॥ ইতি নাটকং ॥ * ॥ প্রস্তাবঃ। যথা। তত্রৈব গঙ্গা যমুনা চ তত্র গোদাবরী তত্র সরস্বতী চ। সর্ব্বাণি তীর্থানি বসন্তি তত্র যত্রাচ্যুতোদারকথাপ্রসঙ্গঃ ॥ ইতি পৌরাণিকাঃ ॥ * ॥ মৈথুনং। যথা। প্রসঙ্গনিত্যদ্রুতপৃষ্ঠযানাদিতি রুগ্বিনিশ্চয়বচনটীকায়াং বিজয়রক্ষিতঃ ॥

প্রসজ্যপ্রতিষেধঃ (পুং) নিষেধবিশেষঃ। তল্লক্ষণং যথা। অপ্রাধান্যং বিধের্যত্র প্রতিষেধে প্রধানতা। প্রসজ্যপ্রতিষেধোঽসৌ ক্রিয়য়া সহ যত্র নঞ্ ॥ অস্যোদাহরণং। ভোজরাজঃ। পৌষে চৈত্রে কৃষ্ণপক্ষে নবান্নং নাচরেদ্বুধঃ। ভবেজ্জন্মান্তরে রোগী পিতৃণাং নোপতিষ্ঠতে ॥ অত্র রোগীতিনিন্দাশ্রবণাৎ প্রসজ্যতা। নোপতিষ্ঠতে ইতি শ্রবণাৎ পর্য্যুদাসতা। ইতি মলমাসতত্ত্বং ॥

প্রসত্তিঃ (স্ত্রী) প্রসন্নতা। নৈর্ম্মল্যং। ইতি জটাধরঃ ॥

প্রসত্বরী (স্ত্রী) প্রতিপত্তিঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ ॥

প্রসত্বা [ন্] (পুং) ধর্ম্মঃ। প্রজাপতিঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ ॥

প্রসন্নঃ (ত্রি) নির্ম্মলঃ। তৎপর্য্যায়ঃ। অচ্ছঃ ২। ইত্যমরঃ ॥ সন্তুষ্টঃ। ইতি মেদিনী ॥

প্রসন্নতা (স্ত্রী) প্রসন্নস্য ভাবঃ। তৎপর্য্যায়ঃ। প্রসাদঃ ২। ইত্যমরঃ ॥

প্রসন্না (স্ত্রী) সুরা। ইত্যমরঃ ॥ মদ্যবিশেষঃ। তস্যা গুণাঃ। প্রসন্না গুল্মবাতার্শোবিবন্ধানাহনাশিনী। শূলপ্রবাহিকাটোপকফবাতার্শসাং হিতা ॥ ইতি রাজবল্লভঃ ॥ প্রসাদবিশিষ্টা। যথা। সৈষা প্রসন্না বরদা নৃণাং ভবতি মুক্তয়ে। ইতি চণ্ডী ॥

প্রসন্নেরা (স্ত্রী) মদিরা। ইত্যমরটীকায়াং ভরতঃ ॥

প্রসভঃ (পুং) বলাৎকারঃ। ইত্যমরঃ ॥

প্রসরঃ (পুং) তন্তুব্রণবিটপাদের্ব্বিসর্পণং। প্রকর্ষেণ নিকটে সরণং সর্পণং। তৎ-

পর্য্যায়ঃ ৮ বিসর্পঃ ২। ইত্যমরভরতৌ॥ প্রণয়ঃ। বেগঃ। ইতি মেদিনী॥ সমূহঃ। ইতি শব্দরত্নাবলী॥ যুদ্ধং। ইতি বিশ্বঃ॥ নারাচঃ। ইতি ভূরিপ্রয়োগঃ॥

প্রসরণং (ক্লী) সৈন্যানাং সর্ব্বতো ব্যাপ্তিঃ। তৎপর্য্যায়ঃ। আসারঃ ২। ইত্যমরঃ॥ প্রসরণী ৩ প্রসরণিঃ ৪ প্রসারণী ৫। ইতি রামাশ্রমঃ॥ সৈন্যানাং তৃণকাষ্ঠাদিহেতবে ইতস্ততো গমনং। ইতি হেমচন্দ্রঃ॥

প্রসরণী (স্ত্রী) প্রসরণং। ইত্যমরটীকায়াং ভরতঃ॥

প্রসর্পণং (ক্লী) গমনং। প্রসরণং। প্রপূর্ব্ব-সৃপধাতোর্ভাবেঽনট্‌প্রত্যয়ঃ॥

প্রসবঃ (পুং) গর্ব্ভমোচনং। তৎপর্য্যায়ঃ। প্রসূতিঃ ২। ইত্যমরঃ॥ উৎপাদঃ। অপত্যং। ফলং। কুসুমং। ইতি মেদিনী॥ * ॥ প্রসবস্য মাসনিয়মো যথা। নবমে দশমে মাসি নারী গর্ব্ভং প্রসূয়তে। একাদশে দ্বাদশে বা ততোঽন্যত্র বিকারতঃ॥ ইতি ভাবপ্রকাশঃ॥ * ॥ প্রসূতিকারকৌষধাদি যথা। পীতস্তু কাঞ্জিকং রুদ্র কথিতং শরপুঙ্খয়া। হিঙ্গুসৈন্ধবসংযুক্তং শীঘ্রং স্ত্রীণাং প্রসূতিকৃৎ॥ মাতুলুঙ্গস্য বৈ মূলং কটিবদ্ধং প্রসূতিকৃৎ। অপামার্গস্য বৈ মূলং যোনিস্থঞ্চ প্রসূতিকৃৎ॥ অপামার্গস্য বৈ মূলে গর্ব্ভবত্যাস্তু নামতঃ। উৎপাট্যমানে সকলে পুত্রঃ স্যাদন্যথা সুতা॥ অপামার্গস্য বৈ মূলে নারীণাং শিরসি স্থিতে। গর্ব্ভশূলং বিনশ্যেত নাত্র কার্য্যা বিচারণা॥ ইতি গারুড়ে ১৯৬ অধ্যায়ঃ॥ * ॥ অপি চ। পাঠালাঙ্গলিসিংহাস্যময়ূরকজটৈঃ পৃথক্। নাভিবস্তিভগালেপাৎ সুখং নারী প্রসূয়তে॥ পাঠায়াস্তু শিফা যোনৌ যা নারী সংপ্রধারয়েৎ। উষঃ প্রসবকালে তু সা সুখেন প্রসূয়তে॥ তুষাম্বুপরিপিষ্টেন মূলেন পরিলেপয়েৎ। লাঙ্গল্যাশ্চরণৌ সূতে ক্ষিপ্রমেতেন গর্ব্ভিণী॥ মাতুলুঙ্গস্য মূলানি মধুকং মধুসংযুতং। ঘৃতেন সহ পাতব্যং সুখং নারী প্রসূয়তে॥ ইতি চক্রপাণিদত্তঃ॥ * ॥ সুখপ্রসবমন্ত্রো যথা। অস্তি গোদাবরীতীরে জম্ভলা নাম রাক্ষসী। তস্যাঃ স্মরণমাত্রেণ বিশল্যা গর্ব্ভিণী ভবেৎ॥ * ॥ সুখপ্রসবচক্রং যথা। পঞ্চরেখাঃ সমুল্লিখ্য তির্য্যগূর্দ্ধক্রমেণ হি। পদানি ষড়্‌দশাপাদ্য ত্বেকমাদ্যে মুনৌ ত্রয়ং॥ নবমে সপ্ত দদ্যাত্তু বাণং পঞ্চদশে তথা। দ্বিতীয়েঽষ্টাবষ্টমে ষট্ দিশি দ্বৌ ষোড়শে শ্রুতিঃ॥ একাদিনা সমং জ্ঞেয়মিচ্ছাঙ্কার্দ্ধং ত্রিকোণকে। তদা দ্বাত্রিংশদাদিঃ স্যাচ্চতুষ্কোষ্ঠেষু সর্ব্বতঃ॥ দর্শনাদ্ধারণাত্তাসাং শুভং স্যাদেষু কর্ম্মসু। দ্বাত্রিংশৎ প্রসবে নার্য্যাশ্চতুস্ত্রিংশদ্গমে নৃণাং॥ ভূতাবিষ্টেষু পঞ্চাশন্মৃতাপত্যাসু বৈ শতং। দ্বাসপ্ততিস্তু বন্ধ্যায়াং চতুঃষষ্টী রণাধ্বনি॥ বিষে বিংশো ধান্যকীটেম্বষ্টাবিংশতিরেব চ। চতুরষ্টৌ চ বালানাং রোদনে পরিকীর্ত্তিতাঃ॥ ইতি জ্যোতিস্তত্ত্বং॥ * ॥ তস্য বৈকৃতং যথা। গর্গ উবাচ। অকালপ্রসবা নার্য্যঃ কালাতীত-

প্রজাস্তথা। বিকৃতপ্রসবাশ্চৈব যুগ্মপ্রসবনাস্তথা ॥ অমানুষা অবণ্ডাশ্চ ন জাতব্যঞ্জনাস্তথা। হীনাঙ্গা অধিকাঙ্গাশ্চ জায়ন্তে যদি বা স্ত্রিয়ঃ ॥ পশবঃ পক্ষিণশ্চৈব তথৈব চ সরীসৃপাঃ। বিনাশং তস্য দেশস্য কুলস্য চ বিনির্দ্দিশেৎ ॥ নির্ব্বাসয়েত্তাং নৃপতিঃ স্বরাষ্ট্রাৎ স্ত্রিয়ঞ্চ পূজ্যাশ্চ ততো দ্বিজেন্দ্রাঃ। কিমিচ্ছকৈর্ব্রাহ্মণতর্পণঞ্চ লোকে ততঃ শান্তিমুপৈতি পাপং ॥ ইতি মাৎস্যে অদ্ভুতশান্তিস্ত্রীপ্রসববিকৃতো নাম ২০৯ অধ্যায়ঃ ॥ * ॥ প্রসবাদ্ভুতত্বং যথা। একো বৃষস্ত্রয়ো গাবঃ সপ্তাশ্বা নব দন্তিনঃ। সিংহপ্রসূতিকাশ্চৈব কথিতাঃ স্বামিঘাতকাঃ ॥ তিস্র ইতি বক্তব্যে ছান্দসত্বাৎ ত্রয় ইত্যুক্তং। সিংহপ্রসূতাশ্চ স্ত্রিয়ো বোধ্যাঃ। ভানৌ সিংহগতে চৈব যস্য গৌঃ সংপ্রসূয়তে। মরণং তস্য নির্দ্দিষ্টং ষড়্‌ভির্মাসৈর্ন সংশয়ঃ ॥*॥ অত্র শান্তিং প্রবক্ষ্যামি যেন সম্পদ্যতে শুভং। প্রসূতাং তৎক্ষণাদেব তাং গাং বিপ্রায় দাপয়েৎ ॥ ততো হোমং প্রকুর্ব্বীত ঘৃতাক্তৈ রাজসর্ষপৈঃ। আহুতীনাং ঘৃতাক্তানামযুতং জুহুয়াত্ততঃ ॥ ব্যাহৃতিভিশ্চায়ং হোমঃ। সোপবাসঃ প্রযত্নেন দদ্যাদ্বিপ্রায় দক্ষিণাং। অপি চ। সিংহরাশৌ গতে সূর্য্যে গোপ্রসূতির্যদা ভবেৎ। পৌষে চ মহিষী সূতে দিবৈবাশ্বতরী তথা ॥ তদানিষ্টম্ভবেৎ কিঞ্চিৎ তচ্ছান্ত্যৈ শান্তিকঞ্চরেৎ। অস্য বামেতিসূক্তেন তদ্বিষ্ণোরিতিমন্ত্রতঃ ॥ জুহুয়াচ্চ তিলাজ্যেন শতমষ্টোত্তরাধিকং। মৃত্যুঞ্জয়বিধানেন জুহুয়াচ্চ তথাযুতং। শ্রীসূক্তেন ততঃ স্নায়াৎ শান্তিসূক্তেন বা পুনঃ ॥ ইত্যদ্ভুতসাগরে নারদঃ ॥

প্রসবকঃ (পুং) পিয়ালবৃক্ষঃ। ইতি শব্দমালা ॥

প্রসববন্ধনং (ক্লী) বৃন্তং। ইত্যমরঃ ॥

প্রসবস্থলী (স্ত্রী) মাতা। যথা। ইয়মিয়ং ময়দানবনন্দিনী ত্রিদশনাথজিতঃ প্রসবস্থলী। ইতি মহানাটকং ॥

প্রসবিতা [ঋ] (পুং) পিতা। ইতি শব্দরত্নাবলী ॥

প্রসবিত্রী (স্ত্রী) জনয়িত্রী। মাতা। প্রপূর্ব্বকসূধাতোঃ কর্ত্তরি তৃণ্ ঈপ্ চ ॥

প্রসব্যং (ত্রি) প্রতিকূলং। ইত্যমরঃ ॥

প্রসহঃ (পুং) বলাৎকারেণ ভক্ষকপক্ষী। স চ কুররশ্যেনাদিঃ। যথা। প্রসহ্য ভক্ষয়ন্ত্যেতে প্রসহাস্তেন কীর্ত্তিতাঃ ॥ অস্য মাংসগুণাঃ। গুরূষ্ণমধুরাঃ স্নিগ্ধা বাতঘ্নাঃ শুক্রবর্দ্ধনাঃ। ইতি রাজবল্লভঃ ॥ অপি চ। কাকো গৃধ্র উলূকশ্চ চিল্লশ্চ শশঘাতকঃ। চাষো ভাসশ্চ কুরর ইত্যাদ্যাঃ প্রসহাঃ স্মৃতাঃ ॥ শশঘাতকঃ বাজ ইতি লোকে। প্রসহাঃ কীর্ত্তিতা এতে প্রসহ্য ছিদ্য ভক্ষণাৎ। প্রসহাঃ খলু বীর্য্যোষ্ণাস্তন্মাংসং ভক্ষয়ন্তি যে ॥ তে শোষভস্মকোন্মাদৈঃ শুক্রক্ষীণা ভবন্তি হি। ইতি ভাবপ্রকাশঃ ॥

প্রসহনঃ (পুং) হিংস্রপশুঃ। যথা। শার্দ্দূলসিংহশরভর্ক্ষতরক্ষুমুখ্যা যেহন্যান্ প্রসহ্য

বিনিহত্য নির্বর্ত্তয়ন্তে। তে কীর্ত্তিতাঃ প্রসহনাঃ পললং তদীয়মর্শঃপ্রমেহজঠরাময়জাড্যহারি ॥ ইতি রাজনির্ঘণ্টঃ ॥ আলিঙ্গনে ক্লী। যথা। পরস্পরপ্রসহনচুম্বনাদিকাঃ শুচৌ সুখে বহুলবিধা ভিদা মতাঃ। ইতি কাব্যপ্রকাশটীকাধৃতকাব্যকৌমুদী ॥ সহনে ক্লী তদ্বতি ত্রি ॥

প্রসহা (স্ত্রী) বৃহতিকা। ইতি রত্নমালা ॥

প্রসহ্য ব্য হঠার্থকং। বলাৎকারার্থং। ইত্যমরঃ॥

প্রসহ্যচৌরঃ (পুং) হঠাৎ চৌর্য্যকারী। ডাকাইত ইতি লুটেরা ইতি চ ভাষা। তৎপর্য্যায়ঃ। বন্দীকারঃ২ মাচলঃ৩ চিল্লাভঃ৪। ইতি ত্রিকাণ্ডশেষঃ॥

প্রসাতিকা (স্ত্রী) অণুব্রীহিঃ। সূক্ষ্মধান্যং। ইতি রত্নমালা ॥

প্রসাদঃ (পুং) প্রসন্নতা। নৈর্ম্মল্যং। ইত্যমরঃ॥ অনুগ্রহঃ। কাব্যপ্রাণঃ। স্বাস্থ্যং। প্রসক্তিঃ। ইতি মেদিনী ॥ বৈদর্ভীরীতিযুক্তকাব্যগুণঃ। তস্য লক্ষণং। গ্রাম্যশব্দভিন্নব্যক্তার্থপদবত্ত্বং। যথা। ওজঃপ্রসাদমাধুর্য্যগুণত্রিতয়ভেদতঃ। গৌড়বৈদর্ভপাঞ্চালা রীতয়ঃ পরিকীর্ত্তিতাঃ। ব্যক্তার্থপদমগ্রাম্যং প্রসাদঃ পরিকীর্ত্তিতঃ ॥ ইতি কাব্যচন্দ্রিকা ॥ * ॥ দেবনিবেদিতদ্রব্যং গুরূণাং ভুক্তাবশেষশ্চ। যথা। আসীদ্বংশধ্বজো রাজা প্রজাপালনতৎপরঃ। প্রসাদং সত্যদেবস্য ত্যক্ত্বা দুঃখমবাপ সঃ॥ ইতি স্কান্দে রেবাখণ্ডে সত্যনারায়ণব্রতকথা ॥

প্রসাদনং (ক্লী) অন্নং। ইতি ত্রিকাণ্ডশেষঃ॥ প্রসন্নতাকারকং। যথা। বলবর্ণপ্রসাদনমিতি রাজবল্লভঃ॥

প্রসাদনা (স্ত্রী) সেবা। পরিচর্য্যা। ইতি হেমচন্দ্রঃ॥

প্রসাধনং (ক্লী) বেশঃ। ইত্যমরঃ॥ কঙ্কতিকা। ইতি ভরতধৃতামরমালা॥ প্রকৃষ্টনিষ্পত্তিশ্চ॥

প্রসাধনী (স্ত্রী) সিদ্ধিঃ। ইতি মেদিনী॥ কঙ্কতিকা। ইত্যমরঃ॥ তদ্যুক্তির্যথা। প্রসাধনী দিঙ্নবনাগসপ্তসংখ্যাভিরুক্তাঙ্গুলিভিঃ ক্রমেণ। চতুর্ব্বিধানাং পৃথিবীপতীনাং সম্পত্তিসৌভাগ্যযশঃসমৃদ্ধিদা॥ কাষ্ঠজা ধাতুজা চৈব শৃঙ্গজা চ যথাক্রমং। জাঙ্গলানূপসামান্যদেশজানাং মহীভুজাং॥ ছত্রদণ্ডবদুন্নেয়ঃ কাষ্ঠজায়া বিনিশ্চয়ঃ। কনকং রজতং তাম্রং পিত্তলং সীসকং তথা॥ লৌহং সর্ব্বঞ্চ সর্ব্বার্দ্ধমাদিত্যাদিদশাভুবাং। রাজ্ঞামেবোপযুজ্যেত কালকীর্ত্তিপ্রসাধনী॥ মৃগাণাং মহিষাণাঞ্চ সিংহজাতা প্রসাধনী। গজদন্তসমুদ্ভূতা রাজ্ঞামেবোপযুজ্যতে॥ অত্রাপি রত্নবিন্যাসো জ্ঞেয়শ্চামরদণ্ডবৎ। ইতি যুক্তিকল্পতরুঃ॥

প্রসাধিকা (স্ত্রী) নীবারঃ। যথা। প্রসাধিকা তু নীবারস্তৃণান্তমিতি চ স্মৃতং। অস্যা গুণাঃ। নীবারঃ শীতলো গ্রাহী পিত্তঘ্নঃ কফবাতকৃৎ॥ ইতি ভাবপ্রকাশঃ॥ বেশকারিণী। যথা। প্রসাধিকালম্বিতমগ্রপাদমাক্ষিপ্য কাচিৎ দ্রবরাগমেব। ইতি কুমারসম্ভবে সপ্তমঃ সর্গঃ॥

প্রসাধিতঃ (ত্রি) অলঙ্কৃতঃ। ইত্যমরঃ॥ প্রকৃষ্টনিষ্পন্নঃ। নিষ্পাদিতঃ। যথা। ততঃ প্রস্থমিতং কল্কং দত্ত্বা তোয়চতুর্গুণে। ক্ষীরে প্রসাধিতং তৈলং গ্রহঘ্নঃ বলবর্ণকৃৎ॥ ইতি সারসংগ্রহঃ॥

প্রসারঃ (পুং) প্রসরণং। ইতি হেমচন্দ্রঃ॥

প্রসারণং (ক্লী) পঞ্চবিধকর্ম্মান্তর্গতকর্ম্মবিশেষঃ। স তু বিস্তাররূপঃ। যথা। উৎক্ষেপণং ততোঽবক্ষেপণমাকুঞ্চনন্তথা। প্রসারণঞ্চ গমনং কর্ম্মাণ্যেতানি পঞ্চ চ॥ ইতি ভাষাপরিচ্ছেদঃ॥

প্রসারণী (স্ত্রী) লতাবিশেষঃ। গন্ধভাদালিয়া ইতি ভাষা। অস্য গুণাঃ। বাতপিত্তনাশিত্বং। উষ্ণত্বং। বলশুক্রকারিত্বঞ্চ। ইতি রাজবল্লভঃ॥ সৈন্যানাং সর্ব্বতো ব্যাপ্তিঃ। ইতি প্রসরণশব্দটীকায়াং ভরতঃ॥

প্রসারিণী (স্ত্রী) লজ্জালুলতা। প্রসারণী। গন্ধভাদালিয়া ইতি ভাষা। তৎপর্য্যায়ঃ। সুপ্রসরা ২ সারিণী ৩ প্রসরা ৪ সরা ৫ চারুপর্ণী ৬ রাজবলা ৭ ভদ্রপর্ণী ৮ প্রতানিকা ৯ প্রবলা ১০ রাজপর্ণী ১১ চন্দ্রপর্ণী ১২ ভদ্রবলা ১৩ চন্দ্রবল্লী ১৪ প্রভদ্রা ১৫। অস্যা গুণাঃ। গুরুত্বং। উষ্ণত্বং। তিক্তত্বং। বাতার্শঃশ্বযথুমলবিষ্টম্ভনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

প্রসারী (ত্রি) প্রসরণশীলঃ। তৎপর্য্যায়ঃ। বিসৃত্বরঃ ২ বিসৃমরঃ ৩ বিসারী ৪। ইত্যমরঃ॥

প্রসিতং (ক্লী) পূযং। ইতি শব্দচন্দ্রিকা॥ আসক্তে ত্রি। ইত্যমরঃ॥

প্রসিতিঃ (স্ত্রী) বন্ধনসাধনরজ্জুনিগড়াদিঃ। ইত্যমরঃ॥

প্রসিদ্ধঃ (ত্রি) ভূষিতঃ। খ্যাতঃ। ইতি মেদিনী॥

প্রসিদ্ধিঃ (স্ত্রী) টঙ্কারঃ। খ্যাতিঃ। ইতি ত্রিকাণ্ডশেষঃ॥ ভূষা। ইতি প্রসিদ্ধশব্দার্থদর্শনাৎ॥

প্রসূঃ (স্ত্রী) মাতা। ঘোটকী। ইত্যমরঃ॥ কদলী। বীরুৎ। ইতি মেদিনী॥

প্রসূকা (স্ত্রী) বাজিনী। ইতি রাজনির্ঘণ্টঃ॥

প্রসূতং (ক্লী) কুসুমং। ইতি মেদিনী॥

প্রসূতঃ (ত্রি) সংজাতঃ। সূতঃ। ইতি মেদিনী॥

প্রসূতা (স্ত্রী) জাতসন্তানা। তৎপর্য্যায়ঃ। জাতাপত্যা ২ প্রজাতা ৩ প্রসূতিকা ৪। ইত্যমরঃ॥

প্রসূতিঃ (স্ত্রী) প্রসবঃ। ইত্যমরঃ॥ উদ্ভবঃ। তনয়ঃ। দুহিতা। ইতি মেদিনী॥

প্রসূতিকা (স্ত্রী) প্রসূতা। ইত্যমরঃ॥

প্রসূতিজং (ক্লী) দুঃখং। ইত্যমরঃ॥

প্রসূনং (ক্লী) পুষ্পং। ফলং। ইত্যমরঃ॥ জাতে ত্রি। ইতি মেদিনী॥

প্রসূনেষুঃ (পুং) কামদেবঃ। ইতি ত্রিকাণ্ডশেষঃ॥

প্রসৃতং (ক্লী) পলদ্বয়ং। ইতি শব্দমালা॥

প্রসৃতঃ (পুং) নিকুব্জপাণিঃ। অর্দ্ধাঞ্জলিঃ। ইত্যমরঃ॥

প্রসৃতঃ (ত্রি) প্রবৃদ্ধঃ। প্রসারিতঃ। ইত্যমরঃ॥

বিনীতঃ। বেগিতঃ। ইতি মেদিনী॥ গতঃ। ইতি ত্রিকাণ্ডশেষঃ॥ নিযুক্তঃ। ইতি হলায়ুধঃ॥

প্রস্থতা (স্ত্রী) জঙ্ঘা। ইতি মেদিনী॥

প্রস্থতিঃ (স্ত্রী) প্রস্থতঃ। আকুঞ্চিতপাণিঃ। ইতি রায়মুকুটঃ রাজনির্ঘণ্টশ্চ॥

প্রসেকঃ (পুং) সেচনং। চ্যুতিঃ। ইতি মেদিনী॥

প্রসেদিকা (স্ত্রী) ক্ষুদ্রারামঃ। ইতি হেমচন্দ্রঃ॥

প্রসেদিবান্ [স্] (ত্রি) প্রসন্নঃ। প্রপূর্ব্বসদধাতোঃ কর্ত্তরি ক্বসুপ্রত্যয়নিষ্পন্নঃ॥

প্রসেবঃ (পুং) বীণাঙ্গং। স্যূতঃ। ইতি মেদিনী॥

প্রসেবকঃ (পুং) বীণাপ্রান্তবক্রকাষ্ঠং। দণ্ডাধঃ শব্দগাম্ভীর্য্যার্থং দারুময়ং ভাণ্ডং যচ্চর্ম্মণা আচ্ছাদ্য দীয়তে সঃ। ইত্যন্যে। বীণাস্থিতালাবুফলং। ইত্যপরে। ইতি ভরতঃ॥ তৎপর্য্যায়ঃ। ককুভঃ ২। ইত্যমরঃ॥ সূত্ররচিতভাণ্ডং। ধোকড়া ইতি খ্যাতঃ। তৎপর্য্যায়ঃ। স্যূনঃ ২ স্যোনঃ ৩ ধৌতকটঃ ৪ স্যোতঃ ৫ স্যূতঃ ৬। ইতি ভরতঃ॥ প্রকৃষ্টতন্তুসন্তানকর্ত্তা চ॥

প্রস্কন্দনং (ক্লী) বিরেকঃ। ইতি রত্নমালা॥

প্রস্কন্নঃ (পুং) ঋষিবিশেষঃ। স চ বৈদিকসন্ধ্যান্তর্গতসূর্য্যোপস্থানমন্ত্রস্য ঋষিঃ। পতিতে ত্রি। ইতি হেমচন্দ্রঃ॥

প্রস্তরঃ (পুং) প্রস্তৃণাতি আচ্ছাদয়তি যঃ। পাতর ইতি ভাষা। তৎপর্য্যায়ঃ। গ্রাবা ২ পাষাণঃ ৩ উপলঃ ৪ অশ্মা ৫ দৃশৎ ৬ দৃষৎ ৭ পারারুকঃ ৮ পারটীটঃ ৯ মুম্মরুঃ ১০ কাচকঃ ১১ শিলা ১২॥ পল্লবাদিরচিতশয্যা যথা। পল্লবাদ্যৈর্বিরচিতে শয়নীয়ে তু সংস্তরঃ। প্রস্তরঃ প্রস্তিরশ্চেতি প্রস্তারোঽপি চ কুত্রচিৎ॥ ইতি শব্দরত্নাবলী॥ মণিঃ। ইতি মেদিনী॥

প্রস্তরিণী (স্ত্রী) গোলোমিকা। ইতি রাজনির্ঘণ্টঃ॥

প্রস্তারঃ (পুং) তৃণবনং। তৎপর্য্যায়ঃ। তৃণাটবী ২ ঋষঃ ৩। ইতি হেমচন্দ্রঃ॥ পল্লবাদিবিরচিতশয়নীয়ং। ইতি শব্দরত্নাবলী॥ শয্যা। ইতি হারাবলী॥ ছন্দঃপ্রভৃতীনাং প্রভেদজ্ঞাপকসঙ্কেতবিশেষঃ। যথা। পাদে সর্ব্বগুরাবাদ্যাৎ লঘু ন্যস্য গুরোরধঃ। যথোপরি তথা শেষং ভূয়ঃ কুর্য্যাদমুং বিধিং॥ ঊনে দদ্যাদ্গুরূনেব যাবৎ সর্ব্বলঘুর্ভবেৎ। প্রস্তারোঽয়ং সমাখ্যাতশ্ছন্দোবিচিতিবেদিভিঃ॥ ইতি বৃত্তরত্নাবলী॥ *॥ অপি চ। অহপত্থার। পঢ়ম গুরু হেট্ঠ ঠাণে লহুআ পরিঠবউ অপ্পবুদ্ধী এ। সরিসা সরিসা পন্তী উব্বরিআ গুরুলহূ দেহু॥ অস্য টীকা। এতদ্ভেদজ্ঞানং প্রস্তারজ্ঞানাধীনমিতিপ্রস্তারং দর্শয়তি। প্রথমং গুরোরধঃস্থানে লঘুকং স্থাপয় আত্মবুদ্ধ্যা সদৃশী সদৃশী পংক্তিরুদ্বৃত্তৌ গুরুলঘূ দেহি সদৃশী পংক্তিদক্ষিণে কার্য্যা বামে গুরুলঘুভিঃ পূরণং কার্য্যং ইদন্তু মাত্রাপ্রস্তারবিষয়ং তত্রাপি গুরোলিখনযোগ্যত্বে গুরুর্লেখ্যঃ অপরত্র

লঘুর্দেয়ঃ। বর্ণপ্রস্তারে তু গুরুণৈব পূরণং কার্য্যং তত্রায়ং প্রকারঃ আদৌ গুরুর্লেখ্যঃ তত্র প্রথমং গুরোরধঃস্থানে লঘুর্লেখ্যঃ তদ্দক্ষিণে চোপরিস্থিতপংক্তেঃ সদৃশী কার্য্যা বামে চ গুরুলঘুভিঃ পূরণং কার্য্যং বামে চৈক একলঘুঃ পততি বর্ণপ্রস্তারে তু বামে লঘুস্পর্শো নাস্তি যথা ত্রিকলপ্রস্তারে। ৬৬। প্রথমগুরোরধো লঘুর্বামতশ্চ কলার্দ্ধপূরণং গুরুণৈব কার্য্যং দক্ষিণে চ পংক্ত্যভাবঃ ততো গুরোরধো লঘুর্লেখ্যঃ দক্ষিণে চ লঘোরধো লঘুর্লেখ্যঃ বামে চ কলাপূরণং একেন লঘুনা কার্য্যং এবং চতুষ্কলা৬৬-দাবপি বোধ্যং যথা অক্ষরচ্ছন্দসি ৬৬ এবমন্যত্রাপি বোধ্যং ॥ * ॥ অথ সকল-প্রস্তারসংখ্যা। দব্বীসা সত্তসআতইং সত্তাবহ সহস্সাইং বাআলিসহ লক্‌খং তেরহকোড়ী সমগ্‌গাইং। অস্য টীকা। অত্র চৈকাক্ষরমারভ্য ষড়্‌বিংশত্যবধিবর্ণ-বৃত্তানাং প্রস্তারে কিয়তী সংখ্যেত্যত আহ। ১৩৪২১৭৭২৬ ষড়্‌বিংশতিঃ সপ্ত-শতানি তথা সপ্তদশসহস্রাণি দ্বিচত্বারিংশ-ল্লক্ষাস্ত্রয়োদশকোট্যঃ সমগ্রাণি অঙ্কস্য বামা গতিরিত্যঙ্কাঃ স্থাপ্যাঃ। ইতি পিঙ্গলঃ শীঘ্রবোধভূষণশ্চ ॥

প্রস্তার্য্যর্ম্ম [ন্] (ক্লী) নেত্ররোগভেদঃ। তস্য লক্ষণং। প্রস্তার্য্যর্ম্ম তনুস্তীর্ণং শ্যাবং রক্ত-নিভং সিতে। ইতি মাধবকরঃ ॥ অপি চ। সমস্তাদ্বিস্তৃতঃ শ্যাবো রক্তো বা মাংস-সঞ্চয়ঃ। সন্নিপাতেন দোষাণাং প্রস্তার্য্যর্ম্ম তদুচ্যতে ॥ ইতি রক্ষিতধৃতনিমিঃ ॥

তস্যৌষধং। কতকস্য ফলং শঙ্খং ত্র্যূষণং সৈন্ধবান্বিতং। ফেনো রসাঞ্জনং ক্ষৌদ্রং বিড়ঙ্গানি মনঃশিলা ॥ কুক্কুটাণ্ডকপালানি বর্ত্তিরেষা ব্যপোহতি। তিমিরং পটলং কাচমর্ম্মশুক্রং তথৈব চ ॥ কণ্ডূক্লেদার্বুদং হন্তি মলমাশু সুখাবতী। ইতি চক্রপাণি-দত্তঃ ॥

প্রস্তাবঃ (পুং) অবসরঃ। ইত্যমরঃ ॥ প্রসঙ্গ-স্তুতিঃ। ইতি ভরতঃ ॥ প্রসঙ্গঃ। ইতি ভানুদীক্ষিতঃ ॥ প্রকরণং। যথা। প্রস্তাব-দেশকালাদের্বৈশিষ্ট্যাৎ প্রতিভাজুষাং। ইত্যস্যার্থে কাব্যপ্রকাশঃ ॥

প্রস্তাবনা (স্ত্রী) আরম্ভঃ। ইতি জটাধরঃ ॥ সূত্রধারেণ সহ নটীবিদূষকাদীনাং পর-স্পরবিচিত্রভাষণং। তস্যা লক্ষণং। নটী বিদূষকো বাপি পারিপার্শ্বিক এব বা। সূত্রধারেণ সহিতাঃ সংলাপং যত্র কুর্ব্বতে ॥ চিত্রৈর্ব্বাক্যৈঃ স্বকার্য্যোত্থৈঃ প্রস্তুতা-ক্ষেপিভির্ম্মিথঃ। আমুখং তত্র বিজ্ঞেয়ং নাম্না প্রস্তাবনাপি সা ॥ ইতি সাহিত্য-দর্পণঃ ॥

প্রস্তরঃ (পুং) পল্লবাদিরচিতশয্যা। ইতি শব্দরত্নাবলী ॥

প্রস্তীতঃ } (ত্রি) সংহতঃ। ধ্বনিতঃ। প্রপূর্ব্ব-
প্রস্তীমঃ } স্ত্যৈধাতোঃ কর্ম্মণি ক্তপ্রত্যয়ঃ। ইতি মুগ্ধবোধব্যাকরণং ॥

প্রস্তুতঃ (ত্রি) প্রকরণপ্রাপ্তঃ। যথা। অ-প্রস্তুতপ্রশংসা সা যা চৈব প্রস্তুতাশ্রয়া। ইতি কাব্যপ্রকাশঃ ॥ প্রাকরণিকঃ। প্রাস-ঙ্গিকঃ। ইত্যলঙ্কারকৌস্তুভঃ ॥ নিষ্পন্নঃ।

যথা। প্রস্তুতবৃত্তের্ময়ট্। অন্নং প্রস্তুতং অন্নময়ং। যবাগূঃ প্রস্তুতা যবাগূময়ী। ইতি কলাপতদ্ধিতঃ॥ প্রকর্ষস্তুতিযুক্তঃ। প্রপূর্ব্বস্তুধাতোঃ কর্ম্মণি ক্তঃ। উপস্থিতঃ। প্রতিপন্নঃ। উদ্যুক্তঃ। ইতি লোকব্যবহারদর্শনাৎ॥

প্রস্তৃতঃ (ত্রি) অন্তরিতঃ। ইতি ত্রিকাণ্ডশেষঃ॥

প্রস্থঃ (পুং) পরিমাণবিশেষঃ। স তু চতুঃকুড়বরূপঃ। ইত্যমরভরতৌ॥ আঢ়কচতুর্থাংশঃ। ইতি লীলাবতী॥ দ্বিশরাবপরিমাণং। ইতি বৈদ্যকপরিভাষা॥

প্রস্থঃ (পুং ক্লী) অদ্রেঃ সমভূভাগঃ। অদ্রেরেকদেশঃ। ইতি ভরতঃ॥ তৎপর্য্যায়ঃ। স্নুঃ ২ সানুঃ ৩। ইত্যমরঃ॥ উন্মিতবস্তু। ইতি মেদিনী॥ বিস্তারঃ। যথা। দীর্ঘে প্রস্থে সমানঞ্চ ন কুর্য্যান্মন্দিরং বুধঃ। ইতি ব্রহ্মবৈবর্ত্তে জন্মখণ্ডে ১০৩ অধ্যায়ঃ॥ প্রকৃষ্টস্থিতিবিশিষ্টে ত্রি॥

প্রস্থপুষ্পঃ (পুং) মরুবকঃ। ইত্যমরঃ॥ স্বল্পপত্রতুলসী। জম্বীরভেদঃ। ইতি কেচিৎ। জম্বীরসামান্যং। ইতি কেচিৎ। ইতি তট্টীকায়াং ভরতঃ॥

প্রস্থানং (ক্লী) বিজিগীষোঃ প্রয়াণং। ইত্যমরঃ॥ গমনমাত্রং। যথা। প্রস্থানন্তে কুলিশকলনাম্নিশ্চিতং পণ্ডিতাগ্র্যেঃ। ইত্যাদি পদাঙ্কদূতঃ॥

প্রস্থানবিঘ্নঃ (পুং) গমনব্যাঘাতঃ। যথা। যঃ পুনর্ব্বিবাহাবসরে মঙ্গলবতি বাসরে প্রতিষ্ঠমানস্য তৎপ্রস্থানৌপয়িকং কর্ম্ম প্রাগঙ্গীকৃত্য তদানীং ন করিষ্যামীতি প্রস্থানবিঘ্নমাচরতি তদাসৌ দ্বিগুণাং ভৃতিং দাপ্যঃ। ইতি মিতাক্ষরা॥

প্রস্থাপিতঃ (ত্রি) প্রেষিতঃ। ইতি হেমচন্দ্রঃ॥ প্রকর্ষেণ স্থাপিতশ্চ॥

প্রস্থিকা (স্ত্রী) অম্বষ্ঠা। ইতি ভাবপ্রকাশঃ॥

প্রস্ফুটঃ (ত্রি) প্রফুল্লঃ। ইতি শব্দরত্নাবলী॥

প্রস্ফোটনং (ক্লী) সূর্পং। ইত্যমরঃ॥ তাড়নং। বিকাশনং। ইতি মেদিনী॥ পচনং। ইতি হেমচন্দ্রঃ॥

প্রস্রবণং (ক্লী) যত্র স্থানে স্রুত্বা জলং গলতি তৎ। ইতি ভরতঃ॥ অবিচ্ছেদেন স্রবজ্জলং যত্র স্থানে পততি যত্র নিপত্য চ বহুলীভবতি তৎ। ইতি স্বাম্যাদয়ঃ॥ গিরেরুপরি নির্ঝরাদিপ্রভবজলসংঘাতঃ। ইতি সাঞ্জঃ॥ অজস্রং মন্দবেগেন স্রবজ্জলং। ইতি কোক্কটঃ॥ তৎপর্য্যায়ঃ। উৎসঃ ২। ইত্যমরঃ॥ জলপ্রস্রাবঃ ৩। অস্য গুণাঃ। প্রস্রবণজলং স্বচ্ছং লঘু মধুরং রোচনঞ্চ দীপনকৃৎ। ইতি রাজনির্ঘণ্টঃ॥

প্রস্রবণঃ (পুং) মাল্যবৎপর্ব্বতঃ। ইতি হেমচন্দ্রঃ॥ স্বেদঃ। ইতি ত্রিকাণ্ডশেষঃ॥ প্রকর্ষেণ ক্ষরণে ক্লী॥

প্রস্রাবঃ (পুং) মূত্রং। ইত্যমরঃ॥ গোপ্রস্রাবমাহাত্ম্যং যথা। প্রস্রাবেণ তু যঃ স্নায়াৎ রোহিণ্যাং মানবো দ্বিজ। সর্ব্বপাপকৃতান্দোষান্ দহত্যাশু ন সংশয়ঃ॥ ইতি বরাহপুরাণং॥

প্রস্বানঃ (পুং) উচ্চৈঃশব্দঃ। প্রপূর্ব্বস্বনধাতোর্ঘঞ্প্রত্যয়েন নিষ্পন্নঃ ॥

প্রস্বেদঃ (পুং) অতিশয়ঘর্ম্মঃ। তস্যৌষধং যথা। চন্দনং কুঙ্কুমং মাংসী কর্পূরো জাতিপত্রিকা। জাতীককোলপূগানাং লবঙ্গস্য ফলানি চ ॥ অগুরূশীরকাশ্মর্য্যঃ কুষ্ঠং তগরনালিকা। গোরোচনা প্রিয়ঙ্গুশ্চ চোলং মদনকং নখং ॥ সরলঃ সপ্তপর্ণশ্চ লাক্ষা চামলকী তথা। কর্ব্বূরকঃ পদ্মকঞ্চ এতৈস্তৈলং প্রসাধিতং ॥ প্রস্বেদমলদৌর্গন্ধ্যকণ্ডুকুষ্ঠহরং পরং। পুমান্ যুবা স্যাৎ শুক্রাঢ্যঃ স্ত্রীণাঞ্চাত্যন্তবল্লভঃ ॥ স্ত্রীশতং গচ্ছতে রুদ্র বন্ধ্যাপি লভতে সুতং। ইতি গারুড়ে ১৯৮ অধ্যায়ঃ ॥

প্রহতং (ত্রি) বিততং। ক্ষুণ্ণং। ইতি শব্দরত্নাবলী ॥ প্রকর্ষেণ হিংসিতং গতঞ্চ ॥

প্রহনেমিঃ (পুং) চন্দ্রঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

প্রহরঃ (পুং) বাসরস্যাষ্টভাগৈকভাগঃ। পহর ইতি হিন্দী ভাষা। তৎপর্য্যায়ঃ। যামঃ ২। ইত্যমরঃ ॥

প্রহরকুটুবী (স্ত্রী) কুটুম্বিনীক্ষুপঃ। ইতি রাজনির্ঘণ্টঃ ॥

প্রহরণং (ক্লী) অস্ত্রং। ইত্যমরঃ॥ কর্ণীরথঃ। ইতি তট্টীকাসারসুন্দরী ॥ যুদ্ধং। ইতি হলায়ুধঃ ॥ প্রহারশ্চ ॥

প্রহরী [ন্] (ত্রি) যামিকঃ। প্রহরো বিদ্যতে অস্যেতি প্রহরশব্দাদস্ত্যর্থে ইন্প্রত্যয়েন নিষ্পন্নঃ ॥

প্রহর্ষণঃ (পুং) বুধগ্রহঃ। ইতি ত্রিকাণ্ডশেষঃ॥ হর্ষবিশিষ্টে হর্ষকারকে চ ত্রি ॥

প্রহর্ষণী (স্ত্রী) হরিদ্রা। ইতি হারাবলী ত্রয়োদশাক্ষরপাদচ্ছন্দোভেদঃ। তস্যা লক্ষণং যথা। ত্র্যাশাভির্মনজরগাঃ প্রহর্ষণীয়ং। তস্যা লক্ষ্যং যথা। গোপীনামধরসুধারসস্য পানৈরুত্তুঙ্গস্তনকলসোপগূহনৈশ্চ। আশ্চর্য্যৈরপি রতিবিভ্রমৈর্মুরারেঃ সংসারে মতিরভবৎ প্রহর্ষণীহ ॥ ইতি ছন্দোমঞ্জরী ॥

প্রহসনং (ক্লী) প্রহাসঃ। রূপকভেদঃ। পরিহাসঃ। ইতি মেদিনী ॥ আক্ষেপঃ। ইতি হেমচন্দ্রঃ ॥ রূপকভেদস্য লক্ষণং যথা। ভাণবৎসন্ধিসন্ধ্যঙ্গলাস্যাঙ্গাঙ্কৈর্বিনির্ম্মিতে। ভবেৎ প্রহসনে বৃত্তং নিন্দ্যানাং কবিকল্পিতং ॥ তত্র নারভটীনাপি বিস্কম্ভকপ্রবেশকৌ। অঙ্গী হাস্যরসস্তত্র বীথ্যঙ্গানাং স্থিতির্ন বা ॥ তপস্বিভগবদ্বিপ্রপ্রভৃতিষত্র নায়কঃ। একো যত্র ভবেদ্ধৃষ্টো হাস্যং তচ্ছুদ্ধমুচ্যতে ॥ ইতি সাহিত্যদর্পণঃ ॥

প্রহসন্তী (স্ত্রী) যূথী। ইতি ত্রিকাণ্ডশেষঃ ॥ বাসন্তী। ইতি রাজনির্ঘণ্টঃ ॥ প্রকৃষ্টাঙ্গারধানী চ ॥

প্রহস্তঃ (পুং) বিস্তৃতাঙ্গুলিপাণিঃ। চপেটঃ। ইত্যমরঃ ॥ রাবণসেনাপতিবিশেষঃ। যথা। ততো নীলাম্বুদপ্রখ্যং প্রহস্তো নাম রাক্ষসঃ। অব্রবীৎ প্রাঞ্জলির্ব্বাক্যং সূরঃ সেনাপতিস্তদা ॥ ইতি রামায়ণে লঙ্কাকাণ্ডে ৮ সর্গঃ ॥

প্রহারঃ (পুং) আঘাতঃ। যথা। তলপ্রহারেণ শিরশ্চামরস্য পৃথক্ কৃতং। ইতি চণ্ডী ॥

প্রহারণং (ক্লী) কাম্যদানং। ইতি প্রবারণশব্দটীকায়াং সারসুন্দরী ॥

প্রহারবল্লী (স্ত্রী) মাংসরোহিণী। ইতি ভাবপ্রকাশঃ ॥

প্রহাসঃ (পুং) শিবঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ নটঃ। ইতি ধরণিঃ ॥ সোমতীর্থং। ইতি জটাধরঃ ॥ অট্টহাসঃ। ইতি শব্দরত্নাবলী ॥

প্রহাসী [ন্] (পুং) প্রকৃষ্টং হাসয়তি হসতি চ যঃ। ভাঁড় ইতি ভাষা। তৎপর্য্যায়ঃ। বাসন্তিকঃ ২ কেলিকিলঃ ৩ বৈহাসিকঃ ৪ বিদূষকঃ ৫ প্রীতিদঃ ৬। ইতি হেমচন্দ্রঃ

প্রহিঃ (পুং) কূপঃ। ইত্যমরঃ ॥

প্রহিতং (ক্লী) সূপঃ। ইতি হেমচন্দ্রঃ ॥ ক্ষিপ্তে ত্রি। ইতি নিরস্তশব্দটীকায়াং ভরতঃ ॥

প্রহীণঃ (ত্রি) পরিত্যক্তঃ। প্রপূর্ব্বহাধাতোঃ কর্ম্মণি ক্তঃ। ইতি মুগ্ধবোধব্যাকরণং ॥ প্রহীণপূর্ব্বধ্বনিনাধিরূঢস্তলামধারেণ শরদ্ঘনেন। ইতি রঘুকাব্যঞ্চ ॥

প্রহুতং (ক্লী) ভূতযজ্ঞঃ। ইতি জটাধরঃ ॥

প্রহেণকং (ক্লী) পিষ্টকবিশেষঃ। তৎপর্য্যায়ঃ। বাচনং ২ ব্রতোপায়নং ৩। ইতি ত্রিকাণ্ডশেষঃ ॥ প্রহেলকং ৪ বাচনকং ৫। ইতি হারাবলী ॥

প্রহেলকং (ক্লী) প্রহেণকং। ইতি হারাবলী ॥

প্রহেলিকা (স্ত্রী) দুর্বিজ্ঞানার্থপ্রশ্নঃ। কূটার্থভাষিতা কথা। হেয়ালি ইতি ভাষা। তৎপর্য্যায়ঃ। প্রবল্হিকা ২। ইত্যমরঃ ॥ প্রবহ্লিকা ৩ প্রবহ্লিঃ ৪ প্রবহ্লী ৫ প্রহেলিঃ ৬। ইতি ভরতঃ ॥ প্রশ্নদূতী ৭ প্রবহ্লীকা ৮। ইতি শব্দরত্নাবলী ॥ তস্য লক্ষণং। ব্যক্তীকৃত্য কমপ্যর্থং স্বরূপার্থস্য গোপনাৎ। যত্র বাহ্যান্তরাবর্থৌ কথ্যেতে সা প্রহেলিকা ॥ সা দ্বিধার্থী চ শাব্দী চ বিখ্যাতা প্রশ্নশাসনে। আর্থী স্যাদর্থবিজ্ঞানাৎ শাব্দী শব্দস্য ভঙ্গতঃ ॥ আর্থী যথা। তরুণ্যালিঙ্গিতঃ কণ্ঠে নিতম্বস্থলমাশ্রিতঃ। গুরূণাং সন্নিধানেঽপি কঃ কূজতি মুহুর্মুহুঃ ॥ পানীয়কুম্ভ ইতি ॥ শাব্দী যথা। সদারিমধ্যাপি ন বৈরিযুক্তা নিতান্তরক্তাপ্যসিতৈব নিত্যং। যথোক্তবাদিন্যপি নৈব দূতী কা নাম কান্তেতি নিবেদয়ন্তি ॥ সারিকা। ইতি বিদগ্ধমুখমণ্ডনং ॥

প্রহ্রাদঃ (পুং) প্রহ্লাদঃ। স চ হিরণ্যকশিপোঃ পুত্রঃ পরমবৈষ্ণবঃ। তস্য চরিত্রং ভাগবতাদৌ বর্ত্ততে ॥

প্রহ্লত্তিঃ (স্ত্রী) প্রীতিঃ। ইতি মুগ্ধবোধব্যাকরণং ॥

প্রহ্লন্নঃ (ত্রি) প্রীতঃ। ইত্যমরঃ ॥

প্রহ্লাদঃ (পুং) প্রহ্রাদঃ। স চ পূর্ব্বজন্মনি শিবশর্ম্মণঃ পুত্রঃ সোমশর্ম্মনামাভূৎ ততো দৈত্যভাবনয়া মৃতঃ অনন্তরং কমলায়াং হিরণ্যকশিপোঃ সকাশাদ্দৈত্যভাবেন জাতঃ। যথা। সূত উবাচ। স লোষ্টেন সমং মেনে কাঞ্চনং ভূষণং পুনঃ। জিতাহারঃ স ধর্ম্মাত্মা নিদ্রয়া পরিবর্জ্জিতঃ ॥

বিষয়ান্ স পরিত্যজ্য একান্তমপি সেবতে। যোগাসনসমারূঢ়ো নিরাশো নিষ্পরিগ্রহঃ॥ তস্য বেলাং সুসংপ্রাপ্য মৃত্যুকালঃ সমাগতঃ। আগতান্ দানবান্ বিপ্রঃ সোমশর্ম্মা ব্যলোকয়ৎ॥ মৃত্যুকালে তু সংপ্রাপ্তে প্রাণযাত্রাপ্রবর্ত্তকে। শালগ্রামে মহাক্ষেত্রে ঋষীণামেব সন্নিধৌ॥ কেচিদ্বদন্তি বৈ দৈত্যাঃ কেচিদ্বদন্তি দানবাঃ। এবম্বিধো মহাশব্দঃ কর্ণরন্ধ্রগতস্তদা॥ তস্যৈব বিপ্রবর্য্যস্য সুবিপ্রাঃ সোমশর্ম্মণঃ। জ্ঞানধ্যানাৎ প্রচলতঃ প্রবিষ্টং দৈত্যজং ভয়ং॥ তেন ধ্যানেন তস্যাপি দৈত্যভূতেন বৈ তদা। সত্বরং তস্য বৈ প্রাণা গতাস্তস্য মহাত্মনঃ॥ দৈত্যভাবেন সংযুক্তঃ স হি মৃত্যুবশং গতঃ। তস্মাদ্দৈত্যগৃহে জাতো হিরণ্যকশিপোস্তদা॥ দেবাসুরে মহাযুদ্ধে নিহতশ্চক্রপাণিনা। যুধ্যমানেন তেনাপি প্রহ্লাদেন মহাত্মনা॥ সুভৃশং বাসুদেবং তদ্বিশ্বরূপং বিচিন্তিতং। যোগাভ্যাসেন পূর্ব্বেণ জ্ঞানমাসীন্মহাত্মনঃ॥ সস্মার পৌর্ব্বিকং সর্ব্বং চরিত্রং শিবশর্ম্মণঃ। সোঽপ্যহং সোমশর্ম্মা বৈ প্রবিষ্টো দানবীং তনুং॥ কস্য কায়ং কদা পুণ্যং কেবলং ধ্যানমুত্তমং। প্রয়ামি চ মহাপুণ্যৈর্জ্ঞানৈর্থৈর্মোক্ষদায়িভিঃ॥ সমরে প্রীয়মাণেন প্রহ্লাদেন মহাত্মনা। এবং চিন্তা কৃতা পূর্ব্বং শ্রূয়তাং দ্বিজসত্তম॥ এতত্তে সর্ব্বমাখ্যাতং সর্ব্বসন্দেহনাশনং। সূত উবাচ। প্রহ্লাদে তু হতে সংখ্যে দেবদেবেন চক্রিণা। সংহ্লাদে চ মহাবিপ্রাস্তস্মিংশ্চ কালনেমিনি॥ প্রহ্লাদস্য তু যা মাতা হিরণ্যকশিপোঃ প্রিয়া। প্রহ্লাদস্য মহাশোকৈর্দিবা রাত্রৌ প্রশোচতি॥ পতিব্রতা মহাভাগা কমলা নাম দুঃখিতা। খিদ্যমানা দিবা রাত্রৌ নারদস্তামুবাচ হ॥ মা শুচস্ত্বং মহাভাগে পুত্রার্থং পুণ্যভাগিনি। নিহতো বাসুদেবেন তব পুত্রঃ সমেষ্যতি॥ তদ্রূপলক্ষণোপেতস্তবোদরে মহামতিঃ। প্রহ্লাদেতি চ বৈ নাম পুনরস্য ভবিষ্যতি॥ বিহীন আসুরৈর্ভাবৈর্বৈষ্ণবেন সমন্বিতঃ। ইন্দ্রত্বং ভোক্ষ্যতে ভদ্রে সর্ব্বদেবৈর্নমস্কৃতঃ॥ সুখী ভব মহাভাগে পুত্রেণ তেন বৈ সদা। ন প্রকাশ্যা ত্বয়া দেবি স্ববার্ত্তেয়ঞ্চ কস্যচিৎ॥ কর্ত্তব্যমজ্ঞানভাবৈঃ সুগোপ্যং ত্বং সদা কুরু। এবমুক্ত্বা গতো বিপ্র নারদো মুনিসত্তমঃ॥ কমলায়াশ্চোদরে বৈ আসীৎ তজ্জন্ম চোত্তমং। পুনঃ প্রহ্লাদো বৈ নাম তস্যাং জাতো মহাত্মনঃ॥ বাল্যভাবং গতো বিপ্র কৃষ্ণ এবং বিচিন্ত্য চ। নরসিংহপ্রসাদেন দেবরাজোঽপ্যভূৎ স হি॥ ইতি পাদ্মে ভূমিখণ্ডে ৫ অধ্যায়ঃ॥ *॥ প্রমোদঃ। ইতি বিশ্বঃ॥ শব্দঃ। ইতি ধরণিঃ॥

প্রহ্বঃ (ত্রি) নম্রঃ। ইত্যুণাদিকোষঃ॥ আসক্তিঃ। ইতি হেমচন্দ্রঃ॥

প্রক্ষরঃ (পুং) অশ্বসন্নাহঃ। ইতি হেমচন্দ্রঃ॥

প্রক্ষালনং (ক্লী) ধাবনং। মার্জ্জনং। যথা। ধর্ম্মার্থং যস্য বিত্তেহা বরং তস্য নিরীহতা। প্রক্ষালনাদ্ধি পঙ্কস্য দূরাদস্পর্শনং বরং॥ ইতি হিতোপদেশে ১ পরিচ্ছেদঃ॥

প্রক্ষালিতঃ (ত্রি) ধৌতঃ। মার্জ্জিতঃ। ইতি হলায়ুধঃ॥

প্রক্ষেপঃ (পুং) ঔষধাদিষু ক্ষেপণীয়দ্রব্যং। যথা। প্রক্ষেপঃ পাদিকঃ ক্বাথ্যাৎ স্নেহে কল্কসমো মতঃ। ষোড়শাষ্টচতুর্ভাগং বাতপিত্তকফার্ত্তিষু॥ ক্ষৌদ্রং কষায়ে দাতব্যং বিপরীতা তু শর্করা। মাত্রা ক্ষৌদ্রঘৃতাদীনাং স্নেহে ক্বাথে চ চূর্ণবৎ॥ মাষিকং হিঙ্গু সিন্ধুত্থং জরণাদ্যাস্তু শাণিকাঃ। ইতি বৈদ্যকপরিভাষা॥ বিক্ষেপঃ। যথা। সমিৎপ্রক্ষেপান্তং কর্ম্ম কৃত্বেতি ভবদেবভট্টঃ॥

প্রক্ষেপণং (ক্লী) প্রকর্ষেণ ক্ষেপঃ। নিক্ষেপণং। প্রপূর্ব্বক্ষিপধাতোর্ভাবে অনট্‌প্রত্যয়ঃ॥

প্রক্ষ্বেড়নঃ (পুং) নারাচঃ। ইত্যমরঃ॥

প্রক্ষ্বেড়না (স্ত্রী) নারাচঃ। ইত্যমরটীকায়াং ভগীরথঃ॥

প্রক্ষ্বেদনঃ (পুং)
প্রক্ষ্বেদনা (স্ত্রী) } নারাচঃ। ইত্যমরটীকায়াং ভগীরথঃ॥

প্রা ল পূর্ত্তৌ। ল প্রাতি ঘটং জলেন লোকঃ। ইতি দুর্গাদাসঃ॥

প্রাক্ ব্য পূর্ব্বদিগ্দেশকালাঃ। ইত্যমরঃ॥ প্রাচী দিক্ প্রাঙ্ দেশঃ কালো বা প্রাক্। এবং প্রাচ্যা দিশঃ প্রাচো দেশাৎ কালাদ্বা আগতঃ প্রাগাগতঃ। এবং প্রাচ্যাং দিশি প্রাচি দেশে বা বসতি প্রাগ্বসতি। দিক্‌শব্দাদ্দিগ্দেশকালে ইতি প্রথমাপঞ্চমীসপ্তমীনাং স্তাৎ অচো লুগিতি স্তাতো লুক্। ইতি তট্টীকায়াং ভরতঃ॥ পূর্ব্বং। প্রভাতং। অবান্তরং। অতীতং। অগ্রং। ইতি হেমচন্দ্রঃ মেদিনী চ॥ ক্রমপ্রাপ্তিঃ। ইতি শব্দরত্নাবলী॥

প্রাকষিকঃ (পুং) ষিড়্গঃ। মায়ানর্ত্তকঃ। ইত্যুণাদিকোষঃ॥

প্রাকাম্যং (ক্লী) শিবস্যাষ্টৈশ্বর্য্যান্তর্গতৈশ্বর্য্যবিশেষঃ। তচ্চ ইচ্ছানভিঘাতঃ। ইত্যমরটীকায়াং ভরতঃ হেমচন্দ্রশ্চ॥ স্বাচ্ছন্দ্যানুমতিঃ। তৎপর্য্যায়ঃ। অবসর্গঃ ২ স্বাচ্ছন্দ্যানুমননং ৩। ইতি ত্রিকাণ্ডশেষঃ॥

প্রাকারঃ (পুং) বপ্রোপরি অন্যত্র বা ইষ্টকাদিরচিতবেষ্টনং। তৎপর্য্যায়ঃ। বরণঃ২ সালঃ ৩। ইত্যমরঃ॥ শালঃ ৪। ইতি ভরতঃ॥ বপ্রঃ৫। যথা। প্রাকাররোধসোর্ব্বপ্রঃ পিতৃকেদারয়োরপি। ইতি রত্নকোষঃ॥ তস্য পরিমাণং যথা। ঊর্দ্ধং ষোড়শহস্তেভ্যো নৈব কুর্য্যাদ্গৃহং গৃহী। ঊর্দ্ধং বিংশতিহস্তেভ্যঃ প্রাকারং ন শুভপ্রদং॥ তস্য দ্বারমানং। প্রস্থে হস্তদ্বয়াৎ পূর্ব্বং দীর্ঘে হস্তত্রয়ন্তথা। গৃহিণাং শুভদং দ্বারং প্রাকারস্য গৃহস্য চ॥ ন মধ্যদেশে কর্ত্তব্যং কিঞ্চিন্ন্যূনাধিকে শুভং। ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ১০৩ অধ্যায়ঃ॥

প্রাকৃতঃ (ত্রি০) নীচঃ। ইত্যমরঃ॥ ভাষাভেদঃ। স চ সংস্কৃতপ্রকৃতিকঃ। যথা। অথ প্রাকৃতং। অথশব্দ আনন্তর্য্যার্থোঽধিকারার্থশ্চ। প্রকৃতিঃ সংস্কৃতং তত্র ভবং তত আগতং বা প্রাকৃতং।

সংস্কৃতানন্তরং প্রাকৃতমধিক্রিয়তে। সংস্কৃতানন্তরং প্রাকৃতস্যানুশাসনং। সিদ্ধসাধ্যমানভেদসংস্কৃতযোনেরেব তস্য লক্ষণং ন দেশ্যস্য ইতি জ্ঞাপনার্থং। সংস্কৃতসমন্তু সংস্কৃতলক্ষণেনৈব গতার্থং। প্রাকৃতে প্রকৃতিপ্রত্যয়লিঙ্গকারকসমাসসংজ্ঞাদয়ঃ সংস্কৃতবদ্বেদিতব্যাঃ। লোকাদিতি চ বর্ত্ততে। তেন ঋ ৠ ৯ ৡ ঐ ঔ ঙ ঞ শ ষ বিসর্জ্জনীয়প্লুতবর্জ্জো বর্ণসমাম্নায়ো লোকাদবগন্তব্যঃ। ঙঞৌ স্ববর্গ্যসংযুক্তৌ ভবত এব। ঐদৌতৌ চ কেষাঞ্চিৎ। কৈতবং কৈঅবং। সৌদর্য্যং সৌঅরিঅং। কৌরবাঃ কৌঅবা। তথা স্বরব্যঞ্জনং দ্বিবচনং চতুর্থীবহুবচনঞ্চ ন তু ভবতি। অবহুলং বহুলমিত্যধিকৃতং বেদিতব্যমাশাস্ত্রপরিসমাপ্তেঃ। ততশ্চ ক্বচিৎ প্রবৃত্তিঃ ক্বচিদপ্রবৃত্তিঃ ক্বচিদ্বিভাষা ক্বচিদন্যদেব ভবতি। ইতি হেমচন্দ্রকৃতশব্দানুশাসনবৃত্তৌ অষ্টমাধ্যায়স্য চতুর্থঃ পাদঃ ॥ * ॥ প্রকৃতিসম্বন্ধী। যথা। ইত্যুক্ত্বাসীদ্ধরিস্তূষ্ণীং ভগবানাত্মমায়য়া। পিত্রোঃ সংপশ্যতোঃ সদ্যো বভূব প্রাকৃতঃ শিশুঃ ॥ ইতি শ্রীভাগবতে দশমস্কন্ধে ৩ অধ্যায়ঃ ॥

প্রাকৃতজ্বরঃ (পুং) বর্ষাশরদ্বসন্তেষু ত্রিষু ঋতুষু ক্রমেণ বাতপিত্তকফজজ্বরঃ। যথা। বর্ষাশরদ্বসন্তেষু বাতাদ্যৈঃ প্রাকৃতঃ ক্রমাৎ। ইতি মাধবকরঃ ॥

প্রাকৃতদোষঃ (পুং) বর্ষাশরদ্বসন্তেষু ক্রমেণ কুপিতো বাতঃ পিত্তং কফশ্চ। যথা। চয়প্রকোপপ্রশমাঃ পিত্তস্য প্রাবৃড়াদিষু। শ্লেষ্মণঃ শিশিরাদ্যেষু বায়োর্গর্ম্মাদিষু ত্রিষু ॥ ইতি রক্ষিতঃ ॥

প্রাকৃতপ্রলয়ঃ (পুং) প্রকৃতের্লয়ঃ। তস্য বিবরণং যথা। নির্গুণস্য চ নিত্যস্য চাদ্যন্তরহিতস্য চ। নিমেষাণাং সহস্রেণ প্রকৃতের্দ্দণ্ড উচ্যতে ॥ ষষ্টিদণ্ডাত্মকস্তস্য বাসরশ্চ প্রকীর্ত্তিতঃ। মাসস্ত্রিংশদ্দিবারাত্রৈর্ব্বর্ষং দ্বাদশমাসকৈঃ ॥ এবং গতে শতাব্দে চ শ্রীকৃষ্ণে প্রকৃতের্লয়ঃ। প্রকৃত্যাঞ্চ প্রলীনায়াং তদৈবং প্রাকৃতো লয়ঃ ॥ সর্ব্বাঃ সংহৃত্য সা চৈকা মহাবিষ্ণোঃ প্রসূশ্চ যা। কৃষ্ণবক্ষসি লীনা চ মূলপ্রকৃতিরীশ্বরী ॥ শাক্তা বদন্তি তাং দুর্গাং বিষ্ণুমায়াং সনাতনীং। সর্ব্বশক্তিস্বরূপাঞ্চ পরাং নারায়ণীং সতীং ॥ বুদ্ধ্যধিষ্ঠাতৃদেবীঞ্চ কৃষ্ণস্য ত্রিগুণাত্মিকাং। যন্মায়য়া মোহিতাশ্চ ব্রহ্মবিষ্ণুশিবাদয়ঃ ॥ বৈষ্ণবাস্তাং মহালক্ষ্মীং পরাং রাধাং বদন্তি তে। যদর্দ্ধাঙ্গা মহালক্ষ্মীঃ প্রিয়া নারায়ণস্য চ ॥ প্রাণাধিষ্ঠাতৃদেবীঞ্চ প্রেম্না প্রাণাধিকাং বরাং। শশ্বৎ প্রেমময়ীং শক্তিং নির্গুণাং নির্গুণস্য চ ॥ নারায়ণস্য শম্ভুশ্চ সংহৃত্য স্বগণান্ বহূন্। শুদ্ধসত্ত্বস্বরূপী চ কৃষ্ণে লীনশ্চ নির্গুণে ॥ গোপা গোপ্যশ্চ গাবশ্চ সুরভ্যশ্চ নরাধিপ। সর্ব্বে লীনাঃ প্রকৃত্যাঞ্চ প্রকৃতিঃ প্রকৃতীশ্বরে ॥ মহাবিষ্ণৌ বিলীনাশ্চ সর্ব্বে তে ক্ষুদ্রবিষ্ণবঃ। মহাবিষ্ণুঃ প্রকৃত্যাঞ্চ সা চৈবং পরমাত্মনি ॥ প্রকৃতির্যোগনিদ্রা চ শ্রীকৃষ্ণনেত্রপদ্ময়োঃ। অধিষ্ঠানং

চকারৈবং মায়য়া চেশ্বরেচ্ছয়া ॥ প্রকৃতের্ব্বাসরং যাবন্মিতং কালং প্রকীর্ত্তিতং। তাবদ্‌বৃন্দাবনে নিদ্রা কৃষ্ণস্য পরমাত্মনঃ॥ অমূল্যরত্নতল্পে চ বহ্নিশুদ্ধাংশুকার্চ্চিতে। গন্ধচন্দনমাল্যাঢ্যে বায়ুনা সুরভীকৃতে॥ পুনঃ প্রজাগরে তস্য সর্ব্বসৃষ্টির্ভবেৎ পুনঃ। এবং সর্ব্বে প্রাকৃতিকাঃ শ্রীকৃষ্ণং নির্গুণং বিনা॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ৫১ অধ্যায়ঃ ॥ * ॥ অপি চ। প্রকৃতৌ সংস্থিতো যস্মাৎ সর্ব্বস্তন্মাত্রসঞ্চয়ঃ। অহঙ্কারমহত্তত্ত্বগতো যৎ প্রাকৃতো লয়ঃ॥ প্রকৃতৌ সংস্থিতো ব্যক্তমতীতপ্রলয়স্তু যৎ। তস্মাৎ প্রাকৃতসংজ্ঞোঽয়মুচ্যতে প্রতিসঞ্চরঃ॥ অয়ং যঃ কথিতো বিপ্রাঃ প্রাকৃতাখ্যো মহালয়ঃ। ইতি কালিকাপুরাণে ২৪ অধ্যায়ঃ॥

প্রাকৃতমানুষঃ (পুং) সামান্যমনুষ্যঃ। যথা। একাদশচমূনাথং ভীম পাদেন মা স্পৃশ। পঞ্চানামপি যো ভর্ত্তা নাসৌ প্রাকৃতমানুষঃ॥ ইতি মহাভারতে গদাপর্ব্ব॥

প্রাকৃতমিত্রং (ক্লী) স্বদেশব্যবহিতদেশাবস্থিতরাজাদি। যথা। সখা গরীয়ান্ শত্রুশ্চ কৃত্রিমস্তৌ হি কার্য্যতঃ। স্যাতামমিত্রে মিত্রে চ সহজপ্রাকৃতাবপি॥ ইতি মাঘদ্বিতীয়সর্গঃ॥ অস্য টীকা। নমু ক্ষুদ্রোহিয়ং চৈদ্যঃ কিং করিষ্যতীত্যাশঙ্ক্য তস্য বলবত্তাং বক্তুং মিত্রামিত্রবলাবলবিবেকং তাবৎ করোতি। সখেতি। ক্রিয়য়া উপকারাপকারান্যতররূপয়া নির্ব্বৃত্তঃ কৃত্রিমঃ সখা সুহৃৎ গরীয়ান্ বলবান্ এবং শত্রুশ্চ কৃত্রিমো গরীয়ান্ কুতঃ হি যস্মাত্তৌ কৃত্রিমমিত্রশত্রূ চ কার্য্যতঃ উপকারাপকাররূপকার্য্যবশাৎ নির্ব্বৃত্তাবিতি শেষঃ। উক্তকার্য্যোপাধের্যাবজ্জীবমনপায়াদনয়োর্মিত্রামিত্রভাবোঽপি অনপায়ীতি গরীয়স্ত্বমিতি ভাবঃ সহজপ্রাকৃতৌ তু নৈবমিত্যাহ। স্যাতামিতি। সহ জাতঃ সহজঃ একশরীরাবয়বাৎ তত্র সহজং মিত্রং মাতৃস্বসেয়পিতৃস্বসেয়াদিঃ সহজশত্রুস্তু পিতৃব্যতৎপুত্রাদিঃ প্রকৃত্যা সিদ্ধঃ প্রাকৃতঃ পূর্ব্বোক্তসহজকৃত্রিমলক্ষণরহিত ইত্যর্থঃ। তত্র বিষয়ান্তরঃ প্রাকৃতঃ শত্রুঃ তদনন্তরঃ প্রাকৃতং মিত্রং অপিস্ত্বর্থে তৌ সহজপ্রাকৃতৌ শত্রুমিত্রে চ স্যাতাং ন ত্বাত্মকার্য্যবশাদনিয়মেনোভয়রূপতামাপদ্যেতে ন কৃত্রিমশত্রুমিত্রে কৃত্রিমশত্রুরেব মিত্রঞ্চ মিত্রমেবেতি কৃত্রিমাবেব মিত্রামিত্রৌ গরীয়াংসৌ ন তু সহজৌ নাপি প্রাকৃতাবিত্যর্থঃ অনেন কৃত্রিমত্বং সর্ব্বাপবাদীতি সিদ্ধং। ইতি মল্লিনাথঃ॥

প্রাকৃতশত্রুঃ (পুং) একবিষয়াভিনিবেশিরাজাদিঃ। যথা। বিষয়ান্তরঃ প্রাকৃতঃ শত্রুঃ। ইতি মাঘটীকায়াং মল্লিনাথঃ॥

প্রাকৃতিকঃ (ত্রি) প্রকৃতিবিকারঃ। প্রকৃতিসম্বন্ধী। যথা। এবং সর্ব্বে প্রাকৃতিকাঃ শ্রীকৃষ্ণং নির্গুণং বিনা। ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ৫১ অধ্যায়ঃ॥

প্রাক্তনঃ (ত্রি) প্রাগ্‌ভবঃ। যথা। প্রপেদিরে প্রাক্তনজন্মবিদ্যাঃ॥ ইতি কুমারসম্ভবং॥ অন্যচ্চ। প্রাক্তনেন শুভং সর্ব্বং সুখঞ্চ

বিভবশ্চিরং। দুঃখং শোকঃ প্রাক্তনেন বিপৎ সম্পচ্চ সাম্প্রতং ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ৯৪ অধ্যায়ঃ ॥ অপি চ। বিধাত্রা লিখিতং কর্ম্ম প্রাক্তনং কেন বার্য্যতে। মা ভুক্তং ক্ষীয়তে কর্ম্ম কল্পকোটিশতৈরপি ॥ ইতি তত্রৈব ১২৯ অধ্যায়ঃ ॥

প্রাক্তনকর্ম্ম (ক্লী) ভাগ্যং। অদৃষ্টং। ইতি জটাধরঃ ॥ পুরাকৃতকার্য্যঞ্চ ॥

প্রাক্‌ফলঃ (পুং) পনসঃ। ইতি জটাধরঃ ॥

প্রাক্‌ফল্গুনী (স্ত্রী) পূর্ব্বফল্গুনী। যথা। প্রাক্‌ফল্গুন্যশ্চেজ্জন্মকালে চ যস্য। ইতি কোষ্ঠীপ্রদীপঃ ॥

প্রাক্‌ফল্গুনীভবঃ (পুং) বৃহস্পতিঃ। ইতি হারাবলী ॥ পূর্ব্বফল্গুন্যাং জাতে ত্রি ॥

প্রাক্‌ফাল্গুনঃ (পুং) বৃহস্পতিঃ। ইতি শব্দরত্নাবলী ॥

প্রাক্‌ফাল্গুনেয়ঃ (পুং) বৃহস্পতিঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

প্রাখর্য্যং (ক্লী) প্রখরত্বং। তীক্ষ্ণতা। প্রখরশব্দাৎ ভাবার্থে ষ্ণ্যপ্রত্যয়ঃ ॥

প্রাগভাবঃ (পুং) সংসর্গাভাববিশেষঃ। তস্য লক্ষণং। বিনাশ্যভাবত্বং। ইতি সিদ্ধান্তমুক্তাবলী ॥

প্রাগল্‌ভ্যং (ক্লী) প্রগল্‌ভতা। যথা। প্রাগল্‌ভ্যহীনস্য নরস্য বিদ্যা শস্ত্রং যথা কাপুরুষস্য হস্তে। ন তৃপ্তিমুৎপাদয়তে শরীরে বৃদ্ধস্য দারা ইব দর্শনীয়াঃ ॥ ইতি জ্যোতিস্তত্ত্বং ॥ স্ত্রীণামযত্নজভাববিশেষঃ। যথা। প্রাগল্‌ভ্যৌদার্য্যমাধুর্য্যশোভাধীরত্বকান্তয়ঃ। দীপ্তিশ্চাযত্নজা ভাবহাবহেলাস্ত্রয়োঽঙ্গজাঃ ॥ ইতি হেমচন্দ্রঃ ॥

প্রাগুদীচী (স্ত্রী) পূর্ব্বোত্তরবিদিক্। ঈশানকোণঃ। যথা। ততোৎকীর্ণমৃত্তিকাঃ প্রাগুদীচ্যাং দিশি ক্ষিপেৎ। ইতি ভবদেবভট্টঃ ॥

প্রাগ্‌জ্যোতিষঃ (পুং) কামরূপদেশঃ। ইতি হেমচন্দ্রঃ ॥ স তু নরকরাজপুরং। যথা। শ্রীভগবানুবাচ। করতোয়া সত্যগঙ্গা পূর্ব্বভাগাবধিশ্রিতা। যাবল্ললিতকান্তাস্তি তাবদ্দেশং পুরং তদা ॥ তত্র দেবী মহামায়া যোগনিদ্রা জগৎপ্রসূঃ। কামাখ্যারূপমাদায় সদা তিষ্ঠতি শোভনা ॥ অত্রাস্তি নদরাজোঽয়ং লৌহিত্যো ব্রহ্মণঃ সুতঃ। অত্রৈব দশ দিক্‌পালাঃ স্বে স্বে পীঠে ব্যবস্থিতাঃ ॥ অত্র স্বয়ং মহাদেবো ব্রহ্মা বাহঞ্চ সর্ব্বদা। চন্দ্রঃ সূর্য্যশ্চ সততং বসতেঽত্রৈব পুত্রক ॥ সর্ব্বে ক্রীড়ার্থমায়াতা রহস্যদেশমুত্তমং। অত্র শ্রীঃ সর্ব্বতো ভদ্রা ভোগ্যমত্র সদা বহু ॥ অত্রৈব হি স্থিতো ব্রহ্মা প্রাঙ্নক্ষত্রং সসর্জ্জ হ। ততঃ প্রাগ্‌জ্যোতিষাখ্যেয়ং পুরী শক্রপুরীসমা ॥ অত্র ত্বং বস ভদ্রন্তে হ্যভিষিক্তো ময়া স্বয়ং। কৃতদারঃ সহামাত্যৈ রাজা ভূত্বা মহাবল ॥ ততো বিদর্ভরাজস্য পুত্রীং মায়াহ্বয়াং হরিঃ। পুত্রার্থে বরয়ামাস নরকস্য সমাং গুণৈঃ ॥ ইতি কালিকাপুরাণে ৩৭ অধ্যায়ঃ ॥

প্রাগ্‌ভারঃ (পুং) পর্ব্বতাগ্রভাগঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ কুত্রচিৎ প্রাগ্‌ভাব ইতি চ পাঠঃ ॥

প্রাগ্রহরঃ (ত্রি) শ্রেষ্ঠঃ। ইত্যমরঃ॥

প্রাগ্নাটং (ক্লী) অঘনদধি। ইতি ত্রিকাণ্ড-শেষঃ॥

প্রাগ্র্যং (ত্রি) শ্রেষ্ঠঃ। ইত্যমরঃ॥

প্রাগ্বংশঃ (পুং) হবিষাং হোতব্যানাং আধারো যদ্গৃহং ততঃ প্রাক্ পূর্ব্বদেশে যজমান-সদস্যাদিস্থিত্যর্থং গৃহং। ইত্যমরভরতৌ॥ পূর্ব্বকুলঞ্চ॥

প্রাঘাতঃ (পুং) যুদ্ধং। ইতি হেমচন্দ্রঃ॥

প্রাঘারঃ (পুং) ঘৃতাদিক্ষরণং। তৎপর্য্যায়ঃ। শ্চ্যোতঃ ২। ইত্যমরঃ॥

প্রাঘুণঃ (পুং) অতিথিঃ। ইতি ত্রিকাণ্ড-শেষঃ॥

প্রাঘুণিকঃ (পুং) অতিথিঃ। যথা। অমিতং মধু তৎকথা মম শ্রবণপ্রাঘুণিকীকৃতা জনৈঃ। মদনানলবোধনেঽভবৎ খগ ধাষ্যা ধিগধৈর্য্যধারিণঃ॥ ইতি নৈষধ-দ্বিতীয়সর্গঃ॥

প্রাঘূর্ণিকঃ (পুং) অতিথিঃ। ইতি হেমচন্দ্রঃ॥

প্রাঙ্ (ত্রি) পূর্ব্বদিক্। পূর্ব্বদেশঃ। পূর্ব্ব-কালঃ। ইতি মেদিনী॥

প্রাঙ্গঃ (পুং) পণববাদ্যং। ইতি শব্দরত্না-বলী॥

প্রাঙ্গণং (ক্লী) পণববাদ্যং। ইতি শব্দরত্না-বলী॥ গৃহভূমিঃ। আঙ্গিনা ইতি উঠান ইতি চ ভাষা। তৎপর্য্যায়ঃ। অজিরং ২ চত্বরং ৩ অঙ্গনং ৪। ইতি হেমচন্দ্রঃ॥ সূর্য্যবিদ্ধস্য তস্য দোষো যথা। অভদ্রদং সূর্য্যবেধং প্রাঙ্গণঞ্চ তথৈব চ। ইতি ব্রহ্ম-বৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ১০৩ অধ্যায়ঃ॥

প্রাড্বিবাকঃ (পুং) চতুর্ধোত্তরান্তর্গতোত্তর-বিশেষঃ। যত্রাভিযুক্ত এবং ক্রিয়াদস্মিন্নর্থে অনেনাহমভিযুক্তস্তু তত্র চাযং ব্যবহার-মার্গেণ পরাজিত ইতি। উক্তঞ্চ কাত্যা-য়নেন। আচারেণাবসন্নোঽপি পুনর্লেখ-য়তে যদি। সোঽভিধেয়ো জিতঃ পূর্ব্বং প্রাড্ন্যায়শ্চ স উচ্যতে॥ ইতি মিতাক্ষরা॥

প্রাচিকা (স্ত্রী) বনমক্ষিকা। ডাঁশ ইতি ভাষা। ইত্যমরভরতৌ॥

প্রাচী (স্ত্রী) পূর্ব্বা দিক্। ইত্যমরঃ॥ পূজক পূজ্যয়োরগ্রং। যথা। দেবাগ্রে স্বস্য চাপ্যগ্রে প্রাচী প্রোক্তা গুরুক্রমৈঃ। ইতি। যত্রৈব ভানুস্তু বিয়ত্যুদেতি প্রাচীতি তাং বেদবিদো বদন্তি। তথা পুরঃ পূজক-পূজ্যয়োশ্চ সদাগমজ্ঞাঃ প্রবদন্তি তন্ত্রে॥ ইতি তিথ্যাদিতত্ত্বং॥

প্রাচীনঃ (ত্রি) পূর্ব্বাদিগ্দেশকালভবঃ। তৎ-পর্য্যায়ঃ। প্রাক্ ২। প্রাচীরং। তৎ পর্য্যায়ঃ। আবেষ্টকঃ ২ বৃতিঃ ৩। ইতি হেমচন্দ্রঃ

প্রাচীনপনসঃ (পুং) বিল্বং। ইতি ত্রিকাণ্ড-শেষঃ॥

প্রাচীনবর্হিঃ [স্] (পুং) ইন্দ্রঃ। ইতি হেম-চন্দ্রঃ॥ রাজবিশেষঃ। যথা। হবির্দ্ধানাৎ ষড়াগ্নেয়ী পুত্রানজনয়দ্ব্রতং। প্রাচীন-বর্হিষং শুক্রং জয়ং কৃষ্ণং প্রযাজিনং॥ প্রাচীনবর্হির্ভগবান্ মহানাসীৎ প্রজা-পতিঃ। হবির্দ্ধানাৎ দ্বিজশ্রেষ্ঠ যেন সং-বর্দ্ধিতাঃ প্রজাঃ॥ প্রাচীনাগ্রাঃ কুশাস্তস্য পৃথিব্যাং বিশ্রুতা মুনে। প্রাচীনবর্হি-

র্ভগবান্ খ্যাতো ভুবি মহাবলঃ॥ সমুদ্রতনয়ায়াস্তু কৃতদারো মহীপতিঃ। মহতস্তপসঃ পারে সুবর্ণায়াং মহীপতিঃ॥ সুষুবে দশ পুত্রাংশ্চ শুষ্মিণাং বৈ প্রচেতসঃ। দশবর্ষসহস্রাণি সমুদ্রসলিলে শয়াঃ॥ ইতি বহ্নিপুরাণে বরসর্গো নামাধ্যায়ঃ॥

প্রাচীনা (স্ত্রী) বনতিক্তিকা। আকনাদি ইতি ভাষা। ইত্যমরঃ॥ রাস্না। ইতি শব্দচন্দ্রিকা॥ প্রাগ্‌ভবা চ॥

প্রাচীনামলকং (ক্লী) পানীয়ামলকং। পানী আমলা ইতি ভাষা। তৎপর্য্যায়ঃ। বারিবদরং ২। ইতি ত্রিকাণ্ডশেষঃ॥ অস্য গুণঃ। দোষত্রয়গরনাশিত্বং। ইতি ভাবপ্রকাশঃ॥

প্রাচীনাবীতং (ক্লী) শ্রাদ্ধাদৌ বামকরে বহিষ্কৃতে সতি দক্ষিণস্কন্ধার্পিতযজ্ঞসূত্রং। ইত্যমরভরতৌ॥ তথাহি। সব্যং বাহুং সমুদ্ধৃত্য দক্ষিণে তু ধৃতং দ্বিজাঃ। প্রাচীনাবীতমিত্যুক্তং পিত্রে কর্ম্মণি যোজয়েৎ॥ ইতি কৌর্ম্মে উপবিভাগে ১০ অধ্যায়ঃ॥

প্রাচীনাবীতী [ন্] (পুং) প্রাচীনাবীতবিশিষ্টঃ। যথা। সব্যং বাহুমুদ্ধৃত্য শিরোঽবধায় দক্ষিণেঽংশে প্রতিষ্ঠাপয়তি সব্যং কক্ষমবলম্বং ভবতি এবং প্রাচীনাবীতী ভবতীতি। ইতি গোভিলঃ॥ প্রতিষ্ঠাপয়তি যজ্ঞোপবীতমিতি শেষঃ। ইত্যাহ্নিকতত্ত্বং॥

প্রাচীপতিঃ (পুং) ইন্দ্রঃ। ইতি ত্রিকাণ্ডশেষঃ॥

প্রাচীরং (ক্লী) প্রান্ততোবৃতিঃ। পাঁচীল ইতি ভাষা। ইত্যমরঃ॥ দুর্গার্থং নগরাদেঃ প্রান্তভাগে বেণুকণ্টকবেত্রাদিময়ী বৃতির্বেষ্টনিকা। ইতি ভরতঃ॥ মৃণ্ময্যামপি বৃতৌ প্রাচীরমুপচারাদিতি স্বাম্যাদয়ঃ॥ তৎপর্য্যায়ঃ। বৃতিঃ ২। ইতি ভট্টঃ॥ প্রাচীনং ৩। ইতি মুকুটঃ॥ প্রাচীরং প্রাবরোঽপি ৪ স্যাৎ প্রাবৃতিঃ ৫ প্রান্ততোবৃতিঃ ৬। ইষ্টকামৃত্তিকাদ্যৈশ্চ গৃহবাট্যাদিবেষ্টনে॥ ইতি শব্দরত্নাবলী॥*॥ অথ প্রাচীরনির্ণয়ঃ। গজৈরভেদ্যা মনুজৈরলঙ্ঘ্যাঃ প্রাচীরখণ্ডা নৃপতের্ভবন্তি॥ রাজদণ্ডোন্নতাঃ সর্ব্বে প্রাচীরাঃ পৃথিবীভুজঃ। বিংশতিস্তে তু পঞ্চাগ্রে পার্শ্বয়োঃ পঞ্চ পঞ্চ চ॥ পশ্চাৎ পঞ্চ চ বিজ্ঞেয়াঃ প্রাচীরাঃ পৃথিবীভুজঃ। সর্ব্বপ্রান্তে ত্বাবরণো নাম প্রাচীর উচ্যতে॥ প্রতিপ্রাকারসংস্থানং দ্বারং নাভিমুখস্থিতং।*। তত্র জয়াখ্যস্য দীর্ঘস্য বাস্তুখণ্ডস্য নির্ণয়ঃ। তদযথা। রাজচ্ছত্রান্তরে পঞ্চ রাজদ্বারে মহীপতেঃ। রাজদণ্ডত্রয়ে সার্দ্ধে জয়দ্বারে প্রতিষ্ঠিতাঃ॥ অদ্বারে রাজদণ্ডার্দ্ধে প্রাচীরাঃ পৃথিবীপতেঃ। এবং ব্যবস্থিতে স্থানে মধ্যমে তদ্ধি তিষ্ঠতি॥ রাজচ্ছত্রদ্বয়ং সার্দ্ধমায়ামে জয়বাস্তুনি। পরিণাহে পঞ্চ রাজদণ্ডাস্তিষ্ঠন্তি মধ্যতঃ॥ রাজপট্টাভিধানেন স্থানমেতন্নিগদ্যতে। অস্মিন্ গৃহং নৃপঃ কৃত্বা সুচিরং সুখমশ্নুতে॥ অজ্ঞানাদন্ততো রাজা যোঽন্যত্র গৃহমারভেৎ। সোঽচিরান্মৃত্যুমাপ্নোতি রোগং শোকং ভয়ন্তথা॥ যমদণ্ডোদয়দণ্ডৌ

কোণাহতিরুপপ্লবঃ। যে চান্যে বাস্তু-দোষাঃ স্যুঃ স্থানে দোষাশ্চ যে পুনঃ॥ ন স্পৃশ্যন্তে রাজপট্টস্তৈঃ সর্পৈর্গরুড়ো যথা। দ্বিগুণাদিরতোঽপি স্যাৎ ক্রমাদ্ ভঙ্গাদিবাস্তুষু॥ রাজচ্ছত্রমিতেঽপ্যেবং প্রাচীরে গুণদোষকৌ। ইতি যুক্তিকল্পতরুঃ॥

প্রাচেতসঃ (পুং) বাল্মীকিমুনিঃ। ইতি হেমচন্দ্রঃ॥

প্রাচেতসঃ (পুং) প্রাচীনবর্হীরাজপুত্রাঃ। সাস্তুনিত্যবহুবচনান্তোঽয়ং। যথা। এবমুক্তাস্তু তে পুত্রাস্ততঃ প্রাচেতসো দশ। পয়োধিসলিলে মগ্নাস্তপস্তেপে সুদারুণং॥ পতত্রিরাজমারূঢ়ং নীলোৎপলদলচ্ছবিং। দৃষ্ট্বা প্রাচেতসঃ সর্ব্বে শিরোভিরবনীগতাঃ॥ ইতি বহ্নিপুরাণং॥

প্রাচ্যঃ (পুং) শরাবত্যাঃ প্রাগ্দক্ষিণদেশঃ। ইত্যমরঃ॥ পূর্ব্বদেশীয়ে ত্রি॥

প্রাজকঃ (পুং) সারথিঃ। যথা। যত্রাপবর্ত্ততে যুগ্যং বৈগুণ্যাৎ প্রাজকস্য চ। তত্র স্বামী ভবেদ্দণ্ড্যো হিংসায়াং দ্বিশতং দমং॥ ইতি মনুবচনে যত্র সারথেরকৌশল্যাদ্ যানমন্যথা গচ্ছতি তত্র হিংসায়াং অশিক্ষিতসারথিনিয়োগাৎ স্বামী দ্বিশতং দণ্ডং দণ্ড্যঃ স্যাদিতি কুল্লুকভট্টঃ। ইতি প্রায়শ্চিত্ততত্ত্বং॥

প্রাজনং (ক্লী) তোদনং। পাচনীবাড়ী ইতি ভাষা। ইত্যমরঃ॥

প্রাজাপত্যং (ক্লী) দ্বাদশাহসাধ্যব্রতবিশেষঃ। তত্র দিবসত্রয়ং রাত্রিমাত্রভোজনং ২২ গ্রাসাঃ। দিবসত্রয়ং দিবামাত্রভোজনং ২৬ গ্রাসাঃ। দিবসত্রয়ং অযাচিতভোজনং ২৪ গ্রাসাঃ। দিবসত্রয়ং উপবাসঃ। যথা। ত্র্যহং সায়ং ত্র্যহং প্রাতস্ত্র্যহমদ্যাদযাচিতং। ত্র্যহং পরন্তু নাশ্নীয়াৎ প্রাজাপত্যং চরন্ দ্বিজঃ॥ গ্রাসসংখ্যা পরাশরেণোক্তা। সায়ং দ্বাবিংশতির্গ্রাসাঃ প্রাতঃ ষড়্বিংশতিস্তথা। অযাচিতে চতুর্ব্বিংশঃ পরঞ্চানশনং স্মৃতং॥ ইতি প্রায়শ্চিত্ততত্ত্বং॥ * ॥ তত্তু অগম্যাগমনাদিপ্রায়শ্চিত্তং। যথা। অগম্যাগমনং কৃত্বা মদ্যগোমাংসভক্ষণং। শুধ্যেচ্চান্দ্রায়ণাদ্বিপ্রঃ প্রাজাপত্যেন ভূমিপঃ। বৈশ্যঃ সান্তপনাচ্ছূদ্রঃ পঞ্চাহোভির্বিশুধ্যতি॥ প্রায়শ্চিত্তে কৃতে দদ্যাদ্গবাং ব্রাহ্মণভোজনং। ইতি গারুড়ে ২২৬ অধ্যায়ঃ॥ * ॥ রোহিণীনক্ষত্রং। যথা। ঐন্দ্রে গুরুঃ শশী চৈব প্রাজাপত্যে রবিস্তথা। পূর্ণিমা গুরুবারেণ মহাজ্যৈষ্ঠী প্রকীর্ত্তিতা॥ ইতি প্রায়শ্চিত্ততত্ত্বং॥

প্রাজাপত্যঃ (পুং) প্রয়াগঃ। ইতি ত্রিকাণ্ডশেষঃ॥ জৈনরাজভেদঃ। তৎপর্য্যায়ঃ। ত্রিপৃষ্ঠঃ ২। ইতি হেমচন্দ্রঃ॥ কায়নামকবিবাহঃ। সহ ধর্ম্মং চরতাং ইতি নিয়মং কৃত্বা কন্যাদানং। যথা। ইত্যুক্ত্বা চরতাং ধর্ম্মং সহজা দীয়তেঽর্থিনে। স কায়ঃ পাবয়েত্তজ্জঃ ষট্ ষড়্বংশ্যান্ সহাত্মনা॥ ইতি মিতাক্ষরা॥ কায়ঃ কঃ প্রজাপতির্দ্দেবতা অস্যেতি প্রাজাপত্য ইত্যর্থঃ। ইত্যুদ্বাহতত্ত্বং॥

প্রাজাপত্যা (স্ত্রী) প্রব্রজ্যাশ্রমপূর্ব্বকর্ত্তব্য-প্রজাপতিদেবতাকসর্ব্বস্বদক্ষিণেষ্টিঃ। যথা। প্রাজাপত্যাং নিরূপ্যেষ্টিং সর্ব্ববেদসদক্ষিণাং। আত্মন্যগ্নীন্ সমারোপ্য ব্রাহ্মণঃ প্রব্রজেদ্‌গৃহাৎ ॥ ইতি মানবে ৬ অধ্যায়ঃ ॥

প্রাজিতা [ঋ] (পুং) সারথিঃ। ইত্যমরঃ ॥ প্রকৃষ্টগন্তরি ত্রি ॥

প্রাজ্ঞঃ (পুং) কল্কিদেবস্য জ্যেষ্ঠভ্রাতা। যথা। কল্কিং দ্রষ্টুং হরেরংশমাবির্ভূতঞ্চ শম্ভলে। কবিং প্রাজ্ঞং সুমন্তঞ্চ পুরস্কৃত্য মহাপ্রভং ॥ ইতি কল্কিপুরাণে ২ অধ্যায়ঃ॥ পণ্ডিতঃ। ইত্যমরঃ ॥ রাজশুকঃ। ইতি রাজনির্ঘণ্টঃ ॥

প্রাজ্ঞঃ (ত্রি) পণ্ডিতঃ। দক্ষঃ। ইতি শব্দরত্নাবলী ॥

প্রাজ্ঞমানী (ত্রি) পণ্ডিতাভিমানী। যথা। দুঃখিতায় শয়ানায় শ্রদ্দধানায় রোগিণে। যো ভেষজমবিজ্ঞায় প্রাজ্ঞমানী প্রযচ্ছতি॥ ইতি চরকঃ ॥

প্রাজ্ঞা (স্ত্রী) বুদ্ধিমতী। তৎপর্য্যায়ঃ। ধীমতী ২। ইত্যমরঃ ॥ বুদ্ধিঃ। যথা। প্রজ্ঞা প্রাজ্ঞা ধরা জ্ঞপ্তিঃ পণ্ডা সংবেদনং বিদা। ইতি রায়মুকুটধৃতশব্দার্ণবঃ ॥

প্রাজ্ঞী (স্ত্রী) স্বয়ংজ্ঞাত্রী। তৎপর্য্যায়ঃ। প্রজ্ঞা ২। ইত্যমরঃ ॥ পণ্ডিতপত্নী। ইতি প্রাজ্ঞশব্দটীকায়াং ভানুদীক্ষিতঃ ॥

প্রাজ্যং (ত্রি) প্রচুরং। ইত্যমরঃ ॥

প্রাঞ্জলঃ (ত্রি) সরলঃ। যথা। ঋজাবজিহ্মপ্রগুণৌ প্রাঞ্জলঃ সরলোঽপি চ। ইতি জটাধরঃ ॥

প্রাট্ [ছ্] (পুং) পৃচ্ছতি যঃ। প্রশ্নকর্ত্তা। ইতি মুগ্ধবোধব্যাকরণং ॥

প্রাড়্‌বিবাকঃ (পুং) ব্যবহারদ্রষ্টা। জজ্ ইতি ইঙ্গরেজী ভাষা। তৎপর্য্যায়ঃ। অক্ষদর্শকঃ ২। ইত্যমরঃ ॥ ব্যবহারদর্শী ৩। ইতি শব্দরত্নাবলী॥ দ্বে ব্যবহারাণাং ঋণাদানাদিবিবাদানাং দ্রষ্টরি নির্ণেতরি ধর্ম্মাধ্যক্ষে ইত্যর্থঃ। পৃচ্ছতি বাদিপ্রতিবাদিবাক্যং প্রাট্ দদৃগ্জ্ঞুহূবাক্ প্রাড়িতি নিপাতঃ। বিবিচ্য বক্তি বিবাকঃ কভাবেঽমী ইতি ঘঞ্ প্রাট্ চাসৌ বিবাকশ্চেতি প্রাড়্‌বিবাকঃ। বিবাদানুগতং পৃষ্ট্বা পূর্ব্ববাক্যং প্রযত্নতঃ। বিচারয়তি যেনাসৌ প্রাড়্‌বিবাকস্ততঃ স্মৃতঃ ॥ ইতি স্মৃতিঃ। ইতি ভরতঃ ॥ অপি চ। অর্থিপ্রত্যর্থিনৌ পৃচ্ছতীতি প্রাট্ তয়োর্ব্বচনং বিরুদ্ধাবিরুদ্ধঞ্চ সভ্যৈঃ সহ বিবিনক্তি বিবেচয়তি বেতি বিবাকঃ প্রাট্ চাসৌ বিবাকশ্চেতি প্রাড়্‌বিবাকঃ। উক্তঞ্চ। বিবাদানুগতম্পৃষ্ট্বা সসভ্যস্তৎ প্রযত্নতঃ। বিচারয়তি যেনাসৌ প্রাড়্‌বিবাকস্ততঃ স্মৃতঃ ॥ ইতি মিতাক্ষরা ॥

প্রাণঃ (পুং) ব্রহ্মা। ইতি ত্রিকাণ্ডশেষঃ ॥ হৃন্মারুতঃ। বোলঃ। কাব্যজীবঃ। অনিলঃ। বলং। পূরিতে ত্রি। ইতি মেদিনী॥ সূক্ষ্মশরীরসমষ্ট্যুপহিতচৈতন্যং ॥ প্রাগনবান্ নাসাগ্রস্থানবর্ত্তী বায়ুঃ। ইতি বেদান্তসারঃ ॥ তস্য কর্ম্ম বহির্গমনং। ইতি শ্রীধরস্বামী ॥ তস্য রূপং স্থানানি চ যথা। ইন্দ্রনীলপ্রতীকাশং প্রাণরূপং প্রকীর্ত্তিতং। আস্যনাসিকয়োর্ম্মধ্যে হৃন্মধ্যে নাভি-

মধ্যগে ॥ প্রাণালয় ইতি প্রাহুঃ পাদাঙ্গুষ্ঠে-ঽপি কেচন। ইতি যোগার্ণবঃ ॥ পঞ্চ-প্রাণবিবরণং বহুবচনান্তপ্রাণশব্দে দ্রষ্টব্যং॥ ধাতুঃ পুত্রঃ। যথা। আয়তির্নিয়তিশ্চৈব মেরোঃ কন্যে মহাত্মনঃ। ভার্য্যে ধাতৃ-বিধাত্রোস্তে তয়োর্জাতৌ সুতাবুভৌ॥ প্রাণশ্চৈব মৃকণ্ডুশ্চ পিতা মম মহাযশাঃ। ইতি মার্কণ্ডেয়ে রুদ্রসর্গাধ্যায়ঃ ॥

প্রাণকঃ (পুং) সত্ত্বজাতীয়ঃ। প্রাণিমাত্রং। জীবকদ্রুমঃ। চোলঃ। ইতি মেদিনী ॥

প্রাণথঃ (পুং) বায়ুঃ। বলবান্। ইত্যুণাদি-কোষঃ॥ প্রজাপতিঃ। তীর্থং। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥

প্রাণদং (ক্লী) জলং। রক্তং। ইতি হেম-চন্দ্রঃ ॥

প্রাণদঃ (পুং) জীবকবৃক্ষঃ। ইতি রাজ-নির্ঘণ্টঃ ॥

প্রাণদা (স্ত্রী) ঋদ্ধিবৃক্ষঃ। হরীতকী। ইতি রাজনির্ঘণ্টঃ ॥

প্রাণনং (ক্লী) জীবনং। ইতি জটাধরঃ ॥ গলে পুং। ইতি শব্দচন্দ্রিকা ॥

প্রাণনাথঃ (পুং) পতিঃ। ইতি শব্দরত্নাবলী ॥

প্রাণন্তঃ (পুং) বায়ুঃ। ইতি সিদ্ধান্তকৌমুদ্যা-মুণাদিবৃত্তিঃ॥ রসাঞ্জনং। ইত্যুণাদি-কোষঃ ॥

প্রাণন্তী (স্ত্রী) ক্ষুৎ। হিক্কা। ইত্যুণাদিকোষঃ॥

প্রাণপ্রদা (স্ত্রী) ঋদ্ধিনামকৌষধং। ইতি রত্নমালা ॥

প্রাণভাস্বান্ [ৎ] (পুং) সমুদ্রঃ। ইতি শব্দ-রত্নাবলী ॥

প্রাণময়কোষঃ (পুং) কর্ম্মেন্দ্রিয়সহিতপ্রাণাদি পঞ্চকং। ইতি বেদান্তসারঃ ॥

প্রাণসংযমঃ (পুং) প্রাণায়ামঃ। যথা। তদশক্তৌ তচ্চতুর্থমেবং প্রাণস্য সংযমঃ। ইতি তন্ত্রসারঃ ॥

প্রাণসদ্ম [ন্] (ক্লী) শরীরং। ইতি কেচিৎ॥

প্রাণসমা (স্ত্রী) পত্নী। ইতি হেমচন্দ্রঃ ॥

প্রাণহারকং (ক্লী) বৎসনাভঃ। ইতি রাজ-নির্ঘণ্টঃ ॥ অসুনাশকে ত্রি ॥

প্রাণাঃ (পুং) অসবঃ। ইত্যমরঃ॥ দ্বে অঙ্গ সন্নিহিতেষু পঞ্চবায়ুষু। অস্যন্তে অসবঃ নাম্নীতি উঃ। প্রাণিতি এভিঃ প্রাণাঃ ঘঞ্। এবমিতি অসুবৎ প্রাণা অপি পুং বহুত্বে ইত্যর্থঃ। অসুপ্রাণশব্দাভ্যাং বহু-বচনান্তাভ্যাং পঞ্চপ্রাণাদয় উচ্যন্তে ন পুনরেকৈকাভিধানে বহুবচনং অতএব প্রাণোঽপান ইত্যুক্তং হৃদি প্রাণো গুদে-ঽপান ইত্যাদি চ দৃশ্যতে। ইতি তট্টী-কায়াং ভরতঃ ॥ * ॥ শরীরস্থপঞ্চপ্রাণা যথা। প্রাণোঽপানঃ সমানশ্চোদানব্যানৌ চ বায়বঃ। শরীরস্থা ইমে ইত্যমরঃ॥ ইমে প্রাণাদয়ঃ পঞ্চবায়বঃ শরীরে তিষ্ঠন্তি তে চ নিয়তস্থানস্থাঃ। যদাহুঃ। হৃদি প্রাণো গুদেঽপানঃ সমানো নাভিসংস্থিতঃ। উদানঃ কণ্ঠদেশে চ ব্যানঃ সর্ব্বশরীরগ ইতি ॥ * ॥ এবং তদ্ব্যাপারাশ্চ যথা। অন্নপ্রবেশনং মূত্রাদ্যুৎসর্গোঽন্নবিপাচনং। ভাষণাদি নিমেষাদি তদ্ব্যাপারাঃ ক্রমাদমী॥ ইতি চ ভরতঃ॥ * ॥ প্রাণকরাণি যথা। সদ্যোমাংসং নবান্নঞ্চ বালা স্ত্রী ক্ষীর-

ভোজনং। ঘৃতমুষ্ণোদকঞ্চৈব সদ্যঃপ্রাণকরাণি ষট্॥ * ॥ প্রাণহরাণি যথা। শুষ্কং মাংসং স্ত্রিয়ো বৃদ্ধা বালার্কস্তরুণং দধি। প্রভাতে মৈথুনং নিদ্রা সদ্যঃপ্রাণহরাণি ষট্॥ ইতি চাণক্যকর্ম্মলোচনে ॥ * ॥ প্রাণবিয়োগকালকর্ত্তব্যং যথা। কণ্ঠস্থানং গতে জীবে ভীতিবিভ্রান্তমানসঃ। জ্ঞাত্বা চ বিহ্বলং তত্র শীঘ্রং নিঃসারয়েদ্‌গৃহাৎ॥ কুশাস্তরণশায়ী চ দিশঃ সর্ব্বা ন পশ্যতি। লব্ধস্মৃতির্মুহূর্ত্তাত্তু যাবজ্জীবো ন নশ্যতি॥ বাচয়েৎ স্নেহভাবেন ভূমে দেবা দ্বিজাতয়ঃ। সুবর্ণঞ্চ হিরণ্যঞ্চ যথোৎপন্নেন মাধবি॥ পরলোকহিতার্থায় গোপ্রদানং বিশিষ্যতে। সর্ব্বদেবময়া গাব ঈশ্বরেণাবতারিতাঃ॥ অমৃতং ক্ষরয়ন্ত্যশ্চ প্রচরন্তি মহীতলে। এতাসাঞ্চৈব দানেন শীঘ্রং মুচ্যেত কিল্বিষাৎ॥ পশ্চাৎ শ্রুতিপথং দিব্যমুৎকর্ণেন চ শ্রাবয়েৎ। যাবৎ প্রাণান্ প্রমুচ্যেত কৃত্বা কর্ম্ম সুদুষ্করং॥ দৃষ্ট্বা সুবিহ্বলং হ্যেনং মম মার্গানুসারিণং। প্রয়াণকালে তু নরো মন্ত্রেণ বিধিপূর্ব্বকং॥ মন্ত্রেণানেন কর্ত্তব্যং সর্ব্বসংসারমোক্ষণং। মধুপর্কং ত্বরন্ গৃহ্য ইমং মন্ত্রমুদাহরেৎ॥ মন্ত্রঃ। গৃহাণ চেমং মধুপর্কমাদ্যং সংসারনাশনকরং ত্বমৃতেন তুল্যং। নারায়ণেন রচিতং ভগবৎপ্রিয়াণাং দাহে চ শান্তিকরণং সুরলোকপূজ্যং॥ তত এতেন মন্ত্রেণ দদ্যাদ্বৈ মধুপর্ককং। পুরুষো মৃত্যুকালে তু পরলোকসুখাবহং॥ এবং বিনিঃসৃতাৎ প্রাণাৎ সংসারঞ্চ ন গচ্ছতি। নষ্টসংজ্ঞং সমুদ্দিশ্য জ্ঞাত্বা মৃত্যুবশং গতং॥ মহাবনস্পতিং গত্বা গন্ধাংশ্চ বিবিধানপি। ঘৃততৈলসমাযুক্তং কৃত্বা বৈ দেহশোধনং॥ তেজোব্যয়করং বাস্য তৎ সর্ব্বং পরিকল্প্য চ। দক্ষিণায়াং শিরঃ কৃত্বা সলিলে তং নিধায় চ। তীর্থাদ্যাবাহনং কৃত্বা স্নাপনং তস্য কারয়েৎ॥ গয়াদীনি চ তীর্থানি যে চ পুণ্যাঃ শিলোচ্চয়াঃ। কুরুক্ষেত্রঞ্চ গঙ্গা চ যমুনা চ সরিদ্বরা॥ কৌশিকী চ পয়োষ্ণী চ সর্ব্বপাপপ্রণাশিনী। গণ্ডকী ভদ্রনামা চ সরযূর্বলদা তথা॥ বনানি নববারাহং তীর্থং পিণ্ডারকং তথা। পৃথিব্যাং যানি তীর্থানি চত্বারঃ সাগরাস্তথা। সর্ব্বাণি মনসা ধ্যাত্বা স্নানমেবন্তু কারয়েৎ॥ প্রাণান্দাগতন্তু তং জ্ঞাত্বা চিতাং কৃত্বা বিধানতঃ। তস্যা উপরি তং স্থাপ্য দক্ষিণাগ্রং শিরস্তথা॥ দেবানগ্নিমুখান্ ধ্যাত্বা গৃহ্য হস্তে হুতাশনং। প্রজ্বাল্য বিধিবত্তত্র মন্ত্রমেতদুদাহরেৎ॥ মন্ত্রঃ। কৃত্বা তু দুষ্করং কর্ম্ম জানতা বাপ্যজানতা। মৃত্যুকালবশং প্রাপ্য নরঃ পঞ্চত্বমাগতঃ॥ ধর্ম্মাধর্ম্মসমাযুক্তো লোভমোহসমাবৃতঃ। দহেয়ং তস্য গাত্রাণি দৈবলোকায় গচ্ছতু॥ এবমুক্ত্বা ততঃ শীঘ্রং কৃত্বা চৈব প্রদক্ষিণং। জ্বলমানং তদা বহ্নিং শিরঃস্থানে প্রদাপয়েৎ॥ চাতুর্ব্বর্ণ্যেষু সংস্কারমেবন্তুবতি পুত্রক। গাত্রাণি বাসসী চৈব প্রক্ষাল্য বিনিবর্ত্তয়েৎ॥ মৃতনাম তথোদ্দিশ্য দদ্যাৎ পিণ্ডং মহীতলে। তদাপ্রভৃতি চাশৌচং দৈবকর্ম্ম ন

কারয়েৎ ॥ ইতি বরাহপুরাণে শ্রাদ্ধোৎপত্তিনামাধ্যায়ঃ ॥

প্রাণা (স্ত্রী) পক্ষিণীবিশেষঃ। সা চারুণগারুড়য়োঃ শ্বশ্রূঃ। যথা। পুলহস্যাত্মজঃ সর্গঃ প্রাণায়াস্তু নিবোধত। কন্যাঃ ষড়িতি বিখ্যাতাঃ প্রাণায়া বৈ বিজজ্ঞিরে ॥ শ্যেনী ভাসী তথা ক্রৌঞ্চী ধৃতরাষ্ট্রী শুনী শুকী। অরুণস্য ভার্য্যা শ্যেনী বীর্য্যবন্তৌ মহাবলৌ ॥ সম্পাতিশ্চ জটায়ুশ্চ প্রসূতৌ পক্ষিসত্তমৌ। সম্পাতির্জনয়ন্ গৃধ্রান্ কাকাঃ পুত্রা জটায়ুষঃ ॥ ভার্য্যা গরুত্মতশ্চাপি ভাসী ক্রৌঞ্চী শুনী শুকী। ইত্যগ্নিপুরাণং ॥

প্রাণাধিনাথঃ (পুং) পতিঃ। ইতি হলায়ুধঃ ॥

প্রাণাপানৌ (পুং) অশ্বিনীকুমারৌ। যথা। প্রাণাপানৌ কথং দেবাবশ্বিনৌ সংবভূবতুঃ। ইতি প্রজাপালপ্রশ্নে। মহাতপা উবাচ। তস্যাং ত্বাষ্ট্র্যামশ্বরূপ্যাং মার্ত্তণ্ডস্তীব্রতেজসা। বীজং নির্ব্বাপয়ামাস তজ্জলং তদ্দ্বিধাপতৎ ॥ তত্র প্রাণস্ত্বপানশ্চ যোনৌ চাত্মজিতৌ পুরা। বরদানেন চ পুনর্মূর্ত্তিমন্তৌ বভূবতুঃ ॥ তৌ ত্বাষ্ট্র্যামশ্বরূপিণ্যাং জাতৌ যেন নরোত্তমৌ। ততস্তাবশ্বিনৌ দেবৌ কীর্ত্তেতে রবিনন্দনৌ ॥ ইতি বারাহে অশ্বিনোৎপত্তিনামাধ্যায়ঃ ॥

প্রাণায়ামঃ (পুং) যোগাঙ্গবিশেষঃ। তত্রাঙ্গুলিনিয়মো জ্ঞানার্ণবে। কনিষ্ঠানামিকাঙ্গুষ্ঠৈর্যন্নাসাপুটধারণং। প্রাণায়ামঃ স বিজ্ঞেয়স্তর্জনীমধ্যমে বিনা ॥ স দ্বিবিধঃ। সগর্ব্ভো নির্গর্ব্ভশ্চ। তথা চ। সগর্ব্ভো মন্ত্রজাপেন নির্গর্ব্ভো মাত্রয়া ভবেদিতি। মাত্রা চ। বামজানুনি তদ্ধস্তভ্রামণং যাবতা ভবেৎ। কালেন মাত্রা সা জ্ঞেয়া মুনিভির্ব্বেদপারগৈঃ ॥ অথ প্রাণায়ামঃ। মূলমন্ত্রস্য বীজস্য প্রণবস্য বা ষোড়শবারজপেন বামনাসাপুটে বায়ুং পূরয়েৎ। তস্য চতুঃষষ্টিবারজপেন বায়ুং কুম্ভয়েৎ। তস্য দ্বাত্রিংশদ্বারজপেন বায়ুং রেচয়েৎ। পুনর্দ্দক্ষিণেনাপূর্য্য উভাভ্যাং কুম্ভয়িত্বা বামেন রেচয়েৎ। পুনর্বামেনাপূর্য্য উভাভ্যাং কুম্ভয়িত্বা দক্ষিণেন রেচয়েৎ। তথা চ কালীহৃদয়ে। প্রাণায়ামত্রয়ং কুর্য্যান্মূলেন প্রণবেন বা। অথবা মন্ত্রবীজেন যথোক্তবিধিনা সুধীরিতি ॥ সারসমুচ্চয়েঽপি। বিপরীতমতো বিদধীত বুধঃ পুনরেব তু তদ্বিপরীতকমিতি ॥ যৌগিকে পুনর্মাত্রানিয়মঃ। তথা চ গৌতমীয়ে। মন্ত্রঃ প্রাণায়ামঃ প্রোক্তো যৌগিকং কথয়ামি তে। পূরয়েদ্বাময়া বিদ্বান্ মাত্রাষোড়শসংখ্যয়েতি ॥ যদ্বা চতুঃষোড়শাষ্টবারজপেন পূরকাদিকং কুর্য্যাৎ। অথবা একচতুর্দ্বিবারেণ। তথা চ তন্ত্রান্তরে। পূরয়েৎ ষোড়শভির্ব্বায়ুং ধারয়েত্তচ্চতুর্গুণৈঃ। রেচয়েৎ কুম্ভকার্দ্ধেন অশক্ত্যা তত্তুরীয়কৈঃ ॥ তদশক্তৌ তচ্চতুর্থমেব প্রাণস্য সংযমঃ। অস্য নিত্যত্বমাহ তত্রৈব। প্রাণায়ামং বিনা মন্ত্রপূজনে নহি যোগ্যতা ॥ * ॥ গোপালে তু বিশেষো যথা। কামবীজস্যৈকবারজপেন দক্ষিণ-

নাসয়া বায়ুং রেচয়েৎ। পুনঃ সপ্তবার-জপেন বামনাসয়া বায়ুং পূরয়েৎ। নাসা-পুটৌ ধৃত্বা বিংশতিবারজপেন বায়ুং কুম্ভ-য়েৎ। পুনর্ব্বামেন রেচয়েৎ। দক্ষিণেন পূরয়েৎ। উভাভ্যাং কুম্ভয়েৎ। পুনর্দ্দক্ষি-ণেন রেচয়েৎ। বামেনাপূর্য্য উভাভ্যাং কুম্ভয়েৎ। তথা চ। একেন রেচয়েৎ কাম-বীজেনৈব পৃথক্ পৃথক্। পূরয়েৎ সপ্ত-জপ্তেন বিংশত্যা তেন ধারয়েৎ॥ সর্ব্বেষু কৃষ্ণমন্ত্রেষু বীজেনানেন রেচয়েৎ। যদ্বা মূলমন্ত্রেণৈব প্রাণায়ামঃ। তথা চ। পবন-সংযমনন্ত্বমুনা চরেৎ যমিহ জপ্তুমসৌ মনু-মিচ্ছতি। যদি দশাক্ষরং জপতি তদা দশাক্ষরেণ চেত্তত্র চাষ্টাবিংশতিবারং রেচ-য়েৎ। পূরয়েদ্বাময়া তদ্বদ্ধারয়েত্তৎপ্রমা-ণতঃ। প্রাণায়ামো ভবেদেকো রেচপূরক-কুম্ভকৈঃ॥ অষ্টাদশাক্ষরেণ চেৎ দ্বাদশৈবং সমাচরেৎ। অন্যমনুভির্ব্বর্ণানুরূপমিত্যুক্ত-ত্বাৎ। তত্তন্মন্ত্রবর্ণসংখ্যাকৈ রেচকাদি-ত্রয়ং কুর্য্যাৎ। ক্রমদীপিকায়াং। রেচয়েন্-মারুতং দক্ষয়া দক্ষিণঃ। পূরয়েদ্বাময়া মধ্যনাড্যা পুনর্ধারয়েদিত্যাদি। এতত্তু শ্রীকৃষ্ণমন্ত্রবিষয়ং নান্যত্র। ইতি তন্ত্র-সারঃ॥ * ॥ অপি চ। আসনং পদ্মকা-দ্যুক্তং প্রাণায়ামো মরুজ্জয়ঃ। মন্ত্রধ্যান-যুতো গর্ব্ভো বিপরীতো হ্যগর্ব্ভকঃ॥ অ-গর্ব্ভাত্তু সগর্ব্ভস্থঃ প্রাণায়ামস্ততোঽধিকঃ। এবং দ্বিধা ত্রিধাপ্যুক্তঃ পূরণাৎ পূরকঃ স চ॥ কুম্ভকো নিশ্চলত্বাৎ স রেচনা-দ্রেচকস্ত্রিধা। লঘুর্দ্বাদশমাত্রঃ স্যাচ্চতু-র্ব্বিংশতিকঃ পরঃ॥ ষট্‌ত্রিংশন্মাত্রিকঃ শ্রেষ্ঠঃ প্রত্যাহারশ্চ রোধনং। ইতি গারুড়ে ৪৯ অধ্যায়ঃ॥*॥ তস্য ফলং যথা। প্রথমে জনয়েৎ স্বপ্নং মধ্যমেন চ বেপথুং। বিপাকং হি তৃতীয়েন জয়েদ্দোষাননু-ক্রমাৎ॥ ইতি তত্রৈব ২৩০ অধ্যায়ঃ॥*॥ অন্যচ্চ; যথা পর্ব্বতধাতূনাং ধ্মাতানাং দহ্যতে মলং। তথেন্দ্রিয়কৃতা দোষা দহ্যন্তে প্রাণনিগ্রহাৎ॥ প্রথমং সাধনং কুর্য্যাৎ প্রাণায়ামস্য যোগবিৎ। প্রাণাপাননিরো-ধস্তু প্রাণায়াম উদাহৃতঃ॥ লঘুমধ্যোত্তরী-য়াখ্যঃ প্রাণায়ামস্ত্রিধোদিতঃ। তস্য প্রমাণং বক্ষ্যামি তদলক শৃণুষ্ব মে॥ লঘুর্দ্বাদশ-মাত্রস্তু দ্বিগুণঃ স তু মধ্যমঃ। ত্রিগুণাভি-শ্চ মাত্রাভিরুত্তরীয় উদাহৃতঃ॥ নিমে-ষোন্মেষণে মাত্রা তালো লঘ্বক্ষরো মতঃ। প্রাণায়ামস্য সংখ্যার্থং স্মৃতো দ্বাদশ-মাত্রকঃ॥ প্রথমে জনয়েৎ স্বেদং মধ্য-মেন তু বেপথুং। বিষাদং হি তৃতীয়েন জয়েদ্দোষাননুক্রমাৎ॥ মৃদুত্বং সেব্য-মানাস্তু সিংহশার্দ্দূলকুঞ্জরাঃ। যথা যান্তি তথা প্রাণো বশ্যো ভবতি যোগিনঃ॥ বশ্যং মত্তং যথেচ্ছাতো নাগং নয়তি হস্তিপঃ। তথৈব যোগী ছন্দেন প্রাণং নয়তি সাধিতং॥ যথা হি সাধিতঃ সিংহো মৃগান্ হন্তি ন মানুষান্। তদ্বন্নিষিদ্ধঃ পবনঃ কিল্বিষং ন নৃণাং তনুং॥ তস্মাদ্-যুক্তঃ সদা যোগী প্রাণায়ামপরো ভবেৎ। শ্রূয়তাং মুক্তিফলদং তস্যাবস্থাচতু-ষ্টয়ং॥ ধ্বস্তিঃ প্রাপ্তিস্তথা সম্বিৎ প্রসাদশ্চ

মহীপতে । স্বরূপং শৃণু চৈতেষাং কথ্যমানমনুক্রমাৎ ॥ কর্ম্মণামিষ্টদুষ্টানাং জায়তে ফলসংক্ষয়ঃ। চেতসো বিকষায়ত্বং যত্র সা ধ্বস্তিরুচ্যতে ॥ ইষ্টদুষ্টানাং পুণ্যপাপানাং। ঐহিকামুষ্মিকান্ কামান্ লোভমোহাত্মকাংশ্চ যান্। নিরুধ্যাস্তে সদা যোগী প্রাপ্তিঃ সা সার্ব্বকামিকী ॥ অতীতানাগতানর্থান্ বিপ্রকৃষ্টতিরোহিতান্। বিজানতীন্দুসূর্য্যর্ক্ষগ্রহাণাং জ্ঞানসম্পদা ॥ তুল্যপ্রভাবস্তু যদা যোগী প্রাপ্নোতি সম্বিদং। তদা সম্বিদিতি খ্যাতা প্রাণায়ামস্য সা স্থিতিঃ ॥ যান্তি প্রসাদং যেনাস্য মনঃ পঞ্চ চ বায়বঃ। ইন্দ্রিয়াণীন্দ্রিয়ার্থাশ্চ স প্রসাদ ইতি স্মৃতঃ ॥ শৃণুষ্ব চ মহীপাল প্রাণায়ামস্য লক্ষণং। যুঞ্জতশ্চ যথাযোগং যাদৃগ্বিহিতমানসং ॥ ইতি মার্কণ্ডেয়পুরাণে যোগিচিকিৎসানামাধ্যায়ঃ ॥ * ॥ অন্যচ্চ। প্রাণাখ্যমনিলং বশ্যমভ্যাসাৎ কুরুতে তু যৎ। প্রাণায়ামঃ স বিজ্ঞেয়ঃ সবীজোঽবীজ এব চ॥ পরস্পরেণাভিভবং প্রাণাপানৌ যদানিলৌ। কুরুতঃ সদ্বিধানেন তৃতীয়ঃ সংযমাৎ তয়োঃ॥ তস্য চালম্বনবতঃ স্থূলরূপং দ্বিজোত্তম। আলম্বনমনন্তস্য যোগিনোঽভ্যসতঃ স্মৃতং ॥ এতেষাং টীকা। প্রাণায়ামমাহ প্রাণাখ্যমিতি। সবীজঃ সালম্বনো ভগবন্মূর্ত্তিধ্যানমন্ত্রজপসহিতঃ। দ্বিবিধস্যাপি তস্য পুনস্ত্রৈবিধ্যমাহ পরস্পরেণেতি। উচ্ছ্বাসেন মুখনাসিকাভ্যাং বহির্নির্গচ্ছতি বায়ুঃ স প্রাণঃ। নিশ্বাসেনান্তঃ প্রবিশতি যঃ সোঽপানঃ। তত্র প্রাণবৃত্ত্যাপানবৃত্তেরভিভবো নিরোধো রেচকাখ্যঃ প্রাণায়ামঃ। এবমপানবৃত্ত্যা প্রাণবৃত্তেরভিভবঃ পূরকাখ্যঃ। এবমনেন পরস্পরাভিভবপ্রকারদ্বয়েন স প্রাণায়ামো দ্বিধা। তয়োর্যুগপৎসংযমাৎ কুম্ভকাখ্যস্তৃতীয়ঃ প্রাণায়ামঃ। যদ্বা। সদ্বিধানেনেত্যেকমেব পদং। তত্র চায়মর্থঃ। সদ্বিধানেন সদ্গুরূপদিষ্টমার্গেণ রেচকপূরকাভ্যাং যৎ পরস্পরাভিভূতং দ্বয়ং যশ্চ কুম্ভকেনোভয়োঃ সহাভিভবঃ। এবমভিভবত্রয়েণৈব প্রাণায়াম ইতি। সবীজস্যালম্বনমাহ। তস্য চেতি। স্থূলং বক্ষ্যমাণং হিরণ্যগর্ভাদিরূপং। ইতি বিষ্ণুপুরাণে ৬ অংশে ৭ অধ্যায়ঃ ॥ * ॥ গায়ত্রীপ্রাণায়ামো যথা। সব্যাহৃতিং সপ্রণবাং গায়ত্রীং শিরসা সহ। ত্রিঃ পঠেদায়তপ্রাণঃ প্রাণায়ামঃ স উচ্যতে ॥ প্রাণায়ামত্রয়ং কৃত্বা প্রাণায়ামৈস্ত্রিভিস্ত্রিভিঃ। অহোরাত্রকৃতাৎ পাপান্মুচ্যতে নাত্র সংশয়ঃ ॥ সর্ব্বপাপহরং প্রোক্তং প্রাণায়ামং দ্বিজন্মনাং। ততস্ত্বভ্যধিকং নাস্তি তপঃ পরমপাবনং ॥ প্রাণসংধারণং মাসং কুশাগ্রচ্যুতবিন্দুনা। যঃ কুর্য্যাৎ প্রযতো নিত্যং প্রাণায়ামস্তু তৎসমঃ ॥ নিরোধাজ্জায়তে বায়ুস্তস্মাদগ্নিস্ততো জলং। ত্রিভিঃ শরীরং সকলং প্রাণায়ামেন শুদ্ধ্যতি ॥ আকেশাদানখাগ্রাচ্চ তপস্তপ্যেৎ সুদারুণং। আত্মানং শোধয়েদ্যস্তু প্রাণায়ামৈঃ পুনঃ পুনঃ ॥ শ্রাবণ্যাং পৌর্ণমাস্যাঞ্চ সোপবাসো

জিতেন্দ্রিয়ঃ। প্রাণায়ামশতং কৃত্বা মুচ্যতে সর্ব্বকিল্বিষৈঃ॥ ইত্যগ্নিপুরাণং॥

প্রাণিদ্যূতং (ক্লী) পণপূর্ব্বকমেষকুক্কুটাদিযুদ্ধং। তৎপর্য্যায়ঃ। সমাহ্বয়ঃ ২। ইত্যমরঃ। সাহ্বয়ঃ ৩। ইতি শব্দরত্নাবলী॥

প্রাণিমাতা (স্ত্রী) গর্ব্ভদাত্রীক্ষুপঃ। ইতি রাজনির্ঘণ্টঃ॥

প্রাণিহিতা (স্ত্রী) পাদুকা। ইতি ত্রিকাণ্ডশেষঃ॥ লোকহিতকারিণী চ॥

প্রাণী [ন্] (ত্রি) প্রাণবিশিষ্টঃ। মনুষ্যাদিঃ। তৎপর্য্যায়ঃ। চেতনঃ ২ জন্মী ৩ জন্তুঃ ৪ জন্যুঃ ৫ শরীরী ৬। ইত্যমরঃ॥

প্রাণীত্যং (ক্লী) ঋণং। যথা। প্রাণীত্যমৃণমর্থানাং প্রয়োগঃ স্যাৎ কলান্বিকা। ইতি ত্রিকাণ্ডশেষঃ॥

প্রাণেশঃ (পুং) পতিঃ। ইতি জটাধরঃ॥

প্রাণেশা (স্ত্রী) ভার্য্যা। ইতি হেমচন্দ্রঃ॥

প্রাতঃ [র্] ব্য প্রভাতং। তৎপর্য্যায়ঃ। প্রগে ২। ইত্যমরঃ॥ সূর্য্যোদয়াবধিত্রিমুহূর্ত্তকালঃ। যথা। প্রাতঃকালো মুহূর্ত্তাংস্ত্রীন্ সঙ্গবস্তাবদেব তু। ইতি তিথ্যাদিতত্ত্বং॥

প্রাতঃকৃত্যং (ক্লী) প্রভাতকর্ত্তব্যকর্ম্ম। তদনুষ্ঠানং যথা। ব্রাহ্মে মুহূর্ত্তে উত্থায় ধর্ম্মমর্থঞ্চ চিন্তয়েৎ। কায়ক্লেশস্তদুদ্ভূতং ধ্যায়েত্তু মনসেশ্বরং॥ উষঃকালেঽথ সংপ্রাপ্তে কৃত্বা চাবশ্যকং বুধঃ। স্নায়ান্নদীষু শুদ্ধাসু শৌচং কৃত্বা যথাবিধি॥ * ॥ প্রাতঃস্নানেন শুধ্যন্তি যেঽপি পাপকৃতো জনাঃ। তস্মাৎ সর্ব্বপ্রযত্নেন প্রাতঃস্নানং সমাচরেৎ॥ প্রাতঃস্নানং প্রশংসন্তি দৃষ্টাদৃষ্টকরং শুভং। ঋষীণাং শুচিতা নিত্যং প্রাতঃস্নানান্ন সংশয়ঃ॥ মুখে সুপ্তস্য সততং লালাদ্যাঃ প্রস্রবন্তি হি। ততো নৈবাচরেৎ কর্ম্মাণ্যকৃত্বা স্নানমাদিতঃ॥ অলক্ষ্মীঃ কালকর্ণী চ দুঃস্বপ্নং দুর্ব্বিচিন্তিতং। প্রাতঃস্নানেন পাপানি পূয়ন্তে নাত্র সংশয়ঃ॥ ন চ স্নানং বিনা পুংসাং পাবনং প্রত্যহং স্মৃতং। হোমে জপ্যে বিশেষেণ তস্মাৎ স্নানং সমাচরেৎ॥ অশক্তাবশিরস্কং বা স্নানমস্য বিধীয়তে। আর্দ্রেণ বাসসা চাথ মার্জনং কায়িকং স্মৃতং॥ অপ্রায়ত্যে সমুৎপন্নে স্নানমেব সমাচরেৎ। ব্রাহ্মাদীনি যথাশক্তৌ স্নানান্যাহুর্ম্মনীষিণঃ॥ * ॥ ব্রাহ্মমাগ্নেয়মুদ্দিষ্টং বায়ব্যং দিব্যমেব চ। বারুণং যৌগিকং তদ্বৎ ষোঢ়াস্নানং প্রকীর্ত্তিতং॥ ব্রাহ্মন্তু মার্জ্জনং মন্ত্রৈঃ কুশৈঃ সোদকবিন্দুভিঃ। আগ্নেয়ং ভস্মনা পাদমস্তকাদিবিধূননং॥ গবাং হি রজসা প্রোক্তং বায়ব্যং স্নানমুত্তমং। যত্তু সাতপবর্ষেণ স্নানন্তদ্দিব্যমুচ্যতে॥ বারুণঞ্চাবগাহস্তু মানসন্ত্বাত্মবেদনং। যৌগিকং স্নানমাখ্যাতং যোগে বিষ্ণুবিচিন্তনং॥ আত্মতীর্থমিতি খ্যাতং সেবিতং ব্রহ্মবাদিভিঃ॥ মনঃশুচিকরং পুংসাং নিত্যন্তৎস্নানমাচরেৎ। শক্তশ্চেদ্বারুণং বিদ্বান্ প্রাজাপত্যন্তথৈব চ॥ * ॥ প্রক্ষাল্য দন্তকাষ্ঠং বৈ ভক্ষয়িত্বা বিধানতঃ। আচম্য প্রযতো নিত্যং স্নানং প্রাতঃ সমাচরেৎ॥ মধ্যাঙ্গুলসমস্থৌল্যং

দ্বাদশাঙ্গুলসম্মিতং। সত্বচং দন্তকাষ্ঠং স্যাত্তস্যাগ্রেণ চ ধাবয়েৎ॥ ক্ষীরিবৃক্ষসমুদ্ভূতং মালতীসম্ভবং শুভং। অপামার্গঞ্চ বিল্বঞ্চ করবীরং বিশেষতঃ॥ বর্জ্জয়িত্বা নিন্দিতানি গৃহীত্বৈনং যথোদিতং। পরিহৃত্য দিনং পাপং ভক্ষয়িত্বা বিধানতঃ॥ নোৎপাটয়েদ্দন্তকাষ্ঠং নাঙ্গুল্যা ধাবয়েৎ ক্বচিৎ। প্রক্ষাল্য ভুক্ত্বা তজ্জহ্যাচ্ছুচৌ দেশে সমাহিতঃ॥ *॥ স্নাত্বা সন্তর্পয়েদ্দেবানৃষীন্ পিতৃগণাংস্তথা। সম্মার্জ্জ্য মন্ত্রৈরাত্মানং কুশৈঃ সোদকবিন্দুভিঃ॥ আপোহিষ্ঠাব্যাহৃতিভিঃ সাবিত্র্যা বারুণৈঃ শুভৈঃ। ওঙ্কারব্যাহৃতিযুতাং গায়ত্রীং দেবমাতরং। জপ্ত্বা জলাঞ্জলিং দদ্যাদ্ভাস্করং প্রতি তন্মনাঃ॥ প্রাক্‌কূলেষু সমাসীনো দর্ভেষু সুসমাহিতঃ। প্রাণায়ামত্রয়ং কৃত্বা ধ্যায়েৎ সন্ধ্যামিতি স্মৃতিঃ॥ যা সন্ধ্যা সা জগৎসূতির্মায়াতীতা চ নিষ্কলা। ঐশ্বরী তু পরা শক্তিস্তত্ত্বমন্ত্রসমুদ্ভবা॥ ধ্যাত্বার্কমণ্ডলগতাং সাবিত্রীং বৈ জপন্ বুধঃ। প্রাঙ্মুখঃ সততং বিপ্রঃ সন্ধ্যোপাসনমাচরেৎ॥ সন্ধ্যাহীনোঽশুচির্নিত্যমনর্হঃ সর্ব্বকর্ম্মসু। যদন্যৎ কুরুতে কিঞ্চিৎ ন তস্য ফলমাপ্নুয়াৎ॥ অনন্যচেতসঃ শান্তা ব্রাহ্মণা বেদপারগাঃ। উপাস্য বিধিবৎ সন্ধ্যাং প্রাপ্তাশ্চ পরমাং গতিং॥ যোঽন্যত্র কুরুতে যত্নাদ্ধর্ম্মকার্য্যং দ্বিজোত্তমঃ। বিহায় সন্ধ্যাপ্রণতিং স যাতি নরকাযুতং॥ তস্মাৎ সর্ব্বপ্রযত্নেন সন্ধ্যোপাসনমাচরেৎ। উপাসিতো ভবেত্তেন দেবো যোগতনুঃ পরঃ॥ সহস্রপরমাং নিত্যং শতমধ্যাং দশাবরাং। সাবিত্রীং বৈ জপেদ্বিদ্বান্ প্রাঙ্মুখঃ প্রযতঃ স্থিতঃ॥ অথোপতিষ্ঠেদাদিত্যমুদয়ন্তং সমাহিতঃ। মন্ত্রৈস্তু বিবিধৈঃ সৌরৈর্ঋগ্‌যজুঃসামসম্ভবৈঃ॥ উপস্থায় মহাযোগং দেবদেবং দিবাকরং। কুর্ব্বীত প্রণতিং ভূমৌ মূর্দ্ধ্না নিত্যঞ্চ মন্ত্রতঃ॥ *॥ ওঁ খং খখোল্কায় শান্তায় কারণত্রয়হেতবে। নিবেদয়ামি চাত্মানং নমস্তে জ্ঞানরূপিণে॥ নমস্তে ঘৃণিনে তুভ্যং সূর্য্যায় ব্রহ্মরূপিণে। ত্বমেব ব্রহ্ম পরমমাপো জ্যোতী রসোঽমৃতং॥ ভূর্ভুবঃ স্বস্ত্বমোঙ্কারঃ সর্ব্বে রুদ্রাঃ সনাতনাঃ। পুরুষঃ সন্মহোঽন্তস্তাং প্রণমামি কপর্দ্দিনং॥ ত্বমেব বিশ্বং বহুধা সদসৎ সূয়সে চ যৎ। নমো রুদ্রায় সূর্য্যায় ত্বামহং শরণং গতঃ॥ প্রাচেতসে নমস্তুভ্যমুমায়াঃ পতয়ে নমঃ। নমোঽস্তু নীলগ্রীবায় নমস্তুভ্যং পিনাকিনে॥ বিলোহিতায় ভর্গায় সহস্রাক্ষায় তে নমঃ। নম উমাপতয়ে তুভ্যমাদিত্যায় নমোঽস্তু তে॥ নমস্তে বহুহস্তায় ত্র্যম্বকায় নমোঽস্তু তে। প্রপদ্যে ত্বাং বিরূপাক্ষ মহান্তং পরমেশ্বরং॥ হিরণ্ময়ে গৃহে গুপ্তমাত্মানং সর্ব্বদেহিনাং। নমস্যামি পরং জ্যোতির্ব্রহ্মাণং ত্বাং পরামৃতং॥ বিশ্বং পশুপতিং ভীমং নরনারীশরীরিণং। নমঃ সূর্য্যায় রুদ্রায় ভাস্বতে পরমেষ্ঠিনে। উগ্রায় সর্ব্বভক্ষ্যায় ত্বাং প্রপদ্যে সদৈব হি॥ *॥ এতদ্বৈ সূর্য্যহৃদয়ং জপ্ত্বা স্তব-

মনুত্তমং। প্রাতঃকালেঽথ মধ্যাহ্নে নমস্কুর্য্যাদ্দিবাকরং ॥ ইদং পুত্ত্রায় শিষ্যায় ধার্ম্মিকায় দ্বিজাতয়ে। প্রদেয়ং সূর্য্যহৃদয়ং ব্রহ্মণা তু প্রদর্শিতং ॥ সর্ব্বপাপপ্রশমনং বেদসারং সমুদ্ধৃতং। ব্রাহ্মণানাং হিতং পুণ্যং ঋষিসংঘৈর্নিষেবিতং॥ যস্তু নিত্যং পঠেদ্ধীমান্ প্রেক্ষন্নাদিত্যমণ্ডলং। মহাপাতকযুক্তোঽপি পূয়তে নাত্র সংশয়ঃ॥ ক্ষয়াপস্মারকুষ্ঠাদ্যৈর্ব্যাধিভিঃ পীড়িতোঽপি সন্। জপ্ত্বা শতগুণং স্তোত্রং স শ্লাঘ্যো ভবতি দ্রুতং॥ ভূতগ্রহপিশাচাতিবীজব্যসনকর্ষিভিঃ। স্তবন্ ধ্যাত্বা হরিং বিপ্রো মুচ্যতে মহতো ভয়াৎ॥ *॥ অথাগত্য গৃহং বিপ্রঃ সমাচম্য যথাবিধি। প্রজ্বাল্য বহ্নিং বিধিবজ্জুহুয়াজ্জাতবেদসং॥ ঋত্বিক্পুত্ত্রোঽথ পত্নী বা শিষ্যো বাপি সহোদরঃ। প্রাপ্যানুজ্ঞাং বিশেষেণ জুহুয়ুর্ব্বা যথাবিধি॥ পবিত্রপাণিঃ পূতাত্মা শুক্লাম্বরধরোত্তরঃ। অনন্যমানসো ভূত্বা জুহুয়াৎ সংযতেন্দ্রিয়ঃ॥ বিনা দর্ভেণ যৎ কর্ম্ম বিনা মন্ত্রেণ বা পুনঃ। রাক্ষসং তদ্ভবেৎ সর্ব্বং নামুত্রেহ ফলপ্রদং॥ *॥ দৈবতানি নমস্কুর্য্যাদ্দেয়মারান্নিবেদয়েৎ। দদ্যাৎ পুষ্পাদিকং তেষাং বৃদ্ধাংশ্চৈবাভিবাদয়েৎ॥ গুরুঞ্চৈবাভ্যুপাসীত হিতঞ্চাস্য সমাচরেৎ। বেদাভ্যাসং ততঃ কুর্য্যাৎ প্রযত্নাচ্ছক্তিতো দ্বিজঃ॥ জপেদধ্যাপয়েচ্ছিষ্যান্ শ্রাবয়েচ্চ বিধারয়েৎ। অবেক্ষেত চ শাস্ত্রাণি ধর্ম্মাদীনি দ্বিজোত্তমঃ॥ বৈদিকাংশ্চৈব নিয়মান্ বেদাঙ্গানি বিশেষতঃ। উপেয়াদীশ্বরঞ্চাথ যোগক্ষেমপ্রসিদ্ধয়ে॥ সাধয়েদ্বিবিধানর্থান্ কুটম্বার্থে ততো দ্বিজঃ। ইতি কৌর্ম্মে উপবিভাগে ১৭ অধ্যায়ঃ॥*॥ অপি চ। প্রাতঃ শিরসি শুক্লাব্জে দ্বিনেত্রং দ্বিভুজং গুরুং। প্রসন্নবদনং শান্তং স্মরেত্তন্নামপূর্ব্বকং॥ ওঁ নমো গুরবে তস্মা ইষ্টদেবস্বরূপিণে। যস্য বাক্যামৃতং হন্তি বিষং সংসারসংজ্ঞকমিতি পঠেৎ॥ অহং দেবো ন চান্যোঽস্মি ব্রহ্মৈবাস্মি ন শোকভাক্। সচ্চিদানন্দরূপোঽহং নিত্যমুক্তস্বভাববান্॥ ইতি ভাবয়েৎ। লোকেশ চৈতন্যময়াদিদেব শ্রীকান্ত বিষ্ণো ভবদাজ্ঞয়ৈব। প্রাতঃ সমুত্থায় তব প্রিয়ার্থং সংসারযাত্রামনুবর্ত্তয়িষ্যে॥ জানামি ধর্ম্মং ন চ মে প্রবৃত্তির্জানাম্যধর্ম্মং ন চ মে নিবৃত্তিঃ। ত্বয়া হৃষীকেশ হৃদি স্থিতেন যথা নিযুক্তোঽস্মি তথা করোমি॥ বিষ্ণুপুরাণে। প্রবুদ্ধশ্চিন্তয়েদ্ধর্ম্মমর্থকাম্যাবিরোধিনং। অপীড়য়া তয়োঃ কামমুভয়োরপি চিন্তয়েৎ॥ ধর্ম্মলক্ষণন্তু ভবিষ্যে। ধর্ম্মঃ শ্রেয়ঃ সমুদ্দিষ্টং শ্রেয়োঽভ্যুদয়সাধনং। অতএব জৈমিনিঃ। চোদনা লক্ষণোঽর্থো ধর্ম্ম ইতি। তেন বৈদিকলিঙ্প্রতিপাদ্যোঽর্থো ধর্ম্মঃ। কোঽর্থো যোঽভ্যুদয়ায় ইতি তু ভবিষ্যে॥ *॥ ততঃ ওঁ প্রিয়দত্তায়ৈ ভুবে নমঃ। ইতি নমস্কৃত্য দক্ষিণং চরণং ন্যসেৎ। ছন্দোগপরিশিষ্টং। শ্রোত্রিয়ং সুভগাময়িং গাঞ্চৈবাগ্নিচিতং তথা। প্রাতরুত্থায় যঃ পশ্যেদাপদ্ভ্যঃ স বিমুচ্যতে॥ পাপিষ্ঠং দুর্ভগাং

মদ্যং নগ্নমুৎকৃত্তনাসিকং। প্রাতরুত্থায় যঃ পশ্যেত্তৎ কলেরুপলক্ষণং॥ অতএব ব্যাসঃ। ধনিনঃ শ্রোত্রিয়ো রাজা নদী বৈদ্যস্তু পঞ্চমঃ। পঞ্চ যত্র ন বিদ্যন্তে তত্র বাসং ন কারয়েৎ॥ মহাভারতে। কর্কোটকস্য নাগস্য দময়ন্ত্যা নলস্য চ। ঋতপর্ণস্য রাজর্ষেঃ কীর্ত্তনং কলিনাশনং॥ মাৎস্যে। কার্ত্তবীর্য্যার্জ্জুনো নাম রাজা বাহুসহস্রভৃৎ। যোঽস্য সংকীর্ত্তয়েন্নাম কল্যমুত্থায় মানবঃ॥ ন তস্য বিত্তনাশঃ স্যান্নষ্টঞ্চ লভতে পুনঃ। কল্যং প্রাতঃ॥*॥ অথ বিণ্মূত্রোৎসর্গঃ। বিষ্ণুধর্ম্মোত্তরে। নিদ্রাং জহ্যাদ্গৃহী রাম নিত্যমেবারুণোদয়ে। বেগোৎসর্গং ততঃ কৃত্বা দন্তধাবনপূর্ব্বকং॥ স্নানং সমাচরেৎ প্রাতঃ সর্ব্বকল্মষনাশনং। অরুণোদয়কালমাহ স্কন্দপুরাণং। উদয়াৎ প্রাক্ চতস্রস্তু নাড়িকা অরুণোদয়ঃ। তত্র স্নানং প্রশস্তং স্যাত্তদ্ধি পুণ্যতমং স্মৃতং॥ নাড়িকা দণ্ডঃ। বিষ্ণুধর্ম্মোত্তরে। বেগরোধং ন কর্ত্তব্যমন্যত্র ক্রোধবেগতঃ। আয়ুর্ব্বেদীয়েঽপি। ন বেগিতোঽন্যকার্য্যসিদ্ধিঃ স্যান্নাজিত্বা সাধ্যমাময়ং। অঙ্গিরাঃ। উত্থায় পশ্চিমে রাত্রেস্তত আচম্য চোদকং। অন্তর্দ্ধায় তৃণৈর্ভূমিং শিরঃ প্রাবৃত্য বাসসা॥ বাচং নিয়ম্য যত্নেন ষ্ঠীবনোচ্ছ্বাসবর্জ্জিতঃ। কুর্য্যান্মূত্রপুরীষে তু শুচৌ দেশে সমাহিতঃ॥ বিষ্ণুপুরাণং। ততঃ কল্যং সমুত্থায় কুর্য্যান্মৈত্রং নরেশ্বর। নৈঋর্ত্যামিষুবিক্ষেপমতীত্যাভ্যধিকং ভুবঃ॥ তিষ্ঠেন্নাতিচিরং তত্র নৈব কিঞ্চিদুদীরয়েৎ। কল্যমুষঃকালং। মৈত্রং মিত্রদেবতাকপায়ুসম্বন্ধাৎ পুরীষোৎসর্গঃ। নৈঋর্ত্যামুত্থানদেশমারভ্য উত্থায়েত্যনেন উপস্থিতেঃ ইষুপ্রক্ষেপযোগ্যদেশাদ্বহিঃ। তদ্দেশপরিমাণমাহ পিতামহঃ। মধ্যমেন তু চাপেন প্রক্ষিপেত্তু শরত্রয়ং। হস্তানাঞ্চ শতে সার্দ্ধে লক্ষ্যং কৃত্বা বিচক্ষণঃ॥ *॥ আপস্তম্বঃ। মূত্রপুরীষোৎসর্গং কুর্য্যাদ্দক্ষিণাং দিশং দক্ষিণাপরাম্বেতি। দক্ষিণাপরাং নৈঋর্তীং। মনুঃ। মূত্রোচ্চারসমুৎসর্গং দিবা কুর্য্যাদুদঙ্মুখঃ। দক্ষিণাভিমুখো রাত্রৌ সন্ধ্যয়োশ্চ যথা দিবা॥ যত্তু যমবচনং। প্রত্যঙ্মুখশ্চ পূর্ব্বাহ্ণে ত্বপরাহ্ণে চ প্রাঙ্মুখঃ। উদঙ্মুখস্তু মধ্যাহ্নে নিশায়াং দক্ষিণামুখঃ। ইতি তদিচ্ছাবিকল্পার্থং সূর্য্যাভিমুখনিরাসার্থঞ্চ ন তু নিয়মার্থং দেবলবচনবিরোধাৎ। তথা চ দেবলঃ। সদৈবোদঙ্মুখঃ প্রাতঃ সায়াহ্নে দক্ষিণামুখঃ। বিণ্মূত্রমাচরেন্নিত্যং সন্ধ্যায়াং পরিবর্জ্জয়েদিতি॥ অত্র প্রাতঃসায়াহ্নশব্দৌ দিবারাত্রিপরৌ পূর্ব্বোক্তমনুবচনৈকবাক্যত্বাৎ। সন্ধ্যায়াং পরিবর্জ্জয়েদিতি তু পীড়িতেতরপরং॥ *॥ যমঃ। কৃত্বা যজ্ঞোপবীতন্তু পৃষ্ঠতঃ কণ্ঠলম্বিতং। বিণ্মূত্রে চ গৃহী কুর্য্যাদ্যদ্বা কর্ণে সমাহিতঃ॥ পৃষ্ঠতঃ পৃষ্ঠে কণ্ঠলম্বিতং নিবীতং তৎ পৃষ্ঠলম্বিতং নিবীতমাপৃষ্ঠদেশাবলম্বং গ্রাম্যধর্ম্মেম্বিতি নিগমপরিশিষ্টবচনাৎ।

নিয়ম্য প্রযতো বাচং সম্বীতাঙ্গোঽবগুণ্ঠিত ইতি মনুবচনাচ্চ। অত্র সম্বীতং নিবীতং সম্বীতং মানুষ ইতি তৈত্তিরীয়শ্রুতেঃ। মানুষে সনকাদিকৃত্যে। পৃষ্ঠলম্বিতং নিবীতী বেতি বৌধায়নীয়াচ্চ। ততশ্চ হারবৎ কৃত্বা পৃষ্ঠলম্বিতং স্কন্ধে ইত্যর্থঃ। একবস্ত্রতাপক্ষে ব্যবস্থামাহ সাংখ্যায়নঃ। যদ্যেকবস্ত্রো যজ্ঞোপবীতং কর্ণে কৃত্বা অবগুণ্ঠিত ইতি কর্ণে দক্ষিণে। পবিত্রং দক্ষিণে কর্ণে বিণ্মূত্রমাচরেদিতি স্মৃতৌ তথাদর্শনাৎ। অবগুণ্ঠিতঃ কৃতশিরোঽবগুণ্ঠনঃ। মনুঃ। ছায়ায়ামন্ধকারে বা রাত্রাবহনি বা দ্বিজঃ। যথাসুখমুখঃ কুর্য্যাৎ প্রাণবাধভয়েষু চ॥ মহাভারতে। প্রত্যাদিত্যং প্রতি জলং প্রতি গাঞ্চ প্রতি দ্বিজং। মেহন্তি যে চ পথিষু তে ভবন্তি গতায়ুষঃ॥ প্রতিঃ সাংমুখ্যে॥ * ॥ মনুঃ। ন মূত্রং পথি কুর্ব্বীত ন ভস্মনি ন গোব্রজে। ন ফালকৃষ্টে ন জলে ন চিত্যাং ন চ পর্ব্বতে॥ ন জীর্ণদেবায়তনে ন বল্মীকে কদাচন। ন সসত্ত্বেষু গর্ত্তেষু ন গচ্ছন্নাপি সংস্থিতঃ॥ ন নদীতীরমাসাদ্য ন চ পর্ব্বতমস্তকে। গবাগ্নিবিপ্রানাদিত্যমপঃ পশ্যংস্তথৈব চ॥ ন কদাচন কুর্ব্বীত বিণ্মূত্রস্য বিসর্জ্জনং। সসত্ত্বেষু প্রাণিমৎসু। সংস্থিতঃ উত্থিতঃ। পর্ব্বতনিষেধাদেব মস্তকনিষেধে সিদ্ধে পুনর্নিষেধো যত্র পর্ব্বতোঽশক্যপরীহারস্তত্রাপি মস্তকবর্জ্জনার্থঃ। অথবা। পর্ব্বতমস্তকনিষেধোঽধিকদোষায় ॥ * ॥ বশিষ্ঠঃ। আহারনির্হারবিহারযোগাঃ সুসংবৃতা ধর্ম্মবিদা তু কার্য্যাঃ। বাগ্‌বুদ্ধিগুপ্তী চ তপস্তথৈব ধনায়ুষী গুপ্ততমে তু কার্য্যে॥ নির্হারো মূত্রপুরীষোৎসর্গঃ। বিহারঃ স্ত্রীসংভোগঃ। যোগঃ সমাধিঃ। বাগ্‌গুপ্তিরশুভালাপত্যাগঃ। বুদ্ধিগুপ্তিরনিষ্টচিন্তাত্যাগঃ। হারীতঃ। আহারন্তু রহঃ কুর্য্যান্নির্হারঞ্চৈব সর্ব্বদা। গুপ্তাভ্যাং লক্ষ্ম্যুপেতঃ স্যাৎ প্রকাশে হীয়তে তথা॥ বিষ্ণুপুরাণং। সোমাগ্ন্যর্কাম্বুবায়ূনাং পূজ্যানাঞ্চ ন সংমুখং। কুর্য্যাৎ ষ্ঠীবনবিণ্মূত্রসমুৎসর্গঞ্চ পণ্ডিতঃ॥ আপস্তম্বঃ। ন চ সোপানৎকো মূত্রপুরীষে কুর্য্যাদিতি। বৃহন্মনুঃ। করগৃহীতপাত্রেণ কৃত্বা মূত্রপুরীষকে। মূত্রতুল্যন্তু পানীয়ং পীত্বা চান্দ্রায়ণঞ্চরেৎ ॥ * ॥ ভরদ্বাজঃ। অথাবকৃষ্য বিণ্মূত্রং লোষ্টকাষ্ঠতৃণাদিনা। উদস্তবাসা উত্তিষ্ঠেদ্দৃঢ়ং বিধৃতমেহনঃ॥ উদস্তবাসাঃ কটিদেশাদূর্দ্ধক্ষিপ্তবস্ত্রঃ ॥ * ॥ অথ শৌচং। দেবলঃ। ধর্ম্মবিদ্দক্ষিণং হস্তমধঃশৌচে ন যোজয়েৎ। তথৈব বামহস্তেন নাভেরূর্দ্ধং ন শোধয়েৎ। প্রকৃতিস্থিতিরেষা স্যাৎ কারণাদুভয়ক্রিয়া॥ কারণাদ্রোগাদেঃ। ব্রহ্মাণ্ডপুরাণং। উদ্ধৃতোদকমাদায় মৃত্তিকাঞ্চৈব বাগ্‌যতঃ। উদঙ্মুখো দিবা কুর্য্যাদ্রাত্রৌ চেদ্দক্ষিণামুখঃ॥ সুনির্নিক্তে মৃদং দদ্যান্মৃদন্তে ত্বপ এব চ। কুর্য্যাচ্ছৌচমিতি শেষঃ। সুনির্নিক্তে ভরদ্বাজোক্তলোষ্টাদিপ্রমৃষ্টে গুদে। উদকপাত্রাভাবে করেণ জলাশয়াৎ উদক-

গ্রহণমাহ আদিত্যপুরাণং । রত্নিমাত্রং জলং ত্যক্ত্বা কুর্য্যাচ্ছৌচমনুদ্ধৃতে। পশ্চাচ্চ শোধয়েত্তীর্থমন্যথা ন শুচির্ভবেৎ ॥ তস্মিন দেশে শৌচং কর্ত্তব্যং যস্মাদ্রত্নিমাত্রব্যবহিতং জলং তৎস্থলমেব তীর্থং জলসমীপত্বাৎ ॥ * ॥ বিষ্ণুপুরাণং । বল্মীকমূষিকোৎখাতাং মৃদমন্তর্জলান্তথা। শৌচাবশিষ্টাং গেহাচ্চ নাদদ্যাল্লেপসম্ভবাং ॥ অন্তঃপ্রাণ্যবপন্নাঞ্চ হলোৎখাতাং সকর্দ্দমাং । মনুদক্ষৌ। একা লিঙ্গে গুদে তিস্রস্তথা বামকরে দশ। উভয়োঃ সপ্ত দাতব্যা মৃদঃ শুদ্ধিমভীপ্সতা ॥ উভয়োঃ করয়োঃ। বামহস্তে দশদানানন্তরং তৎপৃষ্ঠে ষড়্দানমাহ হারীতঃ। দশ মধ্যে চ ষট্‌পৃষ্ঠে ইতি। শঙ্খদক্ষৌ। তিস্রস্তু মৃত্তিকা দেয়াঃ কৃত্বা তু নখশোধনং । তিস্রস্তু পাদয়োর্দেয়াঃ শুদ্ধিকামেন নিত্যশঃ॥ নখশোধনং তৃণাদিনা নখান্তর্মলশোধনং । তিস্র ইতি হস্তয়োরিতি শেষঃ ॥ * ॥ পাদপ্রক্ষালনং ন কাংস্যে কর্ত্তব্যমাহ বিষ্ণুধর্ম্মোত্তরং । দর্ব্বৈর্ন মার্জয়েৎ পাদৌ ন চ কাংস্যে প্রধাবয়েৎ ॥ * ॥ দক্ষঃ। লিঙ্গে তত্র সমাখ্যাতা ত্রিপর্ব্বী পূর্য্যতে যয়া। অর্দ্ধপ্রসৃতিমাত্রা তু প্রথমা মৃত্তিকা স্মৃতা॥ দ্বিতীয়া চ তৃতীয়া চ তদর্দ্ধং পরিকীর্ত্তিতং। যদা তু উক্তপ্রমাণয়া মৃদা গন্ধলেপক্ষয়ো ন ভবতি তদা অধিকয়াপি কর্ত্তব্যং। গন্ধলেপক্ষয়করং শৌচং কুর্য্যাদতন্দ্রিতঃ॥ ইতি যাজ্ঞবল্ক্যবচনাৎ। গুদাদন্যত্র পরিমাণমাহ যমঃ।

মৃত্তিকা তু সমুদ্দিষ্টা ত্রিপর্ব্বী পূর্য্যতে যয়া। ত্রিপর্ব্বী তর্জ্জনীমধ্যমানামিকানামগ্রপর্ব্বত্রয়ং ॥ * ॥ মূত্রমাত্রে তু স্মৃতিঃ। একাং লিঙ্গে মৃদং দদ্যাৎ বামহস্তে তু মৃত্ত্রয়ং। উভয়োর্হস্তয়োর্দ্বে তু মূত্রশৌচং প্রকীর্ত্তিতং ॥ ব্রহ্মপুরাণে। পাদয়োর্দ্বে গৃহীত্বা চ সুপ্রক্ষালিতপাণিমান্ । দ্বিরাচম্য ততঃ শুদ্ধঃ স্মৃত্বা বিষ্ণুং সনাতনং ॥ পাদয়োর্দ্বে একৈকা। ইদং মূত্রে পুরীষোৎসর্গে তিসৃণাং বিধানাৎ ॥ * ॥ দক্ষঃ। যথোদিতং দিবা শৌচমর্দ্ধং রাত্রৌ বিধীয়তে। আতুরে চ তদর্দ্ধং স্যাৎ তদর্দ্ধন্তু পথি স্মৃতং ॥ যথোক্তকরণাশক্তাবেবেদং ন তু নিশাদিপুরস্কারেণৈব বাক্যস্যাদৃষ্টার্থতাপত্তেঃ ॥ * ॥ আপস্তম্বঃ। পথি পাদস্তু বিজ্ঞেয় আর্ত্তঃ কুর্য্যাদযথাবলং। এতয়োর্ব্বিরোধস্তু আর্ত্তানার্ত্তাভ্যাং পরিহরণীয়ঃ। দক্ষঃ। দেশং কালং তথাত্মানং দ্রব্যং দ্রব্যপ্রয়োজনং। উপপত্তিমবস্থাঞ্চ জ্ঞাত্বা শৌচং প্রকল্পয়েৎ ॥ ব্রহ্মপুরাণে। ন যাবদুপনীয়েত দ্বিজঃ শূদ্রস্তথাঙ্গনা। গন্ধলেপক্ষয়করং শৌচং তেষাং বিধীয়তে ॥ প্রমাণং শৌচসংখ্যা বা ন শিষ্টৈরুপদিশ্যতে। যাবচ্চ শুদ্ধিং মন্যেত তাবৎ শৌচং সমাচরেৎ ॥ দক্ষঃ। ন্যূনাধিকং ন কর্ত্তব্যং শৌচং শুদ্ধিমভীপ্সতা। প্রায়শ্চিত্তং প্রসজ্জেত বিহিতাতিক্রমে কৃতে॥ শৌচাচারবিহীনস্য সমস্তা নিষ্ফলাঃ ক্রিয়াঃ। গন্ধলেপক্ষয়ে সত্যধিকং ন কর্ত্তব্যং পূর্ব্বোক্তযাজ্ঞবল্ক্যবিরোধাৎ। গন্ধ-

লেপাক্ষয়ে ত্বধিকসংখ্যয়াপি। যাজ্ঞবল্ক্যবচনং অনুপনীতাদিপরং বা। পূর্ব্বোক্তব্রহ্মপুরাণৈকবাক্যত্বাৎ ॥ * ॥ এতচ্ছৌচং গৃহস্থানাং দ্বিগুণং ব্রহ্মচারিণাং। ত্রিগুণন্তু বনস্থানাং যতীনাঞ্চ চতুর্গুণং ॥ ইদন্তু দ্বৈগুণ্যাদিকং সংখ্যামাত্রে তদনন্তরাভিধানাৎ। ব্যাঘ্রপাদঃ। শৌচন্তু দ্বিবিধং প্রোক্তং বাহ্যমাভ্যন্তরং তথা। মৃজ্জলাভ্যাং স্মৃতং বাহ্যং ভাবশুদ্ধিস্তথাপরং ॥ গঙ্গাতোয়েন কৃৎস্নেন মৃদ্ভারৈশ্চ নগোপমৈঃ। আমৃত্যোঃ স্নাতকশ্চৈব ভাবদুষ্টো ন শুধ্যতি ॥ * ॥ স্মৃতিঃ। ধাবন্তঞ্চ প্রমত্তঞ্চ মূত্রোচ্চারকৃতন্তথা। ভুঞ্জানমাচমানঞ্চ নাস্তিকং নাভিবাদয়েৎ ॥ জন্মপ্রভৃতি যৎকিঞ্চিৎ চেতসা ধর্ম্মমাচরেৎ। সর্ব্বং তন্নিষ্ফলং যাতি একহস্তাভিবাদনাৎ ॥ * ॥ ঋষ্যশৃঙ্গঃ। যস্মিন্ স্থানে কৃতং শৌচং বারিণা তদ্বিশোধয়েৎ। ন শুদ্ধিস্তু ভবেত্তস্য মৃত্তিকাং যো ন শোধয়েৎ ॥ * ॥ শৌচানন্তরং হারীতঃ। গোময়েন মৃদা বা কমণ্ডলুং প্রমৃজ্য পূর্ব্ববদুপস্পৃশ্য আদিত্যং সোমমগ্নিং বা বীক্ষেতেতি। অত্র মার্জনানন্তরং ক্ষালনং অন্যত্র তথাদর্শনাৎ। আচমনানন্তরং আদিত্যাদিদর্শনং যথাসম্ভবং। শৌচং কৃত্বা মূত্রোচ্চারং ন পশ্যেৎ দৃষ্ট্বাদিত্যমগ্নিং সোমং বা পশ্যেদিতি ॥ * ॥ অথাচমনবিধিঃ। দক্ষঃ। প্রক্ষাল্য পাণী পাদৌ চ ত্রিঃ পিবেদম্বু বীক্ষিতং। সংবৃত্যাঙ্গুষ্ঠমূলেন দ্বিঃ প্রমৃজ্যাত্ততো মুখং। সংহত্য তিসৃভিঃ পূর্ব্বমাস্যমেবমুপস্পৃশেৎ ॥ অঙ্গুষ্ঠেন প্রদেশিন্যা ঘ্রাণং পশ্চাদনন্তরং। অনামিকাভ্যাঞ্চ চক্ষুঃশ্রোত্রে পুনঃ পুনঃ ॥ নাভিং কনিষ্ঠাঙ্গুষ্ঠেন হৃদয়ন্তু তলেন বৈ। সর্ব্বাভিস্তু শিরঃ পশ্চাদ্বাহূ চাগ্রেণ সংস্পৃশেৎ ॥ * ॥ পাদপ্রক্ষালনং বিশেষয়তি দেবলঃ। প্রথমং প্রাঙ্মুখঃ স্থিত্বা পাদৌ প্রক্ষালয়েৎ শনৈঃ। উদঙ্মুখো বা দৈবত্যে পৈতৃকে দক্ষিণামুখঃ ॥ শনৈরত্বরঃ। দৈবপৈতৃকেতরত্রাপস্তম্বঃ। প্রত্যক্‌পাদাবসেচনমিতি। প্রত্যক্ পশ্চিমাভিমুখঃ। ক্রমমাহ গোভিলঃ। সব্যং পাদমবনেনিজ ইতি সব্যং পাদং প্রক্ষালয়েৎ। দক্ষিণং পাদমবনেনিজ ইতি দক্ষিণং পাদং প্রক্ষালয়েদিতি অর্হণীয়ে তথাদর্শনাৎ সর্ব্বত্র তথা কল্প্যতে। পারস্করঃ। সব্যং পাদং প্রক্ষাল্য দক্ষিণং প্রক্ষালয়তীতিসূত্রেণ প্রাক্ সব্যপাদপ্রক্ষালনে সিদ্ধে সব্যং প্রক্ষাল্য দক্ষিণং প্রক্ষালয়তীত্যত্র সব্যগ্রহণং সামান্যার্থং তেনান্যস্যাপি পাদপ্রক্ষালনে সব্যস্যৈব প্রাথম্যং অন্যার্থং পুনর্ব্বচনমিতিন্যায়াৎ। অন্যার্থমধিকার্থং। ব্রাহ্মণশ্চেদ্দক্ষিণং প্রথমমিতি সূত্রং তস্য পাদৌ যদি ব্রাহ্মণঃ প্রক্ষালয়তি তদা দক্ষিণং প্রথমমিতি ন সব্যং। যথা প্রক্ষালয়তীত্যনুবৃত্তৌ আশ্বলায়নঃ। দক্ষিণমগ্রে ব্রাহ্মণায় প্রযচ্ছেৎ সব্যং শূদ্রায়েতি। স্বয়ং প্রক্ষালনে সব্যস্যৈব প্রাথম্যং ইতি এবং হরিশর্ম্মাপি। আচমনে পাণিপাদপ্রক্ষালনং

মূত্রাদ্যুৎসর্গে। যথা বৃদ্ধপরাশরঃ। কৃত্বাথ শৌচং প্রক্ষাল্য হস্তৌ পাদৌ চ মৃজ্জলৈঃ। নিবদ্ধশিখ আসীনো দ্বিজ আচমনঞ্চরেৎ॥ কৃত্বোপবীতং সব্যাংশে বাঙ্মনঃকায়সংযতঃ। আপস্তম্বঃ। ইত্যেবমদ্ভিরাজানু প্রক্ষাল্য চরণৌ পৃথক্। হস্তৌ চামণিবন্ধাভ্যাং পশ্চাদাসীতসংযতঃ॥ আজানু আমণিবন্ধাভ্যামিত্যবধ্যুপাদানং তৎপর্য্যন্তাশুচিত্বশঙ্কায়াং অধ্বশ্রমাপনোদনায় অতিশয়শৌচায় বা। অতএবোক্তং অঙ্গপ্রকর্ষাৎ ফলপ্রকর্ষ ইতি॥ *॥ শিখাবন্ধনে বিশেষমাহ ব্রহ্মপুরাণং। গায়ত্র্যা তু শিখাং বদ্ধা নৈর্ঋত্যাং ব্রহ্মরন্ধ্রতঃ। জুটিকাঞ্চ ততো বদ্ধা ততঃ কর্ম্ম সমাচরেৎ॥ *॥ পিবেদিত্যত্রান্তর্জান্বাহ যাজ্ঞবল্ক্যঃ। অন্তর্জানু শুচৌ দেশে উপবিষ্ট উদঙ্মুখঃ। প্রাগ্বা ব্রাহ্মেণ তীর্থেন দ্বিজো নিত্যমুপস্পৃশেৎ॥ অন্তর্জানু জানুনোর্মধ্যে হস্তৌ কৃত্বেতি শেষঃ। বাশব্দাদীশানাভিমুখঃ। ঈশানাভিমুখো ভূত্বোপস্পৃশেত্তু যথাবিধি। ইতি মরীচ্যুক্তেঃ। ব্রাহ্মেণ তীর্থেন অঙ্গুষ্ঠমূলেন। কনিষ্ঠদেশিন্যঙ্গুষ্ঠমূলান্যগ্রং করস্য চ। প্রজাপতিপিতৃব্রহ্মদেবতীর্থান্যনুক্রমাৎ ইতি যাজ্ঞবল্ক্যাৎ॥ দেশিনী তর্জ্জনী। করস্য দক্ষিণস্য। যথা মার্কণ্ডেয়পুরাণং। অঙ্গুষ্ঠোত্তরতো রেখা যা পাণের্দক্ষিণস্য চ। এতদ্ব্রাহ্মমিতি খ্যাতং তীর্থমাচমনায় বৈ॥ অত্র দ্বিজো ন স্ত্রীশূদ্রাবিতি মিতাক্ষরা॥ অতএব স্ত্রিয়াস্ত্রৈদশিকং তীর্থং শূদ্রজাতেস্তথৈব চ। সকৃদাচমনাচ্ছুদ্ধিরেতয়োরেব চোভয়োঃ॥ ব্রাহ্মতীর্থাবরোধে তু মনুঃ। কায়ত্রৈদশিকাভ্যাং বা ন পৈত্র্যেণ কদাচন। উক্ততীর্থত্রয়স্য ব্রণাদিনাবরোধে করমধ্যাত্মকাগ্রেয়েনাপি। এবঞ্চ সর্ব্বাবিরোধে স্বর্ণাদিপাত্রেণাপ্যাচমনং কার্য্যং স্বয়মসামর্থ্যেঽন্যেনাচমনং কারয়িতব্যং। যাজ্ঞবল্ক্যঃ। অদ্ভিস্তু প্রকৃতিস্থাভির্হীনাভিঃ ফেনবুদ্বুদৈঃ। হৃৎকণ্ঠতালুগাভিস্তু যথাসংখ্যং দ্বিজাতয়ঃ॥ শুধ্যেরন্ স্ত্রী চ শূদ্রশ্চ সকৃৎ স্পৃষ্টাভিরন্ততঃ॥ অন্ততঃ ওষ্ঠোপান্তে। উত্তরোত্তরমুপকর্ষাৎ। অতএব স্পৃষ্টাভিরিত্যুক্তং ন তু ভক্ষিতাভিরিতি। স্ত্রী শূদ্রো বাথ নিত্যান্তঃক্ষালনাচ্চ করোষ্ঠয়োরিতি ব্রহ্মপুরাণাচ্চ। আচমনার্থে পাণিপাদপ্রক্ষালনমেবেত্যেকে। ইতি শূদ্রাধিকারে গোতমোক্তেশ্চ। আচমনার্হজলাভাবে ইদমিত্যাচারাধ্যায়ঃ। মনুঃ। হৃদ্গাভিঃ পূয়তে বিপ্রঃ কণ্ঠগাভিস্তু ভূমিপঃ। বৈশ্যোঽদ্ভিঃ প্রাশিতাভিশ্চ শূদ্রঃ স্পৃষ্টাভিরন্ততঃ॥ অত্র বৈশ্যাবধিপ্রাশনমুক্তং। অনুপনীতানাস্তু স্ত্রীশূদ্রবদাচমনং ন যাবদুপনীয়েত। ইতি প্রাগুক্তশৌচে তথাদর্শনাৎ। মিতাক্ষরাদয়োঽপ্যেবং। অম্বু বিশেষয়তি বৌধায়নঃ। পাদপ্রক্ষালনাচ্ছেষেণ নাচামেৎ যদ্যাচামেৎ ভূমৌ স্রাবয়িত্বাচামেদিতি। উশনাঃ। কাংস্যায়সেন পাত্রেণ ত্রপুসীসকপিত্তলৈঃ। আচান্তঃ শতকৃত্বো-

ঽপি ন কদাচিচ্ছুচির্ভবেৎ ॥ কাংস্যাদিপাত্রকরণকাচমনং কাংস্যায়সেনেত্যাদিনা নিষিদ্ধমিতি কেচিৎ। হস্তেনাচমনেঽপি কাংস্যাদিপাত্রাবর্জ্জিতং তন্নিষিদ্ধমিত্যপরে। আচমনজলনিষেধে শঙ্খলিখিতৌ। ন শূদ্রা শুচ্যেকপাণ্যা বর্জিতেনেতি অত্রাশুচিপদং আচমনকর্ত্তৃভিন্নপরং। শূদ্রসাহচর্য্যাৎ একপাণিপদমপি আচমনকর্ত্তৃভিন্নপাণিপরং। তেন স্বীয়বামপাণ্যাবর্জিতমনিষিদ্ধং। তথা চ কমণ্ডল্বধিকারে বৌধায়নঃ। মূত্রপুরীষে কুর্ব্বন্ দক্ষিণহস্তেন গৃহ্লাতি সব্যেনাচমনীয়মিতি। গৃহ্লাতি জলপাত্রমিতি শেষঃ। আচামেদিত্যনুবৃত্তৌ দেবলঃ। শিখাং বদ্ধা বসিত্বা দ্বে নির্নিক্তে বাসসী শুভে। তুষ্ণীং ভূত্বা সমাদায় নোদ্গচ্ছন্নবিলোকয়ন্ ॥ একবস্ত্রাঃ প্রাচীনাবীতিন ইত্যাদিপারস্করদর্শনাৎ যত্র প্রেতস্নানতর্পণাদৌ একবস্ত্রত্বং বিহিতং তত্র তদঙ্গত্বাদেকবাসা এবাচমনং কুর্য্যাৎ। প্রচেতাঃ। অনুষ্ণাভিরফেনাভিঃ পূতাভির্বীক্ষ্য চক্ষুষা। হৃদ্গতাভিরশব্দাভিস্ত্রিশ্চতুর্ব্বাদ্ভিরাচমেৎ ॥ চতুর্ব্বেতি ভাবশুদ্ধ্যপেক্ষয়া বিকল্পঃ। ন তু ফলভূয়স্ত্বার্থং কল্পনাগৌরবাপত্তেঃ। বীক্ষণানুষ্ণয়োর্ভট্টভাষ্যমাধবাচার্য্যকৃতপরাশরভাষ্যয়োরপবাদমাহ যমঃ। রাত্রাববীক্ষিতেনাপি শুদ্ধিরুক্তা মনীষিভিঃ। উদকে নাতুরাণাঞ্চ তথোষ্ণেনোষ্ণপায়িনাং ॥ আচামেদিত্যনুবৃত্তৌ বশিষ্ঠঃ। প্রদরাদপি যা গোস্তর্পণায় স্যূর্ন বর্ণরসদুষ্টাভির্যাশ্চ স্যুরশুভাগমা ইতি। প্রদরো বিদীর্ণভূভাগঃ। অশুভাগমাঃ অশুচিদেশাদাগতাঃ। যস্মিন্ দেশে বর্ণাদিদুষ্টমেব তোয়ং তত্র তদপি গ্রাহ্যং। তথা চ মরীচিঃ। যেষু স্থানেষু যচ্ছৌচং ধর্ম্মাচারশ্চ যাদৃশঃ। তত্র তন্নাবমন্যেত ধর্ম্মস্তত্রৈব তাদৃশঃ ॥ যেষু স্থানেষু যে দেবা যেষু দেশেষু যে দ্বিজাঃ। যেষু স্থানেষু যত্তোয়ং যা চ যত্রৈব মৃত্তিকা ॥*॥ আচমনে উদকগ্রহণপ্রকারং পরিমাণঞ্চাহ ভরদ্বাজঃ। আয়তং পর্ব্বণাং কৃত্বা গোকর্ণাকৃতিবৎ করং। সংহতাঙ্গুলিনা তোয়ং গৃহীত্বা পাণিনা দ্বিজঃ ॥ মুক্তাঙ্গুষ্ঠকনিষ্ঠাভ্যাং শেষেণাচমনঞ্চরেৎ। মাষমজ্জনমাত্রাস্তু সংগৃহ্য ত্রিঃ পিবেদপঃ ॥ পাণিনা দক্ষিণেন। ত্রিঃ পিবেদ্দক্ষিণেনাপি ইত্যাদিপুরাণোক্তেঃ। মার্কণ্ডেয়ঃ। সপবিত্রেণ হস্তেন কুর্য্যাদাচমনক্রিয়াং। নোচ্ছিষ্টং তৎ পবিত্রস্তু ভুক্তোচ্ছিষ্টন্তু বর্জ্জয়েৎ ॥ মদনপারিজাতে হারীতঃ। গ্রন্থির্যস্য পবিত্রস্য ন তেনাচমনঞ্চরেৎ। গ্রন্থনাদ্‌গ্রন্থিরিতি সমুদ্রকরেঽপি। আচমনানুবৃত্তৌ দেবলঃ। ন গচ্ছন্ন শয়ানশ্চ ন চলন্ন পরান্ স্পৃশন্। ন হসন্নৈব সংজল্পন্নাত্মানঞ্চৈব বীক্ষয়ন্ ॥ চলন্ কম্পমান ইতি রত্নাকরঃ ॥ আত্মানং আত্মস্থানং হৃদয়ং। বীক্ষয়ন্নিতি স্বার্থে ণিচ্। কেশান্নীবীমধঃকায়ং ন স্পৃশন্ ধরণীমপি। যদি স্পৃশতি চৈতানি ভূয়ঃ প্রক্ষালয়েৎ করং ॥ অধঃকায়ং নাভেরধঃপ্রদেশং। করং দক্ষিণং। আচমনানুবৃত্তৌ গোভিলঃ।

নান্তরীয়ৈকদেশেন কল্পয়িত্বোত্তরীয়কমিতি। অন্তরীয়মধঃপরীধানং তদেকদেশমুত্তরীয়ং কৃত্বা মরীচিঃ। ন বহির্জানুস্ত্বরয়া নাসনস্থো ন চোত্থিতঃ। ন পাদুকাস্থোঽন্যচিত্তঃ শুচিঃ প্রযতমানসঃ॥ উপস্পৃশ্য দ্বিজো নিত্যং শুদ্ধঃ পূতো ভবেন্নরঃ। ভুক্ত্বাসনস্থো নাচামেন্নান্যকালে কদাচন॥ জলস্থলোভয়কর্ম্মানুষ্ঠানার্থন্তু জলস্থৈকচরণেনাচমনং কর্ত্তব্যমিত্যাহ পৈঠীনসিঃ। অন্তরুদকে আচান্তোঽন্তরেব শুদ্ধঃ স্যাৎ বহিরুদকে আচান্তো বহিরেব শুদ্ধঃ স্যাৎ তস্মাদন্তরেকং বহিরেকঞ্চ কৃত্বা পাদমাচামেৎ সর্ব্বত্র শুদ্ধো ভবতীতি। জলে তূত্তিষ্ঠন্নাচামেৎ। জানোরূর্দ্ধং জলে তিষ্ঠন্নাচান্তঃ শুচিতামিয়াৎ। অধস্তাৎ শতকৃত্বোঽপি সমাচান্তো ন শুধ্যতীতি বিষ্ণূক্তেঃ॥ হারীতঃ। আর্দ্রবাসা জলে কুর্য্যাত্তর্পণাচমনং জপং। শুষ্কবাসাঃ স্থলে কুর্য্যাত্তর্পণাচমনং জপং॥ কাত্যায়নঃ। স্নানমাচমনং হোমং ভোজনং দেবতার্চ্চনং। প্রৌঢ়পাদো ন কুর্ব্বীত স্বাধ্যায়ং পিতৃতর্পণং॥ আসনারূঢ়পাদস্তু জানুনোর্জঙ্ঘয়োস্তথা। কৃতাবসকৃথিকো যস্তু প্রৌঢ়পাদঃ স উচ্যতে॥ আসনারূঢ়পাদঃ আসনারোপিতপাদতলঃ। জানুনোর্জঙ্ঘয়োঃ কৃতাবসকৃথিকো বস্ত্রাদিনা কৃতপৃষ্ঠজানুজঙ্ঘাবন্ধঃ। তুদ্বয়েন ভেদপ্রতীতেঃ প্রৌঢ়পাদস্য দ্বিবিধত্বং প্রতীয়তে॥ *॥ অত্র চ অনেকোদ্বাহে দারুশিলে ভূমিসমে ইষ্টকাশ্চ সঙ্কীর্ণীভূতা ইতি বৌধায়নবচনাত্তথাবিধে আরূঢ়পাদোঽপি কুর্য্যাৎ। ব্যাসঃ। শিরঃ প্রাবৃত্য কণ্ঠং বা মুক্তকচ্ছশিখোঽপি বা। অকৃত্বা পাদয়োঃ শৌচমাচান্তোঽপ্যশুচির্ভবেৎ॥ তথা। অপঃ পাণিনখাগ্রেণ আচামেদ্যস্তু ব্রাহ্মণঃ। সুরাপানেন তত্তুল্যমিত্যেবমৃষিরব্রবীৎ॥ সংবৃত্যেতি মুখং সংবৃত্য অলোমকোষ্ঠস্পর্শো যথা ন ভবতীতি তাৎপর্য্যং। তথা চ বশিষ্ঠঃ। আচান্তঃ পুনরাচামেদ্বাসো বিপরিধায় চ। ওষ্ঠৌ চ সংস্পৃশ্য তথা যত্র স্যাতামলোমকৌ॥ এবঞ্চ প্রাগুক্তহারীতবচনে ওষ্ঠয়োর্ম্মার্জ্জনমুক্তং তৎ সলোমকয়োরেবেতি। এতদনন্তরং বামহস্তং পাদৌ শিরশ্চ দক্ষিণেন পাণিনাভ্যুক্ষয়েৎ। তথা চ কামধেনাবাপস্তম্বঃ। ত্রিরাচামেৎ হৃদ্গাভিস্ত্রিরোষ্ঠৌ পরিমৃজেৎ দ্বিরিত্যেকে দক্ষিণেন পাণিনা সব্যং প্রোক্ষ্য পাদৌ শিরশ্চেতি। গোভিলঃ। ত্রিরাচামেৎ দ্বিঃ পরিমৃজীত পাদাবভ্যুক্ষ্য শিরোঽভ্যুক্ষয়েদিতি ইন্দ্রিয়াণ্যদ্ভিঃ স্পৃশেৎ অক্ষিণী নাসিকে কর্ণাবিতি। ইন্দ্রিয়াণি ইন্দ্রিয়ায়তনানি ইন্দ্রিয়াণামমূর্ত্তত্বাৎ। তিসৃভিরিতি তর্জ্জনীমধ্যমানামিকাভিঃ॥*॥ সর্ব্বত্রাঙ্গুষ্ঠযোগেন আচমনকারণমাহ পৈঠীনসিঃ। অগ্নিরঙ্গুষ্ঠস্তস্মাত্তেনাপি সর্ব্বাণি স্থানানি স্পৃশেৎ॥ নিষ্ঠীবনাদাবাচমনং যথা। বায়ুপুরাণে। নিষ্ঠীবনে তথাভ্যঙ্গে তথা পাদাবসেচনে। উচ্ছিষ্টস্য চ সংভাষাদশুচ্যপহতস্য চ॥ সন্দেহেষু চ সর্ব্বেষু শিখাং মুক্ত্বা তথৈব চ। বিনা

যজ্ঞোপবীতেন নিত্যমেব উপস্পৃশেৎ ॥ উষ্ট্রবায়সসংস্পর্শে দর্শনে চান্ত্যবাসিনাং ॥ হারীতঃ। স্ত্রীশূদ্রোচ্ছিষ্টসংভাষণে মূত্র-পুরীষোৎসর্গদর্শনে দেবমভিগন্তুকাম আচা-মেদিতি। যাজ্ঞবল্ক্যঃ। স্নাত্বা পীত্বা ক্ষুতে সুপ্তে ভুক্ত্বা রথ্যোপসর্পণে। আচান্তঃ পুন-রাচামেদ্বাসো বিপরিধায় চ ॥ ব্রহ্মপুরাণে। হোমে ভোজনকালে চ সন্ধ্যয়োরুভয়ো-রপি। আচান্তঃ পুনরাচামেদন্যত্রাপি সকৃৎ সকৃৎ ॥ দ্বিরাচম্য ততঃ শুদ্ধঃ স্মৃত্বা বিষ্ণুং সনাতনং ॥ * ॥ স্মৃতিঃ। ক্ষুতে নিষ্ঠীবিতে সুপ্তে পরিধানেঽশ্রুপাতনে। কর্ম্মস্থ এষু নাচামেৎ দক্ষিণং শ্রবণং স্পৃশেৎ ॥ অত্র হেতুমাহ পরাশরঃ। প্রভাসাদীনি তীর্থানি গঙ্গাদ্যাঃ সরিতস্তথা। বিপ্রস্য দক্ষিণে কর্ণে বসন্তি মনুরব্রবীৎ ॥ সাংখ্যায়নঃ। আদিত্যা বসবো রুদ্রা বায়ুরগ্নিশ্চ ধর্ম্ম-রাট্। বিপ্রস্য দক্ষিণে কর্ণে নিত্যং তিষ্ঠন্তি দেবতাঃ ॥ পুরাণসারবায়ুপুরাণয়োঃ। যঃ কর্ম্ম কুরুতে মোহাদনাচম্যৈব নাস্তিকঃ। ভবন্তি হি বৃথা তস্য ক্রিয়াঃ সর্ব্বা ন সংশয়ঃ ॥ * ॥ অথ দন্তধাবনং। বৃদ্ধশাতা-তপঃ। মুখে পর্য্যুষিতে নিত্যং ভবত্যপ্র-যতো নরঃ। তস্মাৎ সর্ব্বপ্রযত্নেন ভক্ষয়ে-দ্দন্তধাবনং ॥ * ॥ শ্রাদ্ধদিনাদৌ তস্য বর্জ্যত্বং যথা বিষ্ণুঃ। শ্রাদ্ধে জন্মদিনে চৈব বিবাহেঽজীর্ণসম্ভবে। ব্রতে চৈবোপবাসে চ বর্জ্জয়েদ্দন্তধাবনং ॥ দন্তধাবনমদ্যাদুদ-ঙ্মুখঃ প্রাঙ্মুখো বেতি ॥ * ॥ দন্তলগ্নস্য দন্ততুল্যত্বং যথা। গোতমঃ। দন্তশ্লিষ্টে দন্তবদন্যত্র জিহ্বাভিঘর্ষণাৎ প্রাক্ চ্যুতে-রিত্যেকে। চ্যুতেরাস্রাববদ্বিদ্যান্নিগরন্নেব তচ্ছুচিরিতি। জিহ্বাভিঘর্ষণাযোগ্যং দন্তলগ্নং অশৌচজনকং ন ভবতীত্যর্থঃ। ইদঞ্চানুপলভ্যমানরসবিষয়ং। দন্তবদ্দন্ত-লগ্নেষু রসবর্জ্জমিতি শঙ্খবচনাৎ। জিহ্বা-ভিঘর্ষণেঽপি অশক্যোদ্ধরণে ন দোষঃ। ভোজনে দন্তলগ্নানি নির্হৃত্যাচমনঞ্চরেৎ। দন্তলগ্নমসংহার্য্যং লেপং মন্যেত দন্ত-বৎ॥ ন তত্র কুর্য্যাদ্বহুশো যত্নমুদ্ধরণে পুনঃ॥ ভবেদশৌচমত্যর্থং তৃণবেধাদ্‌ব্রণে কৃতে। ইতি দেবলবচনাৎ। চ্যুতেরিত্যুপ-লভ্যমানরসবিষয়ং। আস্রাবো লালা তদ্বন্নিগরন্নিত্যর্থঃ। অতএব শোণিতং যথা ন ভবতি তথা তৃণাদিনা দন্তলগ্ননিঃসারণা-চরণং ॥ * ॥ ছন্দোগপরিশিষ্টং। নারদা-দ্যুক্তবার্ক্ষেয়মষ্টাঙ্গুলমপাটিতং। সত্বচং দন্তকাষ্ঠং স্যাত্তদগ্রেণ প্রধাবয়েৎ ॥ উত্থায় নেত্রে প্রক্ষাল্য শুচির্ভূত্বা সমাহিতঃ। পরিজপ্য তু মন্ত্রেণ ভক্ষয়েদ্দন্তধাবনং ॥ আয়ুর্ব্বলং যশো বর্চ্চঃ প্রজাঃ পশুবসূনি চ। ব্রহ্মপ্রজ্ঞাঞ্চ মেধাঞ্চ ত্বন্নো ধেহি বন-স্পতে ॥ শুচির্ভূত্বা দ্বিরাচমনেনেতি শেষঃ ॥ * ॥ নরসিংহপুরাণং। দন্তকাষ্ঠস্য বক্ষ্যামি সমাসেন প্রশস্ততাং। সর্ব্বে কণ্ট-কিনঃ পুণ্যাঃ ক্ষীরিণশ্চ যশস্বিনঃ ॥ প্রমাণং স্থৌল্যঞ্চাহ বিষ্ণুঃ। কনীন্যগ্রনিভস্থৌল্যং সকূর্চ্চং দ্বাদশাঙ্গুলং। প্রাতর্ভূত্বা চ যত-বাক্ ভক্ষয়েদ্দন্তধাবনং ॥ প্রক্ষাল্য ভুক্ত্বা তজ্জহ্যাচ্ছুচৌ দেশে সমাহিতঃ। সকূর্চ্চং

দলিতাগ্রং। দ্বাদশাঙ্গুলস্তু ছন্দোগেতরেষাং। দ্বাদশাঙ্গুলস্তু বিপ্রাণাং ক্ষত্রিয়াণাং নবাঙ্গুলং। অষ্টাঙ্গুলস্তু বৈশ্যানাং শূদ্রাণাস্তু ষড়ঙ্গুলং। ভক্ষয়েৎ শাস্ত্রদৃষ্টানি পর্ব্বস্বপি চ বর্জ্জয়েৎ॥ * ॥ তিথিবিশেষে তস্য বর্জ্জনং যথা। নৃসিংহপুরাণং। প্রতিপদ্দর্শষষ্ঠীষু নবম্যাঞ্চৈব সপ্তমাঃ। দন্তানাং কাষ্ঠসংযোগো দহত্যাসপ্তমং কুলং॥ অলাভে দন্তকাষ্ঠানাং প্রতিষিদ্ধদিনে তথা। অপাং দ্বাদশগণ্ডূষৈর্মুখশুদ্ধির্ব্বিধীয়তে॥ গণ্ডূষস্য দন্তকাষ্ঠকার্য্যকারিত্বেঽপি ন তত্র মন্ত্রান্বয়ঃ। শাতাতপঃ। প্রতিপদ্দর্শষষ্ঠীষু নবম্যাং দন্তধাবনং। পত্রৈরন্যত্র কাষ্ঠৈশ্চ জিহ্বোল্লেখঃ সদৈব হি॥ * ॥ গুবাকাদিপত্রৈর্দ্দন্তধাবনং নিষিদ্ধং যথা। ক্রিয়াকৌমুদ্যাং বশিষ্ঠঃ। গুবাকতালহিন্তালাস্তথা তাড়ী চ কেতকী। খর্জ্জূরনারিকেলৌ চ সপ্তৈতে তৃণরাজকাঃ॥ তৃণরাজশিরাপত্রৈর্যঃ কুর্য্যাদ্দন্তধাবনং। তাবদ্ভবতি চাণ্ডালো যাবদ্গাং নৈব পশ্যতি॥ পরাশরভাষ্যে যাজ্ঞবল্ক্যঃ। নেষ্টকালোষ্টপাষাণৈরিতরাঙ্গুলিভিস্তথা। ত্যক্ত্বা অনামিকাঙ্গুষ্ঠৌ বর্জ্জয়েদ্দন্তধাবনং॥ * ॥ প্রচেতাঃ। মধ্যাহ্নস্নানকালে তু যঃ কুর্য্যাদ্দন্তধাবনং। নিরাশাস্তস্য গচ্ছন্তি দেবাঃ পিতৃগণৈঃ সহ॥ * ॥ স্মৃতিঃ। বমন্তং জৃম্ভমাণঞ্চ কুর্ব্বন্তং দন্তধাবনং। অভ্যক্তশিরসঞ্চৈব স্নাতং নৈবাভিবাদয়েৎ॥ হারীতঃ। শুচিং দেবাভিরক্ষন্তি পিতরঃ শুচিমন্বিয়ুঃ। শুচের্বিভ্যতি রক্ষাংসি যে চান্যে দুষ্টচারিণঃ॥ তথা। স্নানং দানং তপস্ত্যাগো মন্ত্রকর্ম্মবিধিক্রিয়াঃ। মঙ্গলাচারনিয়মাঃ শৌচভ্রষ্টস্য নিষ্ফলাঃ॥ শৌচন্তু দ্বিবিধং প্রোক্তং বাহ্যমাভ্যন্তরস্তথা। মৃজ্জলাভ্যাং ভবেৎ বাহ্যং ভাবশুদ্ধিস্তথাপরং॥ * ॥ অথ প্রাতঃস্নানসন্ধ্যে। ব্রহ্মপুরাণং। প্রাতঃস্নানং ততঃ কৃত্বা সংক্ষেপেণ যথোদিতং। সন্ধ্যাঞ্চাপি তথা কুর্য্যাৎ নিত্যনৈমিত্তিকে তথা॥ কাত্যায়নঃ। যথাহনি তথা প্রাতর্নিত্যং স্নায়াদনাতুরঃ। দন্তান্ প্রক্ষাল্য নদ্যাদৌ গেহে চেত্তদমন্ত্রবৎ॥ দন্তান্ প্রক্ষাল্য প্রাতরনাতুরঃ স্নায়াৎ॥ * ॥ আতুরং বিশেষয়তি আয়ুর্ব্বেদীয়ে। স্নানমর্দ্দিতনেত্রাস্যকর্ণরোগাতিসারিষু। আধ্মানপীনসাজীর্ণভুক্তবৎসু চ গর্হিতং॥ তৎকালমাহ বিষ্ণুঃ। প্রাতঃস্নায্যরুণকিরণগ্রস্তাং প্রাচীমবলোক্য স্নায়াৎ। ইতি সমুদ্রকরধৃতং॥ * ॥ মৃত্তিকাতিলকং কুর্য্যাৎ স্নাত্বা হুত্বা চ ভস্মনা। দৃষ্টদোষবিঘাতার্থং চাণ্ডালাদ্যাদিদর্শনে॥ উশনাঃ। অভাবে তুদকেনাপি পিতৃদৈবতমর্চ্চয়েৎ। ব্রহ্মাণ্ডপুরাণে। কর্ম্মাদৌ তিলকং কুর্য্যাদ্রূপং তদ্বৈষ্ণবং পরং। গোপ্রদানং জপো হোমঃ স্বাধ্যায়ঃ পিতৃতর্পণং॥ ভস্মীভবতি তৎ সর্ব্বমূর্দ্ধপুণ্ড্রং বিনা কৃতং। ব্রাহ্মে। অঙ্গুষ্ঠঃ পুষ্টিদঃ প্রোক্তো মধ্যমায়ুষ্করী ভবেৎ। অনামিকার্থদা নিত্যং মুক্তিদা চ প্রদেশিনী॥ ব্যাসঃ। জাহ্নবীতীরসম্ভূতাং মৃদং মূর্দ্ধ্না বিভর্ত্তি যঃ।

বিভর্ত্তি রূপং সোঽর্কস্য তমোনাশায় কেবলং ॥*॥ গোপীচন্দনমাহ শাতাতপঃ। গোমতীতীরসম্ভূতাং গোপীদেহসমুদ্ভবাং। মৃদং মূর্দ্ধ্না বহেদ্যস্তু সর্ব্বপাপৈঃ প্রমুচ্যতে ॥ ব্রহ্মাণ্ডপুরাণে। ঊর্দ্ধপুণ্ড্রং মৃদা কুর্য্যাৎ ত্রিপুণ্ড্রং ভস্মনা সদা। তিলকং বৈ দ্বিজঃ কুর্য্যাৎ চন্দনেন যদৃচ্ছয়া॥ ঊর্দ্ধপুণ্ড্রং দ্বিজঃ কুর্য্যাৎ ক্ষত্রিয়শ্চ ত্রিপুণ্ড্রকং। অর্দ্ধচন্দ্রঞ্চ বৈশ্যশ্চ বর্ত্তুলং শূদ্রযোনিজঃ ॥ * ॥ আতুরাণান্তু। অশিরস্কং ভবেৎ স্নানং স্নানাশক্তৌ চ কর্ম্মিণাং। আর্দ্রেণ বাসসা বাপি মার্জ্জনং দৈহিকং বিদুঃ॥ ইতি জাবালবচনাৎ শিরো বিহায় গাত্রপ্রক্ষালনং। তদশক্তাবার্দ্রবাসসা গাত্রমার্জনং কুর্য্যাৎ তদনন্তরং সন্ধ্যাং কুর্য্যাৎ। এতৎপরমেব প্রাতঃসন্ধ্যাং ততঃ কুর্য্যাৎ দন্তধাবনপূর্ব্বকমিতি যাজ্ঞবল্ক্যবচনং। ইত্যাহ্নিকাচারতত্ত্বং ॥

প্রাতঃসন্ধ্যা (স্ত্রী) সন্ধ্যাদেহপূর্ব্বার্দ্ধং। তদুৎপত্তির্যথা। তস্মিন্ গিরৌ চন্দ্রভাগে বৃহল্লোহিততীরগাং। সন্ধ্যাং দৃষ্ট্বাথ পপ্রচ্ছ বশিষ্ঠঃ সাদরন্তদা ॥ বশিষ্ঠ উবাচ। কিমর্থমাগতা ভদ্রে নির্জনং ত্বং মহীধরং। কস্য বা তনয়া গৌরি কিং বা তব চিকীর্ষিতং ॥ এতদিচ্ছাম্যহং শ্রোতুং যদি গুহ্যং ন তে ভবেৎ। বদনং পূর্ণচন্দ্রাভং নিশ্রীকং বা কথং তব॥ শ্রীমার্কণ্ডেয় উবাচ। তৎ শ্রুত্বা বচনং তস্য বশিষ্ঠস্য মহাত্মনঃ। দৃষ্ট্বা চ তম্মহাত্মানং জ্বলন্তমিব পাবকং ॥ শরীরধৃগ্‌ব্রহ্মচর্য্যসদৃশং তং জটাধরং। সাদরং প্রণিপত্যাথ সন্ধ্যোবাচ তপোধনং ॥ সন্ধ্যোবাচ। যদর্থমাগতা শৈলং সিদ্ধং তন্মে তপোধন। তব দর্শনমাত্রেণ তন্মে সেৎস্যতি বা বিভো॥ তপঃ কর্ত্তুমহং ব্রহ্মন্ নির্জনং শৈলমাগতা। ব্রহ্মণোঽহং মনোজ্জাতা সন্ধ্যা নাম্না চ বিশ্রুতা॥ নোপদেশমহং জানে তপসো মুনিসত্তম। যদি তে যুজ্যতে গুহ্যং মাং ত্বং সমুপদেশয় ॥ এতচ্চিকীর্ষিতং গুহ্যং নান্যৎ কিঞ্চ ন বিদ্যতে। অজ্ঞাত্বা তপসো ভাবং তপোবনমুপস্থিতা। চিন্তয়া পরিশুষ্যেঽহং বেপতে চ মনঃ সদা॥ শ্রীমার্কণ্ডেয় উবাচ। আকর্ণ্য তস্যা বচনং বশিষ্ঠো ব্রহ্মণঃ সুতঃ। স্বয়ং স সর্ব্বকৃত্যজ্ঞো নান্যৎ কিঞ্চন পৃষ্টবান্ ॥ অথ তাং নিয়তাত্মানং তপসেঽতিধৃতোদ্যমাং। বশিষ্ঠো মন্ত্রয়াঞ্চক্রে গুরুবৎ শিষ্যবত্তদা ॥ বশিষ্ঠ উবাচ। পরমং যো মহত্তেজঃ পরমং যো মহত্তপঃ। পরমঃ পরমারাধ্যো বিষ্ণুর্মনসি ধীয়তাং ॥ মন্ত্রেণানেন দেবেশং বিষ্ণুং ভজ শুভাননে। ওঁ নমো বাসুদেবায় ইত্যনেন চ সন্ততং ॥ মার্কণ্ডেয় উবাচ। উপদিশ্য বশিষ্ঠোঽথ সন্ধ্যায়ৈ তপসঃ ক্রিয়াং। তামাভাষ্য যথান্যায়ং তত্রৈবান্তর্দধে মুনিঃ ॥ যথোক্তস্তু বশিষ্ঠেন মন্ত্রং তপসি সাধনং। ব্রতেন তেন গোবিন্দং পূজয়ামাস ভক্তিতঃ ॥ প্রসন্নস্তেন রূপেণ যদ্রূপং চিন্তিতং তয়া। পুরঃ প্রত্যক্ষতাং যাতস্তস্যাং বিষ্ণুর্জগৎপতিঃ ॥ নিমীলিতাক্ষ্যা-

স্তস্যাস্ত প্রবিশ্য হৃদয়ং হরিঃ। দিব্যে-ঙ্গিতং দদৌ তস্যৈ বাচং দিব্যে চ চক্ষুষী ॥ দিব্যং জ্ঞানং দিব্যচক্ষুর্দিব্যাং বাচমবাপ্য সা। প্রত্যক্ষং বীক্ষ্য গোবিন্দং তুষ্টাব জগতাং পতিং ॥ অথ তস্যাঃ শরীরন্তু বল্কলাজিনসংবৃতং। পরিক্ষীণং জটা-ব্রাতৈঃ পবিত্রং মূর্দ্ধি রাজিতং ॥ নিরীক্ষ্য কৃপয়াবিষ্টো হরিঃ প্রোবাচ তামিদং। শ্রীভগবানুবাচ। যঃ পশ্যতি সকামস্ত্বাং পাণিগ্রাহস্তে তব। স সদ্যঃ ক্লীবতাং প্রাপ্য দুর্ব্বলত্বং গমিষ্যতি ॥ পতিস্তব মহাভাগস্তপোরূপসমন্বিতঃ। সপ্তকল্পান্ত-জীবী চ ভবিষ্যতি সহ ত্বয়া ॥ অন্যচ্চ তে বদিষ্যামি পূর্ব্বং যন্মনসি স্থিতং। অগ্নৌ শরীরত্যাগস্তে পূর্ব্বমেব প্রতিশ্রুতঃ॥ স চ মেধাতিথের্যজ্ঞে মুনের্দ্বাদশবার্ষিকে। ঘৃতপ্রজ্বলিতে বহ্নৌ ন চিরাৎ ক্রিয়তাং ত্বয়া॥ তত্র গত্বা স্বয়ং ছন্নং মুনিভি-র্নোপলক্ষিতা। মৎপ্রসাদাদ্বহ্নিজাতা তস্য পুত্রী ভবিষ্যসি ॥ যস্তে বা বাঞ্ছনীয়ো-ঽস্তি স্বামী মনসি কশ্চন। তন্নিধায় নিজ-স্বান্তে ত্যজ বহ্নৌ বপুঃ স্বকং ॥ নারায়ণঃ স্বয়ং সন্ধ্যাং পস্পর্শাথাগ্রপাণিনা। ততঃ পুরোডাশময়ং তৎ শরীরমভূৎ ক্ষণাৎ ॥ সমিদ্ধেঽগ্নৌ মহাযজ্ঞে মুনিভির্নোপ-লক্ষিতা। তদা বিষ্ণোঃ প্রসাদেন সা বিবেশ বিধেঃ সুতা ॥ বহ্নিস্তস্যাঃ শরীরং তদ্দগ্ধ্বা সূর্য্যস্য মণ্ডলে। শুদ্ধং প্রবেশয়া-মাস বিষ্ণোরেবাজ্ঞয়া পুনঃ ॥ সূর্য্যো দ্বিধা বিভজ্যাথ তৎ শরীরং তদা রথে। স্বকে সংস্থাপয়ামাস প্রীতয়ে পিতৃদেবয়োঃ ॥ যদূর্দ্ধভাগস্তস্যাস্ত শরীরস্য দ্বিজোত্তমাঃ। প্রাতঃসন্ধ্যাভবৎ সা তু অহোরাত্রাদি-মধ্যগা ॥ যচ্ছেষভাগস্তস্যাস্ত অহোরাত্রান্ত-মধ্যগঃ। স সায়মভবৎ সন্ধ্যা পিতৃপ্রীতি-প্রিয়া সদা ॥ সূর্য্যোদয়াচ্চ প্রথমং যদা স্যাদরুণোদয়ঃ। প্রাতঃসন্ধ্যা তদোদেতি দেবানাং প্রীতিকারিণী ॥ অস্তং গতে ততঃ সূর্য্যে শোণপদ্মনিভা সদা। উদেতি সায়ংসন্ধ্যাপি পিতৃণাং মোদকারিণী ॥ ইতি কালিকাপুরাণে ২২ অধ্যায়ঃ ॥ * ॥ প্রাতঃকালকর্ত্তব্যবৈদিকতান্ত্রিকোপাসনা-বিশেষঃ। বৈদিকে তদনুষ্ঠানানি যথা। মার্জনং ১ প্রার্থনং ২ প্রাণায়ামঃ ৩ আচ-মনং ৪ আপোমার্জনং ৫ অঘমর্ষণং ৬ সূর্য্যোপস্থানং ৭ দেবতর্পণং ৮ সাবিত্র্যা-বাহনং ৯ সাবিত্রীধ্যানং ১০ সাবিত্রী-জপঃ ১১ সাবিত্রীবিসর্জনং ১২ আদিত্য-শুক্রপ্রীণনং ১৩ আত্মরক্ষণং ১৪ রুদ্রোপ-স্থানং ১৫ ব্রহ্মাদিভ্যো জলদানং ১৬ সূর্য্যার্ঘদানং ১৭ সূর্য্যনতিঃ ১৮ ॥ * ॥ তান্ত্রিকে তদনুষ্ঠানানি যথা। মন্ত্রাচ-মনং ১ জলশুদ্ধিঃ ২ করন্যাসঃ ৩ অঙ্গ-ন্যাসঃ ৪ অঘমর্ষণং ৫ হস্তক্ষালনং ৬ আচমনং ৭ সূর্য্যার্ঘদানং ৮ গায়ত্র্যা জলদানং ৯ তর্পণং ১০ গায়ত্রীধ্যানং ১১ গায়ত্রীজপঃ ১২ জপসমর্পণং ১৩ ইষ্ট-দেবধ্যানং ১৪ প্রাণায়ামঃ ১৫ মূলমন্ত্র-জপঃ ১৬ জপসমর্পণং ১৭ প্রাণায়ামঃ ১৮ নমস্কারঃ ১৯। ইতি স্মৃতিতন্ত্রে ॥

প্রাতঃস্নানং (ক্লী) প্রভাতকর্ত্তব্যাবগাহনাদি। যথা। উষঃকালে তু সংপ্রাপ্তে কৃত্বা চাবশ্যকং বুধঃ। স্নায়ান্নদীষু শুদ্ধাসু শৌচং কৃত্বা যথাবিধি॥ প্রাতঃস্নানেন পূয়ন্তে যেঽপি পাপকৃতো জনাঃ। তস্মাৎ সর্ব্বপ্রযত্নেন প্রাতঃস্নানং সমাচরেৎ॥ প্রাতঃস্নানং প্রশংসন্তি দৃষ্টাদৃষ্টকরং হি তৎ। সুখসুপ্তস্য সততং লালাদ্যাঃ সংস্রবন্তি হি॥ অতো নৈবাচরেৎ কর্ম্মাণ্যকৃত্বা স্নানমাদিতঃ। অলক্ষ্মীঃ কালকর্ণী চ দুঃস্বপ্নং দুর্বিচিন্তিতং॥ প্রাতঃস্নানেন পাপানি ধূয়ন্তে নাত্র সংশয়ঃ। ন চ স্নানং বিনা পুংসাং প্রাশস্ত্যং কর্ম্ম সংস্মৃতং॥ হোমে জপ্যে বিশেষেণ তস্মাৎ স্নানং সমাচরেৎ। অশক্তাবশিরস্কন্তু স্নানমস্য বিধীয়তে॥ ইতি গারুড়ে ৫০ অধ্যায়ঃ॥*॥ অপি চ। প্রাতঃ সংক্ষেপতঃ স্নানং মধ্যাহ্নে বিধিবিস্তরং। প্রাতর্মধ্যাহ্নয়োঃ স্নানং বানপ্রস্থগৃহস্থয়োঃ॥ যতেস্ত্রিসবনং প্রোক্তং সকৃত্তু ব্রহ্মচারিণঃ। অপি চ। উষস্যুষসি যৎ স্নানং সন্ধ্যায়ামুদিতে রবৌ। প্রাজাপত্যেন তত্তুল্যং মহাপাতকনাশনং॥ যৎ ফলং দ্বাদশাব্দানি প্রাজাপত্যৈঃ কৃতৈর্ভবেৎ। প্রাতঃস্নায়ী তদাপ্নোতি বর্ষেণ শ্রদ্ধয়ান্বিতঃ॥ য ইচ্ছেদ্বিপুলান্ ভোগান্ চন্দ্রসূর্য্যগ্রহোপমান্। প্রাতঃস্নায়ী ভবেন্নিত্যং দ্বৌ মাসৌ মাঘফাল্গুনৌ॥ ষট্তিলী মাঘমাসন্তু প্রাতঃস্নায়ী হবিষ্যভুক্। অতিপাপং মহাঘোরং মাসাদেব ব্যপোহতি॥ মাতরং পিতরঞ্চাপি ভ্রাতরং সুহৃদং গুরুং। যমুদ্দিশ্য নিমজ্জেত দ্বাদশাংশং লভেত্তু সঃ॥ ইতি গারুড়ে ২১৫ অধ্যায়ঃ॥

প্রাতরাশঃ (পুং) প্রাতঃকালীনভোজনং। তৎপর্য্যায়ঃ। কল্যবর্ত্তঃ ২। ইতি হেমচন্দ্রঃ॥ প্রাতর্ভোজনং ৩। ইতি ত্রিকাণ্ডশেষঃ॥ কল্যজগ্ধিঃ ৪। ইতি জটাধরঃ॥

প্রাতর্গেয়ঃ (পুং) প্রাতঃকালে গেয় ঈশ্বরাদির্যৈঃ। স্তুতিপাঠকঃ। তৎপর্য্যায়ঃ। স্তুতিব্রতঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥ প্রভাতগাতব্যে ত্রি॥

প্রাতর্ভোক্তা [ঋ] (পুং) কাকঃ। ইতি শব্দচন্দ্রিকা॥ প্রভাতে ভোজনকর্ত্তরি ত্রি॥

প্রাতর্ভোজনং (ক্লী) প্রাতরাশঃ। ইতি জটাধরঃ॥

প্রাতিকা (স্ত্রী) জবা। ইতি রাজনির্ঘণ্টঃ॥

প্রাতিপদিকঃ (পুং) অগ্নিঃ। যথা। ইত্থম্ভূতো মহানগ্নির্ব্রহ্মক্রোধোদ্ভবো মহান্। উবাচ দেবং ব্রহ্মাণং তিথির্মে দীয়তাং প্রভো। যস্যামহং সমস্তস্য জগতঃ খ্যাতিমাপ্নুয়াং॥ ব্রহ্মোবাচ। দেবানামথ যক্ষাণাং গন্ধর্ব্বাণাঞ্চ সত্তম। আদৌ প্রতিপদা যেন ত্বমুৎপন্নোঽসি পাবক॥ ত্বৎপদাৎ প্রাতিপদিকং সংভবিষ্যন্তি দেবতাঃ। অতস্তে প্রতিপন্নাম তিথিরেষা ভবিষ্যতি॥ ইতি বরাহপুরাণং॥ নাম্নি ক্লী। যথা। অধাতুবিভক্ত্যর্থবৎ প্রাতিপদিকং। ইতি সুপদ্মব্যাকরণং॥

প্রাতিভাব্যং (ক্লী) প্রতিভুবো ভাবঃ। জামিনী

ইতি ভাষা। যথা। সাক্ষিত্বং প্রাতিভাব্যঞ্চ দানং গ্রহণমেব চ। বিভক্তা ভ্রাতরঃ কুর্য্যু-র্নাবিভক্তাঃ পরস্পরং ॥ ইতি দায়ভাগঃ ॥

প্রাতিস্বিকং (ত্রি) অসাধারণং। তৎপর্য্যায়ঃ। অন্যাসাধারণং ২ আবেশিকং ৩। ইতি ত্রিকাণ্ডশেষঃ ॥

প্রাতিহারঃ } (পুং) প্রাতিহারিকঃ। ইত্য-
প্রাতিহারকঃ } মরটীকায়াং ভরতঃ ॥

প্রাতিহারিকঃ (পুং) মায়াকারঃ। ইত্যমরঃ ॥

প্রাতীপঃ (পুং) প্রতীপপুত্রঃ। শান্তনুরাজঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

প্রাথমকল্পিকঃ (পুং) প্রথমারব্ধবেদাধ্যয়নঃ। প্রথমং শিক্ষণীয়ং কল্পং শাস্ত্রমধীতে যঃ ইত্যর্থে ঞিকঃ। তৎপর্য্যায়ঃ। শৈক্ষঃ ২। ইত্যমরভরতৌ ॥

প্রাথমিকঃ (ত্রি) প্রথমভবঃ। যথা। যত্রা-বিরলক্রমেণ সিদ্ধিসিষাধয়িষানুমিতয়স্তত্র দ্বিতীয়ক্ষণে পক্ষতাসম্পত্ত্যর্থং দ্বিতীয়ঃ সিষাধয়িষাবিরহো বিশেষণমস্তু সিদ্ধেঃ প্রাথমিকস্তু কিমর্থং। ইতি পক্ষতাশিরো-মণিঃ ॥

প্রাথম্যং (ত্রি) প্রথমস্য ভাবঃ। যথা। অস্মাভি-রেব প্রাথম্যেন নানামুনীনাং বচনৈরেব-ম্বিধো নিবন্ধঃ ক্রিয়তে। ইতি বিজয়-রক্ষিতঃ ॥

প্রাদুঃ [স্] ব্য নাম। প্রাকাশ্যং। স্ফুটত্বং। তৎপর্য্যায়ঃ। আবিঃ ২। যথা। প্রাদু-রাসীৎ। আবির্ভূতঃ। ইত্যমরভরতৌ ॥ প্রকাশঃ। সম্ভাব্যং। বৃত্তিঃ। ইতি শব্দ-রত্নাবলী ॥

প্রাদুর্ভাবঃ (পুং) আবির্ভাবঃ। যথা। বপুঃ প্রাদুর্ভাবাদনুমিতমিদং জন্মনি পুরা। ইতি কুবলয়ানন্দঃ ॥

প্রাদেশঃ (পুং) তর্জ্জনীসহিতবিস্তৃতা ইত্যমরঃ ॥ দেশমাত্রং। যথা। প্রাদেশো দেশমাত্রে চ তর্জ্জন্যঙ্গুষ্ঠসম্মিতে। ইতি মেদিনী ॥ অঙ্গুষ্ঠস্য প্রদেশিন্যা ব্যাসঃ প্রাদেশ উচ্যতে। ইতি দেবীপুরাণঞ্চ ॥

প্রাদেশনং (ক্লী) দানং। ইত্যমরঃ ॥

প্রাদোষঃ } (ত্রি) প্রদোষসম্বন্ধী। ইতি
প্রাদোষিকঃ } সিদ্ধান্তকৌমুদী ॥

প্রাধান্যং (ক্লী) প্রধানত্বং। প্রধানস্য ভাবঃ। যথা। বেদার্থোপনিবন্ধৃত্বাৎ প্রাধান্যং হি মনোঃ স্মৃতং। ইতি ধর্ম্মদীপিকা ॥

প্রাধ্বং ব্য অনুকূলং। ইত্যমরঃ ॥ নত্র ইতি মেদিনী

প্রাধ্বঃ (ত্রি) দূরপথঃ। প্রহ্বঃ। বদ্ধঃ। ইতি হেমচন্দ্রঃ ॥ রথঃ। ইতি বোপদেবঃ ॥

প্রান্তঃ (পুং) অন্তভাগঃ। শেষসীমা। যথা। প্রান্তেষু সংসক্তনমেরুশাখং ধ্যানাস্পদং ভূতপতের্ব্বিবেশ ॥ ইতি কুমারতৃতীয়-সর্গঃ ॥

প্রান্ততঃ [স্] ব্য প্রান্তভাগে। যথা। প্রাচীরং প্রান্ততো বৃতিঃ। ইত্যমরঃ ॥

প্রান্তরং (ক্লী) দূরশূন্যোঽধ্বা। ইত্যমরঃ ॥ ছায়াতরুজলাদিরহিতে পথি প্রান্তরং দূরং শূন্যো দূরশূন্যঃ দূরশ্চাসৌ শূন্যশ্চেতি বা দূরশূন্যো জলাদিবর্জ্জিতত্বাৎ ঈদৃক্ যোঽধ্বা স প্রান্তরমিত্যন্বয়ঃ। প্রকৃষ্ট-মন্তরং ব্যবধানমবকাশো বা অত্রেতি

প্রান্তরং। ইতি ভরতঃ ॥ বিপিনং। কোটরং। ইতি মেদিনী ॥

প্রান্তশূন্যং (ক্লী) দূরশূন্যপথঃ। ছায়াদি-রহিতপথঃ। ইতি শব্দরত্নাবলী ॥

প্রাপণং (ক্লী) নয়নং। প্রাপ্তিঃ। প্রাপ্তি-প্রেরণা। প্রকর্ষেণ ব্যাপনং। ণ্যন্তা-দণ্যন্তাদ্বা প্রপূর্ব্বাপধাতোর্ভাবে অনট্ প্রত্যয়ঃ ॥

প্রাপণিকঃ (পুং) পণ্যবিক্রয়ী। ইতি সিদ্ধান্ত-কৌমুদ্যামুণাদিবৃত্তিঃ ॥

প্রাপণীয়ং (ত্রি) প্রাপ্যং। প্রাপ্যতে যৎ। প্রপূর্ব্বাপধাতোঃ কর্ম্মণ্যনীয়প্রত্যয়ঃ ॥

প্রাপেয়ঃ (পুং) গন্ধর্ব্বগণবিশেষঃ। যথা। প্রবাচ্য জনয়ৎ পুত্রান্ দিব্যান্ বৈ গায়নোত্তমান্। চতুর্দ্দশ দেবগন্ধর্ব্বাঃ প্রাপেয়াঃ পরিকীর্ত্তিতাঃ॥ ইত্যগ্নিপুরাণং ॥

প্রাপ্তঃ (ত্রি) প্রস্থাপিতঃ। তৎপর্য্যায়ঃ। প্রণি-হিতঃ ২। লব্ধঃ। তৎপর্য্যায়ঃ। বিন্নঃ ২ ভাবিতঃ ৩ আসাদিতঃ ৪ ভূতঃ ৫। ইত্য-মরঃ ॥

প্রাপ্তপঞ্চত্বং (ত্রি) মৃতং। ইত্যমরঃ ॥

প্রাপ্তভাবঃ (পুং) জাতোক্ষঃ। ইতি শব্দ-চন্দ্রিকা ॥ লব্ধসত্তাদৌ ত্রি ॥

প্রাপ্তরূপঃ (ত্রি) পণ্ডিতঃ। মনোজ্ঞঃ। ইত্য-মরঃ ॥ রূপবাংশ্চ ॥

প্রাপ্তব্যং (ত্রি) প্রাপ্যং। প্রাপ্যতে যৎ। প্রপূর্ব্বাপধাতোঃ কর্ম্মণি তব্যপ্রত্যয়ঃ ॥

প্রাপ্তিঃ (স্ত্রী) উদয়ঃ। ধনাদিবৃদ্ধিঃ। অধি-গমঃ। লাভঃ। ইত্যমরভরতৌ ॥ প্রাপণং। সংহতিঃ। ইতি শব্দরত্নাবলী ॥ অণিমা-দ্যষ্টৈশ্বর্য্যান্তর্গতৈশ্বর্য্যবিশেষঃ। স চ অভী-প্সিতপ্রাপণং। ইতি হেমচন্দ্রঃ ভরতশ্চ ॥

প্রাপ্যং (ত্রি) প্রাপ্তব্যং। তৎপর্য্যায়ঃ। গম্যং ২ সমাসাদ্যং ৩। ইত্যমরঃ ॥

প্রাবোধিকঃ (পুং) উষঃকালঃ। ইতি শব্দ-মালা ॥ প্রাবোধকোঽপি পাঠঃ ॥

প্রাভবং (ক্লী) শ্রেষ্ঠত্বং। ইতি শব্দচন্দ্রিকা ॥

প্রাভাকরঃ (পুং) মীমাংসকবিশেষঃ। যথা। ব্যাপ্তিস্বরূপং নিরূপ্য পরমতনিরাকরণ-পূর্ব্বকং স্বমতেন তদ্গ্রহোপায়মভিধাতুং প্রথমং প্রাভাকরমতমুপদর্শয়তি সেয়-মিত্যাদিনা। ইতি ব্যাপ্তিগ্রহোপায়শিরো-মণিঃ ॥ প্রাভাকরমতে ব্যাপ্তেঃ সকৃদ্দর্শন-গম্যত্বং যথা তস্মাৎ পরিশেষেণ সকৃদ্দর্শন-গম্যা সা। ইতি ব্যাপ্তিগ্রহোপায়চিন্তা-মণিঃ ॥

প্রাভৃতং (ক্লী) উপঢৌকনং। ইত্যমরঃ ॥

প্রাভৃতকং (ক্লী) প্রাভৃতং। তৎপর্য্যায়ঃ। কৌশলিকা ২। ইতি হারাবলী ॥

প্রামাদ্যঃ (পুং) বাসকঃ। ইতি শব্দচন্দ্রিকা॥ স্বার্থে ষ্ণ্যে প্রমাদঃ। তস্য ভাবে ক্লী ॥

প্রামাণিকঃ (ত্রি) হৈতুকঃ। মর্য্যাদার্হঃ। শাস্ত্রজ্ঞঃ। পরিচ্ছেদকঃ। প্রমাণকর্ত্তা। ইতি প্রমাণশব্দাৎ কর্ত্তরি ষ্ণিকপ্রত্যয়ঃ ॥

প্রামাণ্যং (ক্লী) প্রমাকরণত্বং। প্রমাণশব্দাৎ ভাবার্থে ষ্ণ্যপ্রত্যয়ঃ ॥

প্রামাণ্যবাদঃ (পুং) প্রমাকরণতাকথনং। তদ্বতি তৎপ্রকারকত্বরূপপ্রমাত্বকথনং। চিন্তামণিন্যায়গ্রন্থবিশেষঃ। ইতি পূর্ব্বা-চার্য্যাঃ॥ স যথা। অথ জগদেব পঙ্কনিমগ্ন-

মুদ্দিধীর্ষুরষ্টাদশস্বু বিদ্যাস্থানেষ্বভ্যর্হিতমামান্বিক্ষিকীং পরমকারুণিকো মুনিঃ প্রণিনায়। তত্র প্রেক্ষাবৎ প্রবৃত্ত্যর্থং প্রমাণাদিপদার্থতত্ত্বজ্ঞানান্নিঃশ্রেয়সাধিগম ইত্যাদাবসূত্রয়ৎ। তেষু প্রমাণাধীনা সর্ব্বেষাং ব্যবস্থিতিরিতি প্রমাণতত্ত্বমত্র বিবিচ্যতে। ইত্যাদি গঙ্গেশোপাধ্যায়ঃ॥

প্রামীত্যং, (ক্লী) ঋণং। ইতি ত্রিকাণ্ডশেষঃ॥ মৃতত্বঞ্চ॥

প্রায়ঃ (পুং) মরণং। অনশনমৃত্যুঃ। তুল্যং। বাহুল্যং। ইতি মেদিনী॥ বয়ঃ। ইতি হেমচন্দ্রঃ॥

প্রায়ঃ [স্] ব্য বাহুল্যং। ইত্যমরঃ॥

প্রায়শ্চিত্তং (ক্লী) পাপক্ষয়মাত্রসাধনং কর্ম্ম। যথা হারীতঃ। প্রযতত্বাদ্বোপচিতমশুভং নাশয়তীতি প্রায়শ্চিত্তং॥ *॥ তস্য ব্যুৎপত্তির্যথা। অঙ্গিরাঃ। প্রায়ো নাম তপঃ প্রোক্তং চিত্তং নিশ্চয় উচ্যতে। তপো নিশ্চয়সংযুক্তং প্রায়শ্চিত্তমিতি স্মৃতং॥ নিশ্চয়সংযুক্তম্পাপক্ষয়সাধনত্বেন নিশ্চিতমিত্যর্থঃ॥ *॥ পাপন্তু বৈদিকপ্রতিপাদ্যোঽনর্থঃ। অনর্থশ্চানিষ্টসাধনং। পাপকারণমুক্তং যাজ্ঞবল্ক্যেন। যথা। বিহিতস্যাননুষ্ঠানান্নিন্দিতস্য চ সেবনাৎ। অনিগ্রহাচ্চেন্দ্রিয়াণাং নরঃ পতনমৃচ্ছতি॥ *॥ পাপবিশেষেণাবস্থাবিশেষমাহ মনুঃ। শরীরজৈঃ কর্ম্মদোষৈর্যাতি স্থাবরতাং নরঃ। বাচিকৈঃ পক্ষিমৃগতাং মানসৈরন্ত্যজাতিতাং॥ ইহ দুশ্চরিতৈঃ কেচিৎ কেচিৎ পূর্ব্বকৃতৈস্তথা। প্রাপ্নুবন্তি দুরাত্মানো নরা রূপবিপর্য্যয়ং॥ যমঃ। সুরাপো ব্রহ্মহা গোঘ্নঃ স্বুবর্ণস্তেয়কৃন্নরঃ। পতিতৈঃ সংপ্রযুক্তশ্চ কৃতঘ্নো গুরুতল্পগঃ। এতে পতন্তি সর্ব্বেষু নরকেষ্বনুপূর্ব্বশঃ॥ *॥ প্রায়শ্চিত্তমাহাত্ম্যং যথা। অঙ্গিরাঃ। উদযচ্ছন্ যদ্বদাদিত্যস্তমঃ সর্ব্বং ব্যপোহতি। তদ্বৎ কল্যাণমাতিষ্ঠন্ সর্ব্বং পাপং ব্যপোহতি॥ পাপঞ্চেৎ পুরুষঃ কৃত্বা কল্যাণমভিপদ্যতে। মুচ্যতে পাতকৈঃ সর্ব্বৈর্ম্মহাভ্রৈরিব চন্দ্রমাঃ॥ কল্যাণং প্রায়শ্চিত্তং॥ *॥ তস্যাবশ্যকর্ত্তব্যত্বমাহ যমঃ। তপসোঽন্তে বিশুধ্যন্তি কর্ম্মণাং বা পরিক্ষয়াৎ। তস্মাৎ কর্ত্তব্যমেতৈস্তু প্রায়শ্চিত্তং বিশুদ্ধয়ে॥ কর্ম্মণাং ভোগেন পরিক্ষয়াদিত্যর্থঃ॥ *॥ প্রায়শ্চিত্তার্হত্বমাহ মনুঃ। অকুর্ব্বন্ বিহিতং কর্ম্ম নিষিদ্ধন্তু সমাচরন্। প্রসজংশ্চেন্দ্রিয়ার্থেষু প্রায়শ্চিত্তীয়তে নরঃ॥ *॥ অজ্ঞানাদযদি বা জ্ঞানাৎ কৃত্বা কর্ম্ম বিগর্হিতং। তস্মাদ্বিমুক্তিমন্বিচ্ছন্ দ্বিতীয়ং ন সমাচরেৎ॥*॥ প্রায়শ্চিত্তস্য কাম্যত্বং নৈমিত্তিকত্বং নিত্যত্বঞ্চ যথা। জাবালঃ। কাম্যানাং সফলার্থঞ্চ দোষঘাতার্থমেব চ। অতঃ কাম্যং নৈমিত্তিকঞ্চ প্রায়শ্চিত্তমিতি স্থিতিঃ॥ চরিতব্যমতো নিত্যং প্রায়শ্চিত্তং বিশুদ্ধয়ে। নিন্দ্যৈশ্চ লক্ষণৈর্যুক্তা জায়ন্তে নিষ্কৃতৈনসঃ॥ *॥ জ্ঞানাজ্ঞানকৃতপাপয়োঃ প্রায়শ্চিত্তভেদো যথা। অঙ্গিরাঃ। অকামতঃ কৃতে পাপে প্রায়শ্চিত্তং ন কামতঃ। স্যাত্ত্বকামকৃতে যত্তু দ্বিগুণং বুদ্ধিপূর্ব্বকে॥*॥

অথ প্রায়শ্চিত্তিনস্পর্ষদুপস্থানং। তত্রাঙ্গিরাঃ। কৃতে নিঃসংশয়ে পাপে ন ভুঞ্জীতানুপস্থিতঃ। ভুঞ্জানো বর্দ্ধয়েৎ পাপমসত্যং পর্ষদি ব্রুবন্॥ সচেলং বাগ্‌যতঃ স্নাত্বা ক্লিন্নবাসাঃ সমাহিতঃ। উপস্থায় ততঃ শীঘ্রমার্ত্তিমান্ ধরণীং গতঃ। গাত্রৈশ্চ শিরসা চৈব ন চ কিঞ্চিদুদাহরেৎ॥ উপস্থানঞ্চ ব্রাহ্মণান্ বস্ত্রাদিনা তোষয়িত্বা কার্য্যং। মহৎসু পাপেষু রাজ্ঞোঽপ্যুপস্থিতিঃ কার্য্যেত্যাহ দেবলঃ। স্বয়ং বা ব্রাহ্মণৈঃ কৃচ্ছ্রমল্পদোষে বিধীয়তে। রাজ্ঞা চ ব্রাহ্মণৈশ্চৈব মহৎসু পরিচক্ষতে॥ *॥ পরিষদমাহাঙ্গিরাঃ। একবিংশতিসংখ্যা কৈর্মীমাংসাবেদপারগৈঃ। বেদাঙ্গকুশলৈশ্চৈব পরিষৎ সংপ্রকল্পয়েৎ॥ চাতুর্বিদ্যং বিকল্পী চ অঙ্গবিদ্ধর্ম্মপাঠকঃ। ত্রয়শ্চাশ্রমিণো বৃদ্ধাঃ পর্ষৎ স্যাত্তু দশাবরা॥ মনুঃ। ত্রৈবিদ্যো হেতুকস্তর্কী নৈরুক্তো ধর্ম্মপাঠকঃ। ত্রয়শ্চাশ্রমিণঃ পূর্ব্বে পর্ষৎ স্যাত্তু দশাবরা॥ অঙ্গিরাঃ। এষা তু লঘুকার্য্যেষু মধ্যমেষু তু মধ্যমা। মহাপাতকিশোধ্যেষু শতশো ভূয় এব বা॥ প্রদর্শনার্থমিদং। যাবদ্ভিরেব নিরূপণং তাবদ্ভিরেব পরিষৎ। দৃষ্টার্থত্বাদেব তস্যাঃ। তথা চ যমঃ। একো দ্বৌ বা ত্রয়ো বাপি যদ্ব্রূয়ুর্ধর্ম্মপাঠকাঃ। স ধর্ম্ম ইতি বিজ্ঞেয়ো নেতরেষাং সহস্রশঃ॥ *॥ প্রায়শ্চিত্তাকথনে দোষো যথা। আর্ত্তানাং মার্গমাণানাং প্রায়শ্চিত্তানি যে দ্বিজাঃ। জানন্তো ন প্রযচ্ছন্তি তেঽপি তদ্দোষভাগিনঃ॥ *॥ অনর্চ্চিতৈরনাহূতৈরপৃষ্টৈশ্চৈব সংসদি। প্রায়শ্চিত্তং ন বক্তব্যং জানদ্ভিরপি জল্পতঃ॥ ন্যায়তো মার্গমাণস্য ক্ষত্রিয়াদেঃ প্রণামিনঃ। অন্তরা ব্রাহ্মণং কৃত্বা ব্রতমেতৎ সমাদিশেৎ॥ *॥ হারীতঃ। যথাবয়ো যথাকালং যথাপ্রাণঞ্চ ব্রাহ্মণে। প্রায়শ্চিত্তং প্রদাতব্যং ব্রাহ্মণৈর্ধর্ম্মপাঠকৈঃ॥ তস্মাৎ কৃচ্ছ্রমথাপ্যর্দ্ধং পাদং বাপি বিধানতঃ। জ্ঞাত্বা বলাবলং কালং প্রায়শ্চিত্তং প্রকল্পয়েৎ॥ *॥ অশক্তাবনুগ্রহমাহ পরাশরঃ। দুর্ব্বলেঽনুগ্রহঃ কার্য্যস্তথা বৈ শিশুবৃদ্ধয়োঃ। অতোঽন্যথা ভবেদ্দোষ স্তস্মান্নানুগ্রহী ভবেৎ॥ *॥ স্নেহাদিনানুগ্রহে দোষো যথা। স্নেহাদ্বা যদি বা লোভাৎ মোহাদজ্ঞানতোঽপি বা। কুর্ব্বন্ত্যনুগ্রহং যে তু তৎ পাপং তেষু গচ্ছতি॥ শাস্ত্রীয়প্রায়শ্চিত্তমুদাহৃত্য পশ্চাদনুগ্রহঃ কার্য্য ইত্যাহাঙ্গিরাঃ। কৃত্বা পূর্ব্বমুদাহারং যথোক্তং ধর্ম্মবক্তৃভিঃ। পশ্চাৎ কার্য্যানুসারেণ শক্ত্যা কুর্ব্বন্ত্যনুগ্রহং॥ *॥ বৃদ্ধত্বাদিভেদাৎ প্রায়শ্চিত্তং যথা। অশীতির্যস্য বর্ষাণি বালো বাপ্যূনষোড়শঃ। প্রায়শ্চিত্তার্দ্ধমর্হন্তি স্ত্রিয়ো রোগিণ এব চ॥ *॥ অথ পাপনিক্রমণাদিঃ। তত্র মনুঃ। খ্যাপনেনানুতাপেন তপসাধ্যয়নেন চ। পাপকৃন্মুচ্যতে পাপাত্তথা দানেন চাপদি॥ আপদীত্যনেন অধ্যয়নতপসোর্দানমনুকল্প ইত্যুক্তং। এতদ্ধিংসাব্যতিরিক্তবিষয়ং। হিংসায়ান্তু দানং মুখ্যং। যথা ভবিষ্যে। হিংসাত্মকানাং সর্ব্বেষাং কীর্ত্তিতানাং

মনীষিভিঃ। 'প্রায়শ্চিত্তকদম্বানাং দানং প্রথম উচ্যতে ॥ তথা মনুঃ। দানেন বধনির্ণেকং সর্পাদীনামশক্নুবন্। একৈকশশ্চরেৎ কৃচ্ছ্রং দ্বিজঃ পাপাপনুত্তয়ে ॥ * ॥ সামান্যপ্রায়শ্চিত্তানি যথা সম্বর্ত্তঃ। হিরণ্যদানং গোদানং ভূমিদানং তথৈব চ। নাশয়ন্ত্যাশু পাপানি মহাপাতকজান্যপি ॥ যমঃ। শোষণেন শরীরস্য তপসাধ্যয়নেন চ। পাপ কৃন্মুচ্যতে পাপাৎ দানেন চ দমেন চ ॥ মনুঃ। কৃত্বা পাপং হি সন্তপ্য তস্মাৎ পাপাৎ প্রমুচ্যতে। নৈবং কুর্য্যাং পুনরিতি নিবৃত্ত্যা পূয়তে নরঃ ॥ বিষ্ণুপুরাণং। প্রায়শ্চিত্তান্যশেষাণি তপঃকর্ম্মাত্মকানি বৈ। যানি তেষামশেষাণাং কৃষ্ণানুস্মরণং পরং ॥ যমঃ। গবাহ্নিকা দেবপূজা বেদাভ্যাসঃ সরিৎপ্লবঃ। নাশয়ন্ত্যাশু পাপানি মহাপাতকজান্যপি ॥ গোতমঃ। হিরণ্যং গৌর্ব্বাসোঽশ্বো ভূমিস্তিলা ঘৃতমন্নং ইতি দেয়ানি। এতান্যেবানাদেশে বিকল্পেন ক্রিয়েরন্ এনসি লঘূনি লঘূনি গুরূণি গুরূণি। বিষ্ণুপুরাণং। এবং বিষয়ভেদাদ্বৈ ব্যবস্থাপ্যানি পুত্রক। প্রায়শ্চিত্তানি সর্ব্বাণি গুরূণি চ লঘূনি চ ॥ অন্যথা হি মহাবাহো লঘূনামুপদেশতঃ। গুরূণামুপদেশো হি নিষ্প্রয়োজনতাং ব্রজেৎ ॥ মহাভারতে। যদ্যকার্য্যশতং কৃত্বা কৃতং গঙ্গাভিষেচনং। সর্ব্বং দহতি গঙ্গাম্ভস্তূলরাশিমিবানলঃ ॥ * ॥ ব্রতানি শুদ্ধিকারণান্যাহ বিশ্বামিত্রঃ। কৃচ্ছ্রং চান্দ্রায়ণাদীনি শুদ্ধ্যভ্যুদয়কারণং। প্রকাশে বা রহস্যে বা সংশয়েঽনুক্তকে স্ফুটে ॥ প্রাজাপত্যঃ শান্তপনঃ শিশুকৃচ্ছ্রঃ পরাককঃ। অতিকৃচ্ছ্রঃ পর্ণকৃচ্ছ্রঃ সৌম্যঃ কৃচ্ছ্রাতিকৃচ্ছ্রকঃ ॥ মহাশান্তপনঃ শুদ্ধ্যৈ তপ্তকৃচ্ছ্রস্তু পাবনঃ। জলোপবাসকৃচ্ছ্রশ্চ ব্রহ্মকূর্চ্চস্তু শোধকঃ ॥ এতে সমস্তা ব্যস্তা বা প্রত্যেকমেকশোঽপি বা। পাতকাদিষু সর্ব্বেষু পাপকেষু প্রযত্নতঃ ॥ কার্য্যাশ্চান্দ্রায়ণৈর্যুক্তাঃ কেবলা বা বিশুদ্ধয়ে। শিশুচান্দ্রায়ণং প্রোক্তং যতিচান্দ্রায়ণং তথা। যবমধ্যং তথা প্রোক্তং তথা পিপীলিকাকৃতি ॥ উপবাসস্ত্রিরাত্রং বা মাসঃ পক্ষস্তদর্দ্ধকং। ষড়হং দ্বাদশাহাদি কার্য্যং শুদ্ধিফলার্থিনা ॥ উপপাতকযুক্তানামনাদিষ্টেষু চৈব হি। প্রকাশে চ রহস্যে চ অভিসন্ধ্যাদ্যপেক্ষয়া ॥ জাতিশক্তিগুণান্ দৃষ্ট্বা সকৃদ্বুদ্ধিকৃতং তথা। অনুবন্ধাদিকং দৃষ্ট্বা সর্ব্বং কার্য্যং যথাক্রমং ॥ প্রকাশকৃতে পাপে ব্রতানি মুখ্যানি। রহস্যকৃতে জপাদীনি। যথা প্রাজাপত্যাদীন্যভিধায় মনুঃ। এতৈর্দ্বিজাতয়ঃ শোধ্যা ব্রতৈরাবিষ্কৃতৈনসঃ। অনাবিষ্কৃতপাপাংস্তু মন্ত্রৈর্হোমৈস্তু শোধয়েৎ ॥ দেবলঃ। প্রকাশ উক্তং যৎকিঞ্চিৎ বিংশভাগো রহস্যকে। ত্রিংশভাগঃ যষ্টিভাগঃ কল্প্যো জাত্যাদ্যপেক্ষয়া ॥ ইতি প্রায়শ্চিত্তবিবেকঃ ॥ * ॥ অথ প্রায়শ্চিত্তপূর্ব্বাহ্নকৃত্যং। শঙ্খলিখিতৌ। বাপ্য কেশনখান্ পূর্ব্বং ঘৃতং প্রাশ্য বহির্নিশি। প্রত্যেকং নিয়তং কালমাত্মনো ব্রতমাদিশেৎ। প্রায়শ্চিত্তমুপাসীনো বাগ্যত-

স্ত্রিসবনং স্পৃশেৎ ॥*॥ কেশধারণেচ্ছায়াং দ্বিগুণব্রতাদিকমাহ হারীতঃ। রাজা বা রাজপুত্ত্রো বা ব্রাহ্মণো বা বহুশ্রুতঃ। কেশানাং বপনং কৃত্বা প্রায়শ্চিত্তং সমাচরেৎ॥ কেশানাং ধারণার্থন্তু দ্বিগুণং ব্রতমাচরেৎ। দ্বিগুণে তু ব্রতে চীর্ণে দ্বিগুণা দক্ষিণা ভবেৎ॥ * ॥ বিদ্বদ্বিপ্রনৃপস্ত্রীণাং নেষ্যতে কেশবাপনং। ঋতে মহাপাতকিনো গোহন্তুশ্চাবকীর্ণিনঃ॥ * ॥ সধবাস্ত্রীণাং বিশেষমাহ ভবদেবভট্টধৃতং বচনং। বপনং নৈব নারীণাং নানুব্রজ্যা জপাদিকং। ন গোষ্ঠে শয়নং তাসাং ন চ দদ্যাদ্‌গবাজিনং॥ সর্ব্বান্ কেশান্ সমুদ্ধৃত্য ছেদয়েদঙ্গুলিদ্বয়ং। সর্ব্বত্রৈবং হি নারীণাং শিরসো মুণ্ডনং স্মৃতং॥ * ॥ অথ ধেনুমূল্যব্যবস্থা। তত্র সম্বর্ত্তঃ। প্রাজাপত্যব্রতাশক্তৌ ধেনুং দদ্যাৎ পয়স্বিনীং। ধেনোরভাবে দাতব্যং তুল্যং মূল্যং ন সংশয়ঃ॥ পয়স্বিনীমিতিবিশেষণং দুগ্ধোপযোগায়। স চ বৎসং বিনা ন সম্ভবতি। অতঃ সবৎসায়া এব দানং মুখ্যং। তদভাবে যথোচিতং মূল্যং। তদসম্ভবে পুরাণত্রয়ং। দ্বাত্রিংশৎপণিকা গাবো বৎসঃ পৌরাণিকো ভবেদিতি কাত্যায়নবচনাৎ॥ ষট্‌ত্রিংশন্মতমিতি কৃত্বা পঠন্তি। ধেনুঃ পঞ্চভিরাঢ্যানাং মধ্যানাং ত্রিপুরাণিকী। কার্ষাপণৈকমূল্যা হি দরিদ্রাণাং প্রকীর্ত্তিতা॥ * ॥ প্রায়শ্চিত্তোত্তরকর্ত্তব্যাণি যথা। ভবিষ্যে। ক্রিয়তে শুদ্ধয়ে যত্তু ব্রাহ্মণানান্তু ভোজনং। শুদ্ধ্যর্থমিতি তৎ প্রোক্তং বৈনতেয় মনীষিভিঃ॥ জাবালঃ। আরম্ভে সর্ব্বকৃচ্ছ্রাণাং সমাপ্তৌ চ বিশেষতঃ। আজ্যেনৈব হি শালাগ্নৌ জুহুয়াদাহুতীঃ পৃথক্। শ্রাদ্ধং কুর্য্যাদ্‌ব্রতস্যান্তে গোহিরণ্যান্নদক্ষিণং॥ * ॥ প্রায়শ্চিত্তানন্তরং গোভ্যো যবসং দদ্যাৎ। যদি তু গাবস্তদ্দত্ততৃণং ন গৃহ্লীয়ুস্তদা পুনস্তৎপ্রায়শ্চিত্তমনুতিষ্ঠেৎ। যথা হারীতঃ। স্বশিরসা যবসমাদায় গোভ্যো দদ্যাৎ যদি তাঃ প্রমুদিতা গৃহ্লীয়ুরথৈনং প্রবর্ত্তয়েয়ুঃ। এনং কৃতপ্রায়শ্চিত্তং। ইতরথা ন। ইতি প্রায়শ্চিত্ততত্ত্বং॥ * ॥ অথ প্রায়শ্চিত্তবিবেকোক্তনববিধপাপানাং প্রায়শ্চিত্তানি লিখ্যন্তে।

অথাতিপাতকানি	প্রায়শ্চিত্তানি	তদশক্তৌ ধেনুদানং।	তদশক্তৌ চূর্ণীদানং।	দক্ষিণা।
ব্রাহ্মণস্য মাতৃগমনং দুহিতৃগমনং স্নুষাগমনঞ্চ।	অজ্ঞানতো দ্বিগুণদ্বাদশবার্ষিকব্রতং। তচ্চ মহাপাতকে দ্রষ্টব্যং। জ্ঞানতস্তদ্দ্বিগুণং।	৩৬০ ধেনবঃ	১০৮০ কার্ষাপণাঃ। তল্লভ্যস্বর্ণাদি বা।	২০০ গাবঃ। অশক্তৌ ২০০ কার্ষাপণাঃ।

প্রথিষ্ঠঃ (ত্রি) অতিশয়েন পৃথুঃ। অতিবৃহৎ ইতি মুগ্ধবোধব্যাকরণং ॥

প্রথুকঃ (পুং) পৃথুকঃ। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

প্রদঃ (ত্রি) প্রকর্ষেণ দদাতি যঃ। প্রদাতা। ইতি সিদ্ধান্তকৌমুদী ॥

প্রদত্তং (ত্রি) প্রকর্ষেণ দত্তং। ইতি মুগ্ধবোধব্যাকরণং ॥

প্রদরঃ (পুং) ভঙ্গঃ। বাণঃ। ইত্যমরঃ ॥ বিদারঃ। নারীরুগ্‌ভেদঃ। ইতি মেদিনী॥*॥ অস্য নামান্তরং অসৃগ্দরং। তত্তু ফলিতযোন্যা রক্তাদিধাতুক্ষরণং অস্য নিদানং। যথা। বিরুদ্ধমদ্যাধ্যশনাদজীর্ণাদ্গর্ভপ্রপাতাদতিমৈথুনাচ্চ। যানাধ্বশোকাদতিকর্ষণাচ্চ ভারাভিঘাতাচ্ছয়নাদ্দিবা চ ॥ অসৃগ্দরং ভবেৎ সর্ব্বং সাঙ্গমর্দ্দং সবেদনং ॥ তস্যাতিবৃদ্ধৌ দৌর্ব্বল্যং শ্রমো মূর্চ্ছা মদস্তৃষা। দাহঃ প্রলাপঃ পাণ্ডুত্বং তন্দ্রা রোগাশ্চ বাতজাঃ ॥ * ॥ স চ চতুর্ব্বিধো যথা। তং শ্লেষ্মপিত্তানিলসন্নিপাতৈশ্চতুঃপ্রকারং প্রদরং বদন্তি। *। শ্লৈষ্মিকস্য তস্য লক্ষণং। আমং সপিচ্ছাপ্রতিমং সপাণ্ডুপুলাকতোয়প্রতিমং কফাত্তু॥ * ॥ পৈত্তিকস্য তস্য লক্ষণং। সপীতনীলাসিতরক্তমুষ্ণং পিত্তার্ত্তিযুক্তং ভৃশবেগি পিত্তাৎ ॥ * ॥ বাতিকস্য তস্য লক্ষণং। রূক্ষারুণং ফেনিলমল্পমল্পং বাতার্ত্তিবাতাৎ পিশিতোদকাভং ॥ * ॥ তস্য ত্রৈদোষিকস্য লক্ষণং। সক্ষৌদ্রসর্পির্হরিতালবর্ণং মজ্জপ্রকাশং কুণপং ত্রিদোষাৎ। তঞ্চাপ্যসাধ্যং প্রবদন্তি তজ্জ্ঞা ন তত্র কুর্ব্বীত ভিষক্ চিকিৎসাং ॥ ইতি মাধবকরঃ॥*॥ অস্যৌষধং যথা। ঘৃততুল্যা রুদ্রলাক্ষা পীতা ক্ষীরেণ বৈ সহ। প্রদরং হরতে রোগং নাত্র কার্য্যা বিচারণা ॥ ইতি গারুড়ে ১৯৬ অধ্যায়ঃ ॥ * ॥ অপি চ। দধ্না সৌবর্চ্চলাজাজীমধুকং নীলমুৎপলং। পিবেৎ ক্ষৌদ্রযুতং নারী বাতাসৃগ্দরশান্তয়ে ॥ এষাং প্রত্যেকং মাষদ্বয়ং। সর্ব্বমেকীকৃত্য দধ্না কর্ষচতুষ্টয়েন পিষ্ট্বা তত্র মাষাষ্টকং মধু নিঃক্ষিপ্য পেয়ং ॥ *॥ মধুকং কর্ষমেকন্তু চতুষ্কর্ষাং সিতান্তথা। তণ্ডুলোদকসংপিষ্টাং লোহিতে প্রদরে পিবেৎ ॥ বলা কঙ্কতিলাখ্যা যা তস্যা মূলন্তু চূর্ণিতং। লোহিতে প্রদরে খাদেচ্ছর্করামধুসংযুতং ॥*॥ শুচিস্থানে ব্যাঘ্রনখ্যা মূলমুত্তরদিগ্‌ভবং। নীতমুত্তরফল্গুন্যাং কটিবদ্ধং হরেদসৃক্ ॥ * ॥ রসাঞ্জনং তণ্ডুলকস্য মূলং ক্ষৌদ্রান্বিতং তণ্ডুলতোয়পীতং। অসৃগ্দরং সর্ব্বভবং নিহন্তি যাসঞ্চ ভার্গী সহ নাগরেণ ॥*॥ অশোকবল্কলক্বাথশৃতং দুগ্ধং সুশীতলং। যথাবলং পিবেৎ প্রাতস্তীব্রাসৃগ্দরনাশনং ॥ অশোকবল্কলপলং দ্বাত্রিংশৎপলসংমিতেন জলেন নিষ্ক্বাথ্য শেষেণ পলাষ্টকক্বাথেন সহ ক্ষীরং পলাষ্টকমিতং বিপচেৎ তত্তু দুগ্ধাবশেষং কর্ত্তব্যং তন্মধ্যে পলচতুষ্টয়মিতং দুগ্ধং পেয়ং বহ্নিবলাপেক্ষয়া বা ॥ *॥ কুশমূলং সমুদ্ধৃত্য পেষয়েত্তণ্ডুলাম্বুনা। এতৎ পীত্বা ত্র্যহং নারী

প্রদরাৎ পরিমুচ্যতে ॥ ইতি ভাব-প্রকাশঃ ॥

প্রদর্শিতঃ (ত্রি) আলোকিতঃ। যথা। ক্রিয়া-বাচিত্বমাখ্যাতুং প্রসিদ্ধোঽর্থঃ প্রদর্শিতঃ। প্রয়োগতোঽন্যে মন্তব্যা অনেকার্থা হি ধাতবঃ ॥ ইতি মুগ্ধবোধটীকায়াং দুর্গা-দাসঃ ॥

প্রদলঃ (পুং) বাণঃ। ইতি জটাধরঃ ॥

প্রদক্ষিণং (ক্লী) } দক্ষিণাবর্ত্তেন দেবমুদ্দিশ্য
প্রদক্ষিণঃ (পুং) } ভ্রমণং। যথা। একং দেব্যাং রবৌ সপ্ত ত্রীণি কুর্য্যাদ্বিনায়কে। চত্বারি কেশবে কুর্য্যাৎ শিবে চার্দ্ধপ্রদক্ষিণং ॥ ইতি কর্ম্মলোচনং ॥ * ॥ সর্ব্বদেবতুষ্টিদ-প্রদক্ষিণং যথা। প্রসার্য্য দক্ষিণং হস্তং স্বয়ং নম্রশিরাঃ পুনঃ। দক্ষিণং দর্শয়ন্ পার্শ্বং মনসাপি চ দক্ষিণঃ॥ সকৃত্ত্রির্ব্বা বেষ্টয়েত্তা দেব্যাঃ প্রীতিঃ প্রজায়তে। স চ প্রদক্ষিণো জ্ঞেয়ঃ সর্ব্বদেবৌঘতুষ্টি-দঃ॥ অষ্টোত্তরশতং যস্তু দেব্যাঃ কুর্য্যাৎ প্রদক্ষিণং। সর্ব্বান্ কামান্ সমাসাদ্য পশ্চান্মোক্ষমবাপ্নুয়াৎ ॥ মনসাপি চ যো দদ্যাদ্দেব্যৈ ভক্ত্যা প্রদক্ষিণং। প্রদক্ষিণাদ্ যমগৃহে নরকাণি ন পশ্যতি ॥ ইতি কালিকাপুরাণে ৭০ অধ্যায়ঃ ॥ * ॥ অপি চ। দক্ষিণাদ্বায়বীং গত্বা দিশং তস্মাশ্চ শাম্ভবীং। ততশ্চ দক্ষিণাং গত্বা নমস্কার-স্ত্রিকোণবৎ ॥ অর্দ্ধচন্দ্রং মহেশস্য পৃষ্ঠ-তশ্চ সমীরিতং। শিবপ্রদক্ষিণে মন্ত্রী অর্দ্ধচন্দ্রক্রমেণ তু। সব্যাসব্যক্রমেণৈব সোমসূত্রং ন লঙ্ঘয়েৎ ॥ সোমসূত্রং জলনিঃসরণস্থানং। প্রসার্য্য দক্ষিণং হস্তং স্বয়ং নম্রশিরাঃ পুনঃ। দর্শয়েদ্দক্ষিণং পার্শ্বং মনসাপি চ দক্ষিণঃ ॥ ত্রিধা চ বেষ্টয়েৎ সম্যক্ দেবতায়াঃ প্রদক্ষিণং ॥ একহস্তপ্রণামশ্চ একং বাপি প্রদক্ষিণং। অকালে দর্শনং বিষ্ণোর্হন্তি পুণ্যং পুরা-কৃতং ॥ ইতি তন্ত্রসারঃ ॥

প্রদক্ষিণা (স্ত্রী) প্রদক্ষিণং। যথা। অথ প্রদ-ক্ষিণা। ততঃ প্রদক্ষিণাং কুর্য্যাদ্ভক্ত্যা ভগবতো হরেঃ। নামানি কীর্ত্তয়ন্ শক্তৌ তাঞ্চ সাষ্টাঙ্গবন্দনাং ॥*॥ প্রদক্ষিণাসঙ্খ্যা চোক্তা নারসিংহে। একাং চণ্ড্যাং রবেঃ সপ্ত তিস্রো দদ্যাদ্বিনায়কে। চতস্রঃ কেশবে দদ্যাৎ শিবে ত্বর্দ্ধপ্রদক্ষিণাং ॥*॥ প্রদক্ষিণামাহাত্ম্যং বারাহে। প্রদক্ষিণাং যে কুর্ব্বন্তি ভক্তিযুক্তেন চেতসা। ন তে যমপুরং যান্তি যান্তি পুণ্যকৃতাং গতিং ॥ যস্ত্রিঃ প্রদক্ষিণং কুর্য্যাৎ সাষ্টাঙ্গকপ্রণা-মকং। দশাশ্বমেধস্য ফলং প্রাপ্নুয়ান্নাত্র সংশয়ঃ ॥ স্কান্দে ব্রহ্মনারদসংবাদে। বিষ্ণোর্ব্বিমানং যঃ কুর্য্যাৎ সকৃদ্ভক্ত্যা প্রদক্ষিণং। অশ্বমেধসহস্রস্য ফল-মাপ্নোতি মানবঃ ॥ তত্রৈব চাতুর্ম্মাস্য-মাহাত্ম্যে। চতুর্ব্বারং ভ্রমীভিস্তু জগৎ সর্ব্বং চরাচরং। ক্রান্তং ভবতি বিপ্রাগ্র্য তত্তীর্থগমনাধিকং ॥ তত্রৈবান্যত্র। প্রদ-ক্ষিণং তু যঃ কুর্য্যাদ্ধরিং ভক্ত্যা সমন্বিতঃ। হংসযুক্তবিমানেন বিষ্ণুলোকং স গচ্ছতি॥ নারসিংহে। প্রদক্ষিণেন চৈকেন দেব-দেবস্য মন্দিরে। কৃতেন যৎ ফলং নৃণাং

তচ্ছৃণুষ্ব নৃপাত্মজ। পৃথ্বীপ্রদক্ষিণফলং যত্তৎ প্রাপ্য হরিং ব্রজেৎ॥ অন্যত্র চ। এবং কৃত্বা তু কৃষ্ণস্য যঃ কুর্য্যাদ্দ্বিপ্রদক্ষিণং। সপ্তদ্বীপবতীপুণ্যং লভতে তু পদে পদে॥ পঠন্নামসহস্রস্তু নামান্যেবাথ কেবলং। ভক্তিস্বধোদয়ে। বিষ্ণুং প্রদক্ষিণীকুর্ব্বন্ যস্তত্রাবর্ত্ততে পুনঃ। তদেবাবর্ত্তনং তস্য পুনর্নাবর্ত্ততে ভবে॥ বৃহন্নারদীয়ে যম-ভগীরথসংবাদে। প্রদক্ষিণত্রয়ং কুর্য্যাৎ যো বিষ্ণোর্ম্মনুজেশ্বর। সর্ব্বপাপবিনির্ম্মুক্তো দেবেন্দ্রত্বং সমশ্নুতে॥ তত্রৈব প্রদক্ষিণ মাহাত্ম্যে সুধর্ম্মোপাখ্যানারম্ভে। ভক্ত্যা কুর্ব্বন্তি যে বিষ্ণোঃ প্রদক্ষিণচতুষ্টয়ং। তেঽপি যান্তি পরং স্থানং সর্ব্বলোকোত্তমোত্তমমিতি॥ তৎ খ্যাতং যৎ সুধর্ম্মস্য পূর্ব্বস্মিন্ গৃধ্রজন্মনি। কৃষ্ণপ্রদক্ষিণাভাবান্মহাসিদ্ধিরভূদিতি॥ *॥ অথ প্রদক্ষিণায়াং নিষিদ্ধং বিষ্ণুস্মৃতৌ। একহস্তপ্রণামশ্চ একা চৈব প্রদক্ষিণা। অকালে দর্শনং বিষ্ণোর্হন্তি পুণ্যং পুরাকৃতং॥ অকালে ভোজনাদিসময়ে। কিঞ্চ। কৃষ্ণস্য পুরতো নৈব সূর্য্যস্যৈব প্রদক্ষিণাং। কুর্য্যাদ্‌ভ্রমরিকারূপাং বৈমুখ্যাপাদনীং প্রভো॥ তথা চোক্তং। প্রদক্ষিণং ন কর্ত্তব্যং বিমুখত্বাচ্চ কারণাৎ। ইতি শ্রীহরিভক্তিবিলাসে ৮ বিলাসঃ॥

প্রদানং (ক্লী) দানং। ইতি শব্দরত্নাবলী॥ প্রকৃষ্টদানঞ্চ॥

প্রদিগ্ধং (ক্লী) মাংসব্যঞ্জনভেদঃ। যথা। মাংসং বহুঘৃতৈর্ভৃষ্টং সিক্ত্বা চোষ্ণাম্বুনা মুহুঃ। জীরকাদ্যৈঃ সমাযুক্তং পরিশুষ্কং তদুচ্যতে॥ তদেব ঘৃততক্রাঢ্যং প্রদিগ্ধং সত্রিজাতকং। ইতি শব্দচন্দ্রিকা॥ প্রলিপ্তে ত্রি॥

প্রদিক্ (স্ত্রী) বিদিক্। ইতি জটাধরঃ॥

প্রদীপঃ (পুং) দীপঃ। ইত্যমরঃ॥ তৎপর্য্যায়ঃ। স্নেহাদীপকঃ ২ কজ্জলধ্বজঃ ৩ শিখাতরুঃ ৪ গৃহমণিঃ ৫ জ্যোৎস্নাবৃক্ষঃ ৬ দশেন্ধনঃ ৭ দোষাতিলকঃ ৮ দোষাস্যঃ ৯ নয়নোৎসবঃ ১০। ইতি শব্দরত্নাবলী॥ দীপমাহাত্ম্যং যথা। দীপেন লোকান্ জয়তি দীপস্তেজোময়ঃ স্মৃতঃ। চতুর্ব্বর্গপ্রদো দীপস্তস্মাদ্দীপং যজেৎ শ্রিয়ে॥*॥ সপ্তপ্রকারা দীপা যথা। ঘৃতপ্রদীপঃ প্রথমস্তিলতৈলোদ্ভবস্ততঃ। সার্ষপঃ ফলনির্য্যাসজাতো বা রাজিকোদ্ভবঃ। দধিজশ্চান্নজশ্চৈব প্রদীপাঃ সপ্ত কীর্ত্তিতাঃ॥*॥ তস্য পঞ্চপ্রকারা বর্ত্তিকা যথা। পদ্মসূত্রভবা দর্ব্ভগর্ব্ভসূত্রভবাথবা। সালজা বাদরী বাপি ফলকোষোদ্ভবাথবা। বর্ত্তিকা দীপকৃত্যেষু সদা পঞ্চবিধাঃ স্মৃতাঃ॥*॥ দীপপাত্রাণি যথা। তৈজসং দারবং লৌহং মার্ত্তিক্যং নারিকেলজং। তৃণধ্বজোদ্ভবং বাপি দীপপাত্রং প্রশস্যতে॥*॥ দীপবৃক্ষে দীপস্থাপনং ভূমৌ তন্নিষেধো যথা। দীপবৃক্ষাশ্চ কর্ত্তব্যাস্তৈজসাদ্যৈশ্চ ভৈরব। বৃক্ষে চ দীপো দাতব্যো ন তু ভূমৌ কদাচন॥ সর্ব্বংসহা বসুমতী সহতে ন ত্বিদং দ্বয়ং। অকার্য্যপাদঘাতঞ্চ দীপতাপস্তথৈব চ॥ তস্মাদ্যথা তু পৃথিবী তাপং নাপ্নোতি বৈ তথা। দীপং দদ্যান্মহাদেব্যৈ

অন্যেভ্যোঽপি চ ভৈরব ॥ কুর্ব্বস্তং পৃথিবীতাপং যো দীপমুৎসৃজেন্নরঃ। স তাম্রতাপং নরকমাপ্নোত্যেব শতং সমাঃ ॥ * ॥ সুবৃত্তবর্ত্তিঃ সস্নেহঃ পাত্রেঽভগ্নে সুদর্শনে। মৃচ্ছায়ে বৃক্ষকোটৌ তু দীপং দদ্যাৎ প্রযত্নতঃ ॥ লভ্যতে যস্য তাপস্তু দীপস্য চতুরঙ্গুলাৎ। ন স দীপ ইতি খ্যাতো হ্যোঘবহ্নিস্তু স শ্রুতঃ ॥ নেত্রাহ্লাদকরঃ সর্ব্বভূমিতাপবিবর্জ্জিতঃ। সুশিখঃ শব্দরহিতো নির্ধূমো নাতিহ্রস্বকঃ ॥ দক্ষিণাবর্ত্তবর্ত্তিস্তু প্রদীপঃ শ্রীবিবৃদ্ধয়ে। দীপবৃক্ষস্থিতে শুদ্ধস্নেহেনৈব প্রপূরিতে॥ দক্ষিণাবর্ত্তবর্ত্ত্যা তু চারুদীপঃ প্রদীপকঃ। উত্তমঃ প্রোচ্যতে পুত্র সর্ব্বতুষ্টিপ্রদায়কঃ॥ বৃক্ষেণ বর্জ্জিতো দীপো মধ্যমঃ পরিকীর্ত্তিতঃ। বিহীনঃ পাত্রতৈলাভ্যামধমঃ পরিকীর্ত্তিতঃ॥ ইতি কালিকাপুরাণে ৬৮ অধ্যায়ঃ ॥ * ॥ কার্ত্তিকে তদ্দানফলং যথা। কার্ত্তিকে মাসি যো দদ্যাৎ প্রদীপং সর্পিরাদিনা। আকাশে মণ্ডলে বাপি স চাক্ষয়ফলং লভেৎ ॥ ইতি কর্ম্মলোচনং ॥ * ॥ অপি চ। সমভ্যর্চ্চ্য হরিং ভক্ত্যা দীপং দত্ত্বা দিবানিশং। তত্র পাপবিশুদ্ধাত্মা নরো যাতি দিবং নৃপ ॥ কৃষ্ণপক্ষে বিশেষেণ তত্র পঞ্চ দিনানি তু। পুণ্যানি তেষু যদ্দত্তমক্ষয়ং সর্ব্বকামিকং ॥ একাদশ্যাং হরিমুদ্দিশ্য দীপং প্রজ্বাল্য মূষিকা। মানুষ্যং দুর্লভং প্রাপ্য পরাং গতিমবাপ সা ॥ দ্বাদশ্যাং তস্করো রাত্রিদীপমুদ্বোধ্য চৌর্য্যতঃ। কারণাৎ পরমং প্রাপ্তো লোকং বিষ্ণোঃ সনাতনং ॥ শ্বপচোঽপি ত্রয়োদশ্যাং দীপান্ দত্ত্বাপরৈঃ কৃতান্। বেশ্যা লীলাবতী ভূত্বা জগাম স্বর্গমক্ষয়ং ॥ লুব্ধকোঽপি চতুর্দ্দশ্যাং পূজয়িত্বা জনার্দ্দনং। নির্ভক্তিঃ পরসংগত্যা বিষ্ণুলোকং জগাম সঃ ॥ গোপঃ কশ্চিদমাবাস্যাং পূজাং দৃষ্ট্বাথ শার্ঙ্গিণঃ। সুদুর্জ্জয়স্তুর্জ্জাপালো রাজ রাজেশ্বরোঽভবৎ ॥ তস্মাদ্দীপাঃ প্রদাতব্যা রাত্রাবস্তমিতে রবৌ। গৃহেষু সর্ব্বগোষ্ঠেষু চৈত্যেষ্বায়তনেষু চ ॥ দেবানাঞ্চৈব রথ্যাসু শ্মশানেষু সরঃসু চ। ইত্যগ্নিপুরাণং ॥

প্রদীপনঃ (পুং) স্থাবরবিষভেদঃ। ইত্যমরঃ ॥ তস্য লক্ষণং যথা। বর্ণতো লোহিতো যঃ স্যাৎ দীপ্তিমান্ দহনপ্রভঃ। মহাদাহকরঃ পূর্ব্বৈঃ কথিতঃ স প্রদীপনঃ ॥ ইতি রাজনির্ঘণ্টঃ ॥ প্রকাশকে ত্রি ॥

প্রদেশঃ (পুং) দেশমাত্রং। তৎপর্য্যায়ঃ। আস্থানং ২ আস্থা ৩ ভূঃ ৪ অবকাশঃ ৫ স্থিতিঃ ৬ পদং ৭। ইতি রাজনির্ঘণ্টঃ ॥ তর্জ্জন্যঙ্গুষ্ঠসম্মিতঃ। ভিত্তিঃ। ইতি মেদিনী ॥

প্রদেশনং (ক্লী) নৃপাদেরুপঢৌকনং। ভেটী ইতি খ্যাতং। তৎপর্য্যায়ঃ। প্রাভৃতং ২ উপায়নং ৩ উপগ্রাহ্যং ৪ উপহারঃ ৫ উপদা ৬। ইত্যমরঃ॥ কেচিত্তু দেবতাভ্যো ভক্ত্যা মিত্রাদিভ্যশ্চ প্রীত্যা যৎ প্রশস্তং লড্ডুকাদি দীয়তে তৎ ইত্যাহুঃ। কেচিচ্চ প্রাভৃতাদি দ্বয়ং শ্রদ্ধয়া দেবতাব্রাহ্মণরাজাদিভ্যো যদ্দীয়তে তত্র। উপায়নাদি চতুষ্কং তুভ্যমিদং দীয়তে ত্বয়ৈতৎ

মম কার্য্যং সাধনীয়মিতি যদ্দীয়তে ধূতী ইতি খ্যাতে ইত্যাহুঃ। কিন্তু ষট্ক-মেকার্থমেবেতি বহবঃ। উপায়নমুপ-গ্রাহ্যং প্রাভৃতঞ্চোপদা স্ত্রিয়ামিত্যমর-মালা। ইতি ভরতঃ॥

প্রদেশনী
প্রদেশিনী (স্ত্রী) তর্জ্জনী। ইত্যমরভরতৌ॥

প্রদেহঃ (পুং) প্রলেপঃ। ইতি বৈদ্যকং॥

প্রদোষঃ (পুং) রজনীমুখং। ইত্যমরঃ॥ তত্তু রাত্রেঃ প্রথমদণ্ডচতুষ্টয়ং। যথা। প্রদোষোঽস্তময়াদূর্দ্ধং ঘটিকাদ্বয়মিষ্যতে। ইতি তিথ্যাদিতত্ত্বং॥ দোষঃ। ইতি হেম-চন্দ্রঃ॥

প্রদ্যু (ক্লী) প্রকৃষ্টা দ্যৌঃ স্বর্গো যস্মাৎ তৎ পুণ্যং। ইতি মুগ্ধবোধটীকায়াং দুর্গা-দাসঃ॥

প্রদ্যুম্নঃ (পুং) কন্দর্পঃ। ইত্যমরঃ॥ স বাসু দেবস্য চতুর্থাংশঃ। যথা। একদেবং চতুষ্পাদং চতুর্ধা পুনরচ্যুতঃ। বিভেদ বাসুদেবোঽসৌ প্রদ্যুম্নো হরিরব্যয়ঃ॥ কৃষ্ণদ্বৈপায়নো ব্যাসো বিষ্ণুর্নারায়ণঃ স্বয়ং। অপাং তরতমাঃ পূর্ব্বং স্বেচ্ছয়া হ্যভবদ্ধরিঃ॥ ইতি কৌর্ম্মে ৪৮ অধ্যায়ঃ॥ অপি চ। অনিরুদ্ধঃ স্বয়ং ব্রহ্মা প্রদ্যুম্নঃ কাম এব চ। বলদেবঃ স্বয়ং শেষঃ কৃষ্ণশ্চ প্রকৃতেঃ পরঃ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ১১৬ অধ্যায়ঃ॥

প্রদ্যোতঃ (পুং) রশ্মিঃ। ইতি হলায়ুধঃ॥

প্রদ্যোতনঃ (পুং) সূর্য্যঃ। ইতি হলায়ুধঃ॥ দ্যুতৌ ক্লী॥

প্রদ্রবঃ (পুং) পলায়নং। ইত্যমরঃ॥

প্রধনং (ক্লী) যুদ্ধং। ইত্যমরঃ॥ দারণং। ইতি মেদিনী॥

প্রধানং (ক্লী) প্রকৃতিঃ। মহামাত্রঃ। পর মাত্মা। বুদ্ধিঃ। প্রশস্তং। তৎপর্য্যায়ঃ। প্রমুখং ২ প্রবেকং ৩ অনুত্তমং ৪ উত্তমং ৫ মুখ্যং ৬ বর্য্যং ৭ বরেণ্যং ৮ প্রবর্হং ৯ অন-বরার্দ্ধ্যং ১০ পরার্দ্ধ্যং ১১ অগ্রং ১২ প্রাগ্র হরং ১৩ প্রগ্র্যং ১৪ অগ্র্যং ১৫ অগ্রীয়ং ১৬ অগ্রিমং ১৭। ইত্যমরঃ॥

প্রধানঃ (পুং) মহামাত্রঃ। সেনাপত্যাদিঃ। মহামাত্রঃ প্রধানঃ স্যাদিতি পুংস্কাণ্ডে বোপালিতঃ। ইত্যমরটীকায়াং ভরতঃ॥

প্রধিঃ (পুং) নেমিঃ। ইত্যমরঃ॥

প্রধীঃ (ত্রি) প্রকৃষ্টবুদ্ধিযুক্তঃ। প্রকৃষ্টবুদ্ধৌ স্ত্রী। ইতি মুগ্ধবোধব্যাকরণং॥

প্রধূপিতা (স্ত্রী) ক্লেশিতা। সূর্য্যগন্তব্যদিক্। ইতি মেদিনী॥ প্রকর্ষেণ তপ্তে দীপ্তে চ ত্রি॥

প্রনষ্টঃ (ত্রি) প্রকর্ষেণ নাশযুক্তঃ। কশ্চি-দজ্ঞানসম্ভূতঃ প্রনষ্টস্তে ধনঞ্জয়। ইতি শ্রীভগবদ্গীতায়াং ১৮ অধ্যায়ঃ॥

প্রনিঘাতনং (ক্লী) প্রণিঘাতনং। বধঃ। ইতি হেমচন্দ্রঃ॥

প্রপঞ্চঃ (পুং) বিপর্য্যাসঃ। বিস্তরঃ। ইত্য-মরঃ॥ বিপর্য্যাসো বৈপরীত্যং ভ্রমো বা মায়েতি স্বামী। ইতি ভরতঃ॥ সঞ্চয়ঃ। প্রতারণং। ইতি মেদিনী॥ সংসারঃ। যথা। পাদুকাপঞ্চকস্তোত্রং পঞ্চবক্ত্রাদ্-বিনির্গতং। ষড়াম্নায়ফলোপেতং প্রপঞ্চে চাতিদুর্লভং॥ ইতি গুরুপাদুকাস্তোত্রং॥

প্রপঞ্চিতং (ত্রি) বিস্তৃতং। ভ্রমযুক্তং। যথা। আত্মানমেবাত্মতয়া বিজানতাং তেনৈব জাতং নিখিলং প্রপঞ্চিতং। জ্ঞানেন ভূয়োঽপি চ তৎ প্রলীয়তে রজ্জ্বামহের্ভোগ-ভবাভবৌ যথা॥ ইতি শ্রীভাগবতে ১০ স্কন্ধে ১৪ অধ্যায়ঃ॥

প্রপথঃ (ত্রি) শিথিলঃ। ইতি ভূরিপ্রয়োগঃ॥

প্রপথ্যা (স্ত্রী) হরীতকী। ইতি রাজ-নির্ঘণ্টঃ॥

প্রপদং (ক্লী) পাদাগ্রং। ইত্যমরঃ॥

প্রপন্নঃ (ত্রি) শরণাগতঃ। যথা। গোবিন্দং পুণ্ডরীকাক্ষমনন্তমজমব্যয়ং। কেশবঞ্চ প্রপন্নোঽস্মি কিন্নো মৃত্যুঃ করিষ্যতি॥ ইতি মার্কণ্ডেয়পুরাণে মৃত্যুজয়ো নাম ৭ অধ্যায়ঃ॥

প্রপন্নাড়ঃ (পুং) প্রপুন্নাড়ঃ। চক্রমর্দ্দকঃ। ইতি রত্নমালা॥

প্রপা (স্ত্রী) পানীয়শালিকা। ইত্যমরঃ॥

প্রপাণিঃ (পুং) করস্যাধোদেশঃ। পাণিতলং। ইতি রাজনির্ঘণ্টঃ॥

প্রপাতঃ (পুং) নিরবলম্বনপর্ব্বতাদিপার্শ্বং। আয়ড়ি ইতি খ্যাতং। যস্মাৎ পতনে অবস্থানক্রিয়াবিশেষো নাস্তি। তৎ-পর্য্যায়ঃ। অতটঃ ২ ভৃগুঃ ৩। ইত্যমরঃ॥ নির্ঝরঃ। ইতি মেদিনী॥ অভ্যবস্কন্দঃ। কূলং। ইতি হেমচন্দ্রঃ॥

প্রপায়ী [ন্] (ত্রি) পানকর্ত্তা। রক্ষণকর্ত্তা। ইতি মুগ্ধবোধব্যাকরণং॥

প্রপাবনং (ক্লী) বনভেদঃ। কামারণ্যং। ইতি শব্দমালা

প্রপিতামহঃ (পুং) ব্রহ্মা। ইতি ত্রিকাণ্ড-শেষঃ॥ পিতামহপিতা। ইত্যমরঃ॥

প্রপিতামহী (স্ত্রী) প্রপিতামহপত্নী। যথা। স্বেন ভর্ত্রা সহ শ্রাদ্ধং মাতা ভুঙ্‌ক্তে স্বধাময়ং। পিতামহী চ স্বেনৈব স্বেনৈব প্রপিতামহী॥ ইতি দায়ভাগঃ॥

প্রপুনাড়ঃ } (পুং) প্রপুন্নাড়ঃ। ইত্যমর-
প্রপুন্নড়ঃ } টীকায়াং ভরতঃ॥

প্রপুন্নাটঃ (পুং) চক্রমর্দ্দঃ। ইতি রাজ-নির্ঘণ্টঃ॥

প্রপুন্নাড়ঃ (পুং) চক্রমর্দ্দকঃ। চাকুন্দিয়া ইতি ভাষা। ইত্যমরঃ॥

প্রপুন্নালঃ (পুং) প্রপুন্নাড়ঃ। ইতি ভরত-দ্বিরূপকোষঃ॥

প্রপূরিকা (স্ত্রী) কণ্টকারী। ইতি শব্দ-চন্দ্রিকা॥

প্রপৌণ্ডরীকং (ক্লী হস্তিনাং মনুষ্যাণাঞ্চ চক্ষুষ্যঃ ক্ষুদ্রবিটপঃ। শালপর্ণীপত্রতুল্য-পত্রঃ। পুণ্ডরিয়া খ্যাতঃ। ইত্যমরভরতৌ॥ তৎপর্য্যায়ঃ। চক্ষুষ্যং ২ শীতং ৩ শ্রী-পুষ্পং ৪ পুণ্ডরী ৫। ইতি রত্নমালা॥ পুণ্ডর্য্যং ৬ পুণ্ডরীয়কং ৭ পৌণ্ডরীয়ং ৮ সুপুষ্পং ৯ সানুজং ১০ অনুজং ১১। অস্য গুণাঃ। চক্ষুর্হিতত্বং। মধুরত্বং। তিক্তত্বং। শীতলত্বং। পিত্তরক্তব্রণজ্বর-দাহতৃষানাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অপি চ। পৌণ্ডর্য্যং মধুরং তিক্তং কষায়ং শুক্রলং হিমং। চক্ষুষ্যং মধুরং পাকে বর্ণ্যং পিত্তকফাস্রনুৎ॥ ইতি ভাব-প্রকাশঃ॥

প্রপৌত্রঃ (পুং) পৌত্রস্য পুত্রঃ। তৎপর্য্যায়ঃ। প্রতিনপ্তা ২। ইতি হেমচন্দ্রঃ॥

প্রপৌত্রী (স্ত্রী) পৌত্রস্য কন্যা। ইতি স্মৃতিঃ॥

প্রফুল্লঃ (ত্রি) বিকাশযুক্তঃ। তৎপর্য্যায়ঃ। উৎফুল্লঃ ২ সংফুল্লঃ ৩ ব্যাকোষঃ ৪ বিকচঃ ৫ স্ফুটঃ ৬ ফুল্লঃ ৭ বিকসিতঃ ৮। ইত্যমরঃ॥ প্রবুদ্ধঃ ৯ জৃম্ভঃ ১০ স্মিতঃ ১১ উন্মিষিতঃ ১২ দলিতঃ ১৩ স্ফুটিতঃ ১৪ উচ্ছ্বসিতঃ ১৫ বিজৃম্ভিতঃ ১৬ স্মেরঃ ১৭ বিনিদ্রঃ ১৮ উন্নিদ্রঃ ১৯ বিমুদ্রঃ ২০ হসিতঃ ২১। ইতি হেমচন্দ্রঃ॥

প্রবন্ধঃ (পুং) সন্দর্ভঃ। ইতি ত্রিকাণ্ডশেষঃ॥ কাব্যাদিগ্রথনং। যথা। প্রবন্ধোহয়ং বন্ধোরখিলজগতান্তস্য সরসামিতি হংসদূতঃ॥

প্রবন্ধকল্পনা (স্ত্রী) প্রবন্ধস্য কল্পনা রচনা বহ্বনৃতা স্তোকসত্যা কথা। প্রবন্ধকল্পনাং স্তোকসত্যাং প্রাজ্ঞাঃ কথাং বিদুঃ। পরস্পরাশ্রয়া যা স্যাৎ সা মতাখ্যায়িকা ক্বচিৎ॥ ইতি কোলাহলাচার্য্যঃ। ইত্যমরটীকায়াং ভরতঃ॥

প্রবলঃ (পুং) পল্লবঃ। ইতি শব্দমালা॥ প্রকৃষ্টবলযুক্তে ত্রি। যথা। আক্রান্তঃ স মহাভাগস্তৈস্তদা প্রবলারিভিঃ। ইতি মার্কণ্ডেয়পুরাণং॥ প্রকৃষ্টবলে ক্লীবঞ্চ॥

প্রবলা (স্ত্রী) প্রসারিণী। ইতি রাজনির্ঘণ্টঃ॥ প্রকৃষ্টবলবতী চ॥

প্রবালঃ (পুং ক্লী) রক্তবর্ণবর্ত্তুলাকাররত্নবিশেষঃ। পলা ইতি মুঙ্গা ইতি চ ভাষা। তস্যাধিষ্ঠাত্রী দেবতা মঙ্গলঃ। ইতি জ্যোতিষং॥ তৎপর্য্যায়ঃ। বিদ্রুমঃ ২। ইত্যমরঃ॥ অঙ্গারকমণিঃ ৩ অম্ভোধিবল্লভঃ ৪ ভৌমরত্নং ৫ রক্তাঙ্গঃ ৬ রক্তাকারঃ ৭ লতামণিঃ ৮। অস্য গুণাঃ। মধুরত্বং। অম্লত্বং। কফপিত্তাদিদোষনাশিত্বং। স্ত্রীণাং বীর্য্যকান্তিকরত্বং। ধৃতে মঙ্গলদায়িত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ *॥ অপি চ। সারকত্বং। শীতত্বং। কষায়ত্বং। স্বাদুত্বং। বান্তিকারিত্বং। চক্ষুর্হিতত্বং। ধারণে পাপালক্ষ্মীনাশিত্বঞ্চ। ইতি রাজবল্লভঃ॥ *॥ তস্য শুভলক্ষণং যথা। শুদ্ধং দৃঢ়ং ঘনং বৃত্তং স্নিগ্ধং গাত্রসুরঙ্গকং। সমং গুরু সিরাহীনং প্রবালং ধারয়েৎ শুভং॥ *॥ তস্যাশুভলক্ষণং যথা। গৌরং রঙ্গজলাক্রান্তং বক্রসূক্ষ্মং সকোটরং। রূক্ষকৃষ্ণং লঘু শ্বেতং প্রবালমশুভং ত্যজেৎ॥ ইতি রাজনির্ঘণ্টঃ॥*॥ তস্যোৎপত্ত্যাদি যথা। সূত উবাচ। আদায় শেষস্তস্যান্ত্রং যমস্যাকম্বলাদিষু। চিক্ষেপ তত্র জায়ন্তে বিদ্রুমাঃ সুমহাগুণাঃ॥ তত্র প্রধানং শশলোহিতাভং গুঞ্জাজবাপুষ্পনিভং প্রদিষ্টং। সনীসকং দেবকরোমকঞ্চ স্থানানি তেষু প্রভবং সুরাগং॥ অন্যত্র জাতঞ্চ ন তৎ প্রধানং মূল্যং ভবেচ্ছিল্পিবিশেষযোগাৎ॥ প্রসন্নং কোমলং স্নিগ্ধং সুরাগং বিদ্রুমং হি তৎ। ধন ধান্যকরং লোকে বিষার্ত্তিভয়নাশনং॥ পরীক্ষা পুলকস্যোক্তা রুধিরাখ্যস্য বৈ মণেঃ। স্ফটিকস্য বিদ্রুমস্য রত্নজ্ঞানায় শৌনক॥ ইতি গারুড়ে ৮০ অধ্যায়ঃ॥*॥

অথ বিদ্রুমপরীক্ষা। শ্বেতসাগরমধ্যে তু জায়তে বল্লরী তু যা। বিদ্রুমা নাম রত্নাখ্যা দুর্ল্লভা বজ্ররূপিণী॥ পাষাণং প্রভজত্যেষা প্রযত্নাৎ কথিতা সতী। বিদ্রুমং নাম যদ্রত্নমামনন্তি মনীষিণঃ ॥ * ॥ ব্রহ্মাদি-জাতিভেদেন তচ্চতুর্ব্বিধমুচ্যতে। অরুণং শশরক্তাখ্যং কোমলং স্নিগ্ধমেব চ। প্রবালং বিপ্রজাতিঃ স্যাৎ সুখবেধ্যং মনোরমং॥ জবাবন্ধূকসিন্দূরদাড়িমীকুসুম-প্রভং। কঠিনং দুর্ব্বেধ্যমস্নিগ্ধং ক্ষত্র-জাতিং তদুচ্যতে ॥ পলাশকুসুমাভাসং তথা পাটলসন্নিভং। বৈশ্যজাতির্ভবেৎ স্নিগ্ধং বর্ণাঢ্যং মন্দকান্তিভং ॥ রক্তোৎ-পলদলাকারং কঠিনং ন চিরদ্যুতি। বিদ্রুমং শূদ্রজাতিঃ স্যাদ্বায়ুবেধ্যং তথৈব চ ॥ * ॥ রক্ততা স্নিগ্ধতা দার্ঢ্যং চিরদ্যুতি সুবর্ণতা। প্রবালানাং গুণাঃ প্রোক্তা ধন-ধান্যকরাঃ পরাঃ॥ হিমাদ্রৌ যত্তু সংজাতং তদ্রক্তমতিনিষ্ঠুরং। তত্র লিপ্তো ভবে-ন্নিম্বকল্কোঽতিমধুরঃ স্থিতঃ। তস্য ধারণ-মাত্রেণ বিষবেগঃ প্রশাম্যতি ॥ * ॥ বিব-র্ণতা তু খরতা প্রবালে দূষণদ্বয়ং। রেখা-কাকপদৌ বিন্দুর্যথা বজ্রেষু দোষকৃৎ। তথা প্রবালে সর্ব্বত্র বর্জনীয়ং বিচক্ষণৈঃ॥ রেখা হন্যাদ্যশো লক্ষ্মীমাবর্ত্তঃ কুল-নাশনঃ। পট্টলো রোগকৃৎ খ্যাতো বিন্দু-র্দ্ধনবিনাশকৃৎ॥ ত্রাসঃ সংজনয়েত্ত্রাসং নীলিকা মৃত্যুকারিণী। মূল্যং শুদ্ধপ্রবা-লস্য রূপ্যদ্বিগুণমুচ্যতে॥ ধারণেঽস্যাপি নিয়মো জাতিভেদেন পূর্ব্ববৎ । * । তথাহি। বিরূপজাতিং বিষমং বিবর্ণং খরপ্রবালং প্রবহন্তি যে যে। তে মৃত্যু-মেবাত্মনি বৈ বহন্তি সত্যং বদত্যেষকতো মুনীন্দ্রঃ॥ ইতি যুক্তিকল্পতরৌ প্রবাল-পরীক্ষা ॥ * ॥ কিশলয়ঃ। বীণাদণ্ডঃ। ইতি মেদিনী ॥

প্রবালিকঃ (পুং) জীবশাকঃ। ইতি রাজ-নির্ঘণ্টঃ॥

প্রবালফলং (ক্লী) রক্তচন্দনং। ইতি ভাব-প্রকাশঃ॥

প্রবুদ্ধঃ (ত্রি) পণ্ডিতঃ। প্রফুল্লঃ। ইতি হেম-চন্দ্রঃ॥ জাগৃতঃ। যথা। প্রাতস্তরাং পত-ত্রিভ্যঃ প্রবুদ্ধঃ প্রণমন্নবিং। ইতি ভট্টিঃ ॥

প্রবোধঃ (পুং) বিনিদ্রত্বং। ইতি হেমচন্দ্রঃ॥ প্রকৃষ্টজ্ঞানঞ্চ। যথা। তাবৎ সত্যং জগ-দ্ভাতি প্রবোধে সত্যসম্ভবেৎ। ইত্যাত্ম-বোধগ্রন্থঃ॥

প্রবোধনং (ক্লী) ন্যূনপূর্ব্বগন্ধস্য চন্দনাদেঃ প্রযত্নবিশেষেণ পুনঃ পূর্ব্বসৌগন্ধ্যোৎ-পাদনং। তৎপর্য্যায়ঃ। অনুবোধঃ ২। ইত্যমরভরতৌ॥ বোধজননঞ্চ॥

প্রবোধনী (স্ত্রী) দুরালভা। ইতি রাজনির্ঘণ্টঃ। শ্রীহরেরুত্থানৈকাদশ্যাদিঃ। অথ প্রবো-ধনীকৃত্যং। শয়ন্যামিব কৃত্বাস্যাং ক্ষীরা-ম্ভোধিমহোৎসবং। প্রবোধ্য কৃষ্ণং সংপূজ্য বিধিনারোহয়েদ্রথং ॥ * ॥ অথ প্রবোধনী-কৃত্যনিত্যতা। স্কান্দে তত্রৈব। জন্ম-প্রভৃতি যৎ পুণ্যং নরেণোপার্জিতং ভুবি। বৃথা ভবতি তৎ সর্ব্বং ন কৃত্বা বোধ-বাসরং॥ * ॥ অথ প্রবোধনীমাহাত্ম্যং

তত্রৈব। প্রবোধন্যাশ্চ মাহাত্ম্যং পাপঘ্নং পুণ্যবর্দ্ধনং। মুক্তিদং কৃতবুদ্ধীনাং শৃণু ত্বং মুনিসত্তম ॥ তাবদ্গর্জ্জতি বিপ্রেন্দ্র গঙ্গা ভাগীরথী ক্ষিতৌ। যাবন্নায়াতি পাপঘ্নী কার্ত্তিকে হরিবোধনী ॥ তাবদ্গর্জ্জন্তি তীর্থানি আসমুদ্রসরাংসি চ। যাবৎ প্রবোধনী বিষ্ণোস্তিথির্নায়াতি কার্ত্তিকে ॥ বাজপেয়সহস্রাণি অশ্বমেধশতানি চ। একেনৈবোপবাসেন প্রবোধন্যাং লভেন্নরঃ ॥ দুর্ল্লভঞ্চৈব দুষ্প্রাপং ত্রৈলোক্যে সচরাচরে। তদপি প্রার্থিতং বিপ্র দদাতি হরিবোধনী ॥ ঐশ্বর্য্যং সন্ততিং প্রজ্ঞাং রাজ্যঞ্চ সুখসম্পদঃ। দদাত্যুপোষিতা বিপ্র হেলয়া হরিবোধনী ॥ মেরুমন্দরতুল্যানি পাপান্যত্যুর্জ্জিতান্যপি। একেনৈবোপবাসেন দহতে হরিবোধনী ॥ পৃথিব্যাং যানি দানানি দত্ত্বা যৎ ফলমাপ্নুতে। একেনৈবোপবাসেন দদাতি হরিবোধনী ॥ কিঞ্চ। জাতঃ স এব সুকৃতী কুলং তেনৈব পাবিতং। কার্ত্তিকে মুনিশার্দ্দূল কৃতা যেন প্রবোধনী ॥ যানি কানি চ তীর্থানি ত্রৈলোক্যে সম্ভবন্তি চ। তানি তস্য গৃহে সম্যক্ যঃ করোতি প্রবোধনীং ॥ সর্ব্বং কৃত্যং পরিত্যজ্য তুষ্ট্যর্থং চক্রপাণিনঃ। উপোষ্যৈকাদশী সম্যক্ কার্ত্তিকে হরিবোধনী ॥ কিং তস্য বহুভিঃ কৃত্যৈঃ পরলোকপ্রদৈর্ম্মুনে। সকৃচ্চোপোষিতা যেন কার্ত্তিকে হরিবোধনী ॥ স জ্ঞানী স হি যোগী চ স তপস্বী জিতেন্দ্রিয়ঃ। স্বর্গমোক্ষৌ চ তস্যাস্তামুপাস্তে হরিবোধনীং ॥ বিষ্ণোঃ প্রিয়তমা হ্যেষা ধর্ম্মসারস্য দায়িনী। ইমাং সকৃদুপোষ্যৈব মুক্তিভাগী ভবেন্নরঃ ॥ প্রবোধনীমুপোষ্যৈব ন গর্ত্তং বিশতে নরঃ। সর্ব্বধর্ম্মান্ পরিত্যজ্য তস্মাৎ কুর্ব্বীত নারদ ॥ স্নানং দানং তপো হোমঃ সমুদ্দিশ্য জনার্দ্দনং। নরৈর্যৎ ক্রিয়তে বিপ্র প্রবোধন্যাং তদক্ষয়ং॥ মহাব্রতমিদং পুত্র মহাপাপৌঘনাশনং। প্রবোধবাসরং বিষ্ণোর্বিধিবৎ সমুপোষয়েৎ ॥ ব্রতেনানেন দেবেশং পরিতোষ্য জনার্দ্দনং। বিরাজয়ন্ দিশো দীপ্ত্যা প্রয়াতি ভুবনং হরেঃ ॥ পাদ্মে চ তত্রৈব। দুগ্ধাব্ধিভোগিশয়নে ভগবাননন্তো যস্মিন্দিনে স্বপিতি চাথ বিবুধ্যতে চ। তস্মিন্ননন্যমনসামুপবাসভাজাং পুংসাং দদাত্যভিমতং গরুড়াঙ্কশায়ী ॥ বারাহে চ। উপবাসাসমর্থানাং সদৈব পৃথুলোচনে। একা সা দ্বাদশী পুণ্যা সমুপোষ্যা প্রবোধনী ॥ তস্যামারাধ্য বিশ্বেশং জগতামীশ্বরেশ্বরং। প্রাপ্নোতি সকলং তদ্ধি দ্বাদশদ্বাদশীব্রতং ॥ উত্তরাঙ্গারকযুতা যদি সা ভবতি প্রিয়ে। তদা সা মহতী পুণ্যা কোটিকোটিগুণোত্তরা ॥ শয়নে বোধনে চৈব কটিদানে চ সুন্দরি। উপোষ্যৈব বিধানেন যান্তি মল্লয়তাং নরাঃ ॥ একাদশী সোমযুতা কার্ত্তিকে মাসি ভাবিনি। উত্তরাভাদ্রসংযোগে অনন্তা সা প্রকীর্ত্তিতা ॥ তস্যাং যৎ ক্রিয়তে ভদ্রে সর্ব্বমানন্ত্যমশ্নুতে। অনন্তপুণ্যফলদা তেনানন্তা স্মৃতা ফলে ॥ তত্রৈব শ্রীযমনারদ-

সংবাদে। অন্যচ্চ তে প্রবক্ষ্যামি গুহ্যাদ্গুহ্যতরং মুনে। কার্ত্তিকেঽমলপক্ষে তু সাক্ষাদেকাদশী স্মৃতা ॥ ভক্তিপ্রদা হরেঃ সা তু নাম্না খ্যাতা প্রবোধনী। যা সা বিষ্ণোঃ পরা মূর্ত্তিরব্যক্তানেকরূপিণী ॥ সা ক্ষিপ্তা মানুষে লোকে দ্বাদশী মুনিপুঙ্গব। শ্রীমথুরায়াঞ্চ বিশেষতঃ পাদ্মে তত্রৈব। তাবদ্গর্জ্জন্তি তীর্থানি বাজিমেধাদয়ো মখাঃ। মথুরায়াং প্রিয়া বিষ্ণোর্যাবন্নায়াতি বোধনী ॥ সংসারদাবতপ্তানাং কামসৌখ্যপিপাসিনাং। শ্রীকৃষ্ণপাদপদ্মস্য সান্নিধ্যং শীতলং গৃহং ॥ ভবপান্থজনানাং বৈ প্রাপিকেয়ং প্রবোধনী। কথং ন সেব্যতে মূঢ়ৈর্মথুরায়াং কিমন্যতঃ ॥ * ॥ অথ বিশেষতঃ প্রবোধন্যাং শ্রীভগবৎপূজাদিমাহাত্ম্যং। স্কান্দে তত্রৈব প্রবোধনীমাহাত্ম্যে। যেঽর্চ্চয়ন্তি নরাস্তস্যাং ভক্ত্যা দেবন্তু মাধবং। সমুপোষ্য প্রমুচ্যন্তে পাপৈস্তে সমুপার্জ্জিতৈঃ ॥ বাল্যে যচ্চার্জ্জিতং বৎস যৌবনে বার্দ্ধকে চ যৎ। সপ্তজন্মকৃতং পাপং স্বল্পং বা যদি বা বহু ॥ শুষ্কার্দ্রং মুনিশার্দ্দূল সুগুহ্যমপি নারদ। তৎ ক্ষালয়তি গোবিন্দস্তিথৌ তস্যাং প্রপূজিত কিঞ্চ। প্রবোধবাসরে বিষ্ণোঃ কুরুতে চ হরেঃ কথাং। সপ্তদ্বীপাবনীদানে যৎ ফলং তল্লভেন্মুনে ॥ বারাহে চ। কৌমুদস্য তু মাসস্য যা সিতা দ্বাদশী ভবেৎ। অর্চ্চয়েদ্যস্তু মাং তত্র তস্য পুণ্যফলং শৃণু ॥ যাবল্লোকা হি বর্ত্তন্তে যাবত্ত্বঞ্চৈব মাধবি। মদ্ভক্তো জায়তে তাবদন্যভক্তো ন জায়তে ॥ * ॥ তস্যা অনুষ্ঠানং যথা। ব্রহ্মোবাচ। শৃণু মে ভক্তিতঃ পুত্র বোধন্যেকাদশী হরেঃ। উপোষ্যা যেন বিধিনা তং বিপ্র প্রবদামি তে ॥ কার্ত্তিকে শুক্লপক্ষে তু দশম্যাং নিয়তঃ শুচিঃ। স্নাত্বা দেবার্চ্চনং কৃত্বা বহ্নিকার্য্যং যথাবিধি ॥ আচান্তঃ সুপ্রসন্নাত্মা হবিষ্যান্নং সুসংস্কৃতং। ভুক্ত্বাচম্য স্বপেৎ সম্যক্ কৃত্বা শৌচঞ্চ পাদয়োঃ ॥ রাত্রেশ্চ পশ্চিমে যামে সমুত্থায় যথাবিধি। কৃত্বা মূত্রপুরীষে তু শৌচং কুর্য্যাদতন্দ্রিতঃ ॥ কৃত্বাষ্টাঙ্গুলমাত্রন্তু ক্ষীরবৃক্ষসমুদ্ভবং। ভক্ষয়েদ্দন্তকাষ্ঠঞ্চ স্নাত্বাচামেৎ প্রযত্নতঃ ॥ মৃষ্ট্বাঙ্গানি তথাদ্ভিশ্চ চিরং ধ্যায়েজ্জনার্দ্দনং। অতসীপুষ্পসঙ্কাশং কমলাক্ষং চতুর্ভুজং ॥ শঙ্খচক্রগদাশার্ঙ্গপীতবস্ত্রং কিরীটিনং। প্রসন্নবদনং দেবং সর্ব্বলক্ষণলক্ষিতং ॥ ততো অনুদয়ে বারিহস্তেন পরিগৃহ্য চ। কুশান্বিতং প্রগৃহ্নীয়াৎ নিয়মং বিষ্ণুতুষ্টয়ে ॥ ধ্যাত্বা জলং গৃহীত্বা তু ভানুরূপং জনার্দ্দনং। দৃষ্ট্বার্ঘ্যং দাপয়েৎ পশ্চাৎ করতোয়েন মানবং ॥ এবমুচ্চারয়েদ্বাচং তস্মিন্ কালে মহামুনে। একাদশ্যাং নিরাহারঃ স্থিত্বা চৈবাপরেঽহনি। ভোক্ষ্যেঽহং পুণ্ডরীকাক্ষ শরণং মে ভবাচ্যুত ॥ এবমুক্ত্বা ততঃ সম্যক্ নিত্যকর্ম্ম সুকর্ম্মধীঃ। সমর্পয়েদ্বিধানেন বিষ্ণুং সংপূজয়েন্মুনে ॥ সহস্রসংখ্যয়া সুস্থঃ সাবিত্রীং সংজপেদ্দ্বিজঃ। সর্ব্বপাপক্ষয়করীং ব্রতস্য পরিপূর্ত্তয়ে ॥ ইতি পাদ্মোত্তরখণ্ডে

১২৬ অধ্যায়ঃ ॥ * ॥ অথ প্রবোধকাল-নির্ণয়ঃ। ভবিষ্যে। আ-ভা-কা-সিতপক্ষেষু মৈত্রশ্রবণরেবতী। আদিমধ্যাবসানেষু প্রস্বাপাবর্ত্তনাদিকং ॥ পাদ্মে। পৌষ্ণ-শেষো যদা নাহ্নি মৈত্রাদ্যমপি নো নিশি। দ্বাদশ্যামপি তৎ কুর্য্যাদুত্থানং শয়নং হরেঃ॥ নিশি স্বাপো দিবোত্থানং সন্ধ্যায়াং পরি-বর্ত্তনং। অন্যত্র পাদযোগেঽপি দ্বাদশ্যা-মেব কারয়েৎ ॥ বারাহে চ। অপাদ-নিয়মস্তত্র স্বাপে বা পরিবর্ত্তনে। পাদ-যোগো যদা ন স্যাদৃক্ষেণাপি তদা ভবেৎ ॥ কিঞ্চ স্কান্দে। রেবত্যন্তো যদা রাত্রৌ দ্বাদশ্যা চ সমন্বিতঃ। তদা বিবুধ্যতে বিষ্ণু-র্দিনান্তে প্রাপ্য রেবতীং ॥ রেবত্যাদি-রথান্তো বা দ্বাদশ্যা চ বিনা ভবেৎ। উভয়োরপ্যভাবে তু সন্ধ্যায়াঞ্চ মহোৎ-সবঃ ॥ বারাহে চ। দ্বাদশ্যাং সন্ধিসময়ে নক্ষত্রাণামসম্ভবে। আ-ভা-কা-সিতপক্ষেষু শয়নাবর্ত্তনাদিকং ॥ অতএব পুষ্করপুরাণে। যস্য যস্য তু দেবস্য যন্নক্ষত্রং তিথিশ্চ যা। তস্য দেবস্য তস্মিংশ্চ শয়নাবর্ত্তনা-দিকং ॥ * ॥ অথ ভগবৎপ্রবোধনবিধিঃ। শয়ন্যামিব নিষ্পাদ্য মহাপূজাং জলাশয়ে। কৃষ্ণং নীত্বাথ সঙ্কল্পং কৃত্বা তঞ্চ প্রবো-ধয়েৎ ॥ তত্র মন্ত্রঃ। ব্রহ্মেন্দ্ররুদ্রাগ্নি-কুবেরসূর্য্যসোমাদিভির্ব্বন্দিতপাদপদ্মঃ। বুধ্যস্ব দেবেশ জগন্নিবাস মন্ত্রপ্রভাবেণ সুখেন দেব ॥ ইয়ন্তু দ্বাদশী দেব প্রবো-ধার্থং বিনির্ম্মিতা। ত্বয়ৈব সর্ব্বলোকানাং হিতার্থং শেষশায়িনা ॥ উত্তিষ্ঠোত্তিষ্ঠ গোবিন্দ ত্যজ নিদ্রাং জগৎপতে। ত্বয়ি সুপ্তে জগৎ সুপ্তমুত্থিতে চোত্থিতং ভবেৎ॥ গতা মেঘা বিয়চ্চৈব নির্ম্মলং নির্ম্মলা দিশঃ। শারদানি চ পুষ্পাণি গৃহাণ মম কেশবেতি ॥ উত্তিষ্ঠোত্তিষ্ঠেত্যত্র ক্বচি-চ্চৈবং। ত্বয়ি সুপ্তে জগন্নাথে জগৎ সুপ্তং ভবেদিদং। উত্থিতে চেষ্টতে সর্ব্বমুত্তিষ্ঠো-ত্তিষ্ঠ মাধবেতি ॥ বারাহে চ। ব্রহ্মেন্দ্র রুদ্রৈরবিতর্ক্যভাবো ভবানৃষির্ব্বন্দিতবন্দ-নীয়ঃ। প্রাপ্তা তব দ্বাদশী কৌমুদাখ্যা জাগৃষ্ব জাগৃষ্ব চ লোকনাথ ॥ মেঘা গতা নির্ম্মলপূর্ণচন্দ্রঃ শারদ্যপুষ্পাণি চ লোক-নাথ। অহং দদানীতি চ ভক্তিহেতো-র্জ্জাগৃষ্ব জাগৃষ্ব চ লোকনাথ ॥ শ্রুতিশ্চ। ইদং বিষ্ণুর্ব্বিচক্রমে ত্রেধা নিদধে পদং সমূঢ়মস্য পাংশুলে ইত্যাদি। ততস্তল্লাৎ সমুত্থাপ্য কৃষ্ণং ঘণ্টাদিনিস্বনৈঃ। তীরে সুখং নিবেশ্যাথ প্রার্থয়েত্তদনুগ্রহং ॥ তথা হি তৃতীয়স্কন্ধে শ্রীব্রহ্মস্তবৌ। সোঽসা বদভ্রকরুণো ভগবান্ বিবৃদ্ধপ্রেমস্মিতেন নয়নাম্বুরুহং বিজৃম্ভন্। উত্থায় বিশ্ববিজ-য়ায় চ নো বিষাদং মাধ্ব্যা গিরাপনয়তাৎ পুরুষঃ পুরাণঃ ॥ ইতি। ততঃ পুষ্পা-ঞ্জলিং দত্ত্বা সংস্থাপ্য বিধিবৎ প্রভুং। নীরাজ্য ন্যাসপূর্ব্বঞ্চ বস্ত্রাদীনি সমর্পয়েৎ॥ তথা চ ব্রাহ্মে। একাদশ্যাস্তু শুক্লায়াং কার্ত্তিকে মাসি কেশবং। প্রসুপ্তং বোধ-য়েদ্রাত্রৌ ভক্তিশ্রদ্ধাসমন্বিতঃ ॥ নৃত্যৈ-র্গীতৈস্তথা বাদ্যৈর্ঋগ্‌যজুঃসামমঙ্গলৈঃ। বিনা পণবশব্দৈশ্চ পুরাণশ্রবণেন চ ॥

বাসুদেবকথাভিশ্চ স্তোত্রৈরন্যৈশ্চ বৈষ্ণবৈঃ। সুভাষিতৈরিন্দ্রজালৈর্ভূমিশোভাভিরেব চ॥ পুষ্পৈর্ধূপৈশ্চ নৈবেদ্যৈর্দীপবৃক্ষৈঃ সুশোভনৈঃ। হোমৈর্ভক্ষৈরপূপৈশ্চ ফলৈঃ শাকৈশ্চ পায়সৈঃ ॥ ইক্ষোর্বিকারৈর্মধুনা দ্রাক্ষাক্ষৌদ্রৈঃ সদাড়িমৈঃ। কুঠেরকস্য মঞ্জর্য্যা মালত্যা নবনেন চ ॥ নবনং পুষ্পবিশেষঃ। হৃদ্যাভাং শ্বেতরক্তাভ্যাং চন্দনাভ্যাঞ্চ সর্ব্বদা। কুঙ্কুমালক্তকাভ্যাঞ্চ রক্তসূত্রৈঃ সকুঙ্কুমৈঃ ॥ তথা নানাবিধৈঃ পুষ্পৈর্দ্রব্যৈর্বীরক্রয়াহৃতৈঃ। এবমেব প্রায়ঃ পাদ্মে চ তথা স্কান্দে চ। বহুপুষ্পৈর্ব্বহুফলৈঃ কর্পূরাগুরুকুঙ্কুমৈঃ। হরেঃ পূজা বিধাতব্যা কার্ত্তিকে বোধবাসরে ইতি ॥ ইত্থং কৃত্বা মহাপূজাং মহানীরাজনং তথা। স্বব্রতান্যর্পয়েৎ কৃষ্ণে সপুষ্পাক্ষতবারিণা ॥ বেদস্তুত্যাদিনা স্তুত্বা স্বস্ত্যস্ত্বিত্যাদিনা প্রভুং। সংপ্রার্থ্য গীতবাদ্যাদিঘোষৈরারোহয়েদ্রথং ॥ তথা চ ভবিষ্যোত্তরে শ্রীকৃষ্ণযুধিষ্ঠিরসংবাদে। মহাতূর্য্যরবৈ রাত্রৌ ভ্রাময়েৎ স্যন্দনে স্থিতং। উত্থিতং দেবদেবেশং নগরে পার্থিবঃ স্বয়ং। দীপোদ্যোতকরে মার্গে নৃত্যগীতসমাকুলে ॥ * ॥ অথ রথযাত্রামাহাত্ম্যং ভবিষ্যোত্তরে তত্রৈব। যং যং দামোদরঃ পশ্যেদুত্থিতো ধরণীধরঃ। তং তং প্রদেশং রাজেন্দ্র সর্ব্বং স্বর্গায় কল্পয়েৎ ॥ কিঞ্চ। যাবৎ পদানি কৃষ্ণস্য রথস্যাকর্ষণং নরঃ। করোতি ক্রতুভিস্তানি তুল্যানি নরনায়ক ॥ রথস্থং যে নিরীক্ষন্তে কৌতুকেনাপি কেশবং। দেবতানাং গণাঃ সর্ব্বে ভবন্তি শ্বপচাদয়ঃ॥ স্ত্রিয়োঽপি মুক্তিমায়ান্তি রথযাত্রাপরায়ণাঃ। পিতৃমাতৃভর্ত্তৃকুলং নয়ন্তি হরিমন্দিরং ॥ কুর্ব্বন্তি নর্ত্তকীরূপং রথাগ্রে কৌতুকান্বিতং। অপ্সরোভিঃ সহ ক্রীড়াং কুর্ব্বন্তীন্দ্রাশ্চতুর্দ্দশ॥ যে রথাগ্রে প্রকুর্ব্বন্তি গীতবাদ্যাদি মানবাঃ। দেবলোকাৎ পরিভ্রষ্টা জায়ন্তে মণ্ডলেশ্বরাঃ॥ মৌল্যেন স্যন্দনস্যাগ্রে গায়মানাশ্চ গায়কাঃ। বাদকৈঃ সহ রাজেন্দ্র প্রয়ান্তি হরিমন্দিরং ॥ রথোৎসবে মুকুন্দস্য যেষাং হর্ষোঽপি জায়তে। তেষাং ন নারকী পীড়া যাবদিন্দ্রাশ্চতুর্দ্দশ ॥ রথোৎসবস্য মাহাত্ম্যং কলৌ বিতনুতে হি যঃ। পুণ্যবুদ্ধ্যা বিশেষেণ লোভেনাপ্যথবা নরঃ॥ সপ্তদ্বীপসমুদ্রান্তা রত্নধান্যসমন্বিতা। সশৈলবনপুষ্পাঢ্যা তেন দত্তা মহী ভবেৎ॥ অন্যত্র চ। বোধনী জগদাধারা কার্ত্তিকে শুক্লপক্ষতঃ। রথস্থো যত্র ভগবাংস্তুষ্টো যচ্ছতি বাঞ্ছিতং ॥ ভজন্তে যে রথারূঢ়ং দেবং সর্ব্বেশ্বরেশ্বরং। তেষাং যাত্রা কৃতা নৃণাং কামানিষ্টান্ প্রযচ্ছতি॥ শ্রীকৃষ্ণরথশোভাং যে প্রকুর্ব্বন্তি প্রহর্ষিতাঃ। তেষাং মনোরথাবাপ্তিং যচ্ছতে পুরুষোত্তমঃ॥ কৃষ্ণস্য রথশোভাং যে প্রকুর্ব্বন্তি স্বশক্তিতঃ। বাঞ্ছিতং তেভ্যো যচ্ছন্তি নিত্যং সূর্য্যাদয়ো গ্রহাঃ॥ কৃষ্ণস্য রথশোভাং যে প্রকুর্ব্বন্তি সুহর্ষিতাঃ। পদে পদে তথা পুত্র পুণ্যং তেষাং প্রয়াগজং ॥ রথযাত্রাস্থিতে কৃষ্ণে জয়েতি প্রবদন্তি যে।

জয়েতি চ পুনর্যে বৈ শৃণু পুণ্যং বদাম্যহং ॥ গঙ্গাদ্বারে প্রয়াগে চ গঙ্গাসাগরসঙ্গমে। বারাণস্যাদিতীর্থেষু দেবানাঞ্চৈব দর্শনে॥ যৎ পুণ্যং কবিভিঃ প্রোক্তং কাৎস্নেন চ নরেশ্বর। জয়শব্দে কৃতে বিষ্ণৌ রথস্থে তৎ ফলং স্মৃতং ॥ রথস্থিতো নরৈর্যস্তু পূজিতো ধরণীধরঃ। যথালাভোপপন্নৈশ্চ পুষ্পৈর্ভক্ত্যা সমর্চ্চিতঃ॥ দদাতি বাঞ্ছিতান্ কামানন্তে চ পরমং পদং। মঙ্গলং যে প্রকুর্ব্বন্তি ধূপদীপাংস্তথা স্তবং॥ নৈবেদ্যং বস্ত্রপূজাঞ্চ ভক্ত্যা নীরাজনং হরেঃ। রথারূঢ়স্য কৃষ্ণস্য সংপ্রাপ্তে হরিবাসরে॥ ফলং ন তন্ময়া জ্ঞাতং জানাতি যদি কেশবঃ। ব্রহ্মস্বহারী গোঘ্নশ্চ ভ্রূণহা ব্রহ্মনিন্দকঃ॥ মহাপাতকযুক্তোঽপি ব্রহ্মহা গুরুতল্পগঃ। মদ্যপঃ সর্ব্বপাপোঽপি কলিকালেন মোহিতঃ॥ রথাগ্রতঃ পদৈকেন মুচ্যতে সর্ব্বপাতকৈঃ। কিঞ্চান্যত্র। রথারূঢ়ে মহাবিষ্ণৌ যে কুর্ব্বন্তি জয়স্বনং। পূজাঞ্চাখিলপাপেভ্যো মুক্তা যান্তি হরেঃ পদং॥ কিঞ্চ। রথস্যাকর্ষণং পূর্ব্বং কুরুতে দৈত্যনায়কঃ। ততঃ সুরাঃ সিদ্ধসঙ্ঘা যক্ষা গন্ধর্ব্বমানবাঃ॥ ইত্থঞ্চ রথযাত্রায়া বিধির্ব্যক্তঃ স্বতোঽভবৎ। অথাপি কশ্চিত্তত্রান্যো বিশেষোঽপি বিতন্যতে ॥ * ॥ অথ রথযাত্রাবিধিঃ। শ্রীকৃষ্ণে তু রথারূঢ়ে কৃত্বা জয়জয়ধ্বনিং। নিষ্পাদ্য চ মহাপূজামাশীর্ব্বাক্যানি কীর্ত্তয়েৎ॥ তথা চ বিষ্ণুধর্ম্মে। বক্ত্রং নীলোৎপলরুচি লসৎকুণ্ডলাভ্যাং সুমৃষ্টং চন্দ্রাকারং রচিততিলকং চন্দনেনাক্ষতৈশ্চ। গত্বা লীলাং জনসুখকরীং প্রেক্ষণেনামৃতৌঘং পদ্মাবাসাং সততমুরসা ধারয়ন্ পাতু বিষ্ণুঃ॥ যুক্তঃ শৈব্যাদিবাহৈর্ম্মধুরতররণৎকিঙ্কিণীজালমালৈ রত্নৌঘৈর্ম্মৌক্তিকানামবিরতমণিভিঃ সংভৃতৈশ্চৈব হারৈঃ। হৈমৈঃ কুম্ভৈঃ পতাকাশিবতররুচিভির্ভূষিতঃ কেতুমুখ্যৈশ্ছত্রৈর্ব্রহ্মেশবন্দ্যো দুরিতহরহরেঃ পাতু জৈত্রো রথো বঃ॥ মোদন্তাং সুজনা হৃনির্দ্দিতধিয়ঃ স্রস্তাখিলোপদ্রবাঃ স্বস্থাঃ সুস্থিরবুদ্ধয়ঃ প্রতিহতামিত্রা রমন্তাং সুখং। রে দৈত্যা গিরিগহ্বরাণি গহনান্যাশু ব্রজধ্বং ভয়াদ্দৈত্যারির্ভগবানয়ং যদুপতির্যানং সমারোহতি॥ পলায়ধ্বং পলায়ধ্বং রে রে দিতিজদানবাঃ। সংরক্ষণায় লোকানাং রথারূঢ়ো নৃকেশরীতি॥ ততো বিচিত্রগদ্যানি পঠিত্বাথ মহাপ্রভোঃ। মহাপ্রসাদমালাঞ্চ স্বীকুর্য্যাৎ পরয়া মুদা॥ * ॥ তন্মাহাত্ম্যঞ্চোক্তং। ভক্ত্যা গৃহ্লাতি যো মালাং বৈষ্ণবীং মঙ্গলাশ্রয়াং। ন তেষাং দুর্লভং কিঞ্চিদিহ লোকে পরত্র চ॥ তস্মাৎ সর্ব্বপ্রযত্নেন সর্ব্বকামসমৃদ্ধয়ে। মালামেতাং প্রগৃহ্লীয়াৎ সৌখ্যমোক্ষপ্রদায়িনীং॥ ইতি। সংচিন্ত্যাকৃষ্যমাণঞ্চ শ্রীপ্রহ্লাদাদিভী রথং। আকৃষ্য প্রেরয়ন্ পূর্য্যাং ভ্রাময়েদ্বৈষ্ণবৈঃ সহ॥ তথা চ ভবিষ্যোত্তরে তত্রৈব। নৃত্যমানৈর্ভাগবতৈর্গীতবাদিত্রনিস্বনৈঃ। ভ্রাময়েৎ স্যন্দনং বিষ্ণোঃ পুরমধ্যে সমন্ততঃ॥ কিঞ্চ। প্রবোধবাসরে

প্রাপ্তে কার্ত্তিকে পাণ্ডুনন্দন। দেবালয়েষু সর্ব্বেষু পুরমধ্যে সমন্ততঃ ॥ ভ্রাময়েত্তূর্য্যনির্ঘোষৈ রথস্থং ধরণীধরং। কিঞ্চ। রথাগমে মুকুন্দস্য পুরশোভাস্তু কারয়েৎ। সর্ব্বতো রমণীয়ন্তু পতাকৈরুপশোভিতং॥ তোরণৈর্ব্বহুভির্যুক্তৈ রম্ভাস্তম্ভৈশ্চ শোভিতং। স্থানে স্থানে মহীপাল কর্ত্তব্যং পুণ্যসংযুতং॥ বিচিত্ররথশোভা চ কর্ত্তব্যা ভাবিতৈর্ন রৈরিতি। রথেন গচ্ছন্ ভগবাননুগম্যোঽখিলৈর্জনৈঃ। স্বস্বগেহাগতশ্চার্চ্চ্যোঽন্যথা দোষো মহান্ ভবেৎ ॥ * ॥ অথ রথানুগমননিত্যতা। তত্রৈব। রথেন সহ গচ্ছন্তি পার্শ্বতঃ পৃষ্ঠতোঽগ্রতঃ। বিষ্ণুনৈব সমাঃ সর্ব্বে ভবন্তি শ্বপচাদয়ঃ॥ রথস্থং যে ন গচ্ছন্তি ভ্রমমাণং জনার্দ্দনং। বিপ্রাধ্যয়নসম্পন্না ভবন্তি শ্বপচাধমাঃ॥ কিঞ্চ। যেষাং গৃহাগতো যাতি রথস্থো মধুসূদনঃ। পূজা তৈস্তৈঃ প্রকর্ত্তব্যা বিত্তশাঠ্যবিবর্জ্জিতৈঃ॥ অনর্চ্চিতো যদা যাতি গৃহাদ্‌যস্য মহীধরঃ। পিতরস্তস্য বিমুখা বর্ষাণাং দশ পঞ্চ চ॥ যঃ পুনঃ কুরুতে পূজাং গৃহায়াতে তু মাধবে। বসতে শ্বেতদ্বীপে তু যাবদিন্দ্রাশ্চতুর্দ্দশ ॥ অন্যত্র। নানুব্রজতি যো মোহাদ্‌ব্রজন্তং জগদীশ্বরং। জ্ঞানাগ্নিদগ্ধকর্ম্মাপি স ভবেদ্‌ব্রহ্মরাক্ষসঃ॥ ইতি। অথ স্বমন্দিরং নীত্বা পূর্ব্ববৎ পূজয়েৎ প্রভুং। রাত্রৌ জাগরণং কুর্য্যাদ্বিধিবদ্ বৈষ্ণবৈঃ সমং ॥*॥ অথ প্রবোধনীজাগরণমাহাত্ম্যং। স্কান্দে তত্রৈব। পূর্ব্বজন্মসহস্রেষু পাপং যৎ সমুপার্জ্জিতং। জাগরেণ প্রবোধন্যাং দহ্যতে তূলরাশিবৎ॥ কৃত্বাপি পাতকং ঘোরং ব্রহ্মহত্যাদিকং নরঃ। কৃত্বা জাগরণং বিষ্ণোর্ধূতপাপো ভবেন্মুনে॥ কর্ম্মণা মনসা বাচা পাপং যৎ সমুপার্জ্জিতং। ক্ষালয়েত্তচ্চ গোবিন্দঃ প্রবোধন্যাস্তু জাগরে ॥ দুষ্প্রাপ্যং যৎ ফলং বিপ্রৈরশ্বমেধাদিভির্ম্মখৈঃ। প্রাপ্যতে তৎ সুখেনৈব প্রবোধন্যাস্তু জাগরে॥ আপ্লুত্য সর্ব্বতীর্থানি দত্ত্বা গাং কাঞ্চনীং মহীং। ন তৎফলমবাপ্নোতি যৎ কৃত্বা জাগরং হরেঃ॥ চন্দ্রসূর্য্যোপরাগে তু যৎ ফলং পরিকীর্ত্তিতং। তৎসহস্রগুণং পুণ্যং প্রবোধন্যাস্তু জাগরে ॥ স্নানং দানং তপো হোমঃ স্বাধ্যায়শ্চার্চ্চনং হরেঃ। তৎ সর্ব্বং কোটিগুণিতং প্রবোধন্যাস্তু জাগরে ॥ সমতীতং ভবিষ্যঞ্চ বর্ত্তমানং কুলাযুতং। বিষ্ণুলোকং নয়ত্যাশু জাগরেণ প্রবোধনী॥ চলন্তি পিতরো হৃষ্টা বিষ্ণুলোকমলঙ্কৃতাঃ। বিমুক্তা নারকৈর্দুঃখৈঃ কর্ত্তুঃ কৃষ্ণপ্রজাগরং ॥ ভার্য্যাপক্ষে তু যে জাতা মাতৃতঃ পিতৃতস্তথা। তারয়েন্নাত্র সন্দেহঃ প্রবোধন্যাং তু জাগরে॥ কিঞ্চ। ফলৈর্নানাবিধৈর্দ্রব্যৈঃ প্রবোধন্যাস্তু জাগরে। শঙ্খে তোয়ং সমাদায় অর্ঘ্যং দদ্যাজ্জনার্দ্দনে ॥ যৎ ফলং সর্ব্বদানেষু সর্ব্বতীর্থেষু যৎ ফলং। তৎ সর্ব্বং কোটিগুণিতং দত্ত্বার্ঘ্যং বোধবাসরে॥ পাদ্মে চ তত্রৈব। অন্যত্রাপি প্রিয়া বিষ্ণোর্জাগরে স্যাৎ প্রবোধনী। কিং পুনর্ম্মথুরায়াং সা ততো বৈ জন্মসদ্মনি॥ একৈবৈকাদশী

কৃষ্ণজন্মগেহে কৃতা নরৈঃ। ততোঽধিকং ন কর্ত্তব্যং লোকে কিঞ্চন বিদ্যতে॥ রাত্রৌ জাগরণং তত্র প্রীত্যা কুর্ব্বন্তি যে নরাঃ। সংসারে মোহস্বপ্নান্তে সদা জাগ্রতি জাগ্রতি॥ কিঞ্চ। তত্রৈব শ্রীরাধিকোপাখ্যানান্তে। সুবোধনীজাগরপুণ্যবৈভবাৎ প্রসন্ন ঈশো বিধিবাক্যসত্যকৃৎ। চকার রাসোৎসবনর্ত্তনং সহ বৃন্দাবনেঽন্যাভিরপীহ রাধয়া॥ সা নৃত্যমানাদ্ভুতগোপরূপিণা কৃষ্ণেন জন্মান্তরবাঞ্ছিতেন। রাধা মহাপ্রেমজবাকুলেন্দ্রিয়া নিন্যেঽন্যলোকং কথয়া কৃতার্থতাং॥ তস্মাৎ সুবোধনীং কৃত্বা রাত্রৌ কৃত্বা চ জাগরং। সুপ্তোত্থিতং হরিং দৃষ্ট্বা কা ভীঃ সংসারজা দ্বিজাঃ॥ মথুরায়ান্তু কিং বাচ্যং জাগরে হরিসন্নিধৌ। কার্ত্তিকে বোধনীং প্রাপ্য ততঃ শ্রেয়ঃ পরং ন হি॥ মথুরায়াং প্রবোধন্যাং কৃতজাগরণস্য হি। ক্ষণার্দ্ধদানতো বৈশ্যোঽমোচয়দ্‌ব্রহ্মরাক্ষসং॥ জাগরস্য চ মাহাত্ম্যং গীতবাদিত্রনর্ত্তনং। হরেঃ প্রীতিকরং রাত্রৌ বক্তুং মে নৈব শক্যতে॥ যস্তু গায়তি কৃষ্ণাগ্রে কৌমুদীং দ্বাদশীং ক্ষণং। সর্ব্বলোকান্ পরিত্যজ্য বিষ্ণুলোকং স গচ্ছতি॥ অতএবোক্তং তত্রৈব। রাজ্যমন্যত্র সংত্যজ্য স্ফীতং নিহতকণ্টকং। কার্ত্তিকে মথুরায়াং বৈ কৌমুদ্যাং জাগরং চরেৎ॥*॥ অথ পারণাদিনকৃত্যং। প্রাতর্নিত্যক্রিয়াং কৃত্বা শক্ত্যা সংভোজ্য ভূসুরান্। গৃহ্নন্ কৃতব্রতাচ্ছিদ্রং প্রদদ্যাদ্দক্ষিণাদিকং॥ দানং যথাব্রতং তেভ্যো দত্ত্বা পারণমাচরেৎ। প্রবর্ত্তয়েচ্চ সংত্যক্তং চাতুর্ম্মাস্যব্রতেষু যৎ॥ তথা চ ভবিষ্যোত্তরে তত্রৈব। প্রভাতে বিমলে স্নাত্বা ভোজয়েদন্নবিস্তরৈঃ॥ ঘৃতক্ষীরদধিক্ষৌদ্রকাসারগুড়মোদকৈঃ। অর্চ্চয়েচ্চন্দনৈশ্চূর্ণৈঃ পুষ্পৈর্গন্ধৈর্দ্বিজোত্তমান্॥ আচান্তেভ্যস্তিতো দদ্যাত্ত্যক্তং যৎকিঞ্চিদেব হি। সুবাচা সুমনোঽভীষ্টপত্রপুষ্পফলাদিকং॥ চতুরো বার্ষিকান্মাসান্ নিয়মং যস্য যৎ কৃতং। কথয়িত্বা দ্বিজেভ্যস্তদ্দদ্যাদ্‌ভক্ত্যা সুদক্ষিণাং॥ এবমেব পাদ্মে। তত্রৈব কিঞ্চাধিকং। চাতুর্ম্মাস্যব্রতে বিপ্রাঃ পশ্চাদচ্ছিদ্রবাচনমিতি॥*॥ ইতি শ্রীহরিভক্তিবিলাসে ১৬ বিলাসঃ॥

প্রবোধিনী (স্ত্রী) প্রবোধনী। উত্থানৈকাদশী। যথা। বরাহ উবাচ। উপবাসাসমর্থানাং সদৈব পৃথুলোচনে। একা সা দ্বাদশী পুণ্যা উপোষ্যা যা প্রবোধিনী॥ তস্যামারাধ্য বিশ্বেশং জগতামীশ্বরেশ্বরং। প্রাপ্নোতি সকলং তদ্ধি দ্বাদশদ্বাদশীফলং॥ পূর্ব্বভাদ্রপদা যোগে সৈব বা দ্বাদশী ভবেৎ। অতীব মহতী তস্যাং সর্ব্বকৃত্যমথাক্ষয়ং॥ উত্তরাঙ্গারসহিতা যদি চৈকাদশী ভবেৎ। তদা কোটিগুণং পুণ্যং কেশবাল্লভতে ফলং॥ সকৃদেবার্চ্চিতে তস্যাং সর্ব্বং কৃতমিহাক্ষয়ং। যথা প্রবোধিনী পুণ্যা তথা যস্যাং স্বপেদ্ধরিঃ॥ উপোষ্যা হি মহাভাগে অনন্তফলদা হি সা। শয়নে বোধনে চৈব হরেস্তু পরিবর্ত্তনে॥ উপোষ্যৈব

বিধানেন নরো নির্ম্মলতাং ব্রজেৎ। তস্মাৎ সর্ব্বপ্রযত্নেন দ্বাদশীং সমুপোষয়েৎ ॥ যদীচ্ছেত বিশালাক্ষি শাশ্বতীং গতিমাত্মনঃ। একাদশী সোমযুক্তা কার্ত্তিকে মাসি ভামিনি॥ উত্তরাভদ্রসংযোগে অনন্তা সা প্রকীর্ত্তিতা। তস্যাং যৎ ক্রিয়তে ভদ্রে সর্ব্বমানন্ত্যমশ্নুতে ॥ অনন্তপুণ্যফলদা তেনানন্তা স্মৃতা প্রিয়ে। একাদশী ভৌমযুতা যদা স্যাদ্ভুতধারিণি ॥ স্নাত্বা দেবং সমভ্যর্চ্চ্য প্রাপ্নোতি পরমং ফলং। প্রাপ্নোতি সকলং তদ্ধি দ্বাদশদ্বাদশীং নরঃ ॥ * ॥ জলপূর্ণং তদা কুম্ভং স্থাপয়িত্বা বিচক্ষণঃ। পঞ্চরত্নসমোপেতং ঘৃতপাত্রযুতং তথা ॥ তস্যাং স্কন্ধে তু ধরিতং মৎস্যরূপং জনার্দ্দনং। মাষকেণ সুবর্ণেন সুতপ্তেন বরাননে ॥ স্নাপয়িত্বা বিধানেন কুঙ্কুমেন বিলেপিতং। পীতবস্ত্রযুগচ্ছন্নং ছত্রোপানদ্‌যুগান্বিতং ॥ পূজয়েৎ কমলৈর্দ্দেবি মদ্ভক্তঃ সংজিতেন্দ্রিয়ঃ। মৎস্যং কূর্ম্মং বরাহঞ্চ নারসিংহঞ্চ বামনং ॥ রামং রামঞ্চ কৃষ্ণঞ্চ বুদ্ধঞ্চৈব তু কল্কিনং। এবং দশাবতারাংশ্চ পূজয়েদ্ভক্তিসংযুতঃ ॥ পুষ্পৈর্ধূপৈস্তথা দীপৈর্নৈবেদ্যৈর্ব্বিবিধৈরপি। সংপূজ্যৈবমলঙ্কারৈর্ব্বিবিধৈঃ পূজনঞ্চরেৎ ॥ ততস্তস্যাগ্রতো দেয়ং নৈবেদ্যং পাচিতং চিতং। এবং সংপূজ্য গোবিন্দং দিবাপি কমলেক্ষণং ॥ রাত্রৌ চোত্থাপনং কার্য্যং দেবদেবস্য সুব্রতে। প্রভাতে বিমলে স্নাত্বা ভক্ত্যা সংপূজ্য কেশবং ॥ পুষ্পধূপাদিনৈবেদ্যৈঃ ফলৈর্নানাবিধৈঃ শুভৈঃ। ততস্তু পূজয়েদ্বিদ্বানাচার্য্যং ভক্তিসংযুতঃ ॥ অলঙ্কারোপহারৈশ্চ বস্ত্রাদ্যৈশ্চ স্বশক্তিতঃ। পূজয়িত্বা বিধানেন তং দেবং প্রতিপাদয়েৎ ॥ জগদাদি জগদ্রূপমনাদি জগদাদিকৃৎ। জলশায়িন্ জগদ্যোনে প্রীয়তাং মে জনার্দ্দন ॥ অনেনৈব বিধানেন কুর্য্যাদেকাদশীং নরঃ। তস্য পুণ্যং ভবেদযত্তু তচ্ছৃণুষ্ব বসুন্ধরে॥ যদি বক্ত্রসহস্রাণাং সহস্রাণি ভবন্তি হি। সংখ্যাতুং নৈব শক্যন্তে প্রবোধিন্যাস্তথা গুণাঃ ॥ তথাপ্যুদ্দেশমাত্রেণ শক্ত্যা বক্ষ্যামি তচ্ছৃণু। চন্দ্রতারার্কসঙ্কাশমধিষ্ঠায়ানুজীবিভিঃ ॥ সহৈব যানমাগচ্ছেন্মম লোকং বসুন্ধরে। ততঃ কল্পসহস্রান্তে সপ্তদ্বীপেশ্বরো ভবেৎ॥ আয়ুরারোগ্যসম্পন্নো জন্মাতীতো ভবেত্ততঃ। ব্রহ্মঘ্নশ্চ সুরাপশ্চ স্তেয়ী চ গুরুতল্পগঃ ॥ পাপান্যেতানি সর্ব্বাণি শ্রবণেনৈব নাশয়েৎ। পশ্যেচ্চ ধীমানধনোঽপি ভক্ত্যা স্পৃশেন্মনুষ্য ইহ ধীয়মানঃ। শৃণোতি ভক্তস্য মতিং দদাতি বিকল্মষঃ সোঽপি দিবং প্রয়াতি ॥ দুঃস্বপ্নং প্রশমমুপৈতি পঠ্যমানে মাহাত্ম্যে ভবভয়হারকে নরস্য। যঃ কুর্য্যাদ্ব্রতবরমেতদব্যয়ায়া বোধিন্যাঃ কিমুত ফলস্তু তস্য বাচ্যং ॥ তে ধন্যাস্তে কৃতার্থাশ্চ তৈরেব সুকৃতং কৃতং। তৈরাত্মজন্ম সফলং কৃতং যে ব্রতকারকাঃ॥ ইতি বরাহপুরাণে প্রবোধিনীমাহাত্ম্যং ॥

প্রভঞ্জনঃ (পুং) বায়ুঃ। ইত্যমরঃ ॥ ভঞ্জনকর্ত্তরি ত্রি ॥

প্রভদ্রঃ (পুং) নিম্বঃ। ইতি রাজনির্ঘণ্টঃ ॥

প্রভদ্রা (স্ত্রী) প্রসারিণী। ইতি রাজনির্ঘণ্টঃ ॥

প্রভবঃ (পুং) জন্মহেতুঃ। পিত্রাদিঃ। আদ্যোপলব্ধিস্থানং। আদ্যোপলব্ধয়ে প্রথমজ্ঞানার্থং যৎ স্থানং দেশঃ সঃ। যথা। বাল্মীকিঃ শ্লোকপ্রভবঃ। হিমবান্ গঙ্গাপ্রভবঃ। ইত্যমরভরতৌ ॥ অপাং মূলং। মুনিভেদঃ। ইতি হেমচন্দ্রঃ ॥ পরাক্রমঃ। ইতি মেদিনী ॥ জন্ম। ইতি শব্দরত্নাবলী ॥

প্রভবিষ্ণুঃ (পুং) বটুকভৈরবস্যাষ্টোত্তরশতনামান্তর্গতনামবিশেষঃ। যথা। প্রভবিষ্ণুঃ প্রভাববান্। ইত্যাদি বিশ্বসারতন্ত্রে আপদুদ্ধারকল্পঃ ॥ প্রভুঃ। যথা। ন ভর্ত্তা নৈব চ সুতো ন পিতা ভ্রাতরো ন চ। আদানে বা বিসর্গে বা স্ত্রীধনে প্রভবিষ্ণবঃ ॥ ইতি দায়ভাগঃ ॥ প্রকর্ষেণ ভবনশীলে ত্রি ॥

প্রভবিষ্ণুতা (স্ত্রী) প্রভুতা। প্রভবিষ্ণুশব্দাৎ ভাবার্থে তপ্রত্যয়েন পদং নিষ্পন্নং ॥

প্রভা (স্ত্রী) কুবেরপুরী। ইতি হেমচন্দ্রঃ ॥ দীপ্তিঃ। তৎপর্য্যায়ঃ। রোচিঃ২ দ্যুতিঃ৩ শোচিঃ ৪ ত্বিষা ৫ ওজঃ ৬ ভাঃ ৭ রুচিঃ৮ বিভা ৯ আলোকঃ ১০ প্রকাশঃ ১১ তেজঃ ১২ রুক্ ১৩। ইতি রাজনির্ঘণ্টঃ॥*॥ গোপীবিশেষঃ। যথা। দৃষ্টস্ত্বং প্রভয়া গোপ্যা যুক্তো বৃন্দাবনে বনে। প্রভা দেহং পরিত্যজ্য জগাম সূর্য্যমণ্ডলং ॥ ততস্তস্যাঃ শরীরঞ্চ তীব্রং তেজো বভূব হ। সংবিভজ্য ত্বয়া দত্তং প্রেম্নাশ্রু রুদতা পুনঃ ॥ বিমৃজ্য চক্ষুষোর্লোহং লজ্জয়া মন্তয়ে চ। হুতাশনায় কিঞ্চিচ্চ নৃপেভ্যশ্চাপি কিঞ্চন ॥ কিঞ্চিৎ পুরুষসিংহেভ্যো দেবেভ্যশ্চাপি কিঞ্চন। কিঞ্চিদ্দস্যুজনেভ্যশ্চ নাগেভ্যশ্চাপি কিঞ্চন ॥ ব্রাহ্মণেভ্যো মুনিভ্যশ্চ তপস্বিভ্যশ্চ কিঞ্চন। স্ত্রীভ্যঃ সৌভাগ্যযুক্তাভ্যো যশস্বিভ্যশ্চ কিঞ্চন ॥ তচ্চ দত্ত্বা তু সর্ব্বেভ্যঃ পূর্ব্বং রোদিতুমুদ্যতঃ। ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ৯ অধ্যায়ঃ ॥ * ॥ দুর্গা। যথা। যমস্য ভগিনী জাতা যমুনা তেন সা মতা। প্রভা প্রসাদশীলত্বাৎ জ্যোৎস্না চন্দ্রার্কমালিনী ॥ ইতি দেবীপুরাণে ৪৫ অধ্যায়ঃ ॥ * ॥ সূর্য্যপত্নী। যথা। সূত উবাচ। বিবস্বান্ কশ্যপাৎ পূর্ব্বমদিত্যামভবৎ পুরা। তস্য পত্নীত্রয়ন্তদ্বৎ সংজ্ঞা রাজ্ঞী প্রভা তথা ॥ রেবতস্য সুতা রাজ্ঞী রেবন্তং সুষুবে সুতং। প্রভা প্রভাবং সুষুবে ত্বাষ্ট্রী সংজ্ঞা তথা মনুং ॥ ইতি মাৎস্যে ১১ অধ্যায়ঃ ॥

প্রভাকরঃ (পুং) সূর্য্যঃ। অগ্নিঃ। চন্দ্রঃ। সমুদ্রঃ। ইতি শব্দরত্নাবলী ॥ অর্কবৃক্ষঃ। ইত্যমরঃ ॥

প্রভাকীটঃ (পুং) খদ্যোতঃ। ইতি রাজনির্ঘণ্টঃ ॥

প্রভাঞ্জনঃ (পুং) শোভাঞ্জনঃ। ইতি হেমচন্দ্রঃ

প্রভাতং (ক্লী) প্রাতঃকালঃ। তৎপর্য্যায়ঃ। প্রত্যূষঃ ২ অহর্মুখং ৩ কল্যং ৪ উষঃ ৫ প্রত্যুষঃ ৬। ইত্যমরঃ ॥ দিনাদিঃ ৭ নিশান্তং ৮ ব্যুষ্টং ৯ প্রগে ১০ প্রাহ্নং ১১। ইতি রাজনির্ঘণ্টঃ ॥ গোসঃ ১২ গোসর্গঃ ১৩

ঃ ১৪ উষকং ১৫ উষা ১৬ ঊষা ১৭ বিভাতং ১৮। ইতি শব্দরত্নাবলী ॥ * ॥ তত্র দর্শনীয়া যথা। বৈদ্যঃ পুরোহিতো মন্ত্রী দৈবজ্ঞোঽথ চতুর্থকঃ। প্রভাতকালে দ্রষ্টব্যো নিত্যং স্বশ্রিয়মিচ্ছতা ॥ ইতি রাজবল্লভঃ ॥

প্রভাবঃ (পুং) কোষদণ্ডজতেজঃ। তৎপর্য্যায়ঃ। প্রতাপঃ ২। ইত্যমরঃ॥ কোষো ধনং দণ্ডো দমঃ তদ্ধেতুত্বাৎ সৈন্যমপি দণ্ডঃ তাভ্যাং যত্তেজো জায়তে স প্রতাপঃ প্রভাবশ্চ কথ্যতে। ইতি ভরতঃ॥ শক্তিঃ। তেজঃ। ইতি হেমচন্দ্রঃ ॥ শান্তিঃ। ইতি মেদিনী ॥

প্রভাবজঃ (পুং) শক্তিবিশেষঃ। প্রভাবো বীর্য্যাধিক্যং তজ্জাতঃ। ইত্যমরটীকাসারসুন্দরী ॥ প্রভুত্বসাধকত্বাৎ দণ্ডকোষৌ প্রভুশক্তিঃ। ইতি ভরতঃ ॥

প্রভাবান্ [ৎ] (ত্রি) প্রভাযুক্তঃ। প্রভাশব্দাদস্ত্যর্থে বতুপ্রত্যয়েন পদং নিষ্পন্নং ॥

প্রভাবতী (স্ত্রী) মালিনামকোনবিংশবৃত্তার্হন্মাতা। গণানাং বীণা। ইতি হেমচন্দ্রঃ॥ ত্রয়োদশাক্ষরচ্ছন্দঃ। যথা। যস্যাং প্রিয়ে প্রথমকমক্ষরদ্বয়ং ভূর্য্যন্তথা গুরু নবমং দশান্তিমং। সান্ত্যং ভবেদ্যতিরপি চেদ্‌যুগগ্রহৈঃ সা লক্ষ্যতামমৃতরুতে প্রভাবতী॥ ইতি শ্রুতবোধঃ ॥

প্রভাষঃ (পুং) বসুভেদঃ। ইতি জটাধরঃ ॥ অগ্নি চ। প্রত্যূষশ্চ প্রভাবশ্চ বসবো নামভিঃ স্মৃতাঃ। ইতি গারুড়ে ৬ অধ্যায়ঃ॥ প্রকৃষ্টকথনঞ্চ

প্রভাসঃ (পুং) সোমতীর্থং। ইতি ত্রিকাণ্ডশেষঃ ॥ জৈনগণাধিপবিশেষঃ। ইতি হেমচন্দ্রঃ ॥

প্রভিন্নঃ (পুং) ক্ষরন্মদহস্তী। তৎপর্য্যায়ঃ। গর্জ্জিতঃ ২ মত্তঃ ৩। ইত্যমরঃ॥ ভ্রান্তঃ ৪ মদকলঃ ৫। ইতি রাজনির্ঘণ্টঃ॥ প্রকৃষ্টভেদবিশিষ্টে ত্রি ॥

প্রভুঃ (পুং) বিষ্ণুঃ। ইতি শব্দরত্নাবলী॥ পারদঃ। ইতি রাজনির্ঘণ্টঃ॥ শব্দঃ। ইতি ধরণিঃ ॥

প্রভুঃ (ত্রি) অধিপতিঃ। তৎপর্য্যায়ঃ। স্বামী২ ঈশ্বরঃ ৩ পতিঃ ৪ ঈশিতা ৫ অধিভূঃ ৬ নায়কঃ ৭ নেতা ৮ পরিবৃঢ়ঃ ৯ অধিপঃ ১০। ইত্যমরঃ ॥ পালকঃ ১১। ইতি শব্দরত্নাবলী ॥ নিত্যঃ। ইতি ধরণিঃ ॥ শক্তঃ। ইতি নানার্থরত্নমালা ॥

প্রভুতা (স্ত্রী) প্রভুত্বং। ঐশ্বর্য্যং। ইতি হলায়ুধঃ ॥

প্রভুভক্তঃ (পুং) উত্তমঘোটকঃ। যথা। প্রভুভক্তা ভক্তিলাশ্চ কুলীনেষু কুলোৎকটাঃ। ইতি শব্দচন্দ্রিকা॥ স্বাম্যনুরক্তে ত্রি। যথা। বহ্বাশী স্বল্পসন্তুষ্টঃ সুনিদ্রঃ শীঘ্রচেতনঃ। প্রভুভক্তশ্চ শূরশ্চ জ্ঞাতব্যাঃ ষট্‌ শুনো গুণাঃ॥ ইতি চাণক্যসংগ্রহঃ ॥

প্রভূতং (ত্রি) প্রচুরং। ইত্যমরঃ॥ উদ্গতং। ইতি মেদিনী ॥ ভূতং। উন্নতং। ইতি শব্দরত্নাবলী ॥

প্রভূষ্ণুঃ (ত্রি) ক্ষমঃ। শক্তঃ। ইতি হেমচন্দ্রঃ ॥

প্রভৃতি ব্য তদাদিঃ। যথা। ততঃ প্রভৃতি

পিতরঃ পিণ্ডসংজ্ঞাস্তু লেভিরে। ইতি তিথ্যাদিতত্ত্বং ॥

প্রভেদঃ (পুং) ভেদঃ। তৎপর্য্যায়ঃ। প্রকারঃ২ বিশেষঃ ৩ ভিদা ৪ অন্তরং ৫। ইতি জটাধরঃ ॥

প্রভ্রষ্টকং (ক্লী) শিখালম্বিমাল্যং। চূড়াতো লম্বমানমাল্যং। ইত্যমরভরতৌ ॥

প্রমত্তঃ (ত্রি) প্রমাদী। অনবধানতাযুক্তঃ। যথা। মত্তং প্রমত্তমুন্মত্তং সুপ্তং বালং স্ত্রিয়ং জড়ং। প্রপন্নং বিরথং ভীতং ন রিপুং হন্তি ধর্ম্মবিৎ ॥ ইতি শ্রীভাগবতে ১ স্কন্ধে ৭ অধ্যায়ঃ ॥ মত্তং মদ্যাদিনা। প্রমত্তমনবহিতং। উন্মত্তং গ্রহবাতাদিনা। জড়ং অনুদ্যমং। প্রপন্নং শরণাগতং। বিরথং ভগ্নরথং। ইতি শ্রীধরস্বামী ॥ অপরপ্রমত্তো যথা। সন্ধ্যাপূজাবিহীনশ্চ প্রমত্তঃ পতিতঃ স্মৃতঃ। ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ২৭ অধ্যায়ঃ ॥ স চ রাজ্ঞা নাহ্বানয়িতব্যঃ। যথা। মত্তোন্মত্তপ্রমত্তার্ত্তভৃত্যান্নাহ্বানয়েন্নৃপঃ। ইতি মিতাক্ষরা ॥

প্রমথঃ (পুং) ঘোটকঃ। শিবপারিষদঃ। ইতি শব্দরত্নাবলী ॥ স চ ষট্‌ত্রিংশৎকোটিসংখ্যকঃ। যথা। ষট্‌ত্রিংশত্তু সহস্রাণি প্রমথা দ্বিজসত্তমাঃ। তত্রৈকত্র সহস্রাণি ভাগে ষোড়শ সংস্থিতাঃ ॥ নানারূপধরা যে বৈ জটাচন্দ্রার্দ্ধমণ্ডিতাঃ। তে সর্ব্বে সকলৈশ্বর্য্যযুক্তা ধ্যানপরায়ণাঃ ॥ যোগিনো মদমাৎসর্য্যদম্ভাহঙ্কারবর্জ্জিতাঃ। ক্ষীণপাপা মহাভাগাঃ শম্ভোঃ প্রীতিকরাঃ পরাঃ ॥ ন তে পরিগ্রহং রাগং কাঙ্ক্ষন্তিস্ম কদাচন। সংসারবিমুখাঃ সর্ব্বে যতয়ো যোগতৎপরাঃ ॥ ধ্যানাবস্থং মহাদেবং পরিবার্য্য ধৃতব্রতাঃ। কৃত্বা পরিষদং রুচ্যা তিষ্ঠন্তি বিগতক্লমাঃ ॥ যদেব পরমং জ্যোতিশ্চিন্তয়ত্যম্বিকাপতিঃ। তদেব তে পারিষদাঃ সর্ব্বে সংবেষ্টয়ন্তি তং ॥ তে ষোড়শ সমাখ্যাতাঃ কোটয়ো যে ধৃতব্রতাঃ। সিংহব্যাঘ্রাদিসারূপ্যা অনিমাদিসমাযুতাঃ ॥ * ॥ অপরে কামিনঃ শম্ভোঃ সুনর্ম্মসচিবাঃ স্মৃতাঃ। বিচিত্ররূপাভরণা জটাচন্দ্রার্দ্ধমণ্ডিতাঃ ॥ হরস্য তুল্যা রূপেণ বিশদা বৃষভধ্বজাঃ। উমাসদৃশরূপাভিঃ প্রমদাভিঃ সমাগতাঃ ॥ বিচিত্রমাল্যাভরণা দিব্যস্রগ্‌গন্ধভূষণাঃ। উমাসহায়ং ক্রীড়ন্তমনুগচ্ছন্তি ভূষিতাঃ। শৃঙ্গারবেশাভরণা অষ্টৌ তে কোটয়ো গণাঃ ॥ * ॥ অর্দ্ধনারীশ্বরাশ্চান্যে হ্যর্দ্ধনারীশ্বরং হরং। অনুযান্তি মহাভাগাস্তুল্যরূপা হরস্য যে ॥ উমাসহায়ো হি যদা রমতেস্ম সুখং হরঃ। অর্দ্ধনারীশরীরাস্তু দ্বারপালা ভবন্তি তে ॥ আকাশমার্গে গচ্ছন্তমনুগচ্ছন্তি নিত্যশঃ। ধ্যানস্থং পরিচর্য্যন্তি সলিলাদিভিরীশ্বরং ॥ নানাশস্ত্রধরাঃ শম্ভোর্গণাস্তু প্রমথাঃ স্মৃতাঃ। প্রমথ্নন্তি চ যুদ্ধেষু যুধ্যমানান্মহাবলান্। তে বৈ মহাবলাঃ শূরাঃ সংখ্যয়া নব কোটয়ঃ ॥ * ॥ অপরে গায়নাস্তালমৃদঙ্গপণবাদিভিঃ। নৃত্যন্তি বাদ্যং কুর্ব্বন্তো গায়ন্তি মধুরস্বরং ॥ নানারূপধরাস্তে বৈ

সংখ্যয়া কোটয়স্ত্রয়ঃ। সততং চানুগচ্ছন্তি বিচরন্তং মহেশ্বরং ॥ সর্ব্বে মায়াবিনঃ শূরাঃ সর্ব্বে শাস্ত্রার্থপারগাঃ। সর্ব্বে সর্ব্বত্র সর্ব্বজ্ঞাঃ সর্ব্বে সর্ব্বত্রগাঃ সদা ॥ মুহূর্ত্তাৎ সর্ব্বভুবনং গত্বা যান্তি পুনঃ পুনঃ। অনিমাদ্যষ্টকৈশ্বর্য্যযুক্তাস্তে বৈ মহাবলাঃ॥ * ॥ অপরে রুদ্রনামানো জটাচন্দ্রার্দ্ধমণ্ডিতাঃ। দেবেন্দ্রস্য নিয়োগেন বর্ত্তন্তে ত্রিদিবে সদা ॥ তেষাং সংখ্যা চৈককোটিস্তে সর্ব্বে বলবত্তরাঃ। কুর্ব্বন্তি হি সদা সেবাং হরস্য সততং গণাঃ ॥ বিস্ময়ন্তি চ পাপিষ্ঠান্ ধর্ম্মিষ্ঠান্ পালয়ন্তি চ। অনুগৃহ্ণন্তি সততং ধৃতপাশুপতব্রতান্ ॥ বিঘ্নাংশ্চ সততং হন্তি যোগিনাং প্রযতাত্মনাং। ষট্‌ত্রিংশৎকোটয়শ্চৈতে হরস্য সকলা গণাঃ ॥ * ॥ বরাহগণনাশার্থং হিতায় জগতাং তথা। শঙ্করস্য চ সেবায়ৈ সমুৎপন্না ইমে গণাঃ॥ বরাহস্য গণান্ দৃষ্ট্বা নরসিংহং তথা হরিং। স্বয়ং সরভরূপঃ সন্ ধ্যায়ন্ নাদং যতোহকরোৎ ॥ তচ্ছীকরাম্বুতো জাতাস্তত্তেষাং বহুরূপতা। ক্রূরদৃষ্ট্যা ক্রূরযুদ্ধৈঃ ক্রূরকৃত্যৈরিমান্ গণান্ ॥ বরাহস্য হতেত্যেবং যতঃ প্রোক্তং কপর্দ্দিনা। ততস্তে ক্রূরকর্ম্মাণঃ প্রজাতাশ্চ ভয়ঙ্করাঃ॥ ন সদা ক্রূরকর্ম্মাণি তে কুর্ব্বন্তি মহৌজসঃ। দৃষ্টিমাত্রস্য তে ক্রূরাঃ ক্রূরক্রূরাশ্চ কার্য্যতঃ ॥ ফলং জলং তথা পুষ্পং পত্রং মূলং তথৈব চ। নিবেদিতানি ভুঞ্জন্তি বনপর্ব্বতসানুষু॥ আহৃত্যাপি চ ভুঞ্জন্তি পত্রং পুষ্পাদিকঞ্চ যৎ। ভবেদ্ভর্গস্য যদ্ভোগ্যং তদ্ভোগাস্তে মহৌজসঃ ॥ আমিষং নাপি চাশ্নন্তি হিত্বা চৈত্রচতুর্দ্দশীং। তত্রামিষং হরো ভুঙ্‌ক্তে চতুর্দ্দশ্যাং মধৌ সদা। ততঃ সর্ব্বে গণাস্তত্র ভুঞ্জন্তে পললান্যপি ॥ হতে বরাহস্য গণে ভর্গমাসাদ্য তে গণাঃ। চতুর্ভাগাঃ স্বয়ং ভূত্বা ভূতং কর্ম্মেতি বৈ জগুঃ ॥ ভূতত্বমভবত্তেষাং চতুর্ভাগবতাং তদা। বচনাৎ পদ্মজাতস্য ভূতগ্রামাস্ততো মতাঃ॥ যো লোকবিদিতঃ পূর্ব্বং ভূতগ্রামশ্চতুর্ব্বিধঃ। যতস্তেভ্যোঽধিকা যত্নৈস্তদ্দৃঢ়গ্রাম উচ্যতে ॥ ইতি বঃ সর্ব্বমাখ্যাতং ভূতাঃ শম্ভুগণা যথা। যদাহারা যদাকারা যৎকৃত্যাস্তে মহৌজসঃ ॥ য ইদং শৃণুয়ান্নিত্যমাখ্যানং যোগমুত্তমং। স দীর্ঘায়ুঃ সদোৎসাহী যোগযুক্তশ্চ জায়তে ॥ ইতি কালিকাপুরাণে পারিষদোৎপত্তির্নাম ২৯ অধ্যায়ঃ ॥

প্রমথনং (ক্লী) বধঃ। ইত্যমরঃ॥ ক্লেশনং। বিলোড়নং। ইতি মথধাত্বর্থদর্শনাৎ ॥

প্রমথা (স্ত্রী) হরীতকী। ইতি মেদিনী ॥

প্রমথাধিপঃ (পুং) শিবঃ। ইত্যমরঃ॥

প্রমথিতং (ক্লী) নির্জ্জলতক্রং। ইতি রাজনির্ঘণ্টঃ ॥

প্রমদঃ (পুং) হর্ষঃ। ইত্যমরঃ॥ ধুস্তূরফলং। ইতি শব্দচন্দ্রিকা॥ মত্তে ত্রি। ইতি মেদিনী॥

প্রমদকাননং (ক্লী) প্রমদাবনং। ইত্যমরটীকায়াং ভরতঃ॥

প্রমদবনং (ক্লী) রাজ্ঞোঽন্তঃপুরোচিতবনং। ইত্যমরঃ॥

প্রমদা (স্ত্রী) উত্তমযোষিৎ। ইতি মেদিনী ॥
প্রমদাকাননং (ক্লী) প্রমদবনং। ইত্যমর-
টীকায়াং ভরতঃ ॥
প্রমদাবনং (ক্লী) প্রমদবনং। ইতি শব্দরত্না-
বলী ॥
প্রমনাঃ [স্] (ত্রি) হর্ষযুক্তঃ। ইত্যমরঃ ॥
প্রময়ঃ (পুং) বধঃ। ইতি হেমচন্দ্রঃ ॥
প্রমা (স্ত্রী) যথার্থজ্ঞানং। তৎপর্য্যায়ঃ।
প্রমিতিঃ ২। ইত্যমরঃ ॥ প্রমাণং ৩। ইতি
শব্দরত্নাবলী ॥ ন্যায়মতে তদ্বতি তৎপ্রকা-
রকজ্ঞানং। ভ্রমভিন্নজ্ঞানং। অস্যাঃ
কারণং গুণঃ। স চ প্রত্যক্ষে বিশেষ্যে
বিশেষণস্য সম্বন্ধঃ। অনুমিতৌ সাধ্য-
বিশিষ্টপক্ষে পরামর্শঃ। শাব্দবোধে যোগ্য-
তায়াঃ তাৎপর্য্যস্য বা যথার্থজ্ঞানং। উপ-
মিতৌ শক্যে সাদৃশ্যবুদ্ধিঃ। যথা। দোষো-
ঽপ্রমায়া জনকঃ প্রমায়াস্তু গুণো ভবেৎ।
প্রত্যক্ষে তু বিশেষ্যেণ বিশেষণবতা সমং ॥
সন্নিকর্ষো গুণস্তু স্যাদথ ত্বনুমিতৌ পুনঃ।
পক্ষে সাধ্যবিশিষ্টে চ পরামর্শো গুণো
ভবেৎ ॥ শক্যে সাদৃশ্যবুদ্ধিস্তু ভবেদুপ-
মিতৌ গুণঃ। শাব্দবোধে যোগ্যতায়া-
স্তাৎপর্য্যস্যাথ বা প্রমা ॥ গুণঃ স্যাদ্ভ্রম-
ভিন্নন্তু জ্ঞানমত্রোচ্যতে প্রমা। অথবা
তৎপ্রকারং যৎ জ্ঞানং তদ্বদ্বিশেষ্যকং ॥
ইতি ভাষাপরিচ্ছেদঃ ॥
প্রমাণং (ক্লী) বিষ্ণুঃ। যথা। প্রমাণং প্রাণ-
নিলয়ঃ প্রাণভৃৎ প্রাণজীবনঃ। ইতি মহা-
ভারতে শান্তিপর্ব্বণি দানধর্ম্মঃ ॥ নিত্যং।
মর্য্যাদা। শাস্ত্রং। সত্যবাদী। ইয়ত্তা।
হেতুঃ। প্রমাতা। ইতি মেদিনী ॥ প্রমা।
ইতি শব্দরত্নাবলী ॥ নিত্যক্লীবৈকত্ববানয়ং
শব্দঃ। যথা বেদাঃ প্রমাণং স্মৃতয়ঃ প্রমাণ-
মিত্যাদি ॥ ন্যায়ে তু প্রত্যক্ষানুমানোপ-
মানশব্দাঃ প্রমাণানি। ইত্যত্র বহুবচ-
নান্তোঽপি ॥
প্রমাণবাধিতার্থকঃ (পুং) তর্কবিশেষঃ। তস্য
লক্ষণং। আত্মাশ্রয়াদিচতুষ্কান্যপ্রসঙ্গত্বং।
স দ্বিবিধঃ। ব্যাপ্তিগ্রাহকঃ বিষয়পরিশোধক-
শ্চ। তত্রাদ্যো যথা। ধূমো যদি বহ্নি-
ব্যভিচারী স্যাত্তদা বহ্নিজন্যো ন স্যাৎ।
দ্বিতীয়স্তু পর্ব্বতো যদি নির্ব্বহ্নিঃ স্যাৎ
নির্ধূমঃ স্যাৎ। ইতি তর্কজাগদীশী ॥
প্রমাতামহঃ (পুং) মাতামহপিতা। যথা।
পিতামহঃ পিতৃপিতা তৎপিতা প্রপিতা-
মহঃ। মাতুর্মাতামহাদ্যেবং সপিণ্ডাস্তু স-
নাভয়ঃ ॥ ইত্যমরঃ ॥
প্রমাতামহী (স্ত্রী) প্রমাতামহপত্নী। ইতি
স্মৃতিঃ ॥
প্রমাথঃ (পুং) প্রমথনং। বলাৎ হরণং। ইতি
পুরাণং ॥
প্রমাথী [ন্] (ত্রি) পীড়নকর্ত্তা। মারণকর্ত্তা।
প্রপূর্ব্বমথধাতোঃ কর্ত্তরি ণিন্। প্রমথন-
শীলঃ। দেহেন্দ্রিয়ক্ষোভক ইত্যর্থঃ। ইতি
শ্রীধরস্বামী ॥ যথা। চঞ্চলং হি মনঃ কৃষ্ণ
প্রমাথি বলবদ্দৃঢ়ং ॥ অপি চ। ইন্দ্রিয়াণি
প্রমাথীনি হরন্তি প্রসভং মনঃ। ইতি
শ্রীভগবদ্গীতা ॥
প্রমাদঃ (পুং) অনবধানতা। ইত্যমরঃ ॥ লোভ-
প্রমাদবিশ্বাসৈঃ পুরুষো নশ্যতে ত্রিভিঃ।

তস্মাল্লোভো ন কর্ত্তব্যঃ প্রমাদো ন ন বিশ্বসেৎ ॥ ইতি গারুড়ে নীতিসারে ১১৫ অধ্যায়ঃ ॥

প্রমাদবান্ [ৎ] (ত্রি) প্রমাদযুক্তঃ। তৎপর্য্যায়ঃ। জাল্মঃ ২ অসমীক্ষ্যকারী ৩ খট্বারূঢ়ঃ ৪। ইতি জটাধরঃ ॥

প্রমাদিকা (স্ত্রী) দূষিতা কন্যা। তৎপর্য্যায়ঃ। সম্বেদা ২ দূষিতা ৩ ধর্ষকারিণী ৪। ইতি শব্দরত্নাবলী ॥

প্রমাদী [ন্] (ত্রি) প্রমাদবিশিষ্টঃ। অনবধানতাযুক্তঃ। যথা। কুরঙ্গমাতঙ্গপতঙ্গভৃঙ্গমীনা হতাঃ পঞ্চভিরেব পঞ্চ। একঃ প্রমাদী স কথং ন হন্যতে যঃ সেবতে পঞ্চভিরেব পঞ্চ ॥ ইত্যুদ্ভটঃ ॥

প্রমাপণং (ক্লী) মারণং। ইত্যমরঃ ॥

প্রমিতঃ (ত্রি) জ্ঞাতঃ। ইতি জটাধরঃ ॥

প্রমিতিঃ (স্ত্রী) প্রমা। ইত্যমরঃ ॥

প্রমীঢ়ঃ (ত্রি) ঘনঃ। মূত্রিতঃ। ইতি মেদিনী ॥

প্রমীতঃ (ত্রি) মৃতঃ। যজ্ঞার্থহতপশুঃ। ইত্যমরঃ ॥

প্রমীলা (স্ত্রী) তন্দ্রী। ইত্যমরঃ ॥

প্রমুখং (ক্লী) তদাত্বং। তৎকালঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

প্রমুখঃ (পুং) পুন্নাগবৃক্ষঃ। ইতি শব্দচন্দ্রিকা ॥

প্রমুখঃ (ত্রি) প্রধানং। শ্রেষ্ঠঃ। ইত্যমরঃ ॥ প্রথমঃ। ইতি মেদিনী ॥ সমূহঃ। মান্যঃ। ইতি শব্দরত্নাবলী ॥

প্রমুৎ }
প্রমুদিতঃ } [দ্] (ত্রি) হৃষ্টঃ। ইত্যমরঃ ॥

প্রমেহঃ (পুং) রোগবিশেষঃ। তৎপর্য্যায়ঃ। মেহঃ ২ মূত্রদোষঃ ৩। ইতি রাজনির্ঘণ্টঃ ॥ বহুমূত্রতা ৪। ইতি হেমচন্দ্রঃ ॥ অস্য নিদানং। আস্যাসুখং স্বপ্নসুখং দধীনি গ্রাম্যৌদকানূপরসাঃ পয়াংসি। নবান্নপানং গুড়বৈকৃতঞ্চ প্রমেহহেতুঃ কফকৃচ্চ সর্ব্বং ॥ * ॥ অস্য সম্প্রাপ্তির্যথা। মেদশ্চ মাংসঞ্চ শরীরজঞ্চ ক্লেদং কফো বস্তিগতঃ প্রদূষ্য। করোতি মেহান্ সমুদীর্ণমুষ্ণৈস্তানেব পিত্তং পরিদূষ্য চাপি ॥ * ॥ বাতিকস্য তস্য লক্ষণং। ক্ষীণেষু দোষেম্ববকৃষ্য ধাতূন্ সন্দূষ্য মেহান্ কুরুতেঽনিলশ্চ। * । তস্য কফজাদিভেদেন সাধ্যাদিলক্ষণং যথা। সাধ্যাঃ কফোত্থা দশ পিত্তজাঃ ষট্ যাপ্যা ন সাধ্যঃ পবনাচ্চতুষ্কঃ। সমক্রিয়ত্বাদ্বিষমক্রিয়ত্বান্মহাত্যয়ত্বাচ্চ যথাক্রমন্তে ॥ কফঃ সপিত্তঃ পবনশ্চ দোষা মেদোঽস্রশুক্রাম্বুবসালসীকাঃ। মজ্জা রসৌজঃ পিশিতঞ্চ দূষ্যাঃ প্রমেহিণাং বিংশতিরেব মেহাঃ ॥ * ॥ তস্য পূর্ব্বরূপং। দন্তাদীনাং মলাঢ্যত্বং প্রাগ্রূপং পাণিপাদয়োঃ। দাহশ্চিক্বণতা দেহে তৃট্ স্বাদ্বাস্যঞ্চ জায়তে ॥ * ॥ সামান্যং লক্ষণং তেষাং প্রভূতাবিলমূত্রতা। দোষদূষ্যা বিশেষেঽপি তৎসংযোগবিশেষতঃ। মূত্রবর্ণাদিভেদেন ভেদো মেহেষু কল্প্যতে ॥ * ॥ ক্রমেণ কফজানাং দশানাং লক্ষণানি। অচ্ছং বহুসিতং শীতং নির্গন্ধমুদকোপমং। মেহত্যুদকমেহেন কিঞ্চিদাবিলপিচ্ছিলং ॥ ইক্ষো রসমিবাত্যর্থং মধুরং চেক্ষুমেহতঃ। সান্দ্রী ভবেৎ

পর্য্যুষিতং সান্দ্রমেহেন মেহতি॥ সুরামেহী সুরাতুল্যমুপর্য্যচ্ছমধোঘনং। সংহৃষ্টলোমা পিষ্টেন পিষ্টবদ্বহুলং সিতং॥ শুক্রাভং শুক্রমিশ্রং বা শুক্রমেহী প্রমেহতি। মূর্ত্তাণূন্ সিকতামেহী সিকতারূপিণো মলান্॥ শীতমেহী সুবহুশো মধুরং ভৃশশীতলং। শনৈঃ শনৈঃ শনৈর্মেহী মন্দং মন্দং প্রমেহতি॥ লালাতন্তুযুতং মূত্রং লালামেহেন পিচ্ছিলং।*। ক্রমেণ পিত্তজানাং ষণ্ণাং লক্ষণানি। গন্ধবর্ণরসস্পর্শৈঃ ক্ষারেণ ক্ষারতোয়বৎ॥ নীলমেহেন নীলাভং কালমেহী মসীনিভং। হারিদ্রমেহী কটুকং হরিদ্রাসন্নিভং দহৎ॥ বিস্রং মাঞ্জিষ্ঠমেহেন মঞ্জিষ্ঠাসলিলোপমং। বিস্রমুষ্ণং সলবণং রক্তাভং রক্তমেহতঃ॥*॥ ক্রমেণ বাতজানাং চতুর্ণাং লক্ষণানি। বসামেহী বসামিশ্রং বসাভং মূত্রয়েন্মুহুঃ। মজ্জাভং মজ্জমিশ্রং বা মজ্জমেহী মুহুর্মুহুঃ॥ কষায়ং মধুরং রূক্ষং ক্ষৌদ্রমেহং বদেদ্বুধঃ। হস্তী মত্ত ইবাজস্রং মূত্রং বেগবিবর্জ্জিতং। সলসীকং বিবদ্ধঞ্চ হস্তিমেহী প্রমেহতি॥*॥ কফজাদিভেদেন তেষামুপদ্রবাঃ। অবিপাকোঽরুচিচ্ছর্দ্দির্নিদ্রানাশঃ সপীনসঃ। উপদ্রবাঃ প্রজায়ন্তে মেহানাং কফজন্মনাং॥ বস্তিমেহনয়োস্তোদো মুষ্কাবদরণং জ্বরঃ। দাহস্তৃষ্ণাম্লিকা মূর্চ্ছা বিড়্ভেদাঃ পিত্তজন্মনাং॥ বাতজানামুদাবর্ত্তঃ কম্পহৃদ্গ্রহলোলতাঃ। শূলমুন্নিদ্রতা শোষঃ কাসঃ

শ্বাসশ্চ জায়তে॥*॥ অরিষ্টলক্ষণং। যথোক্তোপদ্রবাবিষ্টমতিপ্রসুতমেব চ। পিড়কাপীড়িতং গাঢ়ং প্রমেহো হন্তি মানবং॥*॥ জাতঃ প্রমেহী মধুমেহিনো বা ন সাধ্যরোগঃ স হি বীজদোষাৎ। যে চাপি কেচিৎ কুলজা বিকারা ভবন্তি তাংশ্চ প্রবদন্ত্যসাধ্যান্॥*॥ সর্ব্ব এব প্রমেহাস্তু কালেনাপ্রতিকারিণঃ। মধুমেহত্বমায়ান্তি তদাসাধ্যা ভবন্তি হি॥ মধুমেহে মধুসমং জায়তে স কিল দ্বিধা। ক্রুদ্ধে ধাতুক্ষয়াদ্বায়ৌ দোষাবৃতপথেঽথবা॥ আবৃতো দোষলিঙ্গানি সোঽনিমিত্তং প্রদর্শয়ন্। ক্ষীণঃ ক্ষণাৎ ক্ষণাৎ পূর্ণো ভজতে কৃচ্ছ্রসাধ্যতাং॥ মধুরং যচ্চ মেহেষু প্রায়ো মধ্বিব মেহতি। সর্ব্বেঽপি মধুমেহাখ্যা মাধুর্য্যাচ্চ তনোরতঃ॥*॥ প্রমেহিণো যদা মূত্রমনাবিলমপিচ্ছলং। বিশদং তিক্তকটুকং তদারোগ্যং প্রচক্ষতে॥ ইতি মাধবকরঃ॥ অস্য দশবিধপিড়কাঃ পিড়কাশব্দে দ্রষ্টব্যাঃ॥*॥ অথ প্রমেহস্য চিকিৎসা। শ্যামাককোদ্রবোদ্দালা গোধূমচণকাবটী। কুলত্থাঃ কথিতা ভোজ্যে পুরাণা মেহিনাং হিতাঃ॥ যবান্নবিকৃতির্মুদ্রাঃ শালয়ঃ ষষ্ঠিকাস্তথা। তথা তিক্তানি শাকানি জাঙ্গলাঃ পক্ষিণো মৃগাঃ॥ উদ্দালো বনকোদ্রবঃ॥*॥ প্রমেহী গুড়দুগ্ধাজ্যতৈলতক্রসুরাঃ সদা। অম্লেক্ষুরসপিষ্টান্নানূপমাংসানি বর্জ্জয়েৎ॥*॥ মুস্তাহরীতকীলোধ্রৈঃ কট্ফলেন কৃতং সৃতং। পীতং মধুযুতং হন্তি প্রমেহং কফ-

হেতুকং ॥ * ॥ পটোলনিম্বামলকামৃতানাং পিবেৎ কষায়ং মধুনা সমেতং। উশীর-লোধ্রার্জ্জুনচন্দনানাং তথা পিবেৎ পিত্ত-নিমিত্তমেহী ॥ * ॥ পাঠাশিরীষদুঃস্পর্শা-জাতিতিন্দুককিংশুকৈঃ। কপিত্থস্য ভিষক্ কাথং হস্তিমেহে প্রযোজয়েৎ ॥*॥ পাঠা-দিভিঃ সহিতস্য কপিত্থস্য কাথং। গুড়ূচ্যাঃ স্বরসঃ পেয়ো মধুনা সর্ব্বমেহজিৎ। হরিদ্রাচূর্ণযুক্তো বা রসো ধাত্র্যাঃ স-মাক্ষিকঃ ॥ মধুনা ত্রৈফলং চূর্ণমথবাশ্ম-জতূদ্ভবং। লোহজং বাভয়োত্থং বা লিহ্যান্-মেহনিবৃত্তয়ে ॥ * ॥ চন্দ্রপ্রভাবচামুস্তা-ভূনিম্বসুরদারবঃ। হরিদ্রাতিবিষা দার্ব্বী পিপ্পলীমূলচিত্রকং ॥ ত্রিবিদন্তী পত্রকঞ্চ ত্বগেলা বংশলোচনা। প্রত্যেকং কর্ষ-মাত্রাণি কুর্য্যাদেতানি বুদ্ধিমান্ ॥ ধান্যকং ত্রিফলা চব্যং বিড়ঙ্গং গজপিপ্পলী। স্বর্ণ-মাক্ষিকং ব্যোষং দ্বৌ ক্ষারৌ লবণত্রয়ং ॥ এতানি টঙ্কমাত্রাণি সংগৃহ্লীয়াৎ পৃথক্ পৃথক্। দ্বিকর্ষহতলোহং স্যাচ্চতুষ্কর্ষা সিতা ভবেৎ ॥ শিলাজত্বষ্টকর্ষং স্যাদষ্টৌ কর্ষাশ্চ গুগ্গুলোঃ। বিধিনা যোজিতৈ-রেতৈঃ কর্ত্তব্যা গুটিকা শুভা ॥ চন্দ্রপ্রভাতি-বিখ্যাতা সর্ব্বরোগপ্রণাশিনী। নিহন্তি বিংশতিং মেহান্ কৃচ্ছ্রমষ্টবিধং তথা ॥ চতস্রশ্চাশ্মরীস্তদ্বন্মূত্রাঘাতাংস্ত্রয়োদশ। অণ্ডবৃদ্ধিং পাণ্ডুরোগং কামলাঞ্চ হলীমকং ॥ কাসং শ্বাসং তথা কুষ্ঠমগ্নিমান্দ্যমরো-চকং। বাতপিত্তকফব্যাধীন্ বল্যা বৃষ্যা রসায়নী ॥ সমারাধ্য শিবং তস্মাৎ প্রযত্নাদ্-গুটিকামিমাং। প্রাপ্তবাংশ্চন্দ্রমা যস্মাৎ তস্মাচ্চন্দ্রপ্রভা স্মৃতা ॥ চন্দ্রপ্রভাকচূর ইতি লোকে। ব্যোষং ত্রিকটু। দ্বৌ ক্ষারৌ সর্জিকাযবক্ষারৌ। লবণত্রয়ং। সৈন্ধবং রুচকঞ্চাপি বিড়ঞ্চ লবণত্রয়-মিতি। চন্দ্রপ্রভাদির্ব্বটিকা ॥ * ॥ প্রমেহ-পিড়কানাং প্রাক্ কার্য্যং রক্তবিমোচনং। পাটনঞ্চ বিপক্কানাং ততো ব্রণবিধিঃ স্মৃতঃ ॥ ইতি ভাবপ্রকাশঃ ॥

প্রমোচনী (স্ত্রী) গবাক্ষী। গোড়ুম্বা। ইতি জটাধরঃ ॥ প্রকৃষ্টমোচনকর্ত্তরি ত্রি ॥

প্রমোদঃ (পুং) হর্ষঃ। ইত্যমরঃ ॥

প্রমোদিতঃ (পুং) কুবেরঃ। ইতি শব্দমালা ॥ প্রমোদযুক্তে ত্রি ॥

প্রমোদিনী (স্ত্রী) জিঙ্গিনীবৃক্ষঃ। ইতি ভাব-প্রকাশঃ ॥ প্রকৃষ্টহর্ষযুক্তা চ ॥

প্রম্লোচা (স্ত্রী) অপ্সরোবিশেষঃ। যথা। তত্র তস্মান্নদীমধ্যাৎ সমুত্তস্থৌ মনোরমা। প্রম্লোচা নাম তন্বঙ্গী তৎসমীপে বরা-প্সরাঃ ॥ ইতি গারুড়ে ৯০ অধ্যায়ঃ ॥

প্রযতঃ (ত্রি) পবিত্রঃ। ইত্যমরঃ ॥

প্রযত্নঃ (পুং) প্রকৃষ্টযত্নঃ। ন্যায়মতে স চ ত্রিবিধঃ। যথা। প্রবৃত্তিশ্চ নিবৃত্তিশ্চ তথা জীবনকারণং। এবং প্রযত্নত্রৈবিধ্যং তান্ত্রিকৈঃ পরিদর্শিতং ॥ চিকীর্ষা কৃতি-সাধ্যেহষ্টসাধনত্বমতিস্তথা। উপাদানস্য চাধ্যক্ষং প্রবৃত্তৌ জনকং ভবেৎ ॥ নিবৃত্তি-স্তু ভবেদ্দ্বেষা দ্বিষ্টসাধনতাধিয়ঃ। যত্নো জীবনযোনিস্তু সর্ব্বদাতীন্দ্রিয়ো ভবেৎ ॥

শরীরে প্রাণসঞ্চারে কারণং তৎ প্রকীর্ত্তিতং। ইতি ভাষাপরিচ্ছেদঃ ॥

প্রযত্নবান্ [ৎ] (ত্রি) প্রকৃষ্টযত্নবিশিষ্টঃ। তৎপর্য্যায়ঃ। প্রতিযত্নঃ ২। ইতি ত্রিকাণ্ডশেষঃ ॥

প্রযস্তং (ত্রি) ঘৃতচতুর্জাতাদিনা দ্রব্যেণ প্রযত্নসুসংস্কৃতব্যঞ্জনাদি। ইত্যমরঃ ॥

প্রয়াগঃ (পুং) তীর্থভেদঃ। যজ্ঞঃ। ইন্দ্রঃ। অশ্বঃ। ইতি মেদিনী ॥ * ॥ অথ প্রয়াগমাহাত্ম্যং। ততো গচ্ছেত ধর্ম্মজ্ঞ প্রয়াগমৃষিসম্মতং। যত্র ব্রহ্মাদয়ো দেবা দিশশ্চ সদিগীশ্বরাঃ ॥ লোকপালাশ্চ সিদ্ধাশ্চ নিরতাঃ পিতরস্তথা। সনৎকুমারপ্রমুখাস্তথৈব চ মহর্ষয়ঃ ॥ তথা নাগাঃ সুপর্ণাশ্চ সিদ্ধাশ্চ ক্রতবস্তথা। গন্ধর্ব্বাপ্সরসশ্চৈব সরিতঃ সাগরাস্তথা ॥ হরিশ্চ ভগবানাস্তে প্রজাপতিভিরাবৃতঃ। তত্র ত্রীণ্যগ্নিকুণ্ডানি তয়োর্মধ্যে তু জাহ্নবী ॥ প্রয়াগাৎ সমতিক্রান্তা সর্ব্বতীর্থপুরস্কৃতা। তপনস্য সুতা তত্র ত্রিষু লোকেষু বিশ্রুতা॥ যমুনা গঙ্গয়া সার্দ্ধং সঙ্গতা লোকভাবিনী। গঙ্গাযমুনয়োর্ম্মধ্যে পৃথিব্যা জঘনং স্মৃতং ॥ প্রয়াগং জঘনস্যান্তমুপস্থমৃষয়ো বিদুঃ। প্রয়াগং স প্রতিষ্ঠানং কম্বলাশ্বতরাবুভৌ॥ তীর্থং ভোগবতী চৈব বেদী প্রোক্তা প্রজাপতেঃ। তত্র বেদাশ্চ যজ্ঞাশ্চ মূর্ত্তিমন্তো মহামতে ॥ প্রজাপতিমুপাসন্তে ঋষয়শ্চ মহাব্রতাঃ। যজন্তে ক্রতুভির্দ্দেবাস্তথা চক্রধরাঃ সদা ॥ ততঃ পুণ্যতমং নাস্তি ত্রিষু লোকেষু সূতজ। প্রয়াগং সর্ব্বতীর্থেভ্যঃ প্রবদন্ত্যধিকং দ্বিজাঃ ॥ শ্রবণাৎ তস্য তীর্থস্য নামসঙ্কীর্ত্তনাদপি। মৃত্তিকালভনাদ্বাপি সর্ব্বপাপৈঃ প্রমুচ্যতে তত্রাভিষেকং যঃ কুর্য্যাৎ সঙ্গমে সংশিত ব্রতঃ। পুণ্যং স মহদাপ্নোতি রাজসূয়াশ্বমেধয়োঃ ॥ এষা যজনভূমির্হি দেবানামপি সৎকৃতা। দত্তং তত্র স্বল্পমপি মহদ্ ভবতি সূতজ ॥ ন বেদবচনাত্তাত ন লোকবচনাদপি। মতিরুৎক্রমণং যাতি প্রয়াগমরণং প্রতি ॥ দশতীর্থসহস্রাণি ষষ্টিকোট্যস্তথাপরাঃ। তেষাং সান্নিধ্যমত্রৈব কীর্ত্তিতং সূতনন্দন ॥ যৎ পুণ্যং ত্রিষু লোকেষু বেদবিদ্যাসু যৎ ফলং। স্নাতমাত্রস্য তৎ পুণ্যং গঙ্গাযমুনসঙ্গমে ॥ ইতি পাদ্মে ভূমিখণ্ডে ১২৭ অধ্যায়ঃ ॥ * ॥ অপি চ। পুত্রকামঃ প্রয়াগে হি স্নাত্বা পুণ্যে সিতাসিতে। ধনকামঃ পুরা শক্র স্নাতো হ্যত্র দ্বিজোত্তম ॥ ধনদস্য নিধীন্ সর্ব্বান্ তস্মাজ্জহার মায়য়া। নারায়ণো নরেণৈব বর্ষাণামযুতং পুরা ॥ অনাহারঃ প্রয়াগেঽস্মিন্ কৃতবান্ পুণ্যমুত্তমং। সিদ্ধিঞ্চ সাধকা যান্তি প্রয়াগেঽস্মিন্ দ্বিজোত্তম ॥ ইতি পাদ্মোত্তরখণ্ডে ২৩ অধ্যায়ঃ ॥ * ॥ অপি চ। যুধিষ্ঠির উবাচ। ভগবন্ শ্রোতুমিচ্ছামি প্রয়াগগমনং ফলং। মৃতানাং কা গতিস্তত্র স্নাতানামপি কিং ফলং ॥ যে বসন্তি প্রয়াগে তু ব্রূহি তেষাস্তু কিংফলং। ভবতা বিদিতং হ্যেতৎ তন্মে ব্রূহি নমোঽস্তুতে ॥ মার্কণ্ডেয় উবাচ। কথয়িষ্যামি তে বৎস যা চেষ্টা যচ্চ

তৎফলং। পৃষ্টা মহর্ষিভিঃ সম্যক্ কথ্যমানং ময়া শ্রুতং॥ যত্র স্নাত্বা দিবং যান্তি যে মৃতাস্তেঽপুনর্ভবাঃ। যত্র ব্রহ্মাদয়ো দেবা রক্ষাং কুর্ব্বন্তি সঙ্গতাঃ॥ ষহূন্যন্যানি তীর্থানি সর্ব্বপাপহরাণি চ। কথিতুং নেহ শক্নোমি বহুবর্ষশতৈরপি॥ সংক্ষেপেণ প্রবক্ষ্যামি প্রয়াগস্যেহ কীর্ত্তনং। ষষ্টির্ধন্বিসহস্রাণি যক্ষা রক্ষন্তি জাহ্নবীং॥ যমুনাং রক্ষতি সদা সবিতা সপ্তিবাহনঃ। প্রয়াগন্তু বিশেষেণ স্বয়ং রক্ষতি বাসবঃ॥ মণ্ডলং রক্ষতি হরিঃ সর্ব্বদেবৈশ্চ সম্মিতং। ন্যগ্রোধং রক্ষতে নিত্যং শূলপাণির্মহেশ্বরঃ॥ স্থানং রক্ষন্তি বৈ দেবাঃ সর্ব্বে পাপহরং শুভং। স্বকর্ম্মণাবৃতা লোকা নৈব গচ্ছন্তি তৎপদং॥ স্বল্পমল্পতরং পাপং যদা তস্য নরাধিপ। প্রয়াগং স্মরমাণস্য সর্ব্বমায়াতি সংক্ষয়ং॥ দর্শনাত্তস্য তীর্থস্য নামসংকীর্ত্তনাদপি। মৃত্তিকালভনাদ্বাপি নরঃ পাপাৎ প্রমুচ্যতে॥ পঞ্চকুণ্ডানি রাজেন্দ্র যেষাং মধ্যে তু জাহ্নবী। প্রয়াগং বিশতঃ পুংসঃ পাপং নশ্যতি তৎক্ষণাৎ॥ যোজনানাং সহস্রেষু গঙ্গাং যঃ স্মরতে নরঃ। অপি দুষ্কৃতকর্ম্মাসৌ লভতে পরমাং গতিং॥ কীর্ত্তনান্মুচ্যতে পাপাৎ দৃষ্ট্বা ভদ্রাণি পশ্যতি॥ ব্যাধিতো যদি বা হীনঃ ক্রুদ্ধো বাপি ভবেন্নরঃ। গঙ্গাযমুনমাসাদ্য ত্যজেৎ প্রাণান্ প্রযত্নতঃ॥ দীপ্তকাঞ্চনবর্ণাভৈর্বিমানৈর্ভানুবর্ণিভিঃ। ঈপ্সিতান্ লভতে কামান্ বদন্তি মুনিপুঙ্গবাঃ॥ সর্ব্বরত্নময়ৈর্দ্দিব্যৈর্নানাধ্বজসমাকুলৈঃ। বরাঙ্গনাসমাকীর্ণৈর্মোদন্তে শুভলক্ষণৈঃ॥ গীতবাদিত্রনির্ঘোষৈঃ প্রসুপ্তঃ প্রতিবুধ্যতে। যাবন্ন স্মরতে জন্ম তাবৎ স্বর্গে মহীয়তে॥ তস্মাৎ স্বর্গাৎ পরিভ্রষ্টঃ ক্ষীণকর্ম্মা নরোত্তমঃ। হিরণ্যরত্নসংপূর্ণে সমৃদ্ধে জায়তে কুলে॥ তদেব স্মরতে তীর্থং স্মরণাত্তত্র গচ্ছতি॥ দেশস্থো যদি বারণ্যে বিদেশে যদি বা গৃহে। প্রয়াগং স্মরমাণস্তু যস্তু প্রাণান্ পরিত্যজেৎ। ব্রহ্মলোকমবাপ্নোতি বদন্তি মুনিপুঙ্গবাঃ॥ সর্ব্বকামফলা বৃক্ষা মহী যত্র হিরণ্ময়ী। ঋষয়ো মুনয়ঃ সিদ্ধাস্তত্র লোকে স গচ্ছতি॥ স্ত্রীসহস্রাকুলে রম্যে মন্দাকিন্যাস্তটে শুভে। মোদতে মুনিভিঃ সার্দ্ধং স্বকৃতেনেহ কর্ম্মণা॥ সিদ্ধচারণগন্ধর্ব্বৈঃ পূজ্যতে দিবি দৈবতৈঃ। অথ স্বর্গাৎ পরিভ্রষ্টো জম্বুদ্বীপপতির্ভবেৎ॥ অতঃ শুভানি কর্ম্মাণি চিন্ত্যমানঃ পুনঃ পুনঃ। গুণবান্ বিত্তসম্পন্নো ভবতীহ ন সংশয়ঃ। কর্ম্মণা মনসা বাচা সত্যধর্ম্মপ্রতিষ্ঠিতঃ॥ গঙ্গাযমুনয়োর্মধ্যে যস্তু গ্রামং প্রযচ্ছতি। সুবর্ণমণিমুক্তাং বা তথৈবান্যৎ প্রতিগ্রহং॥ স্বকার্য্যে পিতৃকার্য্যে বা দেবতাভ্যর্চ্চনেঽপি বা। নিষ্ফলং তস্য তত্তীর্থং যাবৎ তদ্ধনমশ্নুতে॥ অতস্তীর্থে ন গৃহ্লীয়াৎ পুণ্যেষ্বায়তনেষু চ॥ কপিলাং পাটলাভান্তু যস্তু ধেনুং প্রযচ্ছতি। যাবদ্রোমাণি তস্যা বৈ সন্তি গাত্রেষু সত্তম। তাবদ্বর্ষসহস্রাণি রুদ্রলোকে

মহীয়তে ॥ ইতি কৌর্ম্মে প্রয়াগমাহাত্ম্যে ৩৩ অধ্যায়ঃ ॥ * ॥ তত্র মুণ্ডনবিধির্যথা। গঙ্গায়াং ভাস্করক্ষেত্রে মাতাপিত্রোর্গুরৌ মৃতে। আধানে সোমপানে চ বপনং সপ্তসু স্মৃতং ॥ ইতি স্মৃতিসমুচ্চয়লিখিত-বচনং প্রয়াগাবচ্ছিন্নগঙ্গায়াং বিধায়কং। ভাস্করক্ষেত্রং প্রয়াগঃ। অপি চ। প্রয়াগমধিকৃত্য। কেশানাং যাবতী সংখ্যা ছিন্নানাং জাহ্নবীজলে। তাবদ্বর্ষসহস্রাণি স্বর্গলোকে মহীয়তে ॥ প্রয়াগে স্ত্রীণামপি মুণ্ডনং ন তু কেশানাং দ্ব্যঙ্গুলচ্ছেদন-মাত্রং। যথা। কেশমূলমুপাশ্রিত্য সর্ব্বপাপানি দেহিনাং। তিষ্ঠন্তি তীর্থস্নানেন তস্মাত্তান্যত্র বাপয়েৎ ॥ প্রয়াগে মুণ্ডনাকরণে দোষোঽপি। গঙ্গায়াং ভাস্করক্ষেত্রে মুণ্ডনং যো ন কারয়েৎ। স কোটিকুলসংযুক্ত আকল্পং রৌরবে বসেৎ ॥ ইতি প্রায়শ্চিত্ততত্ত্বং ॥

প্রয়াগভয়ঃ (পুং) ইন্দ্রঃ। ইতি শব্দমালা ॥

প্রয়াণং (ক্লী) গমনং। ইতি হলায়ুধঃ ॥ যথা। উদ্ঘাটিতনবদ্বারে পঞ্জরে বিহগোঽনিলঃ। যত্তিষ্ঠতি তদাশ্চর্য্যং প্রয়াণে বিস্ময়ঃ কুতঃ ॥ ইত্যুদ্ভটঃ ॥ তৎপর্য্যায়ঃ। প্রস্থানং ২ গমনং ৩ ব্রজ্যা ৪ অভিনির্যাণং ৫ প্রয়াণকং ৬। ইতি হেমচন্দ্রঃ ॥ অত্র বর্ণনীয়ানি যথা। ভেরীনিস্বনঃ ১ ভূকম্পঃ ২ বলধূলিঃ ৩ করভঃ ৪ বৃষঃ ৫ ধ্বজঃ ৬ ছত্রং ৭ বণিক্ ৮ শকটং ৯ রথঃ ১০। ইতি কবিকল্পলতা ॥

প্রয়াতঃ (পুং) সৌপ্তিকঃ। ভৃগুঃ। ইতি হেমচন্দ্রঃ ॥ গতে ত্রি ॥

প্রয়ামঃ (পুং) নীবাকঃ। ইত্যমরঃ ॥ মহার্ঘ্য-হেতোর্ধান্যাদিষু জনানামাদরাতিশয়ে তুলাধরণাধিক্যং। ইতি কেচিৎ। ক্রয়াদরঃ। ইতি কেচিৎ। মূল্যাধিক্যহেতোনিশ্চয়েন পরিচ্ছেদনং। ইতি কেচিৎ। ইতি ভরতঃ ॥

প্রয়াসঃ (পুং) প্রযত্নঃ। তৎপর্য্যায়ঃ। শ্রমঃ ২ ক্লমঃ ৩ ক্লেশঃ ৪ পরিশ্রমঃ ৫ আয়াসঃ ৬ ব্যায়ামঃ ৭। ইতি হেমচন্দ্রঃ ॥

প্রযুক্তং (ত্রি) প্রকর্ষেণ যুক্তং। যথা। গুণপ্রযুক্তাঃ পরমর্ম্মভেদিনঃ শরা ইবাবংশভবা ভবন্তি হি। তথাবিধা যে তু বিশুদ্ধবংশজা ব্রজন্তি চাপা ইব তেঽতিনম্রতাং ॥ ইত্যুদ্ভটঃ ॥ প্রকৃষ্টসমাধিযুক্তং। প্রকৃষ্টসংযোগবিশিষ্টং। প্রকৃষ্টনিন্দাযুক্তং। প্রকৃষ্টসংযমবিশিষ্টং। প্রপূর্ব্বযুগধাত্বর্থদর্শনাৎ। হেতৌ ক্লী। যথা। ন চ সমবায়িনিমিত্তাভাবপ্রযুক্তো নিয়মেন কার্য্যাভাবঃ কিন্ত্বসমবায়িকারণাভাবপ্রযুক্তোঽপি। ইতি রক্ষিতঃ ॥

প্রযুক্তিঃ (স্ত্রী) প্রয়োজনং। প্রপূর্ব্বযুজধাতোর্ভাবে ক্তিঃ। যথা। তরুণ্যো বৃষলী ভার্য্যা প্রবীরং পুত্রকাম্যতি। ঋদ্ধস্য রাজমাতঙ্গা ইতি ন স্যুঃ প্রযুক্তয়ঃ ॥ ইতি প্রাঞ্চঃ ॥

প্রযুতং (ক্লী) নিযুতং। ইতি হেমচন্দ্রঃ ॥

প্রযুদ্ধার্থঃ (পুং) প্রত্যুৎক্রমঃ। ইতি প্রয়োগার্থশব্দটীকায়াং রমানাথঃ ॥

প্রয়োক্তা [ঋ] (ত্রি) প্রয়োগকর্ত্তা। যথা। উত্তমর্ণাধমর্ণৌ দ্বৌ প্রযোক্তৃগ্রাহকৌ ক্রমাৎ। ইত্যমরঃ॥

প্রয়োগঃ (পুং) কার্ম্মণং। বশীকরণং। প্রযুক্তিঃ। নিদর্শনং। ইতি মেদিনী॥ ঘোটকঃ। ইতি শব্দমালা॥

প্রয়োগার্থঃ (পুং) প্রধানপ্রয়োগানুকূলং প্রয়োজনানুষ্ঠানং। তৎপর্য্যায়ঃ। প্রত্যুৎক্রমঃ ২। ইত্যমরঃ॥

প্রয়োগী [ন্] (ত্রি) প্রয়োগযুক্তঃ। প্রপূর্ব্বযুজধাতোর্ণিন্॥

প্রযোজকঃ (ত্রি) প্রয়োগকর্ত্তা। নিয়োগকর্ত্তা। স্বতন্ত্রতৎপ্রযোজকৌ কর্ত্তা। ইতি সুপদ্মব্যাকরণং॥

প্রয়োজনং (ক্লী) কার্য্যং। হেতুঃ। ইতি মেদিনী॥ সর্ব্বস্যৈব হি শাস্ত্রস্য কর্ম্মণো বাপি কস্যচিৎ। যাবৎ প্রয়োজনং নোক্তং তাবৎ কেন প্রগৃহ্যতে॥ সিদ্ধার্থং সিদ্ধসম্বন্ধং শ্রোতুং শ্রোতা প্রবর্ত্ততে। গ্রন্থাদৌ তেন বক্তব্যঃ সম্বন্ধঃ সপ্রয়োজনঃ॥ ইতি প্রাঞ্চঃ॥

প্রযোজ্যঃ (ত্রি) প্রযোক্তুং শক্যঃ। ভৃত্যঃ। ইতি মুগ্ধবোধব্যাকরণং॥ মূলধনে ক্লী॥

প্ররূঢ়ঃ (পুং) জঠরং। ইতি মেদিনী॥

প্ররূঢ়ঃ (ত্রি) বদ্ধমূলঃ। ইতি মেদিনী॥ জাতঃ। প্রবৃদ্ধঃ। ইতি শব্দরত্নাবলী॥

প্ররোহঃ (পুং) অঙ্কুরঃ। ইতি হেমচন্দ্রঃ॥

প্রলপিতঃ (ত্রি) কথিতঃ। প্রপূর্ব্বলপধাতোঃ কর্ম্মণি ক্তঃ। যথা। জনস্থানে ভ্রান্তং কনকমৃগতৃষ্ণান্ধিতধিয়া বচো বৈদেহীতি প্রতিপদমুদশ্রু প্রলপিতং। ইতি কাব্যপ্রকাশঃ॥

প্রলম্বঃ (পুং) দৈত্যভেদঃ। স চ দনুপুত্রঃ মনুষ্যবধ্যঃ। যথা। একাক্ষ ঋষভো রিষ্টঃ প্রলম্বনরকৌ তথা। ইন্দ্রবাধনকেশী চ পুরঃ শম্বোঽথ ধেনুকঃ॥ গবেষ্টিকো গবাক্ষশ্চ তালকেতুশ্চ বীর্য্যবান্। এতে মনুষ্যবধ্যাস্তু দনোঃ পুত্রান্বয়াঃ স্মৃতাঃ॥ ইত্যগ্নিপুরাণং। ত্রপুষঃ। পয়োধরঃ। লতাঙ্কুরঃ। শাখা। হারভেদঃ। প্রলম্বনং। ইতি মেদিনী॥

প্রলম্বঘ্নঃ (পুং) বলরামঃ। ইত্যমরঃ॥

প্রলম্বভিৎ (পুং) বলরামঃ। ইতি হেমচন্দ্রঃ॥

প্রলম্বাণ্ডঃ (পুং) দীর্ঘাণ্ডকোষবিশিষ্টঃ। তৎপর্য্যায়ঃ। পুষ্করঃ ২। ইতি হেমচন্দ্রঃ॥

প্রলম্বিতঃ (ত্রি) প্রকর্ষেণ লম্বিতমাল্যাদিঃ। প্রপূর্ব্বলম্বধাতোঃ কর্ত্তরি ক্তঃ॥

প্রলয়ঃ (পুং) প্রলীয়তে ক্ষীয়তে জগদস্মিন্ সঃ। তৎপর্য্যায়ঃ। সম্বর্ত্তঃ ২ কল্পঃ ৩ ক্ষয়ঃ ৪ কল্পান্তঃ ৫। ইত্যমরঃ॥ লয়ঃ ৬ সংক্ষয়ঃ ৭ বিলয়ঃ ৮। ইতি শব্দরত্নাবলী॥ প্রতিসর্গঃ ৯ প্রতিসঞ্চরঃ ১০। স চ নিত্যনৈমিত্তিকপ্রাকৃতাত্যন্তিকভেদেন চতুর্ধা। যথা। কূর্ম্ম উবাচ। নিত্যং নৈমিত্তিকশ্চৈব প্রাকৃতাত্যন্তিকৌ তথা। চতুর্ধায়ং পুরাণেঽস্মিন্ প্রোচ্যতে প্রতিসঞ্চরঃ॥ *॥ নিত্যো যথা। যোঽয়ং সংদৃশ্যতে নূনং নিত্যং লোকে ক্ষয়স্ত্বিহ। নিত্যং সংকীর্ত্ত্যতে নাম্না মুনিভিঃ প্রতিসঞ্চরঃ॥ *॥ নৈমিত্তিকো যথা। ব্রাহ্মো

নৈমিত্তিকো নাম কল্পান্তে যো ভবিষ্যতি। ত্রৈলোক্যস্যাস্য কথিতঃ প্রতিসর্গো মনীষিভিঃ ॥ * ॥ প্রাকৃতো যথা। মহদাদ্যং বিশেষান্তং যদা সংযাতি সংক্ষয়ং। প্রাকৃতঃ প্রতিসর্গোঽয়ং প্রোচ্যতে কালচিন্তকৈঃ ॥ * ॥ আত্যন্তিকো যথা। জ্ঞানাদাত্যন্তিকঃ প্রোক্তো যোগিনঃ পরমাত্মনি। প্রলয়ঃ প্রতিসর্গোঽয়ং কালচিন্তাপরৈর্দ্বিজৈঃ ॥ আত্যন্তিকশ্চ কথিতঃ প্রলয়ো লয়সাধনঃ। *। নৈমিত্তিকপ্রলয়বিস্তারো যথা। নৈমিত্তিকমিদানীং বঃ কীর্ত্তয়িষ্যে সমাসতঃ॥ চতুর্যুগসহস্রান্তে সংপ্রাপ্তে প্রতিসঞ্চরে। আত্মসংস্থাঃ প্রজাঃ কর্ত্তুং প্রতিপেদে প্রজাপতিঃ॥ ততো ভবত্যনাবৃষ্টিস্তীব্রা সা শতবার্ষিকী। ভূতক্ষয়করী ঘোরা সর্ব্বভূতভয়ঙ্করী ॥ ততো যান্যল্পসারাণি শস্যানি পৃথিবীতলে। তানি চাগ্রে প্রলীয়ন্তে ভূমিত্বমুপযান্তি চ॥ সপ্তরশ্মিরথো ভূত্বা সমুত্তিষ্ঠন্দিবাকরঃ। অসহ্যরশ্মির্ভবতি পিবন্নম্ভো গভস্তিভিঃ॥ ততস্তে রশ্ময়ঃ সপ্ত পিবন্ত্যম্বু মহার্ণবে। তেনাহারেণ তে সূর্য্যা দীপ্তাঃ সপ্ত ভবন্তি হি॥ তস্য তে রশ্ময়ঃ সপ্ত সূর্য্যা ভূত্বা চতুর্দ্দিশং। চতুর্লোকমিদং কৃৎস্নং দহন্তি শিখিনো যথা ॥ ব্যাপ্নুবন্তশ্চ তে বিপ্রাস্তূর্দ্ধঞ্চাধশ্চ রশ্মিভিঃ। দীপ্যন্তে ভাস্করাঃ সপ্ত দহন্তোঽগ্নিপ্রতাপিনঃ॥ তে সূর্য্যা বারিণা দীপ্তা বহুসাহস্ররশ্ময়ঃ। খং সমাবৃত্য তিষ্ঠন্তি নির্দ্দহন্তো বসুন্ধরাং ॥ ততস্তেষাং প্রতাপেন দহ্যমানা বসুন্ধরা। সাদ্রিনদ্যর্ণবদ্বীপা নিঃস্নেহা সমপদ্যত ॥ দীপ্তাভিঃ সন্তপ্তাভিশ্চ জ্বালাভিশ্চ সমাবৃতঃ। অধশ্চোর্দ্ধঞ্চ তির্য্যক্ চ সমাবৃত্য সহস্রশঃ ॥ সূর্য্যাগ্নিনা প্রস্পৃষ্টানাং সংহৃষ্টানাং পরস্পরং। একত্বমুপজাতানামেকজ্বালো ভবেৎ প্রভুঃ॥ সর্ব্বলোকপ্রণাশশ্চ সোঽগ্নির্ভূত্বাত্মকুণ্ডলী। চতুর্লোকমিদং কৃৎস্নং নির্দ্দহত্যাত্মতেজসা ॥ ততঃ প্রলীনে সর্ব্বস্মিন জঙ্গমে স্থাবরে তথা। নির্ব্বৃক্ষা নিস্তৃণা ভূমিঃ কূর্ম্মপৃষ্ঠে প্রকাশতে ॥ অম্বরীশমিবাভাতি সর্ব্বমাপূরিতং জগৎ। সর্ব্বমেব তদার্চ্চির্ভিঃ পূর্ণং জাজ্বল্যতে নভঃ ॥ পাতালে যানি তীর্থানি মহোদধিগতানি তু। তত্র তানি প্রলীয়ন্তে ভূমিত্বমুপযান্তি বৈ ॥ দ্বীপাংশ্চ পর্ব্বতাংশ্চৈব বর্ষাণ্যথ মহোদধীন্। তান্ সর্ব্বান্ ভস্মসাৎ কৃত্বা সপ্তাত্মা পাবকঃ প্রভুঃ ॥ সমুদ্রেভ্যো নদীভ্যশ্চ পাতালেভ্যশ্চ সর্ব্বশঃ। পিবন্নপঃ সমিদ্ধোঽগ্নিঃ পৃথিবীমাশ্রিতোঽজ্বলৎ ॥ ততঃ সম্বর্ত্তকঃ শৈলানতিক্রম্য মহাংস্তথা। লোকান্দহতি দীপ্তাত্মা রুদ্রতেজোবিজৃম্ভিতঃ॥ স দগ্ধ্বা পৃথিবীন্দেবো রসাতলমশোষয়ৎ। অধস্তাৎ পৃথিবীং দগ্ধ্বা দিবমূর্দ্ধং দহিষ্যতি ॥ যোজনানাং শতানীহ সহস্রাণ্যযুতানি চ। উত্তিষ্ঠন্তি শিখাস্তস্য বায়ুঃ সম্বর্ত্তস্য চ ॥ গন্ধর্ব্বাংশ্চ পিশাচাংশ্চ সযক্ষোরগরাক্ষসান্। তদা দহত্যসৌ দীপ্তঃ কালরুদ্রপ্রচোদিতঃ ॥ ভূর্লোকঞ্চ ভুবর্লোকং

স্বর্লোকঞ্চ তথা মহঃ। দহেদশেষং কালাগ্নিঃ কালো বিশ্বতনুঃ স্বয়ং ॥ ব্যুষ্টেষু তেষু লোকেষু তির্য্যগূর্দ্ধমথাগ্নিনা। তত্তেজঃ সমনুপ্রাপ্য কৃৎস্নং জগদিদং শনৈঃ ॥ অয়োগৃহনিভং সর্ব্বং তদেবৈকং প্রকাশতে। ততো গজকুলোন্নাদাঃ স্তনিতৈঃ সমলঙ্কৃতাঃ ॥ উত্তিষ্ঠন্তি তদা ব্যোম্নি ঘোরাঃ সম্বর্ত্তকা ঘনাঃ। কেচিন্নীলোৎপলশ্যামাঃ কেচিৎ কুমুদসন্নিভাঃ ॥ ধূম্রবর্ণাস্তথা কেচিত্তথা পীতাঃ পয়োধরাঃ। কেচিদ্রক্তাভ্রবর্ণাশ্চ স্থূলাঃ ক্ষারনিভা স্তথা ॥ শঙ্খকুন্দনিভাশ্চান্যে জাত্যঞ্জননিভাঃপরে। মনঃশিলানিভাস্ত্বন্যে কপোতসদৃশাঃ পরে ॥ কেচিদ্রুদ্রাক্ষবর্ণাভাস্তথান্যে ক্ষীরসন্নিভাঃ। তথা কর্ব্বূরবর্ণাভা ভিন্নাঞ্জননিভাস্তথা ॥ ইন্দ্রগোপনিভাঃ কেচিদ্ধরিতালনিভাস্তথা। কাকাণ্ডকনিভাঃ কেচিদুত্তিষ্ঠন্তি ঘনা দিবি ॥ কেচিৎ পর্ব্বতসঙ্কাশাঃ কেচিদ্গজকুলোপমাঃ। কূটাগারনিভাশ্চান্যে কেচিন্মীনকুলোদ্বহাঃ॥ বহুরূপা ঘোররূপা ঘোরস্বরনিনাদিনঃ। তদা জলধরাঃ সর্ব্বে পূরয়ন্তি নভস্তলং ॥ ততস্তে জলদা ঘোরা বারিণা ভাস্করাত্মজাঃ। সপ্তধা সংবৃতাত্মানস্তমগ্নিং শময়ন্ত্যুত ॥ ততস্তে জলদা বর্ষং বর্ষন্তীহ হিমৌঘবৎ। সুঘোরমশিবং সর্ব্বং নাশয়ন্তি চ পাবকং ॥ প্রবৃত্তেন তদাত্যর্থমম্ভসা পূর্য্যতে কিল। অদ্ভিস্তেজোঽভিভূতত্বাত্তদাগ্নিঃ প্রবিশত্যপঃ ॥ নষ্টে চাগ্নৌ বর্ষশতৈঃ পয়োদা জলসম্ভবাঃ। প্লাবয়ন্তোহথ ভুবনং মহাজলপরিস্রবৈঃ ॥ ধারাভিঃ পূরয়ন্তীদং চোদ্যমানাঃ স্বয়ম্ভুবা। উদ্যন্তঃ সলিলৌঘৈশ্চ বেলা ইব মহোদধেঃ ॥ সাদ্রিদ্বীপা তথা পৃথ্বী জলৈঃ সংছাদ্যতে শনৈঃ॥ আদিত্যরশ্মিভিঃ পীতং জলমভ্রেষু তিষ্ঠতি। পুনঃ পততি তদ্ভূমৌ পূর্য্যন্তে তেন চার্ণবাঃ ॥ ততঃ সমুদ্রাঃ স্বাং বেলামতিক্রান্তাস্তু কৃৎস্নশঃ। পর্ব্বতাশ্চ বিলীয়ন্তে মহী চাপ্সু নিমজ্জতি ॥ তস্মিন্নেকার্ণবে ঘোরে নষ্টে স্থাবরজঙ্গমে। যোগনিদ্রাং সমাস্থায় শেতে দেবঃ প্রজাপতিঃ॥ চতুর্যুগসহস্রান্তং কল্পমাহুর্মহর্ষয়ঃ। বরাহো বর্ত্ততে কল্পো যস্য বিস্তার ঈরিতঃ॥ অসংখ্যাতাস্তথা কল্পা ব্রহ্মবিষ্ণুশিবাত্মকাঃ। কথিতা হি পুরাণেষু মুনিভিঃ কালচিন্তকৈঃ॥ সাত্ত্বিকেষ্বথ কল্পেষু মাহাত্ম্যমখিলং হরেঃ। তামসেষু শিবস্যোক্তং রাজসেষু প্রজাপতেঃ। সোঽয়ং প্রবর্ত্ততে কল্পো বারাহঃ সাত্ত্বিকো মতঃ ॥ অন্যে চ সাত্ত্বিকাঃ কল্পা মম তেষু পরিগ্রহঃ। ধ্যানন্তপস্তথা জ্ঞানং লব্ধা তেষ্বেব যোগিনঃ ॥ আরাধ্য গিরিশং মত্তঃ যাতি তৎ পরমং পদং। সোঽহং সত্বং সমাধায় মায়ী মায়াময়ং স্বয়ং ॥ একার্ণবে জগত্যস্মিন্ যোগনিদ্রাং ব্রজানি তু। মাং পশ্যন্তি মহাত্মানঃ সুপ্তং কালে মহর্ষয়ঃ ॥ জনলোকে বর্ত্তমানাস্তপসা যোগচক্ষুষা। অহং পুরাণপুরুষো ভূর্ভুবঃপ্রভবো বিভুঃ ॥ সহস্রচরণঃ শ্রীমান্ সহস্রাক্ষঃ সহস্রপাৎ। মন্ত্রোঽগ্নির্ব্রাহ্মণা গাবঃ কুশাশ্চ সমিধো হ্যহং ॥ প্রোক্ষণী

চ ধ্রুবশ্চৈব সোমো ঘৃতময়োঽস্ম্যহং। সম্বর্ত্তকো মহানাত্মা পবিত্রং পরমং যশঃ॥ বেদবেদ্যঃ প্রভুর্গোপ্তা গোপতির্ব্রহ্মণো মুখং। অনন্তস্তারকো যোগী গতির্মতিমতাম্বরঃ॥ হংসঃ প্রাণোঽথ কপিলো বিশ্বমূর্ত্তিঃ সনাতনঃ। ক্ষেত্রজ্ঞঃ প্রকৃতিঃ কালো জগদ্বীজমথামৃতং॥ মাতা পিতা মহাদেবো মত্তো হ্যন্যন্ন বিদ্যতে॥ আদিত্যবর্ণো ভুবনস্য গোপ্তা নারায়ণঃ পুরুষো যোগমূর্ত্তিঃ। মাং পশ্যন্তি যতয়ো যোগনিষ্ঠা জ্ঞাত্বাত্মানমমৃতত্বং ব্রজন্তি॥*॥ প্রাকৃতপ্রলয়বিস্তারো যথা। কূর্ম্ম উবাচ। অতঃ পরং প্রবক্ষ্যামি প্রতিসর্গমনুত্তমং। প্রাকৃতং প্রসমাসেন শৃণুধ্বং গদতো মম॥ গতে পরার্দ্ধদ্বিতয়ে কালে লোকপ্রকালকঃ। কালাগ্নির্ভস্মসাৎ কর্ত্তুং করোতি নিখিলং মতিং॥ আত্মন্যাত্মানমাবেশ্য ভূত্বা দেবো মহেশ্বরঃ। দহেদশেষং ব্রহ্মাণ্ডং সদেবাসুরমানুষং॥ তমাবিশ্য মহাদেবো ভগবান্নীললোহিতঃ। করোতি লোকসংহারং ভীষণং লোকমাশ্রিতঃ॥ প্রবিশ্য মণ্ডলং সৌরং কৃত্বাসৌ বহুধা পুনঃ। নির্দ্দহত্যখিলং লোকং সপ্তসপ্তিস্বরূপধৃক্॥ স দগ্ধ্বা সকলং সত্ত্বং মন্ত্রং ব্রহ্মশিরো মহৎ। দেবতানাং শরীরেষু ক্ষিপত্যখিলদাহকং॥ দগ্ধেষ্বশেষদেহেষু দেবী গিরিবরাত্মজা। একা সা সাক্ষিণঃ শম্ভোস্তিষ্ঠতে বৈদিকী শ্রুতিঃ॥ শিরঃকপালৈর্দেবানাং কৃতস্রগ্বরভূষণঃ। আদিত্যচন্দ্রাদিগণৈঃ পূরয়ন্ ব্যোমমণ্ডলং॥ সহস্রনয়নো দেবঃ সহস্রাকৃতিরীশ্বরঃ। সহস্রহস্তচরণঃ সহস্রার্চ্চির্মহাভুজঃ॥ দংষ্ট্রাকরালবদনঃ প্রদীপ্তানললোচনঃ। ত্রিশূলী কৃত্তিবসনো যোগমৈশ্বরমাস্থিতঃ॥ পীত্বা তৎ পরমানন্দং প্রভূতমমৃতং স্বকং। করোতি তাণ্ডবং দেবীমালোক্য পরমেশ্বরঃ॥ পীত্বা নৃত্যামৃতং দেবী ভর্ত্তুঃ পরমমঙ্গলা। যোগমাস্থায় দেবস্য দেহমায়াতি শূলিনঃ॥ স ত্যক্ত্বা তাণ্ডবরসং স্বেচ্ছয়ৈব পিনাকধৃক্। যাতি স্বভাবং ভগবান্ দগ্ধ্বা ব্রহ্মাণ্ডমণ্ডলং॥ সংস্থিতেষ্বথ দেবেষু ব্রহ্মবিষ্ণুপিনাকিষু। গুণৈরনেকৈঃ পৃথিবী বিলয়ং যাতি বারিষু। স বারিতত্ত্বং সগুণং গ্রসতে হব্যবাহনঃ॥ তৈজসং গুণসংযুক্তং বায়ৌ সংযাতি সংক্ষয়ং। আকাশে সগুণো বায়ুঃ প্রলয়ং যাতি সত্তমাঃ॥ ভূতাদৌ চ তথাকাশং লীয়তে গুণসংযুতং। ইন্দ্রিয়াণি চ সর্ব্বাণি তৈজসে যান্তি সংক্ষয়ং॥ বৈকারিকে দেবগণাঃ প্রলয়ং যান্তি সত্তমাঃ। বৈকারিকস্তৈজসশ্চ ভূতাদিশ্চেতি সত্তমাঃ॥ ত্রিবিধোঽয়মহঙ্কারো মহতি প্রলয়ং ব্রজেৎ। মহান্তমেভিঃ সহিতং ব্রহ্মাণমমৃতৌজসং॥ অব্যক্তং জগতো যোনিঃ সংহরেদেকমব্যয়ং। এবং সংহৃত্য ভূতানি তত্ত্বানি চ মহেশ্বরঃ॥ নিযোজয়ত্যথান্যোন্যং প্রধানং পুরুষং পরং। প্রধানপুংসোরজয়োরেষ সংহার ঈরিতঃ॥ মহেশ্বরেচ্ছাজনিতো ন স্বয়ং বিদ্যতে

লয়ঃ। গুণসাম্যং তদব্যক্তং প্রকৃতিঃ পরিগীয়তে ॥ প্রধানং জগতো যোনির্মায়াতত্ত্বমচেতনং । কূটস্থশ্চিন্ময়ো হ্যাত্মা কেবলঃ পঞ্চবিংশকঃ ॥ গীয়তে মুনিভিঃ সাক্ষী মহানেকঃ পিতামহঃ। এবংসংহারকরণী শক্তির্মাহেশ্বরী ধ্রুবা ॥ প্রধানাদ্যং বিশেষান্তং দহেদ্রুদ্র ইতি শ্রুতিঃ। যোগিনামথ সর্ব্বেষাং জ্ঞানবিন্যস্তচেতসাং । আত্যন্তিকঞ্চৈব লয়ং বিদধাতীহ শঙ্করঃ ॥ ইতি কৌর্ম্মে ৪২।৪৩ অধ্যায়ঃ ॥ * ॥ আত্যন্তিকপ্রলয়বিস্তারো যথা। শ্রীপরাশর উবাচ । আধ্যাত্মিকাদি মৈত্রেয় জ্ঞাত্বা তাপত্রয়ং বুধঃ । উৎপন্নজ্ঞানবৈরাগ্যঃ প্রাপ্নোত্যাত্যন্তিকং লয়ং ॥ আধ্যাত্মিকো বৈ দ্বিবিধঃ শারীরো মানসস্তথা। শারীরো বহুভির্ভেদৈর্ভিদ্যতে শ্রূয়তাঞ্চ সঃ ॥ শিরোরোগপ্রতিশ্যায়জ্বরশূলভগন্দরৈঃ । গুল্মার্শঃশ্বযথুশ্বাসচ্ছর্দ্যাদিভিরনেকধা ॥ তথাক্ষিরোগাতীসারকুষ্ঠাঙ্গাময়সংজ্ঞকৈঃ।ভিদ্যতে দেহজস্তাপো মানসং শ্রোতুমর্হসি॥ কামক্রোধভয়দ্বেষলোভমোহবিষাদজঃ। শোকাসূয়াবমানের্ষ্যামাৎসর্য্যাদিভবস্তথা ॥ মানসোঽপি দ্বিজশ্রেষ্ঠ তাপো ভবতি নৈকধা। ইত্যেবমাদিভির্ভেদৈস্তাপো হ্যাধ্যাত্মিকঃ স্মৃতঃ ॥ মৃগপক্ষিমনুষ্যাদ্যৈঃ পিশাচোরগরাক্ষসৈঃ । সরীসৃপাদ্যৈশ্চ নৃণাং জন্যতে চাধিভৌতিকঃ॥ শীতোষ্ণবাতবর্ষাম্বুবৈদ্যুতাদিসমুদ্ভবঃ। তাপো দ্বিজবরশ্রেষ্ঠ কথ্যতে চাধিদৈবিকঃ॥ তদস্য ত্রিবিধস্যাপি দুঃখজাতস্য পণ্ডিতৈঃ। গর্ব্ভজন্মজরাদ্যেষু স্থানেষু প্রভবিষ্যতঃ॥ নিরস্তাতিশয়াহ্লাদসুখভাবৈকলক্ষণা । ভেষজং ভগবৎপ্রাপ্তিরেকান্তাত্যন্তিকী মতা ॥ তস্মাত্তৎপ্রাপ্তয়ে যত্নঃ কর্ত্তব্যঃ পণ্ডিতৈর্নরৈঃ। তৎপ্রাপ্তিহেতুজ্ঞানঞ্চ কর্ম্ম চোক্তং মহামুনে॥ আগমোত্থং বিবেকাচ্চ দ্বিধা জ্ঞানং তথোচ্যতে । শব্দব্রহ্মাগমময়ং পরং ব্রহ্ম বিবেকজং॥ অন্ধন্তম ইবাজ্ঞানং দীপবচ্চেন্দ্রিয়োদ্ভবং। যথা সূর্য্যস্তথা জ্ঞানং যদ্বিপ্রর্ষে বিবেকজং ॥ মনুরপ্যাহ বেদার্থং স্মৃত্বা যন্মুনিসত্তম । তদেতচ্ছ্রূয়তামত্র সম্বন্ধে গদতো মম॥ দ্বে ব্রহ্মণী বেদিতব্যে শব্দব্রহ্ম পরঞ্চ যৎ। শব্দব্রহ্মণি নিষ্ণাতঃ পরং ব্রহ্মাধিগচ্ছতি॥ দ্বে বিদ্যে বেদিতব্যে বৈ ইতি বাথর্ব্বণী শ্রুতিঃ। পরয়া ত্বক্ষরপ্রাপ্তিঋর্গ্বেদাদি ময়া পরা ॥ যত্তদব্যক্তমজরমচিন্ত্যমজমব্যয়ং। অনির্দ্দেশ্যমরূপঞ্চ পাণিপাদাদ্যসংযুতং ॥ বিভুং সর্ব্বগতং নিত্যং ভূতযোনিমকারণং। ব্যাপ্যব্যাপ্যং যতঃ সর্ব্বং তং বৈ পশ্যন্তি সূরয়ঃ॥ তদ্ব্রহ্ম তৎ পরং ধাম তদ্ধ্যেয়ং মোক্ষকাঙ্ক্ষিণাং। শ্রুতিবাক্যোদিতং সূক্ষ্মং তদ্বিষ্ণোঃ পরমং পদং ॥ তদেব ভগবদ্বাচ্যং স্বরূপং পরমাত্মনঃ। বাচকো ভগবচ্ছব্দস্তস্যাদ্যস্যাক্ষরাত্মনঃ॥ এবং নিগদিতার্থস্য সতত্ত্বং তস্য তত্ত্বতঃ। জ্ঞায়তে যেন তজ্জ্ঞানং পরমন্যত্ত্রয়ীময়ং॥ অশব্দগোচরস্যাপি তস্যৈব ব্রহ্মণো দ্বিজ । পূজায়াং ভগবচ্ছব্দঃ ক্রিয়তে

হ্যৌপচারিকঃ ॥ শুদ্ধে মহাবিভূত্যাখ্যে পরে ব্রহ্মণি বর্ত্ততে। মৈত্রেয় ভগবচ্ছব্দঃ সর্ব্বকারণকারণে॥ সর্ব্বাণি তত্র ভূতানি বসন্তি পরমাত্মনি। ভূতেষু চ স সর্ব্বাত্মা বাসুদেবস্ততঃ স্মৃতঃ ॥ খাণ্ডিক্যজনকায়াহ পৃষ্টঃ কেশিধ্বজঃ পুরা। নামব্যাখ্যায়নন্তস্য বাসুদেবস্য তত্ত্বতঃ ॥ ভূতেষু বসতে সোঽন্তর্ব্বসন্ত্যত্র চ তানি যৎ। ধাতা বিধাতা জগতাং বাসুদেবস্ততঃ প্রভুঃ ॥ স সর্ব্বভূতপ্রকৃতির্ব্বিকারগুণাংশ্চ দোষাংশ্চ মুনে ব্যতীতঃ। অতীতসর্ব্বাবরণাখিলাত্মা তেনাস্তৃতং যদ্ভুবনান্তরাণি ॥ সমস্তকল্যাণগুণাত্মকো হি স্বশক্তিলেশাবৃতভূতসর্গঃ। ইচ্ছাগৃহীতাভিমতোরুদেহঃ সংসাধিতাশেষজগদ্ধিতোঽসৌ ॥ তেজোবলৈশ্বর্য্যমহাম্বিতশ্চ স্ববীর্য্যশক্ত্যাদিগুণৈকরাশিঃ। পরঃ পরাণাং সকলা ন যত্র ক্লেশাদয়ঃ সন্তি পরাবরেশে ॥ স ঈশ্বরো ব্যষ্টিসমষ্টিরূপোঽব্যক্তস্বরূপঃ প্রকটস্বরূপঃ। সর্ব্বেশ্বরঃ সর্ব্বদৃক্ সর্ব্ববেত্তা সমস্তশক্তিঃ পরমেশ্বরাখ্যঃ॥ স জ্ঞায়তে যেন তদস্তদোষং শুদ্ধং পরং নির্ম্মলমেকরূপং। সংদৃশ্যতে চাপ্যবগম্যতে বা তজ্জ্ঞানমজ্ঞানমতোঽন্যদুক্তং ॥ ইতি বিষ্ণুপুরাণে ৬ অংশে আত্যন্তিকপ্রতিসঞ্চারো নাম ৫অধ্যায়ঃ॥*॥ অপি চ। নারদ উবাচ। কৃতং ত্রেতা দ্বাপরঞ্চ কলিশ্চেতি চতুর্যুগং। দিব্যমেকযুগং জ্ঞেয়ং তস্য যা বৈকসপ্ততিঃ ॥ মন্বন্তরন্তু তজ্জ্ঞেয়ং তে তু যত্র চতুর্দ্দশ। স কল্পো নাম বৈ কালস্তদন্তে প্রলয়স্তু

যঃ ॥ সা ব্রহ্মরাত্রী রাজেন্দ্র যত্র শেতেঽম্বুজাসনঃ। ত্রয়ো লোকাস্তদা রাজন্ লীয়ন্তে তন্নিমিত্ততঃ ॥ নৈমিত্তিকো লয়ো নাম দৈনন্দিন ইতীর্য্যতে ॥ এবং দিনপ্রমাণেন ব্রহ্মণঃ শতবার্ষিকং। আয়ুঃ পূর্ব্বপরার্দ্ধে তু পরার্দ্ধে দ্বে প্রকীর্ত্তিতে॥ দ্বিপরার্দ্ধে ব্যতীতে তু ব্রহ্মণো জগদাত্মনঃ। তদা প্রকৃতয়ঃ সপ্ত প্রলয়ং যান্তি ভূমিপ ॥ লয়ঃ প্রাকৃতিকো হ্যেষ লীনে ব্রহ্মণি ভূপতে। অণ্ডকোষেঽপি সকলঃ প্রলয়ং যাতি সর্ব্বশঃ॥ পূর্ব্বরূপন্তু বক্ষ্যামি প্রলয়স্যাস্য ভূপতে। শতবর্ষাণি ভূমৌ হি পর্জ্জন্যো নৈব বর্ষতি ॥ দুর্ভিক্ষে নির্জনে লোকে প্রজাঃ সর্ব্বাঃ ক্ষুধার্দ্দিতাঃ। পরস্পরং ভক্ষ্যমাণাঃ ক্ষয়ং যাস্যন্তি ভূমিপ ॥ সমুদ্রে চ ধরণ্যাঞ্চ বৃক্ষেষু চ লতাসু চ। দেহে চ যো রসস্তং হি রবির্হরতি রশ্মিভিঃ ॥ ততঃ সম্বর্ত্তকো নাম জ্বালামালী হুতাশনঃ। সঙ্কর্ষণমুখোৎপন্নো দহত্যনিলসারথিঃ॥ সর্ব্বং ব্রহ্মাণ্ডভাণ্ডং বৈ তৎকালক্ষোভগর্জিতঃ। এবং দগ্ধং মহারাজ বহ্ন্যর্কাভ্যাং সমন্ততঃ ॥ দগ্ধা গোময়পিণ্ডাভং ব্রহ্মাণ্ডং সারবর্জ্জিতং। প্রচণ্ডপবনো রাজংস্তত্রে বর্ষশতং পুনঃ ॥ সম্বর্ত্তকো নাম মহান্ ব্রহ্মাণ্ডং চালয়িষ্যতি। ততো মেঘা মহাঘোরা নানাবর্ণা অনেকশঃ॥ শতং বর্ষাণি বর্ষন্তি গর্জ্জন্তি চ মহাস্বনাঃ। একোদকং ততো বিশ্বং নির্ব্বাণং নির্ব্বিকারকং ॥ ভূমের্গন্ধগুণং রাজন্ গ্রসন্ত্যাপঃ সমন্ততঃ।

গুণনাশাৎ স্বয়ং পৃথ্বী প্রলয়ং প্রাপ্স্যতে তদা ॥ তেজস্ত্বপাং রসগুণং সগন্ধং পিবতে বলাৎ। ততঃ প্রলয়মায়ান্তি রাজন্নাপোঽপি তৎক্ষণাৎ ॥ তেজসস্তু ততো রূপং রসগন্ধসমন্বিতং । বায়ুর্হরতি চণ্ডাত্মা তেজঃপ্রলয়মৃচ্ছতি ॥ আকাশস্তু ততো বায়োঃ স্পর্শং পরগুণৈঃ সহ। সমাদত্তে মহারাজ অম্বরেঽথ প্রলীয়তে॥ আকাশস্য গুণং শব্দং গুণৈরন্যৈঃ সমন্বিতং। অহঙ্কারঃ সমাদত্তে নভস্তস্মিন্ প্রলীয়তে ॥ তৈজসেম্বিন্দ্রিয়াণ্যঙ্গদেবা বৈকারিকে তথা। অহঙ্কারে প্রলীয়ন্তে জগদেতচ্চরাচরং ॥ অহঙ্কারং ভক্ষয়ন্তি ততঃ সত্ত্বাদয়ো গুণাঃ। গ্রসতে তান্ মহারাজ আদ্যা প্রকৃতিরুচ্যতে॥ ন তস্যাঃ কালদোষেণ পরিণামো নরর্ষভ। আদ্যন্তরহিতা সা হি নিত্যং কারণমব্যয়ং ॥ শক্তির্ভগবতঃ সা হি তদেকপরমা চ সা। ইত্যুক্তঃ প্রলয়ো রাজন্ বিশ্বস্যাস্য মহামতে॥ যথোৎপত্তিক্রমেণাস্য ব্যুৎক্রমেণ লয়স্তথা । ইতি পাদ্মে স্বর্গখণ্ডে ৩৯ অধ্যায়ঃ ॥

প্রলাপঃ (পুং) প্রলপনং। অনর্থকবাক্যং। নিষ্প্রয়োজনমুন্মত্তাদিবচনং । ইত্যমরভরতৌ॥ রোগাণামুপসর্গোঽয়ং ॥

প্রলাপহা [ন্] (পুং) কুলত্থাঞ্জনং। ইতি রাজনির্ঘণ্টঃ ॥

প্রলীনতা (স্ত্রী) প্রলয়ঃ। তৎপর্য্যায়ঃ । ইন্দ্রিয়স্বাপঃ ২ চেষ্টানাশঃ ৩। ইতি রাজনির্ঘণ্টঃ ॥

প্রলেহঃ (পুং) ব্যঞ্জনবিশেষঃ। দম্পোখ্ত কোরমা ইত্যাদি পারস্যভাষা। ইতি পাকরাজেশ্বরঃ ॥

প্রবক্তা [ঋ] (ত্রি) প্রকর্ষেণ বক্তি যঃ। বেদাদিবাচকঃ। যথা। জাতিমাত্রোপজীবী বা কামং স্যাদ্ব্রাহ্মণব্রুবঃ। ধর্ম্মপ্রবক্তা নৃপতের্ন তু শূদ্রঃ কদাচন ॥ ইতি মানবে ৭ অধ্যায়ঃ ॥

প্রবচনং (ক্লী) বেদঃ। প্রকৃষ্টবাক্যং। ইতি মেদিনী ॥

প্রবচনীয়ঃ (ত্রি) প্রবক্তা। প্রবাচ্যঃ। ইতি মেদিনী ॥

প্রবণঃ (পুং) চতুষ্পথঃ। ইত্যমরঃ ॥

প্রবণঃ (ত্রি) ক্রমনিম্নভূমিঃ। উদরং। প্রহ্বঃ। ইতি মেদিনী॥ আয়তঃ। প্রগুণঃ। ক্ষণঃ। ইতি বিশ্বঃ ॥ প্লুতঃ। স্নিগ্ধঃ। ইতি শব্দরত্নাবলী ॥ আশক্তঃ। ইতি হেমচন্দ্রঃ ॥ ক্ষীণঃ। ইতি ধরণিঃ ॥

প্রবৎস্যৎপতিকা (স্ত্রী) নায়িকাভেদঃ। অস্যা লক্ষণং। যস্যাঃ পতিরগ্রিমক্ষণে দেশান্তরং যাস্যত্যেব সা। অস্যাশ্চেষ্টা কাকুবচনকাতরপ্রেক্ষণগমনবিঘ্নোপদর্শননির্ব্বেদসন্তাপসম্মোহনিশ্বাসবাস্পাদয়ঃ ॥ মুগ্ধা প্রবৎস্যৎপতিকা যথা। প্রাণেশ্বরে কিমপি জল্পতি নির্গমায় ক্ষামোদরী বদনমানময়াঞ্চকার। আলী পুনর্নিভৃতমেত্য লতানিকুঞ্জমুন্মত্তকোকিলকলধ্বনিমাততান॥ ১॥ মধ্যা প্রবৎস্যৎপতিকা যথা। গন্তুং প্রিয়ে বদতি নিঃশ্বসিতং ন দীর্ঘমাসীন্ন বা নয়নয়োর্জলমাবিরাসীৎ। আয়ুর্লিপিং পঠিতু-

মেণদৃশঃ পরন্তু ভালস্থলীং কিমু করঃ সমুপাজগাম ॥ ২ ॥ প্রৌঢ়া প্রবৎস্যৎপতিকা যথা। নায়ং মুঞ্চতি সুভ্রুবামপি তনুত্যাগে বিয়োগজ্বরস্তেনাহং বিহিতাঞ্জলির্যদুপতে পৃচ্ছামি সত্যং বদ। তাম্বূলং কুসুমং পটীরমুদকং যদ্বন্ধুভির্দীয়তে তৎ স্যাদত্র পরত্র বা কিমু বিষজ্বালাবলীদুঃসহং ॥৩॥ পরকীয়া প্রবৎস্যৎপতিকা যথা। ন্যস্তং পন্নগমূর্দ্ধ্নি পাদযুগলং ভক্তির্বিমুক্তা গুরৌ ত্যক্তা নীতিরকারি কিং ন ভবতো হেতোর্ময়া দুষ্কৃতং। অঙ্গানাং শতযাতনা নয়নয়োঃ কোপক্রমো রৌরবঃ কুম্ভীপাকপরাভবশ্চ মনসো যুক্তং ত্বয়ি প্রস্থিতে॥৪॥ সামান্যপ্রবৎস্যৎপতিকা যথা। মুদ্রাং প্রদেহি বলয়ায় ভবদ্বিয়োগমাসাদ্য যাস্যতি বহিঃ সহসা যদেতৎ। ইত্থং নিগদ্য বিগলন্নয়নাম্বুধারা বারাঙ্গনা প্রিয়তমং করয়োর্ব্বভার ॥ ৫ ॥ ইতি রসমঞ্জরী ॥

প্রবয়ণং (ক্লী) প্রতোদঃ। ইতি হেমচন্দ্রঃ ॥

প্রবয়াঃ [স্] (পুং) বৃদ্ধঃ। ইত্যমরঃ ॥

প্রবরং (ক্লী) অগুরু। ইতি ভাবপ্রকাশঃ ॥ গোত্রং। শ্রেষ্ঠে ত্রি। ইতি মেদিনী ॥

প্রবরঃ (পুং) সন্ততিঃ। ইতি মেদিনী ॥ গোত্রপ্রবর্ত্তকমুনিব্যাবর্ত্তকো মুনিগণঃ। তথা চ যমদগ্নিগোত্রস্য প্রবরাঃ যমদগ্ন্যৌর্ব্ববশিষ্ঠাঃ। ভরদ্বাজগোত্রস্য ভরদ্বাজাঙ্গিরসবার্হস্পত্যাঃ। বিশ্বামিত্রগোত্রস্য বিশ্বামিত্রমরীচিকৌষিকাঃ। অত্রিগোত্রস্য অত্র্যাত্রেয়শাতাতপাঃ। গোতমগোত্রস্য গোতমবশিষ্ঠবার্হস্পত্যাঃ। বশিষ্ঠগোত্রস্য বশিষ্ঠঃ। কেষাঞ্চিৎ বশিষ্ঠাত্রিসাঙ্কৃতয়ঃ। কাশ্যপগোত্রস্য কাশ্যপাপ্সারনৈধ্রুবাঃ। অগস্ত্যগোত্রস্য অগস্তিদধীচিজৈমিনয়ঃ। সৌকালিনগোত্রস্য সৌকালিনাঙ্গিরসবার্হস্পত্যাপ্সারনৈধ্রুবাঃ। মৌদ্গল্যগোত্রস্য ঔর্ব্বচ্যবনভার্গবজামদগ্ন্যাপ্লুবতঃ। পরাশরগোত্রস্য পরাশরশক্তিবশিষ্ঠাঃ। বৃহস্পতিগোত্রস্য বৃহস্পতিকপিলপার্ব্বণাঃ। কাঞ্চনগোত্রস্য অশ্বত্থদেবলদেবরাজাঃ। বিষ্ণুগোত্রস্য বিষ্ণুবৃদ্ধিকৌরবাঃ। কৌশিকগোত্রস্য কৌশিকাত্রিজমদগ্নয়ঃ। কাত্যায়নগোত্রস্য অত্রিভৃগুবশিষ্ঠাঃ। আত্রেয়গোত্রস্য আত্রেয়শাতাতপসাংখ্যাঃ। কান্নগোত্রস্য কান্নাশ্বত্থদেবলাঃ। কৃষ্ণাত্রেয়গোত্রস্য কৃষ্ণাত্রেয়াত্রেয়াবাসাঃ। সাঙ্কৃতিগোত্রস্য অব্যাহারাত্রিসাঙ্কৃতয়ঃ। কৌণ্ডিল্যগোত্রস্য কৌণ্ডিল্যস্তিমিককৌৎসাঃ। গর্গগোত্রস্য গার্গ্যকৌস্তুভমাণ্ডব্যাঃ। আঙ্গিরসগোত্রস্য আঙ্গিরসবশিষ্ঠবার্হস্পত্যাঃ। অনাবৃকাক্ষগোত্রস্য গার্গ্যগৌতমবশিষ্ঠাঃ। অব্যগোত্রস্য অধ্যবলিসারস্বতাঃ। জৈমিনিগোত্রস্য জৈমিন্যুতথ্যসাঙ্কৃতয়ঃ। বৃদ্ধিগোত্রস্য কুরুবৃদ্ধাঙ্গিরোবার্হস্পত্যাঃ। শাণ্ডিল্যগোত্রস্য শাণ্ডিল্যাসিতদেবলাঃ। বাৎস্যগোত্রসাবর্ণগোত্রয়োঃ ঔর্ব্বচ্যবনভার্গবজামদগ্ন্যাপ্লুবতঃ॥ আলম্ব্যায়নগোত্রস্য আলম্ব্যায়নশালঙ্কায়নশাকটায়নাঃ। বৈয়াঘ্রপদ্যগোত্রস্য সাঙ্কৃতিঃ। ঘৃতকৌশিকগোত্রস্য কুশিককৌশিকঘৃতকৌশিকাঃ। কেষাঞ্চিৎ কুশিককৌশিক-

বন্ধুলাঃ। শক্তিগোত্রস্য শক্তিপরাশর-বশিষ্ঠাঃ। কাম্বায়নগোত্রস্য কাম্বায়নাঙ্গিরসবার্হস্পত্যভরদ্বাজাজমীঢ়াঃ। বাসুকিগোত্রস্য অক্ষোভ্যানন্তবাসুকয়ঃ। গৌতমগোত্রস্য গৌতমাপ্সারাঙ্গিরসবার্হস্পত্যনৈধ্রুবাঃ। কেষাঞ্চিৎ গৌতমাঙ্গিরসাযাসাঃ। শুনকগোত্রস্য শুনকশৌনকগৃৎসমদাঃ। সৌপায়নগোত্রস্য প্রবরাঃ ঔর্ব্বচ্যবনভার্গবজামদগ্ন্যাপ্লুবতঃ। ইতি ধনঞ্জয়কৃতধর্ম্মপ্রদীপে গোত্রপ্রবরবিবেকঃ॥

প্রবর্গঃ (পুং) হোমাগ্নিঃ। ইতি হেমচন্দ্রঃ॥

প্রবর্ত্তকঃ (ত্রি) প্রবর্ত্তনকারী। প্রবৃত্তিজনকঃ। যথা। প্রবর্ত্তকং বাক্যমুবাচ চোদনাং নিবর্ত্তকং নৈবমুবাচ ভাষ্যকৃৎ। ততশ্চ বিদ্মো নহি চোদনাস্তি সা প্রবর্ত্তিকা যা ন ভবেদিতি স্থিতিঃ॥ ইতি সংক্ষেপশারীরকং॥

প্রবর্ত্তনং (ক্লী) প্রবৃত্তিঃ। যথা। তেহন্যৈর্বান্তং সমশ্নন্তি পরোৎসর্গঞ্চ ভুঞ্জতে। ইতরার্থগ্রহে যেষাং কবীনাং স্যাৎ প্রবর্ত্তনং॥ ইতি কাব্যপ্রকাশঃ॥ আরম্ভঃ। যথা। মৃতে তু স্বামিনি পুনস্তদ্বংশ্যে বাপি মানবে। রাজানমামন্ত্র্য ততঃ কুর্য্যাৎ সেতুপ্রবর্ত্তনং॥ ইতি মিতাক্ষরা॥

প্রবর্ত্তনা (স্ত্রী) প্রবৃত্তিপ্রেরণং। যথা। অথবা ভবতঃ প্রবর্ত্তনা ন কথং পিষ্টমিয়ং পিনষ্টি ন। স্বত এব সতাং পরার্থতা গ্রহণানাং হি যথা যথার্থতা॥ ইতি নৈষধং॥

প্রবর্ত্তিতঃ (ত্রি) জাতঃ। যথা। রূপং তদোজস্বি তদেব বীর্য্যং তথৈব নৈসর্গিকমুন্নতত্বং। ন কারণাৎ স্বাৎ বিভিদে কুমারঃ প্রবর্ত্তিতো দীপ ইব প্রদীপাৎ॥ ইতি রঘুবংশে ৫ সর্গঃ॥

প্রবর্দ্ধনং (ক্লী) বিবর্দ্ধনং। প্রপূর্ব্ববৃধধাতোর্ভাবে অনট্। কর্ত্তরি অনপ্রত্যয়ে ত্রি॥

প্রবলাকী (পুং) ভুজঙ্গঃ। চিত্রমেখলকঃ। ইতি বিশ্বঃ॥

প্রবর্হঃ (ত্রি) প্রধানং। শ্রেষ্ঠঃ। ইত্যমরঃ॥

প্রবহঃ (পুং) গৃহনগরাদের্ব্বহির্গমনং। ইত্যমরঃ॥ বায়ুঃ। ইতি হেমচন্দ্রঃ॥ সপ্তবায়ন্তর্গতদ্বিতীয়বায়ুঃ। স তু আবহবায়োরূর্দ্ধস্থিতঃ। ইতি সিদ্ধান্তশিরোমণিঃ॥ যস্মাজ্জ্যোতীংষি বহতি প্রবহস্তেন স স্মৃতঃ। অস্য টীকা। যস্মাজ্জ্যোতীংষি প্রকর্ষেণ বহতি তেন স বায়ুঃ প্রবহঃ স্মৃতঃ প্রবহস্যৈব ভেদাঃ সর্ব্বে বায়ুস্কন্ধাঃ। ইতি বিষ্ণুপুরাণে ২ অংশে ১২ অধ্যায়ঃ॥

প্রবহণং (ক্লী) কর্ণীরথঃ। স্ত্রীরত্নবহনার্থমুপরি বস্ত্রাচ্ছাদিতমনুষ্যবাহ্যযানবিশেষঃ। ইত্যমরভরতৌ॥

প্রবহ্লিঃ (স্ত্রী) প্রবহ্লিকা। ইত্যমরটীকায়াং ভরতঃ॥

প্রবহ্লিকা (স্ত্রী) প্রহেলিকা। ইত্যমরঃ॥

প্রবহ্লী (স্ত্রী) প্রবহ্লিকা। ইতি ভরতঃ॥

প্রবাক্ [চ্] (ত্রি) বাচো যুক্তিপটুঃ। যথা। বাচো যুক্তিপটুর্ব্বাগ্মী বচোজ্ঞঃ প্রবচ্যুঃ প্রবাক্। ইতি জটাধরঃ॥ প্রকৃষ্টবাক্যঞ্চ॥

প্রবাচকঃ (ত্রি) প্রকৃষ্টবক্তা। প্রপূর্ব্ববচধাতোঃ কর্ত্তরি তৃণ্প্রত্যয়ঃ॥

প্রবাণিঃ } (স্ত্রী) তন্ত্রশলাকা। মাকু ইতি
প্রবাণী } ভাষা। ইতি নিষ্প্রবাণিশব্দটীকায়াং ভরতঃ

প্রবাদঃ (পুং) পরস্পরবাক্যং। যথা। ইত্থং প্রবাদং যুধি সংপ্রহারং প্রচক্রতু রামনিশাবিহারৌ। তৃণায় মত্বা রঘুনন্দনোঽথ বাণেন রক্ষঃ প্রধনান্নিরাস্থৎ॥ ইতি ভট্টিঃ॥ জনরবঃ। যথা। প্রেয়াংস্তেঽহং ত্বমপি চ মম প্রেয়সীতি প্রবাদস্ত্বং মে প্রাণা অহমপি তবাস্মীতি হন্ত প্রলাপঃ। ত্বং মে তেঽস্যামহমপি চ যত্তচ্চ নো সাধু রাধে ব্যাহারে নৌ নহি সমুচিতো যুষ্মদস্মৎপ্রয়োগঃ॥ ইত্যলঙ্কার কৌস্তুভঃ॥

প্রবারঃ (পুং) প্রবরঃ। বস্ত্রং। প্রপূর্ব্ববৃধাতোর্ঘণ্। ইতি সংক্ষিপ্তসারব্যাকরণং॥

প্রবারণং (ক্লী) কাম্যদানং। ইত্যমরঃ॥ কাম্যস্য কমনীয়স্য বস্তুনো বরস্ত্রীরত্নাদিনো দানং। কাম্যেন কামনয়া বা দানং প্রবারণমুচ্যতে। কাম্যশব্দোঽত্র তন্ত্রেণোভয়ার্থঃ। প্রকর্ষেণ বার্য্যতে সংগৃহ্যতে প্রবারণং তচ্চ মহাদানং। প্রবারণং মহাদানমিতি ত্রিকাণ্ডশেষঃ। ইতি তট্টীকায়াং ভরতঃ॥ নিষেধঃ। ইতি মেদিনী॥

প্রবাসঃ (পুং) বিদেশস্থিতিঃ। যথা। কর্ণেজপৈরাহিতরাজ্যলোভা স্ত্রৈণেন নীতা বিকৃতিং লঘিম্না। রামপ্রবাসে ব্যমৃষন্নদোষং জনাপবাদং সনরেন্দ্রমৃত্যুং॥ ইতি ভট্টিঃ॥ *॥ দ্বাদশবর্ষাশ্রুতবার্ত্তাকপ্রোষিতস্য তৎপ্রবাসাদ্যদিনে শ্রাদ্ধং কর্ত্তব্যং। যথা। প্রবাসবাসরে জ্ঞেয়ং তন্মাসেন্দুক্ষয়েঽথবা। ইতি মিতাক্ষরা॥*॥ প্রবাসাগতেন গুর্ব্বাদ্যভিবাদনং কর্ত্তব্যং। যথা। বিপ্রোষ্য পাদগ্রহণমন্বহঞ্চাভিবাদনং। গুরুদারেষু কুর্ব্বীত সতাং ধর্ম্মমনুস্মরন্॥ মাতৃস্বসা মাতুলানী শ্বশ্রূশ্চাথ পিতুঃ স্বসা। প্রপূজ্যা গুরুপত্নীব সমাস্তা গুরুভার্য্যয়া॥ ভ্রাতৃভার্য্যোপসংগ্রাহ্যা সবর্ণাহন্যহন্যপি। বিপ্রোষ্য ভূপ সংগ্রাহ্যা জ্ঞাতিসম্বন্ধিযোষিতঃ॥ পিতুর্ভগিন্যাং মাতুশ্চ জ্যায়স্যাঞ্চ স্বসর্য্যপি। মাতৃবদ্বৃত্তিমাতিষ্ঠেন্মাতা তাভ্যো গরীয়সী॥ ইতি কৌর্ম্মে উপবিভাগে ১৩ অধ্যায়ঃ॥

প্রবাসনং (ক্লী) বধঃ। ইত্যমরঃ॥ প্রবাসনা। যথা। সীতাপ্রবাসনপটোঃ করুণা কুতস্তে। ইত্যুত্তরবীরচরিত্রং॥

প্রবাসী (ত্রি) প্রবাসবিশিষ্টঃ। প্রোষিতঃ। বিদেশস্থঃ। যথা। অধ্বনীনোঽধ্বগোঽধ্বন্যঃ পান্থঃ পথিকদেশিকৌ। প্রবাসী তদ্গণো হারিঃ পাথেয়ং সম্বলং সমে॥ ইতি হেমচন্দ্রঃ॥

প্রবাহঃ (পুং) প্রবৃত্তিঃ। জলস্রোতঃ। ইতি মেদিনী॥ ব্যবহারঃ। ইতি বিশ্বঃ॥ প্রকৃষ্টাশ্বঃ। ইতি নানার্থরত্নমালা॥

প্রবাহকঃ (পুং) রাক্ষসঃ। ইতি শব্দমালা॥ প্রকৃষ্টবহনকর্ত্তরি ত্রি॥

প্রবাহিকা (স্ত্রী) গ্রহণীরুক্। ইত্যমরঃ॥ অস্যা নিদানং গ্রহণীশব্দে দ্রষ্টব্যং। অস্যাঃ স্বরূপমাহ চরকঃ। অগ্ন্যধিষ্ঠানমন্নস্য গ্রহণাদ্গ্রহণী মতা। অপক্কং ধারয়েৎ

তত্র পক্বং ত্যজতি বাপ্যধঃ ॥ সুশ্রুতোঽপি। ষষ্ঠী পিত্তধরা নাম যা কলা পরিকীর্ত্তিতা। আমপক্বাশয়ান্তঃস্থা গ্রহণী সাভিধীয়তে ॥ গ্রহণ্যা বলমগ্নির্হি স চাপি গ্রহণীশ্রিতঃ। তস্মাদগ্নৌ প্রদুষ্টে তু গ্রহণ্যপি বিদুষ্যতি ॥ তস্মাৎ কার্য্যঃ পরীহারো হ্যতীসারে বিরিক্তবৎ ॥ * ॥ অতীসারে দ্রবধাতুপ্রবৃত্তিঃ গ্রহণ্যাস্তু বদ্ধস্যাপি মলস্য প্রবৃত্তিরিতি তয়োর্ভেদঃ ॥ * ॥ গ্রহণীরোগস্য ভেদং সংগ্রহগ্রহণীরোগমাহ। দ্রবং ঘনং সিতং স্নিগ্ধং সকটীবেদনং শকৃৎ। আমং বহুসপৈচ্ছিল্যং সশব্দং মন্দবেদনং ॥ পক্ষান্মাসাদ্দশাহাদ্বা নিত্যঞ্চাপি বিমুঞ্চতি। অন্ত্রকূজনমালস্যং দৌর্ব্বল্যং সদনং ভবেৎ ॥ দিবা প্রকোপো ভবতি রাত্রৌ শান্তিঞ্চ গচ্ছতি। দুর্ব্বিজ্ঞেয়া দুর্নিবারা চিরকালানুবন্ধিনী ॥ সা ভবেদামবাতেন সংগ্রহসংগ্রহণী মতা ॥*॥ অথ ঘটীযন্ত্রাখ্যং গ্রহণীরোগভেদমাহ। প্রসুপ্তিঃ পার্শ্বয়োঃ শূলং তথা জলঘটীধ্বনিঃ। তং বদন্তি ঘটীযন্ত্রমসাধ্যং গ্রহণীগদং ॥ * ॥ অথ গ্রহণীরোগস্যারিষ্টমাহ। যৈর্লক্ষণৈঃ সিধ্যতি নাতিসারস্তৈঃ স্যান্ন সাধ্যো গ্রহণীগদোঽপি। বৃদ্ধস্য জায়েত যদা গদোঽয়ং দেহং তদা তস্য বিনাশমৃচ্ছেৎ ॥ * ॥ অথ সামান্যগ্রহণীরোগস্য চিকিৎসামাহ। গ্রহণীমাশ্রিতং রোগমজীর্ণবদুপাচরেৎ। লঙ্ঘনৈর্দীপনীয়েশ্চ মন্দাতীসারভেষজৈঃ॥ দোষং সামং নিরামঞ্চ বিদ্যাদত্রাতিসারবৎ। অতীসারোক্তবিধিনা তস্যামঞ্চ বিপাচয়েৎ ॥ পেয়াদি পটু লঘ্বন্নং পঞ্চকোলাদিভির্যুতং। দীপনানি চ তক্রঞ্চ গ্রহণ্যাং যোজয়েদ্ভিষক্ ॥ কপিত্থবিল্বচাঙ্গেরীতক্রদাড়িমসাধিতা। যবাগূঃ পাচয়ত্যামং শকৃৎ সম্বর্ত্তয়ত্যপি ॥ সম্বর্ত্তয়তি ঘনীকরোতি ॥ * ॥ অথ খড়্যূষঃ। মুদ্গযূষং রসং তক্রং ধান্যজীরকসংযুতং। সৈন্ধবেনান্বিতং দদ্যাৎ খড়্যূষমিতি কীর্ত্তিতং ॥ রসং লঘুগ্রাহিকমাংসভবং ॥ * ॥ কর্ষং গন্ধকমর্দ্ধপারদমুভে কুর্য্যাচ্ছুভাং কজ্জলীং ত্র্যক্ষং ত্র্যূষণতশ্চ পঞ্চলবণং সার্দ্ধঞ্চ কর্ষং পৃথক্। ভৃষ্টং হিঙ্গু চ জীরকদ্বয়যুতং সর্ব্বার্দ্ধভাগান্বিতং খাদেট্টঙ্কমিতং প্রবৃত্তিগদবাংস্তক্রস্য বিল্বেন চ॥ লঘুনায়িকাচূর্ণমিত্যর্থঃ ॥ * ॥ ইতি লঘুলাঈচূর্ণং ॥ * ॥ ত্রিকটু ত্রিফলা চৈব বিড়ঙ্গং জীরকদ্বয়ং। ভল্লাতকং যবানী চ হিঙ্গুলবণপঞ্চকং ॥ গৃহধূমো বচা কুষ্ঠং রসো গন্ধকমভ্রকং। ক্ষারত্রয়াজমোদে চ চিত্রকং গজপিপ্পলী॥ মুস্তা মোচরসং পাঠা লবঙ্গং জাতিপত্রকং। সমভাগকৃতৈশ্চৈষাং চূর্ণং শ্লক্ষ্ণং বিনির্ম্মিতং॥ শক্রাশনস্য চূর্ণস্তু চূর্ণতুল্যং প্রদাপয়েৎ। মন্দাগ্নিকাসদুর্নামপ্লীহপাণ্ডুরুচিজ্বরান্॥ বিষ্টম্ভং সংগ্রহং শূলং হন্যান্নানাতিসারজিৎ। আমবাতাপহং বল্যং সূতিকাদোষনাশনং ॥ বর্জ্জয়েন্মাষমন্নঞ্চ স্নানং পিশিতভোজনং। পথ্যং কাঞ্জিকমত্রাপি দধি তক্রমথাপি বা॥ বৃহল্লাঈচূর্ণমিদং লাঈভাষিতমুত্তমং।

ইতি বৃহল্লাঙ্গীচূর্ণং। বৃহন্নায়িকাচূর্ণমিতি প্রসিদ্ধং ॥ * ॥ জাতীফললবঙ্গৈলাপত্র-ত্বঙ্নাগকেশরৈঃ। কর্পূরচন্দনতিলত্বক্ক্ষীরী-তগরামলৈঃ ॥ তালীশপিপ্পলীপথ্যাস্থূল জীরকচিত্রকৈঃ। শুণ্ঠীবিড়ঙ্গমরিচৈঃ সম ভাগবিচূর্ণিতৈঃ ॥ যাবন্ত্যেতানি সর্ব্বাণি দদ্যাদ্ভঙ্গাঞ্চ তাবতীং। সর্ব্বচূর্ণসমানাংশা প্রদেয়া শুভ্রশর্করা ॥ কর্ষমাত্রমিদং খাদে-ন্মধুনা প্লাবিতং জনঃ। নাশয়েদ্গ্রহণীং কাসং ক্ষয়ং শ্বাসমরোচকং ॥ জাতী-ফলাদিচূর্ণং ॥ * ॥ চিত্রকং পিপ্পলীমূলং ক্ষারৌ লবণপঞ্চকং। ব্যোষং হিঙ্গ্বজমোদাঞ্চ চব্যঞ্চৈকত্র চূর্ণয়েৎ ॥ বটিকা মাতুলুঙ্গস্য রসৈর্ব্বা দাড়িমস্য বা। কৃতা বিপাচয়ত্যামং প্রদীপয়তি চানলং ॥ ক্ষারৌ সর্জিকা যবক্ষারশ্চ। লবণপঞ্চকর্মিতি। সৈন্ধবং রুচকঞ্চৈব বিড়ং সামুদ্রকং গড়-মিতি। ব্যোষং শুণ্ঠীপিপ্পলীমরিচানি। অজমোদাত্র যবানিকা। মাতুলুঙ্গং বীজ-পূরকং। চিত্রকাদিবটিকা ॥ * ॥ শ্রীফল-শলাটুকল্কো নাগরচূর্ণেন মিশ্রিতঃ স-গুড়ঃ। গ্রহণীগদমত্যুগ্রং তক্রভুজাশীলিতো জয়তি ॥ শ্রীফলশলাটুঃ বিল্বস্যামং ফলং। গুড়স্যাত্র ভাগদ্বয়ং। বিল্বকল্কঃ ॥ * ॥ চতুষ্পলং সুধাকাণ্ডং ত্রিপলং লবণত্রয়ং। বার্ত্তাকোঃ কুড়বঞ্চার্কমূলাদ্দ্বিল্বে তথা-নলাৎ ॥ দগ্ধা দ্রবেণ বার্ত্তাকোর্গুটিকা ভোজনোত্তরং। ভুক্তা ভুক্তং পচত্যাশু নাশয়েদ্গ্রহণীগদং ॥ কাসং শ্বাসং তথা-র্শাংসি বিসূচীঞ্চ হৃদাময়ং। বার্ত্তাকু-গুটিকা ॥ * ॥ মুস্তকাতিবিষাবিল্বকৌটজং সূক্ষ্মচূর্ণিতং। মধুনা চ সমালীঢ়ং গ্রহণীং সর্ব্বজাং ত্যজেৎ ॥ কৌটজং ইন্দ্রযবঃ। মুস্তকাদিচূর্ণং ॥ * ॥ শ্বেতো বা যদি বা রক্তঃ সুপক্কো গ্রহণীগদঃ। গুড়েনাধিক-সর্জেন ভক্ষিতেনাশু নশ্যতি ॥ সর্জ্জঃ রালঃ। সর্জরসচূর্ণং ॥ * ॥ বিল্বাব্দশক্র-যববালকমোচসিদ্ধমাজং পয়ঃ পিবতি যো দিবসত্রয়েণ। সোঽতিপ্রবৃদ্ধচিরজ গ্রহণীবিকারং সামং সশোণিতমসাধ্য-মপি ক্ষিণোতি ॥ মোচো মোচরসঃ। ক্ষিণোতি হন্তি ॥ * ॥ প্রস্থত্রয়ে ত্বামলকী-রসস্য শুদ্ধস্য দত্ত্বার্দ্ধতুলাং গুড়স্য। চূর্ণী কৃতৈগ্রন্থিকজীরচব্যব্যোষেভকৃষ্ণাহবুষা জমোদৈঃ ॥ বিড়ঙ্গসিন্ধুত্রিফলাযবানী-পাঠাগ্নিধান্যৈশ্চ পলপ্রমাণৈঃ। দত্ত্বা ত্রিবৃচ্চূর্ণপলানি চাষ্টাবষ্টৌ চ তৈলস্য পচেদ্-যথাবৎ ॥ তং ভক্ষয়েদক্ষফলপ্রমাণং যথেষ্টচেষ্টস্ত্রিসুগন্ধিযুক্তং। অনেন সর্ব্বে গ্রহণীবিকারাঃ সশ্বাসকাসস্বরভেদশোথাঃ ॥ শাম্যন্তি চায়ং চিরমন্তরগ্নের্হতস্য পুংস্ত্বস্য চ বৃদ্ধিহেতুঃ। স্ত্রীণান্তু বন্ধ্যাময়নাশনঃ স্যাৎ কল্যাণকো নাম গুড়ঃ প্রসিদ্ধঃ ॥ তৈলে মনাক্ ত্রিবৃদ্ভৃষ্টা ত্রিসুগন্ধি পলং পলং। সিদ্ধে নিধেয়মত্রৈব গুড়ে কল্যাণ-পূর্ব্বকে ॥ কল্যাণকগুড়ঃ ॥ * ॥ পিপ্পলী পিপ্পলীমূলং চিত্রকং গজপিপ্পলী। ধান্য-কঞ্চ বিড়ঙ্গানি যবানী মরিচানি চ ॥ ত্রিফলা চাজমোদা চ নলিনী জীরকস্তথা। সৈন্ধবং রৌমকঞ্চাপি সামুদ্রং রুচকং

বিড়ং ॥ আরগ্বধশ্চ ত্বক্‌পত্রং সূক্ষ্মৈলা চোপকুঞ্চিকা। শুণ্ঠীশক্রযবাশ্চৈব প্রত্যেকং কর্ষসম্মিতাঃ ॥ মৃদ্বীকায়াঃ পলান্যত্র চত্বারি কথিতানি হি। ত্রিবৃতায়াঃ পলান্যষ্টৌ গুড়স্যার্দ্ধতুলা তথা ॥ তিলতৈলপলান্যষ্টা বামলক্যা রসস্য তু। প্রস্থত্রয়মিদং সর্ব্বং শনৈর্ম্মৃদ্বগ্নিনা পচেৎ ॥ ঔডুম্বরং চামলকং বাদরং বা যথা ফলং। তাবন্মাত্রমিদং খাদেদ্ভক্ষয়েদ্বা যথানলং ॥ নিখিলান্ গ্রহণীরোগান্ প্রমেহাংশ্চৈব বিংশতিং। উরোঘাতং প্রতিশ্যায়ং দৌর্ব্বল্যং বহ্নিসংক্ষয়ং ॥ জ্বরানপি হরেৎ সর্ব্বান্ কুর্য্যাৎ কান্তিং মতিং স্বরং। পিচুপাঠান্বয়াদ্ধন্তি রক্তপিত্তঞ্চ বিড়্গ্রহং ॥ ধাতুক্ষীণো বয়ঃক্ষীণঃ স্ত্রীষু ক্ষীণঃ ক্ষয়ী চ যঃ। তেভ্যো হিতশ্চ বন্ধ্যায়ৈ মহাকল্যাণকো গুড়ঃ ॥ মহাকল্যাণকগুড়ঃ ॥*॥ কুষ্মাণ্ডানাং সুপক্কানাং স্বিন্নানাং নিষ্কুলত্বচাং। সর্পিঃপ্রস্থে পলশতং তাম্রপাত্রে শনৈঃ পচেৎ॥ পিপ্পলী পিপ্পলীমূলং চিত্রকং গজপিপ্পলী। ধান্যকানি বিড়ঙ্গানি নাগরং মরিচানি চ ॥ ত্রিফলা চাজমোদা চ কলিঙ্গাজাজিসৈন্ধবং ॥ একৈকস্য পলঞ্চৈকং ত্রিবৃতোঽষ্টৌ পলানি চ। তৈলস্য চ পলান্যষ্টৌ গুড়াৎ পঞ্চাশদেব তু॥ আমলক্যা রসস্যাত্র প্রস্থত্রয়মুদীরিতং। তাবৎ পাকং প্রকুর্ব্বীত মৃদুনা বহ্নিনা ভিষক্ ॥ যাবদ্দর্ব্বীপ্রলেপঃ স্যাত্তদৈনমবতারয়েৎ। ঔডুম্বরঞ্চামলকং বাদরং বা যথা ফলং ॥ তাবন্মাত্রমিদং খাদেদ্ভক্ষয়েদ্বা যথানলং। অনেনৈব বিধানেন প্রযুক্তশ্চ দিনে দিনে ॥ নিহন্তি গ্রহণীরোগান্ কুষ্ঠান্যর্শোভগন্দরান্। জ্বরমানাহহৃদ্রোগগুল্মোদরবিসূচিকাঃ ॥ কামলাং পাণ্ডুরোগঞ্চ প্রমেহাংশ্চৈব বিংশতিং। বাতশোণিতবীসর্পদদ্রুযক্ষ্মহলীমকান্ ॥ বাতপিত্তকফান্ সর্ব্বান্ দুষ্টান্ শুদ্ধান্ সমাচরেৎ। ব্যাধিক্ষীণা বয়ঃক্ষীণাঃ স্ত্রীষু ক্ষীণাশ্চ যে নরাঃ॥ তেভ্যো হিতো গুড়োঽয়ং স্যাদ্বন্ধ্যানামপি পুত্রদঃ। বৃষ্যো বল্যো বৃংহণশ্চ বয়সঃ স্থাপনঃ পরঃ ॥ কুষ্মাণ্ডকল্যাণকগুড়ঃ ॥ * ॥ অতীসারাধিকারলিখিতং বিল্বতৈলঞ্চাত্র হিতং। ইতি ভাবপ্রকাশে গ্রহণীরোগাধিকারঃ ॥

প্রবাহী (স্ত্রী) বালুকা। ইতি রাজনির্ঘণ্টঃ ॥

প্রবাহুঃ (পুং) কুর্পস্যাধোভাগঃ। যথা। মুখং বাহুপ্রবাহূ চ মনঃ সর্ব্বেন্দ্রিয়াণি চ। রক্ষন্ত্বব্যাহতৈশ্বর্য্যস্তব নারায়ণোঽব্যয়ঃ ॥ ইতি বিষ্ণুপুরাণে ৫ অংশে ৫ অধ্যায়ঃ ॥

প্রবাহুকম্ ব্য সমানকালে। ঊর্দ্ধার্থে। প্রবাহিকেতি পাঠান্তরং। ইতি কৌমুদীটীকা তত্ত্ববোধিনী ॥

প্রবিখ্যাতিঃ (স্ত্রী) অতিপ্রসিদ্ধিঃ। তৎপর্য্যায়ঃ। বিশ্রাবঃ ২। ইত্যমরঃ ॥

প্রবিদারণং (ক্লী) যুদ্ধং। ইত্যমরঃ ॥ অবদারণং। ইতি মেদিনী ॥ আকীর্ণং। ইতি শব্দরত্নাবলী ॥

প্রবিরঃ (পুং) পীতকাষ্ঠং। ইতি শব্দচন্দ্রিকা॥

প্রবিশ্লেষঃ (পুং) প্রকৃষ্টবিশ্লেষঃ। তৎপর্য্যায়ঃ। বিধুরং২। ইত্যমরঃ ॥ বিকলং।

যথা। বৈক্লব্যেঽপি চ বিশ্লেষে বিধুরং বিকলে ত্রিষ্বিতি ভরতধৃতত্রিকাণ্ডশেষঃ॥

প্রবিষা (স্ত্রী) অতিবিষা। ইত্যমরঃ॥

প্রবিষ্টঃ (ত্রি) প্রবেশবিশিষ্টঃ। যথা। স তং প্রবিষ্টং বৃতমাততায়িভির্ভটৈরনেকৈ-রবলোক্য মাধবঃ। ইতি শ্রীভাগবতে বাণযুদ্ধে ৬২ অধ্যায়ঃ॥

প্রবীণঃ (ত্রি) প্রকৃষ্টং বেত্তি যঃ। তৎপর্য্যায়ঃ। নিপুণঃ ২ অভিজ্ঞঃ ৩ বিজ্ঞঃ ৪ নিষ্ণাতঃ ৫ শিক্ষিতঃ ৬ বৈজ্ঞানিকঃ ৭ কৃতমুখঃ ৮ কৃতী ৯ কুশলঃ ১০। ইত্যমরঃ॥

প্রবীরঃ (পুং) সুভটঃ। উত্তমে ত্রি। ইতি ধরণিঃ॥

প্রবৃত্তঃ (ত্রি) প্রবৃত্তিবিশিষ্টঃ। যথা। প্রবৃত্ত এব স্বয়মুজ্ঝিতশ্রমঃ ক্রমেণ পেষ্টুং ভুবনদ্বিষামপি। তথাপি বাচালতয়া যুনক্তি মাং মিথস্তুদা ভাষণলোলুপং মনঃ॥ ইতি মাঘপ্রথমসর্গঃ॥ আরম্ভঃ। যথা। প্রবৃত্তমন্যথা কুর্য্যাৎ যদি মোহাৎ কথঞ্চন। যতস্তদন্যথা ভূতং তত এব সমাপয়েৎ॥ ইতি ছন্দোগপরিশিষ্টং॥ প্রকৃষ্টবর্ত্তনবিশিষ্টশ্চ॥

প্রবৃত্তিঃ (স্ত্রী) প্রবাহঃ। উদন্তঃ। প্রবর্ত্তনং। অবন্ত্যাদিদেশঃ। ইতি মেদিনী॥ হস্তিমদঃ। ইতি হেমচন্দ্রঃ॥ ন্যায়মতে যত্নবিশেষঃ। অস্যাঃ কারণং। চিকীর্ষা। কৃতিসাধ্যতাজ্ঞানং। ইষ্টসাধনতাজ্ঞানং। উপাদানপ্রত্যক্ষং। যথা। প্রবৃত্তিশ্চ নিবৃত্তিশ্চ তথা জীবনকারণং। এবং প্রযত্নত্রৈবিধ্যং তান্ত্রিকৈঃ পরিদর্শিতং॥ চিকীর্ষা কৃতিসাধ্যেষ্টসাধনত্বমতিস্তথা। উপাদানস্য চাধ্যক্ষং প্রবৃত্তৌ জনকং ভবেৎ॥ ইতি ভাষাপরিচ্ছেদঃ॥

প্রবৃত্তিজ্ঞঃ (পুং) চারভেদঃ। তৎপর্য্যায়ঃ। বার্ত্তিকঃ ২ বার্ত্তায়নঃ ৩। ইতি ত্রিকাণ্ডশেষঃ॥

প্রবৃদ্ধঃ (ত্রি) বৃদ্ধিযুক্তঃ। তৎপর্য্যায়ঃ। প্রৌঢ়ঃ ২ এধিতঃ ৩। প্রসারিতঃ। তৎপর্য্যায়ঃ। প্রসৃতঃ ২। ইত্যমরঃ॥

প্রবেকঃ (ত্রি) উত্তমঃ। প্রধানং। ইত্যমরঃ॥

প্রবেটঃ (পুং) যবঃ। ইতি ত্রিকাণ্ডশেষঃ॥

প্রবেণিঃ (স্ত্রী) কুথঃ। বেণী। ইতি মেদিনী॥

প্রবেণী (স্ত্রী) বেণী। গজপৃষ্ঠস্থচিত্রকম্বলং। ইত্যমরঃ॥

প্রবেলঃ (পুং) পীতমুদ্গাঃ। ইতি হেমচন্দ্রঃ॥

প্রবেশঃ (পুং) অন্তর্বিগাহনং। ইতি হেমচন্দ্রঃ॥

প্রবেশনং (ক্লী) সিংহদ্বারং। ইতি হেমচন্দ্রঃ॥ প্রবেশশ্চ॥

প্রবেষ্টঃ (পুং) বাহুঃ। ইত্যমরঃ॥ বাহুনীচভাগঃ। ইতি শব্দচন্দ্রিকা॥ হস্তিদন্তমাংসং। ইতি হারাবলী॥ গজপৃষ্ঠতল্পনং। ইতি ত্রিকাণ্ডশেষঃ॥

প্রব্যক্তং (ত্রি) স্ফুটং। ইত্যমরঃ॥

প্রব্রজিতঃ (পুং) বুদ্ধভিক্ষুশিষ্যঃ। তৎপর্য্যায়ঃ। চেলুকঃ ২ শ্রামণেরঃ ৩ মহাপাশকঃ ৪ গোমী ৫। ইতি ত্রিকাণ্ডশেষঃ॥ প্রব্রজ্যাশ্রমবিশিষ্টঃ॥

প্রব্রজিতা (স্ত্রী) মাংসী। মুণ্ডীরী। তাপসী। ইতি মেদিনী॥

প্রব্রজ্যা (স্ত্রী) সন্ন্যাসঃ। প্রপূর্ব্বব্রজধাতোর্ভাবে ক্যপ্প্রত্যয়ঃ। অস্য প্রয়োগঃ বক্ষ্যমাণশব্দে দ্রষ্টব্যঃ॥

প্রব্রজ্যাবসিতঃ (পুং) সন্ন্যাসভ্রষ্টঃ। যথা। তবাহমিত্যুপগতঃ প্রব্রজ্যাবসিতঃ কৃতঃ। ইতি দায়ভাগবচনব্যাখ্যায়াং ক্রমসংগ্রহঃ॥

প্রশংসা (স্ত্রী) প্রশংসনং। তৎপর্য্যায়ঃ। বর্ণনা ২ ঈড়া ৩ স্তবঃ ৪ স্তোত্রং ৫ স্তুতিঃ ৬ নুতিঃ ৭ শ্লাঘা ৮ অর্থবাদঃ ৯। ইতি হেমচন্দ্রঃ॥ আত্মপ্রশংসানিষেধো যথা। ন চাত্মানং প্রশংসেদ্বা পরনিন্দাঞ্চ বর্জয়েৎ। বেদনিন্দাং দেবনিন্দাং প্রযত্নেন বিবর্জ্জয়েৎ॥ ইতি কৌর্ম্মে উপবিভাগে ১৫ অধ্যায়ঃ॥

প্রশমঃ (পুং) শমতা। উপশমঃ। যথা। এতানি দশ পাপানি প্রশমং যান্তু জাহ্নবি। ইতি তিথ্যাদিতত্ত্বং॥

প্রশমনং (ক্লী) মারণং। বধঃ। ইতি হেমচন্দ্রঃ॥ শমতা। প্রশান্তিঃ। যথা। সর্ব্বাবাধাপ্রশমনং ত্রৈলোক্যস্যাখিলেশ্বরি। এবমেব ত্বয়া কার্য্যমস্মদ্বৈরিবিনাশনং॥ ইতি মার্কণ্ডেয়পুরাণং॥

প্রশস্তং (ত্রি) ক্ষেমং। ইতি শব্দরত্নাবলী॥ প্রশংসনীয়ং। অতিশ্রেষ্ঠং। ইতি মতল্লিকাদিশব্দটীকায়াং ভরতঃ॥

প্রশস্যঃ (ত্রি) প্রশংসনীয়ঃ। প্রপূর্ব্বশন্সধাতোঃ কর্ম্মণি ক্যপ্প্রত্যয়েন নিষ্পন্নঃ॥

প্রশান্ [ম্] (ত্রি) প্রকর্ষেণ শাম্যতি যঃ। শান্তঃ। ইতি মুগ্ধবোধব্যাকরণং॥

প্রশান্তঃ (ত্রি) প্রকৃষ্টশমতাবিশিষ্টঃ। যথা। প্রশান্তশ্বাপদাকীর্ণং মুনিশিষ্যোপশোভিতং। ইতি মার্কণ্ডেয়পুরাণং॥

প্রশাস্তা [ঋ] (ত্রি) ঋত্বিক্। মিত্রং। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥ শাসনকর্ত্তা চ॥

প্রশ্নঃ (পুং) জিজ্ঞাসা। তৎপর্য্যায়ঃ। অনুযোগঃ ২ পৃচ্ছা ৩। ইত্যমরঃ॥

প্রশ্নদূতী (স্ত্রী) প্রহেলিকা। ইতি ত্রিকাণ্ডশেষঃ॥

প্রশ্নী (স্ত্রী) কুম্ভিকা। ইতি ত্রিকাণ্ডশেষঃ॥

প্রশ্রয়ঃ (পুং) প্রণয়ঃ। ইত্যমরঃ॥

প্রশ্রিতঃ (ত্রি) বিনীতঃ। ইত্যমরঃ॥

প্রশ্লথঃ (ত্রি) শিথিলঃ। ইতি ত্রিকাণ্ডশেষঃ॥

প্রষ্টা [ঋ] (ত্রি) প্রশ্নকর্ত্তা। তৎপর্য্যায়ঃ। কথংকথিকঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥

প্রষ্ঠঃ (ত্রি) অগ্রগামী। ইত্যমরঃ॥

প্রষ্ঠবাট্ (পুং) যুগপার্শ্বগঃ। ইত্যমরঃ॥ শিক্ষার্থং যুগবাহিপার্শ্বযোজিতঃ। ইতি ভরতঃ॥ যোজিতং যুগপার্শ্বে দমনার্থং যং হালিকা ভ্রাময়ন্তি সঃ। ইতি মধুঃ॥ যুবা গৌর্দমনায় যোজিতঃ। ইত্যন্যে॥

প্রষ্ঠী (স্ত্রী) প্রষ্ঠভার্য্যা। অগ্রগামিপত্নী। ইতি জটাধরঃ॥

প্রষ্ঠৌহী (স্ত্রী) বালগর্ব্ভিণী। প্রথমগর্ব্ভবতী গৌঃ। প্রষ্ঠং প্রথমগর্ব্ভং বহতি যা সা। বালা সতী গর্ব্ভিণী প্রথমগর্ব্ভেত্যর্থঃ। ইতি ভরতঃ॥

প্রস ম ষ ঙ প্রসবে। ততৌ। ইতি কবিকল্পদ্রুমঃ॥ রেফযুক্তাদ্যঃ। ম প্রসয়তি। ষ

প্রসা। ও প্রসতে কীর্ত্তিং বিদ্যা। প্রসূতে বিস্তারয়তি বেত্যর্থঃ। ইতি দুর্গাদাসঃ ॥

প্রসক্তং (ক্লী) নিত্যং। ইতি জটাধরঃ ॥ তদ্বতি ত্রি ॥

প্রসক্তিঃ (স্ত্রী) প্রসঙ্গঃ। অনুমিতিঃ। আপত্তিঃ। ইতি সব্যভিচারশিরোমণিঃ ॥

প্রসঙ্গঃ (পুং) সঙ্গতিবিশেষঃ। যথা। স প্রসঙ্গ উপোদ্ঘাতো হেতুতাবসরস্তথা। নির্ব্বাহকৈককার্য্যত্বে ষোঢ়াসঙ্গতিরিষ্যতে॥ তস্য লক্ষণং। স্মৃতস্যোপেক্ষানর্হত্বং। তদর্থস্তু স্মৃতিবিষয়তাপন্নত্বে সতি দ্বেষবিষয়তানাপন্নত্বং। ইত্যনুমিতিগ্রন্থে গদাধরভট্টাচার্য্যঃ ॥ * ॥ অন্যোদ্দেশেন প্রবৃত্তাবন্যস্যাপি সিদ্ধিঃ। যথা। দৃষ্টা তু হরতে পাপং স্পৃষ্টা তু ত্রিদিবং নয়েৎ। প্রসঙ্গেনাপি যা গঙ্গা মোক্ষদা ত্ববগাহিতা ॥ ইতি প্রায়শ্চিত্ততত্ত্বং ॥ * ॥ প্রসক্তিঃ। যথা। আনীতা ভবতা যদা পতিরতা সাধ্বী ধরিত্রীসুতা স্ফূর্জদ্রাক্ষসমায়য়া ন চ কথং রামাঙ্গমঙ্গীকৃতং। কর্ত্তুং চেতসি পুণ্ডরীকনয়নং দূর্ব্বাদলশ্যামলং তুচ্ছং ব্রহ্মপদং ভবেৎ পরবধূসঙ্গপ্রসঙ্গঃ কুতঃ ॥ ইতি নাটকং ॥ * ॥ প্রস্তাবঃ। যথা। তত্রৈব গঙ্গা যমুনা চ তত্র গোদাবরী তত্র সরস্বতী চ। সর্ব্বাণি তীর্থানি বসন্তি তত্র যত্রাচ্যুতোদারকথাপ্রসঙ্গঃ ॥ ইতি পৌরাণিকাঃ ॥ * ॥ মৈথুনং। যথা। প্রসঙ্গনিত্যদ্রুতপৃষ্ঠযানাদিতি রুগ্বিনিশ্চয়বচনটীকায়াং বিজয়রক্ষিতঃ ॥

প্রসজ্যপ্রতিষেধঃ (পুং) নিষেধবিশেষঃ। তল্লক্ষণং যথা। অপ্রাধান্যং বিধের্যত্র প্রতিষেধে প্রধানতা। প্রসজ্যপ্রতিষেধোঽসৌ ক্রিয়য়া সহ যত্র নঞ্ ॥ অস্যোদাহরণং। ভোজরাজঃ। পৌষে চৈত্রে কৃষ্ণপক্ষে নবান্নং নাচরেদ্বুধঃ। ভবেজ্জন্মান্তরে রোগী পিতৃণাং নোপতিষ্ঠতে ॥ অত্র রোগীতিনিন্দাশ্রবণাৎ প্রসজ্যতা। নোপতিষ্ঠতে ইতি শ্রবণাৎ পর্য্যুদাসতা। ইতি মলমাসতত্ত্বং ॥

প্রসত্তিঃ (স্ত্রী) প্রসন্নতা। নৈর্ম্মল্যং। ইতি জটাধরঃ ॥

প্রসত্বরী (স্ত্রী) প্রতিপত্তিঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ ॥

প্রসত্বা [ন্] (পুং) ধর্ম্মঃ। প্রজাপতিঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ ॥

প্রসন্নঃ (ত্রি) নির্ম্মলঃ। তৎপর্য্যায়ঃ। অচ্ছঃ ২। ইত্যমরঃ ॥ সন্তুষ্টঃ। ইতি মেদিনী ॥

প্রসন্নতা (স্ত্রী) প্রসন্নস্য ভাবঃ। তৎপর্য্যায়ঃ। প্রসাদঃ ২। ইত্যমরঃ ॥

প্রসন্না (স্ত্রী) সুরা। ইত্যমরঃ ॥ মদ্যবিশেষঃ। তস্য গুণাঃ। প্রসন্না গুল্মবাতার্শোবিবন্ধানাহনাশিনী। শূলপ্রবাহিকাটোপকফবাতার্শসাং হিতা ॥ ইতি রাজবল্লভঃ ॥ প্রসাদবিশিষ্টা। যথা। সৈষা প্রসন্না বরদা নৃণাং ভবতি মুক্তয়ে। ইতি চণ্ডী ॥

প্রসন্নেরা (স্ত্রী) মদিরা। ইত্যমরটীকায়াং ভরতঃ ॥

প্রসভঃ (পুং) বলাৎকারঃ। ইত্যমরঃ ॥

প্রসরঃ (পুং) তন্তুব্রণবিটপাদের্ব্বিসর্পণং। প্রকর্ষেণ নিকটে সরণং সর্পণং। তৎ-

পর্য্যায়ঃ ৮ বিসর্পঃ ২। ইত্যমরভরতৌ ॥ প্রণয়ঃ। বেগঃ। ইতি মেদিনী ॥ সমূহঃ। ইতি শব্দরত্নাবলী ॥ যুদ্ধং। ইতি বিশ্বঃ ॥ নারাচঃ। ইতি ভূরিপ্রয়োগঃ ॥

প্রসরণং (ক্লী) সৈন্যানাং সর্ব্বতো ব্যাপ্তিঃ। তৎপর্য্যায়ঃ। আসারঃ ২। ইত্যমরঃ ॥ প্রসরণী ৩ প্রসরণিঃ ৪ প্রসারণী ৫। ইতি রামাশ্রমঃ ॥ সৈন্যানাং তৃণকাষ্ঠাদিহেতবে ইতস্ততো গমনং। ইতি হেমচন্দ্রঃ ॥

প্রসরণী (স্ত্রী) প্রসরণং। ইত্যমরটীকায়াং ভরতঃ ॥

প্রসর্পণং (ক্লী) গমনং। প্রসরণং। প্রপূর্ব্ব-সৃপধাতোর্ভাবেঽনট্প্রত্যয়ঃ ॥

প্রসবঃ (পুং) গর্ব্ভমোচনং। তৎপর্য্যায়ঃ। প্রসূতিঃ ২। ইত্যমরঃ ॥ উৎপাদঃ। অপত্যং। ফলং। কুসুমং। ইতি মেদিনী ॥ * ॥ প্রসবস্য মাসনিয়মো যথা। নবমে দশমে মাসি নারী গর্ব্ভং প্রসূয়তে। একাদশে দ্বাদশে বা ততোঽন্যত্র বিকারতঃ ॥ ইতি ভাবপ্রকাশঃ ॥ * ॥ প্রসূতিকারকৌষধাদি যথা। পীতস্তু কাঞ্জিকং রুদ্র কথিতং শরপুঙ্খয়া। হিঙ্গুসৈন্ধবসংযুক্তং শীঘ্রং স্ত্রীণাং প্রসূতিকৃৎ ॥ মাতুলুঙ্গস্য বৈ মূলং কটিবদ্ধং প্রসূতিকৃৎ। অপামার্গস্য বৈ মূলং যোনিস্থঞ্চ প্রসূতিকৃৎ ॥ অপামার্গস্য বৈ মূলে গর্ব্ভবত্যাস্তু নামতঃ। উৎপাট্যমানে সকলে পুত্ত্রঃ স্যাদন্যথা সুতা ॥ অপামার্গস্য বৈ মূলে নারীণাং শিরসি স্থিতে। গর্ব্ভশূলং বিনশ্যেত নাত্র কার্য্যা বিচারণা ॥ ইতি গারুড়ে ১৯৬ অধ্যায়ঃ ॥ * ॥ অপি চ। পাঠালাঙ্গলিসিংহাস্যময়ূরকজটৈঃ পৃথক্। নাভিবস্তিভগালেপাৎ সুখং নারী প্রসূয়তে ॥ পাঠায়াস্তু শিফা যোনৌ যা নারী সংপ্রধারয়েৎ। উষঃ প্রসবকালে তু সা সুখেন প্রসূয়তে ॥ তুষাম্বুপরিপিষ্টেন মূলেন পরিলেপয়েৎ। লাঙ্গল্যাশ্চরণৌ সূতে ক্ষিপ্রমেতেন গর্ব্ভিণী ॥ মাতুলুঙ্গস্য মূলানি মধুকং মধুসংযুতং। ঘৃতেন সহ পাতব্যং সুখং নারী প্রসূয়তে ॥ ইতি চক্রপাণিদত্তঃ ॥ * ॥ সুখপ্রসবমন্ত্রো যথা। অস্তি গোদাবরীতীরে জম্ভলা নাম রাক্ষসী। তস্যাঃ স্মরণমাত্রেণ বিশল্যা গর্ব্ভিণী ভবেৎ ॥ * ॥ সুখপ্রসবচক্রং যথা। পঞ্চরেখাঃ সমুল্লিখ্য তির্য্যগূর্দ্ধক্রমেণ হি। পদানি ষড়্দশাপাদ্য ত্বেকমাদ্যে মুনৌ ত্রয়ং ॥ নবমে সপ্ত দদ্যাত্তু বাণং পঞ্চদশে তথা। দ্বিতীয়েঽষ্টাবষ্টমে ষট্ দিশি দ্বৌ ষোড়শে শ্রুতিঃ ॥ একাদিনা সমং জ্ঞেয়মিচ্ছাঙ্কার্দ্ধং ত্রিকোণকে। তদা দ্বাত্রিংশদাদিঃ স্যাচ্চতুষ্কোষ্ঠেষু সর্ব্বতঃ ॥ দর্শনাদ্ধারণাত্তাসাং শুভং স্যাদেষু কর্ম্মসু। দ্বাত্রিংশৎ প্রসবে নার্য্যাশ্চতুস্ত্রিংশদ্গমে নৃণাং ॥ ভূতাবিষ্টেষু পঞ্চাশন্মৃতাপত্যাসু বৈ শতং। দ্বাসপ্ততিস্তু বন্ধ্যায়াং চতুঃষষ্টী রণাধ্বনি ॥ বিষে বিংশো ধান্যকীটেষ্বষ্টাবিংশতিরেব চ। চতুরষ্টৌ চ বালানাং রোদনে পরিকীর্ত্তিতাঃ ॥ ইতি জ্যোতিস্তত্ত্বং ॥ * ॥ তস্য বৈকৃতং যথা। গর্গ উবাচ। অকালপ্রসবা নার্য্যঃ কালাতীত-

প্রজাস্তথা। বিকৃতপ্রসবাশ্চৈব যুগ্মপ্রসবনাস্তথা ॥ অমানুষা অবণ্ডাশ্চ ন জাতব্যঞ্জনাস্তথা। হীনাঙ্গা অধিকাঙ্গাশ্চ জায়ন্তে যদি বা স্ত্রিয়ঃ ॥ পশবঃ পক্ষিণশ্চৈব তথৈব চ সরীসৃপাঃ। বিনাশং তস্য দেশস্য কুলস্য চ বিনির্দ্দিশেৎ ॥ নির্ব্বাসয়েত্তাং নৃপতিঃ স্বরাষ্ট্রাৎ স্ত্রিয়ঞ্চ পূজ্যাশ্চ ততো দ্বিজেন্দ্রাঃ। কিমিচ্ছকৈর্ব্রাহ্মণতর্পণঞ্চ লোকে ততঃ শান্তিমুপৈতি পাপং ॥ ইতি মাৎস্যে অদ্ভুতশান্তিস্ত্রীপ্রসববিকৃতো নাম ২০৯ অধ্যায়ঃ ॥ * ॥ প্রসবাদ্ভুতত্বং যথা। একো বৃষস্ত্রয়ো গাবঃ সপ্তাশ্বা নব দন্তিনঃ। সিংহপ্রসূতিকাশ্চৈব কথিতাঃ স্বামিঘাতকাঃ ॥ তিস্র ইতি বক্তব্যে ছান্দসত্বাৎ ত্রয় ইত্যুক্তং। সিংহপ্রসূতাশ্চ স্ত্রিয়ো বোধ্যাঃ। ভানৌ সিংহগতে চৈব যস্য গৌঃ সংপ্রসূয়তে। মরণং তস্য নির্দ্দিষ্টং ষড়্ভির্মাসৈর্ন সংশয়ঃ ॥*॥ অত্র শান্তিং প্রবক্ষ্যামি যেন সম্পদ্যতে শুভং। প্রসূতাং তৎক্ষণাদেব তাং গাং বিপ্রায় দাপয়েৎ ॥ ততো হোমং প্রকুর্ব্বীত ঘৃতাক্তৈ রাজসর্ষপৈঃ। আহুতীনাং ঘৃতাক্তানামযুতং জুহুয়াত্ততঃ ॥ ব্যাহৃতিভিশ্চায়ং হোমঃ। সোপবাসঃ প্রযত্নেন দদ্যাদ্বিপ্রায় দক্ষিণাং। অপি চ। সিংহরাশৌ গতে সূর্য্যে গোপ্রসূতির্যদা ভবেৎ। পৌষে চ মহিষী সূতে দিবৈবাশ্বতরী তথা ॥ তদানিষ্টম্ভবেৎ কিঞ্চিৎ তচ্ছান্ত্যৈ শান্তিকঞ্চরেৎ। অস্য বামেতিসূক্তেন তদ্বিষ্ণোরিতিমন্ত্রতঃ ॥ জুহুয়াচ্চ তিলাজ্যেন শতমষ্টোত্তরাধিকং। মৃত্যুঞ্জয়বিধানেন জুহুয়াচ্চ তথাযুতং। শ্রীসূক্তেন ততঃ স্নায়াৎ শান্তিসূক্তেন বা পুনঃ ॥ ইত্যদ্ভুতসাগরে নারদঃ ॥

প্রসবকঃ (পুং) পিয়ালবৃক্ষঃ। ইতি শব্দমালা ॥

প্রসববন্ধনং (ক্লী) বৃন্তং। ইত্যমরঃ ॥

প্রসবস্থলী (স্ত্রী) মাতা। যথা। ইয়মিয়ং ময়দানবনন্দিনী ত্রিদশনাথজিতঃ প্রসবস্থলী। ইতি মহানাটকং ॥

প্রসবিতা [ঋ] (পুং) পিতা। ইতি শব্দরত্নাবলী ॥

প্রসবিত্রী (স্ত্রী) জনয়িত্রী। মাতা। প্রপূর্ব্বকসূধাতোঃ কর্ত্তরি তৃণ্ ঈপ্ চ ॥

প্রসব্যং (ত্রি) প্রতিকূলং। ইত্যমরঃ ॥

প্রসহঃ (পুং) বলাৎকারেণ ভক্ষকপক্ষী। স চ কুররশ্যেনাদিঃ। যথা। প্রসহ্য ভক্ষয়ন্ত্যেতে প্রসহাস্তেন কীর্ত্তিতাঃ ॥ অস্য মাংসগুণাঃ। গুরূষ্ণমধুরাঃ স্নিগ্ধা বাতঘ্নাঃ শুক্রবর্দ্ধনাঃ। ইতি রাজবল্লভঃ ॥ অপি চ। কাকো গৃধ্র উলূকশ্চ চিল্লশ্চ শশঘাতকঃ। চাষো ভাসশ্চ কুরর ইত্যাদ্যাঃ প্রসহাঃ স্মৃতাঃ ॥ শশঘাতকঃ বাজ ইতি লোকে। প্রসহাঃ কীর্ত্তিতা এতে "প্রসহ্য ছিদ্য ভক্ষণাৎ। প্রসহাঃ খলু বীর্য্যোষ্ণাস্তন্মাংসং ভক্ষয়ন্তি যে ॥ তে শোষভস্মকোন্মাদৈঃ শুক্রক্ষীণা ভবন্তি হি। ইতি ভাবপ্রকাশঃ ॥

প্রসহনঃ (পুং) হিংস্রপশুঃ। যথা। শার্দ্দূলসিংহশরভর্ক্ষতরক্ষুমুখ্যা যেহন্যান্ প্রসহ্য

বিনিহত্য নির্বর্ত্তয়স্তে। তে কীর্ত্তিতাঃ প্রসহনাঃ পললং তদীয়মর্শঃপ্রমেহজঠরাময়জাড্যহারি ॥ ইতি রাজনির্ঘণ্টঃ ॥ আলিঙ্গনে ক্লী। যথা। পরস্পরপ্রসহনচুম্বনাদিকাঃ শুচৌ সুখে বহুলবিধা ভিদা মতাঃ। ইতি কাব্যপ্রকাশটীকাধৃতকাব্যকৌমুদী ॥ সহনে ক্লী তদ্বতি ত্রি ॥

প্রসহা (স্ত্রী) বৃহতিকা। ইতি রত্নমালা ॥

প্রসহ্য ব্য হঠার্থকং। বলাৎকারার্থং। ইত্যমরঃ॥

প্রসহ্যচৌরঃ (পুং) হঠাৎ চৌর্য্যকারী। ডাকাইত ইতি লুটেরা ইতি চ ভাষা। তৎপর্য্যায়ঃ। বন্দীকারঃ২ মাচলঃ৩ চিল্লাভঃ৪। ইতি ত্রিকাণ্ডশেষঃ ॥

প্রসাতিকা (স্ত্রী) অণুব্রীহিঃ। সূক্ষ্মধান্যং। ইতি রত্নমালা ॥

প্রসাদঃ (পুং) প্রসন্নতা। নৈর্ম্মল্যং। ইত্যমরঃ ॥ অনুগ্রহঃ। কাব্যপ্রাণঃ। স্বাস্থ্যং। প্রসক্তিঃ। ইতি মেদিনী ॥ বৈদর্ব্ভীরীতিযুক্তকাব্যগুণঃ। তস্য লক্ষণং। গ্রাম্যশব্দভিন্নব্যক্তার্থপদবত্বং। যথা। ওজঃপ্রসাদমাধুর্য্যগুণত্রিতয়ভেদতঃ। গৌড়বৈদর্ব্ভপাঞ্চালা রীতয়ঃ পরিকীর্ত্তিতাঃ। ব্যক্তার্থপদমগ্রাম্যং প্রসাদঃ পরিকীর্ত্তিতঃ ॥ ইতি কাব্যচন্দ্রিকা ॥ * ॥ দেবনিবেদিতদ্রব্যং গুরূণাং ভুক্তাবশেষশ্চ। যথা। আসীদ্বংশধ্বজো রাজা প্রজাপালনতৎপরঃ। প্রসাদং সত্যদেবস্য ত্যক্ত্বা দুঃখমবাপ সঃ ॥ ইতি স্কান্দে রেবাখণ্ডে সত্যনারায়ণব্রতকথা ॥

প্রসাদনং (ক্লী) অন্নং। ইতি ত্রিকাণ্ডশেষঃ ॥ প্রসন্নতাকারকং। যথা। বলবর্ণপ্রসাদনমিতি রাজবল্লভঃ ॥

প্রসাদনা (স্ত্রী) সেবা। পরিচর্য্যা। ইতি হেমচন্দ্রঃ ॥

প্রসাধনং (ক্লী) বেশঃ। ইত্যমরঃ ॥ কঙ্কতিকা। ইতি ভরতধৃতামরমালা ॥ প্রকৃষ্টনিষ্পত্তিশ্চ ॥

প্রসাধনী (স্ত্রী) সিদ্ধিঃ। ইতি মেদিনী ॥ কঙ্কতিকা। ইত্যমরঃ ॥ তদ্যুক্তির্যথা। প্রসাধনী দিঙ্নবনাগসপ্তসঙ্খ্যাভিরুক্তাঙ্গুলিভিঃ ক্রমেণ। চতুর্ব্বিধানাং পৃথিবীপতীনাং সম্পত্তিসৌভাগ্যযশঃসমৃদ্ধিদা ॥ কাষ্ঠজা ধাতুজা চৈব শৃঙ্গজা চ যথাক্রমং। জাঙ্গলানূপসামান্যদেশজানাং মহীভুজাং॥ ছত্রদণ্ডবদুন্নেয়ঃ কাষ্ঠজায়া বিনিশ্চয়ঃ। কনকং রজতং তাম্রং পিত্তলং সীসকং তথা ॥ লৌহং সর্ব্বঞ্চ সর্ব্বার্দ্ধমাদিত্যাদিদশাভুবাং। রাজ্ঞামেবোপযুজ্যেত কাল কীর্ত্তিপ্রসাধনী ॥ মৃগাণাং মহিষাণাঞ্চ সিংহজাতা প্রসাধনী। গজদন্তসমুদ্ভূতা রাজ্ঞামেবোপযুজ্যতে ॥ অত্রাপি রত্নবিন্যাসো জ্ঞেয়শ্চামরদণ্ডবৎ। ইতি যুক্তিকল্পতরুঃ ॥

প্রসাধিকা (স্ত্রী) নীবারঃ। যথা। প্রসাধিকা তু নীবারস্তৃণান্তমিতি চ স্মৃতং। অস্যা গুণাঃ। নীবারঃ শীতলো গ্রাহী পিত্তঘ্নঃ কফবাতকৃৎ ॥ ইতি ভাবপ্রকাশঃ ॥ বেশকারিণী। যথা। প্রসাধিকালম্বিতমগ্রপাদমাক্ষিপ্য কাচিৎ দ্রবরাগমেব। ইতি কুমারসম্ভবে সপ্তমঃ সর্গঃ ॥

প্রসাধিতঃ (ত্রি) অলঙ্কৃতঃ। ইত্যমরঃ॥ প্রকৃষ্টনিষ্পন্নঃ। নিষ্পাদিতঃ। যথা। ততঃ প্রস্থমিতং কল্কং দত্বা তোয়চতুর্গুণে। ক্ষীরে প্রসাধিতং তৈলং গ্রহঘ্নঃ বলবর্ণকৃৎ॥ ইতি সারসংগ্রহঃ॥

প্রসারঃ (পুং) প্রসরণং। ইতি হেমচন্দ্রঃ॥

প্রসারণং (ক্লী) পঞ্চবিধকর্ম্মান্তর্গতকর্ম্মবিশেষঃ। স তু বিস্তাররূপঃ। যথা। উৎক্ষেপণং ততোঽবক্ষেপণমাকুঞ্চনন্তথা। প্রসারণঞ্চ গমনং কর্ম্মাণ্যেতানি পঞ্চ চ॥ ইতি ভাষাপরিচ্ছেদঃ॥

প্রসারণী (স্ত্রী) লতাবিশেষঃ। গন্ধভাদালিয়া ইতি ভাষা। অস্য গুণাঃ। বাতপিত্তনাশিত্বং। উষ্ণত্বং। বলশুক্রকারিত্বঞ্চ। ইতি রাজবল্লভঃ॥ সৈন্যানাং সর্ব্বতো ব্যাপ্তিঃ। ইতি প্রসরণশব্দটীকায়াং ভরতঃ॥

প্রসারিণী (স্ত্রী) লজ্জালুলতা। প্রসারণী। গন্ধভাদালিয়া ইতি ভাষা। তৎপর্য্যায়ঃ। সুপ্রসরা ২ সারিণী ৩ প্রসরা ৪ সরা ৫ চারুপর্ণী ৬ রাজবলা ৭ ভদ্রপর্ণী ৮ প্রতানিকা ৯ প্রবলা ১০ রাজপর্ণী ১১ চন্দ্রপর্ণী ১২ ভদ্রবলা ১৩ চন্দ্রবল্লী ১৪ প্রভদ্রা ১৫। অস্যা গুণাঃ। গুরুত্বং। উষ্ণত্বং। তিক্তত্বং। বাতার্শঃশ্বযথুমলবিষ্টম্ভনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

প্রসারী (ত্রি) প্রসরণশীলঃ। তৎপর্য্যায়ঃ। বিসৃত্বরঃ ২ বিসৃমরঃ ৩ বিসারী ৪। ইত্যমরঃ॥

প্রসিতং (ক্লী) পূযং। ইতি শব্দচন্দ্রিকা॥ আসক্তে ত্রি। ইত্যমরঃ॥

প্রসিতিঃ (স্ত্রী) বন্ধনসাধনরজ্জুনিগড়াদিঃ। ইত্যমরঃ॥

প্রসিদ্ধঃ (ত্রি) ভূষিতঃ। খ্যাতঃ। ইতি মেদিনী॥

প্রসিদ্ধিঃ (স্ত্রী) টঙ্কারঃ। খ্যাতিঃ। ইতি ত্রিকাণ্ডশেষঃ॥ ভূষা। ইতি প্রসিদ্ধশব্দার্থদর্শনাৎ॥

প্রসূঃ (স্ত্রী) মাতা। ঘোটকী। ইত্যমরঃ॥ কদলী। বীরুৎ। ইতি মেদিনী॥

প্রসূকা (স্ত্রী) বাজিনী। ইতি রাজনির্ঘণ্টঃ॥

প্রসূতং (ক্লী) কুসুমং। ইতি মেদিনী॥

প্রসূতঃ (ত্রি) সংজাতঃ। সূতঃ। ইতি মেদিনী॥

প্রসূতা (স্ত্রী) জাতসন্তানা। তৎপর্য্যায়ঃ। জাতাপত্যা ২ প্রজাতা ৩ প্রসূতিকা ৪। ইত্যমরঃ॥

প্রসূতিঃ (স্ত্রী) প্রসবঃ। ইত্যমরঃ॥ উদ্ভবঃ। তনয়ঃ। দুহিতা। ইতি মেদিনী॥

প্রসূতিকা (স্ত্রী) প্রসূতা। ইত্যমরঃ॥

প্রসূতিজং (ক্লী) দুঃখং। ইত্যমরঃ॥

প্রসূনং (ক্লী) পুষ্পং। ফলং। ইত্যমরঃ॥ জাতে ত্রি। ইতি মেদিনী॥

প্রসূনেষুঃ (পুং) কামদেবঃ। ইতি ত্রিকাণ্ডশেষঃ॥

প্রসৃতং (ক্লী) পলদ্বয়ং। ইতি শব্দমালা॥

প্রসৃতঃ (পুং) নিকুব্জপাণিঃ। অর্দ্ধাঞ্জলিঃ। ইত্যমরঃ॥

প্রসৃতঃ (ত্রি) প্রবৃদ্ধঃ। প্রসারিতঃ। ইত্যমরঃ॥

বিনীতঃ। বেগিতঃ। ইতি মেদিনী॥ গতঃ। ইতি ত্রিকাণ্ডশেষঃ॥ নিযুক্তঃ। ইতি হলায়ুধঃ॥

প্রসৃতা (স্ত্রী) জঙ্ঘা। ইতি মেদিনী॥

প্রসৃতিঃ (স্ত্রী) প্রসৃতঃ। আকুঞ্চিতপাণিঃ। ইতি রায়মুকুটঃ রাজনির্ঘণ্টশ্চ॥

প্রসেকঃ (পুং) সেচনং। চ্যুতিঃ। ইতি মেদিনী॥

প্রসেদিকা (স্ত্রী) ক্ষুদ্রারামঃ। ইতি হেমচন্দ্রঃ॥

প্রসেদিবান্ [স্] (ত্রি) প্রসন্নঃ। প্রপূর্ব্বসদধাতোঃ কর্ত্তরি ক্বসুপ্রত্যয়নিষ্পন্নঃ॥

প্রসেবঃ (পুং) বীণাঙ্গং। স্যূতঃ। ইতি মেদিনী॥

প্রসেবকঃ (পুং) বীণাপ্রান্তবক্রকাষ্ঠং। দণ্ডাধঃ শব্দগাম্ভীর্য্যার্থং দারুময়ং ভাণ্ডং যচ্চর্ম্মণা আচ্ছাদ্য দীয়তে সঃ। ইত্যন্যে। বীণাস্থিতালাবুফলং। ইত্যপরে। ইতি ভরতঃ॥ তৎপর্য্যায়ঃ। ককুভঃ ২। ইত্যমরঃ॥ সূত্ররচিতভাণ্ডং। ধোকড়া ইতি খ্যাতঃ। তৎপর্য্যায়ঃ। স্যূনঃ ২ স্যোনঃ ৩ ধৌতকটঃ ৪ স্যোতঃ ৫ স্যূতঃ ৬। ইতি ভরতঃ॥ প্রকৃষ্টতন্তুসন্তানকর্ত্তা চ॥

প্রস্কন্দনং (ক্লী) বিরেকঃ। ইতি রত্নমালা॥

প্রস্কন্নঃ (পুং) ঋষিবিশেষঃ। স চ বৈদিকসন্ধ্যান্তর্গতসূর্য্যোপস্থানমন্ত্রস্য ঋষিঃ। পতিতে ত্রি। ইতি হেমচন্দ্রঃ॥

প্রস্তরঃ (পুং) প্রস্তৃণাতি আচ্ছাদয়তি যঃ। পাতর ইতি ভাষা। তৎপর্য্যায়ঃ। গ্রাবা ২ পাষাণঃ ৩ উপলঃ ৪ অশ্মা ৫ দৃশৎ ৬ দৃষৎ ৭ পারারুকঃ ৮ পারটীটঃ ৯ মৃন্মরুঃ ১০ কাচকঃ ১১ শিলা ১২॥ পল্লবাদিরচিতশয্যা যথা। পল্লবাদ্যৈবিরচিতে শয়নীয়ে তু সংস্তরঃ। প্রস্তরঃ প্রস্তিরশ্চেতি প্রস্তারোঽপি চ কুত্রচিৎ॥ ইতি শব্দরত্নাবলী॥ মণিঃ। ইতি মেদিনী॥

প্রস্তরিণী (স্ত্রী) গোলোমিকা। ইতি রাজনির্ঘণ্টঃ॥

প্রস্তারঃ (পুং) তৃণবনং। তৎপর্য্যায়ঃ। তৃণাটবী ২ খষঃ ৩। ইতি হেমচন্দ্রঃ॥ পল্লবাদিবিরচিতশয়নীয়ং। ইতি শব্দরত্নাবলী॥ শয্যা। ইতি হারাবলী॥ ছন্দঃপ্রভৃতীনাং প্রভেদজ্ঞাপকসঙ্কেতবিশেষঃ। যথা। পাদে সর্ব্বগুরাবাদ্যাৎ লঘু ন্যস্য গুরোরধঃ। যথোপরি তথা শেষং ভূয়ঃ কুর্য্যাদমুং বিধিং॥ ঊনে দদ্যাদ্‌গুরূনেব যাবৎ সর্ব্বলঘুর্ভবেৎ। প্রস্তারোঽয়ং সমাখ্যাতশ্ছন্দোবিচিতিবেদিভিঃ॥ ইতি বৃত্তরত্নাবলী॥ *॥ অপি চ। অহপত্থার। পঢ়ম গুরু হেট্ঠ ঠাণে লহুআ পরিঠবউ অপ্পবুদ্ধী এ। সরিসা সরিসা পন্তী উব্বরিআ গুরুলহূ দেহু॥ অস্য টীকা। এতদ্ভেদজ্ঞানং প্রস্তারজ্ঞানাধীনমিতিপ্রস্তারং দর্শয়তি। প্রথমং গুরোরধঃস্থানে লঘুকং স্থাপয় আত্মবুদ্ধ্যা সদৃশী সদৃশী পংক্তিরুদ্বৃত্তৌ গুরুলঘূ দেহি সদৃশী পংক্তিদক্ষিণে কার্য্যা বামে গুরুলঘুভিঃ পূরণং কার্য্যং ইদন্তু মাত্রাপ্রস্তারবিষয়ং তত্রাপি গুরোলিখনযোগ্যত্বে গুরুর্লেখ্যঃ অপরত্র

লঘুর্দেয়ঃ। বর্ণপ্রস্তারে তু গুরুণৈব পূরণং কার্য্যং তত্রায়ং প্রকারঃ আদৌ গুরুর্লেখ্যঃ তত্র প্রথমং গুরোরধঃস্থানে লঘুর্লেখ্যঃ তদ্দক্ষিণে চোপরিস্থিতপংক্তেঃ সদৃশী কার্য্যা বামে চ গুরুলঘুভিঃ পূরণং কার্য্যং বামে চৈক একলঘুঃ পততি বর্ণপ্রস্তারে তু বামে লঘুস্পর্শো নাস্তি যথা ত্রিকলপ্রস্তারে। ৬৬। প্রথমগুরোরধো লঘুর্বামতশ্চ কলার্দ্ধপূরণং গুরুণৈব কার্য্যং দক্ষিণে চ পংক্ত্যভাবঃ ততো গুরোরধো লঘুর্লেখ্যঃ দক্ষিণে চ লঘোরধো লঘুর্লেখ্যঃ বামে চ কলাপূরণং একেন লঘুনা কার্য্যং এবং চতুষ্কলা৬৬- দাবপি বোধ্যং যথা অক্ষরচ্ছন্দসি ৬৬ এবমন্যত্রাপি বোধ্যং ॥ * ॥ অথ সকল- প্রস্তারসংখ্যা। দব্বীসা সত্তসআতইং সত্তাবহ সহজ্জাইং বাআলিসহ লক্‌খং তেরহকোড়ী সমগ্‌গাইং। অস্য টীকা। অত্র চৈকাক্ষরমারভ্য ষড়্‌বিংশত্যবধিবর্ণ- বৃত্তানাং প্রস্তারে কিয়তী সংখ্যেত্যত আহ। ১৩৪২১৭৭২৬ ষড়্‌বিংশতিঃ সপ্ত- শতানি তথা সপ্তদশসহস্রাণি দ্বিচত্বারিংশ- ল্লক্ষাস্ত্রয়োদশকোট্যঃ সমগ্রাণি অঙ্কস্য বামা গতিরিত্যঙ্কাঃ স্থাপ্যাঃ। ইতি পিঙ্গলঃ শীঘ্রবোধভূষণশ্চ ॥

প্রস্তার্য্যর্ম্ম [ন্] (ক্লী) নেত্ররোগভেদঃ। তস্য লক্ষণং। প্রস্তার্য্যর্ম্ম তনুস্তীর্ণং শ্যাবং রক্ত- নিভং সিতে। ইতি মাধবকরঃ ॥ অপি চ। সমস্তাদ্বিস্তৃতঃ শ্যাবো রক্তো বা মাংস- সঞ্চয়ঃ। সন্নিপাতেন দোষাণাং প্রস্তার্য্যর্ম্ম তদুচ্যতে ॥ ইতি রক্ষিতধৃতনিমিঃ ॥ তস্যৌষধং। কতকস্য ফলং শঙ্খং ত্র্যূষণং সৈন্ধবান্বিতং। ফেনো রসাঞ্জনং ক্ষৌদ্রং বিড়ঙ্গানি মনঃশিলা ॥ কুক্কুটাণ্ডকপালানি বর্ত্তিরেষা ব্যপোহতি। তিমিরং পটলং কাচমর্ম্মশুক্রং তথৈব চ ॥ কণ্ডূক্লেদার্বুদং হন্তি মলমাশু সুখাবতী। ইতি চক্রপাণি- দত্তঃ ॥

প্রস্তাবঃ (পুং) অবসরঃ। ইত্যমরঃ ॥ প্রসঙ্গ- স্তুতিঃ। ইতি ভরতঃ ॥ প্রসঙ্গঃ। ইতি ভানুদীক্ষিতঃ ॥ প্রকরণং। যথা। প্রস্তাব- দেশকালাদের্বৈশিষ্ট্যাৎ প্রতিভাজুষাং। ইত্যস্যার্থে কাব্যপ্রকাশঃ ॥

প্রস্তাবনা (স্ত্রী) আরম্ভঃ। ইতি জটাধরঃ ॥ সূত্রধারেণ সহ নটীবিদূষকাদীনাং পর- স্পরবিচিত্রভাষণং। তস্যা লক্ষণং। নটী বিদূষকো বাপি পারিপার্শ্বিক এব বা। সূত্রধারেণ সহিতাঃ সংলাপং যত্র কুর্ব্বতে ॥ চিত্রৈর্ব্বাক্যৈঃ স্বকার্য্যোত্থৈঃ প্রস্তুতা- ক্ষেপিভির্ম্মিথঃ। আমুখং তত্র বিজ্ঞেয়ং নাম্না প্রস্তাবনাপি সা ॥ ইতি সাহিত্য- দর্পণঃ ॥

প্রস্তিরঃ (পুং) পল্লবাদিরচিতশয্যা। ইতি শব্দরত্নাবলী ॥

প্রস্তীতঃ } (ত্রি) সংহতঃ। ধ্বনিতঃ। প্রপূর্ব্ব-
প্রস্তীমঃ } স্ত্যৈধাতোঃ কর্ম্মণি ক্তপ্রত্যয়ঃ। ইতি মুগ্ধবোধব্যাকরণং ॥

প্রস্তুতঃ (ত্রি) প্রকরণপ্রাপ্তঃ। যথা। অ- প্রস্তুতপ্রশংসা সা যা চৈব প্রস্তুতাশ্রয়া। ইতি কাব্যপ্রকাশঃ ॥ প্রাকরণিকঃ। প্রাস- ঙ্গিকঃ। ইত্যলঙ্কারকৌস্তুভঃ ॥ নিষ্পন্নঃ।

যথা। প্রস্তুতবৃত্তের্ম্ময়ট্। অন্নং প্রস্তুতং অন্নময়ং। যবাগূঃ প্রস্তুতা যবাগূময়ী। ইতি কলাপতদ্ধিতঃ॥ প্রকর্ষস্তুতিযুক্তঃ। প্রপূর্ব্বস্তুধাতোঃ কর্ম্মণি ক্তঃ। উপস্থিতঃ। প্রতিপন্নঃ। উদ্‌যুক্তঃ। ইতি লোকব্যবহারদর্শনাৎ॥

প্রস্তৃতঃ (ত্রি) অন্তরিতঃ। ইতি ত্রিকাণ্ডশেষঃ॥

প্রস্থঃ (পুং) পরিমাণবিশেষঃ। স তু চতুঃকুড়বরূপঃ। ইত্যমরভরতৌ॥ আঢ়কচতুর্থাংশঃ। ইতি লীলাবতী॥ দ্বিশরাবপরিমাণং। ইতি বৈদ্যকপরিভাষা॥

প্রস্থঃ (পুং ক্লী) অদ্রেঃ সমভূভাগঃ। অদ্রেরেকদেশঃ। ইতি ভরতঃ॥ তৎপর্য্যায়ঃ। স্নুঃ ২ সানুঃ ৩। ইত্যমরঃ॥ উন্মিতবস্তু। ইতি মেদিনী॥ বিস্তারঃ। যথা। দীর্ঘে প্রস্থে সমানঞ্চ ন কুর্য্যান্মন্দিরং বুধঃ। ইতি ব্রহ্মবৈবর্ত্তে জন্মখণ্ডে ১০৩ অধ্যায়ঃ॥ প্রকৃষ্টস্থিতিবিশিষ্টে ত্রি॥

প্রস্থপুষ্পঃ (পুং) মরুবকঃ। ইত্যমরঃ॥ স্বল্পপত্রতুলসী। জম্বীরভেদঃ। ইতি কেচিৎ। জম্বীরসামান্যং। ইতি কেচিৎ। ইতি তট্টীকায়াং ভরতঃ॥

প্রস্থানং (ক্লী) বিজিগীষোঃ প্রয়াণং। ইত্যমরঃ॥ গমনমাত্রং। যথা। প্রস্থানন্তে কুলিশকলনান্নিশ্চিতং পণ্ডিতাগ্র্যৈঃ। ইত্যাদি পদাঙ্কদূতঃ॥

প্রস্থানবিঘ্নঃ (পুং) গমনব্যাঘাতঃ। যথা। যঃ পুনর্ব্বিবাহাবসরে মঙ্গলবতি বাসরে প্রতিষ্ঠমানস্য তৎপ্রস্থানৌপয়িকং কর্ম্ম প্রাগঙ্গীকৃত্য তদানীং ন করিষ্যামীতি প্রস্থানবিঘ্নমাচরতি তদাসৌ দ্বিগুণাং ভৃতিং দাপ্যঃ। ইতি মিতাক্ষরা॥

প্রস্থাপিতঃ (ত্রি) প্রেষিতঃ। ইতি হেমচন্দ্রঃ॥ প্রকর্ষেণ স্থাপিতশ্চ॥

প্রস্থিকা (স্ত্রী) অম্বষ্ঠা। ইতি ভাবপ্রকাশঃ॥

প্রস্ফুটঃ (ত্রি) প্রফুল্লঃ। ইতি শব্দরত্নাবলী॥

প্রস্ফোটনং (ক্লী) সূর্পং। ইত্যমরঃ॥ তাড়নং। বিকাশনং। ইতি মেদিনী॥ পচনং। ইতি হেমচন্দ্রঃ॥

প্রস্রবণং (ক্লী) যত্র স্থানে স্রুত্বা জলং গলতি তৎ। ইতি ভরতঃ॥ অবিচ্ছেদেন স্রবজ্জলং যত্র স্থানে পততি যত্র নিপত্য চ বহুলীভবতি তৎ। ইতি স্বাম্যাদয়ঃ॥ গিরেরুপরি নির্ঝরাদিপ্রভবজলসংঘাতঃ। ইতি সাঞ্জঃ॥ অজস্রং মন্দবেগেন স্রবজ্জলং। ইতি কোক্কটঃ॥ তৎপর্য্যায়ঃ। উৎসঃ ২। ইত্যমরঃ॥ জলপ্রস্রাবঃ ৩। অস্য গুণাঃ। প্রস্রবণজলং স্বচ্ছং লঘু মধুরং রোচনঞ্চ দীপনকৃৎ। ইতি রাজনির্ঘণ্টঃ॥

প্রস্রবণঃ (পুং) মাল্যবৎপর্ব্বতঃ। ইতি হেমচন্দ্রঃ॥ স্বেদঃ। ইতি ত্রিকাণ্ডশেষঃ॥ প্রকর্ষেণ ক্ষরণে ক্লী॥

প্রস্রাবঃ (পুং) মূত্রং। ইত্যমরঃ॥ গোপ্রস্রাবমাহাত্ম্যং যথা। প্রস্রাবেণ তু যঃ স্নায়াৎ রোহিণ্যাং মানবো দ্বিজ। সর্ব্বপাপকৃতান্দোষান্ দহত্যাশু ন সংশয়ঃ॥ ইতি বরাহপুরাণং॥

প্রস্বানঃ (পুং) উচ্চৈঃশব্দঃ। প্রপূর্ব্বস্বনধাতো-র্ঘঞ্প্রত্যয়েন নিষ্পন্নঃ ॥

প্রস্বেদঃ (পুং) অতিশয়ঘর্ম্মঃ। তস্যৌষধং যথা। চন্দনং কুঙ্কুমং মাংসী কর্পূরো জাতিপত্রিকা। জাতীকক্কোলপূগানাং লবঙ্গস্য ফলানি চ ॥ অগুরুশীরকাশ্মর্য্যঃ কুষ্ঠং তগরনালিকা। গোরোচনা প্রিয়ঙ্গুশ্চ চোলং মদনকং নখং ॥ সরলঃ সপ্তপর্ণশ্চ লাক্ষা চামলকী তথা। কর্ব্বূরকঃ পদ্মকঞ্চ এতৈস্তৈলং প্রসাধিতং ॥ প্রস্বেদ-মলদৌর্গন্ধ্যকণ্ডুকুষ্ঠহরং পরং। পুমান্ যুবা স্যাৎ শুক্রাঢ্যঃ স্ত্রীণাঞ্চাত্যন্তবল্লভঃ ॥ স্ত্রীশতং গচ্ছতে রুদ্র বন্ধ্যাপি লভতে সুতং। ইতি গারুড়ে ১৯৮ অধ্যায়ঃ ॥

প্রহতং (ত্রি) বিততং। ক্ষুণ্ণং। ইতি শব্দ-রত্নাবলী ॥ প্রকর্ষেণ হিংসিতং গতঞ্চ ॥

প্রহনেমিঃ (পুং) চন্দ্রঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

প্রহরঃ (পুং) বাসরস্যাষ্টভাগৈকভাগঃ। পহর ইতি হিন্দী ভাষা। তৎপর্য্যায়ঃ। যামঃ ২। ইত্যমরঃ ॥

প্রহরকুটুবী (স্ত্রী) কুটুম্বিনীক্ষুপঃ। ইতি রাজ-নির্ঘণ্টঃ ॥

প্রহরণং (ক্লী) অস্ত্রং। ইত্যমরঃ॥ কর্ণীরথঃ। ইতি তট্টীকাসারসুন্দরী ॥ যুদ্ধং। ইতি হলায়ুধঃ ॥ প্রহারশ্চ ॥

প্রহরী [ন্] (ত্রি) যামিকঃ। প্রহরো বিদ্যতে অস্যেতি প্রহরশব্দাদস্ত্যর্থে ইন্প্রত্য-য়েন নিষ্পন্নঃ ॥

প্রহর্ষণঃ (পুং) বুধগ্রহঃ। ইতি ত্রিকাণ্ডশেষঃ॥ হর্ষবিশিষ্টে হর্ষকারকে চ ত্রি ॥

প্রহর্ষণী (স্ত্রী) হরিদ্রা। ইতি হারাবলী ত্রয়োদশাক্ষরপাদচ্ছন্দোভেদঃ। তস্যা লক্ষণং যথা। ত্র্যাশাভির্মনজরগাঃ প্রহর্ষ-ণীয়ং। তস্যা লক্ষ্যং যথা। গোপীনা-মধরসুধারসস্য পানৈরুত্তুঙ্গস্তনকলসোপ-গূহনৈশ্চ। আশ্চর্য্যৈরপি রতিবিভ্রমৈ-র্মুরারেঃ সংসারে মতিরভবৎ প্রহর্ষণীহ ॥ ইতি ছন্দোমঞ্জরী ॥

প্রহসনং (ক্লী) প্রহাসঃ। রূপকভেদঃ। পরি-হাসঃ। ইতি মেদিনী ॥ আক্ষেপঃ। ইতি হেমচন্দ্রঃ ॥ রূপকভেদস্য লক্ষণং যথা। ভাণবৎসন্ধিসন্ধ্যঙ্গলাস্যাঙ্গাঙ্কৈর্বিনির্ম্মিতে। ভবেৎ প্রহসনে বৃত্তং নিন্দ্যানাং কবি কল্পিতং ॥ তত্র নারভটীনাপি বিস্কম্ভক-প্রবেশকৌ। অঙ্গী হাস্যরসস্তত্র বীথ্য-ঙ্গানাং স্থিতির্ন বা ॥ তপস্বিভগবদ্বিপ্র-প্রভৃতিষ্বত্র নায়কঃ। একো যত্র ভবে-দ্ধৃষ্টো হাস্যং তচ্ছুদ্ধমুচ্যতে ॥ ইতি সাহিত্যদর্পণঃ ॥

প্রহসন্তী (স্ত্রী) যূথী। ইতি ত্রিকাণ্ডশেষঃ ॥ বাসন্তী। ইতি রাজনির্ঘণ্টঃ ॥ প্রকৃষ্টা-ঙ্গারধানী চ ॥

প্রহস্তঃ (পুং) বিস্তৃতাঙ্গুলিপাণিঃ। চপেটঃ। ইত্যমরঃ ॥ রাবণসেনাপতিবিশেষঃ। যথা। ততো নীলাম্বুদপ্রখ্যং প্রহস্তো নাম রাক্ষসঃ। অব্রবীৎ প্রাঞ্জলির্ব্বাক্যং সূরঃ সেনাপতিস্তদা ॥ ইতি রামায়ণে লঙ্কাকাণ্ডে ৮ সর্গঃ ॥

প্রহারঃ (পুং) আঘাতঃ। যথা। তলপ্রহারেণ শিরশ্চামরস্য পৃথক্ কৃতং। ইতি চণ্ডী ॥

প্রহারণং (ক্লী) কাম্যদানং। ইতি প্রবারণ-শব্দটীকায়াং সারসুন্দরী ॥

প্রহারবল্লী (স্ত্রী) মাংসরোহিণী। ইতি ভাবপ্রকাশঃ ॥

প্রহাসঃ (পুং) শিবঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ নটঃ। ইতি ধরণিঃ ॥ সোমতীর্থং। ইতি জটাধরঃ ॥ অট্টহাসঃ। ইতি শব্দরত্নাবলী ॥

প্রহাসী [ন্] (পুং) প্রকৃষ্টং হাসয়তি হসতি চ যঃ। ভাঁড় ইতি ভাষা। তৎপর্য্যায়ঃ। বাসন্তিকঃ২ কেলিকিলঃ৩ বৈহাসিকঃ৪ বিদূষকঃ ৫ প্রীতিদঃ ৬। ইতি হেমচন্দ্রঃ

প্রহিঃ (পুং) কূপঃ। ইত্যমরঃ ॥

প্রহিতং (ক্লী) সূপঃ। ইতি হেমচন্দ্রঃ ॥ ক্ষিপ্তে ত্রি। ইতি নিরস্তশব্দটীকায়াং ভরতঃ ॥

প্রহীণঃ (ত্রি) পরিত্যক্তঃ। প্রপূর্ব্বহাধাতোঃ কর্ম্মণি ক্তঃ। ইতি মুগ্ধবোধব্যাকরণং ॥ প্রহীণপূর্ব্বধ্বনিনাধিরূঢ়স্তলামধারেণ শরদ্ঘনেন। ইতি রঘুকাব্যঞ্চ ॥

প্রহুতং (ক্লী) ভূতযজ্ঞঃ। ইতি জটাধরঃ ॥

প্রহেণকং (ক্লী) পিষ্টকবিশেষঃ। তৎপর্য্যায়ঃ। বাচনং ২ ব্রতোপায়নং৩। ইতি ত্রিকাণ্ডশেষঃ ॥ প্রহেলকং ৪ বাচনকং ৫। ইতি হারাবলী ॥

প্রহেলকং (ক্লী) প্রহেণকং। ইতি হারাবলী ॥

প্রহেলিকা (স্ত্রী) দুর্বিজ্ঞানার্থপ্রশ্নঃ। কূটার্থভাষিতা কথা। হেয়ালি ইতি ভাষা। তৎপর্য্যায়ঃ। প্রবল্হিকা ২। ইত্যমরঃ ॥ প্রবহ্লিকা ৩ প্রবহ্লিঃ ৪ প্রবহ্লী ৫ প্রহেলিঃ ৬। ইতি ভরতঃ ॥ প্রশ্নদূতী ৭ প্রবহ্লীকা ৮। ইতি শব্দরত্নাবলী ॥ তস্য লক্ষণং। ব্যক্তীকৃত্য কমপ্যর্থং স্বরূপার্থস্য গোপনাৎ। যত্র বাহ্যান্তরাবর্থৌ কথ্যেতে সা প্রহেলিকা ॥ সা দ্বিধার্থী চ শাব্দী চ বিখ্যাতা প্রশ্নশাসনে। আর্থী স্যাদর্থবিজ্ঞানাৎ শাব্দী শব্দস্য ভঙ্গতঃ ॥ আর্থী যথা। তরুণ্যালিঙ্গিতঃ কণ্ঠে নিতম্বস্থলমাশ্রিতঃ। গুরূণাং সন্নিধানেঽপি কঃ কূজতি মুহুর্মুহুঃ ॥ পানীয়কুম্ভ ইতি ॥ শাব্দী যথা। সদারিমধ্যাপি ন বৈরিযুক্তা নিতান্তরক্তাপ্যসিতৈব নিত্যং। যথোক্তবাদিন্যপি নৈব দূতী কা নাম কান্তেতি নিবেদয়ন্তি ॥ সারিকা। ইতি বিদগ্ধমুখমণ্ডনং ॥

প্রহ্রাদঃ (পুং) প্রহ্লাদঃ। স চ হিরণ্যকশিপোঃ পুত্রঃ পরমবৈষ্ণবঃ। তস্য চরিত্রং ভাগবতাদৌ বর্ত্ততে ॥

প্রহ্লত্তিঃ (স্ত্রী) প্রীতিঃ। ইতি মুগ্ধবোধব্যাকরণং ॥

প্রহ্লন্নঃ (ত্রি) প্রীতঃ। ইত্যমরঃ ॥

প্রহ্লাদঃ (পুং) প্রহ্রাদঃ। স চ পূর্ব্বজন্মনি শিবশর্ম্মণঃ পুত্রঃ সোমশর্ম্মনামাভূৎ ততো দৈত্যভাবনয়া মৃতঃ অনন্তরং কমলায়াং হিরণ্যকশিপোঃ সকাশাদ্দৈত্যভাবেন জাতঃ। যথা। সূত উবাচ। স লোষ্টেন সমং মেনে কাঞ্চনং ভূষণং পুনঃ। জিতাহারঃ স ধর্ম্মাত্মা নিদ্রয়া পরিবর্জ্জিতঃ ॥

বিষয়ান্ স পরিত্যজ্য একান্তমপি সেবতে। যোগাসনসমারূঢ়ো নিরাশো নিষ্পরিগ্রহঃ॥ তস্য বেলাং সুসংপ্রাপ্য মৃত্যুকালঃ সমাগতঃ। আগতান্ দানবান্ বিপ্রঃ সোমশর্ম্মা ব্যলোকয়ৎ ॥ মৃত্যুকালে তু সংপ্রাপ্তে প্রাণযাত্রাপ্রবর্ত্তকে। শালগ্রামে মহাক্ষেত্রে ঋষীণামেব সন্নিধৌ ॥ কেচিদ্বদন্তি বৈ দৈত্যাঃ কেচিদ্বদন্তি দানবাঃ। এবম্বিধো মহাশব্দঃ কর্ণরন্ধ্রগতস্তদা ॥ তস্যৈব বিপ্রবর্য্যস্য সুবিপ্রাঃ সোমশর্ম্মণঃ। জ্ঞানধ্যানাৎ প্রচলতঃ প্রবিষ্টং দৈত্যজং ভয়ং॥ তেন ধ্যানেন তস্যাপি দৈত্যভূতেন বৈ তদা। সত্বরং তস্য বৈ প্রাণা গতাস্তস্য মহাত্মনঃ॥ দৈত্যভাবেন সংযুক্তঃ স হি মৃত্যুবশং গতঃ। তস্মাদ্দৈত্যগৃহে জাতো হিরণ্যকশিপোস্তদা ॥ দেবাসুরে মহাযুদ্ধে নিহতশ্চক্রপাণিনা। যুধ্যমানেন তেনাপি প্রহ্লাদেন মহাত্মনা॥ সুভৃশং বাসুদেবং তদ্বিশ্বরূপং বিচিন্তিতং। যোগাভ্যাসেন পূর্ব্বেণ জ্ঞানমাসীন্মহাত্মনঃ॥ সস্মার পৌর্ব্বিকং সর্ব্বং চরিত্রং শিবশর্ম্মণঃ। সোঽপ্যহং সোমশর্ম্মা বৈ প্রবিষ্টো দানবীং তনুং॥ কস্য কায়ং কদা পুণ্যং কেবলং ধ্যানমুত্তমং। প্রয়ামি চ মহাপুণ্যৈর্জ্ঞানাখ্যৈর্মোক্ষদায়িভিঃ॥ সমরে প্রীয়মাণেন প্রহ্লাদেন মহাত্মনা। এবং চিন্তা কৃতা পূর্ব্বং শ্রূয়তাং দ্বিজসত্তম ॥ এতত্তে সর্ব্বমাখ্যাতং সর্ব্বসন্দেহনাশনং। সূত উবাচ। প্রহ্লাদে তু হতে সংখ্যে দেবদেবেন চক্রিণা। সংহ্লাদে চ মহাবিপ্রা-

স্তস্মিংশ্চ কালনেমিনি॥ প্রহ্লাদস্য তু যা মাতা হিরণ্যকশিপোঃ প্রিয়া। প্রহ্লাদস্য মহাশোকৈর্দ্দিবা রাত্রৌ প্রশোচতি ॥ পতিব্রতা মহাভাগা কমলা নাম দুঃখিতা। খিদ্যমানা দিবা রাত্রৌ নারদস্তামুবাচ হ ॥ মা শুচস্ত্বং মহাভাগে পুত্রার্থং পুণ্যভাগিনি। নিহতো বাসুদেবেন তব পুত্রঃ সমেষ্যতি ॥ তদ্রূপলক্ষণোপেতস্তবোদরে মহামতিঃ। প্রহ্লাদেতি চ বৈ নাম পুনরস্য ভবিষ্যতি॥ বিহীন আসুরৈর্ভাবৈর্বৈষ্ণবেন সমন্বিতঃ। ইন্দ্রত্বং ভোক্ষ্যতে ভদ্রে সর্ব্বদেবৈর্নমস্কৃতঃ॥ সুখী ভব মহাভাগে পুত্রেণ তেন বৈ সদা। ন প্রকাশ্যা ত্বয়া দেবি স্ববার্ত্তেয়ঞ্চ কস্যচিৎ॥ কর্ত্তব্যমজ্ঞানভাবৈঃ সুগোপ্যং ত্বং সদা কুরু। এবমুক্ত্বা গতো বিপ্র নারদো মুনিসত্তমঃ॥ কমলায়াশ্চোদরে বৈ আসীৎ তজ্জন্ম চোত্তমং। পুনঃ প্রহ্লাদো বৈ নাম তস্যাং জাতো মহাত্মনঃ॥ বাল্যভাবং গতো বিপ্র কৃষ্ণ এবং বিচিন্ত্য চ। নরসিংহপ্রসাদেন দেবরাজোঽপ্যভূৎ স হি ॥ ইতি পাদ্মে ভূমিখণ্ডে ৫ অধ্যায়ঃ ॥ *॥ প্রমোদঃ। ইতি বিশ্বঃ॥ শব্দঃ। ইতি ধরণিঃ॥

প্রহ্বঃ (ত্রি) নম্রঃ। ইত্যুণাদিকোষঃ॥ আসক্তিঃ। ইতি হেমচন্দ্রঃ॥

প্রক্ষরঃ (পুং) অশ্বসন্নাহঃ। ইতি হেমচন্দ্রঃ॥

প্রক্ষালনং (ক্লী) ধাবনং। মার্জ্জনং। যথা। ধর্ম্মার্থং যস্য বিত্তেহা বরং তস্য নিরীহতা। প্রক্ষালনাদ্ধি পঙ্কস্য দূরাদস্পর্শনং বরং॥ ইতি হিতোপদেশে ১ পরিচ্ছেদঃ॥

প্রক্ষালিতঃ (ত্রি) ধৌতঃ। মার্জ্জিতঃ। ইতি হলায়ুধঃ॥

প্রক্ষেপঃ (পুং) ঔষধাদিষু ক্ষেপণীয়দ্রব্যং। যথা। প্রক্ষেপঃ পাদিকঃ ক্বাথ্যাৎ স্নেহে কল্কসমো মতঃ। ষোড়শাষ্টচতুর্ভাগং বাতপিত্তকফার্ত্তিষু॥ ক্ষৌদ্রং কষায়ে দাতব্যং বিপরীতা তু শর্করা। মাত্রা ক্ষৌদ্রঘৃতাদীনাং স্নেহে ক্বাথে চ চূর্ণবৎ॥ মাষিকং হিঙ্গু সিন্ধূত্থং জরণাদ্যাস্তু শাণিকাঃ। ইতি বৈদ্যকপরিভাষা॥ বিক্ষেপঃ। যথা। সমিৎপ্রক্ষেপান্তং কর্ম্ম কৃত্বেতি ভবদেবভট্টঃ॥

প্রক্ষেপণং (ক্লী) প্রকর্ষেণ ক্ষেপঃ। নিক্ষেপণং। প্রপূর্ব্বক্ষিপধাতোর্ভাবে অনট্প্রত্যয়ঃ॥

প্রক্ষ্বেড়নঃ (পুং) নারাচঃ। ইত্যমরঃ॥

প্রক্ষ্বেড়না (স্ত্রী) নারাচঃ। ইত্যমরটীকায়াং ভগীরথঃ॥

প্রক্ষ্বেদনঃ (পুং)
প্রক্ষ্বেদনা (স্ত্রী) } নারাচঃ। ইত্যমরটীকায়াং ভগীরথঃ॥

প্রা ল পূর্ত্তৌ। ল প্রাতি ঘটং জলেন লোকঃ। ইতি দুর্গাদাসঃ॥

প্রাক্ ব্য পূর্ব্বদিগ্দেশকালাঃ। ইত্যমরঃ॥ প্রাচী দিক্ প্রাঙ্ দেশঃ কালো বা প্রাক্। এবং প্রাচ্যা দিশঃ প্রাচো দেশাৎ কালাদ্বা আগতঃ প্রাগাগতঃ। এবং প্রাচ্যাং দিশি প্রাচি দেশে বা বসতি প্রাগ্বসতি। দিক্শব্দাদ্দিগ্দেশকালে ইতি প্রথমাপঞ্চমীসপ্তমীনাং স্তাৎ অচো লুগিতি স্তাতো লুক্। ইতি তট্টীকায়াং ভরতঃ॥ পূর্ব্বং। প্রভাতং। অবান্তরং। অতীতং। অগ্রং। ইতি হেমচন্দ্রঃ মেদিনী চ॥ ক্রমপ্রাপ্তিঃ। ইতি শব্দরত্নাবলী॥

প্রাকষিকঃ (পুং) ষিড়্গঃ। মায়ানর্ত্তকঃ। ইত্যুণাদিকোষঃ॥

প্রাকাম্যং (ক্লী) শিবস্যাষ্টধৈশ্বর্য্যান্তর্গতৈশ্বর্য্যবিশেষঃ। তচ্চ ইচ্ছানভিঘাতঃ। ইত্যমরটীকায়াং ভরতঃ হেমচন্দ্রশ্চ॥ স্বাচ্ছন্দ্যানুমতিঃ। তৎপর্য্যায়ঃ। অবসর্গঃ ২ স্বাচ্ছন্দ্যানুমননং ৩। ইতি ত্রিকাণ্ডশেষঃ॥

প্রাকারঃ (পুং) বপ্রোপরি অন্যত্র বা ইষ্টকাদিরচিতবেষ্টনং। তৎপর্য্যায়ঃ। বরণঃ২ সালঃ ৩। ইত্যমরঃ॥ শালঃ ৪। ইতি ভরতঃ॥ বপ্রঃ৫। যথা। প্রাকাররোধসোর্ব্বপ্রঃ পিতৃকেদারয়োরপি। ইতি রত্নকোষঃ॥ তস্য পরিমাণং যথা। ঊর্দ্ধং ষোড়শহস্তেভ্যো নৈব কুর্য্যাদ্গৃহং গৃহী। ঊর্দ্ধং বিংশতিহস্তেভ্যঃ প্রাকারং ন শুভপ্রদং॥ তস্য দ্বারমানং। প্রস্থে হস্তদ্বয়াৎ পূর্ব্বং দীর্ঘে হস্তত্রয়ন্তথা। গৃহিণাং শুভদং দ্বারং প্রাকারস্য গৃহস্য চ॥ ন মধ্যদেশে কর্ত্তব্যং কিঞ্চিন্ন্যূনাধিকে শুভং। ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ১০৩ অধ্যায়ঃ॥

প্রাকৃতঃ (ত্রি০) নীচঃ। ইত্যমরঃ॥ ভাষাভেদঃ। স চ সংস্কৃতপ্রকৃতিকঃ। যথা। অথ প্রাকৃতং। অথশব্দ আনন্তর্য্যার্থোঽধিকারার্থশ্চ। প্রকৃতিঃ সংস্কৃতং তত্র ভবং তত আগতং বা প্রাকৃতং।

সংস্কৃতানন্তরং প্রাকৃতমধিক্রিয়তে। সংস্কৃতানন্তরং প্রাকৃতস্যানুশাসনং। সিদ্ধসাধ্যমানভেদসংস্কৃতযোনেরেব তস্য লক্ষণং ন দেশ্যস্য ইতি জ্ঞাপনার্থং। সংস্কৃতসমন্তু সংস্কৃতলক্ষণেনৈব গতার্থং। প্রাকৃতে প্রকৃতিপ্রত্যয়লিঙ্গকারকসমাসসংজ্ঞাদয়ঃ সংস্কৃতবদ্বেদিতব্যাঃ। লোকাদিতি চ বর্ত্ততে। তেন ঋ ৠ ঌ ৡ ঐ ঔ ঙ ঞ শ ষ বিসর্জ্জনীয়প্লুতবর্জ্জো বর্ণসমাম্নায়ো লোকাদবগন্তব্যঃ। ঙঞৌ স্ববর্গ্যসংযুক্তৌ ভবত এব। ঐদৌতৌ চ কেষাঞ্চিৎ। কৈতবং কৈঅবং। সৌদর্য্যং সৌঅরিঅং। কৌরবাঃ কৌঅবা। তথা স্বরব্যঞ্জনং দ্বিবচনং চতুর্থীবহুবচনঞ্চ ন তু ভবতি। অবহুলং বহুলমিত্যধিকৃতং বেদিতব্যমাশাস্ত্রপরিসমাপ্তেঃ। ততশ্চ ক্বচিৎ প্রবৃত্তিঃ ক্বচিদপ্রবৃত্তিঃ ক্বচিদ্বিভাষা ক্বচিদন্যদেব ভবতি। ইতি হেমচন্দ্রকৃতশব্দানুশাসনবৃত্তৌ অষ্টমাধ্যায়স্য চতুর্থঃ পাদঃ ॥ * ॥ প্রকৃতিসম্বন্ধী। যথা। ইত্যুক্ত্বাসীদ্ধরিস্তূষ্ণীং ভগবানাত্মমায়য়া। পিত্রোঃ সংপশ্যতোঃ সদ্যো বভূব প্রাকৃতঃ শিশুঃ ॥ ইতি শ্রীভাগবতে দশমস্কন্ধে ৩ অধ্যায়ঃ ॥

প্রাকৃতজ্বরঃ (পুং) বর্ষাশরদ্বসন্তেষু ত্রিষু ঋতুষু ক্রমেণ বাতপিত্তকফজজ্বরঃ। যথা। বর্ষাশরদ্বসন্তেষু বাতাদ্যৈঃ প্রাকৃতঃ ক্রমাৎ। ইতি মাধবকরঃ ॥

প্রাকৃতদোষঃ (পুং) বর্ষাশরদ্বসন্তেষু ক্রমেণ কুপিতো বাতঃ পিত্তং কফশ্চ। যথা। চয়প্রকোপপ্রশমাঃ পিত্তস্য প্রাবৃড়াদিষু। শ্লেষ্মণঃ শিশিরাদ্যেষু বায়োর্ঘর্ম্মাদিষু ত্রিষু ॥ ইতি রক্ষিতঃ ॥

প্রাকৃতপ্রলয়ঃ (পুং) প্রকৃতের্লয়ঃ। তস্য বিবরণং যথা। নির্গুণস্য চ নিত্যস্য চাদ্যন্তরহিতস্য চ। নিমেষাণাং সহস্রেণ প্রকৃতের্দ্দণ্ড উচ্যতে ॥ ষষ্টিদণ্ডাত্মকস্তস্য বাসরশ্চ প্রকীর্ত্তিতঃ। মাসস্ত্রিংশদ্দিবারাত্রৈর্ব্বর্ষং দ্বাদশমাসকৈঃ ॥ এবং গতে শতাব্দে চ শ্রীকৃষ্ণে প্রকৃতের্লয়ঃ। প্রকৃত্যাঞ্চ প্রলীনায়াং তদৈবং প্রাকৃতো লয়ঃ ॥ সর্ব্বাঃ সংহৃত্য সা চৈকা মহাবিষ্ণোঃ প্রসূশ্চ যা। কৃষ্ণবক্ষসি লীনা চ মূলপ্রকৃতিরীশ্বরী ॥ শাক্তা বদন্তি তাং দুর্গাং বিষ্ণুমায়াং সনাতনীং। সর্ব্বশক্তিস্বরূপাঞ্চ পরাং নারায়ণীং সতীং ॥ বুদ্ধ্যধিষ্ঠাতৃদেবীঞ্চ কৃষ্ণস্য ত্রিগুণাত্মিকাং। যন্মায়য়া মোহিতাশ্চ ব্রহ্মবিষ্ণুশিবাদয়ঃ ॥ বৈষ্ণবাস্তাং মহালক্ষ্মীং পরাং রাধাং বদন্তি তে। যদর্দ্ধাঙ্গা মহালক্ষ্মীঃ প্রিয়া নারায়ণস্য চ ॥ প্রাণাধিষ্ঠাতৃদেবীঞ্চ প্রেম্না প্রাণাধিকাং বরাং। শশ্বৎ প্রেমময়ীং শক্তিং নির্গুণাং নির্গুণস্য চ ॥ নারায়ণস্য শম্ভুশ্চ সংহৃত্য স্বগণান্ বহূন্। শুদ্ধসত্ত্বস্বরূপী চ কৃষ্ণে লীনশ্চ নির্গুণে ॥ গোপা গোপ্যশ্চ গাবশ্চ সুরভ্যশ্চ নরাধিপ। সর্ব্বে লীনাঃ প্রকৃত্যাঞ্চ প্রকৃতিঃ প্রকৃতীশ্বরে ॥ মহাবিষ্ণৌ বিলীনাশ্চ সর্ব্বে তে ক্ষুদ্রবিষ্ণবঃ। মহাবিষ্ণুঃ প্রকৃত্যাঞ্চ সা চৈবং পরমাত্মনি ॥ প্রকৃতির্যোগনিদ্রা চ শ্রীকৃষ্ণনেত্রপদ্মযোঃ। অধিষ্ঠানং

চকারৈবং মায়য়া চেশ্বরেচ্ছয়া ॥ প্রকৃতে-র্ব্বাসরং যাবন্মিতং কালং প্রকীর্ত্তিতং। তাবদ্বৃন্দাবনে নিদ্রা কৃষ্ণস্য পরমাত্মনঃ॥ অমূল্যরত্নতল্পে চ বহ্নিশুদ্ধাংশুকার্চ্চিতে। গন্ধচন্দনমাল্যাঢ্যে বায়ুনা সুরভীকৃতে॥ পুনঃ প্রজাগরে তস্য সর্ব্বসৃষ্টির্ভবেৎ পুনঃ। এবং সর্ব্বে প্রাকৃতিকাঃ শ্রীকৃষ্ণং নির্গুণং বিনা॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ৫১ অধ্যায়ঃ ॥ * ॥ অপি চ। প্রকৃতৌ সংস্থিতো যস্মাৎ সর্ব্বস্তন্মাত্রসঞ্চয়ঃ। অহঙ্কারমহত্তত্ত্বগতো যৎ প্রাকৃতো লয়ঃ॥ প্রকৃতৌ সংস্থিতো ব্যক্তমতীতপ্রলয়স্তু যৎ। তস্মাৎ প্রাকৃতসংজ্ঞোঽয়মুচ্যতে প্রতিসঞ্চরঃ॥ অয়ং যঃ কথিতো বিপ্রাঃ প্রাকৃতাখ্যো মহালয়ঃ। ইতি কালিকা-পুরাণে ২৪ অধ্যায়ঃ॥

প্রাকৃতমানুষঃ (পুং) সামান্যমনুষ্যঃ। যথা। একাদশচমূনাথং ভীম পাদেন মা স্পৃশ। পঞ্চানামপি যো ভর্ত্তা নাসৌ প্রাকৃত-মানুষঃ॥ ইতি মহাভারতে গদাপর্ব্ব॥

প্রাকৃতমিত্রং (ক্লী) স্বদেশব্যবহিতদেশাব-স্থিতরাজাদি। যথা। সখা গরীয়ান্ শত্রুশ্চ কৃত্রিমস্তৌ হি কার্য্যতঃ। স্যাতামমিত্রে মিত্রে চ সহজপ্রাকৃতাবপি॥ ইতি মাঘ-দ্বিতীয়সর্গঃ॥ অস্য টীকা। নন্বু ক্ষুদ্রোঽয়ং চৈদ্যঃ কিং করিষ্যতীত্যাশঙ্ক্য তস্য বল-বত্তাং বক্তুং মিত্রামিত্রবলাবলবিবেকং তাবৎ করোতি। সখেতি। ক্রিয়য়া উপ-কারাপকারান্যতররূপয়া নির্বৃত্তঃ কৃত্রিমঃ সখা সুহৃৎ গরীয়ান্ বলবান্ এবং শত্রুশ্চ কৃত্রিমো গরীয়ান্ কুতঃ হি যস্মাত্তৌ কৃত্রিম-মিত্রশত্রূ চ কার্য্যতঃ উপকারাপকাররূপ-কার্য্যবশাৎ নির্ব্বৃত্তাবিতি শেষঃ। উক্ত-কার্য্যোপাধের্যাবজ্জীবমনপায়াদনয়োর্মিত্রা-মিত্রভাবোঽপি অনপায়ীতি গরীয়স্ত্বমিতি ভাবঃ সহজপ্রাকৃতৌ তু নৈবমিত্যাহ। স্যাতামিতি। সহ জাতঃ সহজঃ একশরীরা-বয়বাৎ তত্র সহজং মিত্রং মাতৃষ্বসেয়-পিতৃষ্বসেয়াদিঃ সহজশত্রুস্তু পিতৃব্যতৎ-পুত্রাদিঃ প্রকৃত্যা সিদ্ধঃ প্রাকৃতঃ পূর্ব্বোক্ত-সহজকৃত্রিমলক্ষণরহিত ইত্যর্থঃ। তত্র বিষয়ান্তরঃ প্রাকৃতঃ শত্রুঃ তদনন্তরঃ প্রাকৃতং মিত্রং অপিস্ত্বর্থে তৌ সহজ-প্রাকৃতৌ শত্রুমিত্রে চ স্যাতাং ন ত্বাত্ম-কার্য্যবশাদনিয়মেনোভয়রূপতামাপদ্যেতে ন কৃত্রিমশত্রুমিত্রে কৃত্রিমশত্রুরেব মিত্রঞ্চ মিত্রমেবেতি কৃত্রিমাবেব মিত্রামিত্রৌ গরীয়াংসৌ ন তু সহজৌ নাপি প্রাকৃতা-বিত্যর্থঃ অনেন কৃত্রিমত্বং সর্ব্বাপবাদীতি সিদ্ধং। ইতি মল্লিনাথঃ॥

প্রাকৃতশত্রুঃ (পুং) একবিষয়াভিনিবেশি-রাজাদিঃ। যথা। বিষয়ান্তরঃ প্রাকৃতঃ শত্রুঃ। ইতি মাঘটীকায়াং মল্লিনাথঃ॥

প্রাকৃতিকঃ (ত্রি) প্রকৃতিবিকারঃ। প্রকৃতি-সম্বন্ধী। যথা। এবং সর্ব্বে প্রাকৃতিকাঃ শ্রীকৃষ্ণং নির্গুণং বিনা। ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ৫১ অধ্যায়ঃ॥

প্রাক্তনঃ (ত্রি) প্রাগ্‌ভবঃ। যথা। প্রপেদিরে প্রাক্তনজন্মবিদ্যাঃ॥ ইতি কুমারসম্ভবং॥ অন্যচ্চ। প্রাক্তনেন শুভং সর্ব্বং সুখঞ্চ

বিভবশ্চিরং। দুঃখং শোকঃ প্রাক্তনেন বিপৎ সম্পচ্চ সাম্প্রতং ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ৯৪ অধ্যায়ঃ ॥ অপি চ। বিধাত্রা লিখিতং কর্ম্ম প্রাক্তনং কেন বার্য্যতে। মা ভুক্তং ক্ষীয়তে কর্ম্ম কল্পকোটিশতৈরপি ॥ ইতি তত্রৈব ১২৯ অধ্যায়ঃ ॥

প্রাক্তনকর্ম্ম (ক্লী) ভাগ্যং। অদৃষ্টং। ইতি জটাধরঃ ॥ পুরাকৃতকার্য্যঞ্চ ॥

প্রাক্‌ফলঃ (পুং) পনসঃ। ইতি জটাধরঃ ॥

প্রাক্‌ফল্গুনী (স্ত্রী) পূর্ব্বফল্গুনী। যথা। প্রাক্‌ফল্গুন্যশ্চেজ্জন্মকালে চ যস্য। ইতি কোষ্ঠীপ্রদীপঃ ॥

প্রাক্‌ফল্গুনীভবঃ (পুং) বৃহস্পতিঃ। ইতি হারাবলী ॥ পূর্ব্বফল্গুন্যাং জাতে ত্রি ॥

প্রাক্‌ফাল্গুনঃ (পুং) বৃহস্পতিঃ। ইতি শব্দরত্নাবলী ॥

প্রাক্‌ফাল্গুনেয়ঃ (পুং) বৃহস্পতিঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

প্রাখর্য্যং (ক্লী) প্রখরত্বং। তীক্ষ্ণতা। প্রখরশব্দাৎ ভাবার্থে ষ্ণ্যপ্রত্যয়ঃ ॥

প্রাগভাবঃ (পুং) সংসর্গাভাববিশেষঃ। তস্য লক্ষণং। বিনাশ্যভাবত্বং। ইতি সিদ্ধান্তমুক্তাবলী ॥

প্রাগল্‌ভ্যং (ক্লী) প্রগল্‌ভতা। যথা। প্রাগল্‌ভ্যহীনস্য নরস্য বিদ্যা শস্ত্রং যথা কাপুরুষস্য হস্তে। ন তৃপ্তিমুৎপাদয়তে শরীরে বৃদ্ধস্য দারা ইব দর্শনীয়াঃ ॥ ইতি জ্যোতিস্তত্ত্বং ॥ স্ত্রীণামযত্নজভাববিশেষঃ। যথা। প্রাগল্‌ভ্যোদার্য্যমাধুর্য্যশোভাধীরত্বকান্তয়ঃ। দীপ্তিশ্চাযত্নজা ভাবহাবহেলাস্ত্রয়োঽঙ্গজাঃ ॥ ইতি হেমচন্দ্রঃ ॥

প্রাগুদীচী (স্ত্রী) পূর্ব্বোত্তরবিদিক্। ঈশানকোণঃ। যথা। ততোৎকীর্ণমৃত্তিকাঃ প্রাগুদীচ্যাং দিশি ক্ষিপেৎ। ইতি ভবদেবভট্টঃ ॥

প্রাগ্‌জ্যোতিষঃ (পুং) কামরূপদেশঃ। ইতি হেমচন্দ্রঃ ॥ স তু নরকরাজপুরং। যথা। শ্রীভগবানুবাচ। করতোয়া সত্যগঙ্গা পূর্ব্বভাগাবধিশ্রিতা। যাবল্ললিতকান্তাস্তি তাবদ্দেশং পুরং তদা ॥ তত্র দেবী মহামায়া যোগনিদ্রা জগৎপ্রসূঃ। কামাখ্যারূপমাদায় সদা তিষ্ঠতি শোভনা ॥ অত্রাস্তি নদরাজোঽয়ং লৌহিত্যো ব্রহ্মণঃ সুতঃ। অত্রৈব দশ দিক্‌পালাঃ স্বে স্বে পীঠে ব্যবস্থিতাঃ ॥ অত্র স্বয়ং মহাদেবো ব্রহ্মা বাহঞ্চ সর্ব্বদা। চন্দ্রঃ সূর্য্যশ্চ সততং বসতেঽত্রৈব পুত্রক ॥ সর্ব্বে ক্রীড়ার্থমায়াতা রহস্যদেশমুত্তমং। অত্র শ্রীঃ সর্ব্বতো ভদ্রা ভোগ্যমত্র সদা বহু ॥ অত্রৈব হি স্থিতো ব্রহ্মা প্রাঙ্নক্ষত্রং সসর্জ্জ হ। ততঃ প্রাগ্‌জ্যোতিষাখ্যেয়ং পুরী শক্রপুরীসমা ॥ অত্র ত্বং বস ভদ্রন্তে হ্যভিষিক্তো ময়া স্বয়ং। কৃতদারঃ সহামাত্যৈ রাজা ভূত্বা মহাবল ॥ ততো বিদর্ভরাজস্য পুত্রীং মায়াহ্বয়াং হরিঃ। পুত্রার্থে বরয়ামাস নরকস্য সমাং গুণৈঃ ॥ ইতি কালিকাপুরাণে ৩৭ অধ্যায়ঃ ॥

প্রাগ্‌ভারঃ (পুং) পর্ব্বতাগ্রভাগঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ কুত্রচিৎ প্রাগ্‌ভাব ইতি চ পাঠঃ ॥

প্রাগ্রহরঃ (ত্রি) শ্রেষ্ঠঃ। ইত্যমরঃ॥

প্রাগ্নাটং (ক্লী) অঘনদধি। ইতি ত্রিকাণ্ড-শেষঃ॥

প্রাগ্র্যং (ত্রি) শ্রেষ্ঠঃ। ইত্যমরঃ॥

প্রাগ্বংশঃ (পুং) হবিষাং হোতব্যানাং আধারো যদ্গৃহং ততঃ প্রাক্ পূর্ব্বদেশে যজমান-সদস্যাদিস্থিত্যর্থং গৃহং। ইত্যমরভরতৌ॥ পূর্ব্বকুলঞ্চ॥

প্রাঘাতঃ (পুং) যুদ্ধং। ইতি হেমচন্দ্রঃ॥

প্রাঘারঃ (পুং) ঘৃতাদিক্ষরণং। তৎপর্য্যায়ঃ। শ্চ্যোতঃ ২। ইত্যমরঃ॥

প্রাঘুণঃ (পুং) অতিথিঃ। ইতি ত্রিকাণ্ড-শেষঃ॥

প্রাঘুণিকঃ (পুং) অতিথিঃ। যথা। অমিতং মধু তৎকথা মম শ্রবণপ্রাঘুণিকীকৃতা জনৈঃ। মদনানলবোধনেঽভবৎ খগ ধায্যা ধিগধৈর্য্যধারিণঃ॥ ইতি নৈষধ-দ্বিতীয়সর্গঃ॥

প্রাঘূর্ণিকঃ (পুং) অতিথিঃ। ইতি হেমচন্দ্রঃ॥

প্রাঙ্ (ত্রি) পূর্ব্বদিক্। পূর্ব্বদেশঃ। পূর্ব্ব-কালঃ। ইতি মেদিনী॥

প্রাঙ্গঃ (পুং) পণববাদ্যং। ইতি শব্দরত্না-বলী॥

প্রাঙ্গণং (ক্লী) পণববাদ্যং। ইতি শব্দরত্না-বলী॥ গৃহভূমিঃ। আঙ্গিনা ইতি উঠান ইতি চ ভাষা। তৎপর্য্যায়ঃ। অজিরং ২ চত্বরং ৩ অঙ্গনং ৪। ইতি হেমচন্দ্রঃ॥ সূর্য্যবিদ্ধস্য তস্য দোষো যথা। অভদ্রদং সূর্য্যবেধং প্রাঙ্গণঞ্চ তথৈব চ। ইতি ব্রহ্ম-বৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ১০৩ অধ্যায়ঃ॥

প্রাড্বিবাকঃ (পুং) চতুর্ধোত্তরান্তর্গতোত্তর-বিশেষঃ। যত্রাভিযুক্ত এবং ক্রিয়াদস্মিন্নর্থে অনেনাহমভিযুক্তস্তু তত্র চাযং ব্যবহার-মার্গেণ পরাজিত ইতি। উক্তঞ্চ কাত্যা-য়নেন। আচারেণাবসন্নোঽপি পুনর্লেখ-য়তে যদি। সোঽভিধেয়ো জিতঃ পূর্ব্বং প্রাড্ন্যায়শ্চ স উচ্যতে॥ ইতি মিতাক্ষরা॥

প্রাচিকা (স্ত্রী) বনমক্ষিকা। ডাঁশ ইতি ভাষা। ইত্যমরভরতৌ॥

প্রাচী (স্ত্রী) পূর্ব্বা দিক্। ইত্যমরঃ॥ পূজক পূজ্যয়োরগ্রং। যথা। দেবাগ্রে স্বস্য চাপ্যগ্রে প্রাচী প্রোক্তা গুরুক্রমৈঃ। ইতি। যত্রৈব ভানুস্তু বিয়ত্যুদেতি প্রাচীতি তাং বেদবিদো বদন্তি। তথা পুরঃ পূজক-পূজ্যয়োশ্চ সদাগমজ্ঞাঃ প্রবদন্তি তন্ত্রে॥ ইতি তিথ্যাদিতত্ত্বং॥

প্রাচীনঃ (ত্রি) পূর্ব্বাদিগ্দেশকালভবঃ। তৎ-পর্য্যায়ঃ। প্রাক্ ২। প্রাচীরং। তৎ পর্য্যায়ঃ। আবেষ্টকঃ ২ বৃতিঃ ৩। ইতি হেমচন্দ্রঃ

প্রাচীনপনসঃ (পুং) বিল্বং। ইতি ত্রিকাণ্ড-শেষঃ॥

প্রাচীনবর্হিঃ [স্] (পুং) ইন্দ্রঃ। ইতি হেম-চন্দ্রঃ॥ রাজবিশেষঃ। যথা। হবির্দ্ধানাৎ ষড়াগ্নেয়ী পুত্ত্রানজনয়দ্ব্রতং। প্রাচীন-বর্হিষং শুক্রং জয়ং কৃষ্ণং প্রযাজিনং॥ প্রাচীনবর্হির্ভগবান্ মহানাসীৎ প্রজা-পতিঃ। হবির্দ্ধানাৎ দ্বিজশ্রেষ্ঠ যেন সং-বর্দ্ধিতাঃ প্রজাঃ॥ প্রাচীনাগ্রাঃ কুশাস্তস্য পৃথিব্যাং বিশ্রুতা মুনে। প্রাচীনবর্হি-

র্ভগবান্ খ্যাতো ভুবি মহাবলঃ॥ সমুদ্র-তনয়ায়াস্তু কৃতদারো মহীপতিঃ। মহত-স্তপসঃ পারে সুবর্ণায়াং মহীপতিঃ॥ সুষুবে দশ পুত্ত্রাংশ্চ শুষ্মিণাং বৈ প্রচে-তসঃ। দশবর্ষসহস্রাণি সমুদ্রসলিলে শয়াঃ॥ ইতি বহ্নিপুরাণে বরসর্গো নামা-ধ্যায়ঃ॥

প্রাচীনা (স্ত্রী) বনতিক্তিকা। আকনাদি ইতি ভাষা। ইত্যমরঃ॥ রাস্না। ইতি শব্দ-চন্দ্রিকা॥ প্রাগ্ভবা চ॥

প্রাচীনামলকং (ক্লী) পানীয়ামলকং। পানী আমলা ইতি ভাষা। তৎপর্য্যায়ঃ। বারি-বদরং ২। ইতি ত্রিকাণ্ডশেষঃ॥ অস্য গুণঃ। দোষত্রয়গরনাশিত্বং। ইতি ভাব-প্রকাশঃ॥

প্রাচীনাবীতং (ক্লী) শ্রাদ্ধাদৌ বামকরে বহি-ষ্কৃতে সতি দক্ষিণস্কন্ধার্পিতযজ্ঞসূত্রং। ইত্যমরভরতৌ॥ তথাহি। সব্যং বাহুং সমুদ্ধৃত্য দক্ষিণে তু ধৃতং দ্বিজাঃ। প্রাচীনা-বীতমিত্যুক্তং পিত্রে কর্ম্মণি যোজয়েৎ॥ ইতি কৌর্ম্মে উপবিভাগে ১০ অধ্যায়ঃ॥

প্রাচীনাবীতী [ন্] (পুং) প্রাচীনাবীত-বিশিষ্টঃ। যথা। সব্যং বাহুমুদ্ধৃত্য শিরো-ঽবধায় দক্ষিণেঽংশে প্রতিষ্ঠাপয়তি সব্যং কক্ষমবলম্বং ভবতি এবং প্রাচীনাবীতী ভবতীতি। ইতি গোভিলঃ॥ প্রতিষ্ঠা-পয়তি যজ্ঞোপবীতমিতি শেষঃ। ইত্যা-হ্নিকতত্ত্বং॥

প্রাচীপতিঃ (পুং) ইন্দ্রঃ। ইতি ত্রিকাণ্ডশেষঃ॥

প্রাচীরং (ক্লী) প্রান্ততোবৃতিঃ। পাঁচীল ইতি ভাষা। ইত্যমরঃ॥ দুর্গার্থং নগরাদেঃ প্রান্তভাগে বেণুকণ্টকবেত্রাদিময়ী বৃতি-র্বেষ্টনিকা। ইতি ভরতঃ॥ মৃণ্ময্যামপি বৃতৌ প্রাচীরমুপচারাদিতি স্বাম্যাদয়ঃ॥ তৎপর্য্যায়ঃ। বৃতিঃ ২। ইতি ভট্টঃ॥ প্রাচীনং ৩। ইতি মুকুটঃ॥ প্রাচীরং প্রাবরোঽপি ৪ স্যাৎ প্রাবৃতিঃ ৫ প্রান্ততো-বৃতিঃ ৬। ইষ্টকামৃত্তিকাদ্যৈশ্চ গৃহ-বাট্যাদিবেষ্টনে॥ ইতি শব্দরত্নাবলী॥*॥ অথ প্রাচীরনির্ণয়ঃ। গজৈরভেদ্যা মনুজৈ-রলঙ্ঘ্যাঃ প্রাচীরখণ্ডা নৃপতের্ভবন্তি॥ রাজদণ্ডোন্নতাঃ সর্ব্বে প্রাচীরাঃ পৃথিবী-ভুজঃ। বিংশতিস্তে তু পঞ্চাগ্রে পার্শ্বয়োঃ পঞ্চ পঞ্চ চ॥ পশ্চাৎ পঞ্চ চ বিজ্ঞেয়াঃ প্রাচীরাঃ পৃথিবীভুজঃ। সর্ব্বপ্রান্তে ত্বাব-রণো নাম প্রাচীর উচ্যতে॥ প্রতিপ্রাকার-সংস্থানং দ্বারং নাভিমুখস্থিতং।*। তত্র জয়াখ্যস্য দীর্ঘস্য বাস্তুখণ্ডস্য নির্ণয়ঃ। তদ্যথা। রাজচ্ছত্রান্তরে পঞ্চ রাজদ্বারে মহীপতেঃ। রাজদণ্ডত্রয়ে সার্দ্ধে জয়দ্বারে প্রতিষ্ঠিতাঃ॥ অদ্বারে রাজদণ্ডার্দ্ধে প্রাচীরাঃ পৃথিবীপতেঃ। এবং ব্যবস্থিতে স্থানে মধ্যমে তদ্ধি তিষ্ঠতি॥ রাজচ্ছত্র-দ্বয়ং সার্দ্ধমায়ামে জয়বাস্তুনি। পরিণাহে পঞ্চ রাজদণ্ডাস্তিষ্ঠন্তি মধ্যতঃ॥ রাজ-পট্টাভিধানেন স্থানমেতন্নিগদ্যতে। অস্মিন্ গৃহং নৃপঃ কৃত্বা সুচিরং সুখমশ্নুতে॥ অজ্ঞানাদন্ততো রাজা যোঽন্যত্র গৃহমার-ভেৎ। সোঽচিরান্মৃত্যুমাপ্নোতি রোগং শোকং ভয়ন্তথা॥ যমদণ্ডোদয়দণ্ডৌ

কোণাহৃতিরুপপ্লবঃ। যে চান্যে বাস্তু-দোষাঃ স্যুঃ স্থানে দোষাশ্চ যে পুনঃ॥ ন স্পৃশ্যন্তে রাজপট্টস্তৈঃ সর্পৈর্গরুড়ো যথা। দ্বিগুণাদিরতোঽপি স্যাৎ ক্রমাদ্ভঙ্গাদিবাস্তুষু॥ রাজচ্ছত্রমিতেঽপ্যেবং প্রাচীরে গুণদোষকৌ। ইতি যুক্তিকল্পতরুঃ॥

প্রাচেতসঃ (পুং) বাল্মীকিমুনিঃ। ইতি হেমচন্দ্রঃ॥

প্রাচেতসঃ (পুং) প্রাচীনবর্হীরাজপুত্ত্রাঃ। সান্তনিত্যবহুবচনান্তোঽয়ং। যথা। এবমুক্তাস্তু তে পুত্ত্রাস্ততঃ প্রাচেতসো দশ। পয়োধিসলিলে মগ্নাস্তপস্তেপে সুদারুণং॥ পতত্রিরাজমারূঢ়ং নীলোৎপলদলচ্ছবিং। দৃষ্ট্বা প্রাচেতসঃ সর্ব্বে শিরোভিরবনীগতাঃ॥ ইতি বহ্নিপুরাণং॥

প্রাচ্যঃ (পুং) শরাবত্যাঃ প্রাগ্দক্ষিণদেশঃ। ইত্যমরঃ॥ পূর্ব্বদেশীয়ে ত্রি॥

প্রাজকঃ (পুং) সারথিঃ। যথা। যত্রাপবর্ত্ততে যুগ্যং বৈগুণ্যাৎ প্রাজকস্য চ। তত্র স্বামী ভবেদ্দণ্ড্যো হিংসায়াং দ্বিশতং দমং॥ ইতি মনুবচনে যত্র সারথেরকৌশল্যাদ্যানমন্যথা গচ্ছতি তত্র হিংসায়াং অশিক্ষিতসারথিনিয়োগাৎ স্বামী দ্বিশতং দণ্ডং দণ্ড্যঃ স্যাদিতি কুল্লূকভট্টঃ। ইতি প্রায়শ্চিত্ততত্ত্বং॥

প্রাজনং (ক্লী) তোদনং। পাচনীবাড়ী ইতি ভাষা। ইত্যমরঃ॥

প্রাজাপত্যং (ক্লী) দ্বাদশাহসাধ্যব্রতবিশেষঃ। তত্র দিবসত্রয়ং রাত্রিমাত্রভোজনং ২২ গ্রাসাঃ। দিবসত্রয়ং দিবামাত্রভোজনং ২৬ গ্রাসাঃ। দিবসত্রয়ং অযাচিতভোজনং ২৪ গ্রাসাঃ। দিবসত্রয়ং উপবাসঃ। যথা। ত্র্যহং সায়ং ত্র্যহং প্রাতস্ত্র্যহমদ্যাদযাচিতং। ত্র্যহং পরন্তু নাশ্নীয়াৎ প্রাজাপত্যং চরন্ দ্বিজঃ॥ গ্রাসসংখ্যা পরাশরেণোক্তা। সায়ং দ্বাবিংশতির্গ্রাসাঃ প্রাতঃ ষড়্‌বিংশতিস্তথা। অযাচিতে চতুর্ব্বিংশঃ পরঞ্চানশনং স্মৃতং॥ ইতি প্রায়শ্চিত্ততত্ত্বং॥ *॥ তত্তু অগম্যাগমনাদিপ্রায়শ্চিত্তং। যথা। অগম্যাগমনং কৃত্বা মদ্যগোমাংসভক্ষণং। শুধ্যেচ্চান্দ্রায়ণাদ্বিপ্রঃ প্রাজাপত্যেন ভূমিপঃ। বৈশ্যঃ সান্তপনাচ্ছূদ্রঃ পঞ্চাহোভির্বিশুধ্যতি॥ প্রায়শ্চিত্তে কৃতে দদ্যাদ্গবাং ব্রাহ্মণভোজনং। ইতি গারুড়ে ২২৬ অধ্যায়ঃ॥ *॥ রোহিণীনক্ষত্রং। যথা। ঐন্দ্রে গুরুঃ শশী চৈব প্রাজাপত্যে রবিস্তথা। পূর্ণিমা গুরুবারেণ মহাজ্যৈষ্ঠী প্রকীর্ত্তিতা॥ ইতি প্রায়শ্চিত্ততত্ত্বং॥

প্রাজাপত্যঃ (পুং) প্রয়াগঃ। ইতি ত্রিকাণ্ডশেষঃ॥ জৈনরাজভেদঃ। তৎপর্য্যায়ঃ। ত্রিপৃষ্ঠঃ ২। ইতি হেমচন্দ্রঃ॥ কায়নামকবিবাহঃ। সহ ধর্ম্মং চরতাং ইতি নিয়মং কৃত্বা কন্যাদানং। যথা। ইত্যুক্ত্বা চরতাং ধর্ম্মং সহজা দীয়তেঽর্থিনে। স কায়ঃ পাবয়েত্তজ্জঃ ষট্ ষড়্‌বংশ্যান্ সহাত্মনা॥ ইতি মিতাক্ষরা॥ কায়ঃ কঃ প্রজাপতির্দ্দেবতা অস্যেতি প্রাজাপত্য ইত্যর্থঃ। ইত্যুদ্বাহতত্ত্বং॥

প্রাজাপত্যা (স্ত্রী) প্রব্রজ্যাশ্রমপূর্ব্বকর্ত্তব্য-প্রজাপতিদেবতাকসর্ব্বস্বদক্ষিণেষ্টিঃ। যথা। প্রাজাপত্যাং নিরূপ্যেষ্টিং সর্ব্ববেদসদক্ষিণাং। আত্মন্যগ্নীন্ সমারোপ্য ব্রাহ্মণঃ প্রব্রজেদ্‌গৃহাৎ॥ ইতি মানবে ৬ অধ্যায়ঃ॥

প্রাজিতা [ঋ] (পুং) সারথিঃ। ইত্যমরঃ॥ প্রকৃষ্টগন্তরি ত্রি॥

প্রাজ্ঞঃ (পুং) কল্কিদেবস্য জ্যেষ্ঠভ্রাতা। যথা। কল্কিং দ্রষ্টুং হরেরংশমাবির্ভূতঞ্চ শম্ভলে। কবিং প্রাজ্ঞং সুমন্তঞ্চ পুরস্কৃত্য মহাপ্রভং॥ ইতি কল্কিপুরাণে ২ অধ্যায়ঃ॥ পণ্ডিতঃ। ইত্যমরঃ॥ রাজশুকঃ। ইতি রাজনির্ঘণ্টঃ॥

প্রাজ্ঞঃ (ত্রি) পণ্ডিতঃ। দক্ষঃ। ইতি শব্দরত্নাবলী॥

প্রাজ্ঞমানী (ত্রি) পণ্ডিতাভিমানী। যথা। দুঃখিতায় শয়ানায় শ্রদ্দধানায় রোগিণে। যো ভেষজমবিজ্ঞায় প্রাজ্ঞমানী প্রযচ্ছতি॥ ইতি চরকঃ॥

প্রাজ্ঞা (স্ত্রী) বুদ্ধিমতী। তৎপর্য্যায়ঃ। ধীমতী ২। ইত্যমরঃ॥ বুদ্ধিঃ। যথা। প্রজ্ঞা প্রাজ্ঞা ধরা জ্ঞপ্তিঃ পণ্ডা সংবেদনং বিদা। ইতি রায়মুকুটধৃতশব্দার্ণবঃ॥

প্রাজ্ঞী (স্ত্রী) স্বয়ংজ্ঞাত্রী। তৎপর্য্যায়ঃ। প্রজ্ঞা ২। ইত্যমরঃ॥ পণ্ডিতপত্নী। ইতি প্রাজ্ঞশব্দটীকায়াং ভানুদীক্ষিতঃ॥

প্রাজ্যং (ত্রি) প্রচুরং। ইত্যমরঃ॥

প্রাঞ্জলঃ (ত্রি) সরলঃ। যথা। ঋজাবজিহ্মপ্রগুণৌ প্রাঞ্জলঃ সরলোঽপি চ। ইতি জটাধরঃ॥

প্রাট্ [ছ্] (পুং) পৃচ্ছতি যঃ। প্রশ্নকর্ত্তা। ইতি মুগ্ধবোধব্যাকরণং॥

প্রাড়্‌বিবাকঃ (পুং) ব্যবহারদ্রষ্টা। জজ্ ইতি ইঙ্গরেজী ভাষা। তৎপর্য্যায়ঃ। অক্ষদর্শকঃ ২। ইত্যমরঃ॥ ব্যবহারদর্শী ৩। ইতি শব্দরত্নাবলী॥ দ্বে ব্যবহারাণাং ঋণাদানাদিবিবাদানাং দ্রষ্টরি নির্ণেতরি ধর্ম্মাধ্যক্ষে ইত্যর্থঃ। পৃচ্ছতি বাদিপ্রতিবাদিবাক্যং প্রাট্ দদৃক্‌জুহুবাক্ প্রাড়িতি নিপাতঃ। বিবিচ্য বক্তি বিবাকঃ কভাবেঽমী ইতি ঘঞ্ প্রাট্ চাসৌ বিবাকশ্চেতি প্রাড়্‌বিবাকঃ। বিবাদানুগতং পৃষ্ট্বা পূর্ব্ববাক্যং প্রযত্নতঃ। বিচারয়তি যেনাসৌ প্রাড়্‌বিবাকস্ততঃ স্মৃতঃ॥ ইতি স্মৃতিঃ। ইতি ভরতঃ॥ অপি চ। অর্থিপ্রত্যর্থিনৌ পৃচ্ছতীতি প্রাট্ তয়োর্ব্বচনং বিরুদ্ধাবিরুদ্ধঞ্চ সভ্যৈঃ সহ বিবিনক্তি বিবেচয়তি বেতি বিবাকঃ প্রাট্ চাসৌ বিবাকশ্চেতি প্রাড়্‌বিবাকঃ। উক্তঞ্চ। বিবাদানুগতম্‌পৃষ্ট্বা সসভ্যস্তৎ প্রযত্নতঃ। বিচারয়তি যেনাসৌ প্রাড়্‌বিবাকস্ততঃ স্মৃতঃ॥ ইতি মিতাক্ষরা॥

প্রাণঃ (পুং) ব্রহ্মা। ইতি ত্রিকাণ্ডশেষঃ॥ হৃন্মারুতঃ। বোলঃ। কাব্যজীবঃ। অনিলঃ। বলং। পূরিতে ত্রি। ইতি মেদিনী॥ সূক্ষ্মশরীরসমষ্ট্যুপহিতচৈতন্যং॥ প্রাগননবান্ নাসাগ্রস্থানবর্ত্তী বায়ুঃ। ইতি বেদান্তসারঃ॥ তস্য কর্ম্ম বহির্গমনং। ইতি শ্রীধরস্বামী॥ তস্য রূপং স্থানানি চ যথা। ইন্দ্রনীলপ্রতীকাশং প্রাণরূপং প্রকীর্ত্তিতং। আস্যনাসিকয়োর্ম্মধ্যে হৃন্মধ্যে নাভি-

মধ্যগে ॥ প্রাণালয় ইতি প্রাহুঃ পাদাঙ্গুষ্ঠেঽপি কেচন। ইতি যোগার্ণবঃ ॥ পঞ্চপ্রাণবিবরণং বহুবচনান্তপ্রাণশব্দে দ্রষ্টব্যং॥ ধাতুঃ পুত্রঃ। যথা। আয়তির্নিয়তিশ্চৈব মেরোঃ কন্যে মহাত্মনঃ। ভার্য্যে ধাতৃবিধাত্রোস্তে তয়োর্জাতৌ সুতাবুভৌ ॥ প্রাণশ্চৈব মৃকণ্ডুশ্চ পিতা মম মহাযশাঃ। ইতি মার্কণ্ডেয়ে রুদ্রসর্গাধ্যায়ঃ ॥

প্রাণকঃ (পুং) সত্ত্বজাতীয়ঃ। প্রাণিমাত্রং। জীবকদ্রুমঃ। চোলঃ। ইতি মেদিনী ॥

প্রাণথঃ (পুং) বায়ুঃ। বলবান্। ইত্যুণাদিকোষঃ ॥ প্রজাপতিঃ। তীর্থং। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ ॥

প্রাণদং (ক্লী) জলং। রক্তং। ইতি হেমচন্দ্রঃ ॥

প্রাণদঃ (পুং) জীবকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

প্রাণদা (স্ত্রী) ঋদ্ধিবৃক্ষঃ। হরীতকী। ইতি রাজনির্ঘণ্টঃ ॥

প্রাণনং (ক্লী) জীবনং। ইতি জটাধরঃ ॥ গলে পুং। ইতি শব্দচন্দ্রিকা ॥

প্রাণনাথঃ (পুং) পতিঃ। ইতি শব্দরত্নাবলী ॥

প্রাণন্তঃ (পুং) বায়ুঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥ রসাঞ্জনং। ইত্যুণাদিকোষঃ ॥

প্রাণন্তী (স্ত্রী) ক্ষুৎ। হিক্কা। ইত্যুণাদিকোষঃ ॥

প্রাণপ্রদা (স্ত্রী) ঋদ্ধিনামকৌষধং। ইতি রত্নমালা ॥

প্রাণভাস্বান্ [ৎ] (পুং) সমুদ্রঃ। ইতি শব্দরত্নাবলী ॥

প্রাণময়কোষঃ (পুং) কর্ম্মেন্দ্রিয়সহিতপ্রাণাদিপঞ্চকং। ইতি বেদান্তসারঃ ॥

প্রাণসংযমঃ (পুং) প্রাণায়ামঃ। যথা। তদশক্তৌ তচ্চতুর্থমেবং প্রাণস্য সংযমঃ। ইতি তন্ত্রসারঃ ॥

প্রাণসদ্ম [ন্] (ক্লী) শরীরং। ইতি কেচিৎ ॥

প্রাণসমা (স্ত্রী) পত্নী। ইতি হেমচন্দ্রঃ ॥

প্রাণহারকং (ক্লী) বৎসনাভঃ। ইতি রাজনির্ঘণ্টঃ ॥ অসুনাশকে ত্রি ॥

প্রাণাঃ (পুং) অসবঃ। ইত্যমরঃ ॥ দ্বে অঙ্গসন্নিহিতেষু পঞ্চবায়ুষু। অস্যন্তে অসবঃ নাম্নীতি উঃ। প্রাণিতি এভিঃ প্রাণাঃ ঘঞ্। এবমিতি অসুবৎ প্রাণা অপি পুং বহুত্বে ইত্যর্থঃ। অসুপ্রাণশব্দাভ্যাং বহুবচনান্তাভ্যাং পঞ্চপ্রাণাদয় উচ্যন্তে ন পুনরেকৈকাভিধানে বহুবচনং অতএব প্রাণোঽপান ইত্যুক্তং হৃদি প্রাণো গুদেঽপান ইত্যাদি চ দৃশ্যতে। ইতি তট্টীকায়াং ভরতঃ ॥ * ॥ শরীরস্থপঞ্চপ্রাণা যথা। প্রাণোঽপানঃ সমানশ্চোদানব্যানৌ চ বায়বঃ। শরীরস্থা ইমে ইত্যমরঃ ॥ ইমে প্রাণাদয়ঃ পঞ্চবায়বঃ শরীরে তিষ্ঠন্তি তে চ নিয়তস্থানস্থাঃ। যদাহুঃ। হৃদি প্রাণো গুদেঽপানঃ সমানো নাভিসংস্থিতঃ। উদানঃ কণ্ঠদেশে চ ব্যানঃ সর্ব্বশরীরগ ইতি ॥ * ॥ এবং তদ্ব্যাপারাশ্চ যথা। অন্নপ্রবেশনং মূত্রাদ্যুৎসর্গোঽন্নবিপাচনং। ভাষণাদি নিমেষাদি তদ্ব্যাপারাঃ ক্রমাদমী ॥ ইতি চ ভরতঃ ॥ * ॥ প্রাণকরাণি যথা। সদ্যোমাংসং নবান্নঞ্চ বালা স্ত্রী ক্ষীর-

ভোজনং। ঘৃতমুষ্ণোদকঞ্চৈব সদ্যঃপ্রাণকরাণি ষট্॥ * ॥ প্রাণহরাণি যথা। শুষ্কং মাংসং স্ত্রিয়ো বৃদ্ধা বালার্কস্তরুণং দধি। প্রভাতে মৈথুনং নিদ্রা সদ্যঃপ্রাণহরাণি ষট্॥ ইতি চাণক্যকর্ম্মলোচনে ॥ * ॥ প্রাণবিয়োগকালকর্ত্তব্যং যথা। কণ্ঠস্থানং গতে জীবে ভীতিবিভ্রান্তমানসঃ। জ্ঞাত্বা চ বিহ্বলং তত্র শীঘ্রং নিঃসারয়েদ্‌গৃহাৎ॥ কুশাস্তরণশায়ী চ দিশঃ সর্ব্বা ন পশ্যতি। লব্ধস্মৃতির্মুহূর্ত্তাত্তু যাবজ্জীবো ন নশ্যতি॥ বাচয়েৎ স্নেহভাবেন ভূমে দেবা দ্বিজাতয়ঃ। সুবর্ণঞ্চ হিরণ্যঞ্চ যথোৎপন্নেন মাধবি॥ পরলোকহিতার্থায় গোপ্রদানং বিশিষ্যতে। সর্ব্বদেবময়া গাব ঈশ্বরেণাবতারিতাঃ॥ অমৃতং ক্ষরয়ন্ত্যশ্চ প্রচরন্তি মহীতলে। এতাসাঞ্চৈব দানেন শীঘ্রং মুচ্যেত কিল্বিষাৎ॥ পশ্চাৎ শ্রুতিপথং দিব্যমুৎকর্ণেন চ শ্রাবয়েৎ। যাবৎ প্রাণান্ প্রমুচ্যেত কৃত্বা কর্ম্ম সুদুষ্করং॥ দৃষ্ট্বা সুবিহ্বলং হ্যেনং মম মার্গানুসারিণং। প্রয়াণকালে তু নরো মন্ত্রেণ বিধিপূর্ব্বকং॥ মন্ত্রেণানেন কর্ত্তব্যং সর্ব্বসংসারমোক্ষণং। মধুপর্কং ত্বরন্ গৃহ্য ইমং মন্ত্রমুদাহরেৎ॥ মন্ত্রঃ। গৃহাণ চেমং মধুপর্কমাদ্যং সংসারনাশনকরং ত্বমৃতেন তুল্যং। নারায়ণেন রচিতং ভগবৎপ্রিয়াণাং দাহে চ শান্তিকরণং সুরলোকপূজ্যং॥ তত এতেন মন্ত্রেণ দদ্যাদ্বৈ মধুপর্ককং। পুরুষো মৃত্যুকালে তু পরলোকসুখাবহং॥ এবং বিনিঃসৃতাৎ প্রাণাৎ সংসারঞ্চ ন গচ্ছতি। নষ্টসংজ্ঞং সমুদ্দিশ্য জ্ঞাত্বা মৃত্যুবশং গতং॥ মহাবনস্পতিং গত্বা গন্ধাংশ্চ বিবিধানপি। ঘৃততৈলসমাযুক্তং কৃত্বা বৈ দেহশোধনং॥ তেজোব্যয়করং বাস্য তৎ সর্ব্বং পরিকল্প্য চ। দক্ষিণায়াং শিরঃ কৃত্বা সলিলে তং নিধায় চ। তীর্থাদ্যাবাহনং কৃত্বা স্নাপনং তস্য কারয়েৎ॥ গয়াদীনি চ তীর্থানি যে চ পুণ্যাঃ শিলোচ্চয়াঃ। কুরুক্ষেত্রঞ্চ গঙ্গা চ যমুনা চ সরিদ্বরা॥ কৌশিকী চ পয়োষ্ণী চ সর্ব্বপাপপ্রণাশিনী। গণ্ডকী ভদ্রনামা চ সরযূর্বলদা তথা॥ বনানি নববারাহং তীর্থং পিণ্ডারকং তথা। পৃথিব্যাং যানি তীর্থানি চত্বারঃ সাগরাস্তথা। সর্ব্বাণি মনসা ধ্যাত্বা স্নানমেবন্তু কারয়েৎ॥ প্রাণান্তগতন্তু তং জ্ঞাত্বা চিতাং কৃত্বা বিধানতঃ। তস্যা উপরি তং স্থাপ্য দক্ষিণাগ্রং শিরস্তথা॥ দেবানগ্নিমুখান্ ধ্যাত্বা গৃহ্য হস্তে হুতাশনং। প্রজ্বাল্য বিধিবত্তত্র মন্ত্রমেতদুদাহরেৎ॥ মন্ত্রঃ। কৃত্বা তু দুষ্করং কর্ম্ম জানতা বাপ্যজানতা। মৃত্যুকালবশং প্রাপ্য নরঃ পঞ্চত্বমাগতঃ॥ ধর্ম্মাধর্ম্মসমাযুক্তো লোভমোহসমাবৃতঃ। দহেয়ং তস্য গাত্রাণি দৈবলোকায় গচ্ছতু॥ এবমুক্ত্বা ততঃ শীঘ্রং কৃত্বা চৈব প্রদক্ষিণং। জ্বলমানং তদা বহ্নিং শিরঃস্থানে প্রদাপয়েৎ॥ চাতুর্ব্বর্ণ্যেষু সংস্কারমেবন্তবতি পুত্রক। গাত্রাণি বাসসী চৈব প্রক্ষাল্য বিনিবর্ত্তয়েৎ॥ মৃতনাম তথোদ্দিশ্য দদ্যাৎ পিণ্ডং মহীতলে। তদাপ্রভৃতি চাশৌচং দৈবকর্ম্ম ন

কারয়েৎ ॥ ইতি বরাহপুরাণে শ্রাদ্ধোৎপত্তিনামাধ্যায়ঃ ॥

প্রাণা (স্ত্রী) পক্ষিণীবিশেষঃ। সা চারুণগারুড়য়োঃ শ্বশ্রূঃ। যথা। পুলহস্যাত্মজঃ সর্গঃ প্রাণায়াস্তু নিবোধত। কন্যাঃ ষড়িতি বিখ্যাতাঃ প্রাণায়া বৈ বিজজ্ঞিরে ॥ শ্যেনী ভাসী তথা ক্রৌঞ্চী ধৃতরাষ্ট্রী শুনী শুকী। অরুণস্য ভার্য্যা শ্যেনী বীর্য্যবন্তৌ মহাবলৌ ॥ সম্পাতিশ্চ জটায়ুশ্চ প্রসূতৌ পক্ষিসত্তমৌ। সম্পাতির্জনয়ন্ গৃধ্রান্ কাকাঃ পুত্রা জটায়ুষঃ ॥ ভার্য্যা গরুত্মতশ্চাপি ভাসী ক্রৌঞ্চী শুনী শুকী। ইত্যগ্নিপুরাণং ॥

প্রাণাধিনাথঃ (পুং) পতিঃ। ইতি হলায়ুধঃ ॥

প্রাণাপানৌ (পুং) অশ্বিনীকুমারৌ। যথা। প্রাণাপানৌ কথং দেবাবশ্বিনৌ সংবভূবতুঃ। ইতি প্রজাপালপ্রশ্নে। মহাতপা উবাচ। তস্যাং ত্বাষ্ট্র্যামশ্বরূপ্যাং মার্ত্তণ্ডস্তীব্রতেজসা। বীজং নির্ব্বাপয়ামাস তজ্জলং তদ্দ্বিধাপতৎ ॥ তত্র প্রাণস্ত্বপানশ্চ যোনৌ চাত্মজিতৌ পুরা। বরদানেন চ পুনর্মূর্ত্তিমন্তৌ বভূবতুঃ ॥ তৌ ত্বাষ্ট্র্যামশ্বরূপিণ্যাং জাতৌ যেন নরোত্তমৌ। ততস্তাবশ্বিনৌ দেবৌ কীর্ত্তেতে রবিনন্দনৌ ॥ ইতি বারাহে অশ্বিনোৎপত্তিনামাধ্যায়ঃ ॥

প্রাণায়ামঃ (পুং) যোগাঙ্গবিশেষঃ। তত্রাঙ্গুলিনিয়মো জ্ঞানার্ণবে। কনিষ্ঠানামিকাঙ্গুষ্ঠৈর্যন্নাসাপুটধারণং। প্রাণায়ামঃ স বিজ্ঞেয়স্তর্জনীমধ্যমে বিনা ॥ স দ্বিবিধঃ। সগর্ব্ভো নির্গর্ব্ভশ্চ। তথা চ। সগর্ব্ভো মন্ত্রজাপেন নির্গর্ব্ভো মাত্রয়া ভবেদিতি। মাত্রা চ। বামজানুনি তদ্ধস্তভ্রামণং যাবতা ভবেৎ। কালেন মাত্রা সা জ্ঞেয়া মুনিভির্ব্বেদপারগৈঃ ॥ অথ প্রাণায়ামঃ। মূলমন্ত্রস্য বীজস্য প্রণবস্য বা ষোড়শবারজপেন বামনাসাপুটে বায়ুং পূরয়েৎ। তস্য চতুঃষষ্টিবারজপেন বায়ুং কুম্ভয়েৎ। তস্য দ্বাত্রিংশদ্বারজপেন বায়ুং রেচয়েৎ। পুনর্দ্দক্ষিণেনাপূর্য্য উভাভ্যাং কুম্ভয়িত্বা বামেন রেচয়েৎ। পুনর্বামেনাপূর্য্য উভাভ্যাং কুম্ভয়িত্বা দক্ষিণেন রেচয়েৎ। তথা চ কালীহৃদয়ে। প্রাণায়ামত্রয়ং কুর্য্যান্মূলেন প্রণবেন বা। অথবা মন্ত্রবীজেন যথোক্তবিধিনা সুধীরিতি ॥ সারসমুচ্চয়েঽপি। বিপরীতমতো বিদধীত বুধঃ পুনরেব তু তদ্বিপরীতকমিতি ॥ যৌগিকে পুনর্মাত্রানিয়মঃ। তথা চ গৌতমীয়ে। মন্ত্রঃ প্রাণায়ামঃ প্রোক্তো যৌগিকং কথয়ামি তে। পূরয়েদ্বাময়া বিদ্বান্ মাত্রাষোড়শসংখ্যয়েতি ॥ যদ্বা চতুঃষোড়শাষ্টবারজপেন পূরকাদিকং কুর্য্যাৎ। অথবা একচতুর্দ্বিবারেণ। তথা চ তন্ত্রান্তরে। পূরয়েৎ ষোড়শভির্ব্বায়ুং ধারয়েত্তচ্চতুর্গুণৈঃ। রেচয়েৎ কুম্ভকার্দ্ধেন অশক্ত্যা তত্তুরীয়কৈঃ ॥ তদশক্তৌ তচ্চতুর্থমেব প্রাণস্য সংযমঃ। অস্য নিত্যত্বমাহ তত্রৈব। প্রাণায়ামং বিনা মন্ত্রপূজনে নহি যোগ্যতা ॥ * ॥ গোপালে তু বিশেষো যথা। কামবীজস্যৈকবারজপেন দক্ষিণ-

নাসয়া বায়ুং রেচয়েৎ। পুনঃ সপ্তবার-জপেন বামনাসয়া বায়ুং পূরয়েৎ। নাসা-পুটৌ ধৃত্বা বিংশতিবারজপেন বায়ুং কুম্ভ-য়েৎ। পুনর্ব্বামেন রেচয়েৎ। দক্ষিণেন পূরয়েৎ। উভাভ্যাং কুম্ভয়েৎ। পুনর্দ্দক্ষি-ণেন রেচয়েৎ। বামেনাপূর্য্য উভাভ্যাং কুম্ভয়েৎ। তথা চ। একেন রেচয়েৎ কাম-বীজেনৈব পৃথক্ পৃথক্। পূরয়েৎ সপ্ত-জপ্তেন বিংশত্যা তেন ধারয়েৎ ॥ সর্ব্বেষু কৃষ্ণমন্ত্রেষু বীজেনানেন রেচয়েৎ। যদ্বা মূলমন্ত্রেণৈব প্রাণায়ামঃ। তথা চ। পবন-সংযমনন্ত্বমুনা চরেৎ যমিহ জপ্তুমসৌ মনু-মিচ্ছতি। যদি দশাক্ষরং জপতি তদা দশাক্ষরেণ চেত্তত্র চাষ্টাবিংশতিবারং রেচ-য়েৎ। পূরয়েদ্বাময়া তদ্বদ্ধারয়েত্তৎপ্রমা-ণতঃ। প্রাণায়ামো ভবেদেকো রেচপূরক-কুম্ভকৈঃ॥ অষ্টাদশাক্ষরেণ চেৎ দ্বাদশৈবং সমাচরেৎ। অন্যমনুভির্ব্বর্ণানুরূপমিত্যুক্ত-ত্বাৎ। তত্তন্মন্ত্রবর্ণসংখ্যাকৈ রেচকাদি-ত্রয়ং কুর্য্যাৎ। ক্রমদীপিকায়াং। রেচয়েন্-মারুতং দক্ষয়া দক্ষিণঃ। পূরয়েদ্বাময়া মধ্যনাড্যা পুনর্ধারয়েদিত্যাদি। এতত্তু শ্রীকৃষ্ণমন্ত্রবিষয়ং নান্যত্র। ইতি তন্ত্র-সারঃ॥ * ॥ অপি চ। আসনং পদ্মকা-দ্যুক্তং প্রাণায়ামো মরুজ্জয়ঃ। মন্ত্রধ্যান-যুতো গর্ভো বিপরীতো হ্যগর্ভকঃ॥ অ-গর্ভাত্তু সগর্ভস্থঃ প্রাণায়ামস্ততোঽধিকঃ। এবং দ্বিধা ত্রিধাপ্যুক্তঃ পূরণাৎ পূরকঃ স চ॥ কুম্ভকো নিশ্চলত্বাৎ স রেচনা-দ্রেচকস্ত্রিধা। লঘুর্দ্বাদশমাত্রঃ স্যাচ্চতু-র্ব্বিংশতিকঃ পরঃ॥ ষট্‌ত্রিংশন্মাত্রিকঃ শ্রেষ্ঠঃ প্রত্যাহারশ্চ রোধনং। ইতি গারুড়ে ৪৯ অধ্যায়ঃ ॥*॥ তস্য ফলং যথা। প্রথমে জনয়েৎ স্বপ্নং মধ্যমেন চ বেপথুং। বিপাকং হি তৃতীয়েন জয়েদ্দোষাননু-ক্রমাৎ॥ ইতি তত্রৈব ২৩০ অধ্যায়ঃ ॥*॥ অন্যচ্চ; যথা পর্ব্বতধাতূনাং ধ্মাতানাং দহ্যতে মলং। তথেন্দ্রিয়কৃতা দোষা দহ্যন্তে প্রাণনিগ্রহাৎ॥ প্রথমং সাধনং কুর্য্যাৎ প্রাণায়ামস্য যোগবিৎ। প্রাণাপাননিরো-ধস্তু প্রাণায়াম উদাহৃতঃ॥ লঘুমধ্যোত্তরী-য়াখ্যঃ প্রাণায়ামস্ত্রিধোদিতঃ। তস্য প্রমাণং বক্ষ্যামি তদলক শৃণুষ্ব মে॥ লঘুর্দ্বাদশ-মাত্রস্তু দ্বিগুণঃ স তু মধ্যমঃ। ত্রিগুণাভি-শ্চ মাত্রাভিরুত্তরীয় উদাহৃতঃ॥ নিমে-ষোন্মেষণে মাত্রা তালো লঘ্বক্ষরো মতঃ। প্রাণায়ামস্য সংখ্যার্থং স্মৃতো দ্বাদশ-মাত্রকঃ॥ প্রথমে জনয়েৎ স্বেদং মধ্য-মেন তু বেপথুং। বিষাদং হি তৃতীয়েন জয়েদ্দোষাননুক্রমাৎ॥ মৃদুত্বং সেব্য-মানাস্তু সিংহশার্দ্দূলকুঞ্জরাঃ। যথা যান্তি তথা প্রাণো বশ্যো ভবতি যোগিনঃ॥ বশ্যং মত্তং যথেচ্ছাতো নাগং নয়তি হস্তিপঃ। তথৈব যোগী ছন্দেন প্রাণং নয়তি সাধিতং॥ যথা হি সাধিতঃ সিংহো মৃগান্ হন্তি ন মানুষান্। তদ্বন্নিষিদ্ধঃ পবনঃ কিল্বিষং ন নৃণাং তনুং॥ তস্মাদ্-যুক্তঃ সদা যোগী প্রাণায়ামপরো ভবেৎ। শ্রূয়তাং মুক্তিফলদং তস্যাবস্থাচতু-ষ্টয়ং॥ ধ্বস্তিঃ প্রাপ্তিস্তথা সম্বিৎ প্রসাদশ্চ

মহীপতে। স্বরূপং শৃণু চৈতেষাং কথ্যমানমনুক্রমাৎ॥ কর্ম্মণামিষ্টদুষ্টানাং জায়তে ফলসংক্ষয়ঃ। চেতসো বিকষায়ত্বং যত্র সা ধ্বস্তিরুচ্যতে॥ ইষ্টদুষ্টানাং পুণ্যপাপানাং। ঐহিকামুষ্মিকান্ কামান্ লোভমোহাত্মকাংশ্চ যান্। নিরুধ্যাস্তে সদা যোগী প্রাপ্তিঃ সা সার্ব্বকামিকী॥ অতীতানাগতানর্থান্ বিপ্রকৃষ্টতিরোহিতান্। বিজানন্তীন্দুসূর্য্যর্ক্ষগ্রহাণাং জ্ঞানসম্পদা॥ তুল্যপ্রভাবস্তু যদা যোগী প্রাপ্নোতি সম্বিদং। তদা সম্বিদিতি খ্যাতা প্রাণায়ামস্য সা স্থিতিঃ॥ যান্তি প্রসাদং যেনাস্য মনঃ পঞ্চ চ বায়বঃ। ইন্দ্রিয়াণীন্দ্রিয়ার্থাশ্চ স প্রসাদ ইতি স্মৃতঃ॥ শৃণুষ্ব চ মহীপাল প্রাণায়ামস্য লক্ষণং। যুঞ্জতশ্চ যথাযোগং যাদৃখিহিতমানসং॥ ইতি মার্কণ্ডেয়পুরাণে যোগিচিকিৎসানামাধ্যায়ঃ॥ *॥ অন্যচ্চ। প্রাণাখ্যমনিলং বশ্যমভ্যাসাৎ কুরুতে তু যৎ। প্রাণায়ামঃ স বিজ্ঞেয়ঃ সবীজোঽবীজ এব চ॥ পরস্পরেণাভিভবং প্রাণাপানৌ যদানিলৌ। কুরুতঃ সদ্বিধানেন তৃতীয়ঃ সংযমাৎ তয়োঃ॥ তস্য চালম্বনবতঃ স্থূলরূপং দ্বিজোত্তম। আলম্বনমনন্তস্য যোগিনোঽভ্যসতঃ স্মৃতং॥ এতেষাং টীকা। প্রাণায়ামমাহ প্রাণাখ্যমিতি। সবীজঃ সালম্বনো ভগবন্মূর্ত্তিধ্যানমন্ত্রজপসহিতঃ। দ্বিবিধস্যাপি তস্য পুনস্ত্রৈবিধ্যমাহ পরস্পরেণেতি। উচ্ছ্বাসেন মুখনাসিকাভ্যাং বহির্নির্গচ্ছতি বায়ুঃ স প্রাণঃ। নিশ্বাসেনান্তঃ প্রবিশতি যঃ সোঽপানঃ। তত্র প্রাণবৃত্ত্যাপানবৃত্তেরভিভবো নিরোধো রেচকাখ্যঃ প্রাণায়ামঃ। এবমপানবৃত্ত্যা প্রাণবৃত্তেরভিভবঃ পূরকাখ্যঃ। এবমনেন পরস্পরাভিভবপ্রকারদ্বয়েন স প্রাণায়ামো দ্বিধা। তয়োর্যুগপৎসংযমাৎ কুম্ভকাখ্যস্তৃতীয়ঃ প্রাণায়ামঃ। যদ্বা। সদ্বিধানেনেত্যেকমেব পদং। তত্র চায়মর্থঃ। সদ্বিধানেন সদ্গুরূপদিষ্টমার্গেণ রেচকপূরকাভ্যাং যৎ পরস্পরাভিভূতং দ্বয়ং যশ্চ কুম্ভকেনোভয়োঃ সহাভিভবঃ। এবমভিভবত্রয়েণৈব প্রাণায়াম ইতি। সবীজস্যালম্বনমাহ। তস্য চেতি। স্থূলং বক্ষ্যমাণং হিরণ্যগর্ভাদিরূপং। ইতি বিষ্ণুপুরাণে ৬ অংশে ৭ অধ্যায়ঃ॥ *॥ গায়ত্রীপ্রাণায়ামো যথা। সব্যাহৃতিং সপ্রণবাং গায়ত্রীং শিরসা সহ। ত্রিঃ পঠেদায়তপ্রাণঃ প্রাণায়ামঃ স উচ্যতে॥ প্রাণায়ামত্রয়ং কৃত্বা প্রাণায়ামৈস্ত্রিভিস্ত্রিভিঃ। অহোরাত্রকৃতাৎ পাপামুচ্যতে নাত্র সংশয়ঃ॥ সর্ব্বপাপহরং প্রোক্তং প্রাণায়ামং দ্বিজন্মনাং। ততস্ত্বভ্যধিকং নাস্তি তপঃ পরমপাবনং॥ প্রাণসংধারণং মাসং কুশাগ্রচ্যুতবিন্দুনা। যঃ কুর্য্যাৎ প্রযতো নিত্যং প্রাণায়ামস্তু তৎসমঃ॥ নিরোধাজ্জায়তে বায়ুস্তস্মাদগ্নিস্ততো জলং। ত্রিভিঃ শরীরং সকলং প্রাণায়ামেন শুদ্ধ্যতি॥ আকেশাদানখাগ্রাচ্চ তপস্তপ্যেৎ সুদারুণং। আত্মানং শোধয়েদযস্তু প্রাণায়ামৈঃ পুনঃ পুনঃ॥ শ্রাবণ্যাং পৌর্ণমাস্যাঞ্চ সোপবাসো

জিতেন্দ্রিয়ঃ। প্রাণায়ামশতং কৃত্বা মুচ্যতে সর্ব্বকিল্বিষৈঃ॥ ইত্যগ্নিপুরাণং॥

প্রাণিদ্যূতং (ক্লী) পণপূর্ব্বকমেষকুক্কুটাদিযুদ্ধং। তৎপর্য্যায়ঃ। সমাহ্বয়ঃ ২। ইত্যমরঃ। সাহ্বয়ঃ ৩। ইতি শব্দরত্নাবলী॥

প্রাণিমাতা (স্ত্রী) গর্ব্বদাত্রীক্ষুপঃ। ইতি রাজনির্ঘণ্টঃ॥

প্রাণিহিতা (স্ত্রী) পাদুকা। ইতি ত্রিকাণ্ডশেষঃ॥ লোকহিতকারিণী চ॥

প্রাণী [ন্] (ত্রি) প্রাণবিশিষ্টঃ। মনুষ্যাদিঃ। তৎপর্য্যায়ঃ। চেতনঃ ২ জন্মী ৩ জন্তুঃ ৪ জন্যুঃ ৫ শরীরী ৬। ইত্যমরঃ॥

প্রাণীত্যং (ক্লী) ঋণং। যথা। প্রাণীত্যমৃণমর্থানাং প্রয়োগঃ স্যাৎ কলান্বিকা। ইতি ত্রিকাণ্ডশেষঃ॥

প্রাণেশঃ (পুং) পতিঃ। ইতি জটাধরঃ॥

প্রাণেশা (স্ত্রী) ভার্য্যা। ইতি হেমচন্দ্রঃ॥

প্রাতঃ [র্] ব্য প্রভাতং। তৎপর্য্যায়ঃ। প্রগে ২। ইত্যমরঃ॥ সূর্য্যোদয়াবধিত্রিমুহূর্ত্তকালঃ। যথা। প্রাতঃকালো মুহূর্ত্তাংস্ত্রীন্ সঙ্গবস্তাবদেব তু। ইতি তিথ্যাদিতত্ত্বং॥

প্রাতঃকৃত্যং (ক্লী) প্রভাতকর্ত্তব্যকর্ম্ম। তদনুষ্ঠানং যথা। ব্রাহ্মে মুহূর্ত্তে উত্থায় ধর্ম্মমর্থঞ্চ চিন্তয়েৎ। কায়ক্লেশন্তদুদ্ভূতং ধ্যায়েত্তু মনসেশ্বরং॥ উষঃকালেঽথ সংপ্রাপ্তে কৃত্বা চাবশ্যকং বুধঃ। স্নায়ান্নদীষু শুদ্ধাসু শৌচং কৃত্বা যথাবিধি॥ *॥ প্রাতঃস্নানেন শুধ্যন্তি যেঽপি পাপকৃতো জনাঃ। তস্মাৎ সর্ব্বপ্রযত্নেন প্রাতঃস্নানং সমাচরেৎ॥ প্রাতঃস্নানং প্রশংসন্তি দৃষ্টাদৃষ্টকরং শুভং। ঋষীণাং শুচিতা নিত্যং প্রাতঃস্নানান্ন সংশয়ঃ॥ মুখে সুপ্তস্য সততং লালাদ্যাঃ প্রস্রবন্তি হি। ততো নৈবাচরেৎ কর্ম্মাণ্যকৃত্বা স্নানমাদিতঃ॥ অলক্ষ্মীঃ কালকর্ণী চ দুঃস্বপ্নং দুর্বিচিন্তিতং। প্রাতঃস্নানেন পাপানি পূয়ন্তে নাত্র সংশয়ঃ॥ ন চ স্নানং বিনা পুংসাং পাবনং প্রত্যহং স্মৃতং। হোমে জপ্যে বিশেষেণ তস্মাৎ স্নানং সমাচরেৎ॥ অশক্তাবশিরস্কং বা স্নানমস্য বিধীয়তে। আর্দ্রেণ বাসসা চাথ মার্জনং কায়িকং স্মৃতং॥ অপ্রায়ত্যে সমুৎপন্নে স্নানমেব সমাচরেৎ। ব্রাহ্মাদীনি যথাশক্তৌ স্নানান্যাহুর্ম্মনীষিণঃ॥ *॥ ব্রাহ্মমাগ্নেয়মুদ্দিষ্টং বায়ব্যং দিব্যমেব চ। বারুণং যৌগিকং তদ্বৎ ষোঢ়াস্নানং প্রকীর্ত্তিতং॥ ব্রাহ্মন্তু মার্জ্জনং মন্ত্রৈঃ কুশৈঃ সোদকবিন্দুভিঃ। আগ্নেয়ং ভস্মনা পাদমস্তকাদিবিধূননং॥ গবাং হি রজসা প্রোক্তং বায়ব্যং স্নানমুত্তমং। যত্তু সাতপবর্ষেণ স্নানন্তদ্দিব্যমুচ্যতে॥ বারুণঞ্চাবগাহস্তু মানসন্ত্বাত্মবেদনং। যৌগিকং স্নানমাখ্যাতং যোগো বিষ্ণুবিচিন্তনং॥ আত্মতীর্থমিতি খ্যাতং সেবিতং ব্রহ্মবাদিভিঃ॥ মনঃশুচিকরং পুংসাং নিত্যস্তৎস্নানমাচরেৎ। শক্তশ্চেদ্বারুণং বিদ্বান্ প্রাজাপত্যন্তথৈব চ॥ *॥ প্রক্ষাল্য দন্তকাষ্ঠং বৈ ভক্ষয়িত্বা বিধানতঃ। আচম্য প্রযতো নিত্যং স্নানং প্রাতঃ সমাচরেৎ॥ মধ্যাঙ্গুলসমস্থৌল্যং

দ্বাদশাঙ্গুলসম্মিতং। সত্বচং দন্তকাষ্ঠং স্যাত্তস্যাগ্রেণ চ ধাবয়েৎ॥ ক্ষীরিবৃক্ষসমুদ্ভূতং মালতীসম্ভবং শুভং। অপামার্গঞ্চ বিল্বঞ্চ করবীরং বিশেষতঃ॥ বর্জ্জয়িত্বা নিন্দিতানি গৃহীত্বৈনং যথোদিতং। পরিহৃত্য দিনং পাপং ভক্ষয়িত্বা বিধানতঃ॥ নোৎপাটয়েদ্দন্তকাষ্ঠং নাঙ্গুল্যা ধাবয়েৎ ক্বচিৎ। প্রক্ষাল্য ভুক্ত্বা তজ্জহ্যাচ্ছুচৌ দেশে সমাহিতঃ॥ * ॥ স্নাত্বা সন্তর্পয়েদ্দেবানৃষীন্ পিতৃগণাংস্তথা। সম্মার্জ্য মন্ত্রৈরাত্মানং কুশৈঃ সোদকবিন্দুভিঃ॥ আপোহিষ্ঠাব্যাহৃতিভিঃ সাবিত্র্যা বারুণৈঃ শুভৈঃ। ওঙ্কারব্যাহৃতিযুতাং গায়ত্রীং দেবমাতরং। জপ্ত্বা জলাঞ্জলিং দদ্যাদ্ভাস্করং প্রতি তন্মনাঃ॥ প্রাক্‌কূলেষু সমাসীনো দর্ভেষু সুসমাহিতঃ। প্রাণায়ামত্রয়ং কৃত্বা ধ্যায়েৎ সন্ধ্যামিতি স্মৃতিঃ॥ যা সন্ধ্যা সা জগৎসূতির্মায়াতীতা চ নিষ্কলা। ঐশ্বরী তু পরা শক্তিস্তত্ত্বমন্ত্রসমুদ্ভবা॥ ধ্যাত্বার্কমণ্ডলগতাং সাবিত্রীং বৈ জপন্ বুধঃ। প্রাঙ্মুখঃ সততং বিপ্রঃ সন্ধ্যোপাসনমাচরেৎ॥ সন্ধ্যাহীনোঽশুচির্নিত্যমনর্হঃ সর্ব্বকর্ম্মসু। যদন্যৎ কুরুতে কিঞ্চিৎ ন তস্য ফলমাপ্নুয়াৎ॥ অনন্যচেতসঃ শান্তা ব্রাহ্মণা বেদপারগাঃ। উপাস্য বিধিবৎ সন্ধ্যাং প্রাপ্তাশ্চ পরমাং গতিং॥ যোঽন্যত্র কুরুতে যত্নাদ্ধর্ম্মকার্য্যং দ্বিজোত্তমঃ। বিহায় সন্ধ্যাপ্রণতিং স যাতি নরকাযুতং॥ তস্মাৎ সর্ব্বপ্রযত্নেন সন্ধ্যোপাসনমাচরেৎ। উপাসিতো ভবেত্তেন দেবো যোগতনুঃ পরঃ॥ সহস্রপরমাং নিত্যং শতমধ্যাং দশাবরাং। সাবিত্রীং বৈ জপেদ্বিদ্বান্ প্রাঙ্মুখঃ প্রযতঃ স্থিতঃ॥ অথোপতিষ্ঠেদাদিত্যমুদয়ন্তং সমাহিতঃ। মন্ত্রৈস্তু বিবিধৈঃ সৌরৈর্ঋগ্‌যজুঃসামসম্ভবৈঃ॥ উপস্থায় মহাযোগং দেবদেবং দিবাকরং। কুর্ব্বীত প্রণতিং ভূমৌ মূর্দ্ধ্না নিত্যঞ্চ মন্ত্রতঃ॥ * ॥ ওঁ খং খখোল্কায় শান্তায় কারণত্রয়হেতবে। নিবেদয়ামি চাত্মানং নমস্তে জ্ঞানরূপিণে॥ নমস্তে ঘৃণিনে তুভ্যং সূর্য্যায় ব্রহ্মরূপিণে। ত্বমেব ব্রহ্ম পরমমাপো জ্যোতী রসোঽমৃতং॥ ভূর্ভুবঃ স্বস্ত্বমোঙ্কারঃ সর্ব্বে রুদ্রাঃ সনাতনাঃ। পুরুষঃ সন্মহোঽন্তস্ত্বাং প্রণমামি কপর্দ্দিনং॥ ত্বমেব বিশ্বং বহুধা সদসৎ সূয়সে চ যৎ। নমো রুদ্রায় সূর্য্যায় ত্বামহং শরণং গতঃ॥ প্রাচেতসে নমস্তুভ্যমুমায়াঃ পতয়ে নমঃ। নমোঽস্তু নীলগ্রীবায় নমস্তুভ্যং পিনাকিনে॥ বিলোহিতায় ভর্গায় সহস্রাক্ষায় তে নমঃ। নম উমাপতয়ে তুভ্যমাদিত্যায় নমোঽস্তু তে॥ নমস্তে বহুহস্তায় ত্র্যম্বকায় নমোঽস্তু তে। প্রপদ্যে ত্বাং বিরূপাক্ষ মহান্তং পরমেশ্বরং॥ হিরণ্ময়ে গৃহে গুপ্তমাত্মানং সর্ব্বদেহিনাং। নমস্যামি পরং জ্যোতির্ব্রহ্মাণং ত্বাং পরামৃতং॥ বিশ্বং পশুপতিং ভীমং নরনারীশরীরিণং। নমঃ সূর্য্যায় রুদ্রায় ভাস্বতে পরমেষ্ঠিনে। উগ্রায় সর্ব্বভক্ষ্যায় ত্বাং প্রপদ্যে সদৈব হি॥ * ॥ এতদ্বৈ সূর্য্যহৃদয়ং জপ্ত্বা স্তব-

মনুত্তমং। প্রাতঃকালেঽথ মধ্যাহ্নে নমস্কুর্য্যাদ্দিবাকরং ॥ ইদং পুত্রায় শিষ্যায় ধার্ম্মিকায় দ্বিজাতয়ে। প্রদেয়ং সূর্য্যহৃদয়ং ব্রহ্মণা তু প্রদর্শিতং ॥ সর্ব্বপাপপ্রশমনং বেদসারং সমুদ্ধৃতং। ব্রাহ্মণানাং হিতং পুণ্যং ঋষিসংঘৈর্নিষেবিতং॥ যস্ত্ত নিত্যং পঠেদ্ধীমান্ প্রেক্ষন্নাদিত্যমণ্ডলং। মহাপাতকযুক্তোঽপি পূয়তে নাত্র সংশয়ঃ॥ ক্ষয়াপস্মারকুষ্ঠাদ্যৈর্ব্যাধিভিঃ পীড়িতোঽপি সন্। জপ্ত্বা শতগুণং স্তোত্রং স শ্লাঘ্যো ভবতি দ্রুতং॥ ভূতগ্রহপিশাচাতিবীজব্যসনকর্ষিভিঃ। স্তবন্ ধ্যাত্বা হরিং বিপ্রো মুচ্যতে মহতো ভয়াৎ॥ *॥ অথাগত্য গৃহং বিপ্রঃ সমাচম্য যথাবিধি। প্রজ্বাল্য বহ্নিং বিধিবজ্জুহুয়াজ্জাতবেদসং॥ ঋত্বিক্পুত্রোঽথ পত্নী বা শিষ্যো বাপি সহোদরঃ। প্রাপ্যানুজ্ঞাং বিশেষেণ জুহুয়ুর্ব্বা যথাবিধি ॥ পবিত্রপাণিঃ পূতাত্মা শুক্লাম্বরধরোত্তরঃ। অনন্যমানসো ভূত্বা জুহুয়াৎ সংযতেন্দ্রিয়ঃ॥ বিনা দর্ভেণ যৎ কর্ম্ম বিনা মন্ত্রেণ বা পুনঃ। রাক্ষসং তদ্ভবেৎ সর্ব্বং নামুত্রেহ ফলপ্রদং॥ *॥ দৈবতানি নমস্কুর্য্যাদ্দেয়মারান্নিবেদয়েৎ। দদ্যাৎ পুষ্পাদিকং তেষাং বৃদ্ধাংশ্চৈবাভিবাদয়েৎ॥ গুরুঞ্চৈবাভ্যুপাসীত হিতঞ্চাস্য সমাচরেৎ। বেদাভ্যাসং ততঃ কুর্য্যাৎ প্রযত্নাচ্ছক্তিতো দ্বিজঃ॥ জপেদধ্যাপয়েচ্ছিষ্যান্ শ্রাবয়েচ্চ বিধারয়েৎ। অবেক্ষেত চ শাস্ত্রাণি ধর্ম্মাদীনি দ্বিজোত্তমঃ॥ বৈদিকাংশ্চৈব নিয়মান্ বেদাঙ্গানি বিশেষতঃ। উপেয়াদীশ্বরঞ্চাথ যোগক্ষেমপ্রসিদ্ধয়ে॥ সাধয়েদ্বিবিধানর্থান্ কুটুম্বার্থে ততো দ্বিজঃ। ইতি কৌর্ম্মে উপবিভাগে ১৭ অধ্যায়ঃ॥*॥ অপি চ। প্রাতঃ শিরসি শুক্লাজ্জে দ্বিনেত্রং দ্বিভুজং গুরুং। প্রসন্নবদনং শান্তং স্মরেত্তন্নামপূর্ব্বকং॥ ওঁ নমো গুরবে তস্মা ইষ্টদেবস্বরূপিণে। যস্য বাক্যামৃতং হন্তি বিষং সংসারসংজ্ঞকমিতি পঠেৎ॥ অহং দেবো ন চান্যোঽস্মি ব্রহ্মৈবাস্মি ন শোকভাক্। সচ্চিদানন্দরূপোঽহং নিত্যমুক্তস্বভাববান্॥ ইতি ভাবয়েৎ। লোকেশ চৈতন্যময়াদিদেব শ্রীকান্ত বিষ্ণো ভবদাজ্ঞয়ৈব। প্রাতঃ সমুত্থায় তব প্রিয়ার্থং সংসারযাত্রামনুবর্ত্তয়িষ্যে॥ জানামি ধর্ম্মং ন চ মে প্রবৃত্তির্জানাম্যধর্ম্মং ন চ মে নিবৃত্তিঃ। ত্বয়া হৃষীকেশ হৃদি স্থিতেন যথা নিযুক্তোঽস্মি তথা করোমি॥ বিষ্ণুপুরাণে। প্রবুদ্ধশ্চিন্তয়েদ্ধর্ম্মমর্থঞ্চাস্যাবিরোধিনং। অপীড়য়া তয়োঃ কামমুভয়োরপি চিন্তয়েৎ॥ ধর্ম্মলক্ষণন্তু ভবিষ্যে। ধর্ম্মঃ শ্রেয়ঃ সমুদ্দিষ্টং শ্রেয়োঽভ্যুদয়সাধনং। অতএব জৈমিনিঃ। চোদনা লক্ষণোঽর্থো ধর্ম্ম ইতি। তেন বৈদিকলিঙ্প্রতিপাদ্যোঽর্থো ধর্ম্মঃ। কোঽর্থো যোঽভ্যুদয়ায় ইতি তু ভবিষ্যে॥ *॥ ততঃ ওঁ প্রিয়দত্তায়ৈ ভুবে নমঃ। ইতি নমস্কৃত্য দক্ষিণং চরণং ন্যসেৎ। ছন্দোগপরিশিষ্টং। শ্রোত্রিয়ং সুভগামগ্নিং গাঞ্চৈবাগ্নিচিতং তথা। প্রাতরুত্থায় যঃ পশ্যেদাপদ্ভ্যঃ স বিমুচ্যতে॥ পাপিষ্ঠং দুর্ভগাং

মদ্যং নগ্নমুৎকৃত্তনাসিকং। প্রাতরুত্থায় যঃ পশ্যেত্তৎ কলেরুপলক্ষণং॥ অতএব ব্যাসঃ। ধনিনঃ শ্রোত্রিয়ো রাজা নদী বৈদ্যস্তু পঞ্চমঃ। পঞ্চ যত্র ন বিদ্যন্তে তত্র বাসং ন কারয়েৎ॥ মহাভারতে। কর্কোটকস্য নাগস্য দময়ন্ত্যা নলস্য চ। ঋতপর্ণস্য রাজর্ষেঃ কীর্ত্তনং কলিনাশনং॥ মাৎস্যে। কার্ত্তবীর্য্যার্জ্জুনো নাম রাজা বাহুসহস্রভৃৎ। যোঽস্য সংকীর্ত্তয়েন্নাম কল্যমুত্থায় মানবঃ॥ ন তস্য বিত্তনাশঃ স্যান্নষ্টঞ্চ লভতে পুনঃ। কল্যং প্রাতঃ॥*॥ অথ বিণ্মূত্রোৎসর্গঃ। বিষ্ণুধর্ম্মোত্তরে। নিদ্রাং জহ্যাদ্গৃহী রাম নিত্যমেবারুণোদয়ে। বেগোৎসর্গং ততঃ কৃত্বা দন্তধাবনপূর্ব্বকং॥ স্নানং সমাচরেৎ প্রাতঃ সর্ব্বকল্মষনাশনং। অরুণোদয়কালমাহ স্কন্দপুরাণং। উদয়াৎ প্রাক্ চতস্রস্তু নাড়িকা অরুণোদয়ঃ। তত্র স্নানং প্রশস্তং স্যাত্তদ্ধি পুণ্যতমং স্মৃতং॥ নাড়িকা দণ্ডঃ। বিষ্ণুধর্ম্মোত্তরে। বেগরোধং ন কর্ত্তব্যমন্যত্র ক্রোধবেগতঃ। আয়ুর্ব্বেদীয়েঽপি। ন বেগিতোঽন্যকার্য্যসিদ্ধিঃ স্যান্নাজিত্বা সাধ্যমাময়ং। অঙ্গিরাঃ। উত্থায় পশ্চিমে রাত্রেস্তত আচম্য চোদকং। অন্তর্দ্ধায় তৃণৈর্ভূমিং শিরঃ প্রাবৃত্য বাসসা॥ বাচং নিয়ম্য যত্নেন ষ্ঠীবনোচ্ছ্বাসবর্জ্জিতঃ। কুর্য্যান্মূত্রপুরীষে তু শুচৌ দেশে সমাহিতঃ॥ বিষ্ণুপুরাণং। ততঃ কল্যং সমুত্থায় কুর্য্যান্মৈত্রং নরেশ্বর। নৈঋর্ত্যামিষুবিক্ষেপমতীত্যাভ্যধিকং ভুবঃ॥ তিষ্ঠেন্নাতিচিরং তত্র নৈব কিঞ্চিদুদীরয়েৎ। কল্যমুষঃকালং। মৈত্রং মিত্রদেবতাকপায়ুসম্বন্ধাৎ পুরীষোৎসর্গঃ। নৈঋর্ত্যামুত্থানদেশমারভ্য উত্থায়েত্যনেন উপস্থিতেঃ ইষুপ্রক্ষেপযোগ্যদেশাদ্বহিঃ। তদ্দেশপরিমাণমাহ পিতামহঃ। মধ্যমেন তু চাপেন প্রক্ষিপেত্তু শরত্রয়ং। হস্তানাঞ্চ শতে সার্দ্ধে লক্ষ্যং কৃত্বা বিচক্ষণঃ॥*॥ আপস্তম্বঃ। মূত্রপুরীষোৎসর্গং কুর্য্যাদ্দক্ষিণাং দিশং দক্ষিণাপরাম্বেতি। দক্ষিণাপরাং নৈঋর্তীং। মনুঃ। মূত্রোচ্চারসমুৎসর্গং দিবা কুর্য্যাদুদঙ্মুখঃ। দক্ষিণাভিমুখো রাত্রৌ সন্ধ্যয়োশ্চ যথা দিবা॥ যত্তু যমবচনং। প্রত্যঙ্মুখশ্চ পূর্ব্বাহ্নে ত্বপরাহ্নে চ প্রাঙ্মুখঃ। উদঙ্মুখস্তু মধ্যাহ্নে নিশায়াং দক্ষিণামুখঃ। ইতি তদিচ্ছাবিকল্পার্থং সূর্য্যাভিমুখনিরাসার্থঞ্চ ন তু নিয়মার্থং দেবলবচনবিরোধাৎ। তথা চ দেবলঃ। সদৈবোদঙ্মুখঃ প্রাতঃ সায়াহ্নে দক্ষিণামুখঃ। বিণ্মূত্রমাচরেন্নিত্যং সন্ধ্যায়াং পরিবর্জ্জয়েদিতি॥ অত্র প্রাতঃসায়াহ্নশব্দৌ দিবারাত্রিপরৌ পূর্ব্বোক্তমনুবচনৈকবাক্যত্বাৎ। সন্ধ্যায়াং পরিবর্জ্জয়েদিতি তু পীড়িতেতরপরং॥*॥ যমঃ। কৃত্বা যজ্ঞোপবীতন্তু পৃষ্ঠতঃ কণ্ঠলম্বিতং। বিণ্মূত্রে চ গৃহী কুর্য্যাদ্যদ্বা কর্ণে সমাহিতঃ॥ পৃষ্ঠতঃ পৃষ্ঠে কণ্ঠলম্বিতং নিবীতং তৎ পৃষ্ঠলম্বিতং নিবীতমাপৃষ্ঠদেশাবলম্বং গ্রাম্যধর্ম্মেম্বিতি নিগমপরিশিষ্টবচনাৎ।

নিয়ম্য প্রযতো বাচং সম্বীতাঙ্গোঽবগুণ্ঠিত ইতি মনুবচনাচ্চ। অত্র সম্বীতং নিবীতং সম্বীতং মানুষ ইতি তৈত্তিরীয়শ্রুতেঃ। মানুষে সনকাদিকৃত্যে। পৃষ্ঠলম্বিতং নিবীতী বেতি বৌধায়নীয়াচ্চ। ততশ্চ হারবৎ কৃত্বা পৃষ্ঠলম্বিতং স্কন্ধে ইত্যর্থঃ। একবস্ত্রতাপক্ষে ব্যবস্থামাহ সাংখ্যায়নঃ। যদ্যেকবস্ত্রো যজ্ঞোপবীতং কর্ণে কৃত্বা অবগুণ্ঠিত ইতি কর্ণে দক্ষিণে। পবিত্রং দক্ষিণে কর্ণে বিণ্মূত্রমাচরেদিতি স্মৃতৌ তথাদর্শনাৎ। অবগুণ্ঠিতঃ কৃতশিরোঽবগুণ্ঠনঃ। মনুঃ। ছায়ায়ামন্ধকারে বা রাত্রাবহনি বা দ্বিজঃ। যথাসুখমুখঃ কুর্য্যাৎ প্রাণবাধভয়েষু চ॥ মহাভারতে। প্রত্যাদিত্যং প্রতি জলং প্রতি গাঞ্চ প্রতি দ্বিজং। মেহন্তি যে চ পথিষু তে ভবন্তি গতায়ুষঃ॥ প্রতিঃ সাংমুখ্যে॥ * ॥ মনুঃ। ন মূত্রং পথি কুর্ব্বীত ন ভস্মনি ন গোব্রজে। ন ফালকৃষ্টে ন জলে ন চিত্যাং ন চ পর্ব্বতে॥ ন জীর্ণদেবায়তনে ন বল্মীকে কদাচন। ন সসত্ত্বেষু গর্ত্তেষু ন গচ্ছন্নাপি সংস্থিতঃ॥ ন নদীতীরমাসাদ্য ন চ পর্ব্বতমস্তকে। গবাগ্নিবিপ্রানাদিত্যমপঃ পশ্যংস্তথৈব চ॥ ন কদাচন কুর্ব্বীত বিণ্মূত্রস্য বিসর্জ্জনং। সসত্ত্বেষু প্রাণিমৎসু। সংস্থিতঃ উত্থিতঃ। পর্ব্বতনিষেধাদেব মস্তকনিষেধে সিদ্ধে পুনর্নিষেধো যত্র পর্ব্বতোঽশক্যপরীহারস্তত্রাপি মস্তকবর্জ্জনার্থঃ। অথবা। পর্ব্বতমস্তকনিষেধোঽধিকদোষায়॥ * ॥ বশিষ্ঠঃ। আহারনির্হারবিহারযোগাঃ সুসংবৃতা ধর্ম্মবিদা তু কার্য্যাঃ। বাগ্‌বুদ্ধিগুপ্তী চ তপস্তথৈব ধনায়ুষী গুপ্ততমে তু কার্য্যে॥ নির্হারো মূত্রপুরীষোৎসর্গঃ। বিহারঃ স্ত্রীসংভোগঃ। যোগঃ সমাধিঃ। বাগ্‌গুপ্তিরশুভালাপত্যাগঃ। বুদ্ধিগুপ্তিরনিষ্টচিন্তাত্যাগঃ। হারীতঃ। আহারন্তু রহঃ কুর্য্যান্নির্হারঞ্চৈব সর্ব্বদা। গুপ্তাভ্যাং লক্ষ্ম্যুপেতঃ স্যাৎ প্রকাশে হীয়তে তথা॥ বিষ্ণুপুরাণং। সোমাগ্ন্যর্কাম্বুবায়ূনাং পূজ্যানাঞ্চ ন সংমুখং। কুর্য্যাৎ ষ্ঠীবনবিণ্মূত্রসমুৎসর্গঞ্চ পণ্ডিতঃ॥ আপস্তম্বঃ। ন চ সোপানৎকো মূত্রপুরীষে কুর্য্যাদিতি। বৃহন্মনুঃ। করগৃহীতপাত্রেণ কৃত্বা মূত্রপুরীষকে। মূত্রতুল্যন্তু পানীয়ং পীত্বা চান্দ্রায়ণঞ্চরেৎ॥ * ॥ ভরদ্বাজঃ। অথাবকৃষ্য বিণ্মূত্রং লোষ্টকাষ্ঠতৃণাদিনা। উদস্তবাসা উত্তিষ্ঠেদ্দৃঢ়ং বিধৃতমেহনঃ॥ উদস্তবাসাঃ কটিদেশাদূর্দ্ধক্ষিপ্তবস্ত্রঃ॥ * ॥ অথ শৌচং। দেবলঃ। ধর্ম্মবিদ্দক্ষিণং হস্ত মধঃশৌচে ন যোজয়েৎ। তথৈব বাম হস্তেন নাভেরূর্দ্ধং ন শোধয়েৎ। প্রকৃতিস্থিতিরেষা স্যাৎ কারণাদুভয়ক্রিয়া॥ কারণাদ্রোগাদেঃ। ব্রহ্মাণ্ডপুরাণং। উদ্ধৃতোদকমাদায় মৃত্তিকাঞ্চৈব বাগ্‌যতঃ। উদঙ্মুখো দিবা কুর্য্যাদ্রাত্রৌ চেদ্দক্ষিণামুখঃ॥ সুনির্নিক্তে মৃদং দদ্যান্মৃদন্তে ত্বপ এব চ। কুর্য্যাচ্ছৌচমিতি শেষঃ। সুনির্নিক্তে ভরদ্বাজোক্তলোষ্টাদিপ্রমৃষ্টে গুদে। উদকপাত্রাভাবে করেণ জলাশয়াৎ উদক-

গ্রহণমাহ আদিত্যপুরাণং । রত্নিমাত্রং জলং ত্যক্ত্বা কুর্য্যাচ্ছৌচমনুদ্ধৃতে। পশ্চাচ্চ শোধয়েত্তীর্থমন্যথা ন শুচির্ভবেৎ॥ তস্মিন দেশে শৌচং কর্ত্তব্যং যস্মাদ্রত্নিমাত্রব্যবহিতং জলং তৎস্থলমেব তীর্থং জলসমীপত্বাৎ ॥ * ॥ বিষ্ণুপুরাণং । বল্মীকমূষিকোৎখাতাং মৃদমন্তর্জলান্তথা। শৌচাবশিষ্টাং গেহাচ্চ নাদদ্যাল্লেপসম্ভবাং ॥ অন্তঃপ্রাণ্যবপন্নাঞ্চ হলোৎখাতাং সকর্দ্দমাং । মনুদক্ষৌ। একা লিঙ্গে গুদে তিস্রস্তথা বামকরে দশ । উভয়োঃ সপ্ত দাতব্যা মৃদঃ শুদ্ধিমভীপ্সতা ॥ উভয়োঃ করয়োঃ। বামহস্তে দশদানানন্তরং তৎপৃষ্ঠে ষড়্দানমাহ হারীতঃ। দশ মধ্যে চ ষট্পৃষ্ঠে ইতি। শঙ্খদক্ষৌ। তিস্রস্ত মৃত্তিকা দেয়াঃ কৃত্বা তু নখশোধনং । তিস্রস্ত পাদয়োর্দ্দেয়াঃ শুদ্ধিকামেন নিত্যশঃ॥ নখশোধনং তৃণাদিনা নখান্তর্মলশোধনং । তিস্র ইতি হস্তয়োরিতি শেষঃ॥ * ॥ পাদপ্রক্ষালনং ন কাংস্যে কর্ত্তব্যমাহ বিষ্ণুধর্ম্মোত্তরং। দর্ভৈর্ন মার্জয়েৎ পাদৌ ন চ কাংস্যে প্রধাবয়েৎ ॥*॥ দক্ষঃ। লিঙ্গে তত্র সমাখ্যাতা ত্রিপর্ব্বী পূর্য্যতে যয়া। অর্দ্ধপ্রসৃতিমাত্রা তু প্রথমা মৃত্তিকা স্মৃতা॥ দ্বিতীয়া চ তৃতীয়া চ তদর্দ্ধং পরিকীর্ত্তিতং। যদা তু উক্তপ্রমাণয়া মৃদা গন্ধলেপক্ষয়ো ন ভবতি তদা অধিকয়াপি কর্ত্তব্যং। গন্ধলেপক্ষয়করং শৌচং কুর্য্যাদতন্দ্রিতঃ॥ ইতি যাজ্ঞবল্ক্যবচনাৎ। গুদাদন্যত্র পরিমাণমাহ যমঃ। মৃত্তিকা তু সমুদ্দিষ্টা ত্রিপর্ব্বী পূর্য্যতে যয়া। ত্রিপর্ব্বী তর্জ্জনীমধ্যমানামিকানামগ্রপর্ব্বত্রয়ং ॥ * ॥ মূত্রমাত্রে তু স্মৃতিঃ। একাং লিঙ্গে মৃদং দদ্যাৎ বামহস্তে তু মৃত্ত্রয়ং। উভয়োর্হস্তয়োর্দ্বে তু মূত্রশৌচং প্রকীর্ত্তিতং ॥ ব্রহ্মপুরাণে। পাদয়োর্দ্বে গৃহীত্বা চ সুপ্রক্ষালিতপাণিমান্ । দ্বিরাচম্য ততঃ শুদ্ধঃ স্মৃত্বা বিষ্ণুং সনাতনং ॥ পাদয়োর্দ্বে একৈকা। ইদং মূত্রে পুরীষোৎসর্গে তিসৃণাং বিধানাৎ ॥ * ॥ দক্ষঃ। যথোদিতং দিবা শৌচমর্দ্ধং রাত্রৌ বিধীয়তে। আতুরে চ তদর্দ্ধং স্যাৎ তদর্দ্ধন্ত পথি স্মৃতং ॥ যথোক্তকরণাশক্তাবেবেদং ন তু নিশাদিপুরস্কারেণৈব বাক্যস্যাদৃষ্টার্থতাপত্তেঃ॥*॥ আপস্তম্বঃ। পথি পাদস্ত বিজ্ঞেয় আর্ত্তঃ কুর্য্যাদযথাবলং। এতয়োর্ব্বিরোধস্ত আর্ত্তানার্ত্তাভ্যাং পরিহরণীয়ঃ। দক্ষঃ। দেশং কালং তথাত্মানং দ্রব্যং দ্রব্যপ্রয়োজনং। উপপত্তিমবস্থাঞ্চ জ্ঞাত্বা শৌচং প্রকল্পয়েৎ ॥ ব্রহ্মপুরাণে। ন যাবদুপনীয়েত দ্বিজঃ শূদ্রস্তথাঙ্গনা। গন্ধলেপক্ষয়করং শৌচং তেষাং বিধীয়তে ॥ প্রমাণং শৌচসংখ্যা বা ন শিষ্টৈরুপদিশ্যতে। যাবচ্চ শুদ্ধিং মন্যেত তাবৎ শৌচং সমাচরেৎ ॥ দক্ষঃ। ন্যূনাধিকং ন কর্ত্তব্যং শৌচং শুদ্ধিমভীপ্সতা। প্রায়শ্চিত্তং প্রসজ্জেত বিহিতাতিক্রমে কৃতে॥ শৌচাচারবিহীনস্য সমস্তা নিষ্ফলাঃ ক্রিয়াঃ। গন্ধলেপক্ষয়ে সত্যধিকং ন কর্ত্তব্যং পূর্ব্বোক্তযাজ্ঞবল্ক্যবিরোধাৎ। গন্ধ-

লেপাক্ষয়ে ত্বধিকসংখ্যয়াপি। যাজ্ঞবল্ক্য-বচনং অনুপনীতাদিপরং বা। পূর্ব্বোক্ত-ব্রহ্মপুরাণৈকবাক্যত্বাৎ ॥ * ॥ এতচ্ছৌচং গৃহস্থানাং দ্বিগুণং ব্রহ্মচারিণাং। ত্রিগুণন্তু বনস্থানাং যতীনাঞ্চ চতুর্গুণং ॥ ইদন্তু দ্বৈগুণ্যাদিকং সংখ্যামাত্রে তদনন্তরাভিধানাৎ। ব্যাঘ্রপাদঃ। শৌচন্তু দ্বিবিধং প্রোক্তং বাহ্যমাভ্যন্তরং তথা। মৃজ্জলাভ্যাং স্মৃতং বাহ্যং ভাবশুদ্ধিস্তথাপরং ॥ গঙ্গাতোয়েন কৃৎস্নেন মৃদ্ভারৈশ্চ নগোপমৈঃ। আমৃত্যোঃ স্নাতকশ্চৈব ভাবদুষ্টো ন শুধ্যতি ॥ * ॥ স্মৃতিঃ। ধাবন্তঞ্চ প্রমত্তঞ্চ মূত্রোচ্চারকৃতন্তথা। ভুঞ্জানমাচমানঞ্চ নাস্তিকং নাভিবাদয়েৎ ॥ জন্মপ্রভৃতি যৎকিঞ্চিৎ চেতসা ধর্ম্মমাচরেৎ। সর্ব্বং তন্নিষ্ফলং যাতি একহস্তাভিবাদনাৎ ॥ * ॥ ঋষ্যশৃঙ্গঃ। যস্মিন্ স্থানে কৃতং শৌচং বারিণা তদ্বিশোধয়েৎ। ন শুদ্ধিস্তু ভবেত্তস্য মৃত্তিকাং যো ন শোধয়েৎ ॥ * ॥ শৌচানন্তরং হারীতঃ। গোময়েন মৃদা বা কমণ্ডলুং প্রমৃজ্য পূর্ব্ববদুপস্পৃশ্য আদিত্যং সোমমগ্নিং বা বীক্ষেতেতি। অত্র মার্জনানন্তরং ক্ষালনং অন্যত্র তথাদর্শনাৎ। আচমনানন্তরং আদিত্যাদিদর্শনং যথাসম্ভবং। শৌচং কৃত্বা মূত্রোচ্চারং ন পশ্যেৎ দৃষ্ট্বাদিত্যমগ্নিং সোমং বা পশ্যেদিতি ॥ * ॥ অথাচমনবিধিঃ। দক্ষঃ। প্রক্ষাল্য পাণী পাদৌ চ ত্রিঃ পিবেদম্বু বীক্ষিতং। সংবৃত্যাঙ্গুষ্ঠমূলেন দ্বিঃ প্রমৃজ্যাত্ততো মুখং। সংহত্য তিসৃভিঃ পূর্ব্বমাস্যমেবমুপস্পৃশেৎ ॥ অঙ্গুষ্ঠেন প্রদেশিন্যা ঘ্রাণং পশ্চাদনন্তরং। অনামিকাভ্যাঞ্চ চক্ষুঃশ্রোত্রে পুনঃ পুনঃ ॥ নাভিং কনিষ্ঠাঙ্গুষ্ঠেন হৃদয়ন্তু তলেন বৈ। সর্ব্বাভিস্তু শিরঃ পশ্চাদ্বাহূ চাগ্রেণ সংস্পৃশেৎ ॥ * ॥ পাদপ্রক্ষালনং বিশেষয়তি দেবলঃ। প্রথমং প্রাঙ্মুখঃ স্থিত্বা পাদৌ প্রক্ষালয়েৎ শনৈঃ। উদঙ্মুখো বা দৈবত্যে পৈতৃকে দক্ষিণামুখঃ ॥ শনৈরত্বরঃ। দৈবপৈতৃকেতরত্রাপস্তম্বঃ। প্রত্যক্পাদাবসেচনমিতি। প্রত্যক্ পশ্চিমাভিমুখঃ। ক্রমমাহ গোভিলঃ। সব্যং পাদমবনেনিজ ইতি সব্যং পাদং প্রক্ষালয়েৎ। দক্ষিণং পাদমবনেনিজ ইতি দক্ষিণং পাদং প্রক্ষালয়েদিতি অর্হণীয়ে তথাদর্শনাৎ সর্ব্বত্র তথা কল্প্যতে। পারস্করঃ। সব্যং পাদং প্রক্ষাল্য দক্ষিণং প্রক্ষালয়তীতিসূত্রেণ প্রাক্ সব্যপাদপ্রক্ষালনে সিদ্ধে সব্যং প্রক্ষাল্য দক্ষিণং প্রক্ষালয়তীত্যত্র সব্যগ্রহণং সামান্যার্থং তেনান্যস্যাপি পাদপ্রক্ষালনে সব্যস্যৈব প্রাথম্যং অন্যার্থং পুনর্ব্বচনমিতিন্যায়াৎ। অন্যার্থমধিকার্থং। ব্রাহ্মণশ্চেদ্দক্ষিণং প্রথমমিতি সূত্রং তস্য পাদৌ যদি ব্রাহ্মণঃ প্রক্ষালয়তি তদা দক্ষিণং প্রথমমিতি ন সব্যং। যথা প্রক্ষালয়তীত্যনুবৃত্তৌ আশ্বলায়নঃ। দক্ষিণমগ্রে ব্রাহ্মণায় প্রযচ্ছেৎ সব্যং শূদ্রায়েতি। স্বয়ং প্রক্ষালনে সব্যস্যৈব প্রাথম্যং ইতি এবং হরিশর্ম্মাপি। আচমনে পাণিপাদপ্রক্ষালনং

মূত্রাদ্যুৎসর্গে। যথা বৃদ্ধপরাশরঃ। কৃত্বাথ শৌচং প্রক্ষাল্য হস্তৌ পাদৌ চ মৃজ্জলৈঃ। নিবদ্ধশিখ আসীনো দ্বিজ আচমনঞ্চরেৎ॥ কৃত্বোপবীতং সব্যাংশে বাঙ্মনঃকায়সংযতঃ। আপস্তম্বঃ। ইত্যেবমদ্ভিরাজানু প্রক্ষাল্য চরণৌ পৃথক্। হস্তৌ চামণিবন্ধাভ্যাং পশ্চাদাসীতসংযতঃ॥ আজানু আমণিবন্ধাভ্যামিত্যবধ্যুপাদানং তৎপর্য্যন্তাশুচিত্বশঙ্কায়াং অধ্বশ্রমাপনোদনায় অতিশয়শৌচায় বা। অতএবোক্তং অঙ্গপ্রকর্ষাৎ ফলপ্রকর্ষ ইতি॥ *॥ শিখাবন্ধনে বিশেষমাহ ব্রহ্মপুরাণং। গায়ত্র্যা তু শিখাং বদ্ধা নৈঋর্ত্যাং ব্রহ্মরন্ধ্রতঃ। জুটিকাঞ্চ ততো বদ্ধা ততঃ কর্ম্ম সমাচরেৎ॥ *॥ পিবেদিত্যত্রান্তর্জান্বাহ যাজ্ঞবল্ক্যঃ। অন্তর্জানু শুচৌ দেশে উপবিষ্ট উদঙ্মুখঃ। প্রাগ্বা ব্রাহ্মেণ তীর্থেন দ্বিজো নিত্যমুপস্পৃশেৎ॥ অন্তর্জানু জানুনোর্মধ্যে হস্তৌ কৃত্বেতি শেষঃ। বাশব্দাদীশানাভিমুখঃ। ঈশানাভিমুখো ভূত্বোপস্পৃশেত্তু যথাবিধি। ইতি মরীচ্যুক্তেঃ। ব্রাহ্মেণ তীর্থেন অঙ্গুষ্ঠমূলেন। কনিষ্ঠদেশিন্যঙ্গুষ্ঠমূলান্যগ্রং করস্য চ। প্রজাপতিপিতৃব্রহ্মদেবতীর্থান্যনুক্রমাৎ ইতি যাজ্ঞবল্ক্যাৎ॥ দেশিনী তর্জ্জনী। করস্য দক্ষিণস্য। যথা মার্কণ্ডেয়পুরাণং। অঙ্গুষ্ঠোত্তরতো রেখা যা পাণের্দক্ষিণস্য চ। এতদ্ব্রাহ্মমিতি খ্যাতং তীর্থমাচমনায় বৈ॥ অত্র দ্বিজো ন স্ত্রীশূদ্রাবিতি মিতাক্ষরা॥ অতএব স্ত্রিয়াস্ত্রৈদশিকং তীর্থং শূদ্রজাতেস্তথৈব চ। সকৃদাচমনাচ্ছুদ্ধিরেতয়োরেব চোভয়োঃ॥ ব্রাহ্মতীর্থাবরোধে তু মনুঃ। কায়ত্রৈদশিকাভ্যাং বা ন পৈত্র্যেণ কদাচন। উক্ততীর্থত্রয়স্য ব্রণাদিনাবরোধে করমধ্যাত্মকাগ্রেয়েনাপি। এবঞ্চ সর্ব্বাবিরোধে স্বর্ণাদিপাত্রেণাপ্যাচমনং কার্য্যং স্বয়মসামর্থ্যেঽন্যেনাচমনং কারয়িতব্যং। যাজ্ঞবল্ক্যঃ। অদ্ভিস্তু প্রকৃতিস্থাভির্হীনাভিঃ ফেনবুদ্বুদৈঃ। হৃৎকণ্ঠতালুগাভিস্তু যথাসংখ্যং দ্বিজাতয়ঃ॥ শুধ্যেরন্ স্ত্রী চ শূদ্রশ্চ সকৃৎ স্পৃষ্টাভিরন্ততঃ॥ অন্ততঃ ওষ্ঠোপান্তে। উত্তরোত্তরমুপকর্ষাৎ। অতএব স্পৃষ্টাভিরিত্যুক্তং ন তু ভক্ষিতাভিরিতি। স্ত্রী শূদ্রো বাথ নিত্যান্তঃক্ষালনাচ্চ করোষ্ঠয়োরিতি ব্রহ্মপুরাণাচ্চ। আচমনার্থে পাণিপাদপ্রক্ষালনমেবেত্যেকে। ইতি শূদ্রাধিকারে গোতমোক্তেশ্চ। আচমনার্হজলাভাবে ইদমিত্যাচারাধ্যায়ঃ। মনুঃ। হৃদ্গাভিঃ পূয়তে বিপ্রঃ কণ্ঠগাভিস্তু ভূমিপঃ। বৈশ্যোঽদ্ভিঃ প্রাশিতাভিশ্চ শূদ্রঃ স্পৃষ্টাভিরন্ততঃ॥ অত্র বৈশ্যাবধিপ্রাশনমুক্তং। অনুপনীতানান্তু স্ত্রীশূদ্রবদাচমনং ন যাবদুপনীয়েত। ইতি প্রাগুক্তশৌচে তথাদর্শনাৎ। মিতাক্ষরাদয়োঽপ্যেবং। অস্য বিশেষয়তি বৌধায়নঃ। পাদপ্রক্ষালনাচ্ছেষেণ নাচামেৎ যদ্যাচামেৎ ভূমৌ স্রাবয়িত্বাচামেদিতি। উশনাঃ। কাংস্যায়সেন পাত্রেণ ত্রপুসীসকপিত্তলৈঃ। আচান্তঃ শতকৃত্বো-

ঽপি ন কদাচিচ্ছুচির্ভবেৎ ॥ কাংস্যাদি-পাত্রকরণকাচমনং কাংস্যায়সেনেত্যাদিনা নিষিদ্ধমিতি কেচিৎ। হস্তেনাচমনেঽপি কাংস্যাদিপাত্রাবর্জ্জিতং তন্নিষিদ্ধমিত্যপরে। আচমনজলনিষেধে শঙ্খলিখিতৌ। ন শূদ্রা শুচ্যেকপাণ্যা বর্জিতেনেতি অত্রাশুচিপদং আচমনকর্ত্তৃভিন্নপরং। শূদ্র-সাহচর্য্যাৎ একপাণিপদমপি আচমনকর্ত্তৃ-ভিন্নপাণিপরং। তেন স্বীয়বামপাণ্যা-বর্জিতমনিষিদ্ধং। তথা চ কমণ্ডল্বধিকারে বৌধায়নঃ। মূত্রপুরীষে কুর্ব্বন্ দক্ষিণ-হস্তেন গৃহ্ণাতি সব্যেনাচমনীয়মিতি। গৃহ্ণাতি জলপাত্রমিতি শেষঃ। আচামে-দিত্যনুবৃত্তৌ দেবলঃ। শিখাং বদ্ধা বসিত্বা দ্বে নির্নিক্তে বাসসী শুভে। তুষ্ণীং ভূত্বা সমাদায় নোদ্গচ্ছন্নবিলোকয়ন্ ॥ একবস্ত্রাঃ প্রাচীনাবীতিন ইত্যাদিপারস্করদর্শনাৎ যত্র প্রেতস্নানতর্পণাদৌ একবস্ত্রত্বং বিহিতং তত্র তদঙ্গত্বাদেকবাসা এবাচমনং কুর্য্যাৎ। প্রচেতাঃ। অনুষ্ণাভিরফেনাভিঃ পূতাভি-র্বীক্ষ্য চক্ষুষা। হৃদ্গতাভিরশব্দাভিস্ত্রিশ্চতু-র্ব্বাদ্ভিরাচমেৎ ॥ চতুর্ব্বেতি ভাবশুদ্ধ্যপে-ক্ষয়া বিকল্পঃ। ন তু ফলভূয়স্ত্বার্থং কল্পনা-গৌরবাপত্তেঃ। বীক্ষণানুষ্ণয়োর্ভট্টভাষ্য-মাধবাচার্য্যকৃতপরাশরভাষ্যয়োরপবাদমাহ যমঃ। রাত্রাববীক্ষিতেনাপি শুদ্ধিরুক্তা মনীষিভিঃ। উদকে নাতুরাণাঞ্চ তথোষ্ণে-নোষ্ণপায়িনাং ॥ আচামেদিত্যনুবৃত্তৌ বশিষ্ঠঃ। প্রদরাদপি যা গোস্তর্পণায় স্যুর্ন বর্ণরসদুষ্টাভির্যাশ্চ স্যুরশুভাগমা ইতি। প্রদরো বিদীর্ণভূভাগঃ। অশুভাগমাঃ অশুচিদেশাদাগতাঃ। যস্মিন্ দেশে বর্ণাদি-দুষ্টমেব তোয়ং তত্র তদপি গ্রাহ্যং। তথা চ মরীচিঃ। যেষু স্থানেষু যচ্ছৌচং ধর্ম্মাচারশ্চ যাদৃশঃ। তত্র তন্নাবমন্যেত ধর্ম্মস্তত্রৈব তাদৃশঃ॥ যেষু স্থানেষু যে দেবা যেষু দেশেষু যে দ্বিজাঃ। যেষু স্থানেষু যত্তোয়ং যা চ যত্রৈব মৃত্তিকা॥*॥ আচমনে উদকগ্রহণপ্রকারং পরিমাণ-ঞ্চাহ ভরদ্বাজঃ। আয়তং পর্ব্বণাং কৃত্বা গোকর্ণাকৃতিবৎ করং। সংহতাঙ্গুলিনা তোয়ং গৃহীত্বা পাণিনা দ্বিজঃ॥ মুক্তাঙ্গুষ্ঠ-কনিষ্ঠাভ্যাং শেষেণাচমনঞ্চরেৎ। মাষ-মজ্জনমাত্রাস্তু সংগৃহ্য ত্রিঃ পিবেদপঃ॥ পাণিনা দক্ষিণেন। ত্রিঃ পিবেদ্দক্ষিণে-নাপি ইত্যাদিপুরাণোক্তেঃ। মার্কণ্ডেয়ঃ। সপবিত্রেণ হস্তেন কুর্য্যাদাচমনক্রিয়াং। নোচ্ছিষ্টং তৎ পবিত্রন্তু ভুক্তোচ্ছিষ্টন্তু বর্জ্জয়েৎ॥ মদনপারিজাতে হারীতঃ। গ্রন্থির্যস্য পবিত্রস্য ন তেনাচমনঞ্চরেৎ। গ্রন্থনাদ্গ্রন্থিরিতি সমুদ্রকরেঽপি। আচ-মনানুবৃত্তৌ দেবলঃ। ন গচ্ছন্ন শয়ানশ্চ ন চলন্ন পরান্ স্পৃশন্। ন হসন্নৈব সং-জল্পন্নাত্মানঞ্চৈব বীক্ষয়ন্॥ চলন্ কম্পমান ইতি রত্নাকরঃ॥ আত্মানং আত্মস্থানং হৃদয়ং। বীক্ষয়ন্নিতি স্বার্থে ণিচ্। কেশা-ন্নীবীমধঃকায়ং ন স্পৃশন্ ধরণীমপি। যদি স্পৃশতি চৈতানি ভূয়ঃ প্রক্ষালয়েৎ করং॥ অধঃকায়ং নাভেরধঃপ্রদেশং। করং দক্ষিণং। আচমনানুবৃত্তৌ গোভিলঃ।

নান্তরীয়ৈকদেশেন কল্পয়িত্বোত্তরীয়কমিতি। অন্তরীয়মধঃপরীধানং তদেকদেশমুত্তরীয়ং কৃত্বা মরীচিঃ। ন বহির্জানুস্ত্বরয়া নাসনস্থো ন চোত্থিতঃ। ন পাদুকাস্থোঽন্যচিত্তঃ শুচিঃ প্রযতমানসঃ॥ উপস্পৃশ্য দ্বিজো নিত্যং শুদ্ধঃ পূতো ভবেন্নরঃ। ভুক্ত্বাসনস্থো নাচামেন্নান্যকালে কদাচন॥ জলস্থলোভয়কর্ম্মানুষ্ঠানার্থস্তু জলস্থৈকচরণেনাচমনং কর্ত্তব্যমিত্যাহ পৈঠীনসিঃ। অন্তরুদকে আচান্তোঽন্তরেব শুদ্ধঃ স্যাৎ বহিরুদকে আচান্তো বহিরেব শুদ্ধঃ স্যাৎ তস্মাদন্তরেকং বহিরেকঞ্চ কৃত্বা পাদমাচামেৎ সর্ব্বত্র শুদ্ধো ভবতীতি। জলে তূত্তিষ্ঠন্নাচামেৎ। জানোরূর্দ্ধং জলে তিষ্ঠন্নাচান্তঃ শুচিতামিয়াৎ। অধস্তাৎ শতকৃত্বোঽপি সমাচান্তো ন শুধ্যতীতি বিষ্ণূক্তেঃ॥ হারীতঃ। আর্দ্রবাসা জলে কুর্য্যাত্তর্পণাচমনং জপং। শুষ্কবাসাঃ স্থলে কুর্য্যাত্তর্পণাচমনং জপং॥ কাত্যায়নঃ। স্নানমাচমনং হোমং ভোজনং দেবতার্চ্চনং। প্রৌঢ়পাদো ন কুর্ব্বীত স্বাধ্যায়ং পিতৃতর্পণং॥ আসনারূঢ়পাদস্তু জানুনোর্জ্জ্ঘয়োস্তথা। কৃতাবসক্থিকো যস্তু প্রৌঢ়পাদঃ স উচ্যতে॥ আসনারূঢ়পাদঃ আসনারোপিতপাদতলঃ। জানুনোর্জ্জ্ঘয়োঃ কৃতাবসক্থিকো বস্ত্রাদিনা কৃতপৃষ্ঠজানুজঙ্ঘাবন্ধঃ। তদ্বয়েন ভেদপ্রতীতেঃ প্রৌঢ়পাদস্য দ্বিবিধত্বং প্রতীয়তে॥ *॥ অত্র চ অনেকোদ্বাহে দারুশিলে ভূমিসমে ইষ্টকাশ্চ সঙ্কীর্ণীভূতা ইতি বৌধায়নবচনাত্তথাবিধে আরূঢ়পাদোঽপি কুর্য্যাৎ।

ব্যাসঃ। শিরঃ প্রাবৃত্য কণ্ঠং বা মুক্তকচ্ছশিখোঽপি বা। অকৃত্বা পাদয়োঃ শৌচমাচান্তোঽপ্যশুচির্ভবেৎ॥ তথা। অপঃ পাণিনখাগ্রেণ আচামেদ্যস্তু ব্রাহ্মণঃ। সুরাপানেন তত্তুল্যমিত্যেবমৃষিরব্রবীৎ॥ সংবৃত্যেতি মুখং সংবৃত্য অলোমকোষ্ঠস্পর্শো যথা ন ভবতীতি তাৎপর্য্যং। তথা চ বশিষ্ঠঃ। আচান্তঃ পুনরাচামেদ্বাসো বিপরিধায় চ। ওষ্ঠৌ চ সংস্পৃশ্য তথা যত্র স্যাতামলোমকৌ॥ এবঞ্চ প্রাগুক্তহারীতবচনে ওষ্ঠয়োর্ম্মার্জ্জনমুক্তং তৎ সলোমকয়োরেবেতি। এতদনন্তরং বামহস্তং পাদৌ শিরশ্চ দক্ষিণেন পাণিনাভ্যুক্ষয়েৎ। তথা চ কামধেনাবাপস্তম্বঃ। ত্রিরাচামেৎ হৃদ্গাভিস্ত্রিরোষ্ঠৌ পরিমৃজেৎ দ্বিরিত্যেকে দক্ষিণেন পাণিনা সব্যং প্রোক্ষ্য পাদৌ শিরশ্চেতি। গোভিলঃ। ত্রিরাচামেৎ দ্বিঃ পরিমৃজীত পাদাবভ্যুক্ষ্য শিরোঽভ্যুক্ষয়েদিতি ইন্দ্রিয়াণ্যদ্ভিঃ স্পৃশেৎ অক্ষিণী নাসিকে কর্ণাবিতি। ইন্দ্রিয়াণি ইন্দ্রিয়ায়তনানি ইন্দ্রিয়াণামমূর্ত্তত্বাৎ। তিসৃভিরিতি তর্জ্জনীমধ্যমানামিকাভিঃ॥*॥ সর্ব্বত্রাঙ্গুষ্ঠযোগেন আচমনকারণমাহ পৈঠীনসিঃ। অগ্নিরঙ্গুষ্ঠস্তস্মাত্তেনাপি সর্ব্বাণি স্থানানি স্পৃশেৎ॥ নিষ্ঠীবনাদাবাচমনং যথা। বায়ুপুরাণে। নিষ্ঠীবনে তথাভ্যঙ্গে তথা পাদাবসেচনে। উচ্ছিষ্টস্য চ সংভাষাদশুচ্যপহতস্য চ॥ সন্দেহেষু চ সর্ব্বেষু শিখাং মুক্ত্বা তথৈব চ। বিনা

যজ্ঞোপবীতেন নিত্যমেব উপস্পৃশেৎ ॥ উষ্ট্রবায়সসংস্পর্শে দর্শনে চান্ত্যবাসিনাং ॥ হারীতঃ। স্ত্রীশূদ্রোচ্ছিষ্টসংভাষণে মূত্রপুরীষোৎসর্গদর্শনে দেবমভিগন্তুকাম আচামেদিতি। যাজ্ঞবল্ক্যঃ। স্নাত্বা পীত্বা ক্ষুতে সুপ্তে ভুক্ত্বা রথ্যোপসর্পণে। আচান্তঃ পুনরাচামেদ্বাসো বিপরিধায় চ ॥ ব্রহ্মপুরাণে। হোমে ভোজনকালে চ সন্ধ্যয়োরুভয়োরপি। আচান্তঃ পুনরাচামেদন্যত্রাপি সকৃৎ সকৃৎ ॥ দ্বিরাচম্য ততঃ শুদ্ধঃ স্মৃত্বা বিষ্ণুং সনাতনং ॥ * ॥ স্মৃতিঃ। ক্ষুতে নিষ্ঠীবিতে সুপ্তে পরিধানেঽশ্রুপাতনে। কর্ম্মস্থ এষু নাচামেৎ দক্ষিণং শ্রবণং স্পৃশেৎ ॥ অত্র হেতুমাহ পরাশরঃ। প্রভাসাদীনি তীর্থানি গঙ্গাদ্যাঃ সরিতস্তথা। বিপ্রস্য দক্ষিণে কর্ণে বসন্তি মনুরব্রবীৎ ॥ সাংখ্যায়নঃ। আদিত্যা বসবো রুদ্রা বায়ুরগ্নিশ্চ ধর্ম্মরাট্। বিপ্রস্য দক্ষিণে কর্ণে নিত্যং তিষ্ঠন্তি দেবতাঃ ॥ পুরাণসারবায়ুপুরাণয়োঃ। যঃ কর্ম্ম কুরুতে মোহাদনাচম্যৈব নাস্তিকঃ। ভবন্তি হি বৃথা তস্য ক্রিয়াঃ সর্ব্বা ন সংশয়ঃ ॥ * ॥ অথ দন্তধাবনং। বৃদ্ধশাতাতপঃ। মুখে পর্য্যুষিতে নিত্যং ভবত্যপ্রযতো নরঃ। তস্মাৎ সর্ব্বপ্রযত্নেন ভক্ষয়েদ্দন্তধাবনং ॥ * ॥ শ্রাদ্ধদিনাদৌ তস্য বর্জ্যত্বং যথা বিষ্ণুঃ। শ্রাদ্ধে জন্মদিনে চৈব বিবাহেঽজীর্ণসম্ভবে। ব্রতে চৈবোপবাসে চ বর্জ্জয়েদ্দন্তধাবনং ॥ দন্তধাবনমদ্যাদুদঙ্মুখঃ প্রাঙ্মুখো বেতি ॥ * ॥ দন্তলগ্নস্য দন্ততুল্যত্বং যথা। গোতমঃ। দন্তশ্লিষ্টে দন্তবদন্যত্র জিহ্বাভিঘর্ষণাৎ প্রাক্ চ্যুতেরিত্যেকে। চ্যুতেরাস্রাববদ্বিদ্যান্নিগরন্নেব তচ্ছুচিরিতি। জিহ্বাভিঘর্ষণাযোগ্যং দন্তলগ্নং অশৌচজনকং ন ভবতীত্যর্থঃ। ইদঞ্চানুপলভ্যমানরসবিষয়ং। দন্তবদ্দন্তলগ্নেষু রসবর্জ্জমিতি শঙ্খবচনাৎ। জিহ্বাভিঘর্ষণেঽপি অশক্যোদ্ধরণে ন দোষঃ। ভোজনে দন্তলগ্নানি নির্হৃত্যাচমনঞ্চরেৎ। দন্তলগ্নমসংহার্য্যং লেপং মন্যেত দন্তবৎ॥ ন তত্র কুর্য্যাদ্বহুশো যত্নমুদ্ধরণে পুনঃ॥ ভবেদশৌচমত্যর্থং তৃণবেধাদ্ব্রণে কৃতে। ইতি দেবলবচনাৎ। চ্যুতেরিত্যুপলভ্যমানরসবিষয়ং। আস্রাবো লালা তদ্বন্নিগরন্নিত্যর্থঃ। অতএব শোণিতং যথা ন ভবতি তথা তৃণাদিনা দন্তলগ্ননিঃসারণাচরণং ॥ * ॥ ছন্দোগপরিশিষ্টং। নারদাদ্যুক্তবার্ক্ষেয়মষ্টাঙ্গুলমপাটিতং। সত্বচং দন্তকাষ্ঠং স্যাত্তদগ্রেণ প্রধাবয়েৎ ॥ উত্থায় নেত্রে প্রক্ষাল্য শুচির্ভূত্বা সমাহিতঃ। পরিজপ্য তু মন্ত্রেণ ভক্ষয়েদ্দন্তধাবনং ॥ আয়ুর্ব্বলং যশো বর্চ্চঃ প্রজাঃ পশুবসূনি চ। ব্রহ্মপ্রজ্ঞাঞ্চ মেধাঞ্চ ত্বন্নো ধেহি বনস্পতে ॥ শুচির্ভূত্বা দ্বিরাচমনেনেতি শেষঃ ॥ * ॥ নরসিংহপুরাণং। দন্তকাষ্ঠস্য বক্ষ্যামি সমাসেন প্রশস্ততাং। সর্ব্বে কণ্টকিনঃ পুণ্যাঃ ক্ষীরিণশ্চ যশস্বিনঃ ॥ প্রমাণং স্থৌল্যঞ্চাহ বিষ্ণুঃ। কনীন্যগ্রনিভস্থৌল্যং সকূর্চ্চং দ্বাদশাঙ্গুলং। প্রাতর্ভূত্বা চ যতবাক্ ভক্ষয়েদ্দন্তধাবনং ॥ প্রক্ষাল্য ভুক্ত্বা তজ্জহ্যাচ্ছুচৌ দেশে সমাহিতঃ। সকূর্চ্চং

দলিতাগ্রং। দ্বাদশাঙ্গুলস্তু ছন্দোগেতরেষাং। দ্বাদশাঙ্গুলস্তু বিপ্রাণাং ক্ষত্রিয়াণাং নবাঙ্গুলং। অষ্টাঙ্গুলস্তু বৈশ্যানাং শূদ্রাণাস্তু ষড়ঙ্গুলং। ভক্ষয়েৎ শাস্ত্রদৃষ্টানি পর্ব্বস্বপি চ বর্জ্জয়েৎ॥ * ॥ তিথিবিশেষে তস্য বর্জ্জনং যথা। নৃসিংহপুরাণং। প্রতিপদ্দর্শষষ্ঠীষু নবম্যাঞ্চৈব সপ্তমাঃ। দন্তানাং কাষ্ঠসংযোগো দহত্যাসপ্তমং কুলং॥ অলাভে দন্তকাষ্ঠানাং প্রতিষিদ্ধদিনে তথা। অপাং দ্বাদশগণ্ডূষৈর্মুখশুদ্ধির্ব্বিধীয়তে॥ গণ্ডূষস্য দন্তকাষ্ঠকার্য্যকারিত্বেঽপি ন তত্র মন্ত্রান্বয়ঃ। শাতাতপঃ। প্রতিপদ্দর্শষষ্ঠীষু নবম্যাং দন্তধাবনং। পত্রৈরন্যত্র কাষ্ঠৈশ্চ জিহ্বোল্লেখঃ সদৈব হি॥ * ॥ গুবাকাদিপত্রৈর্দ্দন্তধাবনং নিষিদ্ধং যথা। ক্রিয়াকৌমুদ্যাং বশিষ্ঠঃ। গুবাকতালহিন্তালাস্তথা তাড়ী চ কেতকী। খর্জ্জূরনারিকেলৌ চ সপ্তৈতে তৃণরাজকাঃ॥ তৃণরাজশিরাপত্রৈর্যঃ কুর্য্যাদ্দন্তধাবনং। তাবদ্ভবতি চাণ্ডালো যাবদ্গাং নৈব পশ্যতি॥ পরাশরভাষ্যে যাজ্ঞবল্ক্যঃ। নেষ্টকালোষ্টপাষাণৈরিতরাঙ্গুলিভিস্তথা। ত্যক্ত্বা অনামিকাঙ্গুষ্ঠৌ বর্জ্জয়েদ্দন্তধাবনং॥ * ॥ প্রচেতাঃ। মধ্যাহ্নস্নানকালে তু যঃ কুর্য্যাদ্দন্তধাবনং। নিরাশাস্তস্য গচ্ছন্তি দেবাঃ পিতৃগণৈঃ সহ॥ * ॥ স্মৃতিঃ। বমন্তং জৃম্ভমাণঞ্চ কুর্ব্বন্তং দন্তধাবনং। অভ্যক্তশিরসঞ্চৈব স্নাতং নৈবাভিবাদয়েৎ॥ হারীতঃ। শুচিং দেবাভিরক্ষন্তি পিতরঃ শুচিমন্বিয়ুঃ। শুচের্বিভ্যতি রক্ষাংসি যে চান্যে দুষ্টচারিণঃ॥ তথা। স্নানং দানং তপস্ত্যাগো মন্ত্রকর্ম্মবিধিক্রিয়াঃ। মঙ্গলাচারনিয়মাঃ শৌচভ্রষ্টস্য নিষ্ফলাঃ॥ শৌচন্তু দ্বিবিধং প্রোক্তং বাহ্যমাভ্যন্তরস্তথা। মৃজ্জলাভ্যাং ভবেৎ বাহ্যং ভাবশুদ্ধিস্তথাপরং॥ * ॥ অথ প্রাতঃস্নানসন্ধ্যে। ব্রহ্মপুরাণং। প্রাতঃস্নানং ততঃ কৃত্বা সংক্ষেপেণ যথোদিতং। সন্ধ্যাঞ্চাপি তথা কুর্য্যাৎ নিত্যনৈমিত্তিকে তথা॥ কাত্যায়নঃ। যথাহনি তথা প্রাতর্নিত্যং স্নায়াদনাতুরঃ। দন্তান্ প্রক্ষাল্য নদ্যাদৌ গেহে চেত্তদমন্ত্রবৎ॥ দন্তান্ প্রক্ষাল্য প্রাতরনাতুরঃ স্নায়াৎ॥ * ॥ আতুরং বিশেষয়তি আয়ুর্ব্বেদীয়ে। স্নানমর্দ্দিতনেত্রাস্যকর্ণরোগাতিসারিষু। আধ্মানপীনসাজীর্ণভুক্তবৎসু চ গর্হিতং॥ তৎকালমাহ বিষ্ণুঃ। প্রাতঃস্নায্যরুণকিরণগ্রস্তাং প্রাচীমবলোক্য স্নায়াৎ। ইতি সমুদ্রকরধৃতং॥ * ॥ মৃত্তিকাতিলকং কুর্য্যাৎ স্নাত্বা হুত্বা চ ভস্মনা। দৃষ্টদোষবিঘাতার্থং চাণ্ডালাদ্যাদিদর্শনে॥ উশনাঃ। অভাবে তুদকেনাপি পিতৃদৈবতমর্চ্চয়েৎ। ব্রহ্মাণ্ডপুরাণে। কর্ম্মাদৌ তিলকং কুর্য্যাদ্রূপং তদ্বৈষ্ণবং পরং। গোপ্রদানং জপো হোমঃ স্বাধ্যায়ঃ পিতৃতর্পণং॥ ভস্মীভবতি তৎ সর্ব্বমূর্দ্ধপুণ্ড্রং বিনা কৃতং। ব্রাহ্মে। অঙ্গুষ্ঠঃ পুষ্টিদঃ প্রোক্তো মধ্যমায়ুষ্করী ভবেৎ। অনামিকার্থদা নিত্যং মুক্তিদা চ প্রদেশিনী॥ ব্যাসঃ। জাহ্নবীতীরসম্ভূতাং মৃদং মূর্দ্ধ্না বিভর্ত্তি যঃ।

বিভর্ত্তি রূপং সোঽর্কস্য তমোনাশায় কেবলং ॥*॥ গোপীচন্দনমাহ শাতাতপঃ। গোমতীতীরসম্ভূতাং গোপীদেহসমুদ্ভবাং। মৃদং মূর্দ্ধ্না বহেদ্যস্তু সর্ব্বপাপৈঃ প্রমুচ্যতে ॥ ব্রহ্মাণ্ডপুরাণে। ঊর্দ্ধপুণ্ড্রং মৃদা কুর্য্যাৎ ত্রিপুণ্ড্রং ভস্মনা সদা। তিলকং বৈ দ্বিজঃ কুর্য্যাৎ চন্দনেন যদৃচ্ছয়া ॥ ঊর্দ্ধপুণ্ড্রং দ্বিজঃ কুর্য্যাৎ ক্ষত্রিয়শ্চ ত্রিপুণ্ড্রকং। অর্দ্ধচন্দ্রঞ্চ বৈশ্যশ্চ বর্ত্তুলং শূদ্রযোনিজঃ ॥ * ॥ আতুরাণাস্তু। অশিরস্কং ভবেৎ স্নানং স্নানাশক্তৌ চ কর্ম্মিণাং। আর্দ্রেণ বাসসা বাপি মার্জ্জনং দৈহিকং বিদুঃ ॥ ইতি জাবালবচনাৎ শিরো বিহায় গাত্রপ্রক্ষালনং। তদশক্তাবার্দ্রবাসসা গাত্রমার্জনং কুর্য্যাৎ তদনন্তরং সন্ধ্যাং কুর্য্যাৎ। এতৎপরমেব প্রাতঃসন্ধ্যাং ততঃ কুর্য্যাৎ দন্তধাবনপূর্ব্বকমিতি যাজ্ঞবল্ক্যবচনং। ইত্যাহ্নিকাচারতত্ত্বং ॥

প্রাতঃসন্ধ্যা (স্ত্রী) সন্ধ্যাদেহপূর্ব্বার্দ্ধং। তদুৎপত্তির্যথা। তস্মিন্ গিরৌ চন্দ্রভাগে বৃহল্লোহিততীরগাং। সন্ধ্যাং দৃষ্ট্বাথ পপ্রচ্ছ বশিষ্ঠঃ সাদরস্তদা ॥ বশিষ্ঠ উবাচ। কিমর্থমাগতা ভদ্রে নির্জনং ত্বং মহীধরং। কস্য বা তনয়া গৌরি কিং বা তব চিকীর্ষিতং ॥ এতদিচ্ছাম্যহং শ্রোতুং যদি গুহ্যং ন তে ভবেৎ। বদনং পূর্ণচন্দ্রাভং নিশ্রীকং বা কথং তব ॥ শ্রীমার্কণ্ডেয় উবাচ। তৎ শ্রুত্বা বচনং তস্য বশিষ্ঠস্য মহাত্মনঃ। দৃষ্ট্বা চ তম্মহাত্মানং জ্বলন্তমিব পাবকং ॥ শরীরধৃগ্‌ব্রহ্মচর্য্যসদৃশং তং জটাধরং। সাদরং প্রণিপত্যাথ সন্ধ্যোবাচ তপোধনং ॥ সন্ধ্যোবাচ। যদর্থমাগতা শৈলং সিদ্ধং তন্মে তপোধন। তব দর্শনমাত্রেণ তন্মে সেৎস্যতি বা বিভো ॥ তপঃ কর্ত্তুমহং ব্রহ্মন্ নির্জনং শৈলমাগতা। ব্রহ্মণোঽহং মনোজ্জাতা সন্ধ্যা নাম্না চ বিশ্রুতা ॥ নোপদেশমহং জানে তপসো মুনিসত্তম। যদি তে যুজ্যতে গুহ্যং মাং ত্বং সমুপদেশয় ॥ এতচ্চিকীর্ষিতং গুহ্যং নান্যৎ কিঞ্চ ন বিদ্যতে। অজ্ঞাত্বা তপসো ভাবং তপোবনমুপস্থিতা। চিন্তয়া পরিশুষ্যেঽহং বেপতে চ মনঃ সদা ॥ শ্রীমার্কণ্ডেয় উবাচ। আকর্ণ্য তস্যা বচনং বশিষ্ঠো ব্রহ্মণঃ সুতঃ। স্বয়ং স সর্ব্বকৃত্যজ্ঞো নান্যৎ কিঞ্চন পৃষ্টবান্ ॥ অথ তাং নিয়তাত্মানং তপসেঽতিধৃতোদ্যমাং। বশিষ্ঠো মন্ত্রয়াঞ্চক্রে গুরুবৎ শিষ্যবত্তদা ॥ বশিষ্ঠ উবাচ। পরমং যো মহত্তেজঃ পরমং যো মহত্তপঃ। পরমঃ পরমারাধ্যো বিষ্ণুর্মনসি ধীয়তাং ॥ মন্ত্রেণানেন দেবেশং 'বিষ্ণুং ভজ শুভাননে। ওঁ নমো বাসুদেবায় ইত্যনেন চ সন্ততং ॥ মার্কণ্ডেয় উবাচ। উপদিশ্য বশিষ্ঠোঽথ সন্ধ্যায়ৈ তপসঃ ক্রিয়াং। তামাভাষ্য যথান্যায়ং তত্রৈবান্তর্দধে মুনিঃ ॥ যথোক্তস্তু বশিষ্ঠেন মন্ত্রং তপসি সাধনং। ব্রতেন তেন গোবিন্দং পূজয়ামাস ভক্তিতঃ ॥ প্রসন্নস্তেন রূপেণ যদ্রূপং চিন্তিতং তয়া। পুরঃ প্রত্যক্ষতাং যাতস্তস্যাং বিষ্ণুর্জগৎপতিঃ ॥ নিমীলিতাক্ষ্যা-

স্তস্যাস্ত প্রবিশ্য হৃদয়ং হরিঃ। দিব্যে-ঙ্গিতং দদৌ তস্যৈ বাচং দিব্যে চ চক্ষুষী ॥ দিব্যং জ্ঞানং দিব্যচক্ষুর্দিব্যাং বাচমবাপ্য সা। প্রত্যক্ষং বীক্ষ্য গোবিন্দং তুষ্টাব জগতাং পতিং ॥ অথ তস্যাঃ শরীরস্তু বল্কলাজিনসংবৃতং। পরিক্ষীণং জটা-ব্রাতৈঃ পবিত্রং মূর্দ্ধ্নি রাজিতং ॥ নিরীক্ষ্য কৃপয়াবিষ্টো হরিঃ প্রোবাচ তামিদং। শ্রীভগবানুবাচ। যঃ পশ্যতি সকামস্ত্বাং পাণিগ্রাহমৃতে তব। স সদ্যঃ ক্লীবতাং প্রাপ্য দুর্ব্বলত্বং গমিষ্যতি ॥ পতিস্তব মহাভাগস্তপোরূপসমন্বিতঃ। সপ্তকল্পান্ত-জীবী চ ভবিষ্যতি সহ ত্বয়া ॥ অন্যচ্চ তে বদিষ্যামি পূর্ব্বং যন্মনসি স্থিতং। অগ্নৌ শরীরত্যাগস্তে পূর্ব্বমেব প্রতিশ্রুতঃ ॥ স চ মেধাতিথের্যজ্ঞে মুনের্দ্বাদশবার্ষিকে। ঘৃতপ্রজ্বলিতে বহ্নৌ ন চিরাৎ ক্রিয়তাং ত্বয়া ॥ তত্র গত্বা স্বয়ং ছন্নং মুনিভি-র্নোপলক্ষিতা। মৎপ্রসাদাদ্বহ্নিজাতা তস্য পুত্রী ভবিষ্যসি ॥ যস্তে বা বাঞ্ছনীয়ো-ঽস্তি স্বামী মনসি কশ্চন। তন্নিধায় নিজ-স্বান্তে ত্যজ বহ্নৌ বপুঃ স্বকং ॥ নারায়ণঃ স্বয়ং সন্ধ্যাং পস্পর্শাথাগ্রপাণিনা। ততঃ পুরোডাশময়ং তৎ শরীরমভূৎ ক্ষণাৎ ॥ সমিদ্ধেঽগ্নৌ মহাযজ্ঞে মুনিভির্নোপ-লক্ষিতা। তদা বিষ্ণোঃ প্রসাদেন সা বিবেশ বিধেঃ সুতা ॥ বহ্নিস্তস্যাঃ শরীরং তদ্দগ্ধ্বা সূর্য্যস্য মণ্ডলে। শুদ্ধং প্রবেশয়া-মাস বিষ্ণোরেবাজ্ঞয়া পুনঃ ॥ সূর্য্যো দ্বিধা বিভজ্যাথ তৎ শরীরং তদা রথে। স্বকে সংস্থাপয়ামাস প্রীতয়ে পিতৃদেবয়োঃ ॥ যদূর্দ্ধভাগস্তস্যাস্ত শরীরস্য দ্বিজোত্তমাঃ। প্রাতঃসন্ধ্যাভবৎ সা তু অহোরাত্রাদি-মধ্যগা ॥ যচ্ছেষভাগস্তস্যাস্ত অহোরাত্রান্ত-মধ্যগঃ। স সায়মভবৎ সন্ধ্যা পিতৃপ্রীতি-প্রিয়া সদা ॥ সূর্য্যোদয়াচ্চ প্রথমং যদা স্যাদরুণোদয়ঃ। প্রাতঃসন্ধ্যা তদোদেতি দেবানাং প্রীতিকারিণী ॥ অস্তং গতে ততঃ সূর্য্যে শোণপদ্মনিভা সদা। উদেতি সায়ংসন্ধ্যাপি পিতৃণাং মোদকারিণী ॥ ইতি কালিকাপুরাণে ২২ অধ্যায়ঃ ॥ * ॥

প্রাতঃকালকর্ত্তব্যবৈদিকতান্ত্রিকোপাসনা-বিশেষঃ। বৈদিকে তদনুষ্ঠানানি যথা। মার্জনং ১ প্রার্থনং ২ প্রাণায়ামঃ ৩ আচ-মনং ৪ আপোমার্জনং ৫ অঘমর্ষণং ৬ সূর্য্যোপস্থানং ৭ দেবতর্পণং ৮ সাবিত্র্যা-বাহনং ৯ সাবিত্রীধ্যানং ১০ সাবিত্রী-জপঃ ১১ সাবিত্রীবিসর্জনং ১২ আদিত্য-শুক্রপ্রীণনং ১৩ আত্মরক্ষণং ১৪ রুদ্রোপ-স্থানং ১৫ ব্রহ্মাদিভ্যো জলদানং ১৬ সূর্য্যার্ঘদানং ১৭ সূর্য্যনতিঃ ১৮ ॥ * ॥ তান্ত্রিকে তদনুষ্ঠানানি যথা। মন্ত্রাচ-মনং ১ জলশুদ্ধিঃ ২ করন্যাসঃ ৩ অঙ্গ-ন্যাসঃ ৪ অঘমর্ষণং ৫ হস্তক্ষালনং ৬ আচমনং ৭ সূর্য্যার্ঘদানং ৮ গায়ত্র্যা জলদানং ৯ তর্পণং ১০ গায়ত্রীধ্যানং ১১ গায়ত্রীজপঃ ১২ জপসমর্পণং ১৩ ইষ্ট-দেবধ্যানং ১৪ প্রাণায়ামঃ ১৫ মূলমন্ত্র-জপঃ ১৬ জপসমর্পণং ১৭ প্রাণায়ামঃ ১৮ নমস্কারঃ ১৯। ইতি স্মৃতিতন্ত্রে ॥

প্রাতঃস্নানং (ক্লী) প্রভাতকর্ত্তব্যাবগাহনাদি। যথা। উষঃকালে তু সংপ্রাপ্তে কৃত্বা চাবশ্যকং বুধঃ। স্নায়ান্নদীষু শুদ্ধাসু শৌচং কৃত্বা যথাবিধি॥ প্রাতঃস্নানেন পূয়ন্তে যেঽপি পাপকৃতো জনাঃ। তস্মাৎ সর্ব্বপ্রযত্নেন প্রাতঃস্নানং সমাচরেৎ॥ প্রাতঃস্নানং প্রশংসন্তি দৃষ্টাদৃষ্টকরং হি তৎ। সুখসুপ্তস্য সততং লালাদ্যাঃ সংস্রবন্তি হি॥ অতো নৈবাচরেৎ কর্ম্মাণ্যকৃত্বা স্নানমাদিতঃ। অলক্ষ্মীঃ কালকর্ণী চ দুঃস্বপ্নং দুর্বিচিন্তিতং॥ প্রাতঃস্নানেন পাপানি ধূয়ন্তে নাত্র সংশয়ঃ। ন চ স্নানং বিনা পুংসাং প্রাশস্ত্যং কর্ম্ম সংস্মৃতং॥ হোমে জপ্যে বিশেষেণ তস্মাৎ স্নানং সমাচরেৎ। অশক্তাবশিরস্কন্তু স্নানমস্য বিধীয়তে॥ ইতি গারুড়ে ৫০ অধ্যায়ঃ॥*॥ অপি চ। প্রাতঃ সংক্ষেপতঃ স্নানং মধ্যাহ্নে বিধিবিস্তরং। প্রাতর্মধ্যাহ্নয়োঃ স্নানং বানপ্রস্থগৃহস্থয়োঃ॥ যতেস্ত্রিসবনং প্রোক্তং সকৃত্তু ব্রহ্মচারিণঃ। অপি চ। উষস্যুষসি যৎ স্নানং সন্ধ্যায়ামুদিতে রবৌ। প্রাজাপত্যেন তত্তুল্যং মহাপাতকনাশনং॥ যৎ ফলং দ্বাদশাব্দানি প্রাজাপত্যৈঃ কৃতৈর্ভবেৎ। প্রাতঃস্নায়ী তদাপ্নোতি বর্ষেণ শ্রদ্ধয়ান্বিতঃ॥ য ইচ্ছেদ্বিপুলান্ ভোগান্ চন্দ্রসূর্য্যগ্রহোপমান্। প্রাতঃস্নায়ী ভবেন্নিত্যং দ্বৌ মাসৌ মাঘফাল্গুনৌ॥ ষট্তিলী মাঘমাসন্তু প্রাতঃস্নায়ী হবিষ্যভুক্। অতিপাপং মহাঘোরং মাসাদেব ব্যপোহতি॥ মাতরং পিতরঞ্চাপি ভ্রাতরং সুহৃদং গুরুং। যমুদ্দিশ্য নিমজ্জেত দ্বাদশাংশং লভেত্তু সঃ॥ ইতি গারুড়ে ২১৫ অধ্যায়ঃ॥

প্রাতরাশঃ (পুং) প্রাতঃকালীনভোজনং। তৎপর্য্যায়ঃ। কল্যবর্ত্তঃ ২। ইতি হেমচন্দ্রঃ॥ প্রাতর্ভোজনং ৩। ইতি ত্রিকাণ্ডশেষঃ॥ কল্যজগ্ধিঃ ৪। ইতি জটাধরঃ॥

প্রাতর্গেয়ঃ (পুং) প্রাতঃকালে গেয় ঈশ্বরাদির্যৈঃ। স্তুতিপাঠকঃ। তৎপর্য্যায়ঃ। স্তুতিব্রতঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥ প্রভাতগাতব্যে ত্রি॥

প্রাতর্ভোক্তা [ঋ] (পুং) কাকঃ। ইতি শব্দচন্দ্রিকা॥ প্রভাতে ভোজনকর্ত্তরি ত্রি॥

প্রাতর্ভোজনং (ক্লী) প্রাতরাশঃ। ইতি জটাধরঃ॥

প্রাতিকা (স্ত্রী) জবা। ইতি রাজনির্ঘণ্টঃ॥

প্রাতিপদিকঃ (পুং) অগ্নিঃ। যথা। ইত্থম্ভূতো মহানগ্নির্ব্রহ্মক্রোধোদ্ভবো মহান্। উবাচ দেবং ব্রহ্মাণং তিথির্মে দীয়তাং প্রভো। যস্যামহং সমস্তস্য জগতঃ খ্যাতিমাপ্নুয়াং॥ ব্রহ্মোবাচ। দেবানামথ যক্ষাণাং গন্ধর্ব্বাণাঞ্চ সত্তম। আদৌ প্রতিপদা যেন ত্বমুৎপন্নোঽসি পাবক॥ ত্বৎপদাৎ প্রাতিপদিকং সংভবিষ্যন্তি দেবতাঃ। অতস্তে প্রতিপন্নাম তিথিরেষা ভবিষ্যতি॥ ইতি বরাহপুরাণং॥ নাম্নি ক্লী। যথা। অধাতুবিভক্ত্যর্থবৎ প্রাতিপদিকং। ইতি সুপদ্মব্যাকরণং॥

প্রাতিভাব্যং (ক্লী) প্রতিভুবো ভাবঃ। জামিনী

ইতি ভাসা। যথা। সাক্ষিত্বং প্রাতিভাব্যঞ্চ দানং গ্রহণমেব চ। বিভক্তা ভ্রাতরঃ কুর্য্যুর্নাবিভক্তাঃ পরস্পরং ॥ ইতি দায়ভাগঃ ॥

প্রাতিস্বিকং (ত্রি) অসাধারণং। তৎপর্য্যায়ঃ। অন্যাসাধারণং ২ আবেশিকং ৩। ইতি ত্রিকাণ্ডশেষঃ ॥

প্রাতিহারঃ } (পুং) প্রাতিহারিকঃ। ইত্য-
প্রাতিহারকঃ } মরটীকায়াং ভরতঃ ॥

প্রাতিহারিকঃ (পুং) মায়াকারঃ। ইত্যমরঃ ॥

প্রাতীপঃ (পুং) প্রতীপপুত্রঃ। শান্তনুরাজঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

প্রাথমকল্পিকঃ (পুং) প্রথমারব্ধবেদাধ্যয়নঃ। প্রথমং শিক্ষণীয়ং কল্পং শাস্ত্রমধীতে যঃ ইত্যর্থে ঞিকঃ। তৎপর্য্যায়ঃ। শৈক্ষঃ ২। ইত্যমরভরতৌ ॥

প্রাথমিকঃ (ত্রি) প্রথমভবঃ। যথা। যত্রাবিরলক্রমেণ সিদ্ধিসিষাধয়িষানুমিতয়স্তত্র দ্বিতীয়ক্ষণে পক্ষতাসম্পত্ত্যর্থং দ্বিতীয়ঃ সিষাধয়িষাবিরহো বিশেষণমস্তু সিদ্ধেঃ প্রাথমিকস্তু কিমর্থং। ইতি পক্ষতাশিরোমণিঃ ॥

প্রাথম্যং (ত্রি) প্রথমস্য ভাবঃ। যথা। অস্মাভিরেব প্রাথম্যেন নানামুনীনাং বচনৈরেবম্বিধো নিবন্ধঃ ক্রিয়তে। ইতি বিজয়রক্ষিতঃ ॥

প্রাদুঃ [স্] ব্য নাম। প্রাকাশ্যং। স্ফুটত্বং। তৎপর্য্যায়ঃ। আবিঃ ২। যথা। প্রাদুরাসীৎ। আবির্ভূতঃ। ইত্যমরভরতৌ ॥ প্রকাশঃ। সম্ভাব্যং। বৃত্তিঃ। ইতি শব্দরত্নাবলী ॥

প্রাদুর্ভাবঃ (পুং) আবির্ভাবঃ। যথা। বপুঃ প্রাদুর্ভাবাদনুমিতমিদং জন্মনি পুরা। ইতি কুবলয়ানন্দঃ ॥

প্রাদেশঃ (পুং) তর্জ্জনীসহিতবিস্তৃতা ইত্যমরঃ ॥ দেশমাত্রং। যথা। প্রাদেশো দেশমাত্রে চ তর্জ্জন্যঙ্গুষ্ঠসম্মিতে। ইতি মেদিনী ॥ অঙ্গুষ্ঠস্য প্রদেশিন্যা ব্যাসঃ প্রাদেশ উচ্যতে। ইতি দেবীপুরাণঞ্চ ॥

প্রাদেশনং (ক্লী) দানং। ইত্যমরঃ ॥

প্রাদোষঃ } (ত্রি) প্রদোষসম্বন্ধী। ইতি
প্রাদোষিকঃ } সিদ্ধান্তকৌমুদী ॥

প্রাধান্যং (ক্লী) প্রধানত্বং। প্রধানস্য ভাবঃ। যথা। বেদার্থোপনিবন্ধৃত্বাৎ প্রাধান্যং হি মনোঃ স্মৃতং। ইতি ধর্ম্মদীপিকা ॥

প্রাধ্বং ব্য অনুকূলং। ইত্যমরঃ ॥ নত্র ইতি মেদিনী

প্রাধ্বঃ (ত্রি) দূরপথঃ। প্রহ্বঃ। বন্ধঃ। ইতি হেমচন্দ্রঃ ॥ রথঃ। ইতি বোপদেবঃ ॥

প্রান্তঃ (পুং) অন্তভাগঃ। শেষসীমা। যথা। প্রান্তেষু সংসক্তনমেরুশাখং ধ্যানাস্পদং ভূতপতের্ব্বিবেশ ॥ ইতি কুমারতৃতীয়সর্গঃ ॥

প্রান্ততঃ [স্] ব্য প্রান্তভাগে। যথা। প্রাচীরং প্রান্ততো বৃতিঃ। ইত্যমরঃ ॥

প্রান্তরং (ক্লী) দূরশূন্যোঽধ্বা। ইত্যমরঃ ॥ ছায়াতরুজলাদিরহিতে পথি প্রান্তরং দূরং শূন্যো দূরশূন্যঃ দূরশ্চাসৌ শূন্যশ্চেতি বা দূরশূন্যো জলাদিবর্জ্জিতত্বাৎ ঈদৃক্ যোঽধ্বা স প্রান্তরমিত্যন্বয়ঃ। প্রকৃষ্টমন্তরং ব্যবধানমবকাশো বা অত্রেতি

প্রান্তরং। ইতি ভরতঃ॥ বিপিনং। কোটরং। ইতি মেদিনী॥

প্রান্তশূন্যং (ক্লী) দূরশূন্যপথঃ। ছায়াদি-রহিতপথঃ। ইতি শব্দরত্নাবলী॥

প্রাপণং (ক্লী) নয়নং। প্রাপ্তিঃ। প্রাপ্তি-প্রেরণা। প্রকর্ষেণ ব্যাপনং। ণ্যন্তা-দণ্যন্তাদ্বা প্রপূর্ব্বাপধাতোর্ভাবে অনট্ প্রত্যয়ঃ॥

প্রাপণিকঃ (পুং) পণ্যবিক্রয়ী। ইতি সিদ্ধান্ত-কৌমুদ্যামুণাদিবৃত্তিঃ॥

প্রাপণীয়ং (ত্রি) প্রাপ্যং। প্রাপ্যতে যৎ। প্রপূর্ব্বাপধাতোঃ কর্ম্মণ্যনীয়প্রত্যয়ঃ॥

প্রাপেয়ঃ (পুং) গন্ধর্ব্বগণবিশেষঃ। যথা। প্রবাচ্য জনয়ৎ পুত্ত্রান্ দিব্যান্ বৈ গায়নোত্তমান্। চতুর্দ্দশ দেবগন্ধর্ব্বাঃ প্রাপেয়াঃ পরিকীর্ত্তিতাঃ॥ ইত্যগ্নিপুরাণং॥

প্রাপ্তঃ (ত্রি) প্রস্থাপিতঃ। তৎপর্য্যায়ঃ। প্রণি-হিতঃ ২। লব্ধঃ। তৎপর্য্যায়ঃ। বিন্নঃ ২ ভাবিতঃ ৩ আসাদিতঃ ৪ ভূতঃ ৫। ইত্য-মরঃ॥

প্রাপ্তপঞ্চত্বং (ত্রি) মৃতং। ইত্যমরঃ॥

প্রাপ্তভাবঃ (পুং) জাতোক্ষঃ। ইতি শব্দ-চন্দ্রিকা॥ লব্ধসত্তাদৌ ত্রি॥

প্রাপ্তরূপঃ (ত্রি) পণ্ডিতঃ। মনোজ্ঞঃ। ইত্য-মরঃ॥ রূপবাংশ্চ॥

প্রাপ্তব্যং (ত্রি) প্রাপ্যং। প্রাপ্যতে যৎ। প্রপূর্ব্বাপধাতোঃ কর্ম্মণি তব্যপ্রত্যয়ঃ॥

প্রাপ্তিঃ (স্ত্রী) উদয়ঃ। ধনাদিবৃদ্ধিঃ। অধি-গমঃ। লাভঃ। ইত্যমরভরতৌ॥ প্রাপণং। সংহতিঃ। ইতি শব্দরত্নাবলী॥ অণিমা-দ্যষ্টৈশ্বর্য্যান্তর্গতৈশ্বর্য্যবিশেষঃ। স চ অভী-প্সিতপ্রাপণং। ইতি হেমচন্দ্রঃ ভরতশ্চ॥

প্রাপ্যং (ত্রি) প্রাপ্তব্যং। তৎপর্য্যায়ঃ। গম্যং ২ সমাসাদ্যং ৩। ইত্যমরঃ॥

প্রাবোধিকঃ (পুং) উষঃকালঃ। ইতি শব্দ-মালা॥ প্রাবোধকোঽপি পাঠঃ॥

প্রাভবং (ক্লী) শ্রেষ্ঠত্বং। ইতি শব্দচন্দ্রিকা॥

প্রাভাকরঃ (পুং) মীমাংসকবিশেষঃ। যথা। ব্যাপ্তিস্বরূপং নিরূপ্য পরমতনিরাকরণ-পূর্ব্বকং স্বমতেন তদ্গ্রহোপায়মভিধাতুং প্রথমং প্রাভাকরমতমুপদর্শয়তি সেয়-মিত্যাদিনা। ইতি ব্যাপ্তিগ্রহোপায়শিরো-মণিঃ॥ প্রাভাকরমতে ব্যাপ্তেঃ সকৃদ্দর্শন-গম্যত্বং যথা তস্মাৎ পরিশেষেণ সকৃদ্দর্শন-গম্যা সা। ইতি ব্যাপ্তিগ্রহোপায়চিন্তা-মণিঃ॥

প্রাভৃতং (ক্লী) উপঢৌকনং। ইত্যমরঃ॥

প্রাভৃতকং (ক্লী) প্রাভৃতং। তৎপর্য্যায়ঃ। কৌশলিকা ২। ইতি হারাবলী॥

প্রামাদ্যঃ (পুং) বাসকঃ। ইতি শব্দচন্দ্রিকা॥ স্বার্থে ষ্ণ্যঃ প্রমাদঃ। তস্য ভাবে ক্লী॥

প্রামাণিকঃ (ত্রি) হৈতুকঃ। মর্য্যাদার্হঃ। শাস্ত্রজ্ঞঃ। পরিচ্ছেদকঃ। প্রমাণকর্ত্তা। ইতি প্রমাণশব্দাৎ কর্ত্তরি ষ্ণিকপ্রত্যয়ঃ॥

প্রামাণ্যং (ক্লী) প্রমাকরণত্বং। প্রমাণশব্দাৎ ভাবার্থে ষ্ণ্যপ্রত্যয়ঃ॥

প্রামাণ্যবাদঃ (পুং) প্রমাকরণতাকথনং। তদ্বতি তৎপ্রকারকত্বরূপপ্রমাত্বকথনং। চিন্তামণিন্যায়গ্রন্থবিশেষঃ। ইতি পূর্ব্বা-চার্য্যাঃ॥ স যথা। অথ জগদেব পঙ্কনিমগ্ন-

মুদ্দিধীর্ষুরষ্টাদশস্বু বিদ্যাস্থানেম্বভ্যর্হিততমামান্বিক্ষিকীং পরমকারুণিকো মুনিঃ প্রণিনায়। তত্র প্রেক্ষাবৎ প্রবৃত্ত্যর্থং প্রমাণাদিপদার্থতত্ত্বজ্ঞানান্নিঃশ্রেয়সাধিগম ইত্যাদাবসূত্রয়ৎ। তেষু প্রমাণাধীনা সর্ব্বেষাং ব্যবস্থিতিরিতি প্রমাণতত্ত্বমত্র বিবিচ্যতে। ইত্যাদি গঙ্গেশোপাধ্যায়ঃ॥

প্রামীত্যং, (ক্লী) ঋণং। ইতি ত্রিকাণ্ডশেষঃ॥ মৃতত্বঞ্চ॥

প্রায়ঃ (পুং) মরণং। অনশনমৃত্যুঃ। তুল্যং। বাহুল্যং। ইতি মেদিনী॥ বয়ঃ। ইতি হেমচন্দ্রঃ॥

প্রায়ঃ [স্] ব্য বাহুল্যং। ইত্যমরঃ॥

প্রায়শ্চিত্তং (ক্লী) পাপক্ষয়মাত্রসাধনং কর্ম্ম। যথা হারীতঃ। প্রযতত্বাদ্বোপচিতমশুভং নাশয়তীতি প্রায়শ্চিত্তং॥ *॥ তস্য ব্যুৎপত্তির্যথা। অঙ্গিরাঃ। প্রায়ো নাম তপঃ প্রোক্তং চিত্তং নিশ্চয় উচ্যতে। তপো নিশ্চয়সংযুক্তং প্রায়শ্চিত্তমিতি স্মৃতং॥ নিশ্চয়সংযুক্তম্পাপক্ষয়সাধনত্বেন নিশ্চিতমিত্যর্থঃ॥ *॥ পাপন্তু বৈদিকপ্রতিপাদ্যোঽনর্থঃ। অনর্থশ্চানিষ্টসাধনং। পাপকারণমুক্তং যাজ্ঞবল্ক্যেন। যথা। বিহিতস্যাননুষ্ঠানান্নিন্দিতস্য চ সেবনাৎ। অনিগ্রহাচ্চেন্দ্রিয়াণাং নরঃ পতনমৃচ্ছতি॥ *॥ পাপবিশেষেণাবস্থাবিশেষমাহ মনুঃ। শরীরজৈঃ কর্ম্মদোষৈর্যাতি স্থাবরতাং নরঃ। বাচিকৈঃ পক্ষিমৃগতাং মানসৈরন্ত্যজাতিতাং॥ ইহ দুশ্চরিতৈঃ কেচিৎ কেচিৎ পূর্ব্বকৃতৈস্তথা। প্রাপ্নুবন্তি দুরাত্মানো নরা রূপবিপর্য্যয়ং॥ যমঃ। সুরাপো ব্রহ্মহা গোঘ্নঃ স্বুবর্ণস্তেয়কৃন্নরঃ। পতিতৈঃ সংপ্রযুক্তশ্চ কৃতঘ্নো গুরুতল্পগঃ। এতে পতন্তি সর্ব্বেষু নরকেম্বনুপূর্ব্বশঃ॥ *॥ প্রায়শ্চিত্তমাহাত্ম্যং যথা। অঙ্গিরাঃ। উদযচ্ছন্ যদ্বদাদিত্যস্তমঃ সর্ব্বং ব্যপোহতি। তদ্বৎ কল্যাণমাতিষ্ঠন্ সর্ব্বং পাপং ব্যপোহতি॥ পাপঞ্চেৎ পুরুষঃ কৃত্বা কল্যাণমভিপদ্যতে। মুচ্যতে পাতকৈঃ সর্ব্বৈর্ম্মহাভ্রৈরিব চন্দ্রমাঃ॥ কল্যাণং প্রায়শ্চিত্তং॥ *॥ তস্যাবশ্যকর্ত্তব্যত্বমাহ যমঃ। তপসোঽন্তে বিশুধ্যন্তি কর্ম্মণাং বা পরিক্ষয়াৎ। তস্মাৎ কর্ত্তব্যমেবৈতন্তু প্রায়শ্চিত্তং বিশুদ্ধয়ে॥ কর্ম্মণাং ভোগেন পরিক্ষয়াদিত্যর্থঃ॥ *॥ প্রায়শ্চিত্তাহত্বমাহ মনুঃ। অকুর্ব্বন্ বিহিতং কর্ম্ম নিষিদ্ধন্তু সমাচরন্। প্রসজংশ্চেন্দ্রিয়ার্থেষু প্রায়শ্চিত্তীয়তে নরঃ॥ *॥ অজ্ঞানাদযদি বা জ্ঞানাৎ কৃত্বা কর্ম্ম বিগর্হিতং। তস্মাদ্বিমুক্তিমন্বিচ্ছন্ দ্বিতীয়ং ন সমাচরেৎ॥ *॥ প্রায়শ্চিত্তস্য কাম্যত্বং নৈমিত্তিকত্বং নিত্যত্বঞ্চ যথা। জাবালঃ। কাম্যানাং সফলার্থঞ্চ দোষঘাতার্থমেব চ। অতঃ কাম্যং নৈমিত্তিকঞ্চ প্রায়শ্চিত্তমিতি স্থিতিঃ॥ চরিতব্যমতো নিত্যং প্রায়শ্চিত্তং বিশুদ্ধয়ে। নিন্দ্যৈশ্চ লক্ষণৈর্যুক্তা জায়ন্তে নিষ্কৃতৈনসঃ॥ *॥ জ্ঞানাজ্ঞানকৃতপাপয়োঃ প্রায়শ্চিত্তভেদো যথা। অঙ্গিরাঃ। অকামতঃ কৃতে পাপে প্রায়শ্চিত্তং ন কামতঃ। স্যাত্ত্বকামকৃতে যত্তু দ্বিগুণং বুদ্ধিপূর্ব্বকে॥ *॥

অথ প্রায়শ্চিত্তিনস্পর্ষদুপস্থানং। তত্রাঙ্গিরাঃ। কৃতে নিঃসংশয়ে পাপে ন ভুঞ্জীতানুপস্থিতঃ। ভুঞ্জানো বর্দ্ধয়েৎ পাপমসত্যং পর্ষদি ব্রুবন্॥ সচেলং বাগ্যতঃ স্নাত্বা ক্লিন্নবাসাঃ সমাহিতঃ। উপস্থায় ততঃ শীঘ্রমার্ত্তিমান্ ধরণীং গতঃ। গাত্রৈশ্চ শিরসা চৈব ন চ কিঞ্চিদুদাহরেৎ॥ উপস্থানঞ্চ ব্রাহ্মণান্ বস্ত্রাদিনা তোষয়িত্বা কার্য্যং। মহৎসু পাপেষু রাজ্ঞোঽপ্যুপস্থিতিঃ কার্য্যেত্যাহ দেবলঃ। স্বয়ং বা ব্রাহ্মণৈঃ কৃচ্ছ্রমল্পদোষে বিধীয়তে। রাজ্ঞা চ ব্রাহ্মণৈশ্চৈব মহৎসু পরিচক্ষতে॥ * ॥ পরিষদমাহাঙ্গিরাঃ। একবিংশতিসংখ্যা কৈর্মীমাংসাবেদপারগৈঃ। বেদাঙ্গকুশলৈশ্চৈব পরিষৎ সংপ্রকল্পয়েৎ॥ চাতুর্ব্বিদ্যং বিকল্পী চ অঙ্গবিদ্ধর্ম্মপাঠকঃ। ত্রয়শ্চাশ্রমিণো বৃদ্ধাঃ পর্ষৎ স্যাত্তু দশাবরা॥ মনুঃ। ত্রৈবিদ্যো হেতুকস্তর্কী নৈরুক্তো ধর্ম্মপাঠকঃ। ত্রয়শ্চাশ্রমিণঃ পূর্ব্বে পর্ষৎ স্যাত্তু দশাবরা॥ অঙ্গিরাঃ। এষা তু লঘুকার্য্যেষু মধ্যমেষু তু মধ্যমা। মহাপাতকিশোধ্যেষু শতশো ভূয় এব বা॥ প্রদর্শনার্থমিদং। যাবদ্ভিরেব নিরূপণং তাবদ্ভিরেব পরিষৎ। দৃষ্টার্থত্বাদেব তস্যাঃ। তথা চ যমঃ। একো দ্বৌ বা ত্রয়ো বাপি যদ্ব্রূয়ুর্ধর্ম্মপাঠকাঃ। স ধর্ম্ম ইতি বিজ্ঞেয়ো নেতরেষাং সহস্রশঃ॥ * ॥ প্রায়শ্চিত্তাকথনে দোষো যথা। আর্ত্তানাং মার্গমাণানাং প্রায়শ্চিত্তানি যে দ্বিজাঃ। জানন্তো ন প্রযচ্ছন্তি তেঽপি তদ্দোষভাগিনঃ॥ * ॥ অনর্চ্চিতৈরনাহূতৈরপৃষ্টৈশ্চৈব সংসদি। প্রায়শ্চিত্তং ন বক্তব্যং জানদ্ভিরপি জল্পতঃ॥ ন্যায়তো মার্গমাণস্য ক্ষত্রিয়াদেঃ প্রণামিনঃ। অন্তরা ব্রাহ্মণং কৃত্বা ব্রতমেতৎ সমাদিশেৎ॥ * ॥ হারীতঃ। যথাবয়ো যথাকালং যথাপ্রাণঞ্চ ব্রাহ্মণে। প্রায়শ্চিত্তং প্রদাতব্যং ব্রাহ্মণৈর্ধর্ম্মপাঠকৈঃ॥ তস্মাৎ কৃচ্ছ্রমথাপ্যর্দ্ধং পাদং বাপি বিধানতঃ। জ্ঞাত্বা বলাবলং কালং প্রায়শ্চিত্তং প্রকল্পয়েৎ॥ * ॥ অশক্তাবনুগ্রহমাহ পরাশরঃ। দুর্ব্বলেঽনুগ্রহঃ কার্য্যস্তথা বৈ শিশুবৃদ্ধয়োঃ। অতোঽন্যথা ভবেদ্দোষস্তস্মান্নানুগ্রহী ভবেৎ॥ * ॥ স্নেহাদিনানুগ্রহে দোষো যথা। স্নেহাদ্বা যদি বা লোভাৎ মোহাদজ্ঞানতোঽপি বা। কুর্ব্বন্ত্যনুগ্রহং যে তু তৎ পাপং তেষু গচ্ছতি॥ শাস্ত্রীয়প্রায়শ্চিত্তমুদাহৃত্য পশ্চাদনুগ্রহঃ কার্য্য ইত্যাহাঙ্গিরাঃ। কৃত্বা পূর্ব্বমুদাহারং যথোক্তং ধর্ম্মবক্তৃভিঃ। পশ্চাৎ কার্য্যানুসারেণ শক্ত্যা কুর্ব্বন্ত্যনুগ্রহং॥ * ॥ বৃদ্ধত্বাদিভেদাৎ প্রায়শ্চিত্তং যথা। অশীতির্যস্য বর্ষাণি বালো বাপ্যূনষোড়শঃ। প্রায়শ্চিত্তার্দ্ধমর্হন্তি স্ত্রিয়ো রোগিণ এব চ॥ * ॥ অথ পাপনিষ্ক্রমণাদিঃ। তত্র মনুঃ। খ্যাপনেনানুতাপেন তপসাধ্যয়নেন চ। পাপকৃন্মুচ্যতে পাপাত্তথা দানেন চাপদি॥ আপদীত্যনেন অধ্যয়নতপসোর্দানমনুকল্প ইত্যুক্তং। এতদ্ধিংসাব্যতিরিক্তবিষয়ং। হিংসায়াস্তু দানং মুখ্যং। যথা ভবিষ্যে। হিংসাত্মকানাং সর্ব্বেষাং কীর্ত্তিতানাং

মনীষিভিঃ। 'প্রায়শ্চিত্তকদম্বানাং দানং প্রথম উচ্যতে ॥ তথা মনুঃ। দানেন বধনির্ণেকং সর্পাদীনামশক্নুবন্। একৈকশশ্চরেৎ কৃচ্ছ্রং দ্বিজঃ পাপাপনুত্তয়ে ॥ * ॥ সামান্যপ্রায়শ্চিত্তানি যথা সম্বর্ত্তঃ। হিরণ্যদানং গোদানং ভূমিদানং তথৈব চ। নাশয়ন্ত্যাশু পাপানি মহাপাতকজান্যপি ॥ যমঃ। শোষণেন শরীরস্য তপসাধ্যয়নেন চ। পাপ কৃন্মুচ্যতে পাপাৎ দানেন চ দমেন চ ॥ মনুঃ। কৃত্বা পাপং হি সন্তপ্য তস্মাৎ পাপাৎ প্রমুচ্যতে। নৈবং কুর্য্যাং পুনরিতি নিবৃত্ত্যা পূয়তে নরঃ ॥ বিষ্ণুপুরাণং। প্রায়শ্চিত্তান্যশেষাণি তপঃকর্ম্মাত্মকানি বৈ। যানি তেষামশেষাণাং কৃষ্ণানুস্মরণং পরং ॥ যমঃ। গবাহ্নিকা দেবপূজা বেদাভ্যাসঃ সরিৎপ্লবঃ। নাশয়ন্ত্যাশু পাপানি মহাপাতকজান্যপি ॥ গোতমঃ। হিরণ্যং গৌর্ব্বাসোঽশ্বো ভূমিস্তিলা ঘৃতমন্নং ইতি দেয়ানি। এতান্যেবানাদেশে বিকল্পেন ক্রিয়েরন্ এনসি লঘূনি লঘূনি গুরূণি গুরূণি। বিষ্ণুপুরাণং। এবং বিষয়ভেদাদ্বৈ ব্যবস্থাপ্যানি পুত্রক। প্রায়শ্চিত্তানি সর্ব্বাণি গুরূণি চ লঘূনি চ ॥ অন্যথা হি মহাবাহো লঘূনামুপদেশতঃ। গুরূণামুপদেশো হি নিষ্প্রয়োজনতাং ব্রজেৎ ॥ মহাভারতে। যদ্যকার্য্যশতং কৃত্বা কৃতং গঙ্গাভিষেচনং। সর্ব্বং দহতি গঙ্গাম্ভস্তূলরাশিমিবানলঃ ॥ * ॥ ব্রতানি শুদ্ধিকারণান্যাহ বিশ্বামিত্রঃ। কৃচ্ছ্রং চান্দ্রায়ণাদীনি শুদ্ধ্যভ্যুদয়কারণং। প্রকাশে বা রহস্যে বা সংশয়েঽনুক্তকে স্ফুটে ॥ প্রাজাপত্যঃ শান্তপনঃ শিশুকৃচ্ছ্রঃ পরাককঃ। অতিকৃচ্ছ্রঃ পর্ণকৃচ্ছ্রঃ সৌম্যঃ কৃচ্ছ্রাতিকৃচ্ছ্রকঃ ॥ মহাশান্তপনঃ শুদ্ধ্যৈ তপ্তকৃচ্ছ্রস্তু পাবনঃ। জলোপবাসকৃচ্ছ্রশ্চ ব্রহ্মকূর্চ্চস্তু শোধকঃ ॥ এতে সমস্তা ব্যস্তা বা প্রত্যেকমেকশোঽপি বা। পাতকাদিষু সর্ব্বেষু পাপকেষু প্রযত্নতঃ ॥ কার্য্যাশ্চান্দ্রায়ণৈর্যুক্তাঃ কেবলা বা বিশুদ্ধয়ে। শিশুচান্দ্রায়ণং প্রোক্তং যতিচান্দ্রায়ণং তথা। যবমধ্যং তথা প্রোক্তং তথা পিপীলিকাকৃতি ॥ উপবাসস্ত্রিরাত্রং বা মাসঃ পক্ষস্তদর্দ্ধকং। ষড়হদ্বাদশাহাদি কার্য্যং শুদ্ধিফলার্থিনা ॥ উপপাতকযুক্তানামনাদিষ্টেষু চৈব হি। প্রকাশে চ রহস্যে চ অভিসন্ধ্যাদ্যপেক্ষয়া ॥ জাতিশক্তিগুণান্ দৃষ্ট্বা সকৃদ্বুদ্ধিকৃতং তথা। অনুবন্ধাদিকং দৃষ্ট্বা সর্ব্বং কার্য্যং যথাক্রমং ॥ প্রকাশকৃতে পাপে ব্রতানি মুখ্যানি। রহস্যকৃতে জপাদীনি। যথা প্রাজাপত্যাদীন্যভিধায় মনুঃ। এতৈর্দ্বিজাতয়ঃ শোধ্যা ব্রতৈরাবিষ্কৃতৈনসঃ। অনাবিষ্কৃতপাপাংস্তু মন্ত্রৈর্হোমৈস্তু শোধয়েৎ ॥ দেবলঃ। প্রকাশ উক্তং যৎকিঞ্চিৎ বিংশভাগো রহস্যকে। ত্রিংশভাগঃ ষষ্টিভাগঃ কল্প্যো জাত্যাদ্যপেক্ষয়া ॥ ইতি প্রায়শ্চিত্তবিবেকঃ ॥ * ॥ অথ প্রায়শ্চিত্তপূর্ব্বাহকৃত্যং। শঙ্খলিখিতৌ। বাপ্য কেশনখান্ পূর্ব্বং ঘৃতং প্রাশ্য বহির্নিশি। প্রত্যেকং নিয়তং কালমাত্মনো ব্রতমাদিশেৎ। প্রায়শ্চিত্তমুপাসীনো বাগ্যত-

স্ত্রিসবনং স্পৃশেৎ ॥*॥ কেশধারণেচ্ছায়াং দ্বিগুণব্রতাদিকমাহ হারীতঃ। রাজা বা রাজপুত্রো বা ব্রাহ্মণো বা বহুশ্রুতঃ। কেশানাং বপনং কৃত্বা প্রায়শ্চিত্তং সমাচরেৎ ॥ কেশানাং ধারণার্থন্তু দ্বিগুণং ব্রতমাচরেৎ। দ্বিগুণে তু ব্রতে চীর্ণে দ্বিগুণা দক্ষিণা ভবেৎ ॥ * ॥ বিদ্বদ্বিপ্রনৃপস্ত্রীণাং নেষ্যতে কেশবাপনং। ঋতে মহাপাতকিনো গোহন্তুশ্চাবকীর্ণিনঃ ॥ * ॥ সধবাস্ত্রীণাং বিশেষমাহ ভবদেবভট্টধৃতং বচনং। বপনং নৈব নারীণাং নানুব্রজ্যা জপাদিকং। ন গোষ্ঠে শয়নং তাসাং ন চ দদ্যাদ্‌গবাজিনং ॥ সর্ব্বান্ কেশান্ সমুদ্ধৃত্য ছেদয়েদঙ্গুলিদ্বয়ং। সর্ব্বত্রৈবং হি নারীণাং শিরসো মুণ্ডনং স্মৃতং ॥ * ॥ অথ ধেনুমূল্যব্যবস্থা। তত্র সম্বর্ত্তঃ। প্রাজাপত্যব্রতাশক্তৌ ধেনুং দদ্যাৎ পয়স্বিনীং। ধেনোরভাবে দাতব্যং তুল্যং মূল্যং ন সংশয়ঃ ॥ পয়স্বিনীমিতিবিশেষণং দুগ্ধোপযোগায়। স চ বৎসং বিনা ন সম্ভবতি। অতঃ সবৎসায়া এব দানং মুখ্যং। তদভাবে যথোচিতং মূল্যং। তদসম্ভবে পুরাণত্রয়ং। দ্বাত্রিংশৎপণিকা গাবো বৎসঃ পৌরাণিকো ভবেদিতি কাত্যায়নবচনাৎ ॥ ষট্‌ত্রিংশন্মতমিতি কৃত্বা পঠন্তি। ধেনুঃ পঞ্চভিরাঢ্যানাং মধ্যানাং ত্রিপুরাণিকী। কার্ষাপণৈকমূল্যা হি দরিদ্রাণাং প্রকীর্ত্তিতা ॥ * ॥ প্রায়শ্চিত্তোত্তরকর্ত্তব্যাণি যথা। ভবিষ্যে। ক্রিয়তে শুদ্ধয়ে যত্তু ব্রাহ্মণানান্তু ভোজনং। শুদ্ধ্যর্থমিতি তৎ প্রোক্তং বৈনতেয় মনীষিভিঃ ॥ জাবালঃ। আরম্ভে সর্ব্বকৃচ্ছ্রাণাং সমাপ্তৌ চ বিশেষতঃ। আজ্যেনৈব হি শালাগ্নৌ জুহুয়াদাহুতীঃ পৃথক্। শ্রাদ্ধং কুর্য্যাদ্‌ব্রতস্যান্তে গোহিরণ্যান্নদক্ষিণং ॥ * ॥ প্রায়শ্চিত্তানন্তরং গোভ্যো যবসং দদ্যাৎ। যদি তু গাবস্তদ্দত্ততৃণং ন গৃহ্লীয়ুস্তদা পুনস্তৎপ্রায়শ্চিত্তমনুতিষ্ঠেৎ। যথা হারীতঃ। স্বশিরসা যবসমাদায় গোভ্যো দদ্যাৎ যদি তাঃ প্রমুদিতা গৃহ্লীয়ুরথৈনং প্রবর্ত্তয়েয়ুঃ। এনং কৃতপ্রায়শ্চিত্তং। ইতরথা ন। ইতি প্রায়শ্চিত্ততত্ত্বং ॥ * ॥ অথ প্রায়শ্চিত্তবিবেকোক্তনববিধপাপানাং প্রায়শ্চিত্তানি লিখ্যন্তে।

অথাতিপাতকানি	প্রায়শ্চিত্তানি	তদশক্তৌ ধেনুদানং।	তদশক্তৌ চূর্ণীদানং।	দক্ষিণা।
ব্রাহ্মণস্য মাতৃগমনং দুহিতৃগমনং স্নুষাগমনঞ্চ।	অজ্ঞানতো দ্বিগুণদ্বাদশবার্ষিকব্রতং। তত্তু মহাপাতকে দ্রষ্টব্যং। জ্ঞানত এতদ্দ্বিগুণং।	৩৬০ ধেনবঃ	১০৮০ কার্ষাপণাঃ। তল্লভ্যস্বর্ণাদি বা।	২০০ গাবঃ। অশক্তৌ ২০০ কার্ষাপণাঃ।

প্রায়িকং (ত্রি) বাহুল্যে ভবং। যথা। কৈৈণ্যজ্ঞানে তু প্রায়িকমরণং জ্ঞাত্বা প্রবৃত্তস্য চান্দ্রায়ণাদিকং। ইতি প্রায়শ্চিত্ততত্ত্বং॥

প্রায়ুদ্ধেষী [ন্] (পুং) ঘোটকঃ। ইতি শব্দচন্দ্রিকা॥

প্রায়োজ্যং (ত্রি) প্রয়োজনার্হং। যথা। প্রায়োজ্যং ন বিভজ্যেত। যদ্যস্য প্রয়োজনার্হং পুস্তকাদি তন্মূর্খৈঃ সহ ন বিভজনীয়মিতি দায়ভাগঃ॥

প্রায়োপবিষ্টঃ (ত্রি) প্রায়োপবেশবিশিষ্টঃ। যথা। প্রায়োপবিষ্টং গঙ্গায়াং পরীতং পরমর্ষিভিঃ। ইতি শ্রীভাগবতং॥ প্রায়েণ মৃত্যুপর্য্যন্তানশনেনোপবিষ্টমিতি তট্টীকায়াং শ্রীধরস্বামী॥

প্রায়োপবেশঃ (পুং) সন্ন্যাসপূর্ব্বকানশনস্থিতিঃ। যথা। প্রায়োপবেশো রাজর্ষেবিপ্রশাপাৎ পরীক্ষিতঃ। ইতি শ্রীভাগবতে ১২ স্কন্ধঃ॥

প্রারব্ধঃ (পুং) প্রালব্ধঃ। শরীরারম্ভকাদৃষ্টবিশেষঃ। যথা। প্রারব্ধকর্ম্মণাং ভোগাদেব ক্ষয়ঃ। ইতি স্মৃতিঃ॥ প্রারব্ধমশ্নন্নভিমানশূন্যঃ। ইতি শ্রীভাগবতং॥ প্রারব্ধকর্ম্মবিক্ষেপাদ্বাসনা তু ন নশ্যতি। ইতি ভগবদ্গীতায়াং মধুসূদনসরস্বতী চ॥

প্রারব্ধিঃ (স্ত্রী) গজবন্ধনরজ্জুঃ। ইতি হারাবলী॥

প্রারম্ভঃ (পুং) প্রকর্ষেণ আরম্ভঃ। যথা। প্রারম্ভে কর্ম্মণাং বিপ্রঃ পুণ্ডরীকং স্মরেদ্ধরিং॥ ইতি স্মৃতিঃ॥

প্রার্থনং (ক্লী) } প্রকর্ষেণ যাচনং। তৎ-
প্রার্থনা (স্ত্রী) } পর্য্যায়ঃ। যাচ্ঞা ২ অভিশস্তিঃ ৩ যাচনা ৪ অর্থনা ৫। ইতি শব্দরত্নাবলী॥

প্রার্থনীয়ং (ক্লী) দ্বাপরযুগং। ইতি শব্দরত্নাবলী॥ প্রার্থনাবিষয়ে ত্রি॥

প্রার্থিতঃ (ত্রি) যাচিতঃ। শত্রুসংরুদ্ধঃ। অভিহিতঃ। ইতি মেদিনী॥ হতঃ। ইতি ত্রিকাণ্ডশেষঃ॥

প্রালম্বং (ক্লী) কণ্ঠাৎ ঋজুলম্বমানমাল্যং। ইত্যমরঃ॥

প্রালম্বিকা (স্ত্রী) স্বর্ণরচিতললন্তিকা। স্বর্ণহারঃ। ইত্যমরঃ॥

প্রালেয়ং (ক্লী) হিমং। ইত্যমরঃ॥

প্রালেয়াংশুঃ (পুং) চন্দ্রঃ। ইতি হলায়ুধঃ॥

প্রাবটঃ (পুং) যবঃ। ইতি জটাধরঃ॥

প্রাবরঃ (পুং) প্রাচীরং। ইতি শব্দরত্নাবলী॥

প্রাবরণং (ক্লী) উত্তরীয়বস্ত্রং। তৎপর্য্যায়ঃ। প্রচ্ছাদনং ২ সংব্যানং ৩ উত্তরীয়কং ৪। ইতি হেমচন্দ্রঃ॥ প্রকৃষ্টাবরণঞ্চ॥

প্রাবারঃ (পুং) উত্তরাসঙ্গঃ। উত্তরীয়বস্ত্রং। ইত্যমরঃ॥

প্রাবারকীটঃ (পুং) কীটবিশেষঃ। তৎপর্য্যায়ঃ। কুণঃ ২। ইতি জটাধরঃ॥

প্রাবৃট্ [ষ্] (স্ত্রী) বর্ষাকালঃ। শ্রাবণভাদ্রমাসৌ। ইত্যমরঃ॥

প্রাবৃড়ত্যয়ঃ (পুং) শরৎকালঃ। ইতি রাজনির্ঘণ্টঃ॥

প্রাবৃতং (ত্রি) প্রকৃষ্টাবরণং। গুড়িতবস্ত্রং। ইতি ভরতঃ॥ তৎপর্য্যায়ঃ। নিবীতং ২।

ইত্যমরঃ ॥ নিবৃতং ৩। ইতি তট্টীকায়াং স্বামী ॥

প্রাবৃতিঃ (স্ত্রী) প্রাচীরং। ইতি শব্দরত্নাবলী ॥

প্রাবৃষা (স্ত্রী) ঘনাগমঃ। বর্ষাকালঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

প্রাবৃষায়ণী (স্ত্রী) কপিকচ্ছুঃ। আলকুশী ইতি ভাষা। ইত্যমরঃ ॥

প্রাবৃষিকঃ (পুং) ময়ূরঃ। ইতি ধরণিঃ ॥ প্রাবৃট্কালভবে ত্রি ॥

প্রাবৃষেণ্যঃ (পুং) কদম্ববৃক্ষঃ। ইতি মেদিনী॥ কুটজবৃক্ষঃ। ধারাকদম্বঃ। ইতি রাজনির্ঘণ্টঃ ॥

প্রাবৃষেণ্যঃ (ত্রি) প্রাচুর্য্যং। ইতি শব্দরত্নাবলী ॥ প্রাবৃট্কালভবং। ইতি মেদিনী ॥

প্রাবৃষেণ্যা (স্ত্রী) কপিকচ্ছুঃ। রক্তপুনর্নবা। ইতি রাজনির্ঘণ্টঃ ॥

প্রাবৃষ্যং (ক্লী) বৈদূর্য্যং। ইতি রাজনির্ঘণ্টঃ ॥ প্রাবৃষি ভবে ত্রি ॥

প্রাবৃষ্যঃ (পুং) কুটজঃ। ধারাকদম্বঃ। বিকণ্টকঃ। ইতি রাজনির্ঘণ্টঃ ॥

প্রাশিতং (ক্লী) পিতৃযজ্ঞঃ। ইতি জটাধরঃ ॥ ভক্ষিতে ত্রি ॥

প্রাশ্নিকঃ (পুং) সভ্যঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ প্রশ্নকর্ত্তরি ত্রি ॥

প্রাসঃ (পুং) কুন্তাস্ত্রং। কোঁচ ইতি ভাষা। ইত্যমরঃ ॥

প্রাসকঃ (পুং) পাশকঃ। ইতি হেমচন্দ্রঃ ॥ প্রাসাস্ত্রঞ্চ ॥

প্রাসঙ্গঃ (পুং) যুগং। যোয়ালি ইতি ভাষা। ইত্যমরঃ ॥ অনসঃ শকটস্য সম্বন্ধি অনসি সম্বদ্ধং বা যৎ যুগং ততোঽন্যৎ যৎ বৎসানাং দমনকালে স্কন্ধে আসজ্যতে তৎ যুগং প্রাসঙ্গঃ। ইতি ভরতঃ ॥

প্রাসঙ্গ্যঃ (পুং) যুগবোঢ়ৃবৃষঃ। ইত্যমরঃ ॥

প্রাসাদঃ (পুং) দেবভূভুজাং গৃহং। ইত্যমরঃ ॥ তল্লক্ষণাদি যথা। সূত উবাচ। প্রাসাদানাং লক্ষণন্তু বক্ষ্যে শৌনক তচ্ছৃণু। চতুঃষষ্টিপদং কৃত্বা দিগ্বিদিক্ষুপলক্ষিতং ॥ চতুষ্কোণং চতুর্ভিশ্চ দ্বারাণি সূর্য্যসংখ্যয়া। চত্বারিংশাষ্টভিশ্চৈব ভিত্তীনাং কল্পনা ভবেৎ ॥ ঊর্দ্ধক্ষেত্রসমা জঙ্ঘা জঙ্ঘার্দ্ধদ্বিগুণং ভবেৎ। গর্ত্তবিস্তরবিস্তীর্ণা শুকাঘ্রা চ বিধীয়তে ॥ তত্ত্রিভাগেণ কর্ত্তব্যা পঞ্চভাগেন বা পুনঃ। নির্গমস্তু শুকাঘ্রায়া উচ্ছ্রয়ঃ শিখরার্দ্ধগঃ ॥ চতুর্ধা শিখরং কৃত্বা ত্রিভাগে বেদিবন্ধনং। চতুর্থে পুনরস্যৈব কণ্ঠমামলসারকং ॥ * ॥ অথবাপি সমং বাস্তুং কৃত্বা ষোড়শভাগিকং। তস্য মধ্যে চতুর্ভাগমাদৌ গর্ত্তন্তু কারয়েৎ ॥ ভাগদ্বাদশকাং ভিত্তিং ততস্তু পরিকল্পয়েৎ। চতুর্ভাগেণ ভিত্তীনামুচ্ছ্রয়ঃ স্যাৎ প্রমাণতঃ ॥ দ্বিগুণঃ শিখরোচ্ছ্রায়ো ভিত্ত্যুচ্ছ্রায়াচ্চ মানতঃ। শিখরার্দ্ধস্য চার্দ্ধেন বিধেয়াস্তু প্রদক্ষিণাঃ ॥ চতুর্দ্দিক্ষু তথা জ্ঞেয়ো নির্গমস্তু তথা বুধৈঃ। পঞ্চভাগেন সংভজ্য গর্ত্তমানং বিচক্ষণঃ ॥ ভাগমেকং গৃহীত্বা তু নির্গমং কল্পয়েৎ পুনঃ। গর্ত্তসূত্রসমো ভাগাদগ্রতো মুখমণ্ডপঃ ॥ এতৎ সামান্যমুদ্দিষ্টং প্রাসাদস্য

হি লক্ষণং । * । লিঙ্গমানমথো বক্ষ্যে পীঠো লিঙ্গসমো ভবেৎ ॥ দ্বিগুণেন ভবেদ্গর্ত্তঃ সমন্তাচ্ছৌনক ধ্রুবং । তদ্বিধা চ ভবেদ্ভিত্তির্জ্জঙ্ঘা তদ্বিস্তরার্দ্ধগা ॥ দ্বিগুণং শিখরং প্রোক্তং জঙ্ঘায়াশ্চৈব শৌনক । পীঠং গর্ত্তাবরং কর্ম্ম তন্মানেন শুকাগ্রকাং ॥ নির্গমস্তু সমাখ্যাতঃ শেষং মূলবদেব তু । লিঙ্গমানঃ স্মৃতো হ্যেষ দ্বারমানমথোচ্যতে ॥ * ॥ করাগ্রং বেদবৎ কৃত্বা দ্বারং ভাগাষ্টকং ভবেৎ । বিস্তরেণ সমাখ্যাতং দ্বিগুণং বেচ্ছয়া ভবেৎ ॥ দ্বারবৎ পীঠমধ্যে তু শেষং শুষিরকং ভবেৎ । প্যাদিকং শেষিকং ভিত্তির্দ্বারার্দ্ধেন পরিগ্রহাৎ ॥ তদ্বিস্তারসমা জঙ্ঘা শিখরং দ্বিগুণং ভবেৎ । শুকাগ্রা পূর্ব্ববজ্জ্ঞেয়া নির্গমোচ্ছ্রায়কং ভবেৎ ॥ মণ্ডপে মানমেতত্তু স্বরূপঞ্চাপরং বদে । * । ত্রৈবেদং কারয়েৎ ক্ষেত্রং যত্র তিষ্ঠন্তি দেবতাঃ ॥ ইত্থং কৃতেন মানেন বাহ্যভাগবিনির্গতং নেমিঃ পাদেন বিস্তীর্ণা প্রাসাদস্য সমন্ততঃ ॥ গর্ত্তস্তু দ্বিগুণং কুর্য্যাৎ নেম্যা মানং ভবেদিহ । স এব ভিত্তেরুৎসেধো দ্বিগুণঃ শিখরো মতঃ ॥ *॥ প্রাসাদানাঞ্চ বক্ষ্যামি মানং যোনিঞ্চ নামতঃ । বৈরাজঃ পুষ্পকাখ্যশ্চ কৈলাসো মালকাহ্বয়ঃ ॥ ত্রিপিষ্টপঞ্চ পঞ্চৈতে প্রাসাদাঃ সর্ব্বযোনয়ঃ । প্রথমশ্চতুরস্রো হি দ্বিতীয়স্তু তদায়তঃ ॥ বৃত্তো বৃত্তায়তশ্চান্যোঽষ্টাস্রশ্চেহ চ পঞ্চমঃ । এতেভ্য এব সম্ভূতাঃ প্রাসাদাঃ সুমনোহরাঃ ॥ সর্ব্বপ্রকৃতিভূতেভ্যশ্চত্বারিংশচ্চ এব চ । মেরুশ্চ মন্দরশ্চৈব বিমানশ্চ তথাপরঃ ॥ ভদ্রকঃ সর্ব্বতোভদ্রো রুচকো নন্দনস্তথা । নন্দিবর্দ্ধনসংজ্ঞশ্চ শ্রীবৎসশ্চ নবেত্যমী ॥ চতুরস্রাঃ সমুদ্ভূতা বৈরাজাদিতি গম্যতাং । * । বড়ভী গৃহরাজশ্চ শালাগৃহঞ্চ মন্দিরং ॥ বিমানশ্চ তথা ব্রহ্মমন্দিরে ভবনং তথা । উত্তম্ভং শিবিকা বেশ্ম নবৈতে পুষ্পকোদ্ভবাঃ ॥ * ॥ বলয়ো দুন্দুভিঃ পদ্মো মহাপদ্মস্তথাপরঃ । ভদ্রকঃ সর্ব্বতোভদ্রো রুচকো নন্দনস্তথা ॥ গুবাবৃক্ষস্তথান্যচ্চ বৃত্তাঃ কৈলাসসম্ভবাঃ । * । গজোঽথ বৃষভো হংসো গরুড়ঃ সিংহনামকঃ ॥ ভূমুখো ভূধরশ্চৈব শ্রীজয়ঃ পৃথিবীধরঃ । বৃত্তায়তঃ সমুদ্ভূতো নবৈতে মালকাহ্বয়াৎ ॥ * ॥ বজ্রং চক্রং তথান্যচ্চ মুষ্টিকং বভ্রুসংজ্ঞিতং । বক্রঃ স্বস্তিকখড়্গৌ চ গদা শ্রীবৃক্ষ এব চ ॥ বিজয়ো নামতঃ শ্বেতস্ত্রিপিষ্টপসমুদ্ভবাঃ । * । ত্রিকোণপত্রমর্দ্ধেন্দু চতুষ্কোণং দ্বিরষ্টকং ॥ যত্র তত্র বিধাতব্যং সংস্থানং মণ্ডপস্য তু । রাজ্যঞ্চ বিজয়শ্চৈব মায়ুর্ব্বর্দ্ধনমেব চ ॥ পুত্ত্রলাভঃ শ্রিয়ঃ পুষ্টিস্ত্রিকোণাদিক্রমাদ্ভবেৎ ॥ * ॥ কুর্য্যাৎ ধ্বজাদিসংখ্যাং বা দ্বারি গর্ত্তগৃহস্তথা ॥ মণ্ডপঃ সমসংখ্যাভির্গুণিতঃ সূত্রতস্তথা । মণ্ডপস্য চতুর্থাংশাদ্ভদ্রঃ কার্য্যো বিজানতা ॥ স্পর্দ্ধা গবাক্ষকোপেতো নির্গবাক্ষোঽথবা ভবেৎ । সার্দ্ধভিত্তিপ্রমাণেন ভিত্তিমানেন বা পুনঃ ॥ ভিত্তের্দ্বৈগুণ্যতো বাপি কর্ত্তব্যা মণ্ডপাঃ ক্বচিৎ । প্রাসাদে

মঞ্জরী কার্য্যা চিত্রা বিষমভূমিকা ॥ পরিমাণনিরোধেন রেখা বৈষম্যভূমিকা। আধারস্তু চতুর্দ্বারশ্চতুর্মণ্ডপশোভিতঃ ॥ শতশৃঙ্গসমাযুক্তো মেরুপ্রাসাদ উত্তমঃ। মণ্ডপাস্তস্য কর্ত্তব্যা ভদ্রৈস্ত্রিভিরলঙ্কৃতাঃ ॥ ঘটনাকারমানানাং ভিন্না ভিন্না ভবন্তি যে। কিয়ন্তোতেষু সাধারা নিরাধারাশ্চ কেচন ॥ প্রতিচ্ছন্দকভেদেন প্রাসাদাঃ সম্ভবন্তি তে। অন্যোন্যসঙ্করাস্তেষাং ঘটনা নাম ভেদতঃ ॥ দেবতানাং বিশেষায় প্রাসাদা বহবঃ স্মৃতাঃ। প্রাসাদে নিয়মো নাস্তি দেবতানা স্বয়ম্ভুবাং ॥ তান্যেব দেবতানাঞ্চ পূর্ব্বমানেন কারয়েৎ। চতুরস্রায়তাস্তত্র চতুষ্কোণসমন্বিতাঃ ॥ চন্দ্রশালান্বিতাঃ কার্য্যা ভেরীশিখরসংযুতাঃ। পুরতো বাহনানাঞ্চ কর্ত্তব্যা লঘুমণ্ডপাঃ ॥ নাট্যশালা চ কর্ত্তব্যা দ্বারদেশসমাশ্রয়া। প্রাসাদা দেবতানাঞ্চ কার্য্যা দিক্ষু বিদিক্ষ্বপি ॥ দ্বারপালাশ্চ কর্ত্তব্যা মুখ্যা গত্বা পৃথক্ পৃথক্। কিঞ্চিদ্বিদূরতঃ কার্য্যা মঠাস্তত্রোপজীবিনাং ॥ প্রাবৃতা জগতী কার্য্যা ফলপুষ্পজলান্বিতা। প্রাসাদেষু সুরান্ স্থাপ্য পূজাভিঃ পূজয়েন্নরঃ ॥ বাসুদেবঃ সর্ব্বদেবাঃ সর্ব্বভাক্ তদ্গৃহাদিকৃৎ। ইতি গারুড়ে প্রাসাদকীর্ত্তনং নাম ৪৭ অধ্যায়ঃ ॥

প্রাসাদকুক্কুটঃ (পুং) পারাবতঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

প্রাসিকঃ (পুং) প্রাসাস্ত্রধারী। প্রাসপ্রহারী। তৎপর্য্যায়ঃ। কৌন্তিকঃ ২। ইত্যমরঃ ॥

প্রাস্থিকঃ (ত্রি) প্রস্থং সম্ভবতি প্রাস্থিকঃ কটাহঃ। প্রস্থং স্বস্মিন্ সমাবেশয়তীত্যর্থঃ। প্রাস্থিকী ব্রাহ্মণী। প্রস্থমবহরতি পচতি বেত্যর্থঃ। ইতি সিদ্ধান্তকৌমুদী ॥

প্রাহঃ (পুং) নৃত্যোপদেশঃ। ইতি শব্দমালা ॥ নির্ব্বিসর্গশ্চেৎ প্রপূর্ব্বতিবন্তক্রধাতো রূপমপ্যেবং ॥

প্রাহ্ণঃ (পুং) পূর্ব্বাহ্ণঃ। ইত্যমরঃ ॥

প্রাহ্ণে ব্য পূর্ব্বাহ্ণে। ইতি সিদ্ধান্তকৌমুদী ॥

প্রাহ্ণেতনঃ (ত্রি) পূর্ব্বাহ্ণসম্বন্ধী। ইতি সিদ্ধান্তকৌমুদী ॥

প্রাহ্ণেতরাং ব্য অতিশয়পূর্ব্বাহ্ণে। ইতি মুগ্ধবোধব্যাকরণং ॥

প্রিয়ঃ (পুং) ভর্ত্তা। ইত্যমরঃ ॥ মৃগবিশেষঃ। ইতি জটাধরঃ ॥ ঋদ্ধিনামৌষধং। হৃদ্যে ত্রি। ইতি মেদিনী ॥ জীবকৌষধং। ইতি রাজনির্ঘণ্টঃ ॥ প্রিয়োঽপ্রিয়শ্চ কার্য্যবশাদ্ভবতি। যথা। নহি কস্য প্রিয়ঃ কো বা বিপ্রিয়ো বা জগত্ত্রয়ে। কালে কার্য্যবশাৎ সর্ব্বে ভবন্ত্যেবাপ্রিয়াঃ প্রিয়াঃ ॥ ইতি শ্রীকৃষ্ণজন্মখণ্ডে ৫ অধ্যায়ঃ ॥

প্রিয়কঃ (পুং) পীতশালকঃ। নীপঃ। চিত্রমৃগঃ। অলিঃ। প্রিয়ঙ্গুঃ। কুঙ্কুমং। ইতি মেদিনী ॥ ধারাকদম্বঃ। অশনবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

প্রিয়ঙ্করঃ (ত্রি) প্রিয়কারকঃ। যথা। মহাঙ্গলীন ঐক্ষ্বাকে বংশে দাশরথির্মম। পিতুঃ প্রিয়ঙ্করো ভর্ত্তা ক্ষেমকারস্তপস্বিনাং ॥ ইতি ভট্টিঃ ॥

প্রিয়ঙ্করী (স্ত্রী) বৃহজ্জীবন্তী। শ্বেতকণ্টকারী। অশ্বগন্ধা। ইতি রাজনির্ঘণ্টঃ॥

প্রিয়ঙ্গুঃ (স্ত্রী) স্বনামখ্যাতসুগন্ধিবৃক্ষবিশেষঃ। তৎপর্য্যায়ঃ। শ্যামা ২ মহিলাহ্বয়া ৩ লতা ৪ গোবন্দনী ৫ গুন্দ্রা ৬ ফলিনী ৭ ফলী ৮ বিষ্বক্সেনা ৯ গন্ধফলী ১০ কারম্ভা ১১ প্রিয়কঃ ১২। ইত্যমরঃ॥ প্রিয়বল্লী ১৩ ফলপ্রিয়া ১৪ গৌরী ১৫ বৃত্তা ১৬ কঙ্গুঃ ১৭ কঙ্গুনী ১৮ ভঙ্গুরা ১৯ গৌরবল্লী ২০ শুভগা ২১ পর্ণভেদিনী ২২ শুভা ২৩ পীতা ২৪ মঙ্গল্যা ২৫ শ্রেয়সী ২৬। অস্যা গুণাঃ। শীতলত্বং। তিক্তত্বং। দাহপিত্তাস্রদোষভ্রমবান্তিজ্বরবক্তজাড্যনাশিত্বং। ইতি রাজনির্ঘণ্টঃ॥ তুবরত্বং। অনিলনাশিত্বং। রক্তাতিযোগদৌর্গন্ধ্যস্বেদগুল্মতৃড়্বিষমোহনাশিত্বঞ্চ। ইতি ভাবপ্রকাশঃ॥ *॥ রাজিকা। পিপ্পলী। কঙ্গুঃ। ইতি মেদিনী॥ কটুকী। ইতি ধরণিঃ॥

প্রিয়জনঃ (পুং) হৃদ্যলোকঃ। প্রৌঢ়ভাবজ্ঞঃ। যথা। প্রৌঢ়ভাবানুবিজ্ঞো যস্তস্য প্রিয়জনোঽত্র সঃ। ইত্যুজ্জ্বলনীলমণিঃ॥

প্রিয়জীবঃ (পুং) শ্যোনাকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

প্রিয়তমঃ (পুং) ময়ূরশিখাবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥ অতিশয়প্রিয়ে ত্রি॥

প্রিয়তরঃ (ত্রি) অনয়োরতিশয়েন প্রিয়ঃ। ইতি ব্যাকরণং॥

প্রিয়তা (স্ত্রী) প্রিয়স্য ভাবঃ। হার্দ্দং। ইত্যমরঃ॥

প্রিয়তোষণঃ (পুং) ষোড়শবন্ধাতিরিক্তরতিবন্ধবিশেষঃ। তস্য লক্ষণং যথা। নারী পাদৌ স্বহস্তেন ধারয়েজ্জঘনোপরি। স্তনাপীড়করঃ কামী কাময়েৎ প্রিয়তোষণঃ॥ ইতি রতিমঞ্জরী॥ প্রিয়স্য তুষ্টিকারিণি ত্রি॥

প্রিয়ত্বং (ক্লী) প্রিয়তা। তৎপর্য্যায়ঃ। প্রেম ২ প্রেমা ৩ স্নেহঃ ৪ প্রণয়ঃ ৫ হার্দ্দং ৬ প্রিয়তা ৭ স্নিগ্ধতা ৮। ইতি শব্দরত্নাবলী॥

প্রিয়দর্শনঃ (ত্রি) সুদৃশ্যঃ। তৎপর্য্যায়ঃ। চক্ষুষ্যঃ ২। ইতি জটাধরঃ॥

প্রিয়দর্শনঃ (পুং) শুকপক্ষী। ক্ষীরিকাবৃক্ষঃ। ইতি জটাধরঃ॥

প্রিয়প্রায়ঃ [স্] (ক্লী) প্রিয়বাক্যং। তৎপর্য্যায়ঃ। চটু ২ চাটু ৩। ইতি হেমচন্দ্রঃ॥

প্রিয়প্রেপ্সুঃ (ত্রি) ইষ্টার্থোদ্যুক্তঃ। উৎসুকঃ। ইতি জটাধরঃ॥

প্রিয়মধুঃ (পুং) বলরামঃ। ইতি হেমচন্দ্রঃ॥

প্রিয়ম্বদঃ (পুং) খেচরঃ। গন্ধর্ব্বভেদঃ। প্রিয়ভাষিণি ত্রি। ইতি শব্দরত্নাবলী॥ তৎকারণং যথা। গোসহস্রপ্রদাতারো ভূমিদাতার এব চ। যে সুবর্ণপ্রদাতারস্তথা সর্ব্বে প্রিয়ম্বদাঃ॥ ইতি দানসাগরে শিবপুরাণং

প্রিয়বর্ণী (স্ত্রী) প্রিয়ঙ্গুঃ। ইতি জটাধরঃ॥

প্রিয়ব্রতঃ (পুং) স্বায়ম্ভুবমনুপুত্রঃ। যথা। প্রিয়ব্রতোত্তানপাদৌ মনোঃ স্বায়ম্ভুবস্য

তু। দ্বৌ পুত্রৌ সুমহাবীর্য্যৌ ধর্ম্মজ্ঞৌ কথিতৌ তব ॥ ইত্যগ্নিপুরাণং ॥

প্রিয়বল্লী (স্ত্রী) প্রিয়ঙ্গুঃ। ইতি রাজনির্ঘণ্টঃ॥

প্রিয়বাদী [ন্] (ত্রি) মনোজ্ঞবক্তা। যথা। কোঽতিভারঃ সমর্থানাং কিং দূরং ব্যবসায়িনাং। কো বিদেশঃ সবিদ্যানাং কঃ পরঃ প্রিয়বাদিনাং ॥ ইতি চাণক্যং ॥

প্রিয়সখঃ (পুং) খদিরঃ। ইতি শব্দচন্দ্রিকা ॥ প্রিয়শ্চাসৌ সখা চেতি প্রিয়স্য সখা ইতি চ। ইতি ব্যাকরণং ॥

প্রিয়সত্যং (ক্লী) সুনৃতবাক্যং। ইতি হেমচন্দ্রঃ ॥

প্রিয়সন্দেশঃ (পুং) চম্পাকবৃক্ষঃ। ইতি শব্দচন্দ্রিকা ॥ প্রিয়সংবাদশ্চ ॥

প্রিয়সালকঃ (পুং) অসনবৃক্ষঃ। পেয়াসাল ইতি খ্যাতঃ। ইতি রাজনির্ঘণ্টঃ ॥

প্রিয়া (স্ত্রী) নারী। ইতি শব্দরত্নাবলী॥ ভার্য্যা। ইতি হেমচন্দ্রঃ ॥ এলা। ইতি শব্দচন্দ্রিকা ॥ মল্লিকা। মদিরা। ইতি রাজনির্ঘণ্টঃ ॥ বার্ত্তা। ইতি ধরণিঃ ॥

প্রিয়াম্বুঃ (পুং) আম্রবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ তৎফলে হৃদ্যজলে চ ক্লী ॥

প্রিয়ালঃ (পুং) বৃক্ষভেদঃ। পিয়াল ইতি ভাষা। অস্য বীজং চিরঞ্জীতি প্রসিদ্ধং। তৎপর্য্যায়ঃ। চারঃ ২ অখট্টঃ ৩ খরস্কন্ধঃ ৪ ললনঃ ৫ চারকঃ ৬ বহুবল্কঃ ৭ সন্নদ্রুঃ ৮ তাপসপ্রিয়ঃ ৯ স্নেহবীজঃ ১০ উপবটঃ ১১ মক্ষবীর্য্যঃ ১২। ইতি রাজনির্ঘণ্টঃ ॥ পিয়ালঃ ১৩। ইত্যমরঃ॥ বহুলবল্কলঃ ১৪ রাজাদনং ১৫ তাপসেষ্টঃ ১৬ সন্নকদ্রুঃ ১৭ ধনুঃপটঃ ১৮। অস্য গুণঃ। পিত্তকফাস্র‌নাশিত্বং ॥ তৎফলগুণাঃ। মধুরত্বং। গুরুত্বং। স্নিগ্ধত্বং। সরত্বং। মরুৎপিত্তদাহজ্বরতৃষাপহত্বঞ্চ ॥ তন্মজ্জগুণাঃ। মধুরত্বং। বৃষ্যত্বং। পিত্তানিলাপহত্বং। হৃদ্যত্বং। দুর্জরত্বং। স্নিগ্ধত্বং। বিষ্টম্ভিত্বং। আমবর্দ্ধনত্বঞ্চ। ইতি ভাবপ্রকাশঃ ॥ অপি চ। চারস্য চ ফলং পক্বং বৃষ্যং গৌল্যাম্লকং গুরু। তদ্বীজং মধুরং বৃষ্যং পিত্তদাহার্ত্তিনাশনং ॥ ইতি রাজনির্ঘণ্টঃ ॥

প্রিয়ালা (স্ত্রী) দ্রাক্ষা। ইতি রাজনির্ঘণ্টঃ ॥

প্রিয়োদিতং (ত্রি) চাটুবাক্যং। ইতি শব্দরত্নাবলী ॥ প্রিয়বাক্যবিষয়শ্চ ॥

প্রী ক তর্পণে। ইতি কবিকল্পদ্রুমঃ ॥ ক যং, প্রায়য়ন্তি কবিসূক্তিরসায়নানি। ইতি হলায়ুধঃ। প্রীণয়ত্যপীতি কেচিৎ। ইতি দুর্গাদাসঃ ॥

প্রী ঙ য প্রীতৌ। কান্তৌ। ইতি কবিকল্পদ্রুমঃ ॥ প্রীতিরিহ প্রীতীভাবঃ। ঙ য যঃ প্রীয়তে প্রণয়িষু। ইতি হলায়ুধঃ। ইতি দুর্গাদাসঃ ॥

প্রী ঞ তর্পণে। ইতি কবিকল্পদ্রুমঃ ॥ ঞ প্রয়তি প্রয়তে। ইতি দুর্গাদাসঃ ॥

প্রী ঞ গ কান্তৌ। তর্পণে। ইতি কবিকল্পদ্রুমঃ ॥ তর্পণমিহ প্রীতীভাবঃ প্রীতীকরণঞ্চ। ঞ গ প্রভুঃ প্রীণাতু বিশ্বভুক্। প্রীণাতি বান্ধবজনানিতি হলায়ুধঃ। প্রীণীতে। ইতি দুর্গাদাসঃ ॥

প্রীঃ (স্ত্রী) প্রীতিঃ। ইতি কনধাতুটীকায়াং দুর্গাদাসঃ ॥ প্রথমা বিভক্তিঃ। যথা। ত্রিশঃ

প্রীদ্বীত্রীচীপীষীপ্ত্যঃ। স্যাদীনি ত্রীণি ত্রীণি ক্রমাৎ প্রীদ্বীত্রীচীপীষীপ্তীসংজ্ঞানি স্যুঃ। ইতি মুগ্ধবোধব্যাকরণং

প্রীণঃ (ত্রি) পুরাতনঃ। ইতি ত্রিকাণ্ডশেষঃ॥

প্রীতঃ। ইতি ব্যাকরণং॥

প্রীণনং (ক্লী) তৃপ্তিকরণং। তৎপর্য্যায়ঃ। তর্পণং ২ অবনং ৩। ইত্যমরঃ॥

প্রীণসঃ (পুং) গণ্ডকঃ। ইতি রাজনির্ঘণ্টঃ॥

প্রীতঃ (ত্রি) প্রীতিযুক্তঃ। তৎপর্য্যায়ঃ। হৃষ্টঃ ২ মত্তঃ ৩ তৃপ্তঃ ৪ প্রহ্লন্নঃ ৫ প্রমুদিতঃ ৬। ইত্যমরঃ॥ হৃষিতঃ ৭। নর্ম্ম। ইতি মেদিনী॥

প্রীতিঃ (স্ত্রী) তৃপ্তিঃ। তৎপর্য্যায়ঃ। মুৎ ২ প্রমদঃ ৩ হর্ষঃ ৪ প্রমোদঃ ৫ আমোদঃ ৬ সম্মদঃ ৭ আনন্দথুঃ ৮ আনন্দঃ ৯ শর্ম্ম ১০ সাতং ১১ সুখং ১২। ইত্যমরঃ॥ কেচিত্তু। মুদাদিসপ্তকং প্রীতৌ। আনন্দথ্বাদিপঞ্চকং সুখে ইত্যাহুঃ। ইতি ভরতঃ॥ ইষ্টদর্শনজন্যং সুখং। ইতি মোক্ষধর্ম্মে নীলকণ্ঠঃ॥ কামপত্নী। সা পুরা অনঙ্গবতী বেশ্যা আসীৎ বিভূতিদ্বাদশীব্রতং কৃত্বা রত্যাঃ সপত্নী জাতা। যথা। বেশ্যানঙ্গবতী নাম বিভূতিদ্বাদশীব্রতং। সমাপ্য মাঘমাসস্য দ্বাদশ্যাং লবণাচলং॥ নিবেদয়ন্তী গুরবে শয্যাঞ্চোপস্করান্বিতাং। অলংকৃত্য হৃষীকেশং সৌবর্ণামরপাদপং॥ সা চানঙ্গবতী বেশ্যা কামদেবস্য সাম্প্রতং। পত্নী সপত্নী সংজাতা রত্যাঃ প্রীতিরিতি শ্রুতা॥ ইতি মাৎস্যে ৮২ অধ্যায়ঃ॥ বিষ্কম্ভাদিসপ্তবিংশতিযোগান্তর্গতদ্বিতীয়যোগঃ। তত্র জাতফলং। প্রসূতিকালে যদি প্রীতিযোগো নরো হ্যরোগঃ সুখবান্ বিনোদী। রক্তানুরক্তো বিদুষাং প্রপন্নঃ সংপ্রার্থিতো যচ্ছতি বিত্তমেব॥ ইতি কোষ্ঠীপ্রদীপঃ॥ প্রেম। ইতি মেদিনী॥

প্রীতিজুষা (স্ত্রী) অনিরুদ্ধপত্নী। উষা। ইতি শব্দরত্নাবলী

প্রীতিদঃ (পুং) ভণ্ডঃ। ভাঁড় ইতি ভাষা। তৎপর্য্যায়ঃ। বাসন্তিকঃ ২ কেলিকিলঃ ৩ বৈহাসিকঃ ৪ বিদূষকঃ ৫ প্রহাসী ৬। ইতি হেমচন্দ্রঃ॥ হর্ষসুখপ্রেমদাতরি ত্রি॥

প্রীতিদত্তং (ক্লী) প্রীত্যা দত্তবস্তু। যথা। প্রীত্যা দত্তন্তু যৎকিঞ্চিৎ শ্বশ্র্বা বা শ্বশুরেণ বা। পাদবন্দনিকঞ্চৈব প্রীতিদত্তং তদুচ্যতে॥ ইতি মিতাক্ষরা॥ ভাবে ক্তপ্রত্যয়ে প্রীতিদানঞ্চ॥

প্রীতিভোজ্যং (ত্রি) প্রীত্যা ভক্ষণীয়মন্নাদি। যথা। অন্নানি প্রীতিভোজ্যানি আপদ্ভোজ্যানি বা পুনঃ। ন চ সংপ্রীয়সে রাজন্ন চৈবাপদ্গতা বয়ং॥ ইতি মহাভারতে উদ্যোগপর্ব্ব॥

প্রু ঙ সর্পণে। ইতি কবিকল্পদ্রুমঃ॥ রেফযুক্তঃ। ঙ প্রবতে। ইতি দুর্গাদাসঃ॥

প্রুষ উ দাহে। ইতি কবিকল্পদ্রুমঃ॥ উ প্রোষিত্বা প্রুষ্ট্বা। দাহ ভস্মীকরণে। ইতি দুর্গাদাসঃ

প্রুষ গ সেকে। পূর্ত্তৌ। স্নেহে। ইতি কবিকল্পদ্রুমঃ॥ গ প্রুষ্ণাতি পুপ্রোষ। সেক-

স্থানে মোচনমিতি ধাতুপ্রদীপভট্টমল্লৌ। ইতি দুর্গাদাসঃ ॥

প্রুষ্টঃ (ত্রি) দগ্ধঃ। ইত্যমরঃ ॥

প্রুম্বঃ (পুং) ঋতুঃ। দিবাকরঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তি

প্রুম্বা (স্ত্রী) জলবিন্দুঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ

প্রেঙ্খন্ [ৎ] (ত্রি) চলনবিশিষ্টঃ। সংসক্তিবিশিষ্টঃ। যথা। জ্যাকৃষ্টিবদ্ধখটকামুখপাণিপৃষ্ঠপ্রেঙ্খন্নখাংশুচয়সম্বলিতোঽম্বিকায়াঃ। ইত্যাদ্যমরুশতকং ॥

প্রেঙ্খা (স্ত্রী) দোলা। ইত্যমরঃ॥ পর্য্যটনং। অশ্বগতিঃ। সম্বেশনান্তরং। ইতি মেদিনী॥ নৃত্যং। ইতি ধরণিঃ ॥

প্রেঙ্খিতং (ত্রি) কম্পিতং। ইত্যমরঃ॥

প্রেঙ্খোল ৎ ক চাপলে। ইতি কবিকল্পদ্রুমঃ ॥ অন্তঃস্থতৃতীয়োপধঃ। অপিপ্রেঙ্খোলৎ। চাপলং চঞ্চলীভাবঃ। ইতি দুর্গাদাসঃ ॥

প্রেঙ্খোলনং (ক্লী) দোলা। ইতি হেমচন্দ্রঃ॥

প্রেঙ্খোলিতং (ত্রি) দোলিতং। তৎপর্য্যায়ঃ। তরলিতং ২ লুলিতং ৩ প্রেঙ্খিতং ৪ ধুতং ৫ চলিতং ৬ কম্পিতং ৭ ধূতং ৮ বেল্লিতং ৯ আন্দোলিতং ১০। ইতি হেমচন্দ্রঃ॥

প্রেতঃ (পুং) নরকস্থপ্রাণী। ইত্যমরঃ॥ ভূতভেদঃ। মৃতে ত্রি। ইতি মেদিনী॥ বৈদিকবিধানেন ঔর্দ্ধদেহিকাভাবাৎ বিষ্ণুদ্বেষাচ্চ বহুনরকভোগান্তে প্রেতশরীরং ভবতি। যথা। লোমশ উবাচ। ততো বহুতিথে কালে স রাজা পঞ্চতাং গতঃ। বৈদিকেন বিধানেন ন লেভে সৌর্দ্ধদেহিকং ॥ বিষ্ণুপ্রদ্বেষমাত্রেণ যুগানাং সপ্তবিংশতিং। ভুক্ত্বা চ যাতনাং যামীং নিস্তীর্ণনরকো নৃপঃ ॥ সময়া গিরিরাজস্তু পিশাচোঽভূত্তদা মহান্। *। তস্য রূপং যথা। দেবদ্যুতিরধীয়ানঃ শুশ্রাব করুণাময়ঃ। সমাগত্য ততস্তত্র তং পিশাচং দদর্শ সঃ॥ বিকরালমুখং দীনং পিশঙ্গনয়নং ভৃশং। ঊর্দ্ধমূর্দ্ধজকৃষ্ণাঙ্গং যমদূতমিবাপরং ॥ চলজ্জিহ্বঞ্চ লম্বোষ্ঠং দীর্ঘজঙ্ঘশিরাকুলং। দীর্ঘাঙ্ঘ্রিং শুষ্কতুণ্ডঞ্চ গর্ত্তাক্ষং শুষ্কপঞ্জরং॥ ইতি পাদ্মোত্তরখণ্ডে ১৬ অধ্যায়ঃ ॥*॥ প্রেতত্বাদিজনককর্ম্মাণি যথা। হরির্বক্তুর্হরতি নাম্নো যে গোবিন্দং নার্চ্চয়ন্তি যে। লভন্তে নাত্মবিদ্যাঞ্চ সুতীর্থবিমুখাশ্চ যে॥ সুবর্ণং বস্ত্রতাম্বূলং রত্নমন্নং ফলং জলং। আর্ত্তেভ্যো ন প্রযচ্ছন্তি সর্ব্বে সুকৃতদারকাঃ॥ ব্রহ্মস্বঞ্চ স্ত্রীধনানি লোভাদেব হরন্তি যে। বলেন ছদ্মনা বাপি ধূর্ত্তাশ্চ পরবঞ্চকাঃ॥ নাস্তিকাঃ কুহকাশ্চৌরা যে চান্যে বকবৃত্তয়ঃ। বালবৃদ্ধাতুরস্ত্রীষু নির্দ্দয়াঃ সত্যবর্জ্জিতাঃ ॥ অগ্নিদা গরদা যে চ যে চান্যে কূটসাক্ষিণঃ। অগম্যাগামিনঃ সর্ব্বে যে চান্যে গ্রামযাজিনঃ ॥ ব্যাধাচরণসম্পন্না বর্ণাদিধর্ম্মবর্জ্জিতাঃ। দেবোপদেবদনুজরক্ষোযক্ষাদিসেবিনঃ ॥ সর্ব্বদা মাদকদ্রব্যপানমত্তা হরিদ্বিষঃ। দেবতোচ্ছিষ্টপতিতনৃপশ্রাদ্ধান্নভোজিনঃ ॥ অসৎকর্ম্মরতা নিত্যং

সর্ব্বপাতকপাপিনঃ। পাষণ্ডধর্ম্মাচরণাঃ পুরোধোবৃত্তিজীবিনঃ॥ পিতৃমাতৃস্নুষাপত্যস্বদারত্যাগিনশ্চ যে। যে কদর্য্যাশ্চ লুব্ধাশ্চ নাস্তিকা ধর্ম্মদূষকাঃ॥ ত্যজন্তি স্বামিনং যুদ্ধে ত্যজন্তি শরণাগতং। গবাং ভূমেশ্চ হর্ত্তারো যে চান্যে রত্নদূষকাঃ॥ মহাক্ষেত্রেষু সর্ব্বেষু প্রতিগ্রহরতাশ্চ যে। পরদ্রোহরতা যে চ তথা যে প্রাণিহিংসকাঃ॥ পরাপবাদিনঃ পাপা দেবতাগুরুনিন্দকাঃ। কুপ্রতিগ্রাহিণঃ সর্ব্বে সম্ভবন্তি পুনঃ পুনঃ॥ প্রেতরাক্ষসপৈশাচ্যতির্য্যগ্‌বৃক্ষকুযোনিষু। ন তেষাং সুখলেশোঽস্তি ইহ লোকে পরত্র চ॥ ইতি পাদ্মোত্তরখণ্ডে ১৮ অধ্যায়ঃ॥ *॥ পঞ্চপ্রেতোপাখ্যানং যথা। ব্রাহ্মণ উবাচ। প্রেতানাং নাম জাতানাং যুষ্মাকং সম্ভবঃ কথং। কিন্তৎ কারণমুদ্দিশ্য যূয়মীদৃশনামকাঃ॥ প্রেতা ঊচুঃ। অহং স্বাদু সদা ভুক্ত্বা দদ্যাং পর্য্যুষিতং সদা। এতৎকারণমুদ্দিশ্য নাম পর্য্যুষিতং মম॥ ১॥ সূচিতা বহবোঽনেন বিপ্রাদ্যা হ্যন্নকাঙ্ক্ষিণঃ। এতৎ কারণমুদ্দিশ্য সূচীমুখমিমং বিদুঃ॥২॥ শীঘ্রং গচ্ছতি বিপ্রেণ যাচিতঃ ক্ষুধিতেন বৈ। পশ্চাদ্‌ভুঙ্‌ক্তে দ্বিজঃ শিষ্টমেষ শীঘ্রক উচ্যতে॥৩॥ গৃহোপরি সদা ভুঙ্‌ক্তে স্বাদু দ্বিজভয়েন হি। দ্বিজায় কুৎসিতং দত্ত্বা এষ রোহক উচ্যতে॥ ৪॥ মৌনেনাপি স্থিরো নিত্যং যাচিতো বিলিখেন্মহীং। অস্মাকমপি পাপিষ্ঠো লেখকো নাম এষ বৈ॥ ৫॥ মেঢ্রেণ লেখকো যাতি রোহকঃ পার্শ্বতঃ শিরাঃ। শীঘ্রকঃ পঙ্গুতাং প্রাপ্তঃ সূচী সূচীমুখোঽভবৎ॥ *॥ প্রেতানামাহারো যথা। দ্বিজ উবাচ। যে জীবা ভুবি তিষ্ঠন্তি সর্ব্বে আহারমূলকাঃ। যুষ্মাকমপি আহারং শ্রোতুমিচ্ছামি তত্ত্বতঃ॥ প্রেতা ঊচুঃ। শৃণু আহারমস্মাকং সর্ব্বসত্ত্ববিগর্হিতং। শ্লেষ্মমূত্রপুরীষেণ যোষিতাস্ত্র মলেন চ। গৃহাণি ত্যক্তশৌচানি প্রেতা ভুঞ্জন্তি তত্র বৈ॥ স্ত্রীভির্জগ্ধানি জীর্ণানি সংকীর্ণাপহতানি চ। মলেনাতিজুগুপ্সানি প্রেতা ভুঞ্জন্তি তত্র বৈ॥ ভয়লজ্জাবিহীনানি পতিতৈঃ সেবিতানি চ। অন্যোন্যদস্যুযুক্তানি প্রেতা ভুঞ্জন্তি তত্র বৈ॥ কলহান্বিতশোকানি ত্যক্তশোভানি মণ্ডনৈঃ। সবর্চ্চস্কানি ভাণ্ডানি প্রেতা ভুঞ্জন্তি তত্র বৈ॥ বলিমন্ত্রবিহীনানি দ্বিজাদৃষ্টানি যানি তু। নিয়মব্রতহীনানি প্রেতা ভুঞ্জন্তি তত্র বৈ॥ গুরবো নৈব পূজ্যন্তে স্ত্রীজিতানি মলানি চ। সক্রোধান্যপবিত্রাণি প্রেতা ভুঞ্জন্তি তত্র বৈ॥ ভুঞ্জন্তি ভিন্নভাণ্ডেষু মর্য্যাদারহিতেষু চ। অন্যোন্যোচ্ছিষ্টযুক্তেষু তত্র প্রেতাস্তু ভুঞ্জতে॥ সকেশ মাক্ষিকোচ্ছিষ্টং পূতিপর্য্যুষিতং তথা। সক্রোধঞ্চ সশোকঞ্চ তচ্চ প্রেতেষু ভোজনং॥ সনগ্নং ভোজনং যচ্চ নোত্তরীয়ং পদাসনং। সোষ্ণীষং সাম্বরীকক্ষং তচ্চ প্রেতেষু ভোজনং॥ অৰ্দ্ধগ্রাসং মহাগ্রাসং সোৎক্ষিপ্তং পতিতং তথা। দুর্ভুক্তং গোষ্ঠিকঞ্চৈব তচ্চ প্রেতেষু ভোজনং॥ সৌতিকং মৃতকঞ্চৈব রজসং

কলুষীকৃতং । নির্দ্দীপং কৃমিবচ্চাগ্রে যদ্ভুক্তং প্রৈতিকস্তু তৎ ॥ এতত্তে কথিতং সর্ব্বং যৎ প্রেতেষেব ভোজনং। নির্ব্বিণ্ণাঃ প্রেতজাত্যা বৈ পৃচ্ছামস্ত্বাং দ্বিজোত্তম ॥ * ॥ প্রেতত্বাভাবকারণং যথা। ন প্রেতো জায়তে যেন যেন চৈবেহ জায়তে। এতৎ সর্ব্বং সমাসেন প্রক্রূহি বদতাং বর॥ ব্রাহ্মণ উবাচ। একরাত্রং ত্রিরাত্রং বা কৃচ্ছ্রং চান্দ্রায়ণাদিকং । ব্রতেষপ্যুষিতো যস্তু ন প্রেতো জায়তে নরঃ॥ মিষ্টান্নপানদাতাথ সততং শ্রদ্ধয়ান্বিতঃ । দেবপূজাকরো নিত্যং ন প্রেতো জায়তে নরঃ॥ ত্রিরগ্নিরেকপঞ্চাগ্নির্নিরগ্নির্বাপ্যুপাসকঃ। সর্ব্বভূতদয়াপন্নো ন প্রেতো জায়তে নরঃ॥ তুল্যমানাপমানশ্চ তুল্যঃ কাঞ্চনলোষ্টয়োঃ। তুল্যঃ শত্রৌ চ মিত্রে চ ন প্রেতো জায়তে নরঃ॥ দেবতাতিথিপূজাসু গুরুজাতিষু নিত্যশঃ। বেদশাস্ত্ররতো নিত্যং ন প্রেতো জায়তে নরঃ॥ জিতক্রোধো মদৈশ্বর্য্যতৃষ্ণাসঙ্গবিবর্জিতঃ । ক্ষমাক্রোধসুশীলশ্চ ন প্রেতো জায়তে নরঃ॥ দেবতাতিথিপূজাস্তু পর্ব্বতাংশ্চ নদীস্তথা। পশ্যেদ্দেবালয়াংশ্চৈব ন প্রেতো জায়তে নরঃ॥*॥ প্রেতত্বকারণং যথা। শূদ্রান্নং যো দ্বিজো ভুঙ্ক্তে যঃ ক্রামতি দ্বিজোত্তমং। বৃত্তিহা দ্বিজদেবেষু স প্রেতো জায়তে নরঃ॥ মাতরং পিতরং বৃদ্ধং জ্ঞাতিং সাধুজনং তথা। লোভাৎ ত্যজতি যঃ স্নেহং স প্রেতো জায়তে নরঃ॥ অযাজ্যযাজকশ্চৈব যাজ্যঞ্চ পরিবর্জ্জয়েৎ। শূদ্রানুগ্রহকর্ত্তা চ স প্রেতো জায়তে নরঃ॥ কুজ্যোতিষি কুবিদ্যস্তু কুজনেষু কুদেশকঃ। শূদ্রসেবাকরো রাজ্ঞাং স প্রেতো জায়তে নরঃ॥ সেবকায়াপদ্রুতো যঃ সেবকস্ত্বপরিগ্রহঃ। তাবুভাবপি জায়েতে প্রেতৌ কালান্ন কিং প্রদঃ॥ দ্বিজানুমন্ত্রিতো ভুঙ্ক্তে শূদ্রান্নং বা দ্বিজস্য তু। শূদ্রেণৈব দ্বিজঃ প্রেতো নিরয়ানুপগচ্ছতি॥ গীতবাদ্যরতো নিত্যং মদ্যপস্ত্রীনিষেবণাৎ। দ্যূতমাংসপ্রিয়ো যস্তু স প্রেতো জায়তে নরঃ॥ বৃথারেতো বৃথামাংসো বৃথাবাদী বৃথামতিঃ । নিন্দকো দ্বিজদেবানাং স প্রেতো জায়তে নরঃ ॥ বৃদ্ধং বালং গুরুং বিপ্রং যোঽবমন্য ভুনক্তি বৈ। কন্যাং দদাতি শুল্কেন স প্রেতো জায়তে নরঃ॥ ন্যাসাপহর্ত্তা মিত্রধ্রুক্ পরপাকরতস্তথা। বিশ্রম্ভঘাতী কূটশ্চ স প্রেতো জায়তে নরঃ॥ নির্দ্দোষান্ সুহৃদো নারীস্ত্যজেৎ কালান্ন পাতি যঃ। ধনমীহেত যস্তেষাং স প্রেতো জায়তে নরঃ॥ হস্ত্যশ্বরথযানানি মৃতশয্যাসনাদি যঃ। কৃষ্ণাজিনঞ্চ গৃহ্লাতি অনাপৎসু গতো দ্বিজঃ॥ তথোভয়মুখীং কালং সশৈলাং মেদিনীং দ্বিজঃ। কুরুক্ষেত্রস্থ যদ্দানং চাণ্ডালাৎ পতিতাত্তথা । মাসিকেঽপি নবশ্রাদ্ধে ভুঞ্জন্ প্রেতান্ন মুচ্যতে॥ ব্রহ্মহা গোবধী স্তেয়ী সুরাপো গুরুতল্পগঃ। ভূমিকন্যাপহর্ত্তা যঃ স প্রেতো জায়তে নরঃ॥ লালাসঙ্করকৃন্নিত্যং বর্ণসঙ্করকৃত্তথা। যোনিসঙ্করকৃচ্চাপি স প্রেতো

জায়তে নরঃ॥ বিক্রীণাতি বিষং শস্ত্রং তিলানাং লবণস্য তু। গবাং কেশরিণাং মোহাৎ বিক্রয়াৎ প্রেততাং ব্রজেৎ॥ কূটমাপ্যে চ তৌল্যেন ক্রয়ং ক্রীণাতি বিক্রয়াৎ। মদ্যতক্রপয়োদধ্নাং স প্রেতো জায়তে নরঃ॥ স্ত্রীরক্তো মদ্যপানে তু মৃগয়ামনুধাবতি। নিত্যনৈমিত্তিকেঽদাতা স প্রেতো জায়তে নরঃ॥ ইত্যগ্নিপুরাণং॥ *॥ মনুষ্যাণাং আতিবাহিকদেহানন্তরং প্রেতদেহো ভবতি। যথা বিষ্ণুধর্ম্মোত্তরে। তৎক্ষণাদেব গৃহ্লাতি শরীরমাতিবাহিকং। আতিবাহিকসংজ্ঞোঽসৌ দেহো ভবতি ভার্গব॥ কেবলং তন্মনুষ্যাণাং নান্যেষাং প্রাণিনাং ক্বচিৎ। প্রেতপিণ্ডৈস্ততো দত্তৈর্দ্দেহমাপ্নোতি ভার্গব॥ ভোগদেহমিতি প্রোক্তং ক্রমাদেব ন সংশয়ঃ। প্রেতপিণ্ডা ন দীয়ন্তে যস্য তস্য বিমোক্ষণং॥ শ্মাশানিকেভ্যো দেবেভ্য আকল্পং নৈব বিদ্যতে। তত্রাস্য যাতনা ঘোরাঃ শীতবাতাতপোদ্ভবাঃ॥ ততঃ সপিণ্ডীকরণে বান্ধবৈঃ স কৃতে নরঃ। পূর্ণে সম্বৎসরে দেহমতোঽন্যং প্রতিপদ্যতে॥ ততঃ স নরকে যাতি স্বর্গে বা স্বেন কর্ম্মণা॥ ইতি শুদ্ধিতত্ত্বং॥

প্রেতকার্য্যং (ক্লী) মৃতস্য দাহাদিসপিণ্ডীকরণান্তং কর্ম্ম। যথা। অকৃত্বা প্রেতকার্য্যাণি প্রেতস্য ধনহারকঃ। বর্ণানাং যদ্বধে প্রোক্তং তদ্ব্রতং নিয়তশ্চরেৎ॥ ইতি দায়তত্ত্বং॥

প্রেতগৃহং (ক্লী) শ্মশানং। ইতি হেমচন্দ্রঃ॥

প্রেততর্পণং (ক্লী) মরণাবধিসপিণ্ডীকরণপর্য্যন্তং প্রেতশব্দোল্লেখেন জলদানং যথা। অত্র প্রেততর্পণে তিলাংস্থিতিবিশেষোপাদানাৎ সূর্য্যাদিবারেণাপি তিলৈরেব তর্পণং প্রতীয়তে॥ তদনুষ্ঠানং যথা। অপঃ সর্ব্বে শবস্পর্শিনো গত্বা পিতৃপদস্থানে প্রেতপদোহেন দ্বিতীয়ান্তং তর্পয়েয়ুঃ পিতৃশব্দোচ্চারণেঽপি তৃপ্তা ভবতি। এতেন অমুকগোত্রং প্রেতং অমুকদেবশর্ম্মাণং তর্পয়ামি। ইতি সামগানাং প্রয়োগঃ। যজুর্ব্বেদিনাস্তু অমুকগোত্র প্রেত অমুকদেবশর্ম্মন্ তৃপ্যস্ব। ইতি সম্বোধনান্তবাক্যং। ইতি শুদ্ধিতত্ত্বং॥

প্রেতদেহঃ (পুং ক্লী) প্রেতশরীরং। যথা। কৃতে সপিণ্ডীকরণে নরঃ সংবৎসরাৎ পরং। প্রেতদেহং পরিত্যজ্য ভোগদেহং প্রপদ্যতে॥ ইতি তিথ্যাদিতত্ত্বধৃতবিষ্ণুধর্ম্মোত্তরীয়বচনং॥ *॥ পূরকপিণ্ডদানেন তদুৎপত্তির্যথা। শিরস্ত্বাদ্যেন পিণ্ডেন প্রেতস্য ক্রিয়তে সদা। দ্বিতীয়েন তু কর্ণাক্ষিনাসিকাস্তু সমাসতঃ॥ গলাংসভুজবক্ষাংসি তৃতীয়েন যথাক্রমাৎ। চতুর্থেন তু পিণ্ডেন নাভিলিঙ্গগুদানি চ॥ জানুজঙ্ঘে তথা পাদৌ পঞ্চমেন তু সর্ব্বদা। সর্ব্বমর্ম্মাণি ষষ্ঠেন সপ্তমেন তু নাড়য়ঃ॥ দন্তলোমাদ্যষ্টমেন বীর্য্যঞ্চ নবমেন তু। দশমেন চ পূর্ণত্বং তৃপ্ততা ক্ষুদ্বিপর্য্যয়ঃ॥ ইতি শুদ্ধিতত্ত্বধৃতকূর্ম্মপুরাণবচনং॥

প্রেতনদী (স্ত্রী) বৈতরণী। ইতি শব্দরত্নাবলী ॥

প্রেতপটহঃ (পুং) মরণকালে বাদনীয়বাদ্যবিশেষঃ। তৎপর্য্যায়ঃ। ভবরুৎ ২ মৃত্যুভঙ্গুরকঃ ৩। ইতি ত্রিকাণ্ডশেষঃ ॥

প্রেতপতিঃ (পুং) যমঃ। ইতি হলায়ুধঃ ॥

প্রেতপক্ষঃ (পুং) গৌণচান্দ্রাশ্বিনকৃষ্ণপক্ষঃ। তত্র মৃতস্য পার্ব্বণবিধিনা সাংবৎসরিকং শ্রাদ্ধং কর্ত্তব্যং। যথা। আষাঢ্যাঃ পঞ্চমে পক্ষে কন্যাসংস্থে দিবাকরে। যো বৈ শ্রাদ্ধং নরঃ কুর্য্যাদেকস্মিন্নপি বাসরে ॥ তস্য সংবৎসরং যাবত্তৃপ্তাঃ স্যুঃ পিতরো ধ্রুবং ॥ নভা বাথ নভস্যো বা মলমাসো যদা ভবেৎ। সপ্তমঃ পিতৃপক্ষঃ স্যাদন্যত্রৈব তু পঞ্চমঃ ॥ ইতি। তত্র মৃতস্য সপিণ্ডীকরণাদূর্দ্ধং যত্র যত্র প্রদীয়তে। তত্র তত্র ত্রয়ং কুর্য্যাদ্বর্জ্জয়িত্বা মৃতাহনি ॥ অমাবাস্যাং ক্ষয়ো যস্য প্রেতপক্ষেঽথবা পুনঃ। সপিণ্ডীকরণাদূর্দ্ধং তস্যোক্তঃ পার্ব্বণো বিধিঃ॥ ইতি শঙ্খোক্তেন প্রত্যাব্দিকং পার্ব্বণবিধিনা কর্ত্তব্যং। ইতি মলমাসতত্ত্বং ॥ * ॥ তত্র নিষিদ্ধদিনেঽপি তিলতর্পণং কর্ত্তব্যং। যথা স্মৃতিঃ। তীর্থে তিথিবিশেষে চ গঙ্গায়াং প্রেতপক্ষকে। নিষিদ্ধেঽপি দিনে কুর্য্যাৎ তর্পণং তিলমিশ্রিতং ॥ ইতি চ মলমাসতত্ত্বং ॥

প্রেতপিণ্ডঃ (পুং) মরণাবধিসপিণ্ডীকরণপর্য্যন্তং প্রেতসম্প্রদানকপিণ্ডাকারান্নং। যথা। ন স্বধাঞ্চ প্রযুঞ্জীত প্রেতপিণ্ডে দশাহিকে। ভাষেতৈতচ্চ বৈ পিণ্ডং যজ্ঞদত্তস্য পূরকং ॥ * ॥ তত্তৎপিণ্ডস্য প্রেতাঙ্গকরণত্বং যথা।- ব্রহ্মপুরাণে। শিরস্ত্বাদ্যেন পিণ্ডেন প্রেতস্য ক্রিয়তে সদা। দ্বিতীয়েন তু কর্ণাক্ষিনাসিকাস্তু সমাসতঃ ॥ গলাংসভুজবক্ষাংসি তৃতীয়েন তথা ক্রমাৎ। চতুর্থেন তু পিণ্ডেন নাভিলিঙ্গগুদানি চ ॥ জানুজঙ্ঘে তথা পাদৌ পঞ্চমেন তু সর্ব্বদা। সর্ব্বমর্ম্মাণি ষষ্ঠেন সপ্তমেন তু নাড়য়ঃ ॥ দন্তলোমাদ্যষ্টমেন বীর্য্যঞ্চ নবমেন তু। দশমেন তু পূর্ণত্বং তৃপ্ততা ক্ষুদ্বিপর্য্যয়ঃ ॥ * ॥ তদকরণে দোষো যথা। প্রেতপিণ্ডা ন দীয়ন্তে যস্য তস্য বিমোক্ষণং। শ্মাশানিকেভ্যো দেবেভ্য আকল্পং নৈব বিদ্যতে ॥ * ॥ পূরকপিণ্ডদানাদেরিতিকর্ত্তব্যতা যথা। পারস্করঃ। প্রেতায় পিণ্ডং দত্ত্বা অবনেজনদানপ্রত্যবনেজনেষু নামগ্রাহং মৃণ্ময়ে তাং রাত্রিং বিহায়সি ক্ষীরোদকে নিদধ্যুঃ প্রেতাত্র স্নাহি পিব চেদং ক্ষীরমিত্যুচ্চার্য্যেতি। অত্র দানশব্দেন পিণ্ডদানমুক্তং বহুবচনাৎ। তেনাবনেজনপিণ্ডদানপ্রত্যবনেজনেষু নামগ্রাহং নাম গৃহীত্বা প্রেতপিণ্ডানুষ্ঠানং সমাপ্যং। বিহায়সি রাত্রৌ ক্ষীরোদকে প্রেতাত্র স্নাহি পিব চেদং ক্ষীরমিত্যুচ্চার্য্য নিদধ্যুঃ। প্রথমেঽহনি যো দদ্যাৎ প্রেতায়ান্নং সমাহিতঃ। যত্নান্নবস্তু চান্যেষু স এব প্রদদাত্যপি ॥*॥ প্রথমপিণ্ডকর্ত্তৃনিয়মবৎ প্রথমপিণ্ডদ্রব্যনিয়মমাহ শুনঃ পুচ্ছঃ। প্রথমেঽহনি যদ্দ্রব্যং তদেব স্যাদ্দশাহিকং। সদ্যঃ-

শৌচেঽপি দাতব্যাঃ সর্ব্বেঽপি যুগপত্তথা ॥ ত্র্যহাশৌচে প্রদাতব্যাঃ প্রথমে ত্বেক এব হি। দ্বিতীয়েঽহনি চত্বারস্তৃতীয়ে পঞ্চ চৈব হি ॥ একস্তোয়াঞ্জলিস্ত্বেবং পাত্রমেকঞ্চ দীয়তে। দ্বিতীয়ে দ্বৌ তৃতীয়ে ত্রীন্ চতুর্থে চতুরস্তথা ॥ পঞ্চমে পঞ্চ ষষ্ঠে ষট্ সপ্তমে সপ্ত এব চ। অষ্টমেঽষ্টৌ চ নবমে নবৈব দশমে দশ ॥ যেন স্যুঃ পঞ্চপঞ্চাশৎ তোয়স্যাঞ্জলয়ঃ ক্রমাৎ। তোয়পাত্রাণি তাবন্তি সংযুক্তানি তিলাদিভিঃ ॥ ইতি শুদ্ধিতত্ত্বং ॥

প্রেতপুরং (ক্লী) যমালয়ঃ। যথা। যাবচ্চ কন্যাতুলয়োঃ ক্রমাদাস্তে দিবাকরঃ। তাবৎ শ্রাদ্ধস্য কালঃ স্যাৎ শূন্যং প্রেতপুরং তদা ॥ ইতি শ্রাদ্ধতত্ত্বং ॥

প্রেতরাক্ষসী (স্ত্রী) তুলসী। ইতি রত্নমালা ॥

প্রেতবনং (ক্লী) শ্মশানং। ইতি হেমচন্দ্রঃ ॥

প্রেতবাহিতঃ (ত্রি) ভূতাবিষ্টঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

প্রেতশিলা (স্ত্রী) পিণ্ডদানার্থগয়াস্থিতপ্রস্তরবিশেষঃ। যথা। ব্রহ্মোবাচ। যেয়ং প্রেতশিলা খ্যাতা গয়ায়াং সা ত্রিধা স্থিতা। প্রভাসে প্রেতকুণ্ডে চ গয়াসুরশিরস্যপি ॥ ধর্ম্মেণ ধারিতা ভূত্যৈ সর্ব্বদেবময়ী শিলা ॥ প্রেতত্বং যে গতা নৃণাং পিত্রাদ্যা বান্ধবাদয়ঃ। তেষামুদ্ধরণার্থায় যতঃ প্রেতশিলা ততঃ ॥ অতোঽত্র মুনয়ো ভূপা রাজপত্ন্যাদয়ঃ সদা। তস্যাং শিলায়াং শ্রাদ্ধাদিকর্ত্তারো ব্রহ্মলোকগাঃ ॥ গয়াসুরস্য যম্মুণ্ডং তস্য পৃষ্ঠে শিলা যতঃ। মুণ্ডপৃষ্ঠো গিরিস্তস্মাৎ সর্ব্বদেবময়ো হ্যয়ং ॥ মুণ্ডপৃষ্ঠস্য পাদেষু যতো ব্রহ্মসরোমুখাঃ। অরবিন্দবনস্তেষু তেন চৈবোপলক্ষিতঃ ॥ অরবিন্দো গিরির্নাম ক্রৌঞ্চপাদাঙ্কিতো যতঃ। তস্মাদ্গিরিঃ ক্রৌঞ্চপদঃ পিতৃণাং ব্রহ্মলোকদঃ ॥ গদাধরাদয়ো দেবা আদ্যা আদৌ ব্যবস্থিতাঃ। শিলারূপেণ চ ব্যক্তাস্তস্মাদ্দেবময়ী শিলা। গয়াশিরশ্ছাদয়িত্বা গুরুত্বাদাস্থিতা শিলা ॥ * ॥ স্নাত্বা প্রেতশিলাদৌ তু চরণাম্বুস্থতেন চ। পিণ্ডং দদ্যাদিমৈর্ম্মন্ত্রৈরাবাহ্য চ পিতৄন পরান্ ॥ অস্মৎকুলে মৃতা যে চ গতির্যেষাং ন বিদ্যতে। তেষামাবাহয়িষ্যামি দর্ভপৃষ্ঠে তিলোদকৈঃ ॥ পিতৃবংশে মৃতা যে চ মাতৃবংশে চ যে মৃতাঃ। তেষামুদ্ধরণার্থায় ইমং পিণ্ডং দদাম্যহং ॥ মাতামহকুলে যে চ গতির্যেষাং ন জায়তে। তেষামুদ্ধরণার্থায় ইমং পিণ্ডং দদাম্যহং ॥ অজাতদন্তা যে কেচিৎ যে চ গর্ব্তেষু পীড়িতাঃ। তেষামুদ্ধরণার্থায় ইমং পিণ্ডং দদাম্যহং ॥ বন্ধুবর্গাশ্চ যে কেচিন্নামগোত্রবিবর্জ্জিতাঃ। স্বগোত্রে পরগোত্রে বা গতির্যেষাং ন বিদ্যতে। তেষামুদ্ধরণার্থায় ইমং পিণ্ডং দদাম্যহং ॥ উদ্বন্ধনমৃতা যে চ বিষশস্ত্রহতাশ্চ যে। আত্মোপঘাতিনো যে চ তেভ্যঃ পিণ্ডং দদাম্যহং ॥ অগ্নিদাহে মৃতা যে চ সিংহব্যাঘ্রহতাশ্চ যে। দংষ্ট্রিভিঃ শৃঙ্গিভির্ব্বাপি তেষাং পিণ্ডং দদাম্যহং ॥ অগ্নিদগ্ধাশ্চ যে কেচিন্নাগ্নিদগ্ধাস্তথাপরে। বিদ্যুচ্চৌরহতা যে

চ তেষাং পিণ্ডং দদাম্যহং ॥ রৌরবে চান্ধতামিস্রে কালসূত্রে চ যে গতাঃ। তেষামুদ্ধরণার্থায় ইমং পিণ্ডং দদাম্যহং ॥ অসিপত্রবনে ঘোরে কুম্ভীপাকে চ যে গতাঃ। তেষামুদ্ধরণার্থায় ইমং পিণ্ডং দদাম্যহং ॥ অন্যেষাং যাতনাস্থানাং প্রেত-লোকনিবাসিনাং। তেষামুদ্ধরণার্থায় ইমং পিণ্ডং দদাম্যহং ॥ পশুযোনি-গতা যে চ পক্ষিকীটসরীসৃপাঃ। অথবা বৃক্ষযোনিস্থাস্তেভ্যঃ পিণ্ডং দদাম্যহং ॥ অসংখ্যযাতনাসংস্থা যে নীতা যমশাসনে। তেষামুদ্ধরণার্থায় ইমং পিণ্ডং দদাম্যহং ॥ জাত্যন্তরসহস্রাণি ভ্রমন্তঃ স্বেন কর্ম্মণা। মানুষ্যং দুর্লভং যেষাং তেভ্যঃ পিণ্ডং দদাম্যহং ॥ যে বান্ধবাবান্ধবা বা যেঽন্য জন্মনি বান্ধবাঃ। তে সর্ব্বে তৃপ্তিমায়ান্তু পিণ্ডদানেন সর্ব্বদা ॥ যে কেচিৎ প্রেত-রূপেণ বর্ত্তন্তে পিতরো মম। তে সর্ব্বে তৃপ্তিমায়ান্তু পিণ্ডদানেন সর্ব্বদা ॥ যে মে পিতৃকুলে জাতাঃ কুলে মাতুস্তথৈব চ। গুরুশ্বশুরবন্ধূনাং যেচান্যে বান্ধবা মৃতাঃ ॥ যে মে কুলে লুপ্তপিণ্ডাঃ পুত্রদারবিব-র্জিতাঃ। ক্রিয়ালোপগতা যে চ জাত্যন্ধাঃ পঙ্গবস্তথা॥ বিরূপাস্ত্বামগর্ত্তা যে জ্ঞাতা-জ্ঞাতাঃ কুলে মম। তেষাং পিণ্ডং ময়া দত্তমক্ষয্যমুপতিষ্ঠতাং ॥ সাক্ষিণঃ সন্তু মে দেবা ব্রহ্মেশানাদয়স্তথা। ময়া গয়াং সমাসাদ্য পিতৃণাং নিষ্কৃতিঃ কৃতা ॥ আগতোঽহং গয়াং দেব পিতৃকার্য্যে গদাধর। তন্মে সাক্ষী ভবস্বাদ্য অনৃণোঽহ-মৃণত্রয়াৎ ॥ ইতি গারুড়ে গয়ামাহাত্ম্যে ৮৫। ৮৬ অধ্যায়ঃ ॥

প্রেতশৌচং (ক্লী) মৃতসংস্কারাদি। যথা। যাজ্ঞবল্ক্য উবাচ। প্রেতশৌচং প্রবক্ষ্যামি তচ্ছৃণুধ্বং যতব্রতাঃ। ঊনদ্বিবর্ষং নিখ-নেন্ন কুর্য্যাদুদকন্ততঃ ॥ আশ্মশানাদনু-ব্রজ্য ইতরো জ্ঞাতিভির্মৃতঃ। যমসূক্তং তথা জপ্যং জপদ্ভির্লৌকিকাগ্নিনা ॥ স দগ্ধব্য উপেতশ্চেদাহিতাগ্ন্যাবৃতার্থবৎ। সপ্তমাদ্দশমাদ্বাপি জ্ঞাতয়ো হ্যুপয়-ন্ত্যপঃ॥ অপনঃ শোশুচদঘমনেন পিতৃদিঙ্-মুখাঃ॥ এবং মাতামহাচার্য্যপ্রেতানাঞ্চোদক-ক্রিয়াঃ ॥ কামোদকাঃ সখিপুত্রস্বস্রীয়-শ্বশুরর্ত্বিজঃ। নামগোত্রেণ হ্যুদকং সকৃৎ সিঞ্চন্তি বাগ্যতাঃ॥ পাষণ্ডপতিতস্তেনা ন কুর্য্যুরুদকক্রিয়াং। ন ব্রহ্মচারিণো ব্রাত্যা যোষিতঃ কামগাস্তথা ॥ সুরাপা-স্ত্বাত্মঘাতিন্যো নাশৌচোদকভাজনাঃ। অতো ন রোদিতব্যং হি ত্বনিত্যা জীব-সংসৃতিঃ ॥ ক্রিয়া কার্য্যা যথাশক্তি ততো গচ্ছেদ্‌গৃহান্ প্রতি। বিদশ্য নিম্বপত্রাণি নিয়তা দ্বারি বেশ্মনঃ ॥ আচম্যাথাগ্নি-মুদকং গোময়ং গৌরসর্ষপান্। প্রবিশেয়ুঃ সমালভ্য কৃত্বাশ্মনি পদং শনৈঃ ॥ প্রবে-শনাদিকং কর্ম্ম প্রেতসংস্পর্শিনামপি। ঈক্ষতাং তৎক্ষণাচ্ছুদ্ধিঃ পরেষাং স্নানসং-যমাৎ ॥ ক্রীতলব্ধাশনা ভূমৌ স্বপেয়ুস্তে পৃথক্ পৃথক্। পিণ্ডযজ্ঞাবৃতা দেয়ং প্রেতা-য়ান্নং দিনত্রয়ং ॥ জলমেকাহমাকাশে স্থাপ্যং ক্ষীরঞ্চ মৃণ্ময়ে। বৈতালোপাসনাঃ

কার্য্যাঃ ক্রিয়াশ্চ শ্রুতিচোদিতাঃ॥ আ-
দন্তজন্মনঃ সদ্য আচূড়ান্নৈশিকী স্মৃতা।
ত্রিরাত্রমাব্রতাদেশাদ্দশরাত্রমতঃ পরং ॥
ত্রিরাত্রং দশরাত্রং বা শাবমাশৌচমুচ্যতে।
ঊনদ্বিবর্ষ উভয়োঃ সূতকং মাতুরেব হি।
অন্তরা জন্মমরণে শেষাহোভির্বিশুদ্ধ্যতি॥
দশ দ্বাদশ বর্ণানাং তথা পঞ্চদশৈব চ।
ত্রিংশদ্দিনানি চ তথা ভবতি প্রেতসূতকং॥
অহস্ত্বদত্তকন্যাসু বালেষু চ বিশোধনং।
গুর্ব্বন্তে বাস্ত্বনূচানমাতুলশ্রোত্রিয়েষু চ॥
অনৌরসেষু পুত্ত্রেষু ভার্য্যাস্বন্যগতাসু চ।
নিবাসরাজনি তথা তদহঃ শুদ্ধিকারণং॥
হতানাং নৃপগোবিপ্রৈরন্বক্ষং চাত্মঘাতিনাং।
বিষাদ্যৈশ্চ হতানাঞ্চ নাশৌচং পৃথিবী-
পতে॥ সত্রিব্রতিব্রহ্মচারিদাতৃব্রহ্মবিদাং
তথা। দানে বিবাহে যজ্ঞে চ সংগ্রামে
দেশবিপ্লবে। আপদ্যপি হি কষ্টায়াং
সদ্যঃশৌচং বিধীয়তে॥ কালোঽগ্নিঃ
কর্ম্মমৃদ্বায়ুর্ম্মনো জ্ঞানং তপো জলং।
পশ্চাত্তাপো নিরাহারঃ সর্ব্বেষাং শুদ্ধি-
হেতবঃ॥ ইতি গারুড়ে ১০৬ অধ্যায়ঃ॥

প্রেতশ্রাদ্ধং (ক্লী) প্রেতোদ্দেশ্যকশ্রাদ্ধং। তদনুষ্ঠানং যথা। তত্র গোভিলঃ। অথৈ-কোদ্দিষ্টমেকং পবিত্রমেকোঽর্ঘ একঃ পিণ্ডো নাবাহনং নাগ্নৌকরণং নাত্র বিশ্বে-দেবাঃ স্বদিতমিতি তৃপ্তিপ্রশ্নঃ। উপ-তিষ্ঠতামিত্যক্ষয্যস্থানে অভিরম্যতামিতি বিসর্গোঽভিরতোঽস্মীতি প্রতিবচনমেতৎ প্রেতশ্রাদ্ধমিতি। ইতি শ্রাদ্ধতত্ত্বং॥ *॥ তচ্চ নবশ্রাদ্ধং তত্তু সাগ্নিককর্ত্তব্যং চতুর্থপঞ্চমনবমৈকাদশাহেষু প্রেতশ্রাদ্ধং। যথা যমঃ। চতুর্থে পঞ্চমে চৈব নবমৈকা-দশে তথা। যদত্র দীয়তে জন্তোস্তন্নব-শ্রাদ্ধমুচ্যতে॥ ইতি শ্রাদ্ধবিবেকঃ॥ *॥ সাগ্নিনিরগ্ন্যুভয়কর্ত্তব্যং আদ্যশ্রাদ্ধাদি-সপিণ্ডীকরণান্তং শ্রাদ্ধং। যথা। দ্বাদশ প্রতিমাস্যানি আদ্যং ষাণ্মাসিকে তথা। সপিণ্ডীকরণঞ্চৈব ইত্যেতৎ শ্রাদ্ধ ষোড়শং॥ ইতি শ্রাদ্ধতত্ত্বং॥*॥ অম্বুঘট-শ্রাদ্ধং। তত্তু সংবৎসরং যাবৎ প্রত্যহং প্রেতোদ্দেশ্যকান্নজলদানরূপং। যথা। পারস্করঃ। অহরহরন্নমস্মৈ ব্রাহ্মণায়োদ-কুম্ভঞ্চ দদ্যাৎ পিণ্ডমপ্যেকে নিগৃণন্তি। দদতীত্যর্থঃ। ইতি শ্রাদ্ধবিবেকঃ॥ *॥ গয়াদিতীর্থদ্রব্যাদিপ্রাপ্তিনির্মিত্তমেকোদ্দি-ষ্টশ্রাদ্ধং। যথা। পিতৃযজ্ঞস্তু নির্ব্বর্ত্ত্য মাসিকে শ্রাদ্ধ এব তু। শ্রাদ্ধং প্রতিরুচৌ চৈব মাতাপিত্রোর্ম্মৃতাহনি॥ অসপিণ্ডীকৃতং প্রেতমেকোদ্দিষ্টেন তর্প-য়েৎ। তেনাম্বুঘটশ্রাদ্ধে মৃতাহবিহিত-মাসিকে তথা বিশিষ্টতীর্থদ্রব্যাদিপ্রাপ্তৌ প্রেতশ্রাদ্ধকরণেচ্ছায়াং মাতাপিত্রোর্ম্মৃতা-হনি চ অসপিণ্ডীকৃতং প্রেতমেকো-দ্দিষ্টেন তর্পয়েৎ। ইতি শ্রাদ্ধতত্ত্বং॥

প্রেতা (স্ত্রী) প্রেতভাবাপন্না। যথা। বিষ্ণুরোঁ। তৎ সদিত্যাদি অমুকগোত্রায়াঃ প্রেতায়া অমুকীদেব্যা অশৌচান্তাদ্দ্বিতীয়ে-ঽহ্নি অমুকগোত্রায়াঃ প্রেতায়াঃ প্রেতত্ব-বিমুক্তিপূর্ব্বকস্বর্গলোকগমনকামঃ সোপ-করণচন্দনাঙ্কিতধেনুদানমহং করিষ্যামি।

ইতি মৌর্থহা ॥*॥ মৃতা। যথা। প্রেতায়াঃ পুত্রিকায়া ন ভর্ত্তা ধনমর্হত্যপুত্রায়াঃ। ইতি দায়ভাগে শঙ্খলিখিতৌ ॥

প্রেত্য ব্য লোকান্তরং। তৎপর্য্যায়ঃ। অমুত্র ২। ইত্যমরঃ ॥

প্রেম [ন্] (ক্লী পুং) সৌহৃদ্যং। তৎপর্য্যায়ঃ। প্রেমা ২ প্রিয়তা ৩ হার্দ্দং ৪ স্নেহঃ ৫। ইত্যমরঃ॥ নর্ম্ম। ইতি মেদিনী ॥

প্রেমপাতনং (ক্লী) রোদনং। নেত্রজলং। ইতি শব্দচন্দ্রিকা ॥

প্রেমভক্তিঃ (স্ত্রী) স্নেহযুক্তশ্রীকৃষ্ণসেবা। বিষ্ণৌকান্তিকমমতা। তল্লক্ষণং যথা। নারদপঞ্চরাত্রে। অনন্যমমতা বিষ্ণৌ মমতা প্রেমসংপ্লুতা। ভক্তিরিত্যুচ্যতে ভীষ্ম প্রহ্লাদোদ্ধবনারদৈরিতি ॥ প্রেমভক্তেশ্চ মাহাত্ম্যং ভক্তের্ম্মাহাত্ম্যতঃ পরং। সিদ্ধমেব যতো ভক্তেঃ ফলং প্রেমৈব নিশ্চিতং ॥ * ॥ অথ প্রেমসম্পত্তিচিহ্নানি। সপ্তমস্কন্ধে শ্রীপ্রহ্লাদস্য বালানুশাসনে। নিশম্য কর্ম্মাণি গুণানতুল্যান্ বীর্য্যাণি লীলাতনুভিঃ কৃতানি। যদাতিহর্ষোৎপুলকাশ্রুগদ্গদং প্রোৎকণ্ঠ উদ্গায়তি নৃত্যতে চ ॥ যদা গ্রহগ্রস্ত ইব ক্বচিদ্ধসত্যাক্রন্দতে ধ্যায়তি বন্দতে জনং। মুহুঃ শ্বসন্ বক্তি হরে জগৎপতে নারায়ণেত্যাত্মমতির্গতত্রপঃ ॥ তদা পুমান্ মুক্তসমস্তবন্ধনস্তদ্ভাবভাবানুশয়াকৃতাকৃতিঃ। নির্দ্দগ্ধবীজানুশয়ো মহীয়সা ভক্তিপ্রয়োগেণ সমেত্যধোক্ষজং ॥ ইতি শ্রীহরিভক্তিবিলাসে ১১ বিলাসঃ ॥

প্রেমা [ন্] (পুং) স্নেহঃ। ইত্যমরঃ॥ বাসবঃ। বায়ুঃ। ইতি মেদিনী ॥ আদ্যস্য লক্ষণং যথা। সর্ব্বথা ধ্বংসরহিতং সত্যপি ধ্বংসকারণে। যদ্ভাববন্ধনং যূনোঃ স প্রেমা পরিকীর্ত্তিতঃ ॥ ইত্যুজ্জ্বলনীলমণিঃ ॥

প্রেমালিঙ্গনং (ক্লী) স্নেহেন পরিস্বঙ্গঃ। নায়কনায়িকয়োরালিঙ্গনবিশেষঃ। তল্লক্ষণং যথা। নায়ককটিং নায়িকয়ৈকপাদেন বেষ্টয়িত্বা দ্বিতীয়ং পাদং তস্য জঙ্ঘোপরি স্থাপয়িত্বা যদালিঙ্গনং তৎ। ইতি কামশাস্ত্রং ॥

প্রেমী [ন্] (ত্রি) প্রেমযুক্তঃ। স্নেহবিশিষ্টঃ। প্রেমশব্দাদস্ত্যর্থে ইন্‌প্রত্যয়েন নিষ্পন্নঃ। ইতি ব্যাকরণং ॥

প্রেয়সী (স্ত্রী) প্রিয়তমা নারী। তৎপর্য্যায়ঃ। দয়িতা ২ কান্তা ৩ প্রাণেশা ৪ বল্লভা ৫ প্রিয়া ৬ হৃদয়েশা ৭ প্রাণসমা ৮ প্রেষ্ঠা ৯ প্রণয়িনী ১০। ইতি হেমচন্দ্রঃ ॥

প্রেয়ান্ [স্] (পুং) পতিঃ। তৎপর্য্যায়ঃ। দয়িতঃ ২ কান্তঃ ৩ প্রাণেশঃ ৪ বল্লভঃ ৫ প্রিয়ঃ ৬ হৃদয়েশঃ ৭ প্রাণসমঃ ৮ প্রেষ্ঠঃ ৯ প্রণয়ী ১০। ইতি হেমচন্দ্রঃ ॥ অতিপ্রিয়ে ত্রি। ইতি জটাধরঃ ॥

প্রেরণং (ক্লী) প্রেষণং। পাঠান ইতি ভাষা। যথা। ধিক্ চাপলে বৎসিমবৎসলত্বং যৎপ্রেরণাদুত্তরলীভবন্ত্যা। ইতি নৈষধে ৩ সর্গঃ ॥

প্রেরণা (স্ত্রী) চোদনা। ফলভাবনা। বিধিরিতি যাবৎ। ইতি ধর্ম্মদীপিকা ॥

প্রেরিতঃ (ত্রি) প্রেষিতঃ। যথা। নপুংসক-মিতি জ্ঞাত্বা প্রিয়ায়ৈ প্রেরিতং মনঃ। মনস্তত্রৈব রমতে হতাঃ পাণিনিনা বয়ং॥ ইতি প্রাচীনাঃ॥

প্রের্ম্মা [ন্] (পুং) সমুদ্রঃ। ইতি সিদ্ধান্ত-কৌমুদ্যামুণাদিবৃত্তিঃ॥

প্রেম্বরী (স্ত্রী) নদী। ইতি সিদ্ধান্তকৌমুদ্যা-মুণাদিবৃত্তিঃ॥

প্রেস ৠ গতৌ। ইতি কবিকল্পদ্রুমঃ॥

প্রেসঃ (পুং) প্রেসণং। পীড়া। ইতি জটা-ধরঃ॥

প্রেসণং (ক্লী) প্রেরণং। যথা। জানীয়াৎ প্রেস্নণে ভৃত্যান্ বান্ধবান্ ব্যসনাগমে। মিত্রঞ্চাপদি কালে চ ভার্য্যাঞ্চ বিভব-ক্ষয়ে॥ ইতি চাণক্যসংগ্রহঃ॥

প্রষিতং (ত্রি) প্রেরিতং। তৎপর্য্যায়ঃ। প্রস্থাপিতং ২ প্রতিশিষ্টং ৩ প্রতি-হতং ৪। ইতি হেমচন্দ্রঃ॥

প্রেষ্ঠঃ (ত্রি) অতিশয়প্রিয়ঃ। ইত্য-মরঃ॥

প্রেষ্ঠা (স্ত্রী) প্রেয়সী। ইতি হেমচন্দ্রঃ॥ জঙ্ঘা। ইতি শব্দচন্দ্রিকা॥

প্রৈষ্যঃ (ত্রি). দাসঃ। ইত্যমরঃ॥ প্রের-ণীয়শ্চ॥

প্রেক্ষণং (ক্লী) চক্ষুঃ। ইতি শব্দরত্নাবলী॥ দর্শনং। যথা। সঞ্চারো রতিমন্দিরাবধি পদন্যাসাবধি প্রেক্ষণং। ইত্যাদি রস-মঞ্জরী॥

প্রেক্ষণকূটঃ (পুং) চক্ষুর্গোলকঃ। যথা। ত্বক্‌পোটনষ্ঠীবনগাত্রসাদমৃদ্‌ভক্ষণপ্রেক্ষণ-কূটশোথাঃ। ইতি পাণ্ডুরোগপূর্ব্বরূপে মাধবকরঃ॥

প্রেক্ষা (স্ত্রী) নৃত্যেক্ষণং। প্রজ্ঞা। ইত্য-মরঃ॥ ঈক্ষণং। ইতি ভরতঃ॥ শাখা। ইতি শব্দরত্নাবলী॥

প্রৈষঃ (পুং) ক্লেশঃ। মর্দ্দনং। উন্মাদঃ। প্রেষণং। ইতি মেদিনী॥

প্রৈষ্যঃ (পুং) প্রেষ্যঃ। ইত্যমরটীকায়াং ভরতঃ॥

প্রোক্তং (ত্রি) কথিতং। প্রকর্ষেণোক্তং। যথা। অম্বরীশ শুকপ্রোক্তং নিত্যং ভাগ-বতং শৃণু। ইতি শ্রীভাগবতং॥

প্রোঞ্ছনং (ক্লী) প্রবর্জনং। লোপনং। মোছা ইতি ভাষা। যথা। প্রোঞ্ছনৈর্বামপাদেন দরিদ্রো ভবতি ধ্রুবং। বৈরিনাশকরং প্রোক্তং কবচং বশ্যকারকং॥ ইতি রুদ্রযামলে বৈরিহরকালীকবচং॥

প্রোজ্জাসনং (ক্লী) মারণং। ইতি হেমচন্দ্রঃ॥

প্রোজ্‌ঝিতং (ত্রি) ত্যক্তং। যথা। ধর্ম্ম-প্রোজ্‌ঝিতকৈতবোঽত্র পরমো নির্ম্মৎ-সরাণাং সতাং। ইত্যাদি শ্রীভাগবতং॥

প্রোষ্ঠঃ (পুং) পতদ্‌গ্রহঃ। পাগদান ইতি ভাষা। যথা। স্যাদাচমনকঃ প্রোষ্ঠঃ কট-কোলঃ পতদ্‌গ্রহঃ। ইতি হারাবলী॥

প্রোতং (ক্লী) বস্ত্রং। ইতি জটাধরঃ॥

প্রোতং (ত্রি) খচিতং। ইতি মেদিনী॥ স্যূতং। গুম্ফিতং। ইতি হেমচন্দ্রঃ॥

প্রোতোৎসাদনং (ক্লী) বস্ত্রকুট্টিমং। ছত্রং। ইতি ত্রিকাণ্ডশেষঃ॥

প্রোৎফলঃ (পুং) বৃক্ষবিশেষঃ। তৎপর্য্যায়ঃ।

সিংহলাঙ্গূলঃ ২ ছড়ী ৩ ছটা ৪ পিঙ্গা ৫। ইতি শব্দমালা ॥

প্রোৎফুল্লং (ত্রি) বিকসিতং। যথা। যে বর্দ্ধিতাঃ করিকপোলমদেন ভৃঙ্গাঃ প্রোৎফুল্লপঙ্কজরজঃসুরভীকৃতাঙ্গাঃ। তে সাম্প্রতং বিধিবশাদ্গময়ন্তি কালং নিম্বেষু চার্কফুসুমেষু করীলকেষু॥ ইতি ভামিনী-বিলাসঃ

প্রোৎসাহঃ (পুং) প্রকৃষ্টোৎসাহঃ। কর্ম্মসু সুকরপ্রত্যয় উৎসাহ ইতি মধুঃ॥ কর্ম্মসু দৃঢ়যত্নকারকো ভাবঃ উৎসাহ ইতি রমানাথঃ॥ কর্ম্মসু প্রত্যয় উৎসাহ ইতি নয়না নন্দঃ॥ অশক্যে বলোদ্যম উৎসাহ ইতি কেচিৎ। ইত্যমরটীকায়াং ভরতঃ॥

প্রোথ ঋ ঞ পর্য্যাপণে। ইতি কবিকল্পদ্রুমঃ॥ রেফযুক্তঃ। ঋ অপুপ্রোথৎ। ঞ প্রোথতি প্রোথতে। পর্য্যাপণং সামর্থ্যং। পুপ্রোথাস্মৈ ন কশ্চন। পর্য্যাপণং পরিপূর্ণতা। ইতি গোবিন্দভট্টঃ। ইতি দুর্গাদাসঃ॥

প্রোথঃ (পুং ক্লী) অশ্বনাসিকা। ইত্যমরঃ॥

প্রোথঃ (পুং) কটী। ইতি মেদিনী॥ শাটকঃ। ইতি ত্রিকাণ্ডশেষঃ॥ স্ত্রীগর্ত্তঃ। ইতি বিশ্বঃ॥ গর্ত্তঃ। ভীষণং। স্ফিক্। অশ্বমুখং। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥

প্রোথঃ (ত্রি) অধ্বগঃ। ইতি মেদিনী॥ প্রথিতঃ। ইতি ত্রিকাণ্ডশেষঃ॥ স্থাপিতঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥

প্রোষঃ (পুং) সন্তাপঃ। ইতি রাজনির্ঘণ্টঃ॥

প্রোষিতঃ (ত্রি) প্রবাসগতঃ। যথা। আর্ত্তার্ত্তে মুদিতা হৃষ্টে প্রোষিতে মলিনা কৃশা। মৃতে ম্রিয়েত যা পত্যৌ সাধ্বী জ্ঞেয়া পতিব্রতা॥ ইতি শুদ্ধিতত্ত্বং॥

প্রোষিতভর্ত্তৃকা (স্ত্রী) বিদেশস্থপতিকা। ইতি জটাধরঃ॥ স্বীয়াদিনায়িকাভেদঃ। তস্যা লক্ষণং যথা। দেশান্তরে গতে ভর্ত্তরি সন্তাপাকুলা প্রোষিতভর্ত্তৃকা। অস্যাশ্চেষ্টা দশাবস্থা। যথা। পত্যভিলাষঃ ১ চিন্তা ২ স্মৃতিঃ ৩ গুণোৎকীর্ত্তনং ৪ উদ্বেগঃ ৫ বিলাপঃ ৬ উন্মাদঃ ৭ ব্যাধিঃ ৮ জড়তা ৯ নিধনং ১০। মুগ্ধা প্রোষিতভর্ত্তৃকা যথা। দুঃখং দীর্ঘতরং বহন্ত্যপি সখীবর্গায় নো ভাষতে শৈবালৈঃ শয়নং সৃজন্ত্যপি পুনঃ শেতে ন বা লজ্জয়া। কণ্ঠে গদ্গদবাচমঞ্চতি দৃশা ধত্তে ন বাষ্পোদকং সন্তাপং সহতে যদম্বুজমুখী তদ্বেদ চেতোভবঃ॥ *॥ মধ্যা প্রোষিতভর্ত্তৃকা যথা। বাসন্তদেব বপুষো বলয়ন্তদেব হস্তস্য সৈব জঘনস্য চ রত্নকাঞ্চী। বাচালভৃঙ্গসুভগে সুরতৌ সমস্তমদ্যাধিকং ভবতি তৎ সখি কিম্নিদানং॥*॥ প্রগল্ভা প্রোষিতভর্ত্তৃকা যথা। মালা বালাম্বুজদলময়ী মৌক্তিকী হারযষ্টিঃ কাঞ্চী স্থানাৎ প্রসরতি হরৌ সুভ্রুবঃ প্রস্থিতৈব। অন্যদ্ক্রমঃ কিমপি ধমনী বিদ্যতে বা ন বেতি জ্ঞাতুং বাহ্বোরহহ বলয়ং পাণিমূলং প্রয়াতি॥ পরকীয়া প্রোষিতভর্ত্তৃকা যথা। শ্বশ্রূঃ পদ্মদলং দদাতি তদপি ভ্রূসংজ্ঞয়া গৃহ্যতে সদ্যো মর্ম্মরশঙ্কয়া ন চ তয়া সংস্পৃশ্যতে পাণিনা। যাতুর্ব্বাচি সুহৃজ্জনস্য বচসা প্রত্যুত্তরং

দীয়তে শ্বাসঃ কিন্তু ন মুচ্যতে হুতবহক্রুরঃ কুরঙ্গীদৃশা ॥ সামান্যবনিতা প্রোষিতভর্ত্তৃকা যথা । বিরহবিদিতমন্তঃপ্রেম বিজ্ঞায় কান্তঃ পুনরপি বসু তস্মাদেত্য মে দাস্যতীতি। মরিচনিচয়মক্ষোন্যস্য বাষ্পোদবিন্দূন্ সৃজতি চ পুরগোষিদ্দ্বারদেশোপবিষ্টা ॥ ইতি রসমঞ্জরী ॥

প্রোষ্ঠঃ (পুং) প্রোষ্ঠীমৎস্যঃ। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

প্রোষ্ঠপদঃ (পুং) ভাদ্রমাসঃ। ইত্যমরঃ ॥

প্রোষ্ঠপদাঃ (স্ত্রী) পূর্ব্বভাদ্রপদনক্ষত্রং ২৫। উত্তরভাদ্রপদনক্ষত্রং ২৬। তৎপর্য্যায়ঃ। ভাদ্রপদাঃ ২। ইত্যমরঃ ॥ দ্বে পূর্ব্বভাদ্রপদোত্তরভাদ্রপদাসু প্রোষ্ঠৌ গৌঃ ভদ্রশ্চ গৌঃ তস্যেব পাদ আসাং তাস্তথা। পূর্ব্বে প্রোষ্ঠপদে দ্বে উত্তরে তু ভাদ্রপদে দ্বে সমুদায়শ্চাসাং চতুঃসংখ্য ইতি বহুবচনং। কদা পূর্ব্বে প্রোষ্ঠপদে কদা উত্তরে প্রোষ্ঠপদে ইতি তারকয়োর্দ্বিত্বাদ্দ্বিবচনং। ইতি ভরতঃ ॥ ভাদ্রপদশব্দেন তারকাবিশেষাণাং সমুদায় উচ্যতে তিরোহিতাবয়বভেদপক্ষে একবচনং। প্রোষ্ঠপদাশব্দস্তূদ্রিক্তাবয়বভেদপক্ষে বহুবচনমিতি মৈত্রেয়ঃ। ইতি রায়মুকুটঃ ॥

প্রোষ্ঠপদী (স্ত্রী) ভাদ্রী পূর্ণিমা। যথা। প্রোষ্ঠপদ্যামতীতায়াং তথা কৃষ্ণা ত্রয়োদশী। এতাংস্তু শ্রাদ্ধকালান্ বৈ নিত্যানাহ প্রজাপতিঃ ॥ ইতি তিথ্যাদিতত্ত্বং ॥ অপি চ। লিখিত্বা তচ্চ যো দদ্যাদ্ধেমসিংহসমন্বিতং। প্রোষ্ঠপদ্যাং পৌর্ণমাস্যাং স যাতি পরমাং গতিং ॥ ইতি শ্রীভাগবতটীকায়াং শ্রীধরস্বামী ॥

প্রোষ্ঠপাদঃ (ত্রি) প্রোষ্ঠপদাসু জাতঃ। ইতি সিদ্ধান্তকৌমুদী ॥

প্রোষ্ঠী (স্ত্রী পুং) মৎস্যভেদঃ। পুটী মাছ ইতি ভাষা। তৎপর্য্যায়ঃ। শফরী ২ শফরঃ ৩। ইত্যমরঃ ॥ শ্বেতকোলঃ ৪। ইতি শব্দরত্নাবলী ॥ তস্যা গুণাঃ। তিক্তত্বং। কটুত্বং। স্বাদুত্বং। শুক্রকারিত্বং। কফবাতনাশিত্বঞ্চ। ইতি রাজবল্লভঃ ॥ স্নিগ্ধত্বং। আস্যকণ্ঠরোগনাশিত্বং। শ্রেষ্ঠত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

প্রোহঃ (পুং) হস্তিচরণঃ। পর্ব্ব। ইতি বিশ্বমেদিন্যৌ ॥ গজচরণপর্ব্ব। ইতি ত্রিকাণ্ডশেষশব্দরত্নাবল্যৌ ॥

প্রোহঃ (ত্রি) নিপুণঃ। তর্কঃ। ইতি মেদিনী ॥

প্রোক্ষণং (ক্লী) যজ্ঞার্থপশুহননং। ইত্যমরঃ ॥ বধঃ। সেচনং। ইতি মেদিনী ॥

প্রোক্ষিতং (ত্রি) নিহতং। সিক্তং। ইতি মেদিনী ॥ যজ্ঞার্থং মন্ত্রৈঃ সংস্কৃতমাংসাদি। যথা। ভক্ষয়েৎ প্রোক্ষিতং মাংসং সকৃদ্‌ব্রাহ্মণকাম্যয়া। দৈবে নিযুক্তঃ শ্রাদ্ধে বা নিয়মে তু বিবর্জ্জয়েৎ ॥ আরণ্যানামিদানীন্তনপ্রোক্ষণাপেক্ষা নাস্তি। যথা মহাভারতে। আরণ্যাঃ সর্ব্বদৈবত্যাঃ প্রোক্ষিতাঃ সর্ব্বশো মৃগাঃ। অগস্ত্যেন পুরা রাজন্ মৃগয়া যেন পূজ্যতে ॥ ইতি তিথ্যাদিতত্ত্বং ॥

প্রৌঢ়ং (ত্রি) বর্দ্ধিতং। তৎপর্য্যায়ঃ। প্রবৃদ্ধং ২ এধিতং ৩। ইত্যমরঃ ॥

... । ... হেমচন্দ্রঃ ॥ নিপুণঃ। ইতি রাজনির্ঘণ্টঃ ॥ প্রকর্ষেণ ঊঢ়শ্চ ॥

প্রৌঢ়পাদঃ (পুং) আসনারোপিতপাদতলঃ। আসনোপরিপাদতলদ্বয়সংযোগপূর্ব্বকোপবেষ্টা। বস্ত্রাদিনা কৃতপৃষ্ঠজানুজঙ্ঘাবন্ধঃ। বস্ত্রাদিদ্বারা পৃষ্ঠজানুজঙ্ঘাদ্বয়দৃঢ়বন্ধনপূর্ব্বকোপবেষ্টা। যথা। আসনারূঢ়পাদস্তু জানুনোর্জঙ্ঘয়োস্তথা। কৃতাবসক্‌থিকো যস্তু প্রৌঢ়পাদঃ স উচ্যতে॥ স্নানমাচমনং হোমং ভোজনং দেবতার্চ্চনং। প্রৌঢ়পাদো ন কুর্ব্বীত স্বাধ্যায়ং পিতৃতর্পণং ॥ ইতি কাত্যায়নঃ॥ *॥ অনেকোদ্বাহে দারুশিলে ভূমিসমে ইষ্টকাশ্চ সংকীর্ণীভূতা ইতি বৌধায়নবচনাত্তথাবিধে আরূঢ়পাদোঽপি কুর্য্যাৎ। ইত্যাহ্নিকতত্ত্বং ॥

প্রৌঢ়া (স্ত্রী) নায়িকাভেদঃ। তৎপর্য্যায়ঃ। চিরিণ্টী ২ সুবয়াঃ ৩ শ্যামা ৪ দৃষ্টরজাঃ ৫। ইতি রাজনির্ঘণ্টঃ ॥ যথা। বালা তু তরুণী প্রৌঢ়া বৃদ্ধা ভবতি নায়িকা। গুণযোগেন রন্তব্যা নারী বশ্যা ভবেত্তদা ॥ * ॥ ত্রিংশদ্বর্ষাদূর্দ্ধং পঞ্চপঞ্চাশদ্বর্ষপর্য্যন্তং প্রৌঢ়াবস্থা। যথা। আষোড়শী ভবেদ্বালা তরুণী ত্রিংশতা মতা। পঞ্চপঞ্চাশতী প্রৌঢ়া ভবেদ্‌বৃদ্ধা ততঃ পরং ॥*॥ অস্যা বশ্যত্বকারণং যথা। অলঙ্কারাদিভির্ব্বালা তরুণী রতিযোগতঃ। প্রেমদানাদিভিঃ প্রৌঢ়া বৃদ্ধা চ দৃঢ়তাড়নাৎ॥ * ॥ তস্যা রমণে দোষো যথা। বালা তু প্রাণদা প্রোক্তা তরুণী প্রাণহারিণী। প্রৌঢ়া করোতি বৃদ্ধত্বং বৃদ্ধা মরণদা ভবেৎ ॥ ইতি রতিমঞ্জরী ॥ * ॥ মুগ্ধাদিত্রিবিধান্তর্গতপ্রগল্‌ভা নায়িকা। তত্র প্রৌঢ়া খণ্ডিতা যথা। মামুদ্বীক্ষ্য বিপক্ষপক্ষ্মলদৃশঃ পাদাম্বুজালক্তকৈরালিপ্তাননমানতীকৃতমুখী চিত্রার্পিতে বাভবৎ। রূক্ষং নোক্তবতী ন বা কৃতবতী নিশ্বাসকোষ্ণাদৃশঃ প্রাতর্মঙ্গলমঙ্গলা করতলাদাদর্শমাদর্শয়ৎ ॥ * ॥ প্রৌঢ়া কলহান্তরিতা যথা। অকরোঃ কিমু নেত্রশোণিমানং কিমকার্ষীঃ করপল্লবে নিরোধং। কলহংকমধাঃ ক্রুধা রসজ্ঞে হিতমর্থং ন বিদন্তি দৈবদুষ্টাঃ ॥ * ॥ প্রৌঢ়া উৎকণ্ঠিতা যথা। ভ্রাতর্নিকুঞ্জসখিযূথিরসালবন্ধো মাতস্তমস্বিনি পিতস্তিমির প্রসীদ। পৃচ্ছামি কিঞ্চ নবনীরধরাভিরামো দামোদরঃ কথয় কিং ন সমাজগাম ॥ * ॥ প্রৌঢ়া বাসকসজ্জা যথা। কৃতং বপুষি ভূষণং চিকুরধোরণী ধূপিতা কৃতা শয়নসন্নিধৌ ক্রমুকবীটিকাসম্ভৃতিঃ। অকারি হরিণীদৃশা ভবনমেত্য দেহত্বিষা স্ফুরৎকনককেতকীকুসুমকান্তিভিদুর্দ্দিনং ॥ * ॥ প্রৌঢ়াভিসারিকা যথা। স্ফুরদুরসিজভারভঙ্গুরাঙ্গী কিসলয়কোমলকান্তিনা পদেন। অথ কথয় কথং সহেত গন্তুং যদি ন নিশাসু মনোরথো রথঃ স্যাৎ ॥ * ॥ প্রৌঢ়া প্রবৎস্যৎপতিকা যথা। নায়ং মুঞ্চতি সুভ্রুবামপি তনুত্যাগে বিয়োগজ্বরস্তেনাহং বিহিতাঞ্জলির্যদুপতে পৃচ্ছামি সত্যং বদ। তাম্বুলং কুসুমং পটীরমুদকং যদ্বন্ধুভির্দীয়তে তৎ

স্যাদত্র পরত্র বা কিমু বিষজ্বালাবলী-দুঃসহং ॥ ইতি রসমঞ্জরী ॥ * ॥ অন্যৎ প্রগল্‌ভাশব্দে দ্রষ্টব্যং ॥

প্রৌঢ়িঃ (স্ত্রী) সামর্থ্যং । ইতি মুগ্ধবোধব্যাকরণং ॥ তৎপর্য্যায়ঃ । উৎসাহঃ ২ প্রগল্‌ভতা ৩ অভিযোগঃ ৪ উদ্যমঃ ৫ উদ্‌যোগঃ ৬ কিয়দেতিকা ৭ অধ্যবসায়ঃ ৮ ঊর্জ্জঃ ৯ । ইতি হেমচন্দ্রঃ ॥

প্রৌণঃ (ত্রি) নিপুণঃ । ইতি কেচিৎ ॥

প্রৌষ্ঠপদঃ (পুং) ভাদ্রমাসঃ । ইত্যমরঃ ॥

প্রৌহঃ (পুং) প্রকর্ষেণোহঃ । ইতি মুগ্ধবোধব্যাকরণং ॥

প্লব ঙ.গত্যাং । অন্তঃস্থতৃতীয়যুক্তঃ । ঙ প্লবতে । প্লু ঙ ইত্যনেনৈবেষ্টসিদ্ধে অস্য পাঠঃ প্লবিষ্যতে প্লব্যতে ইত্যাদি সিদ্ধ্যর্থঃ । ইতি দুর্গাদাসঃ ॥

প্লবং (ক্লী) কৈবর্ত্তীমুস্তকং । গন্ধতৃণং । ইতি মেদিনী ॥ প্লুতগে ত্রি ॥

প্লবঃ (পুং) প্লবনং । ভেলঃ । ভেকঃ । অবিঃ । শ্বপচঃ । কপিঃ । জলকাকঃ । কুলকঃ । প্রবণঃ । পর্কটীদ্রুমঃ । কারণ্ডববিহগঃ । শব্দঃ । প্রতিগতিঃ । ইতি মেদিনী ॥ প্রেরণং । শক্রঃ । ইতি শব্দরত্নাবলী ॥ জলান্তরং । ইতি হেমচন্দ্রঃ ॥ পলবঃ । পোলো ইতি ভাষা । ইতি ত্রিকাণ্ডশেষঃ ॥ জলকুক্কুটঃ । ইতি মিতাক্ষরা ॥ জলচরপক্ষী । যথা । হংসসারসকাচাক্ষবকক্রৌঞ্চসরারিকাঃ । নন্দীমুখী সকাদম্বা বলাকাদ্যাঃ প্লবাঃ স্মৃতাঃ ॥ প্লবন্তে সলিলে যস্মাদেতে তস্মাৎ প্লবাঃ স্মৃতাঃ । * । এতেষাং মাংসগুণাঃ । প্লবাঃ পিত্তহরাঃ স্নিগ্ধা মধুরা গুরবো হিমাঃ । বাতশ্লেষ্মপ্রদাশ্চাপি বলশুক্রকরাঃ সরাঃ ॥ ইতি ভাবপ্রকাশঃ ॥

প্লবকঃ (পুং) খড়্গধারাদিনর্ত্তকঃ। তৎপর্য্যায়ঃ। কেলকঃ ২ । ইতি ত্রিকাণ্ডশেষঃ ॥ কেকলঃ ৩ নর্ত্তুঃ ৪ কেলিকোষঃ ৫ কলায়নঃ ৬ । ইতি শব্দরত্নাবলী ॥ চণ্ডালঃ । ইতি হলায়ুধঃ ॥ ভেকঃ । প্লক্ষঃ । ইতি রাজনির্ঘণ্টঃ ॥

প্লবগঃ (পুং) বানরঃ । ভেকঃ । সূর্য্যসারথিঃ। ইতি মেদিনী ॥ প্লবপক্ষী । ইতি শব্দরত্নাবলী ॥ শিরীষবৃক্ষঃ । ইতি রাজনির্ঘণ্টঃ ॥

প্লবগতিঃ (পুং) ভেকঃ । ইতি শব্দচন্দ্রিকা ॥

প্লবঙ্গঃ (পুং) বানরঃ । ইত্যমরঃ ॥ মৃগঃ । ইতি শব্দচন্দ্রিকা ॥ প্লক্ষবৃক্ষঃ । ইতি রাজনির্ঘণ্টঃ ॥

প্লবঙ্গমঃ (পুং) ভেকঃ । বানরঃ । ইত্যমরঃ॥ প্লুতগতিযুক্তে ত্রি ॥

প্লবনঃ (ত্রি) প্রবণঃ । ক্রমনিম্নভূমিঃ । যথা । প্রাগুদক্‌প্লবনাং ভূমিং কারয়েৎ যত্নতো নরঃ । ইতি তিথ্যাদিতত্ত্বে মৎস্যপুরাণং ॥

প্লক্ষ ঞ ভক্ষণে । ইতি কবিকল্পদ্রুমঃ ॥ অন্তঃস্থতৃতীয়যুক্তঃ । ঞ প্লক্ষতি প্লক্ষতে। ইতি দুর্গাদাসঃ ॥

প্লক্ষঃ (পুং) বৃক্ষবিশেষঃ । পাকুড় ইতি ভাষা । তৎপর্য্যায়ঃ । জটী ২ পর্কটী ৩ । ইত্যমরঃ ॥ পর্কটিঃ ৪ প্লক্ষা ৫ প্লাক্ষা ৬ জটিঃ ৭ । ইতি শব্দরত্নাবলী ॥ কপীতনঃ ৮

ক্ষীরী ৯ সুপার্শ্বঃ ১০ কমণ্ডলুঃ ১১ শৃঙ্গী ১২ অবরোহশাখী ১৩ গর্দ্দভাণ্ডঃ ১৪ কপীতকঃ ১৫ দৃঢ়প্ররোহঃ ১৬ প্লবকঃ ১৭ প্লবঙ্গঃ ১৮ মহাবলঃ ১৯॥ হ্রস্বপ্লক্ষপর্য্যায়ঃ। সূক্ষ্মঃ ২০ সুশীতঃ ২১ শীতবীর্য্যকঃ ২২ পুণ্ড্রঃ ২৩ মহাবরোহঃ ২৪ হ্রস্বপর্ণঃ ২৫ পিম্বরিঃ ২৬ ভিদুরঃ ২৭ মঙ্গলচ্ছায়ঃ ২৮। অস্য গুণাঃ। কটুত্বং। কষায়ত্বং। শিশিরত্বং। রক্তদোষমূর্চ্ছাভ্রমপ্রলাপনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ ব্রণযোনিগদদাহপিত্তকফশোথরক্তপিত্তনাশিত্বং। পর্কটী চ স্ত্রিয়ামপি। ইতি ভাবপ্রকাশঃ॥*॥ কন্দরালবৃক্ষঃ। দ্বীপভেদঃ। অশ্বত্থবৃক্ষঃ। ইতি মেদিনী॥ পক্ষকঃ। ইতি হেমচন্দ্রঃ॥

প্লক্ষদ্বীপঃ (পুং) সপ্তদ্বীপান্তর্গতদ্বীপবিশেষঃ। তস্য বিবরণং যথা। সূত উবাচ। জম্বুদ্বীপস্য বিস্তারাদ্দ্বিগুণেন সমন্ততঃ। সংবেষ্টয়িত্বা ক্ষীরোদং প্লক্ষদ্বীপো ব্যবস্থিতঃ॥ প্লক্ষদ্বীপে চ বিপ্রেন্দ্রাঃ সপ্তাসন্ কুলপর্ব্বতাঃ। ঋজ্বায়তাঃ সুপর্ব্বাণঃ সিদ্ধসংঘনিষেবিতাঃ॥ গোমেরুঃ প্রথমস্তেষাং দ্বিতীয়শ্চন্দ্র উচ্যতে। নারদো দুন্দুভিশ্চৈব সোমশ্চ ঋষভস্তথা। বিভ্রাজঃ সপ্তমঃ প্রোক্তো ব্রহ্মণোঽত্যন্তবল্লভঃ॥ তত্র দেবর্ষিগন্ধর্ব্বৈঃ সিদ্ধৈশ্চ ভগবানজঃ। উপাস্যতে স বিশ্বাত্মা সাক্ষী সর্ব্বস্য বিশ্বসৃক্॥ তেষু পুণ্যা জনপদা নাধয়ো ব্যাধয়োঽপি চ। ন তত্র পাপকর্ত্তারঃ পুরুষা বা কদাচন॥ তেষাং নদ্যঃ সপ্ত চৈব বর্ষাণাস্তু সমুদ্রগাঃ। তাসু ব্রহ্মর্ষয়ো নিত্যং পিতামহমুপাসতে॥ অনুতপ্তা শিখী চৈব বিপাশা ত্রিদিবা কৃতা। অমৃতা সুকৃতা চৈব নামতঃ পরিকীর্ত্তিতাঃ॥ ক্ষুদ্রনদ্যস্ত্বসংখ্যাতাঃ সরাংসি সুবহূন্যপি। ন বৈ তেষু যুগাবস্থাঃ পুরুষা বৈ চিরায়ুষঃ॥ আর্য্যকাঃ কুররাশ্চৈব বিদশা ভাবিনস্তথা। ব্রহ্মক্ষত্রিয়বিট্‌শূদ্রাস্তস্মিন্ দ্বীপে প্রকীর্ত্তিতাঃ॥ ইজ্যতে ভগবান্ সোমো বর্ণৈস্তত্র নিবাসিভিঃ। তেষাঞ্চ সোমসাযুজ্যং সারূপ্যং মুনিপুঙ্গবাঃ॥ সর্ব্বে ধর্ম্মপরা নিত্যং নিত্যং মুদিতমানসাঃ। পঞ্চবর্ষসহস্রাণি জীবন্তি চ নিরাময়াঃ॥ ইতি কৌর্ম্মে ভুবনকোষে ৪৬ অধ্যায়ঃ॥*॥ অপি চ ঋষিরুবাচ। অতঃ পরং প্লক্ষাদীনাং প্রমাণলক্ষণসংস্থানতো বর্ষবিভাগ উপবর্ণ্যতে। জম্বুদ্বীপো যাবৎপ্রমাণবিস্তারস্তাবতা ক্ষারোদধিনা পরিবেষ্টিতো যথা মেরুর্জম্ব্বাখ্যেন। লবণোদধিরপি ততো দ্বিগুণবিশালেন প্লক্ষাখ্যেন পরিক্ষিপ্তো যথা পরিখা বাহ্যোপবনেন। প্লক্ষো জম্বুপ্রমাণো দ্বীপাখ্যাতিকরো হিরণ্ময় উত্থিতো যত্রাগ্নিরুপাস্তে সপ্তজিহ্বঃ। তস্যাধিপতিঃ প্রিয়ব্রতাত্মজ ইধ্মজিহ্বস্তং দ্বীপং সপ্তবর্ষাণি বিভজ্য সপ্তবর্ষনামভ্য আত্মজেভ্য আকলয্য স্বয়মাত্মযোগেনোপররামাশিবং বয়সং সুভদ্রং শান্তং ক্ষেমমমৃতমভয়মিতি বর্ষাণি। তেষু গিরয়ো নদ্যশ্চ সপ্তৈবাভিজ্ঞাতাঃ। মণিকূটো বজ্রকূট ইন্দ্রসেনো জ্যোতিষ্মান্ সুবর্ণো হিরণ্যষ্ঠীবো

মেঘমাল ইতি সেতুশৈলাঃ। অরুণা নৃমণা আঙ্গিরসী সাবিত্রী সুপ্রভাতা ঋতম্ভরা সত্যম্ভরেতি মহানদ্যঃ। যাসাং জলোপস্পর্শনবিধূতরজস্তমসো হংসপতঙ্গোর্দ্ধায়নসত্যাঙ্গসংজ্ঞাশ্চত্বারো বর্ণাঃ সহস্রায়ুষো বিবুধোপমসন্দর্শনপ্রজননাঃ স্বর্গদ্বারং ত্রয্যা বিদ্যয়া ভগবন্তং ত্রয়ীময়ং সূর্য্যমাত্মানং যজন্তে। প্রত্নস্য বিষ্ণো রূপং যৎ সত্যর্ত্তস্য ব্রহ্মণঃ অমৃতস্য চ মৃত্যোশ্চ সূর্য্যমাত্মানমীমহীতি প্লক্ষাদিষু পঞ্চসু পুরুষাণামায়ুরিন্দ্রিয়মোজঃ সহো বলং বুদ্ধিবিক্রম ইতি চ সর্ব্বেষামৌৎপত্তিকী সিদ্ধিরবিশেষেণ বর্ত্ততে। প্লক্ষশ্চ সমানেনেক্ষুরসোদেনাবৃতঃ। ইতি শ্রীভাগবতে ৫ স্কন্ধে ২০ অধ্যায়ঃ ॥

প্লাবনং (ক্লী) দ্রবদ্রব্যস্যোর্দ্ধপ্রাপণং। উথলন ইতি ভাষা। যথা। তাপনং ঘৃততৈলানাং প্লাবনং গোরসস্য চ। তন্মাত্রমুদ্ধৃতং শুদ্ধেৎ কঠিনন্তু পয়ো দধি ॥ ইতি শুদ্ধিতত্ত্বং ॥ * ॥ মজ্জনং। বহুতরজলসংযোগঃ। যথা। এতৎ শ্রুত্বা বচো রাজা প্রাতিষ্ঠত ভগীরথঃ। যত্র তানি শরীরাণি সাগরাণাং মহাত্মনাং ॥ প্লাবনার্থং নরশ্রেষ্ঠ পুণ্যেন সলিলেন হ। ইতি মহাভারতে বনপর্ব্বণি ১১০ অধ্যায়ঃ ॥

প্লাবিতং (ত্রি) জলাদিমগ্নস্থানাদি। যথা। সুপ্রসন্নাং সুবদনাং করুণার্দ্রনিজান্তরাং। সুধাপ্লাবিতভূপৃষ্ঠামার্দ্রগন্ধানুলেপনাং ॥ ইতি গঙ্গাবাক্যাবলী ॥

প্লাক্ষং (ক্লী) প্লক্ষবৃক্ষস্য ফলং। ইত্যমরঃ ॥ প্লক্ষস্য বিকারঃ। প্লক্ষস্য সমূহঃ। প্লক্ষস্য ভাবঃ। প্লক্ষস্যেদং। প্লক্ষস্য হিতং। ইত্যাদি ব্যাকরণং ॥

প্লিহ ঙ গত্যাং। ইতি কবিকল্পদ্রুমঃ ॥ অন্তঃস্থতৃতীয়যুক্তঃ। ঙ প্লেহতে। ইতি দুর্গাদাসঃ ॥

প্লিহা [ন্] (পুং) প্লীহরোগঃ। যথা। যকৃৎ প্লিহান্ত্রাণি মুখাদিব ক্ষিপন্নিতি বৈদ্যকং। ইত্যমরটীকায়াং ভরতঃ ॥

প্লীহঘ্নঃ (পুং) বৃক্ষবিশেষঃ। রোহড়া ইতি খ্যাতঃ। তৎপর্য্যায়ঃ। রোহী২ রোহিতকঃ৩ প্লীহশত্রুঃ৪ দাড়িমপুষ্পকঃ৫ মাংসদলনঃ৬ যকৃদ্বৈরী ৭ চলচ্ছদঃ ৮। ইতি শব্দচন্দ্রিকা ॥ রৌহিতেয়ঃ ৯ রোহিতঃ ১০ রোহীতকঃ ১১ রৌহী ১২। ইতি শব্দরত্নাবলী ॥ অস্য গুণাঃ রোহিতকশব্দে দ্রষ্টব্যাঃ ॥

প্লীহশত্রুঃ (পুং) প্লীহঘ্নবৃক্ষঃ। ইত্যমরঃ ॥

প্লীহা (স্ত্রী) প্লিহরোগঃ। যথা। যকৃৎপ্লীহে চ সম্বন্ধে। ইতি বালকাস্যঃ। ইত্যমরটীকায়াং ভরতঃ ॥

[ন্] (পুং) কুক্ষিবামপার্শ্বস্থমাংসখণ্ডং। পিলা ইতি খ্যাতং। তৎপর্য্যায়ঃ। গুল্মঃ ২ প্লিহা ৩। ইত্যমরভরতৌ ॥ অস্য নিদানং। বিদাহ্যভিষ্যন্দিরতস্য জন্তোঃ প্রদুষ্টমত্যর্থমসৃক্ কফশ্চ। প্লীহাভিবৃদ্ধিং কুরুতঃ প্রবৃদ্ধৌ প্লীহোত্থমেতজ্জঠরং বদন্তি ॥ তদ্বামপার্শ্বে পরিবৃদ্ধিমেতি বিশেষতঃ সীদতি চাতুরোঽত্র। মন্দজ্বরাগ্নিঃ কফপিত্তলিঙ্গৈরুপদ্রুতঃ ক্ষীণবলোঽতি-

পাণ্ডুঃ ॥ ইতি মাধবকরঃ ॥ * ॥ রক্তজস্য তস্য লক্ষণং। ক্লমো ভ্রমো বিদাহশ্চ বৈবর্ণ্যং গাত্রগৌরবং। মোহো রক্তোদরত্বঞ্চ জ্ঞেয়ং রক্তজলক্ষণং ॥ * ॥ পৈত্তিকস্য তস্য লক্ষণং। সজ্বরঃ সপিপাসশ্চ সদাহো মোহসংযুতঃ। পীতগাত্রো বিশেষেণ প্লীহা পৈত্তিক উচ্যতে ॥ * ॥ শ্লৈষ্মিকস্য তস্য লক্ষণং। প্লীহা মন্দব্যথঃ স্থূলঃ কঠিনো গৌরবান্বিতঃ। অরোচকযুতঃ শীতঃ প্লীহা কফজ উচ্যতে ॥ * ॥ বাতিকস্য তস্য লক্ষণং। নিত্যমানদ্ধকোষ্ঠঃ স্যান্নিত্যোদাবর্ত্তপীড়িতঃ। বেদনাভিঃ পরীতশ্চ প্লীহা বাতিক উচ্যতে ॥ * ॥ দোষত্রিতয়রূপাণি প্লীহ্ন্যসাধ্যে ভবন্তি হি ॥ * ॥ অথ তস্য চিকিৎসা। পাতব্যো যুক্তিতঃ ক্ষারঃ ক্ষীরেণোদধিশুক্তিজঃ। তথা দুগ্ধেন পাতব্যাঃ পিপ্পল্যঃ প্লীহ শান্তয়ে ॥ ১ ॥ অর্কপত্রং সলবণং পুটদগ্ধং সুচূর্ণিতং। নিহন্তি মস্তুনা পীতং প্লীহানমপি দারুণং ॥ ২ ॥ হিঙ্গু ত্রিকটুকং কুষ্ঠং যবক্ষারশ্চ সৈন্ধবং। মাতুলুঙ্গরসোপেতং প্লীহশূলহরং রজঃ ॥ ৩ ॥ পালাশক্ষারতোয়েন পিপ্পলী পরিভাবিতা। প্লীহগুল্মার্ত্তিশমনী বহ্নিমান্দ্যহরী মতা ॥ ৪ ॥ রসেন জম্বীরফলস্য শঙ্খনাভীরজঃ পীতমবশ্যমেব। শাণপ্রমাণং শময়েদশেষং প্লাহাময়ং কূর্ম্মসমানমাশু ॥ ৫ ॥ শরপুঙ্খমূলকল্কস্তক্রেণালোড়িতঃ পীতঃ। প্লীহানং যদি ন হরতে শৈলোঽপি তদা জলে প্লবতে ॥৬॥ সুপক্কসহকারস্য রসঃ ক্ষৌদ্রসমন্বিতঃ। পীতঃ প্রশময়ত্যেব প্লীহানং নেহ সংশয়ঃ ॥৭॥ সুস্বিন্নং শাল্মলীপুষ্পং নিশাপর্য্যুষিতং নরঃ। রাজিকাচূর্ণসংযুক্তং খাদেৎ প্লীহোপশান্তয়ে ॥ ৮ ॥ ইতি ভাবপ্রকাশঃ ॥ * ॥ পিপ্পলীমধুপানাচ্চ তথা মধুরভোজনাৎ। প্লীহা বিনশ্যতে রুদ্র ইতি ॥ ৯ ॥ কেতকীপত্রজং ক্ষারং ঘৃতেন সহ ভক্ষয়েৎ। তক্রেণ শরপুঙ্খাভ্যাং পীত্বা প্লীহাং বিনাশয়েৎ ॥ ১০ ॥ ইতি গারুড়ে ১৮৭। ১৮৮ অধ্যায়ঃ ॥-

প্লীহারিঃ (পুং) অশ্বত্থবৃক্ষঃ। ইতি শব্দচন্দ্রিকা ॥

প্লীহাশত্রুঃ (পুং) প্লীহশত্রুঃ। প্লীহঘ্নবৃক্ষঃ। ইতি কেচিৎ ॥

প্লু ঙ সর্পণে। ইতি কবিকল্পদ্রুমঃ ॥ অন্তঃস্থতৃতীয়যুক্তঃ। ঙ প্লবতে। ইতি দুর্গাদাসঃ ॥

প্লুতং (ক্লী) অশ্বগতিবিশেষঃ। স চ ত্বরয়া ঝম্পেন গতিঃ। ইত্যমরভরতৌ ॥ তির্য্যগগতিঃ। ইতি কলিঙ্গঃ ॥

প্লুতঃ (পুং) ত্রিমাত্রবর্ণঃ। ইতি মেদিনী ॥ একমাত্রো ভবেদ্ধ্রস্বো দ্বিমাত্রো দীর্ঘ উচ্যতে। ত্রিমাত্রস্তু প্লুতো জ্ঞেয়ো ব্যঞ্জনঞ্চার্দ্ধমাত্রকং ॥ ইতি দুর্গাদাসাদিধৃত-প্রাচীনকারিকা চ ॥ ঝম্পগতিযুক্তে ত্রি ॥

প্লুষ উ দহি। ভস্মীকরণে। ইতি কবিকল্পদ্রুমঃ ॥ উ প্লোষিত্বা প্লুষ্টা। ইতি দুর্গাদাসঃ ॥

প্লুষ গ সেকে। পূর্ত্তৌ। স্নেহে। ইতি কবিকল্পদ্রুমঃ ॥ গ প্লুষ্ণাতি। ইতি দুর্গাদাসঃ ॥

প্লষ য ৯ দহি। ইতি কবিকল্পদ্রুমঃ॥ অন্তঃস্থ-তৃতীয়যুক্তঃ। য প্লুষ্যতি। ৯ অপ্লুষৎ। পুপ্লোষ। ইতি দুর্গাদাসঃ॥

প্লুষঃ (পুং) দহনং। ইতি প্লুষধাতোর্ভাবে অলপ্রত্যয়ঃ॥

প্লুষ্টঃ (ত্রি) দগ্ধঃ। ইত্যমরঃ॥

প্লুস ইর্ য দাহে। বিভাগে। ইতি কবিকল্পদ্রুমঃ॥ অন্তঃস্থতৃতীয়যুক্তঃ। ইর্ অপ্লুসৎ অপ্লোসীৎ। য প্লুস্যতি। ইতি দুর্গাদাসঃ॥

প্লুক্ষিঃ (পুং) অগ্নিঃ। ইত্যুণাদিকোষঃ॥ স্নেহঃ। গৃহদাহঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥

প্লেব ঋ ঙ সেবনে। ইতি কবিকল্পদ্রুমঃ॥ অন্তঃস্থতৃতীয়যুক্তঃ। ঋ অপিপ্লেবৎ। ঙ প্লেবতে। ইতি দুর্গাদাসঃ॥

প্লোষঃ (পুং) দাহঃ। ইত্যমরঃ॥

প্সা ল ভক্ষণে। ইতি কবিকল্পদ্রুমঃ॥ ল প্সাতি। ইতি দুর্গাদাসঃ॥

প্সা (স্ত্রী) ভক্ষণং। ইতি ত্রিকাণ্ডশেষঃ॥

প্সাতং (ত্রি) ভক্ষিতং। ইত্যমরঃ॥

প্সানং (ক্লী) ভোজনং। ইতি হেমচন্দ্রঃ

ফ

ফ ফকারঃ। দ্বাবিংশতিতমব্যঞ্জনবর্ণঃ। অস্যোচ্চারণস্থানং ওষ্ঠঃ। ইতি ব্যাকরণং॥ তস্য তত্ত্বং যথা। ফকারং শৃণু চার্ব্বঙ্গি রক্তবিদ্যুল্লতোপমং। চতুর্ব্বর্গপ্রদং বর্ণং পঞ্চদেবময়ং সদা॥ পঞ্চপ্রাণময়ং বর্ণং সদা ত্রিগুণসংযুতং। আত্মাদিতত্ত্বসংযুক্তং ত্রিবিন্দুসহিতং সদা॥ ইতি কামধেনুতন্ত্রে পঞ্চমপটলঃ॥ *॥ বক্রা বামগতা রেখা ততোঽধঃসঙ্গতা ভবেৎ। তস্মাদূর্দ্ধগতা ভূত্বা দক্ষমারভ্য কুণ্ডলী॥ ব্রহ্মা রুদ্রশ্চ বিষ্ণুশ্চ কুণ্ডলী ব্রহ্মরূপিণী। মাত্রা বামাদ্দক্ষিণতঃ ক্রমশঃ পরিকীর্ত্তিতা॥ ইতি বর্ণোদ্ধারতন্ত্রং॥ তৎপর্য্যায়ঃ। ফকারশ্চ মহেশানি শিখী চৈব জনার্দ্দনঃ। ইতি রুদ্রযামলোক্তবর্ণাভিধানং॥ অস্য ধ্যানং যথা। প্রলয়াম্বুদবর্ণাভাং ললজ্জিহ্বাং চতুর্ভুজাং। ভক্তাভয়প্রদাং নিত্যাং নানালঙ্কারভূষিতাং॥ এবং ধ্যাত্বা ফকারন্তু তন্মন্ত্রং দশধা জপেৎ। ইতি বর্ণোদ্ধারতন্ত্রং॥ *॥ অস্য নামানি যথা। ফঃ সখী দুর্গিণী ধূম্রা বামপার্শ্বো জনার্দ্দনঃ। জয়া পাদঃ শিখা রৌদ্রী ফেৎকারঃ শাখিনীপ্রিয়ঃ॥ উমা বিহঙ্গমঃ কালঃ কুব্জিনীপ্রিয়পাবকৌ। প্রলয়াগ্নির্নীলপাদোঽক্ষরঃ পশুপতিঃ শশী॥ ফুৎকারো যামিনী ব্যক্তা পাবনো মোহবর্দ্ধনঃ। নিষ্ফলবাগহঙ্কারঃ প্রয়াগো গ্রামণীঃ ফলং॥ ইতি নানাতন্ত্রশাস্ত্রং॥

ফং (ক্লী) রূক্ষোক্তিঃ। ফুৎকৃতিঃ। নিষ্ফলভাষণং। ইতি মেদিনী॥

ফঃ (পুং) যক্ষসাধনং। স্ফানং। ঝঞ্ঝাবাতঃ। ইতি মেদিনী॥ বর্দ্ধকঃ। জৃম্ভানিষ্ফারঃ। স্ফুটিঃ। ফললাভঃ। ইতি বিশ্ব সংজ্ঞাবিশেষঃ। যথা। হসোঽস্তুঃ ফঃ।

অচানন্তরিতো হসঃ ফসংজ্ঞঃ স্যাৎ। ইতি মুগ্ধবোধব্যাকরণং ॥

ফক্ক অসদ্ব্যবহারে। শনৈর্গতৌ। ইতি কবিকল্পদ্রুমঃ ॥ কোপধঃ। ফক্কতি খলঃ কুৎসিতং ব্যবহরতীত্যর্থঃ। ফক্কতি বৃদ্ধো মন্দং গচ্ছতীত্যর্থঃ। ইতি দুর্গাদাসঃ ॥

ফক্কিকা (স্ত্রী) অসদ্ব্যবহারঃ। ফাকি ইতি ভাষা। তৎপর্য্যায়ঃ। চোদ্যং ২ দেশ্যং ৩ পূর্ব্বপক্ষঃ ৪। ইতি শব্দরত্নাবলী ॥ ন্যায়সম্বন্ধিব্যাখ্যা। যথা। শ্রীমতা মথুরানাথতর্কবাগীশধীমতা। বিশদীকৃত্য দর্শ্যন্তে দ্বিতীয়মণিফক্কিকাঃ ॥ ইত্যনুমানখণ্ডটীকারম্ভে মথুরানাথঃ ॥

ফঞ্জিকা (স্ত্রী) ব্রাহ্মণযষ্টিকা। ইত্যমরঃ ॥ দেবতাড়ঃ। দুরালভা। ইতি শব্দচন্দ্রিকা ॥

ফঞ্জিপত্রিকা (স্ত্রী) আখুপর্ণী। ইতি রত্নমালা ॥

ফঞ্জী (স্ত্রী) ভার্গী। ইতি রাজনির্ঘণ্টঃ ॥

ফট্ ব্য অনুকরণশব্দঃ। অস্ত্রবীজং। যথা। ফড়স্ত্রং শস্ত্রমায়ুধং। ইতি বীজবর্ণাভিধানং ॥ * ॥ শান্তিকুম্ভক্ষালনে অর্ঘ্যপাত্রক্ষালনে অর্ঘ্যজলেন পূজোপকরণাভ্যুক্ষণে অন্তরীক্ষগবিঘ্নোৎসারণে বিকিরক্ষেপণে গন্ধপুষ্পাভ্যাং করশোধনে অঘমর্ষণে পাপপুরুষতাড়নে করাঙ্গন্যাসে নৈবেদ্যপ্রোক্ষণে হোমাগ্নেঃ ক্রব্যাদাংশত্যাগে হোমাগ্ন্যাবাহনে তদগ্নিপ্রোক্ষণাদৌ চ ফড়িতিমন্ত্রস্য প্রয়োগঃ ॥

ফটঃ (পুং স্ত্রী) ফণা। ইত্যমরজটাধরৌ ॥

ফটা (স্ত্রী) ফণা। দম্ভঃ। ইতি মেদিনী ॥ কিতবঃ। ইতি হেমচন্দ্রঃ ॥ * ॥ স্যাৎ পবর্গদ্বিতীয়াদি ফটায়াস্তু স্ফটাপি চ। ইতি ভরতধৃতশব্দভেদঃ ॥

ফড়িঙ্গা (স্ত্রী) ঝিল্লিকা। ফড়িঙ্গ ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥

ফণ ণ নিঃস্নেহে। ইতি কবিকল্পদ্রুমঃ ॥ ফেণতুঃ পফণতুঃ। নিঃস্নেহঃ অনায়াসেনোৎপত্তিঃ। ফণতি বাঞ্ছিতং শ্রীমতাং। অনায়াসেন জাতং। অস্যৈব ঞ্যান্তস্য নিষ্ঠায়াং অনায়াসকৃতং ফাণ্টং ইত্যমরঃ ॥ অতএব রমানাথোঽপি ঘটাদৌ ফণ গতৌ ইত্যত্র গতেরন্যত্র। ফাণয়তি জনোঽনায়াসেন জনয়তীত্যর্থ ইত্যাহ। ইতি দুর্গাদাসঃ ॥

ফণ মিণ গতৌ। ইতি কবিকল্পদ্রুমঃ ॥ মি ফণয়তি ফাণয়তি। ণ ফেণতুঃ পফণতুঃ। ইতি দুর্গাদাসঃ ॥

ফণঃ (ত্রি) সর্পস্য বিস্তৃতমস্তকং। যথা। ফটায়াস্তু ফণা দ্বয়োরিত্যমরঃ ॥ শশোর্ণং কারণং ফণং। ইতি ক্লীবকাণ্ডে চন্দ্রগোমী ॥ তৎপর্য্যায়ঃ। ফণা ২ ফণং ৩ ফটা ৪ ফটঃ ৫ স্ফটঃ ৬ স্ফটা ৭। ইত্যমরভরতৌ ॥ দর্ব্বী ৮ ভোগঃ ৯ স্ফুটঃ ১০। ইতি হেমচন্দ্রঃ ॥ স্ফুটা ১১ দর্ব্বিঃ ১২ ফটী ১৩। ইতি শব্দরত্নাবলী ॥

ফণকরঃ (পুং) ভুজঙ্গঃ। ইতি শব্দরত্নাবলী ॥

ফণধরঃ (পুং) সর্পঃ। ইতি শব্দরত্নাবলী ॥

ফণধরধরঃ (পুং) শিবঃ। ইতি কবিকল্পলতা ॥

ফণভৃৎ (পুং) সর্পঃ। ইতি হেমচন্দ্রঃ

ফণবান্ [ৎ] (পুং) সর্পঃ। ইতি শব্দরত্না-
বলী ॥

ফণা (স্ত্রী) সর্পফটা। ইত্যমরঃ ॥

ফণাকরঃ (পুং) সর্পঃ। ইতি শব্দরত্নাবলী ॥

ফণাধরঃ (পুং) সর্পঃ। ইতি শব্দরত্নাবলী ॥

ফণাভরঃ (পুং) সর্পঃ। ইতি হারাবলী ॥

ফণাবান্ [ৎ] (পুং) সর্পঃ। ইতি শব্দরত্নাবলী॥

ফণিকেসরং (ক্লী) নাগকেসরং। ইতি রাজ-
নির্ঘণ্টঃ ॥

ফণিখেলঃ (পুং) ভারতীপক্ষী। ভারই ইতি
ভাষা। ইতি ত্রিকাণ্ডশেষঃ ॥

ফণিচক্রং (ক্লী) বিবাহাদিকর্ম্মসু শুভাশুভ-
জ্ঞানার্থং সপ্তবিংশতিনক্ষত্রঘটিতসর্পা-
কারত্রিনাড়িকচক্রং । যথা। অশ্বিন্যাদি
লিখেচ্চক্রং সর্পাকারং ত্রিনাড়িকং। তত্র
বেধবশাজ্জ্ঞেয়ং বিবাহাদৌ শুভাশুভং ॥
ত্রিনাড়ীবেধনক্ষত্রমশ্বিন্যার্দ্রাযুগোত্তরাঃ ।
হস্তেন্দ্রমূলবারুণ্যঃ পূর্ব্বভাদ্রপদাস্তথা ॥
যাম্যঃ সৌম্যো গুরুর্যোনিশ্চিত্রা মিত্রে-
জলাহ্বয়ং। ধনিষ্ঠা চোত্তরা ভাদ্রা মধ্য-
নাড়ীব্যবস্থিতাঃ ॥ কৃত্তিকা রোহিণী সর্পো
মঘা স্বাতীবিশাখকে । উত্তরা শ্রবণা
পৌষ্ণং পৃষ্ঠনাড়ীব্যবস্থিতাঃ ॥ অশ্বাদি-
নাড়ীবেধর্ক্ষে ষষ্ঠং দ্বিতীয়কং ক্রমাৎ ।
যাম্যাদিতুর্য্যতুর্য্যঞ্চ কৃত্তিকাদিদ্বিষট্ককং ॥
এবং নিরীক্ষয়েদ্বেধং কন্যামন্ত্রে গুরৌ
সুরে। পণ্যস্ত্রীস্বামিমিত্রেষু দেশে গ্রামে
পুরে গৃহে ॥ একনাড়ীস্থধিষ্টানি যদি
স্যুর্ব্বরকন্যয়োঃ। তদা বেধং বিজানীয়াদ্
গুর্ব্বাদিষু তথৈব চ॥ প্রকটং যস্য জন্মর্ক্ষং
তস্য জন্মর্ক্ষতো ব্যধঃ। প্রনষ্টং জন্মভং
যস্য তস্য নামর্ক্ষতো ভবেৎ। দ্বয়োর্জন্ম-
ভয়োর্ব্বেধে ন কর্ত্তব্যং কদাচন॥ এক-
নাড়ীস্থিতা চেৎ স্যাদ্ভর্ত্তুর্নাশায় চাঙ্গনা।
তস্মান্নাড়ীব্যধো বীক্ষ্যো বিবাহে শুভ-
মিচ্ছতা ॥ প্রাঙ্নাড্যা বেধতো ভর্ত্তা মধ্য-
নাড্যো ভয়ন্তথা। পৃষ্ঠনাড়ীব্যধে কন্যা
ম্রিয়তে নাত্র সংশয়ঃ ॥ একনাড়ীস্থিতা
যত্র গুরুর্মন্ত্রশ্চ দেবতা। তত্র দ্বেষং রুজং
মৃত্যুং ক্রমেণ ফলমাদিশেৎ ॥ সমাসন্নে
ব্যধে শীঘ্রং দূরবেধে চিরেণ তু। বেধা-
ন্তরভমানেন বর্ষে দুষ্টং প্রজায়তে॥ প্রভুঃ
পণ্যাঙ্গনা মিত্রং দেশো গ্রামঃ পুরং
গৃহং। একনাড়ীগতা ভব্যা অভব্যা বেধ-
বর্জ্জিতাঃ। একরাশ্যাদিযোগে তু নাড়ী-
দোষো ন বিদ্যতে ॥ ইতি জ্যোতি-
স্তত্ত্বং ॥*॥ অপি চ। কৃত্তিকাদিযমদৈবত-
শেষঃ পৃষ্ঠে সুতহতিসঙ্কটরোগঃ ক্রোড়ে
কান্তাপুত্রবিয়োগঃ। মধ্যে রেখে বিহিত-
বিবাহ উভয়োর্ম্মরণং বদতি বরাহঃ ॥
ক্রোড়ে পৃষ্ঠে বশ উদ্দামং মধ্যে ক্রোড়ে
বহুসম্মানং। মধ্যে পৃষ্ঠে ভবতি বিবাহো
বহুসুতবিত্তমিতি মুনিরাহ॥ ইতি সময়-
প্রদীপঃ ॥ * ॥ তস্য বিন্যাসো যথা।

পৃষ্ঠে ১ ৬ ৭ ১২ ১৩ ১৮ ১৯ ২৪ ২৫

মধ্যে ২ ৫ ৮ ১১ ১৪ ১৭ ২০ ২৩ ২৬

ক্রোড়ে ৩ ৪ ৯ ১০ ১৫ ১৬ ২১ ২২ ২৭॥

ফণিজিহ্বা (স্ত্রী) মহাশতাবরী। মহাসমঙ্গা।
ইতি রাজনির্ঘণ্টঃ ॥

ফণিজ্ঝকঃ (পুং) ক্ষুদ্রপত্রতুলসী। জম্বীর-ভেদঃ। ইতি কেচিৎ॥ জম্বীরসামান্যঃ। ইতি কেচিৎ॥ তৎপর্য্যায়ঃ। সমীরণঃ ২ মরুবকঃ ৩ প্রস্থপুষ্পঃ ৪ জম্বীরঃ ৫। ইত্যমরভরতৌ॥

ফণিতঃ (ত্রি) গতঃ। নিঃস্নেহিতঃ। ফণ-ধাতোঃ ক্তপ্রত্যয়েন নিষ্পন্নঃ॥

ফণিতল্পগঃ (পুং) বিষ্ণুঃ। সর্পশয্যায়াং গচ্ছতি যঃ। ইতি ব্যুৎপত্তিঃ॥

ফণিপ্রিয়ঃ (পুং) বায়ুঃ। ইতি শব্দরত্না-বলী॥

ফণিফেনঃ (পুং) অহিফেনঃ। আফিং ইতি ভাষা। যথা। জাতীফলং টঙ্গণমভ্রকঞ্চ হিঙ্গুলগন্ধং পরিমর্দ্দ্য যামং। ভাগদ্বয়ং স্যাৎ ফণিফেনকস্য গান্ধালিকাপত্ররসেন মর্দ্দ্যং॥ ইতি রত্নাবলী॥

ফণিবল্লী (স্ত্রী) নাগবল্লী। ইতি রাজনির্ঘণ্টঃ॥

ফণিহন্ত্রী (স্ত্রী) গন্ধনাকুলী। ইতি রাজ-নির্ঘণ্টঃ॥

ফণিহৃৎ (স্ত্রী) ক্ষুদ্রদুরালভা। ইতি রাজ-নির্ঘণ্টঃ॥

ফণী [ন্] (পুং) সর্পঃ। ইত্যমরঃ॥ সর্পিণী-নামকৌষধিঃ। ইতি রাজনির্ঘণ্টঃ॥

ফণীশ্বরঃ (পুং) অনন্তঃ। ইতি শব্দরত্নাবলী॥

ফণ্ডঃ (পুং) জঠরং। ইত্যুণাদিকোষঃ॥

ফৎকারী (পুং) পক্ষিমাত্রং। ইতি শব্দ-চন্দ্রিকা॥

ফরং (ক্লী) ফলকং। ইত্যমরটীকায়াং ভরতঃ॥

ফরুবকং (ক্লী) পূগপাত্রং। ইতি হারাবলী॥

ফর্করীকঃ (পুং) চপেটঃ। মার্দ্দবে ক্লী। ইতি মেদিনী॥

ফর্করীকা (স্ত্রী) পাদুকা। মদনঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥

ফল নিষ্পত্তৌ। ইতি কবিকল্পদ্রুমঃ॥ ইং নবশুককোমলা মণীনাং রবিকরসম্বলিতাঃ ফলন্তি ভাসঃ। ইতি ভারবিঃ॥ নিষ্পা-দনেঽপি বাল্মীকিঃ। ফলতিস্ম যস্য চরিতস্তোত্রায় দিব্যা গিরঃ। ইতি দুর্গা-দাসঃ॥

ফল জ গতৌ। ইতি কবিকল্পদ্রুমঃ॥ জ ফালঃ ফলঃ। ইতি দুর্গাদাসঃ॥

ফল ঞি আ ভিদি। ইতি কবিকল্পদ্রুমঃ॥ ঞি ফুল্লোঽস্তি। আ ফলিতং ফুল্তং তেন। ফলতি কাষ্ঠং কুঠারঃ। ইতি দুর্গাদাসঃ॥

ফলং (ক্লী) লাভঃ। শস্যং। ফলকং। হেতু-কৃতং। ইত্যমরঃ॥ জাতীফলং। ত্রিফলা। কক্কোলং। ইতি মেদিনী॥ বাণাগ্রং। আর্ত্তবং। ইতি শব্দরত্নাবলী॥ ফালঃ। ইতি হেমচন্দ্রঃ॥ দানং। ইতি ধরণিঃ॥ মুষ্কঃ। যথা। অফলো ভুজ্যতে মেষঃ সফলস্তু ন ভুজ্যতে। ইতি রামা-য়ণং॥ * ॥ জীবস্য কর্ম্মফলভুক্তির্যথা। জীবঃ কর্ম্মফলং ভুঙ্ক্তে আত্মা নির্লিপ্ত এব চ। আত্মনঃ প্রতিবিম্বশ্চ দেহী জীবঃ স এব চ॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ২৩ অধ্যায়ঃ॥ * ॥ দানফলং যথা। যথা ফলন্তি শস্যানি ন্যূনানি বাধিকানি চ। কৃষকাণাং ক্ষেত্রভেদে পাত্রভেদে

ফলং তথা॥ সামান্যদিবসে বিপ্রে দানং সমফলং ভবেৎ। অমায়াং রবিসংক্রান্ত্যাং ফলং শতগুণং ভবেৎ। চাতুর্মাস্যাং পৌর্ণমাস্যামনন্তং ফলমেব চ॥ গ্রহণে শশিনঃ কোটিগুণঞ্চ ফলমেব চ। সূর্য্যস্য গ্রহণে চাপি ততো দশগুণং ভবেৎ॥ অক্ষয়ায়ামক্ষয়ঞ্চৈবাসংখ্যং ফলমুচ্যতে। এবমন্যত্র পুণ্যাহে ফলাধিক্যং ভবেদিহ॥ যথা দানে তথা স্নানে জপেঽন্যৎ পুণ্যকর্ম্মসু। এবং সর্ব্বত্র বোদ্ধব্যং নরাণাং কর্ম্মণাং ফলং॥ সামান্যদেশে দানঞ্চ বিপ্রে সমফলং ভবেৎ। তীর্থে দেবগৃহে চৈব ফলং শতগুণং স্মৃতং॥ গঙ্গায়াঞ্চ কোটিগুণং ক্ষেত্রে নারায়ণে ফলং। এবং সর্ব্বত্র বোদ্ধব্যং ফলাধিক্যং ক্রমেণ চ॥ যথা চৈব কোটিগুণং তথা চ বিষ্ণুমন্দিরে। কেদারে চ লক্ষগুণং হরিদ্বারে তথা ফলং॥ পুষ্করে ভাস্করক্ষেত্রে দশলক্ষগুণং ফলং। এবং সর্ব্বত্র বোদ্ধব্যং ফলাধিক্যং ক্রমেণ চ॥ সামান্যব্রাহ্মণে দানং সমমেব ফলং ভবেৎ। লক্ষং ত্রিসন্ধ্যপূতে চ পণ্ডিতে চ জিতেন্দ্রিয়ে॥ বিষ্ণুমন্ত্রোপাসকে চ বুধে কোটিগুণং ভবেৎ। এবং সর্ব্বত্র বোদ্ধব্যং ফলাধিক্যং গুণং ভবেৎ॥ যথা দণ্ডেন সূত্রেণ শরাবেণ জবেন চ। কুম্ভং নির্ম্মাতি চক্রেণ কুম্ভকারো মৃদা ভুবি। তথৈব কর্ম্মসূত্রেণ ফলং ধাতা দদাতি চ॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ৩৪ অধ্যায়ঃ॥ * ॥ স্বপ্রিয়ফলস্য বিষ্ণুদেয়ত্বং যথা। ভক্ষ্যাণি যানি পেয়ানি ভোজ্যান্যভিমতানি চ। ফলঞ্চ বল্লভং যচ্চ তত্তদ্দেয়ং জনার্দ্দনে॥ ইত্যগ্নিপুরাণং॥ * ॥ ইষ্টকফলদ্বারা ফলপাতননিষেধো যথা। ন সাতয়েদিষ্টকাভিঃ ফলানি বৈ ফলেন তু। ন ম্লেচ্ছভাষাং শিক্ষেত নাকর্ষেচ্চ পদাসনং॥ ইতি কৌর্ম্মে উপবিভাগে ১৬ অধ্যায়ঃ॥ কর্ম্মজন্যশুভাদৃষ্টদুরদৃষ্টসম্ভবস্বর্গনরকাদি। তত্ত্রিবিধং যথা। অনিষ্টমিষ্টং মিশ্রঞ্চ ত্রিবিধং কর্ম্মণঃ ফলং। ভবত্যত্যাগিনাং প্রেত্য ন তু সন্ন্যাসিনাং ক্বচিৎ॥ ইতি শ্রীভগবদ্গীতায়াং ১৮ অধ্যায়ঃ॥ অনিষ্টং নারকিত্বং। ইষ্টং দেবত্বং। মিশ্রং মনুষ্যত্বং। এবং ত্রিবিধং পাপস্য পুণ্যস্য উভয়মিশ্রস্য চ কর্ম্মণো যৎ ফলং প্রসিদ্ধং তৎ সর্ব্বমত্যাগিনামেব প্রেত্য পরত্র ভবতি তেষাং ত্রিবিধকর্ম্মসম্ভবাৎ ন তু সন্ন্যাসিনাং ক্বচিদপি ভবতি। ইতি তট্টীকায়াং শ্রীধরস্বামী॥*॥ বেদাদীনাং ফলং। যথা। বহ্নিং প্রতি মরীচিবাক্যং। স তং প্রাহ ফলং ব্রূহি বেদস্য চ ধনস্য চ। দারশ্রুতস্য বিপ্রাদেঃ স্বর্গাপবর্গহেতবে॥ বহ্নিরুবাচ। অগ্নিহোত্রফলা বেদা দত্তভুক্তফলং ধনং। রতিপুত্রফলা দারাঃ শীলবৃত্তফলং শ্রুতং॥ ইতি বহ্নিপুরাণে নিত্যাহ্নিকস্নানবিধিনামাধ্যায়ঃ॥ * ॥ লবণাদিসংযোগে ফলস্যান্নত্বং যথা। তণ্ডুলোম্বগ্নিসংযোগাল্লবণযোগেন পিষ্টকং। ফলং ত্রিতয়সংযোগাদন্নং ভবতি তৎক্ষণাৎ॥ ইতি রামার্চ্চনচন্দ্রিকাধৃতবচনমিতি কেচিৎ॥

ফলঃ (পুং) কুটজবৃক্ষঃ। ইতি শব্দরত্নাবলী॥

ফলকং (ক্লী পুং) চর্ম্ম। ঢাল ইতি ভাষা। ইত্যমরঃ॥

ফলকঃ (পুং) অস্থিখণ্ডং। ইতি জটাধরঃ॥ নাগকেশরং। ইতি শব্দচন্দ্রিকা॥ কাষ্ঠাদিপট্টকং। যথা। পাণ্ডুলেখ্যেন ফলকে ভূমৌ বা প্রথমং লিখেৎ। ঊনাধিকন্তু সংশোধ্যং পশ্চাৎ পত্রে নিবেশয়েৎ॥ ইতি ব্যবহারতত্ত্বে ব্যাসঃ॥ রজকপট্টং। ধোপার পাট ইতি ভাষা। যথা। শাল্মলে ফলকে শ্লক্ষ্ণে নিজ্যাদ্বাসাংসি নেজকঃ। ন চ বাসাংসি বাসোভির্নির্হরেন্ন চ বাসয়েৎ॥ ইতি মিতাক্ষরা॥

ফলকপাণিঃ (পুং) চর্ম্মী। ঢালী ইতি ভাষা। ইত্যমরঃ॥

ফলকর্কশা (স্ত্রী) বনকোলিঃ। ইতি কেচিৎ॥

ফলকামঃ (ত্রি) কর্ম্মফলকামী। যথা। ধর্ম্মবাণিজিকা মূঢ়াঃ ফলকামা নরাধমাঃ। অর্চ্চয়ন্তি জগন্নাথং তে কামানাপ্নুবন্ত্যুতঃ॥ ইতি মলমাসতত্ত্বধৃতবিষ্ণুধর্ম্মোত্তরীয়তৃতীয়কাণ্ডীয়বচনং॥

ফলকী [ন্] (পুং) মৎস্যভেদঃ। ফলুই ইতি ভাষা। ফলকান্বিতে ত্রি। ইতি মেদিনী॥

ফলকৃষ্ণঃ (পুং) পানীয়ামলকং। ইতি শব্দচন্দ্রিকা॥

ফলকেশরঃ (পুং) নারিকেলবৃক্ষঃ। ইতি জটাধরঃ॥

ফলকোষকঃ (পুং) মুষ্কঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ফলগ্রহিঃ (ত্রি) ফলেগ্রহিঃ। যথাসময়ং ফলধরবৃক্ষঃ। ইত্যমরটীকায়াং ভরতঃ॥

ফলগ্রাহী [ন্] (পুং) বৃক্ষঃ। ইতি ধরণিঃ॥ ফলগ্রহণকর্ত্তরি ত্রি॥

ফলচমসঃ (পুং) দধিমিশ্রিতবটত্বক্চূর্ণং। ইতি শ্রাদ্ধতত্ত্বং॥

ফলচোরকঃ (পুং) চোরকনামগন্ধদ্রব্যং। ইতি রাজনির্ঘণ্টঃ॥

ফলত্রয়ং (ক্লী) দ্রাক্ষাপরূষকাশ্মর্য্যঃ। ত্রিফলা। ইতি শব্দচন্দ্রিকা॥

ফলত্রিকং (ক্লী) ত্রিফলা। শুণ্ঠীপিপ্পলীমরিচানি। ইত্যমরঃ॥

ফলদঃ (পুং) বৃক্ষঃ। ইতি ধরণিঃ॥

ফলদঃ (ত্রি) ফলদাতা। যথা। বিশিষ্টফলদা কন্যা নিষ্কামাণাং বিমুক্তিদা। ইতি মলমাসতত্ত্বধৃতবিষ্ণুপুরাণবচনং॥

ফলপক্বাম্লং (ক্লী) অম্লপক্বফলং। ইতি রাজনির্ঘণ্টঃ॥

ফলপাকঃ (পুং) করমর্দ্দকঃ। ইত্যমরটীকায়াং ভরতঃ॥ পানীয়ামলকং। ইতি শব্দচন্দ্রিকা॥

ফলপাকান্তা (স্ত্রী) ওষধিঃ। ধান্যকদল্যাদিঃ। ইত্যমরঃ॥

ফলপাকী [ন্] (পুং) গর্দ্দভাণ্ডঃ। ইতি রত্নমালা॥

ফলপুচ্ছঃ (পুং) বরণ্ডালুঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ফলপুষ্পা (স্ত্রী) পিণ্ডখর্জ্জুরী। ইতি রাজনির্ঘণ্টঃ॥

ফলপূরঃ (পুং) বীজপূরঃ। ইত্যমরঃ॥

ফলপূরকঃ (পুং) বীজপূরঃ। ইতি ভাবপ্রকাশঃ॥

ফলপ্রদঃ (ত্রি) ফলদাতা। যথা। ক্রীণীহি ভোঃ ফলানীতি শ্রুত্বা সত্বরমচ্যুতঃ। ফলার্থী ধান্যমাদায় যযৌ সর্ব্বফলপ্রদঃ॥ ইতি শ্রীভাগবতে ১০ স্কন্ধে ১১ অধ্যায়ঃ॥

ফলপ্রিয়া (স্ত্রী) প্রিয়ঙ্গুঃ। ইতি রাজনির্ঘণ্টঃ॥

ফলভাক্ [জ্] (ত্রি) ফলভাগী। যথা। মাসপক্ষতিথীনাঞ্চ নিমিত্তানাঞ্চ সর্ব্বশঃ। উল্লেখনমকুর্ব্বাণো ন তস্য ফলভাগ্ ভবেৎ॥ ইতি তিথ্যাদিতত্ত্বধৃতব্রহ্মাণ্ডভবিষ্যপুরাণবচনং॥

ফলভূমিঃ (স্ত্রী) কর্ম্মফলভোগস্থানং। যথা। ভরতান্যৈরাবতানি বিদেহাশ্চ কুরূন্বিতাঃ। বর্ষাণি কর্ম্মভূম্যঃ স্যুঃ শেষাণি ফলভূময়ঃ॥ ইতি হেমচন্দ্রঃ॥

ফলমুখ্যা (স্ত্রী) অজমোদা। ইতি রাজনির্ঘণ্টঃ॥

ফলমুদ্গরিকা (স্ত্রী) পিণ্ডখর্জ্জুরঃ। ইতি শব্দমালা॥

ফললক্ষণা (স্ত্রী) প্রয়োজনবতী লক্ষণা। যথা। ব্যঙ্গ্যস্য গূঢ়াগূঢ়ত্বাদ্দ্বিধা স্যুঃ ফললক্ষণাঃ। ইতি সাহিত্যদর্পণঃ॥

ফলবর্ত্তুলং (ক্লী) কালিঙ্গং। ইতি রাজনির্ঘণ্টঃ॥

ফলবান্ [ৎ] (ত্রি) ফলযুক্তবৃক্ষঃ। তৎপর্য্যায়ঃ। ফলিনঃ ২ ফলী ৩। ইত্যমরঃ॥ ফলিতঃ ৪। ইতি রাজনির্ঘণ্টঃ॥

ফলবিক্রয়িণী (ত্রি) ফলবিক্রেত্রী। কুজ্‌ড়ায়িনী ইতি হিন্দী ভাষা। যথা। ফলবিক্রয়িণী তস্য চ্যুতধান্যকরদ্বয়ং। ফলৈরপূরয়দ্রত্নৈঃ ফলভাণ্ডমপূরি চ॥ ইতি শ্রীভাগবতে ১০ স্কন্ধে ১১ অধ্যায়ঃ॥

ফলবৃক্ষকঃ (পুং) পনসঃ। ইতি রাজনির্ঘণ্টঃ॥

ফলশাকং (ক্লী) ষড়্‌বিধশাকান্তর্গতফলরূপশাকং। যথা। পত্রং পুষ্পং ফলং নালং কন্দং সংস্বেদজং তথা। শাকং ষড়্‌বিধমুদ্দিষ্টং গুরু বিদ্যাদ্যথোত্তরং॥ ইতি রাজবল্লভঃ॥

ফলশাড়বঃ (পুং) দাড়িমঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ফলশালী [ন্] (ত্রি) ফলাশ্রয়ঃ। যথা। পর সমবেতধাত্বর্থজন্যফলশালিত্বং কর্ম্মত্বং। ইতি কর্ম্মলক্ষণে সারমঞ্জরী॥

ফলশৈশিরঃ (পুং) বদরবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

ফলশ্রুতিঃ (স্ত্রী) কর্ম্মফলশ্রবণং। যথা। ফলশ্রুতিরিয়ং নৃণাং ন শ্রেয়ো রোচনং পরং। শ্রেয়ো বিবক্ষয়া প্রোক্তং যথা ভৈষজ্যরোচনং॥ অপি চ। বেদোক্তমেব কুর্ব্বাণো নিঃসঙ্গোঽর্পিতমীশ্বরে। নৈষ্কর্ম্ম্যাং লভতে সিদ্ধিং রোচনার্থা ফলশ্রুতিঃ॥ ইতি শ্রীভাগবতে ১১ স্কন্ধঃ। ইতি মলমাসতত্ত্বং॥

ফলশ্রেষ্ঠঃ (পুং) আম্রবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

ফলসঃ (পুং) পনসবৃক্ষঃ। ইত্যমরটীকায়াং ভরতঃ॥

ফলস্নেহঃ (পুং) আখোটবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

ফলহারী (স্ত্রী) কালী। ফলং হরতি যা তাং

ষণ্বিতি কর্ম্মোপপদহৃঞ্ধাতোঃ ষণি ঈপ্‌প্রত্যয়নিষ্পন্নোঽয়ং শব্দঃ। সা জ্যৈষ্ঠপঞ্চদশ্যাং বহুফলাদ্যুপহারৈঃ পূজনীয়া। যথা। জ্যৈষ্ঠে মাসি অমায়াং বৈ মধ্যরাত্রে মহেশ্বরি। পূজয়েৎ কালিকাং দেবীং নানাদ্রব্যোপহারকৈঃ॥ তত্রৈব সিতপক্ষে তু পঞ্চদশ্যাং নিশার্দ্ধকে। পূজয়েচ্চ ফলৈর্লক্ষৈঃ শক্তিতো বাপি কালিকাং॥ ইতি মায়াতন্ত্রে ১৭ পটলঃ॥

ফলা (স্ত্রী) ঝিঞ্ঝিরিষ্টাক্ষুপঃ। ইতি রাজনির্ঘণ্টঃ॥

ফলাঢ্যা (স্ত্রী) কাষ্ঠকদলী। ইতি রাজনির্ঘণ্টঃ॥

ফলাধ্যক্ষং (ক্লী) রাজাদনবৃক্ষঃ। ইত্যমরঃ॥ ফলানামধিকৃতে ত্রি॥

ফলাদনঃ (পুং) শুকপক্ষী। ইতি হেমচন্দ্রঃ॥ ফলভক্ষকে ত্রি॥

ফলান্তঃ (পুং) বংশঃ। ইতি শব্দমালা॥

ফলাম্লং (ক্লী) বৃক্ষাম্লং। ইতি রাজনির্ঘণ্টঃ॥

ফলাম্লঃ (পুং) অম্লবেতসঃ। ইতি রাজনির্ঘণ্টঃ॥

ফলার্থী [ন্] (ত্রি) ফলকামী। যথা। সর্ব্বসূক্তেষু কর্ত্তব্যা প্রতিষ্ঠা বিধিনা বুধৈঃ। ফলার্থিভিস্তু প্রতিষ্ঠং যস্মান্নিষ্ফলমুচ্যতে॥ ইতি মঠপ্রতিষ্ঠাতত্ত্বধৃতহয়শীর্ষপঞ্চরাত্রীয়সঙ্কর্ষণকাণ্ডীয়বচনং॥

ফলাশনঃ (পুং) শুকপক্ষী। ইতি ত্রিকাণ্ডশেষঃ॥ ফলভক্ষকে ত্রি॥

ফলাসঙ্গং (ক্লী) ফলাসক্তিঃ। যথা। ত্যক্ত্বা কর্ম্মফলাসঙ্গং নিত্যতৃপ্তো নিরাশ্রয়ঃ কর্ম্মণ্যভিপ্রবৃত্তোঽপি নৈব কিঞ্চ করোতি সঃ॥ ইতি শ্রীভগবদ্গীতায়াং ৪ অধ্যায়ঃ॥

ফলিঃ (পুং) মৎস্যবিশেষঃ। ফলুই ইতি ভাষা। অস্য গুণাঃ। স্বাদুত্বং। গুরুত্বং। স্নিগ্ধত্বং। বলকারিত্বং। শুক্রবর্দ্ধনত্বঞ্চ। ইতি রাজবল্লভঃ॥

ফলিকা (স্ত্রী) নিষ্পাবী। ইতি রাজনির্ঘণ্টঃ॥

ফলিতং (ত্রি) ফলমস্য জাতং। ইতি মুগ্ধবোধব্যাকরণং॥ বৃক্ষে পুং। ইতি ধরণিঃ॥ শৈলেয়ে ক্লী। ইতি রাজনির্ঘণ্টঃ॥

ফলিনঃ (ত্রি) ফলবান্। ইত্যমরঃ॥ পনসে ফলবতি বৃক্ষে চ পুং। ইতি রাজনির্ঘণ্টঃ॥

ফলিনী (স্ত্রী) প্রিয়ঙ্গুবৃক্ষঃ। অগ্নিশিখাবৃক্ষঃ। ইত্যমরঃ॥

ফলী [ন্] (ত্রি) ফলযুক্তবৃক্ষাদিঃ। ইত্যমরঃ॥

ফলী (স্ত্রী) প্রিয়ঙ্গুবৃক্ষঃ। ইত্যমরঃ॥ ফলিমৎস্যঃ। ইতি শব্দমালা॥

ফলূষঃ (পুং) লতাভেদঃ। ইত্যুণাদিকোষঃ॥

ফলেগ্রহিঃ (পুং) যথাসময়ং ফলধরবৃক্ষঃ। ঋতুপ্রাপ্তৌ ফলানি গৃহ্লাতি ধারয়তীতি ফলেগ্রহিঃ শকৃৎস্তম্বাদিত্যাদিনা ইঃ সূত্রে ফলে ইতি নির্দ্দেশাৎ একারঃ। কিম্বা ফলে গৃহ্লাতি ইতি ফলেগ্রহিঃ কর্ম্মণ্যাধারবিবক্ষা নিপাতনাৎ সপ্তম্যা অলুক্ লুকি ফলগ্রহিশ্চ ফলেগ্রহিঃ ফলগ্রহিরিতি বাচস্পতিঃ॥ ইহ গ্রহির্ধারণার্থঃ স্বীকারার্থশ্চ অত্র ধারণার্থে বৃক্ষ এব রূঢ়িঃ। স্বীকারার্থে তু ক্রিয়াশব্দতৈব যথা ফলেগ্রহীন্ হংসি বনস্পতীনামিতি ভট্টিঃ॥

ইতি রায়মুকুটাদয়ঃ। ইত্যমরটীকায়াং ভরতঃ॥ ফলগ্রহণকর্ত্তরি ত্রি॥ [বলী॥

ফলেগ্রাহিঃ (পুং) ফলেগ্রহিঃ। ইতি শব্দরত্না-

ফলেন্দ্রঃ (পুং) বৃহজ্জম্বুঃ। তৎপর্য্যায়ঃ। নন্দঃ ২ রাজজম্বুঃ ৩ মহাফলা ৪ সুরভিপত্রা ৫ মহাজম্বুঃ ৬। অস্য গুণাঃ। স্বাদুত্বং। বিষ্টম্ভিত্বং। গুরুত্বং। রোচনত্বঞ্চ। ইতি ভাবপ্রকাশঃ॥

ফলেপুষ্পা (স্ত্রী) ক্ষুদ্রক্ষুপবিশেষঃ। গূমা ইতি হিন্দী ভাষা। তৎপর্য্যায়ঃ। দ্রোণা ২ দ্রোণপুষ্পী ৩। অস্যা গুণাঃ। গুরুত্বং। স্বাদুত্বং। রূক্ষত্বং। উষ্ণত্বং। বাতপিত্তকারিত্বং। ক্ষারত্বং। লবণত্বং। স্বাদুপাকত্বং। কটুত্বং। ভেদকত্বং। কফামকামলাশোথতমকশ্বাসজন্তুনাশিত্বঞ্চ। ইতি ভাবপ্রকাশঃ॥

ফলেরুহা (স্ত্রী) পাটলিবৃক্ষঃ। ইত্যমরঃ॥

ফলেসক্তঃ (ত্রি) ফলাসক্তঃ। ফলকামী। যথা। ভগবদ্গীতা। যুক্তঃ কর্ম্মফলং ত্যক্ত্বা শান্তিমাপ্নোতি নৈষ্ঠিকীং। অযুক্তঃ কামকারেণ ফলেসক্তো নিবধ্যতে॥ ফলেসক্তঃ মম ফলায়েদং কর্ম্ম করোমীত্যেবং ফলেসক্তো নিতরাং বন্ধং প্রাপ্নোতি। ইতি মলমাসতত্ত্বং॥

ফলোত্তমা (স্ত্রী) কাকলীদ্রাক্ষা। ইতি রাজনির্ঘণ্টঃ॥ [চন্দ্রিকা॥

ফলোৎপত্তিঃ (পুং) আম্রবৃক্ষঃ। ইতি শব্দ-

ফলোদয়ঃ (পুং) লাভঃ। সুরালয়ঃ। হর্ষঃ। ইতি শব্দরত্নাবলী॥ ফলোৎপত্তিঃ। যথা। সোঽহমাজন্মশুদ্ধানামাফলোদয়কর্ম্মণাং। আসমুদ্রক্ষিতীশানামানাকরথবর্ত্মনাং॥ ইতি রঘুঃ॥

ফল্কঃ (পুং) বিসারিতাঙ্গং। ইত্যুণাদিকোষঃ॥

ফল্গু (ত্রি) অসারং। ইত্যমরঃ॥ নিরর্থকং। ইতি ত্রিকাণ্ডশেষঃ॥

ফল্গুঃ (স্ত্রী) গয়াস্থনদীভেদঃ। তস্যা মাহাত্ম্যাদি যথা। সার্দ্ধক্রোশদ্বয়ং মানং গয়ায়াং পরিকীর্ত্তিতং। পঞ্চক্রোশং গয়াক্ষেত্রং ক্রোশমেকং গয়াশিরঃ। তত্র পিণ্ডপ্রদানেন তৃপ্তির্ভবতি শাশ্বতী॥ নগাজ্জনার্দ্দনাচ্চৈব কূপাচ্চোত্তরমানসাৎ। এতদ্গয়াশিরঃ প্রোক্তং ফল্গুতীর্থং তদুচ্যতে। তত্র পিণ্ডপ্রদানেন পিতৄণাং পরমা গতিঃ॥ পৃথিব্যাং যানি তীর্থানি যে সমুদ্রাঃ সরাংসি চ। ফল্গুতীর্থং গমিষ্যন্তি বারমেকং দিনে দিনে॥ ইতি গারুড়ে ৮৩ অধ্যায়ঃ॥ অন্যৎ গয়াশব্দে দ্রষ্টব্যং॥ *॥ কাকোডুম্বরিকা। কাকডুমুর ইতি ভাষা। ইত্যমরঃ॥ অস্যা গুণাঃ। গুরুত্বং। গ্রাহিত্বং। শীতলত্বং। স্বাদুত্বং। তৃপ্তিকারিত্বঞ্চ। ইতি রাজবল্লভঃ॥ রেণুভেদঃ। ফাগু ইতি প্রসিদ্ধঃ। মিথ্যাবাক্যং। ইতি শব্দরত্নাবলী॥ বসন্তর্ত্তুঃ। ইতি জটাধরঃ॥

ফল্গুদা (স্ত্রী) গয়ানদী। যথা। তত্র দেশে গয়া নাম পুণ্যদেশোঽভিবিশ্রুতঃ। নদী চ ফল্গুদা নাম পিতৄণাং স্বর্গদায়িনী॥ ইতি বৃহদ্ধর্ম্মপুরাণে ৫৬ অধ্যায়ঃ॥

ফল্গুনঃ (পুং) অর্জ্জুনঃ। ফাল্গুনমাসঃ। ইত্যমরটীকায়াং ভরতঃ॥ [প্রয়োগঃ॥

ফল্গুনালঃ (পুং) ফাল্গুনমাসঃ। ইতি ভূরি-

ফল্গুনী (স্ত্রী) নক্ষত্রবিশেষঃ। তচ্চ পূর্ব্বফল্গুনী উত্তরফল্গুনী চ। ইতি ভরতধৃতগোবর্দ্ধনানন্দঃ ॥ কাকোডুম্বরিকা। ইতি রাজনির্ঘণ্টঃ ॥ [নির্ঘণ্টঃ ॥

ফল্গুবাটিকা (স্ত্রী) কাকোডুম্বরিকা। ইতি রাজ-

ফল্গুবৃন্তাকঃ (পুং) শ্যোনাকপ্রভেদঃ। ইতি রাজনির্ঘণ্টঃ ॥

ফল্গূৎসবঃ (পুং) ফল্গুকরণকগোবিন্দোৎসবঃ। দোলযাত্রা ইতি খ্যাতঃ। যথা। গোবিন্দানুগৃহীতস্তু যাত্রাঙ্গং তৎ প্রকীর্ত্তিতং। ফল্গূৎসবং প্রকুর্ব্বীত পঞ্চাহানি ত্র্যহাণি বা ॥ ইতি দোলযাত্রাপদ্ধতিঃ ॥

ফল্যং (ক্লী) কুসুমং। ইতি শব্দচন্দ্রিকা ॥

ফল্লকী (পুং) মৎস্যবিশেষঃ। ফলুই ইতি ভাষা। ইতি শব্দমালা ॥

ফল্লফলঃ (পুং) সূর্পবাতঃ। কুলার বাতাস ইতি ভাষা। ইতি জটাধরঃ ॥

ফাঃ (পুং) সন্তাপঃ। নিষ্ফলভাষণং। যথা। ফিঃ কোপে ফাশ্চ সন্তাপে তথা নিষ্ফলভাষণে। ইতি শব্দরত্নাবলী ॥ বৃদ্ধিঃ। বর্দ্ধকঃ। যথা। ফা বৃদ্ধৌ বর্দ্ধকে পুমান্। ইতি বিশ্বঃ ॥

ফাটকী (স্ত্রী) স্ফটী। ইতি রাজনির্ঘণ্টঃ ॥

ফাণিঃ (স্ত্রী) গুড়ঃ। করম্ভঃ। ইত্যুণাদিকোষঃ ॥

ফাণিতং (ক্লী) অর্দ্ধাবর্ত্তিতেক্ষুরসঃ। ফেণীতি খ্যাতং। ইত্যমরভরতৌ ॥ অস্য গুণাঃ। গুরুত্বং। অভিষ্যন্দিত্বং। বৃংহণত্ব কফশুক্রলত্বং। বাতপিত্তশ্রমনাশিত্বং মূত্রবস্তিবিশোধনত্বঞ্চ ॥ * ॥ ইক্ষো রসো যঃ পক্কঃ কিঞ্চিদ্গাঢ়ো বহুদ্রবঃ। স এবেক্ষুবিকারেষু খ্যাতঃ ফাণিতসংজ্ঞয়া ॥ ইতি ভাবপ্রকাশঃ ॥

ফাণ্টং (ত্রি) অনায়াসকৃতং। ইত্যমরঃ ॥ কষায়ভেদঃ। যথা। ক্ষিপ্তোষ্ণতোয়ে মৃদিতঃ ফাণ্ট ইত্যভিধীয়তে। অপি চ। ক্ষুণ্ণদ্রব্যপলে সম্যক্ জলমুষ্ণং বিনিঃক্ষিপেৎ। পাত্রে চতুঃপলমিতি ততস্তু স্রাবয়েজ্জলং। সোঽয়ং চূর্ণদ্রবঃ ফাণ্টো ভিষগ্ভিরভিধীয়তে ॥ ইতি বৈদ্যকপরিভাষা ॥

ফালং (ক্লী) হলোপকরণং। ইতি মেদিনী ॥

ফালঃ (পুং) লাঙ্গলস্থভূবিদারকলৌহঃ। ফল্যতে বিশীর্য্যতে ভূমিরনেন সঃ। তৎপর্য্যায়ঃ। কুসিকঃ ২। ইত্যমরঃ ॥ কৃষকঃ ৩ ফলং ৪। ইতি ভরতঃ ॥ কুবিকা ৫ ফালং ৬। ইতি মুকুটঃ ॥ কুশিকং ৭। ইতি হেমচন্দ্রঃ ॥ মহাদেবঃ। বলদেবঃ। কার্পাসবস্ত্রে ত্রি। ইতি মেদিনী ॥ * ॥ নববিধদিব্যান্তর্গতাষ্টমদিব্যং। তস্য বিধির্যথা। বৃহস্পতিঃ। আয়সং দ্বাদশপলঘটিতং ফালমুচ্যতে। অষ্টাঙ্গুলং ভবেদ্দীর্ঘং চতুরঙ্গুলবিস্তরং ॥ অগ্নিবর্ণং ততশ্চৌরো জিহ্বয়া লেহয়েৎ সকৃৎ। ন দগ্ধশ্চেচ্ছুদ্ধিমিয়াদন্যথা তু স হীয়তে ॥ চৌরোঽত্র গোচৌরঃ। গোচৌরস্য প্রদাতব্যং তপ্তফালাবলেহনমিতি স্মৃতিরিতি মৈথিলাঃ ॥ অত্রাপি ত্বমগ্নে ইত্যাদিমন্ত্রানন্তরং আয়সং লেলিহানস্য জিহ্বয়াপি সমাদিশেদিতি পিতামহোক্তেঃ প্রাড়্বিবাকশোধ্যাভ্যামগ্ন্যভিমন্ত্রণং কার্য্যং ॥*॥ তত্র প্রয়োগঃ। লৌকিকচত্বারিংশত্তোলক-

মিতং লৌহঘটিতমষ্টযবমধ্যাত্মকাঙ্গুলাষ্ট-দীর্ঘং তথাবিধচতুরঙ্গুলপ্রস্তারং ফালমগ্নৌ তাপয়েৎ। তত্র প্রাড়্বিবাকো ধর্ম্মাবাহনাদিহবনান্তং কর্ম্ম কৃত্বা দক্ষিণাং দত্ত্বা ওঁ ত্বমগ্নে বেদাশ্চত্বারস্ত্বঞ্চ যজ্ঞেষু হূয়সে। ত্বং মুখং সর্ব্বদেবানাং ত্বং মুখং ব্রহ্মবাদিনাং ॥ জঠরস্থোঽসি ভূতানাং ততো বেৎসি শুভাশুভং। পাপং পুনাসি বৈ যস্মাত্তস্মাৎ পাবক উচ্যতে ॥ পাপেষু দর্শয়াত্মানমর্চ্চিষ্মান্ ভব পাবক। অথবা শুভভাবেন শীতো ভব হুতাশন ॥ ত্বমগ্নে সর্ব্বভূতানামন্তশ্চরসি সাক্ষিবৎ। ত্বমেব দেব জানীষে ন বিদুর্যানি মানবাঃ ॥ ব্যবহারাভিশস্তোঽয়ং মানুষঃ শুদ্ধিমিচ্ছতি। তদেনং সংশয়াদস্মাদ্ধর্ম্মতস্ত্রাতুমর্হসি ॥ ইত্যেতৈঃ ফালস্থমগ্নিং অভিমন্ত্রয়েৎ। শোধ্যস্তু প্রতিজ্ঞাপত্রং শিরসি নিধায় ত্বমগ্নে সর্ব্বভূতানামন্তশ্চরসি পাবক। সাক্ষিবৎ পুণ্যপাপেভ্যো ব্রূহি সত্যং করে মম ॥ ইত্যনেনাভিমন্ত্র্য অগ্নিবর্ণং ফালং জিহ্বয়া সকৃল্লিহ্যাৎ ন দগ্ধশ্চেত্তদা শুদ্ধঃ। ইতি দিব্যতত্ত্বং ॥

ফালকৃষ্টঃ (ত্রি) ফালেন কর্ষিতভূম্যাদিঃ। যথা। ন মূত্রং পথি কুর্ব্বীত ন ভস্মনি ন গোব্রজে। ন ফালকৃষ্টে ন জলে ন চিত্যাং ন চ পর্ব্বতে ॥ ইতি মানবে ৪ অধ্যায়ঃ ॥

ফালাঃ (পুং) জম্বীরবীজানি। ইতি দুর্গটীকাটিপ্পনীকৃৎকুলচন্দ্রঃ ॥

ফাল্গুনঃ (পুং) গুড়াকেশঃ। নদীজবৃক্ষঃ অর্জ্জুনবৃক্ষঃ। তপস্যমাসঃ। যথা। ফাল্গুনস্তু গুড়াকেশে নদীজার্জ্জুনভূরুহে। তপস্যসংজ্ঞে মাসে তৎপূর্ণিমায়ান্তু ফাল্গুনী ॥ ইতি দন্ত্যনান্তবর্গে মেদিনী ॥ অতএব ফাল্গুনে গগনে ফেনে ণত্বমিচ্ছন্তি বর্ব্বরাঃ। ইতি কারিকা সমূলিকা। অত্র ণত্বমিচ্ছন্তীতি অকারঃ প্রশ্লেষো ভ্রান্তানাং ॥ * বৈশাখাদিদ্বাদশমাসান্তর্গতৈকাদশমাসঃ। ফল্গুনীনক্ষত্রযুক্তা পৌর্ণমাসী যস্মিন্ মাসে সঃ। ইতি তু প্রায়িকাভিপ্রায়ং। স চ ত্রিবিধঃ। মুখ্যচান্দ্রো গৌণচান্দ্রঃ সৌরশ্চ। যথা। কুম্ভস্থরবিপ্রারব্ধশুক্লপ্রতিপদাদিদর্শান্তো মাসো মুখ্যচান্দ্রঃ। মুখ্যচান্দ্রফাল্গুনমাসীয়পৌর্ণমাস্যন্তঃ কৃষ্ণপ্রতিপদাদিকো মাসো গৌণচান্দ্রঃ। কুম্ভরাশিস্থরবিভোগোপলক্ষিতকালাত্মকো মাসঃ সৌরঃ। ইতি মলমাসতত্ত্বানুসারাৎ ॥ * ॥ তৎপর্য্যায়ঃ। তপস্যঃ২ ফাল্গুনিকঃ৩ ফল্গুনঃ৪। ইত্যমরভরতৌ ॥ বৎসরাত্মকঃ ৫ ইতি রাজনির্ঘণ্টঃ ॥ * ॥ তত্র জাতফলং। প্রিয়ম্বদঃ সজ্জনবল্লভশ্চ পরোপকারী বিমলাশয়শ্চ। দাতা নিতান্তং প্রমদাভিলাষী স্যাৎ ফাল্গুনে যস্য জনস্য জন্ম ॥ ইতি কোষ্ঠীপ্রদীপঃ ॥ * ॥ অথ ফাল্গুনকৃত্যং। তত্র মাঘ্যনন্তরং ফাল্গুনকৃষ্ণাষ্টম্যাং কালশাকবাস্তুকশাকোপকরণান্নেন শ্রাদ্ধং কর্ত্তব্যং ॥ * ॥ গৌণচান্দ্রফাল্গুনকৃষ্ণচতুর্দ্দশ্যাং শিবরাত্রিব্রতং। যদ্দিনে প্রদোষনিশীথোভয়ব্যাপিনী চতুর্দ্দশী তদ্দিনে ব্রতং উভয়ব্যাপ্ত্যনুরোধাৎ। যদা পূর্ব্বেদ্যুর্নিশীথব্যাপিনী পরেদ্যুঃ প্রদোষ-

মাত্রব্যাপিনী তদা পূর্ব্বেদ্যুরেব তৎ প্রধান-কালব্যাপ্ত্যনুরোধাৎ। যদা তু পূর্ব্বেদ্যুর্ন নিশীথব্যাপ্তিঃ পরদিনে প্রদোষব্যাপিনী তদা পরদিনে প্রদোষব্যাপিনীতি বচনাৎ ॥ * ॥ মুখ্যচান্দ্রফাল্গুনশুক্লদ্বাদশী গোবিন্দদ্বাদশী। ফাল্গুনে শুক্লপক্ষস্য পুষ্যর্ক্ষে দ্বাদশী যদি। গোবিন্দদ্বাদশী নাম মহাপাতকনাশিনী ॥ মহাপাতকনাশ-কামো গঙ্গায়াং স্নানমহং করিষ্যে। অত্র পদ্মপুরাণীয়ো মন্ত্রঃ। মহাপাতক-সংজ্ঞানি যানি পাপানি সন্তি মে। গোবিন্দদ্বাদশীং প্রাপ্য তানি মে হর জাহ্নবি ॥ * ॥ ফাল্গুনপৌর্ণমাস্যাং দোলযাত্রা। তীর্থচিন্তামণৌ ব্রহ্মপুরাণং নরো দোলাগতং দৃষ্ট্বা গোবিন্দং পুরুষো ত্তমং। ফাল্গুন্যাং সংযতো ভূত্বা গোবি ন্দস্য পুরং ব্রজেৎ ॥ স্কন্দপুরাণীয়পুরু-ষোত্তমমাহাত্ম্যে ত্রিংশাধ্যায়ে। ফাল্গুন্যাং ক্রীড়নং কুর্য্যাৎ দোলায়াং মম ভূপতে। ইতি কৃত্যতত্ত্বং ॥

ফাল্গুনানুজঃ (পুং) বসন্তকালঃ। ইতি হারা-বলী ॥ অর্জ্জুনস্য কনিষ্ঠভ্রাতা চ ॥

ফাল্গুনিকঃ (পুং) ফাল্গুনমাসঃ। ইত্যমরঃ ॥

ফাল্গুনী (স্ত্রী) ফাল্গুনমাসস্য পূর্ণিমা। ইতি মেদিনী ॥ পূর্ব্বফল্গুনীনক্ষত্রং। উত্তর-ফল্গুনীনক্ষত্রং। ইত্যমরটীকায়াং ভরতঃ ॥

ফিঃ (পুং) পাপঃ। নিষ্ফলবাক্যং। ইত্যেকা-ক্ষরকোষঃ ॥ কোপঃ। ইতি শব্দরত্নাবলী ॥

ফিঙ্গকঃ (পুং) পক্ষিবিশেষঃ। ফিঙ্গা ইতি ভাষা। তৎপর্য্যায়ঃ। কুলিঙ্গঃ২ কলিঙ্গঃ৩ ধূম্যাটঃ ৪। ইতি শব্দমালা ॥ ভৃঙ্গঃ ৫ ইত্যমরঃ ॥

ফিরঙ্গঃ (পুং) স্বনামখ্যাতম্লেচ্ছদেশঃ। যথা। পূর্ব্বাম্নায়ে নবশতং ষড়শীতিঃ প্রকীর্ত্তিতাঃ। ফিরঙ্গভাষয়া মন্ত্রাস্তেষাং সংসাধনাদ্ভুবি ॥ অধিপা মণ্ডলানাঞ্চ সংগ্রামেষ্বপরাজিতাঃ। ইংরেজা নব ষট্ পঞ্চ লণ্ডুজাশ্চাপি ভাবিনঃ ॥ ইতি মেরুতন্ত্রে ২৩ প্রকাশঃ॥*॥ রোগবিশেষঃ। অথ ফিরঙ্গস্য নিরুক্তি-মাহ। ফিরঙ্গসংজ্ঞকে দেশে বাহুল্যেনৈব যদ্ভবেৎ। তস্মাৎ ফিরঙ্গ ইত্যুক্তো ব্যাধি-র্ব্যাধিবিশারদৈঃ ॥*॥ তস্য বিপ্রকৃষ্টং নিদান-মাহ। গন্ধরোগঃ ফিরঙ্গোঽয়ং জায়তে দেহিনাং ধ্রুবং। ফিরঙ্গিণোঽতিসংসর্গাৎ ফিরঙ্গিণ্যাঃ প্রসঙ্গতঃ ॥ ব্যাধিরাগরুজো হ্যেষ দোষাণামত্র সংক্রমঃ। ভবেত্তা লক্ষয়েত্তেষাং লক্ষণৈর্ভিষজাং বরঃ ॥ ফিরঙ্গিণ্যাঃ প্রসঙ্গত ইতি বিশেষার্থং ॥*॥ রূপমাহ। ফিরঙ্গস্ত্রিবিধো জ্ঞেয়ো বাহ্যা-ভ্যন্তরতস্তথা। বহিরন্তর্ভবশ্চাপি তেষাং লিঙ্গানি চ ব্রুবে ॥ তত্র বাহ্যঃ ফিরঙ্গঃ স্যাদ্বিস্ফোটসদৃশোঽল্পরুক্। স্ফুটিতো ব্রণবদ্বেদ্যঃ সুখসাধ্যোঽপি স স্মৃতঃ ॥ সন্ধেশ্চাভ্যন্তরঃ স স্যাদুভয়োর্লক্ষণৈর্যুতঃ। কষ্টদোঽতিচিরস্থায়ী কষ্টসাধ্যতমশ্চ সঃ॥ উপদ্রবান্ আহ। কার্শ্যং বলক্ষয়ো নাসাভঙ্গো বহ্নেশ্চ মন্দতা। অস্থিশোষো-ঽস্থিবক্রত্বং ফিরঙ্গোপদ্রবা অমী ॥ * ॥ সাধ্যত্বাদিকমাহ। বহির্ভবো ভবেৎ সাধ্যো নূতনো নিরুপদ্রবঃ। আভ্যন্তরস্তু কষ্টেন

সাধ্যঃ স্যাদয়মাময়ঃ ॥ বহিরন্তর্ভবো জীর্ণঃ ক্ষীণস্যোপদ্রবৈর্যতঃ। বোধ্যো ব্যাধিরসাধ্যোঽয়মিত্থং চূর্ম্মুনয়ঃ পুরা ॥ * ॥ অথ ফিরঙ্গস্য চিকিৎসা। ফিরঙ্গসংজ্ঞকং রোগং রসঃ কর্পূরসংজ্ঞকঃ। অবশ্যং নাশয়েদেতদূচুঃ পূর্ব্বে চিকিৎসকাঃ ॥ লিখ্যতে রসকর্পূরপ্রাশনে বিধিরুত্তমঃ। অনেন বিধিনা খাদন্মুখে শোথং ন বিন্দতি ॥ গোধূমচূর্ণং সংনীয় বিদধ্যাৎ সূক্ষ্মকূপিকাং। তন্মধ্যে নিঃক্ষিপেৎ সূতং চতুর্গুঞ্জামিতং ভিষক্ ॥ ততস্তু গুটিকাং কুর্য্যাদ্যথা ন স্যাদ্রসো বহিঃ। সূক্ষ্মচূর্ণং লবঙ্গস্য তাং বটীমবধূলয়েৎ ॥ দন্তস্পর্শো যথা ন স্যাত্তথা তামম্ভসা গিলেৎ। তাম্বূলং ভক্ষয়েৎ পশ্চাচ্ছাকাম্ললবণাংস্ত্যজেৎ। শ্রমমাতপমধ্বানং বিশেষাৎ স্ত্রীনিষেবণং ॥ কর্পূররসঃ ॥ ১ ॥ পারদষ্টঙ্কমানঃ স্যাৎ খদিরষ্টঙ্কসংমিতঃ। আকারকরভশ্চাপি গ্রাহ্যষ্টঙ্কদ্বয়োন্মিতঃ ॥ টঙ্কত্রয়মিতং ক্ষৌদ্রং খল্লে সর্ব্বং বিনিঃক্ষিপেৎ। সংমর্দ্য তস্য সর্ব্বস্য কুর্য্যাৎ সপ্ত বটীর্ভিষক্ ॥ স রোগী ভক্ষয়েৎ প্রাতরেকৈকামম্বুনা বটীং। বর্জয়েদম্ললবণৌ ফিরঙ্গস্তস্য নশ্যতি ॥ সপ্তশাণিকাবটী ॥ ২ ॥ পারদঃ কর্ষমাত্রঃ স্যাত্তাবদেব হি গন্ধকঃ। তণ্ডুলা অক্ষমাত্রাঃ স্যুস্তেষাং কুর্য্যাচ্চ কজ্জলীং ॥ তস্যাঃ সপ্ত বটীঃ কুর্য্যাত্তাভির্দ্ধূমং প্রযোজয়েৎ। দিনানি সপ্ত তেন স্যাৎ ফিরঙ্গান্তো ন সংশয়ঃ ধূমপ্রয়োগঃ ॥ ৩ ॥ পীতপুষ্পবলাপত্ররসৈ টঙ্কমিতং রসং। হস্তাভ্যাং মর্দ্দয়েত্তাবৎ যাবৎ সূতো ন দৃশ্যতে ॥ ততঃ সংস্বেদয়েদ্ধস্তাদেবং বাসরসপ্তকং। ত্যজেল্লবণমম্লঞ্চ ফিরঙ্গস্তেন নশ্যতি ॥ ৪ ॥ চূর্ণয়েন্নিম্বপত্রাণি পথ্যাং নিম্বাষ্টমাংসিকাং। ধাত্রীঞ্চ তাবতীং রাত্রিং নিম্বষোড়শভাগিকাং ॥ শাণমানমিদং চূর্ণমশ্নীয়াদম্ভসা সহ। ফিরঙ্গং নাশয়ত্যেব বাহ্যমাভ্যন্তরং তথা ॥ ৫ ॥ চোপচীনীভবং চূর্ণং শাণমানং সমাক্ষিকং। ফিরঙ্গব্যাধিনাশায় ভক্ষয়েল্লবণং ত্যজেৎ ॥ লবণং যদি বা ত্যক্তুং ন শক্নোতি তদা জনঃ। সৈন্ধবং স হি ভুঞ্জীত মধুরোপরসং হিতং ॥ ৬ ॥ অর্দ্ধকর্ষমিতং সূতং কুরণ্টকরসৈঃ সহ। খল্লে বিমর্দ্দয়েত্তত্র পলার্দ্ধং গুগ্‌গুলুং ক্ষিপেৎ ॥ তত্রার্ককরভং কুষ্ঠং ত্রিফলাঞ্চ পৃথক্ পৃথক্। অর্দ্ধকর্ষমিতং সর্ব্বং চূর্ণয়িত্বা তু নিঃক্ষিপেৎ ॥ তৎ সর্ব্বং মধুসর্পির্ভ্যাং দ্বিপলাভ্যাং পৃথক্ পৃথক্। মর্দ্দয়েদথ তৎ খাদেদর্দ্ধকর্ষমিতং রসং ॥ ব্রণঃ ফিরঙ্গরোগোত্থস্তস্যাবশ্যং বিনশ্যতি। অল্লোঽপি চিরজাতোঽপি প্রশাম্যতি মহাব্রণঃ ॥ এতদ্ভক্ষয়তঃ শোথো মুখস্য চ ন জায়তে। বর্জয়েদত্র লবণমেকবিংশতিবাসরান্ ॥৭॥ ইতি ফিরঙ্গাধিকারঃ। ইতি ভাবপ্রকাশঃ ॥

ঙ্গরোটী (স্ত্রী) রোটিকাবিশেষঃ। পাঙ্রোটী ইতি পাঁউরুটি ইতি চ ভাষা। সা তু তালস্যাথবা খর্জ্জুরস্য রসেন মধুরিকাজলেন বা মিশ্রিতাং গোধূমকণিকামধিক-

কালমুক্তমং সংমর্দ্দ্য গোলাকারং স্থূলং স্থূলং নির্ম্মায় তন্দূরপাকেন নিষ্পাদিতা ভবতি। ইতি পাকরাজেশ্বরঃ ॥

ফিরঙ্গিণী (স্ত্রী) ফিরঙ্গদেশোদ্ভবনারী। যথা। গন্ধরোগঃ ফিরঙ্গোঽয়ং জায়তে দেহিনাং ধ্রুবং। ফিরঙ্গিণোঽতিসংসর্গাৎ ফিরঙ্গিণ্যাঃ প্রসঙ্গতঃ ॥ ইতি ভাবপ্রকাশঃ ॥

ফিরঙ্গী [ন্] (পুং) ফিরঙ্গদেশোদ্ভবপুরুষঃ। অস্য প্রমাণং পূর্ব্বশব্দে দ্রষ্টব্যং ॥

ফুঃ (পুং) মন্ত্রকং। তুচ্ছবাক্যং। ইতি বিশ্বঃ॥

ফুৎ ব্য অনুকরণশব্দঃ। ইতি ফুৎকারশব্দদর্শনাৎ। তুচ্ছভাষণং। ইতি কেচিৎ ॥

ফুকঃ (পুং) পক্ষী। ইতি শব্দচন্দ্রিকা ॥

ফুটঃ (ত্রি) সর্পফণা। ইতি হেমচন্দ্রঃ ॥

ফুৎকরঃ (পুং) অগ্নিঃ। ইতি শব্দচন্দ্রিকা ॥

ফুৎকারঃ (পুং) ফুৎকরণং। ফু ইতি ফুঁক্ ইতি চ ভাষা। ফুৎকারবতি পাবকে আহুতিনিষেধো যথা। অল্পে রূক্ষে সস্ফুলিঙ্গে বামাবর্ত্তে ভয়ানকে। আর্দ্রকাষ্ঠৈঃ সমুৎপন্নে ফুৎকারবতি পাবকে ॥ কৃষ্ণার্চ্চিষি সুদুর্গন্ধে তথা লিহতি মেদিনী। আহুতিং জুহুয়াদ্যস্তু তস্য নাশো ভবেদ্ধ্রুবং ॥ ইতি তিথ্যাদিতত্ত্বং ॥

ফুৎকৃতিঃ (স্ত্রী) ফুৎকারঃ। যথা। স্ফূর্জ্জৎফুৎকৃতি[illegible]ভীতসম্ভ্রমচমৎকারস্ফুরৎসম্ভ্রমা ইতি কাব্যচন্দ্রিকা ॥

ফুপ্‌ফুসঃ (পুং) পুপ্‌ফুসঃ। কোষ্ঠবিশেষঃ স চ [illegible]নাড়িকাসংলগ্নাশয়বিশেষঃ ফ্যাপ্‌ড়া [illegible] । কাপাসে ইতি [illegible]লোকে ইতি সু[illegible] যথা। স্থানান্যামাগ্নিপক্বানাং মূত্রস্য রুধিরস্য চ। হৃদুণ্ডুকঃ ফুপ্‌ফুসশ্চ কোষ্ঠ ইত্যভিধীয়তে ॥ ইতি মাধবকরঃ ॥ অস্য ব্যাখ্যা। আমস্য স্থানং আমাশয়ঃ। নাভেরূর্দ্ধং। অগ্নেঃ স্থানং পচ্যমানাশয়ঃ নাভিমধ্যং। পক্বস্য স্থানং পক্বাশয়ঃ নাভেরধঃ। মূত্রস্য স্থানং বস্তিঃ। রুধিরস্য স্থানং যকৃৎপ্লীহানৌ। হৃৎ হৃদয়ং ইক্ষুরসপাকমলবদ্যঃ শোণিতমলস্তজ্জঃ উণ্ডুকঃ স চান্ত্রদেশে ব্যবস্থিতঃ পুরীষাধানং। ফুপ্‌ফুসঃ হৃদয়স্য বামপার্শ্বে ফুপ্‌ফুণ্ড ইতি খ্যাতঃ। ইতি বিজয়রক্ষিতঃ ॥

ফুল্‌তিঃ (স্ত্রী) ফলনং। ইতি মুগ্ধবোধব্যাকরণং॥

ফুল্ল বিকাসে। ইতি কবিকল্পদ্রুমঃ ॥ হ্রস্বী। লদ্বয়ান্তঃ। বিকাস ইহ কস জ গতাবিতি দন্ত্যান্তস্য ঘঞি রূপং। বিপূর্ব্বত্বেনার্থান্তরবাচিতয়া বিকসনমিত্যর্থঃ। ফুল্লতি মল্লীকলিকা। ইতি দুর্গাদাসঃ ॥

ফুল্লঃ (ত্রি) বিকসিতঃ। ইত্যমরঃ ॥ পুষ্পং। ফুল ইতি ভাষা। যথা। শ্রীপঞ্চম্যাং শ্রিয়ং দেবীং ফুল্লৈঃ সংপূজয়েৎ সদা। ইতি কালিকাপুরাণং ॥ [শেষঃ ॥

ফুল্লফালঃ (পুং) শূর্পবাতঃ। ইতি ত্রিকাণ্ড-

ফুল্লদাম (ক্লী) ছন্দোভেদঃ। যথা। মো গৌ নৌ তৌ গৌ শরহয়তুরগৈঃ ফুল্লদাম প্রসিদ্ধং। উদাহরণং যথা। শশ্বল্লোকানাং প্রকটিতকথনং ধ্বস্তমালোক্য কংসং হৃষ্যচ্চেতোভিস্ত্রিদিববসতিভির্ব্যোমসংস্থৈর্বিমুক্তং। মুগ্ধামোদেন স্থগিতদশদিশাভোগমাহূতভৃঙ্গং মৌলৌ দৈত্যারের্ন্যপতদনুপমং স্বস্তরোঃ ফুল্লদাম ॥ ইতি ছন্দোমঞ্জরী ॥

ফুল্ললোচনঃ (পুং) মৃগবিশেষঃ। ইতি শব্দচন্দ্রিকা ॥ প্রফুল্লনেত্রযুক্তে ত্রি ॥

রীকঃ (পুং) দেশঃ। সর্পঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ ॥

ফুল্লিঃ (স্ত্রী) বিকাশঃ। ইঙ্ধাতুকথনে তিঙ্বত্তিঙ্ বা ইতি সংক্ষিপ্তসারসূত্রাৎ ভাবে ইঙ্প্রত্যয়েন নিষ্পন্নঃ ॥

ফেণঃ (পুং) ফেনঃ। তরলদ্রব্যোপর্য্যুত্থিতবুদ্বুদাকারবস্তু। ফেনা ইতি ভাষা। যথা। পয়ঃফেণনিভা শয্যা দান্তা রুক্মপরিচ্ছদা। ইতি পুরাণং ॥ হিণ্ডীরঃ। সমুদ্রফেনা ইতি ভাষা। ইত্যমরঃ ॥ অস্য মূর্দ্ধন্যণান্তস্য প্রমাণং যথা। হংসশ্রেণ্যো নদীতীরে নিনদৈঃ সংপ্রতীয়িরে। যথা সারস্বতা মন্ত্রা অন্তরে ফেণসঙ্গতা ॥ ইত্যমরটীকায়াং রঘুনাথচক্রবর্ত্তী ॥

ফেণপঃ (পুং) স্বয়ংপতিতফলাদিজীবিমুনিবিশেষঃ। যথা। বৈখানসা বালিখিল্যৌডুম্বরাঃ ফেণপা বনে। ন্যাসে কুটীচকঃ পূর্ব্বং বহ্বোদো হংসনিষ্ক্রিয়ৌ ॥ ইতি শ্রীভাগবতে ৩ স্কন্ধে ১২ অধ্যায়ঃ ॥ * ॥ বনে স্থিতাশ্চত্বারঃ। তত্র বৈখানসাঃ অকৃষ্টপচ্যবৃত্তয়ঃ। বালিখিল্যাঃ নবেহন্নে লব্ধে পূর্ব্বসঞ্চিতান্নত্যাগিনঃ। ঔডুম্বরাঃ প্রাতরুত্থায় যাং দিশং প্রথমং পশ্যন্তি তত আহৃতৈঃ ফলাদিভির্জ্জীবন্তঃ। ফেণপাঃ স্বয়ং পতিতৈঃ ফলাদিভির্জ্জীবন্তঃ। কুটীচকঃ স্বাশ্রমধর্ম্মপ্রধানঃ বহ্বোদঃ কর্ম্মোপসর্জ্জনীকৃত্য জ্ঞানাভ্যাসপ্রধানঃ। হংসো জ্ঞানাভ্যাসনিষ্ঠ নিষ্ক্রিয়ঃ প্রাপ্ততত্ত্বঃ। এতে চ সর্ব্বে যথোত্তরং শ্রেষ্ঠাঃ। ইতি তট্টীকায়াং শ্রীধরস্বামী ॥

ফেণায়মানঃ (ত্রি) উত্থিতফেণদুগ্ধাদিঃ। ফেণ ইব আচরতি যঃ ইত্যর্থে ফেণশব্দাৎ ঙ্যপ্রত্যয়ানন্তরং শানপ্রত্যয়েন নিষ্পন্নঃ ॥

ফেণী (স্ত্রী) স্বনামখ্যাতমিষ্টান্নবিশেষঃ। যথা বটৌ বেশবারাল্লবঙ্গেন ফেণীসমং পর্পটঃ শিগ্রুবীজেন যাতি। ইতি জীর্ণমঞ্জরী ॥

ফেৎকারিণী (স্ত্রী) তন্ত্রবিশেষঃ। যথা। উন্মত্তভৈরবং নারসিংহং ডামরভৈরবং। শিবাকারং মলিন্যাদ্যমসিতাঙ্গাদি যামলং ॥ সিদ্ধযোগেশ্বরং তন্ত্রং যোগিনীজালসম্বরং। দৃষ্ট্বা কৃত্বা বিধিং ফেৎকারিণীতন্ত্রং বিরচ্যতে ॥ ইতি প্রথমশ্লোকদ্বয়ং ॥ ফেৎকারিণীতন্ত্র ইয়ং ময়োক্তা কৃত্যা সমস্তাগমসারভূতা। শত্রোর্বিনাশায় ধনায় ধর্ম্মমোক্ষায় সম্যক্ প্রযতো নিযোজ্যা ॥ ইতি ফেৎকারিণীতন্ত্রস্য শেষশ্লোকঃ ॥

ফেৎকারীয়ঃ (পুং) তন্ত্রবিশেষঃ। তন্ত্রসারাদিসংগ্রহে ফেৎকারীয়ে ইতি শাসনং লিখিতং ॥

ফেনঃ (পুং) ফেণঃ। ফেনা ইতি ভাষা। তৎপর্য্যায়ঃ। হিণ্ডীরঃ ২ অব্ধিকফঃ ৩। ইত্যমরঃ ॥ হিণ্ডিরঃ ৪। ইতি শব্দরত্নাবলী ॥ সমুদ্রকফঃ ৫ জলহাসঃ ৬ ফেনকঃ ৭। ইতি ত্রিকাণ্ডশেষঃ ॥ স্ফায়তে ফেনঃ স্ফায়ী ও বৃদ্ধৌ নাম্নীতি ডেনঃ নিপাতনাৎ সলুক্ দন্ত্যনান্তঃ। ইত্যমরটীকায়াং ভরতঃ ॥ অস্য দন্ত্যনান্তস্য প্রমাণান্তরং

যথা। বানীরং গগনং ফেনমূনঞ্চ দন্ত্যনান্বিতং। আহুর্গগনমিচ্ছন্তি কেচিন্মূর্দ্ধন্যণান্বিতং ॥ ইতি ভরতসেনবিরচিতং সুখলেখনং ॥

ফেনকঃ (পুং) ফেনঃ। ইতি ত্রিকাণ্ডশেষঃ॥ পিষ্টকবিশেষঃ। অস্য গুণাঃ। লঘুত্বং। রূক্ষত্বং। শুক্রকারিত্বং। পিত্তবায়ুনাশিত্বঞ্চ। ইতি রাজবল্লভঃ॥

ফেনকা (স্ত্রী) জলপক্কতণ্ডুলচূর্ণং। ইতি শব্দচন্দ্রিকা॥

ফেনদুগ্ধা (স্ত্রী) দুগ্ধফেনীক্ষুপঃ। ইতি রাজনির্ঘণ্টঃ॥

ফেনলঃ (ত্রি) ফেনবান্। ইতি সিদ্ধান্তকৌমুদী॥

ফেনবান্ [ৎ] (ত্রি) ফেনিলঃ। ইতি সিদ্ধান্তকৌমুদী॥

ফেনবাহী [ন্] (পুং) বজ্রং। ইতি শব্দমালা॥

ফেনা (স্ত্রী) সাতলাক্ষুপঃ। ইতি রাজনির্ঘণ্টঃ॥

ফেনাগ্রং (ক্লী) বুদ্বুদং। ইতি হারাবলী॥

ফেনাশনিঃ (পুং) ইন্দ্রঃ। ইতি শব্দমালা॥

ফেনিকা (স্ত্রী) পক্কান্নবিশেষঃ। খাজা ইতি ভাষা। যথা। সমিতায়া ঘৃতাদ্যায়া বর্ত্তী দীর্ঘাঃ সমাচরেৎ। তাস্তু সন্নিহিতা দীর্ঘাঃ পীঠস্যোপরি ধারয়েৎ॥ বেল্লয়েদ্বেল্লনেনৈতা যথৈকা পর্পটী ভবেৎ। ততশ্ছুরিকয়া তাস্তু সংলগ্নামেব কর্ত্তয়েৎ॥ ততস্তু বেল্লয়েদ্ভূয়ঃ সট্টকেন চ লেপয়েৎ। শালিচূর্ণং ঘৃতং তোয়ং মিশ্রিতং সট্টকং ভুবেৎ॥ ততঃ সংবৃত্য তাং লোপ্ত্রীং বিদধীত পৃথক্ পৃথক্। পুনস্তাং বেল্লয়েৎ লোপ্ত্রীং যথা স্যান্মণ্ডলাকৃতিঃ॥ ততস্তাং সুপচেদাজ্যে ভবেয়ুশ্চ পুটাঃ স্ফুটাঃ। সুগন্ধয়া শর্করয়া তদুদ্ধূলনমাচরেৎ॥ সিদ্ধৈষা ফেনিকানাম্নী মণ্ডকেন সমা গুণৈঃ। ততঃ কিঞ্চিল্লঘুরিয়ং বিশেষোঽয়মুদাহৃতঃ॥ ইতি ভাবপ্রকাশঃ॥

ফেনিলং (ক্লী) কোলিফলং। মদন.... সফেনে ত্রি। ইতি মেদিনী॥

ফেনিলঃ (পুং) অরিষ্টবৃক্ষঃ। হারিঠা ইতি খ্যাতঃ। ইত্যমরঃ॥ বদরবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

ফেরঃ (পুং) শৃগালঃ। ইতি শব্দরত্নাবলী॥

ফেরণ্ডঃ (পুং) শৃগালঃ। ইতি হেমচন্দ্রঃ॥

ফেরবঃ (পুং) শৃগালঃ। ইত্যমরঃ॥ রাক্ষসঃ। ইতি মেদিনী॥ ধূর্ত্তে হিংস্রে চ ত্রি। ইতি শব্দরত্নাবলী॥

ফেরুঃ (পুং) শৃগালঃ। ইত্যমরঃ॥

ফেল ঋ গতৌ। ইতি কবিকল্পদ্রুমঃ॥ ঋ অপিফেলৎ পিফেলতুঃ। ইতি দুর্গাদাসঃ॥

ফেলং (ক্লী) ভুক্তসমুজ্ঝিতং। উচ্ছিষ্টং। ইতি শব্দরত্নাবলী॥

ফেলকঃ (পুং) ভুক্তসমুজ্ঝিতং। ইতি জটাধরঃ॥

ফেলা (স্ত্রী) ভুক্তসমুজ্ঝিতং। ইত্যমরঃ॥

ফেলিঃ (স্ত্রী) উচ্ছিষ্টং। ইতি জটাধরঃ॥

ফেলিকা (স্ত্রী) উচ্ছিষ্টং। ফেলাশব্দাৎ স্বার্থে ষ্কিকপ্রত্যয়েন নিষ্পন্না॥

ফেলী (স্ত্রী) ভুক্তসমুজ্ঝিতং। ইতি শব্দরত্নাবলী॥